
Parts 3 & 4

(Vana & Virāṭa)

॥ अथश्रीमहाभारते सटीकं वनपर्व प्रारभ्यते ॥



॥ श्रीगणेशायनमः ॥ योदवोमुनिनिचय क्षुधाक्षुधावान्नयत्तृप्यामुनिनिवहोऽपितृप्तिमाप ॥ तस्यैवंनिजजगदंतरात्मभावंठयाकर्तुःपदमुपयामगोपसूनोः ॥ १ ॥ यज्जिज्ञासालभ्यतेयज्ञमुख्यैर्यंत्रेकाम्यं प्राथ्यतेसंयमाद्यैः ॥ तंसेवेऽहंसद्गुरुं लक्ष्मणार्यब्रह्मब्रह्मज्ञानिवंशावतंसम् ॥ २॥ प्रणम्यनारायणतीर्थवर्यान्धीरेशमिश्रांश्वहमीरपुर्यान् ॥ कुर्मोगुरूणांछदपानुरूपमारण्यकेपर्वणिभावदीपं ॥ ३॥ तत्र पूर्वस्मिन्पर्वणिद्रौपदीत्राणेनभक्तेर्माहात्म्यंदर्शितं साचप्रतिज्ञापालनसत्समागमतीर्थाटनस्वधर्माचरणादिनालभ्यतइतितत्तदाख्यायिकामुखेनेहप्रतिपाद्य द्रौपदीदत्तशाकलेशाशनेनकृष्णेन तृप्तेसतिदौर्वाससोपाख्यानेनभगवतोजगदंतरात्मत्वंदर्शितं धर्मयुधिष्ठिरसंवादेनभगवत्तत्त्वमधिगमोपायसहितंचसंक्षेपेणोक्तं एवंद्यूतजिताःपार्थाइत्यादिनामंत्रायसमुपाविशन्नित्यंतेनग्रंथेन तत्रप्रथमेऽध्यायेसदसत्संगयोर्गुणदोषौ । द्वितीयेशौनकयुधिष्ठिरसंवादेन काम्यधर्मनिंदायोगप्रशंसाचदर्शिता। एवमिति । पार्थाइतिच्छत्रिन्यायेन माद्रीसुतयोरप्युपलक्षणं दुरात्मभिर्दुष्टचित्तैः सहा

॥ श्रीवेदव्यासायनमः ॥ ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींचैवततोजयमुदीरयेत् १ ॥ जनमेजयउवाच ॥ एवंद्यूतजिताःपार्थाः
कोपिताश्चदुरात्मभिः ॥ धार्त्तराष्ट्रैःसहामात्यैर्निकृत्याद्द्विजसत्तम १ श्राविताःपरुषावाचःसृजद्भिर्वैरमुत्तमम् ॥ किमकुर्वतकौरव्याममपूर्वपितामहाः २ कथंचै
श्वर्यविभ्रष्टाःसहसादुःखमेयुषः ॥ वनेविजह्रिरेपार्थाःशक्रप्रतिमतेजसः ३ केवैतानन्ववर्तंतप्राप्तान्व्यसनमुत्तमम् ॥ किमाचाराःकिमाहाराःक्वचवासोमहात्मना
म् ४ कथंचद्वादशसमावनेतेषांमहामुने ॥ व्यतीयुर्ब्राह्मणश्रेष्ठशूराणामरिघातिनाम् ५ कथंचराजपुत्रीसाप्रवरासर्वयोषिताम् ॥ पतिव्रतामहाभागासततंसत्य
वादिनी ६ वनवासमदुःखार्हादारुणंप्रत्यपद्यत ॥ एतदाचक्ष्वमेसर्वंविस्तरेणतपोधन ७ श्रोतुमिच्छामिचरितंभूरिद्रविणतेजसाम् ॥ कथ्यमानंत्वयाविप्रप
रंकौतूहलंहिमे ८ ॥ वैशंपायनउवाच ॥ एवंद्यूतजिताःपार्थाःकोपिताश्चदुरात्मभिः ॥ धार्त्तराष्ट्रैःसहामात्यैर्निर्ययुर्गजसाह्वयात् ९ वर्द्धमानपुरद्वारादभिनि
ष्क्रम्यपांडवाः ॥ उदङ्मुखाःशस्त्रभृतःप्रययुःसहकृष्णया १० इंद्रसेनादयश्चैवभृत्याःपरिचतुर्दश ॥ रथैरनुययुःशीघ्रैःस्त्रियआदायसर्वशः ११ गतानेतान्वि
दित्वातुपौराःशोकाभिपीडिताः ॥ गर्हयंतोऽसकृद्भीष्मविदुरद्रोणगौतमान् ॥ ऊचुर्विगतसंत्रासाःसमागम्यपरस्परम् १२ ॥ पौराऊचुः ॥ नेदमस्तिकुलंसर्वंनव
यंनचनोगृहाः १३ यत्रदुर्योधनःपापःसौबलेयेनपालितः ॥ कर्णदुःशासनाभ्यांचराज्यमेतच्चिकीर्षति १४ नतत्कुलंनचाचारोनधर्मोऽर्थःकुतःसुखम् ॥ यत्र
पापसहायोऽयंपापोराज्यंचिकीर्षति १५ दुर्योधनोगुरुद्वेषीत्यक्ताचारसुहृज्जनः ॥ अर्थलुब्धोऽभिमानीचनीचःप्रकृतिनिर्घृणः १६ नेयमस्तिमहीकृत्स्नायत्र
दुर्योधनोनृपः ॥ साधुगच्छामहेसर्वेयत्रगच्छंतिपांडवाः १७ सानुक्रोशामहात्मानोविजितेंद्रियशत्रवः ॥ ह्रीमंतःकीर्तिमंतश्चधर्माचारपरायणाः १८

मात्यैःकर्णादिभिः निकृत्याछलेन १ पूर्वःपितापरीक्षित् तस्यपितामहाः २ एयुषःप्राप्तवंतः ३ उत्तमंतीव्रम् ४ । ५ । ६ । ७ द्रविणंपराक्रमस्तेजोदेहकांतिश्च तेउभेपुष्कलेयेषांतेभूरिद्रविण तेजसः'द्रविणंचपराक्रमे'इतिविश्वः ८ गजसाह्वयात्हस्तिनापुरात् ९ वर्द्धमानपुरंनाम ग्रामविशेषस्तदभिमुखंद्वारंतस्मात् वृधुर्हिंसायांवर्द्धमानाहिंसकास्तेषांपुरं कुत्सितमार्गेणनिःसारिताइत्यन्ये १० परिचतुर्दशअधिकचतुर्दशाः पंचदशेत्यर्थः । संख्ययाव्ययासन्नेतिसमासः समासांतविधेरनित्यत्वाद्बहुव्रीहौ संख्येयेइतिप्राप्तस्यडच्प्रत्ययस्याभावः ११ । १२ । १३ । १४ । १५ प्रकृतिनिर्घृणःस्वभावानिर्दयः १६ । १७ सानुक्रोशाःसदयाः महात्मानउदारचित्ताः । विजिताइंद्रियाणिचशत्रवश्चयैस्तेविजितेंद्रियशत्रवः । ह्रीरकार्यान्निवर्तिकाचित्तवृत्तिः । धर्मो यमनियमादिस्तस्यआचरणमाचारोधर्माचारः १८

कौंतेयत्वंमाद्रेयत्वंचच्छत्रिन्यायेनेप्रत्येकंपंचस्वपिपर्यवसितं माद्रीतिन्हस्वत्वमार्षम् १९ । २० । २१ भक्तानाराधनापरान् । अनुरक्तान्प्रीतिमतः । सुहृदोवेतनाद्युपकारमनपेक्ष्योपकारकान् । प्रियान्प्रीतिविषयान् । हितेरतानभ्युदयसाधनपरान्हितेरतानित्यलुक्समासः प्रियाश्चतेहितेरताश्चेतिविग्रहः नविनश्येमविनाशंनप्रार्थयामहे । प्रार्थनायांलिङ् नेतिवितर्के । विनश्यंमेतितर्के यामहइतिप्राञ्चः २२ । २३ आपःअपः २४ । २५।२६ अवदातानिशुद्धानि विद्यावैदिकीनतुकौलिक्यादिः । कर्मवेदार्थानुष्ठानं । योनिःपूर्वप्रज्ञा श्येनयागादेर्हिंसासाधनस्यवेदार्थत्वेपिनावदा तत्वमस्त्यतो जन्मांतरीयसंस्कारोपि शुद्धएवापेक्षितः। 'तंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाच' इतिश्रुतेरत्रयोनिशब्देनमुख्यंप्रवृत्तिकारणंपूर्वप्रज्ञैवग्राह्यं अन्येतुयोनिशब्देनापितृमातृशुद्धिमाहुः समास्यासंगतिः । संपूर्वस्यास्गतावित्यस्यरूपं अपिशब्दाच्छास्त्रमपिसम्यक्ज्ञानहेतुतयागुरुसत्संगस्तुततोऽपिगरीयान् । नगाथागाथिनंशास्तीतिकेवलशास्त्रस्यप्रागेवाकिंचित्करत्वोक्तेः २७

॥ वैशंपायनउवाच ॥ एवमुक्त्वाऽनुजग्मुस्तेपांडवांस्तान्समेत्यच ॥ ऊचुःप्रांजलयःसर्वेकौंतेयान्माद्रिनंदनान् १९ क्वगमिष्यथभद्रंवस्त्यक्त्वाऽस्मान्दुःख भागिनः ॥ वयमप्यनुयास्यामोयत्रयूयंगमिष्यथ २० अधर्मेणजितान्श्रुत्वायुष्मांस्त्यक्तघृणैःपरैः ॥ उद्विग्नाःस्मोभृशंसर्वेनास्मान्हातुमिहार्हथ २१ भक्ता नुरक्तान्सुहृदःसदाप्रियहितेरतान् ॥ कुराजाधिष्ठितेराज्येनविनश्येमसर्वशः २२ श्रूयतांचाभिधास्यामोगुणदोषान्नरर्षभाः ॥ शुभाशुभाधिवासेनसंसर्गःकुरुते यथा २३ वस्त्रमापस्तिलान्भूमिंगंधोवासयतेयथा ॥ पुष्पाणामधिवासेनतथासंसर्गजागुणाः २४ मोहजालस्ययोनिर्हिमूढैरेवसमागमः ॥ अहन्यहनिधर्मस्य योनिःसाधुसमागमः २५ तस्मात्प्राज्ञैश्चवृद्धैश्चसुस्वभावैस्तपस्विभिः ॥ सद्भिश्चसहसंसर्गःकार्यःशमपरायणैः २६ येषांत्रीण्यवदातानिविद्यायोनिश्चकर्मच ॥ तान्सेवेत्तैःसमास्याहिशास्त्रेभ्योऽपिगरीयसी २७ निरारंभाह्यपिवयंपुण्यशीलेषुसाधुषु ॥ पुण्यमेवाप्नुयामेहपापंपापोपसेवनात् २८ असतांदर्शनात्स्पर्शात्सं जल्पाच्चसहासनात् ॥ धर्माचाराःप्रहीयंतेसिद्ध्यंतिचनमानवाः २९ बुद्धिश्चहीयतेपुंसांनीचैःसहसमागमात् ॥ मध्यमैर्मध्यतांयातिश्रेष्ठतांयातिचोत्तमैः ३० अनीचैर्नाप्यविषयैर्नाधर्मिष्ठैर्विशेषतः ॥ येगुणाःकीर्तितालोकेधर्मकामार्थसंभवाः ॥ लोकाचारेषुसंभूतावेदोक्ताःशिष्टसंमताः ३१ तेयुष्मासुसमस्ताश्चव्य स्ताश्चैवेहसद्गुणाः ॥ इच्छामोगुणवन्मध्येवस्तुंश्रेयोभिकांक्षिणः ३२ ॥ युधिष्ठिरउवाच ॥ धन्यावयंयदस्माकंस्नेहकारुण्ययंत्रिताः ॥ असतोऽपिगुणानाहु र्ब्राह्मणप्रमुखाःप्रजाः ३३ तदहंभ्रातृसहितःसर्वान्विज्ञापयामिवः ॥ नान्यथातद्धिकर्तव्यमस्मत्स्नेहानुकंपया ३४ भीष्मःपितामहोराजाविदुरोजननीचमे ॥ सुहृज्जनश्चप्रायोमेनगरेनागसाव्हये ३५ तेत्वस्मद्धितकामार्थंपालनीयाःप्रयत्नतः ॥ युष्माभिःसहिताःसर्वेशोकसंतापविव्हलाः ३६

निरारंभाः अग्निहोत्राद्य कुर्वाणाअपि हिशब्दः । 'एतद्धस्मवैतद्विद्वांसः पूर्वेऽग्निहोत्रं नजुहवांचक्रिरे'इति श्रौतींप्रसिद्धिंद्योतयति तत्संगाल्लब्धात्मविद्यानांकिमग्निहोत्रादिनेतिभावः २८ नसिद्ध्यंतिसिद्धिश्चित्तशुद्धि स्तांनप्राप्नुवंति धर्माचारहीनत्वात् २९।३०आविषयैःअगोचरैरपरिचितैरित्यर्थः धर्मकामार्थसंभवाः धर्मादीनांसंभवउत्पत्तिर्येभ्यस्ते शिष्टानांवेदप्रामाण्यवादिनांसंमताः ३१ समस्ताःएकीभूताः व्यस्ताःपृथक्पृथग्भूताः श्रेयःस्वर्गादपिप्रशस्ततरमात्मसुखम् ३२ एवंपौरवचनैः सत्संगगुणाःअसत्संगदोषाश्च उपादानाय हानायचउक्ताः धन्याइत्यादिनाशत्रोरपि सुखंदेयमितिदर्शयति पौरनिवर्तनप्रसंगेन ३३ स्नेहोवात्सल्यंतत्सहिताअनुकंपादयास्नेहानुकंपातया ३४।३५ शोकसंतापविव्हलाः शोकःइष्टवियोगजंदुःखं तेनसंतापःदेहेंद्रियादिरवसादस्तेनविव्हलाःव्याकुलाः ३६

आगमनेत्यविभक्तिकं अस्माभिःसहआगमनेशापिताः ममशपथंकारिताइत्यर्थः ३७ । ३८। ३९ समागम्यसंपृच्छ्य ४० निवृत्तेषुतुपौरेष्वित्यादिना धिक्पापान्धृतराष्ट्रजानित्यंतेन ग्रंथेन ध र्मात्मानमनिच्छंतमपि बलात्संतोऽनुगृण्हंतीत्युच्यते ४१ ऊषुःवासंचक्रुः ४२ उदकेनैवनत्वन्नेन ऊषुर्निन्युः ४३ साग्नयःदारैःसहिताः अनग्नयस्तदन्येस्नातकब्रह्मचार्यादयः ४४ प्रादुष्कृताःप्रक टीकृताःअग्नयोयैस्ते रम्यत्वं तापविरहात्संध्यारागादिशोभातश्च दारुणोरक्षःपिशाचादिसंचारकालत्वात् ब्रह्मघोषपुरस्कारः उच्चैःश्रुत्युपन्यासपूर्वकःसंजल्पःपरस्परसंवादः ४५ आश्वास यंतः वनवासस्यापिश्रेयस्करत्वोपपादनेनेतिशेषः ४६ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेप्रथमोऽध्यायः ॥ १ ॥ ॥ प्रभातायामरुणोदयेनउद्दीपितायां रजन्याश्चरमभागेइति

निवर्ततागताद्दूरंसमागमनशापिताः ॥ स्वजनेन्यासभूतेमेकार्यास्नेहान्वितामतिः ३७ एतद्धिममकार्याणांपरमंहृदिसंस्थितम् ॥ कृतातेनतुतुष्टिर्मेसत्कारश्चभ विष्यति ३८ ॥ वैशंपायनउवाच ॥ तथाऽनुमंत्रितास्तेनधर्मराजेनताःप्रजाः ॥ चक्रुरार्तस्वरंघोरंहाराजन्निितिसंहताः ३९ गुणान्पार्थस्यसंस्मृत्यदुःखार्ताः परमातुराः ॥ अकामाःसंन्यवर्तंतसमागम्याथपांडवान् ४० निवृत्तेषुतुपौरेषुरथानास्थायपांडवाः ॥ आजग्मुर्जान्हवीतीरेप्रमाणाख्यंमहावटम् ४१ तेतंदिव सशेषेणवटंगत्वातुपांडवाः ॥ ऊषुस्तांरजनींवीराःसंस्पृश्यसलिलंशुचि ४२ उदकेनैवतांरात्रिमूषुस्तेदुःखकर्शिताः ॥ अनुजग्मुश्चतत्रैतान्स्नेहात्केचिद्द्विजा तयः ४३ साग्नयोऽनग्नयश्चैवसशिष्यगणबांधवाः ॥ सतैःपरिवृतोराजाशुशुभेब्रह्मवादिभिः ४४ तेषांप्रादुष्कृताग्नीनांमुहूर्तेरम्यदारुणे ॥ ब्रह्मघोषपुरस्कारःसं जल्पःसमजायत ४५ राजानंतुकुरुश्रेष्ठंतेहंसमधुरस्वराः ॥ आश्वासयंतोविप्राग्र्याःक्षपांसर्वांव्यनोदयन् ४६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअरण्यप र्वणिपौरप्रत्यागमनेप्रथमोऽध्यायः ॥ १ ॥ वैशंपायनउवाच ॥ प्रभातायांतुशर्वर्यांतेषामक्लिष्टकर्मणाम् ॥ वनंयियासतांविप्रास्तस्थुर्भिक्षाभुजोऽग्रतः १ तानु वाचततोराजाकुंतीपुत्रोयुधिष्ठिरः ॥ वयंहिहृतसर्वस्वाहृतराज्याहृतश्रियः २ फलमूलामिषाहारावनंगच्छामदुःखिताः ॥ वनंचदोषबहुलंबहुव्यालसरीसृपं ३ ॥ परिक्लेशश्चवोमन्येध्रुवंतत्रभविष्यति ॥ ब्राह्मणानांपरिक्लेशोदैवतान्यपिसादयेत् ॥ किंपुनर्मामितोविप्रानिवर्तध्वंयथेष्टतः ४ ॥ ब्राह्मणाऊचुः ॥ गति र्याभवतांराजंस्तांवयंगंतुमुद्यताः ॥ नार्हस्यस्मान्परित्यक्तुंभक्तान्सद्धर्मदर्शिनः ५ अनुकंपांहिभक्तेषुदेवताह्यपिकुर्वते ॥ विशेषतोब्राह्मणेषुसदाचारावलंबि षु ६ ॥ युधिष्ठिरउवाच ॥ ममापिपरमाभक्तिर्ब्राह्मणेषुसदाद्विजाः ॥ सहायविपरिभ्रंशस्त्वयंसादयतीवमाम् ७ आहरेयुरिमेयेऽपिफलमूलमृगांस्तथा ॥ तइमे शोकजैर्दुःखैर्भ्रातरोमेविमोहिताः ८ द्रौपद्याविप्रकर्षेणराज्यापहरणेनच ॥ दुःखार्दितानिमान्क्लेशैर्नाहंयोक्तुमिहोत्सहे ९ ॥ ब्राह्मणाऊचुः ॥ अस्मत्पोषणजा चिंतामाभूत्तेहृदिपार्थिव ॥ स्वयमाहृत्यचान्नानित्वाऽनुयास्यामहेवयं १० अनुध्यानेनजप्येनविधास्यामःशिवंतव॥कथाभिश्चाभिरम्याभिःसहरंस्यामहेवयम् ११

यावत् यियासतांयातुंगंतुमिच्छतां भिक्षाभुजःब्राह्मणाः १ धनंराज्यंतदुभयकृताश्रीः ब्राह्मणतर्पणादिरूपाशोभाचास्माकंनष्टेत्याह वयंहीति २ व्यालाःश्वापदाःवृकव्याघ्रादयः 'व्यालोभुजं गमेक्रूरेश्वापदेदुष्टदंतिनि'इतिविश्वः ३ । ४ भक्ताअपिमूढाश्चेत्स्युः किंतर्हितैरित्यतआहुः सद्धर्मदर्शिनइति सतोब्रह्मणोयेधर्माः सत्यकामत्वसत्यसंकल्पत्वादयस्तदनुभविनः ५ । ६ । ७ । ८ ९ । १० अनुध्यानेनइष्टचिंतनेनजप्येन स्वस्त्ययनेनेत्यदृष्टद्वाराउपकारमुक्त्वा दृष्टद्वारापितमाहुः कथाभिरिति ११

प्रत्यादेशंधिक्कारं १२ । १३ एवंब्राह्मणभरणसामर्थ्याभावात्खिन्नंराजानंप्रति शोकमोहनिवर्तकंवचनंशौनकआहेत्याह इत्युक्त्वेति अध्यात्मं आत्मानंशारीरमधिकृत्यप्रवृत्तंशास्त्रमध्या त्मंवेदांतस्तत्ररतः १४ योगश्चित्तवृत्तिनिरोधः सांख्यंप्रकृतिपुरुषविवेकस्तयोर्निष्णातः १५ शोकेस्थीयतेऽनेनेतिव्युत्पत्त्यास्थानशब्दोहेतुवचनः शोकोमनस्तापःभयंमरणात्त्रासः तयोर्हेत वइष्टवियोगानिष्टसंयोगादयस्तेषांसहस्रादीनि १६ ननुधर्मसामर्थ्याभावादेवममशोकभयेनतुराज्यच्युतिवनवासकृते इत्याशंक्याह नहीति प्रवृत्तिरूपोयज्ञदानादिधर्मोज्ञानविरोधी ज्ञाने हि । 'यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत्'इतिद्वैतोपमर्दः श्रूयते । कर्माणितु द्वैतोपजीवनान्यतस्तयोर्विरोधःप्रसिद्धइतिहिशब्दोद्योतयति पशुबीजवधादिसाध्यत्वाद्दोषबहुलश्चातएव श्रेयोघातीमोक्षविरोधी तत्रनसज्जंते नात्यंतमभिनिवेशिनोभवंति १७ एवंकर्मनिष्ठांनिंदित्वा योगनिष्ठांग्राहयतिअष्टांगामिति यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो ऽष्टावंगानीति योगसूत्रोक्तानि संकल्पसंबाधादीनिवा वक्ष्यमाणान्यष्टावंगानियस्याःसाबुद्धिस्तत्त्वमस्यादिवाक्यजाप्रज्ञा पांसर्वकृत्स्नमश्रेयोमूलाज्ञानंतदभिघातिनीं श्रुतिस्मृतिभ्यांसमा

॥ युधिष्ठिरउवाच ॥ एवमेतन्नसंदेहोरमेऽहंसततंद्विजैः ॥ न्यूनभावात्तुपश्यामिप्रत्यादेशमिवात्मनः १२ कथंद्रक्ष्यामिवःसर्वान्स्वयमाहृत्यभोजिनः ॥ मद्भक्त्याक्लि श्यतोऽनर्हान्धिक्पापान्धृतराष्ट्रजान् १३ ॥ वैशंपायनउवाच ॥ इत्युक्त्वासनृपःशोचन्निषसादमहीतले ॥ तमध्यात्मरतोविद्वान्शौनकोनामवैद्विजः १४ योगेसांख्येचकुशलोराजानमिदमब्रवीत् १५ शोकस्थानसहस्राणिभयस्थानशतानिच ॥ दिवसेदिवसेमूढमाविशंतिनपंडितम् १६ नहिज्ञानविरुद्धेषुबहुदोषेषुक र्मसु ॥ श्रेयोघातिषुसज्जंतेबुद्धिमंतोभवद्विधाः १७ अष्टांगांबुद्धिमाहुर्यांसर्वश्रेयोभिघातिनीम् ॥ श्रुतिस्मृतिसमायुक्तांराजन्सात्वय्यवस्थिता १८ अर्थकृ च्छ्रेषुदुर्गेषुव्यापत्सुस्वजनस्यच ॥ शारीरमानसैर्दुःखैर्नसीदंतिभवद्विधाः १९ श्रूयतांचाभिधास्यामिजनकेनयथापुरा ॥ आत्मव्यवस्थानकरागीताःश्लोकाम हात्मना २० मनोदेहसमुत्थाभ्यांदुःखाभ्यामर्दितंजगत् ॥ तयोर्व्याससमासाभ्यांशमोपायमिमंशृणु २१ व्याधेरनिष्टसंस्पर्शाच्छ्रमादिष्टविवर्जनात् ॥ दुःखं चतुर्भिःशारीरंकारणैःसंप्रवर्तते २२ तदात्वप्रतिकाराच्चसततंचाविचिंतनात् ॥ आधिव्याधिप्रशमनंक्रियायोगद्वयेनतु २३ मतिमंतोह्यतोवैद्याःशमंप्रागेव कुर्वते ॥ मानसस्यप्रियाख्यानैःसंभोगोपनयैर्नृणाम् २४ मानसेनाहिदुःखेनशरीरमुपतप्यते ॥ अयःपिंडेनतप्तेनकुंभसंस्थमिवोदकम् २५ मानसंशमये त्तस्माज्ज्ञानेनाग्निमिवांबुना ॥ प्रशांतेमानसेह्यस्यशारीरमुपशाम्यति २६

युक्तांसम्यक्दृढीकृतां । सात्वय्यवस्थिताऽस्मत्सन्निधानादितिभावः १८ अर्थकृच्छ्रेषुधननाशेषु अशनवसनाद्यभावात् दुर्गेषुदुस्तरेषुशारीरदुःखेषु विपरीतास्वापत्सुखीकर्षणादिषु मनोदुः खेषुचोपस्थितेषु तैःसंतोनावसीदंति शारीरंदुःखंतितिक्षया मानसंविवेकेनच नाशयितुंसमर्थाइत्यर्थः १९ आत्मव्यवस्थानकराः मनःस्थैर्यहेतवः २० व्याससमासाभ्यांविस्तरसंक्षेपाभ्यां २१ व्याधिःप्रसिद्धःअनिष्टंकंटकादिः श्रमोव्यायामः इष्टमन्नादि २२ प्रतिकारादौषधोपानत्स्वास्थ्यान्नादिभिरुपशमनात् आधिव्याधिप्रशमनमविचिंतनाच्च क्वचिद्विषयेऽत्यंतनिमग्नचित्त स्यनमनोव्यथाव्याधिप्रभवावेदनाचभवतीतिप्रसिद्धंइदमेवक्रियायोगद्वयं २३ मतीति अतोवक्ष्यमाणाद्धेतोः वैद्याःविद्यावंतः प्रागेव मानसस्यशमंकुर्वते प्रियाख्यानैरनुकूलवचनैः बहुलाभदर्श नैर्धनहान्यादिजं संभोगोपनयैः रूपादिसमर्पणैःकामादिजं २४ मानसस्यप्राक्प्रशमने हेतुमाह मानसेनहीति २५ । २६ ॥ २ ॥

स्नेहोरागःसज्जतेप्रवर्तते प्रवृत्त्याचदुःखयोगमुपैति २७ आयासःक्लेशः स्नेहात्रागात् २८ भावःभावनासंकल्पसंज्ञा अनुरागःपश्चाद्भाविनीप्रीतिः । अयंभावः दुःखजन्मप्रवृत्तिदोषमिथ्या ज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्गः दोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइतिन्यायसूत्राभ्यामज्ञानात्संकल्पस्ततोविष यस्ततस्तत्रप्रीतिस्ततस्तल्लाभायप्रवृत्तिस्ततोजन्मततः सुखदुःखे ततोरागद्वेषवासना ततःपुनःसंकल्पइतिक्रमः । तत्रमूलभूतोरागःस्नेहशब्देनोक्तः समावस्यहेतुः । ततोविषयसिद्ध्युत्तरं जायमानोरागोऽनुराग इति । तत्रभावानुरागयोर्म ध्ये पूर्वोभावोऽत्यंतमश्रेयस्करः तस्मात्संकल्पत्यागएवमुख्यंसाधनं तथाच वक्ष्यति । 'यत्किंचिदपि संकल्प्य नरोदुःखे निमज्जति ॥ नकिंचिदपि संकल्प्य सुखमक्षय्यमश्नुते'इति २९ कोटरेति रागएवदोषः ३० विप्रयोगे विषयेणसहवियोगेत्यागीन किंतु सत्यपिसमागमेयोविषयदोषदर्शीसएवत्यागी सएवचविरागंभजते निर्वैरश्चद्वेषाभावान्निरवग्रहःप्रतिबंधशून्यः ३१

मनसोदुःखमूलंतुस्नेहइत्युपलभ्यते ॥ स्नेहात्तुसज्जतेजंतुर्दुःखयोगमुपैतिच २७ स्नेहमूलानिदुःखानिस्नेहजानिभयानिच ॥ शोकहर्षौतथाऽऽयासःसर्वंस्नेहात्प्रव र्तते २८ स्नेहाद्भावोऽनुरागश्चप्रजज्ञेविषयेतथा ॥ अश्रेयस्कावुभावेतौपूर्वस्तत्रगुरुःस्मृतः २९ कोटराग्निर्यथाऽशेषंसमूलंपादपंदहेत् ॥ धर्मार्थौतुतथाल्पोऽ पिरागदोषोविनाशयेत् ३० विप्रयोगेनतुत्यागीदोषदर्शीसमागमे ॥ विरागंभजतेजंतुर्निर्वैरोनिरवग्रहः ३१ तस्मात्स्नेहंनलिप्सेतमित्रेभ्योधनसंचयात् ॥ स्वश रीरसमुत्थंचज्ञानेनविनिवर्तयेत् ३२ ज्ञानान्वितेषुयुक्तेषुशास्त्रज्ञेषुकृतात्मसु ॥ नतेषुसज्जतेस्नेहःपद्मपत्रेष्विवोदकम् ३३ रागाभिभूतःपुरुषःकामेनपरिकृ ष्यते ॥ इच्छासंजायतेतस्यततस्तृष्णाविवर्धते ३४ तृष्णाहिसर्वपापिष्ठानित्योद्वेगकरीस्मृता ॥ अधर्मबहुलाचैवघोरापापानुबंधिनी ३५ यादुस्त्यजादुर्म तिभिर्यानजीर्यतिजीर्यतः ॥ योऽसौप्राणांतिकोरोगस्तांतृष्णांत्यजतःसुखम् ३६ अनाद्यंतातुसातृष्णाअंतर्देहगतानृणाम् ॥ विनाशयतिभूतानिअयोनिजइवा नलः ३७ यथैधःस्वसमुत्थेनवह्निनानाशमृच्छति ॥ तथाऽकृतात्मालोभेनसहजेनविनश्यति ३८ राजतःसलिलादग्नेश्चोरतःस्वजनादपि ॥ भयमर्थवतांनित्यं मृत्योःप्राणभृतामिव ३९ तथाह्यामिषमाकाशेपक्षिभिःश्वापदैर्भुवि ॥ भक्ष्यतेसलिलेमत्स्यैस्तथासर्वत्रवित्तवान् ४० अर्थएवहिकेषांचिदनर्थंभजतेनृणाम् ॥ अर्थश्रेयसिचासक्तोनश्रेयोविंदतेनरः ४१ तस्मादर्थागमाःसर्वेमनोमोहविवर्द्धनाः ॥ कार्पण्यंदर्पमानौचभयमुद्वेगएवच ४२ अर्थजानिविदुःप्राज्ञादुःखान्येता निदेहिनाम् ॥ अर्थस्योत्पादनेचैवपालनेचतथाक्षये ४३

मित्राणि धनानिचप्राप्य तेषुस्नेहंनलिप्सेतनकामयेत् । मित्रेभ्य इत्यादिके ल्यब्लोपे पंचम्यौ किंचस्वशरीरलिंगाख्यात्समुत्थमुत्पन्नमपिस्नेहं ज्ञानेन भोग्यानामवस्तुत्वानित्यत्वज्ञानेननाशयेत् ३२ ज्ञानान्वितेषु नित्यानित्यविवेकवत्सुयुक्तेषु नि त्यवस्तुप्राप्तये उद्युक्तेषु ततएवशास्त्रज्ञेषुकृतात्मसु ध्याने संस्कृतचित्तेषु । तेषुप्रसिद्धेषुस्नेहोरागो नसज्जते नसंगंप्राप्नोति ३३ रागोरम्यवस्तुदर्शनेचित्तस्योत्फुल्लता । कामस्तल्लि प्सा इच्छालब्धेतस्मिन्नरुच्यविशयात्पुनस्तदभिलाषः । पुनःपुनस्तल्लाभेऽप्यतृप्तिस्तृष्णा ३४ । ३५ जीर्यतः जरामृत्युग्रस्तस्य अनाद्यंता ३६ तन्मूलवासनानामनादित्वात् अंतर्देहः बाह्यतरोदेहोऽन्नमयः बाह्यो लिंगशरीरं अंतर्देहो मनस्तद्गताअयस्तप्तायःपिंडं ।निजःस्वरूपस्थः अनलोवन्हिः । अयोनिजमिवानलमितिपाठेतुमास्तिअलंपर्याप्तिर्यस्यतत् इंधनसहस्रैरतृप्तं तेजोऽन्याख्यमितिविशेष्यमध्याहृत्ययोज्यम् ३७ अकृतात्माअनिर्जितचेताः ३८ । ३९ । ४० केषांचिन्मूढानांधीमतामप्यर्थो नात्यंतिकश्रेयस्करइत्याह अर्थश्रेयसिअर्थसाध्येश्रेय सिज्योतिष्टोमादौ ४१ कार्पण्यमर्थव्ययोपस्थितौदैन्यं । दर्पः परपरिभवेच्छा । मानोऽहमेवश्रेष्ठइति मतिः भयंस्वोच्छेदशंका । उद्वेगःशंकाकृतंचित्तस्यानवस्थितत्वम् ४२ । ४३

सहंतिसहंते ४४ अर्थाःदुःखंप्रयच्छंति यदिपरित्यक्तुमिष्यंते तस्मान्नाशमर्थार्जनादिजंदुःखंनचिंतयेत् ४५ पिपासायास्तृष्णायाः ४५ नगृद्धयैवइच्छांनकुर्यात् तत्रयौवनादौ ४७ संचयान् अर्थानतज्जान्अर्थत्यागजान् अनीहार्थोयदृच्छालब्धोऽर्थः ४८ नस्पर्शनमस्पर्शनं सुप्सुपेतिनशब्देननञ्समासः ४९ एवंसर्वेष्वर्थवद्यौवनादिष्वर्थंतांधनात् ५० अर्थोपभोगःवि षयोपभोगः अर्थेप्सुताधनेप्सुता । 'अर्थःप्रकारेविषये वित्तकारणवस्तुषु'इतिविश्वः । आत्मोपभोगेतिपठोनिर्मूलः ५१।५२ भूतानामिति देवपितृमनुष्याणामुपलक्षणंदृश्यते पंचमहायज्ञेषु अप चमानेभ्यः । 'यतिश्चब्रह्मचारीच पकान्नस्वामिनावुभा'इति स्मृतेर्यत्यादिभ्यः ५३ तृणान्यासनार्थानि ५४ स्थितश्रांतस्य स्थितःऊर्ध्वस्थितस्तत्सहितस्यश्रांतस्यचासनंतृणमयंदद्यादतिथये

सहंतिचमहद्दुःखंघ्नंतिचैवार्थकारणात् ॥ अर्थादुःखंपरित्यक्तंपालिताश्चैवशत्रवः ४४ दुःखेनचाधिगम्यंतेतस्मान्नाशंनचिंतयेत् ॥ असंतोषपरामूढाःसंतोषंयां तिपंडिताः ४५ अतोनास्तिपिपासायाःसंतोषःपरमंसुखम् ॥ तस्मात्संतोषमेवेहपरंपश्यंतिपंडिताः ४६ अनित्यंयौवनंरूपंजीवितंरत्नसंचयः ॥ ऐश्वर्यंप्रि यसंवासोगृद्ध्येत्तत्रनपंडितः ४७ त्यजेतसंचयांस्तस्मात्तज्जान्क्लेशान्सहेतच ॥ नहिसंचयवान्कश्चिद्दृश्यतेनिरुपद्रवः ॥ अतश्चधार्मिकैःपुंभिरनीहार्थःप्रश स्यते ४८ धर्मार्थंयस्यवित्तेहावरंतस्यनिरीहता ॥ प्रक्षालनाद्धिपंकस्यश्रेयोनस्पर्शनंनृणाम् ४९ युधिष्ठिरैवंसर्वेषुनस्पृहांकुर्तुमर्हसि ॥ धर्मेणयदितेकार्यंविमुक्ते च्छोभवार्थतः ५० ॥ युधिष्ठिरउवाच ॥ नार्थोपभोगलिप्सार्थमियमर्थेप्सुताम्म ॥ भरणार्थंतुविप्राणांब्रह्मन्कांक्षेनलोभतः ५१ कथंह्यस्मद्विधोब्रह्मन्वर्तमा नोगृहाश्रमे ॥ भरणंपालनंचापिनकुर्यादनुयायिनां ५२ संविभागोहिभूतानांसर्वेषामेवदृश्यते ॥ तथैवापचमानेभ्यःप्रदेयंगृहमेधिना ५३ तृणानिभूमिरुदकं वाक्चतुर्थीचसूनृता ॥ सतामेतानिगेहेषुनोच्छिद्यंतेकदाचन ५४ देयमार्तस्यशयनंस्थितश्रांतस्यचासनम् ॥ तृषितस्यचपानीयंक्षुधितस्यचभोजनम् ५५ चक्षुर्दद्यान्मनोदद्याद्वाचंदद्यात्सुभाषिताम् ॥ उत्थायचासनंदद्यादेषधर्मःसनातनः ॥ प्रत्युत्थायाभिगमनंकुर्यान्न्यायेनचार्चनाम् ५६ अग्निहोत्रमनड्वांश्चज्ञातयो ऽतिथिर्बांधवाः ॥ पुत्रादाराश्चभृत्याश्चनिर्दहेयुरपूजिताः ५७ आत्मार्थंपाचयेन्नान्नंनवृथाघातयेत्पशून् ॥ नचतत्स्वयमश्नीयाद्विधिवद्यन्ननिर्वपेत् ५८ श्वभ्य श्चश्वपचेभ्यश्चवयोभ्यश्चावपेद्भुवि ॥ वैश्वदेवंहिनामैतत्सायंप्रातश्चदीयते ५९ विघसाशीभवेत्तस्मान्नित्यंचामृतभोजनः ॥ विघसोभुक्तशेषंतुयज्ञशेषंतथाऽ मृतम् ६० चक्षुर्दद्यान्मनोदद्याद्वाचंदद्याच्चसूनृताम् ॥ अनुव्रजेदुपासीतसयज्ञःपंचदक्षिणः ६१ योदद्यादपरिक्लिष्टमन्नमध्वनिवर्तते ॥ श्रांतायादृष्टपूर्वायत स्यपुण्यफलंमहत् ६२ एवंयोवर्ततेवृत्तिंवर्तमानोगृहाश्रमे ॥ तस्यधर्मंपरंप्राहुःकथंवाविप्रमन्यसे ६३ शौनकउवाच ॥ अहोबतमहत्कष्टंविपरीतमिदंजगत् ॥ येनापत्रपतेसाधुरसाधुस्तेनतुष्यति ६४

इति शेषः ५५ न्यायेनवर्णाश्रमानुरूप्येण ५६ । ५७ वृथाश्राद्धयज्ञादिनिमित्तंविना । 'देवान्पितॄन्समभ्यर्च्य खादन्मांसंनदोषभाक्'इति स्मृतेः । यदन्नंनिर्वपेन्नदद्यात्तदेव पितृभूतमनुष्ये भ्य इति शेषः ५८ विश्वंसर्वजातीयंप्राणिजातं देवोदेवता यस्मिंस्तद्विश्वदेवं स्वार्थेतद्धितः वैश्वदेवंनामकर्म ५९ । ६० । ६१ अपरिक्लिष्टंकार्पण्यंविना अध्वनिवर्ततेमार्गस्थाय ६२ धर्म परं गार्हस्थ्यात्परोधर्मोनास्तीतिभावः ६३ अपत्रपते निर्लज्जइत्यपवादंलभते ६४

अप्राज्ञइतिच्छेदः प्रकर्षेणअज्ञःप्राज्ञइतिवा शिश्नोदरकृतेइति दिव्यांगनाभोगलिप्सया दिव्यरूपादिभोगलिप्सयाच विघसंदेवतायुपयुक्तशेषं कामुकोबहुकरोति मोहआत्माज्ञानंरागस्तज्जे प्रपंचेप्रीतिः वशंइच्छाऐश्वर्यंवा तैः आक्रांतः 'वशमिच्छाप्रभुत्वयोः'इतिविश्वः । इंद्रियार्थाःशब्दादयस्तेषां वशआयत्ततातदनुगस्तदर्थी ६५ हारिभिःहरणशीलैः एवंवर्णाश्रमाभिमानपूर्वकं यज्ञादीननुतिष्ठतामात्मस्वरूपाज्ञानात्तत्कर्मफलतयोपस्थितेषु विषयेषु रागवतामिंद्रियैर्विषयान्प्रतिहृतानां तत्रनिमग्नचित्तानां परमार्थस्यात्यंतास्फुरणलक्षणं विमूढसंज्ञत्वंभवतीत्युक्तं ६६ तदुपपादयतिषडिति दीपप्रभावत्तैजसंमनोनेत्रादिद्वारा तत्तद्विषयंप्रतिगत्वा तदावरकमज्ञानमभिभाव्यतंविषयंप्रकाशयतियदा तदैषांविषयविदांमनस्तत्तद्विषयहानोपादानोपेक्षालोचना ख्यमननात्मकमंतःकरणंप्रादुर्भवतिविशेषेणपीनंभवति तत्रपूर्वसंकल्पजं यथापूर्वसंस्कारं हीनेऽप्युपादेयबुद्धिरुत्तमेहानबुद्धिर्विपरीतावाबुद्धिर्भवति सोऽयंमनःप्रादुर्भावः ६७ तस्मिंश्चजाते किंस्यात्तदाहमनोयस्येति यस्यपुंसोमनः इंद्रियस्थैंद्रियाणांविषयान्शब्दादीन्सेवितुंयाति उच्चलति तस्यतद्विषयभोगार्थमौत्सुक्यं विलंबासहत्वंभवति चततः प्रवृत्तिर्जायते ६८ प्रवृत्तश्च लोभाग्नौमोहाग्नौपतति यतःकामेनविषयबाणैर्निहतः अतिरागान्मुह्यतीत्यर्थः ६९ महामोहेअंधेतमसि ७० अविद्याआत्माज्ञानं ततःपरमानंदतिरोधानात्स्वक्षुद्रानंदप्राप्तये कर्म ततस्तत्फल

शिश्नोदरकृतेऽप्राज्ञःकरोतिविघसंबहु ॥ मोहरागवशाक्रांतइंद्रियार्थवशानुगः ६५ ह्रियतेबुध्यमानोऽपिनरोहारिभिरिंद्रियैः ॥ विमूढसंज्ञोदुष्टाश्वैरुद्भ्रांतैरिवसार थिः ६६ षडिंद्रियाणिविषयंसमागच्छंतिवैयदा ॥ तदाप्रादुर्भवत्येषांपूर्वसंकल्पजंमनः ६७ मनोयस्येंद्रियस्येहविषयान्यातिसेवितुम् ॥ तस्यौत्सुक्यंसंभवति प्रवृत्तिश्चोपजायते ६८ ततःसंकल्पबीजेनकामेनविषयेषुभिः ॥ विद्धःपततिलोभाग्नौज्योतिर्लोभात्पतंगवत् ६९ ततोविहारैराहारैर्मोहितश्चयथेप्सया ॥ महामो हेसुखेमग्नोनात्मानमवबुध्यते ७० एवंपततिसंसारेतासुतास्विहयोनिषु ॥ अविद्याकर्मतृष्णाभिर्भ्राम्यमाणोऽथचक्रवत् ७१ ब्रह्मादिषुतृणांतेषुभूतेषुपरिवर्तते ॥ जलेभुवितथाऽऽकाशेजायमानःपुनःपुनः ७२ अबुधानांगतिस्त्वेषाबुधानामपिमेशृणु ॥ येधर्मेश्रेयसिरताविमोक्षरतयोजनाः ७३ तदिदंवेदवचनंकुरुकर्मत्यजे तिच ॥ तस्माद्धर्मानिमान्सर्वान्नाभिमानात्समाचरेत् ७४ इज्याध्ययनदानानितपःसत्यंक्षमादमः ॥ अलोभइतिमार्गोऽयंधर्मस्याष्टविधःस्मृतः ७५ अत्रपूर्वश्च तुर्वर्गःपितृयाणपथेस्थितः ॥ कर्तव्यमितियत्कार्यंनाभिमानात्समाचरेत् ७६ उत्तरोदेवयानस्तुसद्भिराचरितःसदा ॥ अष्टांगेनैवमार्गेणविशुद्धात्मासमाचरेत् ७७

भोगेष्वतृप्तिस्तृष्णा ७१ । ७२ अबुधानांगृहस्थानांविघसाशनमेवपरमोधर्मइतिमन्वानानांगतिः कर्मनिष्ठाफलमुक्तं बुधानांतेभ्योऽन्येषांसंन्यासिनामपिगतिंमेमत्तःशृणु धर्मेश्रेयसिप्रवृत्ति धर्मोऽपिप्रशस्यः निवृत्तिधर्मःप्रशस्यतरस्तस्मिन्रताः अतएवविमोक्षरतयः ७३ तदिदमिति । 'कुर्वन्नेवेहकर्माणि जिजीविषेच्छतंसमाः'इति । 'त्यजतैवहितज्ज्ञेयंत्यक्तुःप्रत्यक्परंपदं'इतिच द्विविधाअपिश्रुतयःसंति तत्रयेऽभिमानात्कर्मकुर्वंतेतेपूर्वोक्तरीत्यांऽधंतमोविशंति येचशुद्धाःसंन्यासिनस्तेकृतकृत्याएवभवंति तदनुमध्यमस्यगतिरियमित्याहतस्मादिति तथाचवक्ष्यति । 'एता न्यपितुकर्माणिसंगंत्यक्त्वाफलानिच ॥ कर्तव्यानीतिमेपार्थ निश्चितंमतमुत्तमं'इति ७४ । ७५ पितृयाणपथे धूमादिमार्गे आवृत्तिफले कर्तव्यमवश्यानुष्ठेयं नित्याग्निहोत्रसंध्योपासनादि अभिमानात्संगात् ७६ उत्तरश्चतुर्वर्गः सत्यंदमःक्षमाअलोभश्च देवयानोऽर्चिरादिमार्गोऽनावृत्तिफलः अष्टांगेन वक्ष्यमाणसंकल्पसंबंधाद्यंगाष्टकवतामार्गेण प्रकारेण यत्कर्तव्यं तदाचरेदितिपूर्वेणसंबंधः शुद्धात्मा शुद्धचित्तः ७७

म.भा.टी. संकल्पोमानसंकर्म तस्यसंबंधोनिरोधस्तेन अंतरिंद्रियनिग्रहाख्यः शमउक्तः । इंद्रियनिग्रहोदमः । व्रतविशेषः अहिंसादीनिव्रतानितेषांविशेषःसार्वभौमत्वं सर्वदेशेकालेषुचसर्वप्रकारेणहिंसा वन०
त्यागइत्यर्थः ७८ आहारोहितमितमेध्याशनं तस्ययोगात्कर्मणांविधिवत्त्यागः ततश्चित्तनिरोधनात् ७९ । ८० । ८१ ।८२ कर्ममयी यज्ञयुद्धादिकर्मरूपसाधनप्रधानासिद्धिः पितृमातृमयी अ०
'द्यौःपितापृथिवीमाता'इतिश्रुतेः परलोकइहलोकफलप्रधाना सात्वयाप्राप्तैवचकारएवशब्दार्थः तपसादेवताध्यानजपादिना यासिद्धिस्तां ८३ अनुग्रहात्तपसइतिशेषः ८४ इत्यारण्यकेपर्व
॥ ४ ॥ णिनैलकंठीयेभारतभावदीपेद्वितीयोऽध्यायः २ ॥ ॥ शौनकेनेति १ । २ । ३ धर्मेणयोगमयेननतुकर्मणा ४ सूर्याराधनंविवक्षुः सूर्यस्यसार्वात्म्यंतावदाहप्ररोचनार्थं सविताप्रसविता उ
सम्यक्संकल्पसंबंधात्सम्यक्चेंद्रियनिग्रहात् ॥ सम्यग्व्रतविशेषाच्चसम्यक्चगुरुसेवनात् ७८ सम्यगाहारयोगाच्चसम्यक्चाध्ययनागमात् ॥ सम्यक्कर्मोपसं ॥ १ ॥
न्यासात्सम्यक्चित्तनिरोधनात् ७९ एवंकर्माणिकुर्वंतिसंसारविजिगीषवः ॥ रागद्वेषविनिर्मुक्ताऐश्वर्यंदेवतागताः ८० रुद्राःसाध्यास्तथाऽऽदित्यावसवोऽथ
तथाऽश्विनौ ॥ योगैश्वर्येणसंयुक्ताधारयंतिप्रजाइमाः ८१ तथात्वमपिकौंतेयशममास्थायपुष्कलम् ॥ तपसासिद्धिमन्विच्छयोगसिद्धिंचभारत ८२ पितृमा
तृमयीसिद्धिःप्राप्ताकर्ममयीचते ॥ तपसासिद्धिमन्विच्छद्विजानांभरणायवै ८३ सिद्धाहियद्यदिच्छंतिकुर्वंतेतदनुग्रहात् ॥ तस्मात्तपःसमास्थायकुरुष्वात्मम
नोरथम् ८४ ॥ ॥ इ०महाभा०आरण्यकेप०अ०प०पांडवानांप्रव्रजनेद्वितीयोऽध्यायः २ ॥ ॥ ३ ॥ ॥ वैशंपायनउवाच ॥ शौनकेनैव
मुक्तस्तुकुंतीपुत्रोयुधिष्ठिरः ॥ पुरोहितमुपागम्यभ्रातृमध्येऽब्रवीदिदम् १ प्रस्थितंमाऽनुयांतीमेब्राह्मणावेदपारगाः ॥ नचास्तिपोषणेशक्तोबहुदुःखसमन्वि
तः २ परित्यक्तुंनशक्तोऽस्मिदानशक्तिश्चनास्तिमे ॥ कथमत्रमयाकार्यंतद्ब्रूहिभगवन्मम ३ ॥ वैशंपायनउवाच ॥ मुहूर्तमिवसध्यात्वाधर्मेणान्विष्यतांग
तिम् ॥ युधिष्ठिरमुवाचेदंधौम्योधर्मभृतांवरः ४ ॥ धौम्यउवाच ॥ पुरासृष्टानिभूतानिपीड्यंतेक्षुधयाभृशम् ॥ ततोऽनुकंपयातेषांसवितास्वपितायथा ५
गत्वोत्तरायणंतेजोरसानुद्धृत्यरश्मिभिः ॥ दक्षिणायनमावृत्तोमहींनिविशतेरविः ६ क्षेत्रभूतेततस्तस्मिन्नोषधीरोषधीपतिः ॥ दिवस्तेजःसमुद्धृत्यजनयामा
सवारिणा ७ निषिक्तश्चंद्रतेजोभिःस्वयोनौनिर्गतेरविः ॥ ओषध्यःषड्रसामेध्यास्तदन्नंप्राणिनांभुवि ८ एवंभानुमयंह्यन्नंभूतानांप्राणधारणम् ॥ पितैषसर्वभू
तानांतस्मात्तंशरणंव्रज ९ राजानोहिमहात्मानोयोनिकर्मविशोधिताः ॥ उद्धरंतिप्रजाःसर्वास्तपआस्थायपुष्कलम् १० भीमेनकार्तवीर्येणवैन्येननहुषेणच ॥
तपोयोगसमाधिस्थैरुद्धृताह्यापदःप्रजाः ११ तथात्वमपिधर्मात्मन्कर्मणाचविशोधितः ॥ तपआस्थायधर्मेणद्विजातीन्भरभारत १२
त्पादकःपरमात्मेत्यर्थः ५ तेजोरसान्जलानि उद्धृत्यादायमहींनिविशते स्वोष्मणामहींवासयति ६ ओषधीपतिश्चंद्रः दिवस्तेजः अंतरिक्षगतंमेघाकारेणपरिणतंतेजःउद्धृत्य मेघानुद्राव्ये
त्यर्थः जनयामास तदुत्थेनवारिणाओषधीः ७ स्वयोनौबीजेनिर्गते अंकुरादिरूपेणनिष्पन्नेसति रविरेवओषधीरूपोभवति तदन्नंताभ्यओषधीभ्योऽन्नंअदनीयंधान्यंतच पुनर्जलोष्मयोगादं ॥ ४ ॥
कुरादिक्रमेणधान्ययोनिरिति रविरेवान्नमन्नयोनित्वात् अन्येतु यदादर्शे चंद्रेस्वयोनौसूर्येएकतांगच्छति तदाचंद्रतेजोभिरमृतमयैर्निषिक्तोभवति ततश्चंद्ररूपेणबहिर्निर्गत्य ओषधीराप्या
ययति तेनान्नंभवतीत्याहुः ८ । ९ । १० तपोयोगोव्रतस्वीकारस्तत्पूर्वकः समाधिर्ध्यानंतत्स्थैस्तन्निष्ठैः ११ धर्मेणध्यानेन १२

१३ । १४ । १५ सूर्योऽर्यमेति अत्रसूर्योपाधिकंब्रह्मसर्वकर्तृत्वसर्वज्ञत्वसर्वात्मत्वादिभिर्धर्मैःस्तूयते तद्यथा सूर्यःसूतेआलोकमितिसूर्यः १ अर्यमागतिमत्त्वात् २ भगःसर्वैश्वर्यसंपन्नत्वात् ३ त्व
ष्टाविश्वशिल्पकरत्वात् ४ पूषापोषकः ५ अर्कःअर्चनीयः ६ सविताजगत्प्रसवनात् ७ रविःवेदत्रयीदंडमयः ८ गभस्तिमान्सहस्रकिरणः ९ अजोऽनादिः १० कालःमुहूर्तादिःतत्प्रवर्तकत्वा
त् ११ मृत्युःप्राणहर्ता १२ धाताजगत्कर्ता १३ प्रभाकरःदीप्तिकरः १४ १६ पृथिवीत्यादिनामभिः सर्वात्म्यस्यैवप्रपंचः परायणंमूलकारणं २० । १७ ।२८ शुचिरग्निः २९ शौरिःकृष्णः ३०
१८ । ४० तेजसांपतिःसूर्यः ४१ धर्मध्वजोधर्मप्रधानः ४२ । ४३ वेदांगःवेदशरीरःत्रयीमयत्वात् ४४ । ४५ । १९ । ४८ कलिःसर्वमलाश्रयइत्येकंनाम ४९ । २० अश्वत्थःसंसारवृक्षःसए
वसंवत्सरकरः ननुषष्ठःपदार्थःकालोनामकश्चिदस्ति कालोपाधिभूतंद्रव्यमेवस्वस्य अतीतानागतादिव्यवहारहेतुर्भवतीतिभावः ५५ कालचक्रःकालप्रवर्तकोयोविभावसुःसइत्येकंनाम ५७ पु
रुषः पूर्युकर्मेंद्रियपंचकज्ञानेंद्रियपंचकमनआदिचतुष्टयप्राणादिपंचकभूतपंचककामकर्माविद्याख्यासुतसतीतिपुरुषःजीवरूपः ५८ सएवशाश्वतःआद्यंतशून्यः ५९ योगांकर्मज्ञानाधिकारी ६०
॥ जनमेजयउवाच ॥ कथंकुरूणामृषभःसतुराजायुधिष्ठिरः ॥ विप्रार्थमाराधितवान्सूर्यमद्भुतदर्शनम् १३ ॥ वैशंपायनउवाच ॥ शृणुष्वावहितोराजन्शु
चिर्भूत्वासमाहितः ॥ क्षणंचकुरुराजेंद्रसंप्रवक्ष्याम्यशेषतः १४ धौम्येनतुयथापूर्वंपार्थायसुमहात्मने ॥ नामाष्टशतमाख्यातंतच्छृणुष्वमहामते १५ ॥ धौ
म्यउवाच ॥ सूर्योऽर्यमाभगस्त्वष्टापूषाऽर्कःसवितारविः ॥ गभस्तिमानजःकालोमृत्युर्धाताप्रभाकरः १६ पृथिव्यापश्चतेजश्चखंवायुश्चपरायणम् ॥ सोमो
बृहस्पतिःशुक्रोबुधोऽंगारकएवच १७ इंद्रोविवस्वान्दीप्तांशुःशुचिःशौरिःशनैश्चरः ॥ ब्रह्माविष्णुश्चरुद्रश्चस्कंदोवैवरुणोयमः १८ वैद्युतोजाठरश्चाग्निरैंधनस्ते
जसांपतिः ॥ धर्मध्वजोवेदकर्तावेदांगोवेदवाहनः १९ कृतंत्रेताद्वापरश्चकलिःसर्वमलाश्रयः ॥ कलाकाष्ठामुहूर्ताश्चक्षपायामस्तथाक्षणः २० संवत्सरकरोऽश्व
त्थःकालचक्रोविभावसुः ॥ पुरुषःशाश्वतोयोगीव्यक्ताव्यक्तःसनातनः २१ कालाध्यक्षःप्रजाध्यक्षोविश्वकर्मातमोनुदः ॥ वरुणःसागरोंऽशश्चजीमूतोजीवनोऽ
रिहा २२ भूताश्रयोभूतपतिःसर्वलोकनमस्कृतः ॥ स्रष्टासंवर्तकोवह्निःसर्वस्यादिरलोलुपः २३ अनंतःकपिलोभानुःकामदःसर्वतोमुखः ॥ जयोविशालोवरदः
सर्वधातुनिषेचिता २४ मनःसुपर्णोभूतादिःशीघ्रगःप्राणधारकः ॥ धन्वंतरिर्धूमकेतुरादिदेवोऽदितेःसुतः २५ द्वादशात्माऽरविंदाक्षःपितामातापितामहः ॥
स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपम् २६ देहकर्ताप्रशांतात्माविश्वात्माविश्वतोमुखः ॥ चराचरात्मासूक्ष्मात्मामैत्रेयःकरुणान्वितः २७
व्यक्ताव्यक्तःकार्यकारणात्मा ६१ सनातनोनिरुपाधिः ६२ । २१ । ६५ तमोनुदःअज्ञानहंतामोक्षदइत्यर्थः ६६ अंशःअंशयतिविभाजयतिकर्मफलानीत्यंशः ६९ । ७० जीवनःजलवज्जीवन
हेतुः ७१ । ७२ । २२ संवर्तकःप्रलयकालिकोवह्निरित्येकं ७७ । २३ सर्वेषांधातूनांत्वगादीनांदेहगतानां निषेचितासेचकआप्यायकः ८८ । २४ । मनोरूपीसुपर्णइत्येकं ८९ भूतादिरहंका
रः ९० आदिदेवोऽदितेःसुतःइत्येकंनाम विष्णुरित्यर्थः ९५ । २५ पितामातापितामहः द्यावापृथिव्योःपिताहिरण्यगर्भस्तस्यापिपितेत्यर्थः ९८ स्वर्गद्वारंब्रह्मलोकप्राप्तिद्वारं 'सूर्यद्वारेणते
विरजाःप्रयांति'इतिश्रुतेस्तदेवप्रजाद्वारं 'अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः'इति क्रमेणइहपरलोकप्रापकइत्यर्थः ९९ मोक्षद्वारंक्रममुक्तिस्था
नभूतंत्रिविष्टपंस्वर्गभूमिरित्येकं १०० । २६ मैत्रेयः मित्रेषुसर्वभूताभयप्रदेषुसाधुर्मैत्रेयः १०७ करुणान्वितइति पतितव्रात्यादीनामपित्रातेत्यर्थः १०८ । २७

२८ । २९ । ३० शुचिश्चासौसुमनाश्चेतिकर्मधारयः शोकएवदवाग्निर्यस्मिन् तस्मात्सागरात्सागरवदपारात्संसारात् ३१ विप्रत्यागसमाधिस्थःविप्रेभ्यस्त्यागः त्यज्यमानमन्नंतदर्थंसमाधिस्थःनियमस्थः यूपदार्वादिवत्प्रकृतिविकाराभावेपिचतुर्थीसमासः अश्वघासादिवत्षष्ठीसमासोवा । संयतात्मानियमितचित्तः ३२ तपःसूर्याष्टशतनामजपाख्यम् ३३ योगंचित्तैकाग्र्यंआस्थायकृत्वा ३४ प्राणानामासमंतात्यमनंनिग्रहस्तेनप्राणायामेन आरब्धवान् ततःजपानंतरम् ३५ चक्षुःचक्षुरादिप्रवर्तकत्वात् बाह्यरूपेणचचक्षुरनुग्राहकत्वात्अतएवसर्वदेहिनामात्मायोनिः उत्पत्तिलयस्थानंभूतानांवियदादीनां आचारः आसमंताच्चारयतीत्याचारोऽन्तर्यामी ३६ सांख्यानांज्ञाननिष्ठानांयोगिनांचित्तनिरोधकानामनावृतार्गलद्वारंत्वं आवृणोतीत्यावृतंकपाटंकर्तरिकः

एतद्वैकीर्तनीयस्यसूर्यस्यामिततेजसः ॥ नामाष्टशतकंचेदंप्रोक्तमेतत्स्वयंभुवा २८ सुरगणपितृयक्षसेवितंह्यसुरनिशाचरसिद्धवंदितम् ॥ वरकनकहुताशनप्रभंप्रणिपतितोऽस्मिहितायभास्करम् २९ सूर्योदयेयःसुसमाहितःपठेत्सपुत्रदारान्धनरत्नसंचयान् ॥ लभेतजातिस्मरतांनरःसदाधृतिंचमेधांचसविंदतेपुमान् ३० इमंस्तवंदेववरस्ययोनरःप्रकीर्तयेच्छुचिसुमनाःसमाहितः ॥ विमुच्यतेशोकदवाग्निसागराल्लभेतकामान्मनसायथेप्सितान् ३१ ॥वैशंपायनउवाच॥ एवमुक्तस्तुधौम्येनतत्कालसदृशंवचः ॥ विप्रत्यागसमाधिस्थःसंयतात्मादृढव्रतः ३२ धर्मराजोविशुद्धात्मातपआतिष्ठदुत्तमम् ॥ पुष्पोपहारैर्बलिभिरर्चयित्वादिवाकरम् ३३ सोऽवगाह्यजलंराजादेवस्याभिमुखोऽभवत् ॥ योगमास्थायधर्मात्मावायुभक्षोजितेंद्रियः ३४ गांगेयंवार्युपस्पृश्यप्राणायामेनतस्थिवान् ॥ शुचिःप्रयतवाग्भूत्वास्तोत्रमारब्धवांस्ततः ३५ ॥ युधिष्ठिरउवाच ॥ त्वंभानोजगतश्चक्षुस्त्वमात्मासर्वदेहिनाम् ॥ त्वंयोनिःसर्वभूतानांत्वमाचारःक्रियावताम् ३६ त्वंगतिःसर्वसांख्यानांयोगिनांत्वंपरायणम् ॥ अनावृतार्गलद्वारंत्वंगतिस्त्वंमुमुक्षताम् ३७ त्वयासंधार्यतेलोकस्त्वयालोकःप्रकाश्यते ॥ त्वयापवित्रीक्रियतेनिर्व्याजंपाल्यतेत्वया ३८ त्वामुपस्थायकालेतुब्राह्मणावेदपारगाः ॥ स्वशाखाविहितैर्मंत्रैरर्चंत्यृषिगणार्चित ३९ तवदिव्यंरथंयांतमनुयांतिवरार्थिनः ॥ सिद्धचारणगंधर्वायक्षगुह्यकपन्नगाः ४० त्रयस्त्रिंशच्चवैदेवास्तथावैमानिकागणाः ॥ सोपेंद्राःसमहेंद्राश्चत्वामिष्ट्वासिद्धिमागताः ४१ उपयांत्यर्चयित्वातुत्वांवैप्राप्तमनोरथाः ॥ दिव्यमंदारमालाभिस्तूर्णंविद्याधरोत्तमाः ४२ गुह्याःपितृगणाःसप्तयेदिव्यायेचमानुषाः ॥ तेपूजयित्वात्वामेवगच्छंत्याशुप्रधानताम् ४३ वसवोमरुतोरुद्रायेचसाध्यामरीचिपाः ॥ वालखिल्यादयःसिद्धाःश्रेष्ठत्वंप्राणिनांगताः ४४ सब्रह्मकेषुलोकेषुसप्तस्वप्यखिलेषुच ॥ नतद्भूतमहंमन्येयदर्कादतिरिच्यते ४५ संतिचान्यानिसत्वानिवीर्यवंतिमहांतिच ॥ नतुतेषांतथादीप्तिःप्रभावोवायथातव ४६ ज्योतींषित्वयिसर्वाणित्वंसर्वज्योतिषांपतिः ॥ त्वयिसत्त्यंचसत्त्वंचसर्वेभावाश्चसात्त्विकाः ४७

अर्गलाकपाटविष्टंभकंतिर्यक्काष्ठं तदुभयरहितंमुक्तिद्वारंत्वं मुमुक्षतांगतिश्चत्वमेव प्राप्यंपदमपित्वमेवेत्यर्थः ३७ निर्व्याजंराजवत्प्रत्युपकाराशाख्यंमिषंविनाकेवलंकृपयैवेत्यर्थः ३८।३९।४० त्रयस्त्रिंशत् 'अष्टौवसवएकादशरुद्राद्वादशादित्याःप्रजापतिश्चवषट्कारश्च' इतिश्रुतिप्रसिद्धाः गणास्तदन्यानि विश्वेदेवादीनिसमुदायदैवतानि सिद्धिंज्ञानम् ४१ उपयांतित्वामेवत्वांअर्चयित्वातुप्राप्तमनोरथाभवंति ४२ सप्तार्यमाग्निष्वात्तादयः प्रधानतांजगत्कारणताम् ४३। ४४ अस्यसार्वात्म्यमाहसब्रह्मकेष्विति नमन्येनास्तीतिमन्येसर्वस्यैकात्म्यात् ४५।४६ सत्त्यं सत्पृथिव्यप्तेजांसि त्यत् वाय्वाकाशौ तदात्मकंसत्यं सत्त्वंबुद्धिसत्त्वंसात्त्विकाभावाः धर्मोज्ञानंविरागऐश्वर्यमित्याद्याः ४७

सुनाभंसुदर्शनम् ४८ । ४९ । ५० प्रावाराःवस्त्रविशेषाः ५१ त्रयोदशद्वीपवर्तींसुदर्शनाद्यवांतरद्वीपयोगात् गोभिःरश्मिभिः ५२ । ५३ । ५४ । ५५ अमानवस्येतिच्छेदः अमानवोऽर्चिरादिमार्गगणगतस्यब्रह्मलोकप्रापकःपुरुषः ५६ । ५७ त्वद्दीधितयस्त्वत्किरणाः सैरावताःमेघस्योपरियोमेघःसऐरावतस्तत्सहिताः आभूतंयावच्चतुर्विधभूतग्रामंतस्यसंप्लवःजलेनाभिप्लावनम् ५८ द्वादशधा । 'अरुणोमाघमासेतुसूर्योवैफाल्गुनेतथा' इत्यादिस्मृत्युक्तारुणादिरूपेण ५९।६० हंतिगच्छतिविश्वंसंहरतीतिवाहंसः वृषाकपिःहरोहारिर्वा ६१ गर्वारश्मिनाम् ६२ सप्तसप्तिःसप्ताश्वः

त्वत्तेजसाकृतंचक्रंसुनाभंविश्वकर्मणा ॥ देवारीणांमदोयेननाशितःशार्ङ्गधन्वना ४८ त्वमादायांशुभिस्तेजोनिदाघेसर्वदेहिनाम् ॥ सर्वौषधिरसानांचपुनर्वर्षासुमुंचसि ४९ तपंत्यन्येदहंत्यन्येगर्जंत्यन्येतथाघनाः ॥ विद्योतंतेप्रवर्षंतितवप्रावृषिरश्मयः ५० नतथासुखयत्यग्निर्नप्रावारानकंबलाः ॥ शीतवातार्दितंलोकंयथातवमरीचयः ५१ त्रयोदशद्वीपवतींगोभिर्भासयसेमहीम् ॥ त्रयाणामपिलोकानांहितायैकःप्रवर्तसे ५२ तवयद्युदयोनस्यादंधंजगदिदंभवेत् ॥ नचधर्मार्थकामेषुप्रवर्त्तेरन्मनीषिणः ५३ आधानपशुबंधेष्टिमंत्रयज्ञतपःक्रियाः ॥ त्वत्प्रसादादवाप्यंतेब्रह्मक्षत्रविशांगणैः ५४ यदहर्ब्रह्मणःप्रोक्तंसहस्रयुगसंमितम् ॥ तस्यत्वमादिरंतश्चकालज्ञैःपरिकीर्तितः ५५ मनूनांमनुपुत्राणांजगतोऽमानवस्यच ॥ मन्वंतराणांसर्वेषामीश्वराणांत्वमीश्वरः ५६ संहारकालेसंप्राप्तेतवक्रोधविनिःसृतः ॥ संवर्तकाग्निस्त्रैलोक्यंभस्मीकृत्यावतिष्ठते ५७ त्वद्दीधितिसमुत्पन्नानानावर्णामहाघनाः ॥ सैरावताःसाशनयःकुर्वंत्याभूतसंप्लवम् ५८ कृत्वाद्वादशधाऽऽत्मानंद्वादशादित्यतांगतः ॥ संहृत्यैकार्णवंसर्वंत्वंशोषयसिरश्मिभिः ५९ त्वामिंद्रमाहुस्त्वंरुद्रस्त्वंविष्णुस्त्वंप्रजापतिः ॥ त्वमग्निस्त्वंमनःसूक्ष्मंप्रभुस्त्वंब्रह्मशाश्वतम् ६० त्वंहंसःसवितामानुरंशुमालीवृषाकपिः ॥ विवस्वान्मिहिरःपूषामित्रोधर्मस्तथैवच ६१ सहस्ररश्मिरादित्यस्तपनस्त्वंगवांपतिः ॥ मार्तंडोऽर्कोरविःसूर्यःशरण्योदिनकृत्तथा ६२ दिवाकरःसप्तसप्तिर्धामकेशीविरोचनः ॥ आशुगामीतमोघ्नश्चहरिताश्वश्चकीर्त्यसे ६३ सप्तम्यामथवाषष्ठ्यांभक्त्यापूजांकरोतियः ॥ अनिर्विण्णोऽनहंकारीतंलक्ष्मीर्भजतेनरम् ६४ नतेषामापदःसंतिनाधयोव्याधयस्तथा ॥ येतवानन्यमनसाकुर्वंत्यर्चनवंदनम् ६५ सर्वरोगैर्विरहिताःसर्वपापविवर्जिताः ॥ त्वद्भावभक्ताःसुखिनोभवंतिचिरजीविनः ६६ त्वंममापन्नकामस्यसर्वातिथ्यंचिकीर्षतः ॥ अन्नमन्नपतेदातुमभितःश्रद्धयार्हसि ६७ येचतेऽनुचराःसर्वेपादोपांतंसमाश्रिताः ॥ माठरारुणदंडाद्यास्तांस्तान्वंदेऽशनिक्षुभान् ६८ क्षुभयासहितामैत्रीयाश्चान्याभूतमातरः ॥ ताश्चसर्वानमस्यामिपांतुमांशरणागतम् ६९ ॥ वैशंपायनउवाच ॥ एवंस्तुतोमहाराजभास्करोलोकभावनः ॥ ततोदिवाकरःप्रीतोदर्शयामासपांडवम् ॥ दीप्यमानःस्ववपुषाज्वलन्निवहुताशनः ७०

धामकेशी ज्योतिर्मयकिरणवान् आशुगामीत्यत्राशावहइतिपाठेदिग्व्यवहारनिर्वाहकः आशायाःप्रसिद्धायाइष्टार्थसमर्पणेनपूरकोवा ६३ अनिर्विण्णःपूजनेआसक्तः ६४ । ६५ त्वद्भावभक्ताःसूर्यएवसर्वत्रास्तीतिभावोभावना तत्रभक्ताआदृताः ६६ श्रद्धयाआतिथ्यंचिकीर्षतइतिसंबंधः ६७ अशनिक्षुभान्विद्युदशन्यादिप्रवर्तकान् ६८ क्षुभामैत्र्यौनिग्रहानुग्रहकर्त्र्यौदेवते भूतमातरः गौरीपद्मादयः ब्राह्मीमाहेश्वर्यादयश्च ६९ । ७०

७१ गृण्हीष्वगृहाण पिठरंपरिवेषणपात्रं ताम्रंताम्रमयं वत्स्यंतिवृत्तिंजनजीविकारूपांकरिष्यति पात्रेणपात्रप्रसूतेनान्नेन ७२ यावद्वत्स्यैतितावदन्नाद्यमोदनादिकमक्षय्यंभविष्यतीति संबंधः चतुर्विधंलेह्यंचोष्यंभक्ष्यंपेयंच ७३ । ७४ । ७५ । ७६ । ७७ । ७८ । ७९ । ८० महानसेपाकशालायां साधयामासकारयामासअन्नमितिशेषः ८१ संस्कृतंपक्वम् ८२ । ८३ पार्षतीपृषतः द्रुपदपितुः गोत्रापत्यम् ८४ याज्ञियार्थाःयज्ञार्हाणिवस्तूनि आज्यपशुपुरोडाशीयादीनि प्रवर्त्ततेनिःसरंति विधिमंत्रप्रमाणतः । विधिर्वसंतेवसंतेज्योतिषायजेतेत्यादिरज्ञातज्ञापनरूपः ।

॥ विवस्वानुवाच ॥ यत्तेऽभिलषितंकिंचित्तत्त्वंसर्वमवाप्स्यसि ॥ अहमन्नंप्रदास्यामिसप्तपंचचतेसमाः ७१ गृह्णीष्वपिठरंताम्रंमयादत्तंनराधिप ॥ यावद्वत्स्यैतिपांचालीपात्रेणानेनसुव्रत ७२ फलमूलामिषंशाकंसंस्कृतंयन्महानसे ॥ चतुर्विधंतदन्नाद्यमक्षय्यंतेभविष्यति ७३ इतश्चतुर्दशेवर्षेभूयोराज्यमवाप्स्यसि ॥ वैशंपायनउवाच ॥ एवमुक्त्वातुभगवांस्तत्रैवांतरधीयत ७४ इमंस्तवंप्रयतमनाःसमाधिनापठेदिहान्योऽपिवरंसमर्थयन् ॥ ततस्यदद्याच्चरविर्मनीषितंतदाप्नुयाद्यद्यपितत्सुदुर्लभम् ७५ यश्चेदंधारयेन्नित्यंशृणुयाद्वाऽप्यभीक्ष्णशः ॥ पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनम् ॥ विद्यार्थीलभतेविद्यांपुरुषोऽप्यथवास्त्रियः ७६ उभेसंध्येपठेन्नित्यंनारीवापुरुषोयदि ॥ आपदंप्राप्यमुच्येतबद्धोमुच्येतबंधनात् ७७ एतद्ब्रह्मादददौपूर्वंशक्रायसुमहात्मने ॥ शक्राच्चनारदःप्राप्तोधौम्यस्तुतदनंतरम् ॥ धौम्याद्युधिष्ठिरःप्राप्यसर्वान्कामानवाप्तवान् ७८ संग्रामेचजयेन्नित्यंविपुलंचाप्नुयाद्वसु ॥ मुच्यतेसर्वपापेभ्यःसूर्यलोकंसगच्छति ७९ ॥ वैशंपायनउवाच ॥ लब्ध्वावरंतुकौंतेयोजलादुत्तीर्यधर्मवित् ॥ जग्राहपादौधौम्यस्यभ्रातॄंश्चपरिषस्वजे ८० द्रौपद्यासहसंगम्यवंद्यमानस्तयाप्रभुः ॥ महानसेतदानींतुसाधयामासपांडवः ८१ संस्कृतंप्रसवंयातिस्वल्पमन्नंचतुर्विधम् ॥ अक्षय्यंवर्धतेचान्नंतेनभोजयतेद्विजान् ८२ भुक्तवत्सुचविप्रेषुभोजयित्वाऽनुजानपि ॥ शेषंविघससंज्ञंतुपश्चाद्भुंक्तेयुधिष्ठिरः ८३ युधिष्ठिरंभोजयित्वाशेषमश्नातिपार्षती ॥ द्रौपद्यांभुजमानायांतदन्नंक्षयमेतिच ॥ एवंदिवाकरात्प्राप्यदिवाकरसमप्रभः ८४ कामान्मनोभिलषितान्ब्राह्मणेभ्योऽददात्प्रभुः ॥ पुरोहितपुरोगाश्चतिथिनक्षत्रपर्वसु ॥ याज्ञियार्थाःप्रवर्त्ततेविधिमंत्रप्रमाणतः ८५ ततःकृतस्वस्त्ययनाधौम्येनसहपांडवाः ॥ द्विजसंघैःपरीवृताःप्रययुःकाम्यकंवनम् ८६ इत्यारण्यकेप॰अरण्यपर्वणिकाम्यकवनप्रवेशेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ४ ॥
॥ वैशंपायनउवाच ॥ वनंप्रविष्टेष्वथपांडवेषुप्रज्ञाचक्षुस्तप्यमानोऽम्बिकेयः ॥ धर्मात्मानंविदुरमगाधबुद्धिंसुखासीनोवाक्यमुवाचराजा १ ॥ धृतराष्ट्रउवाच ॥ प्रज्ञाचतेभार्गवस्येवशुद्धाधर्मंचत्वंपरमंवेत्थसूक्ष्मम् ॥ समश्चत्वंसंमतःकौरवाणांपथ्यंचैषांममचैवब्रवीहि २

मंत्रःअनुष्ठेयार्थस्मारकइषेत्वेत्यादिः ताववप्रमाणे ताभ्यामित्यर्थः ८५ । ८६ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपेकाम्यकप्रवेशे तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥
॥ ननुएवंकर्मजसिद्ध्यपेक्षयायोगजसिद्धेःप्राबल्यंचेत् किमितिसर्वेऽपितांनाद्रियंतइत्याशंक्य मूढाःदृष्टद्वारकफलेष्वर्थेषुहितोपदेष्टारंद्विषंति किमुतादृष्टद्वारकेष्वित्याह वनंप्रविष्टेष्वित्यध्यायेन । आंबिकेयइतिपूर्वरूपमार्षम् १ सूक्ष्मोधर्मोज्ञानंतद्वत्त्वादेव त्वं कौरवाणां पाडवधार्तराष्ट्राणांसमः पक्षपातशून्यः एषांपांडवानां ममचसपुत्रस्येतिशेषः २

एवंगते एवंपांडवप्रव्राजनाद्युकरूपेसंकटेगतेप्राप्तेसति उद्धरेयुःउन्मूलयेयुः ३ । ४ सइति यउक्तविधःसएवधर्मो युधिष्ठिररूपोविप्रलब्धःवंचितः अक्षवत्यांद्यूतक्रीडायां सत्यासंधाप्रतिज्ञायस्य तं ५ दुष्प्रणीतस्यदुरात्मभिःकृतस्यशेषस्य पांडवमानहानिलक्षणस्यवधस्यउपायं दोषप्रशांतिप्रकारं ६ अभिसृष्टंदत्तं स्वकेनधनेनेतिशेषः ७ एवंकृतेसति त्वांधर्मोनस्यादितिनैव किंतु स्यादेव स्यादित्यव्ययं सज्जेदित्यर्थः ८ एवंकृत्वाशेषं नष्टावशिष्टंभाग्यं ९ । १० । ११ चकर्थकृतवान् इदंच वक्ष्यमाणंच कर्त्ताकरिष्यासि १२ एकराज्यंयदिअनुमंता तर्हितापोनभवि

एवंगतेविदुरयदद्यकार्यंपौराश्चेमेकथमस्मान्भजेरन् ॥ तेचाप्यस्मान्नोद्धरेयुःसमूलांस्तत्त्वंब्रूयाःसाधुकार्याणिवेत्सि ३ ॥ विदुरउवाच ॥ त्रिवर्गोऽयंधर्ममूलोनरेंद्रराज्यंचेदंधर्ममूलंवदंति ॥ धर्मेराजन्वर्त्तमानःस्वशक्त्यापुत्रान्सर्वान्पाहिपांडोःसुतांश्च ४ सवैधर्मोविप्रलब्धःसभायांपापात्मभिःसौबलेयप्रधानैः ॥ आहूयकुंतीसुतमक्षवत्यांपराजैषीत्सत्यसंधंसुतस्ते ५ एतस्यतेदुष्प्रणीतस्यराजञ्छेषस्याहंपरिपश्याम्युपायम् ॥ यथापुत्रस्तवकौरव्यपापान्मुक्तोलोकेप्रतितिष्ठेतसाधु ६ तद्वैसर्वंपांडुपुत्रालभंतांयत्तद्राजन्नभिसृष्टंत्वयासीत् ॥ एषधर्मःपरमोयत्स्वकेनराजातुष्येन्नपरस्वेषुगृद्धेत् ७ यशोननश्येज्ज्ञातिभेदश्चनस्याद्धर्मोनस्यान्नैवचैवंकृतेत्वाम् ॥ एतत्कार्यंतवसर्वप्रधानंतेषांतुष्टिःशकुनेश्चावमानः ८ एवंशेषंयादिपुत्रेषुतेस्यादेतद्राजंस्त्वरमाणःकुरुष्व ॥ तथैतदेवंनकरोषिराजन्ध्रुवंकुरूणांभविताविनाशः ९ नहिक्रुद्धोभीमसेनोऽर्जुनोवाशेषंकुर्याच्छात्रवाणामनीके ॥ येषांयोद्धासव्यसाचीकृतास्त्रोधनुर्येषांगांडिवंलोकसारम् १० येषांभीमोबाहुशालीचयोद्धातेषांलोकेकिंनुनप्राप्यमस्ति ॥ उक्तंपूर्वंजातमात्रेसुतेतेमयायत्तेऽहितमासीत्तदानीम् ११ पुत्रंत्यजेममहितंकुलस्याहितंपरंनचतत्त्वंचकर्थ ॥ इदंचराजन्हितमुक्तंनचेत्त्वमेवंकर्त्तापरितप्ताऽसिपश्चात् १२ यद्येतदेवमनुमंतासुतस्तेसंप्रीयमाणःपांडवैरेकराज्यम् ॥ तापोनतेभविताप्रीतियोगात्त्वंचेन्निगृह्णीष्वसुतंसुखाय १३ दुर्योधनंत्वाहितंवैनिगृह्यपांडोःपुत्रंप्रकुरुष्वाधिपत्ये ॥ अजातशत्रुर्हिविमुक्तरागोधर्मेणेमांपृथिवींशास्तुराजन् १४ ततोराजन्पार्थिवाःसर्वएववैश्याइवास्मानुपतिष्ठंतुसद्यः ॥ दुर्योधनःशकुनिःसूतपुत्रःप्रीत्याराजन्पांडुपुत्रान्भजंतु १५ दुःशासनोयाचतुभीमसेनंसभामध्येद्रुपदस्यात्मजांच ॥ युधिष्ठिरंत्वंपरिसांत्वयस्वराज्येचैनंस्थापयस्वाभिपूज्य १६ त्वयापृष्टःकिमहमन्यद्वदेयमेतत्कृत्वाकृतकृत्योसिराजन् १७ ॥ धृतराष्ट्रउवाच ॥ एतद्वाक्यंविदुरयत्तेसभायामिहप्रोक्तंपांडवान्प्राप्यमांच ॥ हितंतेषामहितंमामकानामेतत्सर्वंममनावैतिचेतः १८ इदंत्विदानींगतएवनिश्चितंतेषामर्थेपांडवानांयदात्थ ॥
३ तेनाद्यमन्येनासिहितोममेतिकथंहिपुत्रंपांडवार्थेत्यजेयम् १९

तापोनचेत् यदिवानुमंता तर्हिसुतंनिगृण्हीष्व १३ पक्षांतरमाह दुर्योधनमिति १४ । १५ याचतु मदपराधंक्षमस्वेतिप्रार्थयतु १६ । १७ नावैति नांगीकरोति १८ तत्रहेतुमाह इदमिति तथादुर्योधनबंधनं युधिष्ठिरायराज्यप्रदानामित्येवंप्रकारकंसुखोपायंयदात्थ तदिदंकुतएवंनिश्चितं नकुतश्चित् । गतइतिपाठे पांडवानामर्थे गतःप्राप्तइत्यर्थः । लब्धपदाःपांडवाः मदीयान् न हिंस्युरित्यत्र नियामकंनास्तीतिभावः १९

२० जिह्मंकुटिलं २१ नेदमस्तीदंकुलं २२ ॥ ॥ इत्यारण्यकेप०नैलकंठीयेभारतभावदीपेचतुर्थोऽध्यायः ॥ ४ ॥ हितोपदेशेऽपिदुष्टाःकुप्यंतीत्युक्त्वा संतस्तत्रैवतुष्यंतीत्याह पांडवाइत्य
ध्यायेन १ । २ मरुधन्वसु मरुषुनिर्जलदेशेषु धन्वसुजांगलदेशेषु । 'धन्वाजांगलदेशेस्यात्'इतिविश्वः ३ । ४ । ५ । ६ आराद्दूरतः ७ । ८ आद्रवआगच्छ अपयातुंनिवर्तितुं संशयिते पणी

असंशयंतेऽपिममैवपुत्रा दुर्योधनस्तुममदेहात्प्रसूतः ॥ स्वंवैदेहंपरहेतोस्त्यजेतिकोनुब्रूयात्समतामन्ववेक्ष्य २० समांजिह्मंविदुरसर्वंब्रवीषिमानंचतेऽहमधिकंधा
रयामि ॥ यथेच्छकंगच्छवातिष्ठवात्वंसुसांत्व्यमानाऽप्यसतीस्त्रीजहाति २१ ॥ वैशंपायनउवाच ॥ एतावदुक्त्वाधृतराष्ट्रोऽन्वपद्यदंतर्वेश्मसहसोत्थायराजन् ॥
नेदमस्तीत्यथविदुरोभाषमाणःसंप्राद्रवद्यत्रपार्थाबभूवुः २२ ॥ इत्यारण्यकेप०अ०प०विदुरवाक्यप्रत्याख्यानेचतुर्थोऽध्यायः ॥ ॥ ४ ॥ वैशंपायनउवाच ॥
पांडवास्तुवनेवासमुद्दिश्यभरतर्षभाः ॥ प्रययुर्जाह्नवीकूलात्कुरुक्षेत्रंसहानुगाः १ सरस्वतीदृषद्वत्यौयमुनांचनिषेव्यते ॥ ययुर्वनेनैववनंसततंपश्चिमांदिशम् २
ततःसरस्वतीकूलेसमेषुमरुधन्वसु ॥ काम्यकंनामददृशुर्वनंमुनिजनप्रियम् ३ तत्रतेन्यवसन्वीरावनेबहुमृगद्विजे ॥ अन्वास्यमानामुनिभिःसांत्व्यमानाश्चभारत
४ विदुरस्त्वथपांडूनांसदादर्शनलालसः ॥ जगामैकरथेनैवकाम्यकंवनमृद्धिमत् ५ ततोगत्वाविदुरःकाम्यकंतच्छीघ्रैरश्वैर्वाहिनास्यंदनेन ॥ ददर्शासीनंधर्मात्मानं
विविक्तसार्द्धंद्रौपद्याभ्रातृभिर्ब्राह्मणैश्च ६ ततोऽपश्यद्विदुरंतूर्णमारादभ्यायांतंसत्यसंधःसराजा ॥ अथाब्रवीद्भ्रातरंभीमसेनंकिंनुक्षत्तावक्ष्यतिनःसमेत्य ७ कच्चि
न्नायंवचनात्सौबलस्यसमाह्वातादेवनायोपयातः ॥ कच्चित्क्षुद्रःशकुनिर्नायुधानिजेष्यत्यस्मान्पुनरेवाक्षवत्याम् ८ समाहूतःकेनचिदाद्रवेतिनाहंशक्तोभीमसे
नापयातुं ॥ गांडीवेचसंशयितेकथंनुराज्यप्राप्तिःसंशयिताभवेन्नः ९ ॥ वैशंपायनउवाच ॥ ततउत्थायविदुरंपांडवेयाःप्रत्यगृह्णन्नृपतेसर्वएव ॥ तैःसत्कृतःसच
तानाजमीढोयथोचितंपांडुपुत्रान्समेयात् १० समाश्वस्तंविदुरंतेनरर्षभास्ततोऽपृच्छन्नागमनायहेतुम् ॥ सचापितेभ्योविस्तरतःशशंसयथावृत्तोधृतराष्ट्रोऽऽ
बिकेयः ११ ॥ विदुरउवाच ॥ अवोचन्मांधृतराष्ट्रोऽनुगुप्तमजातशत्रोपरिगृह्याभिपूज्य ॥ एवंगतेसमतामभ्युपेत्यपथ्यंतेषांममचैवब्रवीहि १२ मयाप्युक्तं
यत्क्षमंकौरवाणांहितंपथ्यंधृतराष्ट्रस्यचैव ॥ तद्वैतस्मैनरुचामभ्युपैतितत्श्चाहंक्षममन्यन्नमन्ये १३ परंश्रेयःपांडवेयामयोक्तंनमेतच्चश्रुतवानांबिकेयः ॥
यथाऽऽतुरस्यैवहिपथ्यमन्नंनरोचतेस्मास्यतदुच्यमानम् १४ नश्रेयसेनीयतेऽजातशत्रोस्त्रीश्रोत्रियस्येवगृहेप्रदुष्टा ॥ ध्रुवंनरोचेद्भरतर्षभस्यपतिःकुमार्याइवष
ष्टिवर्षः १५ ध्रुवंविनाशोनृपकौरवाणांनवैश्रेयोधृतराष्ट्रःपरैति ॥ यथाचपर्णेपुष्करस्यावसिक्तंजलंनतिष्ठेत्पथ्यमुक्तंतथाऽस्मिन् १६

कृतेसति कथंनःराज्यप्राप्तिर्यतःसंशयिता गांडीवनाशादित्यर्थः ९ । १० यथावृत्तःयादृशाचारः ११ अनुगुप्तमनुरक्षितारं हितोपदेशेनेतिशेषः कर्ताऽऽबिकः ब्रवीहीत्यवोचदितिसंबंधः १२ रु
चामीतिअन्यत्तसाम्नोऽन्यद्वैरं १३ । १४ । १५ परैतिपरामृशति पुष्करस्यकमलस्य १६

श्रद्धाइष्टोऽयमितिधीः १७ धार्यतांनविस्मर्तव्यं १८ उपासतेउपास्ते प्रतीक्षते तृणैःस्तोकमग्निमिवात्मानंसहायसंपत्त्यासंवर्धयन् एकएवशत्रूणांकारस्न्येनोच्छेदात् १९ सहायार्जनोपायमा
हयस्येति अविभक्तंसाधारणं वसुवित्तं २० विप्रलापंवितथःप्रलापोऽनर्थकंवचोयस्मात्तत्तथा पूज्यःस्तव्यः वनवासांतेबहुनाधनेनबहून्सहायान्प्राप्य त्वमेवशत्रूच्छेदंकृत्वा राज्यंप्राप्स्यसीत्यर्थः
२१ । २२ ॥ ॥ इत्यारण्यकेप०नै०भा०पंचमोऽध्यायः ॥ ५ ॥ ॥ गतेइति महाप्राज्ञः विदुरोपदेशेस्थितानांजयोभविष्यतीतिजानन् १ संधिविग्रहकारितं संधिविग्रहादिनीतिज्ञत्वकृतं

ततःक्रुद्धोधृतराष्ट्रोऽब्रवीन्मांयस्मिन्श्रद्धाभारततत्रयाहि ॥ नाहंभूयःकामयेत्वांसहायंमहीमिमांपालयितुंपुरंवा १७ सोऽहंत्यक्तोधृतराष्ट्रेणराज्ञाप्रशासितुंत्वा
मुपयातोनरेंद्र ॥ तद्वैसर्वंयन्मयोक्तंसभायांतद्धार्यतांयत्प्रवक्ष्यामिभूयः १८ क्लेशैस्तीव्रैर्युज्यमानःसपत्नैःक्षमांकुर्वन्कालमुपासतेयः ॥ संवर्धयन्स्तोकमिवाग्नि
मात्मवान्सवैभुंक्तेपृथिवीमेकएव १९ यस्याविभक्तंवसुराजसहायैस्तस्यदुःखेऽप्यंशभाजःसहायाः ॥ सहायानामेषसंग्रहणेऽभ्युपायःसहायाप्तौपृथिवीप्राप्तिमा
हुः २० सत्यंश्रेष्ठंपांडवविप्रलापंतुल्यंचान्नंसहभोज्यंसहायैः ॥ आत्माचैषामग्रतोनस्मपूज्यएवंवृत्तिर्वर्द्धतेभूमिपालः २१ ॥ युधिष्ठिरउवाच ॥ एवंकरिष्या
मियथाब्रवीषिपरांबुद्धिमुपगम्याप्रमत्तः ॥ यच्चाप्यन्यद्देशकालोपपन्नंतद्वैवाच्यंतत्करिष्यामिकृत्स्नम् २२ ॥ ॥ इ०म०भा०आरण्यकेप०अरण्यप०विदुर
निर्वासेपंचमोऽध्यायः ५ ॥ ॥ वैशंपायनउवाच ॥ गतेतुविदुरेराजन्नाश्रमंपांडवान्प्रति ॥ धृतराष्ट्रोमहाप्राज्ञःपर्यतप्यतभारत १ विदुरस्यप्रभावंचसं
धिविग्रहकारितम् ॥ विवृद्धिंचपरांमत्वापांडवानांभविष्यति २ ससभाद्वारमागम्यविदुरस्मारमोहितः ॥ समक्षंपार्थिवेंद्राणांपपाताविष्टचेतनः ३ सतुलब्ध्वा
पुनःसंज्ञांसमुत्थायमहीतलात् ॥ समीपोपस्थितंराजासंजयंवाक्यमब्रवीत् ४ भ्राताममसुहृच्चैवसाक्षाद्धर्मइवापरः ॥ तस्यस्मृत्याऽद्यसुभृशंहृदयंदीर्यतीवमे ५
तमानयस्वधर्मज्ञंममभ्रातरमाशुवै ॥ इतिब्रुवन्सनृपतिःकृपणंपर्यदेवयत् ६ पश्चात्तापाभिसंतप्तोविदुरस्मारमोहितः ॥ भ्रातृस्नेहादिदंराजासंजयंवाक्यमब्र
वीत् ७ गच्छसंजयजानीहिभ्रातरंविदुरंमम ॥ यदिजीवतिरोषेणमयापापेननिर्धुतः ८ नहितेनममभ्रात्रासुसूक्ष्ममपिकिंचन ॥ व्यलीकंकृतपूर्वंवैप्राज्ञेनामित
बुद्धिना ९ सव्यलीकंपरंप्राप्तोमत्तःपरमबुद्धिमान् ॥ त्यक्ष्यामिजीवितंप्राज्ञतंगच्छानयसंजय १० तस्यतद्वचनंश्रुत्वाराज्ञस्तमनुमान्यच ॥ संजयोबाढ
मित्युक्त्वाप्राद्रवत्काम्यकंप्रति ११ सोऽचिरेणसमासाद्यतद्वनंयत्रपांडवाः ॥ रौरवाजिनसंवीतंददर्शाथयुधिष्ठिरम् १२ विदुरेणसहासीनंब्राह्मणैश्चसहस्रशः ॥
भ्रातृभिश्चाभिसंगुप्तंदेवैरिवपुरंदरम् १३ युधिष्ठिरमुपागम्यपूजयामाससंजयः ॥ भीमार्जुनयमाश्चापितदुक्तंप्रतिपेदिरे १४

भविष्यतिआगामिनिकाले २
विदुरस्मारमोहितः स्मरःकामस्तस्मात्केनचित्प्रतिबद्धादुत्पन्नोद्वेषःस्मारइत्युच्यते विदुरद्वेषेण ममनाशोभविष्यतीतिचिंतयामोहंप्राप्तइत्यर्थः स्नेहेत्यपपाठः ३ । ४ द्वेषमेवस्नेहरूपेण
नाटयितुंसभाद्वारेराज्ञांसमक्षंपतित्वोत्थायआह भ्रातेत्यादि ५ । ६ । ७ निर्धुतोनिःसारितः ८ व्यलीकमप्रियं ९ । १० मानितःसन्नितरान्मानयित्वेत्यनुमान्येत्यस्यार्थः ११ । १२ । १३ । १४

१५ । १६ । १७ । १८ धृतराष्ट्रःप्रतापवानितिपाठेमोहेनप्रकृष्टंतापंप्राप्तइत्यर्थः १९ प्रजागरेआधिमवायामुन्निद्रतायां विचित्रंविगतदिव्यवस्तुकंअपेतलक्ष्मीकमित्यर्थः २० । २१।२२ भवंतीति
दीनत्वात्पांडवेषुममपक्षपातोनतुत्वत्पुत्रद्वेषादितिभावः २३ । २४ । २५ ॥ ॥ इत्यारण्यकेप नै०भार०षष्ठोऽध्यायः ॥ ६ ॥ श्रुत्वाचेति १ अबुद्धिरज्ञानंतज्जंतमोरागद्वेषात्मकंमोहं २
सुहृत्शुभचिंतकःहितेरतःशुभकर्ता ३ । ४ वारणोवानवग्रहइतिपाठे वाशब्दइवार्थेनवगृहीतोगजइवेत्यर्थः निरंकुनिरवग्रहइतिपाठे निरवग्रहःप्रतिबंधाभावेऽपिनिरंकुर्निराहारोभूत्वाशोषंगामि

राज्ञाप्रृष्टःसकुशलंसुखासीनश्चसंजयः ॥ शशंसागमनेहेतुमिदंचैवाब्रवीद्वचः १९ ॥ ॥ संजयउवाच ॥ ॥ राजास्मरतितेक्षत्तर्धृतराष्ट्रोऽम्बिकासुतः ॥
तंपश्यगत्वात्वंक्षिप्रंसंजीवयचपार्थिवम् १६ सोऽनुमान्यनरश्रेष्ठान्पांडवान्कुरुनंदनान् ॥ नियोगाद्राजसिंहस्यगंतुमर्हसिसत्तम १७ ॥ वैशंपायनउवाच ॥
एवमुक्तस्तुविदुरोधीमान्स्वजनवल्लभः ॥ युधिष्ठिरस्यानुमतेपुनरायाद्गजाह्वयम् १८ तमब्रवीन्महातेजाधृतराष्ट्रोऽम्बिकासुतः ॥ दिष्ट्याप्राप्तोऽसिधर्मज्ञदि
ष्ट्यास्मरसिमेऽनघ १९ अद्यचाहंदिवारात्रौत्वत्कृतेभरतर्षभ ॥ प्रजागरेप्रपश्यामिविचित्रंदेहमात्मनः २० सोऽङ्कमानीयविदुरंमूर्द्धन्याघ्रायचैवह ॥ क्षम्य
तामितिचोवाचयदुक्तोऽसिमयानघ २१ ॥ विदुरउवाच ॥ क्षांतमेवमयाराजन्गुरुर्मेपरमोभवान् ॥ एषोऽहमागतःशीघ्रंत्वद्दर्शनपरायणः २२ भवंतिहिनर
व्याघ्रपुरुषाधर्मचेतसः ॥ दीनाभिपातिनोराजन्नात्रकार्याविचारणा २३ पांडोःसुतायादृशामेतादृशास्तवभारत ॥ दीनाइतीवमेबुद्धिरभिपन्नाऽद्यतान्प्रति
२४ ॥ वैशंपायनउवाच ॥ अन्योन्यमनुनीयैवंभ्रातरौद्वौमहाद्युती ॥ विदुरोधृतराष्ट्रश्चलेभातेपरमांमुदम् २५ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअ
रण्यपर्वणिविदुरप्रत्यागमनेषष्ठोऽध्यायः ६ ॥ ॥ वैशंपायनउवाच ॥ श्रुत्वाचविदुरंप्राप्तंराज्ञाचपरिसांत्वितम् ॥ धृतराष्ट्रात्मजोराजापर्यतप्यतदुर्मतिः
१ ससौबलेयमानाय्यकर्णंदुःशासनौतथा ॥ अब्रवीद्वचनंराजाप्रविश्याबुद्धिजंतमः २ एषप्रत्यागतोमंत्रीधृतराष्ट्रस्यधीमतः ॥ विदुरःपांडुपुत्राणांसुहृद्विद्वा
न्हितेरतः ३ यावदस्यपुनर्बुद्धिंविदुरोनापकर्षति ॥ पांडवानयनेतावन्मंत्रयध्वंहितंमम ४ अथपश्याम्यहंपार्थान्प्राप्तानिहकथंचन ॥ पुनःशोषंगमिष्यामि
निरंबुर्निरवग्रहः ५ विषमुद्बंधनंचैवशस्त्रमग्निप्रवेशनम् ॥ करिष्येनहितान्वृद्धान्पुनर्द्रष्टुमिहोत्सहे ६ ॥ शकुनिरुवाच ॥ किंबालिशमतिंराजन्नास्थितोऽसिवि
शांपते ॥ गतास्तेसमयंकृत्वानैतदेवंभविष्यति ७ सत्यवाक्येस्थिताःसर्वेपांडवाभरतर्षभ ॥ पितुस्तेवचनंतातनग्रहीष्यंतिकर्हिचित् ८ अथवातेग्रहीष्यंति
पुनरेष्यंतिवापुरम् ॥ निरस्यसमयंसर्वेपणोऽस्माकंभविष्यति ९ सर्वेभवामोमध्यस्थाराज्ञश्छंदानुवर्तिनः ॥ छिद्रंबहुप्रपश्यंतःपांडवानांसुसंवृताः १०

ष्यामीत्यर्थः । 'प्रतिबंधेऽप्यवग्रहः'इति विश्वः । निरवुरितिनिराशुरितिचपाठौचिंत्यौ ५ मरणार्थंविषादिकंकरिष्येस्वीकरिष्येऋद्धान्ऋद्धिमतः ६ । ७ । ८ पणःकार्याकार्यविवेकलक्षणोव्य
वहारः अस्माकमितिपांडवानपिग्रहीत्वोक्तं ९ छिद्रंसमयातिक्रमदोषं बहुबहुलंप्रपश्यंतोऽन्येपिसुसंवृताःपांडवेभ्योऽधर्मवद्भयोभीताःसंतोनिलीयस्थास्यंतीत्यर्थः १०

११ । १२ । १३ नातिहृष्टमनाःपांडवानांनिंदायांसत्यामपि आगमनासहिष्णुत्वात् कर्णेनस्वपराक्रमयोग्यस्यवचनस्यानुक्तेश्च १४ उपलभ्यदुर्योधनाशयमितिशेषः १५ उद्यम्योत्क्षिप्यआ
त्मानंदेहम् १६ वयंकिंकराः पाणयइवकिंकरपाणयः पश्यंतश्चारचक्षुषेतिवत् । किंकुर्मइतिकृत्वाकृतांजलिपाणयइतिप्राञ्चः । प्रियंचिकीर्षामो नतुशक्नुमःप्रियेस्थातुमितिसंबंधः धृतराष्ट्रेण
निरुद्धत्वात् १७ दंशिताःसन्नद्धाः १८ । १९ परिद्यूनाःखिन्नाःवर्जितविजिगीषावा शक्याजेतुमितिशेषः २० । २१ । २१ । २३ । २४ ॥ ॥ इतिआरण्यकेपर्वणिनैलकंठीयेभारतभावदी

॥ दुःशासनउवाच ॥ एवमेतन्महाप्राज्ञयथावदसिमातुल ॥ नित्यंहिमेकथयतस्तवबुद्धिर्विरोचते ११ ॥ कर्णउवाच ॥ काममीशामहेसर्वेदुर्योधनतवेप्सितम् ॥
ऐकमत्यंहिनोराजन्सर्वेषामेवलक्षये १२ नागमिष्यंतितेधीराअकृत्वाकालसंविदम् ॥ आगमिष्यंतिचेन्मोहात्पुनर्द्यूतेनतान्जय १३ ॥ वैशंपायनउवाच ॥ एव
मुक्तस्तुकर्णेनराजादुर्योधनस्तदा ॥ नातित्हृष्टमनाःक्षिप्रमभवत्सपराङ्मुखः १४ उपलभ्यततःकर्णोविवृत्यनयनेशुभे ॥ रोषाद्दुःशासनंचैवसौबलंचतमेवच १५
उवाचपरमक्रुद्धउद्यम्यात्मानमात्मना ॥ अथोममतंयत्तुतन्निबोधतभूमिपाः १६ प्रियंसर्वेकरिष्यामोराज्ञःकिंकरपाणयः ॥ नचास्यशक्नुमःस्थातुंप्रियेसर्वेह्य
तंद्रिताः १७ वयंतुशस्त्राण्यादायरथानास्थायदंशिताः ॥ गच्छामःसहिताहंतुंपांडवान्वनगोचरान् १८ तेषुसर्वेषुशांतेषुगतेष्वविदितांगतिम् ॥ निर्विवादाभ
विष्यंतिधार्तराष्ट्रास्तथावयम् १९ यावदेवपरिद्यूनायावच्छोकपरायणाः ॥ यावन्मित्रविहीनाश्चतावच्छक्यामतंमम २० तस्यतद्वचनंश्रुत्वापूजयंतःपुनः
पुनः ॥ बाढमित्येवतेसर्वेप्रत्यूचुःसूतजंतदा २१ एवमुक्त्वासुसंरब्धारथैःसर्वेपृथक्पृथक् ॥ निर्ययुःपांडवान्हंतुंसहिताःकृतनिश्चयाः २२ तान्प्रस्थितान्प
रिज्ञायकृष्णद्वैपायनःप्रभुः ॥ आजगामविशुद्धात्माहृष्ट्वादिव्येनचक्षुषा २३ प्रतिषिद्ध्याथतान्सर्वान्भगवाँल्लोकपूजितः ॥ प्रज्ञाचक्षुषमासीनमुवाचाभ्येत्यस
त्वरम् २४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअरण्यप०व्यासागमनेसप्तमोऽध्यायः ॥ ७ ॥ व्यासउवाच ॥ धृतराष्ट्रमहाप्राज्ञनिबोधवचनंमम ॥ वक्ष्यामित्वां
कौरवाणांसर्वेषांहितमुत्तमम् १ नमेप्रियंमहाबाहोयद्गताःपांडवावनम् ॥ निकृत्यानिकृताश्चैवदुर्योधनपुरोगमैः २ तेस्मरंतःपरिक्लेशान्वर्षेपूर्णेत्रयोदशे ॥
विमोक्ष्यंतिविषंक्रुद्धाःकौरवेयेषुभारत ३ तदयंकिंनुपापात्मातवपुत्रःसुमंदधीः ॥ पांडवान्नित्यसंक्रुद्धोराज्यहेतोर्जिघांसति ४ वार्यतांसाध्वयंमूढःशमंगच्छतु
तेसुतः ॥ वनस्थांस्तानयंहंतुमिच्छन्प्राणान्विमोक्ष्यति ५ यथाहिविदुरःप्राज्ञोयथाभीष्मोयथावयम् ॥ यथाकृपश्चद्रोणश्चतथासाधुर्भवानपि ६ विग्रहोहिमहाप्रा
ज्ञस्वजनेनविगर्हितः ॥ अधर्म्यमयशस्यंचमाराजन्प्रतिपद्यताम् ७ समीक्षायादृशीह्यस्यपांडवान्प्रतिभारत ॥ उपेक्ष्यमाणासाराजन्महांतमनयंस्पृशेत् ८अथवा
ऽयंसुमंदात्मावनंगच्छतुतेसुतः ॥ पांडवैःसहितोराजन्नेकएवासहायवान् ९ ततःसंसर्गजःस्नेहःपुत्रस्यतवपांडवैः ॥ यदिस्यात्कृतकार्योऽद्यभवेस्त्वंमनुजेश्वर १०

पेसप्तमोध्यायः ७ ॥ ॥ ७ ॥ ॥ धृतेति १ निकृताःनिर्जिताः २ विषमिवविषंशस्त्रम् ३ । ४ । ५ भवानपिअस्तीतिशेषः ६ स्वजनेनसार्द्धंविग्रहंमामातिपद्यतांभवान्मागादि
त्यर्थः ७ समीक्षाविचारपूर्विकाबुद्धिः ८ अथवेति भीमादिवद्भवेसहवासात्तवपुत्रस्ययुधिष्ठिरेणस्नेहश्चेद्भवेत्तर्हिंकृतकृत्योभविष्यसीत्यर्थः ९ । १०

एतदपिदुर्घटमित्याह अथवेति । नमृतस्यापिसर्पतीतिपाठेसहजोदोषोजन्मांतरेऽप्यनुवर्ततइत्यर्थः ११ अत्रयत्क्षमंउचितंतत्पुराकार्यमन्यथावोयुष्माकमर्थःप्रयोजनमभिवर्द्धतेनश्यति । निवर्त्ततेइतिपाठेऽपिसएवार्थः । अतिवर्त्ततइतिपाठेवोयुष्मानर्थोऽतिक्रामतिअतीत्यगच्छतीत्यर्थः १२ ॥ ॥ इतिआरण्यके० नै०भा० अष्टमोध्यायः ८ ॥ ॥ भगवन्निति १ । २ । ३ परं शत्रुंशोकहेतुत्वात्परंश्रेष्ठंप्रीतिहेतुत्वात् नकुपुत्रात्परःशत्रुर्नसत्पुत्रात्परःसखेत्युक्तेः ४ सुरभ्यादेवधेन्वाअन्यैरन्नवस्त्रादिभिर्हेतुभिःपरंश्रेष्ठस्यानंनविद्यतेअपितुपुत्रादेव । तथाचश्रुतिः 'अन्नंह

अथवाजायमानस्ययच्छीलमनुजायते ॥ श्रूयतेतन्महाराजनामृतस्यापसर्पति ११ कथंवामन्यतेभीष्मोद्रोणोऽथविदुरोऽपिवा ॥ भवान्वाऽत्रक्षमंकार्यंपुरा वोऽर्थोऽभिवर्धते १२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअरण्यपर्वणिव्यासवाक्येऽष्टमोऽध्यायः ८ ॥ ॥ धृतराष्ट्रउवाच ॥ भगवन्नाहमप्येत द्रोचयेद्यूतसंभवम् ॥ मन्येतद्विधिनाऽऽकृष्यकारितोऽस्मीतिवैमुने १ नैतद्रोचयतेभीष्मोनद्रोणोविदुरोनच ॥ गांधारीनेच्छतिद्यूतंतत्रमोहात्प्रवर्तितम् २ परित्यक्तुंनशक्नोमिदुर्योधनमचेतनम् ॥ पुत्रस्नेहेनभगवन्जानन्नपिप्रियव्रत ३ ॥ व्यासउवाच ॥ वैचित्रवीर्यनृपतेसत्यमाहयथाभवान् ॥ दृढंविद्मःपरंपुत्रंपरं पुत्रान्नविद्यते ४ इंद्रोऽप्यश्रुनिपातेनसुरभ्याप्रतिबोधितः ॥ अन्यैःसमृद्धैरप्यर्थैर्नसुतान्मन्यतेपरम् ५ अत्रतेवर्तयिष्यामिमहदाख्यानमुत्तमम् ॥ सुरभ्या श्चसंवादमिंद्रस्यचविशांपते ६ त्रिविष्टपगताराजन्सुरभीप्रारुदत्किल ॥ गवांमातापुरातातताभिंद्रोऽन्वकृपायत ७ ॥ इंद्रउवाच ॥ किमिदंरोदिषि शुभेकच्चित्क्षेमंदिवौकसाम् ॥ मनुष्येष्वथनागेषुनैतदल्पंभविष्यति ८ ॥ सुरभिरुवाच ॥ विनिपातोनतेकश्चिद्दृश्यतेत्रिदशाधिप ॥ अहंतुपुत्रंशोचामितेन रोदिमिकौशिक ९ पश्यैनंकर्षकंक्षुद्रंदुर्बलंममपुत्रकम् ॥ प्रतोदेनाभिनिघ्नंतंलांगलेनचपीडितम् १० निषीदमानंसोत्कंठंवध्यमानंसुराधिप ॥ कृपाविष्टाऽ स्मिदेवेंद्रमनश्चोद्विजतेमम ॥ एकस्तत्रबलोपेतोधुरमुद्वहतेऽधिकाम् ११ अपरोऽप्यबलप्राणःकृशोधमनिसंततः ॥ कृच्छ्राद्वुद्वहतेभारंतंवैशोचामिवासव १२ वध्यमानःप्रतोदेनतुद्यमानःपुनःपुनः ॥ नैवशक्नोतितंभारमुद्वोढुंपश्यवासव १३ ततोऽहंतस्यशोकार्ताविरौमिभृशदुःखिता ॥ अश्रूण्यावर्तयंतीचनेत्राभ्यां करुणायती १४ ॥ शक्रउवाच ॥ तवपुत्रसहस्रेषुपीड्यमानेषुशोभने ॥ किंकृपायितवत्यत्रपुत्रएकत्रहन्यति १५ ॥ सुरभिरुवाच ॥ यदिपुत्रसहस्राणिसर्वे त्रसमतैवमे ॥ दीनस्यतुसतःशक्रपुत्रस्याभ्यधिकाकृपा १६ ॥ ॥ व्यासउवाच ॥ ॥ तदिंद्रःसुरभीवाक्यंनिशम्यभृशविस्मितः ॥ जीवितेनापिकौरव्य मेनेऽभ्यधिकमात्मजम् १७ प्रववर्षचतत्रैवसहसातोयमुल्बणम् ॥ कर्षकस्याचरन्विघ्नंभगवान्पाकशासनः १८

प्राणंशरणंहवासोरूपंहिरण्यंपशवोविवाहाः । सखाहजायाकृपणंहदुहिताज्योतिर्हपुत्रःपरमेव्योमन्'इति ५ अत्रपुत्रस्यशोकहेतुत्वेर्थे ६ अन्वकृपायतानुकंपितवान् ७ । ८ कौशिकहेइंद्र ९ प्रतोदेनतीक्ष्णाग्रलोहवतादंडेन १० धुरंभारं ११ धमनिसंततःशिराभिर्व्याप्तःनिर्मांसइत्यर्थः १२ वधोदंडाघातेन तोदःप्रतोदेन १३ । १४ कृपायितवतीकृपांकृतवती । पाठांतरेकृपायितं कृपेवहन्यतिहन्यमाने । पुत्रएकोहिहन्यतेइतिपाठेबहुषुपुत्रेषुहिप्रसिद्धं एकःकश्चिद्धन्यतएवेत्यर्थः १५ । १६ । १७ उल्बणमुत्कटम् १८

१९ । २० मंदास्त्वत्पुत्रवत्कपटानभिज्ञाः २१ । २२ । २३ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेनवमोऽध्यायः ॥ ९ ॥ एवमिति विनाशकालेसाधूनपिमूढाअवजानंतीत्यध्याय तात्पर्यं १ । २ । ३ अन्विष्यअवेक्ष्यभ्रातृन्पंचेतिशेषः ४ अनुशास्ताअनुशासिष्यति ५ अक्रियायामकरणेकार्यस्यावश्यकर्तव्यस्य ६ । ७ क्रियाभिःसत्कारैः ८ । ९ । १० यदृच्छयादैवात्

तद्यथासुरभिःप्राहसमवेतास्तुतेतथा ॥ सुतेषुराजन्सर्वेषुहीनेष्वभ्यधिकाकृपा १९ यादृशोमेसुतःपांडुस्तादृशोमेऽसिपुत्रक ॥ विदुरश्चमहाप्राज्ञःस्नेहादेत द्ब्रवीम्यहम् २० चिरायतवपुत्राणांशतमेकश्चभारत ॥ पांडोःपंचैवलक्ष्यंतेतेऽपिमंदाःसुदुःखिताः २१ कथंजीवेयुरत्यंतंकथंवर्धेयुरित्यपि ॥ इतिदीनेषुपार्थे षुमनोमेपरितप्यते २२ यदिपार्थिवकौरव्यान्जीवमानानिहेच्छसि ॥ दुर्योधनस्तवसुतःशममगच्छतुपांडवैः २३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणि अरण्यपर्वणिसुरभ्युपाख्यानेनवमोऽध्यायः ९ ॥ ॥ धृतराष्ट्रउवाच ॥ एवमेतन्महाप्राज्ञयथावदसिनोमुने ॥ अहंचैवविजानामिसर्वेचेमेनराधिपाः १ भवांश्चमन्यतेसाधुयत्कुरूणांमहोदयम् ॥ तदेवविदुरोऽप्याहभीष्मोद्रोणश्चमांमुने २ यदित्वहमनुग्राह्यःकौरव्येषुदयायदि ॥ अन्वशाधिदुरात्मानंपुत्रंदुर्योध नंमम ३ ॥ व्यासउवाच ॥ अयमायातिवैराजन्मैत्रेयोभगवानृषिः ॥ अन्विष्यपांडवान्भ्रातॄनिहैत्यस्मद्दिदृक्षया ४ एषदुर्योधनंपुत्रंतवराजन्महानृषिः ॥ अनुशास्तायथान्यायंशमायास्यकुलस्यच ५ ब्रूयाद्यदेषकौरव्यतत्कार्यमविशंकया ॥ अक्रियायांतुकार्यस्यपुत्रंतेशप्स्यतेरुषा ६ ॥ वैशंपायनउवाच ॥ ए वमुक्त्वाययौव्यासोमैत्रेयःप्रत्यदृश्यत ॥ पूजयाप्रतिजग्राहसपुत्रस्तंनराधिपः ७ अर्घ्याद्याभिःक्रियाभिर्वैविश्रांतंमुनिसत्तमम् ॥ प्रश्रयेणाब्रवीद्राजाधृतराष्ट्रों बिकासुतः ८ सुखेनागमनंकच्चिद्भगवन्कुरुजांगलान् ॥ कच्चित्कुशलिनोवीराभ्रातरःपंचपांडवाः ९ समयेस्थातुमिच्छंतिकच्चिच्चभरतर्षभाः ॥ कच्चित्कुरूणां सौभ्रात्रमव्युच्छिन्नंभविष्यति १० ॥ मैत्रेयउवाच ॥ तीर्थयात्रामनुक्रामन्प्राप्तोस्मिकुरुजांगलान् ॥ यदृच्छयाधर्मराजंदृष्टवान्काम्यकेवने ११ तंजटाजिनसं वीतंतपोवननिवासिनम् ॥ समाजग्मुर्महात्मानंद्रष्टुंमुनिगणाःप्रभो १२ तत्राश्रौषंमहाराजपुत्राणांतवविभ्रमम् ॥ अनयंद्यूतरूपेणमहाभयमुपस्थितम् १३ ततोऽहंत्वामनुप्राप्तःकौरवाणामवेक्षया ॥ सदाह्यभ्यधिकःस्नेहःप्रीतिश्चत्वयिमेप्रभो १४ नैतदौपयिकंराजंस्त्वयिभीष्मेचजीवति ॥ यदन्योन्येनतेपुत्राविरो ध्यंतेकथंचन १५ मेढीभूतःस्वयंराजन्निग्रहेप्रग्रहेभवान् ॥ किमर्थमनयंघोरमुत्पद्यंतमुपेक्षसे १६ दस्यूनामिवयद्वृत्तंसभायांकुरुनंदन ॥ तेनन्भ्राजसेराजंस्ता पसानांसमागमे १७ ॥ वैशंपायनउवाच ॥ ततोव्यावृत्त्यराजानंदुर्योधनममर्षणम् ॥ उवाचश्लक्ष्णयावाचामैत्रेयोभगवानृषिः १८ ॥ मैत्रेयउवाच ॥ दुर्यो धनमहाबाहोनिबोधवदतांवर ॥ वचनंमेमहाभागब्रुवतोयद्धितंतव १९ माऽद्रुहःपांडवान्राजन्कुरुष्वप्रियमात्मनः ॥ पांडवानांकुरूणांचलोकस्यचनरर्षभ २०

११ । १२ विभ्रमंद्यूतानर्थेऽप्यर्थबुद्धिं १३ । १४ औपयिकंयोग्यं १५ मेढीभूतः खलदामस्तंभीभूतः प्रग्रहेअनुग्रहे १६ । १७ व्यावृत्त्याभिमुखीभूयेत्यर्थः १८ । १९ । २०

विक्रांतयोधिनःविक्रांताश्चयुद्धशलिाश्च वज्रसंहननाःवज्रकायाअतएवदृढाः २१ । २२ प्रद्रवतांगच्छतां २३ समरंजेतुमितिपाठेसमइत्यध्याहारः २४ पशुमारेणपशुमारणप्रकारेण २५
२६ । २७ मन्युवशंक्रोधवशंमेतिनिषेधार्थोनिपातोनतुमाङ् २८ । २९ । ३० । ३१ प्रणुदितःप्रेरितः । प्रचुदितइतिपाठेऽपिसएवार्थः ३२ । ३३ । ३४ । ३५ । ३६ विलक्षयन्भीमस्यबलं

तेहिसर्वेनरव्याघ्राःशूराविक्रांतयोधिनः ॥ सर्वेनागायुतप्राणावज्रसंहननादृढाः २१ सत्यव्रतधराःसर्वेसर्वेपुरुषमानिनः ॥ हंतारोदेवशत्रूणांरक्षसांकामरूपिणां
२२ हिडिंबबकमुख्यानांकिर्मीरस्यचरक्षसः ॥ इतःप्रद्रवतांरात्रौयःसतेषांमहात्मनाम् २३ आवृत्यमार्गंरौद्रात्मातस्थौगिरिरिवाचलः ॥ तंभीमःसमरश्लाघी
बलेनबलिनांवरः २४ जघानपशुमारेणव्याघ्रःक्षुद्रमृगंयथा ॥ पश्यदिग्विजयेराजन्यथाभीमेनपातितः २५ जरासंधोमहेष्वासोनागायुतबलोयुधि ॥ संबं
धीवासुदेवश्चश्यालाःसर्वेचपार्षताः २६ कस्तान्युधिसमासीतजरामरणवान्नरः ॥ तस्यतेशमएवास्तुपांडवैर्भरतर्षभ २७ कुरुमेवचनंराजन्मामन्युवशम
न्वगाः ॥ ॥ वैशंपायनउवाच ॥ ॥ एवंतुब्रुवतस्तस्यमैत्रेयस्यविशांपते २८ ऊरुंगजकराकारंकरेणाभिजघानसः ॥ दुर्योधनःस्मितंकृत्वाचरणेनोल्लिखन्महीं
२९ नकिंचिदुक्त्वादुर्मेधास्तस्थौकिंचिदवाङ्मुखः ॥ तमशुश्रूषमाणंतुविलिखंतंवसुंधराम् ३० दृष्ट्वादुर्योधनंराजन्मैत्रेयंकोपआविशत् ॥ सकोपवशमापन्नो
मैत्रेयोमुनिसत्तमः ३१ विधिनासंप्रणुदितःशापायास्यमनोदधे ॥ ततःसवार्युपस्पृश्यकोपसंरक्तलोचनः ॥ मैत्रेयोधार्तराष्ट्रंतमशपद्दुष्टचेतसम् ३२ यस्मात्त्वं
मामनादृत्यनेमांवाचंचिकीर्षसि ॥ तस्मादस्याभिमानस्यसद्यःफलमवाप्नुहि ३३ त्वदभिद्रोहसंयुक्तंयुद्धमुत्पत्स्यतेमहत् ॥ तत्रभीमोगदाघातैस्तवोरुंभेत्स्यते
बली ३४ इत्येवमुक्तेवचनेधृतराष्ट्रोमहीपतिः ॥ प्रसादयामासमुनिंनैतदेवंभवेदिति ३५ ॥ ॥ मैत्रेयउवाच ॥ ॥ शमंयास्यतिचेत्पुत्रस्तवराजन्यदातदा ॥
शापोनभविताताततविपरीतेभविष्यति ३६ ॥ ॥ वैशंपायनउवाच ॥ ॥ विलक्षयंस्तुराजेंद्रोदुर्योधनपितातदा ॥ मैत्रेयंप्राहकिर्मीरःकथंभीमेनपातितः ३७
॥ मैत्रेयउवाच ॥ ॥ नाहंवक्ष्यामितेभूयोनतेशुश्रूषतेसुतः ॥ एषतेविदुरःसर्वमाख्यास्यतिगतेमयि ३८ इत्येवमुक्त्वामैत्रेयःप्रातिष्ठतयथागतम् ॥ किर्मीर
वधसंविग्नोबहिर्दुर्योधनोययौ ३९ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअरण्यपर्वणिमैत्रेयशापेदशमोऽध्यायः ॥ १० ॥ ॥ समाप्तंचारण्यपर्व ॥ अथकि
र्मीरवधपर्व ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ किर्मीरस्यवधंक्षत्तःश्रोतुमिच्छामिकथ्यतां ॥ रक्षसाभीमसेनस्यकथमासीत्समागमः १ ॥ विदुरउवाच ॥ ॥ शृणुभी
मस्यकर्मेदमतिमानुषकर्मणः ॥ श्रुतपूर्वंमयातेषांकथांतेषुपुनःपुनः २ इतःप्रयाताराजेंद्रपांडवाद्यूतनिर्जिताः ॥ जग्मुस्त्रिभिरहोरात्रैःकाम्यकंनामतद्वनम् ३

विशेषेणअयमस्मज्जय्योनवेतिराक्षसबलद्वारालक्षयन् हेतौशतृप्रत्ययः । विलक्षणइतिपाठेदुर्योधनस्यदुराग्रहेणशापमयाद्विच्छायः । वलक्षस्तत्रेतिपाठेवलक्षोधवलोऽर्जुनइति कोशात्सएव
वार्थः ३७ । ३८ किर्मीरवधसंविग्नःकिर्मीरस्यवधोयस्मात्तस्माद्भीमसेनात्संविग्नः शत्रुयशोदुःखश्रवणमित्यर्थः ३९ इतिआरण्यकेप०नै०भार०दशमोऽध्यायः॥१०॥किर्मीरस्येति १ । २ । ३

आभीलेभयंकरे । स्वाभीलेइत्यपिपाठः । 'आभीलंभीषणेकृच्छ्रे'इतिविश्वः । अर्द्धसमयेऽर्द्धज्ञानेगतेसतिलोकेतंद्रावतिसतीत्यर्थः । 'समयःशपथाचारकालसिद्धांतसंविदोः'इतिविश्वः संप्राप्तेइ
त्यपपाठः ४ । ५ । ६ । ७ स्पष्टेतिअक्षिबलाकयोःकेशार्करश्म्योर्दंततडितोश्चोपमोपमेयभावः । तडिद्वक्रमित्यपपाठः ८'महानादःकुंजरेस्याद्वार्षिकाब्देभयानके'इति विश्वः ९ संपेतुःपक्षीव

रात्रौनिशीथेत्वाभीलेगतेऽर्धसमयेनृप ॥ प्रचारेपुरुषादानांरक्षसांघोरकर्मणां ४ तद्वनंतापसानित्यंशेषाश्चवनचारिणः ॥ दूरात्परिहरंतिस्मपुरुषादभयात्कि
ल ५ तेषांप्रविशतांतत्रमार्गमावृत्यभारत ॥ दीप्ताक्षंभीषणंरक्षःसोल्मुकंप्रत्यपद्यत ६ बाहूमहांतौकृत्वाचतथास्यंचभयानकं ॥ स्थितमावृत्यपंथानंयेनयांति
कुरूद्वहाः ७ स्पष्टाष्टदंष्ट्रंताम्राक्षंप्रदीप्तोर्ध्वशिरोरुहम् ॥ सार्करश्मितडिच्चक्रंसबलाकमिवांबुदम् ८ सृजंतंराक्षसींमायांमहानादनिनादितम् ॥ मुंचंतंविपु
लान्नादान्सतोयमिवतोयदम् ९ तस्यनादेनसंत्रस्ताःपक्षिणःसर्वतोदिशम् ॥ विमुक्तनादाःसंपेतुःस्थलजाजलजैःसह १० संप्रद्रुतमृगद्वीपिमहिषर्क्षसमाकु
लम् ॥ तद्वनंतस्यनादेनसंप्रस्थितमिवाभवत् ११ तस्योरुवाताभिहतास्ताम्रपल्लवबाहवः ॥ विदूरजाताश्चलताःसमाश्लिष्यंतिपादपान् १२ तस्मिन्क्षणेऽ
थप्रववौमारुतोभृशदारुणः ॥ रजसासंवृतंतेननष्टज्योतिरभून्नभः १३ पंचानांपांडुपुत्राणामविज्ञातोमहारिपुः ॥ पंचानामिंद्रियार्थानांशोकावेशइवातुलः १४
सदृष्ट्वापांडवान्दूरात्कृष्णाजिनसमावृतान् ॥ आवृणोत्तद्वनद्वारंमैनाकइवपर्वतः १५ तंसमासाद्यवित्रस्ताकृष्णाकमललोचना ॥ अदृष्टपूर्वंसंत्रासान्न्यमीलयत
लोचने १६ दुःशासनकरोत्सृष्टविप्रकीर्णशिरोरुहा ॥ पंचपर्वतमध्यस्थानदीवाकुलतांगता १७ मोमुह्यमानांतांतत्रजगृहुःपंचपांडवाः ॥ इंद्रियाणिप्रसक्ता
निविषयेषुयथारतिम् १८ अथतांराक्षसींमायामुत्थितांघोरदर्शनाम् ॥ रक्षोघ्नैर्विविधैर्मंत्रैर्धौम्यःसम्यक्प्रयोजितैः १९ पश्यतांपांडुपुत्राणांनाशयामासवीर्य
वान् ॥ सनष्टमायोऽतिबलःक्रोधविस्फारितेक्षणः २० काममूर्तिधरःक्रूरःकालकल्पोव्यदृश्यत ॥ तमुवाचततोराजादीर्घप्रज्ञोयुधिष्ठिरः २१ कोभवान्कस्य
वाकिंतेक्रियतांकार्यमुच्यताम् ॥ प्रत्युवाचाथतद्रक्षोधर्मराजंयुधिष्ठिरम् २२ अहंबकस्यवैभ्राताकिर्मीरइतिविश्रुतः ॥ वनेऽस्मिन्काम्यकेशून्येनिवासामिगत
ज्वरः २३ युधिनिर्जित्यपुरुषानाहारंनित्यमाचरन् ॥ केयूयमभिसंप्राप्ताभक्ष्यभूताममांतिकम् ॥ युधिनिर्जित्यवःसर्वान्भक्षयिष्येगतज्वरः २४ ॥ ॥ वैशं
पायनउवाच ॥ युधिष्ठिरस्तुतच्छ्रुत्वावचस्तस्यदुरात्मनः ॥ आचचक्षेततःसर्वंगोत्रनामादिभारत २५ ॥ युधिष्ठिरउवाच ॥ पांडवोधर्मराजोऽहंयदितेश्रोत्र
मागतः॥सहितोभ्रातृभिःसर्वैर्भीमसेनार्जुनादिभिः२६हृतराज्योवनेवासंवस्तुंकृतमतिस्ततः॥वनमभ्यागतोघोरमिदंतवपरिग्रहम्२७॥ विदुरउवाच॥किर्मीरस्त्व
ब्रवीदेनंदिष्ट्यादेवैरिदंमम॥उपपादितमद्येहचिरकालान्मनोगतम् २८भीमसेनवधार्थंहिनित्यमभ्युद्यतायुधः॥ चरामिपृथिवींकृत्स्नांनैनंचासादयाम्यहम् २९

मुदुः १० । ११ । १२ । १३ पंचानांशब्दादीनामिंद्रियार्थानामिंद्रियैरर्थ्यमानानांकवे शोकावेशःशोकावमः १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९

३० वैत्रकीयवनेएकचक्रायां ३१ मद्बंमम ३२ । ३३ । ३४ लब्धास्मिलप्स्यामि ३५ । ३६ महासुरेतातार्पि ३७ । ३८ आरुज्यभंक्त्वा दशव्यामं व्यामोविस्तारितयोःकरयोस्तिर्यगंतरंउ द्विद्ममुत्पाटितं ३९ वज्रेणनिष्पेषश्चूर्णीभावोयस्यपर्वतस्यतद्वत्गौरवंगुरुत्वंयस्यतत्तथा ४० । ४१ कक्ष्यामुत्पीडचपरिधानवस्त्रंदृढीकृत्य ४२ । ४३ । ४४ उदस्तमुत्क्षिप्तंअलातमुल्मुकं ४५

सोऽयमासादितोदिष्ट्याभ्रातृहाकांक्षितश्चिरम् ॥ अनेनहिममभ्राताबकोविनिहतःप्रियः ३० वैत्रकीयवनेराजन्ब्राह्मणच्छद्मरूपिणा ॥ विद्याबलमुपाश्रित्यनह्यस्त्यस्यौरसंबलम् ३१ हिडिंबश्चसखामह्यंदयितोवनगोचरः ॥ हतोदुरात्मनाऽनेनस्वसाचास्यहृतापुरा ३२ सोऽयमभ्यागतोमूढोममेदंगहनंवनम् ॥ प्रचारसमयेस्माकमर्द्धरात्रेस्थितेसमे ३३ अद्यास्ययातयिष्यामितद्वैरंचिरसंभृतम् ॥ तर्पयिष्यामिचबकंरुधिरेणास्यभूरिणा ३४ अद्याहमनृणोभूत्वाभ्रातुःसख्युस्तथैवच ॥ शांतिंलब्धाऽस्मिपरमांहत्वाराक्षसकंटकम् ३५ यदितेनपुरामुक्तोभीमसेनोबकेनवै ॥ अद्यैनंभक्षयिष्यामिपश्यतस्तेयुधिष्ठिर ३६ एनंहिविपुलप्राणमद्यहत्वावृकोदरम् ॥ संभक्ष्यजरयिष्यामियथाऽगस्त्योमहासुरम् ३७ एवमुक्तस्तुधर्मात्मासत्यसंधोयुधिष्ठिरः ॥ नैतदस्तीतिसक्रोधोभर्त्सयामासराक्षसम् ३८ ततोभीमोमहाबाहुरारुज्यतरसाद्रुमम् ॥ दशव्याममथोद्विद्धंनिष्पत्रमकरोत्तदा ३९ चकारसज्यंगांडीवंवज्रनिष्पेषगौरवम् ॥ निमेषांतरमात्रेणतथैवविजयोऽर्जुनः ४० निवार्यभीमोजिष्णुंतंतद्रक्षोमेघनिःस्वनम् ॥ अभिद्रुत्याब्रवीद्वाक्यंतिष्ठतिष्ठेतिभारत ४१ इत्युक्त्वैनमतिक्रुद्धःकक्ष्यामुत्पीडचपांडवः ॥ निष्पिष्यपाणिनापाणिंसंदष्टौष्ठपुटोबली ४२ तमभ्यधावद्वेगेनभीमोवृक्षायुधस्तदा ॥ यमदंडप्रतीकाशंततस्तंतस्यमूर्धनि ४३ पातयामासवेगेनकुलिशंमघवानिव ॥ असंभ्रांतंतुतद्रक्षःसमरेप्रत्यदृश्यत ४४ चिक्षेपचोल्मुकंदीप्तमशनिंज्वलितामिव ॥ तदुदस्तमलातंतुभीमःप्रहरतांवरः ४५ पदासव्येनचिक्षेपतद्रक्षःपुनरावजत् ॥ किर्मीरश्चापिसहसावृक्षमुत्पाट्यपांडवम् ४६ दंडपाणिरिवक्रुद्धःसमरेप्रत्यधावत ॥ तद्वृक्षयुद्धमभवन्महीरुहविनाशनम् ४७ वालिसुग्रीवयोर्भ्रात्रोर्यथास्त्रीकांक्षिणोःपुरा ॥ शीर्षयोःपतितावृक्षाबिभिदुर्नैकधातयोः ४८ यथैवोत्पलमालानिमत्तयोर्द्विपयोस्तथा ॥ मुंजवज्जर्जरीभूताबहवस्तत्रपादपाः ४९ चीराणीवव्युदस्तानिरेजुस्तत्रमहावने ॥ तद्वृक्षयुद्धमभवन्मुहूर्तंभरतर्षभ ॥ राक्षसानांचमुख्यस्यनराणामुत्तमस्यच ५० ततःशिलांसमुत्क्षिप्यभीमस्ययुधितिष्ठतः ॥ प्राहिणोद्राक्षसःक्रुद्धोभीमश्चनचचालह ५१ तंशिलाताडनजडंपर्यधावतराक्षसः ॥ बाहुविक्षिप्तकिरणःस्वर्भानुरिवभास्करम् ५२ तावन्योन्यंसमाश्लिष्यप्रकर्षंतौपरस्परम् ॥ उभावपिचकाशेतेप्रवृद्धौवृषभाविव ५३ तयोरासीत्सुतुमुलःसंप्रहारःसुदारुणः ॥ नखदंष्ट्रायुधवतोर्व्याघ्रयोरिवदृप्तयोः ५४ दुर्योधननिकाराच्चबाहुवीर्याच्चदर्पितः ॥ कृष्णानयनदृष्टश्चव्यवर्द्धतवृकोदरः ५५

रक्षःराक्षसंआवजत्आगच्छत् ४६ । ४७ स्त्रीतारा ४८ उत्पलमालानिपद्मक्षेत्राणि । 'मालंक्षेत्रेजनेमाले'इति विश्वः । पद्मसमूहइत्यर्थः ४९ चीराणिवृक्षवल्कलानि ५०।५१ । ५२ । ५३ ५४ निकारात्परिभवात् कृष्णानयनंदृष्टंयेनसतथा द्रौपद्याकर्षणेनकुपितइत्यर्थः ५५ ॥११॥

प्रभिन्नकरटामुखंप्रभिन्नेव्यक्तीभूतेकरटयोर्गंडयोर्मुखेमदनिर्गमनमार्गोयस्यतं ५६ । ५७ । ५८ । ५९ व्यस्पंदतकिंचिच्चलनंकृतवान् ६० योक्त्रयामासबबंधरशनयापशुमिव ६१ । ६२ पशुमारंपशुमिवमारयित्वा । कथादित्वादनुप्रयोगःसमूलघातंन्यवधीदरीश्चैतिवत् ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ ॥ इत्यारण्यकेपर्वणिनैलकंठीये

अभिपद्यचबाहुभ्यांप्रत्यगृह्णादमर्षितः ॥ मातंगमिवमातंगःप्रभिन्नकरटामुखम् ५६ सचाप्येनंततोरक्षःप्रतिजग्राहवीर्यवान् ॥ तमाक्षिपद्भीमसेनोबलेनबलिनांवरः ५७ तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा ॥ शब्दःसमभवद्घोरोवेणुस्फोटसमोयुधि ५८ अथैनमाक्षिप्यबलाद्गृह्यमध्येवृकोदरः ॥ धूनयामासवेगेनवायुश्चंडइवद्रुमम् ५९ सभीमेनपरामृष्टोदुर्बलोबलिनारणे ॥ व्यस्पंदतयथाप्राणंविचकर्षचपांडवम् ६० ततएनंपरिश्रांतमुपलक्ष्यवृकोदरः ॥ योक्त्रयामासबाहुभ्यांपशुंरशनयायथा ६१ विनदंतंमहानादंभिन्नभेरीस्वनंबली ॥ भ्रामयामाससुचिरंविस्फुरंतमचेतसम् ६२ तंविषिदंतमाज्ञायराक्षसंपांडुनंदनः ॥ प्रगृह्यतरसादोर्भ्यांपशुमारममारयत् ६३ आक्रम्यचकटीदेशेजानुनाराक्षसाधमम् ॥ पीडयामासपाणिभ्यांतस्यकंठंवृकोदरः ६४ अथजर्जरसर्वांगंव्याविद्धनयनांबरम् ॥ भूतलेभ्रामयामासवाक्यंचेदमुवाचह ६५ हिडिंबबकयोःपापनत्वमश्रुप्रमार्जनम् ॥ करिष्यसिगतश्चापियमस्यसदनंप्रति ६६ इत्येवमुक्त्वापुरुषप्रवीरस्तंराक्षसंक्रोधपरीतचेताः ॥ विस्रस्तवस्त्राभरणंस्फुरंतमुद्भ्रांतचित्तंव्यसुमुत्ससर्ज ६७ तस्मिन्हतेतोयदतुल्यरूपेकृष्णांपुरस्कृत्यनरेंद्रपुत्राः ॥ भीमंप्रशस्याथगुणैरनेकैर्हृष्टास्ततोद्वैतवनायजग्मुः ६८ ॥ विदुरउवाच ॥ एवंविनिहतःसंख्येकिर्मीरोमनुजाधिप ॥ भीमेनवचनात्तस्यधर्मराजस्यकौरव ६९ ततोनिष्कंटकंकृत्वावनंतदपराजितः ॥ द्रौपद्यासहधर्मज्ञोवसतिंतामुवासह ७० समाश्वास्यचतेसर्वेद्रौपदींभरतर्षभाः ॥ प्रहृष्टमनसःप्रीत्याप्रशशंसुर्वृकोदरम् ७१ भीमबाहुबलोत्पिष्टेविनष्टेराक्षसेततः ॥ विविशुस्तेवनंवीराःक्षेमंनिहतकंटकम् ७२ समयागच्छतामार्गेविनिकीर्णोभयावहः ॥ वनेमहतिदुष्टात्मादृष्टोभीमबलाद्धतः ७३ तत्राश्रौषमहंचैतत्कर्मभीमस्यभारत ॥ ब्राह्मणानांकथयतांयेतत्रासन्समागताः ७४ ॥ वैशंपायनउवाच ॥ एवंविनिहतंसंख्येकिर्मीरंरक्षसांवरम् ॥ श्रुत्वाध्यानपरोराजानिशश्वासार्तवत्तदा ७५ ॥ इतिश्रीम० आरण्यकेपर्वणिकिर्मीरवधपर्वणिविदुरवाक्येएकादशोऽध्यायः ॥ ११ ॥ समाप्तंचकिर्मीरवधपर्व ॥ अथार्जुनाभिगमनपर्व ॥ ॥ वैशंपायनउवाच ॥ भोजाःप्रव्रजितान्श्रुत्वावृष्णयश्चांधकैःसह ॥ पांडवान्दुःखसंतप्तान्समाजग्मुर्महावने १ पांचालस्यचदायादोधृष्टकेतुश्चचेदिपः ॥ केकयाश्चमहावीर्याभ्रातरोलोकविश्रुताः २ वनेद्रष्टुंययुःपार्थान्क्रोधामर्षसमन्विताः ॥ गर्हयंतोधार्तराष्ट्रान्किंकुर्मइतिचाब्रुवन् ३ वासुदेवंपुरस्कृत्यसर्वेतेक्षत्रियर्षभाः ॥ परिवार्योपविविशुर्धर्मराजंयुधिष्ठिरम् ॥ अभिवाद्यकुरुश्रेष्ठंविषण्णःकेशवोऽब्रवीत् ४

भारतभावदीपेएकादशोऽध्यायः ॥ ११ ॥ एवमधर्मरुचीनांदुर्योधनादीनांव्यासादिभिरात्मोपदेशेकृतेऽपि मैत्रेयशापेऽपि किर्मीरवधेनमहाभयेऽपि प्रत्युपस्थितेसातिनधर्मरुचित्वमयतइत्युक्तम् । संप्रतिधर्मरुचीनांपांडवानामुपरि परमेश्वरस्येतरेषांचानुग्रहं पांडवानांकृष्णतत्त्वविज्ञानंचवर्णयति भोजाःप्रव्रजितानित्यादिनाऽध्यायेन १ । २ । ३ । ४

दुःशासनश्चतुर्थोयेषां ५ तस्यदुर्योधनस्यपदानुगाःसहायाः ६ निकृत्याछलेनोपचरन्वर्तमानः ७ अभिषंगेणदुःखेनपराभवेनवा ८ । ९ पुरुषस्यपुरिशरीरेशयानस्याप्रमेयस्याहंकारादिवत् प्रमातुमयोग्यस्यअविषयित्वात् अतएवसत्वस्यकालत्रयेऽपिबाधशून्यस्य विषयस्यहिबाधःस्वप्नादौदृष्टः । अमिततेजसस्त्रिविधपरिच्छेदशून्यचिन्मात्रस्य प्रजापतिपतेःसूत्रविराजोरपिस्वा मिनः । विष्णोर्व्यापकस्य लोकनाथस्यांतर्यामिणः । एवंतत्पदार्थमुक्त्वात्वंपदार्थमाहधीमतइति बुद्ध्युपाधेःअनयोःसामानाधिकरण्यादभेदःअस्यैवसूत्रभूतस्यश्लोकस्यविवरणमुत्तरोग्रंथः १० तत्रतपस्विनांक्षमैवोचितेतिदर्शयितुंभगवतःक्रोधोपशमनायतदीयंजन्मांतरीयंतपएवतावदुदाहरति दशेत्यादिना यत्रसायंकालस्तत्रैवगृहंयस्यसयत्रसायंगृहइत्येकंपदं ११ । १२।१३ अवकृष्टोत्तरासंगस्त्यक्तोत्तरीयवस्त्रः १४।१५ तपसःप्रयोजनमाहलोकेति १६ क्षेत्रज्ञःसर्वभूतानामादिरंतश्चकेशवेत्यस्यार्थः क्षेत्रं । 'महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच ॥इंद्रियाणिदशैकंचपं

॥ वासुदेवउवाच ॥ दुर्योधनस्यकर्णस्यशकुनेश्चदुरात्मनः ॥ दुःशासनचतुर्थानांभूमिःपास्यतिशोणितम् ५ एतान्निहत्यसमरेयेचतस्यपदानुगाः ॥ तांश्चस र्वान्विनिर्जित्यसहितान्सनराधिपान् ६ ततःसर्वेऽभिषिंचामोधर्मराजंयुधिष्ठिरम् ॥ निकृत्योपचरन्वध्यएषधर्मःसनातनः ७ ॥ वैशंपायनउवाच ॥ पार्थाना मभिषंगेणतथाक्रुद्धंजनार्दनम् ॥ अर्जुनःशमयामासदिधक्षंतामिवप्रजाः ८ संक्रुद्धंकेशवंदृष्ट्वापूर्वदेहेषुफाल्गुनः ॥ कीर्तयामासकर्माणिसत्यकीर्तेर्महात्मनः ९ पुरुषस्याप्रमेयस्यसत्यस्यामिततेजसः ॥ प्रजापतिपतेर्विष्णोर्लोकनाथस्यधीमतः १० ॥ अर्जुनउवाच ॥ दशवर्षसहस्राणियत्रसायंगृहोमुनिः ॥ व्यचर स्त्वंपुराकृष्णपर्वतेगंधमादने ११ दशवर्षसहस्राणिदशवर्षशतानिच ॥ पुष्करेष्ववसःकृष्णत्वमपोभक्षयन्पुरा १२ ऊर्ध्वबाहुर्विशालायांबदर्यांमधुसूदन ॥ अतिष्ठएकपादेनवायुभक्षःशतंसमाः १३ अवकृष्टोत्तरासंगःकृशोधमनिसंततः ॥ आसीःकृष्णसरस्वत्यांसत्रेद्वादशवार्षिके १४ प्रभासमप्यथासाद्यतीर्थंपुण्य जनोचितम् ॥ तथाकृष्णमहातेजादिव्यंवर्षसहस्रकम् १५ अतिष्ठस्त्वमथैकेनपादेननियमस्थितः ॥ लोकप्रवृत्तिहेतोस्त्वमितिव्यासोममाब्रवीत् १६ क्षेत्रज्ञः सर्वभूतानामादिरंतश्चकेशव ॥ निधानंतपसांकृष्णयज्ञस्त्वंचसनातनः १७ निहत्यनरकंभौममाहृत्यमणिकुंडले ॥ प्रथमोत्पादितंकृष्णमेध्यमश्वमवासृजः १८ कृत्वा तत्कर्मलोकानामृषभःसर्वलोकजित् ॥ अवधीस्त्वंरणेसर्वान्समेतान्दैत्यदानवान् १९ ततःसर्वेश्वरत्वंचसंप्रदायशचीपतेः ॥ मानुषेषुमहाबाहोप्रादुर्भूतोऽसिकेशव २० सत्वंनारायणोभूत्वाहरिरासीःपरंतप ॥ ब्रह्मासोमश्चसूर्यश्चधर्मोधातायमोऽनलः २१ वायुर्वैश्रवणोरुद्रःकालःखंपृथिवीदिशः ॥ अजश्चराचरगुरुःस्रष्टात्वंपुरुषोत्तम २२

चचेंद्रियगोचराः । इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः' । एतत्क्षेत्रमितिभगवताव्याख्यातं कोशपंचकात्मकंतज्ज्ञस्तत्प्रकाशकोऽतरात्मेत्यर्थः । सर्वभूतानांसर्वेषांवियदादीनां जरायुजा दीनांचजीवानामादिःपरमकारणं । अंतोलयस्थानंरजतस्येवशुक्तिः । अवांतरकारणानामविद्याकामकर्मादीनां क्षेत्रमध्येअव्यक्तेच्छादिपदैरुपात्तत्वात् । एतेनप्रपंचस्यमिथ्यात्वाज्जीवपर योरैक्याच्चाद्वैतं कृष्णतत्त्वमुक्तम् १७ भौमंभूमिपुत्रं प्रथमोत्पादितंसर्वभूतानांप्रथमेनाहंकारेणोत्पादितंभूतादिरहंकारइतिप्रसिद्धं मेध्यंयज्ञियम् १८ तत्कर्मअश्वोत्सर्गाख्यम् १९ । २० सत्वंक्षेत्रज्ञः शुद्धचिन्मात्रोभूस्थानीयःसन्नारायणोनरेणपरमात्मनासृष्टंनारंस्थूलसूक्ष्मकारणरूपमुपाधित्रयं तदेवायनंवासस्थानंयस्यसतथा । वृक्षांकुरबीजस्थानीयविराट्सूत्रांतर्यामिरू पोभूत्वा हरिः परिणतबीजसहस्रगर्भफलस्थानीयःसांबमूर्तिरासीः । ईषत्पक्वफलोपमाश्चब्रह्मादयस्त्वमेव २१ हेपुरुषोत्तम उक्तेभ्योबीजादिस्थानीयेभ्यउत्तमभूस्थानीयनिर्विशेषचिन्मात्र रूपअजोविष्णुःचराचरगुरूरुद्रः स्रष्टादक्षप्रजापत्यादिः २२

परायणंसर्वोत्कृष्टंप्राप्यदेवमूर्धादेवश्रेष्ठःक्रतुभिरयजइत्यन्वयः अधृष्यइतिपाठेत्वयजइत्यध्याहारः २३ । २४ । २५ । २६ संप्राप्यसम्यग्व्याप्य आदित्यस्यंदनेसूर्यदेहे भास्करंमंडलाभि मानिनंजीवम् २७ । २८ सादितानिच्छिन्नाःमौरवाःपाशाःतंतिमयाः । मुरवेष्टनेअस्मादौणादिकेउक्प्रत्ययेतद्धितः मौर्वीशब्दोऽप्यतएवमध्यमस्वरलोपेननिष्पन्नः २९ जारूथ्यांनगर्याम् ३० आवप्सीरवाप्तवानसिभोज्यांभोजवंशजाम् ३१ सौभंखेचरंपुरम् ३२ । ३३ । ३४ नृशंस्यंनिर्दयत्वम् । दीर्घपाठेत्वाङ्पूर्वोऽयंशब्दोज्ञेयः ३५ आसीनंचैत्यमध्येत्वां चैत्यमायतनं आ ध्यात्मिकंहृदयपुंडरीकं बाह्यंदेवालयादि चित्तमध्यस्थमित्यपिपाठः नित्यमध्यस्थमितिपाठेऽपि मध्यंहृदयाब्जमेव ३६ आत्मनैवनिमित्तांतरंविनाआत्मसादात्ममात्रम् ३७ युगादौ

परायणंदेवमूर्धाक्रतुभिर्मधुसूदन ॥ अयजोभूरितेजाविकृष्णचैत्ररथेवने २३ शतंशतसहस्राणिसुवर्णस्यजनार्दन ॥ एकैकस्मिंस्तदायज्ञेपरिपूर्णानिभागशः २४ अदितेरपिपुत्रत्वमेत्ययादवनंदन ॥ त्वंविष्णुरितिविख्यातइंद्रादवरजोविभुः २५ शिशुर्भूत्वादिवंखंचपृथिवींचपरंतप ॥ त्रिभिर्विक्रमणैःकृष्णक्रांतवानसितेज सा २६ संप्राप्यदिवमाकाशमादित्यस्यंदनेस्थितः ॥ अत्यरोचश्चभूतात्मन्भास्करंस्वेनतेजसा २७ प्रादुर्भावसहस्रेषुतेषुतेषुत्वयाविभो ॥ अधर्मरुचयःकृष्ण निहताःशतशोऽसुराः २८ सादितामौरवाःपाशानिसुंदनरकौहतौ ॥ कृतःक्षेमःपुनःपंथाःपुरंप्राग्ज्योतिषंप्रति २९ जारूथ्यामाहुतिःक्राथःशिशुपालोजनैःसह ॥ जरासंधश्चशैब्यश्चशतधन्वाचनिर्जितः ३० तथापर्जन्यघोषेणरथेनादित्यवर्चसा ॥ अवाप्सीर्महिषींभोज्यांरणेनिर्जित्यरुक्मिणम् ३१ इंद्रद्युम्नोहतःकोपाद्यव नश्चकसेरुमान् ॥ हतःसौभपतिःशाल्वस्त्वयासौभंचपातितम् ३२ एवमेतेयुधिहताभूयश्चान्याञ्शृणुष्वह ॥ इरावत्यांहतोभोजःकार्तवीर्यसमोयुधि ३३ गोप तिस्तालकेतुश्चत्वयाविनिहतावुभौ ॥ तांचभोगवतींपुण्यामृषिकांतांजनार्दन ३४ द्वारकामात्मसात्कृत्वासमुद्रंगमयिष्यसि ॥ नक्रोधोनचमात्सर्यंनानृतंमधु सूदन ॥ त्वयितिष्ठतिदाशार्हनशृंसंस्यंकुतोऽनृजु ३५ आसीनंचैत्यमध्येत्वांदीप्यमानंस्वतेजसा ॥ आगम्यऋषयःसर्वेऽयाचंताभयमच्युत ३६ युगांतेसर्व भूतानिसंक्षिप्यमधुसूदन ॥ आत्मनैवात्मसात्कृत्वाजगदासीःपरंतप ३७ युगादौतववार्ष्णेयनाभिपद्मादजायत ॥ ब्रह्माचराचरगुरुर्यस्येदंसकलंजगत् ३८ तंहं तुमुद्यतौघोरौदानवौमधुकैटभौ ॥ तयोर्व्यतिक्रमंदृष्ट्वाक्रुद्धस्यभवतोहरेः ३९ ललाटाज्जातवाञ्शंभुःशूलपाणिस्त्रिलोचनः ॥ इत्थंतावपिदेवेशौत्वच्छरीरसमुद्भ वौ ४० त्वन्नियोगकरावेतावितिमेनारदोऽब्रवीत् ॥ तथानारायणपुराक्रतुभिर्भूरिदक्षिणैः ४१ इष्टवांस्त्वंमहासत्रंकृष्णचैत्ररथेवने ॥ नैवंपरेनापरेवाकरिष्यंतिकृतानिवा

५ ४२ यानिकर्माणिदेवत्वंबालएवमहाबलः ॥ कृतवान्पुंडरीकाक्षबलदेवसहायवान् ॥ कैलासभवनेचापिब्राह्मणैर्न्यवसःसह ४३ ॥ वैशंपायनउवाच ॥ एवमुक्त्वा महात्मानमात्माकृष्णस्यपांडवः ॥ तूष्णीमासीत्ततःपार्थमित्युवाचजनार्दनः ४४ ममैवत्वंतवैवाहंयेमदीयास्तवैवते ॥ यस्त्वांद्वेष्टिसमांद्वेष्टियस्त्वामनुसमामनु ४५

तववार्ष्णेयेत्यादिसार्धश्लोकत्रयंक्वचिन्नदृष्टं यस्यकृतिरिदंसकलं असौदेवोऽपित्वन्नियोगकरइतिविपरिणामेनयोज्यम् ३८ । ३९ । ४० । ४१ । ४२ कर्माणिपूतनावधादीनि ४३ एवंतत्पदार्थस्वरूपंप्रपंच्य तस्यत्वंपदार्थाभेदमाह एवमिति ४४ ममैवत्वंब्रह्मणएवस्वरूपंजीवः तवैवाहंजीवस्यैवशुद्धंरूपंब्रह्म नततोऽन्यत् येमदीयास्तवैवते ब्रह्मगताऔपाधिकाःसर्वेश्व रत्वादयस्तेऽपिजीवस्यैवतस्माद्योजीवंद्वेष्टिसब्रह्मद्वेष्टि योजीवंयातिसब्रह्मयाति । अद्रोहीसन्सर्वभूतेषु भगवद्भावंपश्येदित्यर्थः ४५

४६ननुमित्रयोर्ममात्मात्वंतवात्माहमित्यभेदोपचारोदृष्टोनत्वभेदइत्याशंक्याहानन्यइति मित्रयोर्ह्यन्यत्वंप्रत्यक्षदृष्टंतदिहनिरस्यतेअपूर्वार्थज्ञापकत्वाद्वाक्यस्य अनन्यत्वमप्यौपचारिकमस्त्वि त्याशंक्याहनावयोरिति अंतरंभेदःवेदितुंविचारयितुंजीवेशयोर्भेदोदुर्निरूपइत्यर्थःतथाहि । किंदेहभेदादात्मभेद उतात्मभेदात् । नाद्यःकायव्यूहकृतयोगिन्यव्याप्तेः । नांत्यः उपाधिपरामर्शं विनाभेदस्याविभाव्यमानत्वात् मुक्तात्मानोजीवेशौवानस्वभावभिन्ना उक्तहेतोःघटमठाकाशवदिति ४७ समावायेसमूहे संरब्धेषुकुपितेषु ४८ । ४९ एवंविधस्यात्मतत्त्वस्याधिगमायध्यानस्त वनसेवादिनाकृष्णएवशरणीकरणीयइत्याहद्रौपदीवाक्येनपूर्वेइत्यादिना पूर्वेसृष्टेःप्राक्कालेत्वामेकमाहुः। 'सदेवसोम्येदमग्रआसीत्'इत्याद्याःश्रुतयः प्रजाभिसर्गेचप्रजापतिंत्वामाहुः । 'सर्वस्यव शीसर्वस्येशानः'इत्याद्याःश्रुतयः । ईशत्वमपिनराजवत् किंतूपादानत्वेनेत्याहस्रष्टारमिति५० विष्णुःविशतीतिविष्णुः । 'अंतःप्रविष्टःशास्ताजनानाम्'इतिश्रुतेः कारयिताक्रियाकर्त्ताकर्मचत्व मेवासीतिपादचतुष्टयार्थः ५१ क्षमादुःखसहता सत्यं सत्पृथिव्यप्तेजांसि त्यत् वाय्वाकाशौ तदात्मकंतस्माद्यसंभूतोयज्ञोऽपित्वमसि ५२ भूतभावनवियदादिस्रष्टः भूतेशभूतनियंतः । 'यआका

नरस्त्वमसिदुर्द्धर्षहरिर्नारायणोह्यहम् ॥ कालेलोकमिमंप्राप्तौनरनारायणावृषी ४६ अनन्यःपार्थमत्तस्त्वंत्वत्तश्चाहंतथैवच ॥ नावयोरंतरंशक्यंवेदितुं भरतर्षभ ४७ ॥ वैशंपायनउवाच ॥ एवमुक्तेतुवचनेकेशवेनमहात्मना ॥ तस्मिन्वीरसमावायेसंरब्धेष्वथराजसु ४८ धृष्टद्युम्नमुखैर्वीरैर्भ्रातृभिःपरिवारिता ॥ पांचालीपुंडरीकाक्षमासीनंभ्रातृभिःसह ॥ अभिगम्याब्रवीत्क्रुद्धाशरण्यंशरणैषिणी ४९ ॥ द्रौपद्युवाच ॥ पूर्वेप्रजाभिसर्गेत्वामाहुरेकंप्रजापतिम् ॥ स्रष्टारं सर्वलोकानामसितोदेवलोऽब्रवीत् ५० विष्णुस्त्वमसिदुर्द्धर्षत्वंयज्ञोमधुसूदन ॥ यष्टात्वमसियष्टव्योजामदग्न्योयथाऽब्रवीत् ५१ ऋषयस्त्वांक्षमामाहुःसत्यंच पुरुषोत्तम ॥ सत्याद्यज्ञोऽसिसंभूतःकश्यपस्त्वांयथाऽब्रवीत् ५२ साध्यानामपिदेवानांशिवानामीश्वरेश्वर ॥ भूतभावनभूतेशयथात्वांनारदोऽब्रवीत् ५३ ब्रह्मशंकरशक्राद्यैर्देववृंदैःपुनःपुनः ॥ क्रीडसेत्वंनरव्याघ्रबालःक्रीडनकैरिव ५४ द्यौश्चतेशिरसाव्याप्तापद्भ्यांचपृथिवीप्रभो ॥ जठरंतेइमेलोकाःपुरुषोऽसिसना तनः ५५ विद्यातपोभितप्तानांतपसाभावितात्मनाम् ॥ आत्मदर्शनतृप्तानामृषीणामसिसत्तमः ५६ राजर्षीणांपुण्यकृतामाहवेष्वनिवर्तिनाम् ॥ सर्वधर्मोपपन्ना नांत्वंगतिःपुरुषर्षभ ॥ त्वंप्रभुस्त्वंविभुश्चत्वंभूतात्मात्वंविचेष्टसे ५७ लोकपालाश्चलोकाश्चनक्षत्राणिदिशोदश ॥ नभश्चंद्रश्चसूर्यश्चत्वयिसर्वंप्रतिष्ठितम् ५८ मर्त्यताचैवभूतानाममरत्वंदिवौकसाम् ॥ त्वयिसर्वंमहाबाहोलोककार्यंप्रतिष्ठितम् ५९

शमंतरोयमयती'इत्यादिश्रुतेराकाशादेरपिनियम्यत्वादस्मदादिवच्चेतनत्वंद्रष्टव्यं तत्रचेतनानुपलंभस्त्वरणिस्थाग्नेरिवानभिव्यक्तत्वात्स्वभावादितिभावः ५३ ब्रह्मादिनियंतृत्वंवैश्वरूप्यंचाह द्वाभ्यांब्रह्मेति ५४ । ५५ विद्यावेदाधिगमोब्रह्मचारिधर्मः तपस्तदर्थानुष्ठानंगृहस्थधर्मः तपसाकृच्छ्रचांद्रायणादिनावानप्रस्थधर्मेणचभावितात्मनांशोधितचित्तानामतएवात्मदर्शनतृप्तानां यतीनांसत्तमःसत्यतमः सत्यस्वप्नेंद्रजालादिप्रातिभासिकं सत्यतरोव्यवहारः सत्यतमंब्रह्म इतरयोर्बाधावधिभूतत्वात् ५६ सर्वेधर्माःपापपुण्यादयस्तैरुपपन्नानामपित्वमेवगतिः दीनदयालुत्वा त्पापिष्ठानामप्युद्धर्त्तेतिभावः प्रभुर्नियंताविभुर्व्यापकः भूतात्माजीवः बुद्ध्याद्याकारपरिणतानिभूतान्येवात्मत्वेनमन्यमानः । 'अस्तिखल्वन्योऽपरोभूतात्मायोऽयंसितासितैःकर्मफलैरभिभूय मानःसदसद्योनिमापद्यते'इति मैत्राणीयेभूतात्मपदस्यजीवेरूढिदर्शनात् विचेष्टसेकर्माणिकुरुषे ५७ त्वयिसर्वंप्रतिष्ठितंलोकपालादिपदस्यत्वमेवप्रापकइत्यर्थः ५८ अस्यैवव्याख्यामर्त्यता चेति मर्त्यतासंसारः भूतानांसाधारणजीवानां अमृतत्वंमुक्तिः दिवौकसांदिव्यदृष्टिमतांसात्त्विकानाम् ५९

एवंस्वर्गापवर्गार्थिभिःकृष्णएवशरणीकरणीयइतिकृष्णस्तुतिप्रसंगादुक्तंसंप्रतिदृष्टफलार्थमपिसएवानुसर्तव्यइत्याह सातेऽहंदुःखमाख्यास्येइत्यादिना अत्रात्मनिकृष्णस्यकरुणोत्पादनार्थं दुःखनिवेदनंतत्प्रसंगेनमहामहिम्नामपिसंसारिणांदुर्गतिःप्रपंचिताविराग्योत्पादनाय प्रणयाद्विश्रंभात् आख्यानेहेतुमाहईशस्त्वमिति ६० । ६१ स्त्रीधर्मिणीरजस्वला ६२ । ६३ ईषुःऐच्छन् ६४ स्नुषावधूः ६५ धर्मपत्नींयज्ञसंयोगिनीं ६६ विप्रकृतांदुःखंप्रापितांमर्षयेतां क्षमेतां ६७ । ६८ । ६९ जायात्उत्पद्येत् ७० नान्वपद्यंतनानुगृहीतवंतः ७१ । ७२ । ७३

सातेऽहंदुःखमाख्यास्येप्रणयान्मधुसूदन ॥ ईशस्त्वंसर्वभूतानांयेदिव्यायेचमानुषाः ६० कथंनुभार्यापार्थानांतवकृष्णसखीविभो ॥ धृष्टद्युम्नस्यभगिनीसभां कृष्येतमादृशी ६१ स्त्रीधर्मिणीवेपमानाशोणितेनसमुक्षिता ॥ एकवस्त्राविकृष्टाऽस्मिदुःखिताकुरुसंसदि ६२ राज्ञांमध्येसभायांतुरजसाऽतिपरिप्लुता ॥ दृष्ट्वा चमांधार्त्तराष्ट्राःप्राहसन्पापचेतसः ६३ दासीभावेनमांभोक्तुमीषुस्तेमधुसूदन ॥ जीवत्सुपांडुपुत्रेषुपंचालेषुचवृष्णिषु ६४ नन्वहंकृष्णभीष्मस्यधृतराष्ट्रस्यचो भयोः ॥ स्नुषाभवामिधर्मेणसाहंदासीकृताबलात् ६५ गर्हयेपांडवांस्त्वेवयुधिश्रेष्ठान्महाबलान् ॥ यत्क्लिश्यमानांप्रेक्षंतेधर्मपत्नींयशस्विनीम् ६६ धिग्ब लंभीमसेनस्यधिक्पार्थस्यचगांडिवम् ॥ यौमांविप्रकृतांक्षुद्रैर्मर्षयेतांजनार्दन ६७ शाश्वतोऽयंधर्मपथःसद्भिराचरितःसदा ॥ यद्भार्यांपरिरक्षंतिभर्तारोऽल्पब लाअपि ६८ भार्यायांरक्ष्यमाणायांप्रजाभवतिरक्षिता ॥ प्रजायांरक्ष्यमाणायामात्माभवतिरक्षितः ६९ आत्माहिजायतेतस्यांतस्माज्जायाभवत्युत ॥ भर्त्रा चभार्ययारक्ष्यःकथंजायान्ममोदरे ७० नन्विमेशरणंप्राप्तंनत्यजंतिकदाचन ॥ तेमांशरणमापन्नांनान्वपद्यंतपांडवाः ७१ पंचभिःपतिभिर्जाताःकुमारामेमहौ जसः ॥ एतेषामप्यवेक्षार्थंत्रातव्याऽस्मिजनार्दन ७२ प्रतिविंध्योयुधिष्ठिरात्सुतसोमोवृकोदरात् ॥ अर्जुनाच्छ्रुतकीर्तिश्चशतानीकस्तुनाकुलिः ७३ कनि ष्ठाच्छ्रुतकर्माचसर्वेसत्यपराक्रमाः ॥ प्रद्युम्नोयादृशःकृष्णतादृशास्तेमहारथाः ७४ नन्विमेधनुषिश्रेष्ठाअजेयायुधिशात्रवैः ॥ किमर्थंधार्त्तराष्ट्राणांसहंतेदुर्बली यसाम् ७५ अधर्मेणहृतंराज्यंसर्वेदासाःकृतास्तथा ॥ सभायांपरिकृष्टाऽहमेकवस्त्रारजस्वला ७६ नाधिज्यमपियच्छक्यंकर्तुमन्येनगांडिवम् ॥ अन्यत्रार्जुन भीमाभ्यांत्वयावामधुसूदन ७७ धिग्बलंभीमसेनस्यधिक्पार्थस्यचपौरुषम् ॥ यत्रदुर्योधनःकृष्णमुहूर्त्तमपिजीवति ७८ यएतानाक्षिपद्राष्ट्रात्सहमात्राऽविहिंस कान् ॥ अधीयानान्पुराबालान्व्रतस्थान्मधुसूदन ७९ भोजनेभीमसेनस्यपापःप्राक्षेपयद्विषम् ॥ कालकूटंनवंतीक्ष्णंसंभृतंलोमहर्षणम् ८० तज्जीर्णमविकारे णसहान्नेनजनार्दन ॥ सशेषत्वान्महाबाहोभीमस्यपुरुषोत्तम ८१ प्रमाणकोट्यांविश्वस्तंतथासुप्तंवृकोदरम् ॥ बद्ध्वैनंकृष्णगंगायांप्रक्षिप्यपुरमाव्रजत् ८२ य दाविबुद्धःकौंतेयस्तदासंछिद्यबंधनम् ॥ उदतिष्ठन्महाबाहुर्भीमसेनोमहाबलः ८३ आशीविषैःकृष्णसर्पैर्भीमसेनमदंशयत् ॥ सर्वेष्वेवांगदेशेषुनममारचशत्रुहा ८४

७४ धार्त्तराष्ट्राणामपराधंदुर्बलीयसांदुर्बलतराणां ७५ । ७६ अधिज्यमारोपितगुणं ७७ । ७८ आक्षिपत्दूरेकृतवान् अविहिंसकान्अदुःखदान् ७९ संभृतंसहितं संभूतमितिपाठेबहुलं ८० सशेषत्वात् आयुषइति शेषः ८१ प्रमाणकोट्यां प्रमाणाख्योगंगातीरस्थोवटविशेषस्तत्प्रदेशे ८२ । ८३ । ८४

आपोथयत्प्रहृतवान् अपहस्तेनहस्तपृष्ठेन ८९ उपाधाक्षीत् दाहार्थं उपहृतवान् आर्याश्वश्रूः ८६ । ८७ । ८८ । ८९ वैनतेयः विनतापुत्रः ९० । ९१ । ९२ । ९३ । ९४

प्रतिबुद्धस्तुकौंतेयःसर्वान्सर्पानपोथयत् ॥ सारथिंचास्यदयितमपहस्तेनजघ्निवान् ८५ पुनःसुप्तानुपाधाक्षीद्वालकान्वारणावते ॥ शयानानार्ययासार्द्धंकोनु
तत्कर्तुमर्हति ८६ यत्रार्यारुदतीभीतापांडवानिदमब्रवीत् ॥ महद्व्यसनमापन्नाशिखिनापरिवारिता ८७ हाहताऽस्मिकुतोन्वद्यभवेच्छांतिरिहानलात् ॥
अनाथाविनशिष्यामिबालकैःपुत्रकैःसह ८८ तत्रभीमोमहाबाहुर्वायुवेगपराक्रमः ॥ आर्यामाश्वासयामासभ्रातॄंश्चापिवृकोदरः ८९ वैनतेयोयथापक्षीगरुत्मान्प
ततांवरः ॥ तथैवाभिपतिष्यामिभयंवोनेहविद्यते ९० आर्यामंकेनवामेनराजानंदक्षिणेनच ॥ अंसयोश्चयमौकृत्वापृष्ठेबीभत्सुमेवच ९१ सहसोत्पत्यवेगेनसर्वा
नादायवीर्यवान् ॥ भ्रातॄनार्यांचबलवान्मोक्षयामासपावकात् ९२ तेरात्रौप्रस्थिताःसर्वेसहमात्रायशस्विनः ॥ अभ्यगच्छन्महारण्येहिडिंबवनमंतिकात् ९३
श्रांताःप्रसुप्तास्तत्रेमेमात्रासहसुदुःखिताः ॥ सुप्तांश्चैनानभ्यगच्छद्धिडिंबानामराक्षसी ९४ साहृष्ट्वापांडवांस्तत्रसुप्तान्मात्रासहक्षितौ ॥ हृच्छयेनाभिभूतात्मा
भीमसेनमकामयत् ९५ भीमस्यपादौकृत्वातुस्वउत्संगेततोऽबला ॥ पर्यमर्दतसंहृष्टाकल्याणीमृदुपाणिना ९६ तामबुद्ध्यदमेयात्माबलवान्सत्यविक्रमः ॥
पर्यपृच्छततांभीमःकिमिहेच्छस्यनिंदिते ९७ एवमुक्तातुभीमेनराक्षसीकामरूपिणी ॥ भीमसेनंमहात्मानमाहचैवमनिंदिता ९८ पलायध्वमितःक्षिप्रंममभ्राते
षवीर्यवान् ॥ आगमिष्यतिवोहंतुंतस्माद्गच्छतमाचिरम् ९९ अथभीमोऽभ्युवाचैनांसाभिमानमिदंवचः ॥ नोद्विजेयमहंतस्मान्निहनिष्येऽहमागतम् १००
तयोःश्रुत्वातुसंजल्पमागच्छद्राक्षसाधमः ॥ भीमरूपोमहानादान्विसृजन्भीमदर्शनः १ ॥ राक्षसउवाच ॥ केनसार्धंकथयसिआनयैनंममांतिकम् ॥ हिडिंबे
भक्षयिष्यामोनचिरंकर्तुमर्हसि २ साकृपासंगृहीतेनहृदयेनमनस्विनी ॥ नैनमैच्छत्तदाऽऽख्यातुमनुक्रोशादनिंदिता ३ सनादान्विनदन्घोरान्राक्षसःपुरुषा
दकः ॥ अभ्यद्रवतवेगेनभीमसेनंतदाकिल ४ तमभिद्रुत्यसंक्रुद्धोवेगेनमहताबली ॥ अगृह्णात्पाणिनापाणिंभीमसेनस्यराक्षसः ५ इंद्राशनिसमस्पर्शंवज्रसंहन
नंदृढम् ॥ संहत्यभीमसेनायव्याक्षिपत्सहसाकरम् ६ गृहीतंपाणिनापाणिंभीमसेनस्यरक्षसा ॥ नामृष्यतमहाबाहुस्तत्राक्रुद्ध्यद्वृकोदरः ७ तदाऽऽसीत्तुमुलंयु
द्धंभीमसेनहिडिंबयोः ॥ सर्वास्त्रविदुषोर्घोरंवृत्रवासवयोरिव ८ विक्रीड्यसुचिरंभीमोराक्षसेनसहानघ ॥ निजघानमहावीर्यस्तंतदानिर्बलंबली ९ हत्वाहिडिंबं
भीमोऽथप्रस्थितोभ्रातृभिःसह ॥ हिडिंबामग्रतःकृत्वायस्यांजातोघटोत्कचः ११० ततःसंप्राद्रवन्सर्वेसहमात्रापरंतपाः ॥ एकचक्रामभिमुखाःसंवृताब्राह्मण
व्रजैः ११ प्रस्थानेव्यासएषांचमंत्रीप्रियहितेरतः ॥ ततोऽगच्छन्नेकचक्रांपांडवाःसंशितव्रताः १२ तत्राप्यासादयामासुर्बकंनाममहाबलम् ॥ पुरुषादंप्रति
भयंहिडिंबेनैवसंमितम् १३ तंचापिविनिहत्योग्रंभीमःप्रहरतांवरः ॥ सहितोभ्रातृभिःसर्वैर्द्रुपदस्यपुरंययौ ११४

९५ । ९६ । ९७ । ९८ । ९९ । १०० । १०१ । १०२ । कृपासंगृहीतेनस्नेहवशेन १०३ । १०४ । १०५ संहत्यमुष्टीकृत्य १०६ । १०७ । १०८ । १०९ । ११० । ११ । १२ । १३ । १४

१५ । १६ । १७ । १८ । १९ दिव्येनअमानुषेणअग्निकुंडोद्भवत्वात् १२० । २१ । २२ सुजातौसंलग्नौ २३ । २४ । २५ विशोकवद्विशोकाइव २६ । संबंधात् पितृष्वस्रीयभार्यात्वात्
गौरवादग्निकुंडोद्भवत्वात् सख्यात् भक्तिमत्वात् प्रभुत्वेनसामर्थ्यवत्त्वेनत्वदीयेन २७ । २८ । २९ । १३० द्रौपदीवाक्यंप्रतिवाक्यंच श्रुत्वाऽर्जुनआबभाषेइतिव्यवहितेनसंबंधः ३१

लब्धाऽहमपितत्रैववसतासव्यसाचिना ॥ यथात्वयाजिताकृष्णरुक्मिणीभीष्मकात्मजा १५ एवंसुयुद्धेपार्थेनजिताऽहंमधुसूदन ॥ स्वयंवरेमहत्कर्मकृत्वानसु
करंपरैः १६ एवंक्लेशैःसुबहुभिःक्लिश्यमानासुदुःखिता ॥ निवसाम्यार्ययाहीनाकृष्णधौम्यपुरःसरा १७ तइमेसिंहविक्रांतावीर्येणाभ्यधिकाःपरैः ॥ निर्हीनैः
परिक्लिश्यंतींसमुपेक्षंतिमांकथम् १८ एतादृशानिदुःखानिसहंतीदुर्बलीयसाम् ॥ दीर्घकालंप्रदीप्ताऽस्मिपापानांपापकर्मणाम् १९ कुलेमहतिजाताऽस्मिदि
व्येनविधिनाकिल ॥ पांडवानांप्रियाभार्यास्नुषापांडोर्महात्मनः १२० कचग्रहमनुप्राप्तासाऽस्मिकृष्णवरासती ॥ पंचानांपांडुपुत्राणांप्रेक्षतांमधुसूदन २१
इत्युक्त्वाप्रारुदत्कृष्णामुखंप्रच्छाद्यपाणिना ॥ पद्मकोशप्रकाशेनमृदुनामृदुभाषिणी २२ स्तनावपतितौपीनौसुजातौशुभलक्षणौ ॥ अभ्यवर्षतपांचालीदुःख
जैरश्रुबिंदुभिः २३ चक्षुषीपरिमार्जंतीनिःश्वसंतीपुनःपुनः ॥ बाष्पपूर्णेनकंठेनक्रुद्धावचनमब्रवीत् २४ नैवमेपतयःसंतिनपुत्रानचबांधवाः ॥ नभ्रातरोनच
पितानैवत्वंमधुसूदन २५ येमांविप्रकृतांक्षुद्रैरुपेक्षध्वंविशोकवत् ॥ नचमेशाम्यतेदुःखंकर्णोयत्प्राहसत्तदा २६ चतुर्भिःकारणैःकृष्णत्वयारक्ष्याऽस्मिनित्यशः ॥
संबंधाद्गौरवात्सख्यात्प्रभुत्वेनैवकेशव २७ ॥ वैशंपायनउवाच ॥ अथतामब्रवीत्कृष्णस्तस्मिन्वीरसमागमे ॥ वासुदेवउवाच ॥ रोदिष्यंतिस्त्रियोह्येवंयेषांक्रु
द्धाऽसिभाविनि ॥ बीभत्सुशरसंछन्नाञ्शोणितौघपरिप्लुतान् २८ निहतान्वल्लभान्वीक्ष्यशयानान्वसुधातले ॥ यत्समर्थंपांडवानांतत्करिष्यामिमाशुचः २९
सत्यंतेप्रतिजानामिराज्ञांराज्ञीभविष्यसि ॥ पतेद्द्यौर्हिमवाञ्शीर्येत्पृथिवीशकलीभवेत् १३० शुष्येत्तोयनिधिःकृष्णेनमेमोघंवचोभवेत् ॥ तच्छ्रुत्वाद्रौपदीवाक्यं
प्रतिवाक्यमथाच्युतात् १३१ साचीकृतमवैक्षत्सापांचालीमध्यमंपतिम् ॥ आबभाषेमहाराजद्रौपदीमर्जुनस्तदा ३२ मारोदीःशुभताम्राक्षियदाहमधुसूद
नः ॥ तथातद्भवितादेविनान्यथावरवर्णिनि ३३ ॥ धृष्टद्युम्नउवाच ॥ अहंद्रोणंहनिष्यामिशिखंडीतुपितामहम् ॥ दुर्योधनंभीमसेनःकर्णंहंताधनंजयः ३४
रामकृष्णौव्यपाश्रित्यअजेयाःस्मरणेस्वसः ॥ अपिवृत्रहणायुद्धेकिंपुनर्धृतराष्ट्रजैः ३५ ॥ वैशंपायनउवाच ॥ इत्युक्तेऽभिमुखावीरावासुदेवमुपास्थिताः ॥
तेषांमध्येमहाबाहुःकेशवोवाक्यमब्रवीत् १३६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिद्रौपद्याश्वासनेद्वादशोऽध्यायः ॥ १२ ॥

अत्रहेतुःयतःपांचालीसाचीकृतंवक्रीभूतंयथास्यात्तथामध्यमंपतिमेवावैक्षदिति यतइत्यध्याहृत्ययोज्यं ३२ । ३३ । ३४ स्वसःहेभगिनि ३५ । १३६ ॥ इत्यारण्यकेपर्वणिनैलकंठीये
भारतभावदीपेद्रौपदीसांत्वनेद्वादशोऽध्यायः ॥ १२ ॥ ॥

निरूपितासमाधनाब्रह्मविद्या संप्रतिभगवत्स्मरणमेवतत्सान्निध्यहेतुः सान्निध्यंच सर्वापत्तरणकृदितिभंग्यंतरेणप्रतिपाद्यते नैतदित्यादिनाऽध्यायेन यद्यहंद्वारकायांनवद्वारवत्यांदेहनगर्यां तवमांचिंतयतःसन्निहितःस्यांतर्हि एतत् कृच्छ्रंवनवाससंकटं भवान्नानुप्राप्तःस्यात् यथाद्रौपदीकृच्छ्रकालेमांस्मृतवती वस्त्रराशिप्रदानेनमयास्मभार्याकृच्छ्रान्मोचिता तथात्वमप्यक्षपातन काले मां यदिस्मरेस्तर्हिनैतत्कृच्छ्रंप्राप्नुयाः प्रत्युततत्रैवजयःस्यादितिभावः १ अनाहूतोऽपि स्वक्षेमार्थमप्रार्थितोऽपिवारयेयं द्यूतमंतर्यामित्वेन कथापक्षेत्वृजुरेवार्थः २ बहिर्यामित्वेनापि द्यूतवारणोपायमाह भीष्मेतिद्वाभ्याम् ३ राजेंद्रधृतराष्ट्र तवपुत्राणांद्यूतेनालमितिवैचित्रवीर्यादीन्प्रतित्वन्निमित्तं हेप्रभोयुधिष्ठिरअहंतत्रद्यूतेदोषानचक्षं व्यक्तंकथितवान्स्यामितिसं बंधः ४ वीरसेनसुतःनलः यैःअक्षैरितिशेषः ५ सातत्यमाविच्छेदंप्रसंगस्यद्यूतक्रीडायाः हीयमानोऽपि जयाशयापुनःपुनर्दीव्यत्येवेत्यर्थः ६ कामःरागः ७ वक्तव्यमधिगंतव्यंज्ञातव्यं

वासुदेवउवाच ॥ नैतत्कृच्छ्रमनुप्राप्तोभवान्स्याद्वसुधाधिप ॥ यद्यहंद्वारकायांस्यांराजन्सन्निहितःपुरा १ आगच्छेयमहंद्यूतमनाहूतोपिकौरवैः ॥ आंबिकेये नदुर्द्धर्षराज्ञादुर्योधनेनच ॥ वारयेयमहंद्यूतंबहुन्दोषान्प्रदर्शयन् २ भीष्मद्रोणौसमानाय्यकृपंबाह्लीकमेवच ॥ वैचित्रवीर्यंराजानमलंद्यूतेनकौरव ३ पुत्राणां तवराजेंद्रत्वन्निमित्तमितिप्रभो ॥ तत्राचक्षमहंदोषान्यैर्भवान्व्यतिरोपितः ४ वीरसेनसुतोयैस्तुराज्यात्प्रभ्रंशितःपुरा ॥ अतर्कितविनाशश्चदेवनेनविशांपते ५ सातत्यंचप्रसंगस्यवर्णयेयंयथातथम् ६ स्त्रियोऽक्षामृगयापानमेतत्कामसमुत्थितम् ॥ दुःखंचतुष्टयंप्रोक्तंयैर्नरोभ्रश्यतेश्रियः ७ तत्रसर्वत्रवक्तव्यंमन्यंते शास्त्रकोविदाः ॥ विशेषतश्चवक्तव्यंद्यूतेपश्यंतितद्विदः ८ एकाहाद्द्रव्यनाशोऽत्र ध्रुवंव्यसनमेवच ॥ अभुक्तनाशश्चार्थानांवाक्पारुष्यंचकेवलम् ९ एतच्चा न्यच्चकौरव्यप्रसंगिकटुकोदयम् ॥ द्यूतेब्रूयांमहाबाहोसमासाद्यांबिकासुतम् १० एवमुक्तोयदिमयागृह्णीयाद्वचनंमम ॥ अनामयंस्याद्धर्मश्चकुरूणांकुरुवर्द्धन ११ नचेत्समरराजेंद्रगृह्णीयान्मधुरंवचः ॥ पथ्यंचभरतश्रेष्ठनिगृह्णीयांबलेनतम् १२ अथैनमपनीतेनसुहृदोनामदुर्हृदः ॥ सभासदोऽनुवर्तेरंस्तांश्चहन्यांदुरो दरान् १३ असान्निध्यंतुकौरव्यममानर्तेष्वभूत्तदा ॥ येनेदंव्यसनंप्राप्ताभवंतोद्यूतकारितम् १४ सोऽहमेत्यकुरुश्रेष्ठद्वारकांपांडुनंदन ॥ अश्रौषंत्वांव्यसनिनं युयुधानाद्यथातथम् १५ श्रुत्वैवचाहंराजेंद्रपरमोद्विग्नमानसः ॥ तूर्णमभ्यागतोऽस्मित्वांद्रष्टुकामोविशांपते १६ अहोकृच्छ्रमनुप्राप्ताःसर्वेस्मभरतर्षभ ॥ सोऽ हंत्वांव्यसनेमग्नंपश्यामिसहसोदरैः १७ ॥ ॥ इ०म०भा०आ०प० अर्जुनाभिगमनप० वासुदेववाक्येत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ युधिष्ठिरउवाच ॥ असान्निध्यंकथंकृष्णतवासीद्वृष्णिनंदन ॥ क्वचासीद्विप्रवासस्तेकिंचाकार्षीःप्रवासतः १

गत्यर्थस्यवजेरिदंरूपं वचेरेववार्थांतरम् ८ तदेवाहएकाहादिति व्यसनंराज्यभ्रंशादिअर्थानांधर्मार्थकामानांपुमर्थानां ९ । १० । ११ । १२ अपनीतेनान्यायेन दुरोदरान्द्यूतकारान् १३ आनर्तेष्वासमंतान्नर्त्तयंति तेषुधीविलासेषु पक्षेदेशविशेषेषु १४ कथांतरमवतारयितुंकथापक्षमेवानुसरविसोऽहमित्यादिना एत्यागत्य युयुधानात्सात्यकेः १५ । १६ । १७ इत्यारण्य केपर्वणिनीलकंठीयेभारतभावदीपेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ असान्निध्यमिति अत्रसंक्षेपविस्ताराभ्यां सौभवधउपाख्यायते तस्यतात्पर्यं संसारसागरमध्यद्वारकाख्येस्थूलसूक्ष्मदे हद्वयरूपेक्षेत्रे विस्मरणरूपाद्भगवदसंनिधानात् कामगमंमनोरथाख्यंसौभमारुह्यागतेनशाल्वाख्येनमहामोहेनशोकाख्येरुपद्रुतेसति प्रद्युम्नादिस्वरूपायज्ञादयोधर्मास्तंवारयितुमक्षमा अभूवन्

ततोऽहं चित्तद्वारकामेत्यचिदात्मानं मामधिक्षिपंतंशाल्वमोहमहंब्रह्मविद्यास्त्रेणहतवान् तत्पुरंचमनोरथसौभंपातितवानिति एवमेवयुद्धादिरूपकेणसर्वत्राख्यायिकातात्पर्यमुन्नेयंतथाचश्रुतिः 'द्वयाहप्राजापत्यादेवाश्चासुराश्च'इत्यादिनादेवासुरशब्दैः शमकामादीन्विवक्षित्वातद्युद्धरूपकेणाध्यात्मिकमर्थंनिरूपयति तद्वदिहापिज्ञेयं श्रुत्यनुसारित्वाद्भारतस्मृतेः १ । २ । ३ सरो षवशंरोषेणसहितंसामर्थ्यं । 'वशमिच्छाप्रभुत्वयोः'इतिविश्वः । दुरात्मवान्दुष्टचित्तःयद्वादुःस्थितःरोषवत्त्वात् आत्मवान्युद्धादौधृतिमान्सामर्थ्यवत्त्वात् दुःस्थितश्चासावात्मवांश्चेतिसमासः

॥ कृष्णउवाच ॥ शाल्वस्यनगरंसौभंगतोऽहंभरतर्षभ ॥ निहंतुंकौरवश्रेष्ठतत्रमेशृणुकारणम् २ महातेजामहाबाहुर्यःसराजामहायशाः ॥ दमघोषात्मजोवी रःशिशुपालोमयाहतः ३ यज्ञेतेभरतश्रेष्ठराजसूयेऽर्हणांप्रति ॥ सरोषवशमापन्नोनामृष्यतदुरात्मवान् ४ श्रुत्वातंनिहतंशाल्वस्तीव्ररोषसमन्वितः ॥ उपाया द्द्वारकांशून्यामिहस्थेमयिभारत ५ सतत्रयोधितोराजन्कुमारैर्वृष्णिपुंगवैः ॥ आगतःकामगंसौभमाहत्यैवंनृशंसवत् ६ ततोवृष्णिप्रवीरांस्तान्बालान्हत्वाबहूं स्तदा ॥ पुरोद्यानानिसर्वाणिभेदयामासदुर्मतिः ७ उक्तवांश्चमहाबाहोक्वासौवृष्णिकुलाधमः ॥ वासुदेवःसमंदात्मावसुदेवसुतोगतः ८ तस्ययुद्धार्थिनोदर्पंयु द्धेनाशयिताऽस्म्यहम् ॥ आनर्ताःसत्यमाख्याततत्रगंताऽस्मियत्रसः ९ तंहत्वाविनिवर्तिष्येकंसकेशिनिषूदनम् ॥ अहत्वाननिवर्तिष्येसत्येनायुधमालभे १० क्वासौक्वासावितिपुनस्तत्रतत्रप्रधावति ॥ मयाकिलरणेयोद्धुंकांक्षमाणःससौभराट् ११ अद्यतंपापकर्माणंक्षुद्रंविश्वासघातिनम् ॥ शिशुपालवधामर्षाद्गमयि ष्येयमक्षयम् १२ ममपापस्वभावेनभ्रातायेननिपातितः ॥ शिशुपालोमहीपालस्तंवधिष्येमहीपते १३ भ्राताबालश्चराजाचनचसंग्राममूर्धनि ॥ प्रमत्तश्चहतो वीरस्तंहनिष्येजनार्दनम् १४ एवमादिमहाराजविलप्यदिवमास्थितः ॥ कामगेनससौभेनक्षिप्त्वामांकुरुनंदन १५ तमश्रौषमहंगत्वायथावृत्तःसदुर्मतिः ॥ म यिकौरव्यदुष्टात्मामार्तिकावतकोनृपः १६ ततोऽहमपिकौरव्यरोषव्याकुलमानसः ॥ निश्चित्यमनसाराजन्वधायास्यमनोदधे १७ आनर्तेषुविमर्दंचक्षेपंचा त्मनिकौरव ॥ प्रवृद्धमवलेपंचतस्यदुष्कृतकर्मणः १८ ततःसौभवधायाहंप्रतस्थेपृथिवीपते ॥ समयासागरावर्त्तंदृष्टआसीत्परीप्सता १९ ततःप्रध्माप्यजल जंपांचजन्यमहंनृप ॥ आहूयशाल्वंसमरेयुद्धायसमवस्थितः २० तन्मुहूर्तमभूद्युद्धंतत्रमेदानवैःसह ॥ वशीभूताश्चमेसर्वेभूतलेचनिपातिताः २१ एतत्कार्यं महाबाहोयेनाहंनागमंतदा ॥ श्रुत्वैवहास्तिनपुरंद्यूतंचाविनयोत्थितम् ॥ द्रुतमागतवान्युष्मान्द्रष्टुकामःसुदुःखितान् २२ ॥ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिसौभवधोपाख्यानेचतुर्दशोऽध्यायः १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

४ इहस्थेत्वत्समीपस्थे ५ सौभंसुष्ठुभांतितेसुभाःकांचनादयोधातवस्तज्जं ६ । ७ । ८ आनर्ताःभोआनर्तदेश्याःआख्यातकथयत ९ । १० । ११ । १२ । १३ । १४ क्षिप्त्वाकुत्सयित्वा १५ मार्तिकावतकःएतन्नामकदेशवासी १६ । १७ अवलेपंगर्वंज्ञात्वेतिशेषः १८ सागरस्यआसमंताद्वर्त्तोवर्त्तनंयस्मिन्सागरद्वीपेइत्यर्थः १९ जलजंशंखं २० । २१ द्यूतंश्रुत्वैवहास्तिनपुरमा गतवान् २२ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥

अर्थाधीनौधर्मकामावर्थस्तुस्वराज्यरक्षापरराज्यावमर्दाभ्यांराज्ञाप्राप्यतइ।तितावेवशाल्वप्रसंगात्सम्यक्श्रोतुकामःपृच्छति वासुदेवेति कथ्यतःकथयतः कंड्वादियगंतावशत्रंतस्यरूपं १ श्रुतश्रवाशिशुपालमातातज्जंश्रौतश्रवंउपायात्उपागतः २ अरुंधत्सेनया वैहायसंखेचरं व्यूह्य स्वरक्षापरोपमर्दयोग्यरचनाविशेषेणस्थापयित्वाऽधिष्ठितःसम्यक्स्थितः ३ अभितःपरितउपरितश्चायुधानांसरणंनिःसरणमभिसारस्तेनसर्वेणाच्छिद्रेण । सर्वाभ्योदिग्भ्योयुगपद्विरलायुधसमूहागमेनेत्यर्थः ४ पताकाध्वजांचलः । तोरणानिबहिर्द्वाराणि चक्राणि योधगणाः हुडास्तदाश्रयस्थानानिभाषायां'बुरुज'संज्ञानिअन्येतुविण्मूत्रोत्सर्जनशृंगाणिहुडाइत्याहुः उदाहरंतिच। 'कल्प्यंतेहुडशृंगाणिरथस्योपरिसूरिभिः॥विण्मूत्रस्पर्शशुद्ध्यर्थंकरादिस्पर्शउच्यते'इति । यंत्राण्याग्नेयौषधबलेनदृषत्पिंडोत्क्षेपणानिमहांति'कमान'संज्ञानि । क्षुद्राणिसीसगुलिकोत्क्षेपणानि'बंदूख'संज्ञानि । खनकाःसुरंगद्वारागुप्तमार्गकर्तारः ५ उपशल्यालोहमुखाःकीलास्तद्युक्ताःप्रतोल्योरथ्यामार्गायस्यांसा । अट्टालकाउपरिगृहाः । गोपुराणिपुरद्वाराणिसाट्टानिअट्टेनान्नेनसहितानिअट्टालकादीनियस्यांसा । साट्टेतिविशेषणंउपशल्यस्यग्रामांतस्यरथ्यायाश्चाट्टस्यसंबध्यते ।

॥ युधिष्ठिरउवाच ॥ वासुदेवमहाबाहोविस्तरेणमहामते ॥ सौभस्यवधमाचक्ष्वनहितृप्यामिकथ्यतः १ ॥ वासुदेवउवाच ॥ हतंश्रुत्वामहाबाहोमयाश्रौतश्रवंनृप ॥ उपायाद्भरतश्रेष्ठशाल्वोद्वारवतींपुरीम् २ अरुंधत्तांसुदुष्टात्मासर्वतःपांडुनंदन ॥ शाल्वोवैहायसंचापितत्पुरंव्यूह्याधिष्ठितः ३ तत्रस्थोऽथमहीपालोयोधयामासतांपुरीम् ॥ अभिसारेणसर्वेणतत्रयुद्धमवर्तत ४ पुरीसमंतादिहितासपताकासतोरणा ॥ सचक्रासहुडाचैवसयंत्रखनकातथा ५ सोपशल्यप्रतोलीकासाट्टाट्टालकगोपुरा ॥ सचक्रग्रहणीचैवसोल्कालातावपोथिका ६ सोष्ट्रिकाभरतश्रेष्ठसभेरीपणवानका ॥ सतोमरांकुशाराजन्सशतघ्नीकलांगला ७ सभुशुंडचश्मगुडकासायुधासपरश्वधा॥लोहचर्मवतीचापिसाग्निःसगुडशृंगिका८शास्त्रदृष्टेनविधिनासुयुक्ताभरतर्षभ॥रथैरनेकैर्विविधैर्गदसांबोद्धवादिभिः ९पुरुषैःकुरुशार्दूलसमर्थैःप्रतिवारणे॥अतिख्यातकुलैर्वीरैर्दृष्टवीर्यैश्चसंयुगे१०मध्यमेनचगुल्मेनरक्षिभिःसासुरक्षिता॥उत्क्षिप्तगुल्मैश्चतथाहयैश्चसपताकिभिः ११ आघोषितंचनगरेनपातव्यासुरेतिवै॥प्रमादंपरिरक्षद्भिरुग्रसेनोद्धवादिभिः१२प्रमत्तेष्वभिघातंहिकुर्याच्छाल्वोनराधिपः॥इतिकृत्वाऽप्रमत्तास्तेसर्वेवृष्ण्यंधकाःस्थिताः१३ आनर्तांश्चतथासर्वेनटानर्तकगायनाः॥बहिर्निवासिताःक्षिप्रंरक्षद्भिर्वित्तसंचयं१४संक्रमाभेदिताःसर्वेनावश्चप्रतिषेधिताः॥ परिखाश्चापिकौरव्यकीलैःसुनिचिताःकृताः१५

वक्रग्रहणीसैन्यनिग्राहिका'मोर्चा'इति म्लेच्छप्रसिद्धा । सोल्कालातावपोथिकासोल्कमलातंज्वालासहितमुल्मुकंयाभ्यांसासोल्कालाता अवबद्धाःपोथिकायंत्रबद्धाःकाष्ठपाषाणादयोरिपूणामुपरिपातनाययस्यामितिप्राञ्चः। उल्केवोल्काप्राणहरत्वाद्यंत्रोत्क्षिप्तोगोलः । अलातंसकाष्ठदंडंलोहमयमाग्नेयंप्रहरणं'बाण'इतिभाषायांप्रसिद्धं । तयोरप्रत्याख्येयगत्योरपिपोथिकाःपातयित्र्योमंत्रमय्यःशक्तयःकर्णायेंद्रदत्तशक्तिसदृशास्तद्युक्ताःसोल्कालातावपोथिकाः ६ उष्ट्रिकामृच्चर्ममयानिभांडानि । सष्टिकेतिपाठेऋष्टयआयुधविशेषाः ७ अश्मगुडकावर्तुलीकृताःपाषाणाःलोहमयानिचर्माणिकमठपृष्ठाकाराणिप्रहारवारकाणि साग्निःआग्नेयौषधसहिता गुडागोलकाःशृंगिकास्तदुत्क्षेपकयंत्राणि । शत्रूणामुपरिपातनायतप्तोगुडोद्रवीभूतोयत्रशिखरेस्थाप्यतेतत्सहितेत्यन्ये ८ । ९ । १० मध्यमोगुल्मःयत्रस्थितेनयोधसंघेनचतुर्दिगवस्थितारिपवोद्रष्टुंबाणादिनाप्रहर्तुंचशक्यतेतादृशमुच्चस्थानं । उत्क्षिप्तगुल्मैःपरकीयगुल्मोच्चाटनकरैः ११ । १२ अप्रमत्ताइतिच्छेदः १३ । १४ संक्रमानदीसेतवः कीलैःशूलैः सुनिचिताःव्याप्ताः १५

उदपानाःकूपाः । 'अंबरीषोभवेद्भ्राष्ट्रः'इति विश्वः । सुप्ताग्निरित्यन्ये । विषमालोहकंटकाद्याकीर्णा १६ । १७ । १८ । १९ अनुरथ्यासुप्रतिरथ्यं २० वेतनंधनं भक्तंनित्यभोजनंकृतोपधानंकृतविशेषं २१ कुप्यंस्वर्णरूप्येतरद्धनंताम्रादिप्रहोरणोद्य मस्तमनुलक्षीकृत्यभृतोऽनुग्रहभृतस्तत्कालस्वीकृतोनकश्चित् किंतुचिरसंभृताएवकृपाभृतोनकिंतुशौर्यभृतएवेतिवा २२ भूरिदक्षिणाबहुदाक्षिण्ययुक्तायस्यांआहुकेनउग्रसेनेन २३ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचदशोऽध्यायः १५ ॥ तामिति १ समेदेशे चतुरंगंचत्वारिरथनागाश्वपादातान्यंगानियस्य २

उदपानाःकुरुश्रेष्ठतथैवाप्यंबरीषकाः ॥ समंतात्क्रोशमात्रंचकारिताविषमाचभूः १६ प्रकृत्याविषमंदुर्गंप्रकृत्याचसुरक्षितम् ॥ प्रकृत्याचायुधोपेतंविशेषेणतदाऽनघ १७ सुरक्षितंसुगुप्तंचसर्वायुधसमन्वितम् ॥ तत्पुरंभरतश्रेष्ठयथेंद्रभवनंतथा १८ नचामुद्रोऽभिनिर्यातिनचामुद्रःप्रवेश्यते ॥ वृष्ण्यंधकपुरेराजंस्तदासौभसमागमे १९ अनुरथ्यासुसर्वासुचत्वरेषुचकौरव ॥ बलंबभूवराजेंद्रप्रभूतगजवाजिमत् २० दत्तवेतनभक्तंचदत्तायुधपरिच्छदम् ॥ कृतोपधानंचतदाबलमासीन्महाभुज २१ नकुप्यवेतनीकश्चिन्नचातिक्रांतवेतनी ॥ नानुग्रहभृतःकश्चिन्नचादृष्टपराक्रमः २२ एवंसुविहिताराजन्द्वारकाभूरिदक्षिणा ॥ आहुकेनसुगुप्ताचराज्ञाराजीवलोचन २३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिसौभवधोपाख्यानेपंचदशोऽध्यायः १५ ॥ ॥ वासुदेवउवाच ॥तांतूपयातौराजेंद्रशाल्वःसौभपतिस्तदा॥प्रभूतनरनागेनबलेनोपविवेशह १ समेनिविष्टासासेनाप्रभूतसलिलाशये॥ चतुरंगबलोपेताशाल्वराजाभिपालिता २ वर्जयित्वाश्मशानानिदेवतायतनानिच ॥ वल्मीकांश्चैत्यवृक्षांश्चतन्निविष्टमभूद्बलम् ३ अनीकानांविभागेनपंथानःसंवृताभवन् ॥ प्रवणायचनैवासन्शाल्वस्यशिबिरेनृप ४ सर्वायुधसमोपेतंसर्वशस्त्रविशारदम् ॥ रथनागाश्वकलिलंपदातिध्वजसंकुलम् ५ तुष्टपुष्टबलोपेतंवीरलक्षणलक्षितम् ॥ विचित्रध्वजसन्नाहंविचित्ररथकार्मुकम् ६ सन्निवेश्यचकौरव्यद्वारकायांनरर्षभ ॥ अभिसारयामासतदावेगेनपतगेंद्रवत् ७ तदापतंतंसंदृश्यबलंशाल्वपतेस्तदा ॥ निर्यायायोधयामासुःकुमाराद्वृष्णिनंदनाः ८ असहंतोऽभियानंतच्छाल्वराजस्यकौरव ॥ चारुदेष्णश्चसांबश्चप्रद्युम्नश्चमहारथः ९ तेरथैर्दंशिताःसर्वेविचित्राभरणध्वजाः ॥ संसक्ताःशाल्वराजस्यबहुभिर्योधपुंगवैः १० गृहीत्वाकार्मुकंसांबःशाल्वस्यसचिवंरणे ॥ योधयामाससंहृष्टःक्षेमवृद्धिंचमूपतिं ११ तस्यबाणमयंवर्षंजांबवत्याःसुतोमहत् ॥ मुमोचभरतश्रेष्ठयथावर्षंसहस्रदृक् १२ तद्बाणवर्षंतुमुलंविषेहेसचमूपतिः ॥ क्षेमवृद्धिर्महाराजाहिमवानिवनिश्चलः १३ ततःसांबायराजेंद्रक्षेमवृद्धिरपिस्वयम् ॥ मुमोचमायाविहितंशरजालंमहत्तरम् १४ ततोमायामयंजालंमाययैवविदीर्यसः ॥ सांबःशरसहस्रेणरथमस्याभ्यवर्षत १५

३ पंथानःपुरेधान्याद्यागमनमार्गाः प्रवणायगूढभावेननिम्नगमनाय ४ कलिलंसंकटं ५ । ६ अभिसारयामासनगरसमीपंगमयामास सैन्यं पतगेंद्रवत् सौभंचोपरितःअभिसारयामास ७ आपतंतमापतत् निर्यायनिर्गत्य पुराद्बहिः ८ । ९ दंशिताःसंनद्धाः १० । ११ । १२ । १३ । १४ । १५

अपायात्अपलायितः जवनैःशीघ्रगैः १६ । १७ अभिपन्नःआभिमुख्येनासादितः १८ व्याविद्धचभ्रामयित्वा १९ रुग्णःक्षुण्णश्चगजादिपदाघातैः २० । २१ । २२ । २३ । २४ । २५ । २६
सौभेनखेचरेणपुरेण २७ । २८ निर्यायनिर्गत्यअवस्थाप्यआश्वास्यआनर्तानांद्वारकावासिनां २९ । ३० धनुर्भुजविनिर्मुक्तैःधनुषःभुजेनकौटिल्येनअस्याकर्षणजेनानिर्मुक्तैः । भुजकौटिल्येतुद्वादिः
३१ । नश्यतिआशुमरिष्यति । वर्तमानसामीप्येवर्तमानवद्वेतिलट् ३२ धिष्ठितमधिष्ठितं । धिपावचनप्रागल्भ्येनस्थितमितिवा ३३ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषोडशो

ततःसविद्धःसांबेनक्षेमवृद्धिश्चमूपतिः ॥ अपायाज्जवनैरश्वैःसांबबाणप्रपीडितः १६ तस्मिन्विप्रद्रुतेक्रूरेशाल्वस्याथचमूपतौ ॥ वेगवान्नामदैतेयःसुतंमेऽभ्य
द्रवद्बली १७ अभिपन्नस्तुराजेंद्रसांबोवृष्णिकुलोद्वहः ॥ वेगंवेगवतोराजंस्तस्थौवीरोविधारयन् १८ सवेगवतिकौंतेयसांबोवेगवतींगदाम् ॥ चिक्षेपतरसावीरो
व्याविद्धचसत्यविक्रमः १९ तयात्वभिहतोराजन्वेगवान्न्यपतद्भुवि ॥ वातरुग्णइवक्षुण्णोजीर्णमूलोवनस्पतिः २० तस्मिन्विनिहतेवीरेगदानुन्नेमहासुरे ॥ प्र
विश्यमहतींसेनांयोधयामासमेसुतः २१ चारुदेष्णेनसंसक्तोविविंध्योनामदानवः ॥ महारथःसमाज्ञातोमहाराजमहाधनुः २२ ततःसुतुमुलंयुद्धंचारुदेष्णवि
विंध्ययोः ॥ वृत्रवासवयोराजन्यथापूर्वंतथाऽभवत् २३ अन्योन्यस्याभिसंक्रुद्धावन्योन्यंजघ्नतुःशरैः ॥ विनदंतौमहारावान्सिंहाविवमहाबलौ २४ रौक्मिणे
यस्ततोबाणमग्न्यर्कोपमवर्चसम् ॥ अभिमंत्र्यमहास्त्रेणसंदधेशत्रुनाशनम् २५ सविविंध्यायसक्रोधःसमाहूयमहारथः ॥ चिक्षेपमेसुतोराजन्सगतासुरथापतत्
२६ विविंध्यंनिहतंदृष्ट्वातांचविक्षोभितांचमूम् ॥ कामगेनससौभेनशाल्वःपुनरुपागमत् २७ ततोव्याकुलितंसर्वंद्वारकावासितद्बलम् ॥ दृष्ट्वाशाल्वंमहाबा
होसौभस्थंनृपतेतदा २८ ततोनिर्यायकौरव्यअवस्थाप्यचतद्बलम् ॥ आनर्तानांमहाराजप्रद्युम्नोवाक्यमब्रवीत् २९ सर्वेभवंतस्तिष्ठंतुसर्वेपश्यंतुमांयुधि ॥
निवारयंतंसंग्रामेबलात्सौभंसराजकम् ३० अयंसौभपतेःसेनामायसैर्भुजगैरिव ॥ धनुर्भुजविनिर्मुक्तैर्नाशयाम्यद्ययादवाः ३१ आश्वसध्वंनभीःकार्यासौभराड
द्यनश्यति ॥ मयाऽभिपन्नोदुष्टात्मासससौभोविनाशिष्यति ३२ एवंब्रुवतिसंहृष्टेप्रद्युम्नेपांडुनंदन ॥ धिष्ठितंतद्बलंवीरयुयुधेचयथासुखम् ३३ ॥ इतिश्री
महाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिसौभवधोपाख्यानेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
वासुदेवउवाच ॥ एवमुक्त्वारौक्मिणेयोयादवान्भरतर्षभ ॥ दंशितैर्हरिभिर्युक्तंरथमास्थायकांचनम् १ उच्छ्रित्यमकरंकेतुंव्यात्ताननमिवांतकम् ॥ उत्पतद्भि
रिवाकाशंतैर्हयैरन्वयात्परान् २ विक्षिपन्नादयंश्चापिधनुःश्रेष्ठंमहाबलैः ॥ तूणखड्गधरःशूरोबद्धगोधांगुलित्रवान् ३ सविद्युच्छुरितंचापंविहरन्वैतलात्तलम् ॥ मो
हयामासदैतेयान्सर्वान्सौभनिवासिनः ४ तस्यविक्षिपतश्चापंसंदधानस्यचासकृत् ॥ नांतरंददृशेकाश्चिन्निघ्नतःशात्रवान्रणे ५

ऽध्यायः ॥ १६ ॥ ॥ एवमुक्त्वेति हरिभिरश्वैः १ अन्वयादुपगतः २ विक्षिपन् परान्विक्षुर्वन् महाबलैर्हयैः ३ समानंविद्युच्छुरितेनविद्युत्कंपनेनेतिसविद्युच्छुरितं तलात
लंसव्यापसव्यहस्ततलपरिवर्तेन ४ विक्षिपतःकर्षतः ५ ॥१७॥

विकल्पतेभिद्यते ६ जलेचरोमीनःतिमिर्मीनःवाहमुख्येरथश्रेष्ठे ७ । ८ । ९ । १० । ११ सानुकर्षःरथाधस्थकाष्ठमनुकर्षः सःरथःतूणवान् १२ । १३ । १४ । १५ आपततेतिविसर्गलोपआर्षः

मुखस्यवर्णोनविकल्पतेऽस्यचेलुश्चगात्राणिनचापितस्य ॥ सिंहोन्नतंचाप्यभिगर्जतोऽस्यशुश्रावलोकोद्भुतवीर्यमग्र्यम् ६ जलेचरःकांचनयष्टिसंस्थोव्यात्तान
नःसर्वतिमिप्रमाथी ॥ वित्रासयन्राजतिवाहमुख्येशाल्वस्यसेनाप्रमुखेध्वजाग्र्यः ७ ततस्तूर्णंविनिष्पत्यप्रद्युम्नःशत्रुकर्षणः ॥ शाल्वमेवाभिदुद्रावविधित्सुः
कलहंनृप ८ अभियानंतुवीरेणप्रद्युम्नेनमहारणे ॥ नामर्षयतसंक्रुद्धःशाल्वःकुरुकुलोद्वह ९ सरोषमदमत्तोवैकामगादवरुह्यच ॥ प्रद्युम्नंयोधयामासशाल्वःपर
पुरंजयः १० तयोःसुतुमुलंयुद्धंशाल्ववृष्णिप्रवीरयोः ॥ समेतादद्दशुर्लोकाबलिवासवयोरिव ११ तस्यमायामयोवीररथोहेमपरिष्कृतः ॥ सपताकःसध्वजश्च
सानुकर्षःसतूणवान् १२ सतंरथवरंश्रीमान्समारुह्यकिलप्रभो ॥ मुमोचबाणान्कौरव्यप्रद्युम्नायमहाबलः १३ ततोबाणमयंवर्षंव्यसृजत्तरसारणे ॥ प्रद्युम्नोभुज
वेगेनशाल्वंसंमोहयन्निव १४ सतैरभिहतःसंख्येनामर्षयतसौभराट् ॥ शरान्दीप्ताग्निसंकाशान्मुमोचतनयेमम १५ तानापततबाणौघान्सचिच्छेदमहाब
लः ॥ ततश्चान्यान्शरान्दीप्तान्प्रचिक्षेपसुतेमम १६ सशाल्वबाणैराजेंद्रविद्धोरुक्मिणिनंदनः ॥ मुमोचबाणंत्वरितोमर्मभेदिनमाहवे १७ तस्यवर्मविभिद्या
शुसबाणोमत्सुतेरितः ॥ विव्याधहृदयंपत्रीसमुमोहपपातच १८ तस्मिन्निपतितेवीरेशाल्वराजेविचेतसि ॥ संप्राद्रवन्दानवेंद्रादारयंतोवसुंधराम् १९ हाहा
कृतमभूत्सैन्यंशाल्वस्यपृथिवीपते ॥ नष्टसंज्ञेनिपतितेतदासौभपतौनृपे २० ततउत्थायकौरव्यप्रतिलभ्यचचेतनाम् ॥ मुमोचबाणान्सहसाप्रद्युम्नायमहाब
लः २१ तैःसविद्धोमहाबाहुःप्रद्युम्नःसमरेस्थितः ॥ जत्रुदेशेभृशंवीरोव्यवासीदद्रथेतदा २२ तंसविद्ध्वामहाराजशाल्वोरुक्मिणिनंदनम् ॥ ननादसिंहनादं
वैनादेनापूरयन्महीम् २३ ततोमोहंसमापन्नेतनयेममभारत ॥ मुमोचबाणांस्त्वरितःपुनरन्यान्दुरासदान् २४ सतैरभिहतोबाणैर्बहुभिस्तेनमोहितः ॥ नि
श्चेष्टःकौरवश्रेष्ठप्रद्युम्नोऽभूद्रणाजिरे २५ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिसौभवधोपाख्यानेसप्तदशोऽध्यायः ॥ १७॥ वासुदेवउवाच ॥
शाल्वबाणार्दितेतस्मिन्प्रद्युम्नेबलिनांवरे ॥ वृष्णयोभग्नसंकल्पाविव्यथुःपृतनागताः १ हाहाकृतमभूत्सर्वंवृष्ण्यंधकबलंततः ॥ प्रद्युम्नेमोहितेराजन्परेचमुदि
ताभृशम् २ तंतथामोहितंदृष्ट्वासारथिर्जवनैर्हयैः ॥ रणादपाहरत्तूर्णंशिक्षितोदारुकिस्तदा ३ नातिदूरापयातेतुरथेरथवरप्रणुत ॥ धनुर्गृहीत्वायंतारंलब्धसं
ज्ञोऽब्रवीदिदम् ४ सौतेकिंतेव्यवसितंकस्माद्यासिपराङ्मुखः ॥ नैषवृष्णिप्रवीराणामाहवेधर्मउच्यते ॥ ५ ॥

१६ । १७ । १८ । १९ । २० । २१ जत्रुदेशेकंठमूलेव्यवासीदद्विशेषेणावसादंप्राप्तः २२ । २३ । २४ । २५ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपेसप्तदशो
ऽध्यायः ॥ १७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ शाल्वेति १ । २ । ३ । ४ । ५

६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ शिनेर्नप्तासात्यकिः १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ ३२
कच्चित्सौतेनतेमोहःशाल्वंदृष्ट्वामहाहवे ॥ विषादोवारणंदृष्ट्वाब्रूहिमेत्वंयथातथम् ६ ॥ सौतिरुवाच ॥ जनार्दनेनमेमोहोनापिमांभयमाविशत् ॥ अतिभारंतुते
 मन्येशाल्वंकेशवनंदन ७ सोपयामिशनैर्वीरबलवानेषपापकृत् ॥ मोहितश्चरणेशूरोरक्ष्यःसारथिनारथी ८ आयुष्मंस्त्वंमयानित्यंरक्षितव्यस्त्वयाऽप्यहम् ॥
रक्षितव्योरथीनित्यमितिकृत्वाऽपयाम्यहम् ९ एकश्चासिमहाबाहोबहवश्चापिदानवाः ॥ नसमंरौक्मिणेयाहंरणेमत्वाऽपयामिवै १० एवंब्रुवतिसूतेतुतदामक
रकेतुमान् ॥ उवाचसूतंकौरव्यनिवर्तयरथंपुनः ११ दारुकात्मजमैवंत्वंपुनःकार्षीःकथंचन ॥ व्यपयानंरणात्सौतेजीवतोममकर्हिचित् १२ नसवृष्णिकुलेजा
तोयोवैत्यजतिसंगरम् ॥ योवानिपतितंहंतितवास्मीतिचवादिनम् १३ तथास्त्रियंचयोहंतिबालंवृद्धंतथैवच ॥ विरथंविप्रकीर्णंचभग्नशस्त्रायुधंतथा १४ त्वंच
सूतकुलेजातोविनीतःसूतकर्मणि ॥ धर्मज्ञश्चासिवृष्णीनामाहवेष्वपिदारुके १५ सजानंश्चरितंकृत्स्नंवृष्णीनांपृतनामुखे ॥ अपयानंपुनःसौतेमैवंकार्षीःकथं
चन १६ अपयातंहतंपृष्ठेभ्रांतंरणपलायितम् ॥ गदाग्रजोदुराधर्षःकिंमांवक्ष्यतिमाधवः १७ केशवस्याग्रजोवाऽपिनीलवासामदोत्कटः ॥ किंवक्ष्यतिमहाबाहु
र्बलदेवःसमागतः १८ किंवक्ष्यतिशिनेर्नप्तानरसिंहोमहाधनुः ॥ अपयातंरणात्सूतसांबश्चसमितिंजयः १९ चारुदेष्णश्चदुर्धर्षस्तथैवगदसारणौ ॥ अक्रूरश्च
महाबाहुःकिंमांवक्ष्यतिसारथे २० शूरंसंभावितंशांतंनित्यंपुरुषमानिनम् ॥ स्त्रियश्चवृष्णिवीराणांकिंमांवक्ष्यंतिसंहताः २१ प्रद्युम्नोऽयमुपायातिभीतस्त्य
क्त्वामहाहवम् ॥ धिगेनमितिवक्ष्यंतिनतुवक्ष्यंतिसाध्विति २२ धिग्वाचापरिहासोऽपिममवामद्विधस्यवा ॥ मृत्युनाऽभ्यधिकःसौतेसत्वंमाव्यपयाःपुनः २३
भारंहिमयिसंन्यस्ययातोमधुनिहाहरिः ॥ यज्ञंभारतसिंहस्यनहिशक्योऽद्यमर्षितुम् २४ कृतवर्मामयावीरोनिर्यास्यन्नेववारितः ॥ शाल्वंनिवारयिष्येऽहंतिष्ठ
त्वमितिसूतज २५ सचसंभावयन्मांवैनिवृत्तोहृदिकात्मजः ॥ तंसमेत्यरणंत्यक्त्वाकिंवक्ष्याभिमहारथम् २६ उपयातंदुराधर्षंशंखचक्रगदाधरम् ॥ पुरुषंपुंड
रीकाक्षंकिंवक्ष्यामिमहाभुजम् २७ सात्यकिंबलदेवंचयेचान्येंऽधकवृष्णयः ॥ मयास्पर्धंतिसततंकिंनुवक्ष्यामितानहम् २८ त्यक्त्वारणमिमंसौतेपृष्ठतोऽभ्या
हतःशरैः ॥ त्वयाऽपनीतोविवशोनजीवेयंकथंचन २९ सनिवर्तरथेनाशुपुनर्दारुकनंदन ॥ नचैतदेवंकर्तव्यमथापत्सुकथंचन ३० नजीवितमहंसौतेबहुम
न्येकथंचन ॥ अपयातोरणाद्भीतःपृष्ठतोऽभ्याहतःशरैः ३१ कदापिसूतपुत्रत्वंजानीषेमांभयार्दितम् ॥ अपयातंरणंहित्वायथाकापुरुषंतथा ३२ नयुक्तंभ
वतात्यक्तुंसंग्रामंदारुकात्मज ॥ मयियुद्धार्थिनिभृशंसत्वंयाहियतोरणम् ३३ ॥ ॥ इ०म०भा०आ०प०अ०प०सौभवधोपाख्यानेऽष्टादशोऽध्यायः ॥ १८ ॥
३३ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेऽष्टादशोऽध्यायः ॥ १८ ॥

एवमुक्तइति १ । २ । ३ । ४ । ५ । ६ । ७ यमकानिसदृशानिइतराणिविसदृशानि ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३
॥ वासुदेवउवाच ॥ एवमुक्तस्तुकौंतेयसूतपुत्रस्ततोऽब्रवीत् ॥ प्रद्युम्नंबलिनांश्रेष्ठंमधुरंश्लक्ष्णमंजसा १ नमेभयंरौक्मिणेयसंग्रामेयच्छतोहयान् ॥ युद्धज्ञोऽ
स्मिचवृष्णीनांनात्रकिंचिदतोऽन्यथा २ आयुष्मन्नुपदेशस्तुसारथ्येवर्ततांस्मृतः ॥ सर्वार्थेषुरथीरक्ष्यस्त्वंचापिभृशपीडितः ३ त्वंहिशाल्वप्रयुक्तेनशरेणाभिह
तोभृशम् ॥ कश्मलाभिहतोवीरततोऽहमपयातवान् ४ सत्वंसात्वतमुख्याद्यलब्धसंज्ञोयदृच्छया ॥ पश्यमेहयसंयानेशिक्षांकेशवनंदन ५ दारुकेणाहमुत्पन्नो
यथावच्चैवशिक्षितः ॥ वीतभीःप्रविशाम्येतांशाल्वस्यप्रथितांचमूम् ६ ॥ वासुदेवउवाच ॥ एवमुक्त्वाततोवीरहयान्संचोद्यसंगरे ॥ रश्मिभिस्तुसमुद्यम्यजवेना
भ्यपतत्तदा ७ मंडलानिविचित्राणियमकानीतराणिच ॥ सव्यानिचविचित्राणिदक्षिणानिचसर्वशः ८ प्रतोदेनाहताराजन्रश्मिभिश्चसमुद्यताः ॥ उत्पतंत
इवाकाशेव्यचरंस्तेहयोत्तमाः ९ तेहस्तलाघवोपेतंविज्ञायनृपदारुकिम् ॥ दह्यमानाइवतदानास्पृशंश्चरणैर्महीम् १० सोपसव्यांचमूंतस्यशाल्वस्यभरतर्ष
भ ॥ चकारनातियत्नेनतदद्भुतमिवाभवत् ११ अमृष्यमाणोऽपसव्यंप्रद्युम्नेनचसौभराट् ॥ यंतारमस्यसहसात्रिभिर्बाणैःसमार्दयत् १२ दारुकस्यसुतस्तत्र
बाणवेगमचिंतयन् ॥ भूयएवमहाबाहोप्रययावपसव्यतः १३ ततोबाणान्बहुविधान्पुनरेवससौभराट् ॥ मुमोचतनयेवीरममरुक्मिणिनंदने १४ तानप्राप्तान्शि
तैर्बाणैश्चिच्छेदपरवीरहा ॥ रौक्मिणेयःस्मितंकृत्वादर्शयन्हस्तलाघवम् १५ छिन्नान्दृष्ट्वातुतान्बाणान्प्रद्युम्नेनचसौभराट् ॥ आसुरींदारुणींमायामास्थाय
व्यसृजच्छरान् १६ प्रयुज्यमानमाज्ञायदैतेयास्त्रंमहाबलम् ॥ ब्रह्मास्त्रेणांतराच्छित्त्वामुमोचान्यान्पतत्रिणः १७ तेतदस्त्रंविधूयाशुविव्यधूरुधिराशनाः ॥ शिर
स्युरसिवक्त्रेचसमुमोहपपातच १८ तस्मिन्निपतितेक्षुद्रेशाल्वेबाणप्रपीडिते ॥ रौक्मिणेयोपरंबाणंसंदधेशत्रुनाशनम् १९ तमर्चितंसर्वदाशार्हपूगैराशीविषा
ग्निज्वलनप्रकाशम् ॥ दृष्ट्वाशरंज्यामभिनीयमानंबभूवहाहाकृतमंतरिक्षम् २० ततोदेवगणाःसर्वेसेंद्राःसहधनेश्वराः ॥ नारदंप्रेषयामासुःश्वसनंचमनोजवम्
२१ तौरौक्मिणेयमागम्यवचोऽब्रूतांदिवौकसाम् ॥ नैषवध्यस्त्वयावीरशाल्वराजःकथंचन २२ संहरस्वपुनर्बाणमवध्योऽयंत्वयारणे ॥ एतस्यचशरस्याजौना
७ वध्योऽस्तिपुमान्कश्चित् २३ मृत्युरस्यमहाबाहोरणेदेवकिनंदनः ॥ कृष्णःसंकल्पितोधात्रातन्मिथ्यानभवेदिति २४ ततःपरमसंहृष्टःप्रद्युम्नःशरमुत्तमम् ॥
संजहारधनुःश्रेष्ठात्तूणेचैवन्यवेशयत् २५ ततउत्थायराजेंद्रशाल्वःपरमदुर्मनाः ॥ व्यपायात्सबलस्तूर्णंप्रद्युम्नशरपीडितः २६ सद्वारकांपरित्यज्यक्रूरोवृष्णिभि
रार्दितः ॥ सौभमास्थायराजेंद्रदिवमाचक्रमेतदा २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिसौभवधोपाख्यानेएकोनविंशोऽध्यायः ॥१९॥
२४ । २५ । २६ । २७ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

आनर्त्तेति १ । २ हार्दिकात्मजंकृतवर्माणम् ३ । ४ । ५ । ६ । ७ । ८ । ९ त्रिःसामात्रिस्वरा नीचमंद्रतारभावेन त्रिःसमाहन्यतामित्यपिपठंति १० । ११ वाचयित्वास्वस्तित्रादानिति
शेषः १२ । १३ जितकाशिनाजयशोभिना । जिताः काशयोदेशविशेषायेनेतिवा तेहिशूरत्वेनातिप्रसिद्धाः काश्योवाविदेहोवेतिश्रुतिलिंगात् १४ मार्तिकावतंदेशविशेषमासदंप्राप्तः १९

॥ वासुदेवउवाच ॥ आनर्त्तनगरंमुक्तंततोऽहमगमंतदा ॥ महाक्रतौराजसूयेनिवृत्तेनृपतेतव १ अपश्यंद्वारकांचाहंमहाराजहतत्विषम् ॥ निःस्वाध्यायवष
ट्कारांनिर्भूषणवरस्त्रियम् २ अनभिज्ञेयरूपाणिद्वारकोपवनानिच ॥ दृष्ट्वाशंकोपपन्नोऽहमपृच्छंहृदिकात्मजम् ३ अस्वस्थनरनारीकमिदंवृष्णिकुलंभृशम् ॥
किमिदंनरशार्दूलश्रोतुमिच्छामितत्त्वतः ४ एवमुक्तःसतुमयाविस्तरेणेदमब्रवीत् ॥ रोधंमोक्षंचशाल्वेनहार्दिक्योराजसत्तम ५ ततोऽहंभरतश्रेष्ठश्रुत्वासर्वम
शेषतः ॥ विनाशेशाल्वराजस्यतदैवाकरवंमतिम् ६ ततोहंभरतश्रेष्ठसमाश्वास्यपुरेजनम् ॥ राजानमाहुकंचैवतथैवानकदुंदुभिम् ७ सर्वान्वृष्णिप्रवीरांश्चह
र्षयन्नब्रुवंतदा ॥ अप्रमादःसदाकार्योनगरेयादवर्षभाः ८ शाल्वराजविनाशायप्रयातंमांनिबोधत ॥ नाहत्वातंनिवर्तिष्येपुरींद्वारवतींप्रति ९ सशाल्वंसौभन
गरंहत्वाद्रष्टाऽस्मिवःपुनः ॥ त्रिःसामाहन्यतामेषादुंदुभिःशत्रुभीषणा १० तेमयाऽऽश्वासितावीरायथावद्भरतर्षभ ॥ सर्वेमामब्रुवन्हृष्टाःप्रयाहिजहिशात्रवान्
११ तैःप्रहृष्टात्मभिर्वीरैराशीर्भिरभिनंदितः ॥ वाचयित्वाद्विजश्रेष्ठान्प्रणम्यशिरसाभवम् १२ शैब्यसुग्रीवयुक्तेनरथेनानादयन्दिशः ॥ प्रध्मायशंखप्रवरंपां
चजन्यमहंनृप १३ प्रयातोऽस्मिनरव्याघ्रबलेनमहतावृतः ॥ क्लृप्तेनचतुरंगेणयत्तेनजितकाशिना १४ समतीत्यबहून्देशान्गिरींश्चबहुपादपान् ॥ सरांसि
सरितश्चैवमार्तिकावतमासदम् १५ तत्राश्रौषंनरव्याघ्रशाल्वंसागरमंतिकात् ॥ प्रयांतंसौभमास्थायतमहंपृष्ठतोऽन्वयाम् १६ ततःसागरमासाद्यकुक्षौतस्य
महोर्मिणः ॥ समुद्रनाभ्यांशाल्वोऽभूत्सौभमास्थायशत्रुहन् १७ ससमालोक्यदूरान्मांस्मयन्निवयुधिष्ठिर ॥ आह्वयामासदुष्टात्मायुद्धायैवमुहुर्मुहुः १८ तस्य
शार्ङ्गविनिर्मुक्तैर्बहुभिर्मर्मभेदिभिः ॥ पुरंनासाद्यतशरैस्ततोमांरोषआविशत् १९ सचापिपापप्रकृतिर्दैतेयापसदोनृप ॥ मय्यवर्षतदुर्धर्षःशरधाराःसहस्रशः
२० सैनिकान्ममसूतंचहयांश्चसमाकिरत् ॥ अचिंतयंतस्तुशरान्वयंयुद्ध्यामभारत २१ ततःशतसहस्राणिशराणांनतपर्वणाम् ॥ चिक्षिपुःसमरेवीरामयि
शाल्वपदानुगाः २२ तेहयांश्चरथंचैवतदादारुकमेवच ॥ छादयामासुरसुरास्तैर्बाणैर्मर्मभेदिभिः २३ नहयानरथोवीरनयंताममदारुकः ॥ अदृश्यंतशरैश्छ
न्नास्तथाऽहंसैनिकाश्चमे २४ ततोऽहमपिकौंतेयशराणामयुतान्बहून् ॥ आमंत्रितानांधनुषादिव्येनविधिनाऽक्षिपम् २५

सागरमंतिकात्सागरसमीपेअन्वयामनुगतवानस्मि १६ महोर्मिणः महोर्मिमतः व्रीह्यादित्वादिनिः नाभ्यांगर्भेगुप्तइत्यर्थः १७ । १८ तस्यपुरंमदीयैः शरैर्नासाद्यतेतिसंबंधः १९ । २०
२१ नतानिनिम्नीकृतानिपर्वाणिग्रंथयोयेषांश्लक्ष्णानामित्यर्थः २२ । २३ । २४ आमंत्रितानामभिमंत्रितानां दिव्येनविधिनाअलौकिकयाऽस्त्रविद्यया २५

विषयोगोचरःतत्रहेतुः खेविषक्तंलग्नम् २६ तलस्वनैर्हस्ततलशब्दैः २७ दानवानामंगेष्वितिसंबंधःरुचिरापांगाश्चित्रपुंखाः २८ वध्यतांवध्यमानानां २९ । ३० । ३१ प्राणेनबलेन ३२ । ३३
असयःखड्गाः शक्तिःकौमारी कुलिशानिवज्राणि पाशावारुणाः ऋष्टयोदंडाः शक्त्यादीनांकनोदीप्तिर्गतिःशोभावातांपातितेशक्तिकुलिशपाशर्ष्टिकनपाः कार्तिकेयेंद्रवरुणयमायुधतुल्याः

नतत्रविषयस्त्वासीन्ममसैन्यस्यभारत ॥ खेविषक्तंहितत्सौभंक्रोशमात्रइवाभवत् २६ ततस्तेप्रेक्षकाःसर्वेरंगवाटइवस्थिताः ॥ हर्षयामासुरुच्चैर्मांसिंहनादत
लस्वनैः २७ मत्कराग्रविनिर्मुक्तादानवानांशरास्तथा ॥ अंगेषुरुचिरापांगाविविशुःशलभाइव २८ ततोहलहलाशब्दःसौभमध्येव्यवर्धत ॥ वध्यतांविशिखै
स्तीक्ष्णैःपततांचमहार्णवे २९ तेनिकृत्तभुजस्कंधाःकबंधाकृतिदर्शनाः ॥ नदंतोभैरवान्नादान्निपतंतिस्मदानवाः ३० पतितास्तेऽपिभक्ष्यंतेसमुद्रांभोनिवा
सिभिः ॥ ततोगोक्षीरकुंदेंदुमृणालरजतप्रभम् ३१ जलजंपांचजन्यंवैप्राणेनाहमपूरयम् ॥ तान्दृष्ट्वापतितांस्तत्रशाल्वःसौभपतिस्ततः ३२ मायायुद्धेनम
हतायोधयामासमांयुधि ॥ ततोगदाहलाःप्रासाःशूलशक्तिपरश्वधाः ३३ असयःशक्तिकुलिशपाशर्ष्टिकनपाःशराः ॥ पट्टिशाश्चभुशुंड्यश्चप्रपतंत्यनिशंमयि
३४ तामहंमाययैवाशुप्रतिगृह्यव्यनाशयम् ॥ तस्यांहतायांमायायांगिरिशृंगैरयोधयत् ३५ ततोऽभवत्तमइवप्रकाशइवचाभवत् ॥ दुर्दिनंसुदिनंचैवशीतमु
ष्णंचभारत ३६ अंगारपांशुवर्षंचशस्त्रवर्षंचभारत ॥ एवंमायांप्रकुर्वाणोयोधयामासमांरिपुः ३७ विज्ञायतदहंसर्वंमाययैवव्यनाशयम् ॥ यथाकालंतुयुद्धेन
व्यधमंसर्वतःशरैः ३८ ततोव्योममहाराजशतसूर्यमिवाभवत् ॥ शतचंद्रंचकौंतेयसहस्रायुततारकम् ३९ ततोनाज्ञायततदादिवारात्रंतथादिशः ॥ ततो
ऽहंमोहमापन्नःप्रज्ञास्त्रंसमयोजयम् ४० ततस्तदस्त्रंकौंतेयधूतंतूलमिवानिलैः ॥ तथातदभवद्युद्धंतुमुलंलोमहर्षणम् ॥ लब्धालोकस्तुराजेंद्रपुनःशत्रुमयो
धयम् ४१ ॥ ॥ इतिश्रीम०भा०आरण्यकेपर्वणिअर्जुना०प०सौभवधोपाख्यानेविंशोऽध्यायः ॥ २० ॥ ॥ वासुदेवउवाच ॥ ॥ एवंसपुरुषव्या
घ्रःशाल्वराजोमहारिपुः ॥ युध्यमानोमयासंख्येवियदभ्यगमत्पुनः १ ततःशतघ्नीश्चमहागदाश्चदीप्तांश्चशूलान्मुसलानसींश्च ॥ चिक्षेपरोषान्मयिमंदबुद्धिःशा
ल्वोमहाराजजयाभिकांक्षी २ तानाशुगैरापततोऽहमाशुनिवार्यहंतुंखगमान्खएव ॥ द्विधात्रिधाचाच्छिनमाशुमुक्तैस्ततोंऽतरिक्षेनिनदोबभूव ३ ततःशतस
हस्रेणशराणांनतपर्वणाम् ॥ दारुकंवाजिनश्चैवरथंचसमवाकिरत् ४ ततोमामब्रवीद्वीरदारुकोविह्वलन्निव ॥ स्थातव्यमितितिष्ठामिशाल्वबाणप्रपीडितः ॥
अवस्थातुंनशक्नोमिअंगंमेव्यवसीदति ५ इतितस्यनिशम्याहंसारथेःकरुणंवचः ॥ अवेक्षमाणोयंतारमपश्यंशरपीडितम् ६ नतस्योरसिनोमूर्ध्निनकायेनभु
जद्वये ॥ अंतरंपांडवश्रेष्ठपश्याम्यनिचितंशरैः ७

इत्यर्थः । कनीन्त्रिश्रीगतिच्युताविति बोपदेवः ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० तदस्त्रंमायामयम् ४१ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेविंशोऽध्यायः ॥ २० ॥
एवंसइति १ । २ । ३ । ४ । ५ । ६ । ७

बाणवरोत्पीडात्क्षतस्थानात्उल्बणमुल्कटम् ८ अस्तंभयमाश्वासितवान् ९ अथमांपुरुषःकश्चिदित्यादेरध्यायशेषस्यतात्पर्यं भगवानपिक्षुद्रजनमाययामोहितः किमुतक्षुद्रजनोमगवन्माय येति शुद्धचैतन्याश्रितमेवाज्ञानामितिवा १० । ११ पितृसखआहुकः १२ उपायायोपगस्यविषक्तेऽन्यत्रव्यासक्तेशूरसुतोवसुदेवः १३ । १४ १५ अहंजगर्हे । वैचित्यात्परोक्ष्येलिट् निंदितवान्

सतुबाणवरोत्पीडाद्विसुस्रावत्यसृगुल्बणम् ॥ अभिवृष्टेयथामेघेगिरिर्गैरिकधातुमान् ८ अभीषुहस्तंतंदृष्ट्वासीदंतंसारथिंरणे ॥ अस्तंभयंमहाबाहोशाल्वबाणप्रपी डितम् ९ अथमांपुरुषःकश्चिद्द्वारकानिलयोऽब्रवीत् ॥ त्वरितोरथमारोप्यसौहृदादिवभारत १० आहुकस्यवचोवीरतस्यैवपरिचारकः ॥ विषण्णःसन्नकंठेन तन्निबोधयुधिष्ठिर ११ द्वारकाधिपतिर्वीरआहत्वामाहुकोवचः ॥ केशवेहिविजानीष्वयत्त्वांपितृसखोऽब्रवीत् १२ उपायायाद्यशाल्वेनद्वारकांवृष्णिनंदन ॥ विषक्तेत्वयिदुर्धर्षहतःशूरसुतोबलात् १३ तदलंसाधुयुद्धेननिवर्तस्वजनार्दन ॥ द्वारकामेवरक्षस्वकार्यमेतन्महत्तव १४ इत्यहंतस्यवचनंश्रुत्वापरमदुर्मनाः ॥ निश्चयंनाधिगच्छामिकर्तव्यस्येतरस्यच १५ सात्यकिंबलदेवंचप्रद्युम्नंचमहारथम् ॥ जगर्हेमनसावीरतच्छ्रुत्वामहदप्रियम् १६ अहंहिद्वारकायाश्चपितुश्चकु रुनंदन ॥ तेपुरक्षांसमाधायप्रयातःसौभपातने १७ बलदेवोमहाबाहुःकच्चिज्जीवतिशत्रुहा ॥ सात्यकीरौक्मिणेयश्चचारुदेष्णश्चवीर्यवान् १८ सांबप्रभृतयश्चै वेत्यहमासंसुदुर्मनाः॥ एतेषुहिनरव्याघ्रजीवत्सुनकथंचन १९ शक्यःशूरसुतोहंतुमपिवज्रभृतास्वयम् ॥ हतःशूरसुतोव्यक्तंव्यक्तंचैतेपरासवः २० बलदेवमुखाः सर्वइतिमेनिश्चितामतिः ॥ सोऽहंसर्वविनाशंतंचिंतयानोमुहुर्मुहुः ॥ सुविह्वलोमहाराजपुनःशाल्वमयोधयम् २१ ततोऽपश्यंमहाराजप्रपतंतमहंतदा ॥ सौभा च्छूरसुतंवीरततोमांमोहआविशत् २२ तस्यरूपंप्रपततःपितुर्ममनराधिप ॥ ययातेःक्षीणपुण्यस्यस्वर्गादिवमहीतलम् २३ विशीर्णमलिनोष्णीषप्रकीर्णांबर मूर्धजः ॥ प्रपतन्दृश्यतेहस्मक्षीणपुण्यइवग्रहः २४ ततःशार्ङ्गंधनुःश्रेष्ठंकरात्प्रपतितंमम ॥ मोहापन्नश्चकौंतेयरथोपस्थउपाविशम् २५ ततोहाहाकृतंसर्वंसै न्यंमेगतचेतनम् ॥ मांदृष्ट्वारथनीडस्थंगतासुमिवभारत २६ प्रसार्यबाहूपततःप्रसार्यचरणावपि ॥ रूपंपितुर्मेविबभौशकुनेःपततोयथा २७ तंपततंमहाबा होशूलपट्टिशपाणयः ॥ अभिघ्नंतोभृशंवीरममचेतोह्यकंपयन् २८ ततोमुहूर्तात्प्रतिलभ्यसंज्ञामहंतदावीरमहाविमर्दे ॥ नतत्रसौभंनरिपुंचशाल्वंपश्यामिवृद्धं पितरंनचापि २९ ततोममासीन्मनसिमायेयमितिनिश्चितम् ॥ प्रबुद्धोऽस्मिततोभूयःशतशोऽवाकिरञ्छरान् ३० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्व णिअर्जुनाभिगमनपर्वणिसौभवधोपाख्यानेएकविंशोऽध्यायः २१ ॥ ॥ वासुदेवउवाच ॥ ततोऽहंभरतश्रेष्ठप्रगृह्यरुचिरंधनुः ॥ शरैरपातयंसौभाच्छिरां सिविबुधद्विषाम् १ शरांश्चाशीविषाकारानूर्ध्वगांस्तिग्मतेजसः ॥ प्रेषयंशाल्वराजायशार्ङ्गमुक्तान्सुवाससः २ ततोनादृश्यततदासौभंकुरुकुलोद्वह ॥ अं तर्हितंमाययाऽभूत्ततोऽहंविस्मितोऽभवम् ३

१६ । १७ । १८ । १९ । २० । २१ । २२ । २३ २४ । २५ । २६ । २७ । २८ । २९ । ३० ॥ ॥ इत्यारण्यकेपर्वणि नैलकंठीयेभारतभावदीपेएकविंशोऽध्यायः ॥ २१ ॥ ॥ ततोऽहमिति १ सुवाससःसुपुंखान् २ । ३

विकृताननमूर्धजाइतितेषांस्वरूपकथनंनतुतद्दर्शनं धिष्ठितेप्रागल्भ्येनास्थिते । विष्ठितेइतिपाठेऽपिसएवार्थः ४ शब्दएवसाहोलक्ष्यंयत्रतत्तथा शब्दवेधिशब्देत्युपारमन्नपपतदित्यर्थः । शब्द साहंशब्दबाधानिवारकंवा ५ शब्दसाधनैःशब्दएवसाधनंलक्ष्यसंबंधेकारणंयेषांतैःपुरस्यादृश्यत्वात् ६ । ७ । ८ प्राग्ज्योतिषंपूर्वसमुद्रतीरस्थंनगरविशेषंयतःकामगममतःप्राग्ज्योतिषंगत्वाव्य दृश्यत ९ । १० । ११ अप्रख्यातिमदर्शनंइयांप्राप्तवान् १२ । १३ । १४ । १५ एवमिति हेवीरहेअच्युतएवंमांसौभराजोविजितवान्एतदप्यहंपश्चादश्रौषं पूर्वंमोहमापन्नःसन्संज्ञालाभानंतरं

अथदानवसंघास्तेविकृताननमूर्धजाः ॥ उदक्रोशन्महाराजधिष्ठितेमयिभारत ४ ततोऽस्त्रंशब्दसाहंवैत्वरमाणोमहारणे ॥ अयोजयंतद्वधायततःशब्दउपारमत् ५ हतास्तेदानवाःसर्वेयैःसशब्दउदीरितः ॥ शरैरादित्यसंकाशैर्ज्वलितैःशब्दसाधनैः ६ तस्मिन्नुपरतेशब्देपुनरेवान्यतोऽभवत् ॥ शब्दोऽपरोमहाराजतत्रापि प्राहरंशरैः ७ एवंदशदिशःसर्वास्तिर्यगूर्ध्वंचभारत ॥ नादयामासुरसुरास्तेचापिनिहतामया ८ ततःप्राग्ज्योतिषंगत्वापुनरेवव्यदृश्यत ॥ सौभंकामगमंवीर मोहयन्ममचक्षुषी ९ ततोलोकांतकरणोदानवोदारुणाकृतिः ॥ शिलावर्षेणमहतासहसामांसमावृणोत् १० सोऽहंपर्वतवर्षेणवध्यमानःपुनःपुनः ॥ वल्मीकइव राजेंद्रपर्वतोपाचितोऽभवं ११ ततोऽहंपर्वतचितःसहयःसहसारथिः ॥ अप्रख्यातिमियांराजन्सर्वतःपर्वतैश्चितः १२ ततोवृष्णिप्रवीरायेममासन्सैनिकास्तदा ॥ तेभयार्तादिशःसर्वेसहसाविप्रदुद्रुवुः १३ ततोहाहाकृतमभूत्सर्वंकिलविशांपते ॥ द्यौश्चभूमिश्चखंचैवादृश्यमानेतथामयि १४ ततोविषण्णमनसोममराजन्सुहृ ज्जनाः ॥ रुरुदुश्चुक्रुशुश्चैवदुःखशोकसमन्विताः १५ द्विषतांचप्रहर्षोऽभूदार्तिश्चाद्विषतामपि ॥ एवंविजितवान्वीरपश्चादश्रौषमच्युत १६ ततोऽहमिंद्रदयितं सर्वपाषाणभेदनं ॥ वज्रमुद्यम्यतान्सर्वान्पर्वतान्समशातयम् १७ ततःपर्वतभारार्तामंदप्राणाविचेष्टिताः ॥ हयाममममहाराजवेपमानाइवाभवन् १८ मेघजालइवा काशेविदार्याभ्युदितंरविं ॥ दृष्ट्वामांबांधवाःसर्वेहर्षमाहारयन्पुनः १९ ततःपर्वतभारार्तान्मंदप्राणविचेष्टितान् ॥ हयान्संदृश्यमांसूतःप्राहतात्कालिकंवचः २० साधुसंपश्यवार्ष्णेयशाल्वंसौभपतिंस्थितं ॥ अलंकृष्णावमन्यैनंसाधुयत्नंसमाचर २१ मार्दवंसखितांचैवशाल्वादस्माद्व्यपाहर ॥ जहिशाल्वंमहाबाहोमैनंजीवयके शव २२ सर्वैःपराक्रमैर्वीरवध्यःशत्रुरमित्रहन् ॥ नशत्रुरवमंतव्योदुर्बलोऽपिबलीयसा २३ योऽपिस्यात्पीठगःकश्चित्किंपुनःसमरेस्थितः ॥ सत्वंपुरुषशार्दूलसर्वै यत्नैरिमंप्रभो २४ जहिवृष्णिकुलश्रेष्ठमात्वांकालोऽत्यगात्पुनः ॥ नैषमार्दवसाध्योवैमतोनापिसखातव २५ येनत्वंयोधितोवीरद्वारकाचावमर्दिता ॥ एवमादि तुकौंतेयश्रुत्वाऽहंसारथेर्वचः२६तत्त्वमेतदितिज्ञात्वायुद्धेमतिमधारयम् ॥ वधायशाल्वराजस्यसौभस्यचनिपातने २७ दारुकंचाब्रुवंवीरमुहूर्तंस्थीयतामिति ॥ ततोऽप्रतिहतंदिव्यमभेद्यमतिवीर्यवान् २८

श्रुतवान्सारथिमुखेनेतिशेषः १६ इंद्रदयितमिंद्रदैवत्यंवज्रंवज्राख्यं । यद्वाइंद्रोऽप्यस्यवैविभूतिरतस्तच्छस्त्रमप्येतदीयमेवेतिध्येयं समशातयंनाशितवान् १७ । १८ आहारयन्प्राप्तवंतः १९ तात्कालिकंतत्कालयोग्यं २० । २१ । २२ । २३ पीठगःस्वासनस्थःअयुध्यमानोऽपीत्यर्थः २४ । २५ । २६ । २७ । २८

२९ प्रतिलोमानांविपरीताचाराणांम्लेछानां ३० क्षुरांतंतीक्ष्णपरिधि ३१ तस्मैसौभायमाहिणवंप्रहितवान् ३२ । ३३ क्रकचःदंतुरखड्गः ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१

आग्नेयमस्त्रंदयितंसर्वसाहंमहाप्रभम् ॥ योजयंतत्रधनुषादानवांतकरंरणे २९ यक्षाणांराक्षसानांचदानवानांचसंयुगे ॥ राज्ञांचप्रतिलोमानांभस्मांतकरणंमह त् ३० क्षुरांतममलंचक्रंकालांतकयमोपमम् ॥ अनुमंत्र्याहमतुलंद्विषतांविनिबर्हणम् ३१ जहिसौभंस्ववीर्येणयेचात्ररिपवोमम ॥ इत्युक्त्वाभुजवीर्येणतस्मैप्रा हिणवंरुषा ३२ रूपंसुदर्शनस्यासीदाकाशेपततस्तदा ॥ द्वितीयस्येवसूर्यस्ययुगांतेप्रतपिष्यतः ३३ तत्समासाद्यनगरंसौभंव्यपगातत्विषम् ॥ मध्येनपाट यामासक्रकचोदार्विवोच्छ्रितम् ३४ द्विधाकृतंततःसौभंसुदर्शनबलाद्धतम् ॥ महेश्वरशरोद्धूतंपपातत्रिपुरंयथा ३५ तस्मिन्निपतितेसौभेचक्रमागात्करंमम ॥ पुनश्चादायवेगेनशाल्वायेत्यहमब्रुवम् ३६ ततःशाल्वंगदांगुर्वीमाविध्यंतंमहाहवे ॥ द्विधाचकारसहसाप्रजज्वालचतेतसा ३७ तस्मिन्विनिहतेवीरेदानवास्त्र स्तचेतसः ॥ हाहाभूतादिशोजग्मुरर्दितामसायकैः ३८ ततोऽहंसमवस्थाप्यरथंसौभसमीपतः ॥ शंखंप्रध्माप्यहर्षेणसुहृदःपर्यहर्षयम् ३९ तन्मेरुशिखरा कारंविध्वस्ताट्टालगोपुरम् ॥ दह्यमानमभिप्रेक्ष्यस्त्रियस्ताःसंप्रदुद्रुवुः ४० एवंनिहत्यसमरेसौभंशाल्वंनिपात्यच ॥ आनर्तान्पुनरागम्यसुहृदांप्रीतिमावहम् ४१ तदेतत्कारणंराजन्यदहंनागसाह्वयम् ॥ नागमंपरवीरघ्ननहिजीवेत्सुयोधनः ४२ मय्यागतेऽथवावीरद्यूतंनभवितातथा ॥ अद्याहंकिंकरिष्यामिभिन्नसेतु रिवोदकम् ४३ ॥ वैशंपायनउवाच ॥ एवमुक्त्वामहाबाहुःकौरवंपुरुषोत्तमः ॥ आमंत्र्यप्रययौश्रीमान्पांडवान्मधुसूदनः ४४ अभिवाद्यमहाबाहुर्धर्मराजंयु धिष्ठिरम् ॥ राज्ञामूर्धन्युपाघ्रातोभीमेनेचमहाभुजः ४५ परिष्वक्तश्चार्जुनेनयमाभ्यांचाभिवादितः ॥ संमानितश्चधौम्येनद्रौपद्याचार्चितोऽश्रुभिः ४६ सुभ द्रामभिमन्युंचरथमारोप्यकांचनम् ॥ आरुरोहरथंकृष्णःपांडवैरभिपूजितः ४७ शैब्यसुग्रीवयुक्तेनरथेनादित्यवर्चसा ॥ द्वारकांप्रययौकृष्णःसमाश्वास्ययुधि ष्ठिरम् ४८ ततःप्रयातेदाशार्हेधृष्टद्युम्नोऽपिपार्षतः ॥ द्रौपदेयानुपादायप्रययौस्वपुरंतदा ४९ धृष्टकेतुःस्वसारंचसमादायाथचेदिराट् ॥ जगामपांडवान्दृष्ट्वा रम्यांशुक्तिमतींपुरीम् ५० केकयाश्चाप्यनुज्ञाताःकौंतेयेनामितौजसा ॥ आमंत्र्यपांडवान्सर्वान्प्रययुस्तेऽपिभारत ५१ ब्राह्मणाश्चविशश्चैवतथाविषयवासि नः ॥ विसृज्यमानाःसुभृशंनत्यजंतिस्मपांडवान् ५२ समवायःसराजेंद्रसुमहाद्भुतदर्शनः ॥ आसीन्महात्मनांतेषांकाम्यकेभरतर्षभ ५३

मय्यागच्छेयंतर्हिनहिजीवेत् ४२ किंकरिष्यामिअद्याहमकिंचित्करइत्यर्थः उदकंधारयितुमितिशेषः ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ धृष्टकेतुःशिशुपालसुतः स्वसारंकरेणुमतीं नकुलभार्याम् ५० केकयाःसहदेवश्यालाः ५१ । ५२ समवायःमेलकः ५३

शशासआज्ञापयामास एवमुक्त्वामहाबाहुरित्याद्यध्यायशेषस्याग्रिमाध्यायसहितस्यतात्पर्यम् पांडवेष्विवसाधुषुसर्वैर्निसर्गात्रज्यंते धार्तराष्ट्रेष्विवासाधुषुद्वेषवंतोभवंतीति ५४ ॥ इत्यारण्य केपर्वणिनैलकंठीयेभारतभावदीपेसौभवधोपाख्यानेद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ तस्मिन्निति १ भूतपतिःशिवः निष्कःअष्टोत्तरशतंसुवर्णानि वक्षोऽलंकारोवा शिक्षेतिव्याकरणाद्यंगाना मुपलक्षणंअक्षराणिवेदःनित्यत्वात्क्षरणशून्यः । 'वाचानिरूपनित्यया'इतिश्रुतेः । मंत्रःप्रणवःतान्पाठतोऽर्थतश्चजानन्ति ये शिक्षाक्षरमंत्रविद्वचः २ प्रेष्याःकर्मकराः पुरःप्रागेव जघन्यंपाश्चात्यं

युधिष्ठिरस्तुविप्रांस्ताननुमान्यमहामनाः ॥ शशासपुरुषान्कालेरथान्योजयतेतिवै ५४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिसौभवधो पाख्यानेद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ वैशंपायनउवाच ॥ तस्मिन्दशार्हाधिपतौप्रयातेयुधिष्ठिरोभीमसेनार्जुनौच ॥ यमौचकृष्णाचपुरोहितश्चरथान्म हार्हान्परमाश्वयुक्तान् १ आस्थायवीराःसहितावनायप्रतस्थिरेभूतपतिप्रकाशाः ॥ हिरण्यनिष्कान्वसनानिगाश्चप्रादायशिक्षाक्षरमंत्रविद्भ्यः २ प्रेष्याःपुरोविं शतिरात्तशस्त्राधनूंषिशस्त्राणिशरांश्चदीप्तान् ॥ मौर्वीश्चयंत्राणिचसायकांश्चसर्वेसमादायजघन्यमीयुः ३ ततस्तुवासांसिचराजपुत्र्याधात्र्यश्चदास्यश्चविभूषणंच ॥ तदिंद्रसेनस्त्वरितःप्रगृह्यजघन्यमेवोपययौरथेन ४ ततःकुरुश्रेष्ठमुपेत्यपौराःप्रदक्षिणंचक्रुरदीनसत्वाः ॥ तंब्राह्मणाश्चाभ्यवदन्प्रसन्नामुख्याश्चसर्वेकुरुजांगलानाम् ५ सचापितानभ्यवदत्प्रसन्नःसहैवतैर्भ्रातृभिर्धर्मराजः ॥ तस्थौचतत्राधिपतिर्महात्मादृष्ट्वाजनौघंकुरुजांगलानाम् ६ पितेवपुत्रेषुसुतेषुभावंचक्रेकुरूणामृषभोमहा त्मा ॥ तेचापितस्मिन्भरतप्रबर्हेतदाबभूवुःपितरीवपुत्राः ७ ततस्तमासाद्यमहाजनौघाःकुरुप्रवीरंपरिवार्यतस्थुः ॥ हानाथहाधर्मइतिब्रुवाणाह्रीताश्चसर्वेऽश्रु मुखाश्चराजन् ८ वरःकुरूणामधिपःप्रजानांपितेवपुत्रानपहायचास्मान् ॥ पौरानिमाञ्जानपदांश्चसर्वान्हित्वाप्रयातःक्वनुधर्मराजः ९ धिग्धार्तराष्ट्रंसुनृशंसबु द्धिंधिक्सौबलंपापमतिंचकर्णं ॥ अनर्थमिच्छंतिनरेंद्रपापायेधर्मनित्यस्यसतस्तवैवम् १० स्वयंनिवेश्याप्रतिमंमहात्मापुरंमहादेवपुरप्रकाशम् ॥ शतक्रतुप्रस्थ ममेयकर्माहित्वाप्रयातःक्वनुधर्मराजः ११ चकारयामप्रतिमांमहात्मासभांमयोदेवसभाप्रकाशाम् ॥ तांदेवगुप्तामिवदेवमायांहित्वाप्रयातःक्वनुधर्मराजः १२ तान्ध र्मकामार्थविदुत्तमौजाबीभत्सुरुच्चैःसहितानुवाच ॥ आदास्यतेवासमिमंनिरुष्यवनेषुराजाद्विषतांयशांसि १३ द्विजातिमुख्याःसहिताःपृथक्त्वभवद्भिरासाद्यतप स्विनश्च ॥ प्रसाद्यधर्मार्थविदश्चवाच्यायथाऽर्थसिद्धिःपरमाभवेन्नः १४ इत्येवमुक्तेवचनेऽर्जुनेनतेब्राह्मणाःसर्ववर्णाश्चराजन् ॥ मुदाऽभ्यनंदन्सहिताश्चचक्रुःप्रद क्षिणंधर्मभृतांवरिष्ठम् १५ आमंत्र्यपार्थंचवृकोदरंचधनंजयंयाज्ञसेनींयमौच ॥ प्रतस्थिरेराष्ट्रमपेतहर्षायुधिष्ठिरेणानुमतायथास्वम् १६ इतिश्रीमहाभारतेआर ण्यकेपर्वणिअर्जुनाभिगमनपर्वणिद्वैतवनप्रवेशेत्रयोविंशोऽध्यायः ॥ २३ ॥

द्वारकादेशं ३ राजपुत्र्याःसुभद्रयासह ४ । ५ । ६ प्रबर्हेश्रेष्ठे ७ ह्रीताःकुराज्येतिष्ठामइतिहेतोःशंकयालज्जिताः भीताइतिपाठांतरं ८ । ९ अनर्थंद्यूतजंएवमेवंप्रकारं १० । ११ । १२ बीभत्सु रर्जुनःआदास्यतेआच्छिद्यग्रहीष्यतियशांसियशस्कराणिदिव्यसमादीनि १३ भवद्भिःपौरैःवाच्याःप्रार्थ्याः १४।१५। १६ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेत्रयोविंशोऽध्यायः॥२३॥

ततइति सत्यसंगरःसत्यप्रतिज्ञः १ समाःवर्षाणिसंवैिरार्थः २ शरदोवत्सरान् ३ । ४ । ५ । ६ । ७ अनुभा वान्कर्तव्याकर्तव्यविषयान्निश्चयान्प्रभावोनिग्रहानुग्रहशक्तिः । 'अनुभावोनिश्चये स्यात्प्रभावःशक्तितेजसोः'इतिविश्वः ८ श्रेयोमोक्षःकारणंतत्साधनं ९ द्वैतंद्वेशोकमोहौइतौगतोयस्मात्तद्वीतंद्वीतमेवद्वैतंस्वार्थेतद्धितः वनंजलंयस्मिन्द्वैतवनंपुण्येनपावनेनजलेनउचितं समवे

॥ वैशंपायनउवाच ॥ ॥ ततस्तेषुप्रयातेषुकौंतेयःसत्यसंगरः ॥ अभ्यभाषतधर्मात्माभ्रातॄन्सर्वान्युधिष्ठिरः १ द्वादशेमाःसमास्माभिर्वस्तव्यंनिर्जने
वने ॥ समीक्षध्वंमहारण्येदेशंबहुमृगद्विजम् २ बहुपुष्पफलंरम्यंशिवंपुण्यजनावृतम् ॥ यत्रेमाःशरदःसर्वाःसुखंप्रतिवसेमहि ३ एवमुक्तेप्रत्युवाचधर्मराजंधनं
जयः ॥ गुरुवन्मानवगुरुंमानयित्वामनस्विनम् ४ ॥ अर्जुनउवाच ॥ ॥ भवानेवमहर्षीणांवृद्धानांपर्युपासिता ॥ अज्ञातंमानुषेलोकेभवतोनास्तिकिंचन ५
त्वयाह्युपासितानित्यंब्राह्मणाभरतर्षभ ॥ द्वैपायनप्रभृतयोनारदश्चमहातपाः ६ यःसर्वलोकद्वाराणिनित्यंसंचरतेवशी ॥ देवलोकाद्ब्रह्मलोकंगंधर्वाप्सरसामपि
७ अनुभावांश्चजानासिब्राह्मणानांनसंशयः ॥ प्रभावांश्चैववेत्थत्वंसर्वेषामेवपार्थिव ८ त्वमेवराजन्जानासिश्रेयःकारणमेवच ॥ यत्रेच्छसिमहाराजनिवासंतत्र
कुर्महे ९ इदंद्वैतवनंनामसरःपुण्यजलोचितम् ॥ बहुपुष्पफलंरम्यंनानाद्विजनिषेवितम् १० यत्रेमाद्वादशसमाविहरेमेतिरोचये ॥ यदितेऽनुमतंराजन्किंवा
न्यन्मन्यतेभवान् ११ ॥ युधिष्ठिरउवाच ॥ ममाप्येतन्मतंपार्थत्वयायत्समुदाहृतम् ॥ गच्छामःपुण्यविख्यातंमहद्द्वैतवनंसरः १२ ॥ वैशंपायनउवाच ॥
ततस्तेप्रययुःसर्वेपांडवाधर्मचारिणः ॥ ब्राह्मणैर्बहुभिःसार्धंपुण्यंद्वैतवनंसरः १३ ब्राह्मणाःसाग्निहोत्राश्चतथैवचानिरग्नयः ॥ स्वाध्यायिनोभिक्षवश्चतथैववनवा
सिनः १४ बहवोब्राह्मणास्तत्रपरिवव्रुर्युधिष्ठिरम् ॥ तपःसिद्धामहात्मानःशतशःसंशितव्रताः १५ तेयात्वापांडवास्तत्रब्राह्मणैर्बहुभिःसह ॥ पुण्यंद्वैतवनंरम्यंवि
विशुर्भरतर्षभाः १६ तत्सालतालाम्रमधूकनीपकदंबसर्जार्जुनकर्णिकारैः ॥ तपात्ययेपुष्पधरैरुपेतंमहावलंराष्ट्रपतिर्ददर्श १७ महाद्रुमाणांशिखरेषुतस्थुर्मनोरमां
वाचमुदीरयंतः ॥ मयूरदात्यूहचकोरसंघास्तस्मिन्वनेबर्हिणःकोकिलाश्च १८ करेणुयूथैःसहयूथपानांमदोत्कटानामचलप्रभाणाम् ॥ महांतियूथानिमहाद्विपानां
तस्मिन्वनेराष्ट्रपतिर्ददर्श १९ मनोरमांभोगवतीमुपेत्यपूतात्मनांचीरजटाधराणाम् ॥ तस्मिन्वनेधर्मभृतांनिवासेददर्शसिद्धर्षिगणाननेकान् २० ततःसयानाद
वरुह्यराजासभ्रातृकःसजनःकाननंतत् ॥ विवेशधर्मात्मवतांवरिष्ठस्त्रिविष्टपंशक्रइवामितौजाः २१ तंसत्यसंधंसहिताऽभिपेतुर्दिदृक्षवश्चारणसिद्धसंघाः ॥ वनौकस
श्चापिनरेंद्रसिंहंमनस्विनंतंपरिवार्यतस्थुः २२ सतत्रसिद्धानभिवाद्यसर्वान्प्रत्यर्चितोराजवद्देववच्च ॥ विवेशसर्वैःसहितोद्विजाग्र्यैःकृतांजलिर्धर्मभृतांवरिष्ठः २३

तं एतेनद्वैतवनशब्दार्थःसूचितः उचसमवायेदिवादिः १० विहरेमप्रीत्यानयेम ११ । १२ । १३ । १४ । १५ यात्वागत्वा १६ तपात्ययेवर्षासु महावलंमहावनं दंत्यादिरयंशब्दः 'देवावे वलेगाःपर्यपश्यन्'इतिवनेवलशब्दप्रयोगदर्शनात् १७ । १८ करेणुःहस्तिनी १९ भोगवतींसरस्वतींनदीं २० । २१ चारणाःदेवगायनाः सिद्धाःमहर्षयः २२ । २३

महाद्रुमःकदंबः २४ । २५ लतावतानावनतःवल्लीतंतुभिरावृततयानम्रः २६ इत्यारण्यकेपर्वणिनलकंठीयेभारतभावदीपेचतुर्विंशोऽध्यायः ॥ २४ ॥ तत्काननमित्याद्यध्यायद्वयेनद्वैतमाभ्यां मार्कण्डेयदाल्भ्याभ्यांधर्मस्यात्यागोब्राह्मणभक्तिश्चकर्तव्येत्युच्यते तत्कारणमितिपाठेतद्वनंकारणं चिक्रीडिषाहेतुः कृच्छ्रंवनवाससंकटं १ । २ इष्टीर्दर्शपौर्णमासाद्याः पित्र्याणिपिंडपितृयज्ञ दर्शश्राद्धादीनि ३ राष्ट्रादपेत्यनिर्गत्य वनेवसतातीव्रंदुःसहंसमृद्धंपुष्कलंचतेजोयस्य ४ । ५ अस्मयतविस्मितवान् ६ ह्रियाप्रागल्भ्यसंकोचेन ७ । ८ । ९ सहस्रनेत्रःप्राति

सपुण्यशीलःपितृवन्महात्मातपस्विभिर्धर्मपरैरुपेत्य ॥ प्रत्यर्चितःपुष्पधरस्यमूलेमहाद्रुमस्योपविवेशराजा २४ भीमश्चकृष्णाचधनंजयश्चयमौचतेचानुचरा
नरेंद्रम् ॥ विमुच्यवाहानवशाश्चसर्वेतत्रोपतस्थुर्भरतप्रबर्हाः २५ लतावतानावनतःसपांडवैर्महाद्रुमःपंचभिरेवधन्विभिः ॥ बभौनिवासोपगतैर्महात्मभिर्महा
गिरिर्वारणयूथपैरिव २६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिद्वैतवनप्रवेशेचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ वैशंपायनउवाच ॥
तत्काननंप्राप्यनरेंद्रपुत्राःसुखोचितावासमुपेत्यकृच्छ्रम् ॥ विजह्रुरिंद्रप्रतिमाःशिवेषुसरस्वतीशालवनेषुतेषु १ यतींश्चराजासमुनींश्चसर्वांस्तस्मिन्वनेमूलफलै
रुदग्रैः ॥ द्विजातिमुख्यानृषभःकुरूणांसंतर्पयामाससमहानुभावः २ इष्टीश्चपित्र्याणितथाक्रियाश्चमहावनेवसतांपांडवानाम् ॥ पुरोहितस्तत्रसमृद्धतेजाश्चका
रधौम्यःपितृवन्नृपाणाम् ३ अपेत्यराष्ट्राद्वसतांतुतेषामृषिःपुराणोऽतिथिराजगाम ॥ तमाश्रमंतीव्रसमृद्धतेजामार्कंडेयःश्रीमतांपांडवानाम् ४ तमागतंज्वलि
तहुताशनप्रभंमहामनाःकुरुवृषभोयुधिष्ठिरः ॥ अपूजयत्सुरऋषिमानवार्चितंमहामुनिंह्यनुपमसत्ववीर्यवान् ५ ससर्ववित्द्रौपदींवीक्ष्यकृष्णांयुधिष्ठिरंभीमसेना
र्जुनौच ॥ संस्मृत्यरामंमनसामहात्मातपस्विमध्येऽस्मयतामितौजाः ६ तंधर्मराजोविमनाइवाब्रवीत्सर्वेह्रियासंतितपस्विनोऽमी ॥ भवानिदंकिंस्मयतीवहृष्ट
स्तपस्विनांपश्यतांमामुदीक्ष्य ७ ॥ मार्कंडेयउवाच ॥ नतातहृष्यामिनचस्मयामिप्रहर्षजोमांभजतेनदर्पः ॥ तवापदंत्वद्यसमीक्ष्यरामंसत्यव्रतंदाशरथिंस्म
रामि ८ सचापिराजासहलक्ष्मणेनवनेनिवासंपितुरेवशासनात् ॥ धन्वीचरन्पार्थमयैवदृष्टोगिरेःपुराऋष्यमूकस्यसानौ ९ सहस्रनेत्रप्रतिमोमहात्मायमस्यनेता
नमुचेश्चहंता ॥ पितुर्निदेशादनघःस्वधर्मंवासंवनेदाशरथिश्चकार १० सचापिशक्रस्यसमप्रभावोमहानुभावःसमरेष्वजेयः ॥ विहायभोगानचरद्वनेषुनेशेवल
स्येतिचरेदधर्मम् ११ भूपाश्चनाभागभगीरथादयोमहीमिमांसागरांतांविजित्य ॥ सत्येनतेऽप्यजयंस्तातलोकान्नेशेवलस्येतिचरेदधर्मम् १२ अलर्कमाहुर्नर
वर्यसंतंसत्यव्रतंकाशिकरूषराजम् ॥ विहायराज्यानिवसूनिचैवनेशेवलस्येतिचरेदधर्मम् १३

मारूपांतरंयस्य'देवानामस्मिवासवः'इत्युक्तत्वात् अतएवयमस्यनियंतुरपिनेतानिर्वाहकः नमुचेश्चहंता इतिसर्वमिंद्रकर्मतस्यैवकर्मेत्यर्थः १० तदेवाहसचेति शक्रस्यसमप्रभावःकृत्स्नप्रभा वः । समशब्दःसर्वपर्यायःसर्वनामा प्रभावःशक्तिः अनुभावोभावसूचनंविद्याबलमित्यर्थः । शक्रस्यप्रभावादिकमयमेवातोऽसौसमरेष्वजेयः । तस्मादितिसर्वत्राध्याहारः बलस्यबहुसामर्थ्यस्य ईशेप्रभावामीतिहेतोरधर्मंनचरेत् शक्तौसत्यांधर्ममेवाचरेन्नत्वधर्ममित्यर्थः ११ । १२ । १३

धात्राईशेनपुराणैर्वेदवाक्यैर्विहितोविधिरग्निहोत्रादिः १४ पशवोऽपिबलवान्स्मीतिदर्पेणाधर्मेनवर्ततीत्याहमहाबलानिति । 'विषाणंदंतशृंगयोः' इतिकोशः १५ एवंसर्पादिष्वपिज्ञेयमित्या
हसर्वाणीति स्वयोनितोजन्मानुरूपम् १६ विभाप्रभासैववसुर्वित्तंयस्य १७ आदास्यसेग्रहीष्यसि १८ । १९ । इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचविंशोऽध्यायः ॥ २५ ॥

॥२३॥ धात्राविधियोविहितःपुराणैस्तंपूजयंतोनरवर्यसंतः ॥ सप्तर्षयःपार्थदिविप्रभांतिनेशेबलस्येतिचरेदधर्मम् १४ महाबलान्पर्वतकूटमात्रान्विषाणिनःपश्यगजा
न्नरेंद्र ॥ स्थितान्निदेशेनरवर्यधातुर्नेशेबलस्येतिचरेदधर्मम् १५ सर्वाणिभूतानिनरेंद्रपश्यतथायथावद्विहितंविधात्रा ॥ स्वयोनितःकर्मसदाऽऽचरंतिनेशेबल ॥२६॥
स्येतिचरेदधर्मम् १६ सत्येनधर्मेणयथार्हवृत्त्याह्रियातथासर्वभूतान्यतीत्य ॥ यशश्चतेजश्चतवापिदीप्तंविभावसोर्भास्करस्येवपार्थ १७ यथाप्रतिज्ञंचमहानु
भावकृच्छ्रंवनेवासमिमंनिरुष्य ॥ ततःश्रियंतेजसातेनदीप्तामादास्यसेपार्थिवकौरवेभ्यः १८ ॥ वैशंपायनउवाच ॥ तमेवमुक्त्वावचनंमहर्षिस्तपस्विमध्येसहितं
सुहृद्भिः ॥ आमंत्र्यधौम्यंसहितांश्चपार्थांस्ततःप्रतस्थेदिशमुत्तरांसः १९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जु० द्वैतवनप्रवेशेपंचविंशोऽध्यायः ॥ २५ ॥
॥ वैशंपायनउवाच ॥ वसत्सुत्वेद्वैतवनेपाण्डवेषुमहात्मसु ॥ अनुकीर्णंमहारण्यंब्राह्मणैःसमपद्यत १ ईर्यमाणेनसततंब्रह्मघोषेणसर्वशः ॥ ब्रह्मलोकसमंपुण्यमासी
द्द्वैतवनंसरः २ यजुषामृचांसाम्नांचगद्यानांचैवसर्वशः ॥ आसीदुच्चार्यमाणानांनिःस्वनोहृदयंगमः ३ ज्याघोषश्चैवपार्थानांब्रह्मघोषश्चधीमताम् ॥ संसृष्टंब्रह्म
णाक्षत्रंभूयएवव्यरोचत ४ अथाब्रवीद्बकोदाल्भ्योधर्मराजंयुधिष्ठिरम् ॥ संध्यांकौंतेयमासीनमृषिभिःपरिवारितम् ५ पश्यद्वैतवनेपार्थब्राह्मणानांतपस्वि
नाम् ॥ होमवेलांकुरुश्रेष्ठसंप्रज्वलितपावकाम् ६ चरंतिधर्मंपुण्येऽस्मिंस्त्वयागुप्ताधृतव्रताः ॥ भृगवोऽङ्गिरसश्चैववासिष्ठाःकाश्यपैःसह ७ आगस्त्याश्चमहा
भागाआत्रेयाश्चोत्तमव्रताः ॥ सर्वस्यजगतःश्रेष्ठाब्राह्मणाःसंगतास्त्वया ८ इदंतुवचनंपार्थशृणुष्वगदतोमम ॥ भ्रातृभिःसहकौंतेययत्त्वांवक्ष्यामिकौरव ९ ब्रह्म
क्षत्रेणसंसृष्टंक्षत्रंचब्रह्मणासह ॥ उदीर्णेदहतःशत्रून्वनानीवाग्निमारुतौ १० नाब्राह्मणस्तातचिरंबुभूषेदिच्छन्निमंलोकममुंचजेतुम् ॥ विनीतधर्मार्थमपेतमोहं
लब्ध्वाद्विजंनुदतिनृपःसपत्नान् ११ चरन्नैःश्रेयसंधर्मंप्रजापालनकारितम् ॥ नाध्यगच्छद्बलिर्लोकेतीर्थमन्यत्रवैद्विजात् १२ अनूनमासीदसुरस्यकामैर्वैरोच
नेःश्रीरपिचाक्षयाऽऽसीत् ॥ लब्ध्वामहींब्राह्मणसंप्रयोगात्तेष्वाचरन्दुष्टमथोव्यनश्यत् १३ नाब्राह्मणंभूमिरियंसभूतिर्वर्णंद्वितीयंभजतेचिराय ॥ समुद्रनेमिर्न
मतेतुतस्मैयंब्राह्मणःशास्तिनयैर्विनीतम् १४ कुंजरस्येवसंग्रामेपरिगृह्यांकुशग्रहम् ॥ ब्राह्मणैर्विप्रहीनस्यक्षत्रस्यक्षीयतेबलम् १५

वसत्स्विति अनुकीर्णंव्याप्तम् १ । २ गद्यानांब्राह्मणवाक्यानांपादाक्षरादिनियमहीनानाम् ३ । ४ संध्यामुपास्येतिशेषः ५ । ६ । ७ । ८ । ९ । १० अब्राह्मणोब्राह्मणहीनोनृपःबुभूषेदैश्वर्यं ॥२३॥
मिच्छेत् तस्येच्छतोऽपिजयोदुर्लभइत्यर्थः । विनीतौसम्यक्शिक्षितौधर्मार्थौयेन ११ तीर्थमुपायं १२ वैरोचनेर्बलेः १३ । १४ अंकुशग्रहमंकुशेननिग्रहातिवंपरिगृह्यवर्ज्जयित्वापरिवर्जने १५
१६ । १७ बुद्धिपर्येषणंबुद्धेःसाकल्येनसंग्रहणम् १८ यथार्हतीर्थंयथायोग्यपात्रे प्रतिपादनायदानाय १९ वृत्तिर्वर्तनम् २० । २१ । २२ । २३ । २४ । २५ इत्यारण्यकेपर्वणिनैलकंठीयेभार

ब्राह्मण्यनुपमादृष्टिःक्षात्रमप्रतिमंबलम् ॥ तौयदाचरतःसार्धंतदालोकःप्रसीदति १६ यथाहिसुमहानग्निःकक्षंदहतिसानिलः ॥ तथादहतिराजन्योब्राह्मणेन
समंरिपुम् १७ ब्राह्मणेष्वेवमेधावीबुद्धिपर्येषणंचरेत् ॥ अलब्धस्यचलाभायलब्धस्यपरिवृद्धये १८ अलब्धलाभायचलब्धवृद्धयेयथार्हतीर्थप्रतिपादनाय ॥
यशस्विनंवेदविदंविपश्चितंबहुश्रुतंब्राह्मणमेववासय १९ ब्राह्मणेषूत्तमावृत्तिस्तवनित्यंयुधिष्ठिर ॥ तेनतेसर्वलोकेषुदीप्यतेप्रथितंयशः २० ॥ वैशंपायनउवा
च ॥ ततस्तेब्राह्मणाःसर्वेबकंदाल्भ्यमपूजयन् ॥ युधिष्ठिरेस्तूयमानेभूयःसुमनसोऽभवन् २१ द्वैपायनोनारदश्चजामदग्न्यःपृथुश्रवाः ॥ इंद्रद्युम्नोभालुकिश्च
कृतचेताःसहस्रपात् २२ कर्णश्रवाश्चमुंजश्चलवणाश्वश्चकाश्यपः ॥ हारीतःस्थूणकर्णश्चअग्निवेश्योऽथशौनकः २३ कृतवाक्सुवाक्चैवबृहदश्वोविभावसुः ॥
ऊर्ध्वरेतावृषामित्रःसुहोत्रोहोत्रवाहनः २४ एतेचान्येचबहवोब्राह्मणाःसंशितव्रताः ॥ अजातशत्रुमानर्चुःपुरंदरमिवर्षयः २५ इतिश्रीमहाभारतेआरण्यकेपर्व
णिअर्जुनाभिगमनपर्वणिद्वैतवनप्रवेशेषड्विंशोऽध्यायः ॥२६॥ ॥ वैशंपायनउवाच ॥ ततोवनगताःपार्थाःसायान्हेसहकृष्णया ॥ उपविष्टाःकथाश्चक्रुर्दुःखशोकप
रायणाः १ प्रियाचदर्शनीयाचपंडिताचपतिव्रता ॥ अथकृष्णाधर्मराजमिदंवचनमब्रवीत् २ ॥ द्रौपद्युवाच ॥ नूनंतस्यपापस्यदुःखमस्मासुकिंचन ॥ वि
द्यतेधार्तराष्ट्रस्यनृशंसस्यदुरात्मनः ३ यस्त्वांराजन्मयासार्धमजिनैःप्रतिवासितम् ॥ वनंप्रस्थाप्यदुष्टात्मानान्वतप्यतदुर्मतिः ४ आयसंहृदयंनूनंतस्यदुष्कृ
तकर्मणः ॥ यस्त्वांधर्मपरंश्रेष्ठंरूक्षाण्यश्रावयत्तदा ५ सुखोचितमदुःखार्हंदुरात्मासुसुहृद्गणः ॥ ईदृशंदुःखमानीयमोदतेपापपूरुषः ६ चतुर्णामेवपापानामस्रं
नपातितंतदा ॥ त्वयिभारतनिष्क्रांतेवनायाजिनवाससि ७ दुर्योधनस्यकर्णस्यशकुनेश्चदुरात्मनः ॥ दुर्भ्रातुस्तस्यचोग्रस्यराजन्दुःशासनस्यच ८ इतरेषांतु
सर्वेषांकुरूणांकुरुसत्तम ॥ दुःखेनाभिपरीतानांनेत्रेभ्यःप्रापतज्जलम् ९ इदंचशयनंदृष्ट्वायच्चासीत्तेपुरातनम् ॥ शोचामित्वांमहाराजदुःखानर्हंसुखोचितम्
१० दांतंयच्चसभामध्यआसनंरत्नभूषितम् ॥ दृष्ट्वाकुशबृसींचेमांशोकोमांरुंधयत्ययम् ११ यदपश्यंसभायांत्वांराजभिःपरिवारितम् ॥ तच्चराजन्नपश्यंत्याः
काशांतिर्हृदयस्यमे १२ यात्वाऽहंचंदनादिग्धमपश्यंसूर्यवर्चसम् ॥ सात्वांपंकमलादिग्धंदृष्ट्वामुह्यामिभारत १३ यात्वाऽहंकौशिकैर्वस्त्रैःशुभ्रैराच्छादितंपुरा ॥
दृष्टवत्यस्मिराजेंद्रसात्वांपश्यामिचीरिणम् १४ यच्चतद्रुक्मपात्रीभिर्ब्राह्मणेभ्यःसहस्रशः ॥ ह्रियतेतेगृहादन्नंसंस्कृतंसार्वकामिकम् १५

तभावदीपेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ ततइति इतोध्यायद्वयस्यतात्पर्यंसुशीलाऽपिस्त्रीधर्मस्याजयतिकिमुतेतरेति १ । २ अस्मासुदुःखितेष्वितिशेषः ३ । ४ । ५ आनीयप्रापय्य ६ अस्रं
नेत्रजलम् ७ । ८ । ९ । १० दांतंगजदंतमयं कुशबृसींकुशासनं रुंधयतिआवृणोतिमोहयतीत्यर्थः ११ । १२ त्वाऽहं त्वामहं आदिग्धंलिप्तम् १३ कौशिकैःकोशजैः १४ । १५

अग्रहाणांब्रह्मचारिणां १६ सहस्राणिसहस्रसंज्ञानिसत्रपरिवेषणपात्राणि 'ते षांयत्सहस्रंसत्रपरिवेषणंतत्तेस्वर्यंतोदास्यंति'इतिबह्वृचब्राह्मणेदर्शनात् । सत्कृतानिप्रत्यहमुपयोगात्संभाविता
निसर्वकामैःकाम्यमानैरन्नैःयत्रयैःसहस्रैःसर्वैःकामैर्मनोरथैर्द्विजानपूजयथाः वनेतुएकमेवसूर्यदत्तंपरिवेषणपात्रमित्यर्थः १७।१८।१९ । २० मन्युःक्रोधः २१ । २२ । २३ अर्जुनेनकार्तवीर्येण

॥२४॥ यतीनामग्रहाणांतितथैवग्रहमेधिनाम् ॥ दीयतेभोजनंराजन्नतीवगुणवत्प्रभो १६ सत्कृतानिसहस्राणिसर्वकामैःपुराग्रहे ॥ सर्वकामैःसुविहितैर्यदपूजयथा
द्विजान् १७ तच्चराजन्नपश्यंत्याःकाशांतिर्हृदयस्यमे ॥ यत्तेभ्रातॄन्महाराजयुवानोमृष्टकुंडलाः १८ अभोजयंतमृष्टान्नैःसूदाःपरमसंस्कृतैः ॥ सर्वांस्तानद्यप
श्यामिवनेवन्येनजीविनः १९ अदुःखार्हान्मनुष्येंद्रनोपशाम्यतिमेमनः ॥ भीमसेनमिमंचापिदुःखितंवनवासिनम् २० ध्यायतःकिंनमन्युस्तेप्राप्तेकालेविवर्ध
ते ॥ भीमसेनंहिकर्माणिस्वयंकुर्वाणमच्युतम् २१ सुखार्हंदुःखितंदृष्ट्वाकस्मान्मन्युर्नवर्धते ॥ सत्कृतंविविधैर्यानैर्वस्त्रैरुच्चावचैस्तथा २२ तंतेवनगतंदृष्ट्वाकस्मा
न्मन्युर्नवर्धते ॥ अयंकुरून्रणेसर्वान्हंतुमुत्सहतेप्रभुः २३ त्वत्प्रतिज्ञांप्रतीक्षंस्तुसहतेऽयंवृकोदरः ॥ योऽर्जुनेनार्जुनस्तुल्योद्विबाहुर्बहुबाहुना २४ शरावम
र्देशीघ्रत्वात्कालांतकयमोपमः ॥ यस्यशस्त्रप्रतापेनप्रणताःसर्वपार्थिवाः २५ यज्ञेतवमहाराजब्राह्मणानुपतस्थिरे ॥ तमिमंपुरुषव्याघ्रंपूजितंदेवदानवैः २६
ध्यायंतमर्जुनंदृष्ट्वाकस्माद्राजन्नकुप्यसि ॥ दृष्ट्वावनगतंपार्थमदुःखार्हंसुखोचितम् २७ नचतेवर्धतेमन्युस्तेनमुह्यामिभारत ॥ योदेवांश्चमनुष्यांश्चसर्पांश्चैक
रथोऽजयत् २८ तंतेवनगतंदृष्ट्वाकस्मान्मन्युर्नवर्धते ॥ योयानैरद्भुताकारैर्हयैर्नागैश्चसंवृतः २९ प्रसह्यवित्तान्यादत्तपार्थिवेभ्यःपरंतप ॥ क्षिपत्येकेनवेगेन
पंचबाणशतानियः ३० तंतेवनगतंदृष्ट्वाकस्मान्मन्युर्नवर्धते ॥ श्यामंबृहंतंतरुणंचर्मिणामुत्तमंरणे ३१ नकुलंतेवनेदृष्ट्वाकस्मान्मन्युर्नवर्धते ॥ दर्शनीयंचशूरंच
माद्रीपुत्रंयुधिष्ठिर ३२ सहदेवंवनेदृष्ट्वाकस्मात्क्षमसिपार्थिव ॥ नकुलंसहदेवंचदृष्ट्वातेदुःखितावुभौ ३३ अदुःखार्हौमनुष्येंद्रकस्मान्मन्युर्नवर्धते ॥ द्रुपदस्यकुले
जातांस्नुषांपांडोर्महात्मनः ३४ धृष्टद्युम्नस्यभगिनींवीरपत्नीमनुव्रताम् ॥ मांवैवनगतांदृष्ट्वाकस्मात्क्षमसिपार्थिव ३५ नूनंचतववैनास्तिमन्युर्भरतसत्तम ॥ यत्ते
भ्रातॄंश्चमांचैवदृष्ट्वानव्यथतेमनः ३६ ननिर्मन्युःक्षत्रियोऽस्तिलोकेनिर्वचनंस्मृतम् ॥ तदद्यत्वयिपश्यामिक्षत्रियेविपरीतवत् ३७ योनदर्शयतेतेजःक्षत्रियःकाल
आगते ॥ सर्वभूतानितंपार्थसदापरिभवंत्युत ३८ तत्त्वयानक्षमाकार्याशत्रून्प्रतिकथंचन ॥ तेजसैवहितेशक्यानिहंतुंनात्रसंशयः ३९ तथैवयःक्षमाकालेक्षत्रियोनो
पशाम्यति ॥ अप्रियःसर्वभूतानांसोऽमुत्रेहचनश्यति ४० इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिद्रौपदीपरितापवाक्येसप्तविंशोऽध्यायः॥२७॥

२४ शरावमर्देबाणपाते २५ । २६ । २७ । २८ । २९ आदत्तआत्तवान् ३० चर्मिणांखड्गचर्मधराणां ३१ । ३२ । ३३ । ३४ । ३५ । ३६ निर्वचनंक्षत्रियशब्दस्यक्षरतेहिनस्तीति
क्षत्रमिति ३७ हिंस्रत्वंनियमितिचेत्तत्राहयोनेति तेजःक्रोधः ३८ । ३९ । ४० ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥२४॥

अत्रापीति १ आगतागमंप्राप्तरहस्यं २ । ३ श्रेयःप्रशस्ततरं अत्रक्षमातेजसोर्मध्ये ४ । ५ । ६ । ७ अस्यएनं ८ । ९ १० अधिकृताःअन्नपानादिसंरक्षणेनियुक्ताः प्रदिष्टानिइदमस्मैदेयमि
त्याज्ञापितानि ११ एनंक्षमिणं भर्तृपूजाभिःस्वाम्युचितमानेन १२ । १३ । १४ नित्यमुदिताःनित्यंहोलकाद्युत्सवपराः १५ । १६ तेजसाक्रोधेन १७ । १८ उपालंभंधिक्कारं १९ । २० उप

॥ द्रौपद्युवाच ॥ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ प्रह्लादस्यचसंवादंबलेर्वैरोचनस्यच १ असुरेंद्रंमहाप्राज्ञंधर्माणामागतागमम् ॥ बलिःपप्रच्छदै
त्येंद्रंप्रह्लादंपितरंपितुः २ ॥ बलिरुवाच ॥ क्षमास्विच्छ्रेयसीतातउताहोतेजइत्युत ॥ एतन्मेसंशयंतातयथावद्ब्रूहिपृच्छते ३ श्रेयोयदत्रधर्मज्ञब्रूहिमेतदसं
शयम् ॥ करिष्यामिहितत्सर्वंयथावदनुशासनम् ४ तस्मैप्रोवाचतत्सर्वमेवंपृष्टःपितामहः ॥ सर्वनिश्चयवित्प्राज्ञःसंशयंपरिपृच्छते ५ ॥ प्रह्लादउवाच ॥ न
श्रेयःसततंतेजोननित्यंश्रेयसीक्षमा ॥ इतितातविजानीहिद्वयमेतदसंशयम् ६ योनित्यंक्षमतेतातबहून्दोषान्सविंदति ॥ भृत्याःपरिभवंत्येनमुदासीनास्तथाऽ
रयः ७ सर्वभूतानिचाप्यस्यननमंतेकदाचन ॥ तस्मान्नित्यंक्षमातातपंडितैरपिवर्जिता ८ अवज्ञायहितंभृत्याभजंतेबहुदोषताम् ॥ आदातुंचास्यवित्तानि
प्रार्थयंतेऽल्पचेतसः ९ यानंवस्त्राण्यलंकारान्शयनान्यासनानिच ॥ भोजनान्यथपानानिसर्वोपकरणानिच १० आददीरन्नधिकृतायथाकाममचेतसः ॥ प्रदि
ष्टानिचदेयानिनदद्युर्भर्तृशासनात् ११ नचैनंभर्तृपूजाभिःपूजयंतिकथंचन ॥ अवज्ञानंहिलोकेऽस्मिन्मरणादपिगर्हितम् १२ क्षमिणंतादृशंतातब्रुवंतिकटु
कान्यपि ॥ प्रेष्याःपुत्राश्चभृत्याश्चतथोदासीनवृत्तयः १३ अथास्यदारानिच्छंतिपरिभूयक्षमावतः ॥ दाराश्चास्यप्रवर्तंतेयथाकाममचेतसः १४ तथाचनित्य
मुदितायदिनाल्पमपीश्वरात्॥दंडमर्हंतिदुष्यंतिदुष्टाश्चाप्यपकुर्वते१५एतेचान्येचबहवोनित्यंदोषाःक्षमावताम् ॥अथवैरोचनेदोषानिमान्विद्धचक्षमावताम् १६
अस्थानेयदिवास्थानेसततंरजसावृतः ॥ क्रुद्धोदंडान्प्रणयतिविविधान्स्वेनतेजसा १७ मित्रैःसहविरोधंचप्राप्नुतेतेजसावृतः ॥ आप्नोतिद्वेष्यतांचैवलोकात्स्व
जनतस्तथा १८ सोऽवमानादर्थहानिमुपालंभमनादरम् ॥ संतापद्वेषमोहांश्चशत्रूंश्चलभतेनरः १९ क्रोधाद्दंडान्मनुष्येषुविविधान्पुरुषोऽनयात् ॥ भ्रश्यते
शीघ्रमैश्वर्यात्प्राणेभ्यःस्वजनादपि २० योपकर्तॄंश्चहर्तॄंश्चतेजसैवोपगच्छति ॥ तस्मादुद्विजतेलोकःसर्पाद्वेश्मगतादिव २१ यस्मादुद्विजतेलोकःकथंतस्यभवो
भवेत् ॥ अंतरंतस्यदृष्ट्वैवलोकोविकुरुतेध्रुवम् २२ तस्मान्नात्युत्सृजेत्तेजोनचनित्यंमृदुर्भवेत् ॥ कालेकालेतुसंप्राप्तेमृदुस्तीक्ष्णोऽपिवाभवेत् २३ कालेमृदुर्योभवति
९ कालेभवतिदारुणः॥ सवैसुखमवाप्नोतिलोकेऽमुष्मिन्निहैवच २४ क्षमाकालांस्तुवक्ष्यामिशृणुमेविस्तरेणतान् ॥ येतेनित्यमसंत्याज्यायथाप्राहुर्मनीषिणः २५ पूर्वो
पकारीयस्तेस्यादपराधेगरीयसि ॥उपकारेणतत्तस्यक्षंतव्यमपराधिनः २६ अबुद्धिमाश्रितानांतुक्षंतव्यमपराधिनाम् ॥ नाहिसर्वत्रपांडित्यंसुलभंपुरुषेणवै २७

कर्तॄनितिच्छेदः संधिरार्षः उपकर्तॄन् कोशादिवृद्धिकरान् हर्तॄन् चोरान् २१ भवःऐश्वर्यं अंतरंछिद्रं विकुरुतेप्रययति २२ । २३ । २४ असंत्याज्याःक्रोधेनानतिक्रमणीयाः
२५ पूर्वंपूर्वकालेवाउपकारीउपकर्ता २६ अबुद्धिमौढ्यम् २७

२८ अपकृतेअपकारे २९ । ३० मृदुनासाम्ना ३१ सामापिदेशकालापेक्षयैवकर्त्तव्यमित्याहदेशेति ३२ । ३३ । ३४ उत्स्रष्टुंप्रयोक्तुं ३५ ३६ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टाविंशोध्यायः ॥ २८ ॥ क्रोधइति परैरपकृताआर्तश्चोद्दीपिताः सामर्थ्यवंतोऽपिसंतःक्षमामेवश्रयंतइत्यध्यायतात्पर्यं भावयितावर्धयिताजितःसन्निति शेषः १ तदेवाहयोहीति २ लोकआत्मास्वर्गोवातन्नाशनं ३ तदेवाहक्रुद्धइति श्रेयसःश्रेष्ठान्श्रेयोऽपिप्राप्येतिवाल्यब्लोपेपंचमीमाश्रित्यव्याख्येयं ४ । ५ । ६ । ७ तं क्रोधंविक्रमं धीरैरितिपाठेविपरीतःक्रमोयेनतमि

अथचेद्बुद्धिजंकृत्वाब्रूयुस्तेतदबुद्धिजम् ॥ पापान्स्वल्पेऽपितान्हन्यादपराधेतथाऽनृजून् २८ सर्वस्यैकोऽपराधस्तेक्षंतव्यःप्राणिनोभवेत् ॥ द्वितीयेसतिवध्यस्तुस्वल्पेऽप्यपकृतेभवेत् २९ अजानताभवेत्कश्चिदपराधःकृतोयदि ॥ क्षंतव्यमेवतस्याहुःसुपरीक्ष्यपरीक्षया ३० मृदुनादारुणंहंतिमृदुनाहंत्यदारुणम् नासाध्यंमृदुनाकिंचित्तस्मात्तीव्रतरंमृदु ३१ देशकालौतुसंप्रेक्ष्यबलाबलमथात्मनः ॥ नादेशकालेकिंचित्स्यादेशकालौप्रतीक्षताम् ॥ तथालोकभयाच्चैवक्षंतव्यमपराधिनः ३२ एतएवंविधाःकालाःक्षमायाःपरिकीर्तिताः ॥ अतोऽन्यथाऽनुवर्तत्सुतेजसःकालउच्यते ३३ तदहंतेजसःकालंतवमन्येनराधिप ॥ धार्तराष्ट्रेषुलुब्धेषुसततंचापकारिषु ३४ नहिकश्चित्क्षमाकालोविद्यतेऽद्यकुरून्प्रति ॥ तेजसश्चागतेकालेतेजउत्स्रष्टुमर्हसि ३५ मृदुर्भवत्यवज्ञातस्तीक्ष्णादुद्विजतेजनः॥ कालेप्राप्तेद्वयंचैतद्योवेदसमहीपतिः ३६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिआर्जुनाभिगमनपर्वणिद्रौपदीवाक्येअष्टाविंशोऽध्यायः ॥२८॥ ॥युधिष्ठिरउवाच ॥ क्रोधोहंतामनुष्याणांक्रोधोभावयितापुनः ॥ इतिविद्धिमहाप्राज्ञेक्रोधमूलौभवाभवौ १ योहिसंहरतेक्रोधंभवस्तस्यसुशोभने ॥ यःपुनःपुरुषःक्रोधंनित्यंनसहतेशुभे ॥ तस्याभावायभवतिक्रोधःपरमदारुणः २ क्रोधमूलोविनाशोहिप्रजानामिहदृश्यते ॥ तत्कथंमादृशःक्रोधमुत्सृजेल्लोकनाशनम् ३ क्रुद्धःपापंनरःकुर्यात्क्रुद्धोहन्याद्गुरूनपि ॥ क्रुद्धःपरुषयावाचाश्रेयसोऽप्यवमन्यते ४ वाच्यावाच्येहिकुपितोनप्रजानातिकर्हिचित् ॥ नाकार्यमस्तिक्रुद्धस्यनावाच्यंविद्यतेतथा ५ हिंस्यात्क्रोधादवध्यांस्तुवध्यान्संपूजयीतच ॥ आत्मानमपिचक्रुद्धःप्रेषयेद्यमसादनम् ६ एतान्दोषान्प्रपश्यद्भिर्जितःक्रोधोमनीषिभिः ॥ इच्छद्भिःपरमंश्रेयइहचामुत्रचोत्तमम् ७ तंक्रोधंवर्जितंधीरैःकथमस्मद्विधश्चरेत् ॥ एतद्द्रौपदिसंधायनमेमन्युःप्रवर्धते ८ आत्मानंचपरांश्चैवत्रायतेमहतोभयात् ॥ क्रुध्यंतमप्रतिक्रुध्यन्द्वयोरेषचिकित्सकः ९ मूढोयदिक्लिश्यमानःक्लिश्यतेऽशक्तिमान्नरः ॥ बलीयसांमनुष्याणांत्यजत्यात्मानमात्मना १० तस्यात्मानंसंत्यजतोलोकानश्यंत्यनात्मनः ॥ तस्माद्द्रौपद्यशक्तस्यमन्योर्नियमनंस्मृतम् ११

त्यर्थः चरेदाचरेत् ८ अप्रतिक्रुध्यन् त्रायते द्वयोरात्मपरयोः चिकित्सकःदोषापहर्ता ९ एतदेवाहमूढइति बलीयसामुपरियदिअशक्तिमान्क्लिश्यतेक्रुध्यते तर्हिआत्मानंदेहंत्यजति १० अनात्मनःअजितचित्तस्यनियमनंकर्त्तव्यमितिस्मृतं अशक्तःक्रोधंजित्वा आत्मानमात्महत्यादोषात् परंचपरहत्यादोषात्त्रायतइत्यर्थः ११ ॥२५॥

शक्तस्यापिक्रोधजयेआत्मपरत्रातृत्वमाहविद्वानिति १२ । १३ । १४ । १५ मसृजेत्प्रकर्षेणप्रयुंजीत सुयोधनवधादपिसुयोधनाद्वधंप्राप्यापीत्यर्थः यदुक्तंतेजसश्चागतेकालेतेजउत्स्रष्टुमर्हसीतितत्राह तेजस्वीतिक्रोधजिदेवतेजस्वीनतुक्रोधीत्यर्थः १६ । १७ प्रत्युतक्रोधाजयेदोषमाहक्रुद्धोहीति १८ तुदतिव्यथयति परुषोक्त्यादिना तेजसिसतिक्रोधजयित्वमेवतेजोनान्यदित्यर्थः १९ एतदेवतेजोलक्षणप्रदर्शनेनप्रतिपादयति दाक्ष्यमितिदाक्ष्यंकर्मसुकौशलं । अमर्षःशत्रोरपकारोपायचिंतनं । शौर्यंपराभिभवशक्तिः । शीघ्रत्वंआशुकारिता । अंजसाआर्जवेन २० क्रुद्धैःकालयुक्तंदेशकालोपपन्नंतेजःसुदुःसहं २१ पंडितैरित्युपहासोमूर्खैरित्यर्थः अपंडितैरितिगौडपाठः स्वच्छः रजःरजोगुणपरिणामः २२ स्वधर्मान् अपगःअपहायगच्छतीतितथा द्वितीयायाअ

विद्वांस्तथैवयःशक्तःक्लिश्यमानोनकुप्यति ॥ अनाशयित्वाक्लेष्टारंपरलोकेचनंदति १२ तस्माद्बलवताचैवदुर्बलेनचनित्यदा ॥ क्षंतव्यंपुरुषेणाहुरापत्स्वपिविजानता १३ मन्योर्हिविजयंकृष्णेप्रशंसंतीहसाधवः ॥ क्षमावतोजयोनित्यंसाधोरिहसतांमतम् १४ सत्यंचानृततःश्रेयोनृशंसाच्चानृशंसता ॥ तमेवंबहुदोषंतुक्रोधंसाधुविवर्जितम् १५ मादृशःप्रसृजेत्कस्मात्सुयोधनवधादपि ॥ तेजस्वीतियमाहुर्वैपंडितादीर्घदर्शिनः १६ नक्रोधोऽभ्यंतरस्तस्यभवतीतिविनिश्चितम् ॥ यस्तुक्रोधंसमुत्पन्नंप्रज्ञयाप्रतिबाधते १७ तेजस्विनंतंविद्वांसोमन्यंतेतत्त्वदर्शिनः ॥ क्रुद्धोहिकार्यंसुश्रोणिनयथावत्प्रपश्यति ॥ नाकार्यंनचमर्यादांनरःक्रुद्धोऽनुपश्यति १८ हंत्यवध्यानपिक्रुद्धोगुरून्क्रुद्धस्तुदत्यपि ॥ तस्मात्तेजसिकर्त्तव्यःक्रोधोदूरेप्रतिष्ठितः १९ दाक्ष्यंह्यमर्षःशौर्यंचशीघ्रत्वमितितेजसः ॥ गुणाःक्रोधाभिभूतेननशक्याःप्राप्तुमंजसा २० क्रोधंत्यक्त्वातुपुरुषःसम्यक्तेजोऽभिपद्यते ॥ कालयुक्तंमहाप्राज्ञेक्रुद्धैस्तेजःसुदुःसहम् २१ क्रोधस्तुपंडितैःशश्वत्तेजइत्यभिनिश्चितम् ॥ रजस्तुलोकनाशायविहितंमानुषंप्रति २२ तस्माच्छश्वत्त्यजेत्क्रोधंपुरुषःसम्यगाचरन् ॥ श्रेयान्स्वधर्मानपगोनक्रुद्धइतिनिश्चितम् २३ यदिसर्वमबुद्धीनामतिक्रांतमचेतसाम् ॥ अतिक्रमोमद्विधस्यकथंस्वित्स्यादनिंदिते २४ यदिनस्युर्मानुषेषुक्षमिणःपृथिवीसमाः ॥ नस्यात्संधिर्मनुष्याणांक्रोधमूलोहिविग्रहः २५ अभिषक्तोह्यभिषजेदाहन्याद्गुरुणाहतः ॥ एवंविनाशोभूतानामधर्मःप्रथितोभवेत् २६ आक्रुष्टःपुरुषःसर्वंप्रत्याक्रोशेदनंतरम् ॥ प्रतिहन्याद्धतश्चैवतथाहिंस्याच्चहिंसितः २७ हन्युर्हिपितरःपुत्रान्पुत्राश्चापितथापितॄन् ॥ हन्युश्चपतयोभार्याःपतीन्भार्यास्तथैवच २८ एवंसंकुपितेलोकेजन्मकृष्णेनविद्यते ॥ प्रजानांसंधिमूलंहिजन्मविद्धिशुभानने २९ ताःक्षिपेरन्प्रजाःसर्वाःक्षिप्रंद्रौपदितादृशे ॥ तस्मान्मन्युर्विनाशायप्रजानामभवायच ३० यस्मात्तुलोकेदृश्यंतेक्षमिणःपृथिवीसमाः ॥ तस्माज्जन्मचभूतानांभवश्चप्रतिपद्यते ३१

द्वाणाद्यः जातिभ्रष्टात्पतितादपिक्रोधीहीनइत्यर्थः २३ सर्वक्षमार्जवादिकंअबुद्धीनां मूढैःअतिक्रांतंलंघितंअनिंदितेप्रशस्तेविषयेक्षमादौ २४ । २५ अभिषक्तःतापितःअभिषजेत्तापयेत् गुरुणाऽपिहतस्तंआहन्यात्ताडयेत् किमुतान्यमितिभावः एवंविनाशःअधर्मश्चप्रथितोभवेत् २६ आक्रुष्टोवाचाताडितः हतोऽन्येनाभिगतःहिंसितस्ताडितः २७।२८ जन्मोत्पत्तिःतत्रहेतुःप्रजानांसंधिःदंपत्योःप्रीतिः शमइतिपाठेक्षमा २९ तादृशेक्रोधपरेराज्ञिसति क्षिपेरन्नश्येयुःअभवायानैश्वर्याय ३० जन्मप्रतिपद्यतेअन्यथाक्रोधप्राबल्येपूर्वत्रयस्यैवदंपत्योर्नाशाज्जन्मासंभवइत्यर्थः ३१

बलीयसाबलवत्तरेणस्वाम्यादिनायथाआक्रुष्टस्ताडितोवाऽशक्तःक्षमते तथायःप्रभाववानपिक्षमतेतस्यलोकाइतिसार्द्धश्लोकोवाक्यं ३३ अन्यथादोषमाहार्द्धेनक्रोधनास्त्विति ३४ अत्रेतिक्ष मावतांगाथाःप्रशंसाःक्षमावतांमध्येमहात्मना ३५ क्षमाधर्मइति क्षमाहीनस्यधर्मादिरनर्थकरइत्यर्थः । यःधर्मादिफलार्थी ३६ ब्रह्मब्राह्मणजातिःसत्यंपरंब्रह्मापिक्षमाप्राप्यंभूतंसंचितंतपः माविचक्षमैवरक्षति ३७ अतिअतिक्रम्यप्राप्नुवंतितदूर्ध्वंपदमितिशेषः ब्रह्मविदांवेदविदां ३८ यजुषांत्रेताग्निसाध्यकर्मवतां कर्मिणांवापीकूपादिधर्मवतां ३९।४० । ४१ सर्वमनःप्राणेंद्रियाणां

क्षंतव्यंपुरुषेणेहसर्वापत्सुसुशोभने ॥ क्षमावतोहिभूतानांजन्मचैवप्रकीर्तितम् ३२ आक्रुष्टस्ताडितःक्रुद्धःक्षमतेयोबलीयसा ॥ यश्चनित्यंजितक्रोधोविद्वानु त्तमपूरुषः ३३ प्रभाववानपिनरस्तस्यलोकाःसनातनाः ॥ क्रोधनस्त्वल्पविज्ञानःप्रेत्यचेहचनश्यति ३४ अत्राप्युदाहरंतीमागाथानित्यंक्षमावताम् ॥ गी ताःक्षमावतांकृष्णेकाश्यपेनमहात्मना ३५ क्षमाधर्मःक्षमायज्ञःक्षमावेदाःक्षमाश्रुतम् ॥ यएतदेवंजानातिससर्वंक्षंतुमर्हति ३६ क्षमाब्रह्मक्षमासत्यंक्षमाभूतंच भाविच ॥ क्षमातपःक्षमाशौचंक्षमयेदंधृतंजगत् ३७ अतियज्ञविदांलोकान्क्षमिणःप्राप्नुवंतिच ॥ अतिब्रह्मविदांलोकानतिचापितपस्विनाम् ३८ अन्येवैयजु षांलोकाःकर्मिणामपरेतथा॥क्षमावतांब्रह्मलोकेलोकाःपरमपूजिताः ३९ क्षमातेजस्विनांतेजःक्षमाब्रह्मतपस्विनाम् ॥ क्षमासत्यंसत्यवतांक्षमायज्ञःक्षमाशमः४० तांक्षमांतादृशींकृष्णेकथमस्मद्विधस्त्यजेत् ॥ यस्यांब्रह्मचसत्यंचयज्ञालोकाश्चधिष्ठिताः४१क्षंतव्यमेवसततंपुरुषेणविजानता॥ यदाहिक्षमतेसर्वंब्रह्मसंपद्यतेतदा ४२क्षमावतामयंलोकःपरश्चैवक्षमावताम्॥इहसन्मानमृच्छंतिपरत्रचशुभांगतिम्४३येषांमन्युर्मनुष्याणांक्षमयाऽभिहतःसदा॥तेषांपरतरेलोकास्तस्मात्क्षांतिः परामता ४४ इतिगीताःकश्यपेनगाथानित्यंक्षमावताम् ॥ श्रुत्वागाथाःक्षमायास्त्वंतुष्यद्रौपदिमाक्रुधः ४५ पितामहःशांतनवःशमंसंपूजयिष्यति ॥ कृष्णश्चदेव कीपुत्रःशमंसंपूजयिष्यति ४६ आचार्योविदुरःक्षत्ताशममेववदिष्यतः ॥ कृपश्चसंजयश्चैवशममेववदिष्यतः ४७ सोमदत्तोयुयुत्सुश्चद्रोणपुत्रस्तथैवच ॥ पिता महश्चनोव्यासःशमंवदतिनित्यशः ४८ एतैर्हिराजानियतंचोद्यमानःशमंप्रति ॥ राज्यंदातेतिमेबुद्धिर्नचेल्लोभान्नशिष्यति ४९ कालोऽयंदारुणःप्राप्तोभरता नामभूतये ॥ निश्चितंमेसदैवैतत्पुरस्तादपिभाविनि ५० सुयोधनोनार्हतीतिक्षमामेवंनविंदति ॥ अर्हस्तत्राहमित्येवंतस्मान्मांविंदतेक्षमा ५१ एतदा त्मवतांवृत्तमेषधर्मःसनातनः ॥ क्षमाचैवानृशंस्यंचतत्कर्तास्म्यहमंजसा ५२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुना० द्रौपदीयुधिष्ठिरसंवादेऊ नत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ७ ॥ ॥ द्रौपद्युवाच ॥ नमोधात्रेविधात्रेचयौमोहंचक्रतुस्तव ॥ पितृपैतामहेवृत्तेवोढव्येतेऽन्यथामतिः १

येनक्षमतेसोढुंशक्नोति ४२ । ४३ परतरेसत्यलोकेलोकाःभोग्यपदार्थाः ४४ तुष्य तुष्टाभव ४५ । ४६ । ४७ । ४८ राजाधृतराष्ट्रःतत्पुत्रोवादातादास्यति ४९ अभूतये नाशाय ५० नार्हतिराज्यमितिशेषः तत्रहेतुः इतीति एवंउक्तरीत्या ५१ अंजसातत्त्वतः ५२ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेऊनत्रिंशोऽध्यायः ॥ २९ ॥ नमो धात्रेइति धात्रेईश्वराय विधात्रेपूर्वकर्मणे वृत्ते वलेनराज्याक्रमणरूपे १

ईश्वरस्यापिकर्मापेक्षत्वात्प्रथमंकर्मप्राबल्यमेवाहकर्मभिरिति चितितःकल्पितोलोकोभोगसाधनं गत्यांगत्यांउर्ध्वाधोमध्यमोत्तमाधमयोनिषु नित्यानिअपरिहार्यफलानि लोभात्मोहात् मो क्षंकर्मफलेभ्योदुःखेभ्योमुक्तिंयियासतिप्राप्तुमिच्छति २ कर्मनित्यत्वमेवाहनेहेति इहजन्मनिपुरुषःपूर्वकर्मभिर्बाध्यमानो धर्मादिनानाश्रियमाप्नोति आनृशंस्यंदया घृणालोकापवादभयं ३ तत्र त्वमेवदृष्टांतइत्याहत्वामित्यादिना ४ तदानींराज्यकालेअद्यराज्यच्युतौ जातुकदाचिद्धर्मात्प्रियतरंनहितेअध्यगमनज्ञातवंतः किंतुजीवितादपिप्रियतरंधर्ममेवाऽध्यगमन् ५ । ६ । ७ । ८ ९ शृंगमुत्स्वाभिमानः १० । ११ तेत्वया मोक्षिणःसंन्यासिनोमोक्षाश्रमस्थाः १२ आरण्यकेभ्योवानप्रस्थेभ्यः लौहानिसौवर्णादीनि । लोहानांकांचनंवरमितिलिंगात् १३ । १४ पाकय

कर्मभिश्चितितोलोकोगत्यांगत्यांपृथग्विधः ॥ तस्मात्कर्माणिनित्यानिलोभान्मोक्षंयियासति २ नेहधर्मानृशंस्याभ्यांनक्षांत्यानार्जवेनच ॥ पुरुषःश्रियमाप्नो तिनघृणित्वेनकर्हिचित् ३ त्वांचव्यसनमभ्यागादिदंभारतदुःसहम् ॥ यत्त्वंनार्हसिनापीमेभ्रातरस्तेमहौजसः ४ नहितेऽध्यगमन्जातुतदानींनाद्यभारत ॥ धर्मात्प्रियतरंकिंचिदपिचेज्जीवितादिह ५ धर्मार्थमेवतेराज्यंधर्मार्थंजीवितंचते ॥ ब्राह्मणागुरवश्चैवजानंत्यपिचदेवताः ६ भीमसेनार्जुनौचोभौमाद्रेयौचमया सह ॥ त्यजेस्त्वमितिमेबुद्धिर्नतुधर्मंपरित्यजेः ७ राजानंधर्मगोप्तारंधर्मोरक्षतिरक्षितः ॥ इतिमेश्रुतमार्याणांत्वांतुमन्येनरक्षति ८ अनन्याहिनरव्याघ्रनित्य दाधर्ममेवते ॥ बुद्धिःसततमन्वेतिच्छायेवपुरुषंनिजा९नावमंस्थाहिसदृशान्नावरान्श्रेयसःकुतः ॥अवाप्यपृथिवींकृत्स्नांनतेशृंगमवर्द्धत१०स्वाहाकारैःस्वधाभि श्चपूजाभिरपिचद्विजान् ॥ दैवतानिपितॄंश्चैवसततंपार्थसेवसे ११ ब्राह्मणाःसर्वकामैस्तेसततंपार्थतर्पिताः ॥ यतयोमोक्षिणश्चैवगृहस्थाश्चैवभारत१२ भुंजतेरु क्मपात्रीभिर्यत्राहंपरिचारिका ॥ आरण्यकेभ्योलौहानिभाजनानिप्रयच्छसि ॥ नादेयंब्राह्मणेभ्यस्तेगृहेकिंचनविद्यते १३ यदिदंवैश्वदेवंतेशांतयेक्रियतेगृहे ॥ तद्दत्वातिथिभूतेभ्योराजन्शिष्टेनजीवसि १४ इष्टयःपशुबंधाश्चकाम्यनैमित्तिकाश्चये ॥ वर्ततेपाकयज्ञाश्चयज्ञकर्मचनित्यदा १५ अस्मिन्नपिमहारण्येविजने दस्युसेविते ॥ राष्ट्रादपेत्यवसतोधर्मस्तेनावसीदति १६ अश्वमेधोराजसूयःपुंडरीकोऽथगोसवः ॥ एतैरपिमहायज्ञैरिष्टंतेभूरिदक्षिणैः १७ राजन्परीतयाबु द्धाविषमेऽक्षपराजये ॥ राज्यंवसून्यायुधानिभ्रातॄन्मांचासिनिर्जितः १८ ऋजोर्मृदोर्वदान्यस्यह्रीमतःसत्यवादिनः ॥ कथमक्षव्यसनजाबुद्धिरापतितातव १९ अतीवमोहमायातिमनश्चपरिभूयते ॥ निशाम्यतेदुःखमिदमिमांचापदमीदृशीम् २० अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ ईश्वरस्यवशे लोकास्तिष्ठंतेनात्मनोयथा २१ धातैवखलुभूतानांसुखदुःखेप्रियाप्रिये ॥ दधातिसर्वमीशानःपुरस्ताच्छुक्रमुच्चरन् २२ यथादारुमयीयोषानरवीरसमा हिता ॥ ईरयत्यंगमंगानितथाराजन्निमाःप्रजाः २३

ज्ञाग्न्यग्निसाध्याइष्टयः १५ । १६ । १७ परीतयाविपरीतया १८ ऋजोरवक्रस्य मृदोर्दयालोः १९ निशाम्यआलोच्य ममनोमोहंमौढ्यमायातिपरिभूयतेचेत्यन्वयः परिभवआर्तिः २० लोकाभोग्यानितिष्ठंतेप्रकाशंते । प्रकाशनस्थेयाख्ययोश्चेतितङ् २१ धाताईश्वरःशुक्रंप्राक्कर्मबीजं उच्चरन्उत्कर्षेणानुसरन् २२ यथेतिहेनरवीरसूत्रधारेणसमाहितासम्यङ्नियुक्तासतीअंगमीरय ति तथाइमाःप्रजाः अंगानिहस्तादीनि ईश्वरेणसमाहिताःसत्यईरयंति । चेष्टयंत्यंगकर्माणीतिपाठे हेअंगकर्माणिकर्तॄणि कर्मानुरोधीईश्वरइत्यर्थः इमाःप्रजाः चेष्टयंतीतिसंबंधः २३

अंतर्बहिर्व्याप्तोआकाशदृष्टांतः भूतानिजरायुजादीनि २४ बद्धोवाबद्धइव अन्येषामुपाध्यायादीनाम् २५ नसिनासिकायां नस्यंनासासूत्रं तेनयाओतःप्रोतः अत्रद्वौआकाशशकुनिसूत्रदृष्टांतौ ईश्वरस्यव्यापकत्वप्रेरकत्वयोः द्वयोमणिवृषवृक्षदृष्टांताजीवस्यास्वातंत्र्ये २६ आदेशमाज्ञामन्वेतिअनुसरतिवितत्रहेतुः तन्मयोहितदर्पणइति । यथामृन्मयोघटोमृद्येवलीयतेऽतोमध्येपिमृद्घी नोऽनन्य एवंजीवोऽपीश्वरस्यैवरूपमेदस्तन्मयस्तदर्पणश्चातोमध्येऽपितत्प्रेर्यएवेत्यर्थः यथोक्तम् । 'अजानिचयन्मयंतदविमुच्यनियंतृभवोदितियन्मयंततान्नियम्यमिति' तस्यार्थःअय मात्माधीनो नाकिंतुकंचनानिर्देश्यरूपं कालंकालयितारमीशंभजत्यनुसरति २७ । २८ । २९ चरतेभुंक्ते । कर्मव्यतिहारेतङ्फलप्रदत्वेनोपकारकमीशंजीवोभुंक्ते कर्मकर्तृत्वेनोपकारकंजीवमी शोभुंक्तइत्यर्थः अयमिति राजवत्तटस्थतयानचलक्ष्यते अंतर्यामित्वात् ३० नन्वीश्वरोजीवादन्योऽनन्यो वा । आद्येनचायमितिलक्ष्यतइत्यनुपपन्नं । द्वितीयेतयोःशास्तृशास्यभावानुपप तिरित्याशंक्याह हेतुमात्रमिति विभुश्चिदात्मायेनप्रयोज्येनकर्मकारयते तदइदंशरीरंमहाभूतान्यहंकारइत्यादिनोक्तरूपंस्थूलसूक्ष्मदेहद्वयं तदेवकर्तृइत्यर्थः । ननुजडेकर्तृत्वासंभवइत्याशं

आकाशइवभूतानिव्याप्यसर्वाणिभारत ॥ ईश्वरोविदधातीहकल्याणंयच्चपापकम् २४ शकुनिस्तंतुबद्धोवानियतोऽयमनीश्वरः ॥ ईश्वरस्यवशेतिष्ठेन्नान्येषां नात्मनःप्रभुः २५ मणिःसूत्रइवप्रोतोनस्योतइवगोवृषः ॥ स्रोतसोमध्यमापन्नःकूलाद्वृक्षइवच्युतः २६ धातुरादेशमन्वेतितन्मयोहितदर्पणः ॥ नात्माधीनो मनुष्योऽयंकालंभजतिकंचन २७ अज्ञोजंतुरनीशोऽयमात्मनःसुखदुःखयोः ॥ ईश्वरप्रेरितोगच्छेत्स्वर्गंनरकमेवच २८ यथावायोस्तृणाग्राणिवशंयांतिबलीय सः ॥ धातुरेवंवशंयांतिसर्वभूतानिभारत २९ आर्येकर्मणियुंजानःपापेवापुनरीश्वरः ॥ व्याप्यभूतानिचरतेनचायमितिलक्ष्यते ३० हेतुमात्रमिदंधातुःशरीरं क्षेत्रसंज्ञितम् ॥ येनकारयतेकर्मशुभाशुभफलंविभुः ३१ पश्यमायाप्रभावोऽयमीश्वरेणयथाकृतः ॥ योहंतिभूतैर्भूतानिमोहयित्वाऽऽत्ममायया ३२ अन्यथा परिदृष्टानिमुनिभिस्तत्त्वदर्शिभिः ॥ अन्यथापरिवर्त्तंतेवेगाइवनभस्वतः ३३ अन्यथैवहिमन्यंतेपुरुषास्तानितानिच ॥ अन्यथैवप्रभुस्तानिकरोतिविकरोतिच ३४ यथाकाष्ठेनवाकाष्ठमश्मानंचाश्मनापुनः ॥ अयसाचाप्ययश्छिंद्यान्निर्विचेष्टमचेतनम् ३५ एवंसभगवान्देवःस्वयंभूःप्रपितामहः ॥ हिनस्तिभूतैर्भूता निच्छद्मकृत्वायुधिष्ठिर ३६ संप्रयोज्यवियोज्यायंकामकारकरःप्रभुः ॥ क्रीडतेभगवान्भूतैर्बालःक्रीडनकैरिव ३७

नयाऽधातुःक्षेत्रसंज्ञितंक्षेत्रमिवक्षेत्रंचिदात्मनआभासरूपबीजनिवापस्थानं चिदाभासयुक्तंक्षेत्रंकर्तृइत्यर्थः । तच्चहेतुमात्रंइच्छाद्यात्मकत्वात् हेतुरपिनमुख्यहेतुभूतं बिंबप्रतिबिंबदृष्टांतेन चिदाभासस्यचिदात्मतंत्रत्वात् तथाचाभासस्यान्यत्वमादायशास्तृशास्यभावोव्यावहारिकः परमार्थतस्तुक्षेत्रस्यसुतिसमाध्योरभावान्नचायमितिलक्ष्यतइत्युक्तमितिभावः ३१ अयंपूर्वोक्तो मायायाअघटितघटनापटीयस्याअनिर्वचनीयाज्ञानाख्यायाःप्रभावः यईश्वरोभूतैःपृथक्पृथक्क्षेत्राभिमानिभिर्मोहयित्वा अनात्मनिदेहादावात्मबुद्धिंजनयित्वा ३२ मोहमेवविवृणोतिद्वा भ्यांअन्यथेतितत्त्वदर्शिभिः स्वप्नमायेंद्रजालवद्दृष्टान्यपि मूढानांसत्यवत्परिवर्त्तंतेभासंते वेगाःक्षरप्रसराः नभस्वतआकाशगामिनः सूर्यस्यतेजोमयाःसंतो जलवद्बुद्बुदवद्भासंते ३३ अनित्याशु चिदुःखरूपाण्यपितानिनित्यशुचिसुखस्वरूपाणिमन्यंते अन्यथाकरोति गगनवदजातमप्यंकुरादिक्रमेणजनयति विकरोतिचजीर्णत्वादिभावंजनयति ३४ अयोवत्तरुवन्नकेवलंनिश्चेष्टं किं त्वचेतनमपि ३५ छद्ममायाम् ३६ संप्रयोज्यसंयोगंकृत्वा कामकारइच्छातथैवकरोतीतिकामकारकरः बालःप्राकृतः क्रीडनकैःसारिप्रभृतिभिः ३७ ॥२७॥

नमात्रिति ईशोनदयालुःप्रत्युतनृशंसइत्यर्थः ३८ किंचईशस्यदुष्टेषुपक्षपातःसाधुषुचद्वेषोदृश्यतेऽतःसनिर्घृणएवेत्याह आर्यानित्यादित्रिभिः । चिंतयाधनादिध्यानेन ३९ । ४० धर्माभिशंकि नीतिपाठेधर्मश्रद्धाशून्येफलंयज्ञादिनातृप्तिंकिमश्नुतेअपितुनैवेत्यर्थः ४१ कर्मेति कृतंकर्मयदिकर्तारमेवगच्छतिनत्वन्यंतर्हिकारयितृत्वादीश्वरोऽपिपापेनालिप्यतैवेत्यर्थः ४२ अथेति कर्त्तारं कारयितारमीश्वरंऐश्वर्यादेवकर्मनस्पृशतितर्हितत्प्रयोज्याजीवाएवकर्मभिर्हतास्तथाचईश्वरोबलादीनान्नरकेपातयतीत्यस्यंतंनिर्घृणएवसइतिभावः ४३ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारत भावदीपेत्रिंशोऽध्यायः॥३०॥एवंधर्मेश्वरयोराक्षेपमाक्षेप्रत्यक्षानुमानागमैस्तौसमर्थयितुमध्यायआरभ्यतेवल्गुचित्रेति वल्गुशोभनंश्लक्ष्णंसुकुमारं नास्तिक्यंवेदविद्विष्टं १ यदुक्तंत्वांचेद्व्यसनि नमित्यादिनाधर्मस्यनैष्फल्येस्वदभिभवएवदृष्टांतइतितत्राह नाहमिति कर्म धर्मं फलार्थिनाकृतोधर्मोयदिनिष्फलःस्यात्तर्हिभवेदयमाक्षेपो नत्वहंतथाऽऽचरामीत्यर्थः ननुफलेच्छायाअभावे किमर्थंधर्मःकर्तव्यइत्यतआहददामीत्यादिना देयमृणमित्येवददामि । 'जायमानोवैब्राह्मणस्त्रिभिर्ऋणवाजायते ब्रह्मचर्येणऋषिभ्यो यज्ञेनदेवेभ्यः प्रजयापितृभ्यः'इतिश्रुतेः । ऋणवाऋणवान्

नमाद्टपितृवद्राजन्धाताभूतेषुवर्त्तते ॥ रोषादिवप्रवृत्तोऽयंयथाऽयमितरोजनः ३८ आर्यान्शीलवतोदृष्ट्वान्हीमतोवृत्तिकर्षितान् ॥ अनार्यान्सुखिनश्चैवविह्व लानिवचिंतया ३९ तवेमामापदंदृष्ट्वासमृद्धिंचसुयोधने ॥ धातारंगर्हयेपार्थविषमंयोऽनुपश्यति ४० आर्यशास्त्रातिगेक्रूरेलुब्धेधर्मापचायिनि ॥ धार्त्तराष्ट्रे श्रियंदत्वाधाताकिंफलमश्नुते ४१ कर्मचेत्कृतमन्वेतिकर्तारंनान्यमृच्छति ॥ कर्मणातेनपापेनलिप्यतेनूनमीश्वरः ४२ अथकर्मकृतंपापंनचेत्कर्तारमृच्छ ति ॥ कारणंबलमेवेहजनान्शोचामिदुर्बलान् ४३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुना०द्रौपदीवाक्येत्रिंशोऽध्यायः ॥ ३० ॥ ॥ युधिष्ठिरउवाच ॥ वल्गुचित्रपदंश्लक्ष्णंयाज्ञसेनित्वयावचः ॥ उक्तंतच्छ्रुतमस्माभिर्नास्तिक्यंतुप्रभाषसे १ नाहंकर्मफलान्वेषीराजपुत्रिचराम्युत ॥ ददामिदेयमित्येवयजेयष्टव्य मित्युत २ अस्तुवात्रफलंमावाकर्तव्यंपुरुषेणयत् ॥ गृहेवावसताकृष्णेयथाशक्तिकरोमितत् ३ धर्मंचरामिसुश्रोणिनधर्मफलकारणात् ॥ आगमानतिक्रम्य सतांवृत्तमवेक्ष्यच ४ धर्मएवमनःकृष्णेस्वभावाच्चैवमेधृतम् ॥ धर्मवाणिज्यकोहीनोजघन्योधर्मवादिनाम् ५ नधर्मफलमाप्नोतियोधर्मंदोग्धुमिच्छति ॥ यश्चैनं शंकतेकृत्वानास्तिक्यात्पापचेतनः ६ अतिवादाद्वदाम्येषमाधर्ममभिशंकिथाः ॥ धर्माभिशंकीपुरुषस्तिर्यग्गतिपरायणः ७ धर्मोयस्याभिशंक्यःस्यादार्षंवा दुर्बलात्मनः ॥ वेदाच्छूद्रइवापेयात्सलोकादजरामरात् ८

२ यथाशक्तियत्कर्तव्यंतत्करोमीत्यन्वयः ३ धर्ममिति वेदवाक्याच्छिष्टाचाराच्चनिष्काममेवधर्मंचरामि । 'अग्निहोत्रंजुहुयात्स्वर्गकामः' इतिस्वर्गादिफलश्रुतिस्तुधर्मेप्ररोचनार्थेतिभावः ४ स्वभावात् । 'शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनं । दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजम्' इतिगीतावचनोक्तधर्माचरणशीलएवक्षत्रियोनान्यइतिनियमान्मेमयाधर्मेमनोधृतं यतोधर्मवा णिज्यकोधर्मात्स्वर्गादिफलमिच्छन् हीनोमुख्यफलाच्च्युतोऽतएवजघन्योनीचः ५ धर्मफलं । 'तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेन' इतिश्रुतेर्विद्याविवि दिषा वा धर्मफलंमुख्यंतन्नाप्नोति यश्चैनंधर्मंशंकते विश्वासंनकुरुते सोऽपिधर्मफलंनाप्नोति पापचेतनःपापबुद्धिः ६ अतिवादात् मानांतरमतिक्रांतोवादोवचनं तस्माद्वेदैकप्रामाण्यात् ७ आर्षंऋषयोमंत्रास्तद्द्रष्टारोमन्वादयोवा धर्ममूलभूतंमंत्रजातंवा मन्वादिवाक्यंवेत्यर्थः । अर्थेवेतिपाठे फलेविषयेइत्यर्थः । दुर्बलात्मनःविवेकाक्षमचित्तस्य अपेयात्अपगच्छेत् लोकादात्म लोकात् । स्वर्लोकादितिपाठेऽप्यानंदरूपादात्मलोकादित्यर्थः । अनात्मलोकेषुअजरामरत्वयोरसंभवात् अजरामरात् मोक्षरूपात् ८

१०

बालोऽपिस्थविरेषुयोक्तव्योनिर्बोक्तव्यो गणनीयः ९ । १० एवंधर्मस्यवेदैकगम्यत्वादनतिशंक्यत्वं वेदस्यचश्रेष्ठप्रमाणत्वमुक्त्वाप्रत्यक्षत्वादपिधर्मफलस्यानतिशंक्यत्वमाह प्रत्यक्षं
हीत्यादिना चिरजीविताचिरजीवी ११ । १२ । १३ धर्मकर्तव्यंवर्णयंति प्रत्यक्षागमबुद्धयः अस्माकंवेदैकगम्यमप्यर्थंप्रत्यक्षेणपश्यंतइत्यर्थः १४ क्षेपोनिंदा शंकाफलेसंशयः १५ एतचमूढ
कार्यमित्याहउन्मत्तानित्यादिना आगतनिश्चयान् प्राप्ततत्त्वनिश्चयान् १६ उत्त्रद्धोदृप्तः श्रेयसोधर्मस्य अन्यत्रार्तीद्रियेधर्माद्यर्थे १७ ध्यायन् अर्थाश्चिंतयन्नपि लोकान्धर्मप्राप्यान् १८
कामलोभावत्यंतंगच्छतिप्राप्नोतीतिकामलोभातिगः १९ आनंत्यं ब्रह्मभावं २० शंकल्यार्ण २१ । २२ । २३ । २४ अनुमानमपिधर्मेप्रमाणमित्याह अफलइति । अयंभावः यदिधर्मो
नस्यात्तर्हिऊर्ध्वगतिंकश्चिदपिनाप्नुयात् । जायस्वम्रियस्वेतिमशकादीनांपूर्वसंस्कारात्पुनःपुनस्तत्तज्जातीयदेहस्यैवप्राप्तिश्रुतेरंधंतमःप्राप्तिरेवसर्वेषांस्यात् ततश्च शास्त्रानर्थक्यं । यदितु
वेदाध्यायीधर्मपरःकुलेजातोमनस्विनि ॥ स्थविरेषुसयोक्तव्योराजर्षिर्धर्मचारिभिः ९ पापीयान्सहिशूद्रेभ्यस्तस्करेभ्योविशिष्यते ॥ शास्त्रातिगोमंदबुद्धिर्यो
धर्ममभिशंकते १० प्रत्यक्षंहित्वयादृष्टऋषिर्गच्छन्महातपाः ॥ मार्कंडेयोऽप्रमेयात्माधर्मेणचिरजीविता ११ व्यासोवसिष्ठोमैत्रेयोनारदोलोमशःशुकः ॥ अन्ये
चऋषयःसर्वेधर्मेणैवसुचेतसः १२ प्रत्यक्षंपश्यसिह्येतान्दिव्ययोगसमन्वितान् ॥ शापानुग्रहणेशक्तान्देवेभ्योऽपिगरीयसः १३ एतेहिधर्ममेवादौवर्णयंतिसदाऽन
घ ॥ कर्तव्यममरप्रख्याःप्रत्यक्षागमबुद्धयः १४ अतोनार्हसिकल्याणिधातारंधर्ममेवच ॥ राज्ञिमूढेनमनसाक्षेप्तुंशंकितुमेवच १५ उन्मत्तान्मन्यतेबालःसर्वा
नागतनिश्चयान् ॥ धर्माभिशंकीनान्यस्मात्प्रमाणमधिगच्छति १६ आत्मप्रमाणउन्नद्धःश्रेयसोह्यवमन्यकः ॥ इंद्रियप्रीतिसंबद्धंयदिदंलोकसाक्षिकम् ॥ ए
तावन्मन्यतेबालोमोहमन्यत्रगच्छाति १७ प्रायश्चित्तंनतस्यास्तियोधर्ममभिशंकते ॥ ध्यायन्सकृपणःपापोनलोकान्प्रतिपद्यते १८ प्रमाणाद्धिनिवृत्तोहिवेद
शास्त्रार्थनिंदकः ॥ कामलोभातिगोमूढोनरकंप्रतिपद्यते १९ यस्तुनित्यंकृतमतिर्धर्ममेवाभिपद्यते ॥ अशंकमानःकल्याणिसोऽमुत्रानंत्यमश्नुते २० आर्षप्र
माणमुत्क्रम्यधर्मंनप्रतिपालयन् ॥ सर्वशास्त्रातिगोमूढःशंजन्मसुनविंदति २१ यस्यनार्षंप्रमाणंस्याच्छिष्टाचारश्चभामिनि ॥ नवैतस्यपरोलोकोनायमस्तीति
निश्चयः २२ शिष्टैराचरितंधर्मंकृष्णेमाऽस्माभिशंकिथाः ॥ पुराणमृषिभिःप्रोक्तंसर्वज्ञैःसर्वदर्शिभिः २३ धर्मएवप्लवोनान्यःस्वर्गंद्रौपदिगच्छताम् ॥ सैवनौः
सागरस्येववणिजःपारमिच्छतः २४ अफलोयदिधर्मःस्याच्चरितोधर्मचारिभिः ॥ अप्रतिष्ठतमस्येतज्जगन्मज्जेदनिंदिते २५ निर्वाणंनाधिगच्छेयुर्जीवेयुःप
शुजीविकाम् ॥ विद्यांतिनैवयुज्येयुर्नचार्थंकेचिदाप्नुयुः २६
धर्मोऽस्तितर्हितेषामपि विशिष्टदेशनिवासादिजनितस्यपुण्यस्यापरिहार्यत्वादूर्ध्वगतिः संभवति २५ ननुयथातृणात्क्षीरंक्षीराद्दधीतिवत् परिणामक्रमादेवतत्तद्विशिष्टदेहलाभादूर्ध्वगतिर्भ
विष्यति किंधर्मेणेत्याशंक्याह निर्वाणमिति दध्नोऽपिगवोपभुक्तात्क्षीरमन्नादिनीचपरिणामदृष्टेर्नैवयुक्तं । तथाचमोक्षासिद्धिः तस्याचसत्यां बोधशून्याः पशुजीविकांजीवेयुरंधंतमःप्रविशेयुरे
वेत्यर्थः । ततश्चतेपशुतुल्याविद्याविद्ययानैवयुज्येरन् । संवृतहिस्वभावेनैवसर्वेऽपिप्राणिनः किंविद्ययाकिंवामोक्षेणेत्याशंक्याह नचार्थंकेचिदाप्नुयुरिति अयंभावः घटशरावोदंचनादिकार्यवैचि ॥२८॥
त्र्यं क्रियावैचित्र्यायत्तंयथादृष्टं तथाऐहिकयत्नाभावेपिनृपपश्वादिषुज्ञानैश्वर्यतारतम्यंदृश्यमानंजन्मांतरीयक्रियानुमापकंतदभावेजगद्वैचित्र्यस्याकस्मिकानिमित्ताभावादेश्चासंभवःस्यादिति २६

अनादिपरंपरागतःशिष्टाचारोऽपिधर्मोऽस्तित्वेप्रमाणमित्याहतपश्चेत्यादिना २७ विप्रलंभोवंचनंअयंयज्ञादिधर्मः २८।२९श्रेयसिश्रेयोनिमित्तंधर्मंव्यचरन् तद्धिधर्मोहिश्रेयःश्रेयःसाधनं सनात
नमनाद्यनंतं ३० । ३१ अनुभवोऽपिधर्मेप्रमाणमित्याहत्वमिति । अयंभावः'अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः'इति स्मृतेः । पंचाग्निविद्यायांच
द्युपर्जन्यपृथिवीपुरुषयोषास्वग्निषुश्रद्धासोमवर्षान्नरेतआहुतयोहूयंते ततःशरीरमितिक्रमेण'पंचम्यामाहुतावापःपुरुषवचसोभवंति' इतिश्रुतेश्चसर्वेषांप्राणिनामुत्पत्तिरवगतातत्रगर्भवासाख्यारे
तोद्रव्यकपंचम्याहुत्यवस्थाऽत्यंतदुःखमयीपुण्यवशाद्द्रोणस्यनासीत् द्रौपदीधृष्टद्युम्नयोस्त्वतिपुण्यवशात्रेतोरूपमलपरिणामहेतुरन्नाहुतिरपिनास्ति साक्षादग्निकुण्डोद्भवत्वात् तदिदंधर्म
फलंतवानुभवसिद्धमतोधर्ममाऽवमंस्था इति ३२ उपमानंनिदर्शनं कर्मस्वादरवशादल्पेनअन्नाच्छादनमात्रेणतुष्टोभवति नतुकर्माण्युपेक्ष्यबहुलाभार्थयततेइत्यर्थः ३३। ३४ श्रुतंवेदोदितंपुण्यं
येपांपापानामनिष्टसाधनानांचफलोदयः स्वर्गनरकहेतुत्वं प्रभवउत्पत्तिःअविद्येतियावत् अत्ययोनाशः विद्येतियावत् देवगुह्यानिवेदैकवेद्यत्वात् ।'तस्मादेषांतन्नप्रियंयदेतन्मनुष्याविद्युः'इति
श्रुतेर्दैवगोप्यान्येतानिस्वपशुभूतपुरुषविनाशकत्वात् ३५ एतानीति अत्रएतेषुदेवगुह्येषुविषयेष्विमाःप्राकृताःप्रजामुह्यंते अविद्यामपिविद्यात्वेनविद्यांचाविद्यात्वेनगृह्णंति एवंपुण्यपापविपर्ययो
तपश्चब्रह्मचर्यंचयज्ञःस्वाध्यायएवच ॥ दानमार्जवमेतानियदिस्युरफलानिवै २७ नाचरिष्यन्परेधर्मंपरेपरतरेचये ॥ विप्रलंभोऽयमत्यंतंयदिस्युरफलाः
क्रियाः २८ ऋषयश्चैवदेवाश्चगंधर्वासुरराक्षसाः ॥ ईश्वराःकस्यहेतोस्तेचरेयुर्धर्ममादृताः २९ फलदंत्विहविज्ञायधातारंश्रेयसिध्रुवम् ॥ धर्मंतेव्यचरन्कृष्णे
तद्धिश्रेयःसनातनम् ३० सनायमफलोधर्मोनाधर्मोऽफलवानपि ॥ दृश्यंतेऽपिहिविद्यानांफलानितपसांतथा ३१ त्वमात्मनोविजानीहिजन्मकृष्णेयथाश्रुत
म् ॥ वेत्थचापियथाजातोधृष्टद्युम्नःप्रतापवान् ३२ एतावदेवपर्याप्तमुपमानंशुचिस्मिते ॥ कर्मणांफलमाप्नोतिधीरोऽल्पेनापितुष्यति ३३ बहुनाह्यपिविद्वां
सोनैवतुष्यंत्यबुद्धयः ॥ तेषांनधर्मजंकिंचित्प्रेत्यशर्मास्तिवापुनः ३४ कर्मणांश्रुतपुण्यानांपापानांचफलोदयः ॥ प्रभवश्चाव्ययश्चैवदेवगुह्यानिभामिनि ३५
एतानिवेदयःकश्चिन्मुह्यंत्यत्रप्रजाइमाः ॥ अपिकल्पसहस्रेणनसश्रेयोऽधिगच्छति ३६ रक्ष्याण्येतानिदेवानांगूढमायाहिदेवताः ॥ कृताशाश्चव्रताशाश्चत
पसादग्धकिल्बिषाः ॥ प्रसादैर्मानसैर्युक्ताःपश्यंत्येतानिवैद्विजाः ३७ नफलादर्शनाद्धर्मःशंकितव्योनदेवताः ॥ यष्टव्यंचप्रयत्नेनदातव्यंचानसूयता ३८
कर्मणांफलमस्तीहतथैतद्धर्मशाश्वतम् ॥ ब्रह्माप्रोवाचपुत्राणांयदृषिर्वेदकश्यपः ३९ तस्मात्तेसंशयःकृष्णेनीहारइवनश्यतु ॥ व्यवस्यसर्वमस्तीतिना
स्तिक्यंभावमुत्सृज ४० ईश्वरंचापिभूतानांधातारंमाचवैक्षिप ॥ शिक्षस्वैनंनमस्वैनंमातेऽभूद्बुद्धिरीदृशी ४१
ऽपिज्ञेयः अतएतानियस्तत्त्वतोवेदसश्रेयोदेवानांहिततरंकर्मनाधिगच्छतिनानुसरति कर्तृत्वादिमदंतःकरणस्यविविक्तत्वादितिभावः ३६ कृताशाशिताआशायैस्ते । कृहिंसायांस्वादिः व्रतंहिं
तंमितंमेध्यंचाश्नंतितेकृताशाश्चव्रताशाश्चशांतादांताइत्यर्थः तपसाश्रवणमननात्मकेनालोचनेन मनःप्रसादैर्ध्यानफलैर्युक्ताद्विजायोगिनः एतानिदेवगुह्यानि ३७ । ३८ धर्मशाश्वतंधर्मस्यश
श्वद्भावोयंस्वभावः ३९ व्यवस्यनिश्चित्य भावमभिप्रायं ४० एवंधर्मश्रैष्ठ्यंनिश्चित्यईश्वरश्रैष्ठ्यमप्याहईश्वरमिति धातारंदधातिकर्मफलानियथास्वंविभजतीतितं कर्मणामाशुतरविनाशित्वात्
भट्टानांचकालांतरीयफलहेतुत्वायोगात् अपूर्वकल्पनायाश्च । 'सर्वस्यवशीसर्वस्येशानः' इति सर्वस्येश्वराधीनत्वप्रतिपादकश्रुत्याबाधात् लौकिकराजभृत्यदृष्टांताच कर्मभिस्तुष्टोरुष्टोवाईश्वर
एवसदसत्फलविभाजकइतिभावः माक्षिपमानिंदाकुरु शिक्षस्वशास्त्राचार्योपदेशादधीष्व ४१

४२ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकत्रिंशोऽध्यायः ॥ ३१ ॥ नावमन्य इति १ । २ स्थावरा इतरेजनावा हियस्मादकर्माणोनजीवंत्यतःकर्मकर्त्तव्यमितियोजना । तथाचा यंप्रयोगः स्थावरजीविका प्राक्कर्मपूर्विकाजीविकात्वात्पाकादिक्रियापूर्वकास्मदादिजीविकावदिति ३ स्थावरेपूक्तंन्यायंतिर्यक्षुयोजयतियावदिति सद्योजातस्यगोवत्सस्य स्तनपानादिप्रवृ त्तिरपिरवजनकसंस्कारहेतुप्राक्तनकर्मसत्त्वेप्रमाणमित्यर्थः यावद्गोस्तनपानात्वगोस्तनपानादेरित्यर्थः यावच्छायोपसेवनात् प्रतिमाद्वारकभोगादित्यर्थः । अयंभावः कौलिकशास्त्रप्रसिद्ध्या शत्रुनिर्मितायांचैत्रप्रतिमायांशत्रुणाकंटकादिनानुन्नायांचैत्रोव्यथते तत्रव्यथानिमित्तमांतरंधातुवैषम्यं बाह्यंवाकंटकवेधादि नास्तिकिंचिद्दृष्टमस्ति किंतुकेवलमदृष्टमेव अनेनैवन्यायेनजंतवःकर्मणा प्राचीनेनैववृत्तिजीवनमाप्नुवंति ४ जंगमेष्विति प्रेत्यमृत्वा ५ उत्थानंउत्तिष्ठतिप्रवर्त्ततेऽस्मादित्युत्थानंप्राक्कर्मसंस्कारस्तं सर्वेऽपिप्राणिनोऽभिजानंत्यनुभवंति ततःकर्मसुप्रवर्त्ततेतत्फलंचाप्नुवंति तस्मात्कर्मतत्संस्कारपरंपरेयमनादिरित्यर्थः ६ सर्वेहीति यथाऽयंबकःपूर्वसंस्कारात्वृत्त्यर्थंध्यायतिएवंधाताईश्वरोऽप्यनादिसंस्कारवशात् पूर्वपूर्वकल्पस्वरूपामेवसृष्टिंकरोति । 'धातायथा

यस्यप्रसादात्तद्भक्तोमर्त्योगच्छत्यमर्त्यताम् ॥ उत्तमंदैवतंकृष्णेमाऽवमंस्थाःकथंचन ४२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणि युधिष्ठिरवाक्येएकत्रिंशोऽध्यायः ३१ ॥ ॥ द्रौपद्युवाच ॥ ॥ नावमन्येनगर्हेचधर्मंपार्थकथंचन ॥ ईश्वरंकुतएवाहमवमंस्येप्रजापतिम् १ आर्ताऽहं प्रलपामीदमितिमांविद्धिभारत ॥ भूयश्चविलपिष्यामिसुमनास्त्वंनिबोधमे २ कर्मखल्विहकर्तव्यंजानताऽमित्रकर्शन ॥ अकर्माणोहिजीवंतिस्थावरानेतरे जनाः ३ यावद्गोस्तनपानाच्चयावच्छायोपसेवनात् ॥ जंतवःकर्मणावृत्तिमाप्नुवंतियुधिष्ठिर ४ जंगमेषुविशेषेणमनुष्याभरतर्षभ ॥ इच्छंतिकर्मणावृत्तिमवाप्तुंप्रेत्य चेहच ५ उत्थानमभिजानंतिसर्वभूतानिभारत ॥ प्रत्यक्षंफलमश्नंतिकर्मणांलोकसाक्षिकम् ६ सर्वेहिस्वंसमुत्थानमुपजीवंतिजंतवः ॥ अपिधाताविधाताचय थाऽयमुदकेबकः ७ अकर्मणांवैभूतानांवृत्तिःस्यान्नहिकाचन ॥ तदेवाभिप्रपद्येतनविहन्यात्कदाचन ८ सकर्मकुरुमाग्लासीःकर्मणाभवदंशितः ॥ कृतंहि योऽभिजानातिसहस्रेसोऽस्तिनास्तिच ९ तस्यचापिभवेत्कार्यंविवृद्धौरक्षणेतथा ॥ भक्ष्यमाणोह्यनादानात्क्षीयेतहिमवानपि १० उत्सीदेरन्प्रजाःसर्वान कुर्युःकर्मचेद्भुवि ॥ तथाह्येतानवर्धेरन्नकर्मचेदफलंभवेत् ११ अपिचाप्यफलंकर्मपश्यामःकुर्वतोजनान् ॥ नान्यथाह्यपिगच्छंतिवृत्तिंलोकाःकथंचन १२ यश्च दिष्टपरोलोकेयश्चापिहठवादिकः ॥ उभावपिशठावेतौकर्मबुद्धिःप्रशस्यते १३

पूर्वमकल्पयत्'इतिश्रुतेः । तथाविधाताधर्मोऽपिपूर्वसंस्कारानुरोधेनैवकर्माणिप्रवर्त्तयति अन्यथासंसारानादित्वानभ्युपगमेकृतहानाकृताभ्यागमादिदोषःस्यादितिभावः ७ एवंप्राक्तनकर्मप्राब ल्यमुपपाद्यऐहिकानामपितेषांप्राबल्यमाहअकर्मणामिति याञ्चामुखचालनादिदृष्टयत्नशून्यानजीविकाऽस्तिअतस्तदेवदृष्टफलंकर्मैवनविहन्यात्दैवपरोभूत्वानत्यजेदित्यर्थः ८ दंशितःसन्न द्धःकृतंकर्मकर्तुमितिशेषः ९ तस्यकर्मणःकार्यंप्रयोजनंरक्षणेऽर्थानामितिशेषः अनादानादसंग्रहात् लब्धेनार्थेननसंतोष्टव्यंकिंतुतद्विवृद्ध्यर्थंकर्मकर्त्तव्यमित्यर्थः १० । ११ अपिचेतिकर्मणांक्व चिदफलत्वेऽप्यावश्यकत्वंनित्यमित्यर्थः १२ यश्चेति दिष्टपरोमंत्रौषधाद्यदृष्टद्वारैवार्थसाधनपरःकौलिकः । हठवादिकः प्राग्जन्माभावादकृतमेवोपस्थास्यतीतिवदन्चार्वाकः । एतौशठौप्राक्क र्मानंगीकारात् । पाठांतरेअपसदौअधमौ । कर्मबुद्धिःप्राक्तनंतारकालिकंचकर्मसहितंसदिष्टसाधनमितिबुद्धिमान् १३

निर्विचेष्टो दृष्टयत्नहीनः शयेत्शेयात् आमोऽपक्वः १४ । १५ हठादीन्व्याचष्टेअकस्मादिति अचिंतितस्यातर्कितस्यचलाभोहठः १६ दैवंदेवताराधनम् १७ पौरुषंयथोक्तप्रति ग्रहादिवृत्तिः १८ स्वभावोयःप्राक्कर्मानुग्रहः यथा नष्टकपर्दिकान्वेषणप्रवृत्तस्यरत्नलाभः १९ एतच्चतुष्टयजोऽपिलाभः पूर्वकर्मफलमेव २० स्वकर्मैव कर्माधीनएव विदधात्यर्पयतिपूर्व कृतं पूर्वकर्मजम् २१ एतदेवस्पष्टयति यद्धीति २२ कारणमिति यःकर्मणिवर्त्तते सोऽयं मानुषदेहः प्राग्भवीयस्तस्यप्रवर्तकस्यधातुरपिकारणंप्रवर्तकःसधाता एवंवर्त्तमानदेहंबी जांकुरवत् धातृप्रेर्योदेहोदेहप्रेर्यश्चधातेत्यर्थः देहोदेहसाध्यंकर्म २३ । २४ ननुपूर्वकर्मैवप्रवर्तकंचेत्किंपुरुषकारेणेत्याशंक्याह मनसेति २५ एतदपिप्राक्कर्मजमेवेत्याशंक्याह सं

योहिदिष्टमुपासीनोनिर्विचेष्टःसुखंशयेत् ॥ अवसीदेत्सदुर्बुद्धिरामोघटइवोदके १४ तथैवहठदुर्बुद्धिःशक्तःकर्मण्यकर्मकृत् ॥ आसीतनचिरंजीवेदनाथइवदुर्ब लः १५ अकस्मादिहयःकश्चिदर्थंप्राप्नोतिपूरुषः ॥ तंहठेनेतिमन्यंतेसहियत्नोनकस्यचित् १६ यच्चापिकिंचित्पुरुषोदिष्टंनामभजत्युत ॥ दैवेनविधिनापा र्थतद्दैवमितिनिश्चितम् १७ यत्स्वयंकर्मणाकिंचित्फलमाप्नोतिपूरुषः ॥ प्रत्यक्षमेतल्लोकेपुतत्पौरुषमितिश्रुतम् १८ स्वभावतःप्रवृत्तोयःप्राप्नोत्यर्थंनकारणा त् ॥ तत्स्वभावात्मकंविद्धिफलंपुरुषसत्तम १९ एवंहठाच्चदैवाच्चस्वभावात्कर्मणस्तथा ॥ यानिप्राप्नोतिपुरुषस्तत्फलंपूर्वकर्मणाम् २० धाताऽपिहिस्वकर्मै वतैस्तैर्हेतुभिरीश्वरः ॥ विदधातिविभज्येहफलंपूर्वकृतंनृणाम् २१ यद्ध्ययंपुरुषःकिंचित्कुरुतेवैशुभाशुभम् ॥ तद्धातृविहितंविद्धिपूर्वकर्मफलोदयम् २२ कारणंतस्यदेहोऽयंधातुःकर्मणिवर्त्तते ॥ सयथाप्रेरयत्येनंतथाऽयंकुरुतेऽवशः २३ तेषुतेषुहिकृत्येषुविनियोक्तामहेश्वरः ॥ सर्वभूतानिकौंतेयकारयत्यवशान्य पि २४ मनसाऽर्थान्विनिश्चित्यपश्चात्प्राप्नोतिकर्मणा ॥ बुद्धिपूर्वंस्वयंवीरपुरुषस्तत्रकारणम् २५ संख्यातुंनैवशक्यानिकर्माणिपुरुषर्षभ ॥ अगारनगराणां हिसिद्धिःपुरुषहैतुकी २६ तिलेतैलंगविक्षीरंकाष्ठेपावकमंततः ॥ धियाधीरोविजानीयादुपायंचास्यसिद्धये २७ ततःप्रवर्त्ततेपश्चात्कारणैस्तस्यसिद्धये ॥ तां सिद्धिमुपजीवंतिकर्मजामिहजंतवः २८ कुशलेनकृतंकर्मकर्त्रासाधुस्वनुष्ठितम् ॥ इदंत्वकुशलेनेतिविशेषादुपलभ्यते २९ इष्टापूर्तफलंनस्यान्नशिष्योनगुरुर्भवे त् ॥ पुरुषःकर्मसाध्येषुस्याच्चेदयमकारणम् ३० कर्तृत्वादेवपुरुषःकर्मसिद्धौप्रशस्यते ॥ असिद्धौनिंद्यतेचापिकर्मनाशात्कथंत्विह ३१ सर्वमेवहठेनैकेदैवेनै केवदंत्युत ॥ पुंसःप्रयत्नजंकेचित्त्रैधमेतन्निरुच्यते ३२

ख्यातुमिति संख्यातुंप्राक्कर्मैवकारणं नपुरुषकारइतिनिश्चेतुं तत्रहेतुःअगारेति २६ तिलेइति पक्वंधम्यायेनप्राक्कर्मसिद्धमेवपुरुषकारोऽभिव्यनक्तीत्यर्थः अस्यतैलादेः सिद्धयेप्राप्तये २७ कारणैर्यंत्रनिपीडनादिभिः तांसिद्धिंतैलादिप्राप्तिं । कर्मणामितिपाठे सिद्धिंफलं तां तैलप्राप्तिं २८ कुशलेनेति विशेषात्फलभेदात्ऐहिककर्मणोऽपिप्राबल्यमस्तीत्यर्थः २९ विधिप्रति षेधशास्त्रवैयर्थ्यान्यथानुपपत्त्याऽपि पुरुषकारस्यश्रैष्ठ्यमाह इष्टेतिद्वाभ्यां इष्टंयागादि आपूर्तंतडागारामादि ३० । ३१ सर्वमिति हठादयोऽकस्मादिहयःकश्चिदित्यादिश्लोकत्रयेण व्याख्याताः स्वभावस्यापिहठएवांतर्भावः हठेनैकेचार्वाकाः दैवेनैकेकौलिकाः प्रयत्नजंप्राकृताः ३२

एतैरेवनार्थसिद्धिरितिवैदिकाइत्याह नचेति अदृश्यं धर्माधर्मरूपंप्राक्कर्म तदेवदिष्टहठादिकंसर्वमित्यर्थः ३३ अत्रपूर्वपक्षः दृश्यतेहीति स्वभावतोऽयत्नतः ३४ चतुर्थंप्राक्कर्मकुशलाइत्युपहासः इतिप्रतिजानंतीत्यध्याहृत्ययोज्यम् ३५ सिद्धांतमाह तथेति ३६ । ३७ त्रिद्वारामिति हठादित्रयंद्वारमेवार्थसिद्धेर्मुख्यंकारणंकर्मैवेत्यर्थः । आत्मादेहः देहवत्तेजडाइत्यर्थः । यथालोकाइतिपाठेलोकालोकायतिकाः ३८ कर्त्तव्यमेवेति यथाग्रामकामस्यसांग्रहणीष्टीराजसेवाचोतिद्वयमनुष्ठेयं तद्वदिहदिष्टपौरुषात्मकंकर्मकर्त्तव्यमेव हठपक्षस्त्याज्यएवेत्यर्थः एकांतेनातिशयेन अनीहोनिश्चेष्टःहठवादीत्यर्थः ३९ भवत्येवफलसिद्धिः अलसोऽसम्यक्कारी ४० असंभवेत्विति अंगवैकल्यात्कर्मफलानुत्पादेत्वस्यफलस्यहेतुः प्रायश्चित्तंदोषप्रतिसमाधानं लक्षयेत् कर्मतःफलाभावेंऽगवैकल्यंकल्प्यं नतुकर्मवैयर्थ्यमितिभावः । कर्मणिसांगेकृते आनृण्यं फलानुत्पादेऽपि निर्दोषत्वम् ४१ ४२ अनर्थाअर्थहीनाः ननुनिश्चितंधीरानिःसंशयादुर्लभाइ

नचैवैतावताकार्यमन्यंतइतिचापरे ॥ अस्तिसर्वमदृश्यंतुदिष्टंचैवतथाहठः ३३ दृश्यतेहिहठाच्चैवदिष्टाच्चार्थस्यसंततिः ॥ किंचिद्दैवाद्धठात्किंचित्किंचिद्देवस्वभावतः ३४ पुरुषःफलमाप्नोतिचतुर्थंनात्रकारणम् ॥ कुशलाःप्रतिजानंतियेवैतत्त्वविदोजनाः ३५ तथैवधाताभूतानामिष्टानिष्टफलप्रदः ॥ यदिनस्यात्रभूतानांकृपणोनामकश्चन ३६ यंयमर्थमभिप्रेप्सुःकुरुतेकर्मपूरुषः ॥ तत्तत्सफलमेवस्याद्यदिनस्यात्पुराकृतम् ३७ त्रिद्वारामर्थसिद्धिंतुनानुपश्यंतियेनराः ॥ तथैवानर्थसिद्धिंचयथैवात्मातथैवते ३८ कर्त्तव्यमेवकर्मेतिमनोरेषाविनिश्चयः ॥ एकांतेनह्यनीहोऽयंपराभवतिपूरुषः ३९ कुर्वतोहिभवत्येवप्रायेणेहयुधिष्ठिर ॥ एकांतफलसिद्धिंतुनविंदत्यलसःक्वचित् ४० असंभवेत्वस्यहेतुःप्रायश्चित्तंतुलक्षयेत् ॥ कृतेकर्मणिराजेंद्रतथाऽऽनृण्यमवाप्नुते ४१ अलक्ष्मीराविशत्येनंशयानमलसंनरम् ॥ निःसंशयंफलंलब्ध्वादक्षोभूतिमुपाश्नुते ४२ अनर्थाःसंशयावस्थाःसिद्ध्यंतेमुक्तसंशयाः ॥ धीरानराःकर्मरतानतुनिःसंशयाःक्वचित् ४३ एकांतेनह्यनर्थोऽयंवर्ततेऽस्मासुसांप्रतम् ॥ सतुनिःसंशयंनस्यात्त्वयिकर्मण्यवस्थिते ४४ अथवाऽसिद्धिरेवस्याद्भिमानंतदेवते ॥ वृकोदरस्यबीभत्सोर्भ्रात्रोश्चयमयोरपि ४५ अन्येषांकर्मसफलमस्माकमपिवापुनः ॥ विप्रकर्षेणबुद्ध्येतकृतकर्मायथाफलम् ४६ पृथिवींलांगलेनेहभित्त्वाबीजंवपत्युत ॥ आस्तेऽथकर्षकस्तूष्णींपर्जन्यस्तत्रकारणम् ४७ वृष्टिश्चेन्नानुगृह्णीयादनेनास्तत्रकर्षकः ॥ यदन्यःपुरुषःकुर्यात्तत्कृतंसफलंमया ४८ तच्चेदंफलमस्माकमपराधोनमेक्वचित् ॥ इतिधीरोऽन्ववेक्ष्यैवनात्मानंतत्रगर्हयेत् ४९ कुर्वतोनार्थसिद्धिर्मेभवतीतिहभारत ॥ निर्वेदोनात्रकर्तव्योद्वावन्यौह्यत्रकारणम् ५० सिद्धिर्वाऽप्यथवाऽसिद्धिरप्रवृत्तिरतोऽन्यथा ॥ बहूनांसमवायेहिभावानांकर्मसिद्धयः ५१ गुणाभावेफलंन्यूनंभवत्यफलमेवच ॥ अनारंभेहिनफलंनगुणोदृश्यतेक्वचित् ५२

त्यर्थः ४३ अनर्थोराज्यच्युतिः कर्मणिपौरुषे ४४ असिद्धिरितिच्छेदः कृतेऽपिपौरुषेयदिफलासिद्धिरेवस्यात्तर्हितदेवेतत्वृकोदरादीनामभिमानं साकल्येनप्रमाणंराज्यानर्हत्वेस्वात् । तदाराज्याशाविच्छेदात्रममराज्यार्थमुद्वेगःस्यादितिभावः ४५ अन्येषामस्माकंवाकर्मसफलं यथातथाकृतकर्मैवविप्रकर्षेणकर्मकरणातिबुध्येत त्वंस्वकृतकर्मातत्कथंबुध्येरितिभावः ४६ । ४७ । ४८ । ४९ निर्वेदोवैराग्यंद्वावन्यौपौरुषानिर्वेदौ अत्रफलसिद्धौ ५० सिद्धिरसिद्धिर्वाऽस्तु किंत्वप्रवृत्तिरेवमास्त्वित्यर्थः बहूनांसर्वेषांसमवायेसमुदाये भावानांकारणानाम् ५१ गुणोऽप्रधानमंगं तदभावेगुणःशौर्यादिः ५२ ॥३०॥

उपायाःसामादयः स्वस्तिवृद्धयेकल्याणवृद्धये ५३ अप्रमत्तेनेति तद्देशकालादियोगाख्यंकार्यमादरणीयं तत्रपराक्रमःपुरुषकारस्तुउपदेष्टाकार्यकर्तामुख्यइत्यर्थः भूयिष्ठंश्रेष्ठंकर्मयोगेषुकार्यघटनासुपराक्रमोदृश्यमेवप्रसिद्धएव श्रेष्ठत्वेनतस्मात्पराक्रमेयतितव्यमितिभावः५४ ननुभ्रातृपुत्रार्त्तराष्ट्रेषुकथंपराक्रांतुंशक्यमित्याशंक्यसामासंभवमाहयत्रेतिअवेक्षेतादरंकुर्यात् श्रेयांसंप्रशस्ततरंकर्मचमेदंदानाख्यंवा ५५ दुर्मेधसिदुर्योधनेतुनसामभेददानानामुपायानांसंभवोऽस्तिअतस्तत्रदंडएवश्रेयानित्याहव्यसनमिति व्यसनंराष्ट्रोपप्लवादि विवासनंदेशान्निःसारणं ५६ उत्थानयुक्तोयत्नवान्अंतरैषणेछिद्रान्वेषणे । आनृण्यंनिर्दोषत्वं । परस्यामात्यादेः ५७ नन्वशक्तःकथमुत्थानंकुर्यामित्याशंक्याहनत्वेवेति ५८ एवंसंस्थितिकाईदृग्व्यवस्थावती । सांसिद्धिकीतिपाठेस्वाभाविकीत्यर्थः सिद्धिःफलसिद्धिःतत्रेति कालावस्थयोरानुकूल्येनगतिरन्वेषणेयत्नः सैवसिद्धिःसिद्धिमूलं ५९ । ६० । ६१ कर्मवतीमागतांकिंचित्कार्योद्देशेनपितुरंतिकेआगतां ६२

देशकालावुपायांश्चमंगलंस्वस्तिवृद्धये ॥ युनक्तिमेधयाधीरोयथाशक्तियथाबलम् ५३ अप्रमत्तेनतत्कार्यमुपदेष्टापराक्रमः ॥ भूयिष्ठंकर्मयोगेषुदृश्यमेवपराक्रमः ५४ यत्रधीमानवेक्षेतश्रेयांसंबहुभिर्गुणैः ॥ साम्नैवार्थंततोलिप्सेत्कर्मचास्मैप्रयोजयेत् ५५ व्यसनंवाऽस्यकांक्षेतविवासंवायुधिष्ठिर ॥ अपिसिंधोर्गिरेर्वाऽपिकिंपुनर्मर्त्यधर्मिणः ५६ उत्थानयुक्तःसततंपरेषामंतरैषणे ॥ आनृण्यमाप्नोतिनरःपरस्यात्मनएवच ५७ नत्वेवात्माऽवमंतव्यःपुरुषेणकदाचन ॥ नह्यात्मपरिभूतस्यभूतिर्भवतिशोभना ५८ एवंसंस्थितिकासिद्धिरियंलोकस्यभारत ॥ तत्रसिद्धिर्गतिःप्रोक्ताकालावस्थाविभागतः ५९ ब्राह्मणंमेपितापूर्वंवासयामासपंडितम् ॥ सोऽपिसर्वामिमांप्राहपित्रेमेभरतर्षभ ६० नीतिंबृहस्पतिप्रोक्तांभ्रातॄन्मेऽग्राहयत्पुरा ॥ तेषांसकाशादश्रौषमहमेतांतदागृहे ६१ समांराजन्कर्मवतीमागतामाहसांत्वयन् ॥ शुश्रूषमाणामासीनांपितुरंकेयुधिष्ठिर ६२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुना॰द्रौपदीवाक्येद्वात्रिंशोऽध्यायः ३२ ॥ ॥ ४ ॥ ॥ ४ ॥ ॥ वैशंपायनउवाच ॥ ॥ याज्ञसेन्यावचःश्रुत्वाभीमसेनोह्यमर्षणः ॥ निःश्वसन्नुपसंगम्यक्रुद्धोराजानमब्रवीत् १ राज्यस्यपदवींधर्म्यांव्रजसत्पुरुषोचिताम् ॥ धर्मकामार्थहीनानांकिंनोवस्तुंतपोवने २ नैवधर्मेणतद्राज्यंनार्जवेननचौजसा ॥ अक्षकूटमधिष्ठायहृतंदुर्योधनेनवै ३ गोमायुनेवसिंहानांदुर्बलेनबलीयसाम् ॥ आमिषंविघसाशेनतद्वद्राज्यंहिनोहृतम् ४ धर्मलेशप्रतिच्छन्नःप्रभवंधर्मकामयोः ॥ अर्थमुत्सृज्यकिंराजन्दुःखेषुपरितप्यसे ५ भवतोऽनवधानेनराज्यंनःपश्यतांहृतम् ॥ आहार्यमपिशक्रेणगुप्तंगांडीवधन्वना ६ कुणीनामिवबिल्वानिपंगूनामिवधेनवः ॥ हृतमैश्वर्यमस्माकंजीवतांभवतःकृते ७ भवतःप्रियमित्येवंमहद्व्यसनमीदृशम् ॥ धर्मकामेप्रतीतस्यप्रतिपन्नाःस्मभारत ८

॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेद्वात्रिंशोऽध्यायः ॥ ३२ ॥ याज्ञसेन्या इति १ एवंद्रौपद्याप्र कर्माधीनांफलसिद्धिमंगीकृत्यापि तद्वारभूतस्यपुरुषकारस्यप्राबल्येप्रतिपादितेराजानमुद्योजयन्भीमआह राज्यस्यपदवीमित्यादि पदवींप्राप्तिमार्गंधर्म्यांवनवासकालपालनरूपाद्धर्मादनपेतां किंमयोजनमितिशेषः २ कूटंकपटं ३ विघसोभूतबलिशेषःश्वकाकादियोग्यस्तद्भक्षकेनशुनकेनेत्यर्थः ४ धर्मलेशःप्रतिज्ञापालनजस्तेनप्रतिच्छन्नआवृतःअर्थराज्याख्यं ५ अनवधानेनप्रमादेनपश्यतामित्यनादरेषष्ठी ६ कुणीनांहस्तविकलानां पंगूनांपादविकलानां षष्ठीपूर्ववत् भवतःकृतेभवन्निमित्तं ७ धर्मकामेधर्मेच्छायांप्रतीतस्यविश्वस्तस्य । धर्मकाम्याप्रतीतस्येतिपाठेधर्मच्छायांविश्वस्तस्य ८

शास्त्रैःशमवचनैःभवतांमासमानानांयोगिना ९ । १० मृगचर्यामिवएनांवनचर्याअबलस्यैर्निषेवितामित्येकंपदं बलवद्भिरसेवितामित्यर्थः ११ । १३ नआपन्नइतिसंबंधः १३ । १४ । १५
अलंसमर्थान्सतः १६ । १७ गांपृथिवीं १८ । १९ कृत्यलक्षणेकरणीयस्वरूपे २० कुधर्मंतनोतीतिकुधर्मंतत् कुधर्मबीजमित्यर्थः २१ धर्मार्थौ बलसाध्यहेमंतप्रातःस्नानशत्रुजयसंभवौ २२
धर्मार्थेनत्वर्थकामार्थं अर्थप्रयोजनं २३ । २४ अतिवेलमत्यंतं २५ इतरावर्थकामौ २६ कामतोरममाणस्यतस्यकामांतेनिधनमितिसंबंधः २७ साहिधर्मार्थरूपाहि २८ अर्थपरिग्रहोऽर्थायेमे

कर्षयामःस्वमित्राणिनंदयामश्चशात्रवान् ॥ आत्मानंभवतांशास्त्रैर्नियम्यभरतर्षभ ९ यद्वयंनतदैवैतान्धार्त्तराष्ट्रान्निहन्महि ॥ भवतःशास्त्रमादायतन्नस्तपति
दुष्कृतम् १० अथैनामन्ववेक्षस्वमृगचर्यामिवात्मनः ॥ दुर्बलाचरितांराजन्नबलस्थैर्निषेविताम् ११ यांनकृष्णोनबीभत्सुर्नाभिमन्युर्नसृंजयाः ॥ नचाहमभिनं
दामिनचमाद्रीसुतावुभौ १२ भवान्धर्मोधर्मइतिसततंव्रतकर्शितः ॥ कच्चिद्राजन्ननिर्वेदादापन्नःक्लीबजीविकाम् १३ दुर्मनुष्याहिनिर्वेदमफलंस्वार्थघातकम् ॥
अशक्ताःश्रियमाहर्तुमात्मनःकुर्वतेप्रियम् १४ सभवान्दृष्टिमाशक्तःपश्यन्नस्मासुपौरुषम् ॥ आनृशंस्यपरोराजन्नानर्थमवबुद्ध्यसे १५ अस्मानमीधार्त्तराष्ट्राः
क्षममाणानलंसतः ॥ अशक्तानिवमन्यंतेतद्दुःखंनाहवेवधः १६ तत्रचेद्युध्यमानानामजिह्ममनिवर्तिनाम् ॥ सर्वशोहिवधःश्रेयान्प्रेत्यलोकान्लभेमहि १७ अ
थवावयमेवैतान्निहत्यभरतर्षभ ॥ आददीमहिगांसर्वांतथापिश्रेयएवनः १८ सर्वथाकार्यमेतन्नःस्वधर्ममनुतिष्ठताम् ॥ कांक्षतांविपुलांकीर्तिंवैरंप्रतिचिकीर्षता
म् १९ आत्मार्थंयुध्यमानानांविदितेकृत्यलक्षणे ॥ अन्यैरपिहृतेराज्येप्रशंसैवनगर्हणा २० कर्षणार्थोहियोधर्मोमित्राणामात्मनस्तथा ॥ व्यसनंनामतद्राजन्नध
र्मःसकुधर्मंतत् २१ सर्वथाधर्मनित्यंतुपुरुषंधर्मदुर्बलम् ॥ त्यजतस्तातधर्मार्थौप्रेतंदुःखसुखेयथा २२ यस्यधर्मोहिधर्मार्थंक्लेशभाङ्नसपंडितः ॥ नसधर्मस्यवेदा
र्थंसूर्यस्यांधःप्रभामिव २३ यस्यचात्मार्थमेवार्थःसचनार्थस्यकोविदः ॥ रक्षेतभृतकोऽरण्येयथागास्तादृगेवसः २४ अतिवेलंहियोऽर्थार्थीनेतरावनुतिष्ठति ॥
सवध्यःसर्वभूतानांब्रह्महेवजुगुप्सितः २५ सततंयश्चकामार्थीनेतरावनुतिष्ठति ॥ मित्राणितस्यनश्यंतिधर्मार्थाभ्यांचहीयते २६ तस्यधर्मार्थहीनस्यकामांते
निधनंध्रुवम्॥कामतोरममाणस्यमीनस्येवांभसःक्षये२७तस्माद्धर्मार्थयोर्नित्यंनप्रमाद्यंतिपंडिताः॥ प्रकृतिःसाहिकामस्यपावकस्यारणिर्यथा २८सर्वथाधर्ममूलोऽ
र्थोधर्मश्चार्थपरिग्रहः॥इतरेतरयोर्नीतौविद्धिमेघोदधीयथा२९द्रव्यार्थस्पर्शसंयोगेयाप्रीतिरुपजायते ॥ सकामश्चित्तसंकल्पःशरीरंनास्यदृश्यते ३० अर्थार्थीपुरु
षोराजन्बृहंतंधर्ममिच्छति॥अर्थमिच्छतिकामार्थीनकामादन्यमिच्छति३१नहिकामेनकामोऽन्यःसाध्यतेफलमेवतत्॥उपयोगात्फलस्यैवकाष्ठाद्भस्मेवपंडितैः ३२

वालंबनीयः इतरेतरयोर्नीतौधर्मादर्थःप्रणीयतेऽर्थाच्चधर्मइत्यर्थः मेघादुदधिपुष्टिरुदधेर्मेघपूर्तिरिव २९ द्रव्यस्यस्रक्चंदनादेःस्पर्शः अर्थस्यस्वर्णादेःसंयोगोलाभः ३० । ३१ उपयोगःसाक्षा ॥३१॥
त्प्रीत्युत्पादनेनकृतार्थत्वं काष्ठाद्भस्मसाध्यं नतुभस्मात्तोऽपिभस्मांतरंसाध्यमस्तितद्वत् ३२

वैतंसिकोवीतंसेनजीवतीतिपक्षिहंता । 'वीतंसंबंधनोपायेमृगाणांपक्षिणामपि'इतिविश्वः । विहिंसता विशिष्टहिंसावत्त्वं ३३ प्रकृतिंस्वरूपं३४ व्यक्तमिति अर्थःप्रयोजनंकामाख्यं सद्रव्येणस्त्री
धनगोहस्त्यश्वात्मनापरिगृह्यतइतिद्रव्यपरिग्रहः अस्यद्रव्यस्यप्रकृतिंरूपादिरूपां विकृतिंत्यागभोगादिरूपां ३५ तस्यस्त्रीधनादिरूपद्रव्यस्य नाशेअदर्शनेअभावेविनाशेलब्धस्यावियो
गेजरामरणेस्त्रीगोऽश्वादीनांसोऽयमनर्थः स्त्रीपरामर्शराज्यनाशादिरूपः । अनर्थपरिहारायधर्मोऽपिलंघनीयइतिभावः ३६ पंचानांश्रोत्रादीनांविषयेशब्दादौ मनसोविषयःसंकल्पः हृद

इमान्शकुनकान्राजन्हंतिवैतंसिकोयथा ॥ एतद्रूपमधर्मस्यभूतेषुहिविहिंसता ३३ कामाल्लोभाच्चधर्मस्यप्रकृतिंयोनपश्यति ॥ सवध्यःसर्वभूतानांप्रेत्यचेहच
दुर्मतिः ३४ व्यक्तंतेविदितोराजन्नार्थोद्रव्यपरिग्रहः ॥ प्रकृतिंचापिवेत्थास्यविकृतिंचापिभूयसीम् ३५ तस्यनाशेविनाशेवाजरयामरणेनवा ॥ अनर्थइतिम
न्यंतेसोऽयमस्मासुवर्त्तते ३६ इंद्रियाणांचपंचानांमनसोहृदयस्यच ॥ विषयेवर्तमानानांयाप्रीतिरुपजायते ३७ सकामइतिमेबुद्धिःकर्मणांफलमुत्तमम् ॥ ए
वमेवपृथग्दृष्ट्वाधर्मार्थौकाममेवच ३८ नधर्मपरएवस्यान्नचार्थपरमोनरः ॥ नकामपरमोवास्यात्सर्वान्सेवेतसर्वदा ३९ धर्मंपूर्वेधनंमध्येजघन्येकाममाचरेत् ॥
अहन्यनुचरेदेवमेषशास्त्रकृतोविधिः ४० कामंपूर्वेधनंमध्येजघन्येधर्ममाचरेत् ॥ वयस्यनुचरेदेवमेषशास्त्रकृतोविधिः ४१ धर्मंचार्थंचकामंचयथावद्वदतांवर॥
विभज्यकालेकालज्ञःसर्वान्सेवेतपंडितः ४२ मोक्षोवापरमंश्रेयएषराजन्सुखार्थिनाम् ॥ प्राप्तिंवाबुद्धिमास्थायसोपायांकुरुनंदन ४३ तद्वाशुक्रियतांराजन्प्रा
प्तिर्वाऽप्यधिगम्यताम् ॥ जीवितंह्यातुरस्येवदुःखमंतरवर्तिनः ४४ विदितश्चैवमेधर्मःसततंचरितश्चते ॥ जानंतस्त्वयिशंसंतिसुहृदःकर्मचोदनाम् ४५ दानं
यज्ञाःसतांपूजावेदधारणमार्जवम् ॥ एषधर्मःपरोराजन्बलवान्प्रेत्यचेहच ४६ एषनार्थविहीनेनशक्योराजन्निषेवितुम् ॥ अखिलाःपुरुषव्याघ्रगुणाःस्युर्यद्य
पीतरे ४७ धर्ममूलंजगद्राजन्नान्यद्धर्माद्विशिष्यते ॥ धर्मश्चार्थेनमहताशक्योराजन्निषेवितुम् ४८ नचार्थोभैक्ष्यचर्येणनापिक्लैब्येनकर्हिचित् ॥ वेत्तुंशक्यःस
दाराजन्केवलंधर्मबुद्धिना ४९ प्रतिषिद्धाहितेयाच्ञायायासिध्यतिवैद्विजः ॥ तेजसैवार्थलिप्सायांयतस्वपुरुषर्षभ ५० भैक्ष्यचर्यानविहितानचविट्शूद्रजीवि
का ॥ क्षत्रियस्यविशेषेणधर्मस्तुबलमौरसम् ५१ स्वधर्मंप्रतिपद्यस्वजहिशत्रून्समागतान् ॥ धार्त्तराष्ट्रवनंपार्थमयापार्थेननाशय ५२ उदारमेवविद्वांसोधर्मंप्रा
हुर्मनीषिणः ॥ उदारंप्रतिपद्यस्वनावरेस्थातुमर्हसि ५३ अनुबुद्ध्यस्वराजेंद्रवेत्थधर्मान्सनातनान् ॥ क्रूरधर्माभिजातोऽसियस्मादुद्विजतेजनः ५४ प्रजापा
लनसंभूतंफलंतवनगर्हितम् ॥ एषतेविहितोराजन्धात्राधर्मःसनातनः ५५

यस्यनिश्चयः ३७ पृथक्भिन्नान्दृष्ट्वा ३८ । ३९ धर्मंपूर्वेअहनिचरेत् ४० कामंपूर्वेवयसिचरेत् ४१ । ४२ । ४३ प्राप्तिंमहोदयंवाराज्यलाभजं । 'प्राप्तिर्लाभेमहोदये' इतिविश्वः तन्मोक्षाख्यंश्रे
यः दुःखंदुःखवं ४४ कर्मचोदनांप्रवृत्तिजनकंवेदवाक्यं शंसंतिकथयंति ४५ । ४६ अखिलाः खिलंशल्यंतद्रहिताः ४७ । ४८ क्लैब्येनकातर्येणवेत्तुंलब्धुं ४९ द्विजोब्राह्मणः तेजसापराभिभव
शक्त्या ५० औरसमुत्साहः ५१ । ५२ उदारमीश्वरभावं अवरेअनैश्वर्ये ५३ क्रूरंहिंसात्मकंक्षात्रंकर्मयस्य ५४ । ५५

अपचितोहीनः ५६ शिथिलंदुर्बलं ५७ नभूतिमनैश्वर्यंनपुनःश्रियंनास्तिपुनःश्रीर्यधेतिनभूतेरेवविशेषणं । उभयत्रनैकधेतिनञशब्देनसमासः । व्यजयत्पराभूतवान् ५८ जिह्वांजिह्वायाः प्रियंसाध्वन्नंउत्कोचमित्यर्थः क्षुद्राणांशत्रुपक्षीयाणांनिकृत्याभेदरूपेणच्छलेन शल्यकोव्याधःसहिमृगेभ्योभक्ष्यंदत्वाविश्वास्यहत्वाआहारंलभतेतद्वत् शल्यकः श्वावित् क्षुद्रान्मधुमक्षिकाविशेषान्जिह्वांदत्वाबहिर्निःसार्यभक्षयतितद्वज्जिह्वांवाचंदत्वाशत्रूनजहीतिप्राञ्चः ५९ । ६० बलवतःशत्रून्परांनिकृतिसंवत्सरशब्दंमीमांसकन्यायेनदिनपरंकुर्वितिभावः ६१ । ६२ सत्वेनबलेनप्रमाणेनसंधेनउत्साहेनशत्रुपक्षीयैःसहसंधानलक्षणेनसूत्रेण । 'प्रमाणंनित्यमर्यादासंघत्रादिप्रमादिषु । उत्साहस्तूद्यमेसूत्रे'इतिविश्वः अप्रमादीमहोत्साहीत्यपिपाठः ६३ सत्वादन्यस्यवितथत्वेहेतुः नत्विति प्रसक्तमुपकारकत्वेनप्रत्यासन्नं इष्टमित्यर्थः ६४ अर्थत्यागोपीति दुर्योधने राज्यार्पणंनश्रेयसेऽपितुखरकंडूयनवदपकारायैव यथाखरकंडूयनं स्पर्शदोषात्सद्योदुःखदस्नान

तस्मादपचितःपार्थलोकेहास्यंगमिष्यसि ॥ स्वधर्माद्धिमनुष्याणांचलनंनप्रशस्यते ५६ सक्षात्रंहृदयंकृत्वात्यक्त्वेदंशिथिलंमनः ॥ वीर्यमास्थायकौरव्यधुरमुद्वहधुर्यवत् ५७ नहिकेवलधर्मात्माप्रथिवींजातुकश्चन ॥ पार्थिवोव्यजयद्राजन्नभूतिंनपुनःश्रियम् ५८ जिव्हांदत्वाबहूनांहिक्षुद्राणांलुब्धचेतसाम् ॥ निकृत्यालभतेराज्यमाहारमिवशल्यकः ५९ भ्रातरःपूर्वजाताश्चसुसमृद्धाश्चसर्वशः ॥ निकृत्यानिर्जितादेवैरसुराःपार्थिवर्षभ ६० एवंबलवतःसर्वमितिबुद्धामहीपते ॥ जहिशत्रून्महाबाहोपरांनिकृतिमास्थितः ६१ नह्यर्जुनसमःकश्चिद्युधियोधोधनुर्धरः ॥ भवितावापुमान्कश्चिन्मत्समोवागदाधरः ६२ सत्वेनकुरुतेयुद्धंराजन्सुबलवानपि ॥ नप्रमाणेननोत्साहात्सत्वस्थोभवपांडव ६३ सत्वंहिमूलमर्थस्यवितथंयदतोऽन्यथा ॥ नतुप्रसक्तंभवतिवृक्षच्छायेवहैमनी ६४ अर्थत्यागोऽपिकार्यःस्यादर्थंश्रेयांसमिच्छता ॥ बीजौपम्येनकौंतेयमातेऽभूदत्रसंशयः ६५ अर्थेनतुसमोऽनर्थोयत्रलभ्येतनोदयः ॥ नतत्रविपणःकार्यःखरकंडूयनंहितत् ६६ एवमेवमनुष्येंद्रधर्मंत्यक्त्वाल्पकंनरः ॥ बृहंतंधर्ममाप्नोतिसबुद्धइतिनिश्चितम् ६७ अमित्रंमित्रसंपन्नंमित्रैर्भिंदंतिपंडिताः ॥ भिन्नैर्मित्रैःपरित्यक्तंदुर्बलंकुरुतेवशम् ६८ सत्वेनकुरुतेयुद्धंराजन्सुबलवानपि ॥ नोद्यमेननहोत्राभिःसर्वाःस्वीकुरुतेप्रजाः ६९ सर्वथासंहतैरेवदुर्बलैर्बलवानपि ॥ अमित्रःशक्यतेहंतुंमधुहाभ्रमरैरिव ७० यथाराजन्प्रजाःसर्वाःसूर्यःपातिगभस्तिभिः ॥ अत्तिचैवतथैवत्वंसदृशःसवितुर्भव ७१

निमित्तं गोकंडूयनवच्चपरत्रनहितं एवमेतदपीतिश्लोकद्वयार्थः ६५ विपणःप्रतिज्ञा नकार्योननिर्वाह्यः ६६ एवमेवबीजौपम्येनप्रतिज्ञानिर्वाहजमल्पंधर्मंत्यक्त्वा राज्यलाभजोदानयागादिर्महान्धर्मआदर्त्तव्यइत्यर्थः ६७ युवानमल्पबुद्धिं । यदेकःस्थविरोवेत्तिनततरुणकोव्यइत्युक्तेः दुर्बलमित्यपिपाठः ६८ पक्वबुद्धेःसर्वत्र सावधानस्यमित्राणिदुर्भेद्यान्यतस्तादृशेदुर्योधनेबलमेवश्रेयइत्याहसत्वेनेति युद्धेनैवशत्रुजयेकृतेप्रजाःस्वाधीनाभवंतिनतूद्यमेननिग्रहेणनहोत्राभिः सांत्वेनाऽऽह्वानैः६९ संहतैर्मिलितैः मधुहामध्वर्थगतः । ओहाङ्गतावित्यस्यरूपं भ्रमरैर्मधुपटलस्थैःसविषपक्षैर्युगपदृष्टोम्रियतइतिप्रसिद्धं कालप्रतीक्षायांहिशत्रुर्बलवान्भूत्वाऽस्मान्जेष्यतीतिभावः ७० यथेति अचिरसशोषणेन पातिवर्षेण तथात्वंदुर्योधनादीन्वशमानीयपालयेत्यर्थः ७१

एतद्भूमेःपालनंवक्ष्यमाणंतपःस्वधर्मःपुराणमनादि । एतच्चावितथमितिपाठांतरेपुराणंवेदविहितमित्यर्थः ७२ सृष्टेनविहितेनधर्मेणेत्यर्थः इतरेणमरणेन ७३ अपेयात् अपगच्छेत् व्यवसितो निश्चितः ७४।७५।७६।७७ ननुकथंतर्हिमयाराज्यार्थमनृतंकर्त्तव्यमतआहयदेनइति एनःपापमवाप्नुवन् अवाप्तिहेतोः ७८।७९।८० परस्यापिराज्यानर्हत्वादवरोपणमुचितमित्याहश्वदृतावितिश्वदृतौसारमेयचर्मकोशे ब्रह्मवेदःवृषलेशूद्रे ८१ स्वाध्यायमधिकुर्वतेश्वदृतावितिश्लोकंवेदवत्स्व्यादयोनित्यंपठंतीत्यर्थः ८२ भवताहेतुनाउपद्रवेराज्यभ्रंशे ८३ अर्थविभावकोजयार्जितमर्थं

एतच्चापितपोराजन्पुराणमितिनःश्रुतम् ॥ विधिनापालनंभूमेर्यत्कृतंनःपितामहैः ७२ नतथातपसाराजन्लोकान्प्राप्नोतिक्षत्रियः ॥ यथासृष्टेनयुद्धेनविजयेनेतरेणवा ७३ अपेयात्किलभाःसूर्याल्लक्ष्मीश्चंद्रमसस्तथा ॥ इतिलोकोव्यवसितोदृष्ट्वेमांभवतोव्यथाम् ७४ भवतश्चप्रशंसाभिर्निंदाभिरितरस्यच ॥ कथायुक्ताःपरिषदःपृथग्राजन्समागताः ७५ इदमभ्यधिकंराजन्ब्राह्मणाःकुरवश्चते ॥ समेताःकथयंतीहमुदिताःसत्यसंधताम् ७६ यन्नमोहान्नकार्पण्यान्नलोभान्नभयादपि ॥ अनृतंकिंचिदुक्तंतेनकामान्नार्थकारणात् ७७ यदेनःकुरुतेकिंचिद्राजाभूमिमवाप्नुवन् ॥ सर्वंतन्नुदतेपश्चाद्यज्ञैर्विपुलदक्षिणैः ७८ ब्राह्मणेभ्योऽददद्ग्रामान्गाश्चराजन्सहस्रशः ॥ मुच्यतेसर्वपापेभ्यस्तमोभ्यइवचंद्रमाः ७९ पौरजानपदाःसर्वेप्रायशःकुरुनंदन ॥ सवृद्धबालसहिताःशंसंतित्वांयुधिष्ठिर ८० श्वदृतौक्षीरमासक्तंब्रह्मवाद्वृषलेयथा ॥ सत्यंस्तेनेबलंनार्योराज्यंदुर्योधनेतथा ८१ इतिलोकेनिर्वचनंपुरश्चरतिभारत ॥ अपिचैताःस्त्रियोबालाःस्वाध्यायमधिकुर्वते ८२ इमामवस्थांचगतेसहास्माभिररिंदम ॥ हंतनष्टाःस्मसर्वेवैभवतोपद्रवेसति ८३ सभवान्रथमास्थायसर्वोपकरणान्वितम् ॥ त्वरमाणोऽभिनिर्यातुविप्रेभ्योऽर्थविभावकः ८४ वाचयित्वाद्विजश्रेष्ठानद्यैवगजसाह्वयम् ॥ अस्त्रविद्भिःपरिवृतोभ्रातृभिर्दृढधन्विभिः ८५ आशीविषसमैर्वीरैर्मरुद्भिरिववृत्रहा ॥ अमित्रांस्तेजसामृद्नन्नसुरानिववृत्रहा ॥ श्रियमादत्स्वकौंतेयधार्तराष्ट्रान्महाबल ८६ नहिगांडीवमुक्तानांशराणांगार्ध्रवाससाम् ॥ स्पर्शमाशीविषाभानांमर्त्यःकश्चनसंसहेत् ८७ नसवीरोनमातंगोनचसोऽश्वोऽस्तिभारत ॥ यःसहेतगदावेगंममक्रुद्धस्यसंयुगे ८८ सृंजयैःसहकैकेयैर्वृष्णीनांवृषभेणच ॥ कथंस्विद्युधिकौंतेयनराज्यंप्राप्नुयामहे ८९ शत्रुहस्तगतांराजन्कथंस्विन्नाहरेर्महीम् ॥ इहयत्नमुपाहृत्यबलेनमहताऽन्वितः ९० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जु०भीमवाक्येत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ वैशंपायनउवाच ॥ सएवमुक्तस्तुमहानुभावःसत्यव्रतोभीमसेनेनराजा ॥ अजातशत्रुस्तदनंतरंवैधैर्यान्वितोवाक्यमिदंबभाषे १ ॥ युधिष्ठिरउवाच ॥ असंशयंभारतसत्यमेतद्यन्मांतुदन्वाक्यशल्यैःक्षिणोषि ॥ नत्वांविगर्हेप्रतिकूलमेतन्ममानयाद्धिव्यसनंवआगात् २

प्रदातृं । तुमुन्ण्वुलौक्रियायांक्रियार्थायामितिण्वुल् ८४ वाचयित्वाआशीर्वादान् ८५ धार्त्तराष्ट्रादितिच्छेदः ८६ गार्ध्रवाससांगृध्रपक्षमयपुंखवतां संसहेत सम्यक्सहेत ८७ । ८८ सृंजयादिभिःसहायैः स्विदितिविस्मयेनाशिरश्चालने ८९ उपाहृत्यआलंब्य ९० ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ सएवमिति १ एवमम ममैव वोयुष्मान् २

अन्वपद्यमनुसृतवान् जिहीर्षन्हर्तुमिच्छन् शठः कूटपाशकर्तृत्वात् कितवो द्यूतकारः ३ प्रवपन्पातयन् अक्षपूगान्पाशसमूहान् वृजिनं दुःखदं व्यसनं ४ कामानुकूलानिच्छानुकूलान् अयुजोविषमान् युजःसमान् शक्यमिति यःपुरुषस्य धैर्यंहन्यात् समन्युर्दीनामविष्यत्तद्दात्मामनोनियंतुंशक्यमभविष्यदित्यध्याहृत्ययोज्यं परस्यानुकूलानक्षान्दृष्ट्वा मन्युवशान्मम द्यूतोपरमेबुद्धिर्नासीदित्यर्थः ५ । ६ । ७ । ८ समा वर्षाणि अथा परंवर्षं ९ अवभोत्स्यंतेज्ञास्यंति १० नोइतिनिपातः वितस्तादिपंचनद्युपलक्षितं देशः ११ सर्वेशतमविश्रांतरः सराजादुर्योधनः १२

अहंह्यक्षानन्वपद्यंजिहीर्षन्राज्यंसराष्ट्रंधृतराष्ट्रस्यपुत्रात् ॥ तन्मांशठःकितवःप्रत्यदेवीत्सुयोधनार्थंसुबलस्यपुत्रः ३ महामायःशकुनिःपार्वतीयःसभामध्येप्रवपन्नक्षपूगान् ॥ अमायिनंमाययाप्रत्यजैषीत्ततोऽपश्यंवृजिनंभीमसेन ४ अक्षांश्चदृष्ट्वाशकुनेर्यथावत्कामानुकूलानयुजोयुजश्च ॥ शक्यंनियंतुमभविष्यदात्मामन्युस्तुहन्यात्पुरुषस्यधैर्यम् ५ यंतुंनात्माशक्यतेपौरुषेणमानेनवीर्येणचतातनद्धः ॥ नतेवाचोभीमसेनाभ्यसूयेमन्येतथातद्भवितव्यमासीत् ६ सनोराजाधृतराष्ट्रस्यपुत्रोन्यपातयद्व्यसनेराज्यमिच्छन् ॥ दास्यंचनोऽगमयद्भीमसेनयत्राभवच्छरणंद्रौपदीनः ७ त्वंचापितद्वेत्थधनंजयश्चपुनर्द्यूतायागतांस्त्वांसभानः ॥ यन्मांब्रवीद्धृतराष्ट्रस्यपुत्रएकग्लहार्थंभरतानांसमक्षम् ८ वनेसमाद्वादशराजपुत्रयथाकामंविदितमजातशत्रो ॥ अथापरंचाविदितश्चरेथाःसर्वैःसहभ्रातृभिश्छद्मगूढः ९ त्वांचेच्छ्रुत्वाताततथाचरंतमवभोत्स्यंतेभारतानांचराश्च ॥ अन्यांश्चरेथास्तावतोऽब्दांस्तथात्वंनिश्चित्यतत्प्रतिजानीहिपार्थ १० चरैश्चेन्नोविदितःकालमेतंयुक्तोराजन्मोहयित्वामदीयान् ॥ ब्रवीमिसत्यंकुरुसंसदीहतवैवताभारतपंचनद्यः ११ वयंचैतद्भारतसर्वएवत्वयाजिताःकालमपास्यभोगान् ॥ वसेमइत्याहपुरासराजामध्येकुरूणांसमयोक्तस्तथेति १२ तत्रद्यूतमभवन्नोजघन्यंतस्मिन्नजिताःप्रव्रजिताश्चसर्वे ॥ इत्थंतुदेशाननुसंचरामोवनानिकृच्छ्राणिचकृच्छ्ररूपाः १३ सुयोधनश्चापिनशांतिमिच्छन्भूयःसमन्योर्वशमन्वगच्छत् ॥ उद्योजयामासकुरूंश्चसर्वान्येचास्यकेचिद्वशमन्वगच्छन् १४ तंसंधिमास्थायसतांसकाशेकोनामजह्यादिहराज्यहेतोः ॥ आर्यस्यमन्येमरणाद्गरीयोयद्धर्ममुत्क्रम्यमहींप्रशासेत् १५ तदैवचेद्वीरकर्माकरिष्योयदाद्यूतेपरिघंपर्यमृक्षः ॥ बाहूदिधक्षन्वारितःफाल्गुनेनकिंदुष्कृतंभीमतदाऽभविष्यत् १६ प्रागेवचैवंसमयःक्रियायाःकिंनाब्रवीःपौरुषमाविदानः ॥ प्राप्तंतुकालंत्वभिपद्यपश्चात्किंमामिदानीमतिवेलमात्थ १७ भूयोऽपिदुःखंममभीमसेनदूयेविषस्येवरसंहिपीत्वा ॥ यद्याज्ञसेनींपरिक्लिश्यमानांसंदृश्यतत्क्षांतमितिस्मभीम १८ नत्वद्यशक्यंभरतप्रवीरकृत्वायदुक्तंकुरुवीरमध्ये ॥ कालंप्रतीक्षस्वसुखोदयस्यपक्तिंफलानामिवबीजवापः १९

नोऽस्माकंजघन्यंनीचं कृच्छ्ररूपाःक्लिष्टरूपाः १३ शांतिमिच्छन्अनिच्छन् उद्योजयामासोत्कर्षेणस्वेच्छयातेषुतेषुदुर्गदेशादिपालनकार्येष्विष्टान्योजितवान् १४ । १५ पर्यमृक्षःपरामृष्टवान् सिदिधक्षन्दग्धुमिच्छन् १६ समयक्रियातःप्रागेवचेदिदमब्रवीस्तर्हि किंदुष्कृतमभविष्यन्नकिमपीत्यर्थः आविदानोजानन् प्राप्तंकालंकालतुल्यांविपदमभिपद्य स्वीकृत्य अतिवेलमतिशयेन १७ भूयोऽपिबद्धपि दूयेउपतप्ये १८ यदुक्तं यांप्रतिज्ञांकृत्वा बीजवापःकृषीवलः १९

पूर्वंनिकृतोवंचितः वैरंवैरिसमूहं सपुष्पंसफलंविदित्वापुष्टतरंज्ञात्वा यदायदिनिकृंतेच्छिद्यात् तदाहिप्रसिद्धं महागुणंमहान्तंगुणंहरत्याहरति २० । २१ अमृतात्देवभावात्कलांषोडशभाग २२॥इत्यारण्यकेपर्वणिनलकंठीयेभारतभावदीपे चतुस्त्रिंशोऽध्यायः॥३४ ॥ संधिमितिपतत्त्रिणाबाणवच्छीघ्रगामिना प्राणहरेणवा स्रोतसानित्यवाहिना १ प्रत्यक्षंप्रत्यक्षेणज्ञातंकालबंधनःकालवश्यः फेनधर्मानिःसारः फलधर्मापतनशीलः २ सूच्येवांजनचूर्णस्य यथाकज्जलक्षोदस्यातिश्लक्ष्णस्य सूक्ष्माग्रयासूच्याऽपिकिंचिदपचीयते एवंनिमेषादपियस्यायुरपचीयते सकिमित्यवधिंप्रतिपालयेन्नकथमपीत्यध्याहृत्ययोज्यं । 'चूर्णःक्षोदेक्षारभेदे'इति विश्वः शून्येवेतिपाठेऽपिसएवार्थः श्वयतेप्रविशतीतिशूनः स्थूलसूची 'सूवा' इति प्रसिद्धः अल्पःशूनःशूनीतयेति योगात्

यदाहिपूर्वंनिकृतोनिकृंतेद्वैरंसपुष्पंसफलंविदित्वा ॥ महागुणंहरतिहिपौरुषेणतदावीरोजीवतिजीवलोके २० श्रियंचलोकेलभतेसमग्रांमन्येचास्मैशत्रवःसन्नमंते॥ मित्राणिचैनमचिराद्भजंतेदेवाइवेंद्रमुपजीवंतिचैनम् २१ ममप्रतिज्ञांचनिबोधसत्यांवृणेधर्मममृताज्जीविताच्च ॥ राज्यंचपुत्राश्चयशोधनंचसर्वंनसत्यस्यकलामुपैति २२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जु०युधिष्ठिरवाक्येचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ भीमसेनउवाच ॥ संधिंकृत्वैवकालेनह्यंतकेनपतत्रिणा ॥ अनंतेनाप्रमेयेणस्रोतसासर्वहारिणा १ प्रत्यक्षंमन्यसेकालंमर्त्यःसन्कालबंधनः ॥ फेनधर्मामहाराजफलधर्मातथैवच २ निमिषादपिकौंतेययस्यायुरपचीयते ॥ सूच्येवांजनचूर्णस्यकिमितिप्रतिपालयेत् ३ योनूनममितायुःस्यादथवाऽपिप्रमाणवित् ॥ सकालंवैप्रतीक्षेतसर्वप्रत्यक्षदर्शिवान् ४ प्रतीक्ष्यमाणःकालोनःसमाराजंस्त्रयोदश ॥ आयुषोऽपचयंकृत्वामरणायोपनेष्यति ५ शरीरिणांहिमरणंशरीरेनित्यमाश्रितम् ॥ प्रागेवमरणात्तस्माद्राज्यायैवघटामहे ६ योनयातिप्रसंख्यानमस्पष्टोभूमिवर्धनः ॥ आयातयित्वावैराणिसोऽवसीदतिगौरिव ७ योनयातयतेवैरमल्पसत्त्वोद्यमःपुमान् ॥ अफलंजन्मतस्याहंमन्येदुर्जातजायिनः ८ हैरण्यौभवतोबाहूश्रुतिर्भवतिपार्थिवी ॥ हत्वाद्विषंतंसंग्रामेभुंक्ष्वबाहुजितंवसु ९ हत्वावैपुरुषोराजन्निकर्तारमरिंदम ॥ अह्नायनरकंगच्छेत्स्वर्गेणास्यससंमितः १० अमर्षजोहिसंतापःपावकाद्दीप्तिमत्तरः ॥ येनाहमभिसंतप्तोननक्तंनदिवाशये ११ अयंचपार्थोबीभत्सुर्वरिष्ठोज्याविकर्षणे ॥ आस्तेपरमसंतप्तोनूनंसिंहइवाशये १२ योऽयमेकोऽभिमनुतेसर्वान्लोकेधनुर्भृतः ॥ सोऽयमात्मजमूष्माणंमहाहस्तीवयच्छति १३ नकुलःसहदेवश्चवृद्धामाताचवीरसूः ॥ तवैवप्रियमिच्छंतआसतेजडमूकवत् १४

पूर्णस्येत्यपपाठः ३ प्रमाणविदायुःप्रमाणज्ञः ४।५ । ६ यातिप्राप्नोति प्रसंख्यानं प्रकृष्टांसाधुकीर्तिं यतोऽस्पष्टःशौर्याद्यभावादितरैरविदितः भूमिवर्धनो भूमिहिंसकः भूमेर्भारभूतइत्यर्थःअयातयित्वाअनिस्तीर्यगौर्बलीवर्दइव सोऽप्यशक्तश्चेत्गोषुसंख्यानंस्पष्टतांवाऽप्यप्राप्नुवन्भूमेर्भारभूतो भवति ७ दुर्जातजायिनोकुजन्मभाजः ८ हैरण्यौहिरण्यस्वामिनौ श्रुतिःकीर्तिःपार्थिवीपृथ्योराज्ञइवेत्यर्थः ९ निकर्तारंवंचकं अह्नायसद्यः सनरकमापद्‌ १० । ११ आशयेस्वस्थाने १२ अभिमनुते हिनस्ति । 'यदिवेममभिमंस्येकनीयोऽन्नंकरिष्ये'इतिबृहदारण्यकादावभिपूर्वस्य मन्यतेर्हिंसार्थत्वदृष्टेः इमंमयमजंसूक्ष्मं बीजभूतमितिश्रुतिपदस्यार्थः आत्मजं चित्तजमूष्माणंतापं १३ । १४

प्रतिविंध्यतः प्रतिविंध्यस्यमाताद्रौपदी १५ । १६ । १७ घृणाविष्टःकथंसत्यंत्यजेयमितिलज्जयाव्याप्तः आनृशंस्यादयालुत्वात् १८ मंदकस्यकुत्सितमंदस्यअनुवाको गुरूक्तिमनुवचनंतेन हता अर्थज्ञानशून्यस्य वेदाक्षरमात्राभ्यासिनः १९ घृणीदयालुः जायया:जातोऽसि २० । २१ आस्सेतूष्णींभूतोऽसि पीठसर्पवदजगरवत् २२ अज्ञातवासस्यदुष्करत्वमाह तृणानामिति २३

सर्वेतेप्रियमिच्छंतिबांधवाःसहसृंजयैः ॥ अहमेकश्चसंतप्तोमाताचप्रातिविंध्यतः १५ प्रियमेवतुसर्वेषांयद्ब्रवीम्युतकिंचन ॥ सर्वेहिव्यसनंप्राप्ताःसर्वेयुद्धाभिनंदिनः १६ नातःपापीयसीकाचिदापद्राजन्भविष्यति ॥ यन्नोनीचैरल्पबलैराज्यमाच्छिद्यभुज्यते १७ शीलदोषाद्घृणाविष्टआनृशंस्यात्परंतप ॥ क्लेशांस्तितिक्षसेराजन्नान्यःकश्चित्प्रशंसति १८ श्रोत्रियस्येवतेराजन्मंदकस्याविपश्चितः ॥ अनुवाकहताबुद्धिर्नैषातत्त्वार्थदर्शिनी १९ घृणीब्राह्मणरूपोऽसिकथंक्षत्रेभुजायथाः ॥ अस्यांहियोनौजायंतेप्रायशःक्रूरबुद्धयः २० अश्रौषीस्त्वंराजधर्मान्यथावैमनुरब्रवीत् ॥ क्रूरान्निकृतिसंपन्नान्विहितानशमात्मकान् २१ धार्तराष्ट्रान्महाराजक्षमसेकिंदुरात्मनः ॥ कर्तव्येपुरुषव्याघ्रकिमास्सेपीठसर्पवत् २२ बुद्ध्यावीर्येणसंयुक्तःश्रुतेनाभिजनेनच ॥ तृणानांमुष्टिनैकेनहिमवंतंचपर्वतम् २३ छन्नमिच्छसिकौंतेययोऽस्मान्संवर्तुमिच्छसि ॥ अज्ञातचर्यागूढेनपृथिव्यांविश्रुतेनच २४ दिवीवपार्थसूर्येणनशक्याचरितुंत्वया ॥ बृहच्छालइवानूपेशाखापुष्पपलाशवान् २५ हस्तीश्वेतइवाज्ञातःकथंजिष्णुश्चरिष्यति ॥ इमौचसिंहसंकाशौभ्रातरौसहितौशिशू २६ नकुलःसहदेवश्चकथंपार्थचरिष्यतः ॥ पुण्यकीर्तीराजपुत्रीद्रौपदीवीरसूरियम् २७ विश्रुताकथमज्ञाताकृष्णापार्थचरिष्यति ॥ मांचापिराजन्जानंतिह्याकुमारमिमाःप्रजाः २८ नाज्ञातचर्यांपश्यामिमेरोरिवनिगूहनम् ॥ तथैवबहवोऽस्माभीराष्ट्रेभ्योविप्रवासिताः २९ राजानोराजपुत्राश्चधृतराष्ट्रमनुव्रताः ॥ नहितेऽप्युपशाम्यंतिनिकृतावानिराकृताः ३० अवश्यंतैर्निकर्तव्यमस्माकंतत्प्रियैषिभिः ॥ तेऽप्यस्मासुप्रयुंजीरन्प्रच्छन्नान्सुबहूंश्चरान् ॥ आचक्षीरंश्चनोज्ञात्वाततःस्यात्सुमहद्भयम् ३१ अस्माभिरुषिताःसम्यग्वनेमासास्त्रयोदश ॥ परिमाणेनतान्पश्यतावतःपरिवत्सरान् ३२ अस्तिमासःप्रतिनिधिर्यथाप्राहुर्मनीषिणः ॥ पूतिकानिवसोमस्यतथेदंक्रियतामिति ३३ अथवाऽनडुहेराजन्साधवेसाधुवाहिने ॥ सौहित्यदानादेतस्मादेनसःप्रतिमुच्यते ३४ तस्माच्छत्रुवधेराजन्क्रियतांनिश्चयस्त्वया ॥ क्षत्रियस्यहिसर्वस्यनान्योधर्मोऽस्तिसंयुगात् ३५ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिभीमवाक्येपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥

संवर्तुंसंवरीतुंछादितुं २४ अनूपेबहुजलेदेशे २५ । २६ । २७ । २८ । २९ । ३० निकर्तव्यंनीचसूचनादिकर्मकर्तव्यं ३१ । ३२ 'योमासःससंवत्सरः' इतिश्रुतेर्मासःप्रतिनिधिःसंवत्सरस्यास्ति । 'सोमाभावेपूतिकानभिषुणुयात्'इतिश्रुतेःपूतिकाःसोमस्यप्रतिनिधयः ३३ 'अनडुहे पूर्णघासमुपाहृत्यानृतान्मुच्यते' इतिधर्मशास्त्रोक्तं प्रायश्चित्तंवाकर्तव्यमित्याहाथवेति सौहित्यमातृप्तिभोजनंतस्यदानात् एतस्मात् मिथ्यावादकृतादेनसः पापात् ३४ । ३५ ॥ ॥ इत्यारण्यकेपर्वणि नैलकंठीयेभारतभावदीपे पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥

भीमसेनेति १ आयत्यामुत्तरकाले तदात्वेवर्तमानकाले यस्तान्पश्यति २ जानमानोजानन् । भ्रम्विकरणत्वमार्षं ३ इतिकृत्यतामितिकर्तव्यतां अपदांतरमविलंबितं ४ समादत्स्वांगीकुरु ५ व्यथंते व्यथयंति ६ सुमंत्रितेशोभनमंत्रे क्रियमाणेसति सुविक्रांतेउत्कर्षेणोपस्थिते सुकृतेपुण्यकर्मणिसुविचारितेनिश्चितेसति चकारोयद्यर्थे ७ बलंशारीरंसामर्थ्यं दर्पोगर्वस्ताभ्या

वैशंपायनउवाच ॥ ॥ भीमसेनवचःश्रुत्वाकुंतीपुत्रोयुधिष्ठिरः ॥ निःश्वस्यपुरुषव्याघ्रःसंप्रदध्यौपरंतपः १ श्रुतामेराजधर्माश्चवर्णानांचविनिश्चयाः ॥ आयत्यांचतदात्वेचयःपश्यतिसपश्यति २ धर्मस्यजानमानोऽहंगतिमग्र्यांसुदुर्विदाम् ॥ कथंबलात्करिष्यामिमेरोरिवविमर्दनम् ३ समुहूर्तमिवध्यात्वाविनिश्चित्येतिकृत्यताम् ॥ भीमसेनमिदंवाक्यमपदांतरमब्रवीत् ४ युधिष्ठिरउवाच ॥ एवमेतन्महाबाहोयथावदसिभारत ॥ इदमन्यत्समादत्स्ववाक्यंमेवाक्यकोविद ५ महापापानिकर्माणियानिकेवलसाहसात् ॥ आरभ्यंतेभीमसेनव्यथतेतानिमारत ६ सुमंत्रितेसुविक्रांतेसुकृतेसुविचारिते ॥ सिध्यंत्यर्थामहाबाहोदैवंचात्रप्रदक्षिणम् ७ यत्तुकेवलचापल्याद्बलदर्पोत्थितःस्वयम् ॥ आरब्धव्यमिदंकार्यंमन्यसेशृणुतत्रमे ८ भूरिश्रवाःशलश्चैवजलसंधश्चवीर्यवान् ॥ भीष्मोद्रोणश्चकर्णश्चद्रोणपुत्रश्चवीर्यवान् ९ धार्तराष्ट्रादुराधर्षादुर्योधनपुरोगमाः ॥ सर्वएवकृतास्त्राश्चसततंचाततायिनः १० राजानःपार्थिवाश्चैवयेऽस्माभिरुपतापिताः ॥ संश्रिताःकौरवंपक्षंजातस्नेहाश्चतंप्रति ११ दुर्योधनहितेयुक्तानतथाऽस्मासुभारत ॥ पूर्णकोशाबलोपेताःप्रयतिष्यंतिसंगरे १२ सर्वेकौरवसैन्यस्यसपुत्रामात्यसैनिकाः संविभक्ताहिमात्राभिर्भोगैरपिचसर्वशः १३ दुर्योधनेनतेवीरामानिताश्चविशेषतः ॥ प्राणांस्त्यक्ष्यंतिसंग्रामेइतिमेनिश्चितामतिः १४ समायद्यपिभीष्मस्यवृत्तिरस्मासुतेषुच ॥ द्रोणस्यचमहाबाहोकृपस्यचमहात्मनः १५ अवश्यंराजपिंडस्तैर्निर्वेश्यइतिमेमतिः ॥ तस्मात्त्यक्ष्यंतिसंग्रामेप्राणानपिसुदुस्त्यजान् १६ सर्वेदिव्यास्त्रविद्वांसःसर्वेधर्मपरायणाः ॥ अजेयाश्चेतिमेबुद्धिरपिदेवैःसवासवैः १७ अमर्षीनित्यसंरब्धस्तत्रकर्णोमहारथः ॥ सर्वास्त्रविदनाधृष्योह्यभेद्यकवचावृतः १८ अनिर्जित्यरणेसर्वानेतान्पुरुषसत्तमान् ॥ अशक्योह्यसहायेनहंतुंदुर्योधनस्त्वया १९ ननिद्रामधिगच्छामिचिंतयानोवृकोदर ॥ अतिसर्वान्धनुर्ग्राहान्सूतपुत्रस्यलाघवम् २० ॥ वैशंपायनउवाच ॥ एतद्वचनमाज्ञायभीमसेनोऽत्यमर्षणः ॥ बभूवविमनास्त्रस्तोनचैवोवाचकिंचन २१ तयोःसंवदतोरेवंतदापांडवयोर्द्वयोः ॥ आजगाममहायोगीव्यासःसत्यवतीसुतः २२ सोऽभिगम्ययथान्यायंपांडवैःप्रतिपूजितः ॥ युधिष्ठिरमिदंवाक्यमुवाचवदतांवरः २३ ॥ व्यासउवाच ।. युधिष्ठिरमहाबाहोवेद्मितेहृदयस्थितम् ॥ मनीषयाततःक्षिप्रमागतोऽस्मिनरर्षभ २४ भीष्माद्रोणात्कृपात्कर्णाद्द्रोणपुत्राच्चभारत ॥ दुर्योधनान्नृपसुतात्तथादुःशासनादपि २५

मुत्थितःप्रवृत्तः ८ । ९ । १० ११ । १२ सैन्यस्यसैन्यसंबंधिनः सर्वेमात्राभिरंशपरिच्छेदैः १३ । १४ । १५ राजपिंडोराजदत्तोग्रासो निर्वेश्यआनृण्यार्थं शोधनीयः १६ । १७ । १८ । १९ लाघवंशीघ्रताम् २० । २१ । २२ । २३ । २४ । २५

२६ । २७ । २८ । २९ । ३० साधयिष्यातिराज्यं ३१ । ३२ । ३३ । ३४ । ३५ । ३६ उपयोगोव्ययः वीरुध·प्रतानवत्यःऔषध्यःफलपाकांताः ३७ । ३८ अनुज्ञायपृष्ट्वा ३९ ब्रह्ममंत्रं ४० ४१ । ४२ । ४३ । ४४ । ४५ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषट्त्रिंशोऽध्यायः ॥ ३६ ॥ कस्यचित्कस्मिंश्चित् १ । २ वनवासं द्रौपदीवियोगं । 'गृहिणीगृहमुच्यते'इतिस्मृ

यत्तेभयममित्रघ्नहृदिसंपरिवर्त्तते ॥ तत्तेऽहंनाशयिष्यामिविधिदृष्टेनकर्मणा २६ तच्छ्रुत्वाधृतिमास्थायकर्मणाप्रतिपादय ॥ प्रतिपाद्यतुराजेंद्रततःक्षिप्रंज्वरं
जहि २७ ततएकांतमुन्नीयपाराशर्योयुधिष्ठिरम् ॥ अब्रवीदुपपन्नार्थमिदंवाक्यविशारदः २८ श्रेयसस्तेपरःकालःप्राप्तोभरतसत्तम ॥ येनाभिभविताशत्रून्
रणेपार्थोधनुर्द्धरः २९ गृहाणेमांमयाप्रोक्तांसिद्धिंमूर्तिमतीमिव ॥ विद्यांप्रतिस्मृतिंनामप्रपन्नायब्रवीमिते ३० यामवाप्यमहाबाहुरर्जुनःसाधयिष्यति ॥ अस्त्र
हेतोर्महेंद्रंचरुद्रंचैवाभिगच्छतु ३१ वरुणंचकुबेरंचधर्मराजंचपांडव ॥ शक्तोह्येषसुरान्द्रष्टुंतपसाविक्रमेणच ३२ ऋषिरेषमहातेजानारायणसहायवान् ॥ पु
राणःशाश्वतोदेवस्त्वजेयोजिष्णुरच्युतः ३३ अस्त्राणींद्राच्चरुद्राच्चलोकपालेभ्यएवच ॥ समादायमहाबाहुर्महत्कर्मकरिष्यति ३४ वनादस्माच्चकौंतेयवनमन्य
द्विचिंत्यताम् ॥ निवासार्थाययद्युक्तंभवेद्वःपृथिवीपते ३५ एकत्रचिरवासोहिनप्रीतिजननोभवेत् ॥ तापसानांचसर्वेषांभवेदुद्वेगकारकः ३६ मृगाणामुपयोग
श्ववीरुदौषधिसंशयः ॥ बिभर्षिचबहून्विप्रान्वेदवेदांगपारगान् ३७ ॥ वैशंपायनउवाच ॥ एवमुक्त्वाप्रपन्नायशुचयेभगवान्प्रभुः ॥ प्रोवाचलोकतत्त्वज्ञोयोगी
विद्यामनुत्तमाम् ३८ धर्मराजायधीमान्सव्यासःसत्यवतीसुतः ॥ अनुज्ञायचकौंतेयंतत्रैवांतरधीयत ३९ युधिष्ठिरस्तुधर्मात्मातद्ब्रह्ममनसायतः ॥ धारया
मासमेधावीकालेकालेसदाऽभ्यसन् ४० सव्यासवाक्यमुदितोवनाद्द्वैतवनात्ततः ॥ ययौसरस्वतीकूलेकाम्यकंनामकाननम् ४१ तमन्वयुर्महाराजशिक्षाक्षरवि
शारदाः ॥ ब्राह्मणास्तपसायुक्तादेवेंद्रमृषयोयथा ४२ ततःकाम्यकमासाद्यपुनस्तेभरतर्षभ ॥ न्यविशंतमहात्मानःसामात्याःसपरिच्छदाः ४३ तत्रतेन्यव
सन्राजन्किंचित्कालंमनस्विनः ॥ धनुर्वेदपरावीराःशृण्वंतोवेदमुत्तमम् ४४ चरंतोमृगयांनित्यंशुद्धैर्बाणैर्मृगार्थिनः॥ पितृदैवतविप्रेभ्योनिर्वपंतोयथाविधि ४५
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुना०काम्यकवनगमनेषट्त्रिंशोऽध्यायः ॥ ३६ ॥ वैशंपायनउवाच ॥ कस्यचित्त्वथकालस्यधर्मराजोयुधिष्ठिरः ॥
संस्मृत्यमुनिसंदेशमिदंवचनमब्रवीत् १ विविक्तेविदितप्रज्ञमर्जुनंपुरुषर्षभ ॥ सांत्वपूर्वंस्मितंकृत्वापाणिनापरिसंस्पृशन् २ समुहूर्तमिवध्यात्वावनवासमरिंद
मः ॥ धनंजयंधर्मराजोरहसीदमुवाचह ३ ॥ युधिष्ठिरउवाच ॥ भीष्मेद्रोणेकृपेकर्णेद्रोणपुत्रेचभारत ॥ धनुर्वेदश्चतुष्पादएतेष्वद्यप्रतिष्ठितः ४ दैवंब्राह्मंमानुषं
चसयत्नंसचिकित्सितम् ॥ सर्वास्त्राणांप्रयोगंचअभिजानंतिकृत्स्नशः ५

तेः ३ चतुष्पादः आदानसंधानविसर्गसंहाराश्चत्वारःपादा यस्य ४ दैवमिंद्रवरुणाद्यस्त्रं ब्राह्मं ब्रह्मास्त्रं मानुषं धनुर्बाणादि यत्नो ग्रहणधारणप्रयोगरूपः चिकित्सापरप्रयुक्ताना मेषांप्रतीकारः एवंतेसर्वास्त्राणांप्रयोगममितःसाकल्येनजानंति ५

गुरुवत्गुरुष्विव ६ शांतिदोषपरिहारंकर्तुं व्यवहरंतियतंते ७ शक्तिसामर्थ्यंनहापयिष्यंतित्याजयिष्यंत्यपितुउद्दीपयिष्यंति ८ । ९ उपनिषत्रहस्यविद्यां १० । ११ प्रतिपालयप्राप्नुहि
१२ मार्गनददत्अददत् १३ बलंसर्वास्त्ररूपं १४ ततःशक्रात् १५ दीक्षितःस्वीकृतव्रतः अध्यापयत विद्ययायोजितवान् १६ अनुजज्ञे गमनायानुज्ञातवान् १७ । १८ । १९ । २० । २१

तेसर्वेधृतराष्ट्रस्यपुत्रेणपरिसांत्विताः ॥ संविभक्ताश्चतुष्टाश्चगुरुवत्तेषुवर्त्तते ६ दर्शनेषुचैवास्यसदाप्रीतिरनुत्तमा ॥ आचार्यामानितास्तुष्टाःशांतिंव्यवहरं
त्युत ७ शक्तिंनहापयिष्यंतितेकालेप्रतिपूजिताः ॥ अद्यचेयंमहीकृत्स्नादुर्योधनवशानुगा ८ सग्रामनगरापार्थससागरवनाकरा ॥ भवानेवप्रियोऽस्माकंत्वयि
भारःसमाहितः ९ अत्रकृत्यंप्रपश्यामिप्राप्तकालमरिंदम ॥ कृष्णद्वैपायनात्तातगृहीतोपनिषन्मया १० तयाप्रयुक्तयासम्यक्जगत्सर्वंप्रकाशते ॥ तेनत्वंब्र
ह्मणाताततसंयुक्तःसुसमाहितः ११ देवतानांयथाकालंप्रसादंप्रतिपालय ॥ तपसायोजयात्मानमुग्रेणभरतर्षभ १२ धनुष्मान्कवचीखड्गीमुनिःसाधुव्रतेस्थितः॥
नकस्यचिद्ददन्मार्गंगच्छतातोत्तरांदिशम् १३ इंद्रेह्यस्त्राणिदिव्यानिसमस्तानिधनंजय ॥ वृत्राद्भीतैर्बलंदेवैस्तदाशक्रेसमर्पितम् १४ तान्येकस्थानिसर्वाणि
ततस्त्वंप्रतिपत्स्यसे ॥ शक्रमेवप्रपद्यस्वसतेऽस्त्राणिप्रदास्यति १५ दीक्षितोऽद्यैवगच्छत्वंद्रष्टुंदेवंपुरंदरम् ॥ वैशंपायनउवाच ॥ एवमुक्त्वाधर्मराजस्तमध्या
पयतप्रभुः १६ दीक्षितंविधिनाऽतेनधृतवाक्कायमानसम् ॥ अनुजज्ञेतदावीरंभ्राताभ्रातरमग्रजः १७ निदेशाद्धर्मराजस्यद्रष्टुकामःपुरंदरम् ॥ धनुर्गांडीवमा
दायतथाऽक्षय्येमहेषुधी १८ कवचीसतलत्राणोबद्धगोधांगुलित्रवान् ॥ हुत्वाग्निंब्राह्मणान्निष्कैःस्वस्तिवाच्यमहाभुजः १९ प्रातिष्ठतमहाबाहुःप्रगृहीतशरास
नः ॥ वधायधार्त्तराष्ट्राणांनिःश्वस्योर्ध्वमुदीक्ष्यच २० तंदृष्ट्वातत्रकौंतेयंप्रगृहीतशरासनम् ॥ अब्रुवन्ब्राह्मणाःसिद्धाभूतान्यंतर्हितानिच २१ क्षिप्रमाप्नुहि
कौंतेयमनसायद्यदिच्छसि ॥ अब्रुवन्ब्राह्मणाःपार्थमितिकृत्वाजयाशिषः २२ संसाधयस्वकौंतेयध्रुवोऽस्तुविजयस्तव ॥ तंतथाप्रस्थितंवीरंशालस्कंधोरुमर्जुनम्
२३ मनांस्यादायसर्वेषांकृष्णावचनमब्रवीत् ॥ कृष्णोवाच ॥ यत्तेकुंतीमहाबाहोजातस्यैच्छद्धनंजय २४ तत्तेऽस्तुसर्वंकौंतेययथाचत्वयमिच्छसि ॥ माऽ
स्माकंक्षत्रियकुलेजन्मकाश्चिदवाप्नुयात् २५ ब्राह्मणेभ्योनमोनित्यंयेषांभैक्ष्येणजीविका ॥ इदंमेपरमंदुःखंयःसपापःसुयोधनः २६ दृष्ट्वामांगौरितिप्राहप्रहसन्
राजसंसदि ॥ तस्माद्दुःखादिदंदुःखंगरीयइतिमेमतिः २७ यत्तत्परिषदोमध्येबह्वयुक्तमभाषत ॥ नूनंतेभ्रातरःसर्वेत्वत्कथाभिःप्रजागरे २८ रंस्यंतेवीरकर्मा
णिकथयंतःपुनःपुनः ॥ नैवनःपार्थभोगेषुनधनेनोतजीविते २९ तुष्टिर्बुद्धिर्भवित्रीवात्वयिदीर्घप्रवासिनि ॥ त्वयिनःपार्थसर्वेषांसुखदुःखेसमाहिते ३० जीवितं
मरणंचैवराज्यमैश्वर्यमेवच ॥ आपृष्टोमेऽसिकौंतेयस्वस्तिप्राप्नुहिभारत ३१

इतिवक्ष्यमाणमब्रुवन् २२ । २३ यत्मंगलं तेतव २४।२५।२६ गौरितिबहुपुरुषभोग्येत्युपहासः २७ अभाषतशत्रुर्यंतस्माद्दुःखादिदंत्वद्वियोगजमितिपूर्वेणसंबंधः २८ । २९ । ३० । ३१

३२ तवत्वाम् ३३ ज्येष्ठापचायीज्येष्ठपूजनशीलः । ज्येष्ठोपचायीतिपाठे ज्येष्ठवृद्धिकरणशीलः ३४ । ३५ । ३६ । ३७ शुष्मिणोबलिनः । शुष्ममितिबलनामेतियास्कः ३८ । ३९ । ४०

बलवाद्भिर्विरुद्धंनकार्यमेतत्त्वयाऽनघ ॥ प्रयाह्यविघ्नेनैवाशुविजयायमहाबल ॥ नमोधात्रेविधात्रेचस्वस्तिगच्छह्यनामयम् ३२ ह्रीःश्रीःकीर्तिर्धुतिःपुष्टिरुमा लक्ष्मीःसरस्वती ॥ इमावैतवपांथस्यपालयंतुधनंजय ३३ ज्येष्ठापचापीज्येष्ठस्यभ्रातुर्वचनकारकः ॥ प्रपद्येऽहंवसून्रुद्रानादित्यान्समरुद्गणान् ३४ विश्वेदेवां स्तथासाध्याञ्शांत्यर्थंभरतर्षभ ॥ स्वस्तितेऽस्त्वांतरिक्षेभ्यःपार्थिवेभ्यश्चभारत ३५ दिव्येभ्यश्चैवभूतेभ्योयेचान्येपरिपंथिनः ॥ वैशंपायनउवाच ॥ एवमुक्त्वाऽ शिषःकृष्णाविररामयशस्विनी ३६ ततःप्रदक्षिणंकृत्वाभ्रातॄन्धौम्यंचपांडवः ॥ प्रातिष्ठतमहाबाहुःप्रगृह्यरुचिरंधनुः ३७ तस्यमार्गादपाक्रामन्सर्वभूतानिग च्छतः ॥ युक्तस्यैंद्रेणयोगेनपराक्रांतस्यशुष्मिणः ३८ सोऽगच्छत्पर्वतांस्तातततपोधननिषेवितान् ॥ दिव्यंहैमवतंपुण्यंदेवजुष्टंपरंतपः ३९ अगच्छत्पर्वतं पुण्यमेकाह्नैवमहामनाः ॥ मनोजवगतिर्भूत्वायोगयुक्तोयथाऽनिलः ४० हिमवंतमतिक्रम्यगंधमादनमेवच ॥ अत्यक्रामत्सदुर्गाणिदिवारात्रमतंद्रितः ४१ इं द्रकीलंसमासाद्यततोऽतिष्ठद्धनंजयः ॥ अंतरिक्षेऽतिशुश्रावतिष्ठेतिसवचस्तदा ४२ तच्छ्रुत्वासर्वतोदृष्टिंचारयामासपांडवः ॥ अथापश्यत्सव्यसाचीवृक्षमूले तपस्विनम् ४३ ब्राह्मयाश्रियादीप्यमानंपिंगलंजटिलंकृशम् ॥ सोऽब्रवीदर्जुनंतत्रस्थितंदृष्ट्वामहातपाः ४४ कस्त्वंतातेहसंप्राप्तोधनुष्मान्कवचीशरी ॥ निबद्धासि तलत्राणःक्षत्रधर्ममनुव्रतः ४५ नेहशस्त्रेणकर्तव्यंशांतानामेषआलयः ॥ विनीतक्रोधहर्षाणांब्राह्मणानांतपस्विनाम् ४६ नेहास्तिधनुषाकार्यंनसंग्रामोऽत्रकर्हिचि त् ॥ निक्षिपैतद्धनुस्तातप्राप्तोऽसिपरमांगतिम् ४७ ओजसातेजसावीरयथानान्यःपुमान्क्वचित् ॥ तथाहसन्निवाभीक्ष्णंब्राह्मणोऽर्जुनमब्रवीत् ॥ नचैनंचाल यामासधैर्यात्सुधृतनिश्चयम् ४८ तमुवाचततःप्रीतःसद्विजःप्रहसन्निव ॥ वरंवृणीष्वभद्रंतेशक्रोऽहमरिसूदन ४९ एवमुक्तःसहस्राक्षंप्रत्युवाचधनंजयः ॥ प्रां जलिःप्रणतोभूत्वाशूरःकुरुकुलोद्वहः ५० ईप्सितोह्येषवैकामोवरंचैनंप्रयच्छमे ॥ त्वत्तोऽद्यभगवन्नस्त्रंकृत्स्नमिच्छामिवेदितुम् ५१ प्रत्युवाचमहेंद्रस्तंप्रीतात्माप्रहस न्निव ॥ इहप्राप्तस्यकिंकार्यमस्त्रैस्तवधनंजय ५२ कामान्वृणीष्वलोकांस्त्वंप्राप्तोऽसिपरमांगतिम् ॥ एवमुक्तःप्रत्युवाचसहस्राक्षंधनंजयः ५३ नलोभान्नपुनःकामान्न देवत्वंपुनःसुखम् ॥ नचसर्वामरैश्वर्यंकामयेत्रिदशाधिप ५४ भ्रातॄंस्तान्विपिनेत्यक्त्वावैरमप्रतियात्यच ॥ अकीर्तिंसर्वलोकेषुगच्छेयंशाश्वतीःसमाः ५५ एवमुक्तःप्रत्यु वाचवृत्रहापांडुनंदनम् ॥ सांत्वयन्श्लक्ष्णयावाचासर्वलोकनमस्कृतः ५६ यदाद्रक्ष्यसि [illegible] त्र्यक्षंशूलधरंशिवम् ॥ तदादातास्मितेतातदिव्यान्यस्त्राणिसर्वशः ५७ ॥३६॥

४१ । ४२ । ४३ । ४४ । ४५ । विनीतौजितौक्रोधहर्षौयैः ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ कामान्काम्यंतइतिव्युत्पत्त्या इष्टान् लोकान्भोगान् ५३ नलोभान्नपुनःकामोदिति नशब्दौवाशब्दार्थौ लोभाद्वाकामाद्वेत्यर्थः ५४ अप्रतियात्यानिस्तीर्य एतेन ज्येष्ठभ्रात्रादिसेवनमैंद्रपदप्राप्तावपि नोपेक्षणीयमित्युक्तम् ५५ । ५६ । ५७

५८ । ५९ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ भगवन्निति १ । २ । ३ । ४ । ५ दैन्यहर्षातिविस्मयात् दैन्यंनाशभयात् हर्षो महादेवप्रतिभटत्वात् वि

क्रियतांदर्शनेयत्नोदेवस्यपरमेष्ठिनः ॥ दर्शनात्तस्यकौंतेयसंसिद्धःस्वर्गमेष्यसि ५८ इत्युक्त्वाफाल्गुनंशक्रोजगामादर्शनंपुनः ॥ अर्जुनोऽप्यथतत्रैवतस्थौयो गसमन्वितः ॥ ५९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिअर्जुनाभिगमनपर्वणिइंद्रदर्शनेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ समाप्तंचार्जुनाभिगमनपर्व ॥ अथकैरा तपर्व ॥ जनमेजयउवाच ॥ भगवन्श्रोतुमिच्छामिपार्थस्याक्लिष्टकर्मणः ॥ विस्तरेणकथामेतांयथास्त्राण्युपलब्धवान् १ यथाचपुरुषव्याघ्रोदीर्घबाहुर्धनंज यः ॥ वनंप्रविष्टस्तेजस्वीनिर्मनुष्यमभीतवत् २ किंचतेनकृतंतत्रवसताब्रह्मवित्तम ॥ कथंचभगवान्स्थाणुर्देवराजश्चतोषितः ३ एतदिच्छाम्यहंश्रोतुंत्वत्प्र सादाद्विजोत्तम ॥ त्वंहिसर्वज्ञदिव्यंचमानुषंचैववेत्थह ४ अत्यद्भुततमंब्रह्मन्रोमहर्षणमर्जुनः ॥ भवेनसहसंग्रामंचकाराप्रतिमंकिल ५ पुराप्रहरतांश्रेष्ठःसंग्रामे ष्वपराजितः ॥ यच्छ्रुत्वानरसिंहानांदैन्यहर्षातिविस्मयात् ६ शूराणामपिपार्थानांहृदयानिचकंपिरे ॥ यद्यच्चकृतवानन्यत्पार्थस्तदखिलंवद ७ नह्यस्यानिं दितंजिष्णोःसुसूक्ष्ममपिलक्षये ॥ चरितंतस्यशूरस्यतन्मेसर्वंप्रकीर्तय ८ ॥ वैशंपायनउवाच ॥ कथयिष्यामितेतातकथामेतांमहात्मनः ॥ दिव्यांपौरवशा र्दूलमहतीमद्भुतोपमाम् ९ गात्रसंस्पर्शसंबद्धांत्र्यंबकेणसहानघ ॥ पार्थस्यदेवदेवेनशृणुसम्यक्समागमम् १० युधिष्ठिरनियोगात्सजगामामितविक्रमः ॥ शक्रं सुरेश्वरंद्रष्टुंदेवदेवंचशंकरम् ११ दिव्यंतद्धनुरादायखड्गंचकनकत्सरुम् ॥ महाबलोमहाबाहुरर्जुनःकार्यसिद्धये १२ दिशंह्युदीचींकौरव्योहिमवच्छिखरंप्रति ॥ ऐंद्रिःस्थिरमनाराजन्सर्वलोकमहारथः १३ त्वरयापरयायुक्तस्तपसेधृतनिश्चयः ॥ वनंकंटकितंघोरमेकएवान्वपद्यत १४ नानापुष्पफलोपेतंनानापक्षिनि षेवितम् ॥ नानामृगगणाकीर्णंसिद्धचारणसेवितम् १५ ततःप्रयातेकौंतेयेवनंमानुषवर्जितम् ॥ शंखानांपटहानांचशब्दःसमभवद्दिवि १६ पुष्पवर्षंचानुमह न्निपपातमहीतले ॥ मेघजालंचविततंछादयामाससर्वतः १७ सोऽतीत्यवनदुर्गाणिसन्निकर्षेमहागिरेः ॥ शुशुभेहिमवत्पृष्ठेवसमानोऽर्जुनस्तदा १८ तत्रापश्य द्द्रुमान्फुल्लान्विहगैर्वल्गुनादितान् ॥ नदीश्चविपुलावर्तावैदूर्यविमलप्रभाः १९ हंसकारंडवोद्गीताःसारसाभिरुतास्तथा ॥ पुंस्कोकिलरुताश्चैवक्रौंचबर्हिणना दिताः २० मनोहरवनोपेतास्तस्मिन्नतिरथोऽर्जुनः ॥ पुण्यशीतामलजलाःपश्यन्प्रीतमनाऽभवत् २१ रमणीयेवनोद्देशेरममाणोऽर्जुनस्तदा ॥ तपस्युग्रेवर्त मानउग्रतेजामहामनाः २२ दर्भचीरंनिवस्याथदंडाजिनविभूषितः ॥ शीर्णंचपतितंभूमौपर्णंसमुपयुक्तवान् २३

स्मयस्तत्प्रसादेनालौकिकसामर्थ्यलाभात् ६ । ७ । ८ । ९ । १० । ११ कनकत्सरुंस्वर्णमुष्टिं १२ ऐंद्रिरर्जुनः १३ कंटकितंकंटकाक्रांतं १४ । १५ । १६ । १७ । १८ वल्गुमधुरं १९ । २० २१ । २२ दर्भचीरंतृणमयंवासः निवस्यपरिधाय समुपयुक्तवान् भुक्तवान् २३

द्विगुणेनषड्रात्रेणात्ययादतिवाहितवान् २४ । २५ निरालंबोनिराश्रयः २६ । २७ । २८ । २९ धूमाययन्धूमवतीरिवकुर्वन् ३० । ३१ । ३२ संकल्पंमनोरथं ३३ । ३४ । ३५ इत्यारण्यके

पूर्णेपूर्णेत्रिरात्रेतुमासमेकंफलाशनः ॥ द्विगुणेनहिकालेनद्वितीयंमासमत्ययात् २४ तृतीयमपिमासंसपक्षेणाहारमाचरन् ॥ चतुर्थेऽत्वथसंप्राप्तेमासेभरतसत्त
मः २५ वायुभक्षोमहाबाहुरभवत्पांडुनंदनः ॥ ऊर्ध्वबाहुर्निरालंबःपदांऽगुष्ठाग्रधिष्ठितः २६ सदोपस्पर्शनाच्चास्यबभूवुरमितौजसः ॥ विद्युदंभोरुहनिभाजटा
स्तस्यमहात्मनः २७ ततोमहर्षयःसर्वेजग्मुर्देवंपिनाकिनम् ॥ निवेदयिषवःपार्थंतपस्युग्रेसमास्थितम् २८ तंप्रणम्यमहादेवंशशंसुःपार्थकर्मतत् ॥ एषपार्थो
महातेजाहिमवत्पृष्ठमास्थितः २९ उग्रेतपसिदुष्पारेस्थितोधूमाययन्दिशः ॥ तस्यदेवेशनवयंविद्मःसर्वेचिकीर्षितम् ३० संतापयतिनःसर्वान्सौसाधुनिवार्य
ताम् ॥ तेषांतद्वचनंश्रुत्वामुनीनांभावितात्मनाम् ३१ उमापतिर्भूतपतिर्वाक्यमेतदुवाचह ॥ महादेवउवाच ॥ नवोविषादःकर्तव्यःफाल्गुनंप्रतिसर्वशः ३२
शीघ्रंगच्छतसंहृष्टायथागतमतंद्रिताः ॥ अहमस्यविजानामिसंकल्पंमनसिस्थितम् ३३ नास्यस्वर्गस्पृहाकाचिन्नैश्वर्यस्यतथाऽऽयुषः ॥ यत्तस्यकांक्षितंसर्वं
तत्करिष्येऽहमद्यवै ३४ ॥ वैशंपायनउवाच ॥ तच्छ्रुत्वाशर्ववचनमृषयःसत्यवादिनः ॥ प्रहृष्टमनसोजग्मुर्यथास्वान्पुनरालयान् ३५ ॥ इतिश्रीमहाभारतेआर
ण्यकेपर्वणिकैरातप०मुनिशंकरसंवादेअष्टत्रिंशोऽध्यायः ॥ ३८ ॥ वैशंपायनउवाच ॥ गतेषुतेषुसर्वेषुतपस्विषुमहात्मसु ॥ पिनाकपाणिर्भगवान्सर्वपापहरोहरः
१ कैरातंवेषमास्थायकांचनद्रुमसन्निभम् ॥ विभ्राजमानोविपुलोगिरिर्मेरुरिवापरः २ श्रीमद्धनुरुपादायशरांश्चाशीविषोपमान् ॥ निष्पपातमहावेगोदहनोदे
हवानिव ३ देव्यासहोमयाश्रीमान्समानव्रतवेषया ॥ नानावेषधरैर्हृष्टैर्भूतैरनुगतस्तदा ४ किरातवेषसंछन्नःस्त्रीभिश्चापिसहस्रशः ॥ अशोभततदाराजन्
सदेशोऽतीवभारत ५ क्षणेनतद्वनंसर्वंनिःशब्दमभवत्तदा ॥ नादःप्रस्रवणानांचपक्षिणांचाप्युपारमत् ६ ससन्निकर्षमागम्यपार्थस्याक्लिष्टकर्मणः ॥ मूकंनाम
दनोःपुत्रंददर्शाद्भुतदर्शनम् ७ वाराहंरूपमास्थायतर्कयंतमिवार्जुनम् ॥ हंतुंपरंदीप्यमानंतमुवाचाथफाल्गुनः ८ गांडीवंधनुरादायशरांश्चाशीविषोपमान् ॥
सज्यंधनुर्वरंकृत्वाज्याघोषेणनिनादयन् ९ यन्मांप्रार्थयसेहंतुमनागसमिहागतम् ॥ तस्मात्त्वांपूर्वमेवाहंनेताऽद्ययमसादनम् १० दृष्ट्वातंप्रहरिष्यंतंफाल्गुनं
दृढधन्विनम् ॥ किरातरूपीसहसावारयामासशंकरः ११ मयैषप्रार्थितःपूर्वमिंद्रकीलसमप्रभः ॥ अनादृत्यचतद्वाक्यंप्रजहाराथफाल्गुनः १२ किरातश्चसमं
तस्मिन्नेकलक्ष्येमहाद्युतिः ॥ प्रमुमोचाशनिप्रख्यंशरमग्निशिखोपमम् १३ तौमुक्तौसायकौताभ्यांसमंतत्रनिपेततुः ॥ मूकस्यगात्रेविस्तीर्णेशैलसंहननेतदा १४

पर्वणिनैलकंठीयेभारतभावदीपेअष्टत्रिंशोऽध्यायः ॥ ३८ ॥ गतेष्विति १ । २ । ३ भूतैःप्रमथाख्यैःस्वपार्षदैः ४ । ५ । ६ । ७ अर्जुनंहंतुंतर्कयंतमिच्छंतं क्रोधेनदीप्यमानमिव ८ । ९ नेता नेष्यामि १० । ११ इंद्रकीलोमहेंद्रमणिमयःपर्वतः १२ सममेककालं १३ शैलसंहननेशैलवद्दृढे १४

अशनिर्मेघजंवज्रं वज्रमिंद्रप्रहरणं संनिपातोयोगः १५ सदानवःराक्षसमिव १६ । १७ । १८ । १९ अभिपन्नः परिगृहीतः कामाद्यदृच्छातः परिभवान्ममाभिभवाय २० । २१ । २२ मत्कृते
यथाऽशनेर्विनिर्घोषोवज्रस्येवचपर्वते ॥ तथातयोःसन्निपातःशरयोरभवत्तदा १५ सविद्धोबहुभिर्बाणैर्दीप्तास्यैःपन्नगैरिव ॥ ममाररक्षसंरूपंभूयःकृत्वाविभीष
णम् १६ सददर्शततोजिष्णुःपुरुषंकांचनप्रभम् ॥ किरातवेषसंछन्नंस्त्रीसहायममित्रहा १७ तमब्रवीत्प्रीतमनाःकौंतेयःप्रहसन्निव ॥ कोभवानटतेशून्येवनेस्त्री
गणसंवृतः १८ नत्वमस्मिन्वनेघोरेबिभेषिकनकप्रभ ॥ किमर्थंचत्वयाविद्धोवराहोमत्परिग्रहः १९ मयाऽभिपन्नःपूर्वंहिराक्षसोऽयमिहागतः ॥ कामात्परिभवा
द्वापिनमेजीवन्विमोक्ष्यसे २० नह्येषमृगयाधर्मोयस्त्वयाऽद्यकृतोमयि ॥ तेनत्वांभ्रंशयिष्यामिजीवितात्पर्वताश्रयम् २१ इत्युक्तःपांडवेयेनकिरातःप्रहसन्नि
व ॥ उवाचश्लक्ष्णयावाचापांडवंसव्यसाचिनम् २२ नमत्कृतेत्वयावीरभीःकार्यावनमंतिकात् ॥ इयंभूमिःसदाऽस्माकमुचितावसतांवने २३ त्वयातुदुष्करः
कस्मादिहवासःप्ररोचितः ॥ वयंतुबहुसत्त्वेऽस्मिन्निवसामस्तपोधन २४ भवांस्तुकृष्णवर्त्माभःसुकुमारःसुखोचितः ॥ कथंशून्यमिमंदेशमेकाकीविचरिष्य
ति २५ ॥ अर्जुनउवाच ॥ गांडीवमाश्रयंकृत्वानाराचांश्चाग्निसन्निभान् ॥ निवसामिमहारण्येद्वितीयइवपावकिः २६ एषचापिमयाजंतुर्मृगरूपंसमाश्रितः ॥
राक्षसोनिहतोघोरोहंतुंमामिहचागतः २७ ॥ किरातउवाच ॥ मयैषधन्वनिर्मुक्तैस्ताडितःपूर्वमेवहि ॥ बाणैरभिहतःशेतेनीतश्चयमसादनम् २८ ममैषल
क्ष्यभूतोहिममपूर्वपरिग्रहः ॥ ममैवचप्रहारेणजीविताद्व्यपरोपितः २९ दोषान्स्वान्नार्हसेऽन्यस्मैवक्तुंस्वबलदर्पितः ॥ अवलिप्तोऽसिमंदात्मन्नमेजीवन्विमोक्ष्य
से ३० स्थिरोभवस्वमोक्ष्यामिसायकानशनीनिव ॥ घटस्वपरयाशक्त्यामुंचत्वमपिसायकान् ३१ तस्यतद्वचनंश्रुत्वाकिरातस्यार्जुनस्तदा ॥ रोषमाहारया
मासताडयामासचेषुभिः ३२ ततोहृष्टेनमनसाप्रतिजग्राहसायकान् ॥ भूयोभूयइतिप्राहमंदमंदेत्युवाचह ३३ प्रहरस्वशरानेतान्नाराचान्मर्मभेदिनः ॥ इत्यु
क्तोबाणवर्षंससुमोचसहसाऽर्जुनः ३४ ततस्तौतत्रसंरब्धौराजमानौमुहुर्मुहुः ॥ शरैराशीविषाकारैस्ततक्षातेपरस्परम् ३५ ततोऽर्जुनःशरवर्षंकिरातेसमवासृ
जत् ॥ तत्प्रसन्नेनमनसाप्रतिजग्राहशंकरः ३६ मुहूर्तंशरवर्षंतत्प्रतिगृह्यपिनाकधृक् ॥ अक्षतेनशरीरेणतस्थौगिरिरिवाचलः ३७ सदृष्ट्वाबाणवर्षंतुमोघीभूतं
धनंजयः ॥ परमंविस्मयंचक्रेसाधुसाध्वितिचाब्रवीत् ३८ अहोऽयंसुकुमारांगोहिमवच्छिखराश्रयः ॥ गांडीवमुक्तान्नाराचान्प्रतिगृह्णात्यविह्वलः ३९ कोऽयं
देवोभवेत्साक्षाद्रुद्रोयक्षःसुरोऽसुरः ॥ विद्यतेहिगिरिश्रेष्ठेत्रिदशानांसमागमः ४० नहिमद्बाणजालानामुत्सृष्टानांसहस्रशः ॥ शक्तोऽन्यःसहितुंवेगमृतेदेवंपिना
किनम् ४१ देवोवायदिवायक्षोरुद्रादन्योव्यवस्थितः ॥ अहमेनंशरैस्तीक्ष्णैर्नयामियमसादनम् ४२

मन्निमित्तं वनमंतिकाद्वनस्यसमीपे २३ प्ररोचितःस्वीकृतः २४ । २५ पावकिःस्वामीकार्तिकेयः २६ । २७ । २८ । २९ दोषान्मृगयाधर्मातिक्रमरूपान् ३० स्थिरःसन्नभवस्वप्राप्नुहि ३१ ३२ । ३३ । नाराचान्शरजातिभेदान् ३४ । ३५ । ३६ । ३७ । ३८ अहोयमितिसंधिरार्षः ३९ । ४० सहितुंसोढुं ऋतेविना ४१ । ४२

४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ संप्रयुद्धःसम्यक्प्रयुद्धंप्रहृतंप्रहारोयस्यसः ५० । ५१ असक्तमकुंठितं ५२ पफालविशीर्णः ५३ । ५४ धूमंक्रोधावेशेन ५५ । ५६ । ५७ । ५८

ततोहृष्टमनाजिष्णुर्नाराचान्मर्मभेदिनः ॥ व्यसृजच्छतधाराजन्मयूखानिवभास्करः ४३ तान्प्रसन्नेनमनसाभगवान्लोकभावनः ॥ शूलपाणिःप्रत्यगृह्णात्
॥३८॥ शिलावर्षमिवाचलः ४४ क्षणेनक्षीणबाणोऽथसंवृत्तःफाल्गुनस्तदा ॥ भीश्चैनमाविशत्तीव्रातंदृष्ट्वाशरसंक्षयम् ४५ चिंतयामासजिष्णुस्तुभगवंतंहुताशनम् ॥
पुरस्तादक्षयौदत्तौतूणौयेनास्यखांडवे ४६ किंनुमोक्ष्यामिधनुषायन्मेबाणाःक्षयंगताः ॥ अयंचपुरुषःकोऽपिबाणान्ग्रसतिसर्वशः ४७ हत्वाचैनंधनुष्कोट्या
शूलाग्रेणेवकुंजरम् ॥ नयामिदंडधारस्ययमस्यसदनंप्रति ४८ प्रगृह्याथधनुष्कोट्याज्यापाशेनावकृष्यच ॥ मुष्टिभिश्चापिहतवान्वज्रकल्पैर्महाद्युतिः ४९ सं ॥३९॥
प्रयुद्धोधनुष्कोट्याकौंतेयःपरवीरहा ॥ तदप्यस्यधनुर्दिव्यंजग्राहगिरिगोचरः ५० ततोऽर्जुनोग्रस्तधनुःखड्गपाणिरतिष्ठत ॥ युद्धस्यांतमभीप्सन्वैवेगेनाभि
जगामतम् ५१ तस्यमूर्ध्निशितंखड्गमसक्तंपर्वतेष्वपि ॥ मुमोचभुजवीर्येणविक्रम्यकुरुनंदनः ५२ तस्यमूर्धानमासाद्यपफालाशिवरोऽसिः ॥ ततोवृक्षैःशिला
भिश्चयोधयामासफाल्गुनः ५३ तदावृक्षान्महाकायःप्रत्यगृह्णादथोशिलाः ॥ किरातरूपीभगवांस्ततःपार्थोमहाबलः ५४ मुष्टिभिर्वज्रसंकाशैर्धूममुत्पादयन्मु
खे ॥ प्रजहारदुराधर्षेकिरातसमरूपिणि ५५ ततःशक्राशनिसमैर्मुष्टिभिर्भृशदारुणैः ॥ किरातरूपीभगवानर्दयामासफाल्गुनम् ५६ ततश्चटचटाशब्दःसुघो
रःसमपद्यत ॥ पांडवस्यचमुष्टीनांकिरातस्यचयुध्यतः ५७ सुमुहूर्तंतुतद्युद्धमभवल्लोमहर्षणम् ॥ भुजप्रहारसंयुक्तंवृत्रवासवयोरिव ५८ जघानाथततोजिष्णुः
किरातमुरसाबली ॥ पाण्डवंचविचेष्टंतंकिरातोऽप्यहनद्बली ५९ तयोर्भुजविनिष्पेषात्संघर्षेणोरसोस्तथा ॥ समजायतगात्रेषुपावकोंऽगारधूमवान् ६० तत
एनंमहादेवःपीडयन्गात्रैःसुपीडितम् ॥ तेजसाव्यक्रमद्रोषाच्चेतस्तस्यविमोहयन् ६१ ततोऽभिपीडितैर्गात्रैःपिंडीकृतइवाबभौ ॥ फाल्गुनोगात्रसंरुद्धोदेवदेवे
नभारत ६२ निरुच्छ्वासोऽभवच्चैवसन्निरुद्धोमहात्मना ॥ पपातभूम्यांनिश्चेष्टोगतसत्वइवाभवत् ६३ समुहूर्तंतथाभूत्वासचेताःपुनरुत्थितः ॥ रुधिरेणाप्लुतां
गस्तुपांडवोभृशदुःखितः ६४ शरण्यंशरणंगत्वाभगवंतंपिनाकिनम् ॥ मृन्मयंस्थंडिलंकृत्वामाल्येनापूजयद्भवम् ६५ तच्चमाल्यंतदापार्थःकिरातशिरसिस्थि
तम् ॥ अपश्यत्पांडवश्रेष्ठोहर्षेणप्रकृतिंगतः ६६ पपातपादयोस्तस्यततःप्रीतोऽभवद्भवः ॥ उवाचचैनंवचसामेघगंभीरगीर्हरः ॥ जातविस्मयमालोक्यततः
क्षीणांगसंहतिम् ६७ ॥ भवउवाच ॥ भोभोफाल्गुनतुष्टोऽस्मिकर्मणाऽप्रतिमेनते ॥ शौर्येणानेनधृत्याचक्षत्रियोनास्तितेसमः ६८ समंतेजश्चवीर्यंचममाद्य ॥३८॥
तवचानघ ॥ प्रीतस्तेऽहंमहाबाहोपश्यमांभरतर्षभ ६९ ददामितेविशालाक्षचक्षुःपूर्वऋषिर्भवान् ॥ विजेष्यसिरणेशत्रूनपिसर्वान्दिवौकसः ७०

५९ । ६० पीडयनिर्पीडय ६१ गात्रेषुसंरुद्धश्वलनहीनः ६२ । ६३ । ६४ । ६५ प्रकृतिंस्वास्थ्यं ६६ । ६७ । ६८ । ६९ चक्षुर्दिव्यज्ञानं ७०

७१ । ७२ । ७३ कपर्दिन्नित्यादिनामानि शिवसहस्रनामव्याख्यायांव्याख्यास्यंते ७४ । ७५ । ७६ मीढुषेवर्षकाय ७७ मार्जालीयायकिरातायशुद्धदेहायवा । 'मार्जालीयःस्मृतःशूद्रेबिडाले

प्रीत्याचतेऽहंदास्यामियदस्त्रमनिवारितम् ॥ त्वंहिशक्तोमदीयंतदस्त्रंधारयितुंक्षणात् ७१ ॥ वैशंपायनउवाच ॥ ततोदेवंमहादेवंगिरिशंशूलपाणिनम् ॥ ददर्श
फाल्गुनस्तत्रसहदेव्यामहाद्युतिम् ७२ सजानुभ्यांमहींगत्वाशिरसाप्रणिपत्यच ॥ प्रसादयामासहरंपार्थःपरपुरंजयः ७३ ॥अर्जुनउवाच॥ कपर्दिन्सर्वदेवेशभग
नेत्रनिपातन ॥ देवदेवमहादेवनीलग्रीवजटाधर ७४ कारणानांचपरमंजानेत्वांत्र्यंबकंविभुम् ॥ देवानांचगतिंदेवंत्वत्प्रसूतमिदंजगत् ७५ अजेयस्त्वंत्रिभिर्लो
कैःसदेवासुरमानुषैः ॥ शिवायविष्णुरूपायविष्णवेशिवरूपिणे ७६ दक्षयज्ञविनाशायहरिरुद्रायवैनमः ॥ ललाटाक्षायशर्वायमीढुषेशूलपाणये ७७ पिनाकगो
प्त्रेसूर्यायमार्जालीयायवेधसे ॥ प्रसादयेत्वांभगवन्सर्वभूतमहेश्वर ७८ गणेशंजगतःशंभुंलोककारणकारणम् ॥ प्रधानपुरुषातीतंपरंसूक्ष्मतरंहरम् ७९ व्यति
क्रमंमेभगवन्क्षंतुमर्हसिशंकर ॥ भगवन्दर्शनाकांक्षीप्राप्तोऽस्मीमंमहागिरिम् ८० दयितंतवदेवेशतापसालयमुत्तमम् ॥ प्रसादयेत्वांभगवन्सर्वलोकनमस्कृतम्
८१ नमेस्यादपराधोऽयंमहादेवातिसाहसात् ॥ कृतोमयाऽयमज्ञानाद्विमर्दोयस्त्वयासह ॥ शरणंप्रतिपन्नायतत्क्षमस्वाद्यशंकर ८२ ॥ वैशंपायनउवाच ॥ त
मुवाचमहातेजाःप्रहस्यवृषभध्वजः ॥ प्रगृह्यरुचिरंबाहुंक्षांतमित्येवफाल्गुनम् ८३ परिष्वज्यचबाहुभ्यांप्रीतात्माभगवान्हरः ॥ पुनःपार्थंसांत्वपूर्वमुवाचवृषभ
ध्वजः ८४ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकैरातपर्वणिमहादेवस्तवेएकोनचत्वारिंशोऽध्यायः ३९ ॥ ॥ देवदेवउवाच ॥ नरस्त्वंपूर्वदेहेवैना
रायणसहायवान् ॥ बदर्यांतप्तवानुग्रंतपोवर्षायुतान्बहून् १ त्वयिवापरमंतेजोविष्णौवापुरुषोत्तमे ॥ युवाभ्यांपुरुषाग्र्याभ्यांतेजसाधार्यतेजगत् २ शक्राभिषे
केसुमहद्धनुर्जलदनिःस्वनम् ॥ प्रगृह्यदानवाःशस्तास्त्वयाकृष्णेनचप्रभो ३ तदेतदेवगांडीवंतवपार्थकरोचितम् ॥ मायामास्थाययद्ग्रस्तंमयापुरुषसत्तम ४
तूणौचाप्यक्षयौभूयस्तवपार्थयथोचितौ ॥ भविष्यतिशरीरंचनीरुजंकुरुनंदन ५ प्रीतिमानस्मितेपार्थभवान्सत्यपराक्रमः ॥ गृहाणवरमस्मत्तःकांक्षितंपुरुषो
त्तम ६ नत्वयापुरुषःकश्चित्पुमान्मर्त्येषुमानद ॥ दिविवावर्ततेक्षत्रंत्वत्प्रधानमरिंदम ७ ॥ अर्जुनउवाच ॥ भगवन्ददासिचेन्मह्यंकामंप्रीत्यावृषध्वज ॥ का
मयेदिव्यमस्त्रंतद्घोरंपाशुपतंप्रभो ८ यत्तद्ब्रह्मशिरोनामरौद्रंभीमपराक्रमम् ॥ युगांतेदारुणेप्राप्तेकृत्स्नंसंहरतेजगत् ९ कर्णभीष्मकृपद्रोणैर्भवितातुमहाहवः ॥
त्वत्प्रसादान्महादेवजयेयंतान्यथायुधि १० दहेयंयेनसंग्रामेदानवान्राक्षसांस्तथा ॥ भूतानिचपिशाचांश्चगंधर्वानथपन्नगान् ११ यस्मिन्शूलसहस्राणि
गदाश्चोग्रप्रदर्शनाः ॥ शराश्चाशीविषाकाराःसंभवंत्यनुमंत्रिते १२

कायशोधने'इतिविश्वः ७८ । ७९ । ८० । ८१ । ८२ । ८३ । ८४ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ नरस्त्वमिति १ । २ शस्तामारिताः ३ त्वयापुरुष इति पाठे सप्तमित्यध्याहारः ४ । ५ । ६ त्वत्प्रधानंत्वमेवश्रेष्ठोयस्मिन् क्षत्रे ७ कामंवरं ८ । ९ । १० । ११ । १२

१३ विनिर्वृत्तोविशेषेणकृतकृत्यः १४ संहारेनिवर्तने १५ । १६ । १७ मनसासंकल्पमात्रेणनिपातयेत् शत्रुं धनुषेतित्राणप्रयोगेण १८ अधीष्वाध्यापय १९ । २० उपतस्थेकर्मव्यतिहारेतङ्
पार्थोऽस्त्रंप्रत्युपनतएवमस्त्रंपार्थप्रतीत्यर्थः २१ । २२ निर्घाताउत्पाताः २३ । २४ । २५ । २६ वशीवशइच्छातद्वान् तज्जयीत्यर्थः २७ । २८ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपे

॥३१॥ युध्येयंयेनभीष्मेणद्रोणेनचकृपेणच ॥ सूतपुत्रेणचरणेनित्यंकटुकभाषिणा १३ एषमेप्रथमःकामोभगवन्भगनेत्रहन् ॥ त्वत्प्रसादाद्विनिर्वृत्तःसमर्थःस्यामहं
यथा १४ ॥ भवउवाच ॥ ददामितेऽस्त्रंदयितमहंपाशुपतंविभो ॥ समर्थोधारणेमोक्षेसंहारेचासिपांडव १५ नैतद्वेदमहेंद्रोऽपिनयमोनचयक्षराट् ॥ वरुणो
ऽप्यथवावायुःकुतोवेत्स्यंतिमानवाः १६ नत्वेतत्सहसापार्थमोक्तव्यंपुरुषेकचित् ॥ जगद्विनाशयेत्सर्वमल्पतेजसिपातितम् १७ अवध्योनामनास्त्यत्रत्रैलोक्ये
सचराचरे ॥ मनसाचक्षुषावाचाधनुषाचनिपातयेत् १८ ॥ वैशंपायनउवाच ॥ तच्छ्रुत्वात्वरितःपार्थःशुचिर्भूत्वासमाहितः ॥ उपसंगम्यविश्वेशमधीष्वेत्य
थसोऽब्रवीत् १९ ततस्त्वध्यापयामाससरहस्यनिवर्तनम् ॥ तदस्त्रंपांडवश्रेष्ठंमूर्तिमंतमिवांतकम् २० उपतस्थेचतत्पार्थंयथात्र्यक्षमुमापतिं ॥ प्रतिजग्राहतच्चा
पिप्रीतिमानर्जुनस्तदा २१ ततश्चचालपृथिवीसपर्वतवनद्रुमा ॥ ससागरवनोद्देशासग्रामनगराकरा २२ शंखदुंदुभिघोषाश्चभेरीणांचसहस्रशः ॥ तस्मिन्मु
हूर्तेसंप्राप्तेनिर्घाताश्चापतन्मुहुः २३ अथास्त्रंजाज्वलद्घोरंपांडवस्यामितौजसः ॥ मूर्तिमद्वैस्थितंपार्श्वेददृशुर्देवदानवाः २४ स्पृष्टस्यत्र्यंबकेणाथफाल्गुनस्या
मितौजसः ॥ यत्किंचिदशुभंदेहेतत्सर्वंनाशमीयिवत् २५ स्वर्गंगच्छेत्यनुज्ञातस्त्र्यंबकेणतदाऽर्जुनः ॥ प्रणम्यशिरसाराजन्प्रांजलिर्देवमैक्षत २६ ततःप्रभुस्त्रि
दिवनिवासिनांवशीमहामतिर्गिरिशउमापतिःशिवः ॥ धनुर्महद्दितिजपिशाचसूदनंददौभवःपुरुषवरायगांडिवम् २७ ततःशुभंगिरिवरमीश्वरस्तदासहोमया
सिततटसानुकंदरम् ॥ विहायतंपतगमहर्षिसेवितंजगामखंपुरुषवरस्यपश्यतः २८ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकैरा०शिवप्रस्थानेचत्वारिंशो
ऽध्यायः ॥ ४० ॥ वैशंपायनउवाच ॥ तस्यसंपश्यतस्त्वेवपिनाकीवृषभध्वजः ॥ जगामादर्शनंभानुर्लोकस्येवास्तमीयिवान् १ ततोऽर्जुनःपरंचक्रेविस्मयंपर
वीरहा ॥ मयासाक्षान्महादेवोदृष्टइत्येवभारत २ धन्योऽस्म्यनुगृहीतोऽस्मियन्मयात्र्यंबकोहरः ॥ पिनाकीवरदोरूपीदृष्टःस्पृष्टश्चपाणिना ३ कृतार्थंचावग
च्छामिपरमात्मानमाहवे ॥ शत्रूंश्चविजितान्सर्वान्निर्वृत्तंचप्रयोजनम् ४ इत्येवंचिंतयानस्यपार्थस्यामिततेजसः ॥ ततोवैदूर्यवर्णाभोभासयन्सर्वतोदि
शः ॥ यादोगणवृतःश्रीमानाजगामजलेश्वरः ५ नागैर्नदैर्नदीभिश्चदैत्यैःसाध्यैश्चदैवतैः ॥ वरुणोयादसांभर्त्तावशीतंदेशमागमत् ६ अथजांबूनदवपुर्विमा
नेनमहार्चिषा ॥ कुबेरःसमनुप्राप्तोयक्षैरनुगतःप्रभुः ७ विद्योतयन्निवाकाशमद्भुतोपमदर्शनः ॥ धनानामीश्वरःश्रीमानर्जुनंद्रष्टुमागतः ८ ॥३१॥

चत्वारिंशोऽध्यायः ॥ ४० ॥ तस्येति अस्तंस्वस्थानमदर्शनंच १ । २ । ३ परमत्यंतंकृतार्थंकृतकृत्यं निवृत्तंनिष्पन्नं ४ वैदूर्यरत्नविशेषःयादांसिजलजंतवस्तेषांगणः ५ नागैःसर्पैः६ । ७ । ८

९ । १० । ११ भानुमंतिदीप्तिमंति १२ । १३ । १४ । १५ । १६ वितरामोयच्छामः १७ । १८ संसाध्योजेतव्यः १९ । २० ममपितुःसूर्यस्य २१ । २२ । २३ मृधेसंग्रामे २४ लक्ष्मीमार

तथालोकांतकृच्छ्रीमान्यमःसाक्षात्प्रतापवान् ॥ मर्त्यमूर्तिधरैःसार्धंपितृभिर्लोकभावनैः ९ दंडपाणिरचिंत्यात्मासर्वभूतविनाशकृत् ॥ वैवस्वतोधर्मराजोविमाने
नावभासयन् १० त्रीन्लोकान्गुह्यकांश्चैवगंधर्वांश्चसपन्नगान् ॥ द्वितीयइवमार्तंडोयुगांतेसमुपस्थिते ११ तेभानुमंतिचित्राणिशिखराणिमहागिरेः ॥ समा
स्थायार्जुनंतत्रददृशुस्तपसान्वितम् १२ ततोमुहूर्ताद्भगवानैरावतशिरोगतः ॥ आजगामसहेंद्राण्याशक्रःसुरगणैर्वृतः १३ पांडुरेणातपत्रेणाध्रियमाणेनमूर्द्ध
नि ॥ शुशुभेतारकाराजःसितमभ्रमिवस्थितः १४ संस्तूयमानोगंधर्वैर्ऋषिभिश्चतपोधनैः ॥ शृंगंगिरेःसमासाद्यतस्थौसूर्यइवोदितः १५ अथमेघस्वनोधीमा
न्व्याजहारशुभांगिरम् ॥ यमःपरमधर्मज्ञोदक्षिणांदिशमास्थितः १६ अर्जुनार्जुनपश्यास्मान्लोकपालान्समागतान् ॥ दृष्टिंतेवितरामोऽद्यभवानर्हतिदर्शनम्
१७ पूर्वर्षिरमितात्मात्वंनरोनाममहाबलः ॥ नियोगाद्ब्रह्मणस्तातमर्त्यतांसमुपागतः १८ त्वयाचवसुसंभूतोमहावीर्यःपितामहः ॥ भीष्मःपरमधर्मात्मासंसा
ध्यश्चरणेऽनघ १९ क्षत्रंचाग्निसमस्पर्शंभारद्वाजेनरक्षितम् ॥ दानवाश्चमहावीर्यायेमनुष्यत्वमागताः २० निवातकवचाश्चैवदानवाःकुरुनंदन ॥ पितुर्ममां
शोदेवस्यसर्वलोकप्रतापिनः २१ कर्णश्चसुमहावीर्यस्त्वयावध्योधनंजय ॥ अंशाश्चक्षितिसंप्राप्तादेवदानवरक्षसाम् २२ त्वयानिपातितायुद्धेस्वकर्मफलनिर्जि
ताम् ॥ गतिंप्राप्स्यंतिकौंतेययथास्वमरिकर्षण २३ अक्षयातवकीर्तिश्चलोकेस्थास्यतिफाल्गुन ॥ त्वयासाक्षान्महादेवस्तोषितोहिमहामृधे २४ लक्ष्मीवसु
मतीचापिकर्तव्याविष्णुनासह ॥ गृहाणास्त्रंमहाबाहोदंडमप्रतिवारणम् ॥ अनेनास्त्रेणसुमहत्त्वंहिकर्मकरिष्यसि २५ ॥ वैशंपायनउवाच ॥ प्रतिजग्राहतत्पा
र्थोविधिवत्कुरुनंदनः ॥ समंत्रंसोपचारंचसमोक्षविनिवर्तनम् २६ ततोजलधरश्यामोवरुणोयादसांपतिः ॥ पश्चिमांदिशमास्थायगिरमुच्चारयन्प्रभुः २७ पा
र्थक्षत्रियमुख्यस्त्वंक्षत्रधर्मेव्यवस्थितः ॥ पश्यमांपृथुताम्राक्षवरुणोऽस्मिजलेश्वरः २८ मयासमुद्यतान्पाशान्वारुणाननिवारितान् ॥ प्रतिगृह्णीष्वकौंतेयसर
हस्यनिवर्तनान् २९ एभिस्तदामयावीरसंग्रामेतारकामये ॥ दैतेयानांसहस्राणिसंयतानिमहात्मनाम् ३० तस्मादिमान्महासत्वमत्प्रसादसमुत्थितान् ॥ गृहा
१४ णनहितेमुच्येदंतकोऽप्याततायिनः ३१ अनेनत्वंयदाऽस्त्रेणसंग्रामेविचरिष्यसि ॥ तदानिःक्षत्रियाभूमिर्भविष्यतिनसंशयः ३२ ॥ ॥ वैशंपायनउवाच ॥
॥ ततःकैलासनिलयोधनाध्यक्षोऽभ्यभाषत ॥ दत्तेष्वस्त्रेषुदिव्येषुवरुणेनयमेनच ३३ प्रीतोऽहमपितेप्राज्ञपांडवेयमहाबल ॥ त्वयासहसमागम्यअजितेनत
थैवच ३४ सव्यसाचिन्महाबाहोपूर्वदेवसनातन ॥ सहास्माभिर्भवान्श्रांतःपुराकल्पेषुनित्यशः ३५

शून्या २५ सोपाचारंसेतिकर्तव्यताकं २६ । २७ । २८ । २९ संयतानिबद्धानि ३० । ३१ । ३२ । ३३ अजितेनकृष्णेनयथातथैवप्रीतोऽस्मि ३४ पूर्वदेव नरनारायणसख ३५

३६ । ३७ । ३८ । ३९ उद्यतमुपस्थितं ४० । ४१ देवगतिंदेवानांपरायणत्वं ४२ । ४३ आगंताआयास्यति ४४ । ४५ । ४६ । ४७ । ४८ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ गतेष्विति १ । २ पाटयन् द्विधाकुर्वन् ३ । ४ तुलागुडाभांडगोलकाःभांडानितु 'नालबंदूख'इत्यादिम्लेच्छभाषयाप्रसिद्धान्याग्नेयौषधबलेनपाषाणगोलका

दर्शनात्तेत्विदंदिव्यंप्रदिशामिनरर्षभ ॥ अमनुष्यान्महाबाहोदुर्जयानपिजेष्यसि ३६ मत्तश्चैवभवानाशुग्रहीत्वास्त्रमनुत्तमम् ॥ अनेनत्वमनीकानिवार्तराष्ट्रस्य धक्ष्यसि ३७ तदिदंप्रतिगृह्णीष्वअंतर्धानंप्रियंमम ॥ ओजस्तेजोद्युतिकरंप्रस्वापनमरातिनुत् ३८ महात्मनाशंकरेणात्रिपुरंनिहतंयदा ॥ तदैतदस्त्रंनिर्मुक्तंयेन दग्धामहासुराः ३९ त्वदर्थमुद्यतंचेदंमयासत्यपराक्रम ॥ त्वमर्होधारणेचास्यमेरुप्रतिमगौरव ४० ततोऽर्जुनोमहाबाहुर्विधिवत्कुरुनंदनः ॥ कौबेरमधिजग्राह दिव्यमस्त्रंमहाबलः ४१ ततोऽब्रवीद्देवराजःपार्थमक्लिष्टकारिणम् ॥ सांत्वयन्श्लक्ष्णयावाचामेघदुंदुभिनिःस्वनः ४२ कुंतीमातर्महाबाहोत्वमीशानःपुरातनः ॥ परांसिद्धिमनुप्राप्तःसाक्षाद्देवगतिंगतः ४३ देवकार्यंतुसुमहत्त्वयाकार्यमरिंदम ॥ आरोढव्यस्त्वयास्वर्गःसज्जीभवमहाद्युते ४४ रथोमातलिसंयुक्तआगंतात्वत्कृ तेमहीम् ॥ तत्रतेऽहंप्रदास्यामिदिव्यान्यस्त्राणिकौरव ४५ तान्दृष्ट्वालोकपालांस्तुसमेतान्गिरिमूर्धनि ॥ जगामविस्मयंधीमान्कुंतीपुत्रोधनंजयः ४६ ततोऽ र्जुनोमहातेजालोकपालान्समागतान् ॥ पूजयामासविधिवद्वाग्भिरद्भिःफलैरपि ४७ ततःप्रतिययुर्देवाःप्रतिमान्यधनंजयम् ॥ यथागतेनविबुधाःसर्वेकाममनो जवाः ४८ ततोऽर्जुनोमुदंलेभेलब्धास्त्रःपुरुषर्षभः ॥ कृतार्थमथचात्मानंसमेनेपूर्णमानसम् ४९ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकैरा०देवप्रस्थाने एकचत्वारिंशोऽध्यायः ४१ ॥ ॥ कैरातपर्वसमाप्तं ॥ अथेंद्रलोकाभिगमनपर्व ॥ ॥ वैशंपायनउवाच ॥ गतेषुलोकपालेषुपार्थःशत्रुनिबर्हणः ॥ चिंतया मासराजेंद्रदेवराजरथंप्रति १ ततश्चिंतयमानस्यगुडाकेशस्यधीमतः ॥ रथोमातलिसंयुक्तआजगाममहाप्रभः २ नभोवितिमिरंकुर्वन्जलदान्पाटयन्निव ॥ दि शःसंपूरयन्नादैर्महामेघरवोपमैः ३ असयःशक्तयोभीमागदाश्चोग्रप्रदर्शनाः ॥ दिव्यप्रभावाःप्रासाश्चविद्युतश्चमहाप्रभाः ४ तथैवाशनयश्चैवचक्रयुक्तास्तुलागुडाः ॥ वायु स्फोटाःसनिर्घातामहामेघस्वनास्तथा ५ तत्रनागामहाकायाज्वलितास्याःसुदारुणाः ॥ सिताभ्रकूटप्रतिमाःसंहताश्चतथोपलाः ६ दशवाजिसहस्राणिहरीणांवातरं हसाम् ॥ वहंतियंनेत्रमुषंदिव्यंमायामयंरथम् ७ तत्रापश्यन्महानीलंवैजयंतंमहाप्रभम् ॥ ध्वजमिंदीवरश्यामंवंशंकनकभूषणम् ८ तस्मिन्रथेस्थितंसूतंतप्तहेमविभूषि तम् ॥ दृष्ट्वापार्थोमहाबाहुर्देवमेवान्वतर्कयत् ९ तथातर्कयतस्तस्यफाल्गुनस्याथमातलिः ॥ सन्नतःप्रस्थितोभूत्वावाक्यमर्जुनमब्रवीत् १० ॥ मातलिरुवाच ॥ भोभोश क्रात्मजश्रीमन्शक्रस्त्वांद्रष्टुमिच्छति ॥ आरोहतुभवान्शीघ्रंरथमिंद्रस्यसंमतम् ११ आहमामपरश्रेष्ठःपितातवशतक्रतुः ॥ कुंतीसुतमिहप्राप्तंपश्यंतुत्रिदशालयाः १२

दिनिक्षेपपात्राणि वायुस्फोटाःवेगवशाद्वायुंजनयंतः सनिर्घाताअशनिध्वनियुक्ताश्चमहामेघस्वनाः ५ । ६ 'त्वक्केशवालरोमाणिसुवर्णाभानियस्यतु ॥ हरिःसवर्णतोऽश्वस्तुपीतकौशे यसंनिभः ।' वातरंहसांहरीणांवाजिनांसहस्राणीत्येकदेशान्वयः नेत्रमुषंदृष्टिचोरं ७ वैजयंतंनाम्नादेवेंद्रध्वजं ८ । ९ । १० । ११ । १२ ॥४०॥

१३ । १४ । १५ । १६ १७ । १८ येमे नियमितवान् १९ आप्लुतःस्नातः २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ ललितंक्रीडितं २८ । २९।३०।३१।३२।३३ विप्रकृष्टत्वाद्दूरत्वात्

एषशक्रःपरिवृतोदेवैर्ऋषिगणैस्तथा ॥ गंधर्वैरप्सरोभिश्चत्वांदिदृक्षुःप्रतीक्षते १३ अस्माल्लोकाद्देवलोकंपाकशासनशासनात् ॥ अरोहत्वंमयासार्धंलब्धास्त्रःपु नरेष्यसि १४ ॥ अर्जुनउवाच ॥ मातलेगच्छशीघ्रंत्वमारोहस्वरथोत्तमम् ॥ राजसूयाश्वमेधानांशतैरपिसुदुर्लभम् १५ पार्थिवैःसुमहाभागैर्यज्वभिर्भूरिदक्षि णैः ॥ दैवतैर्वासमारोढुंदानवैर्वारथोत्तमम् १६ नातप्ततपसाशक्यएषदिव्योमहारथः ॥ द्रष्टुंवाऽप्यथवास्प्रष्टुमारोढुंकुतएवच १७ त्वयिप्रतिष्ठितेसाधोरथस्थे स्थिरवाजिनि ॥ पश्चादहमथारोक्ष्येसुकृतीसत्पथंयथा १८ ॥ वैशंपायनउवाच ॥ तस्यतद्वचनंश्रुत्वामातलिःशक्रसारथिः ॥ आरुरोहरथंशीघ्रंहयान्ये मेचरश्मिभिः १९ ततोऽर्जुनोहृष्टमनागंगायामाप्लुतःशुचिः ॥ जजापजप्यंकौंतेयोविधिवत्कुरुनंदनः २० ततःपितॄन्यथान्यायंतर्पयित्वायथाविधि ॥ मंदरंशै लराजंतमाप्रष्टुमुपचक्रमे २१ साधूनांपुण्यशीलानांमुनीनांपुण्यकर्मणां ॥ त्वंसदासंश्रयःशैलस्वर्गमार्गाभिकांक्षिणाम् २२ त्वत्प्रसादात्सदाशैलब्राह्मणाःक्षत्रिया विशः ॥ स्वर्गंप्राप्ताश्चरंतिस्मदेवैःसहगतव्यथाः २३ अद्रिराजमहाशैलमुनिसंश्रयतीर्थवन् ॥ गच्छाम्यामंत्रयित्वात्वांसुखमस्म्युषितस्त्वयि २४ तवसानूनि कुंजाश्चनद्यःप्रस्रवणानिच ॥ तीर्थानिचसुपुण्यानिमयादृष्टान्यनेकशः २५ फलानिचसुगंधीनिभक्षितानिततस्ततः ॥ सुसुगंधाश्चवार्योघास्त्वच्छरीरविनिः सृताः २६ अमृतास्वादनीयामेपीताःप्रस्रवणोदकाः ॥ शिशुर्यथापितुरंकेसुसुखंवर्ततेनग २६ तथातवांकेललितंशैलराजमयाप्रभो ॥ अप्सरोगणसंकीर्णेब्र ह्मघोषानुनादिते २८ सुखमस्म्युषितःशैलतवसानुषुनित्यदा ॥ एवमुक्त्वाऽर्जुनःशैलमामंत्र्यपरवीरहा २९ आरुरोहरथंदिव्यंद्योतयन्निवभास्करः ॥ सते नादित्यरूपेणदिव्येनाद्भुतकर्मणा ३० ऊर्ध्वमाचक्रमेधीमान्प्रहृष्टःकुरुनंदनः ॥ सोऽदर्शनपथंयातोमर्त्यानांधर्मचारिणाम् ३१ ददर्शाद्भुतरूपाणिविमानानि सहस्रशः ॥ नतत्रसूर्यःसोमोवाद्योततेनचपावकः ३२ स्वयैवप्रभयातत्रद्योतंतेपुण्यलब्धया ॥ ताराूपाणियानीहदृश्यंतेद्युतिमंतिवै ३३ दीपवद्विप्रकृष्ट त्वात्तनूनिसुमहांत्यपि ॥ तानितत्रप्रभास्वंतिरूपवंतिचपांडवः ३४ ददर्शस्वेषुधिष्ण्येषुदीप्तिमंतःस्वयाऽर्चिषा ॥ तत्रराजर्षयःसिद्धावीराश्चनिहतायुधि ३५ तपसाचजितंस्वर्गंसंपेतुःशतसंघशः ॥ गंधर्वाणांसहस्राणिसूर्यज्वलिततेजसाम् ३६ गुह्यकानामृषीणांचतथैवाप्सरसांगणान् ॥ लोकानात्मप्रभान्पश्यन् फाल्गुनोविस्मयान्वितः ३७ पप्रच्छमातलिंप्रीत्यासचाप्येनमुवाचह ॥ एतेसुकृतिनःपार्थस्वेषुधिष्ण्येष्ववस्थिताः ३८ तान्दृष्टवानसिविभोताराूपाणि भूतले ॥ ततोऽपश्यत्स्थितंद्वारिशुभ्रंवैजयिनंगजम् ३९ ऐरावतंचतुर्दंतंकैलासमिवशृंगिणम् ॥ ससिद्धमार्गमाक्रम्यकुरुपांडवसत्तमः ४० व्यरोचतयथापू र्वंमांधातापार्थिवोत्तमः ॥ अभिचक्रामलोकान्सराज्ञाराजीवलोचनः ४१

सुमहांत्यपितनूनिसूक्ष्माणिदृश्यंते ३४ धिष्ण्येषुस्थानेषु ३५ । ३६ आत्मनैवसूर्यादिवत्प्रभांति तानात्मप्रभान् ३७ । ३८ वैजयिनंविजयिनमेववैजयिनं स्वार्थेतद्धितः ३९ । ४० । ४१

संक्रमन् गच्छन् अमरावतींनाम्ना ४२ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ददर्शेति १ सौगंधिकानांकल्हाराणांपुष्पाणांचमिश्रेणवायुनेतिसंबं धः २ नंदनंनामतः ३ नातप्ततपस इति तपआदीनानिषेधमुखेनस्वर्गसाधनत्वंविधीयते ४ । ५ यज्ञहनैः । द्रव्यंदेवताचयज्ञस्वरूपंतत्रयोदक्षिणाहीनं देवतास्वरूपज्ञानहीनंचयज्ञं करो तिसदृथापशुबीजघातीयज्ञहनइत्युच्यते । तथाचश्रूयतेशतपथे 'प्रंतिवाएतद्यज्ञं यदेनं तन्वतेयस्वैवराजानमभिषुण्वंतितत्तं प्रंतियत्पशुं संज्ञपयंतिविशासतितत्तं प्रंत्युलूखलमुसलाभ्यां दृषदुपलाभ्यांहविर्यज्ञं प्रंतिसएषयज्ञोहतोनददक्षेतंदेवादक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तद्दक्षिणानामेति' । राजानंसोमवल्लींअभिषुण्वंतिकंडयंतिसंज्ञपयंतिघ्नंतिविशासतिवि

एवंससंक्रमंस्तत्रस्वर्गलोकेमहायशाः ॥ ततोददर्शशक्रस्यपुरींताममरावतीम् ४२ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥वैशंपायनउवाच॥ ददर्शसपुरींरम्यांसिद्धचारणसेविताम् ॥ सर्वर्तुकुसुमैःपुण्यैःपादपैरुपशोभिताम् १ तत्रसौगंधिकानांचपुष्पाणांपुण्यगंधिनाम्॥ उद्वीज्यमानोमिश्रेणवायुनापुण्यगंधिना २ नंदनंचवनंदिव्यमप्सरोगणसेवितम् ॥ ददर्शदिव्यकुसुमैराह्वयद्भिरिवद्रुमैः ३ नातप्ततपसाशक्योद्रष्टुंनानाहिताग्निना ॥ सलोकःपुण्यकर्तृणांनापियुद्धेपराङ्मुखैः ४ नायज्वभिर्नाव्रतिकैर्नवेदश्रुतिवर्जितैः ॥ नानाप्लुतांगैस्तीर्थेषुयज्ञदानबहिष्कृतैः ५ नापियज्ञहनैःक्षुद्रैर्द्रष्टुंशक्यःकथंचन ॥ पानपैर्गुरुतल्पैश्चमांसादैर्वादुरात्मभिः ६ सतद्दिव्यंवनंपश्यन्दिव्यगीतनिनादितम् ॥ प्रविवेशमहाबाहुःशक्रस्यदयितांपुरीम् ७ तत्रदेवविमानानिकामगानिसहस्रशः ॥ संस्थितान्यभियातानिददर्शायुतशस्तदा ८ संस्तूयमानोगंधर्वैरप्सरोभिश्चपांडवः ॥ पुष्पगंधवहैःपुण्यैर्वायुभिश्चानुवीजितः ९ ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः ॥ हृष्टाःसंपूजयामासुःपार्थमक्लिष्टकारिणम् १० आशीर्वादैःस्तूयमानोदिव्यवादित्रनिःस्वनैः ॥ प्रतिपेदेमहाबाहुःशंखदुंदुभिनादितम् ११ नक्षत्रमार्गंविपुलंसुरवीथीतिविश्रुतम् ॥ इंद्राज्ञयाययौपार्थःस्तूयमानःसमंततः१२ तत्रसाध्यास्तथाविश्वेमरुतोऽथाश्विनौतथा ॥ आदित्यावसवोरुद्रास्तथाब्रह्मर्षयोऽमलाः १३ राजर्षयश्चबहवोदिलीपप्रमुखान्नृपाः ॥ तुंबुरुर्नारदश्चैवगंधर्वौचहाहाहूहूः १४ तान्ससर्वान्समागम्यविधिवत्कुरुनंदनः ॥ ततोऽपश्यद्देवराजंशतक्रतुमरिंदमः १५ ततःपार्थोमहाबाहुरवतीर्यरथोत्तमात् ॥ ददर्शसाक्षाद्देवेशंपितरंपाकशासनम् १६ पांडुरेणातपत्रेणहेमदंडेनचारुणा ॥ दिव्यगंधाधिवासेनव्यजनेनविधूयता १७ विश्वावसुप्रभृतिभिर्गंधर्वैःस्तुतिवंदिभिः ॥ स्तूयमानंद्विजाग्र्यैश्चऋग्यजुःसामसंभवैः १८

शसनंकरोति नददक्षेदक्षोनबभूवअदक्षयन् दक्षमकुर्वन् । असंज्ञायामपिहंतेर्घः । यज्ञहरैरित्यपपाठः अतएवक्षुद्रैर्लुब्धैः पानशब्दोनिरुपपदोमद्यवाची गुरुतल्पसमधिव्याहाराद्वापानपैर्मद्यपैःमांसादैर्वृथामांसभक्षकैः । अन्यत्रतु'देवान् पितॄन्समभ्यर्च्यखादन् मांसंनदोषभाक्'इतिस्मृतेर्नदोषःअतएवदुरात्मभिर्हिंस्रैः ६ ।७ अभितोयांतिएतान् देशानित्यभियातान्यापानभूमयः ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ पाकशासनंपाकशब्दः प्रशस्तेनीचेचवर्तते । 'योमापाकेनमनसाचरंतं' । योऽस्मात्पाकतरइत्यादिप्रयोगात् तेननीचादीनामपिपतिरितिवादुष्टानांदंडयितेतिवा पाकशासनपदस्यात्रयवार्थः पाकनामादैत्यइत्यन्ये १६ । १७ स्तुतिवंदिभिःस्तुत्यावंदमानैः १८

१९ । २० प्रश्रयावनतंविनयेननम्रीभूतं २१ । २२ । २३ । २४ वज्रग्रहणस्यचिन्हंकिणोयस्मिन् २५ । २६ चतुर्दश्यामितियद्यपिदर्शेएवसूर्येंद्वोरेकासनगतत्वमेकनक्षत्रस्थत्वादस्तिनचतुर्दश्यांतथाऽपिसामीप्यलक्षणयाएकराशिस्थत्वमत्रग्राह्यं अन्यथाश्विनीस्थेसूर्ये चतुर्दश्यारेवतीयोगेएकराशिस्थितत्वस्याप्यलाभात् २७ साम्नामीत्या वल्गुनारम्येण गीतानिअमंत्रोपरिगानं साममंत्रोपरिगानं २८ । २९ । ३० । ३१ चेतोऽलोचनात्मिकाचित्तवृत्तिः । बुद्धिरध्यवसायरूपा । मनःसंकल्पविकल्पात्मकं कटाक्षादिभिश्चित्तस्यवृत्त्यंतरंहरंतीत्यर्थः ३२ इत्यारण्यके

ततोऽभिगम्यकौंतेयःशिरसाऽभ्यगमद्बली ॥ सचैनंवृत्तपीनाभ्यांबाहुभ्यांप्रत्यगृह्णत १९ ततःशक्रासनेपुण्येदेवर्षिगणसेविते ॥ शक्रःपाणौगृहीत्वैनमुपावेशयदंतिके २० मूर्ध्निचैनमुपाघ्रायदेवेंद्रःपरवीरहा ॥ अंकमारोपयामासप्रश्रयावनतंतदा २१ सहस्राक्षनियोगात्सपार्थःशक्रासनंगतः ॥ अध्यक्रामदमेयात्माद्वितीयइववासवः २२ ततःप्रेम्णावृत्रशत्रुरर्जुनस्यशुभंमुखम् ॥ पस्पर्शपुण्यगंधेनकरेणपरिसांत्वयन् २३ प्रमार्जमानःशनकैर्बाहूचास्यायतौशुभौ ॥ ज्याशरक्षेपकठिनौस्तंभाविवहिरण्मयौ २४ वज्रग्रहणचिह्नेनकरेणपरिसांत्वयन् ॥ मुहुर्मुहुर्वज्रधरोबाहूचास्फोटयन्शनैः २५ स्मयन्निवगुडाकेशंप्रेक्षमाणःसहस्रदृक् ॥ हर्षेणोत्फुल्लनयनोनचातृप्यतवृत्रहा २६ एकासनोपविष्टौतौशोभयांचक्रतुःसभाम् ॥ सूर्याचंद्रमसौव्योमचतुर्दश्यामिवोदितौ २७ तत्रस्मगाथागायंतिसाम्नापरमवल्गुना ॥ गंधर्वास्तुंबुरुश्रेष्ठाःकुशलागीतसामसु २८ घृताचीमेनकारंभापूर्वचित्तिःस्वयंप्रभा ॥ उर्वशीमिश्रकेशीचदंडगौरीवरूथिनी २९ गोपालीसहजन्याचकुंभयोनिःप्रजागरा ॥ चित्रसेनाचित्रलेखासहाचमधुरस्वरा ३० एताश्चान्याश्चननृतुस्तत्रतत्रसहस्रशः ॥ चित्तप्रसादनेयुक्ताःसिद्धानांपद्मलोचनाः ३१ महाकटितटश्रोण्यःकंपमानैःपयोधरैः ॥ कटाक्षहावमाधुर्यैश्चेतोबुद्धिमनोहरैः ३२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिइंद्रसभादर्शनेत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ वैशंपायनउवाच ॥ ततोदेवाःसगंधर्वाःसमादायार्घ्यमुत्तमम् ॥ शक्रस्यमतमाज्ञायपार्थमानर्चुरंजसा १ पाद्यमाचमनीयंचप्रतिग्राह्यनृपात्मजम् ॥ प्रवेशयामासुरथोपुरंदरनिवेशनम् २ एवंसंपूजितोजिष्णुरुवासभवनेपितुः ॥ उपशिक्षन्महास्त्राणिससंहाराणिपांडवः ३ शक्रस्यहस्तादयितंवज्रमस्त्रंचदुःसहम् ॥ अशनीश्चमहानादामेघबर्हिणलक्षणाः ४ गृहीतास्त्रस्तुकौंतेयोभ्रातॄन्सस्मारपांडवः ॥ पुरंदरनियोगाच्चपंचाब्दानवसत्सुखी ५ ततःशक्रोऽब्रवीत्पार्थंकृतास्त्रंकालआगते ॥ नृत्यंगीतंचकौंतेयचित्रसेनादवाप्नुहि ६ वादित्रंदेवविहितंनृलोकेयन्नविद्यते ॥ तदर्जयस्वकौंतेयश्रेयोवैतेभविष्यति ७ सखायंप्रददौचास्यचित्रसेनंपुरंदरः ॥ सतेनसहसंगम्यरेमेपार्थोनिरामयः ८ गीतवादित्रनृत्यानिभूयएवादिदेशह ॥ तथापिनालभच्छर्मतपस्वीद्यूतकारितम् ९ दुःशासनवधामर्षीशकुनेःसौबलस्यच ॥ ततस्तेनातुलांप्रीतिमुपागम्यक्वचित्क्वचित् ॥ गांधर्वमतुलंनृत्यंवादित्रंचोपलब्धवान् १०

पर्वणिनैलकंठीयेभारतभावदीपेत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ ततइति १ । २ । ३ मेघबर्हिणलक्षणाः अकालेऽपिउद्यतैर्मेघैर्नृत्यमानैश्चमयूरैर्यद्दर्शनंयस्वं देशांतरेप्रयुक्तामितिलक्ष्यते । देशांतरीयैस्ताअशनीर्वह्नीरित्यर्थः ४ भ्रातॄन्सस्मारस्वर्गेऽपिदुःखितभ्रातृस्मरणेनदुःखवानेवाभूदित्यर्थः ५ । ६ । ७ । ८ । ९ । १०

११ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ आदाविति १ उर्वशींगच्छ सा च फाल्गुनमुपातिष्ठतु २ । ३ । ४ । ५ । ६ प्रतिभानंसमयेस्फूर्तिः ७ वर्चः शरीरे विद्यैश्वर्यादिजंतेजस्तद्वान्वर्चस्वीतेजःशौर्यंतेनयुक्तः । चतुराख्यानपंचमान् चतु चतुःसंख्यान् विभक्तिलोपआर्षः । आख्यानंभारतादि चतुरप्रियमाख्यानं चतुराख्यानमितिमध्यम पदलोपेनवाशाकपार्थिवादिवत्समासः ८ गुरुशुश्रूषांमेधांचप्रत्येकमष्टगुणामधीते प्राप्नोति । गुणाश्चवाक्यशेषादेवपर्यायशमूह्याः । ब्रह्मचर्यमुपस्थनिग्रहः । दाक्ष्यंअनालस्यं प्रसवैर्द्वैमातुः कुलेद्वेपितुस्तैश्चतुर्भिः वयसातारुण्येन ९ रक्षितापालकः । अकत्थनइतिपालकश्चेतिश्लाघाराहित्यं । स्थूलमिवसुज्ञेयंलक्ष्यंलक्षयितुंयोग्यंसूक्ष्मंयस्य सूक्ष्मानप्यर्थान्स्थूलवज्जानातीत्येवावग

सशिक्षितोनृत्यगुणाननेकान्वादित्रगीतार्थगुणांश्चसर्वान् ॥ नशर्मलेभेपरवीरहंताभ्रातॄन्स्मरन्मातरंचैवकुंतीम् ११ ॥ इतिश्रीमहाभारतेअरण्यकेपर्वणिइंद्र लोकाभिगमनपर्वणिचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ वैशंपायनउवाच ॥ ॥ आदावेवाथतंशक्रश्चित्रसेनंरहोब्रवीत् ॥ पार्थस्यचक्षुरुर्वश्यांसक्तंविज्ञायवासवः १ गंधर्वराजगच्छाद्यप्रहितोऽप्सरसांवराम् ॥ उर्वशींपुरुषव्याघ्रसोपातिष्ठतुफाल्गुनम् २ यथार्चितोगृहीता स्त्रीविद्ययामन्नियोगतः ॥ तथात्वयाविधातव्यंस्त्रीषुसंगविशारदः ३ एवमुक्तस्तथेत्युक्त्वासोऽनुज्ञांप्राप्यवासवात् ॥ गंधर्वराजोऽप्सरसमभ्यगादुर्वशींवराम् ४ तांदृष्ट्वाविदितोहृष्टःस्वागतेनार्चितस्तया ॥ सुखासीनःसुखासीनांस्मितपूर्वंवचोऽब्रवीत् ५ विदितंतेऽस्तुसुश्रोणिप्रहितोऽहमिहागतः ॥ त्रिदिवस्यैकराजेन त्वत्प्रसादाभिनंदिना ६ यस्तुदेवमनुष्येषुप्रख्यातःसहजैर्गुणैः ॥ श्रियाशीलेनरूपेणव्रतेनचदमेनच ॥ प्रख्यातोबलवीर्येणसंमतःप्रतिभानवान् ७ वर्चस्वीतेज सायुक्तःक्षमावान्वीतमत्सरः ॥ सांगोपनिषदान्वेदांश्चतुराख्यानपंचमान् ८ योऽधीतेगुरुशुश्रूषांमेधांचाष्टगुणाश्रयाम् ॥ ब्रह्मचर्येणदाक्ष्येणप्रसवैर्वयसाऽपिच ९ एकोवैरक्षिताचैवत्रिदिवंमघवानिव ॥ अकत्थनोमानयितास्थूललक्ष्यःप्रियंवदः १० सुहृदश्चान्नपानेनविविधेनाभिवर्षति ॥ सत्यवाक्पूजितोवक्तारूपवानन हंकृतः ११ भक्तानुकंपीकांतश्चप्रियश्चस्थिरसंगरः ॥ प्रार्थनीयैर्गुणगणैर्महेंद्रवरुणोपमः १२ विदितस्तेऽर्जुनोवीरःसस्वर्गफलमाप्नुयात् ॥ तवशक्राभ्यनुज्ञातःपादा वद्यप्रपद्यताम् ॥ तदेवंकुरुकल्याणिप्रपन्नस्त्वांधनंजयः १३ एवमुक्तास्मितंकृत्वासंमानंबहुमन्यच ॥ प्रत्युवाचोर्वशीप्रीताचित्रसेनमनिंदिता १४ यस्त्वस्यकथि तःसत्योगुणोद्देशस्त्वयामम ॥ तंश्रुत्वाऽव्यथयंपुंसोवृणुयांकिमतोऽर्जुनम् १५ महेंद्रस्यनियोगेनत्वत्तःसंप्रणयेनच ॥ तस्यचाहंगुणौघेनफाल्गुनेजातमन्मथा ॥ गच्छत्वंहियथाकाममागमिष्याम्यहंसुखम् १६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिचित्रसेनोर्वशीसंवादेपंचचत्वारिंशोऽध्यायः॥४५॥

च्छतीत्यर्थः दातावा १० रूपवान्सुंदरः ११ कांतःसुखदः अतएवप्रियः प्रेमास्पदंप्रसववयोव्यतिरिक्ताब्रह्मचर्यादयोऽष्टौशुश्रूषागुणाःसत्यवाक्त्वादयः पूजितत्वादन्येऽष्टौमेधागुणाइति विभागः । यद्वा'शुश्रूषाश्रवणंचैवग्रहणंधारणंतथा ॥ ऊहापोहार्थविज्ञानंतत्त्वज्ञानंचधीगुणाः'इतिधीगुणाष्टकंग्राह्यं १२ स्वर्गफलंस्वर्गसंगंतवपादावितिप्रपन्नइतिच एतार्थिनोदीनतादर्शिता १३ बहुमन्य मत्वा १४ गुणोद्देशःगुणलेशः तमर्जुनंपुंसःयतःकुतश्चित्सकाशाच्छ्रुत्वा अव्यथयंस्वार्थेणिच् प्रागेवकामव्यथांप्राप्तवत्यस्मि अतोहेतोरर्जुनंकिंवृणुयामितिकाका प्रागेववृतस्त्वंदर्श यति १५ । १६ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥

तत इति १ रूपेणसौंदर्येण २ । ३ रमंती रमयंती ४ । ५ केशहस्तेन हस्तः शुंडादंडःतेनेववेण्येत्यर्थः ६ आह्वयंतीस्पर्धयापहियुध्यावेहेइतिवदंतीव ७ । ८ । ९ उन्नतःपीवरश्चनितंबएवेति ।

वैशंपायनउवाच ॥ ॥ ततोविसृज्यगंधर्वंकृतकृत्यंशुचिस्मिता ॥ उर्वशीचाकरोत्स्नानंपार्थप्रार्थनलालसा १ स्नानालंकरणैर्हृद्यैर्गंधमाल्यैश्चसुप्रभैः ॥ धनंज यस्यरूपेणशरैर्मन्मथचोदितैः २ अतिविद्धेनमनसामन्मथेनप्रदीपिता ॥ दिव्यास्तरणसंस्तीर्णेविस्तीर्णेशयनोत्तमे ३ चित्तसंकल्पभावेनसुचित्ताऽनन्यमान सा ॥ मनोरथेनसंप्राप्तंरमंत्येनंहिफाल्गुनम् ४ निर्गम्यचंद्रोदयनेविगाढेरजनीमुखे ॥ प्रस्थितासापृथुश्रोणीपार्थस्यभवनंप्रति ५ मृदुकुंचितदीर्घेणकुमुदो त्करधारिणा ॥ केशहस्तेनललनाजगामाथविराजती ६ भ्रूक्षेपालापमाधुर्यैःकांत्यासौम्यतयाऽपिच ॥ शशिनंवक्त्रचंद्रेणसाऽऽह्वयंतीवगच्छती ७ दिव्यांगरा गौसुमुखौदिव्यचंदनरूषितौ ॥ गच्छंत्याहाररुचिरौस्तनौतस्याववल्गतुः ८ स्तनोद्वहनसंक्षोभान्नम्यमानापदेपदे ॥ त्रिवलीदामचित्रेणमध्येनातीवशोभि ना ९ अधोभूधरविस्तीर्णंनितंबोन्नतपीवरम् ॥ मन्मथायतनंशुभ्रंरसनादामभूषितम् १० ऋषीणामपिदिव्यानांमनोव्याघातकारणम् ॥ सूक्ष्मवस्त्रधरंरेजे जघनंनिरवद्यवत् ११ गूढगुल्फधरौपादौताम्रायततलांगुली ॥ कूर्मपृष्ठोन्नतौचापिशोभेतेकिंकिणीकिणौ १२ सीधुपानेनचाल्पेनतुष्ट्याऽथमदनेनच ॥ वि लासनैश्चविविधैःप्रेक्षणीयतराऽभवत् १३ सिद्धचारणगंधर्वैःसाप्रयाताविलासिनी ॥ बह्वाश्चर्येऽपिवैस्वर्गेदर्शनीयतमाकृतिः १४ सुसूक्ष्मेणोत्तरीयेणमेघवर्णेन राजता ॥ तनुरभ्रावृताव्योम्निचंद्रलेखेवगच्छती १५ ततःप्राप्ताक्षणेनैवमनःपवनगामिनी ॥ भवनंपांडुपुत्रस्यफाल्गुनस्यशुचिस्मिता १६ तत्रद्वारमनु प्राप्ताद्वारस्थैश्चनिवेदिता ॥ अर्जुनस्यनरश्रेष्ठउर्वशीशुभलोचना १७ उपातिष्ठततद्वेश्मनिर्मलंसुमनोहरम् ॥ सशंकितमनाराजन्प्रत्युद्गच्छततांनिशि १८ दृष्ट्वैवचोर्वशींपार्थोलज्जासंवृतलोचनः ॥ तदाऽभिवादनंकृत्वागुरुपूजांप्रयुक्तवान् १९ ॥ अर्जुनउवाच ॥ अभिवादयेत्वांशिरसाप्रवराप्सरसांवरे ॥ किमाज्ञापयसे देविप्रेष्यस्तेऽहमुपस्थितः २० फाल्गुनस्यवचःश्रुत्वागतसंज्ञातदोर्वशी ॥ गंधर्ववचनंसर्वंश्रावयामासतंतदा २१ ॥ उर्वश्युवाच ॥ यथामेचित्रसेनेनकथितंमनु
१५ जोत्तम ॥ ततेऽहंसंप्रवक्ष्यामियथाचाहमिहागता २२ उपस्थानेमहेंद्रस्यवर्तमानेमनोरमे ॥ तवागमनतोवृत्तेस्वर्गस्यपरमोत्सवे २३ रुद्राणांचैवसान्निध्यमादि त्यानांचसर्वशः ॥ समागमेऽश्विनोश्चैववसूनांचनरोत्तम २४ महर्षीणांचसंघेषुराजर्षिप्रवरेषुच ॥ सिद्धचारणयक्षेषुमहोरगगणेषुच २५ उपविष्टेषुसर्वेषुस्थान मानप्रभावतः ॥ ऋध्याप्रज्वलमानेषुअग्निसोमार्कवर्ष्मसु २६ वीणासुवाद्यमानासुगंधर्वैःशक्रनंदन ॥ दिव्येमनोरमेगेयेप्रवृत्तेपृथुलोचन २७ सर्वाप्सरःसुमुख्या सुप्रनृत्तासुकुरूद्वह ॥ त्वंकिलानिमिषःपार्थमामेकांतत्रदृष्टवान् २८ तत्रचावभृथेतस्मिन्नुपस्थानेदिवौकसाम् ॥ तवपित्राऽभ्यनुज्ञातागतास्वंस्वंगृहंसुराः २९

विशेषणंविशेष्येणबहुलमितिबाहुलकात्समासः १० अवद्यवत्दोषवत्तद्भावोनिरवद्यवत् ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ २६ । २७ । २८ अवभृथो यज्ञांतस्नानं तत्प्राप्ये २९

३० । ३१ । ३२ । ३३ तेनचित्रसेनेनतवपित्राचेंद्रेणचशुश्रूषितुंसेवितुं ३४ । ३५ । ३६ दुःश्रुतंमेऽस्तुममश्रवणंव्यर्थमस्तु यत्त्वमेवंविधदुष्कर्मयोग्यतांमयिसंभावयसीत्यर्थः ३७ । ३८ । ३९

तथैवाप्सरसःसर्वाविशिष्टाःस्वगृहंगताः ॥ अणिचान्याश्वशत्रुघ्नतवपित्राविसर्जिताः ३० ततःशक्रेणसंदिष्टश्चित्रसेनोममांतिकम् ॥ प्राप्तःकमलपत्राक्षसचमा
मब्रवीदथ ३१ त्वत्कृतेऽहंसुरेशेनप्रेषितोवरवर्णिनि ॥ प्रियंकुरुमहेंद्रस्यममचैवात्मनश्चह ३२ शक्रतुल्यंरणेशूरंसदौदार्यगुणान्वितम् ॥ पार्थंप्रार्थयसुश्रोणि
त्वमित्येवंतदाऽब्रवीत् ३३ ततोऽहंसमनुज्ञातातेनपित्राचतेऽनघ ॥ तवांतिकमनुप्राप्ताशुश्रूषितुमरिंदम ३४ त्वद्गुणाकृष्टचित्ताऽहमनंगवशमागता ॥ चिरा
भिलषितोवीरममाप्येषमनोरथः ३५ ॥ वैशंपायनउवाच ॥ तांतथाब्रुवतींश्रुत्वाभृशंलज्जावृतोऽर्जुनः ॥ उवाचकर्णौहस्ताभ्यांपिधायात्रिदशालये ३६ दुः ॥४७॥
श्रुतंमेऽस्तुसुभगेयन्मांवदसिभाविनि ॥ गुरुदारैःसमानामेनिश्चयेनवरानने ३७ यथाकुंतीमहाभागायथेंद्राणीशचीमम ॥ तथात्वमपिकल्याणीनात्रकार्याविचारणा ३८ यच्चेक्षितासिविस्पष्टंविशेषेणमयाशुभे ॥ तच्चकारणपूर्वंहिशृणुसत्यंशुचिस्मिते ३९ इयंपौरववंशस्यजननीमुदितेतिह ॥ त्वामहंदृष्टवांस्तत्रविज्ञा
योत्फुल्ललोचनः ४० नमामर्हसिकल्याणिअन्यथाध्यातुमप्सरः ॥ गुरोर्गुरुतरामेत्वंममत्वंवंशवर्धिनी ४१ ॥ उर्वश्युवाच ॥ अनावृताश्चसर्वाःस्मदेवराजा
भिनंदन ॥ गुरुस्थानेनमांवीरनियोक्तुंत्वमिहार्हसि ४२ पुरोर्वंशेहियेपुत्रानप्तारोवात्विहागताः ॥ तपसारमयंत्यस्मान्नचतेषांव्यतिक्रमः ४३ तत्प्रसीदनमा
मार्तांविसर्जयितुमर्हसि ॥ हृच्छयेनचसंतप्तांभक्तांचभजमानद ४४ ॥ अर्जुनउवाच ॥ शृणुसत्यंवरारोहेयत्त्वांवक्ष्याम्यनिंदिते ॥ शृण्वंतुमेदिशश्चैवविदिश
श्चसदेवताः ४५ यथाकुंतीचमाद्रीचशचीचैवममानघे ॥ तथाचवंशजननीत्वंहिमेऽद्यगरीयसी ४६ गच्छमूर्ध्नाप्रपन्नोऽस्मिपादौतेवरवर्णिनि ॥ त्वंहिमेमातृ
वत्पूज्यारक्ष्योऽहंपुत्रवत्त्वया ४७ ॥ वैशंपायनउवाच ॥ एवमुक्तातुपार्थेनउर्वशीक्रोधमूर्च्छिता ॥ वेपंतीभ्रुकुटीवक्त्राशशापाथधनंजयम् ४८ ॥ उर्वश्युवा
च ॥ तवपित्राभ्यनुज्ञातांस्वयंचगृहमागताम् ॥ यस्मान्मांनाभिनंदेथाःकामबाणवशंगताम् ४९ तस्मात्त्वंनर्तनःपार्थस्त्रीमध्येमानवर्जितः ॥ अपुमानिति
विख्यातःषंढवद्विचरिष्यसि ५० एवंदत्त्वाऽर्जुनेशापंस्फुरदोष्ठीश्वसंत्यथ ॥ पुनःप्रत्यागताक्षिप्रमुर्वशीगृहमात्मनः ५१ ततोऽर्जुनस्त्वरमाणश्चित्रसेनमरिंद
मः ॥ संप्राप्यरजनीवृत्तंतदुर्वश्यायथातथा ५२ निवेदयामासतदाचित्रसेनायपांडवः ॥ तत्रचैवंयथावृत्तंशापंचैवपुनःपुनः ५३ अवेदयच्चशक्रस्याचित्रसेनोऽ
पिसर्वशः ॥ ततआनाय्यतनयंविविक्तेहरिवाहनः ५४ सांत्वयित्वाशुभैर्वाक्यैःस्मयमानोऽभ्यभाषत ॥ सुपुत्राऽद्यपृथाताततत्वयापुत्रेणसत्तम ५५ ऋषयोऽपिहि
धैर्येणजितावैतेमहाभुज ॥ यत्तुदत्तवतीशापमुर्वशीतवमानद ५६ सचापितेऽर्थकृत्तातसाधकश्चभविष्यति ५७

४० अप्सरइत्येकत्वमार्षं । यद्वास्यादेकत्वेऽप्सराअपीतिशब्दार्णवादेकत्वंसाधु ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ मुखव्यावक्त्रा नतुमनसा हितार्थत्वाच्छापस्येतिभावः ४८ ॥४३॥
४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७

५८ । ५९ । ६० । ६१ । ६२ । ६३ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ कदाचिदिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११

अज्ञातवासोवस्तव्योभवद्भिर्भूतलेऽनघ ॥ वर्षेत्रयोदशेवीरतंतत्रक्षपयिष्यसि ५८ तेननर्तनवेषेणअपुंस्त्वेनतथैवच ॥ वर्षमेकंविहृत्यैवततःपुंस्त्वमवाप्स्य
सि ५९ एवमुक्तस्तुशक्रेणफाल्गुनःपरवीरहा ॥ मुदंपरमिकांलेभेनचशापंव्यचिंतयत् ६० चित्रसेनेनसहितोगंधर्वेणयशस्विना ॥ रेमेसस्वर्गभवनेपांडुपुत्रो
धनंजयः ६१ इदंयःशृणुयावृत्तंनित्यंपांडुसुतस्यवै ॥ नतस्यकामःकामेषुपापकेषुप्रवर्तते ६२ इदममरवरात्मजस्यघोरंशुचिचरितंविनिशम्यफाल्गुनस्य ॥
व्यपगतमददंभरागदोषास्त्रिदिवगताभिरमंतिमानवेंद्राः ६३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिउर्वशीशापोनामषट्चत्वारिंशो
ध्यायः ४६ ॥ ॥ वैशंपायनउवाच ॥ कदाचिदटमानस्तुमहर्षिरुतलोमशः ॥ जगामशक्रभवनंपुरंदरदिदृक्षया १ ससमेत्यनमस्कृत्यदेवराजंमहामुनिः॥
ददर्शार्धासनगतंपांडवंवासवस्यहि २ ततःशक्राभ्यनुज्ञातआसनेविष्टरोत्तरे ॥ निषसादद्विजश्रेष्ठःपूज्यमानोमहर्षिभिः ३ तस्यदृष्ट्वाऽभवद्बुद्धिःपार्थमिंद्रासने
स्थितम् ॥ कथंनुक्षत्रियःपार्थःशक्रासनमवाप्तवान् ४ किंत्वस्यसुकृतंकर्मकेलोकावैविनिर्जिताः ॥ सएवमनुसंप्राप्तःस्थानंदेवनमस्कृतम् ५ तस्यविज्ञायसंक
ल्पंशक्रोवृत्रनिषूदनः ॥ लोमशंप्रहसन्वाक्यमिदमाहशचीपतिः ६ ब्रह्मर्षेश्रूयतांयत्तेमनसैतद्विवक्षितम् ॥ नायंकेवलमर्त्योवैमानुषत्वमुपागतः ७ महर्षेमम
पुत्रोऽयंकुंत्यांजातोमहाभुजः ॥ अस्त्रहेतोरिहप्राप्तःकस्माच्चित्कारणांतरात् ८ अहोनैनंभवान्वेत्तिपुराणमृषिसत्तमम् ॥ शृणुमेवदतोब्रह्मन्योऽयंयच्चास्यकार
णम् ९ नरनारायणौयौतौपुराणावृषिसत्तमौ ॥ ताविमावनुजानीहिहृषीकेशधनंजयौ १० विख्यातौत्रिषुलोकेषुनरनारायणावृषी ॥ कार्यार्थमवतीर्णौतौपृ
थ्वींपुण्यप्रतिश्रयाम् ११ यन्नशक्यंसुरैर्द्रष्टुमृषिभिर्वामहात्मभिः ॥ तदाश्रमपदंपुण्यंबदरीनामविश्रुतम् १२ सनिवासोऽभवद्विप्रविष्णोर्जिष्णोस्तथैवच ॥ यतः
प्रववृतेगंगासिद्धचारणसेविता १३ तौमन्नियोगाद्ब्रह्मर्षेक्षितौजातौमहाद्युती ॥ भूमेर्भारावतरणंमहावीर्यौकरिष्यतः १४ उद्वृत्ताह्यसुराःकेचिन्निवातकवचाइति ॥
विप्रियेषुस्थितास्माकंवरदानेनमोहिताः १५ तर्कयंतेसुरान्हंतुंबलदर्पसमन्विताः ॥ देवान्नगणयंत्येतेतथादत्तवराहिते १६ पातालवासिनोरौद्रादनोःपुत्रामहाब
लाः ॥ सर्वदेवनिकायाहिनालंयोधयितुंहितान् १७योऽसौभूमिगतःश्रीमान्विष्णुर्मधुनिषूदनः॥कपिलोनामदेवोऽसौभगवानजितोहरिः १८येनपूर्वंमहात्मानःखन
मानारसातलम् ॥ दर्शनादेवनिहताःसगरस्यात्मजाविभो १९ तेनकार्यंमहत्कार्यमस्माकंद्विजसत्तम ॥ पार्थेनचमहायुद्धेसमेताभ्यांनसंशयः २० सोसुरान्द
र्शनादेवशक्तोहंतुंसहानुगान् ॥ निवातकवचान्सर्वान्नागानिवमहाह्रदे २१ किंतुनाल्पेनकार्येणप्रबोध्योमधुसूदनः ॥ तेजसःसुमहाराशिःप्रबुद्धःप्रदहेज्जगत् २२

१२ । १३ । १४ । १५ । १६ देवनिकायादेवसमूहा नालम् नसमर्थाः १७ कपिलः । 'ऋषिंप्रसूतंकपिलंयस्तमग्रेज्ञानैर्बिभर्तिजायमानंचपश्येत्' इति श्रुतिप्रसिद्धःअग्रेजायमानम् पांचरात्रागमेऽनिरुद्धत्वेन वेदसूत्रात्मत्वेनचव्यवहृतम् नारायणम् १८ । १९ । २० । २१ प्रबोध्योविज्ञाप्यः २२

तेषांनिवातकवचानांप्रतिसमासनेसंक्षेपणे ११ । २४ । २५ । २६ गुडाकेशोऽर्जुनः २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ संप्रतिज्ञायांगीकृत्य ३४ । ३५ ॥ ॥ इत्यारण्यकेपर्वणिनैल

अयंतेषांसमस्तानांशक्तःप्रतिसमासने ॥ तान्निहत्यरणेशूरःपुनर्यास्यतिमानुषान् २३ भवानस्मन्नियोगेनयातुतावन्महीतलम् ॥ काम्यकेद्रक्ष्यसेवीरंनिवसंतं
युधिष्ठिरम् २४ सवाच्योममसंदेशाद्धर्मात्मासत्यसंगरः ॥ नोत्कंठाफाल्गुनेकार्याकृतास्त्रःशीघ्रमेष्यति २५ नाशुद्धबाहुवीर्येणनाकृतास्त्रेणवारणे ॥ भीष्मद्रो
णादयोयुद्धेशक्याःप्रतिसमासितुम् २६ गृहीतास्त्रोगुडाकेशोमहाबाहुर्महामनाः ॥ नृत्यवादित्रगीतानांदिव्यानांपारमीयिवान् २७ भवानपिविविक्तानितीर्थानि
मनुजेश्वर ॥ भ्रातृभिःसहितःसर्वैर्द्रष्टुमर्हत्यरिंदम २८ तीर्थेष्वाप्लुत्यपुण्येषुविपाप्माविगतज्वरः ॥ राज्यंभोक्ष्यसिराजेंद्रसुखीविगतकल्मषः २९ भवांश्चैनंद्विज
श्रेष्ठपर्यटंतंमहीतलम् ॥ त्रातुमर्हतिविप्राग्र्यतपोबलसमन्वितः ३० गिरिदुर्गेषुचसदादेशेषुविषमेषुच ॥ वसंतिराक्षसारौद्रास्तेभ्योरक्षांविधास्यति ३१ एवमुक्ते
महेंद्रेणबीभत्सुरपिलोमशम् ॥ उवाचप्रयतोवाक्यंरक्षेथाःपांडुनंदनम् ३२ यथागुप्तस्त्वयाराजाचरेत्तीर्थानिसत्तम ॥ दानंदद्याद्यथाचैवतथाकुरुमहामुने ३३
॥ वैशंपायनउवाच ॥ ॥ तथेतिसंप्रतिज्ञायलोमशःसुमहातपाः ॥ काम्यकंवनमुद्दिश्यसमुपायान्महीतलम् ३४ ददर्शतत्रकौंतेयंधर्मराजमरिंदमम् ॥
तापसैर्भ्रातृभिश्चैवसर्वतःपरिवारितम् ३५ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिलोमशगमनेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
॥ जनमेजयउवाच ॥ ॥ अत्यद्भुतमिदंकर्मपार्थस्यामिततेजसः ॥ धृतराष्ट्रोमहाप्राज्ञःश्रुत्वाविप्रकिमब्रवीत् १ ॥ ॥ वैशंपायनउवाच ॥ ॥ शक्रलो
कगतंपार्थंश्रुत्वाराजांऽबिकासुतः ॥ द्वैपायनादृषिश्रेष्ठात्संजयंवाक्यमब्रवीत् २ ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ श्रुतंमेसूतकार्त्स्न्येनकर्मपार्थस्यधीमतः ॥
कच्चित्तवापिविदितंयाथातथ्येनसारथे ३ प्रमत्तोग्राम्यधर्मेषुमंदात्मापापनिश्चयः ॥ ममपुत्रःसुदुर्बुद्धिःपृथिवींघातयिष्यति ४ यस्यनित्यमृतावाचःस्वैरेष्वपि
महात्मनः ॥ त्रैलोक्यमपितस्यस्याद्योद्धायस्यधनंजयः ५ अस्यतःकर्णिनाराचानतीक्ष्णाग्रांश्चशिलाशितान् ॥ कोऽर्जुनस्याग्रतस्तिष्ठेदपिमृत्युर्जरातिगः
६ ममपुत्रादुरात्मानःसर्वेमृत्युवशानुगाः ॥ येषांयुद्धंदुराधर्षैःपांडवैःप्रत्युपस्थितम् ७ तथैवचनपश्यामियुधिगांडीवधन्वनः ॥ अनिशंचिंतयानोऽपियएन
मुदियाद्रथी ८ द्रोणकर्णौप्रतीयातांयदिभीष्मोऽपिवारणे ॥ महान्स्यात्संशयोलोकेतत्रपश्यामिनोजयम् ९ घृणीकर्णःप्रमादीचआचार्यःस्थविरोगुरुः ॥ अ
मर्षीबलवान्पार्थःसंरंभीदृढविक्रमः १० संभवेत्तुमुलंयुद्धंसर्वशोऽप्यपराजितम् ॥ सर्वेह्यस्त्रविदःशूराःसर्वेप्राप्तामहद्यशः ११ अपिसर्वेश्वरत्वंहितेवांछंत्यपराजि
ताः ॥ वधेनूनंभवेच्छांतिरेतेषांफाल्गुनस्यवा १२ नतुहंताऽर्जुनस्यास्तिजेतावाऽस्यनविद्यते ॥ मन्युस्तस्यकथंशाम्येन्मांचैवप्रतिसंहितः १३

कंठीयेभारतभावदीपेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ अत्यद्भुतमिदंकर्मत्याद्वरध्यायद्वयेस्यतात्पर्यपरोत्कर्षश्रुतेस्वनाशशंकया मूढस्तप्यत इति १ । २ । ३ । ४ ऋताःसत्याः ५ । ६ । ७
८ प्रतीयातांप्रतिगच्छेतां ९ घृणीदयालुः प्रमादीअनवहितः संरंभोउद्यमी १० । ११ । १२ । १३

१४ । १५ । १६ अपीति सव्यसाचिनोरथघोषेणापि तत् तत्प्रणे १७ यत्तद्वा उद्भ्रमन् निषंगादुद्धरन् प्रवपयन् प्रेरयन् स्यातास्थास्यतिआततायीशस्त्रपाणिः यथोक्तं । 'अग्निदोगरदश्चैव
शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारीचषडेतेआततायिनः' । अपारणीयः अनुल्लंघनीयः जेतुमशक्यः १८ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेइंद्रलोकाभिगमनपर्वणि अष्ट

त्रिदशेशसमोवीरःखांडवेऽग्निमतर्पयत् ॥ जिगायपार्थिवान्सर्वान्राजसूयेमहाक्रतौ १४ शेषंकुर्याद्गिरेर्वज्रोनिपतन्मूर्ध्निसंजय ॥ नतुकुर्युःशराःशेषंक्षिप्तास्ता
तकिरीटिना १५ यथाहिकिरणाभानोस्तपंतीहचराचरम् ॥ तथापार्थभुजोत्सृष्टाःशरास्तप्स्यंतिमत्सुतान् १६ अपितद्रथघोषेणभयार्ताःसव्यसाचिनः ॥
प्रतिभातिविदीर्णेवसर्वतोभारतीचमूः १७ यदुद्वमन्प्रवपंश्चैवबाणान्स्थाताऽऽततायीसमरेकिरीटी ॥ सृष्टोऽन्तकःसर्वहरोविधात्राभवेद्यथातद्वदपारणीयः १८ ॥
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिधृतराष्ट्रविलापेअष्टचत्वारिंशोऽध्यायः ४८ ॥ ॥ संजयउवाच ॥ यदेतत्कथितंराजंस्त्वया
दुर्योधनंप्रति ॥ सर्वमेतद्यथातत्त्वंनैतन्मिथ्यामहीपते १ मन्युनाहिसमाविष्टाःपांडवास्तेमहौजसः ॥ दृष्ट्वाकृष्णांसभांनीतांधर्मपत्नींयशस्विनीम् २ दुःशास
नस्यतावाचःश्रुत्वातिदारुणोदयाः ॥ कर्णस्यचमहाराजजुगुप्संतीतिभेमातिः ३ श्रुतंहिमेमहाराजयथापार्थेनसंयुगे ॥ एकादशतनुःस्थाणुर्धनुषापरितोषितः
४ कैरातंवेषमास्थाययोधयामासफाल्गुनम् ॥ जिज्ञासुःसर्वदेवेशःकपर्दीभगवान्स्वयम् ५ तत्रैनंलोकपालास्तेदर्शयामासुरच्युतम् ॥ अस्त्रहेतोःपराक्रांतंत
पसाकौरवर्षभम् ६ नैतदुत्सहतेचान्योलब्धुमन्यत्रफाल्गुनात् ॥ साक्षाद्दर्शनमेतेषामीश्वराणांनरोभुवि ७ महेश्वरेणयोराजन्नजीर्णोह्यष्टमूर्तिना ॥ कस्तमुत्स
हतेवीरोयुद्धेजरयितुंपुमान् ८ आसादितमिदंघोरंतुमुलंलोमहर्षणम् ॥ द्रौपदींपरिकर्षद्भिःकोपयद्भिश्चपांडवान् ९ यत्तुप्रस्फुरमाणोष्ठोभीमःप्राहवचोऽर्थवत् ॥
दृष्ट्वादुर्योधनेनोरूद्रौपद्यादर्शितावुभौ १० ऊरूभेत्स्यामितेपापगदयाभीमवेगया ॥ त्रयोदशानांवर्षाणामंतेदुर्द्यूतदेविनः ११ सर्वेप्रहरतांश्रेष्ठाःसर्वेचामितते
जसः ॥ सर्वेसर्वास्त्रविद्वांसोदेवैरपिसुदुर्जयाः १२ मन्येमन्युसमुद्भूताःपुत्राणांतवसंयुगे ॥ अंतंपार्थाःकरिष्यंतिभार्यामर्षसमन्विताः १३ ॥ ॥ धृतराष्ट्रउ
वाच ॥ ॥ किंकृतंसूतकर्णेनवदतापरुषंवचः ॥ पर्याप्तवैरमेतावद्यत्कृष्णासासभांगता १४ अपीदानींममसुतास्तिष्ठेरन्मंदचेतसः ॥ तेषांभ्रातागुरुर्ज्येष्ठो
विनयेनावतिष्ठते १५ ममापिवचनंसूतनशुश्रूषतिमंदभाक् ॥ दृष्ट्वामांचक्षुषाहीनंनिर्विचेष्टमचेतसम् १६ येचास्यसचिवामंदाःकर्णसौबलकादयः ॥ तेतस्य
भूयसोदोषान्वर्द्धयंतिविचेतसः १७ स्वैरमुक्ताह्यपिशराःपार्थेनामिततेजसा ॥ निर्दहेयुर्ममसुतान्किंपुनर्मन्युनेरिताः १८

चत्वारिंशोऽध्यायः ४८ ॥ ॥ यदेतदिति १ । २ । ३ । ४ । ५ । ६ । ७ नजीर्णोनक्षीणः अष्टौ पंचभूतानि सूर्यचंद्रपुरुषाश्चमूर्तयोयस्य ८ । ९ । १० दुर्द्यूतदेविनः छद्मद्यूतेनजेतुका
मस्य ११ । १२ अंतंनाशम् १३ । १४ विनयेनीतौ १५ । १६ । १७ । १८

१९ । २० । २१ । २२ नहिसंतीतिशेषः २३ ॥ ॥ इत्यारण्यकेप॰नै॰भा॰एकोनपंचाशत्तमोऽध्यायः ४९ ॥ ॥ यदिदंशोचितमित्यादेरध्यायद्वयस्यतात्पर्यं सत्यसंरक्षणेकृतेदेवा
मानुषाश्चानुगृह्णंतीति १ । २ वानेयंवनभवंनीवारादि कृष्टंकर्षणजंग्राम्यधान्यम् ३ शुद्धैर्विषालिप्तैः 'विषलिप्तेनबाणेनयौहतौमृगपक्षिणौ । तयोर्मांसंकलंजंतद्भुक्त्वाचांद्रायणं चरेत्' इति

पार्थबाहुबलोत्सृष्टामहाचापविनिःसृताः ॥ दिव्यास्त्रमंत्रमुदिताःसादयेयुःसुरानपि १९ यस्यमंत्रीचगोप्ताचसुहृच्चैवजनार्दनः ॥ हरिस्त्रैलोक्यनाथःसकिंनुत
स्यननिर्जितम् २० इदंहिसुमहच्चित्रमर्जुनस्येहसंजय ॥ महादेवेनबाहुभ्यांयत्समेतइतिश्रुतिः २१ प्रत्यक्षंसर्वलोकस्यखाण्डवेयत्कृतंपुरा ॥फाल्गुनेनसहाया
र्थेवन्हेर्दामोदरेणच २२ सर्वथानहिमेपुत्राःसहामात्याःससौबलाः ॥ क्रुद्धेपार्थेचभीमेचवासुदेवेचसात्वते २३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलो
काभिगमनपर्वणिधृतराष्ट्रखेदेएकोनपंचाशत्तमोऽध्यायः ४९ ॥ ॥ जनमेजयउवाच ॥ यदिदंशोचितंराज्ञाधृतराष्ट्रेणवैमुने ॥ प्रव्राज्यपांडवान्वीरान्स
र्वमेतन्निरर्थकम् १ कथंचराजपुत्रंतमुपेक्षेताल्पचेतसम् ॥ दुर्योधनंपांडुपुत्रान्कोपयानंमहारथान् २ किमासीत्पांडुपुत्राणांवनेभोजनमुच्यताम् ॥ वानेयमथ
वाकृष्टमेतदाख्यातुनोभवान् ३ ॥ वैशंपायनउवाच ॥ वानेयंचमृगांश्चैवशुद्धैर्बाणैर्निपातितान् ॥ ब्राह्मणानांनिवेद्याग्रमभुंजन्पुरुषर्षभाः ४ तांस्तुशूरान्महे
ष्वासांस्तदानिवसतोवने ॥ अन्वयुर्ब्राह्मणाराजन्साग्नयोऽनग्नयस्तथा ५ ब्राह्मणानांसहस्राणिस्नातकानांमहात्मनाम् ॥ दशमोक्षविदांतत्रयान्बिभर्तियुधिष्ठि
रः ६ रुरून्कृष्णमृगांश्चैवमेध्यांश्चान्यान्वनेचरान् ॥ बाणैरुन्मथ्यविविधैर्ब्राह्मणेभ्योन्यवेदयत् ७ नतत्रकश्चिद्दुर्वर्णोव्याधितोवाऽपिदृश्यते ॥ कृशोवादुर्बलो
वाऽपिदीनोभीतोपिवापुनः ८ पुत्रानिवप्रियान्भ्रातॄन्ज्ञातीनिवसहोदरान् ॥ पुपोषकौरवश्रेष्ठोधर्मराजोयुधिष्ठिरः ९ पतींश्चद्रौपदीसर्वान्द्विजातींश्चयशस्विनी ॥
मातृवद्भोजयित्वाग्रेशिष्टमाहारयत्तदा १० प्राचींराजादक्षिणांभीमसेनोयमौप्रतीचीमथवाऽप्युदीचीम् ॥ धनुर्धरामांसहेतोर्मृगाणांक्षयंचक्रुर्नित्यमेवोपगम्य ११
तथातेषांवसतांकाम्यकेवैविहीनानामर्जुनेनोत्सुकानाम् ॥ पंचैववर्षाणितथाव्यतीयुरधीयतांजपतांजुह्वतांच १२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणि
इंद्रलोकाभिगमनपर्वणिपार्थाहारकथनेपंचाशत्तमोऽध्यायः ५० ॥ ॥ छ ॥ ॥ वैशंपायनउवाच ॥ ॥ तेषांतच्चरितंश्रुत्वामनुष्यातीतमद्भुत
म् ॥ चिंताशोकपरीतात्मामन्युनाऽभिपरिप्लुतः १ दीर्घमुष्णंचनिःश्वस्यधृतराष्ट्रोऽम्बिकासुतः ॥ अब्रवीत्संजयंसूतमामंत्र्यपुरुषर्षभ २ नरात्रौनदिवासूत
शांतिंप्राप्नोमिवैक्षणम् ॥ संचिंत्यदुर्नयंघोरमतीतंद्यूतजंहितत् ३ तेषामसह्यवीर्याणांशौर्यंधैर्यंधृतिंपराम् ॥अन्योन्यमनुरागंचभ्रातॄणामतिमानुषम् ४ देव
पुत्रौमहाभागौदेवराजसमद्युती ॥ नकुलःसहदेवश्चपांडवौयुद्धदुर्मदौ ५ दृढायुधौदूरपातौयुद्धेचकृतनिश्चयौ ॥ शीघ्रहस्तौदृढक्रोधौनित्ययुक्तौतरस्विनौ ६

स्मृतेः । अग्रंहंतकारप्रदेयम् ४ अनग्नयः परिव्राजकाः ५ । ६ । ७ । ८ । ९ आहारयत्आहारंकृतवती १० । ११ । १२ ॥ ॥ इत्यारण्यकेपर्वणिनै॰भा॰पंचाशत्तमोऽध्यायः ॥ ५० ॥
॥ तेषामिति मन्युनादैन्येन १ । २ । ३ । ४ । ५ । ६

७ । ८ नक्षंस्येतेक्षमांनकरिष्यतः ९ । १० सहितुंसोढुं ११ शैक्यया शिक्यस्थया मूर्तिभिस्त्वाप तालंप्रवेक्ष्यतीतिमयादंतरिक्षेपक्षवत्वेत्यर्थः १२ । १३ । १४ पुत्रस्तेत्वया १५ । १६

भीमार्जुनौपुरोवायययदातौरणमूर्धनि ॥ स्थास्येतेसिंहविक्रांतावश्विनाविवदुःसहौ ७ निःशेषमिहपश्यामिममसैन्यस्यसंजय ॥ तौह्यप्रतिरथौयुद्धेदेवपुत्रौमहा
रथौ ८ द्रौपद्यास्तंपरिक्लेशंनक्षंस्येतेत्वमर्षिणौ ॥ वृष्णयोऽथमहेष्वासाःपंचालावामहौजसः ९ युधिसत्याभिसंधेनवासुदेवेनरक्षिताः ॥ प्रधक्ष्यंतिरणेपार्थाःपु
त्राणांममवाहिनीम् १० रामकृष्णप्रणीतानांवृष्णीनांसूतनंदन ॥ नशक्यःसहितुंवेगःसर्वैस्तैरपिसंयुगे ११ तेषांमध्येमहेष्वासोभीमोभीमपराक्रमः ॥ शैक्यया
वीरघातिन्यागदयाविचरिष्यति १२ तथागांडीवनिर्घोषंविस्फूर्जितमिवाशनेः ॥ गदावेगंचभीमस्यनालंसोढुंनराधिपाः १३ ततोहंसुहृदांवाचोदुर्योधनवशा
नुगः ॥ स्मरणीयाःस्मरिष्यामिमयायानकृताःपुरा १४ ॥ संजयउवाच ॥ व्यतिक्रमोऽयंसुमहांस्त्वयाराजन्नुपेक्षितः ॥ समर्थेनापियन्मोहात्पुत्रस्तेननिवारि
तः १५ श्रुत्वाहिनिर्जितान्द्यूतेपांडवान्मधुसूदनः ॥ त्वरितःकाम्यकेपार्थान्समभावयदच्युतः १६ द्रुपदस्यतथापुत्राधृष्टद्युम्नपुरोगमाः ॥ विराटोधृष्टकेतुश्च
केकयाश्चमहारथाः १७ तैश्चयत्कथितंराजन्दृष्ट्वापार्थान्पराजितान् ॥ चारेणविदितंसर्वंतन्मयाऽवेदितंचते १८ समागम्यवृतस्तत्रपांडवैर्मधुसूदनः ॥ सार
थ्येफाल्गुनस्याजौतथेत्याहचतान्हरिः १९ अमर्षितोहिकृष्णोऽपिदृष्ट्वापार्थांस्तदागतान् ॥ कृष्णाजिनोत्तरासंगानब्रवीच्चयुधिष्ठिरम् २० यासासमृद्धिःपार्था
नामिंद्रप्रस्थेबभूवह ॥ राजसूयेमयादृष्टानृपैरन्यैःसुदुर्लभा २१ यत्रसर्वान्महीपालान्शस्त्रतेजोभयार्दितान् ॥ सवंगांगान्सपौंड्रोड्रान्सचोलद्राविडांध्रकान् २२
सागरानूपकांश्चैवयेचप्रांताभिवासिनः ॥ सिंहलान्बर्बरान्म्लेच्छान्येचलंकानिवासिनः २३ पश्चिमानिचराष्ट्राणिशतशःसागरांतिकान् ॥ पल्हवान्दरदान्स
र्वान्किरातान्यवनान्शकान् २४ हारहूणांश्चचीनांश्चतुषारान्सैंधवांस्तथा ॥ जागुडान्रामठान्मुंडान्स्त्रीराज्यमथतंगणान् २५ केकयान्मालवांश्चैवतथाका
श्मीरकानपि ॥ अद्राक्षमहमाहूतान्यज्ञेतेपरिवेषकान् २६ सातेसमृद्धिर्यैराताचपलाप्रतिसारिणी ॥ आदायजीवितंतेषामाहरिष्यामितामहम् २७ रामेणस
हकौरव्यभीमार्जुनयमैस्तथा ॥ अक्रूरगदसांबैश्चप्रद्युम्नेनाहुकेनच २८ धृष्टद्युम्नेनवीरेणशिशुपालात्मजेनच ॥ दुर्योधनंरणेहत्वासद्यःकर्णंचभारत २९ दुःशा
सनंसौबलेयंयश्चान्यःप्रतियोत्स्यते ॥ ततस्त्वंहास्तिनपुरेभ्रातृभिःसहितोवसन् ३० धार्तराष्ट्रींश्रियंप्राप्यप्रशाधिपृथिवीमिमाम् ॥ अथैनमब्रवीद्राजातस्मि
न्वीरसमागमे ३१ शृण्वत्स्वेतेषुवीरेषुधृष्टद्युम्नमुखेषुच ॥ ॥ युधिष्ठिरउवाच ॥ ॥ प्रतिगृह्णामितेवाचमिमांसत्यांजनार्दन ३२

१७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ प्रतिसारिणीप्रतीपंसरतीति नीचानुगामिनीत्यर्थः आहरिष्यामिइदानीमेवेतिशेषः अतएवप्रार्थना सत्यंमांकुर्विति
२७ । २८ । २९ । ३० । ३१ ३२

३३ । ३४ समयामासुः समंयुक्तमित्याचख्युः । समशब्दात्तदाचष्टइतिणिच्लिटिआम् । शमयामासुरितिपाठेस्पष्टोऽर्थः ३५ । ३६ । ३७ । ३८ । ३९ । ४० अहतलक्षणाअखंडितध्व
जाः । आहतलक्षणाइतिपाठेआह वयोग्यानि शौर्यद्योतकानिलक्षणानि सामुद्रिकचिह्नानियेषामित्यर्थः ४१ । ४२ युयुधानः सात्यकिः ४३ केसारिणः क्रोधेनोच्छ्रितसटान् ४४ । ४५ । ४६

अमित्रान्मेमहाबाहोसानुबंधाहनिष्यसि ॥ वर्षात्त्रयोदशादूर्ध्वंसत्यंमांकुरुकेशव ३३ प्रतिज्ञातोवनेवासोराजमध्येमयाह्ययम् ॥ तद्धर्मराजवचनंप्रतिश्रुत्यसभा
सदः ३४ धृष्टद्युम्नपुरोगास्तेसमयामासुरंजसा ॥ केशवंमधुरैर्वाक्यैःकालयुक्तैरमर्षितम् ३५ पांचालीमाहुरक्लिष्टांवासुदेवस्यशृण्वतः ॥ दुर्योधनस्तवक्रोधा
द्देवित्यक्ष्यतिजीवितम् ३६ प्रतिजानीमहेसत्यंमाशुचोवरवर्णिनि ॥ येस्मतेऽक्षजितांकृष्णेदृष्ट्वात्वांप्राहसंस्तदा ॥ मांसानितेषांखादंतोहरिष्यंतिवृकद्विजाः
३७ पास्यंतिरुधिरंतेषांगृध्रागोमायवस्तथा ॥ उत्तमांगानिकर्षंतोयैःकृष्टाऽसिसभातले ३८ तेषांद्रक्ष्यसिपांचालिगात्राणिपृथिवीतले ॥ क्रव्यादैःकृष्यमाणा
णानिभक्ष्यमाणानिचासकृत् ३९ परिक्लिष्टाऽसियैस्तत्रयैश्चासिसमुपेक्षिता ॥ तेषामुत्कृत्तशिरसांभूमिःपास्यतिशोणितम् ४० एवंबहुविधावाचस्तऊचुर्भरत
र्षभाः ॥ सर्वेतेजस्विनःशूराःसर्वेचाहतलक्षणाः ४१ तेधर्मराजेनवृतावर्षादूर्ध्वंत्रयोदशात् ॥ पुरस्कृत्योपयास्यंतिवासुदेवंमहारथाः ४२ रामश्चकृष्णश्चधनंज
यश्चप्रद्युम्नसांबौयुयुधानभीमौ ॥ माद्रीसुतौकेकयराजपुत्राःपंचालपुत्राःसहमत्स्यराज्ञा ४३ एतान्सर्वाँल्लोकवीरानजेयान्महात्मनःसानुबंधान्ससैन्यान् ॥ कोजी
वितार्थीसमरेऽभ्युदीयात्क्रुद्धान्सिंहान्केसरिणोयथैव ४४ ॥ धृतराष्ट्रउवाच ॥ यन्माऽब्रवीद्विदुरोद्यूतकालेत्वंपांडवाञ्जेष्यसिचेन्नरेंद्र ॥ ध्रुवंकुरूणामयमं
तकालोमहाभयोभविताशोणितौघः ४५ मन्येतथातद्भवितेतिसूतयथाक्षत्ताप्राहवचःपुरामाम् ॥ असंशयंभवितायुद्धमेतद्गतेकालेपांडवानांयथोक्तम् ४६ ॥
इतिश्रीमहाभारतेआरण्यकेपर्वणिइंद्रलोकाभिगमनपर्वणिधृतराष्ट्रविलापेएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ समाप्तमिंद्रलोकाभिगमनपर्व ॥ अथनलो
पाख्यानपर्व ॥ ॥ जनमेजयउवाच ॥ ॥ अस्त्रहेतोर्गतेपार्थेशक्रलोकंमहात्मनि ॥ युधिष्ठिरप्रभृतयःकिमकुर्वतपांडवाः १ ॥ ॥ वैशंपायनउवाच ॥
॥ अस्त्रहेतोर्गतेपार्थेशक्रलोकंमहात्मनि ॥ आवसन्कृष्णयासार्धंकाम्यकेभरतर्षभाः २ ततःकदाचिदेकांतेविविक्तइवशाद्वले ॥ दुःखार्ताभरतश्रेष्ठानिषेदुःसह
कृष्णया ३ धनंजयंशोचमानाःसाश्रुकंठाःसुदुःखिताः ॥ तद्वियोगार्दितान्सर्वाञ्शोकःसमभिपुप्लुवे ४ धनंजयवियोगाच्चराज्यभ्रंशाच्चदुःखिताः ॥ अथभीमो
महाबाहुर्युधिष्ठिरमभाषत ५ निदेशात्तेमहाराजगतोऽसौभरतर्षभः ॥ अर्जुनःपांडुपुत्राणांयस्मिन्प्राणाःप्रतिष्ठिताः ६ यस्मिन्विनष्टेपंचालाःसहपुत्रैस्तथाव
यम् ॥ सात्यकिर्वासुदेवश्चविनश्येयुर्नसंशयः ७ योऽसौगच्छतिधर्मात्माबहून्क्लेशान्विचिंतयन् ॥ भवन्नियोगाद्बीभत्सुस्ततोदुःखतरंनुकिम् ८ यस्यबाहूसमा
श्रित्यवयंसर्वेमहात्मनः ॥ मन्यामहेजितानाजौपरान्प्राप्तांचमेदिनीम् ९ यस्यप्रभावान्नमयासभामध्येधनुष्मतः ॥ नीतालोकममुंसर्वेधार्तराष्ट्राःससौबलाः १०

॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकपंचाशत्तमोऽध्यायः ५१ ॥ अस्त्रेति १ आवसन् आवासंकृतवंतः २।३ पुप्लुवेआविष्टवान् ४।५ निदेशात् आज्ञातः ६।७।८।९ अमुंलोकंपरलोकम् १०

११ । १२ अहीनपौरुषाअपिवयंउपप्लुताःकृताः येबालामूर्खादुर्योधनादयस्तेबलिभिःसामंतदसैर्धनैर्बलवत्तराःकृताः १३।१४ मानीनशःमानाशय १५ । १६। १७ । १८ । १९ ।२० बालिशः
बालवद्वृथाहठी दीर्घसूत्रश्चिरकारी २१।२२।२३ वेदेश्रूयते । 'विश्वसृजाःसहस्रसंवत्सरम्'इति । अत्रहिसंवत्सरशब्दोदिनपरःकृतःअन्यथाशतायुर्वैपुरुषइति श्रुतेरनधिकारिकंतास्त्रमप्रमाणं
स्यात्तावदायुषोलोकेऽदर्शनाच्चकृच्छ्रूत इति द्वादशवार्षिकंप्रायश्चित्तंप्रतिज्ञातं तत्कृच्छूतःकृच्छ्रैरपिसद्योभवतितथाहि । 'त्रिंशताप्राजापत्यकृच्छ्रैरेकोऽब्दोभवति' एवंमित्रविंदेष्टिपवित्रे

तेवयंबाहुबलिनःक्रोधमुत्थितमात्मनः ॥ सहामहेभवन्मूलंवासुदेवेनपालिताः ११ वयंहिसहकृष्णेनहत्वाकर्णमुखान्परान् ॥ स्वबाहुविजितांकृत्स्नांप्रशासेमव
सुंधरां १२ भवतोद्यूतदोषेणसर्वेवयमुपप्लुताः ॥ अहीनपौरुषाबालाबलिभिर्बलवत्तराः १३ क्षात्रंधर्मंमहाराजत्वमवेक्षितुमर्हसि ॥ नहिधर्मोमहाराजक्षत्रियस्य
वनाश्रयः १४ राज्यमेवपरंधर्मंक्षत्रियस्यविदुर्बुधाः ॥ सक्षत्रधर्मविद्राजामाधर्म्यान्नीनशःपथः १५ प्राग्द्वादशसमाराजन्धार्तराष्ट्रान्निहन्महि ॥ निवर्त्यचवना
त्पार्थमानाय्यचजनार्दनम् १६ व्यूढानीकान्महाराजजवेनैवमहामते ॥ धार्तराष्ट्रानमुंलोकंगमयामिविशांपते १७ सर्वानहंहनिष्यामिधार्तराष्ट्रान्ससौबलान् ॥
दुर्योधनंचकर्णंचयोवाऽन्यःप्रतियोत्स्यते १८ मयाप्रशमितेपश्चात्त्वमेष्यसिवनंपुनः ॥ एवंकृतेनतेदोषाभविष्यंतिविशांपते १९ यज्ञैश्चाविविधैस्तातकृतंपापम
रिंदम ॥ अवधूयमहाराजगच्छेमस्वर्गमुत्तमम् २० एवमेतद्भवेद्राजन्यदिराजानबालिशः ॥ अस्माकंदीर्घसूत्रःस्याद्भवान्धर्मपरायणः २१ निकृत्यानिकृतिप्र
ज्ञाहंतव्याइतिनिश्चयः ॥ नहिनैकृतिकंहत्वानिकृत्यापापमुच्यते २२ तथाभारतधर्मेषुधर्मज्ञैरिहदृश्यते ॥ अहोरात्रंमहाराजतुल्यंसंवत्सरेणह २३ तथैववेदव
चनंश्रूयतेनित्यदाविभो ॥ संवत्सरोमहाराजपूर्णोभवतिकृच्छ्रतः २४ यदिवेदाःप्रमाणास्तेदिवसादूर्ध्वमच्युत ॥ त्रयोदशसमाःकालोज्ञायतांपरिनिष्ठितः २५
कालोदुर्योधनंहंतुंसानुबंधमरिंदम ॥ एकाग्रांपृथिवींसर्वांपुराराजन्करोतिसः २६ द्यूतप्रियेणराजेंद्रतथातद्भवताकृतम् ॥ प्रायेणाज्ञातचर्यायांवयंसर्वेनिपातिताः ॥
२७ नतंदेशंप्रपश्यामियत्रसोऽस्मान्सुदुर्जनः ॥ नविज्ञास्यतिदुष्टात्माचारैरितिसुयोधनः २८ अधिगम्यचसर्वान्नोवनवासमिमंततः ॥ प्रव्राजयिष्यतिपुन
र्निकृत्याऽधमपूरुषः २९ यद्यस्मानभिगच्छेतपापःसहिकथंचन ॥ अज्ञातचर्यामुत्तीर्णान्दृष्ट्वाचपुनराह्वयेत् ३० द्यूतेनतेमहाराजपुनर्द्यूतमवर्तत ॥ भवांश्चपु
नराहूतोद्यूतेनैवापनेष्यति ३१ सतथाक्षेषुकुशलोनिश्चितोगतचेतनः ॥ चरिष्यसिमहाराजवनेषुवसतीःपुनः ३२ यद्यस्मान्सुमहाराजकृपणान्कर्तुमर्हसि ॥
यावज्जीवमवेक्षस्ववेदधर्मांश्चकृत्स्नशः ३३ निकृत्यानिकृतिप्रज्ञोहंतव्यइतिनिश्चयः ॥ अनुज्ञातस्त्वयागत्वायावच्छक्तिसुयोधनम् ३४ यथैवकक्षमुत्सृष्टोदहेद
निलसारथिः ॥ हनिष्यामितथामंदमनुजानातुमेभवान् ३५

ष्टिमृगारेष्टिप्रभृतिभिर्दशदशप्राजापत्यस्थानेधर्मशास्त्रेविहिताभिर्द्वादशवार्षिकंव्रतंसमापयितुंशक्यमित्यर्थः २४ । २५ पुराअग्रे २६ । २७ । २८। २९ । ३० द्यूतेद्यूतार्थंपुनराह्वयेत् नन्वाहूतो
ऽप्यहंनगमिष्यामीत्याशंक्याहपुनर्द्यूतमवर्तत पूर्वमप्यनुद्यूतस्यकृतत्वात्पुनरपिद्यूतंकरिष्यस्येवेत्यर्थः अपनेष्यतिदूरीकरिष्यति श्रियमितिशेषः ३१।३२।३३।३४ कक्षंतृणंअनिलःवैतिशेषः३५

३६ । ३७ अनृतमिति विश्वसृजांसत्रेसंवत्सरशब्दोनिकालपरःकिंतु'पंचपंचा शतखिद्दतःसंवत्सराःपंचपंचाशतःपंचदशाः'इत्यादि ...तौसंवत्सरपदस्यत्रिवृदादिशब्दसामानाधिकरण्याददृःशब्द
वाच्यक्रतुपरत्वंदृष्टं अतःसंवत्सरशब्दोदिनपरइतिप्रवादमात्रंपंचपंचाशतइतिपंचाशदधिकंशतद्वयमुच्यते । नहिकालेनकर्तव्यंव्रतंकर्मणासमाप्यितुंशक्यमितिभावः ३८ । ३९ । ४० । ४१

॥ वैशंपायनउवाच ॥ एवंब्रुवाणंभीमंतुधर्मराजोयुधिष्ठिरः ॥ उवाचसांत्वयन्राजामूर्ध्न्युपाघ्रायपांडवम् ३६ असंशयंमहाबाहोहनिष्यसिसुयोधनम् ॥ वर्षात्त्रयो
दशादूर्ध्वंसहगांडीवधन्वना ३७ यत्त्वमाभाषसेपार्थप्राप्तःकालइतिप्रभो ॥ अनृतंनोत्सहेवक्तुंनह्येतन्ममविद्यते ३८ अंतरेणापिकौंतेयनिकृतिंपापनिश्चयम् ॥
हंतात्वमसिदुर्धर्षमानुबंधंसुयोधनम् ३९एवंब्रुवतिभीमंतुधर्मराजेयुधिष्ठिरे ॥ आजगाममहाभागोबृहदश्वोमहानृषिः ४० तमभिप्रेक्ष्यधर्मात्मासंप्राप्तंधर्मचारिणम्॥
शास्त्रवन्मधुपर्केणपूजयामासधर्मराट् ४१ आश्वस्तंचैनमासीनमुपासीनोयुधिष्ठिरः ॥ अभिप्रेक्ष्यमहाबाहुःकृपणंबह्वभाषत ४२ अक्षद्यूतेचभगवन्धनंराज्यं
चमेहृतम् ॥ आहूयनिकृतिप्रज्ञैःकितवैरक्षकोविदैः ४३ अनक्षज्ञस्यहिसतोनिकृत्यापापनिश्चयैः ॥ भार्याचमेसभांनीताप्राणेभ्योऽपिगरीयसी ४४ पुनर्द्यूतेन
मांजित्वावनवासंसुदारुणम् ॥ प्राव्राजयन्महारण्यमजिनैःपरिवारितम् ४५ अहंवनेदुर्वसतीर्वसन्परमदुःखितः ॥ अक्षद्यूताधिकारेचगिरःशृण्वन्सुदारुणाः ४६
आर्तानांसुहृदांवाचोद्यूतप्रभृतिशंसताम्॥अहंहृदिश्रिताःस्मृत्वासर्वरात्रीर्विचिंतयन् ४७यस्मिंश्चैवसमस्तानांप्राणागांडीवधन्वनि ॥ विनामहात्मनातेनगतसत्व
इवाभवम् ४८ कदाद्रक्ष्यामिबीभत्सुंकृतास्त्रंपुनरागतम् ॥ प्रियवादिनमक्षुद्रंदयायुक्तमतंद्रितः ४९ अस्तिराजामयाकश्चिदल्पभाग्यतरोभुवि ॥ भवताद्दृष्टपूर्वो
वाश्रुतपूर्वोऽपिवाक्वचित् ॥ नमत्तोदुःखिततरःपुमानस्तीतिमेमतिः ५० ॥ बृहदश्वउवाच ॥ यद्ब्रवीषिमहाराजनमत्तोविद्यतेक्वचित् ॥ अल्पभाग्यतरः
कश्चित्पुमानस्तीतिपांडव ५१ अत्रतेवर्णयिष्यामियदिशुश्रूषसेऽनघ ॥ यस्त्वत्तोदुःखिततरोराजाऽऽसीत्पृथिवीपते ५२ ॥ वैशंपायनउवाच ॥ अथैनम
ब्रवीद्राजाब्रवीतुभगवानिति ॥ इमामवस्थांसंप्राप्तंश्रोतुमिच्छामिपार्थिवम् ५३ ॥ बृहदश्वउवाच ॥ शृणुराजन्नवहितःसहभ्रातृभिरच्युत ॥ यस्त्वत्तोदुःखितत
रोराजाऽऽसीत्पृथिवीपते ५४ निषधेषुमहीपालोवीरसेनइतिश्रुतः ॥ तस्यपुत्रोऽभवन्नाम्नानलोधर्मार्थकोविदः ५५ सनिकृत्याजितोराजापुष्करेणेतिनःश्रुतम् ॥
वनवासंसुदुःखार्तोभार्ययान्यवसत्सह ५६ नतस्यदासानरथोनभ्रातानचबांधवाः ॥ वनेनिवसतोराजन्शिष्यंतेस्मकदाचन ५७ भवान्हिसंवृतोवीरैर्भ्रातृभिर्दे
वसंमितैः ॥ ब्रह्मकल्पैर्द्विजाग्र्यैश्चतस्मान्नार्हसिशोचितुम् ५८ ॥ युधिष्ठिरउवाच ॥ विस्तरेणाहमिच्छामिनलस्यसुमहात्मनः ॥ चरितंवदतांश्रेष्ठतन्ममा
ख्यातुमर्हसि ५९ ॥ इतिश्रीमहाभारतेआ०नलोपाख्यानप०द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ७ ॥

४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ अत्रैवार्थेसत्यंसर्वथानत्याज्यमितिआख्यायिकाद्वाराभीमसेनंबोधयितुंराज्ञाबृहदश्वःप्रवर्त्यते अस्तिराजामयाकश्चिदित्यादिना ५० । ५१
५२ । ५३ । ५४ । ५५ पुष्करेणराज्ञा ५६ शिष्यंतेअवशिष्टाः कालस्त्वविवक्षितः ५७ । ५८ । ५९ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ७ ॥

आसीदिति उपपन्नोतियुक्तः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ सौदामनिप्रावृषेण्यमेघसंबंधिनी सुद्गजगतोजविनंददातितेसुदामानोमेघास्तेषांसमूहःसौदामनः प्रावृट्
कालस्तत्संबंधिनी साहिअत्यंतंद्योतमानाभवतीतिप्रसिद्धम् १२ । १३ । १४ मूर्तिमानशरीरी १५ प्रशशंसुः वार्ताहराइतिशेषः १६ हृच्छयः कामः १७ । १८ जातरूपपरिष्कृतान्

॥ बृहदश्वउवाच ॥ आसीद्राजानलोनामवीरसेनसुतोबली ॥ उपपन्नोगुणैरिष्टैरूपवानश्वकोविदः १ अतिष्ठन्मनुजेंद्राणांमूर्ध्निदेवपतिर्यथा ॥ उपर्युपरिस
र्वेषामादित्यइवतेजसा २ ब्रह्मण्योवेदविच्छूरोनिषधेषुमहीपतिः ॥ अक्षप्रियःसत्यवादीमहानक्षौहिणीपतिः ३ ईप्सितोवरनारीणामुदारःसंयतेंद्रियः ॥ रक्षि
ताधन्विनांश्रेष्ठःसाक्षादिवमनुःस्वयम् ४ तथैवासीद्विदर्भेषुभीमोभीमपराक्रमः ॥ शूरःसर्वगुणैर्युक्तःप्रजाकामःसचाप्रजः ५ सप्रजार्थेपरंयत्नमकरोत्सुसमाहि
तः ॥ तमभ्यगच्छद्ब्रह्मर्षिर्दमनोनामभारत ६ तंसभीमःप्रजाकामस्तोषयामासधर्मवित् ॥ महिष्यासहराजेंद्रसत्कारेणसुवर्चसम् ७ तस्मैप्रसन्नोदमनःसभा
र्यायवरंददौ ॥ कन्यारत्नंकुमारांश्चत्रीनुदारान्महायशाः ८ दमयंतींदमंदांतंदमनंचसुवर्चसम् ॥ उपपन्नान्गुणैःसर्वैर्भीमान्भीमपराक्रमान् ९ दमयंतीतुरूपेण
तेजसायशसाश्रिया ॥ सौभाग्येनचलोकेषुयशःप्रापसुमध्यमा १० अथतांवयसिप्राप्तेदासीनांसमलंकृतम् ॥ शतंशतंसखीनांचपर्युपासच्छचीमिव ११ तत्र
स्मराजतेभैमीसर्वाभरणभूषिता ॥ सखीमध्येऽनवद्यांगीविद्युत्सौदामनीयथा १२ अतीवरूपसंपन्नाश्रीरिवायतलोचना ॥ नदेवेषुनयक्षेषुतादृग्रूपवतीक्वचित्
१३ मानुषेष्वपिचान्येषुदृष्टपूर्वाऽथवाश्रुता ॥ चित्तप्रसादनीबालादेवानामपिसुंदरी १४ नलश्चनरशार्दूलोलोकेष्वप्रतिमोभुवि ॥ कंदर्पइवरूपेणमूर्तिमानभ
वत्स्वयम् १५ तस्याःसमीपेतुनलंप्रशशंसुःकुतूहलात् ॥ नैषधस्यसमीपेतुदमयंतींपुनःपुनः १६ तयोरदृष्टःकामोऽभूच्छृण्वतोःसततंगुणान् ॥ अन्योन्यंप्र
तिकौंतेयसव्यवर्धतहृच्छयः १७ अशक्नुवन्नलःकामंतदाधारयितुंहृदा ॥ अंतःपुरसमीपस्थेवनआस्तेरहोगतः १८ सददर्शततोहंसाञ्जातरूपपरिष्कृतान् ॥
वनेविचरतांतेषामेकंजग्राहपक्षिणम् १९ ततोऽन्तरिक्षगोवाचंव्याजहारनलंतदा ॥ हंतव्योऽस्मिनतेराजन्करिष्यामितवप्रियम् २० दमयंतीसकाशेत्वांकथ
यिष्यामिनैषध ॥ यथात्वदन्यंपुरुषंनसामंस्यतिकर्हिचित् २१ एवमुक्तस्ततोहंसमुत्ससर्जमहीपतिः ॥ तेतुहंसाःसमुत्पत्यविदर्भानगमंस्ततः २२ विदर्भन
गरींगत्वादमयंत्यास्तदांतिके ॥ निपेतुस्तेगरुत्मंतःसाददर्शचतान्खगान् २३ सातानद्भुतरूपान्वैदृष्ट्वासखिगणावृता ॥ हृष्टाग्रहीतुंखगमांस्त्वरमाणोपचक्र
मे २४ अथहंसाविससृपुःसर्वतःप्रमदावने ॥ एकैकशस्तदाकन्यास्तान्हंसान्समुपाद्रवन् २५ दमयंतीतुयंहंसंसमुपाधावदंतिके ॥ समानुषींगिरंकृत्वादमयंती
मथाब्रवीत् २६ दमयंतिनलोनामनिषधेषुमहीपतिः ॥ अश्विनोःसदृशोरूपेनसमास्तस्यमानुषाः २७ कंदर्पइवरूपेणमूर्तिमानभवत्स्वयम् ॥ तस्यवैयदि
भार्यात्वंभवेथावरवर्णिनि २८ सफलंतेभवेज्जन्मरूपंचेदंसुमध्यमे ॥ वयंहिदेवगंधर्वमनुष्योरगराक्षसान् २९

सुवर्णपक्षान् १९ अंतरिक्षगः खगः २० । २१ । २२ गरुत्मंतः पक्षवंतः २३ । २४ । २५ । २६ । २७ । २८ । २९

३० संग्रामः कामयुद्धंसुरतमित्यर्थः संगमइतिपाठेऽपिसएवार्थः ३१ । ३२ ॥ ॥ इत्या॰नै॰भा॰त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ दमयंतीति १ । २ । ३ । ४ जज्ञुः ज्ञातवत्यः

दृष्टवंतोनचास्माभिर्दृष्टपूर्वस्तथाविधः ॥ त्वंचापिरत्नंनारीणांनरेषुचनलोवरः ३० विशिष्टयाविशिष्टेनसंग्रामोगुणवान्भवेत् ॥ एवमुक्तातुहंसेनदमयंतीविशां
॥४८॥ पते ३१ अब्रवीत्तत्रतंहंसंत्वमप्येवंनलेवद ॥ तथेत्युक्त्वांडजःकन्यांविदर्भस्यविशांपते ॥ पुनरागम्यनिषधान्नलेसर्वंन्यवेदयत् ३२ ॥ ॥ इतिश्रीमहाभारते
आरण्यकेपर्वणिनलोपाख्यानप॰हंसदमयंतीसंवादोत्रपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ बृहदश्वउवाच ॥ दमयंतीतुतच्छ्रुत्वावचोहंस
स्यभारत ॥ ततःप्रभृतिनस्वस्थानलंप्रतिबभूवसा १ ततश्चितापरादीनाविवर्णवदनाकृशा ॥ बभूवदमयंतीतुनिःश्वासपरमातदा २ ऊर्ध्वदृष्टिर्ध्यानपरा
बभूवोन्मत्तदर्शना ॥ पांडुवर्णाक्षणेनाथहृच्छयाविष्टचेतना ३ नशय्यासनभोगेषुरतिंविंदतिकर्हिचित् ॥ ननक्तंनदिवाशेतेहाहेतिरुदतीपुनः ४ तामस्वस्थांत
दाकारांसख्यस्ताजज्ञुरिंगितैः ॥ ततोविदर्भपतयेदमयंत्याःसखीजनः ५ न्यवेदयत्तामस्वस्थांदमयंतींनरेश्वरे ॥ तच्छ्रुत्वानृपतिर्भीमोदमयंतींसखीगणात्
६ चिंतयामासतत्कार्यंसुमहत्स्वांसुतांप्रति ॥ किमर्थंदुहितामेऽद्यनातिस्वस्थेवलक्ष्यते ७ ससमीक्ष्यमहीपालःस्वांसुतांप्राप्तयौवनाम् ॥ अपश्यदा
त्मनाकार्यंदमयंत्याःस्वयंवरम् ८ ससंनिमंत्रयामासमहीपालान्विशांपतिः ॥ अनुभूयतामयंवीराःस्वयंवरइतिप्रभो ९ श्रुत्वातुपार्थिवाःसर्वेदमयंत्याः
स्वयंवरम् ॥ अभिजग्मुस्ततोभीमंराजानोभीमशासनात् १० हस्त्यश्वरथघोषेणपूरयंतोवसुंधराम् ॥ विचित्रमाल्याभरणैर्बलैर्दृश्यैःस्वलंकृतैः ११
तेषांभीमोमहाबाहुःपार्थिवानांमहात्मनाम् ॥ यथार्हमकरोत्पूजांतेऽवसंस्तत्रपूजिताः १२ एतस्मिन्नेवकालेतुसुराणामृषिसत्तमौ ॥ अटमानौमहात्मानाविंद्र
लोकमितोगतौ १३ नारदःपर्वतश्चैवमहाप्राज्ञौमहाव्रतौ ॥ देवराजस्यभवनंविविशातेसुपूजितौ १४ तावर्चयित्वामघवाततःकुशलमव्ययम् ॥ पप्रच्छानाम
यंचापितयोःसर्वगतंविभुः १५ ॥ नारदउवाच ॥ आवयोःकुशलंदेवसर्वत्रगतमीश्वर ॥ लोकेचमघवन्कृत्स्नेनृपाःकुशलिनोविभो १६ ॥ बृहदश्वउवाच ॥
नारदस्यवचःश्रुत्वापप्रच्छबलवृत्रहा ॥ धर्मज्ञाःपृथिवीपालास्त्यक्तजीवितयोधिनः १७ शस्त्रेणनिधनंकालेयेगच्छंत्यपराङ्मुखाः ॥ अयंलोकोऽक्षयस्तेषांय
थैवममकामधुक् १८ क्वनुतेक्षत्रियाःशूरानहिपश्यामितानहम् ॥ आगच्छतोमहीपालान्दयितानतिथीन्मम १९ एवमुक्तस्तुशक्रेणनारदःप्रत्यभाषत ॥
॥ नारदउवाच ॥ शृणुमेमघवन्येननदृश्यंतेमहीक्षितः २० विदर्भराज्ञोदुहितादमयंतीतिविश्रुता ॥ रूपेणसमतिक्रांतापृथिव्यांसर्वयोषितः २१ तस्याः
स्वयंवरःशक्रभवितानचिरादिव ॥ तत्रगच्छंतिराजानोराजपुत्राश्चसर्वशः २२ तांरत्नभूतांलोकस्यप्रार्थयंतोमहीक्षितः ॥ कांक्षंतिस्मविशेषेणबलवृत्रनिषूदन
२३ एतस्मिन्कथ्यमानेतुलोकपालाश्चसाग्निकाः ॥ आजग्मुर्देवराजस्यसमीपममरोत्तमाः २४

इंगितैः अभिप्रायसूचकैश्चेष्टितैः ५ नरेश्वरेनलनिमित्तम् ६ । ७ । ८ संनिमंत्रयामासआमंत्रितवान् अनुभूयतांप्रेक्ष्यतांभवद्भिः ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७
१८ । १९ महीक्षितः पृथ्वीश्वराः २० । २१ । २२ । २३ । २४

२५ । २६ । २७ । २८ विगतोविनष्टःदमयंतींप्राप्स्याम इति संकल्पोयेषां २९ । ३० । ३१ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ तेभ्य इति

ततस्तेशुश्रुवुःसर्वेनारदस्यवचोमहत् ॥ श्रुत्वैवचाब्रुवन्हृष्टागच्छामोवयमप्युत २५ ततःसर्वेमहाराजसगणाःसहवाहनाः ॥ विदर्भानभिजग्मुस्तेयतःसर्वेमही
क्षितः २६ नलोऽपिराजाकौंतेयश्रुत्वाराज्ञांसमागमम् ॥ अभ्यगच्छददीनात्मादमयंतीमनुव्रतः २७ अथदेवाःपथिनलंददृशुर्भूतलेस्थितम् ॥ साक्षादिवस्थि
तंमूर्त्यामन्मथंरूपसंपदा २८ तंदृष्ट्वालोकपालास्तेभ्राजमानंयथारविम् ॥ तस्थुर्विगतसंकल्पाविस्मितारूपसंपदा २९ ततोंऽतरिक्षेविष्टभ्यविमानानिदिवौ
कसः ॥ अब्रुवन्नैषधंराजन्नवतीर्यनभस्तलात् ३० भोभोनिषधराजेंद्रनलसत्यव्रतोभवान् ॥ अस्माकंकुरुसाहाय्यंदूतोभवनरोत्तम ३१ ॥ ॥ इतिश्रीमहा
भारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिइंद्रनारदसंवादेचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ बृहदश्वउवाच ॥ तेभ्यःप्रतिज्ञायनलःकरिष्यइतिभार
त ॥ अथैतान्परिपप्रच्छकृतांजलिरुपस्थितः १ केवैभवंतःकश्चासौयस्याहंदूतईप्सितः ॥ किंचतद्वोमयाकार्यंकथयध्वंयथातथम् २ एवमुक्तेनैषधेनमघवा
नभ्यभाषत ॥ अमरान्वैनिबोधास्मान्दमयंत्यर्थमागतान् ३ अहमिंद्रोऽयमग्निश्चतथैवायमपांपतिः ॥ शरीरांतकरोनृणांयमोऽयमपिपार्थिव ४ त्वंवैसमागता
नस्मान्दमयंत्यैनिवेदय ॥ लोकपालामहेंद्राद्याःसमायांतिदिदृक्षवः ५ प्राप्तुमिच्छंतिदेवास्त्वांशक्रोऽग्निर्वरुणोयमः ॥ तेषामन्यतमंदेवंपतित्वेवरयस्वह ६ ए
वमुक्तःसशक्रेणनलःप्रांजलिरब्रवीत् ॥ एकार्थसमुपेतंमांनप्रेषयितुमर्हथ ७ कथंतुजातसंकल्पःस्त्रियमुत्सृजतेपुमान् ॥ परार्थमीदृशंवक्तुंतत्क्षमंतुमहेश्वराः ८ ॥
॥ देवाऊचुः ॥ करिष्यइतिसंश्रुत्यपूर्वमस्मासुनैषध ॥ नकरिष्यसिकस्मात्त्वंव्रजनैषधमाचिरम् ९ ॥ बृहदश्वउवाच ॥ एवमुक्तःसदेवैस्तैर्नैषधःपुनरब्रवीत् ॥
सुरक्षितानिवेश्मानिप्रवेष्टुंकथमुत्सहे १० प्रवेक्ष्यसीतितंशक्रःपुनरेवाभ्यभाषत ॥ जगामसतथेत्युक्त्वादमयंत्यानिवेशनम् ११ ददर्शतत्रवैदर्भींसखीगणसमा
वृताम् ॥ देदीप्यमानांवपुषाश्रियाचवरवर्णिनीम् १२ अतीवसुकुमारांगींतनुमध्यांसुलोचनाम् ॥ आक्षिपंतीमिवप्रभांशशिनःस्वेनतेजसा १३ तस्यदृष्ट्वैव
ववृधेकामस्तांचारुहासिनीम् ॥ सत्यंचिकीर्षमाणस्तुधारयामासहृच्छयम् १४ ततस्तानैषधंदृष्ट्वासंभ्रांताःपरमांगनाः ॥ आसनेभ्यःसमुत्पेतुस्तेजसातस्य
धर्षिताः १५ प्रशशंसुश्चसुप्रीतानलंताविस्मयान्विताः ॥ नचैनमभ्यभाषंतमनोभिस्त्वभ्यपूजयन् १६ अहोरूपमहोकांतिरहोधैर्यंमहात्मनः ॥ कोऽयंदेवो
१७ ऽथवायक्षोगंधर्वोवाभविष्यति १७ नतास्तंशक्नुवंतिस्मव्याहर्तुमपिकिंचन ॥ तेजसाधर्षितास्तस्यलज्जावत्योवरांगनाः १८ अथैनंस्मयमानंतुस्मितपूर्वा
भिभाषिणी ॥ दमयंतीनलंवीरमभ्यभाषतविस्मिता १९ कस्त्वंसर्वानवद्यांगममहृच्छयवर्धन ॥ प्राप्तोस्यमरवद्वीरज्ञातुमिच्छामितेऽनघ २० कथमागमनंचे
हकथंचासिनलक्षितः ॥ सुरक्षितंहिमेवेश्मराजाचैवोग्रशासनः २१

१ । २ । ३ । ४ । ५ । ६ एकार्थमेकप्रयोजनं यूयमिवाहम
पिदमयंतींप्रार्थयामीत्यर्थः ७ । ८ । ९ । १० प्रवेक्ष्यसीति अदर्शनशक्तिस्तुभ्यंदत्तेतिभावः ११ । १२ । १३ । १४ धर्षिताअभिभूताः १५ । १६ । १७ । १८ । १९ । २० २१

२२ । २३ । २४ । २९ ॥ इत्यारण्यकेप०नै०भारतभा०पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ सेति यथाश्रद्धंदेवेभ्योनमस्कृत्यप्रणयस्वेतिसंबंधः प्रणयस्वपरिणयस्वमामितिशेषः १ विश्रब्धं

एवमुक्तस्तुवैदर्भ्यानलस्तांप्रत्युवाचह ॥ नलउवाच ॥ नलंमांविद्धिकल्याणिदेवदूतमिहागतम् २२ देवास्त्वांप्राप्तुमिच्छंतिशक्रोऽग्निर्वरुणोयमः ॥ तेषामन्य तमंदेवंपतिंवरयशोभने २३ तेषामेवप्रभावेणप्रविष्टोऽहमलक्षितः ॥ प्रविशंतंनमांकाश्चिदपश्यन्नाप्यवारयत् २४ एतदर्थमहंभद्रेप्रेषितःसुरसत्तमैः ॥ एतच्छ्रु त्वाशुभेबुद्धिंप्रकुरुष्वयथेच्छसि २५ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिनलस्यदेवदौत्येपंचपंचाशत्तमोऽध्यायः ५५ ॥ ॥ बृहद श्वउवाच ॥ सानमस्कृत्यदेवेभ्यःप्रहस्यनलमब्रवीत् ॥ प्रणयस्वयथाश्रद्धंराजन्किंकरवाणिते १ अहंचैवहियच्चान्यन्ममास्तिवसुकिंचन ॥ तत्सर्वंतवविश्रब्धं कुरुप्रणयमीश्वर २ हंसानांवचनंयत्तुतन्मांदहतिपार्थिव ॥ त्वत्कृतेहिमयावीरराजानःसन्निपातिताः ३ यदित्वंभजमानांमांप्रत्याख्यास्यसिमानद ॥ विषमग्निं जलंरज्जुमास्थास्येतवकारणात् ४ एवमुक्तस्तुवैदर्भ्यानलस्तांप्रत्युवाचह ॥ तिष्ठत्सुलोकपालेषुकथंमानुषमिच्छसि ५ येषामहंलोककृतामीश्वराणांमहात्म नाम् ॥ नपादरजसातुल्योमनस्तेतेषुवर्त्तताम् ६ विप्रियंह्याचरन्मर्त्योदेवानांमृत्युमृच्छति ॥ त्राहिमामनवद्यांगिवरयस्वसुरोत्तमान् ७ विरजांसिचवासांसि दिव्याश्चित्राःस्रजस्तथा ॥ भूषणानितुमुख्यानिदेवान्प्राप्यतुभुंक्ष्ववै ८ यइमांपृथिवींकृत्स्नांसंक्षिप्यग्रसतेपुनः ॥ हुताशमीशंदेवानांकातंनवरयेत्पतिम् ९ यस्यदंडभयात्सर्वेभूतग्रामाःसमागताः ॥ धर्ममेवानुरुध्यंतिकातंनवरयेत्पतिम् १० धर्मात्मानंमहात्मानंदैत्यदानवमर्दनम् ॥ महेंद्रंसर्वदेवानांकातंनवरयेत्प तिम् ११ क्रियतामविशंकेनमनसायदिमन्यसे ॥ वरुणंलोकपालानांसुहृद्वाक्यमिदंशृणु १२ नैषधेनैवमुक्तासादमयंतीवचोऽब्रवीत् ॥ समाप्लुताभ्यांनेत्राभ्यां शोकजेनाथवारिणा १३ देवेभ्योऽहंनमस्कृत्यसर्वेभ्यःपृथिवीपते ॥ वृणेत्वामेवभर्त्तारंसत्यमेतद्ब्रवीमिते १४ तामुवाचततोराजावेपमानांकृतांजलिम् ॥ दौत्ये नागतस्यकल्याणितथाभद्रेविधीयताम् १५कथंह्यहंप्रतिश्रुत्यदेवतानांविशेषतः॥परार्थेयत्नमारभ्यकथंस्वार्थमिहोत्सहे१६एषधर्मोयदिस्वार्थोममापिभवितातत:॥ एवंस्वार्थंकरिष्यामितथाभद्रेविधीयताम् १७ ततोबाष्पाकुलांवाचंदमयंतीशुचिस्मिता ॥ प्रत्याहरंतीशनकैर्नलंराजानमब्रवीत् १८ उपायोऽयंमयादृष्टोनि रपायोनरेश्वर ॥ येनदोषोनभवितातवराजन्कथंचन १९ त्वंचैवहिनरश्रेष्ठदेवाश्चेंद्रपुरोगमाः ॥ आयांतुसहिताःसर्वेममयत्रस्वयंवरः २० ततोऽहंलोकपाला नांसन्निधौत्वांनरेश्वर ॥ वरयिष्येनरव्याघ्रनैवंदोषोभविष्यति२१एवमुक्तस्तुवैदर्भ्यानलोराजाविशांपते ॥ आजगामपुनस्तत्रयत्रदेवाःसमागताः २२ तमपश्यं स्तथायांतंलोकपालामहेश्वराः॥दृष्ट्वाचैनंततोऽपृच्छन्वृत्तांतंसर्वमेवतम्२३ कच्चिद्दृष्टात्वयाराजन्दमयंतीशुचिस्मिता॥किमब्रवीच्चनःसर्वान्वदभूमिपतेऽनघ २४ ॥४१॥

सविश्वासंयथास्यात्तथा प्रणयंपरिणयनंविवाहं २ सन्निपातिताःमेलिताः ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८।१९।२०।२१।२२।२३। २४

महाकक्षंमहांतंराजद्वारप्रदेशं २५ । २६ । २७ । २८ । २९ । ३० । ३१ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ अथेति १ । २ । ३ । ४ । ५ । ६

॥ नलउवाच ॥ भवद्भिरहमादिष्टोदमयंत्यानिवेशनम् ॥ प्रविष्टःसुमहाकक्षंदंडिभिःस्थविरैर्वृतम् २५ प्रविशंतंचमांतत्रनकश्चिद्दृष्टवान्नरः ॥ ऋतेतांपार्थिव सुतांभवतामेवतेजसा २६ सख्यश्चास्यामयादृष्टास्ताभिश्चाप्युपलक्षितः ॥ विस्मिताश्चाभवन्सर्वादृष्ट्वामांविबुधेश्वराः २७ वर्ण्यमानेषुचमयाभवत्सुरुचिरा नना ॥ मामेवगतसंकल्पावृणीतेसासुरोत्तमाः २८ अब्रवीच्चैवमांबालाआयांतुसहिताःसुराः ॥ त्वयासहनरव्याघ्रममयत्रस्वयंवरः २९ तेषामहंसंनिधौत्वांवर यिष्यामिनैषध ॥ एवंतवमहाबाहोदोषोनभवितेतिह ३० एतावदेवविबुधायथावृत्तमुपाहृतम् ॥ मयाऽशेषेप्रमाणंतुभवंतस्त्रिदशेश्वराः ३१ ॥ इतिश्रीमहाभा रतेआरण्यकेपर्वणिनलोपाख्यानप०नलकर्तृकदेवदूत्येषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ बृहदश्वउवाच ॥ अथकालेशुभेप्राप्तेतिथौपुण्येक्षणेतथा ॥ आजुहावमहीपालान्भीमोराजास्वयंवरे १ तच्छ्रुत्वापृथिवीपालाःसर्वेहृच्छयपीडिताः ॥ त्वरिता समुपाजग्मुर्दमयंतीमभीप्सवः २ कनकस्तंभरुचिरंतोरणेनवि राजितम् ॥ विविशुस्तेनृपारंगंमहासिंहाइवाचलम् ३ तत्रासनेषुविविधेष्वासीनाःपृथिवीक्षितः ॥ सुरभिस्रग्धराःसर्वेप्रमृष्टमणिकुंडलाः ४ तांराजसमितिंपु ण्यांनागैर्भोगवतीमिव ॥ संपूर्णांपुरुषव्याघ्रैर्व्याघ्रैर्गिरिगुहामिव ५ तत्रस्मपीनादृश्यंतेबाहवःपरिघोपमाः ॥ आकारवर्णसुश्लक्ष्णाःपंचशीर्षाइवोरगाः ६ सु केशांतानिचारूणिसुनासाक्षिभ्रुवाणिच ॥ मुखानिराज्ञांशोभंतेनक्षत्राणियथादिवि ७ दमयंतीततोरंगंप्रविवेशशुभानना ॥ मुष्णंतीप्रभयाराज्ञांचक्षूंषिच मनांसिच ८ तस्यागात्रेषुपतितातेषांदृष्टिर्महात्मनाम् ॥ तत्रतत्रैवसक्ताऽभून्नचचालचपश्यताम् ९ ततःसंकीर्त्यमानेषुराज्ञांनामसुभारत ॥ ददर्शभैमीपु रुषान्पंचतुल्याकृतीनिह १० तान्समीक्ष्यततःसर्वान्निर्विशेषाकृतीन्स्थितान् ॥ संदेहादथवैदर्भीनाभ्यजानान्नलंनृपम् ११ यंयंहिददृशेतेषांतंतंमेनेनलंनृ पम् ॥ साचिंतयंतीबुद्ध्याऽथतर्कयामासभाविनी १२ कथंहिदेवाञ्जानीयांकथंविद्यांनलंनृपम् ॥ एवंसंचिंतयंतीसावैदर्भीभृशदुःखिता १३ श्रुतानिदेवलिं गानितर्कयामासभारत ॥ देवानांयानिलिंगानिस्थविरेभ्यःश्रुतानिमे १४ तानीहतिष्ठतांभूमावेकस्यापिनलक्षये ॥ साविनिश्चित्यबहुधाविचार्यचपुनःपुनः १५ शरणंप्रतिदेवानांप्राप्तकालममन्यत ॥ वाचाचमनसाचैवनमस्कारंप्रयुज्यसा १६ देवेभ्यःप्रांजलिर्भूत्वावेपमानेदमब्रवीत् ॥ हंसानांवचनंश्रुत्वायथामेनै षधोवृतः ॥ पतित्वेतेनसत्येनदेवास्तंप्रदिशंतुमे १७ मनसावचसाचैवयथानाभिचराम्यहम् ॥ तेनसत्येनविबुधास्तमेवप्रदिशंतुमे १८ यथादेवैःसमेभर्त्तावि हितोनिषधाधिपः ॥ तेनसत्येनमेदेवास्तमेवप्रदिशंतुमे १९ यथेदंव्रतमारब्धंनलस्याराधनेमया ॥ तेनसत्येनमेदेवास्तमेवप्रदिशंतुमे २०

७ मुष्णंतीहरंती ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २०

२१ । २२ । २३ मनुष्याःसस्वेदाःसनिमेषाम्लायमानस्रजःसरजस्काभूमिस्पृशः देवास्तद्विपरीताः हृषितस्रजश्चतेरजोहीनाश्चेतिसमासः २४ । २५ । २६ । २७ । २८ । २९ । ३० यद्यस्मान्मांभजसि तस्मात्तेतववचनेरतमित्येतत्विद्धि ३१ । ३२ । ३३ । ३४ । ३५ आत्मभवमात्मनआविर्भावं ३६ अन्नरसंयाद्देशेतादृशेऽप्यन्नेविशिष्टरसवत्तां ३७ भावंसत्तां मिथुनमेकैकेनद्वयंद्वं

स्वंचैवरूपंकुर्वंतुलोकपालामहेश्वराः ॥ यथाऽहमभिजानीयांपुण्यश्लोकंनराधिपम् २१ निशम्यदमयंत्यास्तत्करुणंप्रतिदेवितम् ॥ निश्चयंपरमंतथ्यमनुरागंच नैषधे २२ मनोविशुद्धिंबुद्धिंचभक्तिंरागंचनैषधे ॥ यथोक्तंचक्रिरेदेवाःसामर्थ्यंलिंगधारणे २३ साऽपश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् ॥ हृषितस्रग्रजोहीनान्स्थितानस्पृशतःक्षितिं २४ छायाद्वितीयोम्लानस्रग्रजःस्वेदसमन्वितः ॥ भूमिष्ठोनैषधश्चैवनिमेषेणचसूचितः २५ सासमीक्ष्यतुतान्देवान्पुण्यश्लोकंचभारत ॥ नैषधंवरयामासभैमीधर्मेणपांडव २६ विलज्जमानावस्त्रांतंजग्राहायतलोचना ॥ स्कंधदेशेऽसृजत्तस्यस्रजंपरमशोभनाम् २७ वरयामासचैवैनंपतित्वेवरवर्णिनी ॥ ततोहाहेतिसहसामुक्तःशब्दोनराधिपैः २८ देवैर्महर्षिभिस्तत्रसाधुसाध्वितिभारत ॥ विस्मितैरीरितःशब्दःप्रशंसद्भिर्नलंनृपम् २९ दमयंतींतुकौरव्यवीरसेनसुतोनृपः ॥ आश्वासयद्वरारोहांप्रहृष्टेनांतरात्मना ३० यत्त्वंभजसिकल्याणिपुमांसंदेवसन्निधौ ॥ तस्मान्मांविद्धिभर्तारमेतत्तेवचनेरतम् ३१ यावच्चमेधरिष्यंतिप्राणादेहेशुचिस्मिते ॥ तावत्त्वयिभविष्यामिसत्यमेतद्ब्रवीमिते ३२ दमयंतींतथावाग्भिरभिनंद्यकृतांजलिः ॥ तौपरस्परतःप्रीतौदृष्ट्वात्वग्निपुरोगमान् ३३ तानेवशरणंदेवान्जग्मतुर्मनसातदा ॥ वृतेतुनैषधेभैम्यालोकपालामहौजसः ३४ प्रहृष्टमनसःसर्वेनलायाष्टौवरान्ददुः ॥ प्रत्यक्षदर्शनंयज्ञेगतिंचानुत्तमांशुभां ३५ नैषधायददौशक्रःप्रीयमाणःशचीपतिः ॥ अग्निरात्मभवंप्रादाद्यत्रवांछतिनैषधः ३६ लोकानात्मप्रभांश्चैवददौतस्मैहुताशनः ॥ यमस्त्वन्नरसंप्रादाद्धर्मेचपरमांस्थितिम् ३७ अपांपतिरपांभावंयत्रवांछतिनैषधः ॥ स्रजश्चोत्तमगंधाढ्याःसर्वेचमिथुनंददुः ३८ वरानेवंप्रदायास्यदेवास्तेत्रिदिवंगताः ॥ पार्थिवाश्चानुभूयास्यविवाहंविस्मयान्विताः ३९ दमयंत्याश्चमुदिताःप्रतिजग्मुर्यथागतम् ॥ गतेषुपार्थिवेंद्रेषुभीमःप्रीतोमहामनाः ४० विवाहंकारयामासदमयंत्यानलस्यच ॥ उष्यतत्रयथाकामंनैषधोद्विपदांवरः ४१ भीमेनसमनुज्ञातोजगामनगरंस्वकम् ॥ अवाप्यनारीरत्नंतुपुण्यश्लोकोऽपिपार्थिवः ४२ रेमेसहतयाराजन्शच्येवबलवृत्रहा ॥ अतीवमुदितोराजाभ्राजमानोंऽशुमानिव ४३ अरंजयत्प्रजावीरोधर्मेणपरिपालयन् ॥ ईजेचाप्यश्वमेधेनययातिरिवनाहुषः ४४ अन्यैश्चबहुभिर्धीमान्क्रतुभिश्चाप्तदक्षिणैः ॥ पुनश्चरमणीयेषुवनेषूपवनेषुच ४५ दमयंत्यासहनलोविजहारामरोपमः ॥ जनयामासचततोदमयंत्यांमहामनाः ॥ इंद्रसेनंसुतंचापिइंद्रसेनांचकन्यकाम् ४६ एवंसयजमानश्चविहरंश्चनराधिपः ॥ ररक्षवसुसंपूर्णांवसुधांवसुधाधिपः ४७ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिदमयंतीस्वयंवरेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥

यमपीत्यर्थः ३८ अनुभूयेदृष्ट्वा ३९ । ४० उष्यवासंकृत्वा ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ७ ॥

एवंदेवेभ्योलब्धवरस्य रूपौदार्यादिमतो दमयंतीलाभजंसुखमुक्त्वा तस्यैवसंप्रतिदुर्व्यसनजामापदंवक्तुमुपक्रमते वृतेतुनैषधेइत्यादिना १ । २ । ३ निर्वृत्तःसमाप्तः ४ । ५ । ६ । ७ । ८ । ९ यस्मिन्निति दाक्ष्यंनित्योत्साहः सत्यमितिपाठेयथार्थभाषणं धृतिर्वाङ्मनःकायानामवसादप्राप्तौतदुत्तंभनार्थेयत्नविशेषोमनोधर्मः ज्ञानंशब्दतोऽर्थतश्च तपःस्वधर्मनिष्ठा शौचंबाह्यंमृज्जलादिजमाभ्यंतरंभावशुद्धिः दमोबाह्येंद्रियनिग्रहः शमोमनोनिग्रहः ध्रुवाणिविघ्नैरप्यबाध्यानि १० । ११ । १२ । १३ । १४ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपेअष्टपंचा

॥ बृहदश्वउवाच ॥ वृतेतुनैषधेभैम्यालोकपालामहौजसः ॥ यांतोददृशुरायांतंद्वापरंकलिनासह १ अथाब्रवीत्कलिंशक्रःसंप्रेक्ष्यबलवृत्रहा ॥ द्वापरेणसहायेनकलेब्रूहिक्वयास्यसि २ ततोऽब्रवीत्कलिःशक्रंदमयंत्याःस्वयंवरम् ॥ गत्वाहिवरयिष्येतांमनोहिममतांगतम् ३ तमब्रवीत्प्रहस्येंद्रोनिर्वृत्तःसस्वयंवरः ॥ वृतस्तयानलोराजापतिरस्मत्समीपतः ४ एवमुक्तस्तुशक्रेणकलिःकोपसमन्वितः ॥ देवानामंत्र्यतान्सर्वानुवाचेदंवचस्तदा ५ देवानांमानुषंमध्येयत्सापतिमविंदत ॥ तत्रतस्याभवेन्न्याय्यंविपुलंदंडधारणम् ६ एवमुक्तेतुकलिनाप्रत्यूचुस्तेदिवौकसः ॥ अस्माभिःसमनुज्ञातेदमयंत्यानलोवृतः ७ काचसर्वगुणोपेतंनाश्रयेतनलंनृपम् ॥ योवेदधर्मानखिलान्यथावच्चरितव्रतः ८ योऽधीतेचतुरोवेदान्सर्वानाख्यानपंचमान् ॥ नित्यंतृप्तागृहेयस्यदेवायज्ञेषुधर्मतः ॥ अहिंसानिरतोयश्चसत्यवादीदृढव्रतः ९ यस्मिन्दाक्ष्यंधृतिर्ज्ञानंतपःशौचंदमःशमः ॥ ध्रुवाणिपुरुषव्याघ्रेलोकपालसमेनृपे १० एवंरूपंनलंयोवैकामयेच्छपितुंकले ॥ आत्मानंसशपेन्मूढोहन्यादात्मानमात्मना ११ एवंगुणंनलंयोवैकामयेच्छपितुंकले ॥ कृच्छ्रेसनरकेमज्जेदगाधेविपुलेह्रदे ॥ एवमुक्त्वाकलिंदेवाद्वापरंचदिवंययुः १२ ततोगतेषुदेवेषुकलिर्द्वापरमब्रवीत् ॥ संहर्तुंनोत्सहेकोपंनलेवत्स्यामिद्वापर १३ भ्रंशयिष्यामितंराज्यान्नभैम्यासहरंस्यते ॥ त्वमप्यक्षान्समाविश्यसाहाय्यंकर्तुमर्हसि १४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिकलिदेवसंवादेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ बृहदश्वउवाच ॥ एवंससमयंकृत्वाद्वापरेणकलिःसह ॥ आजगामततस्तत्रयत्रराजासनैषधः १ सनित्यमंतरप्रेप्सुर्निषधेष्ववसच्चिरम् ॥ अथास्यद्वादशेवर्षेददर्शकलिरंतरम् २ कृत्वामूत्रमुपस्पृश्यसंध्यामन्वास्तनैषधः ॥ अकृत्वापादयोःशौचंतत्रैनंकलिराविशत् ३ ससमाविश्यचनलंसमीपंपुष्करस्यच ॥ गत्वापुष्करमाहेदमेहिदीव्यनलेनवै ४ अक्षद्यूतेनलंजेताभवान्हिसहितोमया ॥ निषधान्प्रतिपद्यस्वजित्वाराज्यंनलंनृपम् ५ एवमुक्तस्तुकलिनापुष्करोनलमभ्ययात् ॥ कलिश्चैववृषोभूत्वागवांपुष्करमभ्ययात् ६ आसाद्यतुनलंवीरंपुष्करःपरवीरहा ॥ दीव्यावेत्यब्रवीद्भ्रातावृषेणेतिमुहुर्मुहुः ७

शत्तमोऽध्यायः ॥ ५८ ॥ ॥ एवमितिसमयंसंकेतं १ । २ अन्वास्तउपासितवान् सोऽन्स्तेस्मेतिपाठेसउपास्तेस्मेत्यर्थः आर्षःसंधिः ३ सकलिःनलंसमाविश्य रूपांतरेणपुष्करंचाब्रवीत् दीव्यद्यूतंकुरु ४ । ५ साहाय्यमेवाह कलिश्चेति गवांवृषः अत्र गोशब्दोलक्षितलक्षणयाऽक्षशब्दवाच्येषुपाशेषुवर्तते वृषःश्रेष्ठःपाशश्रेष्ठोभूत्वा ६ वृषेणाक्षमुख्येन ७

पणकालं द्यूतकालं ८ यानेषुयुग्यंयुगवहंरथादितस्य ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ नायमस्तिनष्टोऽयमित्यर्थः पुण्यःपावनःश्लोको यशोयस्य अजीयतजितः १८

नचक्षमेततोराजासमाह्वानंमहामनाः ॥ वैदर्भ्याःप्रेक्षमाणायाःपणकालममन्यत ८ हिरण्यस्यसुवर्णस्ययानयुग्यस्यवाससाम् ॥ आविष्टःकलिनाद्यूतेजीयते स्मनलस्तदा ९ तमक्षमदसंमत्तंसुहृदांनतुकश्चन ॥ निवारणेऽभवच्छक्तोदीव्यमानमरिंदम १० ततःपौरजनाःसर्वेमंत्रिभिःसहभारत ॥ राजानंद्रष्टुमागच्छ न्निवारयितुमातुरम् ११ ततःसूतउपागम्यदमयंत्यैन्यवेदयत् ॥ एषपौरजनोदेविद्वारितिष्ठतिकार्यवान् १२ निवेद्यतांनैषधायसर्वाःप्रकृतयःस्थिताः ॥ अमृ ष्यमाणाव्यसनंराज्ञोधर्मार्थदर्शिनः १३ ततःसाबाष्पकलयावाचादुःखेनकर्शिता ॥ उवाचनैषधंभैमीशोकोपहतचेतना १४ राजन्पौरजनोद्वारित्वांदिदृक्षुरव स्थितः ॥ मंत्रिभिःसहितःसर्वैराजभक्तिपुरस्कृतः १५ तंद्रष्टुमर्हसीत्येवंपुनःपुनरभाषत ॥ तांतथारुचिरापांगींविलपंतींतथाविधाम् १६ आविष्टःकलिनाराजा नाभ्यभाषतकिंचन ॥ ततस्तेमंत्रिणःसर्वेतेचैवपुरवासिनः १७ नायमस्तीतिदुःखार्ताव्रीडिताजग्मुरालयान् ॥ तथातदभवद्द्यूतंपुष्करस्यनलस्यच ॥ युधि ष्ठिरबहून्मासान्पुण्यश्लोकस्त्वजीयत १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिनलद्यूतेएकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ बृहदश्व उवाच ॥ दमयंतीततोदृष्ट्वापुण्यश्लोकंनराधिपम् ॥ उन्मत्तवदनुन्मत्तादेवनेगतचेतसम् १ भयशोकसमाविष्टाराजन्भीमसुताततः ॥ चिंतयामासतत्कार्यं सुमहत्पार्थिवंप्रति २ साशंकमानातत्पापंचिकीर्षंतीचतत्प्रियम् ॥ नलंचहृतसर्वस्वमुपलभ्येदमब्रवीत् ३ बृहत्सेनामतियशांतांधात्रींपरिचारिकाम् ॥ हितां सर्वार्थकुशलामनुरक्तांसुभाषिताम् ४ बृहत्सेनेव्रजामात्यानानाय्यनलशासनात् ॥ आचक्ष्वयद्धृतंद्रव्यमवशिष्टंचयद्वसु ५ ततस्तेमंत्रिणःसर्वेविज्ञायनल शासनम् ॥ अपिनोभागधेयंस्यादित्युक्त्वानलमाव्रजन् ६ तास्तुसर्वाःप्रकृतयोद्वितीयंसमुपस्थिताः ॥ न्यवेदयद्भीमसुतानचतत्प्रत्यनंदत ७ वाक्यमप्रति नंदंतंभर्तारमभिवीक्ष्यसा ॥ दमयंतीपुनर्वेश्मव्रीडिताप्रविवेशह ८ निशम्यसततंचाक्षान्पुण्यश्लोकपराङ्मुखान् ॥ नलंचहृतसर्वस्वंधात्रींपुनरुवाचह ९ बृहत्सेनेपुनर्गच्छवार्ष्णेयंनलशासनात् ॥ सूतमानयकल्याणिमहत्कार्यमुपस्थितम् १० बृहत्सेनातुसाश्रुत्वादमयंत्याःप्रभाषितम् ॥ वार्ष्णेयमानयामासपुरु षैराप्तकारिभिः ११ वार्ष्णेयंतुततोभैमीसांत्वयच्छ्लक्ष्णयागिरा ॥ उवाचदेशकालज्ञाप्राप्तकालमनिंदिता १२ जानीषेत्वंयथाराजासम्यग्वृत्तःसदात्वयि ॥ तस्य त्वंविषमस्थस्यसाहाय्यंकर्तुमर्हसि १३ यथायथाहिनृपतिःपुष्करेणैवजीयते ॥ तथातथाऽस्यवैद्यूतेरागोभूयोऽभिवर्धते १४ तथाचपुष्करस्याक्षाःपतंतिवशव र्तिनः ॥ तथाविपर्ययश्चापिनलस्याक्षेषुदृश्यते १५ सुहृत्स्वजनवाक्यानियथावन्नशृणोतिच ॥ ममापिचतथावाक्यंनाभिनंदतिमोहितः १६

इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपे एकोनषष्टितमोऽध्यायः ५९ ॥ ॥ दमयंतीति १ । २ । ३ । ४ । ५ । ६ द्वितीयंद्वितीयवारं ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६

१७ विनश्येद्विनश्येतनलइतिशेषः १८ मिथुनंकुमारींकुमारंच कुंडिनंभीमस्यनगरम् १९ । २० मुख्यशोमुख्येषुमुख्येषु २१ वाहिनाअश्वरथेन २२ । २३ अटमानोवेतनार्थीपर्यटन् २४

नूनंमन्येनदोषोऽस्तिनैषधस्यमहात्मनः ॥ यत्तुमेवचनंराजानाभिनंदतिमोहितः १७ शरणंत्वांप्रपन्नास्मिसारथेकुरुमद्वचः ॥ नहिमेशुध्यतेभावःकदाचिद्वि नश्येदपि १८ नलस्यदयितानश्वान्योजयित्वामनोजवान् ॥ इदमारोप्यमिथुनंकुंडिनंयातुमर्हसि १९ ममज्ञातिषुनिक्षिप्यदारकौस्यंदनंतथा ॥ अश्वांश्चेमान्य थाकामंवसवाऽन्यत्रगच्छवा २० दमयंत्यास्तुतद्वाक्यंवार्ष्णेयोनलसारथिः ॥ न्यवेदयदशेषेणनलामात्येषुमुख्यशः २१ तैःसमेत्यविनिश्चित्यसोनुज्ञातोमही पते ॥ ययौमिथुनमारोप्यविदर्भांस्तेनवाहिना २२ हयांस्तत्रविनिक्षिप्यसूतोरथवरंचतम् ॥ इंद्रसेनांचतांकन्यामिंद्रसेनंचबालकम् २३ आमंत्र्यभीमंरा जानमार्तःशोचन्नलंनृपम् ॥ अटमानस्ततोऽयोध्यांजगामनगरींतदा २४ ऋतुपर्णंसराजानमुपतस्थेसुदुःखितः ॥ भृतिंचोपययौतस्यसारथ्येनमहीपते २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिकुंडिनंप्रतिकुमारकुमारीप्रस्थापनेषष्टितमोऽध्यायः ६० ॥ ॥ बृहदश्वउवाच ॥ ततस्तुयाते वार्ष्णेयेपुण्यश्लोकस्यदीव्यतः ॥ पुष्करेणहृतंराज्यंयच्चान्यद्वसुकिंचन १ हृतराज्यंनलंराजन्प्रहसन्पुष्करोऽब्रवीत ॥ द्यूतंप्रवर्ततांभूयःप्रतिपाणोऽस्तिक स्तव २ शिष्टातेदमयंत्येकासर्वमन्यज्जितंमया ॥ दमयंत्याःपणःसाधुवर्ततांयदिमन्यसे ३ पुष्करेणैवमुक्तस्यपुण्यश्लोकस्यमन्युना ॥ व्यदीर्यतेवहृदयंनचैनं किंचिदब्रवीत् ४ ततःपुष्करमालोक्यनलःपरममन्युमान् ॥ उत्सृज्यसर्वगात्रेभ्योभूषणानिमहायशाः ५ एकवासाह्यसंवीतःसुहृच्छोकविवर्धनः ॥ निश्चक्राम ततोराजात्यक्त्वासुविपुलांश्रियम् ६ दमयंत्येकवस्त्राऽथगच्छंतंपृष्ठतोऽन्वगात् ॥ सतयाबाह्यतःसार्धंत्रिरात्रंनैषधोऽवसत् ७ पुष्करस्तुमहाराजघोषयामासवै पुरे ॥ नलेयःसम्यगातिष्ठेत्सगच्छेद्वध्यतांमम ८ पुष्करस्यतुवाक्येनतस्यविद्वेषणेनच ॥ पौरानतस्यसत्कारंकृतवंतोयुधिष्ठिर ९ सतथानगराभ्यासेसत्का रार्होनसत्कृतः ॥ त्रिरात्रमुषितोराजाजलमात्रेणवर्तयन् १० पीड्यमानःक्षुधातत्रफलमूलानिकर्षयन् ॥ प्रातिष्ठतततोराजादमयंतीतमन्वगात् ११ क्षुधयापी ड्यमानस्तुनलोबहुतिथेऽहनि ॥ अपश्यच्छकुनान्कांश्चिद्धिरण्यसदृशच्छदान् १२ सचिंतयामासतदानिषधाधिपतिर्बली ॥ अस्तिभक्ष्योममाद्यायंवसुचेदं भविष्यति १३ ततस्तान्परिधानेनवाससासमावृणोत् ॥ तस्यतद्वस्त्रमादायसर्वेजग्मुर्विहायसा १४ उत्पतंतःखगावाक्यमेतदाहुस्ततोनलम् ॥ दृष्ट्वादिग्वा
१८ ससंभूमौस्थितंदीनमधोमुखम् १५ वयमक्षाःसुदुर्बुद्धेतववासोजिहीर्षवः ॥ आगतानहिनःप्रीतिःसवाससिगतेत्वयि १६ तान्समीपगतानक्षानात्मानंचविवासस म् ॥ पुण्यश्लोकस्तदाराजन्दमयंतीमथाब्रवीत् १७ येषांप्रकोपादैश्वर्यात्प्रच्युतोऽहमनिंदिते ॥ प्राणयात्रांनविंदेयंदुःखितःक्षुधयाऽन्वितः १८

भृतिंवेतनम् २५ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषष्टितमोऽध्यायः ॥ ६० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ततइति १ प्रतिपाणःपणनीयंद्रव्यम् २ । ३ । ४ । ५ । ६ तयासार्धंबाह्यतःबहिः ७ । ८ तस्यनलस्य ९ नगराभ्यासे नगरसमीपे १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८

१९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० अलमत्यर्थम् ३१ । ३२ अपकृष्टेनकलिकर्षितेन ३३ । ३४ । ३५ यद्यपिपूजयिष्यतितथापित्वंसुखंनोवत्स्यसि

येषांकृतेनसत्कारमकुर्वन्मयिनैषधाः ॥ इमेतेशकुनाभूत्वावासोभीरुहरंतिमे १९ वैषम्यंपरमंप्राप्तोदुःखितोगतचेतनः ॥ भर्त्ताते ऽहंनिबोधेदंवचनंहितमात्मनः
२० एतेगच्छंतिबहवःपंथानोदक्षिणापथम् ॥ अवंतीमृक्षवंतंचसमतिक्रम्यपर्वतम् २१ एषविंध्योमहाशैलःपयोष्णीचसमुद्रगा ॥ आश्रमाश्चमहर्षीणांबहुमू
लफलान्विताः २२ एषपंथाविदर्भाणामसौगच्छतिकोसलान् ॥ अतःपरंचदेशोऽयंदक्षिणेदक्षिणापथः २३ एतद्वाक्यंनलोराजादमयंतींसमाहितः ॥ उवाचा
सकृदार्तोहिभैमीमुद्दिश्यभारत २४ ततःसावाष्पकलयावाचादुःखेनकर्षिता ॥ उवाचदमयंतीतंनैषधंकरुणंवचः २५ उद्वेजतेमेहृदयंसीदंत्यंगानिसर्वशः ॥
तवपार्थिवसंकल्पंचिंतयंत्याःपुनःपुनः २६ हृतराज्यंहृतद्रव्यंविवस्त्रंक्षुच्छ्रमान्वितम् ॥ कथमुत्सृज्यगच्छेयमहंत्वांनिर्जनेवने २७ श्रांतस्यतेक्षुधार्तस्यचिंत
यानस्यतत्सुखम् ॥ वनेघोरेमहाराजनाशयिष्याम्यहंक्लमम् २८ नचभार्यासमंकिंचिद्विद्यतेभिषजांमतम् ॥ औषधंसर्वदुःखेषुसत्यमेतद्ब्रवीमिते २९ ॥ न
लउवाच ॥ एवमेतद्यथात्थत्वंदमयंतिसुमध्यमे ॥ नास्तिभार्यासमंमित्रंनरस्यार्तस्यभेषजम् ३० नचाहंत्यक्तुकामस्त्वांकिमलंभीरुशंकसे ॥ त्यजेयमहमात्मा
नंनचैवत्वामनिंदिते ३१ ॥ दमयंत्युवाच ॥ यदिमांत्वंमहाराजनविहातुमिहेच्छसि ॥ तत्किमर्थंविदर्भाणांपंथाःसमुपदिश्यते ३२ अवैमिचाहंनृपतेनतुमांत्य
क्तुमर्हसि ॥ चेतसात्वपकृष्टेनमांत्यजेथामहीपते ३३ पंथानंहिममाभीक्ष्णमाख्यासिचनरोत्तम ॥ अतोनिमित्तंशोकंमेवर्धयस्यमरोपम ३४ यदिचायमभिप्राय
स्तवज्ञातीन्व्रजेदिति ॥ सहितावेवगच्छावोविदर्भान्यदिमन्यसे ३५ विदर्भराजस्तत्रत्वांपूजयिष्यतिमानद ॥ तेनत्वंपूजितोराजन्सुखंवत्स्यसिनोगृहे ३६॥
॥ इ०म०भा०आरण्यके०नलोपाख्यानप०नलवनयात्रायामेकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ नलउवाच ॥ यथाराज्यंतवपितुस्तथाममनसंशयः ॥ न
तुतत्रगमिष्यामिविषमस्थःकथंचन १ कथंसमृद्धोगत्वाऽहंतवहर्षविवर्धनः ॥ परिच्युतोगमिष्यामितवशोकविवर्धनः २ ॥ बृहदश्वउवाच ॥ इतिब्रुवन्नलोराजा
दमयंतींपुनःपुनः॥सांत्वयामासकल्याणींवाससोर्धेनसंवृताम् ३तावेकवस्त्रसंवीतावटमानावितस्ततः॥क्षुत्पिपासापरिश्रांतौसभांकांचिदुपेयतुः ४ तांसभामुपसंप्रा
प्यतदासनिषधाधिपः ॥ वैदर्भ्यासहितोराजानिषसादमहीतले ५ सवैविवस्त्रोविकटोमलिनःपांसुगुंठितः ॥ दमयंत्यासहश्रांतःसुष्वापधरणीतले ६ दमयंत्यपि
कल्याणीनिद्रयाऽपहृताततः॥सहसादुःखमासाद्यसुकुमारीतपस्विनी ७ सुप्तायांदमयंत्यांतुनलोराजाविशांपते ॥ शोकोन्मथितचित्तात्मानस्मशेतेयथापुरा ८

नवासंकरिष्यसिश्वशुरगृहवासस्यनीचतावहत्वात् ३६ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ॥ ॥ एतदेवसमर्थयन्नलउवा
चयथेति १ । २ । ३ पाठांतरेउपोषतुःउपेत्यवासंचक्रतुः ४ । ५ विकटः कटस्तृणासनंतद्रहितः अतएवपांसुगुंठितः ६ । ७ । ८

परिध्वंसं कलिनावस्त्रापहरणादिक्लेशं ९ जनस्यपरिशेषाद्भार्यायाःत्व १० । ११ । १२ । १३ । १४ दमयंत्यांविषयेन्यवर्तत निवृत्तासतीविसर्जनेऽभूदितिशेषः १५ । १६ । १७ । १८ नि

सतद्राज्यापहरणंसुहृत्त्यागंचसर्वशः ॥ वनेचतंपरिध्वंसंप्रेक्ष्यचिंतामुपेयिवान् ९ किंनुमेस्यादिदंकृत्वाकिंनुमेस्यादकुर्वतः ॥ किंनमेमरणंश्रेयःपरित्यागोजन
स्यवा १० मामियंह्यनुरक्तैवंदुःखमाप्नोतिमत्कृते ॥ मद्विहीनात्वियंगच्छेत्कदाचित्स्वजनंप्रति ११ मयिनिःसंशयंदुःखमियंप्राप्स्यत्यनुव्रता ॥ उत्सर्गेसंशयः
स्यात्तुविंदेतापिसुखंक्वचित् १२ सविनिश्चित्यबहुधाविचार्यचपुनःपुनः ॥ उत्सर्गंमन्यतेश्रेयोदमयंत्यानराधिप १३ नचैषातेजसाशक्याकैश्चिद्धर्षयितुंपथि ॥
यशस्विनीमहाभागामद्भक्तेयंपतिव्रता १४ एवंतस्यतदाबुद्धिर्दमयंत्यांन्यवर्तत ॥ कलिनादुष्टभावेनदमयंत्याविसर्जने १५ सोऽवस्त्रतामात्मनश्चतस्याश्चाप्ये
कवस्त्रताम् ॥ चिंतयित्वाऽध्यगाद्राजावस्त्रार्धस्यावकर्तनम् १६ कथंवासोविकर्तेयंनचबुद्ध्येतमेप्रिया ॥ विचिंत्यैवंनलोराजासभांपर्यचरत्तदा १७ परिधावन्न
थनलइतश्चेतश्चभारत ॥ आससादसभोद्देशेविकोशंखड्गमुत्तमम् १८ तेनार्धंवाससश्छित्त्वानिवस्यचपरंतपः ॥ सुप्तामुत्सृज्यवैदर्भींप्राद्रवद्गतचेतनाम् १९
ततोनिवृत्तहृदयःपुनरागम्यतांसभाम् ॥ दमयंतींतदादृष्ट्वारुरोदनिषधाधिपः २० यांनवायुर्नचादित्यःपुरापश्यतिमेप्रियाम् ॥ सेयमद्यसभामध्येशेतेभूमाव
नाथवत् २१ इयंवस्त्रावकर्तेनसंवीताचारुहासिनी ॥ उन्मत्तेववरारोहाकथंबुद्ध्वाभविष्यति २२ कथमेकासतीभैमीमयाविरहिताशुभा ॥ चरिष्यतिवनेघोरेमृग
व्यालनिषेविते २३ आदित्यावसवोरुद्राआश्विनौसमरुद्गणौ ॥ रक्षंतुत्वांमहाभागेधर्मेणासिसमावृता २४ एवमुक्त्वाप्रियांभार्यांरूपेणाप्रतिमांभुवि ॥ कलि
नाऽपहृतज्ञानोनलःप्रातिष्ठदुद्यतः २५ गत्वागत्वानलोराजापुनरेतिसभांमुहुः ॥ आकृष्यमाणःकलिनासौहृदेनावकृष्यते २६ द्विधेवहृदयंतस्यदुःखितस्या
भवत्तदा ॥ दोलेवमुहुरायातियातिचैवसभांप्रति २७ अवकृष्टस्तुकलिनामोहितःप्राद्रवन्नलः ॥ सुप्तामुत्सृज्यतांभार्यांविलप्यकरुणंबहु २८ नष्टात्माकलिना
स्पृष्टस्तत्तद्विगणयन्नृपः ॥ जगामैकांवनेशून्येभार्यामुत्सृज्यदुःखितः २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिदमयंतीपरित्यागेद्विषष्टित
मोऽध्यायः ॥ ६२ ॥ ॥ बृहदश्वउवाच ॥ अपक्रांतेनलेराजन्दमयंतीगतक्लमा ॥ अबुध्यतवरारोहासंत्रस्ताविजनेवने १ अपश्यमानाभर्तारंशोकदुःखसम
न्विता ॥ प्राक्रोशदुच्चैःसंत्रस्तामहाराजेतिनैषधम् २ हानाथहामहाराजहास्वामिन्किंजहासिमाम् ॥ हाहताऽस्मिविनष्टास्मिभीताऽस्मिविजनेवने ३ ननुनाम
महाराजधर्मज्ञःसत्यवागसि ॥ कथमुक्त्वातथासत्यंसुप्तामुत्सृज्यकानने ४ कथमुत्सृज्यगंताऽसिदक्षांभार्यामनुव्रताम् ॥ विशेषतोऽनपकृतेपरेणापकृतेसति ५

वस्त्रपरिधाय १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ ॥ इत्यारण्यके०नै०द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ अपेति १ । २ । ३ तथासत्यंयत्त्वयंवरेउक्तं
त्वानत्यक्ष्यामीति ४ अनपकृते अपकाराभावे ५

६ । ७ । ८ । ९ । १० शोचिमिशोचामि ११ । १२ मन्युनाशोकेन १३ । १४ । १५ कञ्चिशपतियस्येतिअभिशापात् वृथाक्षेपात् नोदुःखात् अस्मत्संबंधिदुःखात् १६ । १७ । १८

शक्यसेतागिरःसम्यक्कर्तुंमयिनरेश्वर ॥ यास्तेषांलोकपालानांसन्निधौकथिताःपुरा ६ नाकालेविहितोमृत्युर्मर्त्यानांपुरुषर्षभ ॥ यत्रकांतात्वयोत्सृष्टामुहूर्तम
पिजीवति ७ पर्याप्तःपरिहासोऽयमेतावान्पुरुषर्षभ ॥ भीताऽहमतिदुर्धर्षदर्शयात्मानमीश्वर ८ दृश्यसेदृश्यसेराजन्नेषदृष्टोऽसिनैषध ॥ आवार्यगुल्मैरात्मानं
किंमांनप्रतिभाषसे ९ नृशंसंबतराजेंद्रयन्मामेवंगतामिह ॥ विलपंतींसमागम्यनाश्वासयसिपार्थिव १० नशोचाम्यहमात्मानंनचान्यदपिकिंचन ॥ कथंनुभ
वितास्येकइतित्वांनृपशोचिमि ११ कथंनुराजंस्तृषितःक्षुधितःश्रमकर्षितः ॥ सायान्हेवृक्षमूलेषुमामपश्यन्भविष्यसि १२ ततःसातीव्रशोकार्ताप्रदीप्तेवचम
न्युना ॥ इतश्चेतश्चरुदतीपर्यधावतदुःखिता १३ मुहुरुत्पततेबालामुहुःपततिविह्वला ॥ मुहुरालीयतेभीतामुहुःक्रोशतिरोदिति १४ अतीवशोकसंतप्ता
मुहुर्निःश्वस्यविह्वला ॥ उवाचभैमीनिःश्वस्यरुदत्यथपतिव्रता १५ यस्याभिशापाद्दुःखार्तोदुःखंविंदतिनैषधः ॥ तस्यभूतस्यनोदुःखाद्दुःखमप्यधिकंभवेत्
१६ अपापचेतसंपापोयएवंकृतवान्नलम् ॥ तस्माद्दुःखतरंप्राप्यजीवत्वसुखजीविकाम् १७ एवंतुविलपंतीसाराज्ञोभार्यामहात्मनः ॥ अन्वेषमाणाभर्तारंवने
श्वापदसेविते १८ उन्मत्तवद्भीमसुताविलपंतीइतस्ततः ॥ हाहाराजन्नितिमुहुरितश्चेतश्चधावति १९ तांक्रंदमानामत्यर्थंकुररीमिववाशतीम् ॥ करुणंबहु
शोचंतींविलपंतींमुहुर्मुहुः २० सहसाऽभ्यागतांभैमीमभ्यासपरिवर्तिनीम् ॥ जग्राहाजगरोग्राहोमहाकायःक्षुधान्वितः २१ साग्रस्यमानाग्राहेणशोकेनचपरिप्लु
ता ॥ नात्मानंशोचतितथायथाशोचतिनैषधम् २२ हानाथमामिहवनेग्रस्यमानामनाथवत् ॥ ग्राहेणानेनविजनेकिमर्थंनानुधावसि २३ कथंभविष्यसिपुन
र्मामनुस्मृत्यनैषध ॥ कथंभवान्जगामाद्यमामुत्सृज्यवनेप्रभो २४ पापान्मुक्तःपुनर्लब्ध्वाबुद्धिंचेतोधनानिच ॥ श्रांतस्यतेक्षुधार्तस्यपरिग्लानस्यनैषध ॥
कःश्रमंराजशार्दूलनाशयिष्यतितेऽनघ २५ ततःकश्चिन्मृगव्याधोविचरन्गहनेवने ॥ आक्रंदमानांसंश्रुत्यजवेनाभिससारह २६ तांतुदृष्ट्वातथाग्रस्तामुरगेणा
यतेक्षणाम् ॥ त्वरमाणोमृगव्याधःसमभिक्रम्यवेगतः २७ मुखतःपाटयामासशस्त्रेणनिशितेनच ॥ निर्विचेष्टंभुजंगंतंविशस्यमृगजीवनः २८ मोक्षयित्वास
तांव्याधःप्रक्षाल्यसलिलेनह ॥ समाश्वास्यकृताहारामथपप्रच्छभारत २९ कस्यत्वंमृगशावाक्षिकथंचाभ्यागतावनम् ॥ कथंचेदंमहत्कृच्छ्रंप्राप्तवत्यसिभावि
नि ३० दमयंतीतथातेनपृच्छ्यमानाविशांपते ॥ सर्वमेतद्यथावृत्तमाचचक्षेऽस्यभारत ३१ तामर्धवस्त्रसंवीतांपीनश्रोणिपयोधराम् ॥ सुकुमारानवद्यांगीं
पूर्णचंद्रनिभाननाम् ३२ अरालपक्ष्मनयनांतथामधुरभाषिणीम् ॥ लक्षयित्वामृगव्याधःकामस्यवशमीयिवान् ३३

१९ वाशतींक्रोशंतीं २० ग्राहःसर्पः अजगरः तद्वत्स्थूलः २१ २२ । २३ बुद्धिलाभादूर्ध्वंमाविनाकथंभविष्यसि कथंजीविष्यसि २४ । २५ । २६ । २७ विशस्यविदार्य २८ । २९ । ३०
३१ । ३२ अरालानि कुटिलानि शोभमानानिवापक्ष्माणिनयनप्रांतकेशाययोस्तादृशेनयनेयस्यास्तथा ३३

३४ मन्युनाक्रोधेन ३५ । ३६ पतिराज्यविनाकृता पत्याराज्येनचरहिता अतीतवाक्पथेवाचाप्यनिवार्येसति कालेधूम्रवर्णेव्याधे ३७ परासुर्गतप्राणः ३८ व्यसुर्विगतप्राणः ३९ ॥ ॥ इत्यार

तामेवंश्लक्ष्णयावाचालुब्धकोमृदुपूर्वया ॥ सांत्वयामासकामार्तस्तदबुध्यतभाविनी ३४ दमयंत्यपितंदुष्टमुपलभ्यपतिव्रता ॥ तीव्ररोषसमाविष्टाप्रजज्वालेव
मन्युना ३५ सतुपापमतिःक्षुद्रःप्रधर्षयितुमातुरः ॥ दुर्धर्षांतर्कयामासदीप्तामग्निशिखामिव ३६ दमयंतीतुदुःखार्तापतिराज्यविनाकृता ॥ अतीतवाक्पथे
कालेशशापैनंरुषाऽन्विता ३७ यद्यहंनैषधादन्यंमनसाऽपिनचिंतये ॥ तथाऽयंपततांक्षुद्रोपरासुर्मृगजीवनः ३८ उक्तमात्रेतुवचनेतथासमृगजीवनः ॥ व्यसुः
पपातमेदिन्यामग्निदग्धइवद्रुमः ३९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिअजगरग्रस्तदमयंतीमोचनेत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥
॥ बृहदश्वउवाच ॥ सानिहत्यमृगव्याधंप्रतस्थेकमलेक्षणा ॥ वनंप्रतिभयंशून्यंझिल्लिकागणनादितम् १ सिंहद्वीपिरुरुव्याघ्रमहिषर्क्षगणैर्युतम् ॥ नानापक्षि
गणाकीर्णंम्लेच्छतस्करसेवितम् २ शालवेणुधवाश्वत्थतिंदुकेंगुदकिंशुकैः ॥ अर्जुनारिष्टसंछन्नंस्यंदनैश्चसशाल्मलैः ३ जंब्वाम्रलोध्रखदिरसालवेत्रसमाकुलम् ॥
पद्मकामलकप्लक्षकदंबोदुंबरावृतम् ४ बदरीबिल्वसंछन्नंन्यग्रोधैश्चसमाकुलम् ॥ प्रियालतालखर्जूरहरीतकबिभीतकैः ५ नानाधातुशतैर्नद्धान्विविधानपिचा
चलान् ॥ निकुंजान्पक्षिसंघुष्टान्दरीश्चाद्भुतदर्शनाः ६ नदीःसरांसिवापीश्चविविधांश्चमृगद्विजान् ॥ साबहून्भीमरूपांश्चपिशाचोरगराक्षसान् ७ पल्वलानि
तडागानिगिरिकूटानिसर्वशः ॥ सरितोनिर्झरांश्चैवददर्शाद्भुतदर्शनान् ८ यूथशोददृशेचात्रविदर्भाधिपनंदिनी ॥ महिषांश्चवराहांश्चऋक्षांश्चवनपन्नगान् ९
तेजसायशसालक्ष्म्यास्थित्याचपरयायुता ॥ वैदर्भीविचरत्येकानलमन्वेषतीतदा १० नाबिभ्यत्सान्नृपसुताभैमीतत्राथकस्यचित् ॥ दारुणामटवींप्राप्यभर्तृ
व्यसनपीडिता ११ विदर्भतनयाराजन्विललापसुदुःखिता ॥ भर्तृशोकपरीतांगीशिलातलमथाश्रिता १२ ॥ दमयंत्युवाच ॥ व्यूढोरस्कमहाबाहोनैषधानां
जनाधिप ॥ क्वनुराजन्गतोऽस्यद्यविसृज्यविजनेवने १३ अश्वमेधादिभिर्वीरक्रतुभिर्भूरिदक्षिणैः ॥ कथमिष्ट्वानरव्याघ्रमयिमिथ्याप्रवर्तसे १४ यत्त्वयोक्तंनर
श्रेष्ठमत्समक्षंमहाद्युते ॥ स्मर्तुमर्हसिकल्याणवचनंपार्थिवर्षभ १५ यच्चोक्तंविहगैर्हंसैःसमीपेतवभूमिप ॥ मत्समक्षंयदुक्तंचतदवेक्षितुमर्हसि १६ चत्वारएकतो
वेदाःसांगोपांगाःसविस्तराः ॥ स्वधीतामनुजव्याघ्रसत्यमेकंकिलैकतः १७ तस्मादर्हसिशत्रुघ्नसत्यंकर्तुंनरेश्वर ॥ उक्तवानसियद्वीरमत्सकाशेपुरावचः १८
हावीरनलनामाहंनष्टाकिलत्वानघ ॥ अस्यामटव्यांघोरायांकिंमांनप्रतिभाषसे १९ कर्षयत्येषमांरौद्रोव्यात्तास्योदारुणाकृतिः ॥ अरण्यराट्क्षुधाविष्टःकिं
मांनत्रातुमर्हसि २० नमेत्वदन्याकाचिद्धिप्रियाऽस्तीत्यब्रवीःसदा ॥ तामृतांकुरुकल्याणपुरोक्तांभारतींनृप २१

ण्यकेपर्वणिनैलकंठीयेभारतभावदीपेत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ सेति प्रतिभयंभीषणं झिल्लिकातीक्ष्णशब्दःपतंगविशेषः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११
१२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ अरण्यराट्शार्दूलः मांममचित्तंकर्षयतिव्यथयति २० । २१

२१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ परव्यूहाःशत्रुसैन्यानि । परव्यसनेतिपाठेपरेषांदुःखस्यनाशनं ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१

उन्मत्तांविलपंतींमांभार्यामिष्टांनराधिप ॥ ईप्सितामीप्सितोऽसित्वंकिंमांनप्रतिभाषसे २२ कृशांदीनांविवर्णांचमलिनांवसुधाधिप ॥ वस्त्रार्धप्रावृतामेकांवि लपंतीमनाथवत् २३ यूथभ्रष्टामिवैकांमांहरिणींपृथुलोचन ॥ नमानयसिमामार्यरुदंतीमरिकर्शन २४ महाराजमहारण्येअहमेकाकिनीसती ॥ दमयंत्यभिभा षेत्वांकिंमांनप्रतिभाषसे २५ कुलशीलोपसंपन्नचारुसर्वांगशोभन ॥ नाद्यत्वांप्रतिपश्यामिगिरावस्मिन्नरोत्तम २६ वनेचास्मिन्महाघोरेसिंहव्याघ्रनिषेविते ॥ शयानमुपविष्टंवास्थितंवानिषधाधिप २७ प्रस्थितंवानरश्रेष्ठममशोकविवर्धन ॥ कंनुपृच्छामिदुःखार्तात्वदर्थेशोककर्शिता २८ कच्चिद्दृष्टस्त्वयाऽऽरण्ये संगत्येहनलोनृपः ॥ कोनुमेवाऽथप्रष्टव्योवनेऽस्मिन्प्रस्थितंनलम् २९ अभिरूपंमहात्मानंपरव्यूहविनाशनम् ॥ यमन्वेषसिराजानंनलंपद्मनिभेक्षणम् ३० अयंसइतिकस्याद्यश्रोष्यामिमधुरांगिरम् ॥ अरण्यराडयंश्रीमांश्चतुर्दंष्ट्रोमहाहनुः ३१ शार्दूलोऽभिमुखोऽभ्येतिव्रजाम्येनमशंकिता ॥ भवान्मृगाणामधि पस्त्वमस्मिन्काननेप्रभुः ३२ विदर्भराजतनयांदमयंतीतिविद्धिमाम् ॥ निषधाधिपतेर्भार्यांनलस्यामित्रघातिनः ३३ पतिमन्वेषतीमेकांकृपणांशोककर्शि ताम् ॥ आश्वासयमृगेंद्रेहयदिदृष्टस्त्वयानलः ३४ अथवात्वंवनपतेनलंयदिनशंससि ॥ मांखादयमृगश्रेष्ठदुःखादस्माद्विमोचय ३५ श्रुत्वाऽरण्येविल पितंनमामाश्वासयत्ययम् ॥ यामिमांस्वादुसलिलामापगांसागरंगमाम् ३६ इमंशिलोच्चयंपुण्यंशृंगैर्बहुभिरुच्छ्रितैः ॥ विराजद्भिरिवानेकैर्नैकवर्णैर्मनोरमैः ३७ नानाधातुसमाकीर्णंविविधोपलभूषितम् ॥ अस्यारण्यस्यमहतःकेतुभूतमिवोत्थितम् ३८ सिंहशार्दूलमातंगवराहर्क्षमृगायुतम् ॥ पतत्रिभिर्बहुविधैःसमंतादनुना दितम् ३९ किंशुकाशोकबकुलपुन्नागैरुपशोभितम् ॥ कर्णिकारधवप्लक्षैःसुपुष्पैरुपशोभितम् ४० सरिद्भिःसविहंगाभिःशिखरैश्चसमाकुलम् ॥ गिरिराजमिमंतावत्पृ च्छामिनृपतिंप्रति ४१ भगवन्नचलश्रेष्ठदिव्यदर्शनविश्रुत ॥ शरण्यबहुकल्याणनमस्तेऽस्तुमहीधर ४२ प्रणमेत्वाऽभिगम्याहंराजपुत्रींनिबोधमाम् ॥ राज्ञःस्नु षांराजभार्यांदमयंतीतिविश्रुताम् ४३ राजाविदर्भाधिपतिःपितामममहारथः ॥ भीमोनामक्षितिपतिश्चातुर्वर्ण्यस्यरक्षिता ४४ राजसूयाश्वमेधानांक्रतूनांद क्षिणावताम् ॥ आहर्तापार्थिवश्रेष्ठःपृथुचार्वंचितेक्षणः ४५ ब्रह्मण्यःसाधुवृत्तश्चसत्यवागनसूयकः ॥ शीलवान्वीर्यसंपन्नःपृथुश्रीर्धर्मविच्छुचिः ४६ सम्यग्गो प्ताविदर्भाणांनिर्जितारिगणःप्रभुः ॥ तस्यमांविद्धितनयांभगवंस्त्वामुपस्थिताम् ४७ निषधेषुमहाराजःश्वशुरोमेनरोत्तमः ॥ गृहीतनामाविख्यातोवीरसे नइतिस्मह ४८ तस्यराज्ञःसुतोवीरःश्रीमान्सत्यपराक्रमः ॥ क्रमप्राप्तंपितुःस्वंयोराज्यंसमनुशास्तिह ४९ नलोनामाऽरिहाश्यामःपुण्यश्लोकइतिश्रुतः ॥ ब्रह्मण्योवेदविद्वाग्मीपुण्यकृत्सोमपोऽग्निमान् ५०

४२ । ४३ । ४४ । ४५ ब्रह्मण्यः ब्रह्मणि ब्राह्मणजातौ वेदे वैदिककर्मणि परमात्मनिवा साधुः ४६ । ४७ । ४८ । ४९ अग्निमान् । नित्ययोगेमतुप् सर्वदैवाग्निविच्छेदशून्यइत्यर्थः ५०

५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ आम्नायसारिणींवेदानुगांसत्यामित्यर्थः ऋद्धामदीनां आश्वासयतेतिबहुत्वंवकुर्वैकाऽपात्रदोषावहम् ५९ । ६०।६१ । ६२ अब्भक्षैरिति सर्व

यष्टादाताचयोद्धाचसम्यक्चैवप्रशासिता ॥ तस्यमामबलांश्रेष्ठांविद्धिभार्यामिहागताम् ५१ त्यक्तश्रियंभर्तृहीनामनाथांव्यसनान्विताम् ॥ अन्वेषमाणांभर्ता रंत्वंमांपर्वतसत्तम ५२ समुल्लिखद्भिरेतैर्हित्वयाशृंगशतैर्नृपः ॥ कच्चिद्दृष्टोऽचलश्रेष्ठवनेऽस्मिन्दारुणेनलोनृपः ५३ गजेंद्रविक्रमोधीमान्दीर्घबाहुरमर्षणः ॥ विक्रांतः सत्त्ववान्वीरोभर्तामममहायशाः ५४ निषधानामधिपतिःकच्चिद्दृष्टस्त्वयानलः ॥ किंमांविलपतीमेकांपर्वतश्रेष्ठविह्वलाम् ५५ गिरानाश्वासयस्यद्यस्वांसुतामिवदुः खिताम् ॥ वीरविक्रांतधर्मज्ञसत्यसंधमहीपते ५६ यद्यस्यस्मिन्वनेराजन्दर्शयात्मानमात्मना ॥ कदासुस्निग्धगंभीरांजीमूतस्वनसन्निभाम् ५७ श्रोष्यामि नैषधस्याहंवाचंताममृतोपमाम् ॥ वैदर्भीत्येवविस्पष्टांशुभांराज्ञोमहात्मनः ५८ आम्नायसारिणीमृद्धांममशोकविनाशिनीम् ॥ भीतामाश्वासयतमांनृपतेधर्म वत्सल ५९ इतिसातंगिरिश्रेष्ठमुक्त्वापार्थिवनंदिनी ॥ दमयंतीततोभूयोजगामदिशमुत्तराम् ६० सागत्वात्रीनहोरात्रान्ददर्शपरमांगना ॥ तापसारण्यमतुलं दिव्यकाननशोभितम् ६१ वसिष्ठभृग्वत्रिसमैस्तापसैरुपशोभितम् ॥ नियतैःसंयताहारैर्दमशौचसमन्वितैः ६२ अब्भक्षैर्वायुभक्षैश्चपत्राहारैस्तथैवच ॥ जितेंद्रियैर्महाभागैःस्वर्गमार्गदिदृक्षुभिः ६३ वल्कलाजिनसंवीतैर्मुनिभिःसंयतेंद्रियैः ॥ तापसाऽध्युषितंरम्यंददर्शाश्रममंडलम् ६४ नानामृगगणैर्जुष्टंशाखा मृगगणायुतम् ॥ तापसैःसमुपेतंचसादृष्ट्वैवसमाश्वसत् ६५ सुभ्रूःसुकेशीसुश्रोणीसुकुचासुद्विजानना ॥ वर्चस्विनीसुप्रतिष्ठास्वसितायतलोचना ६६ साविवे शाश्रमपदंवीरसेनसुतप्रिया ॥ योषिद्रत्नंमहाभागादमयंतीतपस्विनी ६७ साऽभिवाद्यतपोवृद्धान्विनयावनतास्थिता ॥ स्वागतंतइतिप्रोक्तातैःसर्वैस्ताप सोत्तमैः ६८ पूजांचास्याथान्यायंकृत्वातत्रतपोधनाः ॥ आस्यतामित्यथोचुस्तेब्रूहिकिंकरवामहे ६९ तानुवाचवरारोहाकच्चिद्भगवतामिह ॥ तपःस्वग्निषु धर्मेषुमृगपक्षिषुचानघाः ७० कुशलंवोमहाभागाःस्वधर्माचरणेषुच ॥ तैरुक्ताकुशलंभद्रेसर्वत्रेतियशस्विनी ७१ ब्रूहिसर्वानवद्यांगिकात्वंकिंचचिकीर्षसि ॥ दृ ष्ट्वैवतेपरंरूपंद्युतिंचपरमामिह ७२ विस्मयोनःसमुत्पन्नःसमाश्वसिहिमाशुचः ॥ अस्यारण्यस्यदेवीत्वमुताहोऽस्यमहीभृतः ७३ अस्याश्चनद्याःकल्याणिवद सत्यमनिंदिते ॥ साऽब्रवीत्तानृषीन्नाहमरण्यस्यास्यदेवता ७४ नचाप्यस्य गिरेर्विप्रानैवनद्याश्चदेवता ॥ मानुषींमांविजानीतयूयंसर्वेतपोधनाः ७५ विस्त

१९ रेणाभिधास्यामितन्मेशृणुतसर्वशः ॥ विदर्भेषुमहीपालोभीमोनाममहीपतिः ७६ तस्यमांतनयांसर्वेजानीतद्विजसत्तमाः ॥ निषधाधिपतिर्धीमान्नलोनाम महायशाः ७७ वीरःसंग्रामजिद्विद्वान्ममभर्ताविशांपतिः ॥ देवताभ्यर्चनपरोद्विजातिजनवत्सलः ७८

वाक्यंसावधारणमितिन्यायेनअंबुमात्रभक्षैरित्यर्थः ६३ । ६४ । ६५ सुद्विजाननाशोभनदंतयुक्तमुखी वर्चस्विनीधर्मजनवेजसायुक्ता सुप्रतिष्ठासुजघना प्रतिष्ठत्यस्मिन्निति प्रतिष्ठशब्दोजघनवा ची ६६ वीरसेनसुतस्यनलस्यप्रिया ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८

७९ । ८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ श्रेयसामोक्षेण योक्ष्येयोजयिष्ये योगबलेनदेहंत्यक्त्वामोक्षंमाप्स्येइत्यर्थः अन्यथाआत्महत्यादोषात्श्रेयोयोगोनसंभवेत् ८९

गोप्तानिषधवंशस्यमहातेजामहाबलः ॥ सत्यवान्धर्मवित्प्राज्ञःसत्यसंधोऽरिमर्दनः ७९ ब्रह्मण्योदैवतपरःश्रीमान्परपुरंजयः ॥ नलोनामनृपश्रेष्ठोदेवराजसम
द्युतिः ८० ममभर्त्ताविशालाक्षःपूर्णेंदुवदनोऽरिहा ॥ आहर्त्ताक्रतुमुख्यानांवेदवेदांगपारगः ८१ सपत्नानांमृधेहंतारविसोमसमप्रभः ॥ सकैश्चिन्निकृतिप्रज्ञैर
नार्यैरकृतात्मभिः ८२ आहूयपृथिवीपालःसत्यधर्मपरायणः ॥ देवनेकुशलैर्जिह्मैर्जितंराज्यंवसूनिच ८३ तस्यमामवगच्छध्वंभार्यांराजर्षभस्यवै ॥ दमयंतीति
विख्यातांभर्तुर्दर्शनलालसाम् ८४ सावनानिगिरींश्चैवसरांसिसरितस्तथा ॥ पल्वलानिचसर्वाणितथाऽरण्यानिसर्वशः ८५ अन्वेषमाणाभर्तारंनलंरणविशार
दम् ॥ महात्मानंकृतास्त्रंचविचरामीहदुःखिता ८६ कच्चिद्भगवतांरम्यंतपोवनमिदंनृपः ॥ भवेत्प्राप्तोनलोनामानिषधानांजनाधिपः ८७ यत्कृतेऽहमिदंब्रह्म
न्प्रपन्नाभृशदारुणम् ॥ वनंप्रतिभयंघोरंशार्दूलमृगसेवितम् ८८ यदिकैश्चिदहोरात्रैर्नद्रक्ष्यामिनलंनृपम् ॥ आत्मानंश्रेयसायोक्ष्येदेहस्यास्यविमोचनात् ८९
कोनुमेजीवितेनार्थस्तमृतेपुरुषर्षभम् ॥ कथंभविष्याम्यद्याहंभर्तृशोकाभिपीडिता ९० तथाविलपतीमेकामरण्येभीमनंदिनीम् ॥ दमयंतीमथोचुस्तेतापसाः
सत्यदर्शिनः ९१ उदर्कस्तवकल्याणिकल्याणोभविताशुभे ॥ वयंपश्यामतपसाक्षिप्रंद्रक्ष्यसिनैषधम् ९२ निषधानामधिपतिंनलंरिपुनिपातिनम् ॥ भैमिधर्म
भृतांश्रेष्ठंद्रक्ष्यसेविगतज्वरम् ९३ विमुक्तंसर्वपापेभ्यःसर्वरत्नसमन्वितम् ॥ तदेवनगरंश्रेष्ठंप्रशासतमरिंदमम् ९४ द्विषतांभयकर्तारंसुहृदांशोकनाशनम् ॥ पतिं
द्रक्ष्यसिकल्याणिकल्याणाभिजनंनृपम् ९५ एवमुक्त्वानलस्येष्टांमहिषींपार्थिवात्मजाम् ॥ तापसाऽन्तर्हिताःसर्वेसाग्निहोत्राश्रमास्तथा ९६ सादृष्ट्वामहदाश्चर्यंवि
स्मिताह्यभवत्तदा ॥ दमयंत्यनवद्यांगीवीरसेननृपस्नुषा ९७ किंनुस्वप्नोमयादृष्टःकोऽयंविधिरिहाभवत् ॥ क्वनुतेतापसाःसर्वेक्वतदाश्रममंडलम् ९८ क्वसापुण्य
जलारम्यानदीद्विजनिषेविता ॥ क्वनुतेहनगाहृद्याःफलपुष्पोपशोभिताः ९९ ध्यात्वाचिरंभीमसुतादमयंतीशुचिस्मिता ॥ भर्तृशोकपरादीनाविवर्णवदनाऽभ
वत् १०० सागत्वाऽथापरांभूमिंबाष्पसंदिग्धयागिरा ॥ विललापाश्रुपूर्णाक्षीदृष्ट्वाऽशोकतरुंततः १ उपगम्यतरुश्रेष्ठमशोकंपुष्पितंवने ॥ पल्लवापीडितंहृद्यं
विहंगैरनुनादितम् २ अहोबतायमगमःश्रीमानस्मिन्वनांतरे ॥ आपीडैर्बहुभिर्भातिश्रीमान्पर्वतराडिव ३ विशोकांकुरुमांक्षिप्रमशोकप्रियदर्शन ॥ वीतशो
कभयाबाधंकच्चित्त्वंदृष्टवान्नृपम् ४ नलंनामारिदमनंदमयंत्याःप्रियंपतिम् ॥ निषधानामधिपतिंदृष्टवानसिमेप्रियम् ५ एकवस्त्रार्धसंवीतंसुकुमार
तनुत्वचम् ॥ व्यसनेनार्दितंवीरमरण्यमिदमागतम् १०६

९० । ९१ उदर्कःउत्तरकालः ९२ । ९३ प्रशासतं । जक्षित्यादयःषडितिनुमभावः ९४ । ९५ तापसा इतिच्छेदः संधिरार्षः ९६ । ९७ । ९८ । ९९ । १०० बाष्पोबाष्पवदुष्णउच्छ्वासवायु
स्तेनसंदिग्धयाऽस्फुटाक्षरया १०१ पल्लवैरापीडितंभूषितं २ अगमःवृक्षः आपीडैःपुष्पफलादिरूपैरलंकारैः ३ । ४ । ५ सुकुमारादुःखासहा यतस्तनुर्मृद्वीत्वक्यस्यतम् १०६

२

अशोकनग हेवीतशोकवृक्ष १०७ । ८ । ९ । १० महासार्थंमहांतंजनसमूहम् ११ । १२ । १३ उपसर्पउपससर्पअभ्यासलोपआर्षः वरारोहाविस्तीर्णजघना १४ पांसुकुकाःध्वस्ताः

यथाविशोकागच्छेयमशोकनगतत्कुरु ॥ सत्यनामाभवाशोकअशोकःशोकनाशनः १०७ एवंसाऽशोकवृक्षंतमार्त्ताविपरिगम्यह ॥ जगामदारुणतरंदेशंभैमीवरांगना
८ साददर्शनगान्नैकान्नैकाश्चसरितस्तथा ॥ नैकांश्चपर्वतान्रम्यान्नैकांश्चमृगपक्षिणः ९ कंदरांश्चनितंबांश्चनदीश्चाद्भुतदर्शनाः ॥ ददर्शतान्भीमसुतापतिमन्वेष
तीतदा १० गत्वाप्रकृष्टमध्वानंदमयंतीशुचिस्मिता ॥ ददर्शाथमहासार्थंहस्त्यश्वरथसंकुलम् ११ उत्तरंतंनदींरम्यांप्रसन्नसलिलांशुभाम् ॥ सुशीततो
यांविस्तीर्णांह्रदिनींवेतसैर्वृताम् १२ प्रोद्घुष्टांक्रौंचकुररैश्चक्रवाकोपकूजिताम् ॥ कूर्मग्राहझषाकीर्णांविपुलद्वीपशोभिताम् १३ सादृष्ट्वैवमहासार्थंनलपत्नी
यशस्विनी ॥ उपसर्पवरारोहाजनमध्यंविवेशह १४ उन्मत्तरूपाशोकार्त्तातथावस्त्रार्धसंवृता ॥ कृशाविवर्णामलिनापांसुध्वस्तशिरोरुहा १५ तांदृष्ट्वा
तत्रमनुजाःकेचिद्भीताःप्रदुद्रुवुः ॥ केचिच्चिंतापराजग्मुःकेचित्तत्रविचुक्रुशुः १६ प्रहसंतिस्मतांकेचिदभ्यसूयंतिचापरे ॥ अकुर्वंतदयांकेचित्पप्रच्छु
श्चापिभारत १७ काऽसिकस्यासिकल्याणिकिंवामृगयसेवने ॥ त्वांदृष्ट्वाव्यथिताःस्मेहकच्चित्त्वमसिमानुषी १८ वदसत्यंवनस्यास्यपर्वतस्याथवादिशः ॥ देव
तात्वंहिकल्याणित्वांवयंशरणंगताः १९ यक्षीवाराक्षसीवात्वमुताहोऽसिवरांगना ॥ सर्वथाकुरुनःस्वस्तिरक्षवाऽस्माननिंदिते २० यथाऽयंसर्वथासार्थःक्षेमी
शीघ्रमितोव्रजेत् ॥ तथाविधत्स्वकल्याणियथाश्रेयोहिनोभवेत् २१ तथोक्तातेनसार्थेनदमयंतीनृपात्मजा ॥ प्रत्युवाचततःसाध्वीभर्तृव्यसनपीडिता २२
सार्थवाहंचसार्थंचजनायेचात्रकेचन ॥ युवस्थविरबालाश्चसार्थस्यचपुरोगमाः २३ मानुषींमांविजानीतमनुजाधिपतेःसुताम् ॥ नृपस्नुषांराजभार्यांभर्तृदर्श
नलालसाम् २४ विदर्भराण्ममपिताभर्त्ताराजाचनैषधः ॥ नलोनाममहाभागस्तंमार्गाम्यपराजितम् २५ यदिजानितनृपतिंक्षिप्रंशंसतमेप्रियम् ॥ नलंपुरु
षशार्दुलममित्रगणसूदनम् २६ तामुवाचानवद्यांगींसार्थस्यमहतःप्रभुः ॥ सार्थवाहःशुचिर्नामशृणुकल्याणिमद्वचः २७ अहंसार्थस्यनेतावैसार्थवाहःशुचि
स्मिते ॥ मनुष्यंनलनामानंनपश्यामियशस्विनि २८ कुंजरद्वीपिमहिषशार्दूलर्क्षमृगानपि ॥ पश्याम्यस्मिन्वनेकृत्स्नेह्यमनुष्यनिषेविते २९ ऋतेत्वांमानु
षींमर्त्यंनपश्यामिमहावने ॥ तथानोयक्षराडद्यमणिभद्रःप्रसीदतु ३० साऽब्रवीद्वणिजःसर्वान्सार्थवाहंचतंततः ॥ क्वनुयास्यतिसार्थोऽयमेतदाख्यातुमर्हसि
३१ ॥ ॥ सार्थवाहउवाच ॥ ॥ सार्थोऽयंचेदिराजस्यसुबाहोःसत्यदर्शिनः ॥ क्षिप्रंजनपदंगंतालाभायमनुजात्मजे १३२ ॥ ॥ इतिश्रीमहाभारतेआर
ण्यकेपर्वणिनलोपाख्यानपर्वणिदमयंतीसार्थवाहसंगमेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ६४ ॥ ॥ ६४ ॥ ॥ ६४ ॥ ॥ ६४ ॥

मुक्तबंधाश्चशिरोरुहाःकेशाःयस्याः १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ मार्गाम्यन्वेषयामि २५ । २६ । २७ । २८ । २९ । ३० । ३१ । १३२
॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥

शति १ पद्मैःसौगंधिकैश्चपद्मविशेषैर्युक्तत्वात्पद्मसौगंधिकंनामसरः २ सन्निवासः ३ श्रांतवाहाःश्रांतवाहनाः निवेशायवासाय ४ पश्चिमांत्रिसंध्यां सरस्तीरमुवं वा ५ । ६ । ७ । ८ । ९

॥बृहदश्वउवाच॥सातच्छ्रुत्वाऽनवद्यांगीसार्थवाहवचस्तदा ॥ जगामसहतेनैवसार्थेनपतिलालसा १अथकालेबहुतिथेवनेमहतिदारुणे ॥ तडागंसर्वतोभद्रंपद्मसौगं
धिकंमहत् २ददृशुर्वणिजोरम्यंप्रभूतयवसेंधनम् ॥ बहुपुष्पफलोपेतंनानापक्षिनिषेवितम् ३निर्मलस्वादुसलिलंमनोहारिसुशीतलम् ॥ सुपरिश्रांतवाहास्तेनिवेशा
यमनोदधुः ४ संमतेसार्थवाहस्यविविशुर्वनमुत्तमम् ॥ उवाससार्थःसुमहान्वेलामासाद्यपश्चिमाम् ५ अथार्धरात्रसमयेनिःशब्दस्तिमितेतदा ॥ सुप्तेसार्थेपरिश्रां
तेहस्तियूथमुपागमत् ६ पानीयार्थंगिरिनदींमदप्रस्रवणाविलाम् ॥ अथापश्यतसार्थंतंसार्थजान्सुबहून्गजान् ७ तेतान्ग्राम्यगजान्दृष्ट्वासर्वेवनगजास्तदा ॥
समाद्रवंतवेगेनजिघांसंतोमदोत्कटाः ८ तेषामापततांवेगःकरिणांदुःसहोऽभवत् ॥ नगाग्रादिवशीर्णानांशृंगाणांपततांक्षितौ ९ स्पंदतामपिनागानांमार्गा
नष्टावनोद्भवाः ॥ मार्गंसंरुद्धचसंसुप्तंपद्मिन्याःसार्थमुत्तमम् १० तेतंममर्दुःसहसाचेष्टमानंमहीतले ॥ हाहाकारंप्रमुंचंतःसार्थिकाःशरणार्थिनः ११ वनगुल्मांश्चधा
वंतोनिद्रांधाबहवोऽभवन् ॥ केचिद्दंतैःकरैःकेचित्केचित्पद्भ्यांहतागजैः १२ निहतोष्ट्राश्वबहुलाःपदातिजनसंकुलाः ॥ भयादाधावमानाश्चपरस्परहतास्तदा १३
घोरान्नादान्विमुंचंतोनिपेतुर्धरणीतले ॥ वृक्षेष्वारुह्यसंरब्धाःपतिताविषमेषुच १४एवंप्रकारैर्बहुभिर्दैवेनाक्रम्यहस्तिभिः॥ राजन्विनिहतंसर्वंसमृद्धंसार्थमंडलम्
१५ आरावःसुमहांश्चासीत्त्रैलोक्यभयकारकः ॥ एषोऽग्निरुत्थितःकष्टस्त्रायध्वंधावताधुना १६ रत्नराशिर्विशीर्णोऽयंगृह्णीध्वंकिंप्रधावत ॥ सामान्यमेतद्द्रविणं
नमिथ्यावचनंमम १७ एवमेवाभिभाषंतोविद्रवंतिभयात्तदा ॥ पुनरेवाभिधास्यामिचिंतयध्वंसकातराः १८ तस्मिंस्तथावर्तमानेदारुणेजनसंक्षये ॥ दमयंती
चबुबुधेभयसंत्रस्तमानसा १९ अपश्यद्वैशसंतत्रसर्वलोकभयंकरम् ॥ अदृष्टपूर्वंतद्दृष्ट्वाबालापद्मनिभेक्षणा २० संसक्तवदनाश्वासाउत्तस्थौभयविह्वला ॥ येतु
तत्रविनिर्मुक्ताःसार्थात्केचिदविक्षताः २१ तेऽब्रुवन्सहिताःसर्वेकस्येदंकर्मणःफलम् ॥ नूनंनपूजितोऽस्माभिर्मणिभद्रोमहायशाः २२ तथायक्षाधिपःश्रीमान्न
वैवैश्रवणःप्रभुः ॥ नपूजाविघ्नकर्तॄणामथवाप्रथमंकृता २३ शकुनानांफलंवाथविपरीतमिदंध्रुवम् ॥ ग्रहानविपरीतास्तुकिमन्यादिदमागतं २४ अपरेत्वब्रुवन्
दीनाज्ञातिद्रव्यविनाकृता ॥ याऽसावद्यमहासार्थेनारीह्युन्मत्तदर्शना २५ प्रविष्टाविकृताकाराकृत्वारूपममानुषम् ॥ तयेयंविहितापूर्वंमायापरमदारुणा २६
राक्षसीवाध्रुवंयक्षीपिशाचीवाभयंकरी ॥ तस्याःसर्वमिदंपापंनात्रकार्याविचारणा २७ यदिपश्यामतांपापांसार्थघ्नींनैकदुःखदाम् ॥ लोष्टभिःपांसुभिश्चैवतृणैःका ॥५६॥
ष्ठैश्चमुष्टिभिः २८ अवश्यमेवहन्यामःसार्थस्यकिलकृत्यकाम् ॥ दमयंतीतुतच्छ्रुत्वावाक्यंतेषांसुदारुणम् २९

पद्मिन्याःपद्मवत्याःसरस्याः १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ २३ । २४ । २५ २६ । २७ लोष्टभिरितिप्रयोगादेवलोष्टशब्दोनकारांतो
ऽप्यस्तीतिज्ञायते २८ कृत्यैवकृत्यका कुत्सिताकृत्याकृत्यकेतिवाताम् २९

१० । ३१ । ३२ अपश्चिमामपरावर्तिनीं ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ पापकृतंपापंकर्म ४० । ४१ । ४२ । ४३ । ४४ । ४५ अमार्जितांधूसरवेणीं ४६ ४७ । ४८ । ४९

ह्रीताभीताचसंविग्नाप्राद्रवद्यत्रकाननम् ॥ आशंकमानातत्पापमात्मानंपर्यदेवयत् ३० अहोममोपरिविधेःसंरंभोदारुणोमहान् ॥ नानुबध्नातिकुशलंकस्येदंक
र्मणःफलम् ३१ नस्मराम्यशुभंकिंचित्कृतंकस्यचिदण्वपि ॥ कर्मणामनसावाचाकस्येदंकर्मणःफलम् ३२ नूनंजन्मांतरकृतंपापमापतितंमहत् ॥ अपश्चिमा
मिमांकष्टामापदंप्राप्तवत्यहम् ३३ भर्तृराज्यापहरणंस्वजनाच्चपराजयः ॥ भर्त्रासहवियोगश्चतनयाभ्यांचविच्युतिः ३४ निर्नाथतावनेवासोबहुव्यालनिषेवि
ते ॥ अथापरेद्युःसंप्राप्तेहतशिष्टाजनास्तदा ३५ देशात्तस्माद्विनिष्क्रम्यशोचंतेवैशसंकृतम् ॥ भ्रातरंपितरंपुत्रंसखायंचनराधिप ३६ अशोचत्तत्रवैदर्भीकिंनु
मेदुष्कृतंकृतम् ॥ योऽपिमेनिर्जनेऽरण्येसंप्राप्तोऽयंजनार्णवः ३७ सहतोहस्तियूथेनमंदभाग्यान्ममैवतत् ॥ प्राप्तव्यंसुचिरंदुःखंनूनमद्यापिवैमया ३८ नाप्रा
प्तकालोम्रियतेश्रुतंवृद्धानुशासनम् ॥ यानाहमद्यमृदिताहस्तियूथेनदुःखिता ३९ नह्यदैवकृतंकिंचिन्नराणामिहविद्यते ॥ नचमेबालभावेऽपिकिंचित्पापत्कृतं
कृतम् ४० कर्मणामनसावाचायदिदंदुःखमागतम् ॥ मन्येस्वयंवरकृतेलोकपालाःसमागताः ४१ प्रत्याख्यातामयातत्रनलस्यार्थायदेवताः ॥ नूनंतेषांप्रभा
वेनवियोगंप्राप्तवत्यहम् ४२ एवमादीनिदुःखार्तासाविलप्यवरांगना ॥ प्रलापानितदातानिदमयंतीपतिव्रता ४३ हतशेषैःसहतदाब्राह्मणैर्वेदपारगैः ॥ अग
च्छद्राजशार्दूलचंद्रलेखेवशारदी ४४ गच्छंतीसाऽचिराद्बालापुरमासादयन्महत् ॥ सायाह्नेचेदिराजस्यसुबाहोःसत्यदर्शिनः ४५ अथवस्त्रार्धसंवीताप्रविवेश
पुरोत्तमम् ॥ तांविह्वलांकृशांदीनांमुक्तकेशीममार्जिताम् ४६ उन्मत्तामिवगच्छंतींददृशुःपुरवासिनः ॥ प्रविशंतींतुतांदृष्ट्वाचेदिराजपुरींतदा ४७ अनुजग्मु
स्तत्रबालाग्रामिपुत्राःकुतूहलात् ॥ सातैःपरिवृताऽगच्छत्समीपंराजवेश्मनः ४८ तांप्रासादगताऽपश्यद्राजमाताजनैर्वृताम् ॥ धात्रीमुवाचगच्छैनामान
येहममांतिकम् ४९ जनेनक्लिश्यतेबालादुःखिताशरणार्थिनी ॥ तादृग्रूपंचपश्यामिविद्योतयतिमेगृहम् ५० उन्मत्तवेषाकल्याणीश्रीरिवायतलोचना ॥
साजनंवारयित्वातंप्रासादतलमुत्तमम् ५१ आरोप्यविस्मिताराजन्दमयंतीमपृच्छत ॥ एवमप्यसुखाविष्टाबिभर्षिपरमंवपुः ५२ भासिविद्युदिवाभ्रेषुशंसमे
कासिकस्यवा ॥ नहितेमानुषंरूपंभूषणैरपिवर्जितम् ५३ असहायानरेभ्यश्चनोद्विजस्यमरप्रभे ॥ तच्छ्रुत्वावचनंतस्याभैमीवचनमब्रवीत् ५४ मानुषींमां
विजानीहिभर्तारंसमनुव्रताम् ॥ सैरंध्रींजातिसंपन्नांभुजिष्यांकामवासिनीम् ५५ फलमूलाशनामेकांयत्रसायंप्रतिश्रयाम् ॥ असंख्येयगुणोभर्तामांच
नित्यमनुव्रतः ५६ भक्ताऽहमपितंवीरंछायेवानुगतापथि ॥ तस्यदैवात्प्रसंगोऽभूदतिमात्रंसुदेवने ५७

५० प्रासादतलंप्रासादोपरि ५१ । ५२ । ५३ । ५४ सैरंध्रीःकाराःप्रतिहारीरास्तासांसमूहःसैरं धारयित्रीनेपथ्यधारिणीमंतःपुरचरी मित्यर्थः भुजिष्यांदासीं कामवासिनींयत्रकामइच्छातत्रैव
वसंतीं ५५ यत्रसायंकालस्तत्रैवप्रतिश्रयोगृहंयस्यास्तां ५६ । ५७

५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ हेवीरप्रजायिनि वीरानेवप्रजायतेसूतेसावीरप्रजायिनी ६७ । ६८ । ६९ पश्येयंद्रष्टाचतान्पृच्छेयमपि ७० । ७१ । ७२ । ७३ । ७४

द्यूतेसनिर्जितश्चैववनमेकउपेयिवान् ॥ तमेकवसनंवीरमुन्मत्तमिवविह्वलम् ५८ आश्वासयंतीभर्तारमहमप्यगमंवनम् ॥ सकदाचिद्वनेवीरःकस्मिंश्चित्कारणांतरे
५९ क्षुत्परीतस्तुविमनास्तदप्येकंव्यसर्जयत् ॥ तमेकवसनानग्नमुन्मत्तवदचेतसम् ६० अनुव्रजंतीबहुलानस्वपापिनिशास्तदा॥ततोबहुतिथेकालेसुप्तामुत्सृज्य
मांकचित् ६१ वाससोऽर्धंपरिच्छिद्यत्यक्तवान्मामनागसम् ॥ तंमार्गमाणाभर्तारंदह्यमानादिवानिशम् ६२ साऽहंकमलगर्भाभमपश्यंतीहृदिप्रियम् ॥ नविं
दाम्यमरप्रख्यंप्रियंप्राणेश्वरंप्रभुम् ६३ तामश्रुपरिपूर्णाक्षींविलपंतींतथाबहु ॥ राजमाताऽब्रवीदार्तांभैमीमार्तस्वरांस्वयम् ६४ वसस्वमयिकल्याणिप्रीतिर्मे
परमात्वयि ॥ मृगयिष्यंतितेभद्रेभर्तारंपुरुषामम ६५ अपिवास्वयमागच्छेत्परिधावन्नितस्ततः ॥ इहैववसतीभद्रेभर्तारमुपलप्स्यसे ६६ राजमातुर्वचःश्रु
त्वादमयंतीवचोऽब्रवीत् ॥ समयेनोत्सहेवस्तुंत्वयिवीरप्रजायिनि ६७ उच्छिष्टंनैवभुंजीयांनकुर्यांपादधावनम् ॥ नचाहंपुरुषानन्यान्प्रभाषेयंकथंचन ६८
प्रार्थयेद्यदिमांकश्चिद्दंड्यस्तेसपुमान्भवेत् ॥ वध्यश्चतेऽसकृन्मंदइतिमेव्रतमाहितम् ६९ भर्तुरन्वेषणार्थंतुपश्येयंब्राह्मणानहम् ॥ यद्येवमिहवत्स्यामित्वत्स
काशेनसंशयः ७० अतोऽन्यथानमेवासोवर्ततेहृदयेकाचित् ॥ तांप्रहृष्टेनमनसाराजमातेदमब्रवीत् ७१ सर्वमेतत्करिष्यामिदिष्ट्याचातेव्रतमीदृशम् ॥ एवमुक्त्वात
तोभैमींराजमाताविशांपते ७२ उवाचेदंदुहितरंसुनंदांनामभारत ॥ सैरंध्रीमभिजानीष्वसुनंदेदेवरूपिणीं ७३ वयसातुल्यतांप्राप्तासखीतवभवत्वियम् ॥ एतया
सहमोदस्वनिरुद्विग्नमनाःसदा ७४ ततःपरमसंहृष्टासुनंदागृहमागमत् ॥ दमयंतीमुपादायसखीभिःपरिवारिता ७५ सातत्रपूज्यमानावैदमयंत्यनंदत ॥
सर्वकामैःसुविहितैर्निरुद्वेगाऽवसत्तदा ७६ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिदमयंतीचेदिराजगृहवासेपंचषष्टितमोऽध्यायः ६५ ॥
॥ बृहदश्वउवाच ॥ उत्सृज्यदमयंतींतुनलोराजाविशांपते ॥ ददर्शदावंदह्यंतंमहांतंगहनेवने १ तत्रशुश्रावशब्दंवैमध्येभूतस्यकस्यचित् ॥ अभिधावनलेत्युच्चैः
पुण्यश्लोकेतिचासकृत् २ माभैरितिनलश्चोक्त्वामध्यमग्नेःप्रविश्यतं ॥ ददर्शनागराजानंशयानंकुण्डलीकृतम् ३ सनागःप्रांजलिर्भूत्वावेपमानोनलंतदा ॥ उवा
चमांविद्धिराजन्नागंकर्कोटकंनृप ४ मयाप्रलब्धोमहर्षिर्नारदःसुमहातपाः ॥ तेनमन्युपरीतेनशप्तोऽस्मिमनुजाधिप ५ तिष्ठत्वंस्थावरइवयावदेवनलःकचित्॥
इतोनेताहितत्रत्वंशापान्मोक्ष्यसिमत्कृतात् ६ तस्यशापान्नशक्तोऽस्मिपदाद्विचलितुंपदम् ॥ उपदेक्ष्यामितेश्रेयस्त्रातुमर्हतिमांभवान् ७ सखाचतेभविष्या
मिमत्समोनास्तिपन्नगः ॥ लघुश्चतेभविष्यामिशीघ्रमादायगच्छमाम् ८ एवमुक्त्वासनागेंद्रोबभूवांगुष्ठमात्रकः ॥ तंगृहीत्वानलःप्रायादेशंदावविवर्जितम् ९

॥ उत्सृज्येति १ । २ । ३ । ४ मयाप्रलब्धोब्रह्मर्षिर्नारद इति पाठांतरं ५ त
७५ । ७६ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचषष्टितमोऽध्यायः ६५ ॥
त्रकाले ६ । ७ लघुर्गुरुत्वरहितः ९ दावविवर्जितंवह्निहीनम् ९

१० । ११ दशइत्युक्तेऽदशत् आज्ञांविनानागोनदशतीतिभावः १२ । १३ । १४ यत्कृतेइति सकलिः एतेनयोयच्छरीरेप्रविश तिसतेनशरीरेणसुखंदुःखंवाऽश्नातीतिसूचितं दृष्टंचैतद्ग्रहावेशा
दौ इदंदमयंत्यादत्तस्यशापस्यफलंकलिर्भुंक्तेइतिभावः १५ । १६ अनागाःनिरपराधः निकृतोवंचितः मेमया १७ । १८ । १९ । २० अक्षहृदयंद्यूतेजयावहं अश्वहृदयेनविद्ययाविद्यापरि

आकाशदेशमासाद्यविमुक्तंकृष्णवर्त्मना ॥ उत्स्रष्टुकामंतंनागःपुनःकर्कोटकोऽब्रवीत् १० पदानिगणयन्गच्छस्वानिनैषधकानिचित् ॥ तत्रतेऽहंमहाबाहोश्रे
योधास्यामियत्परम् ११ ततःसंख्यातुमारब्धमदशद्दशमेपदे ॥ तस्यदष्टस्यतद्रूपंक्षिप्रमंतरधीयत १२ सदृष्ट्वाविस्मितस्तस्थावात्मानंविकृतंनलः ॥ स्व
रूपधारिणंनागंददर्शसमहीपतिः १३ ततःकर्कोटकोनागःसांत्वयन्नलमब्रवीत् ॥ मयातेऽतर्हितंरूपंनत्वांविद्युर्जनाइति १४ यत्कृतेचासिनिकृतोदुःखेनमहता
नल ॥ विषेणसमदीयेनत्वयिदुःखंनिवत्स्यति १५ विषेणसंवृतैर्गात्रैर्यावत्त्वांनविमोक्ष्यति ॥ तावत्त्वयिमहाराजदुःखंवैसनिवत्स्यति १६ अनागायेननिकृत
स्त्वमनर्होजनाधिप ॥ क्रोधादसूययित्वातंरक्षामेभवतःकृता १७ नतेभयंनरव्याघ्रदंष्ट्रिभ्यःशत्रुतोऽपिवा ॥ ब्रह्मविद्भ्यश्चभवितामत्प्रसादान्नराधिप १८
राजन्विषनिमित्ताचनतेपीडाभविष्यति ॥ संग्रामेषुचराजेंद्रशश्वज्जयमवाप्स्यसि १९ गच्छराजन्नितःसूतोबाहुकोऽहमितिब्रुवन् ॥ समीपमृतुपर्णस्यसहिवै
वाक्षनैपुणः २० अयोध्यांनगरींरम्यामद्यवैनिषधेश्वर ॥ सतेऽक्षहृदयंदाताराजाऽश्वहृदयेनवै २१ इक्ष्वाकुकुलजःश्रीमान्मित्रंचैवभविष्यति ॥ भविष्यसिय
दाऽक्षज्ञःश्रेयसायोक्ष्यसेतदा २२ समेष्यसिदारैस्त्वंमास्मशोकेमनःकृथाः ॥ राज्येनतनयाभ्यांचसत्यमेतद्ब्रवीमिते २३ स्वंरूपंचयदाद्रष्टुमिच्छेथास्त्वंन
राधिप ॥ संस्मर्तव्यस्तदातेऽहंवासश्चेदंनिवासयेः २४ अनेनवाससाच्छन्नःस्वंरूपंप्रतिपत्स्यसे ॥ इत्युक्त्वाप्रददौतस्मैदिव्यंवासोयुगंतदा २५ एवंनलंच
संदिश्यवासोदत्वाचकौरव ॥ नागराजस्ततोराजंस्तत्रैवांतरधीयत २६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिनलकर्कोटकसंवादेषट्षष्टित
मोऽध्यायः ॥ ६६ ॥ ॥ ६॥ ॥ बृहदश्वउवाच ॥ तस्मिन्नंतर्हितेनागेप्रययौनैषधोनलः ॥ ऋतुपर्णस्यनगरंप्राविशद्दशमेऽहनि १ सराजानमुपातिष्ठ
द्बाहुकोऽहमितिब्रुवन् ॥ अश्वानांवाहनेयुक्तःपृथिव्यांनास्तिमत्समः २ अर्थकृच्छ्रेषुचैवाहंप्रष्टव्योनैपुणेषुच ॥ अन्नसंस्कारमपिचजानाम्यन्यैर्विशेषतः ३
यानिशिल्पानिलोकेऽस्मिन्यच्चैवान्यत्सुदुष्करम् ॥ सर्वंयतिष्येतत्कर्तुमृतुपर्णभरस्वमाम् ४ ॥ ऋतुपर्णउवाच ॥ वसबाहुकभद्रंतेसर्वमेतत्करिष्यसि ॥ शीघ्र
२० यानेसदाबुद्धिर्ध्रियतेमेविशेषतः ५ सत्वमातिष्ठयोगंतंयेनशीघ्राहयामम ॥ भवेयुरश्वाध्यक्षोऽसिवेतनंतेशतंशता ६ त्वामुपस्थास्यतश्चैवनित्यंवार्ष्णेयजीवलौ॥
एताभ्यांरंस्यसेसार्धंवसवैमयिबाहुक ७ ॥ बृहदश्वउवाच ॥ एवमुक्तोनलस्तेनन्यवसत्तत्रपूजितः ॥ ऋतुपर्णस्यनगरेसहवार्ष्णेयजीवलः ८

वर्त्तयेदित्यर्थः २१ । २२ । २३ निवासयेःपरिधेहि २४ । २५ । २६ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषट्षष्टितमोऽध्यायः ॥ ६६ ॥ तस्मिन्निति १ । २
३ । ४ । ५ शतंशता शतानि मासिकंवेतनंदशसहस्रंसुवर्णाइत्यर्थः ६ । ७ । ८

९ तस्यमंदस्य तंमंदंउपति द्वतिजीवनार्थमितिशेषः १०।११। १२ अहृतरंदमयंत्यांमिथ्याप्रतिज्ञात्वं स्वस्यानुसंधायेयमुक्तिः व्ययुज्यतवियुक्तः १३। १४। १५। १६। १७। १८ मारिष आर्य १९ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ हृतेति प्रेष्यतांदासतां १। २। ३ अग्रंब्राह्मणभोजनंतदर्थंह्रियंतेराजधनात्पृथक्क्रियंतेते

सवैतत्रावसद्राजावैदर्भीमनुचिंतयन् ॥ सायंसायंसदाचेमंश्लोकमेकंजगादह ९ क्वनुसाक्षुत्पिपासार्ताश्रांताशेतेतपस्विनी ॥ स्मरंतीतस्यमंदस्यकंवासाऽद्यो पतिष्ठति १० एवंब्रुवंतंराजानंनिशायांजीवलोऽब्रवीत् ॥ कामेनांशोचसेनित्यंश्रोतुमिच्छामिबाहुक ११ आयुष्मन्कस्यवानारीयामेवमनुशोचसि ॥ तमुवा चनलोराजामंदप्रज्ञस्यकस्यचित् १२ आसीद्बहुमतानारीतस्याद्दृढतरंवचः ॥ सवैकेनचिदर्थेनसतयामंदोव्ययुज्यत १३ विप्रयुक्तःसमंदात्माभ्रमत्यसुखपीडि तः ॥ दह्यमानःसशोकेनदिवारात्रमतंद्रितः १४ निशाकालेस्मरंस्तस्याःश्लोकमेकंस्मगायति ॥ सविभ्रमन्महींसर्वांक्वचिदासाद्यकिंचन १५ वसत्यनर्हस्तद्दुः खंभूयएवानुसंस्मरन् ॥ सातुतंपुरुषंनारीकृच्छ्रेऽप्यनुगतावने १६ त्यक्तातेनाल्पपुण्येनदुष्करंयदिजीवति ॥ एकाबालाऽनभिज्ञाचमार्गाणामतथोचिता १७ क्षुत्पिपासापरीतांगीदुष्करंयदिजीवति ॥ श्वापदाचरितेनित्यंवनेमहतिदारुणे १८ त्यक्तातेनाल्पभाग्येनमंदप्रज्ञेनमारिष ॥ इत्येवंनैषधोराजादमयंती मनुस्मरन् ॥ अज्ञातवासंन्यवसद्राज्ञस्तस्यनिवेशने १९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिनलविलापेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥

॥ बृहदश्वउवाच ॥ हृतराज्येनलेभीमःसभार्येप्रेष्यतांगते ॥ द्विजान्प्रस्थापयामासनलदर्शनकांक्षया १ संदिदेशचतान्भीमोवसुदत्वाचपुष्कलम् ॥ मृगयध्वं नलंचैवदमयंतींचमेसुताम् २ अस्मिन्कर्मणिसंपन्नेविज्ञातेनिषधाधिपे ॥ गवांसहस्रंदास्यामियोवस्तावानयिष्यति ३ अग्रहारांश्वदास्यामिग्रामंनगरसंमितम् ॥ नचेच्छक्याविहानेतुंदमयंतीनलोऽपिवा ४ ज्ञातमात्रेऽपिदास्यामिगवांदशशतंधनम् ॥ इत्युक्तास्तेययुर्हृष्टाब्राह्मणाःसर्वतोदिशम् ५ पुरराष्ट्राणिचिन्वंतो नैषधंसहभार्यया ॥ नैवक्वापिप्रपश्यंतिनलंवाभीमपुत्रिकाम् ६ ततश्चेदिपुरींरम्यांसुदेवोनामवैद्विजः ॥ विचिन्वानोऽथवैदर्भीमपश्यद्राजवेश्मनि ७ पुण्याहवा चनेराज्ञःसुनंदासहितांस्थिताम् ॥ मंदंप्रख्यायमानेनरूपेणाप्रतिमेनताम् ८ निबद्धांधूमजालेनप्रभामिवविभावसोः ॥ तांसमीक्ष्यविशालाक्षीमधिकंमलिनांकृ शाम् ॥ तर्कयामासभैमीतिकारणैरुपपादयन् ९॥सुदेवउवाच॥ यथेयंमेपुराहृष्टातथारूपेयमंगना॥कृतार्थोऽस्म्यद्यदृष्ट्वेमांलोककांतामिवश्रियम् १०पूर्णचंद्रनिभां श्यामांचारुवृत्तपयोधराम्॥कुर्वंतींप्रभयादेवींसर्वावितिमिरादिशः११चारुपद्मविशालाक्षींमन्मथस्यरतीमिव॥इष्टांसमस्तलोकस्यपूर्णचंद्रप्रभामिव१२विदर्भसर सस्तस्माद्दैवदोषादिवोद्धृतां॥ मलपंकानुलिप्तांगींमृणालीमिवचोद्धृतां१३पौर्णमासीमिवनिशांराहुग्रस्तनिशाकरां॥पतिशोकाकुलांदीनांशुष्कस्रोतांनदीमिव१४

अग्रहाराः क्षेत्रादयः ४। ५। ६। ७।८ कारणैर्लिंगैः उपपादयन् इयमेवदमयंतीतिनिश्चिन्वन् ९। १० श्यामांसदाषोडशवार्षिकीं। 'शीतेषैवोष्णलानित्यंग्रीष्मेचातीवशीतला। मध्यःक्षी णस्तुयस्यास्तुसाश्यामेत्यभिधीयते' इत्यन्ये ११। १२। १३ शुष्कस्रोतांशुष्कप्रवाहां। छांदसंटाबंतत्वं १४

पद्मिनींसरसीं १५ सुजातांगींअन्यूनानधिकांगीं १६। १७। १८। १९। २०। २१। २२ लब्ध्वाचलब्ध्वेव २३। २४। २५। २६। २७। २८। २९। ३०। ३१। ३२ सुनंदाकथया

विध्वस्तपर्णकमलांवित्रासितविहंगमाम् ॥ हस्तिहस्तपरामृष्टांव्याकुलामिवपद्मिनीम् १५ सुकुमारींसुजातांगींरत्नगर्भगृहोचिताम् ॥ दह्यमानामिवार्केणमृणा लीमिवचोद्धृताम् १६ रूपौदार्यगुणोपेतांमंडनार्हाममंडिताम् ॥ चंद्रलेखामिवनवांव्योम्निनीलाभ्रसंवृताम् १७ कामभोगैःप्रियैर्हीनांहीनांबंधुजनेनच ॥ देहंधारयतींदीनांभर्तृदर्शनकांक्षया १८ भर्तानामपरंनार्याभूषणंभूषणैर्विना ॥ एषाहिरहितातेनशोभमानानशोभते १९ दुष्करंकुरुतेऽत्यंतंहीनोयदनयानलः ॥ धारयत्यात्मनोदेहंनशोकेनापिसीदति २० इमामसितकेशांतांशतपत्रायतेक्षणाम् ॥ सुखार्हांदुःखितांदृष्ट्वाममापिव्यथतेमनः २१ कदानुखलुदुःखस्यपारंया स्यतिवैशुभा ॥ भर्तुःसमागमात्साध्वीरोहिणीशशिनोयथा २२ अस्यानूनंपुनर्लाभान्नैषधःप्रीतिमेष्यति ॥ राजाराज्यपरिभ्रष्टःपुनर्लब्ध्वाचमेदिनीम् २३ तुल्यशीलवयोयुक्तांतुल्याभिजनसंवृताम्॥ नैषधोऽर्हतिवैदर्भीतंचेयमसितेक्षणा २४ युक्तंतस्याप्रमेयस्यवीर्यसत्ववतोमया ॥ समाश्वासयितुंभार्यांपतिदर्शनला लसाम् २५ अहमाश्वासयाम्येनांपूर्णचंद्रनिभाननाम् ॥ अदृष्टपूर्वांदुःखस्यदुःखार्तांध्यानतत्पराम् २६ ॥ बृहदश्वउवाच ॥ एवंविमृश्यविविधैःकारणैर्लक्षणै श्वताम् ॥ उपागम्यततोभैमींसुदेवोब्राह्मणोऽब्रवीत् २७ अहंसुदेवोवैदर्भिभ्रातुस्तेदयितःसखा ॥ भीमस्यवचनाद्राज्ञस्त्वामन्वेष्टुमिहागतः २८ कुशलीतेपि ताराज्ञिजननीभ्रातरश्चते ॥ आयुष्मंतौकुशलिनौतत्रस्थौदारकौचतौ २९ त्वत्कृतेबंधुवर्गाश्वगतसत्वाइवासते ॥ अन्वेष्टारोब्राह्मणाश्चभ्रमंतिशतशोमहीम् ३० ॥ बृहदश्वउवाच ॥ अभिज्ञायसुदेवंतंदमयंतीयुधिष्ठिर ॥ पर्यपृच्छततान्सर्वान्क्रमेणसुहृदःस्वकान् ३१ रुरोदचभृशंराजन्वैदर्भीशोककर्शिता ॥ दृष्ट्वा सुदेवंसहसाभ्रातुरिष्टंद्विजोत्तमम् ३२ ततोरुदंतींतांदृष्ट्वासुनंदाशोककर्शिता ॥ सुदेवेनसहैकांतेकथयंतींचभारत ३३ जनित्र्याःकथयामासरैंध्रीरुदतेभृ शम् ॥ ब्राह्मणेनसहागम्यतांविदयदिमन्यसे ३४ अथचेदिपतेर्माताराज्ञश्चांतःपुरात्तदा ॥ जगामयत्रसाबालाब्राह्मणेनसहाभवत् ३५ ततःसुदेवमानाय्यराजमा ताविशांपते ॥ पप्रच्छभार्याकस्येयंसुतावाकस्यभाविनी ३६ कथंचनष्टाज्ञातिभ्योभर्तुर्वावामलोचना ॥ त्वयाचविदिताविप्रकथमेवंगतासती ३७ एतदि च्छाम्यहंश्रोतुंत्वत्तःसर्वमशेषतः ॥ तत्वेनहिममाचक्ष्वपृच्छंत्यादेवरूपिणीम् ३८ एवमुक्तस्तयाराजन्सुदेवोद्विजसत्तमः ॥ सुखोपविष्टआचष्टदमयंत्याय थातथम् ३९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिदमयंतीसुदेवसंवादेअष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ ६८ ॥

मासेतिसबंधः ३३ वेदविचारय। वेदयतेरिदंरूपं णिजभावआर्षः ३४। ३५। ३६। ३७। ३८। ३९ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टषष्टितमोऽध्यायः ॥ ६८ ॥

विदर्भराज इति १ । २ । ३ । ४ पिप्लुः रक्ततिलकाकृतिर्लांछनं महाराष्ट्राणां 'मस' इति प्रसिद्धं ५ । ६ । ७ । ८ । ९ । १० अपकृष्टेनदूरीकृतेन ११ । १२ । १३ । १४ । १५ । १६ । १७

॥ सुदेवउवाच ॥ विदर्भराजोधर्मात्माभीमोनाममहाद्युतिः ॥ सुतेयंतस्यकल्याणीदमयंतीतिविश्रुता १ राजातुनैषधोनामवीरसेनसुतोनलः ॥ भार्येयंतस्य कल्याणीपुण्यश्लोकस्यधीमतः २ सद्यूतेनजितोभ्रात्राहृतराज्योमहीपतिः ॥ दमयंत्यागतःसार्धंनप्राज्ञायतकस्यचित् ३ तेवयंदमयंत्यर्थेचरामःपृथिवीमिमाम् ॥ सेयमासादिताबालातवपुत्रनिवेशने ४ अस्यारूपेणसदृशीमानुषीनहिविद्यते ॥ अस्याह्येषभ्रुवोर्मध्येसहजःपिप्लुरुत्तमः ५ श्यामायाःपद्मसंकाशोलक्षितोंऽतर्हितोमया ॥ मलेनसंवृतोह्यस्याश्छन्नोऽभ्रेणेवचंद्रमाः ६ चिह्नभूतोविभूत्यर्थमयंधात्राविनिर्मितः ॥ प्रतिपत्कलुषस्येंदोर्लेखानातिविराजते ७ नचास्यानश्यतेरूपंवपुर्मलसमाचितम् ॥ असंस्कृतमभिव्यक्तंभातिकांचनसन्निभम् ८ अनेनवपुषाबालापिप्लुनाऽनेनसूचिता ॥ लक्षितेयंमयादेवीनिभृतोऽग्निरिवोष्मणा ९ तच्छ्रुत्वावचनंतस्यसुदेवस्यविशांपते ॥ सुनंदाशोधयामासपिप्लुप्रच्छादनंमलम् १० समलेनापकृष्टेनपिप्लुस्तस्याव्यरोचत ॥ दमयंत्यायथाव्यभ्रेनभसीवनिशाकरः ११ पिप्लुंदृष्ट्वासुनंदाचराजमाताचभारत ॥ रुदत्यौतांपरिष्वज्यमुहूर्तमिवतस्थतुः १२ उत्सृज्यबाष्पंशनकैराजमातेदमब्रवीत् ॥ भगिन्यादुहितामेऽसिपिप्लुनाऽनेनसूचिता १३ अहंचतवमाताचराज्ञस्तस्यमहात्मनः ॥ सुतेदशार्णाधिपतेःसुदाम्नश्चारुदर्शने १४ भीमस्यराज्ञःसादत्तावीरबाहोरहंपुनः ॥ त्वंतुजातामयादृष्टादशार्णेषुपितुर्गृहे १५ यथैवतेपितुर्गेहंतथैवममभाविनि ॥ यथैवचममैश्वर्यंदमयंतितथातव १६ तांप्रहृष्टेनमनसादमयंतीविशांपते ॥ प्रणम्यमातुर्भगिनीमिदंवचनमब्रवीत् १७ अज्ञायमानाऽपिसतीसुखमस्म्युषितात्वयि ॥ सर्वकामैःसुविहितारक्ष्यमाणासदात्वया १८ सुखात्सुखतरोवासोभविष्यतिनसंशयः ॥ चिरविप्रोषितांमातर्मामनुज्ञातुमर्हसि १९ दारकौचहिमेनीतौवसतस्तत्रबालकौ ॥ पित्राविहीनौशोकार्तौमयाचैवकथंनुतौ २० यदिचापिप्रियंकिंचिन्मयिकर्तुमिहेच्छसि ॥ विदर्भान्यातुमिच्छामिशीघ्रंमेयानमादिश २१ बाढमित्येवतामुक्त्वाहृष्टामातृष्वसानृप ॥ गुप्तांबलेनमहतापुत्रस्यानुमतेततः २२ प्रास्थापयद्राजमाताश्रीमतीनरवाहिना ॥ यानेनभरतश्रेष्ठस्वन्नपानपरिच्छदाम् २३ ततःसानचिरादेवविदर्भानगमत्पुनः ॥ तांतुबंधुजनःसर्वःप्रहृष्टःसमपूजयत् २४ सर्वान्कुशलिनोदृष्ट्वाबांधवान्दारकौचतौ ॥ मातरंपितरंचोभौसर्वंचैवसखीजनम् २५ देवताःपूजयामासब्राह्मणांश्चयशस्विनी ॥ परेणविधिनादेवीदमयंतीविशांपते २६ अतर्पयत्सुदेवंचगोसहस्रेणपार्थिवः ॥ प्रीतोदृष्ट्वैवतनयांग्रामेणद्रविणेनच २७ साव्युष्टारजनींतत्रपितुर्वेश्मनिभाविनी ॥ विश्रांतामातरंराजन्निदंवचनमब्रवीत् २८

१८ । १९ दारकौसुतःसुताच बालकौअल्पवयस्कौ २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ व्युष्टावासंकृतवती २८

दतयत्नंकुरु । अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यचक्षिङोङित्करणेनानित्यत्वज्ञापनात् २९ । ३० । ३१ । ३२ । ३३ प्रदेशितःप्रकर्षेणप्रेरितः ३४ मृत्वागत्वातेतथाप्रस्थिताःसंतःअब्रुवन्नलान्वेषणायप्रस्थिताःस्मेतीतिशेषः ३५ ब्रूयास्तवदत । ब्रुवध्वमितिपाठेत्वार्षस्तङ् ३६ । ३७ । ३८ वदस्व । भासनोपसंभाषेत्यादिनावदेस्तङ् ३९ वायुनेति शोकाग्निःकालवायुनादिनेदिनेवर्धमानोदमयंतीशरीरवनंधक्ष्यतीतिरूपकेणोक्तं । दहतीतिलट्प्रयोगस्तुवर्तमानसामीप्ये ४० भर्तव्याऽन्नादिनारक्षणीयादस्युप्रभृतिभ्यः पतिनेतिपत्या । असमासेऽपिघिसंज्ञाकार्यमार्षं उभयंरक्ष

॥दमयंत्युवाच॥ मांचेदिच्छसिजीवंतींमातःसत्यंब्रवीमिते ॥ नरवीरस्यचैतस्यनलस्यानयनेयत २९ दमयंत्यातथोक्तातुसादेवीभृशदुःखिता ॥ बाष्पेणापिहिताराज्ञीनोत्तरंकिंचिदब्रवीत् ३० तदवस्थांतुतांदृष्ट्वासर्वमंतःपुरंतदा ॥ हाहाभूतमतीवासीद्भृशंचप्ररुरोदह ३१ ततोभीमंमहाराजंभार्यावचनमब्रवीत् ॥ दमयंतीतवसुताभर्तारमनुशोचति ३२ अपकृष्यचलज्जांसास्वयमुक्तवतीनृप ॥ प्रयतंतुतवप्रेष्याःपुण्यश्लोकस्यमार्गणे ३३ तयाप्रदेशितोराजाब्राह्मणान्वशवर्तिनः ॥ प्रास्थापयद्दिशःसर्वायतध्वंनलमार्गणे ३४ ततोविदर्भाधिपतेर्नियोगाद्ब्राह्मणास्तदा ॥ दमयंतीमथोमृत्वाप्रस्थितास्तेतथाब्रुवन् ३५ अथतानब्रवीद्भैमीसर्वराष्ट्रेष्विदंवचः ॥ ब्रूयास्तजनसंसत्सुतत्रतत्रपुनःपुनः ३६ क्वनुत्वंकितवच्छित्वावस्त्रार्धंप्रस्थितोमम ॥ उत्सृज्यविपिनेसुप्तामनुरक्तांप्रियांप्रिय ३७ सावैयथात्वयादृष्टातथाऽऽस्तेत्वत्प्रतीक्षिणी ॥ दह्यमानाभृशंबालावस्त्रार्धेनाभिसंवृता ३८ तस्यारुदंत्याःसततंतेनशोकेनपार्थिव ॥ प्रसादंकुरुवैवीरप्रतिवाक्यंवदस्वच ३९ एवमन्यच्चवक्तव्यंकृपांकुर्याद्यथामयि ॥ वायुनाधूयमानोहिवनंदहतिपावकः ४० भर्तव्यारक्षणीयाचपत्नीहिपतिनासदा ॥ तन्नष्टमुभयंकस्माद्धर्मज्ञस्यसतस्तव ४१ ख्यातःप्राज्ञःकुलीनश्चसानुक्रोशोभवान्सदा ॥ संवृत्तोनिरनुक्रोशःशंकेमद्भाग्यसंक्षयात् ४२ तत्कुरुष्वनरव्याघ्रदयांमयिनरर्षभ ॥ आनृशंस्यंपरोधर्मस्त्वत्तएवहिमेश्रुतः ४३ एवंब्रुवाणान्यदिवःप्रतिब्रूयात्कथंचन ॥ सनरःसर्वथाज्ञेयःकश्चासौक्वनुवर्तते ४४ यश्चैवंवचनंश्रुत्वाब्रूयात्प्रतिवचोनरः ॥ तदादायवचस्तस्यममावेद्यंद्विजोत्तमाः ४५ यथाचवोनजानीयाद्ब्रुवतोममशासनात् ॥ पुनरागमनंचैवतथाकार्यमतंद्रितैः ४६ यदिवासौसमृद्धःस्याद्यदिवाऽप्यधनोभवेत् ॥ यदिवाऽप्यसमर्थःस्याज्ज्ञेयमस्यचिकीर्षितम् ४७ एवमुक्तास्त्वगच्छंस्तेब्राह्मणाःसर्वतोदिशम् ॥ नलंमृगयितुंराजंस्तदाव्यसनिनंतथा ४८ तेपुराणिसराष्ट्राणिग्रामाघोषांस्तथाऽऽश्रमान् ॥ अन्वेषंतोनलंराजन्नाधिजग्मुर्द्विजातयः ४९ तच्चवाक्यंतथासर्वेतत्रतत्रविशांपते ॥ श्रावयांचक्रिरेविप्रादमयंत्यायथेरितम् ॥ ५० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिनलान्वेषणेएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ॥ बृहदश्वउवाच ॥ अथदीर्घस्यकालस्यपर्णादोनामवैद्विजः ॥ प्रत्येत्यनगरंभैमीमिदंवचनमब्रवीत् १

णमरणात्मकं ४१ सानुक्रोशःसदयः ४२ । ४३ । ४४ । ४५ ममशासनात् ब्रुवतोवःयुष्मान् । यथात्वचइतिपाठे ब्रुवतोभवत्समुदायस्यवचोनजानीयादितियोज्यं ४६ । ४७ । ४८ । ४९ ५० ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ अथेति १

भांगासुरिमृतुपर्णं २ । ३ । ४ । ५ । ६ । ७ गोपायंतिपालयंति जितः स्वर्गैस्ताभिरितिशेषः ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२

नैषधंमृगयाणेनदमयंतिमयानलम् ॥ अयोध्यांनगरींगत्वाभांगासुरिमुपस्थितः २ श्रावितश्चमयावाक्यंत्वदीयंसमहाजने ॥ ऋतुपर्णोमहाभागोयथोक्तंवरव
र्णिनि ३ तच्छ्रुत्वानाब्रवीत्किंचिदृतुपर्णोनराधिपः ॥ नचपारिषदःकश्चिद्भाष्यमाणोमयाऽसकृत् ४ अनुज्ञातंतुमांराज्ञाविजनेकश्चिदब्रवीत् ॥ ऋतुपर्णस्यपुरु
षोबाहुकोनामनामतः ५ सूतस्तस्यनरेंद्रस्यविरूपोह्रस्वबाहुकः ॥ शीघ्रयानेषुकुशलोमृष्टकर्त्ताचभोजने ६ सविनिःश्वस्यबहुशोरुदित्वाचपुनःपुनः ॥ कुश
लंचैवमांपृष्ट्वापश्चादिदमभाषत ७ वैषम्यमपिसंप्राप्तागोपायंतिकुलस्त्रियः ॥ आत्मानमात्मनासत्योजितःस्वर्गोनसंशयः ८ रहिताभर्तृभिश्चैवनकुप्यंतिकदाच
न ॥ प्राणांश्चारित्रकवचान्धारयंतिवरस्त्रियः ९ विषमस्थेनमूढेनपरिभ्रष्टसुखेनच ॥ यत्सातेनपरित्यक्तातत्रनक्रोद्धुमर्हति १० प्राणयात्रांपरिप्रेप्सोःशकुनैर्हृ
तवाससः ॥ आधिभिर्दह्यमानस्यश्यामानक्रोद्धुमर्हति ११ सत्कृताऽसत्कृतावाऽपिपतिंदृष्ट्वातथागतम् ॥ भ्रष्टराज्यंश्रियाहीनंक्षुधितंव्यसनाप्लुतम् १२ तस्य
तद्वचनंश्रुत्वात्वरितोऽहमिहागतः ॥ श्रुत्वाप्रमाणंभवतीराज्ञश्चैवानिवेदय १३ एतच्छ्रुत्वाऽश्रुपूर्णाक्षीपर्णादस्यविशांपते ॥ दमयंतीरहोऽभ्येत्यमातरंप्रत्यभाष
त १४ अयमर्थोनसंवेद्योभीमेमातःकदाचन ॥ त्वत्सन्निधौनियोक्ष्येऽहंसुदेवंद्विजसत्तमम् १५ यथानन्नृपतिर्भीमःप्रतिपद्येतमेमतम् ॥ तथात्वयाप्रकर्तव्यंमम
चेत्प्रियमिच्छसि १६ यथाचाहंसमानीतासुदेवेनाशुबांधवान् ॥ तेनैवमंगलेनाशुसुदेवोयातुमाचिरम् १७ समानेतुंनलंमातरयोध्यांनगरीमितः ॥ विश्रांतंतु
ततःपश्चात्पर्णादंद्विजसत्तमम् १८ अर्चयामासवैदर्भीधनेनातीवभाविनी ॥ नलेचेहागतेतत्रभूयोदास्यामितेवसु १९ त्वयाहिमेबहुकृतंयदन्योनकरिष्यति ॥
यद्भर्त्राऽहंसमेष्यामिशीघ्रमेवद्विजोत्तम २० सएवमुक्तोऽथाश्वास्यआशीर्वादैःसुमंगलैः ॥ गृहानुपययौचापिकृतार्थःसुमहामनाः २१ ततःसुदेवमाभाष्यदमयं
तीयुधिष्ठिर ॥ अब्रवीत्सन्निधौमातुर्दुःखशोकसमन्विता २२ गत्वासुदेवनगरीमयोध्यावासिनंनृपम् ॥ ऋतुपर्णंवचोब्रूहिसंपतन्निवकामगः २३ आस्थास्यतिपु
नर्भैमीदमयंतीस्वयंवरम् ॥ तत्रगच्छंतिराजानोराजपुत्राश्चसर्वशः २४ तथाचगणितःकालःश्वोभूतेसभविष्यति ॥ यदिसंभावनीयंतेगच्छशीघ्रमरिंदम २५
सूर्योदयेद्वितीयंसाभर्तारंवरयिष्यति ॥ नहिसज्ञायतेवीरोनलोजीवतिवानवा २६ एवंतयायथोक्तोवैगत्वाराजानमब्रवीत् ॥ ऋतुपर्णंमहाराजसुदेवोब्राह्मणस्त
दा ॥ २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिमदयंतीपुनःस्वयंवरकथनेसप्ततितमोऽध्यायः ॥ ७० ॥ ७ ॥ बृहदश्वउवाच ॥ श्रुत्वाव
चःसुदेवस्यऋतुपर्णोनराधिपः ॥ सांत्वयन्श्लक्ष्णयावाचाबाहुकंप्रत्यभाषत १

२३ । २४ संभाविनी संभाविताइयंगतिरितिशेषः २५ । २६ । २७ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्ततितमोऽध्यायः ॥ ७० ॥ श्रुत्वेति १

२ । ३ । ४ । ५ । ६ सापत्या अपत्यसहिता ७ । ८ । ९ । १० । ११ । १२ तेजः कांतिविशेषः । बलंशक्तिः । कुलंजातिविशेषः । शीलं सादिचित्तानुसारिता । हीनैर्लक्षणैःशतपदीप्रभृति
भिर्वर्जितान् । प्रोथंनासिका । हनुरधरंमुखफलकं १३ शुद्धानद्वदावर्त्तादिदुष्टावर्तहीनान् सिंधुजान्सिंधुदेशजान् १४ तेत्वयामविप्रलब्धव्यानवंचनीयाः बलंभारसहिष्णुता प्राणो वेगवत्ता

विदर्भान्यातुमिच्छामिदमयंत्याःस्वयंवरम् ॥ एकाह्नाहयतत्त्वज्ञमन्यसेयदिबाहुक २ एवमुक्तस्यकौंतेयतेनराज्ञानलस्यह ॥ व्यदीर्यतमनोदुःखात्प्रदध्यौच
महामनाः ३ दमयंतीवदेदेतत्कुर्याद्दुःखेनमोहिता ॥ अस्मदर्थेभवेद्वाऽयमुपायश्चिंतितोमहान् ४ नृशंसंबतवैदर्भीकर्तृकामातपस्विनी ॥ मयाक्षुद्रेणानिकृता
कृपणापापबुद्धिना ५ स्त्रीस्वभावश्चलोलोकेममदोषश्चदारुणः ॥ स्यादेवमपिकुर्यात्साविवासाद्गतसौहृदा ६ ममशोकेनसंविग्नानैराश्यात्तनुमध्यमा ॥ नैवं
साकर्हिचित्कुर्यात्सापत्याचविशेषतः ७ यदत्रसत्यंवाऽसत्यंगत्वावेत्स्यामिनिश्चयम् ॥ ऋतुपर्णस्यवैकाममात्मार्थंचकरोम्यहम् ८ इतिनिश्चित्यमनसाबाहुको
दीनमानसः ॥ कृतांजलिरुवाचेदमृतुपर्णंजनाधिपम् ९ प्रतिजानामितेवाक्यंगमिष्यामिनराधिप ॥ एकाह्नापुरुषव्याघ्रविदर्भनगरींनृप १० ततःपरीक्षा
मश्वानांचक्रेराजन्सबाहुकः ॥ अश्वशालामुपागम्यभांगासुरिनृपाज्ञया ११ सत्वर्यमाणोबहुशऋतुपर्णेनबाहुकः ॥ अश्वान्जिज्ञासमानोवैविचार्यचपुनःपुनः ॥
अध्यगच्छत्कृशानश्वान्समर्थानध्वनिक्षमान् १२ तेजोबलसमायुक्तान्कुलशीलसमन्वितान् ॥ वर्जितान्लक्षणैर्हीनैःपृथुप्रोथान्महाहनून् १३ शुद्धान्दशभि
रावर्तैःसिंधुजान्वातरंहसः ॥ दृष्ट्वातानब्रवीद्राजाकिंचित्कोपसमन्वितः १४ किमिदंप्रार्थितंकर्तुंप्रलब्धव्यानतेवयम् ॥ कथमल्पबलप्राणावक्ष्यंतीमेहयामम ॥
महदध्वानमपिचगंतव्यंकथमीदृशैः १५ ॥ बाहुकउवाच ॥ एकोललाटेद्वेमूर्ध्निद्वौद्वौपार्श्वोपपार्श्वयोः ॥ द्वौद्वौवक्षसिविज्ञेयौप्रयाणेचैकएवतु १६ एतेहया
गमिष्यंतिविदर्भान्नात्रसंशयः ॥ यानन्यान्मन्यसेराजन्ब्रूहितान्योजयामिते १७ ॥ ऋतुपर्णउवाच ॥ त्वमेवहयतत्त्वज्ञःकुशलोह्यसिबाहुक ॥ यान्मन्यसेसम
र्थांस्त्वंक्षिप्रंतानेवयोजय १८ ततःसदश्वांश्चतुरःकुलशीलसमन्वितान् ॥ योजयामासकुशलोजवयुक्तान्रथेनलः १९ ततोयुक्तंरथंराजासमारोहत्त्वरान्वितः ॥
अथपर्यपतन्भूमौजानुभिस्तेहयोत्तमाः २० ततोनरवरःश्रीमान्नलोराजाविशांपते ॥ सांत्वयामासतानश्वांस्तेजोबलसमन्वितान् २१ रश्मिभिश्चसमुद्यम्यन
लोयातुमियेषसः ॥ सूतमारोप्यवार्ष्णेयंजवमास्थायवैपरम् २२

वक्ष्यंतिवहनंकरिष्यंति अध्वानंनिःशब्दं महदतिदूरे दमयंत्याः पुनर्भूस्त्वात्तद्वरणेमहतीलज्जा तयाचअत्रते महत्तरालज्जेतिप्रच्छन्नतयैवतत्रगतमपिवेगवशादगतमिवयथाभवतितथागंतव्य
मितिभावः १५ 'एकोललाटेद्वौमूर्ध्निद्वौ द्वौ पार्श्वोपपार्श्वयोः । द्वौद्वौवक्षसिविज्ञेयौ प्रयाणेचैकएवतु'इतिश्लोकः क्वचिन्नदृश्यते । तदर्थस्तुवक्षसिद्वौपुरस्ताद्द्वौ पश्चादितिप्रयाणेपृष्ठभागेएवंद्वाद
शआवर्तपदमनुषज्ज्ययोज्यं १६ एतेहाति एतेषुरथलेष्वावर्तेष्वतइतिशेषः १७ । १८ । १९ । २० । २१ सूतमिति आरोप्यसूतस्थानादुपर्युपवेश्य स्वयमेवसूतत्वंचकारेत्यर्थः २२

२३ । २४ । २५ । २६ शालिहोत्रः अश्वशास्त्रप्रणेता आचार्यः २७ । २८ । २९ । ३० । ३१ । ३२ अंततः निर्णयेन ३३ । ३४ । ३५ । ३६ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदी

तेचोद्यमानाविधिवद्बाहुकेनहयोत्तमाः ॥ समुत्पेतुरथाकाशंरथिनंमोहयन्निव २३ तथातुदृष्ट्वातानश्वान्वहतोवातरंहसः ॥ अयोध्याधिपतिःश्रीमान्विस्मयं
परमंययौ २४ रथघोषंतुतंश्रुत्वाहयसंग्रहणंचतत् ॥ वार्ष्णेयश्चिंतयामासबाहुकस्यहयज्ञताम् २५ किंनुस्यान्मातलिरयंदेवराजस्यसारथिः ॥ तथातल्लक्षणं
वीरेबाहुकेदृश्यतेमहत् २६ शालिहोत्रोऽथकिंनुस्याद्धयानांकुलतत्त्ववित् ॥ मानुषंसमनुप्राप्तोवपुःपरमशोभनम् २७ उताहोस्विद्भवेद्राजानलःपरपुरंजयः ॥
सोऽयंनृपतिरायातइत्येवंसमचिंतयत् २८ अथचेहनलोविद्यांवेत्तितामेवबाहुकः ॥ तुल्यंहिलक्षयेज्ञानंबाहुकस्यनलस्यच २९ अपिचेदंवयस्तुल्यंबाहुकस्य
नलस्यच ॥ नायंनलोमहावीर्यस्तद्विद्यश्चभविष्यति ३० प्रच्छन्नाहिमहात्मानश्चरंतिपृथिवीमिमाम् ॥ दैवेनविधिनायुक्ताःशास्त्रोक्तैश्चनिरूपणैः ३१ भवेत्तु
मतिभेदोमेगात्रवैरूप्यतांप्रति ॥ प्रमाणात्परिहीनस्तुभवेदितिमतिर्मम ३२ वयःप्रमाणंतत्तुल्यंरूपेणतुविपर्ययः ॥ नलंसर्वगुणैर्युक्तंमन्येबाहुकमंततः ३३
एवंविचार्यबहुशोवार्ष्णेयःपर्यचिंतयत् ॥ हृदयेनमहाराजपुण्यश्लोकस्यसारथिः ३४ ऋतुपर्णस्तुराजेंद्रोबाहुकस्यहयज्ञताम् ॥ चिंतयन्मुमुदेराजासहवार्ष्णेय
सारथिः ३५ ऐकाग्र्यंचतथोत्साहंहयसंग्रहणंचतत् ॥ परंयत्नंचसंप्रेक्ष्यपरांमुदमवापह ३६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिऋतुपर्ण
विदर्भगमनेएकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ ७२ ॥ बृहदश्वउवाच ॥ सनदीःपर्वतांश्चैववनानिचसरांसिच ॥ अचिरेणातिचक्रामखेचरःखेचरन्निव १
तथाप्रयातेतुरथेतदाभांगासुरिर्नृपः ॥ उत्तरीयमधोऽपश्यद्भ्रष्टंपरपुरंजयः २ ततःसत्वरमाणस्तुपटेनिपतितेतदा ॥ ग्रहीष्यामीतितंराजानलमाहमहामनाः ३
निगृह्णीष्वमहाबुद्धेहयानेतान्महाजवान् ॥ वार्ष्णेयोयावदेनंमेपटमानयतामिह ४ नलस्तंप्रत्युवाचाथदूरेभ्रष्टःपटस्तव ॥ योजनंसमतिक्रांतोनाहर्तुंशक्यतेपुनः
५ एवमुक्तेनलेनाथतदाभांगासुरिर्नृपः ॥ आससादवनेराजन्फलवंतंबिभीतकम् ६ तंदृष्ट्वाबाहुकंराजात्वरमाणोऽभ्यभाषत ॥ ममापिसूतपश्यत्वंसंख्यानेप
रमंबलम् ७ सर्वःसर्वंनजानातिसर्वज्ञोनास्तिकश्चन ॥ नैकत्रपरिनिष्ठाऽस्तिज्ञानस्यपुरुषेक्वचित् ८ वृक्षेऽस्मिन्यानिपर्णानिफलान्यपिचबाहुक ॥ पतिता
न्यपियान्यत्रतत्रैकमधिकंशतम् ९ एकपत्राधिकंचात्रफलमेकंचबाहुक ॥ पंचकोट्योऽथपत्राणांद्वयोरपिचशाखयोः १० प्रचिनुह्यस्यशाखेद्वेयाश्चाप्यन्याः
प्रशाखिकाः ॥ आभ्यांफलसहस्रेद्वेपंचोनंशतमेवच ११ ततोरथमवस्थाप्यराजानंबाहुकोऽब्रवीत् ॥ परोक्षमिवमेराजन्कत्थसेशत्रुकर्शन १२ प्रत्यक्षमेतत्क
र्ताऽस्मिशातयित्वाबिभीतकम् ॥ अथात्रगणितेराजन्विद्यतेनपरोक्षता १३ प्रत्यक्षंतेमहाराजशातयिष्येबिभीतकम् ॥ अहंहिनाभिजानामिभवेदेवंनवेतिवा १४

पेदकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ सद्दवि १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४

१५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ अक्षहृदयज्ञं अक्षाणामक्षाभिमानिदेवतायाहृदयवद्वशीकरणार्थमंत्रःअक्षहृदयं येनज्ञातेनद्यूतेऽक्षा अनुकूलाभवंति ।
संख्यानेराशीकृतानांतत्रपुष्पफलधान्यादीनां राश्यायामविस्तारोच्छ्रायाद्यालोचनेनपाटीगणितरीत्याझटितितत्संख्याकथने २६ । २७ । २८ अनयोर्मध्येऽक्षाणांहृदयंपरंश्रेष्ठंइतरत्तु
त्वयाऽपिज्ञायतइतिभावः ऋतुःकालःतद्वच्छीघ्रगामि पर्णं प्रियतेऽप्रियतेऽन्यायच्छतेदेशांतरमनेनेतिपर्णवाहनंयस्येतिऋतुपर्णनामनिरुक्तिः अन्येतुऋतानिसत्यानिगणितानिपर्णानियस्ये

संख्यास्यामिफलान्यस्यपश्यतस्तेजनाधिप ॥ मुहूर्तमपिवार्ष्णेयोरश्मीन्यच्छतुवाजिनाम् १५ तमब्रवीन्नृपःसूतंनायंकालोविलंबितुम् ॥ बाहुकस्त्वब्रवीदेनं
परंयत्नंसमास्थितः १६ प्रतीक्षस्वमुहूर्तंत्वमथवात्वरतेभवान् ॥ एषयातिशिवःपंथायाहिवार्ष्णेयसारथिः १७ अब्रवीदृतुपर्णस्तुसांत्वयन्कुरुनंदन ॥ त्वमेवयं
तानान्योऽस्तिपृथिव्यामपिबाहुक १८ त्वत्कृतेयातुमिच्छामिविदर्भान्हयकोविद ॥ शरणंत्वांप्रपन्नोऽस्मिनविघ्नंकर्तुमर्हसि १९ कामंचतेकरिष्यामियन्मांवक्ष्य
सिबाहुक ॥ विदर्भान्यदियात्वाद्यसूर्यंदर्शयिताऽसिमे २० अथाब्रवीद्बाहुकस्तंसंख्यायचबिभीतकम् ॥ ततोविदर्भान्यास्यामिकुरुष्वैवंवचोमम २१ अकाम
इवतंराजागणयस्वेत्युवाचह ॥ एकदेशंचशाखायाःसमादिष्टंमयाऽनघ २२ गणयस्वाश्वतत्त्वज्ञततस्त्वंप्रीतिमावह ॥ सोऽवतीर्यरथात्तूर्णंशातयामासतंद्रुमम्
२३ ततःसविस्मयाविष्टोराजानमिदमब्रवीत् ॥ गणयित्वायथोक्तानितावंत्येवफलानितु २४ अत्यद्भुतमिदंराजन्दृष्टवानस्मितेबलम् ॥ श्रोतुमिच्छामितांविद्यां
ययैतज्ज्ञायतेनृप २५ तमुवाचततोराजात्वरितोगमनेनृप ॥ विद्ध्यक्षहृदयज्ञंमांसंख्यानेचविशारदम् २६ बाहुकस्तमुवाचाथदेहिविद्यामिमांमम ॥ मत्तोऽपि
चाश्वहृदयंगृहाणपुरुषर्षभ २७ ऋतुपर्णस्ततोराजाबाहुकंकार्यगौरवात् ॥ हयज्ञानस्यलोभाच्चतंतथेत्यब्रवीद्वचः २८ यथोक्तंत्वंगृहाणेदमक्षाणांहृदयंपरम् ॥
निक्षेपोमेऽश्वहृदयंत्वयितिष्ठतुबाहुक ॥ एवमुक्त्वाददौविद्यामृतुपर्णोनलायवै २९ तस्याक्षहृदयज्ञस्यशरीरान्निःसृतःकलिः ॥ कर्कोटकविषंतीक्ष्णंमुखात्सततमु
द्वमन् ३० कलेस्तस्यतदार्तस्यशापाग्निःसविनिःसृतः ॥ सतेनकर्शितोराजादीर्घकालमनात्मवान् ३१ ततोविषविमुक्तात्मास्वंरूपमकरोत्कलिः ॥ तंशप्तुमैच्छ
त्कुपितोनिषधाधिपतिर्नलः ३२ तमुवाचकलिर्भीतोवेपमानःकृतांजलिः ॥ कोपंसंयच्छनृपतेकीर्तिंदास्यामितेपराम् ३३ इंद्रसेनस्यजननीकुपितामाऽशप
त्पुरा ॥ यदात्वयापरित्यक्ताततोऽहंभृशपीडितः ३४ अवसंस्त्वयिराजेंद्रसुदुःखमपराजित ॥ विषेणनागराजस्यदह्यमानोदिवानिशम् ॥ शरणंत्वांप्रपन्नोऽ
स्मिशृणुचेदंवचोमम ३५ येचत्वांमनुजालोकेकीर्तयिष्यंत्यतंद्रिताः ॥ मत्प्रसूतंभयंतेषांनकदाचिद्भविष्यति ३६ भयार्तंशरणंयातंयदिमांत्वंनशप्स्यसे ॥ एव
मुक्तोनलोराजान्ययच्छत्कोपमात्मनः ३७

तिपाठांतरं विप्रकल्प्यव्याकुर्वंते २९ तस्याक्षहृदयज्ञस्येतिसर्वेषांमंत्राणांतत्त्वं मनोमयकोशाख्यःसूत्रात्माऽतएवतंप्रकृत्यश्रूयते । 'तस्ययजुरेवशिरःऋग्दक्षिणःपक्षःसामोत्तरःपक्षः' इत्या
दितमज्ञानंवहिअस्यंतंघर्षितमपिकलिर्बाधतेनतुमंत्रज्ञमितिभावः ३० शापाग्निर्दमयंतीनिसृष्टःसविषरूपः अनात्मवान् हृदयशून्योमूढइत्यर्थः ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७

अदृश्य इति च्छेदः कथयन् कथां कुर्वन् ३८ फलानि संख्याय अक्षविद्यासामर्थ्यात् राशेरायामादिकमनालोच्यैवेति भावः ३९ । ४० द्विजानिव पक्षिण इव ४१ । ४२ । ४३ ॥ इत्यारण्यकेपर्वणि नैलकंठीये भारतभावदीपे द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ ७ ॥ ततइति १ । २ नलाश्वाः विदर्भनगरे येदमयंत्याऽपत्याभ्यां सहप्रेषिताः ३ । ४ । ५ । ६ शिखिनो मयूराः मेघध्व

ततोभीतः कलिः क्षिप्रं प्रविवेश बिभीतकम् ॥ कलिस्त्वन्यैस्तदाऽदृश्यः कथयन्नैषधेन वै ३८ ततो गतज्वरो राजा नैषधः परवीरहा ॥ संप्रनष्टे कलौ राजा संख्याया स्य फलान्युत ३९ मुदा परमया युक्तस्तेजसाऽथ परेण वै ॥ रथमारुह्य तेजस्वी प्रययौ जवनैर्हयैः ४० बिभीतकश्चाप्रशस्तः संवृत्तः कलिसंश्रयात् ॥ हयोत्तमानुत्प ततो द्विजानिव पुनः पुनः ४१ नलः संनोदयामास प्रहृष्टेनांतरात्मना ॥ विदर्भाभिमुखो राजा प्रययौ स महायशाः ४२ नले तु समतिक्रांते कलिरप्यगमद्गृहम् ॥ ततो गतज्वरो राजा नलोऽभूत्पृथिवीपतिः ॥ विमुक्तः कलिना राजन्रूपमात्रवियोजितः ४३ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणि नलोपाख्यानपर्वणि कलिनिर्गमे द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ बृहदश्व उवाच ॥ ततो विदर्भान्संप्राप्तं सायाह्ने सत्यविक्रमम् ॥ ऋतुपर्णं जना राज्ञे भीमाय प्रत्यवेदयन् १ स भीमवच नाद्राजा कुंडिनं प्राविशत्पुरम् ॥ नादयन्रथघोषेण सर्वाः सविदिशो दिशः २ ततस्तं रथनिर्घोषं नलाश्वास्तत्र शुश्रुवुः ॥ श्रुत्वा तु समहृष्यंत पुरेव नलसन्निधौ ३ दमयंती तु शुश्राव रथघोषं नलस्य तं ॥ यथा मेघस्य नदतो गंभीरं जलदागमे ४ परं विस्मयमापन्ना श्रुत्वा नादं महास्वनम् ॥ नलेन संगृहीतेषु पुरेव नलवाजिषु ॥ सदृशं रथनिर्घोषं मेने भैमी तथा हयाः ५ प्रासादस्थाश्च शिखिनः शालास्थाश्चैव वारणाः ॥ हयाश्च शुश्रुवुस्तस्य रथघोषं महीपतेः ६ तच्छ्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा ॥ प्रणेदुरुन्मुखा राजन्मेघनादइवोत्सुकाः ७ ॥ दमयंत्युवाच ॥ यथाऽसौ रथनिर्घोषः पूरयन्निव मेदिनीम् ॥ ममाल्हादयते चेतो नल एष महीपतिः ८ अद्य चंद्राभवक्त्रं तं न पश्यामि नलं यदि ॥ असंख्येयगुणं वीरं विनंक्ष्यामि न संशयः ९ यदि वै तस्य वीरस्य बाह्वोर्नाद्याहमंतरम् ॥ प्रविशामि सुखस्पर्शं न भविष्याम्यसंशयम् १० यदि मां मेघनिर्घोषो नोपगच्छति नैषधः ॥ अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम् ११ यदि मां सिंहविक्रांतो मत्तवारणविक्रमः ॥ नाभिगच्छति राजेंद्रो विनंक्ष्यामि न संशयः १२ न स्मराम्यनृतं किंचिन्न स्मराम्यपकारताम् ॥ न च पर्युषितं वाक्यं स्वैरेष्वपि कदाचन १३ प्रभुः क्षमावान्वीरश्च दाता चाप्यधिको नृपैः ॥ रहोऽनीचानुवर्ती च क्लीबवन्मम नैषधः १४ गुणांस्तस्य स्मरंत्या मे तत्परायादिवानिशम् ॥ हृदयं दीर्यत इदं शोकात्प्रियविनाकृतम् १५ एवं विलपमाना सा नष्टसंज्ञेव भारत ॥ आरुरोह महद्वेश्म पुण्यश्लोकदिदृक्षया १६ ततो मध्यमकक्षायां ददर्श रथमास्थितम् ॥ ऋतुपर्णं महीपालं सह वार्ष्णेयबाहुकम् १७ ततोऽवतीर्य वार्ष्णेयो बाहुकश्च रथोत्तमात् ॥ हयांस्तानवमुच्याथ स्थापयामास वै रथम् १८ सोऽवतीर्य रथोपस्थादृतुपर्णो नराधिपः ॥ उपतस्थे महाराजं भीमं भीमपराक्रमम् १९

निर्भ्रमा उत्सुकाः ७ । ८ । ९ । १० । ११ । १२ पर्युषितं प्रतिज्ञातकालातिलंघि १३ जितेंद्रियत्वमेवाह रहइति रहसि कर्तव्ये सुरतविषये नीचकर्म पारदार्यादि तदनुवर्तते इति तदन्यः अनीचानुवर्ती परस्त्रीषु क्लीबइत्यर्थः १४ । १५ । १६ । १७ । १८ । १९

२० । २१ । २२ । २३ । २४ । २५ । २६ । २७ नैतदेवं एतदेव एतस्मिन्काले एवंविचार्य नव्यसर्जयत् किंतु विश्राम्यतामित्येवोवाचेत्युत्तरेणान्वयः २८ । २९ दिष्टं निर्दिष्टम् ३०

तं भीमः प्रतिजग्राह पूजया परया ततः ॥ स तेन पूजितो राज्ञा ऋतुपर्णो नराधिपः २० स तत्र कुंडिने रम्ये वसमानो महीपतिः ॥ न च किंचित्तदाऽपश्यत्प्रेक्षमाणो मुहुर्मुहुः ॥ स तु राज्ञा समागम्य विदर्भपतिना तदा २१ अकस्मात्सहसा प्राप्तं स्त्रीमंत्रं न स्म विंदति ॥ किं कार्यं स्वागतं तेऽस्तु राज्ञा पृष्टः स भारत २२ नाभिजज्ञे स नृपतिर्दुहित्रर्थे समागतम् ॥ ऋतुपर्णोऽपि राजा स धीमान्सत्यपराक्रमः २३ राजानं राजपुत्रं वा न स्म पश्यति कंचन ॥ नैव स्वयंवरकथां न च विप्रसमागमम् २४ ततोऽविगणयद्राजा मनसा कोसलाधिपः ॥ आगतोऽस्मीत्युवाचैनं भवंतमभिवादकः २५ राजाऽपि च स्मयन्भीमो मनसा समचिंतयत् ॥ अधिकं योजनशतं तस्यागमनकारणम् २६ ग्रामान्बहूनतिक्रम्य नाध्यगच्छद्यथातथम् ॥ अल्पकार्यं विनिर्दिष्टं तस्यागमनकारणम् २७ पश्चादुदर्के ज्ञास्यामि कारणं यद्भविष्यति ॥ नैतदेवं स नृपतिस्तं सत्कृत्य व्यसर्जयत् २८ विश्राम्यतामित्युवाच क्लांतोऽसीति पुनः पुनः ॥ स सत्कृतः प्रहृष्टात्मा प्रीतः प्रीतेन पार्थिवः २९ राजप्रेष्यैरनुगतो दिष्टं वेश्म समाविशत् ॥ ऋतुपर्णे गते राजन्वार्ष्णेयसहिते नृपे ३० बाहुको रथमादाय रथशालामुपागमत् ॥ स मोचयित्वा तानश्वाननुपचर्य च शास्त्रतः ३१ स्वयं चैतान्समाश्वास्य रथोपस्थ उपाविशत् ॥ दमयंत्यपि शोकार्ता दृष्ट्वा भांगासुरिं नृपम् ३२ सूतपुत्रं च वार्ष्णेयं बाहुकं च तथाविधम् ॥ चिंतयामास वैदर्भी कस्यैष रथनिःस्वनः ३३ नलस्येव महानासीन्न च पश्यामि नैषधम् ॥ वार्ष्णेयेन भवेन्नूनं विद्या सैवोपशिक्षिता ३४ तेनाद्य रथनिर्घोषो नलस्येव महानभूत् ॥ आहोस्विदृतुपर्णोऽपि यथा राजा नलस्तथा ॥ यथाऽयं रथनिर्घोषो नैषधस्येव लक्ष्यते ३५ एवं सा तर्कयित्वा तु दमयंती विशांपते ॥ दूतीं प्रस्थापयामास नैषधान्वेषणे शुभा ३६ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणि नलोपाख्यानपर्वणि भीमपुरप्रवेशे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ दमयंत्युवाच ॥ गच्छ केशिनि जानीहि क एष रथवाहकः ॥ उपविष्टो रथोपस्थे विकृतो ह्रस्वबाहुकः १ अभ्येत्य कुशलं भद्रे मृदुपूर्वं समाहिता ॥ पृच्छेथाः पुरुषं ह्येनं यथातत्त्वमनिंदिते २ अत्र मे महती शंका भवेदेष नलो नृपः ॥ यथा च मनसस्तुष्टिर्हृदयस्य च निर्वृतिः ३ ब्रूयाश्चैनं कथांते त्वं पर्णादवचनं यथा ॥ प्रतिवाक्यं च सुश्रोणि बुद्ध्येथास्त्वमनिंदिते ४ ततः समाहिता गत्वा दूती बाहुकमब्रवीत् ॥ दमयंत्यपि कल्याणी प्रासादस्थाह्युपैक्षत ५ ॥ ॥ केशिन्युवाच ॥ ॥ स्वागतं ते मनुष्येंद्र कुशलं ते ब्रवीम्यहम् ॥ दमयंत्या वचः साधु निबोध पुरुषर्षभ ६ कदा वै प्रस्थिता यूयं किमर्थमिह चागताः ॥ तत्त्वं ब्रूहि यथान्यायं वैदर्भी श्रोतुमिच्छति ७ ॥ बाहुक उवाच ॥ श्रुतः स्वयंवरो राज्ञा कोसलेन महात्मना ॥ द्वितीयो दमयंत्या वै भविता श्व इति द्विजात् ८ श्रुत्वैतत्प्रस्थितो राजा शतयोजनयायिभिः ॥ हयैर्वातजवैर्मुख्यैरहमस्य च सारथिः ९

३१ । ३२ । ३३ । ३४ । आहोस्विदित्याश्चर्यार्थे अतएव समानार्थकं वाक्यमावर्तितं ३५ । ३६ इत्या० नै० भा० त्रिसप्ततितमोऽध्यायः ७३ ॥ ॥ गच्छेति १ । २ । ३ पर्णादवचनं क्वनु त्वं कितव च्छित्त्वा वस्त्रार्धं प्रस्थितो मम इत्यादि श्रुत्वा विरूपोऽन्हस्वबाहुकः कश्चित्प्रत्युत्तरं दत्तवांस्त लक्षणएवायमिति भावः ४ । ५ । ६ । ७ । ८ । ९

१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० विकारं हृदयव्यथाऽश्रुनेत्रत्वादिकं ३१ ॥ ॥ इत्या

॥ केशिन्युवाच ॥ अथयोऽसौद्वितीयोवःसकुतःकस्यवापुनः ॥ त्वंचकस्यकथंचेदंत्वयिकर्मसमाहितम् १० ॥ बाहुकउवाच ॥ पुण्यश्लोकस्यवैसूतोवार्ष्णेय
इतिविश्रुतः ॥ सनलेविद्रुतेभद्रेभांगासुरिमुपस्थितः ११ अहमप्यश्वकुशलःसूतत्वेचप्रतिष्ठितः ॥ ऋतुपर्णेनसारथ्येभोजनेचवृतःस्वयम् १२ ॥ केशिन्यु
वाच ॥ अथजानातिवार्ष्णेयःक्वनुराजानलोगतः ॥ कथंचत्वयिवातेनकथितंस्यात्तुबाहुक १३ ॥ बाहुकउवाच ॥ इहैवपुत्रौनिक्षिप्यनलस्यशुभकर्मणः ॥ ग
तस्ततोयथाकामंनैषजानातिनैषधम् १४ नचान्यःपुरुषःकश्चिन्नलंवेत्तियशस्विनि ॥ गूढश्चरतिलोकेऽस्मिन्नष्टरूपोमहीपतिः १५ आत्मैवतुनलंवेदयाचास्य
तदनंतरा ॥ नहिवैस्वानिलिंगानिनलःशंसतिकर्हिचित् १६ ॥ केशिन्युवाच ॥ योऽसावयोध्यांप्रथमंगतोऽसौब्राह्मणस्तदा ॥ इमानिनारीवाक्यानिकथया
नःपुनःपुनः १७ क्वनुत्वंकितवच्छित्त्वावस्त्रार्धंप्रस्थितोमम ॥ उत्सृज्यविपिनेसुप्तामनुरक्तांप्रियांप्रिय १८ सावैयथासमादिष्टातथाऽस्तेत्वत्प्रतीक्षिणी ॥ द
ह्यमानादिवारात्रौवस्त्रार्धेनाभिसंवृता १९ तस्यारुदंत्याःसततंतेनदुःखेनपार्थिव ॥ प्रसादंकुरुमेवीरप्रतिवाक्यंवदस्वच २० तस्यास्तत्प्रियमाख्यानंप्रवद
स्वमहामते ॥ तदेववाक्यंवैदर्भीश्रोतुमिच्छत्यनिंदिता २१ एतच्छ्रुत्वाप्रतिवचस्तस्यदत्तंत्वयाकिल ॥ यत्पुरातत्पुनस्त्वत्तोवैदर्भीश्रोतुमिच्छति २२ ॥
॥ बृहदश्वउवाच ॥ एवमुक्तस्यकेशिन्यानलस्यकुरुनंदन ॥ हृदयंव्यथितंचासीदश्रुपूर्णेचलोचने २३ सनिगृह्यात्मनोदुःखंदह्यमानोमहीपतिः ॥ बाष्पसं
दिग्धयावाचापुनरेवेदमब्रवीत् २४ ॥ बाहुकउवाच ॥ वैषम्यमपिसंप्राप्तागोपायंतिकुलस्त्रियः ॥ आत्मानमात्मनासत्योजितःस्वर्गोनसंशयः २५ रहिताभर्तृ
भिश्चापिनक्रुध्यंतिकदाचन ॥ प्राणांश्चारित्रकवचान्धारयंतिवरस्त्रियः २६ विषमस्थेनमूढेनपरिभ्रष्टसुखेनच ॥ यत्सातेनपरित्यक्तातत्रनक्रोद्धुमर्हति २७
प्राणयात्रांपरिप्रेप्सोःशकुनैर्हृतवाससः ॥ आधिभिर्दह्यमानस्यश्यामानक्रोद्धुमर्हति २८ सत्कृताऽसत्कृतावाऽपिपतिंदृष्ट्वातथाविधम् ॥ राज्यभ्रष्टंश्रियाहीनं
क्षुधितंव्यसनाप्लुतम् २९ एवंब्रुवाणस्तद्वाक्यंनलःपरमदुर्मनाः ॥ नबाष्पमशकत्सोढुंप्ररुरोदचभारत ३० ततःसाकेशिनीगत्वादमयंत्यैन्यवेदयत् ॥ तत्स
र्वंकथितंचैवविकारंतस्यवैचतम् ३१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानप०नलकेशिनीसंवादेचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ ७४ ॥
॥ बृहदश्वउवाच ॥ ॥ दमयंतीतुतच्छ्रुत्वाभृशंशोकपरायणा ॥ शंकमानानलंतंवैकेशिनीमिदमब्रवीत् १ गच्छकेशिनिभूयस्त्वंपरीक्षांकुरुबाहुके ॥ अब्रु
वाणासमीपस्थाचरितान्यस्यलक्षय २ यदाचकिंचित्कुर्यात्सकारणंतत्रभामिनि ॥ तत्रसंचेष्टमानस्यलक्षयंतीविचेष्टितम् ३

रण्यकेपर्वणिनैलकंठीयेभारतभावदीपेचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ दमयंतीति १ । २ पाठांतरेसंलक्ष्यंलक्षणीयं तेत्वया ३

४ । ५ । ६ । ७ शुच्युपचारःजलस्थलशुद्ध्यादिपरः ८ संचारंद्वारंन्हस्वमप्युत्सर्पतिदीर्घंभवति ९ संकटेसंकुचिते एतेनभूमिजयोदर्शितः १० पाशवंपशुसंबंधि ११ कुंभाःपूर्णा एवेतिजल
धातुजयउक्तः १२ वन्हिजयमाहतृणेतितिभिः सवितुःसकाशात् समादधत् उद्दीपितवान् १३ । १४ । १५ वायुजयमाह अतीवेतिद्वाभ्यां पुष्पेषुक्षीणोऽशोऽप्यदितिवायुनाआपूर्यतइत्य
नचास्यप्रतिबंधेनदेयोऽग्निरपिकेशिनि ॥ याचतेनजलंदेयंसर्वथात्वरमाणया ४ एतत्सर्वंसमीक्ष्यत्वंचरितंमेनिवेदय ॥ निमित्तंयत्त्वयादृष्टंबाहुकेदैवमानुषम् ५
यच्चान्यदपिपश्येथास्तच्चाख्येयंत्वयामम ॥ दमयंत्यैवमुक्तासाजगामाथचकेशिनी ६ निशम्याथहयज्ञस्यलिंगानिपुनरागमत् ॥ सातत्सर्वंयथावृत्तंदमयंत्यैन्य
वेदयत् ॥ निमित्तंयत्तयादृष्टंबाहुकेदैवमानुषम् ७ ॥ केशिन्युवाच ॥ दृढंशुच्युपचारोऽसौनमयामानुषःक्वचित् ॥ दृष्टपूर्वःश्रुतोवाऽपिदमयंतितथाविधः ८ न्ह
स्वमासाद्यसंचारंनासौविनमतेक्वचित् ॥ तंतुदृष्ट्वायथासंगमुत्सर्पतियथासुखम् ९ संकटेऽप्यस्यसुमहान्विवरोजायतेऽधिकः ॥ ऋतुपर्णस्यचार्थायभोजनीयम
नेकशः १० प्रेषितंतत्रराज्ञातुमांसंबहुचपाशवम् ॥ तस्यप्रक्षालनार्थायकुंभास्तत्रोपकल्पिताः ११ तेतेनावेक्षिताःकुंभाःपूर्णाएवाभवंस्ततः ॥ ततःप्रक्षा
लनंकृत्वासमधिश्रित्यबाहुकः १२ तृणमुष्टिंसमादायसवितुस्तंसमादधत् ॥ अथप्रज्वलितस्तत्रसहसाहव्यवाहनः १३ तदद्भुततमंदृष्ट्वाविस्मिताऽहमिहागता ॥
अन्यच्चतस्मिन्सुमहदाश्चर्यंलक्षितंमया १४ यदग्निमपिसंस्पृश्यनैवासौदह्यतेशुभे ॥ छंदेनचोदकंतस्यवहत्यावर्जितंद्रुतम् १५ अतीवचान्यत्सुमहदाश्चर्यं
दृष्टवत्यहम् ॥ यत्सपुष्पाण्युपादायहस्ताभ्यांमृद्नन्शनैः १६ मृद्यमानानिपाणिभ्यांतेनपुष्पाणिनान्यथा ॥ भूयएवसुगंधीनिहृषितानिभवंतिहि ॥ एता
न्यद्भुतलिंगानिदृष्ट्वाऽहंद्रुतमागता १७ बृहदश्वउवाच ॥ दमयंतीतुतच्छ्रुत्वापुण्यश्लोकस्यचेष्टितम् ॥ अमन्यतनलंप्राप्तंकर्मचेष्टाभिसूचितम् १८ साशंक
मानाभर्तारंबाहुकंपुनरिंगितैः ॥ केशिनींश्लक्ष्णयावाचारुदतीपुनरब्रवीत् १९ पुनर्गच्छप्रमत्तस्यबाहुकस्योपसंस्कृतम् ॥ महानसाच्छृतंमांसमानयस्वेहभा
विनि २० सागत्वाबाहुकस्याग्रेतन्मांसमपकृष्यच ॥ अत्युष्णमेवत्वरितातत्क्षणात्प्रियकारिणी २१ दमयंत्यैततःप्रादात्केशिनीकुरुनंदन ॥ साचितानलसिद्ध
स्यमांसस्यबहुशःपुरा २२ प्राश्यमत्वानलंसूतंप्राक्रोशद्भृशदुःखिता ॥ वैक्लव्यंपरमंगत्वाप्रक्षाल्यचमुखंततः २३ मिथुनंप्रेषयामासकेशिन्यासहभारत ॥ इं
द्रसेनांसहभ्रात्रासमभिज्ञायबाहुकः २४ अभिद्रुत्यततोराजापरिष्वज्यांकमानयत् ॥ बाहुकस्तुसमासाद्यसुतौसुरसुतोपमौ २५ भृशंदुःखपरीतात्मासुस्वरंप्र
रुरोदह ॥ नैषधोदर्शयित्वातुविकारमसकृत्तदा ॥ उत्सृज्यसहसापुत्रौकेशिनीमिदमब्रवीत् २६ इदंचसदृशंभद्रेमिथुनंममपुत्रयोः ॥ अतोदृष्ट्वैवसहसाबाष्पमु
त्सृष्टवानहम् २७ बहुशःसंपतंतींत्वांजनःशंकेतदोषतः ॥ वयंचदेशातिथयोगच्छभद्रेयथासुखम् २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्व
णिकन्यापुत्रदर्शनेपंचसप्ततितमोऽध्यायः ॥ ७५ ॥

र्थः १६ । १७ कर्मपाकादि चेष्टाभूतजयादि १८ बाहुकंबाहुकरूपिणमिति रूपभेदात्संशयोऽस्तिनतुक्रियातइत्यर्थः १९ । २० । २१ मांसस्यमांसं बहुशःबहुवारं २२ । २३ । २४ । २५
२६ । २७ संपतंतीं आयांतीं दोषतः कामदोषेण २८ ॥ इत्यारण्यकेपर्वणि नैलकंठीये भारतभावदीपे पंचसप्ततितमोऽध्यायः ॥ ७५ ॥

॥ बृहदश्वउवाच ॥ सर्वंविकारंदृष्ट्वातुपुण्यश्लोकस्यधीमतः ॥ आगत्यकेशिनीसर्वंदमयंत्यैन्यवेदयत् १ दमयंतीततोभूयःप्रेषयामासकेशिनीम् ॥ मातुःसकाशंदुः
खार्त्तानलदर्शनकांक्षया २ परीक्षितोमेबहुशोबाहुकोनलशंकया ॥ रूपेमेसंशयस्त्वेकःस्वयमिच्छामिवेदितुम् ३ सवाप्रवेश्यतांमातर्मांवाऽनुज्ञातुमर्हसि ॥ वि
दितंवाऽथवाऽज्ञातंपितुर्मेसंविधीयताम् ४ एवमुक्तातुवैदर्भ्यासादेवीभीममब्रवीत् ॥ दुहितुस्तमभिप्रायमन्वजानात्सपार्थिवः ५ सावैपित्राऽभ्यनुज्ञातामात्रा
चभरतर्षभ ॥ नलंप्रवेशयामासयत्रतस्याःप्रतिश्रयः ६ तांस्मदृष्ट्वैवसहसादमयंतींनलोनृपः ॥ आविष्टःशोकदुःखाभ्यांबभूवाश्रुपरिप्लुतः ७ तंतुदृष्ट्वातथायुक्तं
दमयंतीनलंतदा ॥ तीव्रशोकसमाविष्टाबभूववरवर्णिनी ८ ततःकाषायवसनाजटिलामलपंकिनी ॥ दमयंतीमहाराजबाहुकंवाक्यमब्रवीत् ९ पूर्वंदृष्टस्त्वयाक
श्चिद्धर्मज्ञोनामबाहुक ॥ सुप्तामुत्सृज्यविपिनेगतोयःपुरुषःस्त्रियम् १० ॥ अनागसंप्रियांभार्यांविजनेश्रममोहिताम् ॥ अपहायतुकोगच्छेत्पुण्यश्लोकमृतेनलम्
११ किमुतस्यमयाबाल्यादपराद्धंमहीपतेः ॥ योमामुत्सृज्यविपिनेगतवान्निद्रयार्दिताम् १२ साक्षाद्देवानपाहाययंवृतोयःसपुरामया ॥ अनुव्रतांसाभिकामांपु
त्रिणींत्यक्तवान्कथम् १३ अग्नौपाणिंगृहीत्वातुदेवानामग्रतस्तथा ॥ भविष्यामीतिसत्यंतुप्रतिश्रुत्यक्वतद्व्रतम् १४ दमयंत्याब्रुवंत्यास्तुसर्वमेतदरिंदम ॥ शो
कजंवारिनेत्राभ्यामसुखंप्रास्रवद्बहु १५ अतीवकृष्णताराभ्यांरक्तांताभ्यांजलंतुतत् ॥ परिस्रवन्नलोदृष्ट्वाशोकार्त्तामिदमब्रवीत् १६ ममराज्यंप्रनष्टंयन्नाहंतत्कृ
तवान्स्वयम् ॥ कलिनातत्कृतंभीरुयच्चत्वामहमत्यजम् १७ यत्त्वयाधर्मकृच्छ्रेतुशापेनाभिहतःपुरा ॥ वनस्थयादुःखितयाशोचंत्यामांदिवानिशम् १८ सम
च्छरीरेत्वच्छापाद्दह्यमानोऽवसत्कलिः ॥ त्वच्छापदग्धःसततंसोऽग्नावग्निरिवाहितः १९ ममचव्यवसायेनतपसाचैवनिर्जितः ॥ दुःखस्यांतेनचानेनभवितव्यं
हिनौशुभे २० विमुच्यमांगतःपापस्ततोहमिहचागतः ॥ त्वदर्थंविपुलश्रोणिनहिमेऽन्यत्प्रयोजनम् २१ कथंनुनारीभर्तारमनुरक्तमनुव्रतम् ॥ उत्सृज्यवरयेद
न्यंयथात्वंभीरुकर्हिचित् २२ दूताश्चरंतिपृथिवींकृत्स्नांनृपतिशासनात् ॥ भैमीकिलस्मभर्तारंद्वितीयंवरयिष्यति २३ स्वैरवृत्तायथाकाममनुरूपमिवात्म
नः ॥ श्रुत्वैवचैवंत्वरितोभांगासुरिरुपस्थितः २४ दमयंतीतुतच्छ्रुत्वानलस्यपरिदेवितम् ॥ प्रांजलिर्वेपमानाचभीतावचनमब्रवीत् २५ दमयंत्युवाच ॥
नमामर्हसिकल्याणदोषेणपरिशंकितुम् ॥ मयाहिदेवानुत्सृज्यवृतस्त्वंनिषधाधिप २६ तवाभिगमनार्थंतुसर्वतोब्राह्मणागताः ॥ वाक्यानिममगाथाभिर्गायमा
नादिशोदश २७ ततस्त्वांब्राह्मणोविद्वान्पर्णादोनामपार्थिव ॥ अभ्यगच्छत्कोसलायामृतुपर्णनिवेशने २८ तेनवाक्येकृतेसम्यक्प्रतिवाक्येतथाऽऽहृते ॥
उपायोऽयंमयादृष्टोनैषधानयनेतव २९

सर्वंमिति १ । २ । ३ । ४ । ५ प्रतिश्रयः गृहं ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९

३० । ३१ सदागतिर्वायुः ३२ । ३३ चंद्रमाश्चित्ताभिमानिनीदेवता ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ कल्येप्रभाते ४८ । ४९ । ५०

त्वामृतेनहिलोकेऽन्यएकाह्नापृथिवीपते ॥ समर्थोयोजनशतंगंतुमश्वैर्नराधिप ३० स्पृशेयंतेनसत्येनपादावेतौमहीपते ॥ यथानासत्कृतंकिंचिन्मनसाऽपिचरा
म्यहम् ३१ अयंचरतिलोकेऽस्मिन्भूतसाक्षीसदागतिः ॥ एषमेमुंचतुप्राणान्यदिपापंचराम्यहम् ३२ यथाचरतितिग्मांशुःपरेणभुवनंसदा ॥ समुंचतुमम
प्राणान्यदिपापंचराम्यहम् ३३ चंद्रमाःसर्वभूतानामंतश्चरतिसाक्षिवत् ॥ समुंचतुममप्राणान्यदिपापंचराम्यहम् ३४ एतेदेवास्त्रयःकृत्स्नंत्रैलोक्यंधारयंति
वै ॥ विब्रुवंतुयथासत्यमेतद्देवास्त्यजंतुमाम् ३५ एवमुक्तस्तथावायुरंतरिक्षादभाषत ॥ नैषाकृतवतीपापंनलसत्यंब्रवीमिते ३६ राजन्शीलनिधिःस्फीतोदम
यंत्यासुरक्षितः ॥ साक्षिणोरक्षिणश्चास्यावयंत्रीन्परिवत्सरान् ३७ उपायोविहितश्चायंत्वदर्थमतुलोऽनया ॥ नह्येकान्हाशतंगंतात्वामृतेऽन्यःपुमानिह ३८
उपपन्नात्वयाभैमीत्वंचभैम्यामहीपते ॥ नात्रशंकात्वयाकार्यासंगच्छसहभार्यया ३९ तथाब्रुवतिवायौतुपुष्पवृष्टिःपपातह ॥ देवदुंदुभयोनेदुर्ववौचपवनःशिवः
४० तदद्भुतमयंदृष्ट्वानलोराजाऽथभारत ॥ दमयंत्यांविशंकांतामुपाकर्षदरिंदमः ४१ ततस्तद्वस्त्रमजरंप्रावृणोद्वसुधाधिपः ॥ संस्मृत्यनागराजंततोलेभेस्वकं
वपुः ४२ स्वरूपिणंतुभर्तारंदृष्ट्वाभीमसुतातदा ॥ प्राक्रोशदुच्चैरालिंग्यपुण्यश्लोकमनिंदिता ४३ भैमीमपिनलोराजाभ्राजमानोयथापुरा ॥ सस्वजेस्वसुतौचा
पियथावत्प्रत्यनंदत ४४ ततःस्वोरसिविन्यस्यवक्त्रंतस्यशुभानना ॥ परीतातेनदुःखेननिशश्वासायतेक्षणा ४५ तथैवमलदिग्धांगींपरिष्वज्यशुचिस्मिताम् ॥
सुचिरंपुरुषव्याघ्रस्तस्थौशोकपरिप्लुतः ४६ ततःसर्वंयथावृत्तंदमयंत्यानलस्यच ॥ भीमायाकथयत्प्रीत्यावैदर्भ्याजननीनृप ४७ ततोऽब्रवीन्महाराजःकृतशौ
चमहंनलम् ॥ दमयंत्यासहोपेतंकल्येद्रष्टासुखोषितम् ४८ ततस्तौसहितौरात्रिंकथयंतौपुरातनम् ॥ वनेविचरितंसर्वमूषतुर्मुदितौनृप ४९ गृहेभीमस्यनृप
तेःपरस्परसुखैषिणौ ॥ वसेतांहृष्टसंकल्पौवैदर्भीचनलश्चह ५० सचतुर्थेततोवर्षेसंगम्यसहभार्यया ॥ सर्वकामैःसुसिद्धार्थोलब्धवान्परमांमुदम् ५१ दमयंत्य
पिभर्तारमासाद्याप्यायिताभृशम् ॥ अर्धसंजातसस्येवतोयंप्राप्यवसुंधरा ५२ सैवंसमेत्यव्यपनीयतंद्रांशांतज्वराहर्षविवृद्धसत्त्वा ॥ रराजभैमीसमवाप्तकामाशी
तांशुनारात्रिरिवोदितेन ५३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलदमयंतीसमागमेषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ बृहदश्वउवाच ॥ अथतांव्यु
षितोरात्रिंनलोराजास्वलंकृतः ॥ वैदर्भ्यासहितःकालेददर्शवसुधाधिपम् १ ततोऽभिवादयामासप्रयतःश्वशुरंनलः ॥ ततोऽनुदमयंतीचववंदेपितरंशुभा २

५१ । ५२ ॥ ५३ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ॥ ७ ॥ अथेति १ । २

२ । ३ । ४ । ५ । ६ पुष्पभगः पुष्पसंमर्दः ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ उपाकर्तुंदातुं १७ । १८ । १९ । २० ॥ २१ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपे

तंभीमःप्रतिजग्राहपुत्रवत्परयामुदा ॥ यथार्हंपूजयित्वाचसमाश्वासयतप्रभुः ३ नलेनसहितांतत्रदमयंतींपतिव्रताम् ॥ तामर्हणांनलोराजाप्रतिगृह्ययथाविधि
४ परिचर्यांस्वकांतस्मैयथावत्प्रत्यवेदयत् ॥ ततोबभूवनगरेसुमहान्हर्षजःस्वनः ५ जनस्यसंप्रहृष्टस्यनलंदृष्ट्वातथागतम् ॥ अशोभयच्चनगरंपताकाध्वजमालि
नम् ७ सिक्ताःसुमृष्टपुष्पाढ्याराजमार्गाःस्वलंकृताः ॥ द्वारिद्वारिचपौराणांपुष्पभंगोपकल्पिताः ७ अर्चितानिचसर्वाणिदेवतायतनानिच ॥ ऋतुपर्णोऽपि
शुश्रावबाहुकच्छद्मिनंनलम् ८ दमयंत्यासमायुक्तंजहृषेचनराधिपः ॥ तमानाय्यनलंराजाक्षमयामासपार्थिवम् ९ सचतंक्षमयामासहेतुभिर्बुद्धिसंमितः ॥ स
सत्कृतोमहीपालोनैषधंविस्मिताननः १० उवाचवाक्यंतत्त्वज्ञोनैषधंवदतांवरः ॥ दिष्ट्यासमेतोदारैःस्वैर्भवानित्यभ्यनंदत ११ कच्चित्तुनापराधंतेकृतवान
स्मिनैषध ॥ अज्ञातवासेवसतोमद्गृहेवसुधाधिप १२ यदिवाऽबुद्धिपूर्वाणियदिबुद्ध्याऽपिकानिचित् ॥ मयाकृतान्यकार्याणितानित्वंक्षंतुमर्हसि १३ नलउवाच॥
नमेऽपराधंकृतवांस्त्वंस्वल्पमपिपार्थिव ॥ कृतेऽपिचनमेकोपःक्षंतव्यंहिमयातव १४ पूर्वंह्यपिसखामेऽसिसंबंधीचजनाधिप ॥ अतऊर्ध्वंतुभूयस्त्वंप्रीतिमाहर्तु
मर्हसि ॥ सर्वकामैःसुविहितैःसुखमस्म्युषितस्त्वयि १५ नतथास्वगृहेराजन्यथातवगृहेसदा ॥ इदंचैवहयज्ञानंत्वदीयंमयितिष्ठति १६ तदुपाकर्तुमिच्छामि
मन्यसेयदिपार्थिव ॥ एवमुक्त्वाददौविद्यामृतुपर्णायनैषधः १७ सचतांप्रतिजग्राहविधिदृष्टेनकर्मणा ॥ गृहीत्वाचाश्वहृदयंराजन्भांगासुरिर्नृपः १८ निषधा
धिपतेश्चापिदत्वाऽक्षहृदयंनृपः ॥ सूतमन्यमुपादायययौस्वपुरमेवह १९ ऋतुपर्णेगतेराजन्नलोराजाविशांपते ॥ नगरेकुंडिनेकालंनातिदीर्घमिवावसत् ॥
॥ २० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्वणिऋतुपर्णस्वदेशगमनेसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ध ॥ बृहदश्वउवाच ॥ समामुष्य
कौंतेयभीममामंत्र्यनैषधः ॥ पुरादल्पपरीवारोजगामनिषधान्प्रति १ रथेनैकेनशुभ्रेणदंतिभिःपरिषोडशैः ॥ पंचाशद्भिर्हयैश्चैवषट्शतैश्चपदातिभिः २ सकंप
यन्निवमहींत्वरमाणोमहीपतिः ॥ प्रविवेशाथसंरब्धस्तरसैवमहामनाः ३ ततःपुष्करमासाद्यवीरसेनसुतोनलः ॥ उवाचदीव्यावपुनर्बहुवित्तंमयाऽर्जितम् ४
दमयंतीचयच्चान्यन्ममकिंचनविद्यते ॥ एषवैममसंन्यासस्तवराज्यंतुपुष्कर ५ पुनःप्रवर्ततांद्यूतमितिमेनिश्चितामतिः ॥ एकपाणेनभद्रंतेप्राणयो
श्चपणावहे ६ जित्वापरस्वमाहृत्यराज्यंवायदिवावसु ॥ प्रतिपाणःप्रदातव्यःपरमोधर्मउच्यते ७ नचेद्वांछसित्वंद्यूतंयुद्धद्यूतंप्रवर्तताम् ॥ द्वैरथेना ॥६५॥
स्तुवैशांतिस्तववाममवानृप ८

सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ उष्यत्वासंकृत्वा १ । २ । ३ । ४ राज्यमेकपाणेनैव ममतुदमयंत्यादिचमाणयोश्च पणावहे युद्धमपिवर्त्ततामित्यर्थः ५ । ६ । ७ । ८

९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ ॥ ३३ ॥ इत्यारण्यके

वंशभोज्यमिदंराज्यमर्थितव्यंयथातथा ॥ येनकेनाप्युपायेनवृद्धानामितिशासनम् ९ द्वयोरेकतरेबुद्धिःक्रियतामद्यपुष्कर ॥ कैतवेनाक्षवत्यांतुयुद्धेवानाम्यतां
धनुः १० नैषधेनैवमुक्तस्तुपुष्करःप्रहसन्निव ॥ ध्रुवमात्मजयंमत्वाप्रत्याहपृथिवीपतिम् ११ दिष्ट्यात्वयाऽर्जितंवित्तंप्रतिपाणायनैषध ॥ दिष्ट्याचदुष्कृतं
कर्मदमयंत्याःक्षयंगतम् १२ दिष्ट्याचध्रियसेराजन्सदारोऽद्यमहाभुज ॥ धनेनानेनवैभैमीजितेनसमलंकृता १३ मामुपस्थास्यतिव्यक्तंदिविशक्रमिवाप्सराः॥
नित्यशोहिस्मरामित्वांप्रतीक्षेऽपिचनैषध १४ देवनेनममप्रीतिर्नभवत्यसुहृद्गणैः॥ जित्वात्वद्यवरारोहांदमयंतीमनिंदिताम् १५ कृतकृत्योभविष्यामिसाहिमेनि
त्यशोहृदि ॥ श्रुत्वातुतस्यतावाचोबह्वबद्धप्रलापिनः १६ इयेषसशिरश्छेत्तुंखड्गेनकुपितोनलः ॥ स्मयंस्तुरोषताम्राक्षस्तमुवाचनलोनृपः १७ पणावःकिं
व्याहरसेजितोनव्याहरिष्यसि ॥ ततःप्रावर्ततद्यूतंपुष्करस्यनलस्यच १८ एकपाणेनभद्रंतेनलेनसपराजितः ॥ सरत्नकोशनिचयैःप्राणेनपणितोऽपिच १९ जि
त्वाचपुष्करंराजाप्रहसन्निदमब्रवीत् ॥ ममसर्वमिदंराज्यमव्यग्रंहतकंटकम् २० वैदर्भीनत्वयाशक्याराजापसदवीक्षितुम् ॥ तस्यास्त्वंसपरीवारोमूढदासत्वमा
गतः २१ नत्वयातत्कृतंकर्मयेनाहंविजितःपुरा ॥ कलिनातत्कृतंकर्मत्वंचमूढनबुद्ध्यसे २२ नाहंपरकृतंदोषंत्वय्याधास्येकथंचन ॥ यथासुखंवैजीवत्वंप्राणा
नवसृजामिते २३ तथैवसर्वसंभारंस्वमंशंवितरामिते ॥ तथैवचममप्रीतिस्त्वयिवीरनसंशयः २४ सौहार्दंचापिमेत्वत्तोनकदाचित्प्रहास्यति ॥ पुष्करत्वंहिमे
भ्रातासंजीवशरदःशतम् २५ एवंनलःसांत्वयित्वाभ्रातरंसत्यविक्रमः ॥ स्वपुरंप्रेषयामासपरिष्वज्यपुनःपुनः २६ सांत्वितोनैषधेनैवंपुष्करःप्रत्युवाचतम् ॥
पुण्यश्लोकंतदाराजन्नभिवाद्यकृतांजलिः २६ कीर्तिरस्तुतवाक्षय्याजीववर्षायुतंसुखी ॥ योमेवितरसिप्राणानधिष्ठानंचपार्थिव २८ सतथासत्कृतोराज्ञामासमुष्य
तदानृपः ॥ प्रययौपुष्करोहृष्टःस्वपुरंस्वजनावृतः २९ महत्यासेनयासार्धंविनीतैःपरिचारकैः ॥ भ्राजमानइवादित्योवपुषापुरुषर्षभ ३० प्रस्थाप्यपुष्करंरा
जावित्तवंतमनामयम् ॥ प्रविवेशपुरंश्रीमानत्यर्थमुपशोभिताम् ३१ प्रविश्यसांत्वयामासपौरांश्चनिषधाधिपः ॥ पौराजानपदाश्चापिसंप्रहृष्टतनूरुहाः ३२
ऊचुःप्रांजलयःसर्वेसामात्यप्रमुखाजनाः ॥ अद्यस्मनिर्वृताराजन्पुरेजनपदेऽपिच ॥ उपासितुंपुनःप्राप्तादेवाइवशतक्रतुम् ॥ ३३ ॥ ॥ इतिश्रीमहाभार
तेआरण्यकेपर्वणिनलोपाख्यानपर्वणिपुष्करपराभवपूर्वकंराज्यप्रत्यानयनेअष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ध ॥ ॥ बृहदश्वउवाच ॥ प्रशांतेतुपुरेहृ
ष्टेसंप्रवृत्तेमहोत्सवे ॥ महत्यासेनयाराजादमयंतीमुपानयत् १

पर्वणिनैलकंठीयेभारतभावदीपेअष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ ध ॥ ॥ प्रशांतेवीतशोके १

२ । ३ । ४ वक्ष्यसेदीव्यसे वशकांताविस्यस्यरूपम् ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । पुनर्द्यूतंकरिष्यसीतिराजानंप्रति पूर्वंभीमसेनेनोक्तंतत्र

दमयंतीमपिपितासत्कृत्यपरवीरहा ॥ प्रास्थापयदमेयात्माभीमोभीमपराक्रमः २ आगतायांतुवैदर्भ्यांसपुत्रायांनलोनृपः ॥ वर्तयामासमुदितोदेवराडिवनंदने ३ तथाप्रकाशतांयातोजंबूद्वीपेसराजसु ॥ पुनःशशासतद्राज्यंप्रत्याहृत्यमहायशाः ४ ईजेचविविधैर्यज्ञैर्विधिवच्चाप्तदक्षिणैः ॥ तथात्वमपिराजेंद्रससुहृद्वक्ष्यसेऽचिरात् ५ दुःखमेतादृशंप्राप्तोनलःपरपुरंजयः ॥ देवनेननरश्रेष्ठसभार्योभरतर्षभ ६ एकाकिनैवसुमहन्नलेनपृथिवीपते ॥ दुःखमासादितंघोरंप्राप्तश्चाभ्युदयः पुनः ७ त्वंपुनर्भ्रातृसहितःकृष्णयाचैवपांडव ॥ रमसेऽस्मिन्महारण्येधर्ममेवानुचिंतयन् ८ ब्राह्मणैश्चमहाभागैर्वेदवेदांगपारगैः ॥ नित्यमन्वास्यसेराजंस्तत्रका परिदेवना ९ कर्कोटस्यनागस्यदमयंत्यानलस्यच ॥ ऋतुपर्णस्यराजर्षेःकीर्तनंकलिनाशनम् १० इतिहासमिमंचापिकलिनाशनमच्युत ॥ शक्यमाश्वासितुंश्रुत्वात्वद्विधेनविशांपते ११ अस्थिरत्वंचसंचिंत्यपुरुषार्थस्यनित्यदा ॥ तस्योदयेव्ययेचापिनचिंतयितुमर्हसि १२ श्रुत्वेतिहासंनृपतेसमाश्वसिहिमाशुचः ॥ व्यसनेत्वंमहाराजनविषीदितुमर्हसि १३ विषमावस्थितेदैवेपौरुषेऽफलतांगते ॥ विषादयंतिनात्मानंसत्त्वोपाश्रयिणोनराः १४ येचेदंकथयिष्यंतिनलस्यचरितंमहत् ॥ श्रोष्यंतिचाप्यभीक्ष्णंवैनालक्ष्मीस्तान्भजिष्यति १५ अर्थास्तस्योपपत्स्यंतेधन्यतांचगमिष्यति ॥ इतिहासमिमंश्रुत्वापुराणंशश्वदुत्तमम् १६ पुत्रान्पौत्रान्पशूंश्चापिलभतेनृषुचाग्र्यताम् ॥ आरोग्यप्रीतिमांश्चैवभविष्यतिनसंशयः १७ भयात्त्रस्यसियच्चत्वमाह्वयिष्यतिमांपुनः ॥ अक्षज्ञइतिततेहंनाशयिष्यामिपार्थिव १८ वेदाक्षहृदयंकृत्स्नमहंसत्यपराक्रम ॥ उपपद्यस्वकौंतेयप्रसन्नोऽहंब्रवीमिते १९ ॥ वैशंपायनउवाच ॥ ततोहृष्टमनाराजाबृहदश्वमुवाचह ॥ भगवन्नक्षहृदयंज्ञातुमिच्छामितत्त्वतः २० ततोक्षहृदयंप्रादात्पांडवायमहात्मने ॥ दत्वाचाश्वशिरोऽगच्छदुपस्प्रष्टुंमहातपाः २१ बृहदश्वेगतेपार्थमश्रौषीत्सव्यसाचिनम् ॥ वर्तमानंतपस्युग्रेवायुभक्षंमनीषिणम् २२ ब्राह्मणेभ्यस्तपस्विभ्यःसंपतद्भ्यस्ततस्ततः ॥ तीर्थशैलवनेभ्यश्चसमेतेभ्योदृढव्रतः २३ इतिपार्थोमहाबाहुर्दुरापंतपआस्थितः ॥ नतथादृष्टपूर्वोऽन्यःकश्चिदुग्रतपाइति २४ यथाधनंजयःपार्थस्तपस्वीनियतव्रतः ॥ मुनिरेकचरःश्रीमान्धर्मोविग्रहवानिव २५ तंश्रुत्वापांडवोराजंस्तप्यमानंमहावने ॥ अन्वशोचतकौंतेयःप्रियंवैभ्रातरंजयम् २६ दह्यमानेनतुहृदाशरणार्थीमहावने ॥ ब्राह्मणान्विविधज्ञानान्पर्यपृच्छद्युधिष्ठिरः २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनलोपाख्यानपर्व०बृहदश्वगमनेऊनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ समाप्तंचनलोपाख्यानपर्व ॥

परिहारमाहवेदेति वेदवेद्मि उपपद्यस्वगृहाण १९ । २० अश्वशिरोऽश्वविद्यायायाबृहदश्वइतिमुनेर्नाम उपस्प्रष्टुं स्नानादिकंकर्तुम् २१ । २२ । २३ । २४ । २५ जयंजयमाजमर्जुनम् २६ ॥ २७ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेऊनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ ७ ॥ ॥

भगवन्काम्यकात्पार्थेगतेमेप्रपितामहेइत्यादिरध्यायस्तीर्थयात्राप्रस्तावार्थः यज्ञदानाद्यसमर्थस्याहितीर्थयात्रैवावश्यकी यथोक्तं । 'द्वाविमौग्रसतेभूमिःसर्पो बिलशयानिव ॥ राजानं चाविरोद्धारं दरिद्रं चाप्रवासिनम्'इति तत्रापिबंधुवियोगः सर्वेषांदुःखदस्तेनचचित्तस्यानवस्थितत्वंभवतीत्यवांतरतात्पर्यम् १ । २ । ३ । ४ आक्षिप्तसूत्राश्छिन्नसूत्राः द्विजाःपक्षिणः ५ । ६

अथतीर्थयात्रापर्व ॥ जनमेजयउवाच ॥ भगवन्काम्यकात्पार्थेगतेमेप्रपितामहे ॥ पांडवाःकिमकुर्वंस्तेतमृतेसव्यसाचिनम् १ सहितेषांमहेष्वासोगतिरासीदनीकजित् ॥ आदित्यानांयथाविष्णुस्तथैवप्रतिभातिमे २ तेनेंद्रसमवीर्येणसंग्रामेष्वनिवर्तिना ॥ विनाभूतावनेवीराःकथमासन्पितामहाः ३ वैशंपायनउवाच ॥ गतेतुपांडवेतातकाम्यकात्सत्यविक्रमे ॥ बभूवुःपांडवेयास्तेदुःखशोकपरायणाः ४ आक्षिप्तसूत्रामणयश्छिन्नपक्षाइवद्विजाः ॥ अप्रीतमनसःसर्वेबभूवुरथपांडवाः ५ वनंतुतदभूत्तेनहीनमक्लिष्टकर्मणा ॥ कुबेरेणयथाहीनंवनंचैत्ररथंतथा ६ तमृतेतेनरव्याघ्राःपांडवाजनमेजय ॥ मुदमप्राप्नुवंतोवैकाम्यकेन्यवसंस्तदा ७ ब्राह्मणार्थेपराक्रांताःशुद्धैर्बाणैर्महारथाः ॥ निघ्नंतोभरतश्रेष्ठमेध्यान्बहुविधान्मृगान् ८ नित्यंहिपुरुषव्याघ्रावन्याहारमरिंदमाः ॥ उपाकृत्यउपाहृत्य ब्राह्मणेभ्योन्यवेदयन् ९ सर्वेसंन्यवसंस्तत्रसोत्कंठाःपुरुषर्षभाः ॥ अहृष्टमनसःसर्वेगतेराजन्धनंजये १० विशेषतस्तुपांचालीस्मरंतीमध्यमंपतिम् ॥ उद्विग्नंपांडवश्रेष्ठमिदंवचनमब्रवीत् ११ योर्जुनेनार्जुनस्तुल्योद्विबाहुर्बहुबाहुना ॥ तमृतेपांडवश्रेष्ठवनंनप्रतिभातिमे १२ शून्यामिवप्रपश्यामितत्रतत्रमहीमिमाम् ॥ बह्वाश्चर्यमिदंचापिवनंकुसुमितद्रुमम् १३ नतथारमणीयंवैतमृतेसव्यसाचिनम् ॥ नीलांबुदसमप्रख्यंमत्तमातंगगामिनम् १४ तमृतेपुंडरीकाक्षंकाम्यकंनातिभातिमे ॥ यस्यवाधनुषोघोषःश्रूयतेचाशनिस्वनः ॥ नलभेशर्मवैराजन्स्मरंतीसव्यसाचिनम् १५ तथालालप्यमानांतांनिशम्यपरवीरहा ॥ भीमसेनोमहाराजद्रौपदीमिदमब्रवीत् १६ भीमउवाच ॥ मनःप्रीतिकरंभद्रेयद्ब्रवीषिसुमध्यमे ॥ तन्मेप्रीणातिहृदयममृतप्राशनोपमम् १७ यस्यदीर्घौसमौपीनौभुजौपरिघसन्निभौ ॥ मौर्वीकृतकिणौवृत्तौखड्गायुधधनुर्धरौ १८ निष्कांगदकृतापीडौपंचशीर्षाविवोरगौ ॥ तमृतेपुरुषव्याघ्रंनष्टसूर्यमिवांबरम् १९ यमाश्रित्यमहाबाहुंपंचालाःकुरवस्तथा ॥ सुराणामपियत्तानांपृतनासुनबिभ्यति २० यस्यबाहूसमाश्रित्यवयंसर्वेमहात्मनः ॥ मन्यामहेजितानाजौपरान्प्राप्तांचमेदिनीम् २१ तमृतेफाल्गुनंवीरंनलभेकाम्यकेधृतिम् ॥ पश्यामिचदिशःसर्वास्तिमिरेणावृताइव २२ ततोऽब्रवीत्साश्रुकंठोनकुलःपांडुनंदनः ॥ नकुलउवाच ॥ यस्मिंदिव्यानिकर्माणिकथयंतिरणाजिरे ॥ देवाअपियुधांश्रेष्ठंतमृतेकारतिर्वने २३ उदीचींयोदिशंगत्वाजित्वायुधिमहाबलान् ॥ गंधर्वमुख्यान्शतशोहयाँल्लेभेमहाद्युतिः २४

मेध्यान् यज्ञार्हान् ८ उपाकृत्यहिंसित्वा उपाहृत्ययज्ञार्थंसमाहृत्य ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ मौर्वीकृतकिणौ किणंआघातचिह्नं १८ निष्कांगदकृतापीडौ साष्टशतंसुवर्णां निष्कस्तत्कृतेनांगदेन कृतभूषणौ १९ । २० । २१ । २२ । २३ । २४

२५ । २६ । २७ । २८ वृसीमासनं २९ । ३० इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपे अशीतितमोऽध्यायः ॥ ८० ॥ ॥ धनंजयेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १०

राज्ञेतितिरिकल्माषान्श्रीमतोऽनिलरंहसः ॥ प्रादाद्भ्रात्रेप्रियःप्रेम्णाराजसूयेमहाक्रतौ २५ तमृतेभीमधन्वानंभीमादवरजंवने ॥ कामयेकाम्यकेवासंनेदानीम
मरोपमम् २६ ॥ सहदेवउवाच ॥ योधनानिचकन्याश्चयुधिजित्वामहारथः ॥ आजहारपुराराज्ञेराजसूयेमहाक्रतौ २७ यःसमेतान्मृधेजित्वायादवानमितद्यु
तिः ॥ सुभद्रामाजहारैकोवासुदेवस्यसंमते २८ तस्यजिष्णोर्बृसींदृष्ट्वाशून्यामिवनिवेशने ॥ हृदयंमेमहाराजनशाम्यतिकदाचन २९ वनादस्माद्विवासंतुरोच
येऽहमरिंदम ॥ नहिनस्तमृतेवीररमणीयमिदंवनम् ३० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप० अर्जुनानुशोचनेअशीतितमोऽध्यायः ॥ ८० ॥
॥ वैशंपायनउवाच ॥ धनंजयोत्सुकानांतुभ्रातॄणांकृष्णयासह ॥ श्रुत्वावाक्यानिविमनाधर्मराजोऽप्यजायत १ अथापश्यन्महात्मानंदेवर्षिंतत्रनारदम् ॥ दी
प्यमानंश्रियाब्राह्म्याद्दुतार्चिषमिवानलम् २ तमागतमभिप्रेक्ष्यभ्रातृभिःसहधर्मराट् ॥ प्रत्युत्थाययथान्यायंपूजांचक्रेमहात्मने ३ सतैःपरिवृतःश्रीमान्भ्रातृ
भिःकुरुसत्तमः ॥ विबभावतिदीप्तौजादेवैरिवशतक्रतुः ४ यथाचवेदान्सावित्रीयाज्ञसेनीतथापतीन् ॥ नजहौधर्मतःपार्थान्मेरुमर्कप्रभायथा ५ प्रतिगृह्यचतां
पूजांनारदोभगवानृषिः ॥ आश्वासयद्धर्मसुतंयुक्तरूपमिवानघ ६ उवाचचमहात्मानंधर्मराजंयुधिष्ठिरम् ॥ ब्रूहिधर्मभृतांश्रेष्ठकेनार्थःकिंददानिते ७ अथधर्म
सुतोराजाप्रणम्यभ्रातृभिःसह ॥ उवाचप्रांजलिर्भूत्वानारदंदेवसंमितम् ८ त्वयितुष्टेमहाभागसर्वलोकाभिपूजिते ॥ कृतमित्येवमन्येऽहंप्रसादात्तवसुव्रत ९ य
दित्वहमनुग्राह्योभ्रातृभिःसहितोऽनघ ॥ संदेहंमेमुनिश्रेष्ठतत्त्वतश्छेत्तुमर्हसि १० प्रदक्षिणांयःकुरुतेपृथिवींतीर्थतत्परः ॥ किंफलंतस्यकार्त्स्न्येनतद्भवान्वक्तु
मर्हति ११ ॥ नारदउवाच ॥ शृणुराजन्नवहितोयथाभीष्मेणधीमता ॥ पुलस्त्यस्यसकाशाद्वैसर्वमेतदुपश्रुतम् १२ पुराभागीरथीतीरेभीष्मोधर्मभृतांवरः ॥
पित्र्यंव्रतंसमास्थायन्यवसन्मुनिभिःसह १३ शुभेदेशेतथाराजन्पुण्येदेवर्षिसेविते ॥ गंगाद्वारेमहाभागदेवगंधर्वसेविते १४ सपितॄंस्तर्पयामासदेवांश्चपरमद्यु
तिः ॥ ऋषींश्चतर्पयामासविधिदृष्टेनकर्मणा १५ कस्यचित्त्वथकालस्यजपन्नेवमहायशाः ॥ ददर्शाद्भुतसंकाशंपुलस्त्यमृषिसत्तमम् १६ सतंदृष्ट्वोग्रतपसंदीप्य
मानमिवश्रिया ॥ प्रहर्षमतुलंलेभेविस्मयंपरमंययौ १७ उपस्थितंमहाभागंपूजयामासभारत ॥ भीष्मोधर्मभृतांश्रेष्ठोविधिदृष्टेनकर्मणा १८ शिरसाचार्घमादा
यशुचिःप्रयतमानसः ॥ नामसंकीर्तयामासतस्मिन्ब्रह्मर्षिसत्तमे १९ भीष्मोऽहमस्मिभद्रंतेदासोऽस्मितवसुव्रत ॥ तवसंदर्शनादेवमुक्तोऽहंसर्वकिल्बिषैः २०
एवमुक्त्वामहाराजभीष्मोधर्मभृतांवरः ॥ वाग्यतःप्रांजलिर्भूत्वातूष्णीमासीद्युधिष्ठिर २१ ॥९७॥

११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१

२२ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकाशीतितमोऽध्यायः ॥ ८१ ॥ अनेनेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ यस्यहस्तौचेति । दुष्प्रतिग्रहपरपीडादिभ्योनिवृत्तिर्हस्तसंयमः । दृष्टिपूतेदेशेपादन्यासः पादसंयमः । परानिष्टचिंतनाभावोमनःसंयमः । विद्यासंयमोऽभिचाररहित्यं । तपःसंयमोदंभराहित्यं । कीर्तिसंयमः पापकीर्तिराहित्यं ९ अस्त्येव

तंदृष्ट्वानियमेनाथस्वाध्यायाम्नायकर्शितम् ॥ भीष्मंकुरुकुलश्रेष्ठंमुनिःप्रीतमनाभवत् २२ ॥ ॥ इतिश्रीम०आ०तीर्थयात्राप०पार्थनारदसंवादेएकाशीतित
मोऽध्यायः ८१ ॥ ॥ पुलस्त्यउवाच ॥ अनेनतवधर्मज्ञप्रश्रयेणदमेनच ॥ सत्येनचमहाभागतुष्टोऽस्मितवसुव्रत १ यस्येदृशस्तेधर्मोऽयंपितृभक्त्याऽऽ
श्रितोऽनघ ॥ तेनपश्यसिमांपुत्रप्रीतिश्चपरमात्वयि २ अमोघदर्शीभीष्माहंब्रूहिकिंकरवाणिते ॥ यद्वक्ष्यसिकुरुश्रेष्ठतस्यदाताऽस्मितेऽनघ ३ ॥भीष्मउवाच॥
प्रीतेत्वयिमहाभागसर्वलोकाभिपूजिते ॥ कृतमेतावतामन्येयदहंदृष्टवान्प्रभुम् ४ यदित्वहमनुग्राह्यस्तवधर्मभृतांवर ॥ संदेहंतेप्रवक्ष्यामितन्मेत्वंछेत्तुमर्हसि ५ अ
स्तिमेहृदयेकश्चित्तीर्थेभ्योधर्मसंशयः ॥ तमहंश्रोतुमिच्छामितद्भवान्वक्तुमर्हति ६ प्रदक्षिणांयःपृथिवींकरोत्यमरसन्निभ ॥ किंफलंतस्यविप्रर्षेतन्मेब्रूहितपोनिधे
तम् ७ ॥ पुलस्त्यउवाच ॥ हंततेकथयिष्यामियदृषीणांपरायणम् ॥ तदेकाग्रमनाःपुत्रशृणुतीर्थेषुयत्फलम् ८ यस्यहस्तौचपादौचमनश्चैवसुसंयतम् ॥ विद्यातप
श्चकीर्तिश्चसतीर्थफलमश्नुते ९ प्रतिग्रहादपावृत्तःसंतुष्टोयेनकेनचित् ॥ अहंकारनिवृत्तश्चसतीर्थफलमश्नुते १० अकल्ककोनिरारंभोलघ्वाहारोजितेंद्रियः ॥
विमुक्तःसर्वपापेभ्यःसतीर्थफलमश्नुते ११ अक्रोधनश्चराजेंद्रसत्यशीलोदृढव्रतः ॥ आत्मोपमश्चभूतेषुसतीर्थफलमश्नुते १२ ऋषिभिःक्रतवःप्रोक्तावेदेष्विह
यथाक्रमम् ॥ फलंचैवयथातथ्यंप्रेत्यचेहचसर्वशः १३ नतेशक्यादरिद्रेणयज्ञाःप्राप्तुंमहीपते ॥ बहूपकरणायज्ञानानासंभारविस्तराः १४ प्राप्यंतेपार्थिवैरेतैः
समृद्धैर्वानरैःक्वचित् ॥ नार्थन्यूनैर्नावगणैरेकात्मभिरसाधनैः १५ योदरिद्रैरपिविधिःशक्यःप्राप्तुंनरेश्वर ॥ तुल्योयज्ञफलैःपुण्यैस्तंनिबोधयुधांवर १६ ऋषी
णांपरमंगुह्यमिदंभरतसत्तम ॥ तीर्थाभिगमनंपुण्यंयज्ञैरपिविशिष्यते १७ अनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच ॥ अदत्त्वाकांचनंगाश्चदरिद्रोनामजायते
१८ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः ॥ नतत्फलमवाप्नोतितीर्थाभिगमनेनयत् १९ नृलोकेदेवदेवस्यतीर्थंत्रैलोक्यविश्रुतम् ॥ पुष्करंनामविख्यातंमहाभागः
समाविशेत् २० दशकोटिसहस्राणितीर्थानांवैमहामते ॥ सान्निध्यंपुष्करेयेषांत्रिसंध्यंकुरुनंदन २१ आदित्यावसवोरुद्राःसाध्याश्चसमरुद्गणाः ॥ गंधर्वाप्सरस
श्चैवनित्यंसन्निहिताविभो २२ यत्रदेवास्तपस्तप्त्वादैत्याब्रह्मर्षयस्तथा ॥ दिव्ययोगामहाराजपुण्येनमहताऽन्विताः २३ मनसाऽप्यभिकामस्यपुष्कराणिमन
स्विनः ॥ पूयंतेसर्वपापानिनाकपृष्ठेचपूज्यते २४ तस्मिंस्तीर्थेमहाराजनित्यमेवपितामहः ॥ उवासपरमप्रीतोभगवान्कमलासनः २५

श्लोकस्यव्याख्यानं प्रतिग्रहादित्रितयं अपावृत्तोनिवृत्तः संतोषोऽलंबुद्धिः १० अकल्ककःदंभादिहीनः । 'कल्कःशाठ्येचदंभेच'इतिविश्वः ११ आत्मोपमोदयावान् १२ । १३ । १४ अवगणैरसहायैर्नीचसहायैर्वा एकात्मभिरसहायैः असाधनैः पत्न्यादिरहितैः १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५

२६ । २७ । २८ । २९ । ३० । ३१ । ३२ उपस्पृष्टंस्नातंभवेत् ३३ । ३४ उद्वावासंकृत्वा ३५ ऋतून्सर्वान्प्राप्नोतिसंवत्सरात्मकप्रजापतिसायुज्यंप्राप्नोतीत्यर्थः । ऋतुर्भूत्वासंवत्सरमप्येति 'संवत्सरःप्रजापतिः प्रजापतिर्वावैष'इतिश्रुतेः । ऋतूनित्यपिपाठः ३६।३७ अत्रपुष्करस्तुतिप्रस्तावेविषमश्लोकव्याख्यायां । 'त्रीणिशृंगाणिशुभ्राणि त्रीणिप्रस्रवणानि चपुष्कराण्यादिसिद्धानि नविद्मस्तत्रकारणम्' इतिश्लोकःपठितोऽव्याख्यातश्च इदानींमंदबुद्धिभिर्दुर्व्याख्येयतया परित्यक्तइति नपुस्तकांतरेषुदृश्यते । अत्रप्राचांव्याख्या'श्रयतेः शृणातेर्वाशृंगाणि मुमुक्षुभिराश्रयणीयानि पापहिंसकानिवा शुभ्राणिभ्राजिष्णूनि त्रीणिपुष्कराणि तेषांमध्येसरस्वतीप्रस्रवतीति तान्येवत्रीणिप्रस्रवणानि आदिसिद्धानितीर्थांतरवदुत्पत्तिरहितानि अतएवतत्रतीर्थत्वापादकं

पुष्करेषुमहाभागदेवाःसर्षिगणाःपुरा ॥ सिद्धिंसमभिसंप्राप्ताःपुण्येनमहताऽन्विताः २६ तत्राभिषेकंयःकुर्यात्पितृदेवार्चनेरतः ॥ अश्वमेधाद्दशगुणंफलंप्राहुर्मनीषिणः २७ अप्येकंभोजयेद्विप्रंपुष्करारण्यमाश्रितः ॥ तेनासौकर्मणाभीष्मप्रेत्यचेहचमोदते २८ शाकैर्मूलैःफलैर्वाऽपियेनवर्तयतेस्वयम् ॥ तद्वैदद्याद्ब्राह्मणायश्रद्धावाननसूयकः २९ तेनैवप्राप्नुयात्प्राज्ञोहयमेधफलंनरः ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्रावाराजसत्तम ३० नवैयोनौप्रजायंतेस्नातास्तीर्थेमहात्मनः ॥ कार्त्तिकींतुविशेषेणयोऽभिगच्छतिपुष्करम् ३१ प्राप्नुयात्सनरोलोकान्ब्रह्मणःसदनेऽक्षयान् ॥ सायंप्रातःस्मरेद्यस्तुपुष्कराणिकृतांजलिः ३२ उपस्पृष्टंभवेत्तेनसर्वतीर्थेषुभारत ॥ जन्मप्रभृतियत्पापंस्त्रियावापुरुषेणवा ३३ पुष्करेस्नातमात्रस्यसर्वमेवप्रणश्यति ॥ यथासुराणांसर्वेषामादिस्तुमधुसूदनः ३४ तथैवपुष्करंराजंस्तीर्थानामादिरुच्यते ॥ उष्यद्वादशवर्षाणिपुष्करेनियतःशुचिः ३५ ऋतून्सर्वानवाप्नोतिब्रह्मलोकंसगच्छति ॥ यस्तुवर्षशतंपूर्णमग्निहोत्रमुपासते ३६ कार्त्तिकींवावसेदेकांपुष्करेसममेवतत् ३७ त्रीणिशृंगाणिशुभ्राणित्रीणिप्रस्रवणानिच ॥ पुष्कराण्यादिसिद्धानिनविद्मस्तत्रकारणम् ३८ दुष्करंपुष्करेगंतुंदुष्करंपुष्करेतपः ॥ दुष्करंपुष्करेदानंवस्तुंचैवसुदुष्करम् ३९ उष्यद्वादशरात्रंतुनियतोनियताशनः ॥ प्रदक्षिणमुपावृत्त्यजंबूमार्गंसमाविशेत् ४० जंबूमार्गंसमाविश्यदेवर्षिपितृसेवितम् ॥ अश्वमेधमवाप्नोतिसर्वकामसमन्वितः ४१ तत्रोष्यरजनीःपंचपूतात्माजायतेनरः ॥ नदुर्गतिमवाप्नोतिसिद्धिंप्राप्नोतिचोत्तमाम् ४२ जंबूमार्गादुपावृत्त्यगच्छेत्तंदुलिकाश्रमम् ॥ नदुर्गतिमवाप्नोतिब्रह्मलोकंचगच्छति ४३ आगस्त्यंसरआसाद्यपितृदेवार्चनेरतः ॥ त्रिरात्रोपोषितोराजन्नग्निष्टोमफलंलभेत् ४४ शाकवृत्तिःफलैर्वाऽपिकौमारंविंदतेपरम् ॥ कण्वाश्रमंततोगच्छेच्छ्रीजुष्टंलोकपूजितम् ४५ धर्मारण्यंहितत्पुण्यमाद्यंचभरतर्षभ ॥ यत्रप्रविष्टमात्रोवैसर्वपापैःप्रमुच्यते ४६ अर्चयित्वापितॄन्देवान्नियतोनियताशनः ॥ सर्वकामसमृद्धस्ययज्ञस्यफलमश्नुते ४७

कारणंनविद्मइति । वस्तुतस्तु'वेदारण्यं पंचनदंगौरीमायूरमार्जुनं । श्रीवांछंकुंभकोणंचकाशीक्षेत्रसमानि षट्'इत्यादिवद्दिहकाशीसाम्येन पुष्करंस्तूयते । तथाचायमर्थः पुराणांतरेषुवाराणस्यास्त्रिकोणत्वस्मरणात्त्रयः कोणाएवत्रीणिशृंगाणि शुभ्राणि रजस्तमोमलहीनत्वेन शुद्धसत्त्वमयानिज्ञानप्रदत्वात् । तथाचश्रुतिरविमुक्तं प्रकृत्याहअत्रहिजंतोः प्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टे येनासावमृतीभूत्वामोक्षीभवतीति । त्रीणिप्रस्रवणानि त्रयःप्रवाहाअसीवरणयोर्गंगायाश्च अथवानेनत्रिवेण्येवग्राह्या तथा त्रीणिपुष्कराण्येतानि त्रीणिकाशीप्रयागपुष्कराण्यादिसिद्धानीत्यादि प्राग्वत् । तेनकाश्या काशीप्रयागाभ्यां वा समानमिदंपुष्करं त्रित्वसाम्यादितिपुष्करस्तुतिःकृताभवति ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ ॥६८॥

प्रदक्षिणंततःकृत्वाययातिपतनंव्रजेत् ॥ हयमेधस्ययज्ञस्यफलंप्राप्नोतितत्रवै ४८ महाकालंततोगच्छेन्नियतोनियताशनः ॥ कोटितीर्थमुपस्पृश्यहयमेधफलंलभेत् ४९ ततोगच्छेतधर्मज्ञःस्थाणोस्तीर्थमुमापतेः ॥ नाम्नाभद्रवटंनामत्रिषुलोकेषुविश्रुतम् ५० तत्राभिगम्यचेशानंगोसहस्रफलंलभेत् ॥ महादेवप्रसादाच्चगाणपत्यंचविंदति ५१ समृद्धमसपत्नंचश्रियायुक्तंनरोत्तमः ॥ नर्मदांसमासाद्यनदींत्रैलोक्यविश्रुताम् ५२ तर्पयित्वापितॄन्देवानग्निष्टोमफलंलभेत् ॥ दक्षिणंसिंधुमासाद्यब्रह्मचारीजितेंद्रियः ५३ अग्निष्टोममवाप्नोतिविमानंचाधिरोहति ॥ चर्मण्वतींसमासाद्यनियतोनियताशनः ॥ रंतिदेवाभ्यनुज्ञातमग्निष्टोमफलंलभेत् ५४ ततोगच्छेतधर्मज्ञहिमवत्सुतमर्बुदम् ॥ पृथिव्यांयत्रवैछिद्रंपूर्वमासीद्युधिष्ठिर ५५ तत्राश्रमोवसिष्ठस्यत्रिषुलोकेषुविश्रुतः ॥ तत्रोष्यरजनीमेकांगोसहस्रफलंलभेत् ५६ पिंगतीर्थमुपस्पृश्यब्रह्मचारीजितेंद्रियः ॥ कपिलानांनरश्रेष्ठशतस्यफलमश्नुते ५७ ततोगच्छेतराजेंद्रप्रभासंतीर्थमुत्तमम् ॥ तत्रसंनिहितोनित्यंस्वयमेवहुताशनः ५८ देवतानांमुखंवीरज्वलनोऽनिलसारथिः ॥ तस्मिंस्तीर्थेनरःस्नात्वाशुचिःप्रयतमानसः ५९ अग्निष्टोमातिरात्राभ्यांफलंप्राप्नोतिमानवः ॥ ततोगत्वासरस्वत्याःसागरस्यचसंगमे ६० गोसहस्रफलंतस्यस्वर्गलोकंचविंदति ॥ प्रभयादीप्यतेनित्यमग्निवद्भरतर्षभ ६१ तीर्थेसलिलराजस्यस्नात्वाप्रयतमानसः ॥ त्रिरात्रमुषितःस्नातस्तर्पयेत्पितृदेवताः ६२ प्रभासतेयथासोमःसोऽश्वमेधंचविंदति ॥ वरदानंततोगच्छेत्तीर्थंभरतसत्तम ६३ विष्णोर्दुर्वाससायत्रवरोदत्तोयुधिष्ठिर ॥ वरदानेनरःस्नात्वागोसहस्रफलंलभेत् ६४ ततोद्वारवतींगच्छेन्नियतोनियताशनः ॥ पिंडारकेनरःस्नात्वालभेद्बहुसुवर्णकम् ६५ तस्मिंस्तीर्थेमहाभागपद्मलक्षणलक्षिताः ॥ अद्यापिमुद्रादृश्यंतेतदद्भुतमरिंदम ६६ त्रिशूलांकानिपद्मानिदृश्यंतेकुरुनंदन ॥ महादेवस्यसान्निध्यंतत्रवैपुरुषर्षभ ६७ सागरस्यचसिंधोश्चसंगमंप्राप्यभारत ॥ तीर्थेसलिलराजस्यस्नात्वाप्रयतमानसः ६८ तर्पयित्वापितॄन्देवानृषींश्चभरतर्षभ ॥ प्राप्नोतिवारुणंलोकंदीप्यमानंस्वतेजसा ६९ शंकुकर्णेश्वरंदेवमर्चयित्वायुधिष्ठिर ॥ अश्वमेधाद्दशगुणंप्रवदंतिमनीषिणः ७० प्रदक्षिणमुपावृत्त्यगच्छेतभरतर्षभ ॥ तीर्थंकुरुवरश्रेष्ठत्रिषुलोकेषुविश्रुतम् ७१ दमीतिनाम्नाविख्यातंसर्वपापप्रणाशनम् ॥ तत्रब्रह्मादयोदेवाउपासंतेमहेश्वरम् ७२ तत्रस्नात्वाचपीत्वाचरुद्रंदेवगणैर्वृतम् ॥ जन्मप्रभृतियत्पापंतत्स्नातस्यप्रणश्यति ७३ दमीचात्रनरश्रेष्ठसर्वदेवैरभिष्टुतः ॥ तत्रस्नात्वानरव्याघ्रहयमेधमवाप्नुयात् ७४ गत्वायत्रमहाप्राज्ञविष्णुनाप्रभविष्णुना ॥ पुराशौचंकृतंराजन्हत्वादैतेयदानवान् ७५ ततोगच्छेतधर्मज्ञवसोर्धारामभिष्टुताम् ॥ गमनादेवतस्यांहिहयमेधफलंलभेत् ७६ स्नात्वाकुरुवरश्रेष्ठप्रयतात्मासमाहितः ॥ तर्प्यदेवान्पितॄंश्चैवविष्णुलोकेमहीयते ७७ तीर्थेचात्रसरःपुण्यंवसूनांभरतर्षभ ॥ तत्रस्नात्वाचपीत्वाचवसूनांसंमतोभवेत् ७८

४८ । ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८

सिंधूत्तममितिख्यातंसर्वपापप्रणाशनम् ॥ तत्रस्नात्वानरश्रेष्ठलभेद्वहुसुवर्णकम् ७९ भद्रतुंगंसमासाद्यशुचिःशीलसमन्वितः ॥ ब्रह्मलोकमवाप्नोतिगतिंचपरमां
व्रजेत् ८० कुमारिकाणांशक्रस्यतीर्थंसिद्धनिषेवितम् ॥ तत्रस्नात्वानरःक्षिप्रंस्वर्गलोकमवाप्नुयात् ८१ रेणुकायाश्चतत्रैवतीर्थंसिद्धनिषेवितम् ॥ तत्रस्नात्वाभवे
द्विप्रोनिर्मलश्चंद्रमायथा ८२ अथपंचनदंगत्वानियतोनियताशनः ॥ पंचयज्ञानवाप्नोतिक्रमशोयेऽनुकीर्तिताः ८३ ततोगच्छेतराजेंद्रभीमायाःस्थानमुत्तमम् ॥
तत्रस्नात्वातुयोन्यांवैनरोभरतसत्तम ८४ देव्याःपुत्रोभवेद्राजंस्तप्तकुंडलविग्रहः ॥ गवांशतसहस्रस्यफलंप्राप्नोतिमानवः ८५ श्रीकुंडंतुसमासाद्यत्रिषुलोकेषुवि
श्रुतम् ॥ पितामहंनमस्कृत्यगोसहस्रफलंलभेत् ८६ ततोगच्छेतधर्मज्ञविमलंतीर्थमुत्तमम् ॥ अद्यापियत्रदृश्यंतेमत्स्याःसौवर्णराजताः ८७ तत्रस्नात्वानरः
क्षिप्रंवासवंलोकमाप्नुयात् ॥ सर्वपापविशुद्धात्मागच्छेतपरमांगतिम् ८८ वितस्तांचसमासाद्य संतर्प्यपितृदेवताः ॥ नरःफलमवाप्नोतिवाजपेयस्यभारत ८९
काश्मीरेष्वेवनागस्यभवनंतक्षकस्यच ॥ वितस्ताख्यमितिख्यातंसर्वपापप्रमोचनम् ९० तत्रस्नात्वानरोनूनंवाजपेयमवाप्नुयात् ॥ सर्वपापविशुद्धात्मागच्छेच्च
परमांगतिम् ९१ ततोगच्छेतवडवांत्रिषुलोकेषुविश्रुतां ॥ पश्चिमायांतुसंध्यायामुपस्पृश्ययथाविधि ॥ चरुंसप्तार्चिषेराजन्यथाशक्तिनिवेदयेत् ॥ पितॄणा
मक्षयंदानंप्रवदंतिमनीषिणः ९३ ऋषयःपितरोदेवागंधर्वाप्सरसांगणाः ॥ गुह्यकाःकिन्नरायक्षाःसिद्धाविद्याधरानराः ९४ राक्षसादितिजारुद्राब्रह्माचमनुजाधि
प ॥ नियतःपरमांदीक्षामास्थायाब्दसहस्रिकीम् ९५ विष्णोःप्रसादनंकुर्वंश्चरुंचश्रपयंस्तथा ॥ सप्तभिःसप्तभिश्चैवऋग्भिस्तुष्टावकेशवम् ९६ ददावष्टगुणैश्वर्यंते
षांतुष्टस्तुकेशवः ॥ यथाभिलषितानन्यान्कामान्दत्वामहीपते ९७ तत्रैवांतर्दधेदेवोविद्युदभ्रेषुवैयथा ॥ नाम्नासप्तचरुंतेनख्यातंलोकेषुभारत ९८ गवांशतसह
स्रेणराजसूयशतेनच ॥ अश्वमेधसहस्रेणश्रेयान्सप्तार्चिषेचरुः ९९ ततोनिवृत्तोराजेंद्ररुद्रंपदमथाविशेत् ॥ अर्चयित्वामहादेवमश्वमेधफलंलभेत् १०० मणिमं
तंसमासाद्यब्रह्मचारीसमाहितः ॥ एकरात्रोषितोराजन्नग्निष्टोमफलंलभेत् १०१ अथगच्छेतराजेंद्रदेविकांलोकविश्रुताम् ॥ प्रसूतिर्यत्रविप्राणांश्रूयतेभरतर्षभ
२ त्रिशूलपाणेःस्थानंचत्रिषुलोकेषुविश्रुतम् ॥ देविकायांनरःस्नात्वासमभ्यर्च्यमहेश्वरम् ३ यथाशक्तिचरुंतत्रनिवेद्यभरतर्षभः ॥ सर्वकामसमृद्धस्ययज्ञस्यलभ
तेफलम् ४ कामाख्यंतत्ररुद्रस्यतीर्थंदेवनिषेवितम् ॥ तत्रस्नात्वानरःक्षिप्रंसिद्धिंप्राप्नोतिभारत ५ यजनंयाजनंचैवतथैवब्रह्मवालुकम् ॥ पुष्पांभश्चउपस्पृ
श्यनशोचेन्मरणंगतः ६ अर्धयोजनविस्तारापंचयोजनमायता ॥ एतावतीदेविकातुपुण्यादेवर्षिसेविता ७ ततोगच्छेतधर्मज्ञदीर्घसत्रंयथाक्रमम् ॥ त
त्रब्रह्मादयोदेवाःसिद्धाश्चपरमर्षयः १०८

७९ । ८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ । ८९ । ९० । ९१ । ९२ । ९३ । ९४ । ९५ । ९६ । ९७ । ९८ । ९९ । १०० । १०१ । २ । ३ । ४ । ५ । ६ । ७ । १०८

९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेद्व्यशी

दीर्घसत्रमुपासंतेदीक्षितानियतव्रताः १०९ गमनादेवराजेंद्रदीर्घसत्रमरिंदम ॥ राजसूयाश्वमेधाभ्यांफलंप्राप्नोतिभारत १० ततोविनशनंगच्छेन्नियतोनियता
शनः ॥ गच्छत्यंतर्हितायत्रमेरुपृष्ठेसरस्वती ११ चमसेऽथशिवोद्भेदेनागोद्भेदेचदृश्यते ॥ स्नात्वातुचमसोद्भेदेअग्निष्टोमफलंलभेत् १२ शिवोद्भेदेनरःस्नात्वा
गोसहस्रफलंलभेत् ॥ नागोद्भेदेनरःस्नात्वानागलोकमवाप्नुयात् १३ शशयानंचराजेंद्रतीर्थमासाद्यदुर्लभम् ॥ शशरूपप्रतिच्छन्नाःपुष्करायत्रभारत १४ सर
स्वत्यांमहाराजअनुसंवत्सरंचते ॥ दृश्यंतेभरतश्रेष्ठवृत्तांवैकार्तिकींसदा १५ तत्रस्नात्वानरव्याघ्रद्योततेशशिवत्सदा ॥ गोसहस्रफलंचैवप्राप्नुयाद्भरतर्षभ १६
कुमारकोटीमासाद्यनियतःकुरुनंदन ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः १७ गवामयुतमाप्नोतिकुलंचैवसमुद्धरेत् ॥ ततोगच्छेतधर्मज्ञरुद्रकोटिंसमाहितः
१८ पुरायत्रमहाराजमुनिकोटिःसमागता ॥ हर्षेणमहताऽऽविष्टारुद्रदर्शनकांक्षया १९ अहंपूर्वमहंपूर्वंद्रक्ष्यामिवृषभध्वजम् ॥ एवंसंप्रस्थिताराजन्नृषयःकिल
भारत २० ततोयोगीश्वरेणापियोगमास्थायभूपते ॥ तेषांमन्युप्रणाशार्थमृषीणांभावितात्मनाम् २१ सृष्टाकोटीतिरुद्राणामृषीणामग्रतःस्थिता ॥ मयापूर्व
तरंदृष्टइतितेमेनिरेपृथक् २२ तेषांतुष्टोमहादेवोमुनीनांभावितात्मनां ॥ भक्त्यापरमयाराजन्वरंतेषांप्रदिष्टवान् २३ अद्यप्रभृतियुष्माकंधर्मवृद्धिर्भविष्यति ॥
तत्रस्नात्वानरव्याघ्ररुद्रकोट्यांनरःशुचिः २४ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ ततोगच्छेतराजेंद्रसंगमंलोकविश्रुतम् २५ सरस्वत्यामहापुण्यंकेशवं
समुपासते ॥ यत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः २६ अभिगच्छंतिराजेंद्रचैत्रशुक्लचतुर्दशीम् ॥ तत्रस्नात्वानरव्याघ्रविंदेद्बहुसुवर्णकम् ॥ सर्वपापविशुद्धात्मा
ब्रह्मलोकंचगच्छति २७ ऋषीणांयत्रसत्राणिसमाप्तानिनराधिप ॥ तत्रावसानमासाद्यगोसहस्रफलंलभेत् १२८ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थ
यात्रापर्वणिपुलस्त्यतीर्थयात्रायांद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ पुलस्त्यउवाच ॥ ततोगच्छेतराजेंद्रकुरुक्षेत्रमभिष्टुतम् ॥ पापेभ्योयत्रमुच्यंतेदर्शनात्सर्व
जंतवः १ कुरुक्षेत्रंगमिष्यामिकुरुक्षेत्रेवसाम्यहम् ॥ यएवंसततंब्रूयात्सर्वपापैःप्रमुच्यते २ पांसवोऽपिकुरुक्षेत्रेवायुनासमुदीरिताः ॥ अपिदुष्कृतकर्माणंनयं
तिपरमांगतिम् ३ दक्षिणेनसरस्वत्यादृषद्वत्युत्तरेणच ॥ येवसंतिकुरुक्षेत्रेतेवसंतित्रिविष्टपे ४ तत्रमासंवसेद्धीरःसरस्वत्यांयुधिष्ठिर ॥ यत्रब्रह्मादयोदेवाऋषयः
सिद्धचारणाः ५ गंधर्वाप्सरसोयक्षाःपन्नगाश्चमहीपते ॥ ब्रह्मक्षेत्रंमहापुण्यमभिगच्छंतिभारत ६

तितमोऽध्यायः ८२ ॥ ॥ तत इति १ । २ । ३ । ४ । ५ ततोगच्छेतराजेंद्रकुरुक्षेत्रमिति कुरुक्षेत्रप्रस्तावेबृहस्पतिरुवाचयाज्ञवल्क्यं 'यदनुकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनं'
इति । जाबालोपनिषत्सुप्रसिद्धमनुकुरुक्षेत्रंस्तौति ब्रह्मक्षेत्रमिति ६

कुत्सितंरातीतिकुरु पापं तस्यक्षेपणात्त्रायतइतिकुरुक्षेत्रं पापनिवर्तकं ब्रह्मोपलब्धिस्थानत्वाद्ब्रह्मसदनमिति श्रौतपदद्वयार्थं संगृह्णात्यर्धेन पापानिचप्रणश्यंतिब्रह्मलोकंचगच्छाति ब्रह्मैवलो
कस्तं ब्रह्मविद्भूत्वाब्रह्मैवभवतीत्यर्थः ७ श्रौतस्यदेवयजनपदस्यार्थं संगृण्हातिराजसूयेति ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२

॥७०॥ मनसाऽप्यभिकामस्यकुरुक्षेत्रंयुधिष्ठिर ॥ पापानिविप्रणश्यंतिब्रह्मलोकंचगच्छाति ७ गत्वाहिश्रद्धयायुक्तःकुरुक्षेत्रंकुरूद्वह ॥ फलंप्राप्नोतिचतदाराजसूयाश्व
मेधयोः ८ ततोमचक्रुकंनामद्वारपालंमहाबलम् ॥ यक्षंसमभिवाद्यैवगोसहस्रफलंलभेत् ९ ततोगच्छेतधर्मज्ञविष्णोःस्थानमनुत्तमम् ॥ सततंनामराजेंद्रयत्र
सन्निहितोहरिः १० तत्रस्नात्वाचनत्वाचत्रिलोकप्रभवंहरिम् ॥ अश्वमेधमवाप्नोतिविष्णुलोकंचगच्छाति ११ ततःपारिप्लवंगच्छेत्तीर्थंत्रैलोक्यविश्रुतम् ॥ अ ॥८३॥
ग्निष्टोमातिरात्राभ्यांफलंप्राप्नोतिभारत १२ पृथिवीतीर्थमासाद्यगोसहस्रफलंलभेत् ॥ ततःशालूकिनींगत्वातीर्थसेवीनराधिप १३ दशाश्वमेधेस्नात्वाचतदेव
फलमाप्नुयात् ॥ सर्पदर्वींसमासाद्यनागानांतीर्थमुत्तमम् १४ अग्निष्टोममवाप्नोतिनागलोकंचविंदति ॥ ततोगच्छेत्तधर्मज्ञद्वारपालंतरंतुकम् १५ तत्रोष्यरज
नीमेकांगोसहस्रफलंलभेत् ॥ ततःपंचनदंगत्वानियतोनियताशनः १६ कोटितीर्थमुपस्पृश्यहयमेधफलंलभेत् ॥ अश्विनोस्तीर्थमासाद्यरूपवानभिजायते ॥
१७ ततोगच्छेतधर्मज्ञवाराहंतीर्थमुत्तमम् ॥ विष्णुर्वाराहरूपेणपूर्वंयत्रस्थितोऽभवत् १८ तत्रस्नात्वानरश्रेष्ठअग्निष्टोमफलंलभेत् ॥ ततोजयंत्यांराजेंद्र
सोमतीर्थंसमाविशेत् १९ स्नात्वाफलमवाप्नोतिराजसूयस्यमानवः ॥ एकहंसेनरःस्नात्वागोसहस्रफलंलभेत् २० कृतशौचंसमासाद्यतीर्थसेवीनराधिप ॥ पुं
डरीकमवाप्नोतिकृतशौचोभवेच्चसः २१ ततोमुंजवटंनामस्थाणोःस्थानंमहात्मनः ॥ उपोष्यरजनीमेकांगाणपत्यमवाप्नुयात् २२ तत्रैवचमहाराजयक्षिणींलो
कविश्रुताम् ॥ स्नात्वाऽभिगम्यराजेंद्रसर्वान्कामानवाप्नुयात् २३ कुरुक्षेत्रस्यतद्द्वारंविश्रुतंभरतर्षभ ॥ प्रदक्षिणमुपावृत्त्यतीर्थसेवीसमाहितः २४ संमितं
पुष्कराणांचस्नात्वाऽर्च्यपितृदेवताः ॥ जामदग्न्येनरामेणकृतंतत्सुमहात्मना २५ कृतकृत्योभवेद्राजन्नश्वमेधंचविंदति ॥ ततोरामह्रदानाच्छेत्तीर्थसेवीसमा
हितः २६ तत्ररामेणराजेंद्रतरसादीप्ततेजसा ॥ क्षत्रमुत्साद्यवीरेणह्रदाःपंचनिवेशिताः २७ पूरयित्वानरव्याघ्ररुधिरेणेतिविश्रुतम् ॥ पितरस्तर्पितास्तेसर्वे
तथैवप्रपितामहाः २८ ततस्तेपितरःप्रीतारामम्रूचुर्नराधिप ॥ पितरऊचुः ॥ रामराममहाभागप्रीताःस्मतवभार्गव २९ अनयापितृभक्त्याचविक्रमेणचते
विभो ॥ वरंवृणीष्वभद्रंतेकिमिच्छसिमहाद्युते ३० एवमुक्तःसराजेंद्ररामःप्रहरतांवरः ॥ अब्रवीत्प्रांजलिर्वाक्यंपितॄन्सगगनेस्थितान् ३१ भवंतोयदिमेप्रीता
यद्यनुग्राह्यतामयि ॥ पितृप्रसादमिच्छेयंतपआप्यायनंपुनः ३२ यच्चरोषाभिभूतेनक्षत्रमुत्सादितंमया ॥ ततश्चपापान्मुच्येयंयुष्माकंतेजसाऽप्यहम् ३३ ॥७०॥

२३ कुरुक्षेत्रस्यप्रस्तुतस्य तत् यक्षाभिवंदनादिकंद्वारंप्रापकं तच्चेदंकुरुक्षेत्रमविमुक्ताख्यं'अविमुक्तंवैकुरुक्षेत्रम्'इतिश्रुतेः स्मृतिश्च । 'इमानिपुण्यविद्याणिकाशीप्राप्तिकराणिचे'इति अतएवानु
कुरुक्षेत्रमितिश्रुत्यानिर्दिष्टंकुरुक्षेत्रादिसेवनमाप्यत्वात् २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३

३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ । ५६ काशीश्वरस्यतीर्थेषुमणिकर्णिकादिषु

ह्रदाश्चतीर्थभूतामेभवेयुर्भुविविश्रुताः ॥ एतच्छ्रुत्वाशुभंवाक्यंरामस्यपितरस्तदा ३४ प्रत्यूचुःपरमप्रीतारामंहर्षसमन्विताः ॥ तपस्तेवर्धतांभूयःपितृभक्त्या
विशेषतः ३५ यच्चरोषाभिभूतेनक्षत्रमुत्सादितंत्वया ॥ ततश्चपापान्मुक्तस्त्वंपतितास्तेस्वकर्मभिः ३६ ह्रदाश्चतवतीर्थत्वंगमिष्यंतिनसंशयः ॥ ह्रदेष्वेतेषुयः
स्नात्वापितॄन्संतर्पयिष्यति ३७ पितरस्तस्यवैप्रीतादास्यंतिभुविदुर्लभम् ॥ ईप्सितंचमनःकामंस्वर्गलोकंचशाश्वतम् ३८ एवंदत्वावरान्राजन्रामस्यपित
रस्तदा ॥ आमंत्र्यभार्गवंप्रीत्यातत्रैवांतर्हितास्ततः ३९ एवंरामह्रदाःपुण्याभार्गवस्यमहात्मनः ॥ स्नात्वाह्रदेषुरामस्यब्रह्मचारीशुभव्रतः ४० राममभ्यर्च्य
राजेंद्रलभेद्बहुसुवर्णकम् ॥ वंशमूलकमासाद्यतीर्थसेवीकुरूद्वह ४१ स्ववंशमुद्धरेद्राजन्स्नात्वावैवंशमूलके ॥ कायशोधनमासाद्यतीर्थंभरतसत्तम ४२ शरीर
शुद्धिःस्नातस्यतस्मिंस्तीर्थेनसंशयः ॥ शुद्धदेहश्चसंयातिशुभाँल्लोकाननुत्तमान् ४३ ततोगच्छेतधर्मज्ञतीर्थंत्रैलोक्यविश्रुतम् ॥ लोकायत्रोद्धृताःपूर्वंविष्णुना
प्रभविष्णुना ४४ लोकोद्धारंसमासाद्यतीर्थंत्रैलोक्यपूजितम् ॥ स्नात्वातीर्थवरेराजन्लोकानुद्धरतेस्वकान् ४५ श्रीतीर्थंचसमासाद्यस्नात्वानियतमानसः ॥
अर्चयित्वापितॄन्देवान्विंदतेश्रियमुत्तमाम् ४६ कपिलातीर्थमासाद्यब्रह्मचारीसमाहितः ॥ तत्रस्नात्वाऽर्चयित्वाचपितॄन्स्वान्दैवतान्यपि ४७ कपिलानांसह
स्रस्यफलंविंदतिमानवः ॥ सूर्यतीर्थंसमासाद्यस्नात्वानियतमानसः ४८ अर्चयित्वापितॄन्देवानुपवासपरायणः ॥ अग्निष्टोममवाप्नोतिसूर्यलोकंचगच्छाति
४९ गवांभवनमासाद्यतीर्थसेवीयथाक्रमम् ॥ तत्राभिषेकंकुर्वाणोगोसहस्रफलंलभेत् ५० शंखिनीतीर्थमासाद्यतीर्थसेवीकुरूद्वह ॥ देव्यास्तीर्थेनरःस्नात्वालभते
रूपमुत्तमम् ५१ ततोगच्छेतराजेंद्रद्वारपालमरंतुकम् ॥ यच्चतीर्थंसरस्वत्यांयक्षेंद्रस्यमहात्मनः ५२ तत्रस्नात्वानरोराजन्नग्निष्टोमफलंलभेत् ॥ ततोगच्छे
तराजेंद्रब्रह्मावर्तंनरोत्तमः ५३ ब्रह्मावर्तेनरःस्नात्वाब्रह्मलोकमवाप्नुयात् ॥ ततोगच्छेतराजेंद्रसुतीर्थकमनुत्तमम् ५४ तत्रसन्निहितानित्यंपितरोदैवतैःसह ॥
तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ५५ अश्वमेधमवाप्नोतिपितृलोकंचगच्छति ॥ ततोंबुमत्यांधर्मज्ञसुतीर्थकमनुत्तमम् ५६ काशीश्वरस्यतीर्थेषुस्नात्वाभार
तसत्तम ॥ सर्वव्याधिविनिर्मुक्तोब्रह्मलोकेमहीयते ५७ मातृतीर्थंचतत्रैवयत्रस्नातस्यभारत ॥ प्रजाविवर्धतेराजन्ननंतांश्रियमश्नुते ५८ ततःसीतवनंग
च्छेन्नियतोनियताशनः ॥ तीर्थंतत्रमहाराजमहदन्यत्रदुर्लभम् ५९ पुनातिगमनादेवदृष्टमेकंनराधिप ॥ केशानभ्युक्ष्यवैतस्मिन्पूतोभवतिभारत ६० तीर्थं
तत्रमहाराजश्वाविल्लोमापहंस्मृतम् ॥ यत्रविप्रानरव्याघ्रविद्वांसस्तीर्थतत्पराः ६१ प्रीतिंगच्छंतिपरमांस्नात्वाभरतसत्तम ॥ श्वाविल्लोमापनयनेतीर्थेभरतसत्तम ६२

स्नानमात्राद्ब्रह्मलोकेक्रममुक्तिस्थाने महीयतेपूज्यते ५७ । ५८ । ५९ । ६० । ६१ । ६२

प्राणायमैर्निर्हरंतिस्वलोमानिद्विजोत्तमाः ॥ पूतात्मानश्वराजेंद्रप्रयातिपरमांगतिम् ६३ दशाश्वमेधिकंचैवतस्मिंस्तीर्थेमहीपते ॥ तत्रस्नात्वानरव्याघ्रगच्छे
तपरमांगतिम् ६४ ततोगच्छेतराजेंद्रमानुषंलोकविश्रुतम् ॥ यत्रकृष्णमृगाराजन्व्याधेनशरपीडिताः ६५ विगाह्यतस्मिन्सरसिमानुषत्वमुपागताः ॥ त
स्मिंतीर्थेनरःस्नात्वाब्रह्मचारीसमाहितः ६६ सर्वपापविशुद्धात्मास्वर्गलोकेमहीयते ॥ मानुषस्यतुपूर्वेणक्रोशमात्रेमहीपते ६७ आपगानामविख्यातानदीसिद्ध
निषेविता ॥ श्यामकंभोजनेतत्रयःप्रयच्छतिमानवः ६८ देवान्पितॄन्समुद्दिश्यतस्यधर्मफलंमहत् ॥ एकस्मिन्भोजितेविप्रेकोटिर्भवतिभोजिता ६९ तत्रस्नात्वा
ऽर्चयित्वाचपितॄन्वैदेवतानिच ॥ उषित्वारजनीमेकामग्निष्टोमफलंलभेत् ७० ततोगच्छेतराजेंद्रब्रह्मणःस्थानमुत्तमम् ॥ ब्रह्मोदुंबरमित्येवप्रकाशंभुविभारत ७१
तत्रसप्तर्षिकुंडेषुस्नातस्यनरपुंगव ॥ केदारेचैवराजेंद्रकपिलस्यमहात्मनः ७२ ब्रह्माणमधिगत्वाचशुचिःप्रयतमानसः ॥ सर्वपापविशुद्धात्माब्रह्मलोकंप्रपद्यते
७३ कपिष्ठलस्यकेदारंसमासाद्यसुदुर्लभम् ॥ अंतर्धानमवाप्नोतितपसादग्धकिल्बिषः ७४ ततोगच्छेतराजेंद्रसरकंलोकविश्रुतम् ॥ कृष्णपक्षेचतुर्दश्यामभि
गम्यवृषध्वजम् ७५ लभेतसर्वकामान्हिस्वर्गलोकंचगच्छति ॥ तिस्रःकोट्यस्तुतीर्थानांसरकेकुरुनंदन ७६ रुद्रकोट्यांतथाकूपेह्रदेषुचमहीपते ॥ इलास्प
दंचतत्रैवतीर्थंभरतसत्तम ७७ तत्रस्नात्वाऽर्चयित्वाचदैवतानिपितॄनथ ॥ नदुर्गतिमवाप्नोतिवाजपेयंचविंदति ७८ किंदानेचनरःस्नात्वाकिंजप्येचमहीपते ॥
अप्रमेयमवाप्नोतिदानंजप्यंचभारत ७९ कलश्यांवार्युपस्पृश्यश्रद्दधानोजितेंद्रियः ॥ अग्निष्टोमस्ययज्ञस्यफलंप्राप्नोतिमानवः ८० सरकस्यतुपूर्वेणनारद
स्यमहात्मनः ॥ तीर्थंकुरुकुलश्रेष्ठअंबाजन्मेतिविश्रुतम् ८१ तत्रतीर्थेनरःस्नात्वाप्राणानुत्सृज्यभारत ॥ नारदेनाभ्यनुज्ञातोलोकान्प्राप्नोत्यनुत्तमान् ८२ शुक्ल
पक्षेदशम्यांचपुंडरीकंसमाविशेत् ॥ तत्रस्नात्वानरोराजन्पुंडरीकफलंलभेत् ८३ ततस्त्रिविष्टपंगच्छेत्त्रिषुलोकेषुविश्रुतम् ॥ तत्रवैतरणीपुण्यानदीपापप्रणा
शिनी ८४ तत्रस्नात्वाऽर्चयित्वाचशूलपाणिंवृषध्वजम् ॥ सर्वपापविशुद्धात्मागच्छेतपरमांगतिम् ८५ ततोगच्छेतराजेंद्रफलकीवनमुत्तमम् ॥ तत्रदेवाःसदारा
जन्फलकीवनमाश्रिताः ८६ तपश्चरंतिविपुलंबहुवर्षसहस्रकम् ॥ दृषद्वत्यांनरःस्नात्वातर्पयित्वाचदेवताः ८७ अग्निष्टोमातिरात्राभ्यांफलंविंदतिभारत ॥ तीर्थे
चसर्वदेवानांस्नात्वाभरतसत्तम ८८ गोसहस्रस्यराजेंद्रफलंविंदतिमानवः ॥ पाणिखातेनरःस्नात्वातर्पयित्वाचदेवताः ८९ अग्निष्टोमातिरात्राभ्यांफलंविंदति
भारत ॥ राजसूयमवाप्नोतिऋषिलोकंचविंदति ९० ततोगच्छेतराजेंद्रमिश्रकंतीर्थमुत्तमम् ॥ तत्रतीर्थानिराजेंद्रमिश्रितानिमहात्मना ९१ व्यासेननृपशार्दू
लद्विजार्थमितिनःश्रुतम् ॥ सर्वतीर्थेषुसस्नातिमिश्रकेस्नातियोनरः ९२
६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८ । ७९ । ८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ । ८९ । ९० । ९१ । ९२

ततोव्यासवनंगच्छेन्नियतोनियताशनः ॥ मनोजवेनरःस्नात्वागोसहस्रफलंलभेत् ९३ गत्वामधुवटींचैवदेव्यास्तीर्थेनरःशुचिः ॥ तत्रस्नात्वाऽर्चयित्वाचपितॄ
न्देवांश्चपूरुषः ९४ सदेव्यासमनुज्ञातोगोसहस्रफलंलभेत् ॥ कौशिक्याःसंगमेयस्तुदृषद्वत्याश्चभारत ९५ स्नातिवैनियताहारःसर्वपापैःप्रमुच्यते ॥ ततोव्या
सस्थलीनामयत्रव्यासेनधीमता ९६ पुत्रशोकाभितप्तेनदेहत्यागेकृतामतिः ॥ ततोदेवैस्तुराजेंद्रपुनरुत्थापितस्तदा ९७ अभिगत्वास्थलींतस्यगोसहस्रफलं
लभेत् ॥ किंदत्तंकूपमासाद्यतिलप्रस्थंप्रदायच ९८ गच्छेतपरमांसिद्धिमृणैर्मुक्तःकुरूद्वह ॥ वेदीतीर्थेनरःस्नात्वागोसहस्रफलंलभेत् ९९ अहश्वसुदिनंचैवद्वे
तीर्थेलोकविश्रुते ॥ तयोःस्नात्वानरव्याघ्रसूर्यलोकमवाप्नुयात् १०० मृगधूमंततोगच्छेत्त्रिषुलोकेषुविश्रुतम् ॥ तत्राभिषेकंकुर्वीतगंगायांनृपसत्तम १ अर्चयि
त्वामहादेवमश्वमेधफलंलभेत् ॥ देव्यास्तीर्थेनरःस्नात्वागोसहस्रफलंलभेत् २ ततोवामनकंगच्छेत्त्रिषुलोकेषुविश्रुतम् ॥ तत्रविष्णुपदेस्नात्वाअर्चयित्वाचवामनम्
३ सर्वपापविशुद्धात्माविष्णुलोकंसगच्छति ॥ कुलंपुनेनरःस्नात्वापुनातिस्वकुलंततः ४ पवनस्यह्रदेस्नात्वामरुतांतीर्थमुत्तमम् ॥ तत्रस्नात्वानरव्याघ्रविष्णु
लोकेमहीयते ५ अमराणांह्रदेस्नात्वासमभ्यर्च्यामराधिपम् ॥ अमराणांप्रभावेनस्वर्गलोकेमहीयते ६ शालिहोत्रस्यतीर्थेचशालिसूर्येयथाविधि ॥ स्नात्वानरवर
श्रेष्ठगोसहस्रफलंलभेत् ७ श्रीकुंजंचसरस्वत्यास्तीर्थंभरतसत्तम ॥ तत्रस्नात्वानरश्रेष्ठअग्निष्टोमफलंलभेत् ८ ततोनैमिषकुंजंचसमासाद्यकुरूद्वह ॥ ऋषयः
किलराजेंद्रनैमिषेयास्तपस्विनः ९ तीर्थयात्रांपुरस्कृत्यकुरुक्षेत्रंगताःपुरा ॥ ततःकुंजःसरस्वत्याःकृतोभरतसत्तम १० ऋषीणामवकाशःस्याद्यथातुष्टिकरो
महान् ॥ तस्मिन्कुंजेनरःस्नात्वाअग्निष्टोमफलंलभेत् ११ ततोगच्छेतधर्मज्ञकन्यातीर्थमनुत्तमम् ॥ कन्यातीर्थेनरःस्नात्वागोसहस्रफलंलभेत् १२ ततोगच्छेत
राजेंद्रब्रह्मणस्तीर्थमुत्तमम् ॥ तत्रवर्णावरःस्नात्वाब्राह्मण्यंलभतेनरः १३ ब्राह्मणश्चविशुद्धात्मागच्छेतपरमांगतिम् ॥ ततोगच्छेन्नरश्रेष्ठसोमतीर्थमनुत्तमम्
१४ तत्रस्नात्वानरोराजन्सोमलोकमवाप्नुयात् ॥ सप्तसारस्वतंतीर्थंततोगच्छेन्नराधिप १५ यत्रमंकणकःसिद्धोमहर्षिर्लोकविश्रुतः ॥ पुरामंकणकोराजन्कुशाग्रे
णेतिनःश्रुतम् १६ क्षतःकिलकरेराजंस्तस्यशाकरसोऽस्रवत् ॥ सवैशाकरसंदृष्ट्वाहर्षाविष्टःप्रनृत्तवान् १७ ततस्तस्मिन्प्रनृत्तेतुस्थावरंजंगमंचयत् ॥ प्रनृत्तमुभ
यंवीरतेजसातस्यमोहितम् १८ ब्रह्मादिभिःसुरैराजन्ऋषिभिश्चतपोधनैः ॥ विज्ञप्तोवैमहादेवोऋषेरर्थेनराधिप १९ नायंनृत्येद्यथादेवतथात्वंकर्तुमर्हसि ॥ तंप्रनृ
त्तंसमासाद्यहर्षाविष्टेनचेतसा ॥ सुराणांहितकामार्थमृषिंदेवोऽभ्यभाषत २० भोभोमहर्षेधर्मज्ञकिमर्थंनृत्यतेभवान् ॥ हर्षस्थानंकिमर्थंवातवाद्यमुनिपुंगव २१
९३ । ९४ । ९५ । ९६ । ९७ । ९८ । ९९ । १०० । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१

२२ । २३ । २४ हिमसन्निभमतिश्वेतमिक्षुविकारं खेडशर्कराख्यम् २५ । २६ । २७ । २८ । २९ । १३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२

ऋषिरुवाच ॥ तपस्विनोधर्मपथेस्थितस्यद्विजसत्तम ॥ किन्नपश्यसिमेब्रह्मन्कराच्छाकरसंस्रुतम् १२२ यंदृष्ट्वासंप्रनृत्तोहंहर्षेणमहतान्वितः ॥ तंप्रहस्याब्रवी
द्देवोऋषिंरागेणमोहितम् २३ अहंतुविस्मयंविप्रनगच्छामीतिपश्यमाम् ॥ एवमुक्त्वानरश्रेष्ठमहादेवेनधीमता २४ अंगुल्यग्रेणगजेंद्रस्वांगुष्ठस्ताडितोऽनघ ॥
ततोभस्मक्षताद्राजन्निर्गतंहिमसन्निभम् २५ तदृष्ट्वाव्रीडितोराजन्सम्मुनिःपादयोर्गतः ॥ नान्यद्देवात्परंमेनेरुद्रात्परतरंमहत् २६ सुरासुरस्यजगतोगतिस्त्व
मसिशूलधृक् ॥ त्वयासर्वमिदंसृष्टंत्रैलोक्यंसचराचरम् २७ त्वमेवसर्वान्ग्रससिपुनरेवयुगक्षये ॥ देवैरपिनशक्यस्त्वंपरिज्ञातुंकुतोमया २८ त्वयिसर्वेप्रदृश्यंतेसुराब्र
ह्मादयोऽनघ ॥ सर्वस्त्वमसिलोकानांकर्ताकारयिताचह २९ त्वत्प्रसादात्सुराःसर्वेमोदंतीहाकुतोभयाः ॥ एवंस्तुत्वामहादेवमृषिर्वचनमब्रवीत् १३० त्वत्प्रसादा
न्महादेवततोमेनक्षरेत्तवै ॥ ततोदेवःप्रहृष्टात्माब्रह्मर्षिमिदमब्रवीत् ३१ तपस्तेवर्धतांविप्रमत्प्रसादात्सहस्रधा ॥ आश्रमेचेहवत्स्यामित्वयासहमहामुने ३२ स
प्तसारस्वतेस्नात्वाअर्चयिष्यंतियेतुमाम् ॥ नतेषांदुर्लभंकिंचिदिहलोकेपरत्रच ३३ सारस्वतंचतेलोकंगमिष्यंतिनसंशयः ॥ एवमुक्त्वामहादेवस्तत्रैवांतरधी
यत ३४ ततस्त्वौशनसंगच्छेत्त्रिपुलोकेषुविश्रुतम् ॥ यत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः ३५ कार्तिकेयश्चभगवांस्त्रिसंध्यंकिलभारत ॥ सान्निध्यमकरोन्नि
त्यंभार्गवप्रियकाम्यया ३६ कपालमोचनंतीर्थंसर्वपापप्रमोचनम् ॥ तत्रस्नात्वानरव्याघ्रसर्वपापैःप्रमुच्यते ३७ अग्नितीर्थंततोगच्छेत्तत्रस्नात्वानरर्षभ ॥ अ
ग्निलोकमवाप्नोतिकुलंचैवसमुद्धरेत् ३८ विश्वामित्रस्यतत्रैवतीर्थंभरतसत्तम ॥ तत्रस्नात्वानरश्रेष्ठब्राह्मण्यमभिगच्छति ३९ ब्रह्मयोनिंसमासाद्यशुचिःप्रयतमा
नसः ॥ तत्रस्नात्वानरव्याघ्रब्रह्मलोकंप्रपद्यते १४० पुनात्यासप्तमंचैवकुलंनास्त्यत्रसंशयः ॥ ततोगच्छेतराजेंद्रतीर्थंत्रैलोक्यविश्रुतम् ४१ पृथूदकमिति
ख्यातंकार्तिकेयस्यवैनृप ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ४२ अज्ञानाज्ज्ञानतोवापिस्त्रियावापुरुषेणवा ॥ यत्किंचिदशुभंकर्मकृतंमानुषबुद्धिना ४३ त
त्सर्वंनश्यतेतत्रस्नातमात्रस्यभारत ॥ अश्वमेधफलंचास्यस्वर्गलोकंचगच्छति ४४ पुण्यमाहुःकुरुक्षेत्रंकुरुक्षेत्रात्सरस्वती ॥ सरस्वत्याश्चतीर्थानितीर्थेभ्यश्च
पृथूदकम् ४५ उत्तमंसर्वतीर्थानांयस्त्यजेदात्मनस्तनुम् ॥ पृथूदकेजप्यपरोनैवश्वोमरणंतपेत् ४६ गीतंसनत्कुमारेणव्यासेनचमहात्मना ॥ एवंसनियतंराजन्न
भिगच्छेत्पृथूदकम् ४७ पृथूदकात्तीर्थतमंनान्यत्तीर्थंकुरूद्वह ॥ तन्मेध्यंतत्पवित्रंचपावनंचनसंशयः ४८ तत्रस्नात्वादिवंयांतियेपिपापकृतोनराः ॥ पृथूद
केनरश्रेष्ठएवमाहुर्मनीषिणः ४९ मधुस्रवंचतत्रैवतीर्थंभरतसत्तम ॥ तत्रस्नात्वानरोराजन्गोसहस्रफलंलभेत् १५०

४३ । ४४ । ४५ पृथूदकेजप्यपरोयस्तनुंत्यजेत्तंश्वोमरणं पुनर्मरणंनतपेत् । यद्वापूर्वेद्युरेवकृतजपंश्वोपि जीवितावंमरणंनतपेत् एकरात्रेणैवसर्वपापविमोकोभवतीत्यर्थः ४६ । ४७ । ४८ । ४९ । १५०

ततोगच्छेतराजेंद्रतीर्थंमेध्यंयथाक्रमम् ॥ सरस्वत्यारुणायाश्चसंगमंलोकविश्रुतम् १५१ त्रिरात्रोपोषितःस्नात्वामुच्यतेब्रह्महत्यया ॥ अग्निष्टोमातिरात्राभ्यांफ
लंविंदतिमानवः ५२ आसप्तमंकुलंचैवपुनातिभरतर्षभ ॥ अर्धकीलंचतत्रैवतीर्थंकुरुकुलोद्वह ५३ विप्राणामनुकंपार्थंदर्भिणानिर्मितंपुरा ॥ व्रतोपनयनाभ्यां
चाप्युपवासेनवाऽप्युत ५४ क्रियामंत्रैश्चसंयुक्तोब्राह्मणःस्यान्नसंशयः ॥ क्रियामंत्रविहीनोऽपितत्रस्नात्वानरर्षभ ॥ चीर्णव्रतोभवेद्विद्वान्दृष्टमेतत्पुरातनैः
५५ समुद्राश्चापिचत्वारःसमानीताश्चदर्भिणा ॥ तेषुस्नातोनरश्रेष्ठनदुर्गतिमवाप्नुयात् ५६ फलानिगोसहस्राणांचतुर्णांविंदतेचसः ॥ ततोगच्छेतधर्मज्ञतीर्थंश
तसहस्रकम् ५७ साहस्रकंचतत्रैवद्वेतीर्थेलोकविश्रुते ॥ उभयोर्हिनरःस्नात्वागोसहस्रफलंलभेत् ५८ दानंवाऽप्युपवासोवासहस्रगुणितंभवेत् ॥ ततोगच्छेतरा
जेंद्ररेणुकातीर्थमुत्तमम् ५९ तीर्थाभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥ सर्वपापविशुद्धात्माअग्निष्टोमफलंलभेत् १६० विमोचनमुपस्पृश्यजितमन्युर्जितेंद्रियः ॥
प्रतिग्रहकृतैर्दोषैःसर्वैःसपरिमुच्यते ६१ ततःपंचवटींगत्वाब्रह्मचारीजितेंद्रियः ॥ पुण्येनमहतायुक्तःसतांलोकेमहीयते ६२ यत्रयोगेश्वरःस्थाणुःस्वयमेववृषध्व
जः ॥ तमर्चयित्वादेवेशंगमनादेवसिद्ध्यति ६३ तैजसंवारुणंतीर्थंदीप्यमानंस्वतेजसा ॥ यत्रब्रह्मादिभिर्देवैर्ऋषिभिश्चतपोधनैः ६४ सैनापत्येनदेवानामभि
षिक्तोगुहस्तदा ॥ तैजसस्यतुपूर्वेणकुरुतीर्थंकुरूद्वह ६५ कुरुतीर्थेनरःस्नात्वाब्रह्मचारीजितेंद्रियः ॥ सर्वपापविशुद्धात्माब्रह्मलोकंप्रपद्यते ६६ स्वर्गद्वारंततो
गच्छेन्नियतोनियताशनः ॥ स्वर्गलोकमवाप्नोतिब्रह्मलोकंचगच्छति ६७ ततोगच्छेदनरकंतीर्थसेवीनराधिप ॥ तत्रस्नात्वानरोराजन्नदुर्गतिमवाप्नुयात् ६८ त
त्रब्रह्मास्वयंनित्यंदेवैःसहमहीपते ॥ अन्वास्तेपुरुषव्याघ्रनारायणपुरोगमैः ६९ सान्निध्यंतत्रराजेंद्ररुद्रपत्न्याःकुरूद्वह ॥ अभिगम्यचतांदेवींनदुर्गतिमवाप्नु
यात् १७० तत्रैवचमहाराजविश्वेश्वरमुमापतिम् ॥ अभिगम्यमहादेवंमुच्यतेसर्वकिल्बिषैः ७१ नारायणंचाभिगम्यपद्मनाभमरिंदम ॥ राजमानोमहाराजविष्णु
लोकंचगच्छति ७२ तीर्थेषुसर्वदेवानांस्नातःसपुरुषर्षभ ॥ सर्वदुःखैःपरित्यक्तोद्योततेशशिवन्नरः ७३ ततःस्वस्तिपुरंगच्छेत्तीर्थसेवीनराधिप ॥ प्रदक्षिण
मुपावृत्यगोसहस्रफलंलभेत् ७४ पावनंतीर्थमासाद्यतर्पयेत्पितृदेवताः ॥ अग्निष्टोमस्ययज्ञस्यफलंप्राप्नोतिभारत ७५ गंगाहृदश्चतत्रैवकूपश्चभरतर्षभ ॥ ति
२५ स्रःकोटयस्तुतीर्थानांतस्मिन्कूपेमहीपते ७६ तत्रस्नात्वानरोराजन्स्वर्गलोकंप्रपद्यते ॥ आपगायांनरःस्नात्वाअर्चयित्वामहेश्वरम् ७७ गाणपत्यमवाप्नोतिकुलं
चैवसमुद्धरेत् ॥ ततःस्थाणुवटंगच्छेत्त्रिषुलोकेषुविश्रुतम् ७८ तत्रस्नात्वास्थितोरात्रिंरुद्रलोकमवाप्नुयात् ॥ बदरीपाचनंगच्छेद्वसिष्ठस्याश्रमंगतः १७९

५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८ । ७९

१८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ । ८९ । १९० । ९१ सन्निहत्यांकुरुक्षेत्रे अर्थवनामांतरंसन्निहतीति ९२ तन्निर्वक्तिपृथिव्यामित्यादिना अत्रोपक्रमोपसंहारयोः कुरुक्षेत्रमात्रपरत्वात्तदेवांगितीर्थांतराणितुफलवत्संनिधावफलंतदंगमितिन्यायेन तत्मासावंगत्वमपितेषामपिपृथक्फलश्रवणंतुगुणफलंन्यायेनज्ञेयं यथायोमांगानामपियमनियमादीनामहिंसाप्रतिष्ठादीनांतत्संनिधौवैरत्यागइत्यादि नापृथक्फलंसमर्थयतेतद्वदितिभावः ९३ । ९४ । ९५ । ९६ । ९७ । ९८ । ९९ । २०० । २०१ पृथिव्यामिति नैमिषंनैमिषारण्येकृतंपुण्यंपृथिव्यामे

बदरींभक्षयेत्तत्रत्रिरात्रोपोषितोनरः ॥ सम्यग्द्वादशवर्षाणिबदरींभक्षयेत्तुयः १८० त्रिरात्रोपोषितस्तेनभवेत्तुल्योनराधिप ॥ रुद्रमार्गंसमासाद्यतीर्थसेवीनराधिप
८१ अहोरात्रोपवासेनशक्रलोकेमहीयते ॥ एकरात्रंसमासाद्यएकरात्रोषितोनरः ८२ नियतःसत्यवादीचब्रह्मलोकेमहीयते ॥ ततोगच्छेतराजेंद्रतीर्थंत्रैलोक्यवि
श्रुतम् ८३ आदित्यस्याश्रमोयत्रतेजोराशेर्महात्मनः ॥ तस्मिंस्तीर्थेनरःस्नात्वापूजयित्वाविभावसुम् ८४ आदित्यलोकंव्रजतिकुलंचैवसमुद्धरेत् ॥ सोमती
र्थेनरःस्नात्वातीर्थसेवीनराधिप ८५ सोमलोकमवाप्नोतिनरोनास्त्यत्रसंशयः ॥ ततोगच्छेतधर्मज्ञदधीचस्यमहात्मनः ८६ तीर्थंपुण्यतमंराजन्पावनंलोकवि
श्रुतम् ॥ यत्रसारस्वतोयातःसोऽङ्गिरास्तपसोनिधिः ८७ तस्मिंस्तीर्थेनरःस्नात्वावाजिमेधफलंलभेत् ॥ सारस्वतींगतिंचैवलभतेनात्रसंशयः ८८ ततःक
न्याश्रमंगच्छेन्नियतोब्रह्मचर्यवान् ॥ त्रिरात्रोपोषितोराजन्नियतोनियताशनः ८९ लभेत्कन्याशतंदिव्यंस्वर्गलोकंचगच्छति ॥ ततोगच्छेतधर्मज्ञतीर्थंसन्निह
तीमपि १९० तत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ मासिमासिसमायांतिपुण्येनमहतान्विताः ९१ सन्निहत्यामुपस्पृश्यराहुग्रस्तेदिवाकरे ॥ अश्वमेधशतं
तेनतत्रेष्टंशाश्वतंभवेत् ९२ पृथिव्यांयानितीर्थानिअंतरिक्षचराणिच ॥ नद्योह्रदास्तडागाश्चसर्वप्रस्रवणानिच ९३ उदपानानिवाप्यश्चतीर्थान्यायतनानि
च ॥ निःसंशयममावास्यांसमेष्यंतिनराधिप ९४ मासिमासिनरव्याघ्रसन्निहत्यांनसंशयः ॥ तीर्थसन्निहनादेवसन्निहत्येतिविश्रुता ९५ तत्रस्नात्वाचपीत्वाच
स्वर्गलोकेमहीयते ॥ अमावास्यांतुतत्रैवराहुग्रस्तेदिवाकरे ९६ यःश्राद्धंकुरुतेमर्त्यस्तस्यपुण्यफलंशृणु ॥ अश्वमेधसहस्रस्यसम्यगिष्टस्ययत्फलम् ९७ स्नात
एवसमाप्नोतिकृत्वाश्राद्धंचमानवः ॥ यत्किंचिद्दुष्कृतंकर्मस्त्रियावापुरुषेणवा ९८ स्नातमात्रस्यतत्सर्वंनश्यतेनात्रसंशयः ॥ पद्मवर्णेनयानेनब्रह्मलोकंप्रपद्यते
९९ अभिवाद्यततोयक्षंद्वारपालंमचक्रुकम् ॥ कोटितीर्थमुपस्पृश्यलभेद्बहुसुवर्णकम् २०० गंगाह्रदश्चतत्रैवतीर्थंभरतसत्तम ॥ तत्रस्नायीतधर्मज्ञब्रह्मचारी
समाहितः १ राजसूयाश्वमेधाभ्यांफलंविंदतिमानवः ॥ पृथिव्यांनैमिषंतीर्थमंतरिक्षेचपुष्करम् २०२ त्रयाणामपिलोकानांकुरुक्षेत्रंविशिष्यते ॥ पां
सवोऽपिकुरुक्षेत्राद्वायुनासमुदीरिताः ३

वसंततिसंपत्तिसार्वभौमादिपदप्राप्तिहेतुरित्यर्थः अंतरिक्षेसूर्यचंद्रादिमार्गे नक्षत्रादिचक्रेपुष्करंप्रापयतीत्यर्थः २०२ त्रयाणांभिद्रादिलोकेनसहत्रयाणामुपरिब्रह्मलोकेकुरुक्षेत्रसेवीक्रममुक्तिस्थानं प्राप्नोतीत्यर्थः । नयंतिपरमांगतिमितिमुक्तिफलदर्शकवाक्यशेषात् अत्रकुरुक्षेत्रपदेनकाश्येव । 'काशीश्वरस्यतीर्थेषुस्नात्वाभरतसत्तम ॥ सर्वव्याधिविनिर्मुक्तोब्रह्मलोकेमहीयते'इत्यनेनसमानार्थत्वात् । तथाचपाठक्रमादर्थक्रमस्यबलवत्वात् 'पृथिव्यांनैमिषंपुण्यमंतरिक्षेचपुष्करम्'इत्यतःपरं 'येवसंतिकुरुक्षेत्रेतेवसंतित्रिविष्टपे'इत्ययंग्रंथोद्रष्टव्यः । अन्यथातृतीयश्लोकस्यानुक्तेत्रयाणा

मित्यसंगतंस्यात् । त्रिविष्टपेइत्यध्याहारेणवावाक्यपूरणंस्यात् तथाचोक्तं श्रौतार्थसंभवेदर्शितावाविमुक्तेऽपिकुरुक्षेत्रपदस्यश्रौतीरूढिरविमुक्तंवैकुरुक्षेत्रमितिजाबालोपनिषदि । नचोपक्रमोपसंहारैकरूप्येणप्रसिद्धकुरुक्षेत्रस्यप्राकरणिकत्वेनतीर्थांतरवद्वाराणस्यास्तत्प्रकरणपठितत्वात्तदंगत्वंस्यादितिवाच्यं प्रकरणाल्लिंगस्यबलीयस्त्वात् तथाहि । 'तेवसंतित्रिविष्टपेस्वर्गेलोकेमहीयते' इत्यादिवाक्यशेषात्स्वर्गप्राप्तिरेवकुरुक्षेत्रफलमवगम्यतेनचात्रत्यंत्रिविष्टपादिपदंब्रह्मलोकपरंकर्तुंशक्यं ब्रह्मवेदीकुरुक्षेत्रमितिवाक्यशेषविरोधात् तत्रचवेदीशब्देनतस्यकर्मभूमित्वावगमात् 'तेषांकुरुक्षेत्रंवेदिरासीत्'इतितैत्तिरीयकब्राह्मणात् ।'तेषांकुरुक्षेत्रंदेवयजनमास'इतिशतपथश्रुतेश्च । नचकर्मभूमेर्विद्याफलप्रदत्वंयुज्यते । कर्मणापितृलोकोविद्ययादेवलोकइति । तयोःफलभेदश्रवणात् पितृलोकःस्वर्गलोकः 'देवलोकोब्रह्मलोकः वाराणस्यास्तुज्ञानभूमित्वंसर्वश्रुतिस्मृतिप्रसिद्धं एतदेवात्र । 'पांसवोऽपिकुरुक्षेत्राद्वायुनासमुदीरिताः ॥ अपिदुष्कृतकर्माणंनयंतिपरमांगतिं' इतिप्रदर्श्य दक्षिणेनसरस्वत्याउत्तरेणदृषद्वतीं येवसंतिकुरुक्षेत्रेतेवसंति त्रिविष्टपे'इत्यनंतरश्लोकेनप्रसिद्धकुरुक्षेत्रफलंप्रदर्श्यते नचैतदेवपूर्वश्लोकेनस्तूयतइतिवाच्यंश्रुतिस्मृतिप्रसिद्धिबलात्तस्य

अपिदुष्कृतकर्माणंनयंतिपरमांगतिम् ॥ दक्षिणेनसरस्वत्याउत्तरेणदृषद्वतीम् २०४ येवसंतिकुरुक्षेत्रेतेवसंतित्रिविष्टपे ॥ कुरुक्षेत्रंगमिष्यामिकुरुक्षेत्रेवसाम्य
हम् ५ अप्येकांवाचमुत्सृज्यसर्वपापैःप्रमुच्यते ॥ ब्रह्मवेदीकुरुक्षेत्रंपुण्यंब्रह्मर्षिसेवितम् ६ तस्मिन्वसंतियेमर्त्यानतेशोच्याःकथंचन ७ तरंतुकारंतुकयोर्यदंतरं
रामह्रदानांचमचक्रुकस्यच ॥ एतत्कुरुक्षेत्रसमंतपंचकंपितामहस्योत्तरवेदिरुच्यते २०८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिपुलस्त्यतीर्थ
यात्रायांत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ पुलस्त्यउवाच ॥ ततोगच्छेन्महाराजधर्मतीर्थमनुत्तमम् ॥ यत्रधर्मोमहाभागस्तप्तवाननुत्तमंतपः १ तेनतीर्थंकृतं
पुण्यंस्वेननाम्नाचविश्रुतम् ॥ तत्रस्नात्वानरोराजन्धर्मशीलःसमाहितः २ आसप्तमंकुलंचैवपुनीतेनात्रसंशयः ॥ ततोगच्छेतराजेंद्रज्ञानपावनमुत्तमम् ३ अग्निष्टो
ममवाप्नोतिमुनिलोकंचगच्छति ॥ सौगंधिकवनंराजंस्ततोगच्छेतमानवः ४ तत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ सिद्धचारणगंधर्वाःकिंनराश्चमहोरगाः ५
तद्वनंप्रविशन्नेवसर्वपापैःप्रमुच्यते ॥ ततश्चापिसरिच्छ्रेष्ठानदीनामुत्तमानदी ६ प्लक्षादेवीस्मृताराजन्पुण्यादेवीसरस्वती ॥ तत्राभिषेकंकुर्वीतवल्मीकान्निः
सृतेजले ७ अर्चयित्वापितॄन्देवानश्वमेधफलंलभेत् ॥ ईशानाध्युषितंनामतत्रतीर्थंसुदुर्लभम् ८

भूतार्थवादत्वेसंभवत्यभूतार्थवादत्वोपगमस्यायोगात् वाल्मीकीयेमोक्षोपायेषु । 'छायासूचीतापसूचीमुल्यसूचीतिचत्रिकं ॥ त्रिकोणंतपसापूतंवाराणस्याःसमंकृतम् ॥ गतास्तेनत्रिकोणेनयेकेचिदिहजंतवः ॥ वायवःपांसवोवाऽपितेऽपिमुक्तिपरांगताः'इतिभंग्यंतरेणपूर्वश्लोकार्थस्यप्रत्यभिज्ञानात् तथाचयद्यपिकाश्याःकुरुक्षेत्रांगत्वंप्रकरणात्प्रसक्तंतथापि योग्यतयाफलवारतम्यलिंगात्तत्संभवतिसान्निध्यात्तुपरस्पराकांक्षादिकमुत्थाप्यतीर्थांतरशेषीभूतस्यापिकुरुक्षेत्रस्यकाशीशेषत्वंज्ञेयम् । तथाचवाक्यात् दुर्बलोऽपिसंनिधिरानर्थक्यप्रतिहतानांविपरीतंबलाबलमितिन्यायेनबलत्तवयास्वर्गलोकेमहीयतइतिवाक्यावगतमपिकुरुक्षेत्रफलंतिरोधायप्रतितिष्ठंति 'हवैयएतारात्रीरुपयंति'इत्यादौरात्रिसत्रस्यप्रतिष्ठाशेषितामिवपांसवोऽपिकुरुक्षेत्रइत्यर्थवादेनमुक्तिफलशेषितामविमुक्तसंज्ञस्यकुरुक्षेत्रस्यव्यवस्थापयन्सहैकवाक्यतांगत्वाप्रसिद्धकुरुक्षेत्रस्याविमुक्तशेषतांगमयति । तथाचायंपांसवोऽपीत्यादिश्लोकद्वयार्थः येपरमगतिप्रदांकाशींगंतुमिच्छंति तेकुरुक्षेत्रेवसेयुरिति । तेवसंतित्रिविष्टपेइतितु योगांगफलवद्गुणफलमितिप्रागुक्तंनविस्मर्तव्यं तस्मिद्धंसर्वेषांतीर्थानांकुरुक्षेत्रप्रापकत्वंकुरुक्षेत्रस्यतुकाशीप्रापकत्वमिति २०५ । ४ । ५ । ६ । ७ ॥ २०८ ॥ इत्यारण्यकेप० नैलकंठीयेभारतभावदीपेत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ ८४ ॥ ततइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८

शम्याक्षेपः शम्या कुतिर्यक्क्षेपकरणविशेषः सबलवताक्षिप्तोयावद्दूरंपतेत्तावान्देशःशम्यानिपातः तेषुषट्सु । संपेतिपाठेसंवत्सरंयनयेतियष्टिःसंपा ९ पुरातनेभविष्यपुराणादौ १० । ११ । १२ । १३

षट्सुशम्यानिपातेषुवल्मीकादितिनिश्चयः ॥ कपिलानांसहस्रंचवाजिमेधंचविंदति ९ तत्रस्नात्वानरव्याघ्रदृष्टमेतत्पुरातने ॥ सुगंधांशतकुंभांचपंचयक्षांच
भारत १० अभिगम्यनरश्रेष्ठस्वर्गलोकेमहीयते ॥ त्रिशूलखातंतत्रैवतीर्थमासाद्यभारत ११ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥ गाणपत्यंचलभतेदेहंत्य
क्त्वानसंशयः १२ ततोगच्छेतराजेंद्रदेव्याःस्थानंसुदुर्लभम् ॥ शाकंभरीतिविख्यातात्रिषुलोकेषुविश्रुता १३ दिव्यंवर्षसहस्रंहिशाकेनकिलसुव्रता ॥ आहा
रंसाकृतवतीमासिमासिनराधिप १४ ऋषयोऽभ्यागतास्तत्रदेव्याभक्त्यातपोधनाः ॥ आतिथ्यंचकृतंतेषांशाकेनकिलभारत १५ ततःशाकंभरीत्येवनामत
स्याःप्रतिष्ठितम् ॥ शाकंभरींसमासाद्यब्रह्मचारीसमाहितः १६ त्रिरात्रमुषितःशाकंभक्षयित्वानरःशुचिः ॥ शाकाहारस्ययत्किंचिद्वर्षैर्द्वादशभिःकृतम् १७
तत्फलंतस्यभवतिदेव्याश्छंदेनभारत ॥ ततोगच्छेत्सुवर्णाख्यंत्रिषुलोकेषुविश्रुतम् १८ तत्रविष्णुःप्रसादार्थंरुद्रमाराधयत्पुरा॥वरांश्चसुबहूँल्लेभेदैवतेषुसुदुर्ले
भान् १९ उक्तश्चत्रिपुरघ्नेनपरितुष्टेनभारत ॥ अपिचत्वंप्रियतरोलोकेकृष्णभविष्यसि २० त्वन्मुखंचजगत्सर्वंभविष्यतिनसंशयः ॥ तत्राभिगम्यराजेंद्रपूजयि
त्वावृषध्वजम् २१ अश्वमेधमवाप्नोतिगाणपत्यंचविंदति ॥ धूमावतींततोगच्छेत्त्रिरात्रोपोषितोनरः २२ मनसाप्रार्थितान्कामान्लभतेनात्रसंशयः ॥ देव्यास्तुदक्षि
णार्धेनरथावर्तोनराधिप २३ तत्रारोहेतधर्मज्ञश्रद्दधानोजितेंद्रियः ॥ महादेवप्रसादाद्धिगच्छेतपरमांगतिम् २४ प्रदक्षिणमुपावृत्यगच्छेतभरतर्षभ ॥ धारांनाम
महाप्राज्ञःसर्वपापप्रमोचनीम् २५ तत्रस्नात्वानरव्याघ्रनशोचतिनराधिप ॥ ततोगच्छेतधर्मज्ञनमस्कृत्यमहागिरिम् २६ स्वर्गद्वारेणयत्तुल्यंगंगाद्वारंनसंश
यः ॥ तत्राभिषेकंकुर्वीतकोटितीर्थेसमाहितः २७ पुंडरीकमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ उष्यैकांरजनींतत्रगोसहस्रफलंलभेत् २८ सप्तगंगेत्रिगंगेचशक्रावर्तेच
तर्पयन् ॥ देवान्पितॄंश्चविधिवत्पुण्यलोकेमहीयते २९ ततःकनखलेस्नात्वात्रिरात्रोपोषितोनरः ॥ अश्वमेधमवाप्नोतिस्वर्गलोकंचगच्छति ३० कपिलावटंत
तोगच्छेत्तीर्थसेवीनराधिप ॥ उपोष्यरजनींतत्रगोसहस्रफलंलभेत् ३१ नागराजस्यराजेंद्रकपिलस्यमहात्मनः ॥ तीर्थंकुरुवरश्रेष्ठसर्वलोकेषुविश्रुतम् ३२ तत्रा
भिषेकंकुर्वीतनागतीर्थेनराधिप ॥ कपिलानांसहस्रस्यफलंविंदतिमानवः ३३ ततोललितकंगच्छेच्छांतनोस्तीर्थमुत्तमम् ॥ तत्रस्नात्वानरोराजन्नदुर्ग
तिमवाप्नुयात् ३४ गंगायमुनयोर्मध्येस्नातियःसंगमेनरः ॥ दशाश्वमेधानाप्नोतिकुलंचैवसमुद्धरेत् ३५ ततोगच्छेतराजेंद्रसुगंधंलोकविश्रुतम् ॥ सर्व
पापविशुद्धात्माब्रह्मलोकेमहीयते ३६

१४ । १५ । १६ । १७ छंदेनइच्छया १८ । १९ । २० त्वन्मुखंत्वत्प्रधानम् २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६

३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ औशनसींगतिंशुक्रत्वम् ५६ । ५७ । ५८ । ५९ । ६०

रुद्रावर्तंततोगच्छेत्तीर्थसेवीनराधिप ॥ तत्रस्नात्वानरोराजन्स्वर्गलोकेचगच्छति ३७ गंगायाश्चनरश्रेष्ठसरस्वत्याश्चसंगमे ॥ स्नात्वाऽश्वमेधंप्राप्नोतिस्वर्ग
लोकंचगच्छति ३८ भद्रकर्णेश्वरंगत्वादेवमर्च्ययथाविधि ॥ नदुर्गतिमवाप्नोतिनाकपृष्ठेचपूज्यते ३९ ततःकुब्जाम्रकंगच्छेत्तीर्थसेवीनराधिप ॥ गोसहस्रमवा
प्नोतिस्वर्गलोकंचगच्छति ४० अरुंधतीवटंगच्छेत्तीर्थसेवीनराधिप ॥ सामुद्रकमुपस्पृश्यब्रह्मचारीसमाहितः ४१ अश्वमेधमवाप्नोतित्रिरात्रोपोषितोनरः ॥
गोसहस्रफलंविंद्यात्कुलंचैवसमुद्धरेत् ४२ ब्रह्मावर्तंततोगच्छेद्ब्रह्मचारीसमाहितः ॥ अश्वमेधमवाप्नोतिसोमलोकंचगच्छति ४३ यमुनाप्रभवंगत्वासमुपस्पृश्य
यामुनम् ॥ अश्वमेधफलंलब्ध्वास्वर्गलोकेमहीयते ४४ दर्वीसंक्रमणंप्राप्यतीर्थंत्रैलोक्यपूजितम् ॥ अश्वमेधमवाप्नोतिस्वर्गलोकंचगच्छति ४५ सिंधोश्चप्र
भवंगत्वासिद्धगंधर्वसेवितम् ॥ तत्रोष्यरजनीःपंचविंदेद्बहुसुवर्णकम् ४६ अथवेदींसमासाद्यनरःपरमदुर्गमाम् ॥ अश्वमेधमवाप्नोतिस्वर्गलोकंचगच्छति ४७
ऋषिकुल्यांसमासाद्यवासिष्ठंचैवभारत ॥ वासिष्ठींसमतिक्रम्यसर्वेवर्णाद्विजातयः ४८ ऋषिकुल्यांसमासाद्यनरःस्नात्वाविकल्मषः ॥ देवान्पितॄंश्चार्चयित्वा
ऋषिलोकंप्रपद्यते ४९ यदितत्रवसेन्मासंशाकाहारोनराधिप ॥ भृगुतुंगंसमासाद्यवाजिमेधफलंलभेत् ५० गत्वावीरप्रमोक्षंचसर्वपापैःप्रमुच्यते ॥ कृत्तिकामघ
योश्चैवतीर्थमासाद्यभारत ५१ अग्निष्टोमातिरात्राभ्यांफलमाप्नोतिमानवः ॥ तत्रसंध्यांसमासाद्यविद्यातीर्थमनुत्तमम् ५२ उपस्पृश्यचवैविद्यांयत्रतत्रोपप
द्यते ॥ महाश्रमेवसेद्रात्रिंसर्वपापप्रमोचने ५३ एककालंनिराहारोलोकानावसतेशुभान् ॥ षष्ठकालोपवासेनमासमुष्यमहालये ५४ सर्वपापविशुद्धात्माविंदेद्बहु
सुवर्णकम् ॥ दशापरान्दशपूर्वान्नरानुद्धरतेकुलम् ५५ अथवेतसिकांगत्वापितामहनिषेविताम् ॥ अश्वमेधमवाप्नोतिगच्छेदौशनसींगतिम् ५६ अथसुंदरि
कातीर्थंप्राप्यसिद्धनिषेवितम् ॥ रूपस्यभागीभवतिदृष्टमेतत्पुरातनैः ५७ ततोवैब्राह्मणींगत्वाब्रह्मचारीजितेंद्रियः ॥ पद्मवर्णेनयानेनब्रह्मलोकंप्रपद्यते ५८ तत
स्तुनैमिषंगच्छेत्पुण्यंसिद्धनिषेवितम् ॥ तत्रनित्यंनिवसतिब्रह्मादेवगणैःसह ५९ नैमिषंमृगयाणस्यपापस्यार्धंप्रणश्यति ॥ प्रविष्टमात्रस्तुनरःसर्वपापैःप्रमु
च्यते ६० तत्रमासंवसेद्धीरोनैमिषेतीर्थतत्परः ॥ पृथिव्यांयानितीर्थानितानितीर्थानिनैमिषे ६१ कृताभिषेकस्तत्रैवनियतोनियताशनः ॥ गवांमेधस्ययज्ञस्य
फलंप्राप्नोतिभारत ६२ पुनात्यासप्तमंचैवकुलंभरतसत्तम ॥ यस्त्यजेन्नैमिषेप्राणानुपवासपरायणः ६३ समोदेत्सर्वलोकेषुएवमाहुर्मनीषिणः ॥ नित्यंमेध्यं
चपुण्यंचनैमिषंनृपसत्तम ६४ गंगोद्भेदंसमासाद्यत्रिरात्रोपोषितोनरः ॥ वाजपेयमवाप्नोतिब्रह्मभूतोभवेत्सदा ६५ सरस्वतींसमासाद्यतर्पयेत्पितृदेवताः ॥
सारस्वतेषुलोकेषुमोदतेनात्रसंशयः ६६ ततश्चबाहुदांगच्छेद्ब्रह्मचारीसमाहितः ॥ तत्रोष्यरजनीमेकांस्वर्गलोकेमहीयते ६७ देवसत्रस्ययज्ञस्यफलंप्राप्नो
तिकौरव ॥ ततःक्षीरवतींगच्छेत्पुण्यांपुण्यतरैर्वृताम् ६८

। ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८

पितृदेवार्चनपरोवाजपेयमवाप्नुयात् ॥ विमलाशोकमासाद्यब्रह्मचारीसमाहितः ६९ तत्रोष्यरजनीमेकांस्वर्गलोकेमहीयते ॥ गोप्रतारंततोगच्छेत्सरय्वास्ती
र्थमुत्तमम् ७० यत्ररामोगतःस्वर्गंसभृत्यबलवाहनः ॥ देहंत्यक्त्वामहाराजतस्यतीर्थस्यतेजसा ७१ रामस्यचप्रसादेनव्यवसायाच्चभारत ॥ तस्मिंस्तीर्थेनरः
स्नात्वागोप्रतारेनराधिप ७२ सर्वपापविशुद्धात्मास्वर्गलोकेमहीयते ॥ रामतीर्थेनरःस्नात्वागोमत्यांकुरुनंदन ७३ अश्वमेधमवाप्नोतिपुनातिचकुलंनरः ॥
शतसाहस्रकंतीर्थंतत्रैवभरतर्षभ ७४ तत्रोपस्पर्शनंकृत्वानियतोनियताशनः ॥ गोसहस्रफलंपुण्यंप्राप्नोतिभरतर्षभ ७५ ततोगच्छेतराजेंद्रभर्तृस्थानमनुत्त
मम् ॥ अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः ७६ कोटितीर्थेनरःस्नात्वाअर्चयित्वागुहंनृप ॥ गोसहस्रफलंविंद्यात्तेजस्वीचभवेन्नरः ७७ ततोवाराणसींगत्वा
अर्चयित्वावृषध्वजम् ॥ कपिलाह्रदेनरःस्नात्वाराजसूयमवाप्नुयात् ७८ अविमुक्तंसमासाद्यतीर्थसेवीकुरूद्वह ॥ दर्शनाद्देवदेवस्यमुच्यतेब्रह्महत्यया ७९ प्राणा
नुत्सृज्यतत्रैवमोक्षंप्राप्नोतिमानवः ॥ मार्कंडेयस्यराजेंद्रतीर्थमासाद्यदुर्लभम् ८० गोमतीगंगयोश्चैवसंगमेलोकविश्रुते ॥ अग्निष्टोममवाप्नोतिकुलंचैवसमुद्धरेत्
८१ ततोगयांसमासाद्यब्रह्मचारीसमाहितः ॥ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ८२ तत्राक्षयवटोनामत्रिषुलोकेषुविश्रुतः ॥ तत्रदत्तंपितृभ्यस्तुभवत्यक्षय
मुच्यते ८३ महानद्यामुपस्पृश्यतर्पयेत्पितृदेवताः ॥ अक्षयान्प्राप्नुयाल्लोकान्कुलंचैवसमुद्धरेत् ८४ ततोब्रह्मसरोगत्वाधर्मारण्योपशोभितम् ॥ ब्रह्मलोकम
वाप्नोतिप्रभातामेवशर्वरीम् ८५ ब्रह्मणातत्रसरसियूपश्रेष्ठःसमुच्छ्रितः ॥ यूपंप्रदक्षिणीकृत्वावाजपेयफलंलभेत् ८६ ततोगच्छेतराजेंद्रधेनुकंलोकविश्रुतम् ॥
एकरात्रोषितोराजन्प्रयच्छेत्तिलधेनुकाम् ८७ सर्वपापविशुद्धात्मासोमलोकंव्रजेद्ध्रुवम् ॥ तत्रचिह्नंमहद्राजन्नद्यापिसुमहत्कृशम् ८८ कपिलायाःसवत्सायाश्चरं
त्याःपर्वतेकृतम् ॥ सवत्सायाःपदानिस्मदृश्यंतेऽद्यापिभारत ८९ तेषूपस्पृश्यराजेंद्रपदेषुनृपसत्तम ॥ यत्किंचिदशुभंकर्मतत्प्रणश्यतिभारत ९० ततोगृध्र
वटंगच्छेत्स्थानंदेवस्यधीमतः ॥ स्नायीतभस्मनातत्रअभिगम्यवृषध्वजम् ९१ ब्राह्मणेनभवेच्चीर्णंव्रतंद्वादशवार्षिकम् ॥ इतरेषांतुवर्णानांसर्वपापंप्रण
श्यति ९२ उद्यंतंचततोगच्छेत्पर्वतंगीतनादितम् ॥ सावित्र्यास्तुपदंतत्रदृश्यतेभरतर्षभ ९३ तत्रसंध्यामुपासीतब्राह्मणःसंशितव्रतः ॥ तेनह्युपास्ताभव
तिसंध्याद्वादशवार्षिकी ९४ योनिद्वारंचतत्रैवविश्रुतंभरतर्षभ ॥ तत्राभिगम्यमुच्येतपुरुषोयोनिसंकटात् ९५ कृष्णशुक्लावुभौपक्षौगयायांयोवसेन्नरः ॥ पुना
त्यासप्तमंराजन्कुलंनास्त्यत्रसंशयः ९६ एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजेत् ॥ यजेतवाऽश्वमेधेननीलंवावृषमुत्सृजेत् ९७ ॥७५॥

६९ । ७० । ७१ व्यवसायान्निश्चयात् ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८ । ७९ । ८० । ८१ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ । ८९ । ९० । ९१ । ९२ । ९४ । ९५ । ९६ । ९७

९८ । ९९ । १०० । १०१ । २ । ३ ४ नित्यकंनैवेद्यं भैक्ष्यकंचतद्देव ५ । ६ । ७ । ८ । ९ । ११० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३

ततःफल्गुंव्रजेद्राजंस्तीर्थसेवीनराधिप ॥ अश्वमेधमवाप्नोतिसिद्धिंचमहतींव्रजेत् ९८ ततोगच्छेतराजेंद्रधर्मप्रस्थंसमाहितः ॥ तत्रधर्मोमहाराजनित्यमास्ते
युधिष्ठिर ९९ तत्रकूपोदकंकृत्वातेनस्नातःशुचिस्तथा ॥ पितॄन्देवांस्तुसंतर्प्यमुक्तपापोदिवंव्रजेत् १०० मतंगस्याश्रमस्तत्रमहर्षेर्भावितात्मनः ॥ तंप्रवि
श्याश्रमंश्रीमच्छ्रमशोकविनाशनम् १०१ गवामयनयज्ञस्यफलंप्राप्नोतिमानवः ॥ धर्मंतत्राभिसंस्पृश्यवाजिमेधमवाप्नुयात् २ ततोगच्छेतराजेंद्रब्रह्मस्थानम
नुत्तमम् ॥ तत्राभिगम्यराजेंद्रब्रह्माणंपुरुषर्षभ ३ राजसूयाश्वमेधाभ्यांफलंविंदतिमानवः ॥ ततोराजगृहंगच्छेत्तीर्थसेवीनराधिप ४ उपस्पृश्यततस्तत्रकक्षी
वानिवमोदते ॥ यक्षिण्यानैत्यकंतत्रप्राश्नीतपुरुषःशुचिः ५ यक्षिण्यास्तुप्रसादेनमुच्यतेब्रह्महत्यया ॥ मणिनागंततोगत्वागोसहस्रफलंलभेत् ६ तैर्थिकंभुंज
तेयस्तुमणिनागस्यभारत ॥ दष्टस्याशीविषेणापिनतस्यक्रमतेविषम् ७ तत्रोष्यरजनीमेकांगोसहस्रफलंलभेत् ॥ ततोगच्छेतब्रह्मर्षेर्गौतमस्यवनंप्रियम् ८
अहल्यायाह्रदेस्नात्वाव्रजेतपरमांगतिम् ॥ अभिगत्वाऽऽश्रमंराजन्विंदतेश्रियमात्मनः ९ तत्रोदपानंधर्मज्ञत्रिषुलोकेषुविश्रुतम्॥ तत्राभिषेकंकृत्वातुवाजिमेधम
वाप्नुयात् ११० जनकस्यतुराजर्षेःकूपस्त्रिदशपूजितः ॥ तत्राभिषेकंकृत्वातुविष्णुलोकमवाप्नुयात् ११ ततोविनशनंगच्छेत्सर्वपापप्रमोचनम् ॥ वाजपेयमवा
प्नोतिसोमलोकंचगच्छति १२ गंडकींतुसमासाद्यसर्वतीर्थजलोद्भवाम् ॥ वाजपेयमवाप्नोतिसूर्यलोकंचगच्छति १३ ततोविशल्यामासाद्यनदींत्रैलोक्यविश्रुताम् ॥
अग्निष्टोममवाप्नोतिस्वर्गलोकंचगच्छति १४ ततोऽधिवंगंधर्मज्ञसमाविश्यतपोवनम् ॥ गुह्यकेषुमहाराजमोदतेनात्रसंशयः १५ कंपनांतुसमासाद्यनदींसिद्धनि
षेविताम् ॥ पुंडरीकमवाप्नोतिस्वर्गलोकंचगच्छति १६ अथमाहेश्वरींधारांसमासाद्यधराधिप ॥ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् १७ दिवौकसांपुष्करिणींस
मासाद्यनराधिप ॥ नदुर्गतिमवाप्नोतिवाजिमेधंचविंदति १८ अथसोमपदंगच्छेद्ब्रह्मचारीसमाहितः ॥ माहेश्वरपदेस्नात्वावाजिमेधफलंलभेत् १९ तत्रकोटिंतु
तीर्थानांविश्रुताभरतर्षभ ॥ कूर्मरूपेणराजेंद्रह्यसुरेणदुरात्मना १२० ह्रियमाणाहृताराजन्विष्णुनाप्रभविष्णुना ॥ तत्राभिषेकंकुर्वीततीर्थकोट्यांयुधिष्ठि
र २१ पुंडरीकमवाप्नोतिविष्णुलोकंचगच्छति ॥ ततोगच्छेतराजेंद्रस्थानंनारायणस्यच २२ सदासन्निहितोयत्रविष्णुर्वसतिभारत ॥ यत्रब्रह्मादयोदेवाऋष
यश्चतपोधनाः २३ आदित्यावसवोरुद्राजनार्दनमुपासते ॥ शालग्रामइतिख्यातोविष्णुरद्भुतकर्मकः २४ अभिगम्यत्रिलोकेशंवरदंविष्णुमव्ययम् ॥ अश्वमे
धमवाप्नोतिविष्णुलोकंचगच्छति २५ तत्रोदपानंधर्मज्ञसर्वपापप्रमोचनम् ॥ समुद्रास्तत्रचत्वारःकूपेसंनिहिताःसदा २६ तत्रोपस्पृश्यराजेंद्रनदुर्गतिम
वाप्नुयात् ॥ अभिगम्यमहादेवंवरदंरुद्रमव्ययम् १२७

२४ । २५ । २६ । १२७

१२८।२९ । ३० । ३१ । ३२ । ३३ ३४ । ३५ । ३६ । ३७।३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ ४८ । ४९ । ५०।५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । १५८

विराजतियथासोमोमेघैर्मुक्तोनराधिप ॥ जातिस्मरमुपस्पृश्यशुचिःप्रयतमानसः १२८ जातिस्मरत्वमाप्नोतिस्नात्वातत्रनसंशयः ॥ माहेश्वरपुरंगत्वाअर्चयि
त्वावृषध्वजम् २९ ईप्सितांल्लँभतेकामानुपवासान्नसंशयः ॥ ततस्तुवामनंगत्वासर्वपापप्रमोचनम् १३० अभिगम्यहरिंदेवंनदुर्गतिमवाप्नुयात् ॥ कुशिकस्या
श्रमंगच्छेत्सर्वपापप्रमोचनम् ३१ कौशिकींतत्रगच्छेतमहापापप्रणाशिनीं ॥ राजसूयस्ययज्ञस्यफलंप्राप्नोतिमानवः ३२ ततोगच्छेतराजेंद्रचंपकारण्यमुत्त
मम् ॥ तत्रोष्यरजनीमेकांगोसहस्रफलंलभेत् ३३ अथजेष्ठिलमासाद्यतीर्थंपरमदुर्लभम् ॥ तत्रोष्यरजनीमेकांगोसहस्रफलंलभेत् ३४ तत्रविश्वेश्वरंदृष्ट्वादेव्या
सहमहाद्युतिं ॥ मित्रावरुणयोर्लोकानाप्नोतिपुरुषर्षभ ३५ त्रिरात्रोपोषितस्तत्रअग्निष्टोमफलंलभेत् ॥ कन्यासंवेद्यमासाद्यनियतोनियताशनः ३६ मनोःप्र
जापतेर्लोकानाप्नोतिपुरुषर्षभ ॥ कन्यायांयेप्रयच्छंतिदानमण्वपिभारत ३७ तदक्षय्यमितिप्राहुर्ऋषयःसंशितव्रताः ॥ ततोनिर्वीरमासाद्यत्रिषुलोकेषुविश्रुतम्
३८ अश्वमेधमवाप्नोतिविष्णुलोकंचगच्छति ॥ येतुदानंप्रयच्छंतिनिर्वीरासंगमेनराः ३९ तेयांतिनरशार्दूलशक्रलोकमनामयम् ॥ तत्राश्रमोवासिष्ठस्यात्रिषुलोके
षुविश्रुतः १४० तत्राभिषेकंकुर्वाणोवाजपेयमवाप्नुयात् ॥ देवकूटंसमासाद्यब्रह्मर्षिगणसेवितम् ४१ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ ततोगच्छेतराजेंद्रकौ
शिकस्यमुनेर्ह्रदम् ४२ यत्रसिद्धिंपरांप्राप्तोविश्वामित्रोऽथकौशिकः ॥ तत्रमासंवसेद्वीरकौशिक्यांभरतर्षभ ४३ अश्वमेधस्ययत्पुण्यंतन्मासेनाधिगच्छति ॥
सर्वतीर्थवरेचैवयोवसेतमहाह्रदे ४४ नदुर्गतिमवाप्नोतिविंद्याद्बहुसुवर्णकम् ॥ कुमारमभिगम्याथवीराश्रमनिवासिनम् ४५ अश्वमेधमवाप्नोतिनरोनास्त्यत्रसंश
यः ॥ अग्निधारांसमासाद्यत्रिषुलोकेषुविश्रुतां ४६ तत्राभिषेकंकुर्वाणोह्यग्निष्टोममवाप्नुयात् ॥ अभिगम्यमहादेवंवरदंविष्णुमव्ययम् ४७ पितामहसरोगत्वाशै
लराजसमीपतः ॥ तत्राभिषेकंकुर्वाणोह्यग्निष्टोममवाप्नुयात् ४८ पितामहस्यसरसःप्रस्रुतालोकपावनी ॥ कुमारधारातत्रैवत्रिषुलोकेषुविश्रुता ४९ यत्रस्नात्वा
कृतार्थोऽस्मीत्यात्मानमवगच्छति ॥ षष्ठकालोपवासेनमुच्यतेब्रह्महत्यया १५० ततोगच्छेतधर्मज्ञतीर्थसेवनतत्परः ॥ शिखरंवैमहादेव्यागौर्यास्त्रैलोक्यविश्रु
तम् ५१ समारुह्यनरश्रेष्ठस्तनकुंडेषुसंविशेत् ॥ स्तनकुंडमुपस्पृश्यवाजपेयफलंलभेत् ५२ तत्राभिषेकंकुर्वाणःपितृदेवार्चनेरतः ॥ हयमेधमवाप्नोतिशक्र
लोकंचगच्छति ५३ ताम्रारुणंसमासाद्यब्रह्मचारीसमाहितः ॥ अश्वमेधमवाप्नोतिब्रह्मलोकंचगच्छति ५४ नंदिन्यांचसमासाद्यकूपंदेवनिषेवितम् ॥ नरमेध
स्ययत्पुण्यंतदाप्नोतिनराधिप ५५ कालिकासंगमेस्नात्वाकौशिक्यरुणयोर्गतः ॥ त्रिरात्रोपोषितोराजन्सर्वपापैःप्रमुच्यते ५६ उर्वशीतीर्थमासाद्यततःसोमा ॥७६॥
श्रमंबुधः ॥ कुंभकर्णाश्रमंगत्वापूज्यतेभुविमानवः ५७ कोकामुखमुपस्पृश्यब्रह्मचारीयतव्रतः ॥ जातिस्मरत्वमाप्नोतिदृष्टमेतत्पुरातनैः १५८

५९ । ६० । ६१ । ६२ । ६३ ॥ ॥ इत्या॰नै॰भा॰चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ७ ॥ ॥ अथेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९

प्राङ्नदींचसमासाद्यकृतात्माभवतिद्विजः ॥ सर्वपापविशुद्धात्माशक्रलोकंचगच्छति ५९ ऋषभद्वीपमासाद्यमेध्यंक्रौंचनिषूदनम् ॥ सरस्वत्यामुपस्पृश्यविमा
नस्थोविराजते ६० औद्दालकंमहाराजतीर्थंमुनिनिषेवितम् ॥ तत्राभिषेकंकृत्वावैसर्वपापैःप्रमुच्यते ६१ धर्मतीर्थंसमासाद्यपुण्यंब्रह्मर्षिसेवितम् ॥ वाजपेय
मवाप्नोतिविमानस्थश्चपूज्यते ६२ अथचंपांसमासाद्यभागीरथ्यांकृतोदकः ॥ दंडार्कमभिगत्वातुगोसहस्रफलंलभेत् १६३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणि
तीर्थ॰पुलस्त्यतीर्थयात्रायांचतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ पुलस्त्यउवाच ॥ अथसंध्यांसमासाद्यसंवेद्यंतीर्थमुत्तमम् ॥ उपस्पृश्यनरोविद्यांलभते
नात्रसंशयः १ रामस्यचप्रभावेणतीर्थंराजन्कृतंपुरा ॥ तल्लौहित्यंसमासाद्यविंद्याद्बहुसुवर्णकम् २ करतोयांसमासाद्यत्रिरात्रोपोषितोनरः ॥ अश्वमेधमवाप्नोति
प्रजापतिकृतोविधिः ३ गंगायास्तत्रराजेंद्रसागरस्यचसंगमे ॥ अश्वमेधंदशगुणंप्रवदंतिमनीषिणः ४ गंगायास्त्वपरंपारंप्राप्ययःस्नातिमानवः ॥ त्रिरात्रमु
षितोराजन्सर्वपापैःप्रमुच्यते ५ ततोवैतरणींगच्छेत्सर्वपापप्रमोचनीं ॥ विरजंतीर्थमासाद्यविराजतियथाशशी ६ प्रतरेच्चकुलंपुण्यंसर्वपापंव्यपोहति ॥ गोस
हस्रफलंलब्ध्वापुनातिस्वकुलंनरः ७ शोणस्यज्योतिरथ्यायाःसंगमेनियतःशुचिः ॥ तर्पयित्वापितॄन्देवानग्निष्टोमफलंलभेत् ८ शोणस्यनर्मदायाश्चप्रभवेकुरुनंद
न ॥ वंशगुल्मउपस्पृश्यवाजिमेधफलंलभेत् ९ ऋषभंतीर्थमासाद्यकोशलायांनराधिप ॥ वाजपेयमवाप्नोतित्रिरात्रोपोषितोनरः १० गोसहस्रफलंविंद्यात्कुलं
चैवसमुद्धरेत् ॥ कोशलांतुसमासाद्यकालतीर्थमुपस्पृशेत् ११ वृषभैकादशफलंलभतेनात्रसंशयः ॥ पुष्पवत्यामुपस्पृश्यत्रिरात्रोपोषितोनरः १२ गोसहस्रफलं
लब्ध्वापुनातिस्वकुलंनृप ॥ ततोबदरिकातीर्थेस्नात्वाभरतसत्तम १३ दीर्घमायुरवाप्नोतिस्वर्गलोकंचगच्छति ॥ तथाचंपांसमासाद्यभागीरथ्यांकृतोदकः १४
दंडाख्यमभिगम्यैवगोसहस्रफलंलभेत् ॥ लपेटिकांततोगच्छेत्पुण्यांपुण्योपशोभिताम् १५ वाजपेयमवाप्नोतिदेवैःसर्वैश्चपूज्यते ॥ ततोमहेंद्रमासाद्यजामदग्न्य
निषेवितम् १६ रामतीर्थेनरःस्नात्वाअश्वमेधफलंलभेत् ॥ मतंगस्यतुकेदारस्तत्रैवकुरुनंदन १७ तत्रस्नात्वाकुरुश्रेष्ठगोसहस्रफलंलभेत् ॥ श्रीपर्वतंसमासाद्य
नदीतीरमुपस्पृशेत् १८ अश्वमेधमवाप्नोतिपूजयित्वावृषध्वजम् ॥ श्रीपर्वतेमहादेवोदेव्यासहमहाद्युतिः १९ न्यवसत्परमप्रीतोब्रह्माचत्रिदशैःसह ॥ तत्रदेवह्र
देस्नात्वाशुचिःप्रयतमानसः २० अश्वमेधमवाप्नोतिपरांसिद्धिंचगच्छति ॥ ऋषभंपर्वतंगत्वापांड्येदैवतपूजितम् ॥ वाजपेयमवाप्नोतिनाकपृष्ठेचमोदते २१
ततोगच्छेतकावेरींवृतामप्सरसांगणैः ॥ तत्रस्नात्वानरोराजन्गोसहस्रफलंलभेत् २२

१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२

२३ । २४ । २५ । २६ । २७ । २८ निदर्शनमुदाहरणं २९ तदेवाहगायत्रीमिति योयोनिसंकरजःसचेत्तत्रगायत्रींपठति तस्यसम्यक् पठतोऽपि तीर्थमाहात्म्यात्सागायत्रीगाथास्वरनिय
ततस्तीरेसमुद्रस्यकन्यातीर्थमुपस्पृशेत् ॥ तत्तोयंस्पृश्यराजेंद्रसर्वपापैःप्रमुच्यते २३ अथगोकर्णमासाद्यत्रिषुलोकेषुविश्रुतम् ॥ समुद्रमध्येराजेंद्रसर्वलोकन
मस्कृतम् २४ यत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ भूतयक्षपिशाचाश्चकिन्नराःसमहोरगाः २५ सिद्धचारणगंधर्वमानुषाःपन्नगास्तथा ॥ सरितःसागराः
शैलाउपासंतउमापतिम् २६ तत्रेशानंसमभ्यर्च्यत्रिरात्रोपोषितोनरः ॥ अश्वमेधमवाप्नोतिगाणपत्यंचविंदति २७ उष्यद्वादशरात्रंतुपूतात्माचभवेन्नरः ॥ त
तएवचगायत्र्याःस्थानंत्रैलोक्यपूजितम् २८ त्रिरात्रमुषितस्तत्रगोसहस्रफलंलभेत् ॥ निदर्शनंचप्रत्यक्षंब्राह्मणानांनराधिप २९ गायत्रींपठतेयस्तुयोनिसंकर
जस्तथा ॥ गाथाचगाथिकाचापितस्यसंपद्यतेनृप ३० अब्राह्मणस्यसावित्रींपठतस्तुप्रणश्यति ॥ संवर्तस्यतुविप्रर्षेर्वापीमासाद्यदुर्लभां ३१ रूपस्यभागीभ
वतिसुभगश्चप्रजायते ॥ ततोवेणांसमासाद्यात्रिरात्रोपोषितोनरः ३२ मयूरहंससंयुक्तंविमानंलभतेनरः ॥ ततोगोदावरींप्राप्यनित्यंसिद्धनिषेविताम् ३३ गवांमेध
मवाप्नोतिवासुकेर्लोकमुत्तमम् ॥ वेणायाःसंगमेस्नात्वावाजिमेधफलंलभेत् ३४ वरदासंगमेस्नात्वागोसहस्रफलंलभेत् ॥ ब्रह्मस्थानंसमासाद्यत्रिरात्रोपोषितोनरः
३५ गोसहस्रफलंविंद्यात्स्वर्गलोकंचगच्छति ॥ कुशप्लवनमासाद्यब्रह्मचारीसमाहितः ३६ त्रिरात्रमुषितःस्नात्वाअश्वमेधफलंलभेत् ॥ ततोदेवह्रदेऽरण्येकृ
ष्णवेणाजलोद्भवे ३७ जातिस्मरह्रदेस्नात्वाभवेज्जातिस्मरोनरः ॥ यत्रक्रतुशतैरिष्ट्वादेवराजोदिवंगतः ३८ अग्निष्टोमफलंविंद्याद्गमनादेवभारत ॥ ततःसर्वह्र
देस्नात्वागोसहस्रफलंलभेत् ३९ ततोवापींमहापुण्यांपयोष्णींसरितांवराम् ॥ पितृदेवार्चनरतोगोसहस्रफलंलभते ४० दंडकारण्यमासाद्यपुण्यंराजन्नुपस्पृ
शेत् ॥ गोसहस्रफलंतस्यस्नातमात्रस्यभारत ४१ शरभंगाश्रमंगत्वाशुकस्यचमहात्मनः ॥ नदुर्गतिमवाप्नोतिपुनातिचकुलंनरः ४२ ततःशूर्पारकंगच्छे
ज्जामदग्न्यनिषेवितम् ॥ रामतीर्थेनरःस्नात्वाविंद्याद्बहुसुवर्णकम् ४३ सप्तगोदावरेस्नात्वानियतोनियताशनः ॥ महत्पुण्यमवाप्नोतिदेवलोकंचगच्छति ४४
ततोदेवपथंगत्वानियतोनियताशनः ॥ देवसत्रस्ययत्पुण्यंतदेवाप्नोतिमानवः ४५ तुंगकारण्यमासाद्यब्रह्मचारीजितेंद्रियः ॥ वेदानध्यापयत्तत्रऋषिःसारस्व
तःपुरा ४६ तत्रवेदेषुनष्टेषुमुनेरंगिरसःसुतः ॥ ऋषीणामुत्तरीयेषूपविष्टोयथासुखम् ४७ ओंकारेणयथान्यायंसम्यगुच्चारितेनह ॥ येनयत्पूर्वमभ्यस्तंत
त्सर्वंसमुपस्थितम् ४८ ऋषयस्तत्रदेवाश्चवरुणोग्निःप्रजापतिः ॥ हरिर्नारायणस्तत्रमहादेवस्तथैवच ४९ पितामहश्चभगवान्देवैःसहमहाद्युतिः ॥ भृगुंनियो
जयामासयाजनार्थंमहाद्युतिम् ५० ततःसचक्रेभगवानृषीणांविधिवत्तदा ॥ सर्वेषांपुनराधानंविधिदृष्टेनकर्मणा ५१
महीनागच्यवन्मुखान्निःसरति गाथिकाग्राम्यगीतवद् स्वरवर्णविकृतागीतिकेतिपाठेऽपिसएवार्थः ३० अब्राह्मणस्यतुप्राक्सिद्धाऽपि तत्रनस्फुरतीतिभावः ३१ । ३२ । ३३ । ३४
३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१

५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ चक्रचराः सूर्योदयः ७२ । ७३ । ७४ गंगायमुनयो
आज्यभागेनतत्राग्निंतर्पयित्वायथाविधि ॥ देवाःस्वभवनंयाताऋषयश्चयथाक्रमम् ५२ तदरण्यंप्रविष्टस्यतुंगकंराजसत्तम ॥ पापंप्रणश्यत्यखिलंस्त्रियोवापुरु
षस्यवा ५३ तत्रमासंवसेद्धीरोनियतोनियताशनः ॥ ब्रह्मलोकंव्रजेद्राजन्कुलंचैवसमुद्धरेत् ५४ मेधाविकंसमासाद्यपितॄन्देवांश्चतर्पयेत् ॥ अग्निष्टोममवाप्नो
तिस्मृतिंमेधांचविंदति ५५ अत्रकालंजरंनामपर्वतंलोकविश्रुतम् ॥ तत्रदेवह्रदेस्नात्वागोसहस्रफलंलभेत् ५६ योस्नातःस्नापयेत्तत्रगिरौकालंजरेनृप ॥ स्वर्ग
लोकेमहीयेतनरोनास्त्यत्रसंशयः ५७ ततोगिरिवरश्रेष्ठेचित्रकूटेविशांपते ॥ मंदाकिनींसमासाद्यसर्वपापप्रणाशिनीम् ५८ तत्राभिषेकंकुर्वाणःपितृदेवार्चने
रतः ॥ अश्वमेधमवाप्नोतिगतिंचपरमांव्रजेत् ५९ ततोगच्छेतधर्मज्ञभर्तृस्थानमनुत्तमम् ॥ यत्रनित्यंमहासेनोगुहःसन्निहितोनृप ६० तत्रगत्वानृपश्रेष्ठगम
नादेवसिध्यति ॥ कोटितीर्थेनरःस्नात्वागोसहस्रफलंलभेत् ६१ प्रदक्षिणमुपावृत्यज्येष्ठस्थानंव्रजेन्नरः ॥ अभिगम्यमहादेवंविराजतियथाशशी ६२ तत्रकूपे
महाराजविश्रुताभरतर्षभ ॥ समुद्रास्तत्रचत्वारोनिवसंतियुधिष्ठिर ६३ तत्रोपस्पृश्यराजेंद्रपितृदेवार्चनेरतः ॥ नियतात्मानरःपूतोगच्छेतपरमांगतिम्
६४ ततोगच्छेतराजेंद्रशृंगवेरपुरंमहत् ॥ यत्रतीर्णोमहाराजरामोदाशरथिःपुरा ६५ तस्मिंस्तीर्थेमहाबाहोस्नात्वापापैःप्रमुच्यते ॥ गंगायांतुनरःस्नात्वाब्र
ह्मचारीसमाहितः ६६ विधूतपाप्माभवतिवाजपेयंचविंदति ॥ ततोमुंजवटंगच्छेत्स्थानंदेवस्यधीमतः ६७ अभिगम्यमहादेवमभिवाद्यचभारत ॥ प्रदक्षिण
मुपावृत्यगाणपत्यमवाप्नुयात् ६८ तस्मिंस्तीर्थेतुजाह्नव्यांस्नात्वापापैःप्रमुच्यते ॥ ततोगच्छेतराजेंद्रप्रयागमृषिसंस्तुतम् ६९ यत्रब्रह्मादयोदेवादिशश्चस
दिगीश्वराः ॥ लोकपालाश्चसाध्याश्चपितरोलोकसंमताः ७० सनत्कुमारप्रमुखास्तथैवपरमर्षयः ॥ अंगिरःप्रमुखाश्चैवतथाब्रह्मर्षयोऽमलाः ७१ तथानागाः
सुपर्णाश्चसिद्धाश्चक्रचरास्तथा ॥ सरितःसागराश्चैवगंधर्वाप्सरसोऽपिच ७२ हरिश्चभगवानास्तेप्रजापतिपुरस्कृतः ॥ तत्रत्रीण्यग्निकुंडानियेषांमध्येनजा
ह्नवी ७३ वेगेनसमतिक्रांतासर्वतीर्थपुरस्कृता ॥ तपनस्यसुतादेवीत्रिषुलोकेषुविश्रुता ७४ यमुनागंगयासार्द्धंसंगतालोकपावनी ॥ गंगायमुनयोर्मध्यंपृथि
व्याजघनंस्मृतम् ७५ प्रयागंजघनस्थानमुपस्थमृषयोविदुः ॥ प्रयागंसप्रतिष्ठानंकंबलाश्वतरौतथा ७६ तीर्थंभोगवतीचैववेदिरेषाप्रजापतेः ॥ तत्रवेदाश्च
यज्ञाश्चमूर्तिमंतोयुधिष्ठिर ७७ प्रजापतिमुपासंतेऋषयश्चतपोधनाः ॥ यजंतेक्रतुभिर्देवास्तथाचक्रधरानृपाः ७८ ततःपुण्यतमंनामत्रिषुलोकेषुभारत ॥
प्रयागंसर्वतीर्थेभ्यःप्रवदंत्यधिकंविभो ७९
र्मिति स्त्रीरूपायाःपृथिव्याभरुपृष्ठशीर्षाया हरिद्वारादारभ्य जघनंनामेरधोभागः ७५ जघनस्यस्थानमवस्थानं समाप्तिरंतइतियावत् तदेवोपस्थं तथाच पृथिव्याअपत्यभूतानितीर्थानितत्फ
लभूताःस्वर्गाश्च तानिसर्वाणिप्रयागादुत्पन्नानीतिप्रयागस्यतीर्थराजत्वमुक्तम् ७६ । ७७ । ७८ । ७९

८० । ८१ । ८२ नवेदवचनादिति लोकवेदविरुद्धस्य हठमरणस्यापवादोऽयं अहिंसाविधेरिवपश्वालंभविधिरितिप्राञ्चः वस्तुतस्तु वाराणसीमरणवद्यादृच्छिकमरणविषयएवायं ग्रंथोनहठमरणप्रतिपादकः 'सितासितेसरिते यत्रसंगथेतत्राप्लुतासो दिवमुत्पतंति ॥ येवैतन्वंविसृजंतिधीरास्तेजनासोअमृतत्वंभजंते' 'ब्रह्मज्ञानेनमुच्यंतेप्रयागमरणेनच'इत्यादिश्रुतयः स्मृतयश्चताद्दशाएवहठमरणे 'जलेवाऽपि स्थलेवाऽपि शस्त्रेणोद्बद्धयवापुनः ॥ नरकंतेप्रयांत्याशुआत्मानंघातयंतिये' इतिदोषस्मरणात् नचास्यैवापवादःप्रयागमरणविधिरितिवाच्यं तस्यहठमरणपरत्वासिद्धेः सिद्धौवाअचिकित्स्यरोगादिदोषवतांभृगुपतनादिनाऽपिमरणेप्राप्तेऽपिप्रयागमरणनियमाविधिरयंभविष्यति नचकाम्योऽयंमरणविधिर्नित्यस्यमरणनिषेधविधेर्बाधकः काम्यत्वाच्चनायमुल्लंघनेप्रत्यवायावहइतिवाच्यं उक्तेर्थेबाधकाभावेऽपिवाक्यस्यहठमरणपरत्वमपूर्वविध्यर्थत्वंचकल्पयतोगौरवापत्तेः अभ्युपगमेवा ब्राह्मणव्यतिरिक्तविषयएवायंविधिः भृग्वादिपतनेनमरणमन्यत्रब्राह्मणादिति स्मृतेः । युक्तंतुशुद्धशबलब्रह्मज्ञानयोरिव काशीप्रयागमरणयोःसद्योमुक्तिक्रममुक्तिपरत्वं तथाहि तीर्थमाहात्म्योपसंहारे । 'य

गमनात्तस्यतीर्थस्यनामसंकीर्तनादपि ॥ मृत्युकालभयाच्चापिनरःपापात्प्रमुच्यते ८० तत्राभिषेकंयःकुर्यात्संगमेलोकविश्रुते ॥ पुण्यंसफलमाप्नोतिराजसूयाश्वमेधयोः ८१ एषायजनभूमिर्हिदेवानामभिसंस्कृता ॥ तत्रदत्तंसूक्ष्ममपिमहद्भवतिभारत ८२ नवेदवचनात्तातनलोकवचनादपि ॥ मतिरुत्क्रमणीयातेप्रयागमरणंप्रति ८३ दशतीर्थसहस्राणिषष्टिःकोटचस्तथाऽपराः ॥ येषांसान्निध्यमत्रैवकीर्तितंकुरुनंदन ८४ चतुर्विद्येचयत्पुण्यंसत्यवादिषुचैवयत् ॥ स्नातएवतदाऽऽप्नोतिगंगायमुनसंगमे ८५ तत्रभोगवतीनामवासुकेस्तीर्थमुत्तमम् ॥ तत्राभिषेकंयःकुर्यात्सोऽश्वमेधफलंलभेत् ८६ तत्रहंसप्रपतनंतीर्थंत्रैलोक्यविश्रुतम् ॥ दशाश्वमेधिकंचैवगंगायांकुरुनंदन ८७ कुरुक्षेत्रसमागंगायत्रतत्रावगाहिता ॥ विशेषेणकनखलेप्रयागेपरमंमहत् ८८ यद्यकार्यशतंकृत्वाकृतंगंगावसेचनम् ॥ सर्वंतत्तस्यगंगापोदहत्यग्निरिवेंधनम् ८९ सर्वंकृतयुगेपुण्यंत्रेतायांपुष्करंस्मृतम् ॥ द्वापरेऽपिकुरुक्षेत्रंगंगाकलियुगेस्मृता ९० पुष्करेतुतपस्तप्येद्दानंदद्यान्महालये ॥ मलयेत्वग्निमारोहेद्भृगुतुंगेत्वनाशनम् ९१ पुष्करेतुकुरुक्षेत्रेगंगायांमगधेषुच ॥ स्नात्वातारयतेजंतुःसप्तसप्तवरांस्तथा ९२ पुनातिकीर्तितापापंदृष्ट्वाभद्रंप्रयच्छति ॥ अवगाढाचपीताचपुनात्यासप्तमंकुलम् ९३ यावदस्थिमनुष्यस्यगंगायाःस्पृशतेजलम् ॥ तावत्सपुरुषोराजन्स्वर्गलोकेमहीयते ९४ यथापुण्यानितीर्थानिपुण्यान्यायतनानिच ॥ उपास्यपुण्यंलब्ध्वाचभवत्यमरलोकभाक् ९५ नगंगासदृशंतीर्थंनदेवःकेशवात्परः ॥ ब्राह्मणेभ्यःपरंनास्तिएवमाहपितामहः ९६ यत्रगंगामहाराजसदेशस्तत्तपोवनम् ॥ सिद्धिक्षेत्रंचतज्ज्ञेयंगंगातीरसमाश्रितम् ९७ इदंसत्यंद्विजातीनांसाधूनामात्मजस्यच ॥ सुहृदांचजपेत्कर्णेशिष्यस्यानुगतस्यच ९८

यत्रगंगामहाराजसदेशस्तत्तपोवनं ॥ सिद्धिक्षेत्रंच विज्ञेयंगंगातीरसमाश्रितम्' इतिगंगायास्तदाश्रितस्यसिद्धिक्षेत्रस्यच विज्ञेयत्वोक्त्या तयोरेवमहत्तरत्वंदर्शितं तत्रयमुनयासंगतायाएवगंगायाअत्रग्रहणं प्रयागप्रशंसाधिकारात् प्रतिष्ठानेप्रतिष्ठितातीर्थयात्रेत्युपसंहाराच्च प्रतिष्ठानेप्रयागेसिद्धिक्षेत्रपदेनवाराणस्येवसिद्धिशब्दस्यनिरुपपदस्यमुक्तिवाचित्वात्काश्याश्चमुक्तिक्षेत्रत्वप्रसिद्धेः तदेवमध्यायचतुष्टयेऽपि भंग्यंतरेणसाक्षाद्वाकाशीकीर्तनादुक्तविधोपसंहाराच्चपुष्करगंगाप्रयागादीनांसेवनंकाशीप्राप्तिकरमिति । 'अन्यानितुपवित्राणिकाशीप्राप्तिकराणिहि ॥ काशींप्राप्यविमुच्यंतेनान्यथाकल्पकोटिभिः' इत्यादिपूर्वोदाहृतपुराणांतरसंवादेनसिद्धम् ८३ । ८४ चतुर्विद्ये चतस्रोविद्याः वेदत्रयमात्मविद्याचेतिविद्यंतेऽस्मिन्सचतुर्विद्यस्तस्मिन् ८५ । ८६ । ८७ । ८८ । ८९ । ९० । ९१ । ९२ । ९३ । ९४ । ९५ । ९६ । ९७ । ९८

९९ । १०० । १०१ । २ । ३ अगमानिअगम्यानि ४ समीक्षयादर्शनेच्छया ५ । ६ भावितैःशुद्धैःकरणैरिंद्रियैः ७ अकृतात्माअवशीकृतचित्तः ८ । ९ । ११० । ११ । १२ । १३ प्रतिष्ठानेप्रयागे प्रतिष्ठितासमाप्ता १४ अश्वमेधेति अश्वमेधफलंक्रममुक्तिस्थानं 'उषावाअश्वस्यशिरः'इत्यादिश्रुतेः सोपानस्याश्वमेधस्यतत्प्रापकत्वावगमात् सामान्यफलंत्वैंद्रपदप्राप्तिरितिप्रसिद्धम्

इदंधन्यमिदंमेध्यमिदंस्वर्ग्यमनुत्तमम् ॥ इदंपुण्यमिदंरम्यंपावनंधर्म्यमुत्तमम् ९९ महर्षीणामिदंगुह्यंसर्वपापप्रमोचनम् ॥ अधीत्यद्विजमध्येचनिर्मलःस्वर्गमाप्नुयात् १०० श्रीमत्स्वर्ग्यंतथापुण्यंसपत्नशमनंशिवम् ॥ मेधाजननमग्र्यंवैतीर्थवंशानुकीर्तनम् १ अपुत्रोलभतेपुत्रमधनोधनमाप्नुयात् ॥ महींविजयतेराजावैश्योधनमवाप्नुयात् २ शूद्रोयथेप्सितान्कामान्ब्राह्मणःपारगःपठन् ॥ यश्चेदंशृणुयान्नित्यंतीर्थपुण्यंनरःशुचिः ३ जातीःसस्मरतेबह्वीर्नाकपृष्ठेचमोदते ॥ गम्यान्यपिचतीर्थानिकीर्तितान्यगमानिच ४ मनसातानिगच्छेतसर्वतीर्थसमीक्षया ॥ एतानिवसुभिःसाध्यैरादित्यैर्मरुदश्विभिः ५ ऋषिभिर्देवकल्पैश्चस्नातानिसुकृतैषिभिः ॥ एवंत्वमपिकौरव्यविधिनाऽनेनसुव्रत ६ व्रजतीर्थानिनियतःपुण्यंपुण्येनवर्धयन् ॥ भावितैःकरणैःपूर्वमास्तिक्याच्छ्रुतिदर्शनात् ७ प्राप्यंतेतानितीर्थानिसद्भिःशास्त्रानुदर्शिभिः ॥ नाव्रतीनाकृतात्माचनाशुचिर्नचतस्करः ८ स्नातितीर्थेषुकौरव्यनचवक्रमतिर्नरः ॥ त्वयातुसम्यग्वृत्तेननित्यंधर्मार्थदर्शिना ९ पितापितामहश्चैवसर्वेचप्रपितामहाः ॥ पितामहपुरोगाश्चदेवाःसर्षिगणानृप ११० तवधर्मेणधर्मज्ञनित्यमेवाभितोषिताः ॥ अवाप्स्यसित्वंलोकान्वैवसूनांवासवोपम ॥ कीर्तिंचमहतींभीष्मप्राप्स्यसेभुविशाश्वतीम् ११ ॥ नारदउवाच ॥ एवमुक्त्वाऽभ्यनुज्ञायपुलस्त्योभगवानृषिः ॥ प्रीतःप्रीतेनमनसातत्रैवांतरधीयत १२ भीष्मश्चकुरुशार्दूलशास्त्रतत्त्वार्थदर्शिवान् ॥ पुलस्त्यवचनाच्चैवपृथिवींपरिचक्रमे १३ एवमेषामहाभागाप्रतिष्ठानेप्रतिष्ठिता ॥ तीर्थयात्रामहापुण्यासर्वपापप्रमोचनी १४ अनेनविधिनायस्तुपृथिवींसंचरिष्यति ॥ अश्वमेधशतस्याग्र्यंफलंप्रेत्यसभोक्ष्यति १५ ततश्चाष्टगुणंपार्थप्राप्स्यसेधर्ममुत्तमम् ॥ भीष्मःकुरूणांप्रवरोयथापूर्वमवाप्तवान् १६ नेताचत्वमृषीन्यस्मात्तेनतेऽष्टगुणंफलम् ॥ रक्षोगणविकीर्णानितीर्थान्येतानिभारत ॥ नगतानिमनुष्यैस्त्वाम्नतेकुरुनंदन १७ इदंदेवर्षिचरितंसर्वतीर्थाभिसंवृतम् ॥ यःपठेत्कल्यमुत्थायसर्वपापैःप्रमुच्यते १८ ऋषिमुख्याःसदायत्रवाल्मीकिस्त्वथकश्यपः ॥ आत्रेयःकुंडजठरोविश्वामित्रोऽथगौतमः १९ असितोदेवलश्चैवमार्कंडेयोथगालवः ॥ भरद्वाजोवसिष्ठश्चमुनिरुद्दालकस्तथा २० शौनकःसहपुत्रेणव्यासश्चतपतांवरः ॥ दुर्वासाश्चमुनिश्रेष्ठोजाबालिश्चमहातपाः २१ एतेऋषिवराःसर्वेत्वत्प्रतीक्षास्तपोधनाः ॥ एभिःसहमहाराजतीर्थान्येतान्यनुव्रज २२ एषतेलोमशोनाममहर्षिरमितद्युतिः ॥ समेष्यतिमहाराजतेनसार्धमनुव्रज २३ मयापिसहधर्मज्ञतीर्थान्येतान्यनुक्रमात् ॥ प्राप्स्यसेमहतींकीर्तिंयथाराजामहाभिषः २४

१५ अष्टगुणमणिमाद्यष्टगुणयुक्तं धर्मधर्मफलम् १६ हेतुमाहनेताचेति गणफलेनतुल्यफलत्वान्नेतुरनंतंफलमित्यर्थः १७ । १८ । १९ । २० । २१ । २२ । २३ महाभिषःशांतनुरूपेणावतीर्णः २४

२९ रश्मिवान्सूर्यः ११ । २० । २८ । २९ । ३० । ३१ । ३२ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचाशीतितमोऽध्यायः ॥ ८१ ॥ भ्रातृणामिति १ अमितात्माअमितधैर्यः ।
'आत्माबुद्धौधृतौदेहे'इतिकोशात् २ । ३ । ४ त्रियुगौ धर्मस्यभार्यायांमूर्तिसंज्ञायांकृतयुगेऽवतीर्णौ नरनारायणौ तावेवद्वापरांतेऽपिकेशवार्जुनावितिपुराणपुरुषावेतौ नास्मदादिवन्मानुषा
वितिभावः पुंडरीकाक्षोसाक्षाद्विष्णू । यद्वात्रीणियुगानि युगलानिषडैश्वर्याणि भगसंज्ञानिवा षडंगानिवा ययोस्तौ त्रियुगौ तानिच पुराणांतरेस्मर्यंते । 'ऐश्वर्यस्यसमग्रस्यज्ञानस्ययशसः
श्रियः ॥ वैराग्यस्यचधर्मस्यषण्णांभगइतींगना'इंगनासंज्ञा । 'सर्वज्ञतातृप्तिरनादिबोधःस्वतंत्रतानित्यमलुप्तशक्तिः ॥ अनंतशक्तिश्चविभोर्विधुज्ञाः षडाहुरंगानि महेश्वरस्य'इति । अन्येतु

यथाययातिर्धर्मात्मायथाराजापुरूरवाः ॥ तथात्वंराजशार्दूलस्वेनधर्मेणशोभसे २५ यथाभगीरथोराजायथारामश्चविश्रुतः ॥ तथात्वंसर्वराजभ्योभ्राजसेर
श्मिवानिव २६ यथामनुर्यथेक्ष्वाकुर्यथापूरुर्महायशाः ॥ यथावैन्योमहाराजतथात्वमपिविश्रुतः २७ यथाचवृत्रहासर्वान्सपत्नान्निर्दहन्पुरा ॥ त्रैलोक्यंपाल
यामासदेवराड्विगतज्वरः २८ तथाशत्रुक्षयंकृत्वात्वंप्रजाःपालयिष्यसि ॥ स्वधर्मविजितामुर्वींप्राप्यराजविलोचन २९ ख्यातिंयास्यसिधर्मेणकार्तवीर्यार्जुनोय
था ३० वैशंपायनउवाच ॥ एवमाश्वास्यराजानंनारदोभगवानृषिः ॥ अनुज्ञाप्यमहाराजतत्रैवांतरधीयत ३१ युधिष्ठिरोऽपिधर्मात्मातमेवार्थंविचिंतयन् ॥
तीर्थयात्राश्रितंपुण्यमृषीणांप्रत्यवेदयत् ३२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिपुलस्त्यतीर्थयात्रायांनारदवाक्येपंचाशीतमोऽध्यायः ॥
॥ ८५ ॥ ॥ वैशंपायनउवाच ॥ भ्रातॄणांमतमाज्ञायनारदस्यचधीमतः ॥ पितामहसमंधौम्यंप्राहराजायुधिष्ठिरः १ मयासपुरुषव्याघ्रोजिष्णुःसत्यपराक्र
मः ॥ अस्त्रहेतोर्महाबाहुरमितात्माविवासितः २ सहिवीरोऽनुरक्तश्चसमर्थश्चतपोधनः ॥ कृतीचभृशमप्यस्त्रेवासुदेवइवप्रभुः ३ अहंह्येतावुभौब्रह्मन्कृष्णाव
रिविघातिनौ ॥ अभिजानामिविक्रांतौतथाव्यासःप्रतापवान् ४ त्रियुगौपुंडरीकाक्षौवासुदेवधनंजयौ ॥ नारदोपितथावेदयोऽप्यशंसत्सदामम ५ तथाऽहम
पिजानामिनरनारायणावृषी ॥ शक्तोऽयमित्यतोमत्वामयासप्रेषितोऽर्जुनः ६ इंद्रादनवरःशक्तंसुरसूनुःसुराधिपम् ॥ द्रष्टुमस्त्राणिचादातुमिंद्रादितिविवासि
तः ७ भीष्मद्रोणावतिरथौकृपोद्रौणिश्चदुर्जयः ॥ धृतराष्ट्रस्यपुत्रेणवृतायुधिमहारथाः ८ सर्वेवेदविदःशूराःसर्वास्त्रविदुषस्तथा ॥ योद्धुकामाश्चपार्थेनसततं
येमहाबलाः ॥ सचदिव्यास्त्रवित्कर्णःसूतपुत्रोमहारथः ९ योऽस्त्रवेगानिलबलःशरार्चिस्तलनिःस्वनः ॥ रजोधूमोऽस्त्रसंपातोधार्तराष्ट्रानिलोद्धतः १० निसृष्ट
इवकालेनयुगांतेज्वलनोमहान् ॥ ममसैन्यमयंकक्षंप्रधक्ष्यतिनसंशयः ११ तंसकृष्णानिलोद्धूतोदिव्यास्त्रज्वलनोमहान् ॥ श्वेतवाजिबलाकाभृद्गांडीवेंद्रायुधो
ल्बणः १२ संरब्धःशरधाराभिःसुदीप्तंकर्णपावकम् ॥ अर्जुनोदीरितोमेघःशमयिष्यतिसंयुगे १३

ज्ञानैश्वर्ये वीर्यबले तेजःपराक्रमौ चेतित्रीणियुगळानीत्याहुः तत्रज्ञानमनपरोधंत्रैकालिकार्थस्फुरणम् । ऐश्वर्यमिच्छानभिघातः । बलमुपक्रांतनिर्वाहः । वीर्यंकाममंत्रशक्तिः । तेजःपराभि
घातः । पराक्रमोयथाकालमुत्थानमितितद्व्याचक्षतेतत्तन्निर्मूलं पुनरुक्तिदोषादयुक्तंच ५ । ६ अनवरोऽन्यूनः ७ । ८ अस्त्रविदुषोऽस्त्रविद्वांसः ९ रजइति रजःकार्यःक्रोधःसएवधूमोयस्य
धार्तराष्ट्रैरनिलैरिवउद्धतउद्दीपितः १० कक्षतृणवनम् ११ उल्बणोदुःसहः १२ अर्जुनोदीरितोऽर्जुननामा १३

१४ अलं जेतुंपर्याप्तः दुःशब्दःपक्षांतरे प्रतिक्रियाजयोपायःअर्जुनंविनाऽरयो दुर्जयाइत्यर्थः १५ द्रष्टारोद्रष्टयामः १६ अवधानंध्या स्थम् १७ । १८ । १९ । २० । २१ ॥ ॥ इत्यारण्यके

ससाक्षादेवसर्वाणिशक्रात्परपुरंजयः ॥ दिव्यान्यस्त्राणिबीभत्सुस्ततश्चप्रतिपत्स्यते १४ अलंसतेषांसर्वेषामितिमेधीयतेमतिः ॥ नास्तित्वतिकृतार्थानांरणे
ऽरीणांप्रतिक्रिया १५ तेवयंपांडवंसर्वेगृहीतास्त्रमरिंदमम् ॥ द्रष्टारोनहिबीभत्सुर्भारमुद्यम्यसीदति १६ वयंतुतमृतेवीरंवनेऽस्मिन्द्विपदांवर ॥ अवधानंनग
च्छामःकाम्यकेसहकृष्णया १७ भवानन्यद्वनंसाधुबह्वन्नंफलवच्छुचि ॥ आख्यातुरमणीयंचसेवितंपुण्यकर्मभिः १८ यत्रकंचिद्वयंकालंवसंतःसत्यविक्रमम् ॥
प्रतीक्षामोऽर्जुनंवीरंवृष्टिकामाइवांबुदम् १९ विविधानाश्रमान्कांश्चिद्द्विजातिभ्यःप्रतिश्रुतान् ॥ सरांसिसरितश्चैवरमणीयांश्चपर्वतान् २० आचक्ष्वनहिमेब्र
ह्मन्रोचतेतमृतेऽर्जुनम् ॥ वनेऽस्मिन्काम्यकेवासोगच्छामोऽन्यांदिशंप्रति २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिधौम्यतीर्थयात्रायांषडशी
तितमोऽध्यायः ॥ ८६ ॥ ७ ॥ वैशंपायनउवाच ॥ तान्सर्वानुत्सुकान्दृष्ट्वापांडवान्दीनचेतसः ॥ आश्वासयंस्तथाधौम्योबृहस्पतिसमोऽब्रवीत् १ ब्राह्मणा
नुमतान्पुण्यानाश्रमान्भरतर्षभ ॥ दिशस्तीर्थानिशैलांश्चशृणुमेवदतोऽनघ २ यान्श्रुत्वागदतोराजन्विशोकोभविताऽसिह ॥ द्रौपद्याचानयासार्धंभ्रातृभि
श्चनरेश्वर ३ श्रवणाच्चैवतेषांत्वंपुण्यमाप्स्यसिपांडव ॥ गत्वाशतगुणंचैवतेभ्यएवनरोत्तम ४ पूर्वंप्राचींदिशंराजन्राजर्षिगणसेविताम् ॥ रम्यांतेकथयिष्यामि
युधिष्ठिरयथास्मृति ५ तस्यांदेवर्षिजुष्टायांनैमिषंनामभारत ॥ यत्रतीर्थानिदेवानांपुण्यानिचपृथक्पृथक् ६ यत्रसागोमतीपुण्यारम्यादेवर्षिसेविता ॥ यज्ञ
भूमिश्चदेवानांशामित्रंचविवस्वतः ७ तस्यांगिरिवरःपुण्योगयोराजर्षिसत्कृतः ॥ शिवंब्रह्मसरोयत्रसेवितंत्रिदशर्षिभिः ८ यदर्थेपुरुषव्याघ्रकीर्तयंतिपुरात
नाः ॥ एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजेत् ९ यजेतवाऽश्वमेधेननीलंवावृषमुत्सृजेत् ॥ उत्तारयातिसंतत्यादशपूर्वान्दशावरान् १० महानदीचतत्रैवतथा
गयशिरोनृप ॥ यत्रासौकीर्त्यतेविप्रैरक्षय्यकरणोवटः ११ यत्रदत्तंपितृभ्योऽन्नमक्षय्यंभवतिप्रभो ॥ साचपुण्यजलातत्रफल्गुनामामहानदी १२ बहुमूलफ
लाचापिकौशिकीभरतर्षभ ॥ विश्वामित्रोऽध्यगाद्यत्रब्राह्मणत्वंतपोधनः १३ गंगायत्रनदीपुण्यायस्यास्तीरेभगीरथः ॥ अयजत्तत्रबहुभिःक्रतुभिर्भूरिदक्षिणैः
१४ पंचालेषुचकौरव्यकथयंत्युत्पलावनम् ॥ विश्वामित्रोऽयजद्यत्रपुत्रेणसहकौशिकः १५ यत्रानुवंशंभगवान्जामदग्न्यस्तथाजगौ ॥ विश्वामित्रस्यतांदृष्ट्वा
विभूतिमतिमानुषीम् १६ कान्यकुब्जेऽपिबत्सोममिंद्रेणसहकौशिकः ॥ ततःक्षत्रादपाक्रामद्ब्राह्मणोऽस्मीतिचाब्रवीत् १७

पर्वणिनैलकंठीयेभारतभावदीपेषडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ तानिति १ । २ । ३ । ४ । ५ । ६ शामित्रंशमितुःकर्म यज्ञेपशुमारणं विवस्वतःपुत्रस्ययमस्येतिशेषः ७ तीर्थांतरमा
हतस्यामिति तस्यांप्राच्यांदिशि राजर्षिरपि गयसंज्ञः ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७

पवित्रमिति पविर्वज्रंतत्तुल्यंजन्ममरणादिदुःखंतस्मात्त्रायतइतिपवित्रं अतएवऋषिभिर्जुष्टंसेवितं पुण्यंधर्मवृद्धिहेतुः पावनंपापनाशनम् १८ । १९ । २० । २१ । २२ यत्रभागीरथीति सरसि मणिकर्णिकाख्येप्रविष्टाआसीदं ब्रह्मशालाब्रह्मोपलब्धिसदृशंवाराणस्याख्यम् 'अविमुक्तंवै कुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनम्' इति श्रुतिप्रसिद्धम् २३ आकीर्णान्व्याप्तामंगलीयो

पवित्रमृषिभिर्जुष्टंपुण्यंपावनमुत्तमम् ॥ गंगायमुनयोर्वीरसंगमंलोकविश्रुतम् १८ यत्रायजतभूतात्मापूर्वमेवपितामहः ॥ प्रयागमितिविख्यातंतस्माद्भरतसत्त
म १९ अगस्त्यस्यतुराजेंद्रतत्राश्रमवरोनृप ॥ तत्तथातापसारण्यंतापसैरुपशोभितम् २० हिरण्यबिंदुःकथितोगिरौकालंजरेमहान् ॥ आगस्त्यपर्वतोरम्यः
पुण्योगिरिवरःशिवः २१ महेंद्रोनामकौरव्यभार्गवस्यमहात्मनः ॥ अयजत्तत्रकौंतेयपूर्वमेवपितामहः २२ यत्रभागीरथीपुण्यासरस्यासीद्युधिष्ठिर ॥ यत्रसा
ब्रह्मशालेतिपुण्याख्याताविशांपते २३ धूतपाप्मभिराकीर्णापुण्यंतस्याश्चदर्शनम् ॥ पवित्रोमंगलीयश्चख्यातोलोकेमहात्मनः २४ केदारश्चमतंगस्यमहानाश्रम
उत्तमः ॥ कुंडोदःपर्वतोरम्योबहुमूलफलोदकः २५ नैषधस्तृषितोयत्रजलंशर्मचलब्धवान् ॥ यत्रदेववनंपुण्यंतापसैरुपशोभितम् २६ बाहुदाचनदीयत्रनंदाचगि
रिमूर्धनि ॥ तीर्थानिसरितःशैलाःपुण्यान्यायतनानिच २७ प्राच्यांदिशिमहाराजकीर्तितानिमयातव ॥ तिसृष्वन्यानिपुण्यानिदिक्षुतीर्थानिमेशृणु ॥ सरितःपर्व
ताश्चैवपुण्यान्यायतनानिच २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप० धौम्यतीर्थयात्रायांसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ धौम्यउवाच ॥ दक्षिण
स्यांतुपुण्यानिशृणुतीर्थानिभारत ॥ विस्तरेणयथाबुद्धिकीर्त्यमानानितानिवै १ यस्यामाख्यायतेपुण्यादिशिगोदावरीनदी ॥ बह्वारामाबहुजलातापसाचरिता
शिवा २ वेणाभीमरथीचैवनद्यौपापभयापहे ॥ मृगद्विजसमाकीर्णेतापसालयभूषिते ३ राजर्षेस्तस्यचसरिन्नृगस्यभरतर्षभ ॥ रम्यतीर्थाबहुजलापयोष्णीद्विज
सेविता ४ अपिचात्रमहायोगीमार्कंडेयोमहायशाः ॥ अनुवंश्यांजगौगाथांनृपस्यधरणीपतेः ५ नृगस्ययजमानस्यप्रत्यक्षमितिनःश्रुतम् ॥ अमाद्यदिंद्रःसोमे
नदक्षिणाभिर्द्विजातयः ६ पयोष्ण्यांयजमानस्यवाराहेतीर्थउत्तमे ॥ उद्धृतंभूतलस्थंवावायुनासमुदीरितम् ॥ पयोष्ण्याहरतेतोयंपापमामरणांतिकम् ७ स्व
र्गादुत्तुंगममलंविषाणंयत्रशूलिनः ॥ स्वमात्मविहितंदृष्ट्वामर्त्यःशिवपुरंव्रजेत् ८ एकतःसरितःसर्वागंगाद्याःसलिलोच्चयाः ॥ पयोष्णीचैकतःपुण्यातीर्थेभ्योहि
मतामम ९ माठरस्यवनंपुण्यंबहुमूलफलंशिवम् ॥ यूपश्चभरतश्रेष्ठवरुणस्रोतसेगिरौ १० प्रवेण्युत्तरमार्गेतुपुण्येकण्वाश्रमेतथा ॥ तापसानामरण्यानिकीर्ति
तानियथाश्रुति ११ वेदीशूर्पारकेतातजमदग्नेर्महात्मनः ॥ रम्यापाषाणतीर्थाचपुनश्चंद्राचभारत १२ अशोकतीर्थंतत्रैवकौंतेयबहुलाश्रमम् ॥ अगस्त्यती
र्थंपांड्येषुवारुणंचयुधिष्ठिर १३

मंगलावहः २४ केदारोऽपि काश्यामेव २५ नैषधोनलः तत्रैवलोलार्कदक्षिणेनलग्रामस्यदर्शनात् तीर्थांतरमाह यत्रदेववनमिति २६।२७ । २८ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदी
पेसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ दक्षिणस्यामिति १ । २ । ३ । ४ अनुवंश्यांवंशानुरूपां नवनृगमात्रानुरूपाम् ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३

कुमार्यः कुमारीवाचरंतो बाल्याद्रागादिहीनाअपिपरमेवपतिंप्रार्थयंतोभगवद्भक्ताइत्यर्थः अतएवश्रीभागवतेद्रविडेष्वेवभगवद्भक्तभूयस्त्वंस्मर्यते पांड्येषुद्रविडविशेषेषु १४ महन्मोक्षफलम् १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ तप्तांगःकृततपस्कः २३ सनातनोधर्मः 'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनम्' इतियाज्ञव

कुमार्यःकथिताःपुण्याःपांड्येष्वेवनरर्षभ ॥ ताम्रपर्णींतुकौंतेयकीर्तयिष्यामितांशृणु १४ यत्रदेवैस्तपस्तप्तंमहदिच्छाद्भिराश्रमे ॥ गोकर्णइतिविख्यातस्त्रिषुलोके
षुभारत १५ शीततोयोबहुजलःपुण्यस्ताताशिवःशुभः ॥ हृदःपरमदुष्प्रापोमानुषैरकृतात्मभिः १६ तत्रवृक्षतृणाद्यैश्चसंपन्नःफलमूलवान् ॥ आश्रमोऽगस्त्य
शिष्यस्यपुण्योदेवसमोगिरिः १७ वैदूर्यपर्वतस्तत्रश्रीमान्मणिमयःशिवः ॥ अगस्त्यस्याश्रमश्चैवबहुमूलफलोदकः १८ सुराष्ट्रेष्वपिवक्ष्यामिपुण्यान्यायतना
निच ॥ आश्रमान्सरितश्चैवसरांसिचनराधिप १९ चमसोद्भेदनंविप्रास्तत्रापिकथयंत्युत ॥ प्रभासंचोदधौतीर्थंत्रिदशानांयुधिष्ठिर २० तत्रपिंडारकंनाम
तापसाचरितंशिवम् ॥ उज्जयंतश्चशिखरीक्षिप्रंसिद्धिकरोमहान् २१ तत्रदेवर्षिवर्येणनारदेनानुकीर्तितः ॥ पूराणःश्रूयतेश्लोकस्तंनिबोधयुधिष्ठिर २२ पु
ण्येगिरौसुराष्ट्रेषुमृगपक्षिनिषेविते ॥ उज्जयंतेस्मतप्तांगोनाकपृष्ठेमहीयते २३ पुण्याद्वारवतीतत्रयत्रासौमधुसूदनः ॥ साक्षाद्देवःपूराणोसौसहिधर्मःसनातनः
२४ येचवेदविदोविप्रायेचाध्यात्मविदोजनाः ॥ तेवदंतिमहात्मानंकृष्णंधर्मंसनातनम् २५ पवित्राणांहिगोविंदःपवित्रंपरमुच्यते ॥ पुण्यानामपिपुण्योऽसौमं
गलानांचमंगलम् ॥ त्रैलोक्येपुंडरीकाक्षोदेवदेवःसनातनः २६ अव्ययात्माव्ययात्माचक्षेत्रज्ञःपरमेश्वरः ॥ आस्तेहरिरचिंत्यात्मातत्रैवमधुसूदनः २७
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिधौम्यतीर्थयात्रायामष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ धौम्यउवाच ॥ आनर्तेषुप्रतीच्यांवैकीर्तयि
ष्यामितेदिशि ॥ यानितत्रपवित्राणिपुण्यान्यायतनानिच १ प्रियंग्वाम्रवणोपेतावानीरफलमालिनी ॥ प्रत्यक्स्रोतानदीपुण्यानर्मदातत्रभारत २ त्रैलोक्ये
यानितीर्थानिपुण्यान्यायतनानिच ॥ सरिद्वनानिशैलेंद्रादेवाश्चसपितामहाः ३ नर्मदायांकुरुश्रेष्ठसहसिद्धर्षिचारणैः ॥ स्नातुमायांतिपुण्यौघैःसदावा
रिभारत ४ निकेतःश्रूयतेपुण्योयत्रविश्रवसोमुनेः ॥ जज्ञेधनपतिर्यत्रकुबेरोनरवाहनः ५ वैदूर्यशिखरोनामपुण्योगिरिवरःशिवः ॥ नित्यपुष्पफ
लास्तत्रपादपाहरितच्छदाः ६ तस्यशैलस्यशिखरेसरःपुण्यंमहीपते ॥ फुल्लपद्मंमहाराजदेवगंधर्वसेवितम् ७ बह्वाश्चर्यंमहाराजदृश्यतेतत्रपर्वते ॥
पुण्येस्वर्गोपमेचैवदेवर्षिगणसेविते ८

ल्क्योक्तः तत्रात्मदर्शनाख्यस्यधर्मस्यात्मनोऽनन्यत्वात्सहिधर्मइति सामानाधिकरण्यम् २४ एतदेवस्पष्टयति येचेत्यादिना २५ । २६ अव्ययात्माअक्षरस्वरूपी व्ययात्माक्षरस्वरूपी क्षेत्रज्ञोजीवःसएवपरमेश्वरः 'क्षेत्रज्ञंचापिमांविद्धि' इतिभगवद्वचनात् क्षेत्रं जीवईशश्चत्रयमप्यव्ययाख्यंब्रह्मैवेत्यर्थः 'भोक्ताभोग्यंप्रेरितारंचमत्वासर्वंप्रोक्तंत्रिविधंब्रह्मवेतत्' इतिश्रुतेः २७ ॥ इत्यारण्यकेपर्वणि० नै० भा० अष्टाशीतितमोऽध्यायः ॥ ८८ ॥ आनर्तेषुप
श्चिमाश्रितेषु अवंतिष्वितिपाठेअवंतिषुप्रतीच्यांचोतिविशेशब्दार्थः १ प्रत्यक्स्रोतापश्चिमवाहिनी २ । ३ । ४ । ५ । ६ । ७ बह्वाश्चर्यवेदध्वनिश्रवणादि ८

९ । १० । ११ । १२ । १३ शाम्यतांशमवतां १४ । १५ वैखानसानांहैरण्यगर्भाणां कर्ममार्गेत्यक्ताध्यानपराणामित्यर्थः १६ संश्रयार्थायवासार्थं १७ अभिकामस्यगंतुमिच्छोः १८
 ॥ इत्यारण्यकेनै॰ भा॰ ऊननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥ उदीच्यामिति १ मंत्रयतः कथयतः कथाप्रतिग्रहः कथायामनासिध रणं २ । ३ सारस्वतैःसरस्वत्यांमाद्यैः

हृदिनीपुण्यतीर्थाचराजर्षेस्तत्रवैसरित् ॥ विश्वामित्रनदीराजन्पुण्यापरपुरंजय ९ यस्यास्तीरेसतांमध्येययातिर्नहुषात्मजः ॥ पपातसपुनर्लोकाम्लेभेधर्मा न्सनातनान् १० तत्रपुण्योह्रदःख्यातोमैनाकश्चैवपर्वतः ॥ बहुमूलफलोपेतस्त्वसितोनामपर्वतः ११ आश्रमःकक्षसेनस्यपुण्यस्तत्रयुधिष्ठिर ॥ च्यवनस्या श्रमश्चैवविख्यातस्तत्रपांडव १२ तत्राल्पेनैवसिद्ध्यंतिमानवास्तपसाविभो ॥ जंबूमार्गोमहाराजऋषीणांभावितात्मनाम् १३ आश्रमःशाम्यतांश्रेष्ठमृगद्वि जनिषेवितः ॥ ततःपुण्यतमाराजन्सततंतापसैर्युता १४ केतुमालाचमेध्याचगंगाद्वारंचभूमिप ॥ ख्यातंचसैंधवारण्यंपुण्यंद्विजनिषेवितम् १५ पितामह सरःपुण्यंपुष्करंनामनामतः ॥ वैखानसानांसिद्धानामृषीणामाश्रमःप्रियः १६ अप्यत्रसंश्रयार्थायप्रजापतिरथोजगौ ॥ पुष्करेषुकुरुश्रेष्ठगाथांसुकृतिनांवर १७ मनसाऽप्यभिकामस्यपुष्कराणिमनस्विनः ॥ विप्रणश्यंतिपापानिनाकपृष्ठेचमोदते १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिधौम्यतीर्थे यात्रायामूननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥ ॥ धौम्यउवाच ॥ उदीच्यांराजशार्दूलदिशिपुण्यानियानिवै ॥ तानितेकीर्तयिष्यामिपुण्या न्यायतनानिच १ शृणुष्वावहितोभूत्वाममममंत्रयतःप्रभो ॥ कथाप्रतिग्रहोवीरश्रद्धांजनयतेशुभां २ सरस्वतीमहापुण्याह्रदिनीतीर्थमालिनी ॥ समुद्रगामहावे गायमुनायत्रपांडव ३ यत्रपुण्यतरंतीर्थंप्लक्षावतरणंशुभम् ॥ यत्रसारस्वतैरिष्ट्वागच्छंत्यवभृथैर्द्विजाः ४ पुण्यंचाख्यायतेदिव्यंशिवमग्निशिरोऽनघ ॥ सहदेवो ऽयजद्यत्रशम्याक्षेपेणभारत ५ एतस्मिन्नेवचार्थेऽसौइंद्रगीतायुधिष्ठिर ॥ गाथाचरतिलोकेऽस्मिन्गीयमानाद्विजातिभिः ६ अग्नयःसहदेवेनसेवितायमुना मनु ॥ तेतस्यकुरुशार्दूलसहस्रशतदक्षिणाः ७ तत्रैवभरतोराजाचक्रवर्तीमहायशाः ॥ विंशतिःसप्तचाष्टौचहयमेधानुपाहरत् ८ कामकृद्योद्विजातीनांश्रुत स्तातयथापुरा ॥ अत्यंतमाश्रमःपुण्यःशरभंगस्यविश्रुतः ९ सरस्वतीनदीसद्भिःसततंपार्थपूजिता ॥ वालखिल्यैर्महाराजयत्रेष्टमृषिभिःपुरा १० दृषद्वतीम हापुण्यायत्रख्यातायुधिष्ठिर ॥ न्यग्रोधाख्यस्तुपांचाल्यःपांचाल्योद्विपदांवर ११ दाल्भ्यघोषश्चदाल्भ्यश्चधरणीस्थोमहात्मनः ॥ कौंतेयानंतयशसःसुव्रत स्यामितौजसः १२ आश्रमःख्यायतेपुण्यस्त्रिषुलोकेषुविश्रुतः ॥ एतावर्णाववर्णौचविश्रुतौमनुजाधिप १३

४ सहदेवःसृंजयपुत्रः शम्याक्षेपेणबलवताक्षिप्ताशम्यालगुडविशेषोयावद्दूरंपतेत्तावान् यज्ञमंडपो यस्मिन्यज्ञे सशम्याक्षेपस्तेन ५ । ६ । ७ विंशतिः विंशतिवारमावर्तिताः सप्तअष्टौचेति अष्टाचत्वारिंशदधिकंशतं । त्रयस्त्रिंशच्छतंराजेतितु श्रुतिः विंशतिमितिपाठेऽस्यंतहीनसंख्यत्वात्पंचत्रिंशत् ८ । ९ । १० । ११ । १२ एताकृष्णमृगी तद्वर्णौकृष्णौनरनारायणावि त्यर्थः वरतुतस्त्ववर्णौ वर्णाःलोहितशुक्लकृष्णाः रजःसत्वतमांसितद्रहितौ १३

१४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ विशालानामतः बदरीमनु बदरीसमीपे २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ विहरिष्यसिपरिह

वेदज्ञौवेदविद्वांसौवेदविद्याविदावुभौ ॥ ईजातेक्रतुभिर्मुख्यैःपुण्यैर्भरतसत्तम १४ समेत्यबहुशोदेवाःसेंद्राःसवरुणाःपुरा ॥ विशाखयूपेऽतप्यंततेनपुण्यतमश्च सः १५ ऋषिर्महान्महाभागोजमदग्निर्महायशाः ॥ पलाशकेषुपुण्येषुरम्येष्वयजतप्रभुः १६ यत्रसर्वाःसरिच्छ्रेष्ठाःसाक्षात्तमृषिसत्तमम् ॥ स्वंस्वंतोयमुपादाय परिवार्योपतस्थिरे १७ अपिचात्रमहाराजस्वयंविश्वावसुर्जगौ ॥ इमंश्लोकंतदावीरप्रेक्ष्यदीक्षांमहात्मनः १८ यजमानस्यवैदेवान्जमदग्नेर्महात्मनः ॥ आग म्यसरितोविप्रान्मधुनासमतर्पयन् १९ गंधर्वयक्षरक्षोभिरप्सरोभिश्चसेवितम् ॥ किरातकिन्नरावासंशैलंशिखरिणांवरम् २० बिभेदतरसागंगागंगाद्वारंयुधि ष्ठिर ॥ पुण्यंतत्ख्यायतेराजन्ब्रह्मर्षिगणसेवितम् २१ सनत्कुमारःकौरव्यपुण्यंकनखलंतथा ॥ पर्वतश्चपुरुर्नामयत्रयातःपुरूरवाः २२ भृगुर्यत्रतपस्तेपेमह र्षिगणसेविते ॥ राजन्सआश्रमःख्यातोभृगुतुंगोमहागिरिः २३ यःसभूतंभविष्यच्चभवच्चभरतर्षभ ॥ नारायणःप्रभुर्विष्णुःशाश्वतःपुरुषोत्तमः २४ तस्यातियशसः पुण्यांविशालांबदरीमनु ॥ आश्रमःख्यायतेपुण्यस्त्रिषुलोकेषुविश्रुतः २५ उष्णतोयवहागंगाशीततोयवहापुरा ॥ सुवर्णसिकताराजन्विशालांबदरीमनु २६ ऋषयोयत्रदेवाश्चमहाभागामहौजसः ॥ प्राप्यानित्यंनमस्यंतिदेवंनारायणंप्रभुम् २७ यत्रनारायणोदेवःपरमात्मासनातनः ॥ तत्रकृत्स्नंजगत्सर्वंतीर्थान्यायत नानिच २८ तत्पुण्यंपरमंब्रह्मतत्तीर्थंतत्तपोवनम् ॥ तत्परंपरमंदेवंभूतानांपरमेश्वरम् २९ शाश्वतंपरमंचैवधातारंपरमंपदम् ॥ यंविदित्वानशोचंतिविद्वां सःशास्त्रदृष्टयः ३० तत्रदेवर्षयःसिद्धाःसर्वेचैवतपोधनाः ॥ आदिदेवोमहायोगीयत्रास्तेमधुसूदनः ३१ पुण्यानामपितत्पुण्यमत्रतेसंशयोऽस्तुमा ॥ एतानि राजन्पुण्यानिपृथिव्यांपृथिवीपते ३२ कीर्तितानिनरश्रेष्ठतीर्थान्यायतनानिच ॥ एतानिवसुभिःसाध्यैरादित्यैर्मरुदश्विभिः ३३ ऋषिभिर्देवकल्पैश्चसेविता निमहात्मभिः ॥ चरन्नेतानिकौंतेयसहितोब्राह्मणर्षभैः ॥ भ्रातृभिश्चमहाभागैरुत्कंठांविहरिष्यसि ३४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणि धौम्यतीर्थयात्रायांनवतितमोऽध्यायः ॥ ९० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ एवंसंभाषमाणेतुधौम्येकौरवनंदन ॥ लो
२८ मशःसमहातेजाऋषिस्तत्राजगामह १ तंपांडवाग्रजोराजासगणोब्राह्मणाश्चते ॥ उपातिष्ठन्महाभागंदिविशक्रमिवामराः २ समभ्यर्च्ययथान्यायंधर्मपुत्रोयु धिष्ठिरः ॥ पप्रच्छागमनेहेतुमटनेचप्रयोजनम् ३ सपृष्टःपांडुपुत्रेणप्रीयमाणोमहामनाः ॥ उवाचश्लक्ष्णयावाचाहर्षयन्निवपांडवान् ४ संचरन्नस्मिकौंतेयस र्वांल्लोकान्यदृच्छया ॥ गतःशक्रस्यभवनंतत्रापश्यंसुरेश्वरम् ५ तवचभ्रातरंवीरमपश्यंसव्यसाचिनम् ॥ शक्रस्यार्धासनगतंतत्रमेविस्मयोमहान् ६

रिष्यसि ३४ ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपे नवतितमोऽध्यायः ॥ ९० ॥ ॥ ७ ॥ ॥ एवमिति १ । २ । ३ । ४ । ५ । ६

७ । ८ । ९ । १० । ११ समंत्रंप्रयोगादौमंत्रसहितं । संहारस्त्यक्तस्याकर्षणं । प्रायश्चित्तंअस्त्राग्निनानिरपराधानांदाहेयोदोषस्तस्यशोधनं । मंगलंदग्धानामेवारामादीनांपुनर्विकसनं । वज्रंवज्रवदप्रतीकार्यं रौद्रमेव १२ । १३ गीतंलौकिकंगानं सामऋक्षुगानं १४ अनुजस्यभीमस्यानुजः १५ । १६ । १७ सुरकार्यंनिवातकवचादीनांवधः । दिवौकसैरितिबहुलंछंदसीत्यैस् १८ । १९ सत्यसंधं सत्यप्रतिज्ञं २० वरवार्णिनमतिसुंदरं २१ महेश्वरसुतप्रख्यं स्कंदतुल्यं अतिस्कंधमुन्नतांसं । ज्ञानगतिस्कंधमितिपाठे योगिश्रेष्ठं २२ । २३ अपहरिष्यामिकवचकुंडला

आसीत्पुरुषशार्दूलदृष्ट्वापार्थंतथागतम् ॥ आहमांतत्रदेवेशोगच्छपांडुसुतान्प्रति ७ सोऽहमभ्यागतःक्षिप्रंदिदृक्षुस्त्वांसहानुजम् ॥ वचनात्पुरुहूतस्यपार्थस्य
चमहात्मनः ८ आख्यास्येतेप्रियंतातमहत्पांडवनंदन ॥ ऋषिभिःसहितोराजन्कृष्णयाचैवतच्छृणु ९ यत्त्वयोक्तोमहाबाहुरस्त्रार्थंभरतर्षभ ॥ तदस्त्रमाप्तं
पार्थेनरुद्रादप्रतिमंविभो १० यत्तद्ब्रह्मशिरोनामतपसारुद्रमागमत् ॥ अमृतादुत्थितंरौद्रंतल्लब्धंसव्यसाचिना ११ तत्समंत्रंससंहारंसप्रायश्चित्तमंगलम् ॥ व
ज्रमस्त्राणिचान्यानिदंडादीनियुधिष्ठिर १२ यमात्कुबेराद्वरुणादिंद्राच्चकुरुनंदन ॥ अस्त्राण्यधीतवान्पार्थोदिव्यान्यमितविक्रमः १३ विश्वावसोस्तुतनया
द्गीतंनृत्यंचसामच ॥ वादित्रंचयथान्यायंप्रत्यविंदद्यथाविधि १४ एवंकृतास्त्रःकौंतेयोगांधर्वंवेदमाप्तवान् ॥ सुखंवसतिबीभत्सुरनुजस्यानुजस्तव १५ यदर्थं
मांसुरश्रेष्ठइदंवचनमब्रवीत् ॥ तच्चतेकथयिष्यामियुधिष्ठिरनिबोधमे १६ भवान्मनुष्यलोकेऽपिगमिष्यतिनसंशयः ॥ ब्रूयाद्युधिष्ठिरंतत्रवचनान्मेद्विजोत्तम १७
आगमिष्यतितेभ्राताकृतास्त्रःक्षिप्रमर्जुनः ॥ सुरकार्यंमहत्कृत्वायदशक्यंदिवौकसैः १८ तपसाऽपित्वमात्मानंयोजयभ्रातृभिःसह ॥ तपसोहिपरंनास्तितपसा
विंदतेमहत् १९ अहंचकर्णंजानामियथावद्भरतर्षभ ॥ सत्यसंधंमहोत्साहंमहावीर्यंमहाबलम् २० महाहवेष्वप्रतिमंमहायुद्धविशारदम् ॥ महाधनुर्धरंवीरंमहा
स्त्रंवरवर्णिनम् २१ महेश्वरसुतप्रख्यमादित्यतनयंप्रभुम् ॥ तथार्जुनमतिस्कंधंसहजोल्बणपौरुषम् २२ नसपार्थस्यसंग्रामेकलामर्हतिषोडशीम् ॥ यच्चापिते
भयंकर्णान्मनसिस्थमरिंदम २३ तच्चाप्यपहरिष्यामिसव्यसाचिन्युपागते ॥ यच्चतेमानसंवीरतीर्थयात्रामिमांप्रति ॥ समहर्षिर्लोमशस्तेकथयिष्यत्यसंश
यम् २४ यच्चकिंचित्तपोयुक्तंफलंतीर्थेषुभारत ॥ ब्रह्मर्षिरेषब्रूयात्तेनतच्छ्रद्धेयमन्यथा २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशसंवा
देएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ ७ ॥ ॥ लोमशउवाच ॥ धनंजयेनचाप्युक्तंयत्तच्छृणुयुधिष्ठिर ॥ युधिष्ठिरंभ्रातरंमेयोजयेर्धर्म्ययाश्रिया १
त्वंहिधर्मान्परान्वेत्थतपांसिचतपोधन ॥ श्रीमतांचापिजानासिधर्मंराज्ञांसनातनम् २ सभवान्परमंवेदपावनंपुरुषंप्रति ॥ तेनसंयोजयेथास्त्वंतीर्थपुण्येनपां
डवान् ३ यथातीर्थानिगच्छेतगाश्चदद्यात्सपार्थिवः ॥ तथासर्वात्मनाकार्यमितिमामर्जुनोऽब्रवीत् ४

पहरणेइंद्रेणकृतेसति तदर्थीद्रस्यांतःप्रविश्यसंपादयिष्यामि आर्षेणाभेददर्शनेनाहंमनुरभवमित्यादिवदहमेवेंद्ररूपीकरिष्यामीति २४ तत्श्रद्धेयंनत्वन्यथागृहीतव्यमित्यर्थः २५ इत्या
रण्यकेपर्वणिनैलकंठीयेभारतभावदीपे एकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ धनंजयेनेति योजयेः योजय धर्म्यया धर्मादनपेतया १ । २ पुरुषंप्रतिपुरुषस्येत्यर्थः ३ । ४

५ । ६ । ७ । ८ द्विःद्विवारं तृतीयंतृतीयवारं ९ । १० । ११ सत्यसंगरःसत्ययज्ञः यान्येवसंग्रामनामानितान्येवयज्ञनामानीतियास्कवचनात् १२ । १३ । १४ । १५ । १६ । १७ लघुरल्प

भवताचानुगुप्तोऽसौचरेत्तीर्थानिसर्वशः ॥ रक्षोभ्योरक्षितव्यश्चदुर्गेषुविषमेषुच ५ दधीचइवदेवेंद्रंयथाचाप्यंगिरारविम् ॥ तथारक्षस्वकौंतेयान्राक्षसेभ्योद्वि
जोत्तम ६ यातुधानाहिबहवोराक्षसाःपर्वतोपमाः ॥ त्वयाऽभिगुप्तंकौंतेयंनविवर्तेयुरंतिकम् ७ सोऽहमिंद्रस्यवचनान्नियोगादर्जुनस्यच ॥ रक्षमाणोभयेभ्यस्त्वां
चरिष्यामित्वयासह ८ द्विस्तीर्थानिमयापूर्वंदृष्टानिकुरुनंदन ॥ इदंतृतीयंद्रक्ष्यामितान्येवभवतासह ९ इयंराजर्षिभिर्यातापुण्यकृद्भिर्युधिष्ठिर ॥ मन्वादि
भिर्महाराजतीर्थयात्राभयापहा १० नानृजुर्नाकृतात्माचनाविद्योनचपापकृत् ॥ स्नातितीर्थेषुकौरव्यनचवक्रमतिर्नरः ११ त्वंतुधर्ममतिर्नित्यंधर्मज्ञःसत्यसंगरः ॥
विमुक्तःसर्वसंगेभ्योभूयएवभविष्यसि १२ यथाभगीरथोराजाराजानश्चगयादयः ॥ यथाययातिःकौंतेयतथात्वमपिपांडव १३ ॥युधिष्ठिरउवाच ॥ नहर्षात्संप्र
पश्यामिवाक्यस्यास्योत्तरंक्वचित् ॥ स्मरेद्धिदेवराजोयंकोनामाभ्यधिकस्ततः १४ भवतासंगमोयस्यभ्राताचैवधनंजयः ॥ वासवःस्मरतेयस्यकोनामाभ्यधि
कस्ततः १५ यच्चमांभगवानाहतीर्थानांदर्शनंप्रति ॥ धौम्यस्यवचनादेषाबुद्धिःपूर्वंकृतैवमे १६ तद्यदामन्यसेब्रह्मन्गमनंतीर्थदर्शने ॥ तदैवगंतास्मितीर्था
न्येषमेनिश्चयःपरः १७ ॥ वैशंपायनउवाच ॥ गमनेकृतबुद्धिंतुपांडवंलोमशोऽब्रवीत् ॥ लघुर्भवमहाराजलघुःस्वैरंगमिष्यसि १८ ॥ युधिष्ठिरउवाच ॥
भिक्षाभुजोनिवर्तंतांब्राह्मणायतयश्चये ॥ क्षुत्तृडध्वश्रमायासशीतार्तिमसहिष्णवः १९ तेसर्वेविनिवर्तंतांयेचमिष्टभुजोद्विजाः ॥ पक्वान्नलेह्यपानानांमांसानांच
विकल्पकाः २० तेऽपिसर्वेनिवर्तंतांयेचसूदानुयायिनः ॥ मयायथोचिताजीव्यैःसंविभक्ताश्चवृत्तिभिः २१ येचाप्यनुगताःपौराराजभक्तिपुरःसराः ॥ धृतराष्ट्रं
महाराजमभिगच्छंतुतेचवै २२ सदास्यतियथाकालमुचितायस्ययावृतिः ॥ सचेद्यथोचितांवृत्तिंनदद्यान्मनुजेश्वरः २३ अस्मत्प्रियहितार्थायपांचाल्योवः
प्रदास्यति २४ ॥ वैशंपायनउवाच ॥ ततोभूयिष्ठशःपौरागुरुभारप्रपीडिताः ॥ विप्राश्चयतयोमुख्याजग्मुर्नागपुरंप्रति २५ तान्सर्वान्धर्मराजस्यप्रेम्णाराजां
ऽबिकासुतः ॥ प्रतिजग्राहविधिवद्धनैश्चसमतर्पयत् २६ ततःकुंतीसुतोराजालघुभिर्ब्राह्मणैःसह ॥ लोमशेनचसुप्रीतस्त्रिरात्रंकाम्यकेऽवसत् २७ ॥ इतिश्री
महाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांद्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ वैशंपायनउवाच ॥ ततःप्रयांतंकौंतेयंब्राह्मणाव
नवासिनः ॥ अभिगम्यतदाराजन्निदंवचनमब्रुवन् १ राजंस्तीर्थानिगंतासिपुण्यानिभ्रातृभिःसह ॥ ऋषिणाचैवसहितोलोमशेनमहात्मना २ अस्मान
पिमहाराजनेतुमर्हसिपांडव ॥ अस्माभिर्हिनशक्यानित्वदृतेतानिकौरव ३

परिवारः १८ । १९ विकल्पकाः मृष्टामृष्टविभाजकाः २० आजीव्यैर्भृत्यादिभिः वृत्तिभिर्जीवनहेतुभिरन्नादिभिः २१ । २२ । २३ पांचाल्योद्रुपदः वःयुष्मभ्यं २४ । २५ । २६ । २७
॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपे द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ ७ ॥ ॥ ततइति १ । २ । ३

दुर्गाणिकंटकाद्याक्रांतत्वात् विषमाणिहिंस्रव्याघ्राद्यावृतत्वात् ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ अनुकीर्णान्निव्याप्तानिनोऽस्मान् १३ । १४ । १५ । १६ । १७ । १८ । १९ आर्जवमृजुबुद्धिश्रद्धामित्यर्थः २० । २१ । २२ । २३ । २४ । २५ । २६ कठिनानियष्टीः 'काठी'इतिमहाराष्ट्रप्रसिद्धेः अन्येतुशिक्यानिकरंडानिवेतिव्याचख्युः २७ परिचतुर्दशैःपंचदशभिः

श्वापदैरुपसृष्टानिदुर्गाणिविषमाणिच ॥ अगम्यानिनरैरल्पैस्तीर्थानिमनुजेश्वर ४ भवतोभ्रातरःशूराधनुर्धरवराःसदा ॥ भवद्भिःपालिताःशूरैर्गच्छामोवयम प्युत ५ भवत्प्रसादाद्धिवयंप्राप्नुयामःसुखंफलम् ॥ तीर्थानांपृथिवीपालवनानांचविशांपते ६ तववीर्यपरित्राताःशुद्धास्तीर्थपरिप्लुताः ॥ भवेमधूतपाप्मान स्तीर्थसंदर्शनान्नृप ७ भवानपिनरेंद्रस्यकार्तवीर्यस्यभारत ॥ अष्टकस्यचराजर्षेर्लोमपादस्यचैवह ८ भरतस्यचवीरस्यसार्वभौमस्यपार्थिव ॥ ध्रुवंप्राप्स्य तिदुष्प्रापान्लोकांस्तीर्थपरिप्लुतः ९ प्रभासादीनितीर्थानिमहेंद्रादींश्चपर्वतान् ॥ गंगाद्याःसरितश्चैवप्लक्षादींश्चवनस्पतीन् १० त्वयासहमहीपालद्रष्टुमिच्छा महेवयम् ॥ यदितेब्राह्मणेष्वस्तिकाचित्प्रीतिर्जनाधिप ११ कुरुक्षिप्रंवचोऽस्माकंततःश्रेयोऽभिपत्स्यसे ॥ तीर्थानिहिमहाबाहोतपोविघ्नकरैःसदा १२ अनुकी र्णानिरक्षोभिस्तेभ्योनस्त्रातुमर्हसि ॥ तीर्थान्युक्तानिधौम्येननारदेनचधीमता १३ यान्युवाचचदेवर्षिर्लोमशःसुमहातपाः ॥ विधिवत्तानिसर्वाणिपर्यटस्वन राधिप १४ धूतपाप्मासहास्माभिर्लोमशेनाभिपालितः ॥ सराजापूज्यमानस्तैर्हर्षादश्रुपरिप्लुतः १५ भीमसेनादीभिर्वीरैर्भ्रातृभिःपरिवारितः ॥ बाढमित्यब्र वीत्सर्वांस्तानृषीन्पांडवर्षभः १६ लोमशंसमनुज्ञाप्यधौम्यंचैवपुरोहितम् ॥ ततःसपांडवश्रेष्ठोभ्रातृभिःसहितोवशी १७ द्रौपद्याचानवद्यांग्यागमनायमनो दधे ॥ अथव्यासोमहाभागस्तथापर्वतनारदौ १८ काम्यकेपांडवंद्रष्टुंसमाजग्मुर्मनीषिणः ॥ तेषांयुधिष्ठिरोराजापूजांचक्रेयथाविधि ॥ सत्कृतास्तेमहाभागा युधिष्ठिरमथाब्रुवन् १९ ऋषयऊचुः ॥ युधिष्ठिरयमौभीममनसाकुरुतार्जवम् ॥ मनसाकृतशौचावैशुद्धास्तीर्थानियास्यथ २० शरीरनियमंप्राहुर्ब्राह्मणामा नुषंव्रतम् ॥ मनोविशुद्धांबुद्धिंचदैवमाहुर्व्रतंद्विजाः २१ मनोह्यदुष्टंशौचायपर्याप्तंवैनराधिप ॥ मैत्रींबुद्धिंसमास्थायशुद्धास्तीर्थानिद्रक्ष्यथ २२ तेयूयंमानसैः शुद्धाःशरीरनियमव्रतैः ॥ दैवंव्रतंसमास्थाययथोक्तंफलमाप्स्यथ २३ तेतथेतिप्रतिज्ञायकृष्णयासहपांडवाः ॥ कृतस्वस्त्ययनाःसर्वेमुनिभिर्दिव्यमानुषैः ॥ २४ लोमशस्योपसंगृह्यपादौद्वैपायनस्यच ॥ नारदस्यचराजेंद्रदेवर्षेःपर्वतस्यच २५ धौम्येनसहितावीरास्तथातैर्वनवासिभिः ॥ मार्गशीर्ष्यामतीतायांपु ष्येणप्रययुस्ततः २६ कठिनानिसमादायचीराजिनजटाधराः ॥ अभेद्यैःकवचैर्युक्तास्तीर्थान्यन्वचरंस्ततः २७ इंद्रसेनादिभिर्भृत्यैरथैःपरिचतुर्दशैः ॥ महा नसव्यापृतैश्चतथान्यैःपरिचारिकैः २८ सायुधाबद्धनिस्त्रिंशास्तूणवंतःसमार्गणाः ॥ प्राङ्मुखाःप्रययुर्वीराःपांडवाजनमेजय २९ ॥ इतिश्रीमहाभारतेआर ण्यकेपर्वणितीर्थ० लोमशतीर्थयात्रायांत्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥ ध ॥

चतुर्दशभ्यःपरिउपरीतिव्युत्पत्तेः । संख्ययाव्ययासन्नेतिसमासः बहुव्रीहौसंख्येयेडजितिडच २८ । २९ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेत्रिनवतितमोऽध्यायः ॥ ९३ ॥

नवाइति निर्गुणमुत्तमगुणहीनं १ परान्शत्रून् २ । ३ समूलः पुत्रपौत्रादिवंशवृद्धिमूलंतत्सहितः ४ । ५ । ६ विविशुःस्नानार्थमितिशेषः अधर्मस्तीर्थयात्राऽप्रवेशजस्तत्कर्तृन्अधर्मकृतः । अधर्मेणकृतउत्पादितोवादर्पोगर्वः ततो मानः पूज्योऽस्मीतिबुद्धिः ७ ततःपूजायाअलाभेप्रतिघातेवाक्रोधः ततःअह्रीःअकार्यप्रवृत्तिः ततः अलज्जा लज्जानिवृत्तादोषाद्वयं तस्यनाशः ८ नाचि

युधिष्ठिरउवाच ॥ नवैनिर्गुणमात्मानंमन्येदेवर्षिसत्तम ॥ तथाऽस्मिदुःखसंतप्तोयथानान्योमहीपतिः १ परांश्चनिर्गुणान्मन्येनचधर्मगतानपि ॥ तेचलोमश लोकेऽस्मिन्नृध्यंतेकेनहेतुना २ ॥ लोमशउवाच ॥ नात्रदुःखंत्वयाराजन्कार्यंपार्थकथंचन ॥ यदधर्मेणवर्धेयुरधर्मरुचयोजनाः ३ वर्धत्यधर्मेणनरस्ततोभद्रा णिपश्यति ॥ ततःसपत्नान्जयतिसमूलस्तुविनश्यति ४ मयाहिदृष्टादैतेयादानवाश्चमहीपते ॥ वर्धमानाह्यधर्मेणक्षयंचोपगताःपुनः ५ पुरादेवयुगेचैवदृष्टं सर्वंमयाविभो ॥ अरोचयन्सुराधर्मंधर्मंतत्यजिरेऽसुराः ६ तीर्थानिदेवाविविशुर्नाविशन्भारतासुराः ॥ तानधर्मकृतोदर्पःपूर्वमेवसमाविशत् ७ दर्पान्मानःसम भवन्मानात्क्रोधोव्यजायत ॥ क्रोधादह्रीस्ततोऽलज्जावृत्तंतेषांततोऽनशत् ८ तानलज्जान्गतह्रीकान्हीनवृत्तान्वृथाव्रतान् ॥ क्षमालक्ष्मीःस्वधर्मश्चनचिरात्प्र जहुस्ततः ९ लक्ष्मीस्तुदेवानगमदलक्ष्मीरसुरान्नृप ॥ तानलक्ष्मीसमाविष्टान्दर्पोपहतचेतसः १० दैतेयान्दानवांश्चैवकलिरप्याविशत्ततः ॥ तानलक्ष्मीसमा विष्टान्दानवान्कलिनाहतान् ११ दर्पाभिभूतान्कौंतेयक्रियाहीनानचेतसः ॥ मानाभिभूतानचिराद्विनाशःसमपद्यत १२ निर्यशस्कास्तथादैत्याःकृत्स्नशोवि लयंगताः ॥ देवास्तुसागरांश्चैवसरितश्चसरांसिच १३ अभ्यगच्छन्धर्मशीलाःपुण्यान्यायतनानिच ॥ तपोभिःक्रतुभिर्दानैराशीर्वादैश्चपांडव १४ प्रजहुःसर्वं पापानिश्रेयश्चप्रतिपेदिरे ॥ एवमादानवंतश्चनिरादानाश्चसर्वशः १५ तीर्थान्यगच्छन्विबुधास्तेनापुर्भूतिमुत्तमाम् ॥ तथात्वमपिराजेंद्रस्नात्वातीर्थेषुसानुजः १६ पुनर्वेत्स्यसितांलक्ष्मीमेषपंथाःसनातनः ॥ यथैवहिनृगोराजाशिबिरौशीनरोयथा १७ भगीरथोवसुमनागयःपूरुःपुरूरवाः ॥ चरमाणास्तपोनित्यंस्पर्श नादंभसश्चते १८ तीर्थाभिगमनात्पूतादर्शनाच्चमहात्मनाम् ॥ अलभंतयशःपुण्यंधनानिचविशांपते १९ तथात्वमपिराजेंद्रलब्धासुविपुलांश्रियम् ॥ यथा चेक्ष्वाकुरभवत्सपुत्रजनबांधवः २० मुचुकुंदोऽथमांधातामरुत्तश्चमहीपतिः ॥ कीर्तिंपुण्यामविंदंतयथादेवास्तपोबलात् २१ देवर्षयश्चकार्त्स्न्येनतथात्वमपि वेत्स्यसि ॥ धार्तराष्ट्रास्त्वधर्मेणमोहेनचवशीकृताः ॥ नचिराद्वैविनंक्ष्यंतिदैत्याइवनसंशयः २२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप० लोमश तीर्थयात्रायांचतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ ध ॥ ॥ वैशंपायनउवाच ॥ तेतथासहितावीरावसंतस्तत्रतत्रह ॥ क्रमेणपृथिवीपालनैमिषार ण्यमागताः १ ततस्तीर्थेषुपुण्येषुगोमत्याःपांडवान्नृप ॥ कृताभिषेकाःप्रददुर्गाश्चवित्तंचभारत २

रावशीघ्रमेव ९ । १० । ११ । १२ । १३ । १४ आदानवंतः आर्जवादिनियमग्रहणवंतः निरादानाअमतिबद्धाः सर्वशः देवादिभिरापि १५ । १६ वेत्स्यसिलप्स्यसे १७ । १८ । १९ । २० २१ । २२ ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपे चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ ॥ध॥ ॥ तेतथेति १ । २

३ । ४ । ५ । ६ । ७ । ८ । ९ वानीरमालिनी वेत्रपंक्तियुक्ता १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ ब्रह्मशब्देनवेदध्वनिना २२ । २३ । २४ । २५

तत्रदेवान्पितॄन्विप्रांस्तर्पयित्वापुनःपुनः ॥ कन्यातीर्थेऽश्वतीर्थेचगवांतीर्थेचभारत ॥ कालकोट्यांविपप्रस्थेगिरावुष्यचकौरवाः ३ बाहुदायांमहीपालचक्रुः
सर्वेऽभिषेचनम् ॥ प्रयागेदेवयजनेदेवानांपृथिवीपते ४ ऊपुराप्लुत्यगात्राणितपश्चातस्थुरुत्तमम् ॥ गंगायमुनयोश्चैवसंगमेसत्यसंगराः ५ विपाप्मानोमहा
त्मानोविप्रेभ्यःप्रददुर्वसु ॥ तपस्विजनजुष्टांचततोवेदींप्रजापतेः ६ जग्मुःपांडुसुताराजन्ब्राह्मणैःसहभारत ॥ तत्रतेन्यवसन्वीरास्तपश्चातस्थुरुत्तमम् ७ सं
तर्पयंतःसततंवन्येनहविषाद्विजान् ॥ ततोमहीधरंजग्मुर्धर्मज्ञेनाभिसंस्कृतम् ८ राजर्षिणापुण्यकृतागयेनानुपमद्युते ॥ नगोगयशिरोयत्रपुण्याचैवमहानदी ९
वानीरमालिनीरम्यानदीपुलिनशोभिता ॥ दिव्यंपवित्रकूटंचपवित्रधरणीधरम् १० ऋषिजुष्टंसुपुण्यंतत्तीर्थंब्रह्मसरोत्तमम् ॥ अगस्त्योभगवान्यत्रगतोवै
वस्वतंप्रति ११ उवासचस्वयंतत्रधर्मराजःसनातनः ॥ सर्वासांसरितांचैवसमुद्भेदोविशांपते १२ यत्रसंनिहितोनित्यंमहादेवःपिनाकधृक् ॥ तत्रतेपांडवावीरा
श्चातुर्मास्यैस्तदेजिरे १३ ऋषियज्ञेनमहतायत्राक्षयवटोमहान् ॥ अक्षयेदेवयजनेअक्षयंयत्रवैफलम् १४ तेतुतत्रोपवासांस्तुचक्रुर्निश्चितमानसाः ॥ ब्राह्मणा
स्तत्रशतशःसमाजग्मुस्तपोधनाः १५ चातुर्मास्येनायजंतआर्षेणविधिनातदा ॥ तत्रविद्यातपोवृद्धाब्राह्मणावेदपारगाः ॥ कथांप्रचक्रिरेपुण्यांसदसिस्थामहा
त्मनाम् १६ तत्रविद्याव्रतस्नातःकौमारंव्रतमास्थितः ॥ शमठोऽकथयद्राजन्नमूर्तरयसंगयम् १७ ॥ शमठउवाच ॥ अमूर्तरयसःपुत्रोगयोराजर्षिसत्तमः ॥
पुण्यानियस्यकर्माणितानिमेशृणुभारत १८ यस्ययज्ञोबभूवेहबह्वन्नोबहुदक्षिणः ॥ यत्रान्नपर्वताराजन्शतशोऽथसहस्रशः १९ घृतकुल्याश्चदध्नश्चनद्योबहुश
तास्तथा ॥ व्यंजनानांप्रवाहाश्चमहार्हाणांसहस्रशः २० अहन्यहनिचाप्येवंयाचतांसंप्रदीयते ॥ अन्येचब्राह्मणाराजन्भुंजतेऽन्नंसुसंस्कृतम् २१ तत्रवैद
क्षिणाकालेब्रह्मघोषोदिवंगतः ॥ नचप्रज्ञायतेकिंचिद्ब्रह्मशब्देनभारत २२ पुण्येनचरताराजन्भूर्दिशःखंनभस्तथा ॥ आपूर्णमासीच्छब्देनतदप्यासीन्महा
द्भुतम् २३ यत्रस्मगाथागायंतिमनुष्याभरतर्षभ ॥ अन्नपानैःशुभैस्तृप्तादेशेदेशेसुवर्चसः २४ गयस्ययज्ञेकेत्वद्यप्राणिनोभोक्तुमीप्सवः ॥ तत्रभोजनशिष्ट
स्यपर्वताःपंचविंशतिः २५ नतत्पूर्वेजनाश्चक्रुर्नकरिष्यंतिचापरे ॥ गयोयदकरोद्यज्ञेराजर्षिरमितद्युतिः २६ कथंतुदेवाहविषागयेनपरितर्पिताः ॥ पुनःशक्ष्यं
त्युपादातुमन्यैर्दत्तानिकानिचित् २७ सिकतावायथालोकेयथावादिवितारकाः ॥ यथावावर्षतोधाराअसंख्येयाःस्मकेनचित् ॥ तथागणयितुंशक्यागययज्ञेनद
क्षिणाः २८ एवंविधाःसुबहवस्तस्ययज्ञामहीपतेः ॥ बभूवुरस्यसरसःसमीपेकुरुनंदन २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप० लोमशतीर्थ ॥८४॥
यात्रायांगययज्ञकथनेपंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ छ ॥

२६ । २७ सिकतादिवद्यज्ञेदक्षिणानगणयितुंशक्याइत्यन्वयः २८ । २९ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ छ ॥

ततइति दुर्जयायांवातापिपुर्यांमणिमतीसंज्ञायाम् १ । २ । ३ । ४ । ५ नादात् नदत्तवान् ६ । ७ कामरूपी यथाकामंरूपाणिकर्तुंसमर्थः संस्कृत्यपक्त्वा ८ सचइल्वलश्च ९ । १० । ११
१२ । १३ । १४ सोऽपृच्छदिति तान् भवंलंबमानेनरूपेणतेषामुद्भवं पृच्छत् । पृच्छतिर्द्विकर्मा किमर्थंयूयंलंबध्वमित्यपृच्छदित्यर्थः । तेऊचुःकंपिताइवसंतस्तेतवसंतानहेतोरयमस्माकंभव
इति प्रत्यूचुरितिसंबंधः १५ एतस्यैवविवरणंतेतस्माइति १६ । १७ वःयुष्माकंकामंईप्सितंकरिष्ये १८ प्रसवसंतानंसंततेरविच्छेदम् १९ तस्यतस्यसिंहमृगादेःअंगं कटिदृष्ट्यादिसर्वगुणवती

वैशंपायनउवाच ॥ ततःसंप्रस्थितोराजाकौंतेयोभूरिदक्षिणः ॥ अगस्त्याश्रममासाद्यदुर्जयायामुवासह १ तत्रैवलोमशंराजापप्रच्छवदतांवरः ॥ अगस्त्येने
हवातापिःकिमर्थमुपशामितः २ आसीद्वाकिंप्रभावश्चसदैत्योमानवांतकः ॥ किमर्थंचोदितोमन्युरगस्त्यस्यमहात्मनः ३ ॥ लोमशउवाच ॥ इल्वलोनामदैते
यआसीत्कौरवनंदन ॥ मणिमत्यांपुरिपुरावातापिस्तस्यचानुजः ४ सब्राह्मणंतपोयुक्तमुवाचदितिनंदनः ॥ पुत्रंमेभगवानेकमिंद्रतुल्यंप्रयच्छतु ५ तस्मैसब्रा
ह्मणोनादात्पुत्रंवासवसंमितम् ॥ चुक्रोधसोऽसुरस्तस्यब्राह्मणस्यततोभृशम् ६ तदाप्रभृतिराजेंद्रइल्वलोब्रह्महाऽसुरः ॥ मन्युमान्भ्रातरंछागंमायावीह्यकरोत्ततः
७ मेषरूपीचवातापिःकामरूप्यभवत्क्षणात् ॥ संस्कृत्यचभोजयतितततोविप्रंजिघांसति ८ सचाह्वयतियंवाचागतंवैवस्वतक्षयम् ॥ सपुनर्देहमास्थायजीव
न्स्मप्रत्यदृश्यत ९ ततोवातापिमसुरंछागंकृत्वासुसंस्कृतम् ॥ तंब्राह्मणंभोजयित्वापुनरेवसमाह्वयत् १० तामिल्वलेनमहतास्वरेणवाचमीरिताम् ॥ श्रुत्वाऽ
तिमायोबलवान्क्षिप्रंब्राह्मणकंटकः ११ तस्यपार्श्वंविनिर्भिद्यब्राह्मणस्यमहासुरः ॥ वातापिःप्रहसन्राजन्निश्चक्रामविशांपते १२ एवंसब्राह्मणान्राजन्भोजयि
त्वापुनःपुनः ॥ हिंसयामासदैतेयइल्वलोदुष्टचेतनः १३ अगस्त्यश्चापिभगवानेतस्मिन्कालएवतु ॥ पितॄन्ददर्शगर्तेवैलंबमानानधोमुखान् १४ सोऽपृच्छल्लं
बमानांस्तान्भवंतइवकंपिताः ॥ संतानहेतोरितितेप्रत्यूचुर्ब्रह्मवादिनः १५ तेतस्मैकथयामासुर्वयंतेपितरःस्वकाः ॥ गर्तमेतमनुप्राप्ताःलंबामप्रसवार्थिनः
१६ यदिनोजनयेथास्त्वमगस्त्यापत्यमुत्तमम् ॥ स्यान्नोऽस्मान्निरयान्मोक्षस्त्वंचपुत्राप्नुयागतिम् १७ सतानुवाचतेजस्वीसत्यधर्मपरायणः ॥ करिष्येपित
रःकामंव्येतुवोमानसोज्वरः १८ ततःप्रसवसंतानंचिंतयन्भगवानृषिः ॥ आत्मनःप्रसवस्यार्थेनापश्यत्सदृशींस्त्रियम् १९ सतस्यतस्यसत्वस्यतत्तदंगमनुत्त
मम् ॥ संभृत्यतत्समैरंगैर्निर्ममेस्त्रियमुत्तमाम् २० सतांविदर्भराजस्यपुत्रार्थंतप्यतस्तपः ॥ निर्मितामात्मनोऽर्थायमुनिःप्रादान्महातपाः २१ सातत्रजज्ञे
सुभगाविद्युत्सौदामनीयथा ॥ विभ्राजमानावपुषाव्यवर्धतशुभानना २२ जातमात्रांचतांदृष्ट्वावैदर्भःपृथिवीपतिः ॥ प्रहर्षेणद्विजातिभ्योन्यवेदयतभारत २३
अभ्यनंदंततांसर्वेब्राह्मणावसुधाधिप ॥ लोपामुद्रेतितस्याश्चचक्रिरेनामतेद्विजाः २४

मित्यर्थः २० । २१ जज्ञेजाता सौदामनीतिविशेष्यं विद्युदितिविशेषणंद्युतिविशेषोपपादनार्थं'कुर्याद्धरस्यापिपिनाकपाणेर्धैर्यच्युतिंकेममधन्विनोऽन्ये'इत्यादौपिनाकपाणिपदंऊर्जितचा
पवत्त्वद्योतनार्थमुपक्षीणंसन्नविशेष्यसमर्पणायालमितिहरस्येतिपृथक्प्रत्युक्तं तद्वदिहापिध्येयं २२ । २३ मुद्राणांतत्तन्मृगादिजातिगतानामसाधारणानांचिह्नानांकमनीयवस्तुद्वारी

नांलोपइवलोपस्तिरस्कारोयथासालोपामुद्रा । आहिताग्न्यादित्वात्पूर्वनिपातः अन्येष्वपिदृश्यतइतिदीर्घः प्रकारांतरेणयोगेतुवेदेपदपाठलोपआमुद्रेत्यवग्रहःस्यात्सचनदृश्यतेऽतउक्तविधे

वव्रृधेसामहाराजबिभ्रतीरूपमुत्तमम् ॥ अप्स्विवोत्पलिनीशीघ्रमग्नेरिवशिखाशुभा २५ तांयौवनस्थांराजेंद्रशतंकन्याःस्वलंकृताः ॥ दास्यःशतंचकल्याणी मुपातस्थुर्वशानुगाः २६ सास्मदासीशतवृतामध्येकन्याशतस्यच ॥ आस्तेतेजस्विनीकन्यारोहिणीवदिविप्रभा २७ यौवनस्थामपिचतांशीलाचारसमन्वि ताम् ॥ नवव्रेपुरुषःकश्चिद्भयात्तस्यमहात्मनः २८ सातुसत्यवतीकन्यारूपेणाप्सरसोऽप्यति ॥ तोषयामासपितरंशीलेनस्वजनंतथा २९ वैदर्भीतुतथायु क्तांयुवतींप्रेक्ष्यवैपिता ॥ मनसाचिंतयामासकस्मैदद्यामिमांसुताम् ३० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांअगस्त्यो पाख्यानेषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ लोमशउवाच ॥ यदात्वमन्यतागस्त्योगार्हस्थ्येतांक्षमामिति ॥ तदाऽभिगम्यप्रोवाचवैदर्भंपृथिवीप तिम् १ राजन्निवेशेबुद्धिर्मेवर्ततेपुत्रकारणात् ॥ वरयेत्वांमहीपाललोपामुद्रांप्रयच्छमे २ एवमुक्तःसमुनिनामहीपालोविचेतनः ॥ प्रत्याख्यानायचाशक्तःप्र दातुंचैवनैच्छत ३ ततःसभार्यामभ्येत्यप्रोवाचपृथिवीपतिः ॥ महर्षिर्वीर्यवानेषक्रुद्धःशापाग्निनादहेत् ४ तंतथादुःखितंदृष्ट्वासभार्यंपृथिवीपतिम् ॥ लोपामुद्रा भिगम्येदंकालेवचनमब्रवीत् ५ नमत्कृतेमहीपालपीडामभ्येतुमर्हसि ॥ प्रयच्छमामगस्त्यायत्राह्यात्मानंमयापितः ६ दुहितुर्वचनाद्राजासोऽगस्त्यायमहात्म ने ॥ लोपामुद्रांततःप्रादाद्विधिपूर्वंविशांपते ७ प्राप्यभार्यामगस्त्यस्तुलोपामुद्रामभाषत ॥ महार्हाण्युत्सृजैतानिवासांस्याभरणानिच ८ ततःसादर्शनीया निमहार्हाणितनूनिच ॥ समुत्ससर्जरंभोरूर्वसनान्यायतेक्षणा ९ ततश्चीराणिजग्राहवल्कलान्यजिनानिच ॥ समानव्रतचर्याचबभूवायतलोचना १० गंगा द्वारमथागम्यभगवानृषिसत्तमः ॥ उग्रमातिष्ठततपःसहपत्न्याऽनुकूलया ११ साप्रीताबहुमानाच्चपतिंपर्यचरत्तदा ॥ अगस्त्यश्चपरांप्रीतिंभार्यायामचरत्प्र भुः १२ ततोबहुतिथेकालेलोपामुद्रांविशांपते ॥ तपसाद्योतितांस्नातांददर्शभगवानृषिः १३ सतस्याःपरिचारेणशौचेनचदमेनच ॥ श्रियारूपेणचप्रीतोमैथु नायाजुहावताम् १४ ततःसाप्रांजलिर्भूत्वालज्जमानेवभाविनी ॥ तदासप्रणयंवाक्यंभगवंतमथाब्रवीत् १५ असंशयंप्रजाहेतोर्भार्यांपतिरविंदत ॥ यातुत्व यिममप्रीतिस्तामृषेकर्तुमर्हसि १६ यथापितुर्गृहेविप्रप्रासादेशयनंमम ॥ तथाविधेत्वंशयनेमामुपैतुमिहार्हसि १७ इच्छामित्वांस्रग्विणंचभूषणैश्चविभूषितम् ॥ उपसर्तुंयथाकामंदिव्याभरणभूषिता १८

वव्युत्पत्तिर्युक्ता २४ । २५ वशानुगाःइच्छानुरूपाः २६ । २७ । २८ । २९ । ३० ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ यदेति १ निवेशेवि वाहे २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ स्नातांऋताविविशेषः १३ परिचारेणसेवया १४ । १५ । १६ । १७ । १८ ॥८५॥

भूषणोऽयं चीरकाषायादिस्तपस्विनांश्लाघ्योऽयंसामग्रीकलापो भोगसंपर्केणापवित्रोनैवभवत्वितिशेषः १९ । २० । २१ । २२ ऋतोःकालःषोडशदिनानितेष्वल्पोऽवशिष्टः २३ । २४ । २५ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ ततइति यंवेदवेत्ति १ विषयांतेदेशसीमांते २ आगमनेनिमित्तभूतामर्थितां किमिच्छन्नागतोऽसीतिप्र

अन्यथानोपतिष्ठेयंचीरकाषायवासिनी ॥ नैवापवित्रोविप्रर्षेभूषणोऽयंकथंचन १९ ॥ अगस्त्यउवाच ॥ नतेधनानिविद्यंतेलोपामुद्रेतथामम ॥ यथाविधानि कल्याणिपितुस्तवसुमध्यमे २० ॥ लोपामुद्रोवाच ॥ ईशोऽसितपसासर्वंसमाहर्तुंतपोधन ॥ क्षणेनजीवलोकेयद्वसुकिंचनविद्यते २१ ॥ अगस्त्यउवाच ॥ एवमेतद्यथात्थत्वंतपोव्ययकरंतुतत् ॥ यथातुमेननश्येततपस्तन्मांप्रचोदय २२ ॥ लोपामुद्रोवाच ॥ अल्पावशिष्टःकालोऽयमृतोर्ममतपोधन ॥ नचान्यथाऽह मिच्छामित्वामुपैतुंकथंचन २३ नचापिधर्ममिच्छामिविलोप्तुंतेकथंचन ॥ एवंतुमेयथाकामंसंपादयितुमर्हसि २४ ॥ अगस्त्यउवाच ॥ यद्येषकामःसुभगेतव बुद्ध्याविनिश्चितः ॥ हर्तुंगच्छाम्यहंभद्रेचरकाममिहस्थिता ॥ २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामगस्त्योपाख्या नेसप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ लोमशउवाच ॥ ततोजगामकौरव्यसोऽगस्त्योभिक्षितुंवसु ॥ श्रुतर्वाणंमहीपालंयंवेदाभ्यधिकंनृपैः १ सविदित्वा तुनृपतिःकुंभयोनिमुपागतम् ॥ विषयांतेसहामात्यःप्रत्यगृह्णात्सुसत्कृतम् २ तस्मैचार्घ्यंयथान्यायमानीयपृथिवीपतिः ॥ प्रांजलिःप्रयतोभूत्वापप्रच्छागमने र्थिताम् ३ ॥ अगस्त्यउवाच ॥ वित्तार्थिनमनुप्राप्तंविद्धिमांपृथिवीपते ॥ यथाशक्त्याविहिंस्यान्यान्संविभागंप्रयच्छमे ४ ॥ लोमशउवाच ॥ ततआयव्य यौपूर्णौतस्मैराजान्यवेदयत् ॥ अतोविद्वन्नुपादत्स्वयदत्रवसुमन्यसे ५ ततआयव्ययौदृष्ट्वासमौसममतिर्द्विजः ॥ सर्वथाप्राणिनांपीडामुपादानादमन्यत ६ स श्रुतर्वाणमादायव्रध्नश्वमगमत्ततः ॥ सचतौविषयस्यांतेप्रत्यगृह्णाद्यथाविधि ७ तयोरर्घ्यंचपाद्यंचव्रध्नश्वःप्रत्यवेदयत् ॥ अनुज्ञाप्यचपप्रच्छप्रयोजनमुपक्रमे ८ ॥ अगस्त्यउवाच ॥ वित्तकामाविहप्राप्तौविद्ध्यावांपृथिवीपते ॥ यथाशक्त्यविहिंस्यान्यान्संविभागंप्रयच्छनौ ९ ॥ लोमशउवाच ॥ ततआयव्ययौपूर्णौ ताभ्यांराजान्यवेदयत् ॥ अतोज्ञात्वातुगृह्णीतंयदत्रव्यतिरिच्यते १० ततआयव्ययौदृष्ट्वासमौसममतिर्द्विजः ॥ सर्वथाप्राणिनांपीडामुपादानादमन्यत ११ पौरुकुत्संततोजग्मुस्त्रसदस्युंमहाधनम् ॥ अगस्त्यश्चश्रुतर्वाचव्रध्नश्वश्चमहीपतिः १२ त्रसदस्युस्तुतान्दृष्ट्वाप्रत्यगृह्णाद्यथाविधि ॥ अभिगम्यमहाराजविषयांते महामनाः १३ अर्चयित्वायथान्यायमिक्ष्वाकूराजसत्तमः ॥ समस्तांश्चततोऽपृच्छत्प्रयोजनमुपक्रमे १४ ॥ अगस्त्यउवाच ॥ वित्तकामानिहप्राप्तान्विद्धिनःपृथिवी पते ॥ यथाशक्त्यविहिंस्यान्यान्संविभागंप्रयच्छनः १५ ॥ लोमशउवाच ॥ ततआयव्ययौपूर्णौतेषांराजान्यवेदयत् ॥ एतज्ज्ञात्वाह्युपादध्वंयदत्रव्यतिरिच्यते १६

च्छेत्यर्थः ३ । ४ । ५ उपादानात् धनग्रहणात् ६ । ७ उपक्रमेआगमने ८ नौआवाभ्याम् ९ । १० । ११ । १२ । १३ । १४ । १५ । १६

१० । १८ वसुमान् धनवान् १९ अध्यायतात्पर्यंब्राह्मणेनापिहिंसापूर्वकंभिक्षानकर्तव्येति ॥ १० ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टनवतितमोऽध्यायः ॥ ९८ ॥ इल्वलइति

ततआयव्ययौदृष्ट्वासमौसममतिर्द्विजः ॥ सर्वथाप्राणिनांपीडामुपादानादमन्यत १७ ततःसर्वेसमेत्याथतेनृपास्तंमहामुनिम् ॥ इदमूचुर्महाराजसमवेक्ष्यपर स्परम् १८ अयंवैदानवोब्रह्मन्निल्वलोवसुमान्भुवि ॥ तमतिक्रम्यसर्वेऽद्यवयंचार्थामहेवसु १९ ॥ लोमशउवाच ॥ तेषांतदाऽऽसीदुचितमिल्वलस्यैवभिक्षण म् ॥ ततस्तेसहिताराजन्निल्वलंसमुपाद्रवन् ॥ २० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामगस्त्योपाख्यानेअष्टन वतितमोऽध्यायः ॥ ९८ ॥ ॥ ७ ॥ लोमशउवाच ॥ इल्वलस्तान्विदित्वातुमहर्षिसहितान्नृपान् ॥ उपस्थितान्सहामात्योविषयांतेह्यपूजयत् १ तेषां ततोऽसुरश्रेष्ठस्त्वातिथ्यमकरोत्तदा ॥ सुसंस्कृतेनकौरव्यभ्रात्रावातापिनापदा २ ततोराजर्षयःसर्वेविषण्णागतचेतसः ॥ वातापिंसंस्कृतंदृष्ट्वामेषभूतंमहासु रम् ३ अथाब्रवीदगस्त्यस्तान्राजर्षीन्नृषिसत्तमः ॥ विषादोवोनकर्तव्योह्यहंभोक्ष्येमहासुरम् ४ धुर्यासनमथासाद्यनिषसादमहामुनिः ॥ तंपर्यवेषद्दैत्येंद्रइ ल्वलःप्रहसन्निव ५ अगस्त्यएवकृत्स्नंतुवातापिंबुभुजेततः ॥ भुक्तवत्यसुरोऽऽह्वानमकरोत्तस्यचेल्वलः ६ ततोवायुःप्रादुरभूदगस्तस्यमहात्मनः ॥ शब्देन महतातातगर्जन्निवयथाघनः ७ वातापेनिष्क्रमस्वेतिपुनःपुनरुवाचह ॥ तंप्रहस्याब्रवीद्राजन्नगस्त्योमुनिसत्तमः ८ कुतोनिष्क्रमितुंशक्तोमयाजीर्णस्तुसोऽसु रः ॥ इल्वलस्तुविषण्णोऽभूद्दृष्ट्वाजीर्णंमहासुरम् ९ प्रांजलिश्चससामात्यैरिदंवचनमब्रवीत् ॥ किमर्थमुपयाताःस्थब्रूतकिंकरवाणिवः १० प्रत्युवाचततोऽगस्त्यः प्रहसन्निल्वलंतदा ॥ ईशंह्यसुरविद्मस्त्वांवयंसर्वेधनेश्वरम् ११ एतेचनातिधनिनोधनार्थश्चमहान्मम ॥ यथाशक्त्यविहिंस्यान्यान्संविभागंप्रयच्छनः १२ त तोऽभिवाद्यतमृषिमिल्वलोवाक्यमब्रवीत् ॥ दित्सितंयदिवेत्सित्वंततोदास्यामितेवसु १३ ॥अगस्त्यउवाच ॥ गवांदशसहस्राणिराज्ञामेकैकशोऽसुर ॥ तावदेव सुवर्णस्यदित्सितंतेमहासुर १४ मह्यंततोवैद्विगुणंरथश्चैवहिरण्मयः ॥ मनोजवौवाजिनौचदित्सितंतेमहासुर १५ जिज्ञास्यतांरथःसद्योव्यक्तएषहिरण्मयः ॥ ततःप्रव्यथितोदैत्योददावभ्यधिकंवसु १६ विरावश्चसुरावश्चतस्मिन्युक्तौरथेहयौ ॥ ऊहतुस्तवसूनाशुतावगस्त्याश्रमंप्रति १७ सर्वान्राज्ञःसहागस्त्यान्नि मेषादिवभारत ॥ अगस्त्येनाभ्यनुज्ञाताजग्मूराजर्षयस्तदा ॥ कृतवांश्चमुनिःसर्वंलोपामुद्राचिकीर्षितम् १८ ॥ लोपामुद्रोवाच ॥ कृतवानसितत्सर्वंभगवन्म मकांक्षितम् ॥ उत्पादयसकृन्मह्यमपत्यंवीर्यवत्तरम् १९ ॥ अगस्त्यउवाच ॥ तुष्टोहमस्मिकल्याणितववृत्तेनशोभने ॥ विचारणामपत्येतुतववक्ष्यामितांशृणु २० सहस्रंतेऽस्तुपुत्राणांशतंवादशसंमितम् ॥ दशवाशततुल्याःस्युरेकोवाऽपिसहस्रजित् २१ १ । २ । ३ । ४ । ५ । ६

७ । ८ । ९ । १० । ११ । १२ दित्सितंमयायुष्मभ्यंदातुमिष्टंयत्तेनपरवित्ताभिज्ञत्व मगस्त्यस्यपरीक्षितम् १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० दशसंमितं दशशतसंमितम् २१

समभवत्संगमंचकार २३ शारदान्शरदाऋतुनायुक्तान्संवत्सरानित्यर्थः २४ प्राच्यवदुदरान्निर्गतोऽभवदित्यर्थः २५ । २६ । २७ युक्तमध्ययनेध्मवाहनादौ २८ । २९ प्राह्लादिःप्रह्लाद गोत्रोद्भवः ३० । ३१ शिलानांतलेष्वधोभागेषुसंत्रस्तालीना तेनपाताळगामित्वमुक्तं शेषेणस्वर्गभूगतत्वमिति त्रिपथगात्वमुक्तंगंगायाः ३२ । ३३ । ३४ रामोजामदग्न्यः हृतंदाशरथिरा

॥लोपामुद्रोवाच॥ सहस्रसंमितःपुत्रएकोऽप्यस्तुतपोधन ॥ एकोहिबहुभिःश्रेयान्विद्वान्साधुरसाधुभिः २२ ॥लोमशउवाच॥ सतथेतिप्रतिज्ञायतयासमभवन्मु निः ॥ समयेसमशीलिन्याश्रद्धावान्श्रद्दधानया २३ ततआधायगर्भंतमगमद्वनमेवसः ॥ तस्मिन्वनगतेगर्भोववृधेसप्तशारदान् २४ सप्तमेऽब्देगतेचापिप्राच्यव त्समहाकविः ॥ ज्वलन्निवप्रभावेनदृढस्युर्नामभारत २५ सांगोपनिषदान्वेदान्जपन्निवमहातपाः ॥ तस्यपुत्रोऽभवदृषेःसतेजस्वीमहाद्विजः २६ सबालएव तेजस्वीपितुस्तस्यनिवेशने ॥ इध्मानांभारमाजह्रेइध्मवाहस्ततोऽभवत् २७ तथायुक्तंतुतंदृष्ट्वामुमुदेसमुनिस्तदा ॥ एवंसजनयामासभारतापत्यमुत्तमम् ॥ २८ लेभिरेपितरश्चास्यलोकान्राजन्यथेप्सितान् ॥ ततऊर्ध्वमपंख्यातस्त्वगस्त्यस्याश्रमोभुवि २९ प्राह्लादिरेवंवातापिरगस्त्येनोपशामितः ॥ तस्याय माश्रमोराजन्रमणीयैर्गुणैर्युतः ३० एषाभागीरथीपुण्यादेवगंधर्वसेविता ॥ वातेरितापताकेवविराजतिनभस्तले ३१ प्रतार्यमाणाकूलेषुयथानिम्नेषुनित्यशः॥ शिलातलेषुसंत्रस्तापन्नगेंद्रवधूरिव ३२ दक्षिणांवैदिशंसर्वांप्लावयंतीचमातृवत् ॥ पूर्वंशंभोर्जटाभ्रष्टासमुद्रमहिषीप्रिया ॥ अस्यांनद्यांसुपुण्यायांयथेष्टमवगा ह्यताम् ३३ युधिष्ठिरनिबोधेदंत्रिषुलोकेषुविश्रुतम् ॥ भृगोस्तीर्थंमहाराजमहर्षिगणसेवितम् ३४ यत्रोपस्पृष्टवान्रामोहृतंतेजस्तदाप्तवान् ॥ अत्रत्वंभ्रातृ भिःसार्धंकृष्णयाचैवपांडव ३५ दुर्योधनहृतंतेजःपुनरादातुमर्हसि ॥ कृतवैरेणरामेणयथाचोपहृतंपुनः ३६ ॥ वैशंपायनउवाच ॥ सतत्रभ्रातृभिश्चैवकृष्ण याचैवपांडवः ॥ स्नात्वादेवान्पितॄंश्चैवतर्पयामासभारत ३७ तस्यतीर्थस्यरूपंवैदीप्तादीप्ततरंबभौ ॥ अप्रधृष्यतरश्चासीच्छात्रवाणांनरर्षभ ३८ अपृच्छ च्चवराजेंद्रलोमशंपांडुनंदनः ॥ भगवन्किमर्थंरामस्यहृतमासीद्वपुःप्रभो ॥ कथंप्रत्याहृतंचैवएतदाचक्ष्वपृच्छतः ३९ ॥ लोमशउवाच ॥ शृणुरामस्यराजें द्रभार्गवस्यचधीमतः ॥ जातोदशरथस्यासीत्पुत्रोरामोमहात्मनः ४० विष्णुःस्वेनशरीरेणरावणस्यवधायवै ॥ पश्यामस्तमयोध्यायांजातंदाशरथिंततः ४१ ऋचीकनंदनोरामोभार्गवोरेणुकासुतः ॥ तस्यदाशरथेःश्रुत्वारामस्याक्लिष्टकर्मणः ४२ कौतूहलान्वितोरामस्त्वयोध्यामगमत्पुनः ॥ धनुरादायतद्दिव्यंक्षत्रि याणांनिबर्हणम् ४३ जिज्ञासमानोरामस्यवीर्यंदाशरथेस्तदा ॥ तंवैदशरथःश्रुत्वाविषयांतमुपागतम् ४४ प्रेषयामासरामस्यरामंपुत्रंपुरस्कृतम् ॥ सतम भ्यागतंदृष्ट्वाउद्यतास्त्रमवस्थितम् ४५ प्रहसन्निवकौंतेयरामोवचनमब्रवीत् ॥ कृतकालंहिराजेंद्रधनुरेतन्मयाविभो ४६

मेण ३५ । ३६ । ३७ तस्ययुधिष्ठिरस्य तीर्थस्यतीर्थेस्नातस्य ३८ वपुस्तेजः ३९ । ४० । ४१ दाशरथेःश्रुत्वा धनुर्भंजनादिपराक्रममितिशेषः कर्मणिवाषष्ठी ४२ । ४३ । ४४ । ४५ कृत कालं कृताः हिंसिताःकालतुल्याः क्षत्रियायेनतद्धनुः । कृहिंसायांस्वादेरिदंरूपम् ४६

४७ बाहुवीर्यविषये मकत्थनं श्लाघनं नास्ति ४८ व्यपदेशेनछलेन ४९ । ५० । ५१ । ५२ । ५३ श्रूयतेचकाराद्दृश्यतेच तवदर्पयुक्तत्वमितिशेषः अथापिक्षम्यते ५४ क्षत्रियेभ्यः क्षत्रियान्

समारोपययत्नेनयदिशक्तोषिपार्थिव ॥ इत्युक्तस्त्वाहभगवंस्त्वंनाधिक्षेप्तुमर्हसि ४७ नाहमप्यधमोधर्मेक्षत्रियाणांद्विजातिषु ॥ इक्ष्वाकूणांविशेषेणबाहुवीर्येणकत्थ
॥८७॥ नम् ४८ तमेवंवादिनंतत्ररामोवचनमब्रवीत् ॥ अलंवैव्यपदेशेनधनुरायच्छराघव ४९ ततोजग्राहरोषेणक्षत्रियर्षभसूदनम् ॥ रामोदाशरथिर्दिव्यंहस्ताद्राम
स्यकार्मुकम् ५० धनुरारोपयामाससलीलइवभारत ॥ ज्याशब्दमकरोच्चैवस्मयमानःसवीर्यवान् ५१ तस्यशब्दस्यभूतानिवित्रस्यंत्यशनेरिव ॥ अथाब्रवीत्तदा
रामोरामंदाशरथिस्तदा ५२ इदमारोपितंब्रह्मन्किमन्यत्करवाणिते ॥ तस्यरामोददौदिव्यंजामदग्न्योमहात्मनः ॥ शरमाकर्णदेशांतमयमाकृष्यतामिति ५३
लोमशउवाच ॥ एतच्छ्रुत्वाऽब्रवीद्रामःप्रदीप्तइवमन्युना ॥ श्रूयतेक्षम्यतेचैवदर्पपूर्णोऽसिभार्गव ५४ त्वयाह्यधिगतंतेजःक्षत्रियेभ्योविशेषतः ॥ पितामहप्र
सादेनतेनमांक्षिपसिध्रुवम् ५५ पश्यमांस्वेनरूपेणचक्षुस्तेवितराम्यहम् ॥ ततोरामशरीरेवैरामःपश्यतिभार्गवः ५६ आदित्यान्सवसून्रुद्रान्साध्यांश्चसमरु
द्गणान् ॥ पितरोहुताशनश्चैवनक्षत्राणिग्रहास्तथा ५७ गंधर्वाराक्षसायक्षानद्यस्तीर्थानियानिच ॥ ऋषयोवालखिल्याश्चब्रह्मभूताःसनातनाः ५८ देवर्षय
श्चकार्त्स्न्येनसमुद्राःपर्वतास्तथा ॥ वेदाश्चसोपनिषदोवषट्कारैःसहाध्वरैः ५९ चेतोमंतिचसामानिधनुर्वेदश्चभारत ॥ मेघवृंदानिवर्षाणिविद्युतश्चयुधिष्ठिर
६० ततःसभगवान्विष्णुस्तंवैबाणंमुमोचह ॥ शुष्काशनिसमाकीर्णमहोल्काभिश्चभारत ६१ पांसुवर्षेणमहतामेघवर्षैश्चभूतलम् ॥ भूमिकंपैश्चनिर्घातैर्नादैश्च
विपुलैरपि ६२ सरामंविह्वलंकृत्वातेजश्चाक्षिप्यकेवलम् ॥ आगच्छज्ज्वलितोबाणोरामबाहुप्रचोदितः ६३ सतुविह्वलतांगत्वाप्रतिलभ्यचचेतनाम् ॥ रामः
प्रत्यागतप्राणःप्राणमद्विष्णुतेजसम् ६४ विष्णुनासोऽभ्यनुज्ञातोमहेंद्रमगमत्पुनः ॥ भीतस्तुतत्रन्यवसद्व्रीडितस्तुमहातपाः ६५ ततःसंवत्सरेऽतीतेहृतौजसमव
स्थितम् ॥ निर्मदंदुःखितंदृष्ट्वापितरोराममब्रुवन् ६६ ॥ पितरऊचुः ॥ नवैसम्यगिदंपुत्रविष्णुमासाद्यवैकृतम् ॥ सहिपूज्यश्चमान्यश्चत्रिषुलोकेषुसर्वदा ६७
गच्छपुत्रनदींपुण्यांवधूसरकृताभयाम् ॥ तत्रोपस्पृश्यतीर्थेषुपुनर्वपुरवाप्स्यसि ६८ दीप्तोदंनामतत्तीर्थंयत्रतेप्रपितामहः ॥ भृगुर्देवयुगेरामतप्तवानुत्तमंत
पः ६९ तत्तथाकृतवान्रामःकौंतेयवचनात्पितुः ॥ प्राप्तवांश्चपुनस्तेजस्तीर्थेऽस्मिन्पांडुनंदन ७० एतदीदृशकंतातरामेणाक्लिष्टकर्मणा ॥ प्राप्तमासीन्महारा
जविष्णुमासाद्यवैपुरा ७१ ॥ इतिश्री॰ आ॰ प॰ तीर्थयात्राप॰ लोमशतीर्थयात्रायांजामदग्न्यतेजोहानिकथनेएकोनशततमोऽध्यायः ॥ ९९ ॥ ॥
॥ युधिष्ठिरउवाच ॥ भूयएवाहमिच्छामिमहर्षेस्तस्यधीमतः ॥ कर्मणांविस्तरंश्रोतुमगस्त्यस्यद्विजोत्तम १

जित्वा ५५ । ५६ । ५७ । ५८ । ५९ चेतोमंति चेतनावंति आर्षपदत्वमयुक्तंरुत्वं चेतस्वंतीत्यपेक्षितम् ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ ॥ इत्या ॥८७॥
रण्यकेपर्वणिनैलकंठीयेभारतभावदीपेएकोनशततमोऽध्यायः ॥ ९९ ॥ भूयइति १

२ । ३ । ४ । ५ । ६ । ७ सवोदास्यतिईप्सितमितिशेषः ८ । ९ । १० षडस्रिषट्कोणम् ११ । १२ । १३ जीवंजीववद्भिर्वैतिलुप्तोपमा यतोजीवकैःक्षुद्रजीवैः पश्चादिभिर्नादितमतश्चेतनमि
वेत्यर्थः १४ । १५ करेणुभिर्हस्तिनीभिः प्रभिन्नंमदस्राविकरटामवोद्भेदस्थानंगंडस्थलैकदेशस्तत्र यमुखमुपरिभागोयेषांतैः १६ । १७ त्रिविष्टपसमप्रख्यंस्वर्गतुल्यप्रकाशम् १८ । १९ । २०

॥लोमशउवाच ॥ शृणुराजन्कथांदिव्यामद्भुतामतिमानुषीम् ॥ अगस्त्यस्यमहाराजप्रभावममितौजसः २ आसन्कृतयुगेघोरादानवायुद्धदुर्मदाः॥ कालकेयाइ
तिख्यातागणाःपरमदारुणाः ३ तेतुवृत्रंसमाश्रित्यनानाप्रहरणोद्यताः ॥ समंतात्पर्यधावंतमहेंद्रप्रमुखान्सुरान् ४ ततोवृत्रवधेयत्नमकुर्वंस्त्रिदशाःपुरा ॥ पुरं
दरंपुरस्कृत्यब्रह्माणमुपतस्थिरे ५ कृतांजलींस्तुतान्सर्वान्परमेष्ठीत्युवाचह ॥ विदितंमेसुराःसर्वंयद्वःकार्यंचिकीर्षितम् ६ तमुपायंप्रवक्ष्यामियथावृत्रंवधि
ष्यथ ॥ दधीचइतिविख्यातोमहानृषिरुदारधीः ७ तंगत्वासहिताःसर्वेवरंवैसंप्रयाचत ॥ सवोदास्यतिधर्मात्मासुप्रीतेनांतरात्मना ८ सवाच्यःसहितैःसर्वैर्भव
द्भिर्जयकांक्षिभिः ॥ स्वान्यस्थीनिप्रयच्छेतित्रैलोक्यस्यहितायवै ९ सशरीरंसमुत्सृज्यस्वान्यस्थीनिप्रदास्यति ॥ तस्यास्थिभिर्महाघोरंवज्रंसंस्क्रियतांदृढम्
१० महच्छत्रुहणंघोरंषडस्रिभीमनिःस्वनम् ॥ तेनवज्रेणवैवृत्रंवधिष्यतिशतक्रतुः ११ एतद्वःसर्वमाख्यातंतस्माच्छीघ्रंविधीयताम् ॥ एवमुक्तास्ततोदेवा
अनुज्ञाप्यपितामहम् १२ नारायणंपुरस्कृत्यदधीचस्याश्रमंययुः ॥ सरस्वत्याःपरेपारेनानाद्रुमलतावृतम् १३ षट्पदोद्गीतनिनदैर्विघुष्टंसामगैरिव ॥ पुंस्को
किलरवोन्मिश्रंजीवंजीवकनादितम् १४ महिषैश्चवराहैश्चसृमरैश्चमरैरपि ॥ तत्रतत्रानुचरितंशार्दूलभयवर्जितैः १५ करेणुभिर्वारणैश्चप्रभिन्नकरटामुखैः ॥ सरो
वगाढैःक्रीडद्भिःसमंतादनुनादितम् १६ सिंहव्याघ्रैर्महानादान्नदद्भिरनुनादितम् ॥ अपरैश्चापिसंलीनैर्गुहाकंदरशायिभिः १७ तेषुतेष्ववकाशेषुशोभितंसुम
नोरमम् ॥ त्रिविष्टपसमप्रख्यंदधीचाश्रममागमन् १८ तत्रापश्यन्दधीचंतेदिवाकरसमद्युतिम् ॥ जाज्वल्यमानंवपुषायथालक्ष्म्यापितामहम् १९ तस्यपा
दौसुरराजन्नभिवाद्यप्रणम्यच ॥ अयाचंतवरंसर्वेयथोक्तंपरमेष्ठिना २० ततोदधीचःपरमप्रतीतःसुरोत्तमांस्तानिदमभ्युवाच ॥ करोमियद्वोहितमद्यदेवाःस्वं
चापिदेहंस्वयमुत्सृजामि २१ सएवमुक्त्वाद्विपदांवरिष्ठःप्राणान्वशीस्वान्सहसोत्ससर्ज ॥ ततःसुरास्तेजगृहुःपरासोरस्थीनितस्याथयथोपदेशम् २२ प्रहृष्ट
३० रूपाश्चजयायदेवास्त्वष्टारमागम्यतमर्थमूचुः ॥ त्वष्टातुतेषांवचनंनिशम्यप्रहृष्टरूपःप्रयतःप्रयत्नात् २३ चकारवज्रंभृशमुग्ररूपंकृत्वाचशक्रंसउवाचहृष्टः ॥
अनेनवज्रप्रवरेणदेवभस्मीकुरुष्वाद्यसुरारिमुग्रम् २४ ततोहतारिःसगणःसुखंवैप्रशाधिकृत्स्नंत्रिदिवंदिविष्ठः ॥ त्वष्ट्रातथोक्तस्तुपुरंदरस्तद्वज्रंप्रहृष्टःप्रयतोह्य
गृह्णात् २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांवज्रनिर्माणकथनेशततमोऽध्यायः ॥ १०० ॥ ॥ लोमशउवाच ॥
ततःसवज्रीबलिभिर्दैवतैरभिरक्षितः ॥ आससादततोवृत्रंस्थितमावृत्यरोदसी १ कालकेयैर्महाकायैःसमंतादभिरक्षितम् ॥ समुद्यतप्रहरणैःसशृंगैरिवपर्वतैः २
२१ परासोःगतप्राणस्य २२ । २३ । २४ । २५ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेशततमोऽध्यायः ॥ १०० ॥ ॥ ७ ॥ ततइति रोदसीद्यावापृथिव्यौ १ । २

३ वीरबाहुभिःसार्धमादावुद्यताः पश्चादन्यैःप्रतिपिष्टास्तेषां ४ तालैस्तालफलैः ५ । ६ । ७ । ८ । ९ । व्यदधत्वनिहितवान् १० । ११ । १२ बलस्थंबलवंतं १३ । १४ माल्यधारीमाला

ततोयुद्धंसमभवद्देवानांदानवैःसह ॥ मुहूर्तंभरतश्रेष्ठलोकत्रासकरंमहत् ३ उद्यतप्रतिपिष्टानांखड्गानांवीरबाहुभिः ॥ आसीत्सुतुमुलःशब्दःशरीरेष्वभिपात्य
ताम् ४ शिरोभिःप्रपतद्भिश्चाप्यंतरिक्षान्महीतलम् ॥ तालैरिवमहाराजवृंताद्भ्रष्टैरदृश्यत ५ तेहेमकवचाभूत्वाकालेयाःपरिघायुधाः ॥ त्रिदशानभ्यवर्तंत
दावदग्धाइवाद्रयः ६ तेषांवेगवतांवेगंसाभिमानंप्रधावताम् ॥ नशेकुस्त्रिदशाःसोढुंतेभग्नाःप्राद्रवन्भयात् ७ तान्दृष्ट्वाद्रवतोभीतान्सहस्राक्षःपुरंदरः ॥ वृत्रेविव
र्धमानेचकश्मलंमहदाविशत् ८ कालेयभयसंत्रस्तोदेवःसाक्षात्पुरंदरः ॥ जगामशरणंशीघ्रंतंतुनारायणंप्रभुम् ९ तंशक्रंकश्मलाविष्टंदृष्ट्वाविष्णुःसनातनः ॥ स्व
तेजोव्यदधच्छक्रेबलमस्यविवर्धयन् १० विष्णुनागोपितंशक्रंदृष्ट्वादेवगणास्ततः ॥ सर्वेतेजःसमादध्युस्तथाब्रह्मर्षयोऽमलाः ११ ससमाप्यायितःशक्रोविष्णु
नादैवतैःसह ॥ ऋषिभिश्चमहाभागैर्बलवान्समपद्यत १२ ज्ञात्वाबलस्थंत्रिदशाधिपंतुननादवृत्रोमहतोनिनादान् ॥ तस्यप्रणादेनधरादिशश्चखंद्यौर्नगाश्चापि
चचालसर्वं १३ ततोमहेंद्रःपरमाभितप्तःश्रुत्वारवंघोररूपंमहांतम् ॥ भयेनिमग्नस्त्वरितोमुमोचवज्रंमहत्तस्यवधायराजन् १४ सशक्रवज्राभिहतःपपातमहासु
रःकांचनमाल्यधारी ॥ यथामहाशैलवरःपुरस्तात्समंदरोविष्णुकराद्विमुक्तः १५ तस्मिन्हतेदैत्यवरेभयार्तःशक्रःप्रदुद्रावसरःप्रवेष्टुम् ॥ वज्रंसमेनेनकराद्विमुक्तं
वृत्रंभयाच्चापिहतंनमेने १६ सर्वेचदेवामुदिताःप्रहृष्टामहर्षयश्चेंद्रमभिष्टुवंतः ॥ सर्वांश्चदैत्यांस्त्वरिताःसमेत्यजघ्नुःसुरावृत्रवधाभितप्तान् १७ तैस्त्रास्यमानास्त्रिद
शैःसमेतैःसमुद्रमेवाविविशुर्भयार्ताः ॥ प्रविश्यचैवोदधिमप्रमेयंझषाकुलंनक्रसमाकुलंच १८ तदास्ममंत्रंसहिताःप्रचक्रुस्त्रैलोक्यनाशार्थमभिस्मयंतः ॥ तत्रस्म
केचिन्मतिनिश्चयज्ञास्तांस्तानुपायानुपवर्णयंति १९ तेषांतुतत्रक्रमकालयोगाद्घोरामतिश्चिंतयतांबभूव ॥ येसंतिविद्यातपसोपपन्नास्तेषांविनाशःप्रथमंतुकार्यः
२० लोकाहिसर्वेतपसाध्रियंतेतस्मात्त्वरध्वंतपसःक्षयाय ॥ येसंतिकेचिच्चवसुंधरायांतपस्विनोधर्मविदश्चतज्ज्ञाः २१ तेषांवधःक्रियतांक्षिप्रमेवतेषुप्रनष्टेषुज
गत्प्रनष्टम् ॥ एवंहिसर्वेगतबुद्धिभावाजगद्विनाशेपरमप्रहृष्टाः २२ दुर्गंसमाश्रित्यमहोर्मिमंतंरत्नाकरंवरुणस्यालयंस्म २३ ॥ इतिश्रीमहाभारतेआरण्यकेप
र्वणितीर्थयात्राप॰लोमशतीर्थयात्रायांवृत्रवधोपाख्यानेएकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ लोमशउवाच ॥ समुद्रंतेसमाश्रित्यवरुणंनिधिमंभसः ॥
कालेयाःसंप्रवर्तंतत्रैलोक्यस्यविनाशने १ तेरात्रौसमभिक्रुद्धाभक्षयंतिसदामुनीन् ॥ आश्रमेषुचयेसंतिपुण्येष्वायतनेषुच २ वसिष्ठस्याश्रमेविप्राभक्षिता
स्तैर्दुरात्मभिः ॥ अशीतिःशतमष्टौचनवचान्येतपस्विनः ३

धारी १५ हतमपिवृत्रं भयात् नहतमिवमेने १६ । १७ । १८ । १९ । २० ध्रियंतेजीवंति २१ गतबुद्धिभावाःप्राप्तधीनिश्चयाः २२ वरुणस्यालयंसमुद्रं २३ ॥ इत्यारण्यकेपर्वणिनैलकंठीये
भारतभावदीपेएकाधिकशततमोऽध्यायः ॥ १०१ ॥ ॥ ७ ॥ समुद्रमिति कालेयाःकालायाःकश्यपभार्यायाःपुत्राः १ । २ । ३

४ । ५ । ६ कालोपसृष्टाःमृत्युनाग्रस्ताः ७ तापसेषुप्रवृत्तान् दैत्यांस्तापसास्तत्रतत्रमाकुर्वंतेनवारयंतिइत्याशंक्याह तपा स्विष्विति तपसैव धनवत्सु देहनाशेऽपितपोनाशोमाभूदितिभावः ८
शरीरैर्मांसादिरहितत्वादस्थिमात्रैरित्यर्थः ९ अतएवशंखराशितुल्यैः १० कलशैः शिरोवदैः ११ । १२ । १३ । १४ दानवानांवधायेतिशेषः १५ क्षयंगृहंनाशंवा १६ । १७ । १८ । १९

च्यवनस्याश्रमंगत्वापुण्यंद्विजनिषेवितम् ॥ फलमूलाशनानांहिमुनीनांभक्षितंशतम् ४ एवंरात्रौस्मकुर्वंतिविविशुश्चार्णवंदिवा ॥ भरद्वाजाश्रमेचैवनियताब्रह्म
चारिणः ५ वाय्वाहारांबुभक्षाश्चविंशतिःसंनिषूदिताः ॥ एवंक्रमेणसर्वांस्तानाश्रमान्दानवास्तदा ६ निशायांपरिबाधंतेमत्ताभुजबलाश्रयात् ॥ कालोपसृष्टाः
कालेयाघ्नंतोद्विजगणान्बहून् ७ नचैनानन्वबुध्यंतमनुजामनुजोत्तम ॥ एवंप्रवृत्तान्दैत्यांस्तांस्तापसेषुतपस्विषु ८ प्रभातेसमदृश्यंतनियताहारकर्शिताः ॥
महीतलस्थामुनयःशरीरैर्गतजीवितैः ९ क्षीणमांसैर्विरुधिरैर्विमज्जान्त्रैर्विसंधिभिः ॥ आकीर्णैराबभौभूमिःशंखानामिवराशिभिः १० कलशैर्विप्रविद्धैश्चस्रुवैर्भग्नै
स्तथैवच ॥ विकीर्णैरग्निहोत्रैश्चभूर्बभूवसमावृता ११ निःस्वाध्यायवषट्कारंनष्टयज्ञोत्सवक्रियम् ॥ जगदासीन्निरुत्साहंकालेयभयपीडितम् १२ एवंसंक्षीयमा
णाश्चमानवामनुजेश्वर ॥ आत्मत्राणपराभीताःप्राद्रवंतदिशोभयात् १३ केचिद्गुहाःप्रविविशुर्निर्झरांश्चापरेतथा ॥ अपरेमरणोद्विग्नाभयात्प्राणान्समुत्सृजन् १४
केचिदत्रमहेष्वासाःशूराःपरमहर्षिताः ॥ मार्गमाणाःपरंयत्नंदानवानांप्रचक्रिरे १५ नचैतानधिजग्मुस्तेसमुद्रंसमुपाश्रितान् ॥ श्रमंजग्मुश्चपरममाजग्मुःक्षय
मेवच १६ जगत्युपशमंयातेनष्टयज्ञोत्सवक्रिये ॥ आजग्मुःपरमामार्तिंत्रिदशामनुजेश्वर १७ समेत्यसमहेंद्राश्चभयान्मंत्रंप्रचक्रिरे ॥ शरण्यंशरणंदेवंनारायण
मजंविभुम् १८ तेऽभिगम्यनमस्कृत्यवैकुंठमपराजितम् ॥ ततोदेवाःसमस्तास्तेतदोचुर्मधुसूदनं १९ त्वंनःस्रष्टाचभर्ताचहर्ताचजगतःप्रभो ॥ त्वयासृष्टमिदं
विश्वंयच्चेंगंयच्चनेंगति २० त्वयाभूमिःपुरानष्टासमुद्रात्पुष्करेक्षण ॥ वाराहंवपुराश्रित्यजगदर्थेसमुद्धृता २१ आदिदैत्योमहावीर्योहिरण्यकशिपुःपुरा ॥ नार
सिंहंवपुःकृत्वासूदितःपुरुषोत्तम २२ अवध्यःसर्वभूतानांबलिश्चापिमहासुरः ॥ वामनंवपुराश्रित्यत्रैलोक्याद्भ्रंशितस्त्वया २३ असुरश्चमहेष्वासोजंभइत्यभि
विश्रुतः ॥ यज्ञक्षोभकरःक्रूरस्त्वयैवविनिपातितः २४ एवमादीनिकर्माणियेषांसंख्यानविद्यते ॥ अस्माकंभयभीतानांत्वंगतिर्मधुसूदन २५ तस्मात्त्वांदेवदे
वेशलोकार्थंज्ञापयामहे ॥ रक्षलोकांश्चदेवांश्चशक्रंचमहतोभयात् २६ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांविष्णु
स्तवे द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ देवाऊचुः ॥ ॥ तवप्रसादाद्वर्धंतेप्रजाःसर्वाश्चतुर्विधाः ॥ ताभाविताभावयंतिहव्यकव्यैर्दिवौकसः १
लोकाह्येवंविवर्धंतेह्यन्योन्यंसमुपाश्रिताः ॥ त्वत्प्रसादानिरुद्विग्नास्त्वयैवपरिरक्षिताः २

इंगतिचलती तिइंगंपचाद्यच्जंगमं नेंगतिस्थावरं २० । २१ । २२ । २३ । २४ । २५ । २६ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेद्व्यधिकशततमोऽध्यायः ॥ १०२ ॥
तवेति चतुर्विधाःसुरनरतिर्यक्स्थावराः दिवौकसोदेवान् १ । २

३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ वारुणिंमैत्रावरुणपुत्रम् १३ अभिष्टुवन् अस्तुवन् अ इमावआर्षः १४ । १५ नगोत्तम-पर्वतेषुश्रेष्ठः विंध्योनाम्ना १६ तमसाविंध्यवृद्धया

॥८१॥ इदंचसमनुप्राप्तंलोकानांभयमुत्तमम् ॥ नचजानीमकेनेमेरात्रौवध्यंतिब्राह्मणाः ३ क्षीणेषुचब्राह्मणेषुपृथिवीक्षयमेष्यति ॥ ततःपृथिव्यांक्षीणायांत्रिदिवंक्षय
मेष्यति ४ त्वत्प्रसादान्महाबाहोलोकाःसर्वेजगत्पते ॥ विनाशंनाधिगच्छेयुस्त्वयावैपरिरक्षिताः ५ ॥ विष्णुरुवाच ॥ विदितंमेसुराःसर्वंप्रजानांक्षयकारणम् ॥
भवतांचापिवक्ष्यामिशृणुध्वंविगतज्वराः ६ कालेयइतिविख्यातोगणःपरमदारुणः ॥ तैश्चवृत्रंसमाश्रित्यजगत्सर्वंप्रमाथितम् ७ तेवृत्रंनिहतंदृष्ट्वासहस्राक्षेणधी ॥१०४॥
मता ॥ जीवितंपरिरक्षंतःप्रविष्टावरुणालयम् ८ तेप्रविश्योदधिंघोरंनक्रग्राहसमाकुलम् ॥ उत्सादनार्थंलोकानांरात्रौघ्नंतिऋषीनिह ९ नतुशक्याःक्षयंनेतुंसमु
द्राश्रयगाहिते ॥ समुद्रस्यक्षयेबुद्धिर्भवद्भिःसंप्रधार्यताम् १० अगस्त्येनविनाकोहिशक्तोऽन्योऽर्णवशोषणे ॥ अन्यथाहिनशक्यास्तेविनासागरशोषणम् ११
एतच्छ्रुत्वातदादेवाविष्णुनासमुदाहृतम् ॥ परमेष्ठिनमाज्ञाप्यअगस्त्यस्याश्रमंययुः १२ तत्रापश्यन्महात्मानंवारुणिंदीप्ततेजसम् ॥ उपास्यमानमृषिभिर्देवैरि
वपितामहम् १३ तेऽभिगम्यमहात्मानंमैत्रावरुणिमच्युतम् ॥ आश्रमस्थंतपोराशिंकर्मभिःस्वैरभिष्टुवन् १४ ॥ देवाऊचुः ॥ नाहुषेणाभितप्तानांत्वंलोकानां
गतिःपुरा ॥ भ्रंशितश्चसुरैश्वर्यात्स्वर्लोकाल्लोककंटकः १५ क्रोधात्प्रवृद्धःसहसाभास्करस्यनगोत्तमः ॥ वचस्तवानतिक्रामन्विंध्यःशैलोनवर्धते १६ तमसा
चावृतेलोकेमृत्युनाभ्यर्दिताःप्रजाः ॥ त्वामेवनाथमासाद्यनिर्वृतिंपरमांगताः १७ अस्माकंभयभीतानांनित्यशोभगवान्गतिः ॥ ततस्त्वार्ताःप्रयाचामोवरंत्वां
वरदोह्यसि ॥ १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामगस्त्यमाहात्म्यकथनेत्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ युधि
ष्ठिरउवाच ॥ किमर्थंसहसाविंध्यःप्रवृद्धःक्रोधमूर्च्छितः ॥ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहामुने १ ॥ लोमशउवाच ॥ अद्रिराजंमहाशैलंमेरुंकनकपर्वतम् ॥
उदयास्तमनेभानुःप्रदक्षिणमवर्तत २ तंतुदृष्ट्वातथाविंध्यःशैलःसूर्यमथाब्रवीत् ॥ यथाहिमेरुर्भवतानित्यशःपरिगम्यते ३ प्रदक्षिणश्चक्रियतेमामेवंकुरुभास्क
र ॥ एवमुक्तस्ततःसूर्यःशैलेंद्रंप्रत्यभाषत ४ नाहमात्मेच्छयाशैलंकरोम्येनंप्रदक्षिणम् ॥ एषमार्गःप्रदिष्टोमेयैरिदंनिर्मितंजगत् ५ एवमुक्तस्ततःक्रोधात्प्रवृ
द्धःसहसाऽचलः ॥ सूर्याचंद्रमसोर्मार्गंरोद्धुमिच्छन्परंतपः ६ ततोदेवाःसहिताःसर्वएवविंध्यंसमागम्यमहाद्रिराजम् ॥ निवारयामासुरुपायतस्तंनचस्मतेषांव
चनंचकार ७ अथाभिजग्मुर्मुनिमाश्रमस्थंतपस्विनंधर्मभृतांवरिष्ठम् ॥ अगस्त्यमत्यद्भुतवीर्यवंतंतंचार्थमूचुःसहिताःसुरास्ते ८ ॥ देवाऊचुः ॥ सूर्याचंद्रमसो
र्मार्गंनक्षत्राणांगतिंतथा ॥ शैलराजोऽवृणोत्येषविंध्यःक्रोधवशानुगः ९ तंनिवारयितुंशक्तोनान्यःकश्चिद्द्विजोत्तम ॥ ऋतेत्वांहिमहाभागतस्मादेनंनिवारय १० ॥८१॥

आवृते ग्रस्तालोके लोके जगतिसति १७ ॥ १८ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेत्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ किमर्थमिति १।२।३।४।५।६।७।८।९।१०

११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेचतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥

तच्छ्रुत्वावचनंविप्रःसुराणांशैलमभ्यगात् ॥ सोऽभिगम्याब्रवीद्विंध्यंसदारःसमुपस्थितम् ११ मार्गमिच्छाम्यहंदत्तंभवतापर्वतोत्तम ॥ दक्षिणामभिगंताऽस्मि
दिशंकार्येणकेनचित् १२ यावदागमनंमह्यंतावत्त्वंप्रतिपालय ॥ निवृत्तेमयिशैलेंद्रततोवर्धस्वकामतः १३ एवंससमयंकृत्वाविंध्येनामित्रकर्शन ॥ अद्यापिदक्षि
णाद्देशाद्वारुणिर्ननिवर्तते १४ एतत्तेसर्वमाख्यातंयथाविंध्योनवर्धते ॥ अगस्त्यस्यप्रभावेणयन्मांत्वंपरिपृच्छसि १५ कालेयास्तुयथाराजन्सुरैःसर्वैर्निषूदि
ताः ॥ अगस्त्याद्वरमासाद्यतन्मेनिगदतःशृणु १६ त्रिदशानांवचःश्रुत्वामैत्रावरुणिरब्रवीत् ॥ किमर्थमभियाताःस्थवरंमत्तःकामिच्छथ ॥ एवमुक्तास्ततस्ते
नदेवतामुनिमब्रुवन् १७ एवंत्वयेच्छामकृतंहिकार्यंमहार्णवंपीयमानंमहात्मन् ॥ ततोवधिष्यामसहानुबंधान्कालेयसंज्ञान्सुरविद्विषस्तान् १८ त्रिदशानांवचः
श्रुत्वातथेतिमुनिरब्रवीत् ॥ करिष्येभवतांकामंलोकानांचमहत्सुखम् १९ एवमुक्त्वाततोऽगच्छत्समुद्रंसरितांपतिम् ॥ ऋषिभिश्चतपःसिद्धैःसार्धंदेवैश्चसुव्र
त २० मनुष्योरगगंधर्वयक्षकिंपुरुषास्तथा ॥ अनुजग्मुर्महात्मानंद्रष्टुकामास्तदद्भुतम् २१ ततोऽभ्यगच्छन्सहिताःसमुद्रंभीमनिःस्वनम् ॥ नृत्यंतमिवचो
र्मीभिर्वल्गंतमिववायुना २२ हसंतमिवफेनौघैःस्खलंतंकंदरेषुच ॥ नानाग्राहसमाकीर्णंनानाद्विजगणान्वितम् २३ अगस्त्यसहितादेवाःसगंधर्वमहोरगाः ॥ ऋ
षयश्चमहाभागाःसमासेदुर्महोदधिम् २४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामगस्त्यो०चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
॥ लोमशउवाच ॥ ॥ समुद्रंससमासाद्यवारुणिर्भगवानृषिः ॥ उवाचसहितान्देवानृषींश्चैवसमागतान् १ अहंलोकहितार्थंवैपिबामिवरुणालयम् ॥ भव
द्भिर्यदनुष्ठेयंतच्छीघ्रंसंविधीयताम् २ एतावदुक्त्वावचनंमैत्रावरुणिरच्युतः ॥ समुद्रमपिबत्क्रुद्धःसर्वलोकस्यपश्यतः ३ पीयमानंसमुद्रंतंदृष्ट्वासेंद्रास्तदामराः ॥
विस्मयंपरमंजग्मुःस्तुतिभिश्चाप्यपूजयन् ४ त्वंनस्त्राताविधाताचलोकानांलोकभावन ॥ त्वत्प्रसादात्समुच्छेदंनगच्छेत्सामरंजगत् ५ संपूज्यमानस्त्रिदशैर्महा
त्मागंधर्वतूर्येषुनदत्सुसर्वशः ॥ दिव्यैश्चपुष्पैरवकीर्यमाणोमहार्णवंनिःसलिलंचकार ६ दृष्ट्वाकृतंनिःसलिलंमहार्णवंसुराःसमस्ताःपरमप्रहृष्टाः ॥ प्रगृह्यदिव्या
निवरायुधानितान्दानवाञ्जघ्नुरदीनसत्त्वाः ७ तेवध्यमानास्त्रिदशैर्महात्मभिर्महाबलैर्वेगिभिरुन्नदद्भिः ॥ नसेहिरेवेगवतांमहात्मनांवेगंतदाधारयितुंदिवौकसाम् ८
तेवध्यमानास्त्रिदशैर्दानवाभीमनिःस्वनाः ॥ चक्रुःसुतुमुलंयुद्धंमुहूर्तमिवभारत ९ तेपूर्वंतपसादग्धामुनिभिर्भावितात्मभिः ॥ यतमानाःपरंशक्त्यात्रिदशैर्विनि
षूदिताः १० तेहेमनिष्काभरणाःकुंडलांगदधारिणः ॥ निरताबह्वशोभंतपुष्पिताइवकिंशुकाः ११ हतशेषास्ततःकेचित्कालेयामनुजोत्तम ॥ विदार्यवसुधां
देवींपातालतलमास्थिताः १२

समुद्रमिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ तानिति १ । २ । ३ । ४ । ५ । ६

निहतान्दानवान्दृष्ट्वात्रिदशामुनिपुंगवम् ॥ तुष्टुवुर्विविधैर्वाक्यैरिदंवचनमब्रुवन् १३ त्वत्प्रसादान्महाबाहोलोकैःप्राप्तंमहत्सुखम् ॥ त्वत्तेजसाचनिहताःकालेया
क्रूरविक्रमाः १४ पूरयस्वमहाबाहोसमुद्रंलोकभावन ॥ यत्त्वयासलिलंपीतंतदस्मिन्पुनरुत्सृज १५ एवमुक्तःप्रत्युवाचभगवान्मुनिपुंगवः ॥ जीर्णंतद्धिमया
तोयमुपायोऽन्यःप्रचिंत्यताम् १६ पूरणार्थंसमुद्रस्यभवद्भिर्यत्नमास्थितैः ॥ एतच्छ्रुत्वातुवचनंमहर्षेर्भावितात्मनः १७ विस्मिताश्चविषण्णाश्चबभूवुःसहिताः
सुराः ॥ परस्परमनुज्ञाप्यप्रणम्यमुनिपुंगवम् १८ प्रजाःसर्वामहाराजविप्रजग्मुर्यथागतम् ॥ त्रिदशाविष्णुनासार्धमुपजग्मुःपितामहम् १९ पूरणार्थंसमुद्र
स्यमंत्रयित्वापुनःपुनः ॥ ऊचुःप्रांजलयःसर्वेसागरस्याभिपूरणम् २० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थ० लोमशतीर्थयात्रायामगस्त्योपाख्याने
पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ लोमशउवाच ॥ तानुवाचसमेतांस्तुब्रह्मालोकपितामहः ॥ गच्छध्वंविबुधाःसर्वेयथाकामंयथेप्सितम् १ महताका
लयोगेनप्रकृतिंयास्यतेऽर्णवः ॥ ज्ञातींश्चकारणंकृत्वामहाराज्ञोभगीरथात् २ पितामहवचःश्रुत्वासर्वेविबुधसत्तमाः ॥ कालयोगंप्रतीक्षंतोजग्मुश्चापियथागतम्
३ ॥ युधिष्ठिरउवाच ॥ ॥ कथंवैज्ञातयोब्रह्मन्कारणंचात्रकिंमुने ॥ कथंसमुद्रःपूर्णश्चभगीरथप्रतिश्रयात् ४ एतदिच्छाम्यहंश्रोतुंविस्तरेणतपोधन ॥
कथ्यमानंत्वयाविप्रराज्ञांचरितमुत्तमम् ५ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्तस्तुविप्रेंद्रोधर्मराज्ञामहात्मना ॥ कथयामासमाहात्म्यंसगरस्यमहात्मनः ६ ॥
॥ लोमशउवाच ॥ इक्ष्वाकूणांकुलेजातःसगरोनामपार्थिवः ॥ रूपसत्त्वबलोपेतःसचापुत्रःप्रतापवान् ७ सहैहयान्समुत्साद्यतालजंघांश्चभारत ॥ वशेचकृत्वा
राजन्यान्स्वराज्यमन्वशासत ८ तस्यभार्येत्वभवतांरूपयौवनदर्पिते ॥ वैदर्भीभरतश्रेष्ठशैब्याचभरतर्षभ ९ सपुत्रकामोनृपतिस्तप्यतेस्ममहत्तपः ॥ पत्नी
भ्यांसहराजेंद्रकैलासंगिरिमाश्रितः १० सतप्यमानःसुमहत्तपोयोगसमन्वितः ॥ आससादमहात्मानंत्र्यक्षंत्रिपुरमर्दनम् ११ शंकरंभवमीशानंपिनाकिंशूलपाणि
नम् ॥ त्र्यम्बकंशिवमुग्रेशंबहुरूपमुमापतिं १२ सतंदृष्ट्वैववरदंपत्नीभ्यांसहितोनृपः ॥ प्रणिपत्यमहाबाहुःपुत्रार्थेसमयाचत १३ तंप्रीतिमान्हरःप्राहसभार्यंनृप
सत्तमम् ॥ यस्मिन्वृतोमुहूर्तेऽहंत्वयेहनृपतेवरम् १४ षष्टिःपुत्रसहस्राणिशूराःपरमदर्पिताः ॥ एकस्यांसंभविष्यंतिपत्न्यांनरवरोत्तम १५ तेचैवसर्वेसहिताः
क्षयंयास्यंतिपार्थिव ॥ एकोवंशधरःशूरएतस्यांसंभविष्यति १६ एवमुक्त्वातुतंरुद्रस्तत्रैवांतरधीयत ॥ सचापिसगरोराजाजगामस्वंनिवेशनम् १७ पत्नीभ्यां
सहितस्तत्रसोऽतिहृष्टमनास्तदा ॥ तस्यतेमनुजश्रेष्ठभार्येकमललोचने १८ वैदर्भीचैवशैब्याचगर्भिण्यौसंबभूवतुः ॥ ततःकालेनवैदर्भीगर्भालाबुंव्यजायत १९

७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९

२० । २१ । २२ । २३ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेपडधिकशततमोऽध्यायः ॥ १०६ ॥ ७ ॥ एतच्छ्रुत्वेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

शैब्याचसुषुवेपुत्रंकुमारंदेवरूपिणम् ॥ तदालाबुंसमुत्स्रष्टुंमनश्चक्रेसपार्थिवः २० अथांतरिक्षाच्छुश्राववाचंगंभीरनिःस्वनाम् ॥ राजन्मासाहसंकार्षीःपुत्रान्न
त्यक्तुमर्हसि २१ अलाबुमध्यान्निष्कृष्यबीजंयत्नेनगोप्यताम् ॥ सोपस्वेदेषुपात्रेषुघृतपूर्णेषुभागशः २२ ततःपुत्रसहस्राणिषष्टिंप्राप्स्यसिभारत ॥ महादेवेन
दिष्टंतेपुत्रजन्मनराधिप ॥ अनेनक्रमयोगेनमातेबुद्धिरतोऽन्यथा ॥ २३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांसगरसंतति
कथनेषडधिकशततमोऽध्यायः ॥ १०६ ॥ ७ ॥ लोमशउवाच ॥ एतच्छ्रुत्वांऽतरिक्षाच्चसराजाराजसत्तमः ॥ यथोक्तंतच्चकाराथश्रद्दधद्भरतर्षभ १ एकैकश
स्ततःकृत्वाबीजंबीजंनराधिपः ॥ घृतपूर्णेषुकुंभेषुतान्भागान्विदधेततः २ धात्रीश्चैकैकशःप्रादात्पुत्ररक्षणतत्परः ॥ ततःकालेनमहतासमुत्तस्थुर्महाबलाः ३ प
ष्टिःपुत्रसहस्राणितस्याप्रतिमतेजसः ॥ रुद्रप्रसादाद्राजर्षेःसमजायंतपार्थिव ४ तेघोराःक्रूरकर्माणआकाशपरिसर्पिणः ॥ बहुत्वाच्चावजानंतःसर्वांल्लोकान्सहाम
रान् ५ त्रिदशांश्चाप्यबाधंततथागंधर्वराक्षसान् ॥ सर्वाणिचैवभूतानिशूराःसमरशालिनः ६ वध्यमानास्ततोलोकाःसागरैर्मंदबुद्धिभिः ॥ ब्रह्माणंशरणंजग्मुः
सहिताःसर्वदैवतैः ७ तानुवाचमहाभागःसर्वलोकपितामहः ॥ गच्छध्वंत्रिदशाःसर्वेलोकैःसार्धंयथागतम् ८ नातिदीर्घेणकालेनसागराणांक्षयोमहान् ॥ भवि
ष्यतिमहाघोरःस्वकृतैःकर्मभिःसुराः ९ एवमुक्तास्तुतेदेवालोकाश्चमनुजेश्वर ॥ पितामहमनुज्ञाप्यविप्रजग्मुर्यथागतम् १० ततःकालेबहुतिथेव्यतीतेभरतर्षभ ॥
दीक्षितःसगरोराजाहयमेधेनवीर्यवान् ११ तस्याश्वोव्यचरद्भूमिंपुत्रैःसपरिरक्षितः ॥ समुद्रंससमासाद्यनिस्तोयंभीमदर्शनम् १२ रक्ष्यमाणःप्रयत्नेनतत्रैवांत
रधीयत ॥ ततस्तेसागरास्तातहृतंमत्वाहयोत्तमम् १३ आगम्यपितुराचख्युरदृश्यंतुरगंहृतम् ॥ तेनोक्तादिक्षुसर्वासुसर्वेऽमार्गतवाजिनम् १४ ततस्तेपि
तुराज्ञायदिक्षुसर्वासुतंहयम् ॥ अमार्गंतमहाराजसर्वंचपृथिवीतलम् १५ ततस्तेसागराःसर्वेसमुपेत्यपरस्परम् ॥ नाध्यगच्छंततुरगमश्वहर्तारमेवच १६ आग
म्यपितरंचोचुस्ततःप्रांजलयोऽग्रतः ॥ ससमुद्रवनद्वीपासनदीनदकंदरा १७ सपर्वतवनोद्देशानिखिलेनमहीनृप ॥ अस्माभिर्विचिताराजन्शासनात्तवपार्थिव
१८ नचाश्वमधिगच्छामोनाश्वहर्तारमेवच ॥ श्रुत्वातुवचनंतेषांसराजाक्रोधमूर्च्छितः १९ उवाचवचनंसर्वांस्तदादैववशान्नृप ॥ अनागमायगच्छध्वंभूयोमा
र्गंतवाजिनम् २० यज्ञियंतंविनाह्यश्वंनागंतव्यंहिपुत्रकाः ॥ प्रतिगृह्यतुसंदेशंपितुस्तेसगरात्मजाः २१ भूयएवमहींकृत्स्नांविचेतुमुपचक्रमुः ॥ अथापश्यंत
तेवीराःपृथिवीमवदारिताम् ,२२ समासाद्यबिलंतच्चाप्यखनन्सगरात्मजाः ॥ कुद्दालैर्हेषुकैश्चैवसमुद्रंयत्नमास्थिताः २३

१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ हेषुकैःहेषयाविसर्पयत्येभिरिति मृत्तिकोत्क्षेपणैःसवंडैर्लोहपत्रैः । हेषृप्रसर्पणेऽस्यरूपम् २३

सागरैःनगरसमूहैः २४ । २५ । २६ । २७ पूर्वोत्तरदेशान्याम् २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४५ । ४४ । ४५ । ४६

सखन्यमानःसहितैःसागरैर्वरुणालयः ॥ अगच्छत्परमामार्तिंदीर्यमाणःसमंततः २४ असुरोरगरक्षांसिसत्त्वानिविविधानिच ॥ आर्तनादमकुर्वंतवध्यमानानि
सागरैः २५ छिन्नशीर्षाविदेहाश्चभिन्नत्वगस्थिसंधयः ॥ प्राणिनःसमदृश्यंतशतशोऽथसहस्रशः २६ एवंहिखनतांतेषांसमुद्रंवरुणालयम् ॥ व्यतीतःसुमहान्का
लोनचाश्वःसमदृश्यत २७ ततःपूर्वोत्तरेदेशेसमुद्रस्यमहीपते ॥ विदार्यपातालमथसंक्रुद्धाःसगरात्मजाः २८ अपश्यंतहयंतत्रविचरंतंमहीतले ॥ कपिलंचम
हात्मानंतेजोराशिमनुत्तमम् ॥ तेजसादीप्यमानंतुज्वालाभिरिवपावकम् २९ तेतंदृष्ट्वाहयंराजन्संप्रहृष्टतनूरुहाः ॥ अनादृत्यमहात्मानंकपिलंकालचोदिताः ॥
३० संक्रुद्धाःसंप्रधावंतअश्वग्रहणकांक्षिणः ॥ ततःक्रुद्धोमहाराजकपिलोमुनिसत्तमः ३१ वासुदेवेतियंप्राहुःकपिलंमुनिपुंगवम् ॥ सचक्षुर्विकृतंकृत्वातेजस्तेषुस
मुत्सृजन् ३२ ददाहसुमहातेजामंदबुद्धीन्ससागरान् ॥ तान्दृष्ट्वाभस्मसाद्भूतान्नारदःसुमहातपाः ३३ सगरांतिकमागच्छत्तच्चतस्मैन्यवेदयत् ॥ सतच्छ्रुत्वा
वचोघोरंराजामुनिमुखोद्गतम् ३४ मुहूर्तंविमनाभूत्वास्थाणोर्वाक्यमचिंतयत् ॥ अंशुमंतंसमाहूयअसमंजःसुतंतदा ३५ पौत्रंभरतशार्दूलइदंवचनमब्रवीत् ॥
षष्टिस्तानिसहस्राणिपुत्राणाममितौजसाम् ३६ कापिलंतेजआसाद्यमत्कृतेनिधनंगताः ॥ तवचापिपितातातपरित्यक्तोमयाऽनघ ॥ धर्मंसंरक्षमाणेनपौराणां
हितमिच्छता ३७ ॥ युधिष्ठिरउवाच ॥ किमर्थंराजशार्दूलःसगरःपुत्रमात्मजम् ॥ त्यक्तवान्दुस्त्यजंवीरंतन्मेब्रूहितपोधन ३८ ॥ लोमशउवाच ॥ असमं
जाइतिख्यातःसगरस्यसुतोह्यभूत् ॥ यंशैब्याजनयामासपौराणांसहिदारकान् ३९ गलेषुक्रोशतोगृह्यनद्यांचिक्षेपदुर्बलान् ॥ ततःपौराःसमाजग्मुर्भयशोकप
रिप्लुताः ४० सगरंचाभ्यभाषंतसर्वेप्रांजलयःस्थिताः ॥ त्वंनस्त्रातामहाराजपरचक्रादिभिर्भयात् ४१ असमंजोभयाद्घोरात्ततोनस्त्रातुमर्हसि ॥ पौराणांव
चनंश्रुत्वाघोरंनृपतिसत्तमः ४२ मुहूर्तंविमनाभूत्वासचिवानिदमब्रवीत् ॥ असमंजाःपुरादद्यसुतोमेविप्रवास्यताम् ४३ यदिवोमत्प्रियंकार्यमेतच्छीघ्रंविधीय
ताम् ॥ एवमुक्तानरेंद्रेणसचिवास्तेनराधिप ४४ यथोक्तंत्वरिताश्चक्रुर्यथाऽऽज्ञापितवान्नृपः ॥ एतत्तेसर्वमाख्यातंयथापुत्रोमहात्मना ४५ पौराणांहितकामेन
सगरेणविवासितः ॥ अंशुमांस्तुमहेष्वासोयदुक्तःसगरेणहि ॥ तत्तेसर्वंप्रवक्ष्यामिकीर्त्यमानंनिबोधमे ४६ ॥ सगरउवाच ॥ पितुश्चतेऽहंत्यागेनपुत्राणांनिध
नेनच ॥ अलाभेनतथाऽश्वस्यपरितप्यामिपुत्रक ४७ तस्माद्दुःखाभिसंतप्तंयज्ञविघ्नाच्चमोहितम् ॥ हयस्यानयनात्पौत्रनरकान्मांसमुद्धर ४८ अंशुमानेव
मुक्तस्तुसगरेणमहात्मना ॥ जगामदुःखात्तंदेशंयत्रवैदारितामही ४९ सतुतेनैवमार्गेणसमुद्रंप्रविवेशह ॥ अपश्यच्चमहात्मानंकपिलंतुरगंचतम् ५० सदृष्ट्वाते
जसोराशिंपुराणमृषिसत्तमम् ॥ प्रणम्यशिरसाभूमौकार्यमस्मैन्यवेदयत् ५१ ४७ । ४८ । ४९ । ५० । ५१ ।

५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेसप्ताधिकशततमो

ततःप्रीतोमहाराजकपिलोंऽशुमतोऽभवत् ॥ उवाचचैनंधर्मात्मावरदोऽस्मीतिभारत ५२ सवव्रेतुरगंतत्रप्रथमंयज्ञकारणात् ॥ द्वितीयंवरकंवव्रेपितॄणांपावनेच्छ
या ५३ तमुवाचमहातेजाःकपिलोमुनिपुंगवः ॥ ददानितवभद्रंतेयद्यत्प्रार्थयसेऽनघ ५४ त्वयिक्षमाचधर्मश्चसत्यंचापिप्रतिष्ठितम् ॥ त्वयाकृतार्थःसगरःपुत्र
वांश्चत्वयापिता ५५ तवचैवप्रभावेनस्वर्गंयास्यंतिसागराः ॥ पौत्रश्चतेत्रिपथगांत्रिदिवादानयिष्यति ५६ पावनार्थंसागराणांतोषयित्वामहेश्वरम् ॥ हयंनय
स्वभद्रंतेयज्ञियंनरपुंगव ५७ यज्ञःसमाप्यतांतातसगरस्यमहात्मनः ॥ अंशुमानेवमुक्तस्तुकपिलेनमहात्मना ५८ आजगामहयंगृह्ययज्ञवाटंमहात्मनः ॥ सो
ऽभिवाद्यततःपादौसगरस्यमहात्मनः ५९ मूर्ध्निचेनाप्युपाघ्रातस्तस्मैसर्वंन्यवेदयत् ॥ यथादृष्टंश्रुतंचापिसागराणांक्षयंतथा ६० तंचास्मैहयमाचष्टयज्ञवाटमु
पागतम् ॥ तच्छ्रुत्वासगरोराजापुत्रजंदुःखमत्यजत् ६१ अंशुमंतंचसंपूज्यसमापयततंक्रतुम् ॥ समाप्तयज्ञःसगरोदेवैःसर्वैःसभाजितः ६२ पुत्रत्वेकल्पयामा
ससमुद्रंवरुणालयम् ॥ प्रशास्यसुचिरंकालंराज्यंराजीवलोचनः ६३ पौत्रेभारंसमावेश्यजगामत्रिदिवंतदा ॥ अंशुमानपिधर्मात्मामहींसागरमेखलाम् ६४
६४ प्रशशासमहाराजयथैवास्यपितामहः ॥ तस्यपुत्रःसमभवद्दिलीपोनामधर्मवित् ६५ तस्मैराज्यंसमाधायअंशुमानपिसंस्थितः ॥ दिलीपस्तुततःश्रुत्वापि
तॄणांनिधनंमहत् ६६ पर्यतप्यतदुःखेनतेषांगतिमचिंतयत् ॥ गंगावतरणेयत्नंसुमहच्चाकरोन्नृपः ६७ नचावतारयामासचेष्टमानोयथाबलम् ॥ तस्यपुत्रःसमभ
वच्छ्रीमान्धर्मपरायणः ६८ भगीरथइतिख्यातःसत्यवागनसूयकः ॥ अभिषिच्यतुतंराज्येदिलीपोवनमाश्रितः ६९ तपःसिद्धिसमायोगात्सराजाभरतर्षभ ॥
वनाज्जगामत्रिदिवंकालयोगेनभारत ॥ ७० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप० लोमशतीर्थयात्रायामगस्त्यमाहात्म्यकथनेसप्ताधिकशततमो
ऽध्यायः ॥ १०७ ॥ ॥ ५ ॥ लोमशउवाच ॥ सतुराजामहेष्वासश्चक्रवर्तीमहारथः ॥ बभूवसर्वलोकस्यमनोनयननंदनः १ सशुश्रावमहाबाहुःकपिलेनमहा
त्मना ॥ पितॄणांनिधनंघोरमप्राप्तिंत्रिदिवस्यच २ सराज्यंसचिवेन्यस्यहृदयेनविदूयता ॥ जगामहिमवत्पार्श्वंतपस्तप्तुंनरेश्वर ३ आरिराधयिषुर्गंगांतपसा
दग्धकिल्बिषः ॥ सोऽपश्यतनरश्रेष्ठहिमवंतंनगोत्तमम् ४ शृंगैर्बहुविधाकारैर्धातुमद्भिरलंकृतम् ॥ पवनालंबिभिर्मेघैःपरिषिक्तंसमंततः ५ नदीकुंजनितंबैश्च
प्रासादैरुपशोभितम् ॥ गुहाकंदरसंलीनसिंहव्याघ्रनिषेवितम् ६ शकुनैश्चविचित्रांगैःकूजद्भिर्विविधागिरः ॥ भृंगराजैस्तथाहंसैर्दात्यूहैर्जलकुक्कुटैः ७ मयूरैःश
तपत्रैश्चजीवंजीवककोकिलैः ॥ चकोरैरसितापांगैस्तथापुत्रप्रियैरपि ८

ऽध्यायः ॥ १०७ ॥ सविति १ । २ । ३ । ४ । ५ । ६ । ७ । ८

९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टाधिकशततमोऽ

जलस्थानेषुरम्येषुपद्मिनीभिश्चसंकुलम् ॥ सारसानांचमधुरैर्व्याहृतैःसमलंकृतम् ९ किन्नरैरप्सरोभिश्चनिषेवितशिलातलम् ॥ दिग्वारणविषाणाग्रैःसमंताद्
घृष्टपादपम् १० विद्याधरानुचरितंनानारत्नसमाकुलम् ॥ विषोल्बणभुजंगैश्चदीप्तजिह्वैर्निषेवितम् ११ क्वचित्कनकसंकाशंक्वचिद्रजतसंनिभम् ॥ क्वचिदंज
नपुंजाभंहिमवंतमुपागमत् १२ सतुतत्रनरश्रेष्ठस्तपोघोरंसमाश्रितः ॥ फलमूलांबुसंभक्षःसहस्रपरिवत्सरान् १३ संवत्सरसहस्रेतुगतेदिव्येमहानदी ॥ दर्शया
मासतंगंगातदामूर्तिमतीस्वयम् १४ ॥ गंगोवाच ॥ किमिच्छसिमहाराजमत्तःकिंचददानिते ॥ तद्ब्रवीहिनरश्रेष्ठकरिष्यामिवचस्तव १५ एवमुक्तःप्रत्युवा
चराजाहैमवतींतदा ॥ पितामहामेवरदेकपिलेनमहानदि १६ अन्वेषमाणास्तुरगंनीतावैवस्वतक्षयम् ॥ षष्टिस्तानिसहस्राणिसागराणांमहात्मनाम् १७ कापि
लंदेवमासाद्यक्षणेननिधनंगताः ॥ तेषामेवंविनष्टानांस्वर्गेवासोनविद्यते १८ यावत्तानिशरीराणित्वंजलैर्नाभिषिंचसि ॥ तावत्तेषांगतिर्नास्तिसागराणांमहान
दि १९ स्वर्गंनयमहाभागेमत्पितॄन्सगरात्मजान् ॥ तेषामर्थेनयाचामित्वामहंवैमहानदि २० ॥ लोमशउवाच ॥ एतच्छ्रुत्वावचोराज्ञोगंगालोकनमस्कृता ॥
भगीरथमिदंवाक्यंसुप्रीतासमभाषत २१ करिष्यामिमहाराजवचस्तेनात्रसंशयः ॥ वेगंतुममदुर्धार्यंपतंत्यागगनाद्भुवम् २२ नशक्तस्त्रिषुलोकेषुकश्चिद्धारयितुं
नृप ॥ अन्यत्रविबुधश्रेष्ठान्नीलकंठान्महेश्वरात् २३ तंतोषयमहाबाहोतपसावरदंहरम् ॥ सतुमांप्रच्युतांदेवःशिरसाधारयिष्यति २४ सकरिष्यतितेकामंपितॄ
णांहितकाम्यया ॥ एतच्छ्रुत्वाततोराजन्महाराजोभगीरथः २५ कैलासंपर्वतंगत्वातोषयामासशंकरम् ॥ तपस्तीव्रमुपागम्यकालयोगेनकेनचित् २६ अगृ
ह्णाच्चवरंतस्माद्गंगायाधारणेनृप ॥ स्वर्गेवासंसमुद्दिश्यपितॄणांसनरोत्तमः ॥ २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामग
स्त्योपाख्यानेअष्टाधिकशततमोऽध्यायः ॥ १०८ ॥ लोमशउवाच ॥ भगीरथवचःश्रुत्वाप्रियार्थंचदिवौकसाम् ॥ एवमस्त्वितिराजानंभगवान्प्रत्यभाषत १
धारयिष्येमहाभागगगनात्प्रच्युतांशिवाम् ॥ दिव्यांदेवनदींपुण्यांत्वत्कृतेनृपसत्तम २ एवमुक्त्वामहाबाहोहिमवंतमुपागमत् ॥ वृतःपारिषदैर्घोरैर्नानाप्रहरणो
द्यतैः ३ तत्रस्थित्वानरश्रेष्ठंभगीरथमुवाचह ॥ प्रयाचस्वमहाबाहोशैलराजसुतांनदीं ४ पतमानांसरिच्छ्रेष्ठांधारयिष्येत्रिविष्टपात् ॥ एतच्छ्रुत्वावचोराजाश
र्वेणसमुदाहृतम् ५ प्रयतःप्रणतोभूत्वागंगांसमनुचिंतयत् ॥ ततःपुण्यजलारम्याराज्ञासमनुचिंतिता ६ ईशानंचस्थितंदृष्ट्वागगनात्सहसाच्युता ॥
तांप्रच्युतामथोदृष्ट्वादेवाःसार्धंमहर्षिभिः ७ गंधर्वोरगयक्षाश्चसमाजग्मुर्दिदृक्षवः ॥ ततःपपातगगनाद्गंगाहिमवतःसुता ८ समुद्धृतमहावर्तामीनग्राहस ॥१२॥
माकुला ॥ तांदधारहरोराजन्गंगांगगनमेखलाम् ९

ध्यायः ॥ १०८ ॥ ॥ भगीरथवच इति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९

१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेनवाधिकशततमोऽध्यायः ॥ १०९ ॥ तत इति १ भावान्पदार्थान् २ वाता
बद्धावातेनाबद्धामेघाउपलाश्चभवन् वातंविनैवसहसामेघाःशिलाश्चप्रयुज्यंतेइत्यर्थः । भवन्नित्यडभावआर्षः । वाचायत्रभवन्निति पाठे शब्दोच्चारणेनैव यत्रमेघाउपलाश्च हेमवन् मासमानआ

ललाटदेशेपतितांमालांमुक्तामयीमिव ॥ साबभूवविसर्पंतीत्रिधाराजन्समुद्रगा १० फेनपुंजाकुलजलाहंसानामिवपंक्तयः ॥ क्वचिदाभोगकुटिलाप्रस्खलंती
क्वचित्क्वचित् ११ साफेनपटसंवीतामत्तेवप्रमदाऽव्रजत् ॥ क्वचित्सातोयनिनदैर्नदंतीनादमुत्तमम् १२ एवंप्रकारान्सुबहून्कुर्वतीगगनाच्च्युता ॥ पृथिवीतल
मासाद्यभगीरथमथाब्रवीत् १३ दर्शयस्वमहाराजमार्गंकेनव्रजाम्यहम् ॥ त्वदर्थमवतीर्णाऽस्मिपृथिवींपृथिवीपते १४ एतच्छ्रुत्वावचोराजाप्रातिष्ठतभगीरथः ॥
यत्रतानिशरीराणिसागराणांमहात्मनाम् १५ प्लावनार्थंनरश्रेष्ठपुण्येनसलिलेनच ॥ गंगायाधारणंकृत्वाहरोलोकनमस्कृतः १६ कैलासंपर्वतश्रेष्ठंजगामत्रिदशैः
सह ॥ समासाद्यसमुद्रंचगंगयासहितोनृपः १७ पूरयामासवेगेनसमुद्रंवरुणालयम् ॥ दुहितृत्वेचनृपतिर्गंगांसमनुकल्पयत् १८ पितॄणांचोदकंतत्रददौपूर्णम
नोरथः ॥ एतत्तेसर्वमाख्यातंगंगात्रिपथगायथा १९ पूरणार्थंसमुद्रस्यपृथिवीमवतारिता ॥ समुद्रश्चयथापीतःकारणार्थंमहात्मना २० वातापिश्चयथानीतः
क्षयंसब्रह्महाप्रभो ॥ अगस्त्येनमहाराजयन्मांत्वंपरिपृच्छसि २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप॰लोमशतीर्थयात्रायामगस्त्यमाहात्म्यकथने
नवाधिकशततमोऽध्यायः ॥ १०९ ॥ वैशंपायनउवाच ॥ ॥ ततःप्रयातःकौंतेयःक्रमेणभरतर्षभ ॥ नंदामपरनंदांचनद्यौपापभयापहे १ पर्वतंससमासाद्यहे
मकूटमनामयम् ॥ अचिंत्यानद्भुतान्भावान्ददर्शसुबहून्नृपः २ वाताबद्धाभवन्मेघाउपलाश्चसहस्रशः ॥ नाशक्नुवंस्तमारोढुंविषण्णमनसोजनाः ३ वायुर्नित्यं
ववौतत्रनित्यंदेवश्चवर्षति ॥ स्वाध्यायघोषश्चतथाश्रूयतेनचदृश्यते ४ सायंप्रातश्चभगवान्दृश्यतेहव्यवाहनः ॥ मक्षिकाश्चादशंस्तत्रतपसःप्रतिघातिकाः
५ निर्वेदोजायतेतत्रगृहाणिस्मरतेजनः ॥ एवंबहुविधान्भावानद्भुतान्वीक्ष्यपांडवः ॥ लोमशंपुनरेवाथपर्यपृच्छत्तदद्भुतम् ६ ॥ लोमशउवाच ॥ यथाश्रुत
मिदंपूर्वमस्माभिररिकर्शन ॥ तदेकाग्रमनाराजन्निबोधगदतोमम ७ अस्मिन्नृषभकूटेऽभूदृषभोनामतापसः ॥ अनेकशतवर्षायुस्तपस्वीकोपनोभृशम् ८ सवै
संभाष्यमाणोऽन्यैःकोपाद्गिरिमुवाचह ॥ यइहव्याहरेत्कश्चिदुपलानुत्सृजेस्तथा ९ वातंचाहूयमाशब्दमित्युवाचसतापसः ॥ व्याहरंश्चेहपुरुषोमेघशब्देनवार्य
ते १० एवमेतानिकर्माणिराजंस्तेनमहर्षिणा ॥ कृतानिकानिचित्कोपात्प्रतिषिद्धानिकानिचित् ११ नंदांत्वभिगतादेवाःपुराराजन्नितिश्रुतः ॥ अन्व
पद्यंतसहसापुरुषादेवदर्शिनः १२ तेदर्शनंत्वनिच्छंतोदेवाःशक्रपुरोगमाः ॥ दुर्गंचक्रुरिमंदेशंगिरिंप्रत्यूहरूपकम् १३

विर्भवंतीतिशेषः ३ नचदृश्यतेऽध्येता ४ । ५ निर्वेदोगिरिदर्शनेवैराग्यं गृहाणिस्मरतीत्यादीनि ६ पृष्टश्चलोमशउवाच यथाश्रुतमिति ७ ऋषभकूटेऋषभाख्येशैलशृंगे ८ । ९ माशब्दंकुर्वितिशे
षः १० । ११ अन्वपद्यंतअनुगतवंतः देवदर्शिनो देवदर्शनार्थिनः १२ प्रत्यूहरूपकं दर्शनेविघ्नरूपं १३

१४ नियतवाङ्मौनमपान् १५ । १६ । १७ । १८ हेकुरुश्रेष्ठ १९ । २० । २१ । २२ काश्यपस्यविभांडकस्य ऋश्येतितालव्यादिः मूर्धन्यादिपाठःप्रामादिकः ऋश्योमृगस्तस्यैवशृंगमस्या

तदाप्रभृतिकौंतेयनरागिरिमिमंसदा ॥ नाशक्नुवन्नभिद्रष्टुंकुतएवाधिरोहितुम् १४ नातप्ततपसाशक्योद्रष्टुमेषमहागिरिः ॥ आरोढुंवापिकौंतेयतस्मान्नियत
वाग्भव १५ इहदेवास्तदासर्वेयज्ञानाजन्हुरुत्तमान् ॥ तेषामेतानिलिंगानिदृश्यंतेऽद्यापिभारत १६ कुशाकारेवदूर्वेयंसंस्तीर्णेवचभूरियम् ॥ यूपप्रकाराबहवो
वृक्षाश्चेमेविशांपते १७ देवाश्चऋषयश्चैववसंत्यद्यापिभारत ॥ तेषांसायंतथाप्रातर्दृश्यतेहव्यवाहनः १८ इहाप्लुतानांकौंतेयसद्यःपाप्माऽभिहन्यते ॥ कुरुश्रे
ष्ठाभिषेकंवैतस्मात्कुरुसहानुजः १९ ततोनंदाप्लुतांगस्त्वंकौशिकीमभियास्यसि ॥ विश्वामित्रेणयत्रोग्रंतपस्तप्तमनुत्तमम् २० ॥ वैशंपायनउवाच ॥ ततस्त
त्रसमाप्लुत्यगात्राणिसगणोनृपः ॥ जगामकौशिकींपुण्यांरम्यांशीतजलांशुभाम् २१ ॥ लोमशउवाच ॥ एषादेवनदीपुण्याकौशिकीभरतर्षभ ॥ विश्वामि
त्राश्रमोरम्यएषचात्रप्रकाशते २२ आश्रमश्चैवपुण्याख्यःकाश्यपस्यमहात्मनः ॥ ऋश्यशृंगःसुतोयस्यतपस्वीसंयतेंद्रियः २३ तपसोयःप्रभावेणवर्षयामास
वासवम् ॥ अनावृष्ट्यांभयाद्यस्यववर्षबलवृत्रहा ॥ २४ मृग्यांजातःसतेजस्वीकाश्यपस्यसुतःप्रभुः ॥ विषयेलोमपादस्ययश्चकाराद्भुतंमहत् २५ निर्वर्तिते
षुसस्येषुयस्मैशांतांददौनृपः ॥ लोमपादोदुहितरंसावित्रींसवितायथा २६ ॥ युधिष्ठिरउवाच ॥ ऋश्यशृंगःकथंमृग्यामुत्पन्नःकाश्यपात्मजः ॥ विरुद्धेयो
निसंसर्गेकथंचतपसायुतः २७ किमर्थंचभयाच्छक्रस्तस्यबालस्यधीमतः ॥ अनावृष्ट्यांप्रवृत्तायांववर्षबलवृत्रहा २८ कथंरूपाचसाशांताराजपुत्रीयतव्रता ॥
लोभयामासयाचेतोमृगभूतस्यतस्यवै २९ लोमपादश्चराजर्षिर्यदाश्रूयतधार्मिकः ॥ कथंवैविषयेतस्यनावर्षत्पाकशासनः ३० एतन्मेभगवन्सर्वंविस्तरेणय
थातथम् ॥ वक्तुमर्हसिशुश्रूषोर्ऋश्यशृंगस्यचेष्टितम् ३१ ॥ लोमशउवाच ॥ विभांडकस्यविप्रर्षेस्तपसाभावितात्मनः ॥ अमोघवीर्यस्यसतःप्रजापतिसम
द्युतेः ३२ शृणुपुत्रोयथाजातऋश्यशृंगःप्रतापवान् ॥ महाह्रदस्यमहातेजाबालःस्थविरसंमतः ३३ महाह्रदंसमासाद्यकाश्यपस्तपसिस्थितः ॥ दीर्घकालंपरि
श्रांतऋषिःसदेवसम्मितः ३४ तस्यरेतःप्रचस्कंददृष्ट्वाऽप्सरसमुर्वशीम् ॥ अप्सूपस्पृशतोराजन्मृगीतच्चापिबत्तदा ३५ सहतोयेनतृषितागर्भिणीचाभवत्ततः ॥
सापुरोक्ताभगवताब्रह्मणालोककर्तृणा ३६ देवकन्यामृगीभूत्वामुनिंसूयविमोक्ष्यसे ॥ अमोघत्वाद्विधेश्चैवभावित्वाद्दैवनिर्मितात् ३७ तस्यांमृग्यांसमभवत्तस्य
पुत्रोमहानृषिः ॥ ऋश्यशृंगस्तपोनित्योवनएवाभ्यवर्तत ३८ तस्यर्श्यंशृंगंशिरसिराजन्नासीन्महात्मनः ॥ तेनऋश्यशृंगइत्येवंतदासप्रथितोऽभवत् ३९ नतेनदृष्ट
पूर्वोऽन्यःपितुरन्यत्रमानुषः ॥ तस्मात्तस्यमनोनित्यंब्रह्मचर्येऽभवन्नृप ४०

स्वीतिऋश्यशृंगः ऋश्योनतुष्यन्निति मंत्रवर्णात् २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० शुश्रूषोर्मे इति संबंधः ३१ । ३२ महाह्रदस्य तिपूज्यस्य ३३ । ३४ । ३५ तोयेनसहाऽपिब
दित्यन्वयः ३६ सूयप्रसूयविधेर्विधिवाक्यस्य दैवनिर्मिताद्धेतोर्भावित्वात् अपरिहार्यत्वाच्च ३७ । ३८ । ३९ । ४०

अंगानांदेशानां ४१ तेनकामात बुद्धिपूर्वंब्राह्मणस्य प्रतिश्रुत्येतिशेषः मिथ्याकृतं मयातुभ्यंदातुंकिमपिनप्रतिश्रुतमित्यपलापंकृतवानित्यर्थः ४२ तत्रहेतुःपुरोहितस्यापचारोदोषः सोऽपि
यदृच्छयाब्राह्मणापराधाभावेऽपिस्वेच्छयाकृतः ४३ । ४४ । ४५ निष्कृतिंप्रायश्चित्तं ४६ वानेयंवनभवं ४७ । ४८ । ४९ । ५० । ५१ । ५२ सर्वत्रपरवंचनादौ निष्णाताःकुशलाः ५३

एतस्मिन्नेवकालेतुसखादशरथस्यवै ॥ लोमपादइतिख्यातोह्यंगानामीश्वरोऽभवत् ४१ तेनकामात्कृतंमिथ्याब्राह्मणस्येतिनःश्रुतिः ॥ सब्राह्मणैःपरित्यक्तस्त
तोवैजगतःपतिः ४२ पुरोहितापचाराच्चतस्यराज्ञोयदृच्छया ॥ नववर्षसहस्राक्षस्ततोऽपीडयंतवैप्रजाः ४३ सब्राह्मणान्पर्यपृच्छत्तपोयुक्तान्मनीषिणः ॥
प्रवर्षणेसुरेंद्रस्यसमर्थान्पृथिवीपते ४४ कथंप्रवर्षेत्पर्जन्यउपायःपरिदृश्यताम् ॥ तमूचुश्चोदितास्तेतुस्वमतानिमनीषिणः ४५ तत्रत्वेकोमुनिवरस्तंराजान
मुवाचह ॥ कुपितास्तवराजेंद्रब्राह्मणानिष्कृतिंचर ४६ ऋश्यशृंगंमुनिसुतमानयस्वचपार्थिव ॥ वानेयमनभिज्ञंचनारीणामार्जवेरतम् ४७ सचेदवतरेद्राज
न्विषयंतेमहातपाः ॥ सद्यःप्रवर्षेत्पर्जन्यइतिमेनात्रसंशयः ४८ एतच्छ्रुत्वावचोराजन्कृत्वानिष्कृतिमात्मनः ॥ सगत्वापुनरागच्छत्प्रसन्नेषुद्विजातिषु ४९
राजानमागतंश्रुत्वाप्रतिसंजहृषुःप्रजाः ॥ ततोऽगपतिराहूयसचिवान्मंत्रकोविदान् ५० ऋश्यशृंगागमेयत्नमकरोन्मंत्रनिश्चये ॥ सोऽध्यगच्छदुपायंतुतैरमा
त्यैःसहाच्युतः ५१ शास्त्रज्ञैरलमर्थज्ञैर्नीत्यांचपरिनिष्ठितैः ॥ ततश्चानाययामासवारमुख्यामहीपतिः ५२ वेश्याःसर्वत्रनिष्णातास्ताउवाचसपार्थिवः ॥ ऋ
श्यशृंगमृषेःपुत्रमानयध्वमुपायतः ५३ लोभयित्वाऽभिविश्वास्यविषयंममशोभनाः ॥ ताराजभयभीताश्चशापभीताश्चयोषितः ५४ अशक्यमूचुस्तत्कार्यंवि
वर्णागतचेतसः ॥ तत्रत्वेकाजरद्योषाराजानामिदमब्रवीत् ५५ प्रयतिष्येमहाराजतमानेतुंतपोधनम् ॥ अभिप्रेतांस्तुमेकामांस्त्वमनुज्ञातुमर्हसि ५६ ततःश
क्ष्याम्यानयितुमृश्यशृंगमृषेःसुतम् ॥ तस्याःसर्वमभिप्रेतमन्वजानात्सपार्थिवः ५७ धनंचप्रददौभूरिरत्नानिविविधानिच ॥ ततोरूपेणसंपन्नावयसाचमही
पते ॥ स्त्रियआदायकाश्चित्साजगामवनमंजसा ५८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामृश्यशृंगोपाख्यानेदशाधिकश
ततमोऽध्यायः ॥ ११० ॥ ॥ लोमशउवाच ॥ सातुनाव्याश्रमंचक्रेराजकार्यार्थसिद्धये ॥ संदेशाच्चैवनृपतेःस्वबुद्ध्याचैवभारत १ नानापुष्पफलैर्वृक्षैः
कृत्रिमैरुपशोभितैः ॥ नानागुल्मलतोपेतैःस्वादुकामफलप्रदैः २ अतीवरमणीयंतदतीवचमनोहरम् ॥ चक्रेनाव्याश्रमंरम्यमद्भुतोपमदर्शनम् ३ ततो
निबध्यतांनावमदूरेकाश्यपाश्रमात् ॥ चारयामासपुरुषैर्विहारंतस्यवैमुनेः ४ ततोदुहितरंवेश्यांसमाधायेतिकार्यताम् ॥ दृष्ट्वांतरंकाश्यपस्यप्राहिणोद्बुद्धिसं
मताम् ५ सातत्रगत्वाकुशलातपोनित्यस्यसंनिधौ ॥ आश्रमंतंसमासाद्यददर्शतमृषेःसुतम् ६ ॥ वेश्योवाच ॥ कच्चिन्मुनेकुशलंतापसानांकच्चिच्चवोमूलफलं
प्रभूतम् ॥ कच्चिद्भवानृमतेचाश्रमेऽस्मिंस्त्वांवैद्रष्टुंसांप्रतमागतोऽस्मि ७

५४ जरद्योषावृद्धास्त्री ५५ । ५६ अन्वजानादनुज्ञातवान् ५७ । ५८ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेदशाधिकशततमोऽध्यायः ॥ ११० ॥ ॥ ७ ॥ सात्विति
नाव्याश्रमंनावातार्यमाश्रमं १ । २ । ३ मुनेर्विभांडकस्य विहारंबहिर्गमनं चारयामासचारैरधिगतवती ४ समाधायबोधयित्वा इतिकार्यतामितिकर्तव्यतां अंतरमसान्निध्यं ५ । ६ । ७

८ । ९ कौश्यांवृस्यामास्वकुशासनेउपविश यथोपजोषंयथासुखं सुखायांसुखकर्याम् १० । ११ । १२ । १३ अनर्हाण्यत्युत्तमत्वादमूल्यानि १४ । १५ मूलेसमीपेविभज्यमाना अंगमोटनादी निकुर्वाणा निषेवमाणासूचीवदभ्यंतरंप्रविशंती । षिवुतंतुसंतानेइति धातुः १६ । १७ कायंदेहंपीडयआलिंगनेननिपीडय अपदेशंछलम् १८ भावेनाभिप्रायेण १९ प्रवेष्टितोऽप्यावृतः २० । २१

कच्चित्तपोवर्द्धतेतापसानांपिताचतेकच्चिदहीनतेजाः ॥ कच्चित्त्वयाप्रीयतेचैवविप्रकच्चित्स्वाध्यायःक्रियतेचर्श्यशृंग ८ ॥ ऋश्यशृंगउवाच ॥ ऋद्धचाभवान् ज्योतिरिवप्रकाशतेमन्येचाहंत्वामभिवादनीयम् ॥ पाद्यंवैतेसंप्रदास्यामिकामाद्यथाधर्मंफलमूलानिचैव ९ कौश्यांबृस्यामास्वयथोपजोषंकृष्णाजिनेनावृतायां सुखायाम् ॥ क्वचाश्रमस्तवकिंनामचेदंव्रतंब्रह्मंश्चरसिहिदेववत्त्वम् १० ॥ वेश्योवाच ॥ ममाश्रमःकाश्यपपुत्ररम्यस्त्रियोजनंशैलमिमंपरेण ॥ तत्रस्वधर्मो नाभिवादनंमेनचोदकंपाद्यमुपस्पृशामि ११ भवतानाभिवद्योऽहमभिवाद्योभवान्मया ॥ व्रतमेतादृशंब्रह्मन्परिष्वज्योभवान्मया १२ ॥ ऋश्यशृंगउवाच ॥ फलानिपक्वानिददामितेऽहंभल्लातकान्यामलकानिचैव ॥ करूषकानींगुदधन्वनानिपिप्पलानांकामकारंकुरुष्व १३ ॥ लोमशउवाच ॥ सतानिसर्वाणिविवर्जयित्वाभक्ष्याण्यनर्हाणिददौततोऽस्य ॥ तान्यृश्यशृंगस्यमहारसानिभृशंसुरूपाणिरुचिंददुर्हि १४ ददौचमाल्यानिसुगंधवंतिचित्राणिवासांसिचभानुमंति ॥ पेयानिचाग्र्याणिततोमुमोदाचिक्रीडचैवप्रजहासचैव १५ साकंदुकेनारमतास्यमूलेविभज्यमानाफलितालतेव ॥ गात्रैश्चगात्राणिनिषेवमाणासमाश्लिषच्चासकृदृश्यशृंगम् १६ सर्जानशोकांस्तिलकांश्चवृक्षान्सुपुष्पितानवनाम्यावभज्य ॥ विलज्जमानेवमदाभिभूताप्रलोभयामाससुतंमहर्षेः १७ अथर्श्यशृंगंविकृतंसमीक्ष्य पुनःपुनःपीडयचकायमस्य ॥ अवेक्ष्यमाणाशनकैर्जगामकृत्वाऽग्निहोत्रस्यतदाऽपदेशम् १८ तस्यांगतायांमदनेनमत्तोविचेतनश्चाभवदृश्यशृंगः ॥ तामेवभावेनगतेनशून्येविनिःश्वसन्नार्तरूपोबभूव १९ ततोमुहूर्ताद्धरिपिंगलाक्षःप्रवेष्टितोरोमभिरानखाग्रात् ॥ स्वाध्यायवान्वृत्तसमाधियुक्तोविभांडकःकाश्यपःप्रादुरासीत् २० सोऽपश्यदासीनमुपेत्यपुत्रंध्यायंतमेकंविपरीतचित्तम् ॥ विनिःश्वसंतंमुहुरूर्ध्वदृष्टिंविभांडकःपुत्रमुवाचदीनं २१ नकल्प्यंतेसमिधःकिंनुतातकच्चिद्धुतंचाग्निहोत्रंत्वयाऽद्य ॥ सुनिर्णिक्तंस्रुक्स्रुवंहोमधेनुःकच्चित्सवत्साऽद्यकृतात्वयाच २२ नवैयथापूर्वमिवासिपुत्रचिंतापरश्चासिविचेतनश्च ॥ दीनोतिमात्रंत्वमिहाद्यकिंनुपृच्छामित्वांकइहाद्यागतोऽभूत् २३॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामृश्यशृंगोपाख्यानेएकादशाधिकशततमोऽध्यायः १११ ॥ ऋश्यशृंगउवाच ॥ इहागतोजटिलोब्रह्मचारीनवैह्रस्वोनातिदीर्घोमनस्वी ॥ सुवर्णवर्णःकमलायताक्षःस्वतःसुराणामिवशोभमानः १ समृद्धरूपःसवितेवदीप्तःसुश्लक्ष्णकृष्णाक्षिरतीवगौरः ॥ नीलाःप्रसन्नाश्चजटाःसुगंधाहिरण्यरज्जुग्रथिताःसुदीर्घाः २

कल्प्यंतेसिद्धाःक्रियंते निर्णिक्तंप्रक्षालितं सवत्साकृतादोहनायेतिशेषः २२ । २३ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेएकादशाधिकशततमोऽध्यायः ॥ १११ ॥ ॥ ७ ॥ ॥१४॥
इहागतइति स्वतएवनालंकारादिना १ । २

आधाररूपाआलवालसदृशी कंठाभरणविशेषः । 'आधारश्चाधिकरणेऽप्यालवालेऽम्बुधारणे' इतिविश्वः ३ विलग्नइवेतिकृशत्वंलक्ष्यते अतिकृतप्रमाणातिकृशा ४ कलापकोभूषणविशेषोस्वार्थेकः । 'कलापःसंहतेबर्हेतूणीरेभूषणेहरे' इतिविश्वः । कंकणाविरयर्थः ५ । ६ । ७ । ८ । ९ तथाफलंफलसदृशंकंदुकम् १० प्रीतिराह्लादःरतिरासक्तिः ११ । १२ । १३ । १४ भृश्चलितेवेति

आधाररूपापुनरस्यकंठेविभ्राजतेविद्युदिवांतरिक्षे ॥ द्वौचास्यपिंडावधरेणकंठादजातरोमौसुमनोहरौच ३ विलग्नमध्यश्चसनाभिदेशेकटिश्चतस्यातिकृतप्रमाणा ॥ तथाऽस्यचीरांतरतःप्रभातिहिरण्मयीमेखलामेयथेयम् ४ अन्यच्चतस्याद्भुतदर्शनीयंविकूजितंपादयोःसंप्रभाति ॥ पाण्योश्चतद्वत्स्वनवन्निबद्धौकलापकावक्षमालायथेयम् ५ विचेष्टमानस्यचतस्यतानिकूजंतिहंसाःसरसीवमत्ताः ॥ चीराणितस्याद्भुतदर्शनानिनेमानितद्वन्ममरूपवंति ६ वक्त्रंचतस्याद्भुतदर्शनीयंप्रव्याहृतंह्लादयतीवचेतः ॥ पुंस्कोकिलस्येवचतस्यवाणीतांशृण्वतोमेव्यथितोंऽतरात्मा ७ यथावनंमाधवमासिमध्येसमीरितंश्वसनेनेवभाति ॥ तथासभात्युत्तमपुण्यगंधीनिषेव्यमाणःपवनेनतात ८ सुसंयताश्चापिजटाविषक्ताद्वैधीकृतानातिसमाललाटे ॥ कर्णौचचित्रैरिवचक्रवाकैःसमावृतौतस्यसुरूपवद्भिः ९ तथाफलंवृत्तमथोविचित्रंसमाहरत्पाणिनादक्षिणेन ॥ तद्भूमिमासाद्यपुनःपुनश्चसमुत्पतत्यद्भुतरूपमुच्चैः १० तच्चाभिहत्वापरिवर्ततेऽसौवातेरितोवृक्षइवावघूर्णन् ॥ तंप्रेक्षतःपुत्रमिवामराणांप्रीतिःपरातातरतिश्चजाता ११ समेसमाश्लिष्यपुनःशरीरंजटासुगृह्याभ्यवनाम्यवक्त्रम् ॥ वक्त्रेणवक्त्रंप्रणिधायशब्दंचकारतन्मेऽजनयत्प्रहर्षम् १२ नचापिपाद्यंबहुमन्यतेऽसौफलानिचेमानिमयाऽऽहृतानि ॥ एवंव्रतोऽस्मीतिचमामवोचत्फलानिचान्यानिसमाददन्मे १३ मयोपयुक्तानिफलानियानिनेमानितुल्यानिरसेनतेषाम् ॥ नचापितेषांत्वगियंयथैषांसाराणिनैषामिवसंतितेषाम् १४ तोयानिचैवातिरसानिमह्यंप्रादात्सवैपातुमुदाररूपः ॥ पीत्वैवयान्यभ्यधिकःप्रहर्षोममाभवद्भूश्चलितेवचासीत् १५ इमानिचित्राणिचगंधवंतिमाल्यानितस्योद्ग्रथितानिपट्टैः ॥ यानिप्रकीर्येहगतःस्वमेवसआश्रमंतपसाद्योतमानः १६ गतेनतेनास्मिकृतोविचेतागात्रंचमेसंपरिदह्यतीव ॥ इच्छामितस्यांतिकमाशुगंतुंतंचेहनित्यंपरिवर्तमानम् १७ गच्छामितस्यांतिकमेवतातकानामसाब्रह्मचर्याचतस्य ॥ इच्छाम्यहंचरितुंतेनसार्धंयथातपःसचरत्यार्यधर्मा १८ चर्तुंतथेच्छाहृदयेममास्तिदुनोतिचित्तंयदितंनपश्ये १९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामृश्यशृंगोपाख्यानेद्वादशाधिकशततमोऽध्यायः॥ १२ ॥ ॥ ७ ॥
॥ विभांडकउवाच ॥ रक्षांसिचैतानिचरंतिपुत्ररूपेणतेनाद्भुतदर्शनेन ॥ अतुल्यवीर्याण्यभिरूपवंतिविघ्नंसदातपसश्चिंतयंति १ सुरूपरूपाणिचतानितातप्रलोभयंतेविविधैरुपायैः ॥ सुखाच्चलोकाच्चनिपातयंतितान्युग्ररूपाणिमुनीन्वनेषु २ नतानिसेवेतमुनिर्यतात्मासतांलोकान्प्रार्थयानःकथंचित् ॥ कृत्वाविघ्नंतापसानांरमंतेपापाचारास्तापसस्तान्नपश्येत् ३

मधुपानजाभ्रांतिःसूचिता १५ । १६ । १७ । १८ । १९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेद्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ ॥ ७ ॥ रक्षांसीति १ । २ । ३

४ श्रमाय आश्रमाय ५ अश्रावणेन अर्पाखंडे नवैदिकेन । 'श्रावणो मासि पाखंडे' इति विश्वः । आश्रावणेनेति प्रश्लेषे तु इष्टवाच्यर्थं तत्र आश्रावयेत्यादिशब्दप्रयोगात् वेशयोषा वेश्या ६ । ७ । ८

असज्जनेनाचरितानिपुत्रपापान्यपेयानिमधूनितानि ॥ माल्यानिचैतानिनवैमुनीनांस्मृतानिचित्रोज्वलगंधवंति ४ रक्षांसितानीतिनिवार्यपुत्रंविभांडकस्तां
मृगयांबभूव ॥ नासादयामासयदात्र्यहेणतदासपर्यावदृतेश्रमाय ५ यदापुनःकाश्यपोवैजगामफलान्याहर्तुंविधिनाऽश्रावणेन ॥ तदापुनर्लोभयितुंजगामसावे
शयोषामुनिमृश्यशृंगम् ६ दृष्ट्वैवतामृश्यशृंगःप्रहृष्टःसंभ्रांतरूपोऽभ्यपततदानीम् ॥ प्रोवाचचैनांभवतोश्रमायगच्छावयावन्नपितामममैति ७ ततोराजन्काश्य
पस्यैकपुत्रंप्रवेश्ययोगेनविमुच्यनावम् ॥ प्रमोदयंत्योविविधैरुपायैराजग्मुरंगाधिपतेःसमीपम् ८ संस्थाप्यतामाश्रमदर्शनेतुसंतारितांनावमथातिशुभ्राम् ॥ नी
रादुपादायतथैवचक्रेनाव्याश्रमंनामवनंविचित्रम् ९ अंतःपुरेतंतुनिवेश्यराजाविभांडकस्यात्मजमेकपुत्रं ॥ ददर्शदेवंसहसाप्रविष्टमापूर्यमाणंचजगज्जलेन १०
सलोमपादःपरिपूर्णकामःसुतांददावृश्यशृंगायशांताम् ॥ क्रोधप्रतीकारकरंचचक्रेगाश्चैवमार्गेषुचकर्षणानि ११ विभांडकस्यावजतःसराजापशून्प्रभूतान्पशुपांश्च
वीरान् ॥ समादिशत्पुत्रगृद्धीमहर्षेर्विभांडकःपरिपृच्छेद्यदावः १२ सवक्तव्यःप्रांजलिभिर्भवद्भिःपुत्रस्यतेपशवःकर्षणंच ॥ किंतेप्रियंवैक्रियतांमहर्षेदासाःस्म
सर्वेतववाचिबद्धाः १३ अथोपायात्समुनिश्चंडकोपःस्वमाश्रमंमूलफलंगृहीत्वा ॥ अन्वेषमाणश्चनतत्रपुत्रंददर्शचुक्रोधततोभृशंसः १४ ततःसकोपेनविदीर्यमा
णआशंकमानोनृपतेर्विधानम् ॥ जगामचंपांप्रतिधक्ष्यमाणस्तमंगराजंसपुरंसराष्ट्रम् १५ सवैश्रांतःक्षुधितःकाश्यपस्तान्घोषान्समासादितवान्समृद्धान् ॥ गोपै
श्चतैर्विधिवत्पूज्यमानोराजेवतांरात्रिमुवासतत्र १६ अवाप्यसत्कारमतीवतेभ्यःप्रोवाचकस्यप्रथिताःस्थगोपाः ॥ ऊचुस्ततस्तेऽभ्युपगम्यसर्वेधनंतवेदंवि
हितंसुतस्य १७ देशेषुदेशेषुसपूज्यमानस्तांश्चैवशृण्वन्मधुरान्प्रलापान् ॥ प्रशांतभूयिष्ठरजाःप्रहृष्टःसमाससादांगपतिंपुरस्थम् १८ सपूजितस्तेनन
रर्षभेणददर्शपुत्रंदिविदेवयथेंद्रम् ॥ शांतांस्नुषांचैवददर्शतत्रसौदामनीमुच्चरंतींयथैव १९ ग्रामांश्चघोषांश्चसुतस्यदृष्ट्वाशांतांचशांतोऽस्यपरःसकोपः ॥
चकारतस्यैवपरंप्रसादंविभांडकोभूमिपतेर्नरेंद्र २० सतत्रनिक्षिप्यसुतंमहर्षिरुवाचसूर्याग्निसमप्रभावः ॥ जातेचपुत्रेवनमेवाव्रजेथाराज्ञःप्रियाण्यस्यसर्वाणि
कृत्वा २१ सतद्वचःकृतवानृश्यशृंगोययौचयत्रास्यपिताबभूव ॥ शांताचैनंपर्यचरन्नरेंद्रखेरोहिणीसोममिवानुकूला २२ अरुंधतीवासुभगावसिष्ठंलोपा
मुद्रावायथाह्यगस्त्यम् ॥ नलस्यवैदमयंतीयथाऽभूद्यथाशचीवज्रधरस्यचैव २३ नारायणीचेंद्रसेनाबभूववश्यानित्यंमुद्गलस्याजमीढ ॥ तथाशांता ॥९५॥
ऋश्यशृंगंवनस्थंप्रीत्यायुक्तापर्यचरन्नरेंद्र २४

आश्रमोयत्रस्थैर्दृश्यतेतावतिदेशेआश्रमदर्शने ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४

२५ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेत्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ॥ ७ ॥ ॥ ७ ॥ ततइति १ । २ । ३ । ४ उत्तरंतीरंवैतरण्याः ५
६ । ७ मापरस्वमभिद्रोग्धा परमागस्वनाशंमाकुर्वित्यर्थः धर्मान्यावशीः धर्मसाधनान्यज्ञभागान्सर्वान्कामयेथाः । वशकांतौ अस्यलुङिरूपम् ८ । ९ । १० अयातयामंतात्कालिकम्

तस्याश्रमःपुण्यएषोऽवभातिमहाह्रदंशोभयन्पुण्यकीर्तिः ॥ अत्रस्नातःकृतकृत्योविशुद्धस्तीर्थान्यन्यान्यनुसंयाहिराजन् २५ ॥ इतिश्रीमहाभारतेआरण्यके
पर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामृश्यशृंगो० त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ ७ ॥ वैशंपायनउवाच ॥ ततःप्रयातःकौशिक्याःपांडवो
जनमेजय ॥ आनुपूर्व्येणसर्वाणिजगामायतनान्यथ १ ससागरंसमासाद्यगंगायाःसंगमेनृप ॥ नदीशतानांपंचानांमध्येचक्रेसमाप्लवम् २ ततःसमुद्रतीरेणज
गामवसुधाधिपः ॥ भ्रातृभिःसहितोवीरःकलिंगान्प्रतिभारत ३ ॥ लोमशउवाच ॥ एतेकलिंगाःकौंतेयतत्रवैतरणीनदी ॥ यत्रायजतधर्मोऽपिदेवाञ्शरणमेत्यवै
४ ऋषिभिःसमुपायुक्तंयज्ञियंगिरिशोभितम् ॥ उत्तरंतीरमेतद्धिसततंद्विजसेवितम् ५ समानंदेवयानेनपथास्वर्गमुपेयुषः ॥ अत्रवैऋषयोऽन्येऽपिपुराक्रतु
भिरीजिरे ६ अत्रैवरुद्रोराजेंद्रपशुमादत्तवान्मखे ॥ पशुमादायराजेंद्रभागोऽयमितिचाब्रवीत् ७ हृतेपशौतदादेवास्तमूचुर्भरतर्षभ ॥ मापरस्वमभिद्रोग्धामा
धर्मान्सकलान्वशीः ८ ततःकल्याणरूपाभिर्वाग्भिस्तेरुद्रमस्तुवन् ॥ इष्ट्याचैनंतर्पयित्वामानयांचक्रिरेतदा ९ ततःसपशुमुत्सृज्यदेवयानेनजग्मिवान् ॥
तत्रानुवंशोरुद्रस्यतंनिबोधयुधिष्ठिर १० अयातयामंसर्वेभ्योभागेभ्योभागमुत्तमम् ॥ देवाःसंकल्पयामासुर्भयाद्रुद्रस्यशाश्वतम् ११ इमांगाथामत्रगायन्नपःस्पृ
शतियोनरः ॥ देवयानोऽस्यपंथाश्चचक्षुषाऽभिप्रकाशते १२ ॥ वैशंपायनउवाच ॥ ततोवैतरणींसर्वेपांडवाद्रौपदीतथा ॥ अवतीर्यमहाभागास्तर्पयांचक्रिरे
पितॄन् १३ ॥ युधिष्ठिरउवाच ॥ उपस्पृश्येहविधिवदस्यांनद्यांतपोबलाव ॥ मानुषादस्मिविषयादपेतःपश्यलोमश १४ सर्वाँल्लोकान्प्रपश्यामिप्रसादात्तव
सुव्रत ॥ वैखानसानांजपतामेषशब्दोमहात्मनाम् १५ ॥ लोमशउवाच ॥ त्रिशतंवैसहस्राणियोजनानांयुधिष्ठिर ॥ यत्रध्वनिंशृणोष्येनंतूष्णीमास्स्वविशांपते
१६ एतत्स्वयंभुवोराजन्वनंदिव्यंप्रकाशते ॥ यत्रायजतराजेंद्रविश्वकर्माप्रतापवान् १७ यस्मिन्यज्ञेहिभूर्दत्ताकश्यपायमहात्मने ॥ सपर्वतवनोद्देशादक्षिणा
थैस्वयंभुवा १८ अवासीदच्चकौंतेयदत्तमात्रामहीतदा ॥ उवाचचापिकुपितालोकेश्वरमिदंप्रभुम् १९ नमांमर्त्यायभगवन्कस्मैचिद्दातुमर्हसि ॥ प्रदानं
मोघमतत्तेयास्याम्येषारसातलम् २० विषीदंतींतुतांदृष्ट्वाकश्यपोभगवानृषिः ॥ प्रसादयांबभूवाथततोभूमिंविशांपते २१ ततःप्रसन्नापृथिवीतपसातस्य
पांडव ॥ पुनरुन्मज्यसलिलाद्वेदीरूपास्थितावभौ २२ सैषाप्रकाशतेराजन्वेदीसंस्थानलक्षणा ॥ आरुह्यात्रमहाराजवीर्यवान्वैभविष्यसि २३

११ । १२ । १३ । १४ । १५ । १६ 'भूमिर्हंजगाविश्वुदाहरंतिनमामर्त्यःकश्चनदातुमर्हतिविश्वकर्मन्भौवनमांदिदासिथनिमंक्ष्येऽहंसलिलस्यमध्येमोघस्तएषकश्यपायाससंगरः' इतिश्रुते
रर्थंसंगृह्णाति यत्रायजतराजेंद्रेत्यादिना १७ । १८ । १९ । २० । २१ । २२ । २३

२४ । २५ स्नानाद्यर्थंसमुद्रप्रार्थनामंत्रमाहओंनमइति विश्वंगुप्तंलीनमस्मिन्प्रलयेइतिविश्वगुप्तः विश्वस्मात्परायश्रेष्ठायविष्णवेइत्यर्थः लवणांभसिक्षारोदके २६ अग्निर्मित्रश्चतेजस्त्वादग्निव त्सूर्योऽप्यपांयोनिःअपामितिशेषः विष्णोर्व्यापकस्यात्मनोरेतः शरीराकारपरिणतमभिव्यक्तिस्थानंत्वं हेसमुद्रअमृतस्यनाभिःसुधायागर्भस्थानम् २७ इडायज्ञःविष्णोरेतोवाःविष्णोरेतः

सैषासागरमासाद्यराजन्वेदीसमाश्रिता ॥ एतामारुह्यभद्रंतेत्वमेकस्तरसागरम् २४ अहंचतेस्वस्त्ययनंप्रयोक्ष्येयथात्वमेनामधिरोहसेऽद्य ॥ स्पृष्टाहिमर्त्येन ततःसमुद्रमेषावेदीप्रविशत्याजमीढ २५ ओंनमोविश्वगुप्तायनमोविश्वपरायते ॥ सान्निध्यंकुरुदेवेशसागरेलवणांभसि २६ अग्निर्मित्रोयोनिरापोऽथदेव्योवि ष्णोरेतस्त्वममृतस्यनाभिः ॥ एवंब्रुवन्पांडवसत्यवाक्यंवेदीमिमांत्वंतरसाऽधिरोह २७ अग्निश्चतेयोनिरिडाचदेहोरेतोवाविष्णोरमृतस्यनाभिः ॥ एवंजपन्पां डवसत्यवाक्यंततोवगाहेतपतिंनदीनाम् २८ अन्यथाहिकुरुश्रेष्ठदेवयोनिरपांपतिः ॥ कुशाग्रेणापिकौंतेयनस्प्रष्टव्योमहोदधिः २९ ॥ वैशंपायनउवाच ॥ ततःकृतस्वस्त्ययनोमहात्मायुधिष्ठिरःसागरमभ्यगच्छत् ॥ कृत्वातच्छासनमस्यसर्वंमहेंद्रमासाद्यनिशामुवास ३० ॥ इतिश्रीमहाभारतेआरण्यके० तीर्थ यात्रा० लोमशतीर्थयात्रायांमहेंद्राचलगमनेचतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ ॥ वैशंपायनउवाच ॥ सतत्रतामुषित्वैकांरजनींपृथिवीपतिः ॥ तापसानांपरंचक्रेसत्कारंभ्रातृभिःसह १ लोमशस्तस्यतान्सर्वानाचख्यौतत्रतापसान् ॥ भृगूनंगिरसश्चैववासिष्ठानथकाश्यपान् २ तान्समेत्यसराजर्षिरभिवा द्यकृतांजलिः ॥ रामस्यानुचरंवीरमपृच्छदकृतव्रणम् ३ कदातुरामोभगवांस्तापसान्दर्शयिष्यति ॥ तेनैवाहंप्रसंगेनद्रष्टुमिच्छामिभार्गवम् ४ ॥ अकृतव्र णउवाच ॥ आयानेवासिविदितोरामस्यविदितात्मनः ॥ प्रीतिस्त्वयिचरामस्यक्षिप्रंत्वांदर्शयिष्यति ५ चतुर्दशीमष्टमींचरामंपश्यंतितापसाः ॥ अस्यांरात्र्यां व्यतीतायांभवित्रीश्वश्चतुर्दशी ६ ॥ युधिष्ठिरउवाच ॥ भवाननुगतोरामंजामदग्न्यंमहाबलम् ॥ प्रत्यक्षदर्शीसर्वस्यपूर्ववृत्तस्यकर्मणः ७ सभवान्कथयत्वद्य यथारामेणनिर्जिताः ॥ आहवेक्षत्रियाःसर्वेकथंकेनचहेतुना ८ ॥ अकृतव्रणउवाच ॥ हंततेकथयिष्यामिमहदाख्यानमुत्तमम् ॥ भृगूणांराजशार्दूलवंशेजातस्य भारत ९ रामस्यजामदग्न्यस्यचरितंदेवसंमितम् ॥ हैहयाधिपतेश्चैवकार्तवीर्यस्यभारत १० रामेणचार्जुनोनामहैहयाधिपतिर्हतः ॥ तस्यबाहुशतान्यासं स्त्रीणिसप्तचपांडव ११ दत्तात्रेयप्रसादेनविमानंकांचनंतथा ॥ ऐश्वर्यंसर्वभूतेषुपृथिव्यांपृथिवीपते १२ अव्याहतगतिश्चैवरथस्तस्यमहात्मनः ॥ रथेनतेनतु सदावरदानेनवीर्यवान् १३ ममर्ददेवान्यक्षांश्चऋषींश्चैवसमंततः ॥ भूतांश्चैवससर्वांस्तुपीडयामाससर्वतः १४ ततोदेवाःसमेत्याहुर्ऋषयश्चमहाव्रताः ॥ देवदेवं सुरारिघ्नंविष्णुंसत्यपराक्रमम् १५ भगवन्भूतरक्षार्थमर्जुनंजहिवैप्रभो ॥ विमानेनचदिव्येनहैहयाधिपतिःप्रभुः १६

जीवःसधीयतेऽस्मिन्देहे अमृतस्यनाभिः मोक्षस्यसाधनम् २८ देवयोनिःदेवस्थानम् २९।३० ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेचतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ ७ ॥ सइति १ । २ । ३ । ४ आयान्आगच्छन् ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६

१७ । १८ । १९ । २० । २१ । २२ । २३ । २४ एकतइति बहिःश्यामा अंतरारक्ताःकर्णायेषांते एकतःश्यामकर्णास्तेषाम् २५ । २६ ।२७।२८ जन्याःवरपक्षीयाः २९ । ३० अवलोकको

शचीसहायंक्रीडंतंधर्षयामासवासवम् ॥ ततस्तुभगवान्देवःशक्रेणसहितस्तदा ॥ कार्तवीर्यविनाशार्थंमंत्रयामासभारत १७ यत्तद्भूतहितंकार्यंसुरेंद्रेणनिवेदि तम् ॥ संप्रतिश्रुत्यतत्सर्वंभगवाँल्लोकपूजितः १८ जगामबदरींरम्यांस्वमेवाश्रममंडलम् ॥ एतस्मिन्नेवकालेतुपृथिव्यांपृथिवीपतिः १९ कान्यकुब्जेमहाना सीत्पार्थिवःसुमहाबलः ॥ गाधीतिविश्रुतोलोकेवनवासंजगामह २० वनेतुतस्यवसतःकन्याजज्ञेऽप्सरःसमा ॥ ऋचीकोभार्गवस्तांचवरयामासभारत २१ तमु वाचततोगाधिर्ब्राह्मणंसंशितव्रतम् ॥ उचितंनःकुलेकिंचित्पूर्वैर्यत्संप्रवर्तितम् २२ एकतःश्यामकर्णानांपांडुराणांतरस्विनाम् ॥ सहस्रंवाजिनांशुल्कमिति विद्धिद्विजोत्तम २३ नचापिभगवान्वाच्योदीयतामितिभार्गव ॥ देयामेदुहिताचैवत्वद्विधायमहात्मने २४ ॥ ऋचीकउवाच ॥ एकतःश्यामकर्णानांपांडुराणां तरस्विनाम् ॥ दास्याम्यश्वसहस्रंतेममभार्यासुताऽस्तुते २५ ॥ अकृतव्रणउवाच ॥ सतथेतिप्रतिज्ञायराजन्वरुणमब्रवीत् ॥ एकतःश्यामकर्णानांपांडु राणांतरस्विनाम् २६ सहस्रंवाजिनामेकंशुल्कार्थंप्रतिदीयताम् ॥ तस्मैप्रादात्सहस्रंवैवाजिनांवरुणस्तदा २७ तदश्वतीर्थंविख्यातमुत्थितायत्रतेहयाः ॥ गं गायांकान्यकुब्जेवैददौसत्यवतींतदा २८ ततोगाधिःसुतांचास्मैजन्याश्चासन्सुरास्तदा ॥ लब्ध्वाहयसहस्रंतुतांश्चदृष्ट्वादिवौकसः २९ धर्मेणलब्ध्वातांभार्यामृ चीकोद्विजसत्तमः ॥ यथाकामंयथाजोषंतयारेमेसुमध्यया ३० तंविवाहेकृतेराजन्सभार्यमवलोककः ॥ आजगामभृगुश्रेष्ठःपुत्रंदृष्ट्वाननंदह ३१ भार्यापती तमासीनंगुरुंसुरगणार्चितम् ॥ अर्चित्वापर्युपासीनौप्रांजलीतस्थतुस्तदा ३२ ततःस्नुषांसभगवान्प्रहृष्टोभृगुरब्रवीत् ॥ वरंवृणीष्वसुभगेदाताह्यस्मितवे प्सितम् ३३ साचप्रसादयामासतंगुरुंपुत्रकारणात् ॥ आत्मनश्चैवमातुश्चप्रसादंचचकारसः ३४ ॥ भृगुरुवाच ॥ ऋतौत्वंचैवमाताचस्नातेपुंसवनायवै ॥ आ लिंगेतांपृथग्वृक्षौसाश्वत्थंत्वमुदुंबरम् ३५ चरुद्वयमिदंभद्रेजनन्याश्चतवैवच ॥ विश्वमावर्तयित्वातुमयायत्नेनसाधितम् ३६ प्राशितव्यंप्रयत्नेनतेत्युक्त्वाऽदर्श नंगतः ॥ आलिंगनेचरौचैवचक्रतुस्तेविपर्ययम् ३७ ततःपुनःसभगवान्कालेबहुतिथेगते ॥ दिव्यज्ञानाद्विदित्वातुभगवानागतःपुनः ३८ अथोवाचमहाते जाभृगुःसत्यवतींस्नुषाम् ॥ उपयुक्तश्चरुर्भद्रेवृक्षेचालिंगनंकृतम् ३९ विपरीतेनतेसुभ्रूर्मात्राचैवासिवंचिता ॥ ब्राह्मणःक्षत्रवृत्तिर्वैतवपुत्रोभविष्यति ४० क्ष त्रियोब्राह्मणाचारोमातुस्तवसुतोमहान् ॥ भविष्यतिमहावीर्यःसाधूनांमार्गमास्थितः ४१ ततःप्रसादयामासश्वशुरंसापुनःपुनः ॥ नमेपुत्रोभवेदीदृक्कामंपौत्रो भवेदिति ४२ एवमस्त्वितिसातेनपांडवप्रतिनंदिता ॥ जमदग्निंततःपुत्रंजज्ञेसाकालआगते ४३

ऽवलोकनार्थी ३१ । ३२ । ३३ । ३४ । ३५ विश्वंविराट्पुरुषमावर्तयित्वामुहुर्मुहुरनुसंधाय एतयोश्चरोर्भक्षणेनविश्वस्रष्टृतुल्यौपुत्रौभविष्यतइतिभावः ३६ तेउभेप्रतीत्युक्तेतीकारलोपः संधि र्वाआर्षः । आलिंगनेअश्वत्थोदुंबरयोः ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३

४४ । ४५ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेपंचदशाधिकशततमोऽध्यायः ॥ ११५ ॥ ७ ॥ सवेदेति १ । २ । ३ । ४ । ५ । ६ ततस्तस्यस्पृहयामासतमैच्छत् ७ अंभसि

तेजसावर्चसाचैवयुक्तंभार्गवनंदनम् ॥ सवर्धमानस्तेजस्वीवेदस्याध्ययनेनच ४४ बहूनृषीन्महातेजाःपांडवेयात्यवर्तत ॥ तंतुकृत्स्नोधनुर्वेदःप्रत्यभाद्भरतर्ष
भ ॥ चतुर्विधानिचास्त्राणिभास्करोपमवर्चसम् ॥ ४५ ॥ इतिश्रीमहाभारतेआरण्यके०लोमशतीर्थयात्रायांकार्तवीर्योपाख्यानेपंचदशाधिकशततमोऽध्या
यः ॥ ११५ ॥ ७ ॥ अकृतव्रणउवाच ॥ सवेदाध्ययनेयुक्तोजमदग्निर्महातपाः ॥ तपस्तेपेततोवेदान्नियमाद्वशमानयत् १ सप्रसेनजितंराजन्नधिगम्यनरा
धिपम् ॥ रेणुकांवरयामाससचतस्मैददौनृपः २ रेणुकांत्वथसंप्राप्यभार्यांभार्गवनंदनः ॥ आश्रमस्थस्तयासार्धंतपस्तेपेऽनुकूलया ३ तस्याःकुमाराश्चत्वारो
जज्ञिरेरामपंचमाः ॥ सर्वेषामजघन्यस्तुरामआसीज्जघन्यजः ४ फलाहारेषुसर्वेषुगतेष्वथसुतेषुवै ॥ रेणुकास्नातुमगमत्कदाचित्नियतव्रता ५ सातुचित्ररथंना
ममार्तिकावतकंनृपम् ॥ ददर्शरेणुकाराजन्नागच्छंतीयदृच्छया ६ क्रीडंतंसलिलेदृष्ट्वासभार्यंपद्ममालिनम् ॥ ऋद्धिमंतंततस्तस्यस्पृहयामासरेणुका ७ व्य
भिचाराच्चतस्मात्साक्लिन्नांभसिविचेतना ॥ प्रविवेशाश्रमंत्रस्तातांवैभर्ताऽन्वबुध्यत ८ सतांदृष्ट्वाच्युतांधैर्याद्ब्राह्म्यालक्ष्म्याविवर्जिताम् ॥ धिक्शब्देनमहातेजा
गर्हयामासवीर्यवान् ९ ततोज्येष्ठोजामदग्न्योरुमण्वान्नामनामतः ॥ आजगामसुषेणश्चवसुर्विश्वावसुस्तथा १० तानानुपूर्व्याद्भगवान्वधेमातुरचोदयत् ॥
नचतेजातसंस्नेहाःकिंचिदूचुर्विचेतसः ११ ततःशशापतान्क्रोधात्तेशप्ताश्चेतनांजहुः ॥ मृगपक्षिसधर्माणःक्षिप्रमासन्जडोपमाः १२ ततोरामोऽभ्ययात्पश्चादा
श्रमंपरवीरहा ॥ तमुवाचमहाबाहुर्जमदग्निर्महातपाः १३ जहीमांमातरंपापांमाचपुत्रव्यथांकृथाः ॥ ततआदायपरशुंरामोमातुःशिरोऽहरत् १४ ततस्तस्यमहा
राजजमदग्नेर्महात्मनः ॥ कोपोऽभ्यगच्छत्सहसाप्रसन्नश्चाब्रवीदिदम् १५ ममेदंवचनात्तातकृतंतेकर्मदुष्करम् ॥ वृणीष्वकामान्धर्मज्ञयावतोवांछसेहृदा १६
सवव्रेमातुरुत्थानमस्मृतिंचवधस्यवै ॥ पापेनतेनचास्पर्शंभ्रातॄणांप्रकृतिंतथा १७ अप्रतिद्वंद्वतांयुद्धेदीर्घमायुश्चभारत ॥ ददौचसर्वान्कामांस्तान्जमदग्नि
र्महातपाः १८ कदाचित्तुतथैवास्यविनिष्क्रांताःसुताःप्रभो ॥ अथानूपपतिर्वीरःकार्तवीर्योऽभ्यवर्तत १९ तमाश्रमपदंप्राप्तमृषेर्भार्यासमार्चयत् ॥ सयुद्धमद
संमत्तोनाभ्यनंदत्तथाऽर्चनम् २० प्रमथ्यचाश्रमात्तस्माद्धोमधेनोस्तथाबलात् ॥ जहारवत्संक्रोशंत्याबभंजचमहाद्रुमान् २१ आगतायचरामायतदाऽचष्ट
पितास्वयम् ॥ गांचरोरुदतींदृष्ट्वाकोपोरामंसमाविशत् २२ समृत्युवशमापन्नंकार्तवीर्यमुपाद्रवत् ॥ तस्याथयुधिविक्रम्यभार्गवःपरवीरहा २३ चिच्छेदनिशि
तैर्भल्लैर्बाहून्परिघसंनिभान् ॥ सहस्रसंमितान्राजन्प्रगृह्यरुचिरंधनुः २४ अभिभूतःसरामेणसंयुक्तःकालधर्मणा ॥ अर्जुनस्याथदायादारामेणकृतमन्यवः २५ ॥९७॥

सरस्येवक्लिन्नाद्रुता । तथाचोक्तं'सुंदरंपुरुषंदृष्ट्वाभ्रातरंपितरंसुतम् । योनिर्द्रवतिनारीणांसत्यंसत्यंजनार्दन'इति ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २०
२१ । २२ । २३ । २४ कालधर्मणामृत्युना २५

२६ । २७ । २८ भार्यावधदोषात्स्वयमपिताद्दशमेवमरणंप्रापेत्याशयः २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेषोडशाऽधिकशततमोऽध्यायः ॥ ११६ ॥ ममेति १ । २
३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ दशव्यामायतां व्यामोहस्तचतुष्टयं चत्वारिंशद्धस्तायामविस्तारां नवोत्सेधां षट्त्रिंशद्धस्तोच्छ्रायांचेत्यर्थः व्यायामेतिप्रमादपाठः १२ खंडशः

आश्रमस्थंविनारामंजमदग्निमुपाद्रवन् ॥ तेतंजघ्नुर्महावीर्यमयुध्यंतंतपस्विनम् २६ असकृद्रामरामेतिविक्रोशंतमनाथवत् ॥ कार्तवीर्यस्यपुत्रास्तुजमदग्निंयु
धिष्ठिर २७ पीडयित्वाशरैर्जग्मुर्यथागतमरिंदमाः ॥ अपक्रांतेषुवैतेषुजमदग्नौतथागते २८ समित्पाणिरुपागच्छदाश्रमंभृगुनंदनः ॥ सदृष्ट्वापितरंवीरस्तथा
मृत्युवशंगतम् ॥ अनर्हंतंतथाभूतंविललापसुदुःखितः २९ ॥ इतिश्रीम०आ०तीर्थयात्राप०लोमशतीर्थयात्रायांकार्तवीर्योपाख्यानेजमदग्निवधेषोडशाधिक
शततमोऽध्यायः ११६ ॥ ॥ रामउवाच ॥ ॥ ममापराधात्तैःक्षुद्रैर्हतस्त्वंतातबालिशैः ॥ कार्तवीर्यस्यदायादैर्वनेमृगइवेषुभिः १ धर्मज्ञस्यकथंतातवर्त
मानस्यसत्पथे ॥ मृत्युरेवंविधोयुक्तःसर्वभूतेष्वनागसः २ किंनुतैर्नकृतंपापंयैर्भवांस्तपसिस्थितः ॥ अयुध्यमानोवृद्धःसन्हतःशरशतैःशितैः ३ किंनुतेतत्र व
क्ष्यंतिसचिवेषुसुहृत्सुच ॥ अयुध्यमानंधर्मज्ञमेकंहत्वाऽनपत्रपाः ४ लालप्यैवंसकरुणंबहुनानाविधंनृप ॥ प्रेतकार्याणिसर्वाणिपितुश्चक्रेमहातपाः ५ ददाह
पितरंचाग्नौरामःपरपुरंजयः ॥ प्रतिजज्ञेवधंचापिसर्वक्षत्रस्यभारत ६ संक्रुद्धोऽतिबलःसंख्येशस्त्रमादायवीर्यवान् ॥ जघ्निवान्कार्तवीर्यस्यसुतानेकोऽतको
पमः ७ तेषांचानुगतायेचक्षत्रियाःक्षत्रियर्षभ ॥ तांश्चसर्वानवामृद्नाद्रामःप्रहरतांवरः ८ त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांप्रभुः ॥ समंतपंचकेपंचचकाररु
धिरह्रदान् ९ सतेषुतर्पयामासभृगून्भृगुकुलोद्वहः ॥ साक्षाद्ददर्शचर्चीकंसचरामंन्यवारयत् १० ततोयज्ञेनमहताजामदग्न्यःप्रतापवान् ॥ तर्पयामासदेवेंद्र
मृत्विग्भ्यःप्रददौमहीम् ११ वेदींचाप्यददद्धैमींकश्यपायमहात्मने ॥ दशव्यामायतांकृत्वानवोत्सेधांविशांपते १२ तांकश्यपस्यानुमतेब्राह्मणाःखंडशस्तदा ॥
व्यभजंस्तेतदाराजन्प्रख्याताःखांडवायनाः १३ सप्रदायमहींतस्मैकश्यपायमहात्मने ॥ अस्मिन्महेंद्रेशैलेंद्रेवसत्यमितविक्रमः १४ एवंवैरमभूत्तस्यक्ष
त्रियैर्लोकवासिभिः ॥ पृथिवीचापिविजितारामेणामिततेजसा १५ ॥ वैशंपायनउवाच ॥ ततश्चतुर्दशींरामःसमयेनमहामनाः ॥ दर्शयामासतान्विप्रान्धर्मराजं
चसानुजम् १६ सतमानर्चराजेंद्रभ्रातृभिःसहितःप्रभुः ॥ द्विजानांचपरांपूजांचक्रेनृपतिसत्तमः १७ अर्चित्वाजामदग्न्यंसपूजितस्तेनचोदितः ॥ महेंद्रउ
ष्यतांरात्रिंप्रययौदक्षिणामुखः १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांकार्तवीर्योपाख्यानेसप्तदशाधिकशततमोऽध्यायः
॥ ११७ ॥ ॥ वैशंपायनउवाच ॥ गच्छन्सतीर्थानिमहानुभावःपुण्यानिरम्याणिददर्शराजा ॥ सर्वाणिविप्रैरुपशोभितानिकचित्कचिद्भारतसागरस्य १

खंडाःनिखंडानिकृत्वाव्यभजन् १३।१४।१५।१६ आनर्चअर्चितवान् १७ तेनचउदितइतिच्छेदः उष्यउषित्वा १८ इत्या० नी० भा० सप्तदशाधिकशततमोऽध्यायः ॥११७॥ गच्छन्निति १

इत्तवान्सद्वृत्तः पार्थिवःपृथ्वीपतिःकश्यपस्तस्यपुत्रःसूर्यस्तस्यपौत्रोयुधिष्ठिरः तत्पितुर्धर्मस्यसूर्यपुत्रत्वात् प्रशस्तांनामनदीम् २ । ३ नारीतीर्थानि ग्राहरूपाः पंचाप्सरसोमुनिशापवशाद्यत्र स्थिताअर्जुनेनचशापान्मोचितास्तानि नारीतीर्थानि ४ । ५ । ६ अंबुवरोत्तमस्यसमुद्रस्य ७ । ८ । ९ । १० । ११ । १२ । १३ तेषुतीर्थेषुउपवासान्सम्यगुपवासिनोविबुधान्पंडितानुपोष्य

सद्वृत्तवांस्तेषुकृताभिषेकःसहानुजःपार्थिवपुत्रपौत्रः ॥ समुद्रगांपुण्यतमांप्रशस्तांजगामपारीक्षितपांडुपुत्रः २ तत्रापिचाप्लुत्यमहानुभावःसंतर्पयामासपितॄन्सु
रांश्च ॥ द्विजातिमुख्येषुधनंविसृज्यगोदावरींसागरगामगच्छत् ३ ततोविपाप्माद्रविडेषुराजन्समुद्रमासाद्यचलोकपुण्यम् ॥ अगस्त्यतीर्थंचमहापवित्रंनारीती
र्थान्यथवीरोददर्श ४ तत्रार्जुनस्याग्र्यधनुर्धरस्यनिशम्यतत्कर्मनरैरशक्यम् ॥ संपूज्यमानःपरमर्षिसंघैःपरांमुदंपांडुसुतःसलेभे ५ सतेषुतीर्थेष्वभिषिक्तगा
त्रःकृष्णासहायःसहितोऽनुजैश्च ॥ संपूजयन्विक्रममर्जुनस्यरेमेमहीपालपतिःपृथिव्याः ६ ततःसहस्राणिगवांप्रदायतीर्थेषुतेष्वंबुवरोत्तमस्य ॥ हृष्टःसहभ्रातृ
भिरर्जुनस्यसंकीर्तयामासगवांप्रदानम् ७ सतानितीर्थानिचसागरस्यपुण्यानिचान्यानिबहूनिराजन् ॥ क्रमेणगच्छन्परिपूर्णकामःशूर्पारकंपुण्यतमंददर्श ८
तत्रोदधेःकंचिदतीत्यदेशंख्यातंपृथिव्यांवनमाससाद ॥ तप्तंसुरैरत्रतपःपुरस्तादिष्टंतथापुण्यपरैर्नरेंद्रैः ९ सतत्रतामग्र्यधनुर्धरस्यवेदींददर्शायतपीनबाहुः ॥
ऋचीकपुत्रस्यतपस्विसंघैःसमावृतांपुण्यकृदर्चनीयाम् १० ततोवसूनांवसुधाधिपःसमरुद्गणानांचतथाऽश्विनोश्च ॥ वैवस्वतादित्यधनेश्वराणामिंद्रस्यविष्णोः
सवितुर्विभोश्च ११ भवस्यचंद्रस्यदिवाकरस्यपतेरपांसाध्यगणस्यचैव ॥ धातुःपितॄणांचतथामहात्मारुद्रस्यराजन्सगणस्यचैव १२ सरस्वत्याःसिद्धगणस्य
चैवपुण्याश्चयेचाप्यमरास्तथाऽन्ये ॥ पुण्यानिचाप्यायतनानितेषांददर्शराजासुमनोहराणि १३ तेषूपवासान्विबुधानुपोष्यदत्वाचरत्नानिमहांतिराजा ॥ ती
र्थेषुसर्वेषुपरिप्लुतांगःपुनःसशूर्पारकमाजगाम १४ सतेनतीर्थेनतुसागरस्यपुनःप्रयातःसहसोदरीयैः ॥ द्विजैःपृथिव्यांप्रथितंमहद्भिस्तीर्थंप्रभासंसमुपाजगाम १५
तत्राभिषिक्तःपृथुलोहिताक्षःसहानुजैर्देवगणान्पितॄंश्च ॥ संतर्पयामासतथैवकृष्णातेचापिविप्राःसहलोमशेन १६ सद्वादशाहंजलवायुभक्षःकुर्वन्क्षपाहःसुतदाभि
षेकम् ॥ समंततोऽग्नीनुपदीपयित्वातेपेतपोधर्मभृतांवरिष्ठः १७ तमुग्रमास्थायतपश्चरंतंशुश्रावरामश्चजनार्दनश्च ॥ तौसर्ववृष्णिप्रवरौससैन्यौयुधिष्ठिरंजग्म
तुराजमीढं १८ तेवृष्णयःपांडुसुतान्समीक्ष्यभूमौशयानान्मलदिग्धगात्रान् ॥ अनर्हतींद्रौपदीचापिदृष्ट्वासुदुःखिताश्चुक्रुशुरार्तनादम् १९ ततःसरामंचजनार्द
नंचकार्ष्णिंचसांबंचशिनेश्चपौत्रम् ॥ अन्यांश्चवृष्णीनुपगम्यपूजांचक्रेयथाधर्ममहीनसत्वः २० तेचापिसर्वान्प्रतिपूज्यपार्थांस्तैःसत्कृताःपांडुसुतैस्तथैव ॥ यु
धिष्ठिरंसंपरिवार्यराजन्नुपाविशन्देवगणायथेंद्रम् २१ तेषांससर्वंचरितंपरेषांवनेचवासंपरमप्रतीतः ॥ अस्त्रार्थमिंद्रस्यगतंचपार्थंनिवेशनंहृष्टमनाःशशंस २२ ॥१८॥

वस्त्रैरावास्यरत्नानिचतेभ्यएवदत्वा १४ तेनतीर्थेनसिंधुतीरमार्गेण १५ । १६ । १७ । १८ । १९ कार्ष्णिंप्रद्युम्नं पौत्रंसात्यकिम् २० । २१ । २२

२३ ॥ इत्यारण्यकेनी० भा० अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥ प्रभासेति १ । २ । ३ हलीति हलधरत्वाद्धर्मस्यापिनिंदांकरिष्यतीतिध्वनितं ४ भवायअभ्युदयाय ५ वि वरंशरीरगूहनायनददातीत्यर्थः ६ मिथःशंकाधर्माधर्मयोः किंबलीयइति शास्त्रानुभवयोर्विरोधात्संशयः ७ राज्याच्चसुखाच्चचलेन्नतुधर्मादितिशेषः तत्रहेतुःधर्मादिति कथमित्युपहासार्थं ८ । ९ अवनिप्रधानोधृतराष्ट्रः १० नासाविति किंनामपापंकृत्वाऽहमचक्षुर्जातः कौंतेयंप्रव्राज्यकीदृशोभविष्यामीतिधियानालोचयतीत्यध्याहृत्ययोज्यं ११ चामीकराभान् कनकप्र

श्रुत्वातुतेतस्यवचःप्रतीतास्तांश्चापिदृष्ट्वासुकृशानतीव ॥ नेत्रोद्भवंसंमुमुचुर्महार्हादुःखार्तिजंवारिमहानुभावाः २३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थ
यात्रापर्वणिलोमशतीर्थयात्रायांप्रभासेयादवपांडवसमागमेअष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥ ॥ ध ॥ ॥ जनमेजयउवाच ॥ प्रभासतीर्थमा
साद्यपांडवावृष्णयस्तथा ॥ किमकुर्वन्कथाश्चैषांकास्तत्रासंस्तपोधन १ तेहिसर्वेमहात्मानःसर्वशास्त्रविशारदाः ॥ वृष्णयःपांडवाश्चैवसुहृदश्चपरस्परम् २
॥ वैशंपायनउवाच ॥ प्रभासतीर्थंसंप्राप्यपुण्यंतीर्थंमहोदधेः ॥ वृष्णयःपांडवान्वीराःपरिवार्योपतस्थिरे ३ ततोगोक्षीरकुंदेंदुमृणालरजतप्रभः ॥ वनमाली
हलीरामोबभाषेपुष्करेक्षणम् ४ ॥ बलदेवउवाच ॥ नकृष्णधर्मश्चरितोभवायजंतोरधर्मश्चपराभवाय ॥ युधिष्ठिरोयत्रजटीमहात्मावनाश्रयःक्लिश्यतिचीरवासाः
५ दुर्योधनश्चापिमहींप्रशास्तिनचास्यभूमिर्विवरंददाति ॥ धर्मादधर्मश्चरितोगरीयानितीवमन्येतनरोऽल्पबुद्धिः ६ दुर्योधनेचापिविवर्धमानेयुधिष्ठिरेचासुख
मात्तराज्ये ॥ किंत्वत्रकर्तव्यमितिप्रजाभिःशंकामिथःसंजनितानराणाम् ७ अयंसधर्मप्रभवोनरेंद्रोधर्मेधृतःसत्यधृतिःप्रदाता ॥ चलेद्धिराज्याच्चसुखाच्चपार्थो
धर्मादपेतस्तुकथंविवर्धेत् ८ कथंनुभीष्मश्चकृपश्चविप्रोद्रोणश्चराजाचकुलस्यवृद्धः ॥ प्रव्राज्यपार्थान्सुखमाप्नुवंतिधिक्पापबुद्धीन्भरतप्रधानान् ९ किंनामवक्ष्य
त्यवनिप्रधानःपितॄन्समागम्यपरत्रपापः ॥ पुत्रेषुसम्यक्चरितंमयेतिपुत्रानपापान्व्यपरोप्यराज्यात् १० नासौधियासंप्रतिपश्यतिस्मकिंनामकृत्वाऽहमचक्षुरे
वम् ॥ जातःपृथिव्यामितिपार्थिवेषुप्रव्राज्यकौंतेयमितिस्मराज्यात् ११ नूनंसमृद्धान्पितृलोकभूमौचामीकराभान्क्षितिजान्प्रफुल्लान् ॥ विचित्रवीर्यस्यसुतः
सपुत्रःकृत्वानृशंसंबतपश्यतिस्म १२ व्यूढोत्तरांसान्पृथुलोहिताक्षानिमान्स्मपृच्छन्सशृणातिनूनम् ॥ प्रास्थापयद्यत्सवनंसशंकोयुधिष्ठिरंसानुजमातश
स्त्रम् १३ योऽयंपरेषांपृतनांसमृद्धांनिरायुधोदीर्घभुजोनिहन्यात् ॥ श्रुत्वैवशब्दंहिवृकोदरस्यमुंचंतिसैन्यानिशकृत्समूत्रम् १४ सक्षुत्पिपासाध्वकृशस्तरस्वी
समेत्यनानायुधबाणपाणिः ॥ वनेस्मरन्वासमिमंसुघोरंशेषंनकुर्यादितिनिश्चितंमे १५ नह्यस्यवीर्येणबलेनकश्चित्समःपृथिव्यामपिविद्यतेऽन्यः ॥ सशीतवा
तातपकर्शितांगोनशेषमाजावसुहृत्सुकुर्यात् १६

भान् एतन्मरणचिह्नं नृशंसंनिंद्यंकर्म १२ इमान्भीष्मादीन् शृणातिहिनस्ति शृणोतीतिलेखकप्रमादः नशृणोति इति गौडपाठेतु 'अयमग्निर्वैश्वानरोयोऽयमंतःपुरुषेयेनेदमन्नंपच्यतेयदिदम द्यतेतस्यैषघोषोभवति । यमेतत्कर्णावपिधायशृणोति सयदोत्क्रमिष्यन्भवति नैनंघोषंशृणोति' इति श्रुत्यर्थोऽनुसंधेयः १३ । १४ शेषंनकुर्यान्निःशेषमेवनाशयेदित्यर्थः १५ । १६

स्वस्तिक्षेमेणआगमत् आगतः १७ । १८ सोऽयंनकुलः १९ राज्ञोद्रुपदस्य २० त्रिवर्गमुख्यस्यधर्मस्य । त्रिवर्गोधर्मकामार्थैरित्यमरः । वनेअचरन्नहिअस्तसुखाइति च्छेदः २१ । २२ इत्यारण्यकेप॰ नीलकंठीयेभारतभावदीपेऊनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥ नरामेति १ नाथवंतःऐश्वर्यवंतः । भावेघञ् नात्मनानस्वयंनाथाः कार्यसाधकाः शिष्यादयइत्ये

प्राच्यांनृपानेकरथेनजित्वावृकोदरःसानुचरानरण्ये ॥ स्वस्त्यागमद्योऽतिरथस्तरस्वीसोऽयंवनेक्लिश्यतिचीरवासाः १७ यःसिंधुकूलेऽभ्यजयन्नृदेवान्समागता न्दाक्षिणात्यान्महीपान् ॥ तंपश्यतेमंसहदेवमद्यतरस्विनंतापसवेषरूपम् १८ यःपार्थिवानेकरथेनजिग्येदिशंप्रतीचींप्रतियुद्धशौंडः ॥ सोऽयंवनेमूलफलेन जीवन्जटीचरत्यद्यमलाचितांगः १९ सत्रेसमृद्धेतिरथस्यराज्ञोवेदीतलादुत्पतितासुताया ॥ सेयंवनेवासमिमंसुदुःखंकथंसहत्यद्यसतीसुखार्हा २० त्रिवर्गमु ख्यस्यसमीरणस्यदेवेश्वरस्याप्यथवाऽश्विनोश्च ॥ एषांसुराणांतनयाःकथंनुवनेऽचरन्नह्यस्तसुखाःसुखार्हाः २१ जितेहिधर्मस्यसुतेसभार्येसभ्रातृकेसानुचरेनिरस्ते ॥ दुर्योधनेचापिविवर्धमानेकथंनसीदत्यवनिःसशैला २२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांबलरामवाक्येऊनविंशाधिकशततमोऽध्यायः ॥ ११९ ॥ ॥ सात्यकिरुवाच ॥ नरामकालःपरिदेवनायययुत्तरंत्वत्रतदेवसर्वे ॥ समाचरामोह्यनतीतकालंयुधिष्ठिरोयद्यपि नाहकिंचित् १ येनाथवंतोऽद्यभवंतिलोकेतेनात्मनाकर्मसमारभंते ॥ तेषांतुकार्येषुभवंतिनाथाःशिब्यादयोरामयथाययातेः २ येषांतथारामसमारभंतेकार्याणि नाथाःस्वमतेनलोके ॥ तेनाथवंतःपुरुषप्रवीरानानाथवत्कृच्छ्रमवाप्नुवंति ३ कस्मादिमौरामजनार्दनौचप्रद्युम्नसांबौचमयासमेतौ ॥ वसंत्यरण्येसहसोदरीयैस्त्रैलोक्यनाथानभिगम्यपार्थाः ४ निर्यातुसाध्वद्यदशार्हसेनाप्रभूतनानायुधचित्रवर्मा ॥ यमक्षयंगच्छतुधार्तराष्ट्रःसबांधवोवृष्णिबलाभिभूतः ५ त्वंह्येवकोपात्पृथिवीमपीमांसंवेष्टयेस्तिष्ठतुशार्ङ्गधन्वा ॥ सधार्तराष्ट्रंजहिसानुबंधंवृत्रंयथादेवपतिर्महेंद्रः ६ भ्राताचमेयःससखागुरुश्चजनार्दनस्यात्मसमश्चपार्थः ॥ यदर्थमेच्छन्मनुजाःसुपुत्रंशिष्यंगुरुंचाप्रतिकूलवादम् ७ यदर्थमभ्युद्यतमुत्तमंतत्करोतिकर्माग्र्यमपारणीयम् ॥ तस्यास्त्रवर्षाण्यहमुत्तमास्त्रैर्विहत्यसर्वाणिरणेऽभिभूय ८ कायाच्छिरःसर्पविषाग्निकल्पैःशरोत्तमैरुन्माथितास्मिराम ॥ खड्गेनचाहंनिशितेनसंख्येकायाच्छिरस्तस्यबलात्प्रमथ्य ९ ततोऽस्यसर्वाननुगान्हनिष्येदुर्योधनंचापिकुरूंश्चसर्वान् ॥ आत्तायुधंमामिहरौहिणेयपश्यंतुभौमायुधिजातहर्षाः १० निघ्नंतमेकंकुरुयोधमुख्यानग्निंमहाकक्षमिवांतकाले ॥ प्रद्युम्नमुक्तान्निशितान्नशक्ताःसोढुंकृपद्रोणविकर्णकर्णाः ११ जानामिवीर्यंचजयात्मजस्यकार्ष्णिर्भवत्येवयथारणस्थः ॥ सांबःससूतंसरथंभुजाभ्यांदुःशासनंशास्तुबलात्प्रमथ्य १२ नविद्यतेजांबवतीसुतस्यरणेविषह्यंहिरणोत्कटस्य ॥ एतेनबालेनहिशंबरस्यदैत्यस्यसैन्यंसहसाप्रणुन्नम् १३

त्थादः शैब्यादयइतिपाठेतुस्वार्थेष्यञ् २ । ३ । ४ । ५ । ६ सपार्थोऽपितिष्ठत्वितिपूर्वेणान्वयः यदर्थंशत्रुवधार्थं ७ तत्सपुत्रादिकंअस्माकमस्तीतिशेषः ८ । ९ भैमाभीमकर्मकर्तारो भीमवंशजावा १० । ११ जयात्मजस्याभिमन्योः १२ । १३

१० । १५ । १४ । १५ । १८ । १९ । २० । २१ । २२ माधवमधुवंशोमधुरामदेशस्तत्रजात २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ सुतेनअभिषुतेनयज्ञेसोमपानतुल्यं

हतोरुरत्यायतपीनबाहुरेतेनसंख्येनिहतोऽश्वचक्रः ॥ कोनामसांबस्यमहारथस्यरणेसमक्षंरथमभ्युदीयात् १४ यथाप्रविश्यांतरमंतकस्यकालेमनुष्योनविनिष्क्रमेत ॥ तथाप्रविश्यांतरमस्यसंख्येकोनामजीवन्पुनराव्रजेच्च १५ द्रोणंचभीष्मंचमहारथौतौसुतैर्वृतंचाप्यथसोमदत्तम् ॥ सर्वाणिसैन्यानिचवासुदेवःप्रधक्ष्यतेसायकवह्निजालैः १६ किंनामलोकेष्वविषह्यमस्तिकृष्णस्यसर्वेषुसदेवकेषु ॥ आत्तायुधस्योत्तमबाणपाणेश्चक्रायुधस्याप्रतिमस्ययुद्धे १७ ततोऽनिरुद्धोप्यसिचर्मपाणिर्महीमिमांधार्तराष्ट्रैर्विसंज्ञैः ॥ हृतोत्तमांगैर्निहतैःकरोतुकीर्णांकुशैर्वेदिमिवाध्वरेषु १८ गदोल्मुकौबाहुकभानुनीथाःशूरश्चसंख्येनिशठःकुमारः ॥ रणोत्कटौसारणचारुदेष्णौकुलोचितंविप्रथयंतुकर्म १९ सवृष्णिभोजांधकयोधमुख्यासमागतासात्वतशूरसेना ॥ हत्वारणेतान्धृतराष्ट्रपुत्रान्लोकेयशस्फीतमुपाकरोतु २० ततोऽभिमन्युःपृथिवींप्रशास्तुयावद्व्रतंधर्मभृतांवरिष्ठः ॥ युधिष्ठिरःपारयतेमहात्माद्यूतेयथोक्तंकुरुसत्तमेन २१ अस्मत्प्रमुक्तैर्विशिखैर्जितारिस्ततोमहींमोक्ष्यतिधर्मराजः ॥ निर्धार्तराष्ट्रांहतसूतपुत्रामेतद्धिनःकृत्यतमंयशस्यम् २२ ॥ वासुदेवउवाच ॥ असंशयंमाधवसत्यमेतद्गृह्णीमतेवाक्यमदीनसत्व ॥ स्वाभ्यांभुजाभ्यामजितांतुभूमिंनेच्छेत्कुरूणामृषभःकथंचित् २३ नह्येषकामान्नभयान्नलोभाद्युधिष्ठिरोजातुजह्यात्स्वधर्मम् ॥ भीमार्जुनौचातिरथौयमौचतथैवकृष्णाद्रुपदात्मजेयम् २४ उभौहियुद्धेऽप्रतिमौपृथिव्यांवृकोदरश्चैवधनंजयश्च ॥ कस्मान्नकृत्स्नांपृथिवींप्रशासेन्माद्रीसुताभ्यांचपुरस्कृतोऽयम् २५ यदातुपंचालपतिर्महात्मासकेकयश्चेदिपतिर्वयंच ॥ युध्येमविक्रम्यरणेसमेतास्तदैवसर्वेरिपवोहिनस्युः २६ ॥ युधिष्ठिरउवाच ॥ नेदंचित्रंमाधवयद्ब्रवीषिसत्यंतुमेरक्ष्यतमंनराज्यम् ॥ कृष्णस्तुमांवेदयथावदेकःकृष्णंचवेदाहमथोयथावत् २७ यदैवकालंपुरुषप्रवीरोवेत्स्यत्ययंमाधवविक्रमस्य ॥ तदारणेत्वंचशिनिप्रवीरसुयोधनंजेष्यसिकेशवश्च २८ प्रतिप्रयांत्वद्यदशार्हवीरादृष्टोऽस्मिनाथैर्नरलोकनाथैः ॥ धर्मेऽप्रमादंकुरुताप्रमेयाद्रष्टास्मिभूयःसुखिनःसमेतान् २९ तेन्योन्यमामंत्र्यतथाभिवाद्यवृद्धान्परिष्वज्यशिशूंश्चसर्वान् ॥ यदुप्रवीराःस्वगृहाणिजग्मुस्तेचापितीर्थान्यनुसंविचेरुः ३० विसृज्यकृष्णंत्वथधर्मराजोविदर्भराजोपचितांसुतीर्थाम् ॥ जगामपुण्यांसरितंपयोष्णींसभ्रातृभृत्यःसहलोमशेन ३१ सुतेनसोमेनविमिश्रतोयांपयःपयोष्णींप्रतिसोऽध्युवास ॥ द्विजातिमुख्यैर्मुदितैर्महात्मासंस्तूयमानःस्तुतिभिर्वराभिः ३२ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांयादवगमने विंशत्याधिकशततमोऽध्यायः ॥ १२० ॥ ॥ लोमशउवाच ॥ नृगेणयजमानेनसोमेनेहपुरंदरः ॥ तर्पितःश्रूयतेराजन्सतृप्तोऽदमभ्यगात् १

तज्जलपानमित्यर्थः पयोष्णींप्रतिपयोष्ण्यां पयोमात्रमभ्युत्रासभक्षितवान् ३२ ॥ इत्यारण्य॰ नीलकंठीये भा॰ विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥ ॥ ७ ॥ नृगेणेति १

२ आमूर्तरयसोगयनामा ३ वानस्पत्यंवृक्षजंचषालादि भौमंमृन्मयंस्थाल्यादि ४ चषालोयूपकटकः । यूपोयज्ञस्तंभः । चमसाःसोमपानपात्राणि । पात्र्योहविःस्थापनार्थानिमृन्मयानिपात्राणि । स्रुचःहविःप्रदानार्थाः । स्रुवाः हविरवदानार्थाः ५ । ६ । ७ प्रसंख्यानात् एकयत्नेनभूयःस्वर्णमुद्रादेर्मापकान् खारीद्रोणादीन् ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

इहदेवैःसहेंद्रैश्चप्रजापतिभिरेवच ॥ इष्टंबहुविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः २ आमूर्तरयसश्चेहराजावज्रधरंप्रभुः ॥ तर्पयामाससोमेनहयमेधेषुसप्तसु ३ तस्यसप्तसुयज्ञेषुसर्वमासीद्धिरण्मयम् ॥ वानस्पत्यंचभौमंचयद्द्रव्यंनियतंमखे ४ चषालयूपचमसाःस्थाल्यःपात्र्यःस्रुचःस्रुवाः ॥ तेष्वेवचास्ययज्ञेषुप्रयोगाःसप्तविश्रुताः ५ सप्तैकैकस्ययूपस्यचषालाश्चोपरिस्थिताः ॥ तस्यस्मयूपान्यज्ञेषुभ्राजमानान्हिरण्मयान् ६ स्वयमुत्थापयामासुर्देवाःसेंद्रायुधिष्ठिर ॥ तेषुतस्यमखाग्र्येषुगयस्यपृथिवीपतेः ७ अमाद्यदिंद्रःसोमेनदक्षिणाभिर्द्विजातयः ॥ प्रसंख्यानानसंख्येयान्प्रत्यगृह्णन्द्विजातयः ८ सिकतावायथालोकेयथावादिवितारकाः ॥ यथावावर्षतोधाराअसंख्येयाःस्मकेनचित् ९ तथैवतदसंख्येयंधनंयत्प्रददौगयः ॥ सदस्येभ्योमहाराजतेषुयज्ञेषुसप्तसु १० भवेत्संख्येयमेतद्वियदेतत्परिकीर्तितम् ॥ नतस्यशक्याःसंख्यातुंदक्षिणादक्षिणावतः ११ हिरण्मयीभिर्गोभिश्चकृताभिर्विश्वकर्मणा ॥ ब्राह्मणांस्तर्पयामासनानादिग्भ्यःसमागतान् १२ अल्पावशेषापृथिवीचैत्यैरासीन्महात्मनः ॥ गयस्ययजमानस्यतत्रतत्रविशांपते १३ सलोकान्प्राप्तवानैंद्रान्कर्मणातेनभारत ॥ सलोकतांतस्यगच्छेत्पयोष्ण्यांयउपस्पृशेत् १४ तस्मात्त्वमत्रराजेंद्रभ्रातृभिःसहितोऽच्युत ॥ उपस्पृश्यमहीपालधूतपाप्माभविष्यसि १५ ॥ वैशंपायनउवाच ॥ सपयोष्ण्यांनरश्रेष्ठःस्नात्वावैभ्रातृभिःसह ॥ वैदूर्यपर्वतंचैवनर्मदांचमहानदीम् १६ समागमत्तेजस्वीभ्रातृभिःसहितोऽनघ ॥ तत्रास्यसर्वाण्याचख्यौलोमशोभगवानृषिः १७ तीर्थानिरमणीयानिपुण्यान्यायतनानिच ॥ यथायोगंयथाप्रीतिप्रययौभ्रातृभिःसह ॥ तत्रतत्राददद्वित्तंब्राह्मणेभ्यःसहस्रशः १८ ॥ लोमशउवाच ॥ देवानामेतिकौंतेयतथाराज्ञांसलोकताम् ॥ वैदूर्यपर्वतंदृष्ट्वानर्मदामवतीर्यच १९ संधिरेषनरश्रेष्ठत्रेतायाद्वापरस्यच ॥ एनमासाद्यकौंतेयसर्वपापैःप्रमुच्यते २० एषशर्यातियज्ञस्यदेशस्तातप्रकाशते ॥ साक्षाद्यत्रापिबत्सोममश्विभ्यांसहकौशिकः २१ चुकोपभार्गवश्चापिमहेंद्रस्यमहातपाः ॥ संस्तंभयामासचतंवासवंच्यवनःप्रभुः ॥ सुकन्यांचापिभार्यांसराजपुत्रीमवाप्तवान् २२ ॥ युधिष्ठिरउवाच ॥ कथंविष्टंभितस्तेनभगवान्पाकशासनः ॥ किमर्थंभार्गवश्चापिकोपंचक्रेमहातपाः २३ नासत्यौचकथंब्रह्मन्कृतवान्सोमपीथिनौ ॥ एतत्सर्वंयथावृत्तमाख्यातुभगवान्मम २४ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांसौकन्येएकविंशाधिकशततमोऽध्यायः ॥ १२१ ॥ ॥ ध ॥ ॥ ध ॥ ॥ ध ॥

१५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ सोमस्यपीथःपानंतद्वंतौसोमपीथिनौ २४ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेएकविंशाधिकशततमोऽध्यायः ॥ १२१ ॥

भृगोरिति १ वीरस्थानेनवीरासनेन २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० क्षामकंठः क्षीणध्वनिः ११ अतएवसावद्वचनंनशृणोति १२ । १३ । १४ आनाहो

॥ लोमशउवाच ॥ भृगोर्महर्षेःपुत्रोऽभूच्च्यवनोनामभारत ॥ समीपेसरसस्तस्यतपस्तेपेमहाद्युतिः १ स्थाणुभूतोमहातेजावीरस्थानेनपांडव ॥ अतिष्ठतचिरंकालमेकदेशेविशांपते २ सवल्मीकोऽभवदृषिर्लताभिरिवसंवृतः ॥ कालेनमहताराजन्समाकीर्णःपिपीलिकैः ३ तथाससंवृतोधीमान्मृत्पिंडइवसर्वशः ॥ तप्यतेस्मतपोघोरंवल्मीकेनसमावृतः ४ अथदीर्घस्यकालस्यशर्यातिर्नामपार्थिवः ॥ आजगामसरोरम्यंविहर्तुमिदमुत्तमम् ५ तस्यस्त्रीणांसहस्राणिचत्वार्यासन्परिग्रहः ॥ एकैवचसुतासुभ्रूःसुकन्यानामभारत ६ सासखीभिःपरिवृतादिव्याभरणभूषिता ॥ चंक्रम्यमाणावल्मीकंभार्गवस्यसमासदत् ७ सावैवसुमतींतत्रपश्यंतीसुमनोरमाम् ॥ वनस्पतीन्विचिन्वंतीविजहारसखीवृता ८ रूपेणवयसाचैवमदनेनमदेनच ॥ बभंजवनवृक्षाणांशाखाःपरमपुष्पिताः ९ तांसखीरहितामेकामेकवस्त्रामलंकृताम् ॥ ददर्शभार्गवोधीमांश्चरंतीमिवविद्युतम् १० तांपश्यमानोविजनेसरेमेपरमद्युतिः ॥ क्षामकंठश्चविप्रर्षिस्तपोबलसमन्वितः ११ तामाबभाषेकल्याणींसाचास्यनशृणोतिवै ॥ ततःसुकन्यावल्मीकेदृष्ट्वाभार्गवचक्षुषी १२ कौतूहलात्कंटकेनबुद्धिमोहबलात्कृता ॥ किंनुखल्विदमित्युक्त्वानिर्बिभेदास्यलोचने १३ अक्रुद्ध्यत्सतयाविद्धेनेत्रेपरममन्युमान् ॥ ततःशर्यातिसैन्यस्यशकृन्मूत्रेसमावृणोत् १४ ततोरुद्धेशकृन्मूत्रेसैन्यमानाहदुःखितम् ॥ तथागतमभिप्रेक्ष्यपर्यपृच्छत्सपार्थिवः १५ तपोनित्यस्यवृद्धस्यरोषणस्यविशेषतः ॥ केनापकृतमद्येहभार्गवस्यमहात्मनः १६ ज्ञातंवायदिवाऽज्ञातंतद्दुतंब्रूतमाचिरम् ॥ तमूचुःसैनिकाःसर्वेनविद्मोऽपकृतंवयम् १७ सर्वोपायैर्यथाकामंभवांस्तदधिगच्छतु ॥ ततःसपृथिवीपालःसाम्नाचोग्रेणचस्वयम् १८ पर्यपृच्छत्सुहृद्गणंपर्यजानन्नचैवते ॥ आनाहार्तंततोदृष्ट्वातत्सैन्यमसुखार्दितम् १९ पितरंदुःखितंदृष्ट्वासुकन्येदमथाब्रवीत् ॥ मयाऽटंत्येहवल्मीकेदृष्टंसत्त्वमभिज्वलत् २० खद्योतवदभिज्ञातंतन्मयाविद्धमंतिकात् ॥ एतच्छ्रुत्वातुवल्मीकंशर्यातिस्तूर्णमभ्ययात् २१ तत्रापश्यत्तपोवृद्धंवयोवृद्धंचभार्गवम् ॥ अयाचदथसैन्यार्थंप्रांजलिःपृथिवीपतिः २२ अज्ञानाद्बालयायत्तेकृतंतत्क्षंतुमर्हसि ॥ ततोऽब्रवीन्महीपालंच्यवनोभार्गवस्तदा २३ अपमानादहंविद्धोह्यनयादर्पपूर्णया ॥ रूपौदार्यसमायुक्तांलोभमोहबलात्कृताम् २४ तामेवप्रतिगृह्याहंराजन्दुहितरंतव ॥ क्षंस्यामीतिमहीपालसत्यमेतद्ब्रवीमिते २५ ॥ ॥ लोमशउवाच ॥ ऋषेर्वचनमाज्ञायशर्यातिरविचारयन् ॥ ददौदुहितरंतस्मैच्यवनायमहात्मने २६ प्रतिगृह्यचतांकन्यांभगवान्प्रससादह ॥ प्राप्तप्रसादोराजावैससैन्यःपुरमाव्रजत् २७ सुकन्याऽपिपतिंलब्ध्वातपस्विनमनिंदिता ॥ नित्यंपर्यचरत्प्रीत्यातपसानियमेनच २८

मलविष्टंभः १५ । १६ । १७ । १८ । १९ । २० २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८

२९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेद्वाविंशाधिकशततमोऽध्यायः ॥ १२२ ॥ ॥ * ॥ कस्यचिदिति विवृतामनाच्छादितां १ । २ । ३ । ४ गताध्वने अतीतवय

अग्नीनामतिथीनांचशुश्रूषुरनसूयिका ॥ समाराधयतक्षिप्रंच्यवनंसाशुभानना २९ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थ
यात्रायांसौकन्येद्वाविंशाधिकशततमोऽध्यायः ॥ १२२ ॥ ॥ लोमशउवाच ॥ कस्यचित्त्वथकालस्यत्रिदशावश्विनौनृप ॥ कृताभिषेकांविवृतांसुकन्यां
तामपश्यताम् १ तांदृष्ट्वादर्शनीयांगींदेवराजसुतामिव ॥ ऊचतुःसमभिद्रुत्यनासत्यावश्विनाविदम् २ कस्यत्वमसिवामोरुवनेऽस्मिन्किंकरोषिच ॥ इच्छाव
भद्रेज्ञातुंत्वांतत्त्वमाख्याहिशोभने ३ ततःसुकन्यासव्रीडातावुवाचसुरोत्तमौ ॥ शर्यातितनयांवित्तंभार्यांमांच्यवनस्यच ४ अथाश्विनौप्रहस्यैतामब्रूतांपुनरे
वतु ॥ कथंत्वमसिकल्याणिपित्रादत्तागताध्वने ५ भ्राजसेऽस्मिन्वनेभीरुविद्युत्सौदामनीयथा ॥ नदेवेष्वपितुल्यांहित्वयापश्यावभाविनि ६ अनाभरणसंपन्ना
परमांबरवर्जिता ॥ शोभयस्यधिकंभद्रेवनमप्यनलंकृता ७ सर्वाभरणसंपन्नापरमांबरधारिणी ॥ शोभसेत्वनवद्यांगिनत्वेवंमलपंकिनी ८ कस्मादेवंविधाभूत्वा
जराजर्जरितंपतिम् ॥ त्वमुपास्सेहकल्याणिकामभोगबहिष्कृतम् ९ असमर्थंपरित्राणेपोषणेतुशुचिस्मिते ॥ सात्वंच्यवनमुत्सृज्यवरयस्वैकमावयोः १० पत्यर्थं
देवगर्भाभेमावृथायौवनंकृथाः ॥ एवमुक्तासुकन्याऽपिसुरौताविदमब्रवीत् ११ रताऽहंच्यवनेपत्यौमैवंमांपर्यशंकतम् ॥ तावब्रूतांपुनस्त्वेनामावांदेवभिषग्वरौ
१२ युवानंरूपसंपन्नंकरिष्यावःपतिंतव ॥ ततस्तस्यावयोश्चैववृणीष्वान्यतमंपतिम् १३ एतेनसमयेनैनमामंत्रयपतिंशुभे ॥ सातयोर्वचनाद्राजन्नुपसंगम्य
भार्गवम् १४ उवाचवाक्यंयत्ताभ्यामुक्तंभृगुसुतंप्रति ॥ तच्छ्रुत्वाच्यवनोभार्यामुवाचक्रियतामिति १५ ऊचतूराजपुत्रींतांपतिस्तवविशत्वपः ॥ ततोऽम्भश्च्य
वनःशीघ्रंरूपार्थीप्रविवेशह १६ अश्विनावपितद्राजन्सरःप्राविशतांतदा ॥ ततोमुहूर्तादुत्तीर्णाःसर्वेतेसरसस्तदा १७ दिव्यरूपधराःसर्वेयुवानोमृष्टकुंडलाः ॥
तुल्यवेषधराश्चैवमनसःप्रीतिवर्धनाः १८ तेऽब्रुवन्सहिताःसर्वेवृणीष्वान्यतमंशुभे ॥ अस्माकमीप्सितंभद्रेपतित्वेवरवर्णिनि १९ यत्रवाऽप्यभिकामाऽसितंवृणी
ष्वसुशोभने ॥ सासमीक्ष्यतुतान्सर्वांस्तुल्यरूपधरान्स्थितान् २० निश्चित्यमनसाबुद्ध्यादेवीवव्रेस्वकंपतिम् ॥ लब्ध्वातुच्यवनोभार्यांवयोरूपंचवांछितम्
२१ हृष्टोऽब्रवीन्महातेजास्तौनासत्याविदंवचः ॥ यथाऽहंरूपसंपन्नोवयसाचसमन्वितः २२ कृतोभवद्भ्यांवृद्धःसन्भार्यांचप्राप्तवानिमाम् ॥ तस्माद्युवां
करिष्यामिप्रीत्याऽहंसोमपीथिनौ ॥ मिषतोदेवराजस्यसत्यमेतद्ब्रवीमिवाम् २३

सेहस्यर्थः ५ । ६ । ७ । ८ । ९ । १० ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ 'अश्विनौवैदेवानामसोमपावास्तामिति'
श्रुतंतस्यैवदुपबृंहणंतस्माद्युवामिति युवयोरसोमपत्वं मिषतःपश्यतः दूरीकरिष्यामीत्यर्थः २३

२४ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेत्रयोविंशाधिकशततमोऽध्यायः ॥ १२३ ॥ ततइति वयस्थंयुवानं 'युवच्यवानमश्विनाजरंतंपुनर्युवानंचरथायचक्रथुः' इतिमंत्रलिंगात्

तच्छ्रुत्वाहृष्टमनसौदिवंतौप्रतिजग्मतुः ॥ च्यवनश्चसुकन्याचसुराविवविजह्रतुः २४ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थ
यात्रायांसौकन्येत्रयोविंशाधिकशततमोऽध्यायः ॥ १२३ ॥ ॥ लोमशउवाच ॥ ततःशुश्रावशर्यातिर्वयस्थंच्यवनंकृतम् ॥ सुहृष्टःसेनयासार्धमुपाया
द्भार्गवाश्रमम् १ च्यवनंचसुकन्यांचदृष्ट्वादेवसुताविव ॥ रेमेसभार्यःशर्यातिःकृत्स्नांप्राप्यमहीमिव २ ऋषिणासत्कृतस्तेनसभार्यःपृथिवीपतिः ॥ उपोपविष्टः
कल्याणीःकथाश्चक्रेमनोरमाः ३ अथैनंभार्गवोराजन्नुवाचपरिसांत्वयन् ॥ याजयिष्यामिराजंस्त्वांसंभारानवकल्पय ४ ततःपरमसंहृष्टःशर्यातिरवनीपतिः ॥
च्यवनस्यमहाराजतद्वाक्यंप्रत्यपूजयत् ५ प्रशस्तेऽहनियज्ञीयेसर्वकामसमृद्धिमत् ॥ कारयामासशर्यातिर्यज्ञायतनमुत्तमम् ६ तत्रैनंच्यवनोराजन्याजयामास
भार्गवः ॥ अद्भुतानिचतत्रासन्यानितानिनिबोधमे ७ अगृह्णाच्च्यवनःसोममश्विनोर्देवयोस्तदा ॥ तमिंद्रोवारयामासगृह्णानंसतयोर्ग्रहम् ८ ॥ इंद्रउवाच ॥
उभावेतौनसोमार्हौनासत्यावितिमेमतिः ॥ भिषजौदिविदेवानांकर्मणातेननार्हतः ९ ॥ च्यवनउवाच ॥ महोत्साहौमहात्मानौरूपद्रविणवत्तरौ ॥ यौचक्रतु
र्मांमघवन्वृंदारकमिवाजरम् १० ऋतेत्वांविबुधांश्चान्यान्कथंवैनार्हतःसवम् ॥ अश्विनावपिदेवेंद्रदेवौविद्धिपुरंदर ११ ॥ इंद्रउवाच ॥ चिकित्सकौकर्मकरौ
कामरूपसमन्वितौ ॥ लोकेचरंतौमर्त्यानांकथंसोममिहार्हतः १२ ॥ लोमशउवाच ॥ एतदेवयदावाक्यमाम्रेडयतिदेवराट् ॥ अनादृत्यततःशक्रंग्रहंजग्राहभा
र्गवः १४ ग्रहीष्यंतंतुतंसोममश्विनोरुत्तमंतदा ॥ समीक्ष्यबलभिद्देवइदंवचनमब्रवीत् १४ आभ्यामर्थायसोमंत्वंग्रहीष्यसियदिस्वयम् ॥ वज्रंतेप्रहरिष्यामिघो
ररूपमनुत्तमम् १५ एवमुक्तःस्मयन्निंद्रमभिवीक्ष्यसभार्गवः ॥ जग्राहविधिवत्सोममश्विभ्यामुत्तमंग्रहम् १६ ततोऽस्मैप्राहरद्वज्रंघोररूपंशचीपतिः ॥ तस्य
प्रहरतोबाहुंस्तंभयामासभार्गवः १७ तंस्तंभयित्वाच्यवनोजुहुवेमंत्रतोऽनलम् ॥ कृत्यार्थीसुमहातेजादेवंहिंसितुमुद्यतः १८ ततःकृत्याऽथसंजज्ञेमुनेस्तस्य
तपोबलात्॥मदोनाममहावीर्योबृहत्कायोमहासुरः१९शरीरंयस्यनिर्देष्टुमशक्यंतुसुरासुरैः॥तस्यास्यमभवद्घोरंतीक्ष्णाग्रदशनंमहत्२० हनुरेकास्थितात्वस्यभूमा
वेकादिवंगता ॥ चतस्रश्चायतादंष्ट्रायोजनानांशतंशतम् २१ इतरेतस्यदशनाबभूवुर्दशयोजनाः ॥ प्रासादशिखराकाराःशूलाग्रसमदर्शनाः २२ बाहूपर्व
तसंकाशावायतावयुतंसमौ ॥ नेत्रेरविशशिप्रख्येवक्त्रंकालाग्निसंनिभम् २३ लेलिहन्जिह्वयावक्त्रंविद्युच्चपललोलया॥व्यात्ताननोघोरदृष्टिर्ग्रसन्निवजगद्बलात् २४

च्यवानंच्यवनंचरथाय चर्याचरणार्थं १ । २ । ३ संभारान् यज्ञोपकरणानि ४ । ५ । ६ । ७ ग्रहंसोमस्यग्रहणंतयोरर्थे ८ । ९ । १० सवंसोमं ११ । १२ आम्रेडयतिपुनःपुनरावर्तयति
१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४

२९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेचतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥ ॥ छ ॥ तंदृष्ट्वेति १ सृक्किणीगल्लगर्भौ २ । ३ । ४ । ५ । ६ । ७ मदंचेति सुरा
पानस्त्रीद्यूतमृगयाव्यसनानि मदकरत्वात्त्याज्यानीतिभावः ८।९।१०।११।१२।१३ संधिर्द्वयोरिति संप्रति कलिद्वापरसंधावप्यत्रतीर्थे त्रेताद्वापरसंधितुल्यः कालोऽस्तिअत्रस्नातानांकलिस्प
र्शोनास्तीतिभावः १४।१५ सदास्रोतःसदाप्रवाहयुक्तं १६ पावकाइवदीप्यमानाः पावकाः १७ त्रीणिशृंगाणीति प्रागण्यारण्यात्तरीस्यात्रिकोणं वाराणसीक्षेत्रंत्रीणिप्रस्रवणानीतिचप्रयागं । प्

सभक्षयिष्यन्संक्रुद्धःशतक्रतुमुपाद्रवत् ॥ महताघोररूपेणलोकान्शब्देननादयन् २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रा
यांसौकन्येचतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥ ॥ लोमशउवाच ॥ तंदृष्ट्वाघोरवदनंमदंदेवःशतक्रतुः ॥ आयांतंभक्षयिष्यंतंव्यात्ताननमिवांतकम् १
भयात्संस्तंभितभुजःसृक्किणीलेलिहन्मुहुः ॥ ततोऽब्रवीद्देवराजश्च्यवनंभयपीडितः २ सोमार्हावश्विनावेतावद्यप्रभृतिभार्गव ॥ भविष्यतःसत्यमेतद्वचोविप्रप्रसीदमे
३ नतेमिथ्यासमारंभोभवत्वेषपरोविधिः ॥ जानामिचाहंविप्रर्षेनमिथ्यात्वंकरिष्यसि ४ सोमार्हावश्विनावेतौयथावाऽद्यकृतौत्वया ॥ भूयएवतुतेवीर्यंप्रकाशे
दितिभार्गव ५ सुकन्यायाःपितुश्चास्यलोकेकीर्तिःप्रथेदिति ॥ अतोमयैतद्विहितंतववीर्यप्रकाशनम् ६ तस्मात्प्रसादंकुरुमेभवत्वेवंयथेच्छसि ॥ एवमुक्तस्य
शक्रेणभार्गवस्यमहात्मनः ७ समन्युर्व्यगमच्छीघ्रंमुमोचचपुरंदरम् ॥ मदंचव्यभजद्राजन्पानेस्त्रीषुचवीर्यवान् ८ अक्षेषुमृगयायांचपूर्वसृष्टंपुनःपुनः ॥ तदा
मदंविनिक्षिप्यशक्रंसंतर्प्यचेंदुना ९ अश्विभ्यांसहितान्देवान्याजयित्वाचतंनृपम् ॥ विख्याप्यवीर्यंलोकेषुसर्वेषुवदतांवरः १० सुकन्ययासहारण्येविजहारानु
कूलया ॥ तस्यैतद्द्विजसंघुष्टंसरोराजन्प्रकाशते ११ अत्रत्वंसहसोदर्यैःपितॄन्देवांश्चतर्पय ॥ एतद्दृष्ट्वामहीपालसिकताक्षंचभारत १२ सैंधवारण्यमासाद्यकु
ल्यानांकुरुदर्शनम् ॥ पुष्करेषुमहाराजसर्वेषुचजलंस्पृश १३ स्थाणोर्मंत्राणिचजपन्सिद्धिंप्राप्स्यसिभारत ॥ संधिर्द्वयोर्नरश्रेष्ठत्रेतायाद्वापरस्यच १४
अयंहिदृश्यतेपार्थसर्वपापप्रणाशनः ॥ अत्रोपस्पृशचैवत्वंसर्वपापप्रणाशने १५ आर्चीकपर्वतश्चैवनिवासोवैमनीषिणाम् ॥ सदाफलःसदास्रोतोमरुतांस्था
नमुत्तमम् १६ चैत्याश्चैतेबहुविधास्त्रिदशानांयुधिष्ठिर ॥ एतच्चंद्रमसस्तीर्थमृषयःपर्युपासते ॥ वैखानसावालखिल्याःपावकावायुभोजनाः १७ शृंगाणित्रीणि
पुण्यानित्रीणिप्रस्रवणानिच ॥ सर्वाण्यनुपरिक्रम्ययथाकाममुपस्पृश १८ शन्तनुश्चात्रराजेंद्रशुनकश्चनराधिपः ॥ नरनारायणौचोभौस्थानंप्राप्ताःसनात
नम् १९ इहनित्यशयादेवाःपितरश्चमहर्षिभिः ॥ आर्चीकपर्वतेतेपुस्तान्यजस्वयुधिष्ठिर २०

तानिसर्वाण्यनुपरिक्रम्यप्रदक्षिणीकृत्ययथाकाममभिहस्ताहि । यथाकाममित्यस्यकाशीप्रयागसेविनां चंद्रतीर्थसेवनमैच्छिकमितरेषामत्यावश्यकमिति भावः । गौडास्तुत्रीणिशृंगाणिशुभ्रा
णित्रीणिप्रस्रवणानिच ॥ पुष्कराण्यादिसिद्धानिनविद्यस्तत्रकारणमितिश्लोकमत्रापिपठंति सचप्रागेवव्याख्यातः । अत्रपाठस्तुकाश्यादिस्तुत्या पूर्वोक्तार्थस्यदृढीकारार्थः १८ । १९
नित्यशयानित्यंशयानाः सन्निहिताइत्यर्थः तेपुस्तपश्चक्रुः २०

२१ । २२ । २३ । २४ । २५ साहदेविःसृंजयपुत्रस्यपुत्रः २६ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे पंचविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥ ॥ छ ॥

इहतेवैचरून्प्राश्नन्नृषयश्चविशांपते ॥ यमुनाचाक्षयस्रोताकृष्णश्चेहतपोरतः २१ यमौचभीमसेनश्चकृष्णाचामित्रकर्शन ॥ सर्वेचात्रगमिष्यामस्त्वयैवसह
पांडव २२ एतत्प्रस्रवणंपुण्यमिंद्रस्यमनुजेश्वर ॥ यत्रधाताविधाताचवरुणश्चोर्ध्वमागताः २३ इहतेऽप्यवसन्राजन्क्षांताःपरमधर्मिणः ॥ मैत्राणामृजुबुद्धी
नामयंगिरिवरःशुभः २४ एषासायमुनाराजन्महर्षिगणसेविता ॥ नानायज्ञचिताराजन्पुण्यापापभयापहा २५ अत्रराजामहेष्वासोमांधाताऽयजतस्वयम् ॥
साहदेविश्चकौंतेयसोमकोददतांवरः २६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांसौकन्येपंचविंशत्यधिकशततमोऽध्यायः
॥ १२५ ॥ ॥ युधिष्ठिरउवाच ॥ मांधाताराजशार्दूलस्त्रिषुलोकेषुविश्रुतः ॥ कथंजातोमहाब्रह्मन्यौवनाश्वोनृपोत्तमः १ कथंचैनांपरांकाष्ठांप्राप्तवानमि
तद्युतिः ॥ यस्यलोकास्त्रयोवश्याविष्णोरिवमहात्मनः २ एतदिच्छाम्यहंश्रोतुंचरितंतस्यधीमतः ॥ यथामांधातृशब्दश्चतस्यशक्रसमद्युतेः ॥ जन्मचाप्रति
वीर्यस्यकुशलोह्यसिभाषितुम् ३ ॥ लोमशउवाच ॥ शृणुष्वावहितोराजन्राज्ञस्तस्यमहात्मनः ॥ यथामांधातृशब्दोवैलोकेषुपरिगीयते ४ इक्ष्वाकुवंशप्रभवो
युवनाश्वोमहीपतिः ॥ सोऽयजत्पृथिवीपालःक्रतुभिर्भूरिदक्षिणैः ५ अश्वमेधसहस्रंचप्राप्यधर्मभृतांवरः ॥ अन्यैश्चक्रतुभिर्मुख्यैरयजत्स्वाप्तदक्षिणैः ६ अनप
त्यस्तुराजर्षिःसमहात्मामहाव्रतः ॥ मंत्रिष्वाधायतद्राज्यंवननित्योबभूवह ७ शास्त्रदृष्टेनविधिनासंयोज्यात्मानमात्मवान् ॥ सकदाचिन्नृपोराजन्नुपवासेनदुःखि
तः ८ पिपासाशुष्कहृदयःप्रविवेशाश्रमंभृगोः ॥ तामेवरात्रिंराजेंद्रमहात्माभृगुनंदनः ९ इष्टिंचकारसौद्युम्नेर्महर्षिःपुत्रकारणात् ॥ संभृतोमंत्रपूतेनवारिणाकल
शोमहान् १० तत्रातिष्ठतराजेंद्रपूर्वमेवसमाहितः ॥ यत्प्राश्यप्रसवेत्तस्यपत्नीशक्रसमंसुतम् ११ तंन्यस्यवेद्यांकलशंसुषुपुस्तेमहर्षयः ॥ रात्रिजागरणाच्छ्रां
तान्सौद्युम्निःसमतीत्यतान् १२ शुष्ककंठःपिपासार्तःपानीयार्थीभृशंनृपः ॥ तंप्रविश्याश्रमंश्रांतःपानीयंसोऽभ्ययाचत १३ तस्यश्रांतस्यशुष्केणकंठेनक्रोश
तस्तदा ॥ नाश्रौषीत्कश्चनतदाशकुनेरिववाशतः १४ ततस्तंकलशंदृष्ट्वाजलपूर्णंसपार्थिवः ॥ अभ्यद्रवतवेगेनपीत्वाचांभोव्यवासृजत् १५ सपीत्वाशीतलं
तोयंपिपासार्तोमहीपतिः ॥ निर्वाणमगमद्धीमान्सुसुखीचाभवत्तदा १६ ततस्तेप्रत्यबुध्यंतमुनयःसतपोधनाः ॥ निस्तोयंतंचकलशंददृशुःसर्वएवते १७
३५ कस्यकर्मेदमितितेपर्यपृच्छन्समागताः ॥ युवनाश्वोममेत्येवंसत्यंसमभिपद्यत १८ नयुक्तमितितंप्राहभगवान्भार्गवस्तदा ॥ सुतार्थंस्थापिताह्यापस्तपसा
चैवसंभृताः १९ मयाह्यत्राहितंब्रह्मतपआस्थायदारुणम् ॥ पुत्रार्थंतवराजर्षेमहाबलपराक्रम २०

यौवनाश्वोयुवनाश्वपुत्रः १ परांकाष्ठां स्वर्गेष्वेवश्रेष्ठंस्थानम् २ । ३ । ४ । ५ । ६ । ७ आत्मानंचित्तंआत्मवान्जितचित्तः संयोज्येष्टदेवतयाऐक्यंनीत्वा ८ । ९
सौद्युम्नेः युवनाश्वस्य १० । ११ । १२ । १३ वाशतः शब्दंकुर्वतः १४ । १५ निर्वाणं तपःफलम् १६ । १७ । १८ । १९ । २०

२१ । २२ । २३ । २४ इष्टमिच्छितम् २५ । २६ । २७ । २८ किंधास्यतिपास्यतिस्तन्याभावात् २९ मांधास्यतिमांधाता धातेति लुडंतस्यव्याख्यानंधास्यतीति प्रदेशिनींतर्जनीम् ३० ३१ किष्कून्हस्तान्वितस्तीन्वा । किष्कुर्हस्तेवितस्तौचेत्यमरः ३२ ध्यातमात्रस्यइंद्रेणायमेवंविधो भवत्वितिसंकल्पितस्य ३३ शृंगोद्भवाः स्वर्गजाः । शृंगंप्रभुत्वेशिखरेइत्या

महाबलोमहावीर्यस्तपोबलसमन्वितः ॥ यःशक्रमपिवीर्येणगमयेद्यमसादनम् २१ अनेनविधिनाराजन्मयैतदुपपादितम् ॥ अम्भक्षणंत्वयाराजन्नयुक्तंकृत
मद्यवै २२ नत्वद्यशक्यमस्माभिरेतत्कर्तुमतोऽन्यथा ॥ नूनंदैवकृतंह्येतद्यदेवंकृतवानसि २३ पिपासितेनयाःपीताविधिमंत्रपुरस्कृताः ॥ आपस्त्वयामहारा
जमत्तपोवीर्यसंभृताः २४ ताभ्यस्त्वमात्मनापुत्रमीदृशंजनयिष्यसि ॥ विधास्यामोवयंतत्रतवेष्टिंपरमाद्भुताम् २५ यथाशक्रसमंपुत्रंजनयिष्यसिवीर्यवान् ॥
गर्भधारणजंवाऽपिनखेदंसमवाप्स्यसि २६ ततोवर्षशतेपूर्णेतस्यराज्ञोमहात्मनः ॥ वामंपार्श्वंविनिर्भिद्यसुतःसूर्यइवस्थितः २७ निश्चक्राममहातेजानचतंमृ
त्युराविशत् ॥ युवनाश्वंनरपतिंतदद्भुतमिवाभवत् २८ ततःशक्रोमहातेजास्तंदिदृक्षुरुपागमत् ॥ ततोदेवामहेंद्रंतमपृच्छन्धास्यतीतिकिम् २९ प्रदेशिनीं
ततोऽस्यास्येशक्रःसमभिसंदधे ॥ मामयंधास्यतीत्येवंभाषितेचैववज्रिणा ३० मांधातेतिचनामास्यचक्रुःसेंद्रादिवौकसः ३१ प्रदेशिनींशक्रदत्तामास्वाद्यस
शिशुस्तदा ॥ अवर्धतमहातेजाःकिष्कून्राजंस्त्रयोदश ३२ वेदास्तंसधनुर्वेदादिव्यान्यस्त्राणिचेश्वरम् ॥ उपतस्थुर्महाराजध्यातमात्रस्यसर्वशः ३३ आज
गवंनामधनुःशराःशृंगोद्भवाश्चये ॥ अभेद्यंकवचंचैवसद्यस्तमुपशिश्रियुः ३४ सोभिषिक्तोमघवतास्वयंशक्रेणभारत ॥ धर्मेणव्यजयल्लोकांस्त्रीन्विष्णुरिवविक्र
मैः ३५ तस्याप्रतिहतंचक्रंप्रावर्ततमहात्मनः ॥ रत्नानिचैवराजर्षिंस्वयमेवोपतस्थिरे ३६ तस्येयंवसुसंपूर्णावसुधावसुधाधिप ॥ तेनेष्टंविविधैर्यज्ञैर्बहुभिः
स्वाप्तदक्षिणैः ३७ चितचैत्योमहातेजाधर्मान्प्राप्यचपुष्कलान् ॥ शक्रस्यार्धासनंराजँल्लब्धवानमितद्युतिः ३८ एकाह्नात्पृथिवीतेनधर्मनित्येनधीमता ॥ वि
जिताशासनादेवसरत्नाकरपत्तना ३९ तस्यचैत्यैर्महाराजक्रतूनांदक्षिणावताम् ॥ चतुरंतामहीव्याप्तानासीत्किंचिदनावृतम् ४० तेनपद्मसहस्राणिगवांदशम
हात्मना ॥ ब्राह्मणानांमहाराजदत्तानीतिप्रचक्षते ४१ तेनद्वादशवार्षिक्यामनावृष्ट्यांमहात्मना ॥ वृष्टंसस्यविवृद्ध्यर्थंमिषतोवज्रपाणिनः ४२ तेनसोमकुलोत्पन्नो
गांधाराधिपतिर्महान् ॥ गर्जन्निवमहामेघःप्रमथ्यनिहतःशरैः ४३ प्रजाश्चतुर्विधास्तेनत्राताराजन्कृतात्मना ॥ तेनात्मतपसालोकास्तापिताश्चातितेजसा ४४ तस्यैत
द्देवयजनंस्थानमादित्यवर्चसः ॥ यस्यपुण्यतमेदेशेकुरुक्षेत्रस्यमध्यतः ४५ एतत्तेसर्वमाख्यातंमांधातुश्चरितंमहत् ॥ जन्मचाग्र्यंमहीपालयन्मांत्वंपरिपृच्छसि ४६

दिः स्वर्गभीनविषयोरितिविश्वः दिव्याइत्यर्थः ३४ । ३५ चक्रमाज्ञा ३६ । ३७ चितचैत्यःकृतचयनक्रतुः ३८ । ३९ । ४० पद्मंशतकोटयस्तेषामपिसहस्राणिदश ४१
४२ । ४३ चतुर्विधाः सुरनरतिर्यक्स्थावराः ४४ । ४५ । ४६

४७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेषड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥ ॥ ७ ॥ कथमिति १ । २ । ३ । ४ । ५ स्फिचिकट्याम् ६ । ७ अमात्यपर्षदोमध्येमं
त्रिसमांतः ८ क्षत्ता द्वारिकः ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ जंतुनापशुभूतेन । सत्वरुर्णराजानमुपससारपुत्रोमेजायतांतेनत्वायजा इतीतिपुत्रस्यापिपशुक
॥ वैशंपायनउवाच ॥ एवमुक्तःसकौंतेयोलोमशेनमहर्षिणा ॥ पप्रच्छानंतरंभूयःसोमकंप्रतिभारत ४७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थया
त्रापर्वणिलोमशतीर्थयात्रायांमांधात्रुपाख्यानेषड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥ ॥ युधिष्ठिरउवाच ॥ कथंवीर्यःसराजाभूत्सोमकोवदतांवर ॥
कर्माण्यस्यप्रभावंचश्रोतुमिच्छामितत्त्वतः १ ॥ लोमशउवाच ॥ युधिष्ठिरासीन्नृपतिःसोमकोनामधार्मिकः ॥ तस्यभार्याशतंराजन्सदृशीनामभूत्तदा २ स
वैयत्नेनमहतातासुपुत्रंमहीपतिः ॥ कंचिन्नासादयामासकालेनमहताह्यपि ३ कदाचित्तस्यवृद्धस्यघटमानस्ययत्नतः ॥ जंतुर्नामसुतस्तस्मिन्स्त्रीशतेसमजा
यत ४ तंजातंमातरःसर्वाःपरिवार्यसमासते ॥ सततंपृष्ठतःकृत्वाकामभोगान्विशांपते ५ ततःपिपीलिकाजंतुंकदाचिददशत्स्फिचि ॥ सदष्टोव्यनदन्नादंतेन
दुःखेनबालकः ६ ततस्तामातरःसर्वाःप्राक्रोशन्भृशदुःखिताः ॥ परिवार्यजंतुंसहसासशब्दस्तुमुलोऽभवत् ७ तमार्तनादंसहसाशुश्रावसमहीपतिः ॥ अमात्यप
र्षदोमध्येउपविष्टःसहर्त्विजा ८ ततःप्रस्थापयामासकिमेतदितिपार्थिवः ॥ तस्मैक्षत्तायथावृत्तमाचचक्षेसुतंप्रति ९ त्वरमाणःसचोत्थायसोमकःसहमंत्रिभिः ॥ प्र
विश्यांतःपुरंपुत्रमाश्वासयदरिंदमः १० सांत्वयित्वातुतंपुत्रंनिष्क्रम्यांतःपुरान्नृपः ॥ ऋत्विजासहितोराजन्सहामात्यउपाविशत् ११ ॥ सोमकउवाच ॥ धि
गस्त्विहैकपुत्रत्वमपुत्रत्वंवरंभवेत् ॥ नित्यातुरत्वाद्भूतानांशोकएवैकपुत्रता १२ इदंभार्याशतंब्रह्मन्परीक्ष्यसदृशंप्रभो ॥ पुत्रार्थिनामयावोढंनतासांविद्यतेप्रजा
१३ एकःकथंचिदुत्पन्नःपुत्रोजंतुरयंमम ॥ यतमानासुसर्वासुकिंनुदुःखमतःपरम् १४ वयश्चसमतीतंमेसभार्यस्यद्विजोत्तम ॥ आसांप्राणाःसमायत्तामममचात्रै
कपुत्रके १५ स्यात्तुकर्मतथायुक्तंयेनपुत्रशतंभवेत् ॥ महतालघुनावाऽपिकर्मणादुष्करेणवा १६ ॥ ऋत्विगुवाच ॥ अस्तिचैतादृशंकर्मयेनपुत्रशतंभवेत् ॥ य
दिशक्नोषितत्कर्तुमथवक्ष्यामिसोमक १७ ॥ सोमकउवाच ॥ कार्यंवायदिवाऽकार्यंयेनपुत्रशतंभवेत् ॥ कृतमेवेतितद्विद्धिभगवान्प्रब्रवीतुमे १८ ॥ ऋत्विगुवा
च ॥ यजस्वजंतुनाराजंस्त्वंमयाविततेक्रतौ ॥ ततःपुत्रशतंश्रीमद्भविष्यत्यचिरेणते १९ वपायांहूयमानायांधूममाघ्रायमातरः ॥ ततस्ताःसुमहावीर्यान्जन
यिष्यंतितेसुतान् २० तस्यामेवतुतेजंतुर्भवितापुनरात्मजः ॥ उत्तरेचास्यसौवर्णंलक्ष्मपार्श्वेभविष्यति २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिलोमशती
र्थयात्रायांजंतूपाख्यानेसप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥ ॥ ७ ॥ ॥ सोमकउवाच ॥ ब्रह्मन्यद्यद्यथाकार्यंतत्कुरुष्वतथातथा ॥
पुत्रकामतयासर्वंकरिष्यामिवचस्तव १ ॥ लोमशउवाच ॥ ततःसयाजयामाससोमकंतेनजंतुना ॥ मातरस्तुबलात्पुत्रमपाकर्षुःकृपान्विताः २
रणंबद्ध्वब्राह्मणे परामृष्टंततोनशास्त्रविरोधः १९ । २० । २१ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेसप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥ ॥ ७ ॥ ब्रह्मन्निति १ । २

दाशरथः क्रोशंत्यः ३ । ४ वपां देहांतर्गतमपूपाकारं मांसं ५ । ६ । ७ । ८ लक्षणं चिन्हं ९ सोमकस्य ऋत्विगिति शेषः १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ क्षांतः क्षमावान् उष्य उषित्वा २० अभिचारपापं कुमार्गोपदेष्टृषु याजकेष्वेव याज्यस्य निपातस्तु गुरोः करुणाप्रयुक्तः स्वयं कृतोऽनतुल्याय्य इत्यध्यायतात्पर्यम् २१ ॥ इत्यारण्यके पर्वणि नैलकंठीये भार

हाहताः स्मेति वाशंत्यस्तीव्रशोकसमाहताः ॥ रुदंत्यः करुणं चापि गृहीत्वा दक्षिणे करे २ सव्ये पाणौ गृहीत्वा तु याजकोऽपि स्म कर्षति ॥ कुररीणामिवार्तानां समाकृष्य तु तं सुतम् ४ विशस्य चैनं विधिवद्वपामस्य जुहाव सः ॥ वपायां हूयमानायां गंधमाघ्राय मातरः ५ आर्ता निपेतुः सहसा पृथिव्यां कुरुनंदन ॥ सर्वाश्च गर्भानलभं स्ततस्ताः परमांगनाः ६ ततो दशसु मासेषु सोमकस्य विशांपते ॥ जज्ञे पुत्रशतं पूर्णं तासु सर्वासु भारत ७ जंतुर्ज्येष्ठः समभवज्जनित्र्यामेव पार्थिव ॥ स तासामिष्ट एवासीन्न तथा ते निजाः सुताः ८ तच्च लक्षणमस्यासीत्सौवर्णं पार्श्व उत्तरे ॥ तस्मिन्पुत्रशते चाग्र्यः स बभूव गुणैरपि ९ ततः स लोकमगमत्सोमकस्य गुरुः परम् ॥ अथ काले व्यतीते तु सोमकोऽप्यगमत्परम् १० अथ तं नरके घोरे पच्यमानं ददर्श सः ॥ तमपृच्छत्किमर्थं त्वं नरके पच्यसे द्विज ११ तमब्रवीद्गुरुः सोऽथ पच्यमानोऽग्निना भृशम् ॥ त्वं मया याजितो राजंस्तस्येदं कर्मणः फलम् १२ एतच्छ्रुत्वा स राजर्षिर्धर्मराजानमब्रवीत् ॥ अहमत्र प्रवेक्ष्यामि मुच्यतां मम याजकः १३ मत्कृते हि महाभागः पच्यते नरकाग्निना ॥ धर्म उवाच ॥ नान्यः कर्तुः फलं राजन्नुपभुंक्ते कदाचन ॥ इमानि तव दृश्यंते फलानि वदतां वर १४ ॥ सोमक उवाच ॥ पुण्यान्न कामये लोकान्ऋतेऽहं ब्रह्मवादिनम् ॥ इच्छाम्यहमनेनैव सह वस्तुं सुरालये १५ नरके वा धर्मराज कर्मणाऽस्य समो ह्यहम् ॥ पुण्यापुण्यफलं देव सममस्त्वावयोरिदम् १६ ॥ धर्मराज उवाच ॥ यद्येवमीप्सितं राजन्भुंक्ष्वास्य सहितः फलम् ॥ तुल्यकालं सहानेन पश्चात्प्राप्स्यसि सद्गतिम् १७ ॥ लोमश उवाच ॥ स चकार तथा सर्वं राजा राजीवलोचनः ॥ क्षीणपापश्च तस्मात्स विमुक्तो गुरुणा सह १८ लेभे कामाञ्शुभान्राजन्कर्मणा निर्जितान्स्वयम् ॥ सह तेनैव विप्रेण गुरुणा स गुरुप्रियः १९ एष तस्याश्रमः पुण्यो य एषोऽग्रे विराजते ॥ क्षांत उष्यात्र षड्रात्रं प्राप्नोति सुगतिं नरः २० एतस्मिन्नपि राजेंद्र वत्स्यामो विगतज्वराः ॥ षड्रात्रं नियतात्मानः सज्जीभव कुरूद्वह २१ ॥ ॥ इति श्रीमहाभारते आरण्यके पर्वणि तीर्थयात्रापर्वणि लोमशतीर्थयात्रायां जंतूपाख्याने अष्टाविंशाधिकशततमोऽध्यायः ॥ १२८ ॥
॥ लोमश उवाच ॥ ॥ अस्मिन्किल स्वयं राजन्निष्टवान्वै प्रजापतिः ॥ सत्रमिष्टीकृतं नाम पुरा वर्षसहस्रिकम् १ अंबरीषश्च नाभाग इष्टवान्यमुनामनु ॥ यत्रेष्ट्वा दशपद्मानि सदस्येभ्यो निसृष्टवान् २ यज्ञैश्च तपसा चैव परां सिद्धिमवाप सः ॥ देशश्च नाहुषस्यायं यज्वनः पुण्यकर्मणः ३ सार्वभौमस्य कौंतेय ययातेरमितौजसः ॥ स्पर्धमानस्य शक्रेण तस्येदं यज्ञवास्त्विह ४

तभावदीपे अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥ ॥ ७ ॥ अस्मिन्निति १ दशपद्मानि गवामिति शेषः तस्य द्वादशशतं दक्षिणा इति याज्ञीयदक्षिणादौ सर्वस्व गोवदस्यैवाध्य हारदर्शनात् अभिसृष्टवान्दत्तवान् २ । ३ यज्ञवास्तु यज्ञभूमिः इह अस्मिन्वास्तुनि इदमुत्तरान्वयि ४

अग्निभिरग्निस्थापनार्थैरिष्टकारचितैः स्थंडिलैः ५ शमी आमिक्षार्थं दध्युत्पादनार्थमानीता शमीशाखा एकपत्रा शातितपत्रा अंतर्वेदि शाखायाः पलाशान्यसर्वाणि प्रशास्य मूलतः शाखापरिवास्योपवेषं करोतीति सूत्रात् यापूर्वमेकपत्रशाखाऽभूत्सैषा उपवेषरूपेणावशिष्टा दृश्यते अग्रभागस्य बह्वग्रत्वात्परिवास्य च्छित्वा सरकं सुराग्रहपात्रं । सरकोऽस्त्री सीधुपात्रे इति मेदिनी ६ प्रसर्पणं संचारभूमिः रौप्यायां रूप्यवत् श्वेतवर्णायां स्थल्यां नद्यां वा सामीप्ये सप्तमी प्रसर्पणं तीर्थमित्यन्ये ७ अनुवंशं परंपरागतमाख्यानश्लोकं उलूखलैरिति उलूखलसदृशा निर्ह्रीर्णा कर्णाभरणानि भवंतीति स्वयमुलूखलैरेवाभरणैर्युक्तासतीति शेषः एतेन विकृतवेषत्वं पिशाच्याः ८ उक्तं भाषणमेवाह द्वाभ्यां युगंधर इति अत्र प्राञ्चः अस्मिंस्तीर्थे सपुत्रा ब्राह्मणी स्नातुमागता तां प्रति पिशाची वदति त्वया युगंधरे पर्वते देशे वा दधिप्राशनं कृतं तत्रोष्ट्रीक्षीरं गर्दभ्यादिक्षीरं च दधि क्रियते । तथा अच्युतस्थलाख्ये संकरजानां ग्रामे वासश्च कृतः । तथा भूतिलयाख्ये दस्युग्रामेऽग्निदग्धानां मृतानां क्षेपणं यस्यां नद्यां क्रियते तस्यां स्नाताऽसि अतो दोषत्रयवती त्वं एतत्करणे हि प्रायश्चित्तं धर्मशास्त्रे प्रसिद्धं । औष्ट्रमैकशफं क्षीरं सुरातुल्यमिति । संसृज्य संकरैः सार्धं प्राजापत्यं व्रतं चरेदिति । प्रोष्य भूतिलये विप्रः प्राजापत्यं व्रतं चरेदिति च तच्च त्वया न कृतमतः कथमत्र वस्तुमिच्छसि दोषवतामिह तीर्थे वासो दुर्लभ इत्यर्थः । एवं पिशाचीवाक्यं श्रुत्वाऽपि सा ब्राह्मणी तत्र स्नानादिकं कृतवती ततस्तया राक्षस्या तस्या घटपिठरादिकं नाशितं उक्तं च । एतत्तव दिवा वृत्तं रात्रौ वृत्तं तु द्रक्ष्यसीति वृत्तं जातं रात्रौ तु तव पुत्रमपि नाशयिष्यामीति भावः । अथापि द्वितीयां रात्रिं वस्तुमिच्छसि चेत्तव भूयांसमपकारं करिष्यामीति युगंधरादिदेशत्रयनिंदापरत्वेन व्याचख्युः । अर्वाञ्चस्तु युगंधरादौ दधिप्राशनादिकं त्रयमधिकारकारणं कृत्वा एकरात्रमिह यदि वस्तु

पश्य नानाविधाकारैरग्निभिर्निचितां महीम् ॥ मज्जंतीमिव चाक्रांतां ययातेर्यज्ञकर्मभिः ५ एषा शम्येकपत्रा या सरकं चैतदुत्तमम् ॥ पश्य रामहृदानेतान्पश्य नारायणाश्रमम् ६ एतच्चर्चीकपुत्रस्य योगैर्विचरतो महीम् ॥ प्रसर्पणं महीपाल रौप्यायाममितौजसः ७ अत्रानुवंशं पठतः शृणु मे कुरुनंदन ॥ उलूखलैराभरणैः पिशाची यदभाषत ८ युगंधरे दधि प्राश्य उषित्वा चाच्युतस्थले ॥ तद्वद्भूतलये स्नात्वा सपुत्रा वस्तुमर्हसि ९

मिच्छसि चेद्वस । अत्र पिशाचीवचनव्याजेनैकरात्रवासो नियम्यते यदि तु द्वितीयं दिवारात्रं वत्स्यसि तर्हि एतत्तव दिवाकाले वृत्तं भविष्यति एतदिति वस्त्रपात्राहारताडनादिकमभिनीय दर्शयति । रात्रौ त्वतोऽन्यथा प्राणापहारांतमित्यर्थ इति । ब्रह्मज्ञानिवंशावतंसलक्ष्मणानुचरास्तु द्वारमेतत्कुरुक्षेत्रस्येत्युपसंहारादस्य क्षेत्रस्य द्विविधकुरुक्षेत्रप्रापकत्वमत्रगतं कुरुक्षेत्रद्वयं च । एकं शतपथे प्रवर्ग्यकांडे तेषां कुरुक्षेत्रं देवयजनमास तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनमिति कर्मांगं कुरुदेशांतर्गतं प्रसिद्धम् । अपरं च अविमुक्तं वै कुरुक्षेत्रमित्यादिना ज्ञानांगमविमुक्ताख्यं जाबालरामतापनीयोपनिषदोः प्रसिद्धम् । ततश्चास्य क्षेत्रस्य क्रममुक्तौ सद्योमुक्तौ परंपरया हेतुत्वादत्र वासे देवा विघ्नमाचरंति । मुक्तो हि देवपशुत्वान्निवर्तत इति । तथा बृहदारण्यके आत्मेत्येवोपासीतेत्यैकात्म्यं ज्ञेयमित्युक्त्वाऽथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति भेददर्शिनो देवपशुत्वमुक्त्वा तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युरित्यैकात्म्यज्ञानं देवानामप्रियं पशुनाश इव पशुपतेरित्युक्तम् । ज्ञातैकात्म्यस्य तु देवा अप्रियं कर्तुमसमर्थास्तथा च तत्रैव श्रूयते । तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति देवाश्च न देवा अपि अभूत्यै अनैश्वर्याय एवं सति यदि त्वमिहाऽसि तर्ह्यत्र चिरकालं वस्तुमर्हसीति पिशाची कांचित्सपुत्रां स्त्रियमिह वस्तुमिच्छंतीं प्रति प्रब्रवीति युगंधर इति युगानि कृतत्रेताद्वापरकलिसंज्ञानि धारयतीति युगंधरः स्थूलशरीराभिमानी जीवः तथा हि श्रुतिः । कलिः शयानो भवति संजिहानस्तु द्वापरः ॥ उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्निति । शयानो धर्माचार्यादिमुखादजानन्पुरुषः कलिः । स एव संजिहानस्तं जानन्द्वापरो भवति । उत्तिष्ठन्धर्मानुष्ठानार्थं यतमानस्त्रेता भवति धर्मं चरन्नुत्तिष्ठंस्तु कृतं भवतीति पुंसं एव युगंधरस्तमाह । दधिप्राशनशब्देन धर्मप्रजासंपत्त्ययोर्दार

संयोगउच्यते ॥ तथाहिगृह्यसूत्रे । समंजंतुविश्वेदेवाइतिवदेः प्राश्यप्रतिप्रयच्छेदितिविवाहोते दंपत्योर्हृदयसंधानार्थंदधिप्राशनं विधीयतेतत्रसमापोहृदयानिनौ समंमातरिश्वासंधाता सुदेष्ट्री दधातुनौइतिमंत्रशेषः । मंत्रार्थस्तुविश्वेदेवाः नौआवयोर्हृदयानिवृत्तिबहुत्वात् बहुवचनंसमंजंतुस्निग्धानिकुर्वंतु । संशब्दावृत्त्या समंजंत्विरयस्याप्यावृत्तिर्ज्ञेया । आपोनौहृदयानि समंजंत्वित्यर्थः स्निग्धयोर्हिद्वयोः संधानंभवतीति । मातरिश्वाप्राणवायुर्नौ हृदयानिसंदधातु । एवंधातासंदधातु । उनिश्चितंदेष्ट्रीअंतर्यामिणी देवताचसंदधातु । व्यवहिताश्चेतिछंदसि व्यवहितोपसर्गेणापिक्रियायाः संबंधः । पूर्ववदुपसर्गावृत्त्या क्रियापदस्यावृत्तिरिति । तथाचक्षौमेवसानौ जायापतीसहोमौ चरतांधर्मंप्रजांप्रजनयावहा इतिश्रुतिलिंगाभ्यां धर्मप्रजोत्पादने सहाधिकारात् । जायमानोवैब्राह्मणस्त्रिभिर्ऋणवा जायतेब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यः प्रजयापितृभ्यइतिच श्रुतानामृणानामपाकरणं दारसंयोगंविनानभवतीति दधिप्राशनशब्देनल क्षितलक्षणया आनृण्यंप्राप्यतेनस्वधर्मनिष्ठः प्रजावानेवतीर्थेसेवितुमर्हतीतिपूर्वपदार्थः । अच्युतस्थलेच्युतियोग्यस्थूलशरीरापेक्षया अच्युतंस्थलंलिंगशरीरंतत्र उपित्वानुत्रात्मानमुपास्ये

एकरात्रमुषित्वेहद्वितीयंयदिवत्स्यसि ॥ एतद्वैतेदिवावृत्तंरात्रौवृत्तमितोऽन्यथा १० अद्यचात्रनिवत्स्यामश्वपार्थभरतसत्तम ॥ द्वारमेतत्तुकौंतेयकुरुक्षेत्रस्य
भारत ११ अत्रैवनाहुषोराजाराजन्क्रतुभिरिष्टवान् ॥ ययातिर्बहुरत्नैर्यैर्यत्रेंद्रोमुदमभ्यगात् १२ एतत्प्लक्षावतरणंयमुनातीर्थमुत्तमम् ॥ एतद्वैनाकपृष्ठस्यद्वा
रमाहुर्मनीषिणः १३ अत्रसारस्वतैर्यज्ञैरीजानाःपरमर्षयः ॥ यूपोलूखलिकास्तातगच्छंत्यवभृथप्लवम् १४ अत्रैवभरतोराजाराजन्क्रतुभिरिष्टवान् ॥ हयमे
धेनयज्ञेनमेध्यमश्वमवासृजत् १५ असकृत्कृष्णसारंगंधर्मेणाप्यचमेदिनीम् ॥ अत्रैवपुरुषव्याघ्रमरुत्तःसत्रमुत्तमम् १६ प्रापचैवर्षिमुख्येनसंवर्तेनाभिपालितः॥
अत्रोपस्पृश्यराजेंद्रसर्वाँल्लोकान्प्रपश्यति ॥ पूयतेदुष्कृताच्चैवअत्रापिसमुपस्पृश १७ ॥ ॥ वैशंपायनउवाच ॥ ॥ तत्रसभ्रातृकःस्नात्वास्तूयमानोम
हर्षिभिः ॥ लोमशंपांडवश्रेष्ठइदंवचनमब्रवीत् १८ सर्वाँल्लोकान्प्रपश्यामितपसासत्यविक्रम ॥ इहस्थःपांडवश्रेष्ठंपश्यामिश्वेतवाहनम् १९ ॥ ॥ लोमशउ
वाच ॥ ॥ एवमेतन्महाबाहोपश्यंतिपरमर्षयः ॥ सरस्वतीमिमांपुण्यांपुण्यैकशरणावृताम् २०

स्यर्थः । भूतानिवियदादीनिलीयंतेऽस्मिन्निति कारणंब्रह्मभूतलयः भूतिलयइतिपाठेभूतिरैश्वर्यं तस्यापिचलयोऽस्मिन्निति शुद्धं ब्रह्मतयोरन्यतरत्रस्नात्वा मर्त्यस्यकस्याप्यैयीकतूलमग्नौप्रोतं प्रदूयेतैवंहास्यसर्वेपाप्मानः प्रदूयंतइतितज्ज्ञानफलश्रवणात् । तद्वदितितच्छब्देन पूर्वार्धोक्तेकर्मोपास्तीउच्येते ताभ्यांयुक्तंयथास्यात्तथा भूतलयेस्नानंतेनदेवंदिनसुखेनिर्वृतिः । तत्रापि प्रत्यहंब्रह्मप्राप्तिः श्रूयतेयत्रैतत्पुरुषः स्वपितिनामसतासोम्यतदा संपन्नोभवतीतिसताब्रह्मणा । तथाचकर्मोपास्तिपूर्वकंयो ब्रह्मजानातिसोऽत्रवस्तुमर्हति तस्यपिशाचादिबाधानास्तीत्यर्थः ९ त्वंत्वब्रह्मविदेकरात्रमेवात्रवस्तुंयोग्यायदिद्वितीया वस्तुमिच्छसितर्हिवेतवपुनन्मदीयं वृत्तंभविष्यतिमद्वद्वापिचाचीभूत्वात्रस्नानं नलप्स्यसेपुनरिदितिस्ववृत्तस्यामिनीय प्रदर्शनंद्वितीयदिन वासस्यैवैतत्फलंद्वितीयरात्रिवासे तुइतोऽन्यथाअहल्यादिवन्मोहप्राप्त्या शिलाभावोभविष्यतितेनतीर्थदर्शनमपिनलप्स्यसेइति १० अतोऽत्रक्षपारात्रिमेकवत्स्यामःप्रातरेवप्रस्थास्याम इतिभावः । द्वारमित्यर्थंतुउक्तार्थमस्ति ११ अत्रैवकुरुक्षेत्रद्वारे १२।१३ सारस्वतैर्ब्राह्मगैःक्त्रिग्निर्यज्ञैरीजानाः यूपोलूखलिकाः यूपानुलूखलानिचयज्ञसाधनान्यादद्तेयूपोलूखलिकाः पशुभिः पुरोडाशैश्चइष्टवंतइत्यर्थः १४ । १५ कृष्णसारंगंकृष्णहरिणसदृशं एकदेशेकृष्णवर्णश्यामकर्णमित्यर्थः १६।१७।१८ इहस्थोयमुनातर्गतप्लक्षावतरणस्थः १९ तीर्थांतरमाहसरस्वतीमिति २०

॥१०५॥

२१ । २२ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेएकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥ ॥ इहेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ बध्द्वापाशैरितिशेषः विपाशःपाशहीनः अतएवविपाशानाम ९ । १० औत्तराणामौदीच्यानाम् ११ वर्षंवसतिस्थानम् १२ एषइतियोरामः प्रख्यातःसत्यविक्रमश्चविदेहादुत्तरंचयद्वारं यद्वर्षस्यद्वारमेषोऽनुमूयमा नोवातिकषंडोवातानीतः पद्मादिसमूहोनात्यवर्ततसेनरामेणकृतमितिपूर्वेणान्वयः अनेनवायोरप्यस्मिन्वर्षेप्रवेशोनास्तिकिमुतेतरस्येति पद्मादेर्वातानीतस्यात्राप्रवेशाद्रामसामर्थ्यंप्रत्यक्षमाश्च
यत्रस्नात्वानरश्रेष्ठधूतपाप्माभविष्यसि॥इहसारस्वतैर्यज्ञैरिष्टवंतःसुरर्षयः॥ ऋषयश्चैवकौंतेयतथाराजर्षयोऽपिच२१ वेदीप्रजापतेरेषासमंतात्पंचयोजना ॥ कुरो
र्वैयज्ञशीलस्यक्षेत्रमेतन्महात्मनः २२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामेकोनत्रिंशाधिकशततमोऽध्यायः ॥ १२९ ॥
॥ लोमशउवाच ॥ इहमर्त्यास्तनूस्त्यक्त्वास्वर्गंगच्छंतिभारत ॥ मर्तुकामानराराजन्निहायांतिसहस्रशः १ एवमाशीःप्रयुक्ताहिदक्षेणयजतापुरा ॥ इहयेवै
मरिष्यंतितेवैस्वर्गजितोनराः २ एषासरस्वतीरम्यादिव्याचौघवतीनदी ॥ एतद्विनशनंनामसरस्वत्याविशांपते ३ द्वारंनिषादराष्ट्रस्ययेषांदोषात्सरस्वती॥
प्रविष्टापृथिवींवीरमानिषादाहिमांविदुः ४ एषवैचमसोद्भेदोयत्रदृश्यासरस्वती ॥ यत्रैनामभ्यवर्तंतसर्वाःपुण्याःसमुद्रगाः ५ एतत्सिंधोर्महत्तीर्थंयत्रागस्त्यम
रिंदम ॥ लोपामुद्रासमागम्यभर्तारमवृणीतवै ६ एतत्प्रकाशतेतीर्थंप्रभासंभास्करद्युते ॥ इंद्रस्यदयितंपुण्यंपवित्रंपापनाशनम् ७ एतद्विष्णुपदंनामदृश्यते
तीर्थमुत्तमम् ॥ एषारम्याविपाशाचनदीपरमपावनी ८ अत्रवैपुत्रशोकेनवसिष्ठोभगवानृषिः ॥ बध्द्वात्मानंनिपतितोविपाशःपुनरुत्थितः ९ काश्मीरमंडलंचैत
त्सर्वंपुण्यमरिंदम ॥ महर्षिभिश्चाध्युषितंपश्येदंभ्रातृभिःसह १० यत्रौत्तराणांसर्वेषामृषीणांनाहुषस्यच ॥ अग्नेश्चैवात्रसंवादःकाश्यपस्यचभारत ११ एत
द्द्वारंमहाराजमानसस्यप्रकाशते ॥ वर्षमस्यगिरेर्मध्येरामेणश्रीमताकृतम् १२ एषवातिकषंडोवैप्रख्यातःसत्यविक्रमः ॥ नात्यवर्ततयद्द्वारंविदेहादुत्तरंचयः
१३ इदमाश्चर्यमपरंदेशेऽस्मिन्पुरुषर्षभ ॥ क्षीणेयुगेतुकौंतेयशर्वस्यसहपार्षदैः १४ सहोमयाचभवतिदर्शनंकामरूपिणः ॥ अस्मिन्सरसिसत्रैर्वैचैत्रेमासिपिना
किनम् १५ यजंतेयाजकाःसम्यक्परिवारंशुभार्थिनः ॥ अत्रोपस्पृश्यसरसिश्रद्दधानोजितेंद्रियः १६ क्षीणपापःशुभाँल्लोकान्प्राप्नुतेनात्रसंशयः ॥ एषउज्जा
नकोनामपावकिर्यत्रशांतवान् ॥ अरुंधतीसहायश्चवसिष्ठोभगवानृषिः १७ ह्रदश्चकुशवानेषयत्रपद्मंकुशेशयम् ॥ आश्रमश्चैवरुक्मिण्यायत्राशाम्यदकोपना
१८ समाधीनांसमासस्तुपांडवेयश्रुतस्त्वया ॥ तंद्रक्ष्यसिमहाराजभृगुतुंगंमहागिरिम् १९ वितस्तांपश्यराजेंद्रसर्वपापप्रमोचनीम् ॥ महर्षिभिश्चाध्युषितांशी
ततोयांसुनिर्मलाम् २० जलांचोपजलांचैवयमुनामभितोनदीम् ॥ उशीनरोवैयत्रेष्ट्वावासवादत्यरिच्यत २१ तांदेवसमितिंतस्यवासवश्चविशांपते ॥ अ
भ्यागच्छन्नृपवरंज्ञातुमग्निश्चभारत २२ जिज्ञासमानौवरदौमहात्मानमुशीनरम् ॥ इंद्रःश्येनःकपोतोऽग्निर्भूत्वायज्ञेऽभिजग्मतुः २३

र्षमित्यर्थः १३ युगंपंचसंवत्सरात्मकंतस्मिन्क्षीणे समाप्तेसतियदासौरसावनबार्हस्पत्यनाक्षत्रचांद्राः संवत्सराएककालंसमाप्यंतेस युगक्षयकालस्तस्मिन्नित्यर्थः युगेक्षीणेइत्यस्यसंवत्सरांत इतिवाऽर्थःचैत्रप्रतिपद्युगादिरितिव्यवहारात् १४ अतएवपूर्वदिनेशिवंदृष्ट्वाप्रतिपदमारभ्यमासमात्रं पिनाकिनंयजंतइतिसंगच्छते १५ । १६ पावकिःस्कंदःशांतवान्शमं प्रापवसिष्ठोऽपिशांत वान् १७ कुशवान्जलवान् । शरंवनंकुशंनीरमितिधनंजयः अकोपनाजितक्रोधा १८ समासःसंक्षेपःयस्मिन्दृष्टे समाधिफलंभवतीत्यर्थः १९ । २० । २१ देवसमितिंराजसभाम् २२ । २३

निलिल्येलीनः २४ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेत्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥ ॥ धर्मात्मानमिति १ । २ । ३ । ३ ४ । ५ । ६ । ७ । ८ । ९ । १०

ऊरूराज्ञःसमासाद्यकपोतःश्येनजाद्भयात् ॥ शरणार्थीतदाराजान्निलिल्येभयपीडितः २४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थ
यात्रायांश्येनकपोतीयेत्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥ ॥ ७ ॥ ॥ श्येनउवाच ॥ धर्मात्मानंत्वाऽऽहुरेकंसर्वेराजन्महीक्षितः ॥ सर्वधर्मविरुद्धं
त्वंकस्मात्कर्मचिकीर्षसि १ विहितंभक्षणंराजन्पीड्यमानस्यमेक्षुधा ॥ माऽरक्षीर्धर्मलोभेनधर्ममुत्सृष्टवानसि २ ॥ राजोवाच ॥ संत्रस्तरूपस्त्राणार्थीत्वत्तोभीतो
महाद्विज ॥ मत्सकाशमनुप्राप्तःप्राणगृध्नुरयंद्विजः ३ एवमभ्यागतस्येहकपोतस्याभयार्थिनः ॥ अप्रदानेपरंधर्मंकथंश्येननपश्यसि ४ प्रस्पंदमानःसंभ्रांतः
कपोतःश्येनलक्ष्यते ॥ मत्सकाशंजीवितार्थीतस्यत्यागोविगर्हितः ५ योहिकश्चिद्द्विजान्हन्याद्गांवालोकस्यमातरम् ॥ शरणागतंचत्यजतेतुल्यंतेषांहिपातकं ६
॥ श्येनउवाच ॥ आहारात्सर्वभूतानिसंभवंतिमहीपते ॥ आहारेणविवर्धंतेतेनजीवंतिजंतवः ७ शक्यतेदुस्त्यजेऽप्यर्थेचिररात्रायजीवितुं ॥ नतुभोजनमुत्सृज्य
शक्यंवर्तयितुंचिरं ८ भक्ष्याद्वियोजितस्याद्यममप्राणाविशांपते ॥ विसृज्यकायमेष्यंतिपंथानमकुतोभयम् ९ प्रमृतेमयिधर्मात्मन्पुत्रदारादिनंक्ष्यति ॥ रक्षमा
णःकपोतंत्वंबहून्प्राणान्नरक्षसि १० धर्मंयोबाधतेधर्मोनसधर्मःकुवर्त्मतत् ॥ अविरोधात्तुयोधर्मःसधर्मःसत्यविक्रम ११ विरोधिषुमहीपालनिश्चित्यगुरुलाघवं ॥
नबाधाविद्यतेयत्रतंधर्मंसमुपाचरेत् १२ गुरुलाघवमादायधर्माधर्मविनिश्चये ॥ यतोभूयांस्ततोराजन्कुरुष्वधर्मनिश्चयं १३ ॥ राजोवाच ॥ बहुकल्याणसंयुक्तं
भाषसेविहगोत्तम ॥ सुपर्णःपक्षिराट्किंत्वंधर्मज्ञश्चास्यसंशयं १४ तथाहिधर्मसंयुक्तंबहुचित्रंचभाषसे ॥ नतेऽस्त्यविदितंकिंचिदितित्वांलक्षयाम्यहं १५ शर
णैषिपरित्यागंकथंसाध्वितिमन्यसे ॥ आहारार्थंसमारंभस्तवचायंविहंगम १६ शक्यश्चाप्यन्यथाकर्तुमाहारोऽप्यधिकस्त्वया ॥ गोवृषोवावराहोवामृगोवामहि
षोऽपिवा ॥ त्वदर्थमद्यक्रियतांयच्चान्यादिहकांक्षसि १७ ॥ श्येनउवाच ॥ नवराहंनचोक्षाणंनमृगान्विविधांस्तथा ॥ भक्षयामिमहाराजकिंममान्येनकेनचित्
१८ यस्तुमेदेवविहितोभक्षःक्षत्रियपुंगव ॥ तमुत्सृजमहीपालकपोतमिममेवमे १९ श्येनःकपोतानत्तीतिस्थितिरेषासनातनी ॥ माराजन्सारमज्ञात्वाकदली
स्कंधमासज २० ॥ राजोवाच ॥ राष्ट्रंशिबीनामृद्धंवैददानितवखेचर ॥ यंवाकामयसेकामंश्येनसर्वंददानिते २१ विनेमंपक्षिणंश्येनशरणार्थिनमागतं ॥ येने
मंवर्जयेथास्त्वंकर्मणापक्षिसत्तम ॥ तदाचक्ष्वकरिष्यामिनहिदास्येकपोतकं २२ ॥ श्येनउवाच ॥ उशीनरकपोतेतेयदिस्नेहोनराधिप ॥ आत्मनोमांसमुत्कृ
त्यकपोतेतुलयाधृतं २३ यदासमंकपोतेनतवमांसंनृपोत्तम ॥ तदादेयंतुतन्मह्यंसामेतुष्टिर्भविष्यति २४ ॥ राजोवाच ॥ अनुग्रहमिमंमन्येश्येनयन्माऽभिया
चसे ॥ तस्मात्तेऽद्यप्रदास्यामिस्वमांसंतुलयाधृतम् २५

११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ कदलीस्कंधमासजेविकदलीस्कंधतुल्ये निःसारेऽस्मिन्नधर्मेमा सक्तोभवेत्यर्थः २० । २१ । २२ । २३ । २४ । २५

२६ । २७ । २८ ।२९।३०।३१।३२।३३ स्वदेहत्यागेनापिशरणागतोरक्षणीयइत्यध्यायतात्पर्यंच ३४ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेएकत्रिंशदधिकशततमोऽध्यायः ॥१३१॥

॥ लोमशउवाच ॥ उत्कृत्यसस्वयंमांसंराजापरमधर्मवित् ॥ तुलयामासकौंतेयकपोतेनसमंविभो २६ ध्रियमाणःकपोतस्तुमांसेनात्यतिरिच्यते ॥ पुनश्चोत्कृ
त्यमांसानिराजाप्रादादुशीनरः २७ नविद्यतेयदामांसंकपोतेनसमंधृतं ॥ ततउत्कृत्तमांसोऽसावारुरोहस्वयंतुलां २८ ॥ श्येनउवाच ॥ इंद्रोऽहमस्मिधर्मज्ञ
कपोतोहव्यवाडयम् ॥ जिज्ञासमानौधर्मेत्वांयज्ञवाटमुपागतौ २९ यत्तेमांसानिगात्रेभ्यउत्कृत्तानिविशांपते ॥ एषातेभास्वतीकीर्तिर्लोकानभिभविष्यति ३०
यावल्लोकेमनुष्यास्त्वांकथयिष्यंतिपार्थिव ॥ तावत्कीर्तिश्चलोकाश्चस्थास्यंतितवशाश्वताः ३१ इत्येवमुक्त्वाराजानमारुरोहदिवंपुनः ॥ उशीनरोऽपिधर्मात्मा
धर्मेणावृत्यरोदसी ३२ विभ्राजमानोवपुषाऽप्यारुरोहत्रिविष्टपं ॥ तदेतत्सदनंराजन्राज्ञस्तस्यमहात्मनः ३३ पश्यस्वैतन्मयासार्धंपुण्यंपापप्रमोचनम् ॥ तत्र
वैसततंदेवामुनयश्चसनातनाः ॥ दृश्यंतेब्राह्मणैराजन्पुण्यवद्भिर्महात्मभिः ३४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांश्येनक
पोतीयेएकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ ॥ ७ ॥ ॥ लोमशउवाच ॥ यःकथ्यतेमंत्रविदग्र्यबुद्धिरौद्दालकिःश्वेतकेतुःपृथिव्यां ॥ तस्याश्रमं
पश्यनरेंद्रपुण्यंसदाफलैरुपपन्नंमहीजैः १ साक्षादत्रश्वेतकेतुर्ददर्शसरस्वतींमानुषदेहरूपाम् ॥ वेत्स्यामिवाणीमितिसंप्रवृत्तांसरस्वतींश्वेतकेतुर्बभाषे २ अस्मि
न्युगेब्रह्मकृतांवरिष्ठावास्तांमुनीमातुलभागिनेयौ ॥ अष्टावक्रश्चैवकहोडसूनुरौद्दालकिःश्वेतकेतुःपृथिव्यां ३ विदेहराजस्यमहीपतेस्तौविप्रावुभौमातुलभागिने
यौ ॥ प्रविश्ययज्ञायतनंविवादेबंदिंनिजग्राहतुरप्रमेयौ ४ उपास्स्वकौंतेयसहानुजस्त्वंतस्याश्रमंपुण्यतमंप्रविश्य ॥ अष्टावक्रंयस्यदौहित्रमाहुर्योऽसौबंदिंजन
कस्याथयज्ञे ५ वादीविप्राग्र्योबालएवाभिगम्यवादेभंक्त्वामज्जयामासनद्याम् ६ ॥ युधिष्ठिरउवाच ॥ कथंप्रभावःसबभूवविप्रस्तथाभूतंयोनिजग्राहबंदिम् ॥
अष्टावक्रःकेनचासौबभूवतत्सर्वंमेलोमशशंसतत्त्वं ७ ॥ लोमशउवाच ॥ उद्दालकस्यनियतःशिष्यएकोनाम्नाकहोडइतिविश्रुतोऽभूत् ॥ शुश्रूषुराचार्यवशानुव
र्तीदीर्घंकालंसोऽध्ययनंचकार ८ तंवैविप्राःपर्यचरत्सशिष्यस्तांचज्ञात्वापरिचर्यांगुरुःसः ॥ तस्मैप्रादात्सद्यएवश्रुतंचभार्यांचवैदुहितरंस्वांसुजाताम् ९ तस्या
गर्भःसमभवदग्निकल्पःसोऽधीयानंपितरंचाप्युवाच ॥ सर्वांरात्रिमध्ययनंकरोषिनेदंपितःसम्यगिवोपवर्तते १० उपालब्धःशिष्यमध्येमहर्षिःसतंकोपादुदरस्थं
शशाप ॥ यस्मात्कुक्षौवर्तमानोब्रवीषितस्माद्वक्रोभविताऽस्यष्टकृत्वः ११ सवैतथावक्रएवाभ्यजायदष्टावक्रःप्रथितोवैमहर्षिः ॥ अस्यासीद्वैमातुलःश्वेतकेतुःस
तेनतुल्योवयसाबभूव १२ संपीड्यमानातुतदासुजातासावर्धमानेनसुतेनकुक्षौ ॥ उवाचभर्तारमिदंरहोगत्वाप्रसाद्यहीनंवसुनाधनार्थिनी १३

यःकथ्यतइति १।२।३ बंदिंबंदिनंनिजग्राहतुर्निजग्रहतुः संप्रसारणाभावश्छांदसः अनितरांग्राहवदाचरतुरितिवा ४ । ५ । ६।७ । ८।९।१० अष्टकृत्वोऽष्टवारमष्टसुस्थानेष्वित्यर्थः ११ । १२ । १३

प्रजाताप्रसूता १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेद्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥ ॥ ॥
अंधस्येतिअंधादीनामक्षमत्वान्मार्गोदेयइत्यर्थः असमेत्यसमीपमप्राप्य १ । २ । ३ ऐंद्रद्युम्नेऽजनक ४ । ५ । ६ ज्ञानागमेज्ञानशास्त्रेवेदांतेष्वित्यर्थः निष्ठांनिश्चयम् ७ वेदजानीतियदित

कथंकरिष्याम्यधनामहर्षेमासश्चायंदशमोवर्ततेमे ॥ नैवास्तितेवसुकिंचित्प्रजातायेनाहमेतामापदंनिस्तरेयम् १४ उक्तस्त्वेवंभार्ययाविकहोडोवित्तस्यार्थेजन
कमथाभ्यगच्छत् ॥ सवैतदावादविदानिगृह्यानिमज्जितोबंदिनेहाप्सुविप्रः १५ उद्दालकस्तंतुतदानिशम्यसूतेनवादेऽप्सुनिमज्जितंतथा ॥उवाचतांतत्रततःसुजा
तामष्टावक्रेगूहितव्योऽयमर्थः १६ ररक्षसाचापितमस्यमंत्रंजातोऽप्यसौनैवशुश्रावविप्रः ॥ उद्दालकंपितृवच्चापिमेनेतथाऽष्टावक्रोभ्रातृवच्छ्वेतकेतुम् १७ ततो
वर्षेद्वादशेश्वेतकेतुरष्टावक्रंपितुरंकेनिषण्णम् ॥ अपाकर्षद्गृह्यपाणौरुदंतंनायंतवांकःपितुरित्युक्तवांश्च १८ यत्तेनोक्तंदुरुक्तंतत्तदानींहृदिस्थितंतस्यसुदुःखमा
सीत् ॥ गृहंगत्वामातरंसोऽभिगम्यपप्रच्छेदंक्वनुतातोममेति १९ ततःसुजातापरमार्तरूपाशापाद्भीतासर्वमेवाचचक्षे ॥ तद्वैतत्त्वंसर्वमाज्ञायरात्राविव्यब्रवीच्छ्वेत
केतुंसविप्रः २० गच्छावयज्ञंजनकस्यराज्ञोबह्वाश्चर्यःश्रूयतेतस्ययज्ञः ॥ श्रोष्यावोऽत्रब्राह्मणानांविवादमन्नंचाग्र्यंतत्रभोक्ष्यावहेच २१ विचक्षणत्वंचभविष्यते
नौशिवश्चसौम्यश्चहिब्रह्मघोषः २२ तौजग्मतुर्मातुलभागिनेयौयज्ञंसमृद्धंजनकस्यराज्ञः ॥ अष्टावक्रःपथिराज्ञासमेत्यप्रोत्सार्यमाणोवाक्यमिदंजगाद २३ ॥
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामष्टावक्रीयेद्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥ ॥ अष्टावक्रउवाच ॥
अंधस्यपंथाबधिरस्यपंथाःस्त्रियःपंथाभारवाहस्यपंथाः ॥ राज्ञःपंथाब्राह्मणेनासमेत्यसमेत्यतुब्राह्मणस्यैवपंथाः १ ॥ राजोवाच ॥ पंथाअयंतेऽद्यमयाऽतिदिष्टोये
नेच्छसितेनकामंव्रजस्व ॥ नपावकोविद्यतेवैलघीयानिंद्रोऽपिनित्यंनमतेब्राह्मणानाम् २ ॥ अष्टावक्रउवाच ॥ प्राप्तौस्वयज्ञंनृपसंदिदृक्षूकौतुहलंनौबलवन्नरें
द्र ॥ प्राप्ताविहावामतिथीप्रवेशंकांक्षावहेद्वारपतेस्तवाज्ञाम् ३ ऐंद्रद्युम्नेयज्ञदृशाविहावांविवक्षूवैजनकेंद्रंदिदृक्षू ॥ तौवैक्रोधव्याधिनादह्यमानावयंचनौद्वारपा
लोरुणद्धि ४ ॥द्वारपालउवाच॥ बंदेःसमादेशकरावयंस्मनिबोधवाक्यंचमयेर्यमाणम् ॥नवैबालाःप्रविशंत्यत्रविप्रावृद्धाविदग्धाःप्रविशंत्यत्रविप्राः ५ ॥अष्टावक्रउवाच॥
यद्यत्रवृद्धेषुकृतःप्रवेशोयुक्तंप्रवेष्टुंममद्वारपाल॥वयंहिवृद्धाश्चरितव्रताश्चवेदप्रभावेनसमन्विताश्च ६ शुश्रूषवश्चापिजितेंद्रियाश्चज्ञानागमेचापिगताःस्मनिष्ठाम् ॥न
बालइत्येवमंतव्यमाहुर्बालोऽप्यग्निर्दहतिस्पृश्यमानः ७॥द्वारपालउवाच॥ सरस्वतीमीरयवेदजुष्टामेकाक्षरांबहुरूपांविराजम् ॥ अंगात्मानंसमवेक्षस्वबालंकिंश्लाघ
सेदुर्लभोवैमनीषी ८ ॥अष्टावक्रउवाच ॥नज्ञायतेकायवृद्ध्याविवृद्धिर्यथाष्ठीलाशाल्मलेःसंप्रवृद्धा ॥ ह्रस्वोऽल्पकायःफलितोविवृद्धोयश्चाफलस्तस्यनवृद्धभावः ९

हिंईरयजुष्टांमुनिसेवितां एकमेवाक्षरंब्रह्मप्रतिपाद्यं यस्यांतामेकाक्षरांबहुरूपां मंत्रार्थवादादिरूपांविराजं विशेषेणकर्मकांडादाविक्येन राजमानांअंगेतिसंबोधने ८ शाल्मलेरष्ठीला
शाल्मलिफलांतर्गतग्रंथिः सहिकेवलतूलमयत्वान्निःसारः अतोदेहवृद्धिर्यथा अल्पकायः कृशः ९

१० । ११ अनूचानःसांगवेदाध्यायी १२ पुष्करमालिनेस्वर्णमालाधारिणे १३ । १४ । १५ उपायतः प्रयतिष्येइत्युक्त्वायज्ञवाटादन्यत्र तस्यराजदर्शनंकारयित्वा आहप्रवेशनेकुरुयत्नमिति
राज्ञःपुरस्तात्किंचिज्ज्ञानंप्रकाशयेत्यर्थः १६ सम्राट्सार्वभौमः १७ । १८ सोऽहमद्वैतंब्रह्मकथयितुमागतोऽस्मि एतेनकृत्स्नस्यास्यप्रबंधस्यतात्पर्यमुपन्यस्तम् १९ । २० । २१ विज्ञानमत्ता
अपिपराजयंप्राप्यसभातोनिःसृताः २२ निहतोनिर्जितः शेष्यतेप्रसुप्तपुरुषवज्जडोभविष्यति २३ ब्रह्माद्वैतंकथयितुमागतोऽस्मीतिप्रतिजानानमष्टावक्रं प्रतिपृच्छतिराजात्रिंशकेतिउभयतस्ती
क्ष्णाग्राभिःषड्भिः शलाकाभिरेकस्मिन्शंकौप्रोतमध्याभिः पृथगंताभिर्द्वादशारंषण्णाभिचक्रंजायते तत्रद्वादशराशयः अराःराशिद्वयात्मानः षड्ऋतवोनाभयः एकैकस्मिन्राशौ त्रिंश

॥ द्वारपालउवाच ॥ वृद्धेभ्यएवेहमतिंस्मबालाग्रह्णंतिकालेनभवंतिवृद्धाः ॥ नहिज्ञानमल्पकालेनशक्यंकस्माद्बालःस्थविरइवप्रभाषसे १० ॥ अष्टावक्रउवा
च ॥ नतेनस्थविरोभवतियेनास्यपलितंशिरः ॥ बालोऽपियःप्रजानातितंदेवाःस्थविरंविदुः ११ नहायनैर्नपलितैर्नवित्तेननबंधुभिः ॥ ऋषयश्चक्रिरेधर्मंयोऽ
नूचानःसनोमहान् १२ दिदृक्षुरस्मिसंप्राप्तोबंदिनंराजसंसदि ॥ निवेदयस्वमांद्वाःस्थराज्ञेपुष्करमालिने १३ द्रष्टाऽस्यद्यवदतोऽस्मान्द्वारपालमनीषिभिः ॥
सहवादेविवृद्धेतुबंदिनंचापिनिर्जितम् १४ पश्यंतुविप्राःपरिपूर्णविद्याःसहैवराज्ञासपुरोधमुख्याः ॥ उताहोवाऽप्युच्चतांनीचतांवातूष्णींभूतेष्वेवसर्वेष्वथाद्य १५
॥ द्वारपालउवाच ॥ कथंयज्ञंदशवर्षोविशेस्त्वंविनीतानांविदुषांसंप्रवेशम् ॥ उपायतःप्रयतिष्येतवाहंप्रवेशनेकुरुयत्नंयथावत् १६ ॥ अष्टावक्रउवाच ॥ भो
राजन्जनकानांवरिष्ठत्वंवैसम्राट्त्वयिसर्वंसमृद्धम् ॥ त्वंवाकर्ताकर्मणांयज्ञियानांययातिरेकोनृपतिर्वापुरस्तात् १७ वृद्धान्बंदीवादविदोनिगृह्यवादेभग्नानप्र
तिशंकमानः ॥ त्वयाऽभिसृष्टैःपुरुषैराप्तकृद्भिर्जलेसर्वान्मज्जयतीतिनःश्रुतम् १८ सोऽहंश्रुत्वाब्राह्मणानांसकाशेब्रह्माद्वैतंकथयितुमागतोऽस्मि ॥ क्वासौबंदी
यावदेनंसमेत्यनक्षत्राणीवसवितानाशयामि १९ ॥ ॥ राजोवाच ॥ ॥ आशंससेबंदिनंवैविजेतुमविज्ञायत्वंवाक्यबलंपरस्य ॥ विज्ञातवीर्यैःशक्यमेवं
प्रवक्तुंदृष्टश्चासौब्राह्मणैर्वेदशीलैः २० आशंससेत्वंबंदिनंवैविजेतुमविज्ञात्वातुबलंबंदिनोऽस्य ॥ समागताब्राह्मणास्तेनपूर्वंनशोभंतेभास्करेणेवताराः २१ आ
शंसंताबंदिनंजेतुकामास्तस्यांतिकंप्राप्यविलुप्तशोभाः ॥ विज्ञानमत्तानिःसृताश्चैवतातकथंसदस्यैर्वचनंविस्तरेयुः २२ ॥ ॥ अष्टावक्रउवाच ॥ ॥ वि
वादितोऽसौनहिमादृशैर्हिसिंहीकृतस्तेनवदत्यभीतः ॥ समेत्यमांनिहतःशेष्यतेऽद्यमार्गेभग्नंशकटमिवाचलाक्षम् २३ ॥ ॥ राजोवाच ॥ ॥ त्रिं
शकद्वादशांशस्यचतुर्विंशतिपर्वणः ॥ यस्त्रिषष्टिशतारस्यवेदार्थंसपरःकविः २४

त्रिंशदंशास्तदेतद्भचक्रंषष्ट्यानाडीभिः परिवर्तते । अस्यषष्ट्यधिकशतत्रयपरिवर्तैः सावनःसंवत्सरोभवति । अस्मिंश्चक्रेकुलालचक्रवत् प्रदक्षिणमावर्तमानेपिपीलिकापंक्तिवत् प्रतीपंसूर्यों
दयःपरिभ्रमंति । तत्रचंद्रस्यसप्तविंशत्यहोरात्रैर्भगणभोगः । सूर्यस्यसपादपंचषष्ट्यधिकेनाह्नां शतत्रयेणसप्रवसौरःसंवत्सरः । अस्मिंश्चक्रेस्वस्वगत्यागच्छतोः सूर्यचंद्रयोर्यदाऽत्यंतंविप्रकर्षस्त
दापौर्णमासीयदाऽत्यंतं सन्निकर्षस्तदादर्शस्तेद्वेपर्वणी । एवंचतुर्विंशत्यापर्वभिश्चतुःपंचाशदधिकेनाह्नांशतत्रयेणचांद्रः संवत्सरस्तत्रयंप्रच्छतित्रयाणामपिपृथक्कर्मसुविनियोगात् । तथा

चोक्तंमाघेत्रेऽब्दः पंचविधश्चांद्रोव्रतादौतिलकादिके । सुजन्मादिव्रतेसौरोगोसत्रादिषुसावनइति । त्रिंशकद्वादशोशस्यत्रिंशतोगणास्त्रिंशकस्तेषु द्वादशसंख्याकाअंशायस्येतिसौरसंवत्सर
प्रश्नः चतुर्विंशतिपर्वणइतिचांद्रस्य । त्रीणिषष्ट्यासहितानिशतान्यरायस्येतिसावनस्य । त्रिविधस्यास्यकालचक्रस्ययोऽर्थप्रयोजनंवेदसपरः कविरुत्कृष्टःक्रांतदर्शी २४ इतिपृष्टोऽपरआ
होत्तरंषण्णाभीतिविशेषार्थोक्त्यादिद्वत्ताप्रकाशः शेषोऽनुवादःप्रवयोमासाराशयोवातेषुहि त्रिंशदहोरात्राअंशावाप्रत्येकंप्रत्येकमधीयंते । चक्रंपात्वस्मिन्कालेयथाकालं विहितोधर्मस्त्वांपा
त्वित्यर्थः । एतेनधर्मस्यश्रेयःसाधनत्वंविधीयते केवलकालज्ञानस्यापुरुषार्थत्वात् । मानांतरानवगतंप्रयोजनवदर्थंप्रतिपादयद्धि शास्त्रंभवतिअन्यथाशास्त्रत्वव्याघातः । एवमन्यत्रापिविधानं
द्रष्टव्यं । राशिस्त्रिंशत्सुरत्वात् द्विषड्नुपततार्केणसौरोऽब्दइष्टः सोमेश्त्रिष्टोतुचांद्रीशरदपिचचतुर्विंशकात्पर्वणास्यात् । गोसत्रेसावनोऽब्दो गगनरसगुणैराङ्पहेराशियुग्मादत्वाख्यश्चर्तुयाजा
स्वसमयविहिताः श्रेयसेस्युर्मखाद्याः २५ रथसंयुक्तेअश्वेइवसहचारिण्यौइयेनपातेश्येनवदकस्मात् पतनशीलेयेडभेवर्तेतेदिवौकसादेवानांमध्येतयोः संबंधिनंगर्भंकोधत्तेकस्यगर्भंते उत्पद्येतेकंचज
नयतइत्यर्थः २६ उत्तरंतयोर्नामाप्यमंगलमितिमत्वा परोक्षेणानिर्दिशतितेउभेअधिदैवंविद्युदशनी । अध्यात्मंदुःखमृत्यू । विद्युदशिरशनिरंगाराइतिपंचाग्निविद्यायां तयोर्भेदेनव्यपदेशात्
क्रमादाकाशेनदेहेनचरथेनवडवेइवनित्यसंयुक्तेइयेनपाते चतेतवगृहेमास्मस्यातांराजन्तवशात्रवाणामपि गृहेमास्मस्यातामित्यस्यंतामंगलत्वं तयोर्दर्शितंवातसारथिर्मेघोमनश्चआगंता आ
काशाद्दृष्टयश्चैवुत्पत्त्याख्यात्कारणात् कर्मफलभोगार्थमुदेष्यंस्तेउभेपूर्वोक्तेविद्युदशनी दुःखमृत्यूचगर्भंधत्तइत्येकमुत्तरम् । तेषतमेववातसारथिर्विद्युतमाग्निमनश्चसुषुवतुरित्यपरं । यथाधूमज्योतिरा

॥ अष्टावक्रउवाच ॥ ॥ चतुर्विंशतिपर्वत्वांषण्णाभिद्वादशप्रधि ॥ तत्रिषष्टिशतारंवैचक्रंपातुसदागति २५ ॥ ॥ राजोवाच ॥ ॥ वडवेइवसंयुक्तेश्ये
नपातेदिवौकसाम् ॥ कस्तयोर्गर्भमाधत्तेगर्भंसुषुवतुश्चकम् २६ ॥ ॥ अष्टावक्रउवाच ॥ ॥ मास्मतेतेगृहेराजन्शात्रवाणामपिध्रुवम् ॥ वातसारथिरागं
तागर्भंसुषुवतुश्चतम् २७ ॥ ॥ राजोवाच ॥ ॥ किंस्वित्सुप्तंननिमिषतिकिंस्विज्जातंनचोपति ॥ कस्यस्विद्धृदयंनास्तिकिंस्विद्वेगेनवर्धते २८ ॥
॥ अष्टावक्रउवाच ॥ ॥ मत्स्यःसुप्तोननिमिषत्यंडंजातंनचोपति ॥ अश्मनोहृदयंनास्तिनदीवेगेनवर्धते २९

दिसन्निपातरूपत्वादग्निरूपो मेघोग्निमेवविद्युदादिद्वारासूते एवंमनःप्रभवौदुःखमृत्यूस्ववासनारूपेणमनसः कारणेभवतः तथाचबीजांकुरवन्मनसोदुःखादेश्चहेतुहेतुमद्भावान्मनसो लयोदुःखाभा
वार्थमभ्यसनीयइत्यर्थः । एतेनाश्मापिनद्धंमधुपर्यपश्यन्मत्स्यं नदीनउदनिक्षियंतमितिमंत्रवर्णउपबृंहितः । अश्माअशनवताजलंशोषयतामेघेनविषयान्भुंजानेन मनसावामधुमालिलंतद्वदेकर
संब्रह्मवापिनद्धमाच्छादितं मनसोदुःखहेतुत्वंदृष्टांतमुखेनाह मत्स्यमितिनेत्युपमार्थोनिपातः दीनेऽल्पेउदनिउदकेक्षियंतंनिवसंतंमत्स्यं नमीनमिवाकुलमित्यर्थः । क्षियंतमित्यस्यैवव्याक्रिय
मानमित्यर्थःद्धन्मेघोदुःखमृत्यू तडिदशानिसमेश्येनवच्छीघ्रपाते नित्योद्विग्नेरथेऽश्वेइवकरणसुराधीश्वरः प्राज्ञस्तोत्यः । स्वेगर्भंधत्तएनंसुषुवतुरितरे वासनातंतुजन्याचेतःशार्दी निर्ध्यादसुपवन
वशाविश्वचित्रांमुमुक्षुः २७ स्वप्नकितिस्वपितृपोर्नजिह्वितिजकारांतस्यस्वप्नजशब्दस्य स्वप्नावस्थावद्वाचित्वंसुषुप्त्यवस्थां प्राप्तंकिंननिमिषतिलुतदक् नभवतीतिप्रश्नार्थः २८ तद्यथामहान्मत्स्य
उभेकूलेअनुसंचरतीत्यादिश्रुत्या मत्स्योपमितश्चिद्रूपः पुरुषोजाग्रत्स्वप्नयोरिहपरलोकयोश्चसंचरणेन आतोमत्स्यइवकूलद्वयसंचारेणसुप्तिप्रलययोः कार्यकारणसंघातस्यनिखिलप्राणना
दिशान्तसुपरमेऽनुपरतदृक्शक्तिरेकएवास्ते । नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते विनाशित्वादितिश्रुतेस्तदुपरमाभ्युपगमे कृतहानादिदोषप्राप्तिः सुखमहमेतावंतंकालमस्वाप्समिति परामर्शा
नुपपत्तिश्चअस्याविनाशित्वादजातत्वम् । यत्तुजातमंडंब्रह्मांडंभूतभौतिकात्मकं तन्नचोपतिचुपमंदायागतौन चेष्टतेकिंत्वयमेवतच्चेष्टयतेइत्यर्थः अश्मनोऽशरीरस्यहृदयं शोकायतनंनास्ति । ॥१०८॥

इमशरीरमितियास्कः । अशरीरंवावसंतंनप्रियाप्रियेस्पृशतः । तीर्णोहितदासर्वान्शोकान्हृदयस्यभवतीति श्रुत्योस्तद्दृष्टेर्देहाद्यसंगेयोगी निर्मनस्कोजीवन्मुक्तोभवतीत्यर्थः । नदीचितन
दीयोगिनो व्युत्थितस्यवेगेनसद्यः कृत्स्नप्रपंचरूपेणवर्धतेयोगिदृष्ट्या स्वाप्नवद्यावहारिकोऽपिप्रपंचो दृष्टिसमसमयोत्पत्तिकइत्यर्थः । एवंदगलोपोदृश्यस्यजाड्यंदेहासंगिनोमुक्तिः संसारस्यम
नोमात्रत्वंचात्रदर्शितम् । पुंमीनोनिर्निमेषः स्वपितिभवनदीचारखिन्नः स्वरूपेजातंब्रह्मांडपिंडंजडमपि जवतेयेनलोहाश्मनीत्या । यस्याकायस्यनास्तिकचिदपि हृदयंशोकनीडंसमाधौ
यस्स्थामायानदीयं द्रुतमहमिदमाद्यात्मनोदेतिसोऽस्मि २९ वाक्प्रलापेवाचांप्रकृष्टेसंलापेएषबंदीदृश्यतामितिशेषः ३० ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेत्रयस्त्रिंशदधिकशत
तमोऽध्यायः ॥ १३३ ॥ ॥ ७ ॥ ॥ अत्रेति १ ग्लहंपराजितस्यजलेनिपातनरूपंपणंप्रपन्नः स्वीकृतवान्मेममपुरतोनवक्ष्यसिप्रत्युत्तरमितिशेषः समिद्धतेजसःप्रलयकालेऽग्नेर्यंतं
प्रदीप्तस्याग्नेःपुरोयथानदीवेगः शुष्यतितथाशुष्कोभविष्यसीत्यर्थः २ मामांप्रबोधजानीहि । भौवादिकस्यबुधेर्लोटिरूपं असांधरार्षः पदाहतस्यमत्पितुर्निग्रहणादहंपूर्वमेवत्वया पदाहतस्तस्य

॥ राजोवाच ॥ नत्वांमन्येमानुषंदेवसत्वंनत्वंबालःस्थविरःसंमतोमे ॥ नतेतुल्योविद्यतेवाक्प्रलापेतस्माद्द्वारंवितराम्येषबंदी ३० ॥ इतिश्रीमहाभारतेआर
ण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामष्टावक्रीये त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥ ॥ ७ ॥ ॥ अष्टावक्रउवाच ॥ अत्रोग्रसेनसमि
तेषुराजन्समागतेष्वप्रतिमेषुराजसु ॥ नावैमिवंदिंवरमत्रवादिनांमहाजलेहंसमिवाददामि १ नमेऽद्यवक्ष्यस्यतिवादिमानिन्ग्लहंप्रपन्नःसरितामिवागमः ॥
हुताशनस्येवसमिद्धतेजसःस्थिरोभवस्वेहममाद्यबंदिन् २ व्याघ्रंशयानंप्रतिमाप्रबोधआशीविषंसृक्किणीसंलिहानम् ॥ पदाहतस्येहशिरोभिहत्यनादष्टोवैमोक्ष्य
सेतन्निबोध ३ योवैदर्पात्संहननोपपन्नःसुदुर्बलःपर्वतमाविहंति ॥ तस्यैवपाणिःसनखोविदीर्यतेनचैवशैलस्याहदृश्यतेव्रणः ४ सर्वेराज्ञोमैथिलस्यमैनाकस्येव
पर्वताः ॥ निकृष्टभूताराजानोवत्साह्यनडुहोयथा ५ यथामहेंद्रःप्रवरःसुराणांनदीषुगंगाप्रवरायथैव ॥ तथानृपाणांप्रवरस्त्वमेकोबंदिंसमभ्यानयमत्सकाशम्
६ ॥ लोमशउवाच ॥ एवमष्टावक्रःसमितौहिगर्जन्जातक्रोधोबंदिनमाहराजन् ॥ उक्तेवाक्येचोत्तरंमेब्रवीहिवाक्यस्यचाप्युत्तरंतेब्रवीमि ७ ॥ बंदुवाच ॥
एकएवाग्निर्बहुधासमिध्यतेएकःसूर्यःसर्वमिदंविभाति ॥ एकोवीरोदेवराजोऽरिहंतायमःपितॄणामीश्वरश्चैकएव ८ ॥ अष्टावक्रउवाच ॥ द्वाविंद्राग्नीचरतोवैस
खायौद्वौदेवर्षीनारदपर्वतौच ॥ द्वावश्विनौद्वेरथस्यापिचक्रेभार्यापतीद्वौविहितौविधात्रा ९

मेशिरोभिहत्यत्वंनमुच्यसेअदष्टःसन् ३ संहननेनदेहेनदृढकायत्वेनोपपन्नः ४ । ५ बंदिंबंदिनंविभक्त्यलोपेनकारलोपआर्षः ६ । ७ पूर्वप्रविज्ञातंब्रह्माद्वैतमेववादकथामुखेन प्रपंचयन्बंदिमु
३७ खेनबौद्धपक्षमुत्थापयति एकएवेतियथाएकोग्निः सूर्योवाइतराप्रकाश्योन्यप्रकाशकश्च एवंदेवानामिंद्रियाणांराजाप्रधानभूतो धीधातुरहमिदमाद्याकारेणप्रकाशमानो वीरोऽरिहंतेतिपरा
भिभवत्त्वातराभिभावकोयमः सर्वेंद्रियाणांनियंतापितॄणां विषयोपहारद्वारापालयितॄणामिंद्रियाणामीश्वरो भोक्ताकर्ताचप्रधानभूतएकएवनान्यत्तत्त्वंपृथगस्ति । स्वप्नेसर्वेषांक्रियाकार
कादीनांबुद्धिमात्रत्वोपलंभादित्यर्थः धीर्देवेंद्राग्नित्वात्सावदिदमहमिति व्यक्तनानास्वरूपास्वंचान्यंचस्वयं साम्रययतिरविवत्साारिपुःसाचमृत्युः । साश्रोत्रादेःप्रयोक्त्रीसकलमिदमिह स्वप्नवद्धी
मयंस्यादित्येवंतार्किकेण प्रथममुपगतोबंदिनाबौद्धपक्षः ९ । ८ अष्टावक्रोद्वासुपर्णेतिमंत्रेतयोरन्यः पिप्पलंस्वाद्वत्तीतिसत्त्वमनश्नन्नन्योऽभिपश्यतिज्ञइतिपैंगिरहस्यव्याख्यातेनप्रकारेण

बुद्धिचैतन्ययोः सखायाविरयुक्तेरिंद्राग्न्यादिवत्तौसहैवचरतः नहिदृश्यायाबुद्धेर्द्रष्टृत्वंसंभवति प्रकाश्यस्येवप्रकाशत्वमितिपरिहरति द्वाविंद्राग्नीइति । स्वप्नेऽपिबाधिताद्बोद्धव्यादबाधितो बोद्धाऽन्योऽस्तीतिभावः । स्वातंत्र्यादिंद्र आत्माऽनलवदिह पराधीनसिद्धिश्चबुद्धिर्दृग्दृश्येतेऽज्ञसत्वे इतिखलुविवृतेपैंगिनाद्वैतिमंत्रे । मित्रेदेवर्षिदस्रप्रभृतिवदपिते सूर्यचित्रांशुकामेअन्यो न्यापेक्षयाच व्यवहृतिपथगेचक्रवद्दंपतीवत् २ । ९ बंदीबोद्धुः कर्माधीनत्वमितिमीमांसकमतमाह त्रिरितिपुण्येनदेवस्थावरमानुषरूपं जन्मत्रयंसुकृतेनैवलभते । पापेननारकस्थावरतिर्यग्रूपंस्वर्गान्नरकाद्वा च्युतस्यौषधिभावपूर्वकमेवरेतोद्वारा नृपशुतिर्यग्योनिसंभवस्यश्रौतप्रसिद्धेः अतएवत्रयोवेदायुक्तास्तात्पर्येण सत्रद्वाइववाजपेयोपलक्षितमाश्रमत्रयोचितं कृत्स्नंकर्मजातं वहंतिवेकस्यापिकर्ममात्रपरत्वमित्यर्थः । अध्वर्यवोयज्ञस्ययोक्तारस्त्रैवर्णिकास्त्रीण्येवप्रातः सवनादीनितन्वतेतेनयथाकालंकृतस्यकर्मणः फलंकालानुरोध्येवानुभवंतीत्यर्थः । त्रयोलोकाःस्वर्गो नरकोभूश्चेतिभोगभूमयः । त्रीण्येववेदेज्योतिष्मतांज्योतींषि सुखमार्गप्रकाशकानिजाग्रदादीनि । तस्यत्रयआवसथास्त्रयः स्वप्नाइतिश्रुतेः नास्तिततोऽन्यत्तत्त्वमित्यर्थः । देवःस्याणुर्नरः स्यात्सुकृतकृदितरोनारकस्थाणुतिर्यग्जन्मात्रैवर्णिकः स्याच्छ्रुतियुगधिकृतोवाजपेयादियज्ञे ॥ कालेकालेयजंतेफलमपिच तथाभुंजतेयज्ञभाजः सत्वाद्यैर्यांतिलोकान् स्वरवनिनरकान्स्वप्नजाग्रत्सुषुप्तीः ३ । १० अष्टावक्रएतद्दूषयातिचतुष्टयमितिब्राह्मणानां ब्रह्मविदांनिकेतंज्ञानोपलब्धिस्थानं चतुष्टयंचतुःसंख्यावयवोपेतम् । आश्रमत्रयादन्योऽस्तिमोक्षाश्रमोयदहरेव विरजेत्तदहरेवप्रव्रजेदितिश्रुतिसिद्धइत्यर्थः । यज्ञंज्ञानयज्ञं शूद्रस्याप्यस्त्यत्राधिकारोऽकर्मरूपत्वादित्यर्थः । दिशःदिश्यंतइतिदिशउपदिष्टाः संतिचतस्रोऽवस्थाःविराट्सूत्रांतर्यामितुर्यसाक्षात्का

॥ बंद्युवाच ॥ त्रिःसूयतेकर्मणावैप्रजेयंत्रयोयुक्तावाजपेयंवहंति ॥ अध्वर्यवस्त्रिसवनानितन्वतेत्रयोलोकास्त्रीणिज्योतींषिचाहुः १० ॥ अष्टावक्रउवाच ॥ चतुष्टयंब्राह्मणानांनिकेतंचत्वारोवर्णायज्ञमिमंवहंति ॥ दिशश्चतस्रोवर्णचतुष्टयंचचतुष्पदागौरपिशश्वदुक्ता ११ ॥ बंद्युवाच ॥ पंचाग्नयःपंचपदापंक्तिर्यज्ञाः पंचैवाप्यथपंचेंद्रियाणि ॥ दृष्टावेदेपंचचूडाप्सराश्चलोकेख्यातंपंचनदंचपुण्यम् १२ ॥ अष्टावक्रउवाच ॥ षडाधानेदक्षिणामाहुरेकेषट्चैवेमेऋतवःकालचक्रम् ॥ षडिंद्रियाण्युतषट्कृत्तिकाश्चषट्साद्यस्काःसर्ववेदेषुदृष्टाः १३

रूपाः विश्वतैजसप्राज्ञेभ्यः सर्वप्राणिप्रसिद्धेभ्योऽन्याइत्यर्थः । अतएवतासांवाचकं चतुष्टयमकारउकारमकारार्धमात्रारूपमुपनिषत्प्रसिद्धम् । नचार्धमात्रयाअप्रसिद्धत्वं वाच्यंयस्माच्चतुष्पदापरापश्यंतीमध्यमावैखरीति पादचतुष्टयवतीगौर्वाणीशश्वत्सदैवोक्ता । चत्वारिवाक्परिमितापदानीतिमंत्रेइतिशेषः । जिज्ञास्यंब्रह्मसाक्षिव्रतिवनियातिभिर्ज्ञानयज्ञेऽधिकारिचातुर्वर्ण्यं चतुष्पात्तदुपदिशतिवागेडसूत्रेशशुद्धम् । चत्वारोवाचिवर्णाअउमदलकला वैखरीमध्यमाख्यौपश्यंत्याख्यः पराख्यःसचतुरवयवः प्रत्ययोऽस्याप्रसिद्धः ४ । ११ तुरीयमपलपन्बंद्युवाचपंचाग्नयो गार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्याः । पंचपदाऽष्टाक्षरैः पादैःपंक्तिश्छंदः । यज्ञाःपंचअग्निहोत्रंदर्शपूर्णमासौ चातुर्मास्यानिपशुःसोमइतिश्रुताः । एतेत्रयःपंचकायथाएवंपंचैवेंद्रियाणि शब्दादिपंचकग्राहकाणिनषष्ठो विषयइंद्रियंवास्तीत्यर्थः । दृष्टावेदेअप्सराआपः पुरुषवचसोभवंतीतिश्रुतेः शरीराकारपरिणतेषुजलप्रधानेषु भूतेषुमरत्यनुगच्छतीत्यप्सराश्चितिः पंचचूडापंचैवतत्तद्विषयाकारतया प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपवृत्तिपंचकसारूपेण शिखापंचकवत्येवदृष्टा । वृत्तिनिरोधरूपसमाधेरपि निद्रायामेवांतर्भावइतिभावः । लोकेऽपिपंचानाविषयस्रोतसांसमाहारः पंचनदमुपेयमेवमेवचितिशक्तेरेव कर्तृत्वभोक्तृत्वेइत्युत्तरार्धार्थः । अग्निश्छंदःक्रतूनामिवखलुमनसः खानिपंचैवभागा धांतिर्निद्राविकल्पः स्मृतिरमलमतिर्वृत्तयःपंचतस्य । ताभिःशाखावतीवस्त्विह जलपरीणामकायानुकर्त्रीशुद्धाशुद्धप्रवाहा भवतिचितिनदीतच्चसौख्यादिभोक्त्री ५ । १२ कर्तृत्वादिधर्मकमस्तिषष्ठमिंद्रियंमनः सुषुप्ताविवरवत्तच्च

स्याप्यनुभूयमानत्वात् । कर्तृत्वादेस्तत्सहभावनियतत्वदृष्टेश्च । चित्ताभावसाक्षित्वात्मातः पृथक्कर्त्रादिरूपः सप्तमोऽस्तीत्याहाष्टावक्रः षडाधानेइतिषट्गाइतिशेषः दक्षिणादयोमनसश्चक्षुरादिसाजात्येदृष्टांताः । साद्यस्कायज्ञाविशेषाः । गोनक्षत्रर्तुयज्ञाइवसमवपुषः षट्पदेवंसषिताःश्रोत्राद्या दुःखशब्दाद्यनुभविनइतोऽन्याऽनुभूतिःससाक्षी । धीयोगासप्तभिस्तैरनुभवकरणैरत्र सप्तर्षिसंज्ञैर्भुंक्ते छंदोभिधानानपरिमितवपुश्छादकानष्टमोऽथान् ६ । १३ अथतर्कमतेनबंदीप्रत्यवतिष्ठतेसप्तग्राम्याः मनःषष्ठैरिंद्रियैर्बुध्याचात्मगुणभूतयासमर्पिता मंतव्यबोद्धव्यशब्दादयोविषयास्तेष्वेकैकस्मिन्नासक्तएकैकः पुरुषपशुस्तेचग्राम्याऐहिकावन्याआमुष्मिकाविषयास्तेष्वासक्ततया प्रत्येकंसप्तसप्तपुरुषपशवः सप्तच्छंदांसिच्छादयंतिस्वस्वरूपार्पणजातसुखलेशेन परमात्मानंगूहयंतीतितान्सप्तविषयानेकं क्रतुंकर्तारमात्मानंवहंतिप्रापयंतिकेसप्तर्षयः । प्राणावाऋषयइतिश्रुतेः सप्तैवोक्तामनआदयस्तदुपनीतानि सप्तचैवार्हणान्यर्हणीयानिसुखानि । यथासप्तभिस्तंत्रीभिर्वाद्यमानाएका वीणाशब्दंनिर्वर्तयातिएवमेतैः सप्तभिरात्मासुखमनुभवति । अन्यथाऽकरणत्वात्सुप्तौजडएव न्यस्तवास्यतक्षवत्अवादितवीणावत्तिष्ठति । नतावतास्यकर्तृत्वापगमइत्यर्थः । भैक्षिष्वर्थेषुदिव्येष्वपिनरपशवः सप्तसप्तैवबद्धाभोक्तारंप्रापयंति क्रतुपदविदितंसप्ततान्सप्तखानि । सप्तैवैषांसुखानिप्रातिविषयभवान्येकवीणेव देहीभोगंतंत्रींद्रियाढ्योरवमिवकुरुतेयोऽत्रकर्तासभोक्ता ७।१४ उक्तानेवसप्तकर्तृत्वादिधर्मवताऽहंकारेण सार्धमष्टौविवक्षन्नष्टावक्रोऽष्टौग्रहा अष्टावतिग्रहाइतिश्रुतेंद्रियविषयरूपग्रहातिग्रहरूपं बंधनमुपन्यस्यतदन्यमात्मानंपृथक्करोतिअष्टौशाणाइतिशाणाः शणसूत्रेणनिर्वृत्तागोण्यआवपनाविशेषास्ता इवइंद्रियमनोज्ञयोग्याविषयाअष्टौते शतमानमनंतंप्रमाणंधारयंति । संक्षेपेणाष्टावप्यनंताविषयाइत्यर्थः ।

॥ बंद्युवाच ॥ सप्तग्राम्याःपशवःसप्तवन्याःसप्तच्छंदांसिक्रतुमेकंवहंति ॥ सप्तर्षयःसप्तचाप्यर्हणानिसप्ततंत्रीप्रथिताचैववीणा १४ ॥ अष्टावक्रउवाच ॥ अष्टौशाणाःशतमानंवहंतितथाऽष्टपादःशरभःसिंहघाती ॥ अष्टौवसूनशुश्रुमदेवतासु यूपश्चाष्टास्त्रिर्विहितःसर्वयज्ञे १५ ॥ बंद्युवाच ॥ नवैवोक्ताःसामिधेन्यःपितॄणांतथाप्राहुर्नवयोगंविसर्गम् ॥ नवाक्षराबृहतीसंप्रदिष्टानवैवयोगोगणनामेतिशश्वत् १६

अष्टौपादाःविषयदेशंप्राति गतिसाधनानींद्रियाणियस्यसः शरभःशंलभंतेऽस्मात् । एतस्यैवानंदस्यान्यानिभूतानि मात्रामुपजीवंतीतिश्रुतेः परमानंदरूपःपरमात्मासोऽप्यज्ञातः सन्सिंहघातीहिनस्तिदुःखंददातीतिसिंहोऽद्वैतम् । द्वितीयाद्वैभयंभवतीतिश्रुतेः तस्यद्वैतस्यघातकः । सुषुप्तौजडत्वेसुखमहमस्वाप्समिति व्युत्थितस्यस्वरूपसुखपरामर्शानुपपत्तिः । नचदुःखाभावस्यैवैषपरामर्शः तत्प्रकाशकस्यसाक्षिणः सत्त्वेतस्यतदानींजडत्वोक्त्ययोगात् । अतएवाष्टौवसून्वासनाः देवतास्वेवतत्तदिंद्रियाधिष्ठात्रीषु लिंगात्मनीतियावत्शुश्रुम वेदेनस्वात्मनीत्यर्थः । यूपश्चयोपयतिमोहयतीतियूपो नृपशोर्बंधनस्थानमज्ञानंतदेवाष्टास्त्रिरष्टकोणमष्टधारं सवसर्वयज्ञेषुग्रहातिग्रहसंज्ञकविषयेंद्रियसंयोगेषु वर्ततइतिशेषः । शाणागोण्योऽष्टतेऽर्थाःशतमथःशरभःप्रत्यगानंदएतःपूर्त्याकैः साहमर्थैर्व्रजतिसविषयान्खानितान्यंग्रयोऽस्य । सिंहघ्नोहिंस्रभेदाद्विढितिवसुपदं भेदसंस्कारजातंलिंगस्थेदेवतौघे वसतिसनृपशोर्बंधनेमोहयूपे ८ । १५ तत्रद्वैतघातित्वंशरभस्यानुपपन्नं सर्वेषांयुगपत्संसारोच्छेदापत्तेरित्याशंकते बंदीनवैवेतियथापितॄणामिष्टौएकैव उशंतस्त्वानिधीमहीतिऋक्त्रिरभ्यस्ता प्रत्येकंत्रिसमित्कानवसामिधेन्योऽग्निसमिंधनार्थाऋचः संपद्यंतेतथाएकाप्रकृतिरेवत्रयोगुणाः स्वस्वेतरप्रधानगुणभावेनप्रत्येकंत्रिविधाः संतोनवैवसंयुज्यमानाअंशानांबहुत्वाल्पत्वतारतम्येनाविविधंसर्गंकुर्वंति । यथानवाक्षरैश्चतुर्भिः पादैर्बृहतीसंज्ञकंछंदोभवतियथावानवैवांकाः क्रमभेदेनस्थितायथेष्टसंख्यावाचिनोभवंत्येवं गुणानवैवोक्तविधयासंतोऽनेकधाभावंभजंतेतस्मात् प्रधाननित्यतायाअवश्याभ्युपगंतव्यत्वाद्द्वैतंसत्यमेवेतिभावः । त्रिःपाठेनानुपाठंत्रिसमिदितियथासामिधेन्यृक्नवत्वं प्राप्नोत्येवंप्रधानंत्रिगुणमनुगुणंत्रिप्रवेशान्नवत्वं । गत्वाऽनंतंनवांकीगणितमिवमहन्मुख्यनेतत्प्रसूतेतस्मान्नेतत्प्रधानाधिकमिहबृहतीवाक्षरेभ्योनवभ्यः ९ । १६

तदेतदिंद्रोमायाभिः पुरुरूपईयतेयुक्ताह्यस्यहरयः शतादशेतिश्रुत्यनुसाराद्वैतस्यानिर्वचनीयमायासहाये ब्रह्मण्येवमानोपपत्तौनसत्या प्रकृतिरभ्युपेयेत्याशयवानष्टावक्रः परिहरन्नाहदिश इति तावाएतादशैवभूतमात्राआधिप्रज्ञंदशप्रज्ञामात्रा अधिभूतमिति तस्यवाचापृष्टौपृथिवीचाभिश्लेतिच कौषीतकीयैतरेयकयोर्दर्शनाद्दशैववागाद्याः प्रज्ञामात्राःइयादीनांभूतमात्राणां स्रष्टारः। दिशांतिविषयस्वरूपमातिसृजंति तादिशोवागाद्यादशैव पुरुषस्यदेहाख्ये पुरेवसतोजीवस्यपूर्णे परंब्रह्मैवदशशतानिसहस्रंच विभूतिभेदेन माययाबहुरूपं भूत्वाऽस्तीत्याहुर्वेदाः। एतेनायंवैहरयोयंवैदशचसहस्राणि प्रयुतान्यर्बुदानीतियुक्ताह्यस्यहरयः शतादशेत्येवमंस्यपादस्य श्रौतीव्याख्यादर्शिता । तथाचरज्जूरगवन्मायाबुद्धस्य बाधिताऽपीतरस्यास्तीति वक्तुंशक्यं । परमतेतुविभोरलुप्तदशः पुरुषस्यमुक्तौतदर्शनोक्तिरनुपपन्नादृष्टांताभावादितिभावः । परापूर्वेषांसख्यावृणक्तिवितर्तुराणो अपरेभिरेति । अनानुभूतीरवधून्वानः पूर्वीरिंद्रः शरदस्तर्तरीति । रूपंरूपंप्रतिरूपोबभूवतदस्यरूपं प्रविचक्षणाय ॥ इंद्रोमायाभिः पुरुरूपईयतेयुक्ताह्यस्यहरयः शतादशेतिदाशतय्यां ४।७ अष्टकाध्यायवर्गैऋचावेंद्र्यौआम्नायेते अनयोरर्थः द्वयाहप्राजापत्यादेवाश्चासुराश्चतत्र कानीयसाएवदेवाज्यायांसो असुराइति श्रुतिप्रसिद्धाःपूर्वदेवाः स्वाभाविकासंगपाप्मरूपाः कामक्रोधादयस्तेषां सख्यासख्यानिपरावृणक्तिदूराद्वर्जयति । वितर्तुराणःततारेतितर्तुराणःस्तीर्णवान् । तरतेर्लिंडादेशः कानच्द्विस्त्वंबहुलंछंदसीत्युकारोऽतादेशोरपरः तीव्रवैराग्याभ्यासादिमान् अपरेभिःअपरैर्देवैः शास्त्रीयैः शमदमादिभिरेतिप्राप्नोति सख्येत्यनुषज्यतेकामादीन् जित्वाऽत्यादरेण शमादिपरोभवतीत्यर्थः । एवंभूतःअनानुभूतीरननुभवान् भ्रांतिज्ञानानिशुक्तिरजतज्ञानतुल्यानि देहाद्यात्मज्ञानान्यवधून्वानोऽपनुदन्नात्मनस्तत्तदुपाध्याकारतांनिषेधन्निंद्रः परमेश्वरोऽप्यविद्ययाजीवभावमापन्नः सन्लब्धात्मतत्त्वो विद्वान्पूर्वीः शरदः अनादिकालप्रवृत्तकर्मवासनास्तर्तरीत्यतिश

॥ अष्टावक्रउवाच ॥ दिशोदशोक्ताःपुरुषस्यलोकेसहस्रमाहुर्दशपूर्णंशतानि ॥ दशैवमासान्बिभ्रतिगर्भवत्योदशेरकादशदासादशार्हाः १७

॥ बंदुवाच ॥ एकादशैकादशिनःपशूनामेकादशैवात्रभवंतियूपाः ॥ एकादशप्राणभृतांविकाराएकादशोक्तादिविदेवेषुरुद्राः १८

येनतरतिवीतबंधोभवतीत्यर्थः । अत्रअननुभूतिपदेनशुक्तौरजतंपश्यन् रजतंवाशुक्तिंवानानुभवतीति लौकिकप्रयत्नेनदेहाद्यात्मज्ञानस्याननुभूतित्वं वदंती श्रुतिर्देहादेर्मिथ्यात्वंसूचयति । तद्व्युत्पादनायमंत्रोरूपं रूपमित्यादिस्तत्रमाययेतिअनृतेनाज्ञानेनेत्यर्थः । सत्यत्वेतत्कार्यपदार्थदर्शनस्याननुभूतित्वायोगादिति । शेषंस्पष्टार्थम् । अनानुभूतीरित्यत्रश्रावयादीन् प्रकृत्यआद्याक्षरंप्लुतंतेषामनान्वित्यस्यमध्यमित्यनेनानन्तुइति वर्णत्रयस्यमध्यंप्लुतंदीर्घंभवतीतिप्रातिशाख्येदीर्घत्वविधानादननुभूतीरित्यर्थः पदपाठश्चैवमेवेतिदिक् । दशैवमासानितियथा स्त्रियोगर्भेणांतरालिकः संबंधोबीजकुसूलन्यायेनैवमसंगस्याचिदात्मनोऽहंकारेणेत्यर्थः । दशेरकाःआसमंतादीरयंत्युपदिशंति तत्त्वमित्येरकास्तत्त्वदर्शिनउपदेष्टारः । दशमासास्तत्रस्यक्षेपकाः । दशअर्हास्तत्त्वविद्याधिकारिणः । एवमुक्तविधंब्रह्माद्वैतंबुधानामनुभवसिद्धं मूढानांविद्वेष्यंचित्तशुद्धिमतांश्रद्धेयमित्यर्थः । स्वोत्थप्रज्ञादिशोऽस्मिन्दशपुरिवसतः पूरविद्याष्टकात्माताःपूर्णवस्त्वनंताः स्वगहिसमपुरांव्यापनात्पूर्णतास्य । पुंपुर्योर्गर्भमात्रोरिवपृथगपृथक्त्वेनसत्यानृतेस्तः केऽप्यारूढाःपदंतत्कतिचनविमुखाः केपितत्प्राप्तियोग्याः १० । १७ एकादशेतिप्राणभृतांपशूनांजीवपशूनांएकादशिनः एकादशेंद्रियाणिप्रकाशकानियेषुतेविषयाः शब्दादयस्तेएकादशैवसंख्याताः तएवसर्वेऽपिप्रत्येकंयूपाबंधकारागादयः नैषांकश्चिदप्यबंधकोऽस्तीतिवक्तुंएनरेकादशग्रहणम् । अतोऽत्रअविमृष्टविधेयांशतादोषोनास्तीतिविज्ञेयम् । विकाराःशब्दादिग्रहजाहर्षविषादाः तएतेदिविस्वर्गेऽपिरुद्रारोदयितारो देवानामपिसंतिकिमुतमनुष्याणाम् । तथाचसत्यात्मनोऽसंगत्वंकथंस्यात् प्रत्यक्षेणदुःखानुभवादित्याक्षेपः । रुद्राएकादशोक्ताः स्वरपिपुरुपशून् रोदयंतींद्रियाणितेषामेकादशार्था नृपशुनिगडनेयूपभूताभवंति । रागद्वेषद्वयानिप्रति विषयममीतद्युजां स्युर्विकारास्तद्वंक्तस्तेऽपिचैकादश यदिहसिनोत्येकएकैकमेषाम् ११ । १८ ॥११०॥

दृष्टांतदुःखेनैवदार्ष्टांतिकंनिर्दिशन्परिहरत्यष्टावक्रः यद्यप्यत्रसंवत्सरजगत्यौमासाक्षरेभ्यो ऽनतिरिक्तेएवंसंघातादन्यः शुद्धश्चेतनोमूढानामप्रसिद्धस्तथापि । आनंदाद्ध्येवखल्विमानि भूतानिजायंतइतिश्रुतेर्यथाअहर्गणानांद्वादशाहएवं संघातस्यकृत्स्नस्यशुद्धंब्रह्मैवप्रकृतिः एतदेवकुतइत्यपेक्षायांचित्तशुद्ध्येकगम्योऽयमर्थो नशुष्कतर्कगम्यइत्याह द्वादशादित्यानितिधीराःध्यानवंतोयोगिनः । आदित्यान्आददतेइंद्रियाणि स्वस्वविषयेभ्योव्यावर्तयंतितद्द्वाराप्रत्यक् तत्त्वमधिगमयंतितान्द्वादशसंख्याकानाहुः सनत्सुजाताद्याउद्योगादौ । धर्मश्चसत्यंचदमस्तपश्च अमात्सर्यंह्रीस्तितिक्षाऽनसूया । यज्ञश्चदानंचधृतिर्यमोमहान् व्रतानिवैद्वादशब्राह्मणस्येति । बंधप्रत्यक्षमेतद्रूढमथजगतीवर्षवद्वर्णमासात्संघातात्प्रत्यगात्मानधिकइति यदप्यस्तिलोकेतथाऽपि । वागारभ्योविकारः प्रकृतिरविकृतिर्द्वादशाहादिवत्कोऽप्यस्त्येषां भानआत्माशमैभिरधिगतोवैकृतानंनमीयुः १२ । १९ ब्रह्मलोकंगतानामेवज्ञानं भवतीतिकेषांचिन्निर्बंधः कृतयुगादावेवज्ञानंभवति नकलावित्यपिकेचित्तान्निराचष्टे त्रयोदशीतिदेशकालापेक्षाचित्तशुद्धिर्न पुरुषयत्नसाध्येत्याक्षेपोबंदिप्रोक्तपूर्वार्धेन । नत्रेतादौसधर्मःसकलुषसमये नापिभूरादिषट्केनोपातालेषुसप्तस्वपि शुकतयुगेसत्यलोकेचसोऽस्ति । तस्माद्यासर्वसिद्धातिथिरियमपिनस्वाप्नयेऽतीव शस्तानोवालोकास्तपोताइतिमखतपसीश्रेयसेनात्मचर्चा १३ उत्तरार्धेतुकेशीअग्निर्वायुः सूर्यश्चकेशिनइतिवैदिकप्रसिद्धेरग्न्यादिवदसंगआत्मा । त्रयोदशसंख्यानिदशेंद्रियाणि बुद्धिमनोहंकाराख्यानिअहः शब्दोऽत्रक्रतुवाच्यलक्षणया विषयेंद्रियसंबंधरूपभो

॥ अष्टावक्रउवाच ॥ संवत्सरंद्वादशमासमाहुर्जगत्याःपादोद्वादशैवाक्षराणि ॥ द्वादशाहःप्राकृतोयज्ञउक्तोद्वादशादित्यान्कथयंतीहधीराः १९ ॥ बंदुवाच ॥ त्रयोदशीतिथिरुक्ताप्रशस्तात्रयोदशद्वीपवतीमहीच ॥ लोमशउवाच ॥ एतावदुक्त्वाविरराममबंदीश्लोकस्यार्धंव्याजहाराष्टवक्रः ॥ अष्टावक्रउवाच ॥ त्रयोदशाहानिससारकेशीत्रयोदशादीन्यतिच्छंदांसिचाहुः २० ततोमहानुदतिष्ठन्निनादस्तूष्णींभूतंसूतपुत्रंनिशम्य ॥ अधोमुखंध्यानपरंतदानीमष्टावक्रंचाप्युदीर्यमेव २१ तस्मिंस्तथासंकुलेवर्तमानेस्फीतेयज्ञेजनकस्योतराज्ञः ॥ अष्टावक्रंपूजयंतोऽभ्युपेयुर्विप्राःसर्वेप्रांजलयःप्रतीताः २२ ॥ अष्टावक्रउवाच ॥ अनेनैवब्राह्मणाःशुश्रुवांसोवादेजित्वासलिलेमज्जिताःप्राक् ॥ तानेवधर्मानयमद्यबंदीप्राप्नोतुगृह्याशुनिमज्जयैनम् २३ ॥ बंदुवाच ॥ अहंपुत्रोवरुणस्योतराज्ञस्तत्रासत्रंद्वादशवार्षिकंवै ॥ सत्रेणतेजनकतुल्यकालंतदर्थंतेप्रहितामेद्विजाग्र्याः २४

गाख्येयज्ञेवर्तते असंगस्याप्यात्मनोबुद्ध्यादिसंगात् ध्यायतीवलेलायतीयत्यादिश्रुतेः संगित्वमिवभातिअतोबुद्ध्यादयः शोधनीयाएवनतूदासीत । नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतेतदिदमप्येतर्हि यएवंवेदाहंब्रह्मास्मीतिश्रुत्यवष्टंभेनेहैव देशेकालेचमुक्तिरस्तीतिभावः । यतोऽतिच्छंदांसिछादकज्ञानमतिक्रांतानिधर्मादीनिद्वादश । त्रयोदशादीनित्रयोदशानां बुद्ध्यादीनामादीन्यदनशीलानिधर्मादिबलादुत्पन्ने ज्ञानेबुद्ध्यादयोनिवर्ततइत्यर्थः । तेषुबुद्ध्यादिषुनिवृत्तेषुब्रह्माद्वैतं कथयितुमागतोऽस्मीतिप्राक्प्रतिज्ञातं तदिहस्वयमेवप्रकाशतइत्युक्तमितिभावः । एतर्ह्यत्रैवदेवाइवमुनिमनुजा यांतिसार्वात्म्यमित्याद्युक्तेः साऽहंमनोधीखदशकमनुयन्नप्रिवाप्यर्कतुल्यः । संगीवासंग्यपित्वात्रिदशगणमदंत्येवधर्मादयस्ते येऽतिच्छंदोभिधानास्तिरमतिगताएवमद्वैतसिद्धिः १४ तदयंसंग्रहः । तत्त्वंधीसाक्षिसाक्ष्येश्रुतिषु कतिपरोऽस्त्यत्रकर्ताविसोऽत्रापंचानां षष्ठमेतस्त्वमपसमतिकैस्तैःकरोत्यष्टमोऽन्यः । सोऽहंसाक्षीततोऽन्येगुणमयमखिलंचिन्मयास्ते सदुःखाचित्स्यात्दुःखीतरासा शमुगिहचिदद्वैतभागष्टवक्रः १५ ग्रंथविस्तरभयादुदाहृतोपक्रमाननुगुण्यात् क्लिष्टत्वात्प्रयोजनवदर्थापर्यवसायित्वाच्च टीकांतरोक्ताअर्थानिहप्रदर्शिताः २० सूतपुत्रंशोभनः ऊतः पटस्तद्वत्प्रकृतिविकृत्यात्मैकस्तंतुभिरोतुमिश्रप्रोतस्वादूतः क्रतुरपिसूतः शोभनयज्ञोवरुणस्तस्यपुत्रम् । सद्वत्तंतुसविजानात्यो मितिमंत्रवर्णात्तंत्वाद्यात्मकस्य क्रतोरूतशब्दवाच्यस्यंउदीर्यंतमुदीर्यमाणंस्तूयमानमित्यर्थः २१ । २२ शुश्रुवांसः पंडिताः २३ । २४

जनितारंवरुणम् २५ विप्राइतिवाचा उच्चः पाठेनैवउतमेधयाऊहापोहकौशलेन विप्राविदानाः पंडिताअपिजितामजिताश्वतांप्रसिद्धां वाचंवेदमयींमेधयासहितां बंदिनाकुतर्कार्णवे मज्जितामहं यथाउज्जहारोद्धृतवानस्मितथासंतः सदसद्वचनविवेककुशलाअवाचिन्वंति परीक्षयंतिलोडवेंलट्परीक्षयंत्वित्यर्थः २६ ननुबंदिनोद्धृतांवाचंत्वमेवकुतर्कार्णवे मज्जितवानसितत्रकिंसद्भिः परीक्ष णीयमित्याशंक्याहअग्निर्दहन्निति अग्निर्दहन्स्वभावेनदाहकोऽपिजातवेदाः जातानिसतामसतांचवृत्तानिवेद जानातीतिजातवेदःसतांसत्याभिसंधीनां गृहान्शरीराणिविसर्जयन् वर्जयंस्ते

॥११३॥ तेतुसर्वेवरुणस्योतयज्ञंद्रष्टुंगताइमआयांतिभूयः ॥ अष्टावक्रंपूजयेपूजनीयंयस्यहेतोर्जनितारंसमेष्ये २८ ॥ अष्टावक्रउवाच ॥ विप्राःसमुद्रांभसिमज्जितायेवाचा

जितामेधयावाविदानाः ॥ तांमेधयावाचमथोज्जहारयथावाचमवचिन्वंतिसंतः २६ अग्निर्दहन्जातवेदाःसतांगृहान्विसर्जयंस्तेजसानस्मधाक्षीत् ॥ बालेषुपुत्रे ॥१३४॥

पुकृपणंवदत्सुतथावाचमवाचिन्वंतिसंतः २७ श्लेष्मातकीक्षीणवर्चाःशृणोषिउताहोत्वांस्तुतयोमादयंति ॥ हस्तीवत्वंजनकवितुद्यमानोनमामिकांवाचमिमांशृ

णोषि २८ ॥ जनकउवाच ॥ शृणोमिवाचंतवदिव्यरूपाममानुषींदिव्यरूपोऽसिसाक्षात् ॥ अजैषीर्यद्वंदिनंत्वंविवादेनिसृष्टएषतवकामोऽद्यबंदी २९ ॥ अ

ष्टावक्रउवाच ॥ नानेवजीवताकश्चिदर्थोमेबंदिनानृप ॥ पितायद्यस्यवरुणोमज्जयैनंजलाशये ३० ॥ बंद्युवाच ॥ अहंपुत्रोवरुणस्योतराज्ञोनमेभयंविद्यतेम

ज्जितस्य ॥ इमंमुहूर्तेपितरंद्रक्ष्यतेऽयमष्टावक्रश्चिरनष्टंकहोडम् ३१ ॥ लोमशउवाच ॥ ततस्तेपूजिताविप्रावरुणेनमहात्मना ॥ उदतिष्ठंस्ततःसर्वेजनक

स्यसमीपतः ३२ ॥ कहोडउवाच ॥ इत्यर्थमिच्छंतिसुतान्जनाजननकर्मणा ॥ यदहंनाशकंकर्तुंतत्पुत्रःकृतवान्मम ३३ उताबलस्यबलवानुतबालस्य

पंडितः ॥ उतवाऽविदुषोविद्वान्पुत्रोजनकजायते ३४ शितेनतेपरशुनास्वयमेवांतकोनृप ॥ शिरांस्यपाहरत्राजौरिपूणांभद्रमस्तुते ३५ महदौक्थ्यंगीयते

सामचाग्र्यंसम्यक्सोमःपीयतेचात्रसत्रे ॥ शुचीन्मार्गान्प्रतिजगृहुश्चहृष्टाःसाक्षाद्देवजनकस्योतराज्ञः ३६ ॥ लोमशउवाच ॥ समुत्थितेष्वथसर्वेषुराजन्विप्रे

पुतेष्वधिकंसुप्रभेषु ॥ अनुज्ञातोजनकेनाथराजाविवेशतोयंसागरस्यबंदी ३७ अष्टावक्रःपितरंपूजयित्वासंपूजितोब्राह्मणैस्तैर्यथावत् ॥ प्रत्याजगामाश्रममे

वचाग्र्यंजित्वासौतिंसहितोमातुलेन ३८ ततोऽष्टावक्रंमातुरथांतिकेपितानदींसमंगांशीघ्रमिमांविशस्व ॥ प्रोवाचचैनंसतथाविवेशसमैरंगैश्चापिबभूवसद्यः ३९

नदीसमंगाचबभूवपुण्यायस्यांस्नातोमुच्यतेकिल्बिषाद्धि ॥ त्वमप्येनांस्नानपानावगाहैःसभ्रातृकःसहभार्योविशस्व ४०

जसायथाअधाक्षीत्स्म अर्थादनृताभिसंधिगृहान् नशब्दउपमार्थे । अपोननावादुरितातरेमेत्यादिवत् । तथातमपरशुग्रहणेवह्निः सत्याभिसंधिंनदहतिसत्यपक्षपाती ननु जातिवयोविद्यादि पक्षपातीएवंसंतोऽपिबालादिषु अतोबालवचनमितितद्वाक्यंनावमंतव्यमितिभावः २७ श्लेष्मातकीशब्दितस्तरुविशेषस्तस्यपत्रेषुभोजनं तत्फलभक्षणंचबुद्धिमांद्योपकरंचेतिप्रसिद्धम् २८

अद्यतवकामोनिसृष्टः एषबंदीदृश्यतामितिशेषः २९।३०।३१।३२इत्यर्थमेतदर्थम्३३।३४शितेनतीक्ष्णेनतेतवरिपूणामित्यन्वयः यस्मादपितवशत्रुसंहरणशक्तिरधिकेतिभावः३५ औक्थ्यमुक्थ्या ॥११३॥

ख्यन्तुविशेषेणगेयं साक्षादित्यपरोक्षंदेवतासान्निध्यमुच्यते ३६ । ३७ सौतिंसूतस्यवरुणस्यपुत्रम् ३८ सामान्यंगानिकरोतीतिसमंगेति योगोदर्शितःशकंध्वादित्वात्पररूपम् ३९ । ४०

प्रतीतोविश्रब्धः ४१ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेचतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ ॥ ७ ॥ एषेतिमधुविलेतिअष्टावक्रांगसमीकरणात्पूर्वं समंगाया

अत्रकौंतेयसहितांभ्रातृभिस्त्वंसुखोषितःसहविप्रैःप्रतीतः ॥ पुण्यान्यन्यानिशुचिकर्मैकभक्तिर्मयासार्धंचरितास्याजमीढ ४१ ॥ इतिश्रीमहाभारतेआरण्यके

पर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायामष्टावक्रीयेचतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ ॥ लोमशउवाच ॥ एषामधुविलाराजन्समंगासंप्र

काशते ॥ एतत्कर्दमिलंनामभरतस्याभिषेचनम् १ अलक्ष्म्याकिलसंयुक्तोवृत्रंहत्वाशचीपतिः ॥ आप्लुतःसर्वपापेभ्यःसमंगायांव्यमुच्यत २ एतद्विनशनं

कुक्षौमैनाकस्यनरर्षभ ॥ अदितिर्यत्रपुत्रार्थंतदन्नमपचत्पुरा ३ एनंपर्वतराजानमारुह्यभरतर्षभाः ॥ अयशस्यामसंशब्द्यामलक्ष्मींव्यपनोत्स्यथ ४ एतेक

नखलाराजन्ऋषीणांदयितानगाः ॥ एषाप्रकाशतेगंगायुधिष्ठिरमहानदी ५ सनत्कुमारोभगवानत्रसिद्धिमगात्पुरा ॥ आजमीढावगाह्यैनांसर्वपापैःप्रमोक्ष्यसे

६ अपांहृदंचपुण्याख्यंभृगुतुंगंचपर्वतम् ॥ उष्णीगंगेचकौंतेयसामात्यःसमुपस्पृश ७ आश्रमःस्थूलशिरसोरमणीयःप्रकाशते ॥ अत्रमानंचकौंतेयक्रोधंचैव

विवर्जय ८ एषरैभ्याश्रमःश्रीमान्पांडवेयप्रकाशते ॥ भारद्वाजोयत्रकविर्यवक्रीतोव्यनश्यत ९ ॥ युधिष्ठिरउवाच ॥ कथंयुक्तोऽभवदृषिर्भरद्वाजःप्रताप

वान् ॥ किमर्थंचयवक्रीतःपुत्रोऽनश्यतवैमुनेः १० एतत्सर्वंयथावृत्तंश्रोतुमिच्छामितत्त्वतः ॥ कर्मभिर्देवकल्पानांकीर्त्यमानैर्भृशंरमे ११ ॥ लोमशउवाच ॥

भरद्वाजश्चरैभ्यश्चसखायौसंबभूवतुः ॥ तावूषतुरिहात्यंतंप्रीयमाणावनंतरम् १२ रैभ्यस्यतुसुतावास्तामर्वावसुपरावसू ॥ आसीद्यवक्रीःपुत्रस्तुभरद्वाजस्य

भारत १३ रैभ्योविद्वान्सहापत्यस्तपस्वीचेतरोऽभवत् ॥ तयोश्चाप्यतुलाकीर्तिर्बाल्यात्प्रभृतिभारत १४ यवक्रीःपितरंदृष्ट्वातपस्विनमसत्कृतम् ॥ दृष्ट्वाच

सत्कृतंविप्रैरैभ्यंपुत्रैःसहानघः १५ पर्यतप्यततेजस्वीमन्युनाऽभिपरिप्लुतः ॥ तपस्तेपेततोघोरंवेदज्ञानायपांडव १६ ससमिद्धेमहत्यग्नौशरीरमुपतापयन् ॥

जनयामाससंतापमिंद्रस्यसुमहातपाः १७ ततइंद्रोयवक्रीतमुपगम्ययुधिष्ठिर ॥ अब्रवीत्किस्यहेतोस्त्वमास्थितस्तपउत्तमम् १८ ॥ यवक्रीतउवाच ॥ द्वि

जानामनधीतावैवेदाःसुरगणार्चित ॥ प्रतिभांत्वितितप्येऽहमिदंपरमकंतपः १९ स्वाध्यायार्थेसमारंभोममायंपाकशासन ॥ तपसाज्ञातुमिच्छामिसर्वज्ञाना

निकौशिक २० कालेनमहतावेदाःशक्यागुरुमुखाद्विभो ॥ प्राप्तुंतस्मादयंयत्नःपरमोमेसमास्थितः २१ ॥ इंद्रउवाच ॥ अमार्गएषविप्रर्षेयेनत्वंयातुमिच्छ

३८ सि ॥ किंविघातेनतेविप्रगच्छाधीहिगुरोर्मुखात् २२ ॥लोमशउवाच ॥ एवमुक्त्वागतःशक्रोयवक्रीरपिभारत ॥ भूयएवाकरोद्यत्नंतपस्यमितविक्रमः २३ घोरेणत

पसाराजंस्तप्यमानोमहत्तपः ॥ संतापयामासभृशंदेवेंद्रमितिनःश्रुतम् २४ तंतथातप्यमानंतुतपस्तीव्रंमहामुनिम् ॥ उपेत्यबलभिद्देवोवारयामासवैपुनः २५

एवनाम १ । २ अन्नंब्रह्मौदनंअदितिः पुत्रकामा । साध्येभ्योदेवेभ्योब्रह्मौदनमपचदितिश्रुतेः ३ अयशस्यामयशस्करींअसंशब्द्यामकीर्तनीयां ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

१३ इतरोभरद्वाजस्तपस्व्येवनतुशिष्यादिसंपन्नः १४ । १५ । १६ । १७ । १८ । १९ सर्वज्ञानानिसर्वशास्त्राणि २० । २१ विघातेनआत्मनाशनेन २२ । २३ । २४ । २५

नप्रतिभास्यंतीतिनकारावृत्त्यायोज्यं २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ अमर्त्यइतिच्छेदः

अशक्योऽर्थःसमारब्धोनैतद्बुद्धिकृतंतव ॥ प्रतिभास्यंतिवैवेदास्तवचैवपितुश्चते २६ ॥ यवक्रीतउवाच ॥ नचैतदेवंक्रियतेदेवराजममेप्सितम् ॥ महता नियमेनाहंतप्स्येघोरतरंतपः २७ समिद्धेऽग्नावुपकृत्यांगमंगंहोष्यामिवामघवंस्तन्निबोध ॥ यद्येतदेवंनकरोषिकामंममेप्सितंदेवराजेहसर्वम् २८ ॥ लोमश उवाच ॥ निश्चयंतमभिज्ञायमुनेस्तस्यमहात्मनः ॥ प्रतिवारणहेत्वर्थंबुद्ध्यासंचिंत्यबुद्धिमान् २९ ततइंद्रोऽकरोद्रूपंब्राह्मणस्यतपस्विनः ॥ अनेकशतवर्षस्यदुर्बलस्यसयक्ष्मणः ३० यवक्रीतस्ययत्तीर्थमुचितंशौचकर्मणि ॥ भागीरथ्यांतत्रसेतुंवालुकाभिश्चकारसः ३१ यदाऽस्यवदतोवाक्यंनसचक्रेद्विजोत्तमः ॥ वालुकाभिस्ततःशक्रोगंगांसमभिपूरयन् ३२ वालुकामुष्टिमनिशंभागीरथ्यांव्यसर्जयत् ॥ सेतुमभ्यारभच्छक्रोयवक्रीतंनिदर्शयन् ३३ तंददर्शयवक्रीतोयत्नवंतंनिबंधने ॥ प्रहसंश्चाब्रवीद्वाक्यमिदंसमुनिपुंगवः ३४ किमिदंवर्ततेब्रह्मन्किंचतेहचिकीर्षितम् ॥ अतीवहिमहान्यत्नःक्रियतेऽयंनिरर्थकः ३५ ॥ इंद्रउवाच ॥ बंधिष्येसेतुनागंगांसुखःपंथाभविष्यति ॥ क्लिश्यतेहिजनस्तातततरमाणःपुनःपुनः ३६ ॥ यवक्रीतउवाच ॥ नायंशक्यस्त्वयाबद्धुंमहानोघस्तपोधन ॥ अशक्याद्विनिवर्तस्वशक्यमर्थंसमारभ ३७ ॥ इंद्रउवाच ॥ यथैवभवताचेदंतपोवेदार्थमुद्यतम् ॥ अशक्यंतद्वदस्माभिरयंभारःसमाहितः ३८ ॥ यवक्रीतउवाच ॥ यथातवनिरर्थोऽयमारंभस्त्रिदशेश्वर ॥ तथायदिममापीदंमन्यसेपाकशासन ३९ क्रियतांयद्भवेच्छक्यंत्वयासुरगणेश्वर ॥ वरांश्चमेप्रयच्छान्यान्यैरन्यान्भवितास्म्यति ४० ॥ लोमशउवाच ॥ तस्मैप्रादाद्वरानिंद्रउक्तवान्यान्महातपाः ॥ प्रतिभास्यंतितेवेदाःपित्रासहयथेप्सिताः ४१ यच्चान्यत्कांक्षसेकामंयवक्रीगम्यतामिति ॥ सलब्धकामःपितरंसमेत्याथेदमब्रवीत् ४२ ॥ यवक्रीतउवाच ॥ प्रतिभास्यंतिवैवेदाममतातस्यचोभयोः ॥ अतिचान्यान्भविष्यावोवरालब्धास्तथामया ४३ ॥ भरद्वाजउवाच ॥ दर्पस्तेभवितातातवरॉंल्लब्ध्वायथेप्सितान् ॥ सदर्पपूर्णःकृपणःक्षिप्रमेवविनंक्ष्यसि ४४ अत्राप्युदाहरंतीमागाथादेवैरुदाहृताः ॥ मुनिरासीत्पुरापुत्रबालधिर्नामवीर्यवान् ४५ सपुत्रशोकादुद्विग्नस्तपस्तेपेसुदुष्करम् ॥ भवेन्ममसुतोऽमर्त्यइतितंलब्धवांश्चसः ४६ तस्यप्रसादोवैदेवैःकृतोनत्वमरैःसमः ॥ नामर्त्योविद्यतेमर्त्योनिमित्तायुर्भविष्यति ४७ ॥ बालधिरुवाच ॥ यथेमेपर्वताःशश्वत्तिष्ठंतिसुरसत्तमाः ॥ अक्षयास्तन्निमित्तंमेसुतस्यायुर्भविष्यति ४८ ॥ भरद्वाजउवाच ॥ तस्यपुत्रस्तदाजज्ञेमेधावीक्रोधनस्तदा ॥ सतच्छ्रुत्वाऽकरोद्दर्पमृषींश्चैवावमन्यत ४९ विकुर्वाणोमुनीनांचव्यचरत्समहीमिमाम् ॥ आससादमहावीर्यंधनुषाक्षंमनीषिणम् ५० तस्यापचक्रेमेधावीतंशशापसवीर्यवान् ॥ भवभस्मेतिचोक्तःसनभस्मसमपद्यत ५१ धनुषाक्षस्तुतंदृष्ट्वामेधाविनमनामयम् ॥ निमित्तमस्यमहिषैर्भेदयामासवीर्यवान् ५२ सनिमित्तेविनष्टेतुममारसहसाशिशुः ॥ तंमृतंपुत्रमादायविललापततःपिता ५३ ॥११२॥

अमरइत्यर्थः ४६ । ४७ । ४८ । ४९ । ५० । ५१ निमित्तंपर्वतान्भेदयामासखंडयामास ५२ । ५३

५४ दिष्टंदैवविहितं ५५ । ५६ । ५७ । ५८ । ५९ । ६० ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपेपंचत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ ॥ चंक्रम्यमाणोभृशं पर्यटन् माघवे वैशाखे १ । २ हृतचेतनो वशीकृतचित्तः ३ । ४ एकांतमुन्नीय एकांते कार्यंतंसमाप्य मज्जयामास शोकसमुद्रे इतिशेषः । सज्जयामासेतिपाठे स्वशत्रुमपकर्तुं रैभ्यंसन्नद्धं चकार

लालप्यमानंतंदृष्ट्वामुनयःपरमार्तवत् ॥ ऊचुर्वेदविदःसर्वेगाथांयांतांनिबोधमे ५४ नदिष्टमर्थमत्येतुमीशोमर्त्यःकथंचन ॥ महिषैर्भेदयामासधनुषाक्षोमहीधरान् ५५ एवंलब्ध्वावरान्बालादर्पपूर्णास्तपस्विनः ॥ क्षिप्रमेवविनश्यंतियथानस्यात्तथाभवान् ५६ एषरैभ्योमहावीर्यःपुत्रौचास्यतथाविधौ ॥ तंयथापुत्रनाभ्येषितथाकुर्यास्त्वतंद्रितः ५७ सहिक्रुद्धःसमर्थश्चपुत्रपीडयितुंरुषा ॥ रैभ्यश्चापितपस्वीचकोपनश्चमहानृषिः ५८ ॥ यवक्रीतउवाच ॥ एवंकरिष्येमातापंतातकार्षीःकथंचन ॥ यथाहिमेभवान्मान्यस्तथारैभ्यःपितामम ५९ ॥ लोमशउवाच ॥ उक्त्वासपितरंश्लक्ष्णंयवक्रीरकुतोभयः ॥ विप्रकुर्वनृषीनन्यानतुष्यत्परयामुदा ६० इतिश्रीम॰भा॰आरण्यकेप॰तीर्थयात्राप॰लोमशतीर्थयात्रायांयवक्रीतोपाख्यानेपंचत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ लोमश उवाच ॥ चंक्रम्यमाणःसतदायवक्रीरकुतोभयः ॥ जगाममाधवेमासिरैभ्याश्रमपदंप्रति १ सददर्शाश्रमेरम्येपुष्पितद्रुमभूषिते ॥ विचरंतींस्नुषांतस्यकिन्नरीमिवभारत २ यवक्रीस्तामुवाचेदमुपातिष्ठस्वमामिति ॥ निर्लज्जोलज्जयायुक्तांकामेनहृतचेतनः ३ सातस्यशीलमाज्ञायतस्माच्छापाच्चबिभ्यती ॥ तेजस्वितांचरैभ्यस्यतथेत्युक्त्वाजगामह ४ ततएकांतमुन्नीयमज्जयामासभारत ॥ आजगामतदारैभ्यःस्वमाश्रममरिंदम ५ रुदतींचस्नुषांदृष्ट्वाभार्यामार्तांपरावसोः ॥ सांत्वयन्श्लक्ष्णयावाचापर्यपृच्छद्युधिष्ठिर ६ सातस्मैसर्वमाचष्टयवक्रीभाषितंशुभा ॥ प्रत्युक्तंचयवक्रीतंप्रेक्षापूर्वंतथाऽऽत्मना ७ शृण्वानस्यैवरैभ्यस्ययवक्रेस्तद्विचेष्टनम् ॥ दहन्निवतदाचेतःक्रोधःसमभवन्महान् ८ सतदामन्युनाऽविष्टस्तपस्वीकोपनोभृशम् ॥ अवलुच्यजटामेकांजुहावाग्नौसुसंस्कृते ९ ततःसमभवन्नारीतस्यारूपेणसंमिता ॥ अवलुच्यापरांचापिजुहावाग्नौजटांपुनः १० ततःसमभवद्रक्षोघोराक्षंभीमदर्शनम् ॥ अब्रूतांतौतदारैभ्यंकिंकार्यंकरवामहे ११ तावब्रवीदृषिःक्रुद्धोयवक्रीर्वध्यतामिति ॥ जग्मतुस्तौतथेत्युक्त्वायवक्रीतजिघांसया १२ ततस्तंसमुपास्थायकृत्यासृष्टामहात्मना ॥ कमंडलुंजहारास्यमोहयित्वेवभारत १३ उच्छिष्टंतुयवक्रीतमपकृष्टकमंडलुम् ॥ ततउद्यतशूलःसराक्षसःसमुपाद्रवत् १४ तमाद्रवंतंसंप्रेक्ष्यशूलहस्तंजिघांसया ॥ यवक्रीःसहसोत्थायप्राद्रवद्येनवैसरः १५ जलहीनंसरोदृष्ट्वायवक्रीस्त्वरितःपुनः ॥ जगामसरितःसर्वास्ताश्चाप्यसन्विशोषिताः १६ सकाल्यमानोघोरेणशूलहस्तेनरक्षसा ॥ अग्निहोत्रंपितुर्भीतःसहसाप्रविवेशह १७ सवैप्रविशमानस्तुशूद्रेणांधेनरक्षिणा ॥ निगृहीतोबलाद्द्वारिसोऽवातिष्ठतपार्थिव १८ निगृहीतंतुशूद्रेणयवक्रीतंसराक्षसः ॥ ताडयामासशूलेनसभिन्नहृदयोऽपतत् १९

तदेवाह आजगामेत्यादिना ५ । ६ प्रत्युक्तं प्रत्याख्यातं मदुपरिबलात्कारं कृतवानित्युक्तवतीत्यर्थः ७ । ८ सुसंस्कृतैः स्वरवर्णादिसंस्कारयुक्तैर्मंत्रैः ९ नारी कृत्या १० । ११ । १२ । १३ । १४ । १५ । १६ काल्यमानः सर्वतो निषिध्यमानः अग्निहोत्रे अग्निहोत्रशालायां १७ अवातिष्ठत बहिरेव १८ । १९

२० ॥ इत्यारण्यके० नी०भा०षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥ ॥ भरद्वाजइति आह्निकंस्वाध्यायं प्रत्यहं कर्तव्यं ब्रह्मयज्ञं १ हतपुत्रत्वेन आशौचयुक्तत्वात् २ । ३ । ४
शुद्ध्यति निःसंदेहं भवति ५ । ६ अभ्यगारं प्रविष्टस्य रक्षोभयं न भवेदितिभावः ७ । ८ शूद्रस्य शूद्रकृतंविप्रियं पुत्रनिरोधेनकृतं ९ । १० । ११ । १२ । १३ । १४ किल्बिषीशोकार्क्रां
यवक्रीतंसहत्वातुराक्षसोरैभ्यमागमत् ॥ अनुज्ञातस्तुरैभ्येणतयानार्यासहावसत् २० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थया
त्रायांयवक्रीतोपाख्यानेषट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥ ॥ लोमशउवाच ॥ भरद्वाजस्तुकौंतेयकृत्वास्वाध्यायमाह्निकम् ॥ समित्कलापमादाय
प्रविवेशस्वमाश्रमम् १ तंस्मदृष्ट्वापुरासर्वेप्रत्युत्तिष्ठंतिपावकाः ॥ नत्वेतमुपतिष्ठंतिहतपुत्रंतदाऽग्नयः २ वैकृतंत्वग्निहोत्रेसलक्षयित्वामहातपाः ॥ तमंधंशूद्र
मासीनंगृहपालमथाब्रवीत् ३ किंनुमेनाग्नयःशूद्रप्रतिनंदंतिदर्शनम् ॥ त्वंचापिनयथापूर्वंकच्चित्क्षेममिहाश्रमे ४ कच्चिन्नरैभ्यंपुत्रोमेगतवानल्पचेतनः ॥ एत
दाचक्ष्वमेशीघ्रंनहिशुद्ध्यतिमेमनः ५ ॥ शूद्रउवाच ॥ रैभ्यंयातोनूनमयंपुत्रस्तेमंदचेतनः ॥ तथाहिनिहतःशेतेराक्षसेनबलीयसा ६ प्रकाल्यमानस्तेनायं
शूलहस्तेनरक्षसा ॥ अग्न्यगारंप्रतिद्वारिमयादोर्भ्यांनिवारितः ७ ततःसविहताशोऽत्रजलकामोऽशुचिर्ध्रुवम् ॥ निहतःसोऽतिवेगेनशूलहस्तेनरक्षसा ८ भर
द्वाजस्तुतच्छ्रुत्वाशूद्रस्यविप्रियंमहत् ॥ गतासुंपुत्रमादायविललापसुदुःखितः ९ ॥ भरद्वाजउवाच ॥ ब्राह्मणानांकिलार्थायननुत्वंतप्तवांस्तपः ॥ द्विजानाम
नधीतावैवेदाःसंप्रतिभांत्विति १० तथाकल्याणशीलस्त्वंब्राह्मणेषुमहात्मसु ॥ अनागाःसर्वभूतेषुकर्कशत्वमुपेयिवान् ११ प्रतिषिद्धोमयाताततरैभ्यावसथदर्श
नात् ॥ गतवानेवतंद्रष्टुंकालांतकयमोपमम् १२ यःसजानन्महातेजावृद्धस्यैकंममात्मजम् ॥ गतवानेवकोपस्यवशंपरमदुर्मतिः १३ पुत्रशोकमनुप्राप्तएषरै
भ्यस्यकर्मणा ॥ त्यक्ष्यामित्वामृतेपुत्रप्राणानिष्टतमान्भुवि १४ यथाहंपुत्रशोकेनदेहंत्यक्ष्यामिकिल्बिषी ॥ तथाज्येष्ठःसुतोरैभ्यंहिंस्याच्छीघ्रमनागसम् १५
सुखिनोवैनरायेषांजात्यापुत्रोनविद्यते ॥ येपुत्रशोकमप्राप्यविचरंतियथासुखम् १६ येतुपुत्रकृताच्छोकाद्भृशंव्याकुलचेतसः ॥ शपंतीष्टान्सखीनार्तास्तेभ्यः
पापतरोनुकः १७ परासुश्चसुतोदृष्टःशप्तश्चेष्टःसखामया ॥ ईदृशीमापदंकोऽत्राद्वितीयोऽनुभविष्यति १८ ॥ लोमशउवाच ॥ विलप्यैवंबहुविधंभरद्वाजोऽद
हत्सुतम् ॥ सुसमिद्धंततःपश्चात्प्रविवेशहुताशनम् १९ ॥ इतिश्रीम० आरण्यकेप० तीर्थयात्राप० लोमशतीर्थयात्रायांयवक्रीतोपाख्यानेसप्तत्रिंशदधिकश
ततमोऽध्यायः ॥ १३७ ॥ ॥ लोमशउवाच ॥ एतस्मिन्नेवकालेतुबृहद्द्युम्नोमहीपतिः ॥ सत्रंतेनेमहाभागोरैभ्ययाज्यःप्रतापवान् १ तेनरैभ्यस्यवैपुत्रावर्वा
वसुपरावसू ॥ वृतौसहायौसत्रार्थंबृहद्द्युम्नेनधीमता २ तत्रतौसमनुज्ञातौपित्राकौंतेयजग्मतुः ॥ आश्रमेत्वभवद्रैभ्योभार्याचैवपरावसोः ३ अथावलोकको
ऽगच्छद्गृहानेकःपरावसुः ॥ कृष्णाजिनेनसंवीतंददर्शपितरंवने ४ जघन्यरात्रेनिद्रांधःसावशेषेतमस्यपि ॥ चरंतंगहनेऽरण्येमेनेसपितरंमृगम् ५
तः १५।१६।१७।१८।१९ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥ एतस्मिन्निति १ । २ । ३ अवलोककःअवलोकनार्थी गृहान्भार्या ४।५

६ । ७ । ८ । ९ । १० । ११ । १२ । १३ विट्पतेहेप्रजाधीश १४ । १५ । १६ प्रभाषितो मिथ्यावाद्यसीत्यधिक्षिप्तः १७ रहस्यवेदंसूर्यमंत्रप्रकाशकं वेदंघृणिरितिद्वे अक्षरेसूर्य इतित्रीणि
आदित्यईतित्रीणि । एतद्वैसावित्रस्याष्टाक्षरंपदं श्रियाभिषिक्तमिति काठकब्राह्मणंकृतवान् ददर्श १८ मूर्तिमान्सूर्यस्तंद्विजं ददर्शआत्मानंदर्शयामास १९ तंदेवाःप्रकर्षेणवरयामासुःनि
मृगंतुमन्यमानेनपितावैतेनहिंसितः ॥ अकामयानेनतदाशरीरत्राणमिच्छता ६ तस्यसप्रेतकार्याणिकृत्वासर्वाणिभारत ॥ पुनरागम्यतत्सत्रमब्रवीद्भ्रातरंव
चः ७ इदंकर्मनशक्तस्त्वंवोढुमेकःकथंचन ॥ मयाचहिंसितस्तातोमन्यमानेनतंमृगम् ८ सोऽस्मदर्थेव्रतंतातचरत्वंब्रह्महिंसनम् ॥ समर्थोऽप्यहमेकाकीकर्म
कर्तुमिदंमुने ९ ॥ अर्वावसुरुवाच ॥ करोतुवैभवान्सत्रंबृहद्द्युम्नस्यधीमतः ॥ ब्रह्मवध्यांचरिष्येऽहंत्वदर्थंनियतेंद्रियः १० ॥ लोमशउवाच ॥ सतस्यब्रह्मव
ध्यायाःपारंगत्वायुधिष्ठिर ॥ अर्वावसुस्तदासत्रमाजगामपुनर्मुनिः ११ ततःपरावसुर्दृष्ट्वाभ्रातरंसमुपस्थितम् ॥ बृहद्द्युम्नमुवाचेदंवचनंहर्षगद्गदम् १२ एष
तेब्रह्महायज्ञंमाद्रष्टुंप्रविशेदिति ॥ ब्रह्महाप्रेक्षितेनापिपीडयेत्त्वामसंशयम् १३ ॥ लोमशउवाच ॥ तच्छ्रुत्वैवतदाराजाप्रेष्यानाहसविट्पते ॥ प्रेष्यैरुत्सार्यमा
णस्तुराजन्नर्वावसुस्तदा १४ नमयाब्रह्महत्येयंकृतेत्याहपुनःपुनः ॥ उच्यमानोऽसकृत्प्रेष्यैर्ब्रह्महन्नितिभारत १५ नैवस्मप्रतिजानातिब्रह्मवध्यांस्वयंकृताम् ॥
ममभ्रात्राकृतमिदंमयासपरिमोक्षितः १६ सतथाप्रवदन्क्रोधात्तैश्चप्रेष्यैःप्रभाषितः ॥ तूष्णींजगामब्रह्मर्षिर्वनमेवमहातपाः १७ उग्रंतपःसमास्थायदिवाकर
मथाश्रितः ॥ रहस्यवेदंकृतवान्सूर्यस्यद्विजसत्तमः १८ मूर्तिमांस्तंददर्शाथस्वयमग्रभुगव्ययः ॥ लोमशउवाच ॥ प्रीतास्तस्याभवन्देवाःकर्मणाऽर्वावसो
र्नृप १९ तंतेप्रवरयामासुर्निरासुश्चपरावसुम् ॥ ततोदेवावरंतस्मैददुरग्निपुरोगमाः २० सचापिवरयामासपितुरुत्थानमात्मनः ॥ अनागस्त्वंततोभ्रातुःपि
तुश्चास्मरणंवधे २१ भरद्वाजस्यचोत्थानंयवक्रीतस्यचोभयोः ॥ प्रतिष्ठांचापिवेदस्यसौरस्यद्विजसत्तमः ॥ एवमस्त्वितितंदेवाःप्रोचुश्चापिवरान्ददुः २२
ततःप्रादुर्बभूवुस्तेसर्वएवयुधिष्ठिर ॥ अथाब्रवीद्यवक्रीतोदेवानग्निपुरोगमान् २३ समधीतंमयाब्रह्मव्रतानिचरितानिच ॥ कथंचरैभ्यःशक्तोमामधीयानंतप
स्विनम् २४ तथायुक्तेनविधिनानिहंतुममरोत्तमाः ॥ देवाऊचुः ॥ मैवंकृथायवक्रीतेतथावदसिवैमुने ॥ ऋतेगुरुमधीताहिसुखंवेदास्त्वयापुरा २५ अनेनतु
गुरून्दुःखात्तोषयित्वाऽऽत्मकर्मणा ॥ कालेनमहताक्लेशाद्ब्रह्माधिगतमुत्तमम् २६ ॥ लोमशउवाच ॥ यवक्रीतमथोक्त्वैवंदेवाःसेंद्रपुरोगमाः ॥ संजीवयित्वा
तान्सर्वान्पुनर्जग्मुस्त्रिविष्टपम् २७ आश्रमस्तस्यपुण्योऽयंसदापुष्पफलद्रुमः ॥ अत्रोष्यराजशार्दूलसर्वंपापंप्रमोक्ष्यसि २८ ॥ ॥ इतिश्रीमहाभारतेआर
ण्यकेप० तीर्थयात्रापर्वणिलोमश० यवक्रीतोपाख्यानेअष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ ॥ छ ॥ ॥ लोमशउवाच ॥ उशीरबीजंमैना
कंगिरिंश्वेतंचभारत ॥ समतीतोऽसिकौंतेयकालशैलंचपार्थिव १ एषागंगासप्तविधाराजतेभरतर्षभ ॥ स्थानंविरजसंपुण्यंयत्राग्निर्नित्यमिध्यते २
रासुर्निराचक्रुर्यज्ञादितिशेषः २० । २१ प्रतिष्ठांसंप्रदायप्रवृत्तिंसौरोवेदःपूर्वमुक्तः २२ । २३ समधीतंसम्यक्प्राप्तंब्रह्मवेदः २४ । २५ । २६ । २७ । २८ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भार
तभावदीपेअष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ ॥ छ ॥ उशीरेति १ यत्राग्निर्नित्यमिध्यतइति त्रियोगिनारायणाख्यंहरिद्वारात्परतः स्थानमस्ति २

३ । ४ । ५ । ६ । ७ । ८ । ९ । १० विशालाबदरी ११ । १२ । १३ । १४ । १५ इंद्रस्यइंद्रसंबंधिनोजांबूनदंसुवर्णं तन्मयात्पर्वतान्मेरोःगोपाययेति पिजेतस्यरूपंदेवीरितिशेषः स्वार्थे

एतद्वैमानुषेणाद्यनशक्यंद्रष्टुमद्भुतम् ॥ समाधिंकुरुताव्यग्रास्तीर्थान्येतानिद्रक्ष्यथ ३ एतद्द्रक्ष्यसिदेवानामाक्रीडंचरणांकितम् ॥ अतिक्रांतोऽसिकौंतेयका
लशैलंचपर्वतम् ४ श्वेतंगिरिंप्रवेक्ष्यामोमंदरंचैवपर्वतम् ॥ यत्रमाणिवरोयक्षःकुबेरश्चैवयक्षराट् ५ अष्टाशीतिसहस्राणिगंधर्वाःशीघ्रगामिनः ॥ तथाकिंपुरुषा
राजन्यक्षाश्चैवचतुर्गुणाः ६ अनेकरूपसंस्थानानानाप्रहरणाश्चते ॥ यक्षेंद्रंमनुजश्रेष्ठमाणिभद्रमुपासते ७ तेषामृद्धिरतीवात्रगतौवायुसमाश्चते ॥ स्थानात्प्र
च्यावयेयुर्येदेवराजमपिध्रुवम् ८ तैस्तातबलिभिर्गुप्तायातुधानैश्चरक्षिताः ॥ दुर्गमाःपर्वताःपार्थसमाधिंपरमंकुरु ९ कुबेरसचिवाश्चान्येरौद्रामैत्राश्चराक्षसाः ॥
तैःसमेष्यामकौंतेयसंयतोविक्रमेणच १० कैलासःपर्वतोराजन्षड्योजनसमुच्छ्रितः ॥ यत्रदेवाःसमायांतिविशालायत्रभारत ११ असंख्येयास्तुकौंतेययक्ष
राक्षसकिन्नराः ॥ नागाःसुपर्णागंधर्वाःकुबेरसदनंप्रति १२ तान्विगाहस्वपार्थाद्यतपसाचदमेनच ॥ रक्ष्यमाणोमयाराजन्भीमसेनबलेनच १३ स्वस्तिते
वरुणोराजायमश्चसमितिंजयः ॥ गंगाचयमुनाचैवपर्वतश्चदधातुते १४ मरुतश्चसहाश्विभ्यांसरितश्चसरांसिच ॥ स्वस्तिदेवासुरेभ्यश्चवसुभ्यश्चमहाद्युते
१५ इंद्रस्यजांबूनदपर्वताद्वैशृणोमिघोषंतवदेविगंगे ॥ गोपाययेमंसुभगेगिरिभ्यःसर्वाजमीढोपचितंनरेंद्रम् १६ ददस्वशर्मप्रविविक्षतोऽस्यशैला
न्निमाञ्छैलसुतेनृपस्य ॥ उक्त्वातथासागरगांसविप्रोयत्तोभवस्येतिशशासपार्थम् १७ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ अपूर्वोऽयंसंभ्रमो
लोमशस्यकृष्णांचसर्वेरक्षतमाप्रमादम् ॥ देशोह्ययंदुर्गतमोमतोऽस्यतस्मात्परंशौचमिहाचरध्वम् १८ ॥ वैशंपायनउवाच ॥ ततोऽब्रवीद्भीममुदारवीर्यं
कृष्णांयत्तःपालयभीमसेन ॥ शून्येऽर्जुनेऽसन्निहितेचतातत्वामेवकृष्णाभजतेभयेषु १९ ततोमहात्मासयमौसमेत्यमूर्धन्युपाघ्रायविमृज्यगात्रे ॥ उवाचतौबा
ष्पकलंसराजामाभैष्टमागच्छतमप्रमत्तौ २० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांकैलासादिगिरिप्रवेशेऊनचत्वारिंशदधि
कशततमोऽध्यायः ॥ १३९ ॥ ॥ ७ ॥ ॥ युधिष्ठिरउवाच ॥ अंतर्हितानिभूतानिबलवंतिमहांतिच ॥ अग्निनातपसाचैवशक्यंगंतुंवृकोदर १ सन्नि
वर्तयकौंतेयक्षुत्पिपासेबलाश्रयात् ॥ ततोबलंचदाक्ष्यंचसंश्रयस्ववृकोदर २ ऋषेस्त्वयाश्रुतंवाक्यंकैलासंपर्वतंप्रति ॥ बुध्याप्रपश्यकौंतेयकथंकृष्णागमिष्यति
३ अथवासहदेवेनधौम्येनचसमंविभो ॥ सूतैःपौरोगवैश्चैवसर्वैश्चपरिचारकैः ४ रथैरश्वैश्चयेचान्येविप्राःक्लेशासहाःपथि ॥ सर्वैस्त्वंसहितोभीमनिवर्तस्वायते
क्षण५त्रयोवयंगमिष्यामोलघ्वाहारायतव्रताः॥ अहंचनकुलश्चैवलोमशश्चमहातपाः६ममागमनमाकांक्षन्गंगाद्वारेसमाहितः॥वसेहद्रौपदींरक्षन्यावदागमनंमम७ ॥११४॥

वाणिचूआजमीढवंशेअपचितंपूजितंश्रेष्ठमित्यर्थः १६ ददस्वदेहि १७ शौचंवाङ्मनःकायशुद्धिं १८ । १९ मैष्टमितिच्छेदः २० ॥ इत्यारण्यके० नी० भा० ऊनचत्वारिंशद
धिकशततमोऽध्यायः ॥ १३९ ॥ ॥ ७ ॥ ॥ अंतर्हितानीति १ । २ । ३ । ४ । ५ । ६ । ७

८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ परिदायरक्षार्थंसमर्प्य २८ । २९ ॥ इत्यारण्यकेपर्वणिनील

भीमउवाच ॥ राजपुत्रीश्रमेणार्तादुःखार्ताचैवभारत ॥ व्रजत्येवहिकल्याणीश्वेतवाहदिदृक्षया ८ तवचाप्यरतिस्तीव्रावर्ततेतमपश्यतः ॥ गुडाकेशंमहात्मानं
संग्रामेष्वपलायिनम् ९ किंपुनःसहदेवंचमांचकृष्णांचभारत ॥ द्विजाःकामंनिवर्तंतांसर्वेचपरिचारकाः १० सूताःपौरोगवाश्चैवयंचमन्येतनोभवान् ॥ नह्यहं
हातुमिच्छामिभवंतमिहकर्हिचित् ११ शैलेऽस्मिन्राक्षसाकीर्णेदुर्गेषुविषमेषुच ॥ इयंचापिमहाभागाराजपुत्रीपतिव्रता १२ त्वामृतेपुरुषव्याघ्रनोत्सहेद्विनिव
र्तितुम् ॥ तथैवसहदेवोऽयंसततंत्वामनुव्रतः १३ नजातुविनिवर्तेतमनोज्ञोह्यहमस्यवै ॥ अपिचात्रमहाराजसव्यसाचिदिदृक्षया १४ सर्वेलालसभूताःस्मत
स्माद्यास्यामहेसह ॥ यद्यशक्योरथैर्गंतुंशैलोऽयंबहुकंदरः १५ पद्भिरेवगमिष्यामोमाराजन्विमनाभव ॥ अहंवहिष्येपांचालींयत्रयत्रनशक्ष्यति १६ इतिमेवर्त
तेबुद्धिर्माराजन्विमनाभव ॥ सुकुमारौतथावीरौमाद्रीनंदिकरावुभौ ॥ दुर्गेसंतारयिष्यामियत्राशक्तौभविष्यतः १७ ॥ युधिष्ठिरउवाच ॥ एवंतेभाषमाणस्य
बलंभीमाभिवर्धताम् ॥ यत्त्वमुत्सहसेवोढुंपांचालींचयशस्विनीम् १८ यमजौचापिभद्रंतेनैतदन्यत्रविद्यते ॥ बलंतवयशश्चैवधर्मःकीर्तिश्चवर्धताम् १९ य
स्त्वमुत्सहसेनेतुंभ्रातरौसहकृष्णया ॥ मातेग्लानिर्महाबाहोमाचतेऽस्तुपराभवः २० ॥ ॥ वैशंपायनउवाच ॥ ततःकृष्णाऽब्रवीद्वाक्यंप्रहसंतीमनोरमा ॥ ग
मिष्यामिनसंतापःकार्योमांप्रतिभारत २१ ॥ लोमशउवाच ॥ तपसाशक्यतेगंतुंपर्वतंगंधमादनम् ॥ तपसाचैवकौंतेयसर्वेयोक्ष्यामहेवयम् २२ नकुलःसहदे
वश्चभीमसेनश्चपार्थिव ॥ अहंचत्वंचकौंतेयद्रक्ष्यामःश्वेतवाहनम् २३ ॥ वैशंपायनउवाच ॥ एवंसंभाषमाणास्तेसुबाहुविषयंमहत् ॥ ददृशुर्मुदिताराजन्प्रभू
तगजवाजिमत् २४ किराततंगणाकीर्णंपुलिंदशतसंकुलम् ॥ हिमवत्यमरैर्जुष्टंबह्वाश्चर्यसमाकुलम् ॥ सुबाहुश्चापितान्दृष्ट्वापूजयाप्रत्यगृह्णत २५ विषयांतेकु
लिंदानामीश्वरःप्रीतिपूर्वकम् ॥ ततस्तेपूजितास्तेनसर्वएवसुखोषिताः २६ प्रतस्थुर्विमलेसूर्येहिमवंतंगिरिंप्रति ॥ इंद्रसेनमुखांश्चापिभृत्यान्पौरोगवांस्तथा
२७ सूदांश्चपारिबर्हांश्चद्रौपद्याःसर्वशोनृप ॥ राज्ञःकुलिंदाधिपतेःपरिदायमहारथाः २८ पद्भिरेवमहावीर्याययुःकौरवनंदनाः ॥ तेशनैःप्राद्रवन्सर्वेकृष्णया
सहपांडवाः ॥ तस्माद्देशात्सुसंहृष्टाद्रष्टुकामाधनंजयम् २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांगंधमादनप्रवेशेचत्वारिं
३९ शदधिकशततमोऽध्यायः ॥ १४० ॥ ॥ युधिष्ठिरउवाच ॥ भीमसेनयमौचोभौपांचालिचनिबोधत ॥ नास्तिभूतस्यनाशोवैपश्यतास्मान्वनेचरान् १
दुर्बलाःक्लेशिताःस्मेतियद्द्रवामेतरेतरम् ॥ अशक्येऽपिव्रजामोयद्धनंजयदिदृक्षया २ तन्मेदहतिगात्राणितूलराशिमिवानलः ॥ यच्चवीरंनपश्यामिधनंजयमु
पांतिकात् ३ तस्यदर्शनतृष्णंमांसानुजंवनमास्थितम् ॥ याज्ञसेन्याःपरामर्शःसचवीरदहत्युत ४

कंठीये भारतभावदीपे चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ ॥ ७ ॥ भीमसेनेतिभूतस्यप्राकनकर्मणः १ । २ । ३ परामर्शः केशेषुग्रहणं ४

५ । ६ । ७ । ८ अप्रतिमानंनास्ति प्रतिमानं सादृश्यं यस्य सोऽप्रतिमानस्तं ९ प्रभिन्नं स्रवन्मदं १० अनवरोऽहीनः ११ । १२ । १३ । १४ अभयस्यच दाताअमितात्मा महात्मनाः१५
१६।१७।१८ अमितमहिंसितमजितमिति यावत् १९ हेभीम २० सोमइति मधुरत्वाक्यस्त्वं लक्ष्यते २१ । २२ । २३ नलिनींपुष्करिणीं २४ । २५ । २६ अनियतोऽशुचिः २७ । २८ इत्या

नकुलात्पूर्वजंपार्थंनपश्याम्यमितौजसम् ॥ अजेयमुग्रधन्वानंतेनतप्येवृकोदर ५ तीर्थानिचैवरम्याणिवनानिचसरांसिच ॥ चरामिसहयुष्माभिस्तस्यदर्श
नकांक्षया ६ पंचवर्षाण्यहंवीरंसत्यसंधंधनंजयम् ॥ यन्नपश्यामिबीभत्सुंतेनतप्येवृकोदर ७ तंवैश्यामंगुडाकेशंसिंहविक्रांतगामिनम् ॥ नपश्यामिमहाबाहुं
तेनतप्येवृकोदर ८ कृतास्त्रंनिपुणंयुद्धेऽप्रतिमानंधनुष्मताम् ॥ नपश्यामिकुरुश्रेष्ठतेनतप्येवृकोदर ९ चरंतमरिसंघेषुकालेक्रुद्धमिवांतकम् ॥ प्रभिन्नमिवमा
तंगंसिंहस्कंधंधनंजयम् १० यःसशक्रादनवरोवीर्येणद्रविणेनच ॥ यमयोःपूर्वजःपार्थःश्वेताश्वोऽमितविक्रमः ११ दुःखेनमहताऽऽविष्टस्तंनपश्यामिफाल्गु
नम् ॥ अजेयमुग्रधन्वानंतेनतप्येवृकोदर १२ सततंयःक्षमाशीलःक्षिप्यमाणोऽप्यणीयसा ॥ ऋजुमार्गप्रपन्नस्यशर्मदाताऽभयस्यच १३ सतुजिह्मप्रवृत्तस्य
माययाऽभिजिघांसतः ॥ अपिवज्रधरस्यापिभवेत्कालविषोपमः १४ शत्रोरपिप्रपन्नस्यसोऽनृशंसःप्रतापवान् ॥ दाताऽभयस्यबीभत्सुरमितात्मामहाबलः
१५ सर्वेषामाश्रयोऽस्माकंरणेऽरीणांप्रमर्दिता ॥ आहर्तासर्वरत्नानांसर्वेषांनःसुखावहः १६ रत्नानियस्यवीर्येणदिव्यान्यासन्पुरामम ॥ बहूनिबहुजातीनि
यानिप्राप्तःसुयोधनः १७ यस्यबाहुबलाद्वीरसभाचासीत्पुरामम ॥ सर्वरत्नमयीख्यातात्रिषुलोकेषुपांडव १८ वासुदेवसमंवीर्येकार्तवीर्यसमंयुधि ॥ अजेय
मजितंयुद्धेतंनपश्यामिफाल्गुनम् १९ संकर्षणंमहावीर्यंत्वांचभीमापराजितम् ॥ अनुयातःस्ववीर्येणवासुदेवंचशत्रुहा २० यस्यबाहुबलेतुल्यःप्रभावेचपुरं
दरः ॥ जवेवायुर्मुखेसोमःक्रोधेमृत्युःसनातनः २१ तेवयंतंनरव्याघ्रंसर्वेवीरदिदृक्षवः ॥ प्रवेक्ष्यामोमहाबाहोपर्वतंगंधमादनम् २२ विशालाबदरीयत्रनरनारा
यणाश्रमः ॥ तंसदाध्युषितंयक्षैर्द्रक्ष्यामोगिरिमुत्तमम् २३ कुबेरनलिनींरम्यांराक्षसैरभिसेविताम् ॥ पद्भिरेवगमिष्यामस्तप्यमानामहत्तपः २४ नचयानवता
शक्योगंतुंदेशोवृकोदर ॥ ननृशंसेनलुब्धेननाप्रशांतेनभारत२५तत्रसर्वेगमिष्यामोभीमार्जुनगवेषिणः ॥ सायुधाबद्धनिस्त्रिंशाःसार्धंविप्रैर्महाव्रतैः२६ मक्षिकादं
शमशकान्सिंहान्व्याघ्रान्सरीसृपान्॥प्राप्नोत्यनियतःपार्थनियतस्तान्नपश्यति२७तेवयंनियतात्मानःपर्वतंगंधमादनम्॥ प्रवेक्ष्यामोमिताहाराधनंजयदिदृक्षवः
२८ ॥ इतिश्रीमहाभारतेआरण्यकेप० तीर्थयात्रापर्वणिलोमशतीर्थयात्रायांगंधमादनप्रवेशे एकचत्वारिंशदधिकशततमोऽध्यायः ॥१४१॥ ॥लोमशउवाच॥
द्रष्टारःपर्वताःसर्वेनद्यःसपुरकाननाः॥तीर्थानिचैवश्रीमंतिस्पृष्टंचसलिलंकरैः१ पर्वतंमंदरंदिव्यमेषपंथाःप्रयास्यति॥ समाहितानिरुद्विग्नाःसर्वेभवतपांडवाः२अ
यंदेवनिवासोवैगंतव्योवोभविष्यति॥ऋषीणांचैवदिव्यानांनिवासःपुण्यकर्मणाम्३एषाशिवजलापुण्यायातिसौम्यमहानदी॥बदरीप्रभवाराजन्देवर्षिगणसेविता४

ण्यकेपर्वणिनैलकंठीये भारतभावदीपे एकचत्वारिंशदधिकशततमोऽध्यायः १४१ ॥ भोद्रष्टारः सर्वेमंदराद्न्येपर्वताद्दष्टाइतिशेषः १ । २ । ३ महानदीगंगा अलकनंदा वा ४

उपयाताइष्टसिद्ध्यर्थं प्रार्थिता ५ सामगाः तैत्तिरीयके ब्रह्मविद्रेयं सामश्रूयते । एतत्साम गायन्नास्ते हा ३ वुहा ३ वुहा ३ वुअहमन्नमित्यादि मरीच्यादयोऽत्रसार्वात्म्यं स्वस्य पश्यंतोगा
यंतीत्यर्थः ६ आह्निकंनैयमिकंजपंपरिधावंति परिचरंति तमिंद्रं ७ । ८ । ९ वादतवादयत अक्षरलोप आर्षः १० । ११ । १२ पांडुरंश्वेतंअस्थ्नांराशिमितिशेषः १३ । १४ । १५ नर

एषावैहायसैर्नित्यंवालखिल्यैर्महात्मभिः ॥ अर्चिताचोपयाताचगंधर्वैश्चमहात्मभिः ५ अत्रसामस्मगायंतिसामगाःपुण्यनिःस्वनाः ॥ मरीचिःपुलहश्चैवभृगु
श्चैवांगिरास्तथा ६ अत्राह्निकंसुरश्रेष्ठोजपतेसमरुद्गणः ॥ साध्याश्चैवाश्विनौचैवपरिधावंतितंतदा ७ चंद्रमाःसहसूर्येणज्योतींषिचग्रहैःसह ॥ अहोरात्रविभा
गेननदीमेनामनुव्रजन् ८ एतस्याःसलिलंमूर्ध्निवृषांकःपर्यधारयत् ॥ गंगाद्वारेमहाभागयेनलोकस्थितिर्भवेत् ९ एतांभगवतींदेवींभवंतःसर्वएवहि ॥ प्रयतेना
त्मनाताताप्रतिगम्याभिवादत १० तस्यतद्वचनंश्रुत्वालोमशस्यमहात्मनः ॥ आकाशगंगांप्रयताःपांडवास्तेऽभ्यवादयन् ११ अभिवाद्यचतेसर्वेपांडवाध
र्मचारिणः ॥ पुनःप्रयाताःसंहृष्टाःसर्वैःऋषिगणैःसह १२ ततोदूरात्प्रकाशंतंपांडुरंमेरुसंनिभम् ॥ ददृशुस्तेनरश्रेष्ठाविकीर्णंसर्वतोदिशम् १३ तान्प्रष्टुकामा
न्विज्ञायपांडवान्सतुलोमशः ॥ उवाचवाक्यंवाक्यज्ञःशृणुध्वंपांडुनंदनाः १४ एतद्विकीर्णंसुश्रीमत्कैलासशिखरोपमम् ॥ यत्पश्यसिनरश्रेष्ठपर्वतप्रतिमंस्थि
तम् १५ एतान्यस्थीनिदैत्यस्यनरकस्यमहात्मनः ॥ पर्वतप्रतिमंभातिपर्वतप्रस्तराश्रितम् १६ पुरातनेनदेवेनविष्णुनापरमात्मना ॥ दैत्योविनिहतस्तेन
सुरराजहितैषिणा १७ दशवर्षसहस्राणितपस्तप्यन्महामनाः ॥ ऐंद्रंप्रार्थयतेस्थानंतपःस्वाध्यायविक्रमात् १८ तपोबलेनमहताबाहुवेगबलेनच ॥ नित्यमेव
दुराधर्षोधर्षयन्सदितेःसुतः १९ सतुतस्यबलंज्ञात्वाधर्मंचचरितव्रतम् ॥ भयाभिभूतःसंविग्नःशक्रआसीत्तदाऽनघ २० तेनसंचिंतितोदेवोमनसाविष्णुरव्य
यः ॥ सर्वत्रगःप्रभुःश्रीमानागतश्चस्थितोबभौ २१ ऋषयश्चापितंसर्वेतुष्टुवुश्चदिवौकसः ॥ तंदृष्ट्वाज्वलमानश्रीर्भगवान्हव्यवाहनः २२ नष्टतेजाःसमभवत्तस्य
तेजोभिभर्त्सितः ॥ तंदृष्ट्वावरदंदेवंविष्णुंदेवगणेश्वरम् २३ प्रांजलिःप्रणतोभूत्वानमस्कृत्यचवज्रभृत् ॥ प्राहवाक्यंततस्तत्त्वंयतस्तस्यभयंभवेत् २४ विष्णु
रुवाच ॥ जानामितेभयंशक्रदैत्येंद्रान्नरकात्ततः ॥ ऐंद्रंप्रार्थयतेस्थानंतपःसिद्धेनकर्मणा २५ सोऽहमेनंतवप्रीत्यातपःसिद्धमपिध्रुवम् ॥ वियुनज्मिदेहाद्देवेंद्र
मुहूर्तंप्रतिपालय २६ तस्यविष्णुर्महातेजाःपाणिनाचेतनांहरत् ॥ सपपाततोभूमौगिरिराजइवाहतः २७ तस्यैतदस्थिसंघातंमायाविनिहतस्यवै ॥ इदं
द्वितीयमपरंविष्णोःकर्मप्रकाशते २८ नष्टावसुमतीकृत्स्नापातालेचैवमज्जिता ॥ पुनरुद्धरितातेनवाराहेणैकशृंगिणा २९ ॥ युधिष्ठिरउवाच ॥ भगवन्विस्तरे
णेमांकथांकथयतत्त्वतः ॥ कथंतेनसुरेशेननष्टावसुमतीतदा ३० योजनानांशतंब्रह्मन्पुनरुद्धरितातदा ॥ केनचैवप्रकारेणजगतोधरणीध्रुवा ३१ शिवादेवी
महाभागासर्वसस्यप्ररोहिणी ॥ कस्यचैवप्रभावाद्वियोजनानांशतंगता ३२

कस्य भौमासुरस्य १६ । १७ । १८ । १९ । २० । २१
२२ । २३ । २४ । २५ । २६ पाणिना चपेटाघातेन चेतना हरत्प्राणान्जहार २७ । २८ । २९ । ३० केनचप्रकारेणउद्धरिता पुनरुद्धृतेतिशेषः ३१ गताअधस्तादिति शेषः ३२

म०भा०टी० ३३ । ३४ । ३५ । ३६ पशवश्चगावश्च एडकामेषाश्च पशुगवेडका ३७।३८,३९ । ४० । ४१ । ४२ । ४३ नते त्वयाहेमहिकुर्मिकरोमि ४४ । ४५ घूमंघूर्वं ज्वलयन्निवहेतौ शतृप्रत्ययः यथा वन०

॥११६॥ केनतद्वीर्यंसर्वस्वंदर्शितंपरमात्मनः ॥ एतत्सर्वंयथातत्त्वमिच्छामिद्विजसत्तम ॥ श्रोतुंविस्तरशःसर्वंत्वंहितस्यप्रतिश्रयः ३३ ॥ लोमशउवाच ॥ यत्तेऽहंपरि अ०
पृष्टोऽस्मिकथामेतांयुधिष्ठिर ॥ तत्सर्वमखिलेनेहश्रूयतांममभाषतः ३४ पुराकृतयुगेतातवर्त्तमानेभयंकरे ॥ यमत्वंकारयामासआदिदेवःपुरातनः ३५ यमत्वं
कुर्वतस्तस्यदेवदेवस्यधीमतः ॥ नतत्रम्रियतेकश्चिज्जायतेवातथाऽच्युत ३६ वर्धंतेपक्षिसंघाश्चतथापशुगवेडकम् ॥ गवाश्वंचमृगाश्चैवसर्वेतेपिशिताशनाः ३७ ॥१४२॥
तथापुरुषशार्दूलमानुषाश्चपरंतप ॥ सहस्रशोह्ययुतशोवर्धंतेसलिलंयथा ३८ एतस्मिन्संकुलेतातवर्त्तमानेभयंकरे ॥ अतिभाराद्वसुमतीयोजनानांशतंगता
३९ साविव्यथितसर्वांगीभारेणाक्रांतचेतना ॥ नारायणंवरंदेवंप्रपन्नाशरणंगता ४० ॥ पृथिव्युवाच ॥ भगवंस्त्वत्प्रसादाद्धितिष्ठेयंसुचिरंत्विह ॥ भारेणास्मि
समाक्रांतानशक्नोमिस्मवर्तितुम् ४१ ममेमंभगवन्भारंव्यपनेतुंत्वमर्हसि ॥ शरणागताऽस्मितेदेवप्रसादंकुरुमेविभो ४२ तस्यास्तद्वचनंश्रुत्वाभगवानक्षरःप्र
भुः ॥ प्रोवाचवचनंहृष्टःश्रव्याक्षरसमीरितम् ४३ ॥ ॥ विष्णुरुवाच ॥ ॥ नतेमहिभयंकार्यंभारार्तेवसुधारिणि ॥ अयमेवंतथाकुर्मियथालघ्वीभविष्यसि
४४ ॥ लोमशउवाच ॥ ॥ सतांविसर्जयित्वातुवसुधांशैलकुंडलाम् ॥ ततोवराहःसंवृत्तएकशृंगोमहाद्युतिः ४५ रक्ताभ्यांनयनाभ्यांतुभयमुत्पादयन्निव ॥ धूमं
चज्वलयँल्लक्ष्म्यातत्रदेशेव्यवर्धत ४६ सगृहीत्वावसुमतींशृंगेणैकेनभास्वता ॥ योजनानांशतंवीरसमुद्धरतिसोऽक्षरः ४७ तस्यांचोद्धार्यमाणायांसंक्षोभःसम
जायत ॥ देवाःसंक्षुभिताःसर्वेऋषयश्चतपोधनाः ४८ हाहाभूतमभूत्सर्वंत्रिदिवंव्योमभूस्तथा ॥ नपर्यवस्थितःकश्चिद्देवोवामानुषोऽपिवा ४९ ततोब्रह्माणमा
सीनंज्वलमानमिवश्रिया ॥ देवाःसर्षिगणाश्चैवउपतस्थुरनेकशः ५० उपसर्प्यचदेवेशंब्रह्माणंलोकसाक्षिकम् ॥ भूत्वाप्रांजलयःसर्वेवाक्यमुच्चारयंस्तदा ५१
लोकाःसंक्षुभिताःसर्वेव्याकुलंचचराचरम् ॥ समुद्राणांचसंक्षोभस्त्रिदशेशप्रकाशते ५२ सैषावसुमतीकृत्स्नायोजनानांशतंगता ॥ किमेतत्किंप्रभावेणयेनेदंव्या
कुलंजगत् ॥ आख्यातुनोभवाञ्शीघ्रंविसंज्ञाःस्मेहसर्वशः ५३ ॥ ॥ ब्रह्मोवाच ॥ असुरेभ्योभयंनास्तियुष्माकंकुत्रचित्क्वचित् ॥ श्रूयतांयत्कृतेत्वेषसंक्षोभो
जायतेऽमराः ५४ योऽसौसर्वत्रगःश्रीमानक्षरात्माव्यवस्थितः ॥ तस्यप्रभावात्संक्षोभस्त्रिदिवस्यप्रकाशते ५५ यैषावसुमतीकृत्स्नायोजनानांशतंगता ॥ समु
द्धृतापुनस्तेनविष्णुनापरमात्मना ५६ तस्यामुद्धार्यमाणायांसंक्षोभःसमजायत ॥ एवंभवंतोजानंतुच्छिद्यतांसंशयश्चवः ५७ ॥ देवाऊचुः ॥ कतद्भूतंवसुमतीं
समुद्धरतिहृष्टवत् ॥ तंदेशंभगवन्ब्रूहितत्रयास्यामहेवयम् ५८ ॥११६॥

यथाधूमो ज्वलति तथातथाऽवर्धतेत्यर्थः ४६ अक्षरो वेदात्मा ४७ । ४८ । ४९ । ५० वाक्यमुच्चारयमुच्चारितवंतः ५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८

नंदनेइंद्रवने अत्रएतत्समीपे ५९ । ६० । ६१ । ६२ । ६३ ॥ इत्यार०नी०भा०द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ ॥ तेशूराइति १ । २ ।३ । ४। ५।६।७।८।९।१०।११।१२
ब्रह्मोवाच ॥ हंतगच्छतभद्रंवोनंदनेपश्यतास्थितम् ॥ एषोऽत्रभगवाञ्श्रीमान्सुपर्णःसंप्रकाशते ५९ वाराहेणैवरूपेणभगवाँल्लोकभावनः ॥ कालानलइवा
भातिपृथिवीतलमुद्धरन् ६० एतस्योरसिसुव्यक्तंश्रीवत्समभिराजते ॥ पश्यध्वंविबुधाःसर्वेभूतमेतदनामयम् ६१ ॥लोमशउवाच॥ ततोदृष्ट्वामहात्मानंश्रुत्वा
चामंत्र्यचामराः॥ पितामहंपुरस्कृत्यजग्मुर्देवायथागतम् ६२॥वैशंपायनउवाच॥ श्रुत्वातुतांकथांसर्वेपांडवाजनमेजय ॥लोमशादेशितेनाशुपथाजग्मुःप्रहृष्टवत्
६३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांगंधमादनप्रवेशेद्विचत्वारिंशदधिकशततमोऽध्यायः॥१४२ ॥वैशंपायनउवाच॥
तेशूरास्ततधन्वानस्तूणवंतःसमार्गणाः ॥ बद्धगोधांगुलित्राणाःखड्गवंतोऽमितौजसः १ परिगृह्यद्विजश्रेष्ठाञ्ज्येष्ठाःसर्वधनुष्मताम् ॥ पांचालीसहिताराजन्
प्रययुर्गंधमादनम् २ सरांसिसरितश्चैवपर्वतांश्चवनानिच ॥ वृक्षांश्चबहुलच्छायान्ददृशुर्गिरिमूर्धनि ३ नित्यपुष्पफलान्देशान्देवर्षिगणसेवितान् ॥ आत्मन्या
त्मानमाधायवीरामूलफलाशिनः ४ चेरुरुच्चावचाकारान्देशान्विषमसंकटान् ॥ पश्यंतोमृगजातानिबहूनिविविधानिच ५ ऋषिसिद्धामरयुतंगंधर्वाप्सरसां
प्रियम् ॥ विविशुस्तेमहात्मानःकिन्नराचरितंगिरिम् ६ प्रविशत्स्वथवीरेषुपर्वतंगंधमादनम् ॥ चंडवातंमहद्वर्षंप्रादुरासीद्विशांपते ७ ततोरेणुःसमुद्भूतःसपत्र
बहुलोमहान् ॥ पृथिवींचांतरिक्षंचद्यांचैवसहसाऽऽवृणोत् ८ नस्मप्रज्ञायतेकिंचिदावृतेव्योम्निरेणुना ॥ नचापिशेकुस्तत्कर्तुमन्योन्यस्याभिभाषणम् ९ न
चापश्यंस्ततोऽन्योन्यंतमसाऽऽवृतचक्षुषः ॥ आकृष्यमाणावातेनसाश्मचूर्णेनभारत १० द्रुमाणांवातभग्नानांपततांभूतलेऽनिशम् ॥ अन्येषांचमहीजानां
शब्दःसमभवन्महान् ११ द्यौःस्वित्पततिकिंभूमिर्दीर्यतेपर्वतोनुकिम् ॥ इतितेमेनिरेसर्वेपवनेनापिमोहिताः १२ तेयथाऽनंतरान्वृक्षान्वल्मीकान्विषमाणिच ॥
पाणिभिःपरिमार्गंतोभीतावायोर्निलिल्यिरे १३ ततःकार्मुकमादायभीमसेनोमहाबलः ॥ कृष्णामादायसंगम्यतस्थावाश्रित्यपादपम् १४ धर्मराजश्चधौम्यश्च
निलिल्यातेमहावने ॥ अग्निहोत्राण्युपादायसहदेवस्तुपर्वते १५ नकुलोब्राह्मणाश्चान्येलोमशश्चमहातपाः ॥ वृक्षानासाद्यसंत्रस्तास्तत्रतत्रनिलिल्यिरे १६ मं
दीभूतेतुपवनेतस्मिन्रजसिशाम्यति ॥ महद्भिर्जलधारौघैर्वर्षमभ्याजगामह १७ भृशंचटचटाशब्दोवज्राणांक्षिप्यतामिव ॥ ततस्ताश्चंचलाभासश्चेरुरभ्रेषु
विद्युतः १८ ततोऽश्मसहिताधाराःसंवृण्वंत्यःसमंततः ॥ प्रपेतुरनिशंतत्रशीघ्रवातसमीरिताः १९ तत्रसागरगाह्यापःकीर्यमाणाःसमंततः ॥ प्रादुरासन्सकलु
षाःफेनवत्योविशांपते २० वहंत्योवारिबहुलंफेनोडुपपरिप्लुतम् ॥ परिसस्रुर्महाशब्दाःप्रकर्षंत्योमहीरुहान् २१ तस्मिन्नुपरतेशब्देवातेचसमतांगते ॥ गते
ह्यंभसिनिम्नानिप्रादुर्भूतेदिवाकरे २२

यथामार्गेण अनंतरान्सन्निहितान् निलिल्यिरे निलीनाः १३ संगम्यादायेत्यन्वयः गत्वा गृहीत्वेत्यर्थः १४।१५।१६।१७।१८ अश्मसहिताः करकासहिताः १९।२० वारिवहंत्योनद्यः २१।२२

२३ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥ ॥ ७ ॥ ॥ ७ ॥ क्रोशमात्रमिति १ । २ । ३ । ४ । ५ । ६ । ७

निर्जग्मुस्तेशनैःसर्वेसमाजग्मुश्चभारत ॥ प्रतस्थिरेपुनर्वीराःपर्वतंगंधमादनम् २३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थया
त्रायांगंधमादनप्रवेशेत्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥ ॥ वैशंपायनउवाच ॥ क्रोशमात्रंप्रयातेषुपांडवेषुमहात्मसु ॥ पद्भ्यामनुचिता
गंतुंद्रौपदीसमुपाविशत् १ श्रांतादुःखपरीताचवातवर्षेणतेनच ॥ सौकुमार्याच्चपांचालीसंमुमोहतपस्विनी २ साकंपमानामोहेनबाहुभ्यामसितेक्षणा ॥ वृत्ता
भ्यामनुरूपाभ्यामूरूसमवलंबत ३ आलंबमानासहितावूरूगजकरोपमौ ॥ पपातसहसाभूमौवेपंतीकदलीयथा ४ तांपतंतींवरारोहांभज्यमानांलतामिव ॥
नकुलःसमभिद्रुत्यपरिजग्राहवीर्यवान् ५ ॥ नकुलउवाच ॥ राजन्पंचालराजस्यसुतेयमसितेक्षणा ॥ श्रांतानिपतिताभूमौतामवेक्षस्वभारत ६ अदुःखार्हापरंदुः
खंप्राप्तेयंमृदुगामिनी ॥ आश्वासयमहाराजतामिमांश्रमकर्शिताम् ७ वैशंपायनउवाच ॥ राजातुवचनात्तस्यभृशंदुःखसमन्वितः ॥ भीमश्चसहदेवश्चसहसास
मुपाद्रवन् ८ तामवेक्ष्यतुकौंतेयोविवर्णवदनांकृशाम् ॥ अंकमानीयधर्मात्मापर्यदेवयदातुरः ९ ॥ युधिष्ठिरउवाच ॥ कथंवेश्मसुगुप्तेषुस्वास्तीर्णशयनोचि
ता ॥ भूमौनिपतिताशेतेसुखार्हावरवर्णिनी १० सुकुमारौकथंपादौमुखंचकमलप्रभम् ॥ मत्कृतेऽद्यवरार्हायाःश्यामतांसमुपागतम् ११ किमिदंद्यूतकामेनम
याकृतमबुद्धिना ॥ आदायकृष्णांचरतावनेमृगगणायुते १२ सुखंप्राप्स्यसिकल्याणिपांडवान्प्राप्यवैपतीन् ॥ इतिद्रुपदराजेनपित्रादत्ताऽऽयतेक्षणा १३ तत्स
र्वमनवाप्येयंश्रमशोकाध्वकर्शिता ॥ शेतेनिपतिताभूमौपापस्यममकर्मभिः १४ ॥ वैशंपायनउवाच ॥ तथालालप्यमानेतुधर्मराजेयुधिष्ठिरे ॥ धौम्यप्र
भृतयःसर्वेतत्राजग्मुर्द्विजोत्तमाः १५ तेसमाश्वासयामासुराशीर्भिश्चाप्यपूजयन् ॥ रक्षोघ्नांश्चतथामंत्राञ्जेपुश्चक्रुश्चतेक्रियाः १६ पठ्यमानेषुमंत्रेषुशांत्यर्थं
परमर्षिभिः ॥ स्पृश्यमानाकरैःशीतैःपांडवैश्चमुहुर्मुहुः १७ सेव्यमानाचशीतेनजलमिश्रेणवायुना ॥ पांचालीसुखमासाद्यलेभेचेतःशनैःशनैः १८ परिगृह्य
चतांदीनांकृष्णामजिनसंस्तरे ॥ पार्थाविश्रामयामासुर्लब्धसंज्ञांतपस्विनीम् १९ तस्यायमौरक्ततलौपादौपूजितलक्षणौ ॥ कराभ्यांकिणजाताभ्यांशनकैः
संववाहतुः २० पर्याश्वासयदप्येनांधर्मराजोयुधिष्ठिरः ॥ उवाचचकुरुश्रेष्ठोभीमसेनमिदंवचः २१ बहवःपर्वताभीमविषमाहिमदुर्गमाः ॥ तेषुकृष्णामहाबाहो
कथंनुविचरिष्यति २२ ॥भीमसेनउवाच॥ त्वांराजन्राजपुत्रींचयमौचपुरुषर्षभ ॥ स्वयंनेष्यामिराजेंद्रमाविषादेमनःकृथाः २३ हैडिंबश्चमहावीर्योविहगोमद्व
लोपमः ॥ वहेदनघसर्वान्नोवचनात्तेघटोत्कचः २४॥वैशंपायनउवाच॥ अनुज्ञातोधर्मराज्ञापुत्रंसस्माररराक्षसम् ॥ घटोत्कचस्तुधर्मात्मास्मृतमात्रःपितुस्तदा २५ ॥११७॥

८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ विहगइव विहगः खेचरः २४ । २५

२६ । २७ । २८ ॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ ॥ ७ ॥ धर्मज्ञइति १ । २ । ३ । ४ । ५ । ६ वक्ष्यंतिवहन्

कृतांजलिरुपातिष्ठदभिवाद्याथपांडवान् ॥ ब्राह्मणांश्चमहाबाहुःसचतैरभिनंदितः २६ उवाचभीमसेनंसपितरंभीमविक्रमम् ॥ स्मृतोऽस्मिभवताशीघ्रंशुश्रूषु
रहमागतः २७ आज्ञापयमहाबाहोसर्वंकर्ताऽस्म्यसंशयम् ॥ तच्छ्रुत्वाभीमसेनस्तुराक्षसंपरिषस्वजे २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणि
लोमशतीर्थयात्रायांगंधमादनप्रवेशेचतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ ॥ युधिष्ठिरउवाच ॥ धर्मज्ञोबलवाञ्शूरःसत्योराक्षसपुंगवः ॥ भक्तो
स्मानौरसःपुत्रोभीमगृह्णातुमाचिरम् १ तवबाहुबलेनाहमतिभीमपराक्रम ॥ अक्षतःसहपांचाल्यागच्छेयंगंधमादनम् २ ॥ वैशंपायनउवाच ॥ भ्रातुर्वचन
माज्ञायभीमसेनोघटोत्कचम् ॥ आदिदेशनरव्याघ्रस्तनयंशत्रुकर्शनम् ३ ॥ भीमसेनउवाच ॥ हैडिंबेयपरिश्रांतातवमाताऽपराजिता ॥ त्वंचकामगमस्तात
बलवान्वहतांखग ४ स्कंधमारोप्यभद्रंतेमध्येऽस्माकंविहायसा ॥ गच्छनीचिकयागत्यायथाचैनांनपीडयेः ५ ॥ ॥ घटोत्कचउवाच ॥ धर्मराजंचधौम्यंच
कृष्णांचयमजौतथा ॥ एकोऽप्यहमलंवोढुंकिमुताद्यसहायवान् ६ अन्येचशतशःशूराविहंगाःकामरूपिणः ॥ सर्वान्वोब्राह्मणैःसार्धंवक्ष्यंतिसहिताऽनघ ७ एव
मुक्त्वाततःकृष्णामुवाहसघटोत्कचः ॥ पांडूनांमध्यगोवीरःपांडवानपिचापरे ८ लोमशःसिद्धमार्गेणजगामानुपमद्युतिः ॥ स्वेनैवसप्रभावेणद्वितीयइवभास्करः
९ ब्राह्मणांश्चापितान्सर्वान्समुपादायराक्षसाः ॥ नियोगाद्राक्षसेंद्रस्यजग्मुर्भीमपराक्रमाः १० एवंसुरमणीयानिवनान्युपवनानिच ॥ आलोकयंतस्तेजग्मु
र्विशालांबदरींप्रति ११ तेत्वाशुगतिभिर्वीराराक्षसैस्तैर्महाजवैः ॥ उह्यमानाययुःशीघ्रंमहदध्वानमल्पवत् १२ देशान्म्लेच्छजनाकीर्णान्नानारत्नाकरायुतान् ॥
ददृशुर्गिरिपादांश्चनानाधातुसमाचितान् १३ विद्याधरसमाकीर्णान्युतान्वानरकिन्नरैः ॥ तथाकिंपुरुषैश्चैवगंधर्वैश्चसमंततः १४ मयूरैश्चमरैश्चैववानरैरुरु
भिस्तथा ॥ वराहैर्गवयैश्चैवमहिषैश्चसमावृतान् १५ नदीजालसमाकीर्णान्नानापक्षियुतान्बहून् ॥ नानाविधमृगैर्जुष्टान्वानरैश्चोपशोभितान् १६ समदैश्चापि
विहगैःपादपैरन्वितांस्तथा ॥ तेऽवतीर्यबहून्देशानुत्तरांश्चकुरूनपि १७ ददृशुर्विविधाश्चर्यंकैलासंपर्वतोत्तमम् ॥ तस्याभ्याशेतुददृशुर्नरनारायणाश्रमम् १८
उपेतंपादपैर्दिव्यैःसदापुष्पफलोपगैः ॥ ददृशुस्तांचबदरींवृत्तस्कंधांमनोरमाम् १९ स्निग्धामविरलच्छायांश्रियापरमयायुताम् ॥ पत्रैःस्निग्धैरविरलैरुपेतां
४० मृदुभिःशुभाम् २० विशालशाखांविस्तीर्णामतिद्युतिसमन्विताम् ॥ फलैरुपचितैर्दिव्यैराचितांस्वादुभिर्भृशम् २१ मधुस्रवैःसदादिव्यांमहर्षिगणसेविताम् ॥
मदप्रमुदितैर्नित्यंनानाद्विजगणैर्युताम् २२ अदंशमशकेदेशेबहुमूलफलोदके ॥ नीलशाद्वलसंछन्नेदेवगंधर्वसेविते २३ सुसमीकृतभूभागेस्वभावविहितेशुभे ॥
जातांहिमृदुस्पर्शेदेशेऽपहतकंटके २४ तामुपेत्यमहात्मानःसहतैर्ब्राह्मणर्षभैः ॥ अवतेरुस्ततःसर्वेराक्षसस्कंधतःशनैः २५

करिष्यंति ७ । ८ । ९ । १० । ११ । १२ रत्नाकरैरासमंताद्युतान् १३ । १४ । १५ । १६ । १७ अभ्यासेसमीपे १८ । १९ । २० । २१ । २२ । २३ । २४ स्वभावतएव विशेषेण हिते स्वभावविहिते जातांबदरीं २५

२६ । २७ महर्षिगणसंबाधंमुनिगणव्याप्तं ब्राह्या लक्ष्म्याऋग्यजुःसामात्मिकया । ऋचः सामानियजूंषिसाहिश्रीरमृतासतामिति श्रुतेः २८ सुष्टुसंमृष्टं संमार्जनमनुलेपनंच यत्रतत् २९
अग्निशरणैरग्न्यगारैः आचितंव्याप्तं कठिनैःशिक्यैःकरंडैर्वा ३०।३१ देवचर्यासत्यसंकल्पत्वादिकातयाउपशोभितं ३२।३३ ब्रह्मभूतैर्ब्रह्मविस्त्वेनब्रह्मभावंगतैःतथाचश्रुतिः । ब्रह्मविद्ब्रह्मैवभव

ततस्तमाश्रमंरम्यंनरनारायणाश्रितम् ॥ ददृशुःपांडवाराजन्सहिताद्विजपुंगवैः २६ तमसारहितंपुण्यमनामृष्टंरवेःकरैः ॥ क्षुत्तृट्शीतोष्णदोषैश्चवर्जितंशोक
नाशनम् २७ महर्षिगणसंबाधंब्राह्यालक्ष्म्यासमन्वितम् ॥ दुष्प्रवेशंमहाराजनरैर्धर्मबहिष्कृतैः २८ बलिहोमार्चितंदिव्यंसुसंमृष्टानुलेपनम् ॥ दिव्यपुष्पो
पहारैश्चसर्वतोऽभिविराजितम् २९ विशालैरग्निशरणैःस्रुग्भांडैराचितंशुभैः ॥ महद्भिस्तोयकलशैःकठिनैश्चोपशोभितम् ३० शरण्यंसर्वभूतानांब्रह्मघोषनिना
दितम् ॥ दिव्यमाश्रयणीयंतमाश्रमंश्रमनाशनम् ३१ श्रियायुतमनिर्देश्यंदेवचर्योपशोभितम् ॥ फलमूलाशनैर्दांतैश्चारुकृष्णाजिनांबरैः ३२ सूर्यवैश्वानर
समैस्तपसाभावितात्मभिः ॥ महर्षिभिर्मोक्षपरैर्यतिभिर्नियतेंद्रियैः ३३ ब्रह्मभूतैर्महाभागैरुपेतंब्रह्मवादिभिः ॥ सोऽभ्यगच्छन्महातेजास्तानृषीन्प्रयतःशुचिः
३४ भ्रातृभिःसहितोधीमान्धर्मपुत्रोयुधिष्ठिरः ॥ दिव्यज्ञानोपपन्नास्तेदृष्ट्वाप्राप्तंयुधिष्ठिरम् ३५ अभ्यगच्छंतसुप्रीताःसर्वएवमहर्षयः ॥ आशीर्वादान्प्रयुंजा
नाःस्वाध्यायनिरताभृशम् ३६ प्रीतास्तेतस्यसत्कारंविधिनापावकोपमाः ॥ उपाजहुश्चसलिलंपुष्पमूलफलंशुचि ३७ सतैःप्रीत्याऽथसत्कारमुपनीतंमह
र्षिभिः ॥ प्रयतःप्रतिगृह्याथधर्मराजोयुधिष्ठिरः ३८ तंशक्रसदनप्रख्यंदिव्यगंधंमनोरमम् ॥ प्रीतःस्वर्गोपमंपुण्यंपांडवःसहकृष्णया ३९ विवेशशोभयायुक्तं
भ्रातृभिश्चसहानघ ॥ ब्राह्मणैर्वेदवेदांगपारगैश्चसहस्रशः ४० तत्रापश्यतधर्मात्मादेवदेवर्षिपूजितम् ॥ नरनारायणस्थानंभागीरथ्योपशोभितम् ४१ पश्यंत
स्तेनरव्याघ्रारेमिरेतत्रपांडवाः ॥ मधुस्रवफलंदिव्यंब्रह्मर्षिगणसेवितम् ४२ तदुपेत्यमहात्मानस्तेऽवसन्ब्राह्मणैःसह ॥ मुदायुक्तामहात्मानोरेमिरेतत्रतेतदा
४३ आलोकयंतोमैनाकंनानाद्विजगणायुतम् ॥ हिरण्यशिखरंचैवतच्चबिंदुसरःशिवम् ४४ तस्मिन्विहरमाणाश्चपांडवाःसहकृष्णया ॥ मनोज्ञेकाननवरेसर्वर्तु
कुसुमोज्ज्वले ४५ पादपैःपुष्पविकचैःफलभारावनामिभिः ॥ शोभितेसर्वतोरम्यैःपुंस्कोकिलगणायुतैः ४६ स्निग्धपत्रैरविरलैःशीतच्छायैर्मनोरमैः ॥ सरांसि
चविचित्राणिप्रसन्नसलिलानिच ४७ कमलैःसोत्पलैश्चैवभ्राजमानानिसर्वशः ॥ पश्यंतश्चारुरूपाणिरेमिरेतत्रपांडवाः ४८ पुण्यगंधःसुखस्पर्शोववौतत्रसमी
रणः ॥ ह्लादयन्पांडवान्सर्वान्द्रौपद्यासहितान्प्रभो ४९ भागीरथींसुतीर्थांचसीतांविमलपंकजाम् ॥ मणिप्रवालप्रस्तारांपादपैरुपशोभिताम् ५० दिव्यपु
ष्पसमाकीर्णांमनःप्रीतिविवर्धनीम् ॥ वीक्षमाणामहात्मानोविशालांबदरीमनु ५१ तस्मिन्देवर्षिचरितेदेशेपरमदुर्गमे ॥ भागीरथीपुण्यजलेतर्पयांचक्रिरेतदा ५२

तीति ३४ । ३५ । ३६ सत्कारंचक्रुरितिशेषः ३७ । ३८ । ३९ । ४० । ४१ । ४२ तदुपेत्यस्थानंप्राप्य ४३ । ४४ । ४५ पुष्पविकचैर्विकसितकुसुमैः ४६ । ४७ । ४८ । ४९ सीतां नामवः
प्रस्तारः सोपानपादगणादिरूपः वद्द इत्यर्थः ५० । ५१ । ५२

५३ । ५४ ॥ इत्यारण्यकेपर्वणि नीलकंठीयेभारतभावदीपे पंचचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥ ॥ तत्रेति १ पूर्वोत्तरे ऐशानकोणे २ । ३ शुभाकल्याणीशुभंशोभायुतं सौगं
धिकंपद्मजातिभेदः ४ गंधेतिसंस्थानमाकारः ५ हरआहरइदमेतज्जातीयं ६ । ७ । ८ । ९ । १० प्रभिन्नोमत्तः ११ ग्लानिर्वैक्लव्येदेहचित्तयोरवसादौ भयंतत्कारणं स्वोच्छेदबुद्धिःभयामा

देवानृषींश्चकौंतेयाःपरमंशौचमास्थिताः ॥ तत्रतेतर्पयंतश्चजपंतश्चकुरूद्वहाः ५३ ब्राह्मणैःसहितावीराह्यवसन्पुरुषर्षभाः ॥ कृष्णायास्तत्रपश्यंतःक्रीडिता
न्यमरप्रभाः ॥ विचित्राणिनरव्याघ्रारेमिरेतत्रपांडवाः ५४ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांगंधमादनप्रवेशेपंचचत्वारिं
शदधिकशततमोऽध्यायः १४५ ॥ ॥ ध ॥ वैशंपायनउवाच ॥ तत्रतेपुरुषव्याघ्राःपरमंशौचमास्थिताः ॥ षड्रात्रमवसन्वीराधनंजयदिदृक्षवः १ ततः
पूर्वोत्तरेवायुःप्लवमानोयदृच्छया ॥ सहस्रपत्रमर्काभंदिव्यंपद्ममुपाहरत् २ तदवैक्षतपांचालीदिव्यगंधंमनोरमम् ॥ अनिलेनाहृतंभूमौपतितंजलजंशुचि ३ त
च्छुभाशुभमासाद्यसौगंधिकमनुत्तमम् ॥ अतिवमुदिताराजन्भीमसेनमथाब्रवीत् ४ पश्यदिव्यंसुरुचिरंभीमपुष्पमनुत्तमम् ॥ गंधसंस्थानसंपन्नंमनसोममनंद
नम् ५ इदंचधर्मराजायप्रदास्यामिपरंतप ॥ हरेदंममकामायकाम्यकेपुनराश्रमे ६ यदितेऽहंप्रियापार्थबहूनीमान्युपाहर ॥ तान्यहंनेतुमिच्छामिकाम्यकंपु
नराश्रमम् ७ एवमुक्त्वाशुभापांगीभीमसेनमनिंदिता ॥ जगामपुष्पमादायधर्मराजायतत्तदा ८ अभिप्रायंतुविज्ञायमहिष्याःपुरुषर्षभः ॥ प्रियायाःप्रियकामः
सप्रायाद्भीमोमहाबलः ९ वातंतमेवाभिमुखोयतस्तत्पुष्पमागतम् ॥ आजिहीर्षुर्जगामाशुसपुष्पाण्यपराण्यपि १० रुक्मपृष्ठंधनुर्गृह्यशरांश्चाशीविषोपमान् ॥
मृगराडिवसंक्रुद्धःप्रभिन्नइवकुंजरः ११ ददृशुःसर्वभूतानिमहाबाणधनुर्धरम् ॥ नग्लानिर्नचवैक्लव्यंनभयंनचसंभ्रमः ॥ कदाचिज्जुषतेपार्थमात्मजंमातरिश्वनः
१२ द्रौपद्याःप्रियमन्विच्छन्सबाहुबलमाश्रितः १३ व्यपेतभयसंमोहःशैलमभ्यपतद्बली ॥ सतंद्रुमलतागुल्मच्छन्नंनीलशिलातलम् १४ गिरिंचचारारिहरः
किन्नराचरितंशुभम् ॥ नानावर्णधरैश्चित्रंधातुद्रुममृगांडजैः १५ सर्वभूषणसंपूर्णंभूमेर्भुजमिवोच्छ्रितम् ॥ सर्वत्ररमणीयेषुगंधमादनसानुषु १६ सक्तचक्षुरभि
प्रायान्हृदयेनानुचिंतयन् ॥ पुंस्कोकिलनिनादेषुषट्पदाचरितेषुच १७ बद्धश्रोत्रमनश्चक्षुर्जगामामितविक्रमः ॥ आजिघ्रन्समहातेजाःसर्वर्तुकुसुमोद्भवम् १८
गंधमुद्दतमुद्दामोवनेमत्तइवद्विपः ॥ वीज्यमानःसुपुण्येननानाकुसुमगंधिना १९ पितुःसंस्पर्शशीतेनगंधमादनवायुना ॥ ह्रियमाणश्रमःपित्रासंप्रहृष्टतनूरुहः
२० सयक्षगंधर्वसुरब्रह्मर्षिगणसेवितम् ॥ विलोकयामासतदापुष्पहेतोररिंदमः २१ विषमच्छेदैरचितैरनुलिप्तइवांगुलैः ॥ बलिभिर्धातुविच्छेदैःकांचनांजन
राजतैः ॥ सपक्षमिवनृत्यंतंपार्श्वलग्नैःपयोधरैः २२

वादेवमयायत्नेनगंतव्यमित्यादरः संभ्रमःसोऽपितंनजुषते सेवतेतत्रहेतुः आत्मजामिति मातरिश्वनो वायोःसार्धः १२ । १३ । १४ । १५ । १६ अभिप्रायात्देवऋषिगंधर्वादिलीलोन्नयनहे
तून्पुष्पकुशादिसंस्तरान् १७ । १८ । १९ । पितुर्यथापुत्रस्पर्शः शीतस्तादृक्स्पर्शवतावायुनेत्यर्थः पित्रावायुना २० । २१ धातुविच्छेदैर्धातुभेदैः अंगुलैरिवविषमच्छदैः सप्तपर्णादिभिर्नाना
धातुरंजितपत्रैः रचितैःवलिभिस्त्रिपुंड्राकारैरनुलिप्तइवेत्यर्थः । आजनेतिकृष्णधातुग्रहणं पीतकृष्णश्वेतधातुभिरित्यर्थः पयोधरैर्मेघैः २२

 दरीविलगृहं कंदरं महाप्रपातः अभिरामादरीप्रभृतयो यस्मिन् २३ विषाणाग्रैर्दंताग्रैः । विषाणंकुष्ठकेक्रीबेंत्रिषु शृंगेभदंतयोरिति मेदिनी । शिलाःसमपाषाणाः शयनासनयोग्याःउपला
स्तदन्ये २४ शष्पं बालतृणंकवलोग्रासस्तद्युक्तैः २५ । २६ । २७ कवकवर्णाभःपीतदीप्तिःसिंहसंहननः सिंहवदृढांगः २८ वारणानामपिवारणो निवारकःसंग्रामादौ विचेष्टितैर्व्यावृत्ताभिर्नै

 मुक्ताहारैरिवचितंच्युतैःप्रस्रवणोदकैः ॥ अभिरामदरीकुंजनिर्झरोदककंदरम् २३ अप्सरोनूपुररवैःप्रनृत्तवरबर्हिणम् ॥ दिग्वारणविषाणाग्रैर्घृष्टोपलशिलातलम्
२४ स्रस्तांशुकमिवाक्षोभ्यैर्निम्नगानिःसृतैर्जलैः ॥ सशष्पकवलैःस्वस्थैरदूरपरिवर्तिभिः २५ भयानभिज्ञैर्हरिणैःकौतूहलनिरीक्षितः ॥ चालयानःस्ववेगेनलता
जालान्यनेकशः २६ आक्रीडमानोहृष्टात्माश्रीमान्वायुसुतोययौ ॥ प्रियामनोरथंकर्तुमुद्यतश्चारुलोचनः २७ प्रांशुःकनकवर्णाभःसिंहसंहननोयुवा ॥ म
त्तवारणविक्रांतोमत्तवारणवेगवान् २८ मत्तवारणताम्राक्षोमत्तवारणवारणः ॥ प्रियपार्श्वोपविष्टाभिर्व्यावृत्ताभिर्विचेष्टितैः २९ यक्षगंधर्वयोषाभिरदृश्याभिर्निरी
क्षितः ॥ नवावतारंरूपस्यविक्रीडन्निवपांडवः ३० चचाररमणीयेषुगंधमादनसानुषु ॥ संस्मरन्विविधान्क्लेशान्दुर्योधनकृतान्बहून् ३१ द्रौपद्यावनवासिन्याः
प्रियंकर्तुंसमुद्यतः ॥ सोऽचिंतयद्गतेस्वर्गमर्जुनेमयिचागते ३२ पुष्पहेतोःकथंत्वार्यःकरिष्यतियुधिष्ठिरः ॥ स्नेहान्नरवरोनूनमविश्वासाद्बलस्यच ३३ नकुलंस
हदेवंचनमोक्ष्यतियुधिष्ठिरः ॥ कथंनुकुसुमावाप्तिःस्याच्छीघ्रमितिचिंतयन् ३४ प्रतस्थेनरशार्दूलःपक्षिराडिववेगतः ॥ सज्जमानमनोदृष्टिःफुल्लेषुगिरिसानुषु
३५ द्रौपदीवाक्यपाथेयोभीमःशीघ्रतरंययौ ॥ कंपयन्मेदिनींपद्भ्यांनिर्घातइवपर्वसु ३६ त्रासयन्गजयूथानिवातरंहावृकोदरः ॥ सिंहव्याघ्रमृगांश्चैवमर्दया
नोमहाबलः ३७ उन्मूलयन्महावृक्षान्पोथयंस्तरसाबली ॥ लतावल्लीश्चवेगेनविकर्षन्पांडुनंदनः ॥ उपर्युपरिशैलाग्रमारुरुक्षुरिवद्विपः ३८ विनर्दमानोऽति
भृशंसविद्युदिवतोयदः ॥ तेनशब्देनमहताभीमस्यप्रतिबोधिताः ३९ गुहांसंत्यज्यजुर्व्याघ्रानिलिल्युर्वनवासिनः ॥ समुत्पेतुःखगास्त्रस्तामृगयूथानिदुद्रुवुः ४०
ऋक्षाश्चोत्ससृजुर्वृक्षांस्तत्यजुर्हरयोगुहाम् ॥ व्यजृंभंतमहासिंहामहिषाश्चावलोकयन् ४१ तेनवित्रासितानागाःकरेणुपरिवारिताः ॥ तद्वनंसंपरित्यज्यजग्मुर
न्यन्महावनम् ४२ वराहमृगसंघाश्चमहिषाश्चवनेचराः ॥ व्याघ्रगोमायुसंघाश्चप्रणेदुर्गवयैःसह ४३ रथांगसाह्वदात्यूहाहंसकारंडवप्लवाः ॥ शुकाःपुंस्कोकिलाः
क्रौंचाविसंज्ञाभेजिरेदिशः ४४ तथाऽन्येदर्पितानागाःकरेणुशरपीडिताः ॥ सिंहव्याघ्राश्चसंक्रुद्धाभीमसेनमथाद्रवन् ४५ शकृन्मूत्रंचमुंचानाभयविभ्रांतमान
साः ॥ व्यादितास्यामहारौद्राव्यनदन्भीषणान्रवान् ४६ ततोवायुसुतःक्रोधात्स्वबाहुबलमाश्रितः ॥ गजेनान्यान्गजान्श्रीमान्सिंहंसिंहेनवाविभुः ४७

श्चेष्टाभिरेकाग्राभिरित्यर्थः २९ रूपस्यसौंदर्यस्य । रूपंस्वभावेसौंदर्येइतिमेदिनी ३० । ३१ । ३२ । ३३ । ३४ । ३५ निर्घातउत्पातः पर्वसुउत्सवेषु ३६ । ३७ पोथयन्मर्दयन्लताभूचराव
ल्लीवृक्षचरेतिभेदः ३८ । ३९ । ४० अवलोकयन् व्यलोकयन् ४१ । ४२ । ४३ रथांगसाह्वाश्चक्रसमाननामानश्चक्रवाका इतियावत्दात्यूहो मयूरश्चातकोवा । दात्यूहःकालकंठके ॥ चात
केपीतिमेदिनी ४४ करेणुशरेणहस्तिनीकृतेनोत्तेजनेन पीडिताः शरस्तूत्तेजने बाणे इति मेदिनी ४५ । ४६ । ४७

४८ । ४९ । ५० । ५१ आस्रावी मत्तगजइवेत्यर्थः कदलीस्तंभान्मृगविशेषपादान् । रंभावृक्षेऽथकदलीपताकामृगभेदयोरितिमेदिनी । उत्तरश्लोकाद्बलिनामित्यपकृष्यबलिनां यक्षादीनां
पताकास्तंभान्वा ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ नलिनोत्पलंपद्मपुष्पं । उत्पलीकुष्ठपर्पट्यांक्लीबंकुवलयप्रसूनयोरितिमेदिनी उद्दामोर्बंधनशून्यः ५९ अध्यगंपर्वतोपरिवनंगंतुमुद्यतः
तलप्रहारैरन्यांश्चव्यहनत्पांडवोबली ॥ तेवध्यमानाभीमेनसिंहव्याघ्रतरक्षवः ४८ भयाद्विससृजुर्भीमंशकृन्मूत्रंचसुस्रुवुः ॥ प्रविवेशततःक्षिप्रंतानपास्यमहा
बलः ४९ वनंपांडुसुतःश्रीमान्शब्देनापूरयन्दिशः ॥ अथापश्यन्महाबाहुर्गंधमादनसानुषु ५० सुरम्यंकदलीषंडंबहुयोजनविस्तृतम् ॥ तमभ्यगच्छद्वेगेन
क्षोभयिष्यन्महाबलः ५१ महागजइवास्रावीप्रभंजन्विविधान्द्रुमान् ॥ उत्पाट्यकदलीस्तंभान्बहुतालसमुच्छ्रयान् ५२ चिक्षेपतरसाभीमःसमंताद्बलिनांवरः ॥
विनदन्सुमहातेजान्सिंहइवदर्पितः ५३ ततःसत्वान्युपाक्रामद्बहूनिसुमहांतिच ॥ रुरुवानरसिंहांश्चमहिषांश्चजलाशयान् ५४ तेनशब्देनचैवाथभीमसेनरवेण
च ॥ वनांतरगताश्चापिवित्रेसुर्मृगपक्षिणः ५५ तंशब्दंसहसाश्रुत्वामृगपक्षिसमीरितम् ॥ जलार्द्रपक्षाविहगाःसमुत्पेतुःसहस्रशः ५६ तानौदकान्पक्षिगणान्नि
रीक्ष्यभरतर्षभः ॥ तानेवानुसरन्रम्यंददर्शसुमहत्सरः ५७ कांचनैःकदलीषंडैर्मंदमारुतकंपितैः ॥ वीज्यमानमिवाक्षोभ्यंतीरांतरविसर्पिभिः ५८ तत्सरोऽथा
वतीर्याशुप्रभूतनलिनोत्पलम् ॥ महागजवदुद्दामश्चिक्रीडबलवद्बली ५९ विक्रीड्यतस्मिन्सुचिरमुत्ततारामितद्युतिः ॥ ततोऽध्यगंतुवेगेनतद्वनंबहुपादपम् ६०
दध्मौचशंखंस्वनवत्सर्वप्राणेनपांडवः ॥ आस्फोटयच्चबलवान्भीमःसंनादयन्दिशः ६१ तस्यशंखस्यशब्देनभीमसेनरवेणच ॥ बाहुशब्देनचोग्रेणनर्दंतीवगिरे
र्गुहाः ६२ तंवज्रनिष्पेषसममास्फोटितमहारवम् ॥ श्रुत्वाशैलगुहासुप्तैःसिंहैर्मुक्तोमहास्वनः ६३ सिंहनादभयत्रस्तैःकुंजरैरपिभारत ॥ मुक्तोविरावःसुमहान्
पर्वतोयेनपूरितः ६४ तंतुनादंततःश्रुत्वासुप्तंवारणपुंगवैः ॥ भ्रातरंभीमसेनंतुविज्ञायहनुमान्कपिः ६५ दिवंगमंरुरोधाथमार्गंभीमस्यकारणात् ॥ अनेनहिप
थामावैगच्छेदितिविचार्यसः ६६ आस्तएकायनेमार्गेकदलीषंडमंडिते ॥ भ्रातुर्भीमस्यरक्षार्थंतंमार्गमवरुध्यवै ६७ माऽत्रप्राप्स्यतिशापंवाधर्षणंवेतिपांड
वः ॥ कदलीषंडमध्यस्थोह्येवंसंचिंत्यवानरः ६८ प्राजृंभतमहाकायोहनूमान्नामवानरः ॥ कदलीषंडमध्यस्थोनिद्रावशगतस्तदा ६९ जृंभमाणःसुविपुलंशक्र
ध्वजमिवोच्छ्रितम् ॥ आस्फोटयच्चलांगूलमिंद्राशनिसमस्वनम् ७० तस्यलांगूलनिनदंपर्वतःसुगुहामुखैः ॥ उद्गारमिवगौर्नर्दन्नुत्ससर्जसमंततः ७१
लांगूलास्फोटशब्दाच्चचलितःसमहागिरिः ॥ विघूर्णमानशिखरःसमंतात्पर्यशीर्यत ७२ सलांगूलरवस्तस्यमत्तवारणनिःस्वनम् ॥ अंतर्धायविचित्रेषुचचार
गिरिसानुषु ७३ सभीमसेनस्तच्छ्रुत्वासंप्रहृष्टतनूरुहः ॥ शब्दप्रभवमन्विच्छंश्चचारकदलीवनम् ७४
सन्निविशेषः ६० । ६१ । ६२ आस्फोटितउद्भावितःबाहुघातोवा ६३ । ६४ । ६५ दिवंगमंमार्गं स्वर्गमार्गं ६६ एकायने अतिसंकुचिते ६७ वानरःकपिःवानानिशुष्कफलानिरात्याददातइति
वानरःअहिंस्रइत्यर्थः ६८ । ६९ । ७० उद्गारंप्रतिशब्दंगौरिवउत्ससर्ज ७१ । ७२ । ७३ । ७४

७५।७६ बाहोः स्वस्तिकंचतुरस्रंमूलंअंसइतियावत् तत्रन्यस्तकंधरमित्यर्थः तत्रहेतुः स्कंधेति विपुलांसत्वादित्यर्थः ७७ आमुग्नं द्विगुणीकृतं ७८।७९ उडुपंचंद्रं ८० अशोकानामशोकपुष्पा

कदलीवनमध्यस्थमथपीनेशिलातले ॥ ददर्शसुमहाबाहुर्वानराधिपतिंतदा ७५ विद्युत्संपातदुष्प्रेक्षंविद्युत्संपातपिंगलम् ॥ विद्युत्संपातनिनदंविद्युत्संपातचंचलम् ७६ बाहुस्वस्तिकविन्यस्तपीनह्रस्वशिरोधरम् ॥ स्कंधभूयिष्ठकायत्वात्तनुमध्यकटीतटम् ७७ किंचिच्चाभुग्नशीर्षेणदीर्घरोमांचितेनच ॥ लांगूलेनोर्ध्वगतिनाध्वजेनेवविराजितम् ७८ ह्रस्वौष्ठंताम्रजिह्वास्यंरक्तवर्णंचलद्भ्रुवम् ॥ विवृत्तदंष्ट्रादशनंशुक्लतीक्ष्णाग्रशोभितम् ७९ अपश्यद्वदनंतस्यरश्मिवंतमिवोडुपम् ॥ वदनाभ्यंतरगतैःशुक्लैर्दंतैरलंकृतम् ८० केसरोत्करसंमिश्रमशोकानामिवोत्करम् ॥ हिरण्मयीनांमध्यस्थंकदलीनांमहाद्युतिम् ८१ दीप्यमानेनवपुषास्वर्चिष्मंतमिवानलम् ॥ निरीक्षंतममित्रघ्नंलोचनैर्मधुपिंगलैः ८२ तंवानरवरंधीमानतिकायंमहाबलम् ॥ स्वर्गपंथानमावृत्यहिमवंतमिवस्थितम् ८३ दृष्ट्वाचैनंमहाबाहुरेकंतस्मिन्महावने ॥ अथोपसृत्यतरसाविभीर्भीमस्ततोबली ८४ सिंहनादंचकारोग्रंवज्राशनिसमंबली ॥ तेनशब्देनभीमस्यवित्रेसुर्मृगपक्षिणः ८५ हनूमांश्चमहासत्वईषदुन्मील्यलोचने ॥ दृष्ट्वातमथसावज्ञंलोचनैर्मधुपिंगलैः ॥ स्मितेनचैनमासाद्यहनूमानिदमब्रवीत् ८६ ॥ ॥ हनूमानुवाच ॥ किमर्थंसरुजस्तेऽहंसुखसुप्तःप्रबोधितः ॥ ननुनामत्वयाकार्यादयाभूतेषुजानता ८७ वयंधर्मंनजानीमस्तिर्यग्योनिमुपाश्रिताः ॥ नरास्तुबुद्धिसंपन्नादयांकुर्वंतिजंतुषु ८८ क्रूरेषुकर्मसुकथंदेहवाक्चित्तदूषिषु ॥ धर्मघातिषुसज्जंतेबुद्धिमंतोभवद्विधाः ८९ नत्वंधर्मंविजानासिवृद्धानोपासितास्त्वया ॥ अल्पबुद्धितयाबाल्यादुत्सादयसियन्मृगान् ९० ब्रूहिकस्त्वंकिमर्थंवाकिमिदंवनमागतः ॥ वर्जितंमानुषैर्भावैस्तथैवपुरुषैरपि ९१ क्वचत्वयाऽद्यगंतव्यंप्रब्रूहिपुरुषर्षभ ॥ अतःपरमगम्योयंपर्वतःसुदुरारुहः ९२ विनासिद्धगतिंवीरगतिरत्रनविद्यते ॥ देवलोकस्यमार्गोऽयमगम्योमानुषैःसदा ९३ कारुण्यात्त्वामहंवीरवारयामिनिबोधमे ॥ नातःपरंत्वयाशक्यंगंतुमाश्वसिहिप्रभो ९४ स्वागतंसर्वथैवेहतवाद्यमनुजर्षभ ॥ इमान्यमृतकल्पानिमूलानिचफलानिच ९५ भक्षयित्वानिवर्तस्वमावृथाप्राप्स्यसेवधम् ॥ ग्राह्यंयदिवचोमह्यंहितंमनुजपुंगव ९६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांभीमकदलीखंडप्रवेशेषट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ ॥ वैशंपायनउवाच ॥ एतच्छ्रुत्वावचस्तस्यवानरेंद्रस्यधीमतः ॥ भीमसेनस्तदावीरःप्रोवाचामित्रकर्षणः १ ॥ भीमउवाच ॥ कोभवान्किंनिमित्तंवावानरंवपुरास्थितः ॥ ब्राह्मणानंतरोवर्णःक्षत्रियस्त्वांतुपृच्छति २ कौरवःसोमवंशीयःकुंत्यागर्भेणधारितः ॥ पांडवोवायुतनयोभीमसेनइतिश्रुतः ३ सवाक्यंकुरुवीरस्यस्मितेनप्रतिगृह्यतत् ॥ हनूमान्वायुतनयोवायुपुत्रमभाषत ४

णा ८१ । ८२ । ८३ । ८४ । ८५ । ८६ सरुजःसपीडः ते त्वया ८७ । ८८ । ८९ । ९० । ९१ । ९२ । ९३ आश्वसिहि विश्वासंकुरु ९४ । ९५ मह्यं मम ९६ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ ॥ ७ ॥ एतदिति १ । २ । ३ । ४

वैशसंविरोधं ५।६।७ निर्गुणइतिगुणाःसत्वादयोरूपादयश्चतैर्वर्जितः अतएवपरमःकोशपंचकेहि अनात्मन्यात्मत्वममुख्यमाध्यासिकत्वात्तस्य ततोऽन्यस्तुनिरुपाधिचिन्मात्रो मुख्यआत्मा प्रत्यग्भूतआकाशोघटमिवदेहंव्याप्यस्थितः एतेनशुद्धस्त्वंपदार्थ उक्तःअस्यनिर्गुणत्वेऽनुभवं प्रमाणयतिज्ञानविज्ञेयमिति ज्ञानं शास्त्रार्थध्यानजप्रमा तेनज्ञेयंज्ञातविज्ञेयमितिपाठे सर्वप्रकाश

॥ हनूमानुवाच ॥ वानरोऽहंनतेमार्गंप्रदास्यामियथेप्सितम् ॥ साधुगच्छनिवर्तस्वमात्वंप्राप्स्यसिवैशसम् ५ ॥ भीमसेनउवाच ॥ वैशसंवाऽस्तुयद्वान्यन्नत्वांपृच्छामिवानर ॥ प्रयच्छमार्गमुत्तिष्ठमामत्तःप्राप्स्यसेव्यथाम् ६ ॥ हनूमानुवाच ॥ नास्तिशक्तिर्ममोत्थातुंव्याधिनाक्लेशितोह्यहम् ॥ यद्यवश्यंप्रयातव्यंलंघयित्वाप्रयाहिमाम् ७ ॥ भीमउवाच ॥ निर्गुणःपरमात्मातुदेहंव्याप्यावतिष्ठते ॥ तमहंज्ञानविज्ञेयंनावमन्येनलंघये ८ यद्यागमैर्नविद्यांचतमहंभूतभावनम् ॥ क्रमेयंत्वांगिरिंचैवहनूमानिवसागरम् ९ ॥ हनूमानुवाच ॥ कएषहनुमान्नामसागरोयेनलंघितः ॥ पृच्छामित्वांनरश्रेष्ठकथ्यतांयदिशक्यते १० ॥ भीमउवाच ॥ भ्राताममगुणश्लाघ्योबुद्धिसत्वबलान्वितः ॥ रामायणेऽतिविख्यातःश्रीमान्वानरपुंगवः ११ रामपत्नीकृतेयेनशतयोजनविस्तृतः ॥ सागरःप्लवगेंद्रेणक्रमेणैकेनलंघितः १२ समेभ्रातामहावीर्यस्तुल्योऽहंतस्यतेजसा ॥ बलेपराक्रमेयुद्धेशक्तोऽहंतवनिग्रहे १३ उत्तिष्ठदेहिमेमार्गंपश्यमेचाद्यपौरुषम् ॥ मच्छासनमकुर्वाणंत्वांवानेष्येयमक्षयम् १४ ॥ वैशंपायनउवाच ॥ विज्ञायतंबलोन्मत्तंबाहुवीर्येणदर्पितम् ॥ हृदयेनावहस्यैनंहनूमान्वाक्यमब्रवीत् १५ ॥ हनूमानुवाच ॥ प्रसीदनास्तिमेशक्तिरुत्थातुंजरयाऽनघ ॥ ममानुकंपयात्वेतत्पुच्छमुत्सार्यगम्यताम् १६ ॥ वैशंपायनउवाच ॥ एवमुक्तेहनुमताहीनवीर्यपराक्रमम् ॥ मनसाऽचिंतयद्भीमःस्वबाहुबलदर्पितः १७ पुच्छेप्रगृह्यतरसाहीनवीर्यपराक्रमम् ॥ सालोक्यमंतकस्यैनंनयाम्यद्येहवानरम् १८ सावज्ञमथवामेनस्मयन्जग्राहपाणिना ॥ नचाशकच्चालयितुंभीमःपुच्छंमहाकपेः १९ उच्चिक्षेपपुनर्दोर्भ्यामिंद्रायुधमिवोच्छ्रितम् ॥ नोद्धर्तुमशकद्भीमोदोर्भ्यामपिमहाबलः २० उत्क्षिप्तभ्रूर्विवृत्ताक्षःसंहतभ्रुकुटीमुखः ॥ स्विन्नगात्रोऽभवद्भीमोनचोद्धर्तुंशशाकतम् २१ यत्नवानपितुश्रीमान्लांगुलोद्धरणोद्धुरः ॥ कपेःपार्श्वगतोभीमस्तस्थौव्रीडानताननः २२ प्रणिपत्यचकौंतेयःप्रांजलिर्वाक्यमब्रवीत् ॥ प्रसीदकपिशार्दूलदुरुक्तंक्षम्यतांमम २३ सिद्धोवायदिवादेवोगंधर्वोवाऽथगुह्यकः ॥ पृष्टःसन्कामयाब्रूहिकस्त्वंवानररूपधृक् २४ नचेद्गुह्यंमहाबाहोश्रोतव्यंचेद्भवेन्मम ॥ शिष्यवत्त्वांतुपृच्छामिउपपन्नोऽस्मितेनघ २५ ॥ हनूमानुवाच ॥ यत्तेममपरिज्ञानेकौतूहलमरिंदम ॥ तत्सर्वमखिलेनत्वंशृणुपांडवनंदन २६

कमहंकारादिसाक्षिणमित्यर्थः तस्यावमानना शालग्रामादिवत्तदुपाधिभूतस्य शरीरस्यलंघनेनभवत्यतस्तद्वयं नकुर्वेइत्यर्थः ८ भूतभावनंभूतानांवियदादीनांजरायुजादीनांचभावनंरचनंयस्मात्तं । आत्मनआकाशःसंभूतः । आत्मनःसर्वएतआत्मानो व्युच्चरंतीत्यादिश्रुतिभ्यः एतेनतत्पदार्थउक्तःतयोःसामानाधिकरण्यादभेदे ब्रह्माद्वैतंचदर्शितम् ९ । १० । ११ क्रमेणपादविक्षेपेण १२ । १३ । १४ । १५ । १६ एवमुक्तेसतितमित्यध्याहारः तंहीनवीर्यपराक्रमंमनसाऽचिंतयन्मेने १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६

२० । २८ उपतस्थुर्वालिनं ममचसुग्रीवेणप्रीतिरभवत् २९ निकृतो निरस्तः ३० । ३१ । ३२ । ३३ । ३४ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे सप्तचत्वारिंशदधिकशत

अहंकेसरिणःक्षेत्रेवायुनाजगदायुना ॥ जातःकमलपत्राक्षहनूमान्नामवानरः २७ सूर्यपुत्रंचसुग्रीवंशक्रपुत्रंचवालिनम् ॥ सर्वेवानरराजानस्तथावानरयूथपाः
२८ उपतस्थुर्महावीर्यांममचामित्रकर्षण ॥ सुग्रीवेणाभवत्प्रीतिरनिलस्याग्निनायथा २९ निकृतःसततोभ्रात्राकस्मिंश्चित्कारणांतरे ॥ ऋष्यमूकेमयासार्धंसु
ग्रीवोन्यवसच्चिरम् ३० अथदाशरथिर्वीरोरामोनाममहाबलः ॥ विष्णुर्मानुषरूपेणचचारवसुधातलम् ३१ सपितुःप्रियमन्विच्छन्सहभार्यःसहानुजः ॥ सधनु
र्धन्विनांश्रेष्ठोदंडकारण्यमाश्रितः ३२ तस्यभार्याजनस्थानाच्छलेनापहृताबलात् ॥ राक्षसेंद्रेणबलिनारावणेनदुरात्मना ३३ सुवर्णरत्नचित्रेणमृगरूपेणर
क्षसा ॥ वंचयित्वानरव्याघ्रंमारीचेनतदाऽनघ ३४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप० लोमशतीर्थयात्रायांहनुमद्भीमसंवादेसप्तचत्वारिंशदधि
कशततमोऽध्यायः ॥ १४७ ॥ छ ॥ ॥ हनूमानुवाच ॥ हृतदारःसहभ्रात्रापत्नींमार्गन्सराघवः ॥ दृष्टवान्शैलशिखरेसुग्रीवंवानरर्षभम् १ तेनतस्याभव
त्सख्यंराघवस्यमहात्मनः ॥ सहत्वावालिनंराज्येसुग्रीवमभिषिक्तवान् २ सराज्यंप्राप्यसुग्रीवःसीतायाःपरिमार्गणे ॥ वानरान्प्रेषयामासशतशोऽथसहस्रशः ३
ततोवानरकोटीभिःसहितोऽहंनरर्षभ ॥ सीतांमार्गन्महाबाहोप्रयातोदक्षिणांदिशम् ४ ततःप्रवृत्तिःसीतायाःगृध्रेणसुमहात्मना ॥ संपातिनासमाख्यातारावण
स्यनिवेशने ५ ततोऽहंकार्यसिद्ध्यर्थंरामस्याक्लिष्टकर्मणः ॥ शतयोजनविस्तारमर्णवंसहसाप्लुतः ६ अहंस्ववीर्यादुत्तीर्यसागरंमकरालयम् ॥ सुतांजनकराजस्य
सीतांसुरसुतोपमाम् ७ दृष्टवान्भरतश्रेष्ठरावणस्यनिवेशने ॥ समेत्यतामहंदेवींवैदेहींराघवप्रियाम् ८ दग्ध्वालंकामशेषेणसाट्टप्राकारतोरणाम् ॥ प्रत्यागत
श्चापिपुनर्नामतत्रप्रकाश्यवै ९ मद्वाक्यंचावधार्याशुरामोराजीवलोचनः ॥ सबुद्धिपूर्वंसैन्यस्यबद्ध्वासेतुंमहोदधौ १० वृतोवानरकोटीभिःसमुत्तीर्णोमहार्ण
वम् ॥ ततोरामेणवीर्येणहत्वातान्सर्वराक्षसान् ११ रणेतुराक्षसगणंरावणंलोकरावणम् ॥ निशाचरेंद्रंहत्वातुसभ्रातृसुतबांधवम् १२ राज्येऽभिषिच्यलंकायां
राक्षसेंद्रंबिभीषणम् ॥ धार्मिकंभक्तिमंतंचभक्तानुगतवत्सलम् १३ ततःप्रत्याहृताभार्यानष्टावेदश्रुतिर्यथा ॥ तयैवसहितःसाध्व्यापत्न्यारामोमहायशाः १४
गत्वाततोऽतित्वरितःस्वांपुरींरघुनंदनः ॥ अध्यावसत्ततोऽयोध्यामयोध्यांद्विषतांप्रभुः १५ ततःप्रतिष्ठितोराज्येरामोनृपतिसत्तमः ॥ वरंमयायाचितोऽसौरा
मोराजीवलोचनः १६ यावद्रामकथेयंतेभवेल्लोकेषुशत्रुहन् ॥ तावज्जीवेयमित्येवंतथास्त्वितिचसोऽब्रवीत् १७ सीताप्रसादाच्चसदामामिहस्थमरिंदम ॥ उपति
ष्ठंतिदिव्याहिभोगाभीमयथेप्सिताः १८ दशवर्षसहस्राणिदशवर्षशतानि च ॥ राज्यंकारितवान्रामस्ततःस्वभवनंगतः १९

तमोऽध्यायः ॥ १४७ ॥ ॥ हृतदारइति १ । २ । ३ । ४ । ५ । ६ । ७ समेत्यविदित्वासंभाषणादिना निश्चित्येत्यर्थः ८ अस्यरामस्यतत्रलंकायां ९ अवधार्य निश्चित्य १० । ११
लोकरावणं लोकपीडाकरं १२ । १३ । १४ अयोध्यांयोद्धुमशक्यां १५ । १६ । १७ । १८ कारितवान् कृतवान्स्वार्थेणिच् स्वभवनंवैकुंठं १९

२० । २१ । २२ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ एवमिति १ । २ । ३ । ४ हरिर्वानरः ५ । ६ । ७ । ८ वर्ष्मशरीरं ९
भावान्तत्त्वानिकर्मशुभाशुभं वीर्यं फलोदयपर्यंतंशक्तिः भवाभवावुत्पत्तिविनाशौ ऐश्वर्यानैश्वर्येवा १० कृतमेवसर्वंकृतकरणीयमेवेत्यर्थः ततएवहेतोःकृतयुगंनाम ११ गुणतांमुख्यमप्यमुख्यतांगतं
१२ । १३ नसामेतित्रयीधर्मस्यचित्तशुद्ध्यर्थत्वात्तस्याश्च तदानींस्वभावसिद्धत्वान्न सामादीन्यासन् मानवीक्रियाकृष्याद्यारंभरूपाकिंतु अभिध्यायफलंसंकल्पादेवसर्वंसंपद्यतइत्यर्थः १४

तदिहाप्सरसस्तातगंधर्वाश्चसदाऽनघ ॥ तस्यवीरस्यचरितंगायंतोरमयंतिमाम् २० अयंचमार्गोमर्त्यानामगम्यःकुरुनंदन ॥ ततोऽहंरुद्धवान्मार्गंतवेमंदेव
सेवितम् २१ धर्षयेद्वाशपेद्वाऽपिमाकश्चिदितिभारत ॥ दिव्योदेवपथोह्येषनात्रगच्छंतिमानुषाः ॥ यदर्थमागतश्चासिअतएवसरश्चतत् २२ ॥ ॥ इतिश्री
महाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांहनुमद्भीमसंवादेअष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ ॥ वैशंपायनउवाच ॥
एवमुक्तोमहाबाहुर्भीमसेनःप्रतापवान् ॥ प्रणिपत्यततःप्रीत्याभ्रातरंहृष्टमानसः १ उवाचश्लक्ष्णयावाचाहनूमंतंकपीश्वरम् ॥ मयाधन्यतरोनास्तियदार्यंदृष्टवा
नहम् २ अनुग्रहोमेसुमहांस्तृप्तिश्चतवदर्शनात् ॥ एवंतुकृतमिच्छामित्वयाऽद्यप्रियमात्मनः ३ यत्त्वेतदासीत्प्लवतःसागरंमकरालयम् ॥ रूपमप्रतिमंवीरतदि
च्छामिनिरीक्षितुम् ४ एवंतुष्टोभविष्यामिश्रद्धास्यामिचतेवचः ॥ एवमुक्तःसतेजस्वीप्रहस्यहरिरब्रवीत् ५ नतच्छक्यंत्वयाद्रष्टुंरूपंनान्येनकेनचित् ॥ का
लावस्थातदाह्यन्यानसावर्ततिसांप्रतम् ६ अन्यःकृतयुगेकालस्त्रेतायांद्वापरेपरः ॥ अयंप्रध्वंसनःकालोनाद्यतद्रूपमस्तिमे ७ भूमिर्नद्योनगाःशैलाःसिद्धादेवाम
हर्षयः ॥ कालंसमनुवर्तंतेयथाभावायुगेयुगे ८ बलवर्ष्मप्रभावाहिप्रहीयंत्युद्भवंतिच ॥ तदलंबततद्रूपंद्रष्टुंकुरुकुलोद्वह ॥ युगंसमनुवर्तामिकालोहिदुरतिक्रमः ९
॥ भीमउवाच ॥ युगसंख्यांसमाचक्ष्वआचारंचयुगेयुगे ॥ धर्मकामार्थभावांश्चकर्मवीर्यंभवाभवौ १० ॥ हनूमानुवाच ॥ कृतंनामयुगंतातयत्रधर्मःसनातनः ॥
कृतमेवनकर्तव्यंतस्मिन्कालेयुगोत्तमे ११ नतत्रधर्माःसीदंतिक्षीयंतेनचवैप्रजाः ॥ ततःकृतयुगंनामकालेनगुणतांगतम् १२ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥
नासन्कृतयुगेताततदानक्रयविक्रयः १३ नसामऋग्यजुर्वर्णाःक्रियानासीच्चमानवी ॥ अभिध्यायफलंतत्रधर्मःसंन्यासएवच १४ नतस्मिन्युगसंसर्गेव्याधयोनें
द्रियक्षयः ॥ नासूयानापिरुदितंनदर्पोनापिवैकृतम् १५ नविग्रहःकुतस्तंद्रीनद्वेषोनचपैशुनम् ॥ नभयंनापिसंतापोनचेर्ष्यानचमत्सरः १६ ततःपरमकंब्रह्म
सागतिर्योगिनांपरा ॥ आत्माचसर्वभूतानांशुक्लोनारायणस्तदा १७ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चकृतलक्षणाः ॥ कृतेयुगेसमभवन्स्वकर्मनिरताःप्रजाः १८

वैकृतंकपटं १५ विग्रहोवैरंतंद्रीआलस्यंद्वेषः परानिष्टचिंतनं पैशुनंतद्भाषणं ईर्ष्याअक्षमामत्सरः परोत्कर्षासहिष्णुत्वं १६ ततोऽसूयादित्यागात् परमकंपरमानंदात्मकंब्रह्मप्राप्यतइतिशेषः
गतिःप्राप्यंआत्मेतिश्वेतरक्तपीतकृष्णरूपाणिक्रमेण कृतादिषुभवंतीतिकृतेनारायणः शुक्लइत्युक्तं १७ कृतलक्षणाःकृतानिस्वतःसिद्धानिलक्षणानिशमोदमस्तपइत्यादीनियेषांते १८

समंब्रह्मतदेवआश्रयादिर्यस्यतत्तथा ब्रह्मैवफलप्राप्तयेश्रयेत । तत्प्राप्त्यर्थएवआचारोयस्य । तस्यैवचज्ञानं केवलंनिरुपाधिविषयं । ब्रह्मैवकर्माणिगत्यागत्यादीनियेषांते अहमग्निरहंहुतमि त्यादिवचनात् १९ एकोदेवःप्रत्यगात्मातत्रैवसदायुक्तायोगवंतः । एकोमंत्रःप्रणवः। एकोविधिर्वेदांतश्रवणादिः। एकाक्रियाध्यानादिः । एकएवतत्त्वप्रतिपादकोवेदोयेषांसर्वेऽपिज्ञाननिष्ठाएव नतुकेवलकर्मठाव्यसनिनोवा २० कालोदर्शादिस्तद्युक्तेनकर्मणाकामफलेनेच्छितफलेनरूयादिनास्वर्गादिनावासंयोगस्तदभावात् २१ आत्मनिब्रह्मणियोगऐक्यंतेनसमायुक्तोऽयंधर्मोयोगा रूयःकृतलक्षणःकृतयुगसूचकः । यदैवयत्रैवपुंसिईदृग्धर्मोवर्धते तदैवकृतयुगमित्यर्थः चतुष्पादोऽविकलः २२ त्रैगुण्यंप्रवृत्तिप्रकाशमोहात्मकरजःसत्त्वतमसांसमाहारस्तेनवर्जितंसत्त्रंयज्ञक्रिया

समाश्रयंसमाचारंसमज्ञानंचकेवलम् ॥ तदाहिसमकर्माणोवर्णाधर्मानवाप्नुवन् १९ एकदेवसदायुक्ताएकमंत्रविधिक्रियाः ॥ पृथग्धर्मास्त्वेकवेदाधर्ममेकमनुव्रताः २० चातुराश्रम्ययुक्तेनकर्मणाकालयोगिना ॥ अकामफलसंयोगात्प्राप्नुवंतिपरांगतिम् २१ आत्मयोगसमायुक्तोधर्मोऽयंकृतलक्षणः ॥ कृतेयुगेचतुष्पादश्चा तुर्वर्ण्यस्यशाश्वतः २२ एतत्कृतयुगंनामत्रैगुण्यपरिवर्जितम् ॥ त्रेतामपिनिबोधत्वंयस्मिन्सत्रंप्रवर्तते २३ पादेनह्रसतेधर्मोरक्ततांयातिचाच्युतः ॥ सत्य प्रवृत्ताश्चनराःक्रियाधर्मपरायणाः २४ ततोयज्ञाःप्रवर्तंतेधर्माश्चविविधाःक्रियाः ॥ त्रेतायांभावसंकल्पाःक्रियादानफलोपगाः २५ प्रचलंतिनवैधर्मात्तपोदानप रायणाः ॥ स्वधर्मस्थाःक्रियावंतोनरास्त्रेतायुगेऽभवन् २६ द्वापरेचयुगेधर्मोद्विभागोनःप्रवर्तते ॥ विष्णुर्वैपीततांयातिचतुर्धावेदएवच २७ ततोऽन्येचचतुर्वे दास्त्रिवेदाश्चतथापरे ॥ द्विवेदाश्चैकवेदाश्चाप्यनृचश्चतथापरे २८ एवंशास्त्रेषुभिन्नेषुबहुधानीयतेक्रिया ॥ तपोदानप्रवृत्ताचराजसीभवतिप्रजा २९ एकदेवस्य चाज्ञानाद्वेदास्तेबहवःकृताः ॥ सत्त्वस्यचेहविभ्रंशात्सत्येकश्चिदवस्थितः ३० सत्यात्प्रच्यवमानानांव्याधयोबहवोऽभवन् ॥ कामाश्चोपद्रवाश्चैवतदादैवका रिताः ३१ यैरर्द्यमानाःसुभृशंतपस्तप्यंतिमानवाः ॥ कामकामाःस्वर्गकामायज्ञांस्तन्वंतिचापरे ३२ एवंद्वापरमासाद्यप्रजाःक्षीयंत्यधर्मतः ॥ पादेनैकेनकौं तेयधर्मःकलियुगेस्थितः ३३ तामसंयुगमासाद्यकृष्णोभवतिकेशवः ॥ वेदाचाराःप्रशाम्यंतिधर्मयज्ञक्रियास्तथा ३४ ईतयोव्याधयस्तंद्रीदोषाःक्रोधादयस्त था ॥ उपद्रवाःप्रवर्तंतेआधयःक्षुद्भयंतथा ३५ युगेष्वावर्तमानेषुधर्मोव्यावर्ततेपुनः ॥ धर्मेव्यावर्तमानेतुलोकोव्यावर्ततेपुनः ३६ लोकेक्षीणेक्षयंयांतिभावा लोकप्रवर्तकाः ॥ युगक्षयकृताधर्माःप्रार्थनानिविकुर्वते ३७

रजोमिश्रत्वात् २३ सत्येनैवप्रवृत्ताः २४ भावसंकल्पाःभावोभावनाक्रियाअहमनेनकर्मणाइदंफलमनेनप्रकारेणकरिष्यामीत्येवंरूपा तद्विषयएवसंकल्पो येषांअतएवक्रियादिभिःफलोपगाः फलभुजोनतुकृतवत्संकल्पसिद्धाः२५।२६द्विभागोनःपादद्वयहीनचतुर्धावेदः कृतःकृत्स्नस्यैकेनधारयितुमशक्यत्वात् २७अनृचःऋङ्मात्रेणापिहीनाअतिमांद्यात् यद्वाचतुर्वेदाइतिवेदत्रयोक्तंकर्म ज्योतिष्टोमादिकमथर्वणोपनिषदुक्तंध्यानं चसहैववाऽनुतिष्ठंतीति कर्मोपास्तिसमुच्चयउक्तः । त्रिवेदाइतिकेवलकर्मठाः । द्विवेदाइति स्वशाखोक्तंसंध्यावंदनादिकर्मध्यानंचसहैववानुतिष्ठंती। एकवेदाध्यानैकनिष्ठाः । अनृचःकृतकृत्यावि‍पर्यस्तो निदिध्यासेनकिंध्यानमविपर्यये इत्युक्तेर्ध्यानादपिविरक्ताः २८।२९ सत्त्वस्यबुद्धेर्विभ्रंशात् क्षयात् ३०।३१ यैर्व्याधिभिःकामैश्च ३२।३३ तामसंतमोगुणप्रधानंकलिं३४ईतयोऽतिवृष्ट्यादयः३५व्यावर्ततेनश्यति३६भावाधर्मज्ञानादयः प्रार्थनानिविकुर्वते अन्यत्प्रार्थ्यतेऽन्यत्जायतेपौष्टिकमपिकर्मविविलोपान्नाशकंभवतीतिभावः ३७

चिरजीविनोमादृशा अपियुगानुवर्तिनः कालानुसारिणोभवंति ३८ अनर्थकेषुनिष्प्रयोजनेषुभावोऽभिनिवेशः ३९ स्वस्तिकल्याणं ४० ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेऊन

एतत्कलियुगंनामअचिराद्यत्प्रवर्तते ॥ युगानुवर्तनंत्वेतत्कुर्वंतिचिरजीविनः ३८यच्चतेमत्परिज्ञानेकौतूहलमरिंदम॥ अनर्थकेषुकोभावःपुरुषस्यविजानतः ३९ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि ॥ युगसंख्यांमहाबाहोस्वस्तिप्राप्नुहिगम्यताम् ४० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोम शतीर्थयात्रायांकदलीषंडेहनुमद्भीमसंवादेऊनपंचाशदधिकशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ भीमसेनउवाच ॥ पूर्वरूपमदृष्ट्वातेनयास्यामिक थंचन ॥ यदितेऽहमनुग्राह्योदर्शयात्मानमात्मना १ ॥ वैशंपायनउवाच ॥ एवमुक्तस्तुभीमेनस्मितंकृत्वाप्लवंगमः ॥ तद्रूपंदर्शयामासयद्वैसागरलंघने २ भ्रा तुःप्रियमभीप्सन्वैचकारसुमहद्वपुः ॥ देहस्तस्यततोऽतीववर्धत्यायामविस्तरैः ३ सद्रुमंकदलीषंडछादयन्नमितद्युतिः ॥ गिरिश्चोच्छ्रयमाक्रम्यतस्थौतत्रचवा नरः ४ समुच्छ्रितमहाकायोद्वितीयइवपर्वतः ॥ ताम्रेक्षणस्तीक्ष्णदंष्ट्रोभ्रुकुटीकुटिलाननः५ दीर्घलांगूलमाविध्यदिशोव्याप्यस्थितःकपिः ॥ तद्रूपंमहदालक्ष्यभ्रा तुःकौरवनंदनः ६ विसिष्मियेतदाभीमोजहृषेचपुनःपुनः ॥ तमर्कमिवतेजोभिःसौवर्णमिवपर्वतम् ७ प्रदीप्तमिवचाकाशंदृष्ट्वाभीमोन्यमीलयत् ॥ आबभाषेच हनुमान्भीमसेनंस्मयन्निव ८ एतावदिहशक्तस्त्वंद्रष्टुंरूपंममानघ ॥ वर्धेऽहंचाप्यतोभूयोयावन्मेमनसिस्थितम् ॥ भीमशत्रुषुचात्यर्थंवर्धतेमूर्तिरोजसा ९ ॥ ॥ वैशंपायनउवाच ॥ तदद्भुतंमहारौद्रंविंध्यपर्वतसन्निभम् ॥ दृष्ट्वाहनूमतोवर्ष्मसंभ्रांतःपवनात्मजः १० प्रत्युवाचततोभीमःसंप्रहृष्टतनूरुहः ॥ कृतांजलिरदीना त्माहनूमंतमवस्थितम् ११ दृष्टंप्रमाणंविपुलंशरीरस्यास्यतेविभो ॥ संहरस्वमहावीर्यस्वयमात्मानमात्मना १२ नहिशक्नोमित्वांद्रष्टुंदिवाकरमिवोदितम् ॥ अप्रमे यमनाधृष्यंमैनाकमिवपर्वतम् १३ विस्मयश्चैवमेवीरसुमहान्मनसोऽद्यवै ॥ यद्रामस्त्वयिपार्श्वस्थेस्वयंरावणमभ्यगात् १४ त्वमेवशक्तस्तांलंकांसयोधांसहवा हनाम् ॥ स्वबाहुबलमाश्रित्यविनाशयितुमंजसा १५ नहितेकिंचिदप्राप्यंमारुतात्मजविद्यते ॥ तवनैकस्यपर्याप्तोरावणःसगणोयुधि १६ ॥ वैशंपायनउवाच ॥ एवमुक्तस्तुभीमेनहनूमान्प्लवगोत्तमः ॥ प्रत्युवाचततोवाक्यंस्निग्धगंभीरयागिरा १७ ॥ हनूमानउवाच ॥ एवमेतन्महाबाहोयथावदसिभारत ॥ भीमसेननपर्या प्तोममासौराक्षसाधमः १८ मयातुनिहतेतस्मिन्रावणेलोककंटके ॥ कीर्तिर्नश्येद्राघवस्यततएतदुपेक्षितम् १९ तेनवीरेणतंहत्वासगणंराक्षसाधमम् ॥ आनी तास्वपुरंसीताकीर्तिश्चाख्यापितानृषु २० तद्गच्छविपुलप्रज्ञभ्रातुःप्रियहितेरतः ॥ अरिष्टंक्षेममध्वानंवायुनापरिरक्षितः २१ एषपंथाःकुरुश्रेष्ठसौगंधिकव नायते ॥ द्रक्ष्यसेधनदोद्यानंरक्षितंयक्षराक्षसैः २२ नचतेतरसाकार्यःकुसुमावचयःस्वयम् ॥ दैवतानिहिमान्यानिपुरुषेणविशेषतः २३

पंचाशदधिकशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ पूर्वरूपमिति १ । २ । ३ गिरिश्चविंध्यगिरिरिवइवार्थेचः ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ पर्याप्तःसमर्थः १६ । १७ । १८ । १९ । २० अरिष्टंनिर्विघ्नं २१ । २२ पुरुषेणमर्त्येन २३

२४ गमयस्वबोधपूर्वकमनुतिष्ठस्वार्थेणिच् २५ । २६ दुर्जनवधोऽधर्मोऽपिधर्मएवपरोपघातकंसत्यं धर्मोप्यधर्मएव २७ आचारः शौचादिस्तेनधर्मः प्राप्यतेततोवेदाधिगमस्ततोदेवताप्रसाद इत्यर्थः २८ वेदेतियज्ञैर्देवानांनीत्यामनुष्याणांच स्थितिरित्यर्थः २९ पणोभृविस्तामर्हतीतिपण्यासेवा । पणोवराटमानेस्यादित्युपक्रम्य व्यवहारेभृतौधने इतिभेदिनीवार्ताजीविकार्थां

बलिहोमनमस्कारैर्मंत्रैश्चभरतर्षभ ॥ दैवतानिप्रसादंहिभक्त्याकुर्वंतिभारत २४ मातातसाहसंकार्षीःस्वधर्मंपरिपालय ॥ स्वधर्मस्थःपरंधर्मंबुध्यस्वगमयस्व च २५ नहिधर्ममविज्ञायवृद्धाननुपसेव्यच ॥ धर्मार्थौवेदितुंशक्यौबृहस्पतिसमैरपि २६ अधर्मोयत्रधर्माख्योधर्मश्चाधर्मसंज्ञितः ॥ सविज्ञेयोविभागेनयत्र मुह्यंत्यबुद्धयः २७ आचारसंभवोधर्मोधर्माद्वेदाःप्रतिष्ठिताः ॥ वेदैर्यज्ञाःसमुत्पन्नायज्ञैर्देवाःप्रतिष्ठिताः २८ वेदाचारविधानोक्तैर्यज्ञैर्धार्यंतिदेवताः ॥ बृहस्प त्युशनःप्रोक्तैर्नयैर्धार्यंतिमानवाः २९ पण्याकरवणिज्याभिःकृष्यागोजाविपोषणैः ॥ वार्तयाधार्यतेसर्वंधर्मैरेतैर्द्विजातिभिः ३० त्रयीवार्तादंडनीतिस्तिस्रोवि द्याविजानताम् ॥ ताभिःसम्यक्प्रयुक्ताभिर्लोकयात्राविधीयते ३१ साचेद्धर्मकृतानस्यात्त्रयीधर्मभृतेभुवि ॥ दंडनीतिमृतेचापिनिर्मर्यादमिदंभवेत् ३२ वार्ता धर्मेह्यवर्तिन्योविनश्येयुरिमाःप्रजाः ॥ सुप्रवृत्तैस्त्रिभिर्ह्येतैर्धर्मैःसूयंतिवैप्रजाः ३३ द्विजातीनामृतंधर्मोह्येकश्चैवैकवर्णिकः ॥ यज्ञाध्ययनदानानित्रयःसाधारणाः स्मृताः ३४ याजनाध्यापनेविप्रेधर्मश्चैवप्रतिग्रहः ॥ पालनंक्षत्रियाणांवैवैश्यधर्मश्चपोषणम् ३५ शुश्रूषाचद्विजातीनांशूद्राणांधर्मउच्यते ॥ भैक्ष्यहोमव्रते र्हीनास्तथैवगुरुवासिताः ३६ क्षत्रधर्मोऽत्रकौंतेयतवधर्मोऽत्ररक्षणम् ॥ स्वधर्मंप्रतिपद्यस्वविनीतोनियतेंद्रियः ३७ वृद्धैःसंमंत्र्यसद्भिश्चबुद्धिमद्भिःश्रुतान्वि तैः ॥ आस्थितःशास्तिदंडेनव्यसनीपरिभूयते ३८ निग्रहानुग्रहैःसम्यग्यदाराजाप्रवर्तते ॥ तदाभवंतिलोकस्यमर्यादाःसुव्यवस्थिताः ३९ तस्माद्देशेचदु र्गेचशत्रुमित्रबलेषुच ॥ नित्यंचारेणबोद्धव्यंस्थानंवृद्धिःक्षयस्तथा ४० राज्ञामुपायश्चारश्चबुद्धिर्मंत्रपराक्रमाः ॥ निग्रहप्रग्रहौचैवदाक्ष्यंचैकार्यसाधकम् ४१ साम्नादानेनभेदेनदंडेनोपेक्षणेनच ॥ साधनीयानिकर्माणिसमासव्यासयोगतः ४२ मंत्रमूलानयाःसर्वेचाराश्चभरतर्षभ ॥ सुमंत्रितेनयासिद्धिस्तांद्विजैःसहमं त्रयेत् ४३ स्त्रियामूढेनबालेनलुब्धेनलघुनाऽपिवा ॥ नमंत्रयीतगुह्यानियेषुचोन्मादलक्षणम् ४४ मंत्रयेत्सहविद्वद्भिःशक्तैःकर्माणिकारयेत् ॥ स्निग्धैश्चनी तिविन्यासान्मूर्खान्सर्वत्रवर्जयेत् ४५ धार्मिकान्धर्मकार्येषुअर्थकार्येषुपंडितान् ॥ स्त्रिषुक्लीबान्नियुंजीतक्रूरान्क्रूरेषुकर्मसु ४६

वृत्तिः ३० साचक्रमेणब्राह्मणस्यत्रयीयाजनाध्यापनादिः वैश्यस्यवार्तापण्यादिः क्षत्रियस्यदंडादिः ३१ सालोकयात्रा ३२ । ३३ ऋतंसत्यमात्मज्ञानाख्यंएकोवर्णः शुद्धःकेवलसात्विकः धर्मोयोगाख्यः ३४ । ३५ । भैक्ष्येतिगुरौत्रिवर्णे वासितंवासोयेषांतेशूद्राभैक्ष्यादिभिर्हीनाभवंति ३६ क्षत्रधर्मोऽप्रकरणेउच्यते सचतवधर्मोऽत्रलोके ३७ आस्थितोऽनुष्ठितः ३८ । ३९ स्थानंसिद्धसंरक्षणम् ४० । ४१ समासःसामादिपंचकेएकेनद्विःत्रैर्वा कार्यसाधनंव्यासःसर्वैस्तत्सिद्धिः ४२। ४३ । ४४ स्निग्धैर्हितैप्सुभिःनीतिप्रजादारापत्यादेर्विन्यासाः स्थापनानि ४५ । ४६

स्वेभ्यश्चारेभ्यःपरेभ्यः उत्कोचादिनालोभितेभ्यः ४७ बुद्ध्याजीवनाशया प्रतिपन्नेषुशरणागतेषु ४८ । ४९ घोरोधर्मोराजधर्मः ५० । ५१ । ५२ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये

स्वेभ्यश्चैवपरेभ्यश्चकार्याकार्यसमुद्भवा ॥ बुद्धिःकर्मसुविज्ञेयारिपूणांचबलाबलम् ४७ बुद्ध्यास्वप्रतिपन्नेषुकुर्यात्साधुष्वनुग्रहम् ॥ निग्रहंचाप्यशिष्टेषुनिर्मर्या देषुकारयेत् ४८ निग्रहेप्रग्रहेसम्यग्यदाराजाप्रवर्तते ॥ तदाभवतिलोकस्यमर्यादासुव्यवस्थिता ४९ एषतेऽभिहितःपार्थघोरोधर्मोदुरन्वयः ॥ तंस्वधर्मविभा गेनविनयस्थोऽनुपालय ५० तपोधर्मदमेज्याभिर्विप्रायांतियथादिवम् ॥ दानातिथ्यक्रियाधर्मैर्यांतिवैश्याश्चसद्गतिम् ५१ क्षत्रंयातितथास्वर्गंभुविनिग्रहपा लनैः ॥ सम्यक्प्रणीतदंडाहिकामद्वेषविवर्जिताः ॥ अलुब्धाविगतक्रोधाःसतांयांतिसलोकताम् ५२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलो मशतीर्थयात्रायांहनूमद्भीमसेनसंवादेपंचाशदधिकशततमोऽध्यायः ॥ १५० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ततःसंहृत्यविपुलंतद्वपुः कामतःकृतम् ॥ भीमसेनंपुनर्दोर्भ्यांपर्यष्वजतवानरः १ परिष्वक्तस्यतस्याशुभ्रात्राभीमस्यभारत ॥ श्रमोनाशमुपागच्छत्सर्वंचासीत्प्रदक्षिणम् २ बलंचाति बलोमेनेनमेऽस्तिसदृशोमहान् ॥ ततःपुनरथोवाचपर्यश्रुनयनोहरिः ३ भीममाभाष्यसौहार्दाद्बाष्पगद्गदयागिरा ॥ गच्छवीरस्वमावासंस्मर्तव्योऽस्मिकथां तरे ४ इहस्थश्चकुरुश्रेष्ठननिवेद्योऽस्मिकर्हिचित् ॥ धनदस्यालयाच्चापिविसृष्टानांमहाबल ५ देशकालइहायातुंदेवगंधर्वयोषिताम् ॥ ममापिसफलंचक्षुःस्मा रितश्चास्मिराघवम् ६ रामाभिधानंविष्णुंहिजगद्धृदयनंदनम् ॥ सीतावक्त्रारविंदार्कंदशास्यध्वांतभास्करम् ७ मानुषंगात्रसंस्पर्शंगत्वाभीमत्वयासह ॥ तद स्मद्दर्शनंवीरकौंतेयामोघमस्तुते ८ भ्रातृत्वंत्वंपुरस्कृत्यवरंवरयभारत ॥ यदितावन्मयाक्षुद्रागत्वावारणसाह्वयम् ९ धार्तराष्ट्रानिहंतव्यायावदेतत्करोम्यहम् ॥ शिलयानगरंवाऽपिमर्दितव्यंमयायदि १० बध्वावुर्योधनंचाद्यआनयामितवांतिकम् ॥ यावदेतत्करोम्यद्यकामंतवमहाबल ११ ॥ वैशंपायनउवाच ॥ भी मसेनस्तुतद्वाक्यंश्रुत्वातस्यमहात्मनः ॥ प्रत्युवाचहनूमंतंप्रहृष्टेनांतरात्मना १२ कृतमेवत्वयासर्वंममवानरपुंगव ॥ स्वस्तितेऽस्तुमहाबाहोकामयेत्वांप्रसी दमे १३ सनाथाःपांडवाःसर्वेत्वयानाथेनवीर्यवन् ॥ तवैवतेजसासर्वान्विजेष्यामोवयंपरान् १४ एवमुक्तस्तुहनुमान्भीमसेनमभाषत ॥ भ्रातृत्वात्सौहृदाच्चै वकरिष्यामिप्रियंतव १५ चमूंविगाह्यशत्रूणांपरशक्तिसमाकुलाम् ॥ यदासिंहरवंवीरकरिष्यसिमहाबल १६ तदाऽहंबृंहयिष्यामिस्वरवेणरवंतव ॥ विजयस्य
४२ ध्वजस्थश्चनादान्मोक्ष्यामिदारुणान् १७ शत्रूणांयेप्राणहराःसुखंयेनहनिष्यथ ॥ एवमाभाष्यहनुमांस्तदापांडवनंदनम् १८ मार्गमाख्यायभीमायतत्रैवांत रधीयत १९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांगंधमा॰हनूमद्भीमसंवादेएकपंचाशदधिकशततमोऽध्यायः ॥ १५१ ॥

भारतभावदीपेपंचाशदधिकशततमोऽध्यायः ॥ १५० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ततइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ ।१० । ११ । १२ । १३ । १४ १५ । १६ । १७ । १८ । १९ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेएकपंचाशदधिकशततमोऽध्यायः ॥ १५१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

गतेइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ ।१० ११।१२।१३। १४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेद्विपंचाशदधिकशततमोऽध्यायः ॥ १५२ ॥ ॥ ७ ॥ सगत्वेति १

॥ वैशंपायनउवाच ॥ गतेतस्मिन्हरिवरेभीमोऽपिबलिनांवरः ॥ तेनमार्गेणविपुलंव्यचरद्गंधमादनम् १ अनुस्मरन्वपुस्तस्यश्रियंचाप्रतिमांभुवि ॥ माहात्म्य
मनुभावंचस्मरन्दाशरथेर्ययौ २ सतानिरमणीयानिवनान्युपवनानिच ॥ विलोकयामासतदासौगंधिकवनेप्सया ३ फुल्लद्रुमविचित्राणिसरांसिसरितस्तथा ॥
नानाकुसुमचित्राणिपुष्पितानिवनानिच ४ मत्तवारणयूथानिपंकक्लिन्नानिभारत ॥ वर्षतामिवमेघानांवृंदानिददृशेतदा ५ हरिणैश्चपलापांगैर्हरिणीसहितैर्व
नम् ॥ सशष्पकवलैःश्रीमान्पथिदृष्ट्वाद्रुतंययौ ६ महिषैश्चवराहैश्चशार्दूलैश्चनिषेवितम् ॥ व्यपेतभीर्गिरिंशौर्याद्भीमसेनोव्यगाहत ७ कुसुमानतगंधैश्चताम्र
पल्लवकोमलैः ॥ याच्यमानइवारण्येद्रुमैर्मारुतकंपितैः ८ कृतपद्मांजलिपुटामत्तषट्पदसेविताः ॥ प्रियतीर्थवनामार्गेपद्मिनीःसमतिक्रमन् ९ मज्जमानमनो
दृष्टिःफुल्लेषुगिरिसानुषु ॥ द्रौपदीवाक्यपाथेयोभीमःशीघ्रतरंययौ १० परिवृत्तेऽहनिततःप्रकीर्णहरिणेवने ॥ कांचनैर्विमलैःपद्मैर्ददर्शविपुलांनदीम् ११ हं
सकारंडवयुतांचक्रवाकोपशोभिताम् ॥ रचितामिवतस्याद्रेर्मालांविमलपंकजाम् १२ तस्यांनद्यांमहासत्वःसौगंधिकवनंमहत् ॥ अपश्यत्प्रीतिजननंबाला
र्कसदृशद्युति १३ तद्दृष्ट्वालब्धकामःसमनसापांडुनंदनः ॥ वनवासपरिक्लिष्टांजगाममनसाप्रियाम् १४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलो
मशतीर्थयात्रायांसौगंधिकाहरणेद्विपंचाशदधिकशततमोऽध्यायः ॥१५२॥ ॥ वैशंपायनउवाच ॥ सगत्वानलिनींरम्यांराक्षसैरभिरक्षिताम् ॥ कैलासशिखरा
भ्याशेददर्शशुभकाननाम् १ कुबेरभुवनाभ्याशेजातांपर्वतनिर्झरैः ॥ सुरम्यांविपुलच्छायांनानाद्रुमलताकुलाम् २ हरितांबुजसंछन्नांदिव्यांकनकपुष्कराम् ॥
नानापक्षिजनाकीर्णांसूपतीर्थामकर्दमाम् ३ अतीवरम्यांसुजलांजातांपर्वतसानुषु ॥ विचित्रभूतांलोकस्यशुभामद्भुतदर्शनाम् ४ तत्राम्रुतरसंशीतंलघुकुंतीसुतः
शुभम् ॥ ददर्शविमलंतोयंपिबंश्चबहुपांडवः ५ तांतुपुष्करिणींरम्यांदिव्यसौगंधिकावृताम् ॥ जातरूपमयैःपद्मैश्छन्नांपरमगंधिभिः ६ वैदूर्यवरनालैश्चबहुचित्रै
र्मनोरमैः ॥ हंसकारंडवोद्धूतैःसृजद्भिरमलंरजः ७ आक्रीडंराजराजस्यकुबेरस्यमहात्मनः ॥ गंधर्वैरप्सरोभिश्चदेवैश्चपरमार्चिताम् ८ सेवितामृषिभिर्दिव्यैर्यक्षैः
किंपुरुषैस्तथा ॥ राक्षसैःकिंनरैश्चापिगुप्तांवैश्रवणेनच ९तांचदृष्ट्वैवकौंतेयोभीमसेनोमहाबलः॥बभूवपरमप्रीतोदिव्यंसंप्रेक्ष्यतत्सरः १० तच्चक्रोधवशानामराक्षसा
राजशासनात् ॥ रक्षंतिशतसाहस्राश्चित्रायुधपरिच्छदाः ११ तेतुदृष्ट्वैवकौंतेयमजिनैःप्रतिवासितम् ॥ रुक्मांगदधरंवीरंभीमंभीमपराक्रमम् १२ सायुधंबद्धनिस्त्रिं
शमशंकितमरिंदमम् ॥ पुष्करेप्सुमुपायांतमन्योन्यमभिचुक्रुशुः १३ अयंपुरुषशार्दूलःसायुधोऽजिनसंवृतः ॥ यच्चिकीर्षुरिहप्राप्तस्तत्संप्रष्टुमिहार्हथ १४

२ सूपतीर्थाशोभनानिउपतीर्थानितीराणियस्यांसा ३ । ४ लघुआरोग्यकरम् ५ जातरूपंस्वर्णम् ६ हंसादिपोतैर्हंसाद्युद्धूतैर्वा ७ आक्रीडंक्रीडास्थानं ८ । ९।१० । ११ । १२ । १३ । १४

१५ । १६ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेत्रिपंचाशदधिकशततमोऽध्यायः ॥ १५३ ॥ ॥ पांडवइति १ अनिलोढंवायुनाआनीतम्२।३।४।५।६।७।८।९।१०।११।१२
ततःसर्वेमहाबाहुंसमासाद्यवृकोदरम् ॥ तेजोयुक्तमपृच्छंतकस्त्वमाख्यातुमर्हसि १५ मुनिवेषधरश्चैवसायुधश्चैवलक्ष्यसे ॥ यदर्थमभिसंप्राप्तस्तदाचक्ष्वमहा
मते १६ ॥ ॥ इतिश्रीमहाभारते आरण्यकेप॰तीर्थयात्रापर्वणिलोमशतीर्थयात्रायांसौगंधिकाहरणेत्रिपंचाशदधिकशततमोऽध्यायः ॥ १५३ ॥ ॥ ४ ॥
॥ भीमउवाच ॥ पांडवोभीमसेनोऽहंधर्मराजादनंतरः ॥ विशालांबदरींप्राप्तोभ्रातृभिःसहराक्षसाः १ अपश्यत्तत्रपांचालीसौगंधिकमनुत्तमम् ॥ अनिलोढ
मितोनूनंसाबहूनिपरीप्सति २ तस्यामामनवद्यांग्याधर्मपत्न्याःप्रियेस्थितम् ॥ पुष्पाहारमिहप्राप्तंनिबोधतनिशाचराः ३ ॥ राक्षसाऊचुः ॥ आक्रीडोऽयं
कुबेरस्यदयितःपुरुषर्षभ ॥ नेहशक्यंमनुष्येणविहर्तुंमर्त्यधर्मणा ४ देवर्षयस्तथायक्षादेवाश्चात्रवृकोदर ॥ आमंत्र्ययक्षप्रवरंपिबंतिरमयंतिच ॥ गंधर्वाप्सर
सश्चैवविहरंत्यत्रपांडव ५ अन्यायेनेहयःकश्चिदवमन्यधनेश्वरम् ॥ विहर्तुमिच्छेद्दुर्वृत्तःसविनश्येन्नसंशयः ६ तमनादृत्यपद्मानिजिहीर्षसिबलादितः ॥ धर्मरा
जस्यचात्मानंब्रवीषिभ्रातरंकथम् ७ आमंत्र्ययक्षराजंवैततःपिबहरस्वच ॥ नातोऽन्यथात्वयाशक्यंकिंचित्पुष्करमीक्षितुम् ८ ॥ भीमसेनउवाच ॥ राक्ष
सास्तंनपश्यामिधनेश्वरमिहांतिके ॥ दृष्ट्वापिचमहाराजंनाहंयाचितुमुत्सहे ९ नहियाचंतिराजानएषधर्मःसनातनः ॥ नचाहंहातुमिच्छामिक्षात्रधर्मंकथंचन
१० इयंचनलिनीरम्याजातापर्वतनिर्झरे ॥ नेयंभवनमासाद्यकुबेरस्यमहात्मनः ११ तुल्याहिसर्वभूतानामियंवैश्रवणस्यच ॥ एवंगतेषुद्रव्येषुकःकंयाचितु
मर्हति १२ ॥ वैशंपायनउवाच ॥ इत्युक्त्वाराक्षसान्सर्वान्भीमसेनोह्यमर्षणः ॥ व्यगाहतमहाबाहुर्नलिनींतांमहाबलः १३ ततःसराक्षसैर्वाचाप्रतिषिद्धःप्रता
पवान् ॥ मामैवमितिसक्रोधैर्भर्त्सयद्भिःसमंततः १४ कदर्थीकृत्यतुसतान्राक्षसान्भीमविक्रमः ॥ व्यगाहतमहातेजास्तेतंसर्वेन्यवारयन् १५ गृण्हीतबध्नीत
विकर्ततेमंपचामखादामचभीमसेनम् ॥ क्रुद्धाब्रुवंतोभियुर्द्रुतंतेशस्त्राणिचोद्यम्यविवृत्तनेत्राः १६ ततःसगुर्वींयमदंडकल्पांमहागदांकांचनपट्टनद्धाम् ॥ प्र
गृह्यतानभ्यपतत्तरस्वीततोब्रवीत्तिष्ठततिष्ठतेति १७ तेतंतदातोमरपट्टिशाद्यैर्व्याविद्धशस्त्रैःसहसानिपेतुः ॥ जिघांसवःक्रोधवशाःसुभीमाभीमंसमंतात्परि
वव्रुरुग्राः १८ वातेनकुंत्यांबलवान्सुजातःशूरस्तरस्वीद्विषतांनिहंता ॥ सत्येचधर्मेचरतःसवैवपराक्रमैशत्रुभिरप्रधृष्यः १९ तेषांसमार्गान्विविधान्महात्मा
विहन्यशस्त्राणिचशात्रवाणाम् ॥ यथाप्रवीरान्निजघानभीमःपरंशतंपुष्करिणिसमीपे २० तेतस्यवीर्यंचबलंचदृष्ट्वाविद्याबलंबाहुबलंतथैव ॥ अशक्नुवंतःसहितं
समंताद्धतंप्रवीराःसहसानिवृत्ताः २१ विदीर्यमाणास्ततएवहंतुमाकाशमास्थायविमूढसंज्ञाः ॥ कैलासशृंगाण्यभिदुद्रुवुस्तेभीमार्दिताःक्रोधवशाःप्रभग्नाः २२
सशक्रवदानवदैत्यसंघान्विक्रम्यजित्वाचरणेऽरिसंघान् ॥ विगाह्यतांपुष्करिणींजितारिःकामायजग्राहततोंऽबुजानि २३

१३ । १४ । १५ । १६ । १७ । १८ । १९ विहन्यविनाश्य । वाल्यपीत्यनुनासिकालोपपक्षेइदंरूपम् २० सहितमेकीभूयाप्यशक्नुवंतः २१ ।२२विक्रम्यजित्वाचअभिभूयवशीकृत्यचेत्यर्थः २३

२४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे पंचपंचाशदधिकशततमोऽध्यायः ॥ १५५ ॥ ॥ तस्मिन्निति १ । २

तंचभीमंमहात्मानंतस्यास्तीरेमनस्विनम् ॥ ददृशुर्निहतांश्चैवयक्षांश्चविपुलेक्षणान् २४ भिन्नकायाक्षिबाहूरून्संचूर्णितशिरोधरान् ॥ तंचभीमंमहात्मानंत
स्यास्तीरेव्यवस्थितम् २५ सक्रोधंस्तब्धनयनंसंदष्टदशनच्छदम् ॥ उद्यम्यचगदांदोर्भ्यांनदीतीरेव्यवस्थितम् २६ प्रजासंक्षेपसमयेदंडहस्तमिवांतकम् ॥
तंदृष्ट्वाधर्मराजस्तुपरिष्वज्यपुनःपुनः २७ उवाचश्लक्ष्णयावाचाकौंतेयकिमिदंकृतम् ॥ साहसंबतभद्रंतेदेवानामथचाप्रियम् २८ पुनरेवंनकर्तव्यंममचेदि
च्छसिप्रियम् ॥ अनुशिष्यतुकौंतेयंपद्मानिपरिगृह्यच २९ तस्यामेवनलिन्यांतुविजह्रुरमरोपमाः ॥ एतस्मिन्नेवकालेतुप्रगृहीतशिलायुधाः ३० प्रादुरास
न्महाकायास्तस्योद्यानस्यरक्षिणः ॥ तेदृष्ट्वाधर्मराजानंमहर्षिंचापिलोमशम् ३१ नकुलंसहदेवंचतथान्यान्ब्राह्मणर्षभान् ॥ विनयेननताःसर्वेप्रणिपत्यचभारत
३२ सांत्विताधर्मराजेनप्रसेदुःक्षणदाचराः ॥ विदिताश्चकुबेरस्यतत्रतेकुरुपुंगवाः ३३ ऊषुर्नातिचिरंकालंरममाणाःकुरूद्वहाः ॥ प्रतीक्षमाणाबीभत्सुंगंधमाद
नसानुषु ३४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोमशतीर्थयात्रायांसौगंधिकाहरणेपंचपंचाशदधिकशततमोऽध्यायः १५५ ॥ ॥ वैशं
पायनउवाच ॥ ॥ तस्मिन्निवसमानोऽथधर्मराजोयुधिष्ठिरः ॥ कृष्णयासहितान्भ्रातॄन्नित्युवाचसहद्विजान् १ दृष्टानितीर्थान्यस्माभिःपुण्यानिचाशिवानिच ॥
मनसोह्लादनीयानिवनानिचपृथक्पृथक् २ देवैःपूर्वंविचीर्णानिमुनिभिश्चमहात्मभिः ॥ यथाक्रमविशेषेणद्विजैःसंपूजितानिच ३ ऋषीणांपूर्वचरितंतथाकर्म
विचेष्टितम् ॥ राजर्षीणांचचरितंकथाश्चविविधाःशुभाः ४ शृण्वानास्तत्रतत्रस्मआश्रमेषुशिवेषुच ॥ अभिषेकंद्विजैःसार्धंकृतवंतोविशेषतः ५ अर्चिताःसत
तंदेवाःपुष्पैरद्भिःसदाचवः ॥ यथालब्धैर्मूलफलैःपितरश्चापितर्पिताः ६ पर्वतेषुचरम्येषुसर्वेषुचसरस्सुच ॥ उदधौचमहापुण्येमुपस्पृष्टंमहात्मभिः ७ इलास
रस्वतीसिंधुर्यमुनानर्मदातथा ॥ नानातीर्थेषुरम्येषुमुपस्पृष्टंसहद्विजैः ८ गंगाद्वारमतिक्रम्यबहवःपर्वताःशुभाः ॥ हिमवान्पर्वतश्चैवनानाद्विजगणायुतः ९
विशालाबदरीदृष्टानरनारायणाश्रमः ॥ दिव्यपुष्करिणीदृष्टासिद्धदेवर्षिपूजिता १० यथाक्रमविशेषेणसर्वाण्यायतनानिच ॥ दर्शितानिद्विजश्रेष्ठालोमशेनम
हात्मना ११ इमंवैश्रवणावासंपुण्यंसिद्धनिषेवितम् ॥ कथंभीमगमिष्यामोगतिरंतरधीयताम् १२ ॥वैशंपायनउवाच॥ एवंब्रुवतिराजेंद्रेवागुवाचाशरीरिणी ॥
नशक्योदुर्गमोगंतुमितोवैश्रवणाश्रमात् १३ अनेनैवपथाराजन्प्रतिगच्छयथागतम् ॥ नरनारायणस्थानंबदरीत्यभिविश्रुतम् १४ तस्माद्यास्यसिकौंतेयसिद्धचा
रणसेवितम् ॥ बहुपुष्पफलंरम्यमाश्रमंवृषपर्वणः १५ अतिक्रम्यचतंपार्थत्वार्ष्टिषेणाश्रमेवसेः ॥ ततोद्रक्ष्यसिकौंतेयनिवेशंधनदस्यच १६ एतस्मिन्नंतरेवायुर्दि
व्यगंधवहःशुचिः ॥ सुखप्रह्लादनःशीतःपुष्पवर्षंववर्षच १७ श्रुत्वातुदिव्यामाकाशाद्वाचंसर्वेविसिस्मियुः ॥ ऋषीणांब्राह्मणानांचपार्थिवानांविशेषतः १८ ॥१२५॥

२ । ४ । ५ । ६ ।७।८।९।१०।११ गतिरंतरधीयतांअंतर्गतिः कुबेरभवनेप्रवेशःकथंभवेदित्यधीयतांविचार्यतां १२ इतोहेतोर्वैश्रवणाश्रमात् प्रतिगच्छपरावर्तस्व १३।१४ ।१५।१६। १७ । १८

१९ । २० । २१ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे षट्पंचाशदधिकशततमोऽध्यायः ॥ १५६ ॥ ॥ ततस्तानिति १ । २ जहारधर्मादीनांमनोहृतवान् उत्तमोऽस्मीति

श्रुत्वातन्महदाश्चर्यंद्विजोधौम्योऽब्रवीत्तदा ॥ नशक्यमुत्तरंवक्तुमेवंभवतुभारत १९ ततोयुधिष्ठिरोराजाप्रतिजग्राहतद्वचः ॥ प्रत्यागम्यपुनस्तंतुनरनारायणा
श्रमम् २० भीमसेनादिभिःसर्वैर्भ्रातृभिःपरिवारितः ॥ पांचाल्याब्राह्मणैश्चैवन्यवसंतसुखंतदा २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्रापर्वणिलोम
शतीर्थयात्रायांपुनर्नारायणाश्रमागमनेषट्पंचाशदधिकशततमोऽध्यायः १५६ ॥ ॥ समाप्तंचेदंतीर्थयात्रापर्व ॥ ॥ अथजटासुरवधपर्व ॥ वैशंपायनउवा
च ॥ ततस्तान्परिविश्वस्तान्वसतस्तत्रपांडवान् ॥ पर्वतेंद्रेद्विजैःसार्धंपार्थागमनकांक्षया १ गतेषुतेषुरक्षःसुभीमसेनात्मजेऽपिच ॥ रहितान्भीमसेनेनक
दाचित्तान्यदृच्छया २ जहारधर्मराजानंयमौकृष्णांचराक्षसः ॥ ब्राह्मणोमंत्रकुशलःसर्वशास्त्रविदुत्तमः ३ इतिब्रुवन्पांडवेयान्पर्युपास्तेस्मनित्यदा ॥ परीप्स
मानःपार्थानांकलापानिधनूंषिच ४ अंतरंसंपरिप्रेप्सुर्द्रौपद्याहरणंप्रति ॥ दुष्टात्मापापबुद्धिःसनाम्नाख्यातोजटासुरः ५ पोषणंतस्यराजेंद्रचक्रेपांडवनंदनः
बुबुधेनचतंपार्थभस्मच्छन्नमिवानलम् ६ सभीमसेनेनिष्क्रांतेमृगयार्थमरिंदम ॥ घटोत्कचंसानुचरंदृष्ट्वाविप्रद्रुतंदिशः ७ लोमशप्रभृतींस्तांस्तुमहर्षींश्चसमा
हितान् ॥ स्नातुंविनिर्गतान्दृष्ट्वापुष्पार्थंचतपोधनान् ८ रूपमन्यत्समास्थायविकृतंभैरवंमहत् ॥ गृहीत्वासर्वशस्त्राणिद्रौपदींपरिगृह्यच ९ प्रातिष्ठतसदुष्टात्मा
त्रीनगृहीत्वाचपांडवान् ॥ सहदेवस्तुयत्नेनततोऽपक्रम्यपांडवः १० विक्रम्यकौशिकंखड्गंमोक्षयित्वाग्रहंरिपोः ॥ आक्रंदद्भीमसेनंवैयेनयातोमहाबलः ११ त
मब्रवीद्धर्मराजोह्रियमाणोयुधिष्ठिरः ॥ धर्मस्तेहीयतेमूढनतत्त्वंसमवेक्षसे १२ येऽन्येकेचिन्मनुष्येषुतिर्यग्योनिगताश्चये ॥ धर्मंतेसमवेक्षंतेरक्षांसिचविशेष
षतः १३ धर्मस्यराक्षसामूलंधर्मंतेविदुरुत्तमम् ॥ एतत्परीक्ष्यसर्वंत्वंसमीपेस्थातुमर्हसि १४ देवाश्चऋषयःसिद्धाःपितरश्चापिराक्षस ॥ गंधर्वोरगरक्षांसिवयां
सिपशवस्तथा १५ तिर्यग्योनिगताश्चैवअपिकीटपिपीलिकाः ॥ मनुष्यानुपजीवंतिततस्त्वमपिजीवसि १६ समृद्ध्यायस्यलोकस्यलोकोयुष्माकमृध्यति ॥ इमं
चलोकंशोचंतमनुशोचंतिदेवताः १७ पूज्यमानाश्चवर्धंतेहव्यकव्यैर्यथाविधि ॥ वयंराष्ट्रस्यगोप्तारोरक्षितारश्चराक्षस १८ राष्ट्रस्यारक्ष्यमाणस्यकुतोभूतिःकु
तःसुखम् ॥ नचराजाऽवमंतव्योरक्षसाजात्वनागसि १९ अणुरप्यपचारश्चनास्त्यस्माकंनराशन ॥ विघसाशान्यथाशक्त्याकुर्महेदेवतादिषु २० गुरूंश्चब्रा
ह्मणांश्चैवप्रमाणप्रवणाःसदा ॥ द्रोग्धव्यंनचमित्रेषुनविश्वस्तेषुकर्हिचित् २१ येषांचान्नानिभुंजीतयत्रचस्यात्प्रतिश्रयः ॥ सत्वंप्रतिश्रयेऽस्माकंपूज्यमानःसु
खोषितः २२ भुक्त्वाचान्नानिदुष्प्रज्ञकथमस्मान्जिहीर्षसि ॥ एवमेववृथाचारोवृथावृद्धोवृथामतिः २३

ब्रुवन् ३ कलापानिनिषंगादीनि ४ । ५ । ६ । ७ । ८ । ९ कौशिकंकोशादागतंग्रहंग्रहणं १० । ११ । १२ । १३ । १४ । १५ । १६ युष्माकंदेवासुरादीनांऋध्यतिऋध्यतीतिपाठे वृद्धिं
गच्छति १७ । १८ । १९ विघसाशान् देवासुरब्राह्मणादिशेषाद्यं विघसंतस्यआशा भोजनं येषांतान् २० । २१ प्रतिश्रयोगृहं २२ । २३

२४ । २५ कामात् कामायस्वेष्टसिद्ध्यर्थम् २६ । २७ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेचतुष्पंचाशदधिकशततमोऽध्यायः ॥ १५४ ॥ ॥ ७ ॥ ॥ ततइति

ततःसपीत्वाऽमृतकल्पमंभोभूयोबभूवोत्तमवीर्यतेजाः ॥ उत्पाट्यजग्राहचसोंऽबुजानिसौगंधिकान्युत्तमगंधवंति २४ ततस्तुतेक्रोधवशाःसमेत्यधनेश्वरंभीमबलप्रणुन्नाः ॥ भीमस्यवीर्यंचबलंचसंख्येयथावदाचख्युरतीवभीताः २५ तेषांवचस्तत्तुनिशम्यदेवःप्रहस्यरक्षांसिततोऽभ्युवाच ॥ गृह्णातुभीमोजलजानिकामात्कृष्णानिमित्तंविदितंममैतत् २६ ततोऽभ्यनुज्ञाप्यधनेश्वरंतेजग्मुःकुरूणांप्रवरंविरोषाः ॥ भीमंचतस्यांददृशुर्नलिन्यांयथोपजोषंविहरंतमेकम् २७

॥ इतिश्रीमहाभारतेआरण्यकेपर्वणितीर्थयात्राप०लो०यात्रा०सौगंधिकाहरणेचतुष्पंचाशदधिकशततमोऽध्यायः ॥ १५४ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच॥ ततस्तानिमहार्हाणिदिव्यानिभरतर्षभ ॥ बहूनिबहुरूपाणिविरजांसिसमाददे १ ततोवायुर्महान्शीघ्रोनीचैःशर्करकर्षणः ॥ प्रादुरासीत्खरस्पर्शःसंग्राममभिचोदयन् २ पपातमहतीचोल्कासनिर्घातामहाभया ॥ निष्प्रभश्चाभवत्सूर्यश्छन्नरश्मिस्तमोवृतः ३ निर्घातश्चाभवद्भीमोभीमेविक्रममास्थिते ॥ चचालपृथिवीचापिपांसुवर्षंपपातच ४ सलोहितादिशश्चासन्खरवाचोमृगद्विजाः ॥ तमोवृतमभूत्सर्वंनप्राज्ञायतकिंचन ५ अन्येचबहवोभीमाउत्पातास्तत्रजज्ञिरे ॥ तदद्भुतमभिप्रेक्ष्यधर्मपुत्रोयुधिष्ठिरः ६ उवाचवदतांश्रेष्ठःकोऽस्मानभिभविष्यति ॥ सज्जीभवतभद्रंवःपांडवायुद्धदुर्मदाः ७ यथारूपाणिपश्यामिस्वभ्यग्रोनःपराक्रमः ॥ एवमुक्त्वाततोराजावीक्षांचक्रेसमंततः ८ अपश्यमानोभीमंतुधर्मपुत्रोयुधिष्ठिरः ॥ ततःकृष्णांयमौचापिसमीपस्थावरिंदमः ९ पप्रच्छभ्रातरंभीमंभीमकर्माणमाहवे ॥ कच्चित्कभीमःपांचालिकिंचित्कृत्यंचिकीर्षति १० कृतवानपिवावीरःसाहसंसाहसप्रियः ॥ इमेह्यकस्मादुत्पातामहासमरदर्शनाः ११ दर्शयंतोभयंतीव्रंप्रादुर्भूताःसमंततः ॥ तंतथावादिनंकृष्णाप्रत्युवाचमनस्विनी ॥ प्रियाप्रियंचिकीर्षंतीमहिषीचारुहासिनी १२ ॥ द्रौपद्युवाच ॥ यत्तत्सौगंधिकंराजन्नाहृतंमातरिश्वना ॥ तन्मयाभीमसेनस्यप्रीतयाद्योपपादितम् १३ अपिचोक्तोमयावीरोयदिपश्येर्बहून्यपि ॥ तानिसर्वाण्युपादायशीघ्रमागम्यतामिति १४ सतुनूनंमहाबाहुःप्रियार्थंममपांडवः ॥ प्रागुदीचींदिशंराजंस्तान्याहर्तुमितोगतः १५ उक्तस्त्वेवंतयाराजायमाविदमथाब्रवीत् ॥ गच्छामसहितास्तूर्णंयेनयातोवृकोदरः १६ वहंतुराक्षसाविप्रान्यथाश्रांतान्यथाकृशान् ॥ त्वमप्यमरसंकाशवहकृष्णांघटोत्कच १७ व्यक्तंदूरमितोभीमःप्रविष्टइतिमेमतिः ॥ चिरंचतस्यकालोयंसचवायुसमोजवे १८ तरस्वीवैनतेयस्यसदृशोभुविलंघने ॥ उत्पतेदपिचाकाशंनिपतेच्चयथेच्छकम् १९ तमन्वियामभवतांप्रभावाद्रजनीचराः॥पुरासनापराध्नोतिसिद्धानांब्रह्मवादिनाम् २०तथेत्युक्त्वातुतेसर्वेहैडिंबप्रमुखास्तदा॥ उद्देशज्ञाःकुबेरस्यनलिन्याभरतर्षभ २१ आदायपांडवांश्चैवतांश्चविप्राननेकशः॥लोमशेनैवसहिताःप्रययुःप्रीतमानसाः २२ तेसर्वेत्वरितागत्वाददृशुःशुभकाननाम् ॥ पद्मसौगंधिकवतीनलिनींसुमनोरमाम् २३

१ । २ । ३ । ४ । ५ । ६ । ७ स्वभ्यग्रःसुतरामासन्नः पराक्रमःपराक्रमकालः ८।९।१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९। २० उद्देशज्ञाःस्थलज्ञाः २१।२२।२३

नभविष्यसिमरिष्यसि २४ । २५ । २६ । २७ । २८ । २९ । ३० सत्कृत्यं साधुकार्यं ३१ । ३२ । ३३ राक्षसेइतिसुयोंस्तात्प्रागयमरिष्यतीत्यर्थः ३४ तिष्ठस्वास्थिरोभव ३५ । ३६ । ३७ । ३८

वृथामरणमर्हश्चवृथाऽद्यनभविष्यसि ॥ अथचेद्दुष्टबुद्धिस्त्वंसर्वैर्धर्मैर्विवर्जितः २४ प्रदायशस्त्राण्यस्माकंयुद्धेनद्रौपदींहर ॥ अथचेत्त्वमविज्ञानादिदंकर्मकरिष्यसि २५ अधर्मंचाप्यकीर्तिंचलोकेप्राप्स्यसिकेवलम् ॥ एतामद्यपरामृश्यस्त्रियंराक्षसमानुषीम् २६ विषमेतत्समालोड्यकुंभेनप्राशितंत्वया ॥ ततोयुधिष्ठिरस्तस्यगुरुकःसमपद्यत २७ सतुभाराभिभूतात्मानतथाशीघ्रगोऽभवत् ॥ अथाब्रवीद्द्रौपदींचनकुलंचयुधिष्ठिरः २८ माभैष्टराक्षसान्मूढाद्गतिरस्यमयाहृता ॥ नातिदूरेमहाबाहुर्भवितापवनात्मजः २९ अस्मिन्मुहूर्तेसंप्राप्तेनभविष्यतिराक्षसः ॥ सहदेवस्तुतंदृष्ट्वाराक्षसंमूढचेतसम् ३० उवाचवचनंराजन्कुंतीपुत्रंयुधिष्ठिरम् ॥ राजन्किंनामसत्कृत्यंक्षत्रियस्यास्त्यतोऽधिकम् ३१ यद्युद्धेऽभिमुखःप्राणांस्त्यजेच्छत्रुंजयेतवा ॥ एषचास्मान्वयंचैनंयुध्यमानाःपरंतप ३२ सूदयेममहाबाहोदेशकालोह्ययंनृप ॥ क्षत्रधर्मस्यसंप्राप्तःकालःसत्यपराक्रमः ३३ जयंतोहन्यमानावाप्राप्तुमर्हामसद्गतिम् ॥ राक्षसेजीवमानेऽद्यरविरस्तमियाद्यदि ३४ नाहंब्रूयांपुनर्जातुक्षत्रियोऽस्मीतिभारत ॥ भोभोराक्षसतिष्ठस्वसहदेवोऽस्मिपांडवः ३५ हत्वावामांनयस्वैनांहतोवाऽद्येहस्वप्स्यसि ॥ तदाब्रुवतिमाद्रेयेभीमसेनोयदृच्छया ३६ प्रत्यदृश्यद्गदाहस्तःसवज्रइववासवः ॥ सोऽपश्यद्भ्रातरौतत्रद्रौपदींचयशस्विनीम् ३७ क्षितिस्थंसहदेवंचक्षिपंतंराक्षसंतदा ॥ मार्गाच्चराक्षसंमूढंकालोपहतचेतसम् ३८ भ्रमंतंतत्रतत्रैवदैवेनविनिवारितम् ॥ भ्रातॄंस्तान्हियतोदृष्ट्वाद्रौपदींचमहाबलः ३९ क्रोधमाहारयद्भीमोराक्षसंचेदमब्रवीत् ॥ विज्ञातोऽसिमयापूर्वंपापःशस्त्रपरीक्षणे ४० आस्थातुत्वयिमेनास्तियतोऽसिनहतस्तदा ॥ ब्रह्मरूपप्रतिच्छन्नोननोवदसिचाप्रियम् ४१ प्रियेषुरममाणंत्वांनचैवाप्रियकारिणम् ॥ अतिथिंब्रह्मरूपंचकथंहन्यामनागसम् ४२ राक्षसंजानमानोऽपियोहन्यान्नरकंव्रजेत् ॥ अपक्वस्यचकालेनवधस्तवनविद्यते ४३ नूनमद्यासिसंपक्वोयथातेमतिरीदृशी ॥ दत्ताकृष्णापहरणेकालेनाद्भुतकर्मणा ४४ बडिशोऽयंत्वयाग्रस्तःकालसूत्रेणलंबितः ॥ मत्स्योंऽभसीवस्यूतास्यःकथमद्यभविष्यसि ४५ यंचासिप्रस्थितोदेशंमनःपूर्वंगतंचते ॥ नतंगंताऽसिगंताऽसिमार्गंबकहिडिंबयोः ४६ एवमुक्तस्तुभीमेनराक्षसःकालचोदितः ॥ भीतउत्सृज्यतान्सर्वान्युद्धायसमुपस्थितः ४७ अब्रवीच्चपुनर्भीमंरोषात्प्रस्फुरिताधरः ॥ नमेमूढादिशःपापत्वदर्थंमेविलंबितम् ४८ श्रुतामेराक्षसायेयेत्वयाविनिहतारणे ॥ तेषामद्यकरिष्यामितवास्रेणोदकक्रियाम् ४९ एवमुक्तस्ततोभीमःसृक्किणीपरिसंलिहन् ॥ स्मयमानइवक्रोधात्साक्षात्कालांतकोपमः ५० बाहुसंरंभमेवेक्षन्नभिदुद्रावराक्षसम् ॥ राक्षसोऽपितदाभीमंयुद्धार्थिनमवस्थितम् ५१

हियतोह्रियमाणान् ३९ । ४० आस्थात्वन्मारणेआदरः ४१ । ४२ । ४३ । ४४ बडिशोमत्स्यवेधनंभविष्यासिजीविष्यासि ४५ । ४६ । ४७ । ४८ अस्रेणलोहितेन ४९ । ५० बाहूसंरंभयेते आस्फोटयेते यस्यांक्रियायां यथास्यात्तथाबाहुसंरंभं ५१

५२।५३।५४।५५।५६।५७।५८।५९।६० आविध्यभ्रामयित्वा ६१ मुंजीकृताःरज्ज्वर्थंमुंजवज्जर्जरीकृताः ६२ महाभ्रैरिवेत्यमूतोपमा ६३।६४।६५।६६ शिरोधरांग्रीवां ६७ अभ्यवर्ततापिको

मुहुर्मुहुर्व्यादिदानःसृक्किणीपरिसंलिहन् ॥ अभिदुद्रावसंरब्धोवलिर्वज्रधरंयथा ५२ वर्तमानेतदाताभ्यांबाहुयुद्धेसुदारुणे ॥ माद्रीपुत्रावतिक्रुद्धावुभावप्यभ्यधा
वताम् ५३ न्यवारयत्तौप्रहसन्कुंतीपुत्रोवृकोदरः ॥ शक्तोऽहंराक्षसस्येतिप्रेक्षध्वमितिचाब्रवीत् ५४ आत्मनाभ्रातृभिश्चैवधर्मेणसुकृतेनच ॥ इष्टेनचशपेराज
न्सूदयिष्यामिराक्षसम् ५५ इत्येवमुक्त्वातौवीरौस्पर्धमानौपरस्परम् ॥ बाहुभ्यांसमसज्जेतामुभौरक्षोवृकोदरौ ५६ तयोरासीत्संप्रहारःक्रुद्धयोर्भीमरक्ष
सोः ॥ अमृष्यमाणयोःसंख्येदेवदानवयोरिव ५७ आरुज्यारुज्यतौवृक्षानन्योन्यमभिजघ्नतुः ॥ जीमूताविवगर्जंतौनिनदंतौमहाबलौ ५८ बभंजतुर्महावृक्षा
नूरुभिर्बलिनांवरौ ॥ अन्यान्येनाभिसंरब्धौपरस्परवधैषिणौ ५९ तद्वृक्षयुद्धमभवन्महीरुहविनाशनम् ॥ वालिसुग्रीवयोर्भ्रात्रोःपुरास्त्रीकांक्षिणोर्यथा ६० आ
विध्याविध्यतौवृक्षान्मुहूर्तमितरेतरम् ॥ ताडयामासतुरुभौविनदंतौमुहुर्मुहुः ६१ तस्मिन्देशेयदावृक्षाःसर्वएवनिपातिताः ॥ मुंजीकृताश्चशतशःपरस्परवधे
प्सया ६२ ततःशिलाःसमादायमुहूर्तमिवभारत ॥ महाभ्रैरिवशैलेंद्रौयुयुधातेमहाबलौ ६३ शिलाभिरुग्ररूपाभिर्बृहतीभिःपरस्परम् ॥ वज्रैरिवमहावेगैरा
जघ्नतुरमर्षणौ ६४ अभिद्रुत्यचभूयस्तावन्योन्यबलदर्पितौ ॥ भुजाभ्यांपरिगृह्याथचकर्षातेगजाविव ६५ मुष्टिभिश्चमहाघोरैरन्योन्यमभिजघ्नतुः ॥ ततःक
टकटाशब्दोबभूवसुमहात्मनोः ६६ ततःसंहृत्यमुष्टिंतुपंचशीर्षमिवोरगम् ॥ वेगेनाभ्यहनद्भीमोराक्षसस्याशिरोधराम् ६७ ततःश्रांतंतुतद्रक्षोभीमसेनभुजाहत
म् ॥ सुपरिश्रांतमालक्ष्यभीमसेनोऽभ्यवर्तत ६८ ततएनंमहाबाहुर्बाहुभ्याममरोपमः ॥ समुत्क्षिप्यबलाद्भीमोविनिष्पिष्यमहीतले ६९ तस्यगात्राणिसर्वाणि
चूर्णयामासपांडवः ॥ अरत्निनाचाभिहत्यशिरःकायादपाहरत् ७० संदष्टौष्ठंविवृत्ताक्षंफलंवृक्षादिवच्युतम् ॥ जटासुरस्यतुशिरोभीमसेनबलाद्धृतम् ७१ पपा
तरुधिरादिग्धंसंदष्टदशनच्छदम् ॥ तंनिहत्यमहेष्वासोयुधिष्ठिरमुपागमत् ॥ स्तूयमानोद्विजाग्र्यैस्तुमरुद्भिरिववासवः ७२ इतिश्रीम॰आरण्य॰जटासुरवध
प॰सप्तपंचाशदधिकशततमोऽध्यायः ॥ १५७ ॥समाप्तंचजटासुरवधपर्व॥ अथयक्षयुद्धपर्व ॥ वैशंपायनउवाच ॥ निहतेराक्षसेतस्मिन्पुनर्नारायणाश्रमम् ॥
अभ्येत्यराजाकौंतेयोनिवासमकरोत्प्रभुः १ ससमानीयतान्सर्वान्भ्रातॄनित्यब्रवीद्वचः ॥ द्रौपद्यासहितान्कालेसंस्मरन्भ्रातरंजयम् २ समाश्चतस्रोऽभिगताःशि
वेनचरतांवने ॥ कृतोद्देशःसबीभत्सुःपंचमीमभितःसमाम् ३ प्राप्यपर्वतराजानंश्वेतंशिखरिणांवरम् ॥ पुष्पितैर्द्रुमषंडैश्चमत्तकोकिलषट्पदैः ४ मयूरैश्चातकै
श्चापिनित्योत्सवविभूषितम् ॥ व्याघ्रैर्वराहैर्महिषैर्गवयैर्हरिणैस्तथा ५ श्वापदैर्व्यालरूपैश्चरुरुभिश्चनिषेवितम् ॥ फुल्लैःसहस्रपत्रैश्चशतपत्रैस्तथोत्पलैः ६

रसाहवानभूत् ६८ । ६९ अरत्निनातलप्रहारेणेत्यर्थः ७० । ७१ । ७२ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे सप्तपंचाशदधिकशततमोऽध्यायः ॥ १५७ ॥ ॥ निहतेइति १
जयमर्जुनं २ कृतोद्देशःपंचमे वर्षे मयाऽत्रआगंतव्यमितिकृतसंकेतः ३ श्वेतंकैलासं ४ । ५ । ६

७ तत्रापि देशे अस्माभिरितिशेषः उद्देशः कृतः संधिरार्षः ८ । ९ । १० । ११ सुखोदर्कंसुखोदर्यं १२ । १३ । १४ । १५ । १६ श्वेतंहिमाचलं १७ । १८ । १९ । २० । २१ । २२ । २३

प्रफुल्लैःकमलैश्चैवतथानीलोत्पलैरपि ॥ महापुण्यंपवित्रंचसुरासुरनिषेवितम् ७ तत्रापिचकृतोद्देशःसमागमदिदृक्षुभिः ॥ कृतश्चसमयस्तेनपार्थेनामिततेज
सा ८ पंचवर्षाणिवत्स्यामिविद्यार्थीतिपुरामयि ॥ अत्रगांडीवधन्वानमवाप्तास्त्रमरिंदमम् ९ देवलोकादिमंलोकंद्रक्ष्यामःपुनरागतम् ॥ इत्युक्त्वाब्राह्मणान्स
र्वानामंत्रयतपांडवः १० कारणंचैवतत्तेषामाचचक्षेतपस्विनाम् ॥ तानुग्रतपसःप्रीतान्कृत्वापार्थाःप्रदक्षिणाम् ११ ब्राह्मणास्तेऽन्वमोदंतशिवेनकुशलेनच ॥
सुखोदर्कमिमंक्लेशमचिराद्भरतर्षभ १२ क्षत्रधर्मेणधर्मज्ञतीर्त्वागांपालयिष्यसि ॥ तत्तुराजावचस्तेषांप्रतिगृह्यतपस्विनाम् १३ प्रतस्थेसहविप्रैस्तैर्भ्रातृभिश्च
परंतपः ॥ राक्षसैरनुयातोवैलोमशेनाभिरक्षितः १४ क्वचित्पद्भ्यांततोऽगच्छद्राक्षसैरुह्यतेक्वचित् ॥ तत्रतत्रमहातेजाभ्रातृभिःसहसुव्रतः १५ ततोयुधिष्ठि
रोराजाबहून्क्लेशान्विचिंतयन् ॥ सिंहव्याघ्रगजाकीर्णामुदीचींप्रययौदिशम् १६ अवेक्ष्यमाणःकैलासंमैनाकंचैवपर्वतम् ॥ गंधमादनपादांश्चश्वेतंचापिशिलो
च्चयम् १७ उपर्युपरिशैलस्यबह्वीश्चसरितःशिवाः ॥ पृष्ठंहिमवतःपुण्यंययौसप्तदशेऽहनि १८ ददृशुःपांडवाराजन्गंधमादनमंतिकात् ॥ पृष्ठेहिमवतःपुण्येना
नाद्रुमलतावृते १९ सलिलावर्तसंजातैःपुष्पितैश्चमहीरुहैः ॥ समावृतंपुण्यतममाश्रमंवृषपर्वणः २० तमुपागम्यराजर्षिंधर्मात्मानमरिंदमाः ॥ पांडवावृषप
र्वाणमवंदंतगतक्लमाः २१ अभ्यनंदत्सराजर्षिःपुत्रवद्भरतर्षभान् ॥ पूजिताश्चावसंस्तत्रसप्तरात्रमरिंदमाः २२ अष्टमेऽहनिसंप्राप्तेतमृषिंलोकविश्रुतम् ॥ आ
मंत्र्यवृषपर्वाणंप्रस्थानंप्रत्यरोचयन् २३ एकैकशश्चतान्विप्रान्निवेद्यवृषपर्वणि ॥ न्यासभूतान्यथाकालंबंधूनिवसुसत्कृतान् २४ पारिबर्हंचतंशेषंपरिदायमहा
त्मने ॥ ततस्तेयज्ञपात्राणिरत्नान्याभरणानिच २५ न्यदधुःपांडवाराजन्नाश्रमेवृषपर्वणः ॥ अतीतानागतेविद्वान्कुशलःसर्वधर्मवित् २६ अन्वशासत्सधर्म
ज्ञःपुत्रवद्भरतर्षभान् ॥ तेऽनुज्ञातामहात्मानःप्रययुर्दिशमुत्तराम् २७ तान्प्रस्थितानभ्यगच्छद्वृषपर्वामहीपतिः ॥ उपन्यस्यमहातेजाविप्रेभ्यःपांडवांस्तदा
२८ अनुसंसार्यकौंतेयानाशीर्भिरभिनंद्यच ॥ वृषपर्वानिववृतेपंथानमुपदिश्यच २९ नानामृगगणैर्जुष्टंकौंतेयःसत्यविक्रमः ॥ पदातिर्भ्रातृभिःसार्धंप्रातिष्ठत
युधिष्ठिरः ३० नानाद्रुमनिरोधेषुवसंतःशैलसानुषु ॥ पर्वतंविविशुस्तेतंचतुर्थेऽहनिपांडवाः ३१ महाभ्रघनसंकाशंसलिलोपहितंशुभम् ॥ मणिकांचनरूप
स्यंशिलानांचसमुच्चयान् ३२ तेसमासाद्यपंथानंयथोक्तंवृषपर्वणा ॥ अनुसस्रुर्यथोद्देशंपश्यंतोविविधान्नगान् ३३ उपर्युपरिशैलस्यगुहाःपरमदुर्गमाः ॥ सुदुर्ग
मांस्तेसुबहूनसुखेनैवाभिचक्रमुः ३४ धौम्यःकृष्णाचपार्थाश्चलोमशश्चमहानृषिः ॥ अगच्छन्सहितास्तत्रनकश्चिदवहीयते ३५ तेमृगद्विजसंघुष्टंनानाद्रुम
लतायुतम् ॥ शाखामृगगणैश्चैवसेवितंसुमनोरमम् ३६ पुण्यंपद्मसरोयुक्तंसपल्वलमहावनम् ॥ उपतस्थुर्महाभागामाल्यवंतंमहागिरिम् ३७

२४ । २५ । २६ । २७ उपन्यस्यनिवेद्य २८ अनुसंसार्यअनुगम्य २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७

३८। ३९। ४०। ४१। ४२। ४३। ४४। ४५ काश्मरीगंभारी ४६ क्षीरिकाराजादना ४७।४८।४९।५०।५१।५२।५३।५४।५५।५६ तामरसानां रक्तोत्पलानां रस एवआसवोमद्यंतज्जे

ततःकिंपुरुषावासंसिद्धचारणसेवितम् ॥ ददृशुर्हृष्टरोमाणःपर्वतंगंधमादनम् ३८ विद्याधरानुचरितंकिंनरीभिस्तथैवच ॥ गजसंघसमावासंसिंहव्याघ्रगणायु
॥१२८॥ तम् ३९ शरभोन्नादसंघुष्टंनानामृगनिषेवितम् ॥ तेगंधमादनवनंतन्नंदनवनोपमम् ४० मुदिताःपांडुतनयामनोहृदयनंदनम् ॥ विविशुःक्रमशोवीराःशर
ण्यंशुभकाननम् ४१ द्रौपदीसहितावीरास्तैश्चविप्रैर्महात्मभिः ॥ शृण्वंतःप्रीतिजननान्वल्गून्मदकलान्शुभान् ४२ श्रोत्ररम्यान्सुमधुरानशब्दान्खगमुखे ॥१५८॥
रितान् ॥ सर्वर्तुफलभाराढ्यान्सर्वर्तुकुसुमोज्ज्वलान् ४३ पश्यंतःपादपांश्चापिफलभारावनामितान् ॥ आम्रानाम्रातकान्भव्यान्नारिकेलान्सतिंदुकान् ४४
मुंजातकांस्तथाजीरान्दाडिमान्बीजपूरकान् ॥ पनसाँल्लकुचान्मोचान्खर्जूरानम्लवेतसान् ४५ पारावतांस्तथाक्षौद्रान्नीपांश्चापिमनोरमान् ॥ बिल्वान्क
पित्थान्जंबूंश्चकाश्मरीर्बदरीस्तथा ४६ प्लक्षानुदुंबरवटानश्वत्थान्क्षीरिकास्तथा ॥ भल्लातकानामलकीर्हरीतकबिभीतकान् ४७ इंगुदान्करमर्दांश्चतिंदुकां
श्चमहाबलाल्लान् ॥ एतानन्यांश्चविविधानगंधमादनसानुषु ४८ फलैरमृतकल्पैस्तानाचितान्स्वादुभिस्तरून् ॥ तथैवचंपकाशोकान्केतकान्बकुलांस्तथा
४९ पुन्नागान्सप्तपर्णांश्चकर्णिकारान्सकेतकान् ॥ पाटलान्कुटजान्रम्यान्मंदारेंदीवरांस्तथा ५० पारिजातान्कोविदारान्देवदारुद्रुमांस्तथा ॥ शालांस्तालां
स्तमालांश्चपिप्पलान्हिंगुकांस्तथा ५१ शाल्मलीःकिंशुकाशोकान्शिंशपान्सरलांस्तथा ॥ चकोरैःशतपत्रैश्चभृंगराजैस्तथाशुकैः ५२ कोकिलैःकलविंकैश्चहा
रितैर्जीवजीवकैः ॥ प्रियकैश्चातकैश्चैवतथाऽन्यैर्विविधैःखगैः ५३ श्रोत्ररम्यंसुमधुरंकूजद्भिश्चाप्यधिष्ठितान् ॥ सरांसिचमनोज्ञानिसमंताज्जलचारिभिः ५४
कुमुदैःपुंडरीकैश्चतथाकोकनदोत्पलैः ॥ कल्हारैःकमलैश्चैवआचितानिसमंततः ५६ कादंबैश्चक्रवाकैश्चकुररैर्जलकुक्कुटैः ॥ कारंडवैःप्लवैर्हंसैर्बकैर्मद्गुभिरेवच ॥
एतैश्चान्यैश्चकीर्णानिसमंताज्जलचारिभिः ॥ हृष्टैस्तथातामरसरसासवमदालसैः ५७ पद्मोदरच्युतरजःकिंजल्कारुणरंजितैः ॥ मंजुस्वरैर्मधुकरैर्विरुतान्क
मलाकरान् ५८ अपश्यंस्तेनरव्याघ्रागंधमादनसानुषु ॥ तथैवपद्मषंडैश्चमंडितांश्चसमंततः ५९ शिखंडिनीभिःसहितान्लतामंडलकेषुच ॥ मेघतूर्यरवो
द्दाममदनाकुलितान्भृशम् ६० कृत्वैवकेकामधुरंसंगीतंमधुरस्वरम् ॥ चित्रान्कलापान्विस्तीर्यसविलासान्मदालसान् ६१ मयूरान्ददृशुर्हृष्टान्नृत्यतोवनला
लसान् ॥ कांश्चित्प्रियाभिःसहितान्रममाणान्कलापिनः ६२ वल्लीलतासंकटेषुकुटजेषुस्थितांस्तथा ॥ कांश्चिच्चकुटजानांतुविटपेषूत्कटानिव ६३ कलापरु
चिराटोपनिचितान्मुकुटानिव ॥ विवरेषुतरूणांचरुचिरान्ददृशुश्चते ६४ सिंदुवारांस्तथोदारान्मन्मथस्येवतोमरान् ॥ सुवर्णवर्णकुसुमान्गिरीणांशिखरे ॥१२८॥
षुच ६५ कर्णिकारान्विकसितान्कर्णपूरानिवोत्तमान् ॥ तथाऽपश्यन्कुरबकान्वनराजिषुपुष्पितान् ६६

नमदेनअलसाः ५७ विरुतान्विशिष्टशब्दयुतान् ५८। ५९। ६०। ६१। ६२ कुटजेषुवृक्षविशेषेषुवल्लीनां लवामतानानि तैःसंकटेषुकुंजीकृतेषु ६३। ६४ सिंदुवारान् पत्रविशेषान् ६५। ६६

कामवश्यानांनराणामौत्सुक्यकरान् ६७। ६८। ६९। ७०। ७१ स्फाटिकाभानिनिर्मलानिसारसानामभिरुतं च येषुतानिसरांसीत्युत्तरेणान्वयः ७२। ७३। ७४। ७५। ७६ हेमीम

कामवश्यौत्सुक्यकरान्कामस्येवशरोत्करान् ॥ तथैववनराजीनामुदारान्रचितानिव ६७ विराजमानांस्तेऽपश्यंस्तिलकांस्तिलकानिव ॥ तथाऽनंगशराका
रान्सहकारान्मनोरमान् ६८ अपश्यन्भ्रमरारावान्मंजरीभिर्विराजितान् ॥ हिरण्यसदृशैःपुष्पैर्दावाग्निसदृशैरपि ६९ लोहितैरंजनाभैश्चवैदूर्यसदृशैरपि ॥ अतीवद्वृक्षा
राजंतेपुष्पिताःशैलसानुषु ७० तथाशालांस्तमालांश्चपाटलान्बकुलानपि ॥ मालाइवसमासक्ताःशैलानांशिखरेषुच ७१ विमलस्फाटिकाभानिपांडुरच्छदनैर्द्वि
जैः॥कलहंसैरुपेतानिसारसाभिरुतानि च ७२ सरांसिबहुशःपार्थाःपश्यंतःशैलसानुषु ॥ पद्मोत्पलविमिश्राणिसुखशीतजलानिच ७३ एवंक्रमेणतेवीरावीक्षमाणाः
समंततः ॥ गंधवंत्यथमाल्यानिरसवंतिफलानिच ७४ सरांसिचमनोज्ञानिवृक्षांश्चातिमनोरमान् ॥ विविशुःपांडवाःसर्वेविस्मयोत्फुल्ललोचनाः ७५ कमलोत्पलक
ह्लारपुंडरीकसुगंधिना ॥ सेव्यमानावनेतस्मिन्सुखस्पर्शेनवायुना ७६ ततोयुधिष्ठिरोभीममाहेदंप्रीतिमद्वचः ॥ अहोश्रीमदिदंभीमगंधमादनकाननम् ७७ वनेह्य
स्मिन्मनोरम्येदिव्याःकाननजाद्रुमाः ॥ लताश्चविविधाकाराःपत्रपुष्पफलोपगाः ७८ भांत्येतेपुष्पविकचाःपुंस्कोकिलकुलाकुलाः ॥ नात्रकंटकिनःकेचिन्नचवि
द्यंत्यपुष्पिताः ७९ स्निग्धपत्रफलावृक्षागंधमादनसानुषु ॥ भ्रमरारावमधुरानलिनीःफुल्लपंकजाः ८० विलोड्यमानाःपश्येमाःकरिभिःसकरेणुभिः ॥ पश्येमां
नलिनींचान्यांकमलोत्पलमालिनीम् ८१ स्रग्धरांविग्रहवतींसाक्षाच्छ्रियमिवापराम् ॥ नानाकुसुमगंधाढ्यास्तस्येमाःकाननोत्तमे ८२ उपगीयमानाभ्रमरै
राजंतेवनराजयः ॥ पश्यभीमशुभान्देशान्देवाक्रीडान्समंततः ८३ अमानुषगतिंप्राप्ताःसंसिद्धाःस्मवृकोदर ॥ लताभिःपुष्पिताग्राभिःपुष्पिताःपादपोत्तमाः
८४ संश्लिष्टाःपार्थशोभंतेगंधमादनसानुषु ॥ शिखंडिनीभिश्चरतांसहितानांशिखंडिनाम् ८५ नदतांशृणुनिर्घोषंभीमपर्वतसानुषु ॥ चकोराःशतपत्राश्च
मत्तकोकिलसारिकाः ८६ पत्रिणःपुष्पितानेतान्संपतंतिमहाद्रुमान् ॥ रक्तपीतारुणाःपार्थपादपाग्रगताःखगाः ८७ परस्परमुदीक्षंतेबहवोजीवजीवकाः ॥
हरितारुणवर्णानांशाद्वलानांसमीपतः ८८ सारसाःप्रतिदृश्यंतेशैलप्रस्रवणेष्वपि ॥ वदंतिमधुरावाचःसर्वभूतमनोरमाः ८९ भृंगराजोपचक्राश्चलोहपृष्ठाश्च प
तत्रिणः ॥ चतुर्विषाणाःपद्माभाःकुंजराःसकरेणवः ९० एतेवैदूर्यवर्णाभंक्षोभयंतिमहत्सरः ॥ बहुतालसमुत्सेधाःशैलशृंगपरिच्युताः ९१ नानाप्रस्रवणेभ्यश्च
वारिधाराःपतंतिच ॥ भास्कराभप्रभाभीमाःशारदाभ्रघनोपमाः ९२ शोभयंतिमहाशैलंनानारजतधातवः ॥ क्वचिदंजनवर्णाभाःक्वचित्कांचनसन्निभाः ९३ धातवोहरि
तालस्यक्वचिद्धिंगुलकस्यच ॥ मनःशिलागुहाश्चैवसंध्याभ्रनिकरोपमाः ९४ शशलोहितवर्णाभाःक्वचिद्गैरिकधातवः ॥ सितासिताभ्रप्रतिमाबालसूर्यसमप्रभाः ९५

७७। ७८। ७९। ८० नलिनींसरसींकमलोत्पलयोरवांतरजातिभेदः ८१ विग्रहवतींशरीरवतींतस्यशैलस्य ८२। ८३। ८४। ८५। ८६। ८७। ८८। ८९ भृंगराजादयः पक्षिविशे
षाःचतुर्विषाणाश्चतुर्दंताःपद्माभाःश्वेताः ९०। ९१। ९२। ९३। ९४। ९५

यथोक्तवृषपर्वणानिमित्तभूतेनउक्तंमयासुरेण तथाहिसभापर्वणिमयेनवृषपर्वकथायुधिष्ठिरं प्रतिसभाकरणप्रसंगादुक्तेत्युक्तं सपूर्वदेवचरितंतदातत्राविशांपते । कथयामासदैतेयःपांडुपुत्रेषु
भारतेतिसमयः पूर्वदेवोसुरःवृषपर्वा ९६ । ९७।९८।९९।१००।१०१।१०२।१०३ ॥ इत्या०नी०भा०अष्टपंचाशदधिकशततमोऽध्यायः ॥ १५८ ॥ ॥ युधिष्ठिरइतिनामकीर्तयन्नृषि

॥१२१॥ एतेबहुविधाःशैलंशोभयंतिमहाप्रभाः ॥ गंधर्वाःसहकांताभिर्यथोक्तंवृषपर्वणा ९६ दृश्यंतेशैलशृंगेषुपार्थकिंपुरुषैःसह ॥ गीतानांसमतालानांतथासाम्नांचनिः
स्वनः ९७ श्रूयतेबहुधाभीमसर्वभूतमनोहरः ॥ महागंगामुदीक्षस्वपुण्यांदेवनदींशुभाम् ९८ कलहंसगणैर्जुष्टामृषिकिन्नरसेविताम् ॥ धातुमिश्चसरिद्भिश्चाकि
न्नरैर्मृगपक्षिभिः ९९ गंधर्वैरप्सरोभिश्चकाननैश्चमनोरमैः ॥ व्यालैश्चविविधाकारैःशतशीर्षैःसमंततः १०० उपेतंपश्यकौंतेयशैलराजमरिंदम ॥ वैशंपायन ॥१५१॥
उवाच ॥ तेप्रीतमनसःशूराःप्राप्तागतिमनुत्तमाम् १०१ नातृप्यन्पर्वतेंद्रस्यदर्शनेनपरंतपाः ॥ उपेतमथमाल्यैश्चफलवद्भिश्चपादपैः २ आर्ष्टिषेणस्यरा
जर्षेराश्रमंददृशुस्तदा ॥ ततस्तेतिग्मतपसंकृशंधमनिसंततम् ॥ पारगंसर्वधर्माणामार्ष्टिषेणमुपागमन् १०३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणियक्ष
युद्धपर्वणिगंधमादनप्रवेशेअष्टपंचाशदधिकशततमोऽध्यायः ॥ १५८ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ युधिष्ठिरस्तमासाद्यतपसादग्धकिल्बिषम् ॥
अभ्यवादयतप्रीतःशिरसानामकीर्तयन् १ ततःकृष्णाचभीमश्चयमौचसुतपस्विनौ ॥ शिरोभिःप्राप्यराजर्षिंपरिवार्योपतस्थिरे २ तथैवधौम्योधर्मज्ञःपांड
वानांपुरोहितः ॥ यथान्यायमुपाक्रांतस्तमृषिंसंशितव्रतम् ३ अन्वजानात्सधर्मज्ञोमुनिर्दिव्येनचक्षुषा ॥ पांडोःपुत्रान्कुरुश्रेष्ठानास्यतामितिचाब्रवीत् ४
कुरूणामृषभंपार्थंपूजयित्वामहातपाः ॥ सहभ्रातृभिरासीनंपर्यपृच्छदनामयम् ५ नानृतेकुरुषेभावंकच्चिद्धर्मेप्रवर्तसे ॥ मातापित्रोश्चतेवृत्तिःकच्चित्पार्थनसी
दति ६ कच्चित्तेगुरवःसर्वेवृद्धावैद्याश्चपूजिताः ॥ कच्चिन्नकुरुषेभावंपार्थपापेषुकर्मसु ७ सुकृतंप्रतिकर्तुंचकच्चिद्दातुंचदुष्कृतम् ॥ यथान्यायंकुरुश्रेष्ठजानासि
नविकत्थसे ८ यथार्हमानिनाःकच्चित्त्वयानंदंतिसाधवः ॥ वनेष्वपिवसन्कच्चिद्धर्ममेवानुवर्तसे ९ कच्चिद्धौम्यस्त्वदाचारैर्नपार्थपरितप्यते ॥ दानधर्मतपःशौ
चैरार्जवेनतितिक्षया १० पितृपैतामहंवृत्तंकच्चित्पार्थानुवर्तसे ॥ कच्चिद्राजर्षियातेनपथागच्छसिपांडव ११ स्वेस्वेकिलकुलेजातेपुत्रेनप्तरिवापुनः ॥ पितरः
पितृलोकस्थाःशोचंतिचहसंतिच १२ किंतस्यदुष्कृतेऽस्माभिःसंप्राप्तव्यंभविष्यति ॥ किंचास्यसुकृतेस्माभिःप्राप्तव्यमितिशोभनम् १३ पितामातातथैवा
ग्निर्गुरुरात्माचपंचमः ॥ यस्यैतेपूजिताःपार्थतस्यलोकावुभौजितौ १४ ॥ युधिष्ठिरउवाच ॥ भगवान्नार्यमाऽऽहैतद्यथावद्धर्मनिश्चयम् ॥ यथाशक्तियथा
न्यायंक्रियतेविधिवन्मया १५ ॥ आर्ष्टिषेणउवाच ॥ अब्भक्षावायुभक्षाश्चप्लवमानाविहायसा ॥ जुषंतेपर्वतश्रेष्ठमृषयःपर्वसंधिषु १६ ॥१२१॥
छिरोऽहंत्वामभिवादयेइतिवदन् १ । २ । ३ मुनिःआर्ष्टिषेणः ४ । ५ वृत्तिर्यथायोग्यमाज्ञापालनश्राद्धकरणादिरूपा ६ वैद्याःविद्ययाविदिताः ७ सुकृतमस्यतमुपकारिणं दुष्कृतमप
कारिणंहातुंत्यक्तुंनाविकत्थसे ज्ञातास्मीतिनश्लाघसे ८ । ९ । १० । ११ । १२ । १३ । १४ यथावत्माहयथामामाह १५ पर्वसंधिषुप्रतिपत्पंचदश्योरंतराले १६

१७ । १८ । १९ । २० । २१ । २२ । २३ । २४ यानं मार्गं २५ । २६ । २७ उद्यानंक्रीडावनयुतं २८ । २९ । ३० । ३१ । ३२ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे ऊनष
कामिनःसहकांताभिःपरस्परमनुव्रताः ॥ दृश्यंतेशैलशृंगस्थायथाकिंपुरुषानृप १७ अरजांसिचवासांसिवसानाःकौशिकानिच ॥ दृश्यंतेबहवःपार्थगंधर्वाप्सर
सांगणाः १८ विद्याधरगणाश्चैवस्रग्विणःप्रियदर्शनाः ॥ महोरगगणाश्चैवसुपर्णाश्चोरगादयः १९ अस्यचोपरिशैलस्यश्रूयतेपर्वसंधिषु ॥ भेरीपणवशंखानांमृदं
गानांचनिःस्वनः २० इहस्थैरेवतत्सर्वंश्रोतव्यंभरतर्षभाः ॥ नकार्याव्रःकथंचित्स्यात्तत्राभिगमनेमतिः २१ नचाप्यतःपरंशक्यंगंतुंभरतसत्तमाः ॥ विहारोह्य
त्रदेवानाममानुषगतिस्तुसा २२ ईषच्चपलकर्माणंमनुष्यमिहभारत ॥ द्विषंतिसर्वभूतानिताडयंतिचराक्षसाः २३ अस्यातिक्रम्यशिखरंकैलासस्ययुधिष्ठिर ॥
गतिःपरमसिद्धानांदेवर्षीणांप्रकाशते २४ चापलादिहगच्छंतंपार्थयानमितःपरम् ॥ अयःशूलादिभिर्घ्नंतिराक्षसाःशत्रुसूदन २५ अप्सरोभिःपरिवृतःसमृद्ध्या
नरवाहनः ॥ इहवैश्रवणस्तातपर्वसंधिषुदृश्यते २६ शिखरस्थंसमासीनमधिपंयक्षरक्षसाम् ॥ प्रेक्षंतेसर्वभूतानिभानुमंतमिवोदितम् २७ देवदानवसिद्धानां
तथावैश्रवणस्यच ॥ गिरेःशिखरमुद्यानमिदंभरतसत्तम २८ उपासीनस्यधनदंतुंबुरोःपर्वसंधिषु ॥ गीतसामस्वनस्तातश्रूयतेगंधमादने २९ एतदेवंविधंचि
त्रमिहतातयुधिष्ठिर ॥ प्रेक्षंतेसर्वभूतानिबहुशःपर्वसंधिषु ३० भुंजानामुनिभोज्यानिरसवंतिफलानिच ॥ वसध्वंपांडवश्रेष्ठायावदर्जुनदर्शनात् ३१ नतातच
पलैर्भाव्यमिहप्राप्तैःकथंचन ॥ उषित्वेहयथाकामंयथाश्रद्धंविहृत्यच ॥ ततःशस्त्रजितांतातपृथिवींपालयिष्यसि ३२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणियक्ष
युद्धप०आर्ष्टिषेणयुधिष्ठिरसंवादेऊनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥ ॥ जनमेजयउवाच ॥ आर्ष्टिषेणाश्रमेतस्मिन्ममपूर्वपितामहाः ॥ पांडोः
पुत्रामहात्मानःसर्वेदिव्यपराक्रमाः १ कियंतंकालमवसन्पर्वतेगंधमादने ॥ किंचचक्रुर्महावीर्याःसर्वेऽतिबलपौरुषाः २ कानिचाभ्यवहार्याणितत्रतेषांमहात्म
नाम् ॥ वसतांलोकवीराणामासंस्तद्ब्रूहिसत्तम ३ विस्तरेणचमेशंसभीमसेनपराक्रमम् ॥ यद्यच्चक्रेमहाबाहुस्तस्मिन्हैमवतेगिरौ ४ नखल्वासीत्पुनर्युद्धंतस्य
यक्षैर्द्विजोत्तम ॥ कच्चित्समागमस्तेषामासीद्वैश्रवणस्यच ५ तत्रह्यायातिधनदआर्ष्टिषेणोयथाऽब्रवीत् ॥ एतदिच्छाम्यहंश्रोतुंविस्तरेणतपोधन ॥ नहिमेशृ
ण्वतस्तृप्तिरस्तितेषांविचेष्टितम् ६ ॥ वैशंपायनउवाच ॥ एतदात्महितंश्रुत्वातस्याप्रतिमतेजसः ॥ शासनंसततंचक्रुस्तथैवभरतर्षभाः ७ भुंजानामुनिभो
४४ ज्यानिरसवंतिफलानिच ॥ शुद्धबाणहतानांचमृगाणांपिशितान्यपि ८ मेध्यानिहिमवत्पृष्ठेमधूनिविविधानिच ॥ एवंतेन्यवसंस्तत्रपांडवाभरतर्षभाः ९ त
थानिवसतांतेषांपंचमंवर्षमभ्यगात् ॥ शृण्वतांलोमशोक्तानिवाक्यानिविविधान्युत १० कृत्यकालउपस्थास्यइतिचोक्त्वाघटोत्कचः ॥ राक्षसैःसहसर्वैश्चपूर्व
मेवगतःप्रभो ११ आर्ष्टिषेणाश्रमेतेषांवसतांवैमहात्मनाम् ॥ अगच्छन्बहवोमासाःपश्यतांमहदद्भुतम् १२
ष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥ ॥ ७ ॥ ॥ ७ ॥ आर्ष्टिषेणेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ पृथू विशिष्टौ अंसौयस्य स पृथुव्यंसः २९ । ३० । ३१ । ३२ । ३३ ग्लानिःश्रमः का
तर्यं भयं वैक्लव्यमनुत्साहः मत्सरःपरोत्कर्षासहिष्णुत्वं ३४ एकायनंवामदक्षिणसंचारशून्यं ३५ । ३६ । ३७ परिक्षिप्तंपरितआवृतं ३८ चयाट्टालकशोभिनाचयःप्राकारस्यमूलबंधः अट्टाल

तैस्तत्रविहरद्भिश्चरममाणैश्चपांडवैः ॥ प्रीतिमंतोमहाभागामुनयश्चारणास्तथा १३ आजग्मुःपांडवान्द्रष्टुंशुद्धात्मानोयतव्रताः ॥ तैतैःसहकथांचक्रुर्दिव्यांभ
रतसत्तमाः १४ तत कतिपयाहस्यमहाह्रदनिवासिनम् ॥ ऋद्धिमंतंमहानागंसुपर्णःसहसाऽहरत् १५ प्राकंपतमहाशैलःप्रामृद्यंतमहाद्रुमाः ॥ ददृशुःसर्वभूता
निपांडवाश्चतदद्भुतम् १६ ततःशैलोत्तमस्याग्रात्पांडवान्प्रतिमारुतः ॥ अवहत्सर्वमाल्यानिगंधवंतिशुभानिच १७ तत्रपुष्पाणिदिव्यानिसुहृद्भिःसहपांड
वाः ॥ ददृशुःपंचवर्णानिद्रौपदीचयशस्विनी १८ भीमसेनंततःकृष्णाकालेवचनमब्रवीत् ॥ विविक्तेपर्वतोद्देशेसुखासीनंमहाभुजम् १९ सुपर्णानिलवेगेनश्वस
नेनमहाबलात् ॥ पंचवर्णानिपात्यंतेपुष्पाणिभरतर्षभ २० प्रत्यक्षंसर्वभूतानांनदीमश्वरथांप्रति ॥ खांडवेसत्यसंधेनभ्रात्रातवमहात्मना २१ गधर्वोरगरक्षांसि
वासवश्चनिवारितः ॥ हतामायाविनश्चोग्राधनुःप्राप्तंचगांडिवम् २२ तवापिसुमहत्तेजोमहद्बाहुबलंचते ॥ अविषह्यमनाधृष्यंशक्रतुल्यपराक्रम २३ त्वद्बाहुब
लवेगेनत्रासिताःसर्वराक्षसाः ॥ हित्वाशैलंप्रपद्यंतांभीमसेनदिशोदश २४ ततःशैलोत्तमस्याग्रंचित्रमाल्यधरंशिवम् ॥ व्यपेतभयसंमोहाःपश्यंतुसुहृदस्तव २५
एवंप्रणिहितंभीमचिरात्प्रभृतिमेमनः ॥ द्रष्टुमिच्छामिशैलाग्रंत्वद्बाहुबलपालिता २६ ततःक्षिप्तमिवात्मानंद्रौपद्यासपरंतपः ॥ नामृष्यतमहाबाहुःप्रहारमिव
सद्गवः २७ सिंहर्षभगतिःश्रीमानुदारःकनकप्रभः ॥ मनस्वीबलवान्दृप्तोमानीशूरश्चपांडवः २८ लोहिताक्षःपृथुव्यंसोमत्तवारणविक्रमः ॥ सिंहदंष्ट्रोबृहत्स्कंधः
शालपोतइवोद्गतः २९ महात्माचारुसर्वांगःकंबुग्रीवोमहाभुजः ॥ रुक्मपृष्ठंधनुःखड्गंतूणांश्चापिपरामृशत् ३० सकेसरीवचोत्सिक्तःप्रभिन्नइववारणः ॥ व्यपेतभ
यसंमोह शैलमभ्यपतद्बली ३१ तंमृगेंद्रमिवायांतंप्रभिन्नमिववारणम् ॥ ददृशुःसर्वभूतानिबाणकार्मुकधारिणम् ३२ द्रौपद्यावर्धयन्हर्षंगदामादायपांडवः ॥ व्य
पेतभयसंमोहःशैलराजंसमाश्रितः ३३ नग्लानिर्नचकातर्यंनवैक्लव्यंनमत्सरः ॥ कदाचिज्जुषतेपार्थमात्मजंमातरिश्वनः ३४ तदेकायनमासाद्यविषमंभीमदर्श
नम् ॥ बहुतालोच्छ्रयंशृंगमारुरोहमहाबलः ३५ सकिन्नरमहानागमुनिगंधर्वराक्षसान् ॥ हर्षयन्पर्वतस्याग्रमारुह्यसमहाबलः ३६ ततोवैश्रवणावासंददर्शभर
तर्षभः ॥ कांचनैःस्फाटिकैश्चैववेश्मभिःसमलंकृतम् ३७ प्राकारेणपरिक्षिप्तंसौवर्णेनसमंततः ॥ सर्वरत्नद्युतिमतासर्वोद्यानवतातथा ३८ शैलादभ्युच्छ्रयव
ताचयाट्टालकशोभिना ॥ द्वारतोरणनिर्यूहध्वजसंबाहशोभिना ३९ विलासिनीभिरत्यर्थंनृत्यंतीभिःसमंततः ॥ वायुनाधूयमानाभिःपताकाभिरलंकृतम् ४०
धनुष्कोटिमवष्टभ्यवक्रभावेनबाहुना ॥ पश्यमानःसखेदेनद्रविणाधिपतेःपुरम् ४१

कउपरिगृहं । 'चयःसमूहेप्राकारमूलबंधेसमाहिते'इतिमेदिनी । तोरणंबहिर्द्वारं निर्यूहः नागदंताख्यंगृहान्निर्गतंदारु । 'निर्यूहोनागदंते स्यात्'इतिविश्वः ३९।४० वक्रभावेनवक्रेणबाहुनाउ
पलक्षितः एतेऽस्मान्नप्रत्युद्गच्छंतीतिवा वक्रबुद्ध्याखेदेन तद्दर्शनात्स्वसंपत्स्मरणेनतेन द्रविणाधिपतेःधनाधिपतेः ४१

४२ । ४३ ददृशे ददर्श ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ अदर्शयदधीकारं स्वाम्यं प्राग्दर्शितवानयः समागिमानिति

मोदयन्सर्वभूतानिगंधमादनसंभवः ॥ सर्वगंधवहस्तत्रमारुतःसुसुखोववौ ४२ चित्राविविधवर्णाभाश्चित्रमंजरिधारिणः ॥ अचिंत्याविविधास्तत्रद्रुमाःपरम
शोभिनः ४३ रत्नजालपरिक्षिप्तंचित्रमाल्यविभूषितम् ॥ राक्षसाधिपतेःस्थानंददृशेभरतर्षभः ४४ गदाखड्गधनुष्पाणिःसमभित्यक्तजीवितः ॥ भीमसेनोम
हाबाहुस्तस्थौगिरिरिवाचलः ४५ ततःशंखमुपाध्मासीद्द्विषतांलोमहर्षणम् ॥ ज्याघोषतलशब्दंचकृत्वाभूतान्यमोहयत् ४६ ततःप्रहृष्टरोमाणस्तंशब्दम
भिदुद्रुवुः ॥ यक्षराक्षसगंधर्वाःपांडवस्यसमीपतः ४७ गदापरिघनिस्त्रिंशशूलशक्तिपरश्वधाः ॥ प्रगृहीताव्यरोचंतयक्षराक्षसबाहुभिः ४८ ततःप्रववृतेयुद्धंते
षांतस्यचभारत ॥ तैःप्रयुक्तान्महामायैःशूलशक्तिपरश्वधान् ४९ भल्लैर्भीमःप्रचिच्छेदभीमवेगतरैस्ततः ॥ अंतरिक्षगतानांचभूमिष्ठानांचगर्जताम् ५०
शरैर्विव्याधगात्राणिराक्षसानांमहाबलः ॥ सालोहितमहावृष्टिरभ्यवर्षन्महाबलम् ५१ गदापरिघपाणीनांरक्षसांकायसंभवा ॥ कायेभ्यःप्रच्युताधाराराक्षसा
नांसमंततः ५२ भीमबाहुबलोत्सृष्टैरायुधैर्यक्षरक्षसाम् ॥ विनिकृत्तानिदृश्यंतेशरीराणिशिरांसिच ५३ प्रच्छाद्यमानंरक्षोभिःपांडवंप्रियदर्शनम् ॥ ददृशुः
सर्वभूतानिसूर्यमभ्रगणैरिव ५४ सरश्मिभिरिवादित्यःशरैरिरिनिघातिभिः ॥ सर्वानार्छन्महाबाहुर्बलवान्सत्यविक्रमः ५५ अभितर्जयमानाश्चरुवंतश्चमहार
वान् ॥ नमोहंभीमसेनस्यददृशुःसर्वराक्षसाः ५६ यक्षाविकृतसर्वांगाभीमसेनभयार्दिताः ॥ भीममार्तस्वरंचक्रुर्विप्रकीर्णमहायुधाः ५७ उत्सृज्यतेगदाशूला
नसिशक्तिपरश्वधान् ॥ दक्षिणांदिशमाजग्मुस्त्रासितादृढधन्वना ५८ तत्रशूलगदापाणिर्व्यूढोरस्कोमहाभुजः ॥ सखावैश्रवणस्यासीन्मणिमान्नामराक्षसः
५९ अदर्शयदधीकारंपौरुषंचमहाबलः ॥ सतान्दृष्ट्वापरावृत्तान्स्मयमानइवाब्रवीत् ६० एकेनबहवःसंख्येमानुषेणपराजिताः ॥ प्राप्यवैश्रवणावासंकिंवक्ष्यथ
धनेश्वरम् ६१ एवमाभाष्यतान्सर्वानभ्यवर्ततराक्षसः ॥ शक्तिशूलगदापाणिरभ्यधावत्सपांडवम् ६२ तमापतंतंवेगेनप्रभिन्नमिववारणम् ॥ वत्सदंतैस्त्रिभिःपार्श्वे
भीमसेनःसमार्दयत् ६३ मणिमानपिसंक्रुद्धःप्रगृह्यमहतींगदाम् ॥ प्राहिणोद्भीमसेनायपरिगृह्यमहाबलः ६४ विद्युद्रूपांमहाघोरामाकाशेमहतींगदाम् ॥ शरै
र्बहुभिरानर्छद्भीमसेनःशिलाशितैः ६५ प्रत्यहन्यंततेसर्वेगदामासाद्यसायकाः ॥ नवेगंवारयामासुर्गदावेगस्यवेगिताः ६६ गदायुद्धसमाचारंबुध्यमानःसवी
र्यवान् ॥ व्यंसयामासतंतस्यप्रहारंभीमविक्रमः ६७ ततःशक्तिंमहाघोरांरुक्मदंडामयस्मयीम् ॥ तस्मिन्नेवांतरेधीमान्प्रजहाराथराक्षसः ६८ साभुजंभीमनिर्ह्रादा
भित्त्वाभीमस्यदक्षिणम् ॥ साग्निज्वालामहारौद्रापपातसहसाभुवि ६९ सोऽतिविद्धोमहेष्वासःशक्त्याऽमितपराक्रमः ॥ गदांजग्राहकौंतेयःक्रोधपर्याकुलेक्षणः ७०

यत्तदोरध्याहारेण योज्यम् ६० संख्येसंग्रामे ६१ । ६२ । ६३ । ६४ । ६५ प्रत्यहन्यंत प्रतिहताः वेगितावेगवंतोऽपि गदावेगस्य गदायांवेगोऽत्यभ्यासोयस्य तस्य ६६ समीमः व्यं
सयामास व्यर्थीचकार ६७ अयस्मयीं लोहमयीं भगोपधीय ६८ । ६९ । ७०

शैक्यां शीकयतिशत्रून्परामवतीति शैक्या । शीकयतेर्कहलोर्ण्यदिति ण्यत् ततः स्वार्थिकोऽण् ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदी

रुक्मपट्टपिनद्धांतांशत्रूणांभयवर्धिनीम् ॥ प्रगृह्याथनदन्भीमःशैक्यांसर्वायसींगदाम् ७१ तरसाचाभिदुद्रावमणिमंतंमहाबलम् ॥ दीप्यमानंमहाशूलंप्रगृह्य मणिमानपि ७२ प्राहिणोद्भीमसेनायवेगेनमहतानदन् ॥ भंक्त्वाशूलंगदाग्रेणगदायुद्धविशारदः ७३ अभिदुद्रावतंहंतुंगरुत्मानिवपन्नगम् ॥ सोंऽतरिक्षमवप्लु त्यविधूयसहसागदाम् ७४ प्रचिक्षेपमहाबाहुर्विनद्यरणमूर्धनि ॥ सेंद्राशनिरिवेंद्रेणाविसृष्टावातरंहसा ७५ हत्वारक्षःक्षितिंप्राप्यकृत्येवानिपपातह ॥ तंराक्षसं भीमबलंभीमसेनेनपातितम् ७६ ददृशुःसर्वभूतानिसिंहेनेवगवांपतिम् ॥ तंप्रेक्ष्यनिहतंभूमौहतशेषानिशाचराः ॥ भीममार्तस्वरंकृत्वाजग्मुःप्राचींदिशंप्रति ७७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणियक्षयुद्धपर्वणिमणिमद्वधेषष्टयधिकशततमोऽध्यायः ॥ १६० ॥ ॥ वैशंपायनउवाच ॥ श्रुत्वाबहुविधैःशब्दैर्ना द्यमानांगिरेर्गुहाम् ॥ अजातशत्रुःकौंतेयोमाद्रीपुत्रावुभावपि १ धौम्यःकृष्णाचविप्राश्चसर्वेचसुहृदस्तथा ॥ भीमसेनमपश्यंतःसर्वेविमनसोऽभवन् २ द्रौपदी मार्ष्टिषेणायसंप्रधार्यमहारथाः ॥ सहिताःसायुधाःशूराःशैलमारुरुहुस्तदा ३ ततःसंप्राप्यशैलाग्रंवीक्षमाणामहारथाः ॥ ददृशुस्तेमहेष्वासाभीमसेनमरिंदमाः ४ स्फुरतश्चमहाकायान्गतसत्वांश्चराक्षसान् ॥ महाबलान्महासत्वान्भीमसेनेनपातितान् ५ शुशुभेसमहाबाहुर्गदाखड्गधनुर्धरः ॥ निहत्यसमरेसर्वान्दानवान्म घवानिव ६ ततस्तेभ्रातरंदृष्ट्वापरिष्वज्यमहारथाः ॥ तत्रोपविविशुःपार्थाःप्राप्तागतिमनुत्तमाम् ७ तैश्चतुर्भिर्महेष्वासैर्गिरिशृंगमशोभत ॥ लोकपालैर्महाभागै र्दिवंदेववरैरिव ८ कुबेरसदनंदृष्ट्वाराक्षसांश्चनिपातितान् ॥ भ्राताभ्रातरमासीनमब्रवीत्पृथिवीपतिः ९ ॥ युधिष्ठिरउवाच ॥ साहसाद्यदिवामोहाद्भीमपापमि दंकृतम् ॥ नैतत्तेसदृशंवीरमुनेरिवमृषावधः १० राजद्विष्टंनकर्तव्यमितिधर्मविदोविदुः ॥ त्रिदशानामिदंद्विष्टंभीमसेनत्वयाकृतम् ११ अर्थधर्मावनादृत्ययः पापेकुरुतेमनः ॥ कर्मणापार्थपापानांसफलंविंदतेध्रुवम् ॥ पुनरेवंनकर्तव्यंममचेदिच्छसिप्रियम् १२ ॥ वैशंपायनउवाच ॥ एवमुक्त्वासधर्मात्माभ्राताभ्रातर मच्युतम् ॥ अर्थतत्त्वविभागज्ञःकुंतीपुत्रोयुधिष्ठिरः १३ विररामहातेजास्तमेवार्थविचिंतयन् ॥ ततस्तेहतशिष्टायेभीमसेनेनराक्षसाः १४ सहिताःप्रत्यप द्यंतकुबेरसदनंप्रति ॥ तेजवेनमहावेगाःप्राप्यवैश्रवणालयम् १५ भीममार्तस्वरंचक्रुर्भीमसेनभयार्दिताः ॥ न्यस्तशस्त्रायुधाःक्लांताःशोणिताक्तनुच्छदाः १६ प्रकीर्णमूर्धजाराजन्यक्षाधिपतिमब्रुवन् ॥ गदापरिघनिस्त्रिंशतोमरप्रासयोधिनः १७ राक्षसानिहताःसर्वेतवदेवपुरःसराः ॥ प्रमृद्यतरसाशैलंमानुषेण धनेश्वर १८ एकेनसहिताःसंख्येरणेक्रोधवशागणाः ॥ प्रवराराक्षसेंद्राणांयक्षाणांचनराधिप १९

पेषष्टयधिकशततमोऽध्यायः ॥ १६० ॥ ॥ श्रुत्वेति १ । २ संप्रधार्यरक्षार्थंसमर्थ्य ३ । ४ । ५ । ६ । ७ । ८ । ९ मुनेरिववनवासिनस्तेतवैतत्सदृशंनोचितं यत् मृषा निर्निमित्तं वधो रक्षसां हिंसा १० । ११ । १२ । १३ । १४ सहिता मिलिताः १५ तनुच्छदः कवचादिः १६ । १७ । १८ । १९

लब्धशेषालब्धप्रसादाः । 'शेषःसंकर्षणेवधे अनंतेनाप्रसादेच'इतिमेदिनी । लब्धशैलइतिगौडपाठेतु लब्धोभीमेनजितःशैलःशैलस्थराक्षसगणः २० । २१ द्वितीयमिवद्वितीयंभयहेतुं । 'द्वि तीयाद्वैभयंभवति'इतिश्रुतेः २२ युज्यतांरथइतिशेषःअभ्रघनःसजलमेघः । 'अभ्रंमेघेचगगनेधातुभेदेचकांचने'इतिमेदिनीकोशात् कांचनमेघसंकाशमितिवा २३ गंधर्वैर्हयैर्योजयामासुःयक्षाइति

शेरतेनिहतादेवगतसत्वाःपरासवः ॥ लब्धशेषावयंमुक्तामणिमांस्तेसखाहतः २० मानुषेणकृतंकर्मविधत्स्वयदनंतरम् ॥ सतच्छ्रुत्वातुसंक्रुद्धःसर्वयक्षगणाधि पः २१ कोपसंरक्तनयनःकथमित्यब्रवीद्वचः ॥ द्वितीयमपराध्यंतंभीमंश्रुत्वाधनेश्वरः २२ चुक्रोधयक्षाधिपतिर्युज्यतामितिचाब्रवीत् ॥ अथाभ्रघनसंकाशं गिरिशृंगमिवोच्छ्रितम् २३ रथंसंयोजयामासुर्गंधर्वैर्हेममालिभिः ॥ तस्यसर्वगुणोपेताविमलाक्षाहयोत्तमाः २४ तेजोबलगुणोपेतानानारत्नविभूषिताः ॥ शोभमानारथेयुक्तास्तरिष्यंतइवाशुगाः २५ हेषयामासुरन्योन्यंहेषितैर्विजयावहैः ॥ सतमास्थायभगवान्राजराजोमहारथम् २६ प्रययौदेवगंधर्वैःस्तूयमानो महाद्युतिः ॥ तंप्रयांतंमहात्मानंसर्वेयक्षाधनाधिपम् २७ रक्ताक्षाहेमसंकाशामहाकायामहाबलाः ॥ सायुधाबद्धनिस्त्रिंशायक्षादशशतावराः २८ तेजवेनमहावेगाः प्लवमानाविहायसा ॥ गंधमादनमाजग्मुःप्रकर्षंतइवांबरं २९ तत्केसरिमहाजालंधनाधिपतिपालितम् ॥ कुबेरंचमहात्मानंयक्षरक्षोगणावृतम् ३० ददृशुर्हृष्ट रोमाणःपांडवाःप्रियदर्शनम् ॥ कुबेरस्तुमहासत्वान्पांडोःपुत्रान्महारथान् ३१ आत्तकार्मुकनिस्त्रिंशान्दृष्ट्वाप्रीतोऽभवत्तदा ॥ देवकार्यंचिकीर्षन्सहृदयेनतुतोषह ३२ तेपक्षिणइवापेतुर्गिरिशृंगंमहाजवाः ॥ तस्थुस्तेषांसमभ्याशेधनेश्वरपुरःसराः ३३ ततस्तंहृष्टमनसंपांडवान्प्रतिभारत ॥ समीक्ष्ययक्षगंधर्वानिर्विकार मवस्थिताः ३४ पांडवाश्चमहात्मानःप्रणम्यधनदंप्रभुम् ॥ नकुलःसहदेवश्चधर्मपुत्रश्चधर्मवित् ३५ अपराद्धमिवात्मानंमन्यमानामहारथाः ॥ तस्थुःप्रांजलयः सर्वेपरिवार्यधनेश्वरं ३६ सह्यासनवरंश्रीमत्पुष्पकंविश्वकर्मणा ॥ विहितंचित्रपर्यंतमातिष्ठतधनाधिपः ३७ तमासीनंमहाकायाशंकुकर्णामहाजवाः ॥ उपोपवि विशुर्यक्षाराक्षसाश्चसहस्रशः ३८ शतशश्चापिगंधर्वास्तथैवाप्सरसांगणाः ॥ परिवार्योपतिष्ठंतयथादेवाःशतक्रतुं ३९ कांचनींशिरसाबिभ्रद्भीमसेनःस्रजंशुभां ॥ पाशखड्गधनुष्पाणिरुदैक्षतधनाधिपम् ४० भीमसेनस्यनग्लानिर्विक्षतस्यापिराक्षसैः ॥ आसीत्तस्यामवस्थायांकुबेरमपिपश्यतः ४१ आददानंशिता न्बाणान्योद्धुकाममवस्थितम् ॥ दृष्ट्वाभीमंधर्मसुतमब्रवीन्नरवाहनः ४२ विदुस्त्वांसर्वभूतानिपार्थभूतहितेरतम् ॥ निर्भयश्चापिशैलाग्रेवसत्वंभ्रातृभिःसह ४३ नचमन्युस्त्वयाकार्योभीमसेनस्यपांडव ॥ कालेनैतेहताःपूर्वंनिमित्तमनुजस्तव ४४ व्रीडाचात्रनकर्तव्यासाहसंयदिदंकृतम् ॥ दृष्टश्चापिसुरैःपूर्वंविनाशो यक्षरक्षसाम् ४५ नभीमसेनेकोपोमेप्रीतोऽस्मिभरतर्षभ ॥ कर्मणाभीमसेनस्यममतुष्टिरभूत्पुरा ४६

शेषः विमलाक्षाःदशावर्तशुद्धाः २४ । २५ । २६ । २७ । २८ । २९ केसरिमहाजालमश्वानांमहद्वृंदं ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ ३९ । ४० । ४१ । ४२ । ४३ । ४४ दृष्टोज्ञातः ४५ । ४६

४७।४८।४९।५० ममभयासंक्लेशोमाविदुःखं ५१।५२।५३ कुशवत्याकुशस्थलीसंज्ञे देशविशेषे ५४।५५।५६ एधितंसमिद्धं ५७ मौर्ख्यात्तविचाराक्षमत्वात् अतएवअगस्त्योऽयमित्यज्ञानभावात् मौर्ख्यमपि दर्पात्संपत्तिगर्वात्सोऽपि मोहात्तसंपत्तेर्नश्वरत्वाज्ञानात्५८न्यष्ठीवत्थूत्कृतवान् ५९।६०।६१ सैन्यानामिति तत्र सैन्यानां मध्ये यत्तवआज्ञांकरिष्यतितत् घोरंशापंमानुषात् मरणरूपंनप्राप्स्यते घोरत्वेहेतुः पुत्रेति पुत्रपौत्राः बलानिसैन्यानिच तेष्वन्वितं राक्षसाः सर्वेपुत्रादियुक्तामानुषवध्याभवंत्वित्येकस्यापराधेबहूनांदंडरूपइतिघोरत्वंशापस्येत्यर्थः ६२। ६३

॥ वैशंपायनउवाच ॥ एवमुक्त्वातुराजानंभीमसेनमभाषत ॥ नैतन्मनासिमेतातवर्ततेकुरुसत्तम ४७ यदिदंसाहसंभीमकृष्णार्थेकृतवानसि ॥ मामनादृत्यदेवांश्चविनाशंयक्षरक्षसाम् ४८ स्वबाहुबलमाश्रित्यतेनाहंप्रीतिमांस्त्वयि ॥ शापादद्यविनिर्मुक्तोघोरादस्मिवृकोदर ४९ अहंपूर्वमगस्त्येनक्रुद्धेनपरमर्षिणा ॥ शप्तोऽपराधेकस्मिंश्चित्तस्यैषानिष्कृतिःकृता ५० दृष्टोहिममसंक्लेशःपुरापांडवनंदन ॥ नतवात्रापराधोऽस्तिकथंचिदपिपांडव ५१ ॥ युधिष्ठिरउवाच ॥ कथंशप्तोऽसिभगवन्नगस्त्येनमहात्मना ॥ श्रोतुमिच्छाम्यहंदेवतवैतच्छापकारणम् ५२ इदंचाश्चर्यभूतंमेयत्क्रोधात्तस्यधीमतः ॥ तदैवत्वंननिर्दग्धःसबलःसपदानुगः ५३ ॥ धनेश्वरउवाच ॥ देवतानामभून्मंत्रःकुशवत्यांनरेश्वर ॥ वृतस्तत्राहमगमंमहापद्मशतैस्त्रिभिः ५४ यक्षाणांघोररूपाणांविविधायुधधारिणां ॥ अध्वन्यहमथापश्यमगस्त्यमृषिसत्तमम् ५५ उग्रंतपस्तप्यमानंयमुनातीरमाश्रितं ॥ नानापक्षिगणाकीर्णंपुष्पितद्रुमशोभितम् ५६ तमूर्ध्वबाहुंदृष्ट्वैवसूर्यस्याभिमुखेस्थितम् ॥ तेजोराशिंदीप्यमानंहुताशनमिवैधितम् ५७ राक्षसाधिपतिःश्रीमान्मणिमान्नाममेसखा ॥ मौर्ख्यादज्ञानभावाच्चदर्पान्मोहाच्चपार्थिव ५८ न्यष्ठीवदाकाशगतोमहर्षेस्तस्यमूर्धनि ॥ सकोपान्मामुवाचेदंदिशःसर्वादहन्निव ५९ मामवज्ञायदुष्टात्मायस्मादेषसखातव ॥ धर्षणांकृतवानेतांपश्यतस्तेधनेश्वर ६० तस्मात्सहैभिःसैन्यैस्तेवधंप्राप्स्यतिमानुषात् ॥ त्वंचाप्येभिर्हतैःसैन्यैःक्लेशंप्राप्येहदुर्मतिः ॥ तमेवमानुषंदृष्ट्वाकिल्बिषाद्विप्रमोक्ष्यसे ६१ सैन्यानांतुतवैतेषांपुत्रपौत्रबलान्वितं ॥ नशापंप्राप्स्यतेघोरंतत्तवाज्ञांकरिष्यति ६२ एषशापोमयाप्राप्तःप्राक्तस्मादृषिसत्तमात् ॥ सभीमेनमहाराजभ्रातातवविमोक्षितः ६३ इतिश्री०आर०यक्षयुद्धप०कुबेरदर्शनेएकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥ ॥ ७ ॥ ॥ धनदउवाच ॥ युधिष्ठिरधृतिर्दाक्ष्यंदेशकालपराक्रमाः ॥ लोकतंत्रविधानानामेषपंचविधोविधिः १ धृतिमंतश्चदक्षाश्चस्वेस्वेकर्मणिभारत ॥ पराक्रमविधानज्ञानराःकृतयुगेऽभवन् २ धृतिमान्देशकालज्ञःसर्वधर्मविधानवित् ॥ क्षत्रियःक्षत्रियश्रेष्ठप्रशास्तिपृथिवींचिरम् ३ यएवंवर्ततेपार्थपुरुषःसर्वकर्मसु ॥ सलोकेलभतेवीरयशःप्रेत्यचसद्गतिम् ४

॥ इत्यारण्यकेप०नैलकंठीयेभा० भा० एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥ एवंशापकीर्तनव्याजेनमहतामवज्ञानकर्तव्येतिसूचितमर्थंकंटतोऽपिवक्तुमाह युधिष्ठिरेत्यादिना धृतिःसंकटेप्यविक्लवता दाक्ष्यंयत्नशीलता पराक्रमःशत्रूणामभिभवनहेतुः क्रिया देशकालयोरानुकूल्यंचेति विधानानांकार्याणांविधिरभ्युदयहेतुः । अदेशेअकालेचकृतंद्यूतयात्रादिकमभिभवहेतुरित्यर्थः १ धृतिमंतइति कृतयुगेहिज्ञानप्राधान्यात् ज्ञानस्यचसर्वस्मिन्देशेकालेचाभ्युदयहेतुत्वान्नतत्रदेशकालप्रतीक्षाऽऽसीदित्यर्थः २ क्षत्रियाणांतुसर्वदैवैतत्पंचकमावश्यकमित्याहधृतिमानिति ३ । ४ ॥१३२॥

व्रतेहेतिपराक्रमंनिर्दिशति ५ संरंभात्कोपात् ६ । ७ निकृतीनांवंचनापराणां ८ इममुपदेशंप्रकृतेयोजयतिअधर्मज्ञइति अवलिप्तोगर्वितः ९ । १० प्रथमंप्रथमोत्पन्नानिरक्षांसितत्संबंधित्वात्पक्षोऽपिप्रथमः । रक्षोभयहेतावपिताभिस्त्वरक्षं त्वंतत्रनिर्भयोवसेत्यर्थः । केचित्तुइतएवप्रथमशब्दान्मासारंभंकृष्णपक्षस्यप्राथम्यमिच्छंति तदसत् पूर्वपक्षापरपक्षशब्दयोःक्रमेणशुक्लकृष्णयोरेवरूढत्वात् श्रौतेऽपिपौर्णमासतएवेष्ट्यारंभात् । नचपूर्णोमासोऽस्यामितियोगात् पौर्णमास्यंतोमासइतिवाच्यं तत्रमासशब्दस्यचंद्रवाचित्वात् । 'सूर्यामासाविचरंतादिवि'इतिमंत्रव

देशकालांतरप्रेप्सुःकृत्वाशक्रःपराक्रमम् ॥ संप्राप्तस्त्रिदिवेराज्यंवृत्रहावसुभिःसह ५ यस्तुकेवलसंरंभात्प्रपातंननिरीक्षते ॥ पापात्मापापबुद्धिर्यःपापमेवानुवर्तते ६ कर्मणामविभागज्ञःप्रेत्यचेहविनश्यति ॥ अकालज्ञःसुदुर्मेधाःकार्याणामविशेषवित् ७ वृथाचारसमारंभःप्रेत्यचेहविनश्यति ॥ साहसेवर्तमानानांनिकृतीनांदुरात्मनाम् ८ सर्वसामर्थ्यलिप्सूनांपापोभवतिनिश्चयः ॥ अधर्मज्ञोऽवलिप्तश्चबालबुद्धिरमर्षणः ९ निर्भयोभीमसेनोऽयंतंशाधिपुरुषर्षभ ॥ आर्ष्टिषेणस्यराजर्षेःप्राप्यभूयस्त्वमाश्रमम् १० तामिस्रंप्रथमंपक्षंवीतशोकभयोवस ॥ अलकाःसहगंधर्वैर्यक्षाश्चसहकिन्नरैः ११ मन्नियुक्तामनुष्येंद्रसर्वेचगिरिवासिनः ॥ रक्षिष्यंतिमहाबाहोसहितंद्विजसत्तमैः १२ साहसादनुसंप्राप्तःप्रतिबुध्यवृकोदरः ॥ वार्यतांसाध्वयंराजंस्त्वयाधर्मभृतांवर १३ अतःपरंचवोराजन्द्रक्ष्यंतिवनगोचराः ॥ उपस्थास्यंतिवोराजन्रक्षिष्यंतिचवःसदा १४ तथैवचान्नपानानिस्वादूनिचबहूनिच ॥ आहरिष्यंतिमत्प्रेष्याःसदावःपुरुषर्षभाः १५ यथाजिष्णुर्महेंद्रस्ययथावायोर्वृकोदरः ॥ धर्मस्यत्वंयथातातयोगोत्पन्नोनिजःसुतः १६ आत्मजावात्मसंपन्नौयमौचोभौयथाऽश्विनोः ॥ रक्ष्यास्तद्वन्ममापीहयूयंसर्वेयुधिष्ठिर १७ अर्थतत्त्वविधानज्ञःसर्वधर्मविधानवित् ॥ भीमसेनादवरजःफाल्गुनःकुशलीदिवि १८ याःकाश्चनमतालोकेस्वर्ग्याःपरमसंपदः ॥ जन्मप्रभृतिताःसर्वाःस्थितास्तातधनंजये १९ दमोदानंबलंबुद्धिर्ह्रीर्धृतिस्तेजउत्तमम् ॥ एतान्यपिमहासत्त्वेस्थितान्यमिततेजसि २० नमोहात्कुरुतेजिष्णुःकर्मपांडवगर्हितम् ॥ नपार्थस्यमृषोक्तानिकथयंतिनरानृषु २१ सदेवपितृगंधर्वैःकुरूणांकीर्तिवर्धनः ॥ मानितःकुरुतेऽस्त्राणिशक्रसद्मनिभारत २२ योऽसौसर्वान्महीपालान्धर्मेणवशमानयत् ॥ सशांतनुर्महातेजाःपितुस्तवपितामहः २३ प्रीयतेपार्थपार्थेनदिविगांडीवधन्वना ॥ सम्यक्चासौमहावीर्यःकुलधुर्येणपार्थिवः २४ पितॄन्देवानृषीन्विप्रान्पूजयित्वामहातपाः ॥ सप्तमुख्यान्महामेधानाहरद्यमुनांप्रति २५ अधिराजःसराजंस्त्वांशांतनुःप्रपितामहः ॥ स्वर्गजिच्छक्रलोकस्थःकुशलंपरिपृच्छति २६ ॥ वैशंपायनउवाच ॥ एतच्छ्रुत्वातुवचनंधनदेनप्रभाषितम् ॥ पांडवाश्चततस्तेनबभूवुःसंप्रहर्षिताः २७

र्णात् । सूर्यामासासूर्याचंद्रमसावित्यर्थः निपुणतरमुपपादितमेतदस्माभिःकाण्वशतपथभाष्येएकपादीकांडे । अलकाअलकावासिनः ११ मन्नियुक्तारक्षिष्यंतिसहितंत्वामितिशेषः १२ साहसादनुसंप्राप्तइतिप्रतिबुध्यस्वार्यतां १३ । १४ । १५ यथेति इंद्रादीनामौरसपुत्रत्वाद्यथायूयंरक्ष्यास्तथाममापीतिश्लोकद्वयार्थः १६ । १७ अर्थेति तत्त्वं याथात्म्यं विधानंप्राप्त्युपायं १८ स्वर्ग्याः स्वर्गायहिताःसंपदः १९ ताश्चाहदमइति तेजःशौर्यंपराभिभवसामर्थ्यं २० । २१ कुरुते अभ्यस्यति २२ । २३ । २४ महामेधानश्वमेधान् २५ । २६ । २७

प्राध्वंकृत्वाबध्द्वाउपसंहृत्येत्यर्थः । प्राध्वंबंधनेइतिगतिसंज्ञायांकृञातिप्रादयइतिप्राप्तोऽपिसमासोमहाविभाषयानाहतः ममश्वके स्वदोषानर्जुनगुणांश्चश्रुत्वाल्जितःस्वापराधंक्षमापयितुमि त्यर्थः । प्राज्यंकृत्वेत्यपिपाठःप्रकर्षेणअज्यमाज्यं ज्याराहितमित्यर्थः २८ नंदिःसमृद्धिः २९ स्वेषुवेश्मसुअस्मदीयेषु वोयुष्मत्संबंधिनः कामान् काम्यमानानर्थान् नपरिहास्यंतिकिंतुसाधयि ष्यंत्येवेत्यर्थः ३० सृष्टोविसर्जितः संप्राप्स्यतियुष्मान् ३१ अस्तं गृहं । अपाःसोममस्तमित्रप्रयाहीतिमंत्रवर्णात् ३२ परिस्तोमाश्चित्रकंबलाहस्त्यादीनांपल्याणभूताः ३३ ऐरावतपथे

तत शक्तिगदांखड्गंधनुश्चभरतर्षभः ॥ प्राध्वंकृत्वानमश्चक्रेकुबेरायवृकोदरः २८ ततोऽब्रवीद्धनाध्यक्षःशरण्यःशरणागतम् ॥ मानहामवशत्रूणांसुहृदांनंदिव र्धनः २९ स्वेषुवेश्मसुरम्येषुवसतामित्रतापनाः ॥ कामान्नपरिहास्यंतियक्षावोभरतर्षभाः ३० शीघ्रमेवगुडाकेशःकृतास्त्रःपुनरेष्यति ॥ साक्षान्मघवतासृष्टः संप्राप्स्यतिधनंजयः ३१ एवमुत्तमकर्माणमनुशिष्ययुधिष्ठिरम् ॥ अस्तंगिरिवरश्रेष्ठंप्रययौगुह्यकाधिपः ३२ तंपरिस्तोमसंकीर्णैर्नानारत्नविभूषितैः ॥ याने रनुययुर्यक्षाराक्षसाश्चसहस्रशः ३३ पक्षिणामिवनिर्घोषःकुबेरसदनंप्रति ॥ बभूवपरमाश्वानामैरावतपथेयथा ३४ तेजग्मुस्तूर्णमाकाशंधनाधिपतिवाजिनः ॥ प्रकर्षंतइवाभ्राणिपिबंतइवमारुतम् ३५ ततस्तानिशरीराणिगतसत्वानिरक्षसाम् ॥ अपाकृष्यंतशैलाग्राद्धनाधिपतिशासनात् ३६ तेषांहिशापकालःसकृतो गस्त्येनधीमता ॥ समरेनिहतास्तस्माच्छापस्यांतोऽभवत्तदा ३७ पांडवाश्चमहात्मानस्तेषुवेश्मसुताःक्षपाः ॥ सुखमूषुर्गतोद्वेगाःपूजिताःसर्वराक्षसैः ३८ इतिश्रीमहाभारतेआरण्यकेपर्वणियक्षयुद्ध०कुबेरवाक्येद्विषष्टयधिकशततमोऽध्यायः ॥ १६२ ॥ ॥ वैशंपायनउवाच ॥ ततःसूर्योदयेधौम्यःकृत्वाऽऽ ह्निकमरिंदम ॥ आर्ष्टिषेणेनसहितःपांडवानभ्ययवर्तत १ तेऽभिवाद्यार्ष्टिषेणस्यपादौधौम्यस्यचैवह ॥ ततःप्रांजलयःसर्वेब्राह्मणांस्तानपूजयन् २ ततोयुधि ष्ठिरंधौम्योगृहीत्वादक्षिणेकरे ॥ प्राचींदिशमभिप्रेक्ष्यमहर्षिरिदमब्रवीत् ३ असौसागरपर्यंतांभूमिमावृत्यातिष्ठति ॥ शैलराजोमहाराजमंदरोऽतिविराजते ४ इंद्रवैश्रवणावेतांदिशंपांडवरक्षतः ॥ पर्वतैश्चवनांतैश्चकाननैश्चैवशोभिताम् ५ एतदाहुर्महेंद्रस्यराज्ञोवैश्रवणस्यच ॥ ऋषयःसर्वधर्मज्ञाःसद्मतातमनीषिणः ६ अतश्चोद्यंतमादित्यमुपतिष्ठंतिवैप्रजाः ॥ ऋषयश्चापिधर्मज्ञाःसिद्धाःसाध्याश्चदेवताः ७ यमस्तुराजाधर्मज्ञःसर्वप्राणभृतांप्रभुः ॥ प्रेतसत्वगतिंह्येनांदक्षिणा माश्रितोदिशम् ८ एतत्संयमनंपुण्यमतीवाद्भुतदर्शनम् ॥ प्रेतराजस्यभवनमृद्ध्यापरमयायुतम् ९ तंप्राप्यसविताराजन्सत्येनप्रतितिष्ठति ॥ अस्तंपर्वत राजानमेतमाहुर्मनीषिणः १० एतंपर्वतराजानंसमुद्रंचमहोदधिम् ॥ आवसन्वरुणोराजाभूतानिपरिरक्षति ११ उदीचींदीपयन्नेषदिशंतिष्ठतिवीर्यवान् ॥ म हामेरुर्महाभागशिवोब्रह्मविदांगतिः १२ यस्मिन्ब्रह्मसदश्चैवभूतात्माचावतिष्ठते ॥ प्रजापतिःसृजन्सर्वंयत्किंचिज्जंगमागमम् १३

इंद्रपुरीप्रदेशे ३४ । ३५ अपाकृष्यंतअपाकृतानि ३६ । ३७ । ३८ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे द्विषष्टयधिकशततमोऽध्यायः ॥ १६२ ॥ ॥ अर्जुनेनतपोबला द्देवेभ्योऽस्त्राणिलब्धानीतिविस्मयोनकर्तव्यएतदर्थकर्मफलोर्जितं विष्णुलोकप्राप्स्यंतांवर्णयत्यध्यायेनधौम्योयुधिष्ठिरगर्वपरिहारार्थं ततइत्यादिना १ । २ । ३ । ४ । ५ । ६ । ७ प्रेतस त्वगतिंमृतानांप्राणिनांगम्यां ८ संयमनंनामतः ९ । १० आवसन्नधिवसन् ११ । १२ भूतात्मासर्वेषांभूतानामात्मा संपूर्णब्रह्मांडपिंडाभिमानित्वात् १३

१४ अत्रैवप्रजापतौ १५ । १६ यमिति प्रकृतेःपंचभूतात्मिकायाःप्रकृतिमुपादानं १७ ब्रह्मणश्चतुर्मुखस्य १८ । १९ ननुसर्वैःसोपाधिकः कार्यब्रह्मणोऽन्तःपातीति वैदिकसिद्धांतस्तत्कथंविष्णोः स्थानंततःपरमित्युच्यतेअतआह प्राच्यामिति मेरावेवार्यंतारतम्येनदेशविशेषविभागो नतुसोपाधिकमपिकिंचिदजातमस्ति इममेवस्थानभेदमाश्रित्य ब्रह्मलोकादावर्ततेनतुविष्णुलोकादि तिपौराणिकीव्यवस्थाज्ञेया २० । २१ । २२ । २३ । २४ । २५ ध्रुवमक्षयमव्ययमिति उत्पत्तिह्रासनाशशून्यमित्यर्थः एतच्चयथाघटाकाशयोर्मिथ्यात्वाविशेषेऽपिव्यवहारमाश्रित्यघटोनि त्यआकाशोनित्यइतिविभागः एवंब्रह्मलोकांतमनित्यं वैकुंठंनित्यमिति परमार्थतस्तुक्रममुक्तिस्थानत्वादौपचारिकंध्रुवत्वादिज्ञेयं प्रणमनमस्कुरु २६ उपावृत्यप्रदक्षिणंगत्वैव । भच

यानाहुर्ब्रह्मणःपुत्रान्मानसान्दक्षसप्तमान् ॥ तेषामपिमहामेरुःशिवंस्थानमनामयम् १४ अत्रैवप्रतितिष्ठंतिपुनरेवोदयंतिच ॥ सप्तदेवर्षयस्तातवसिष्ठप्रमुखा स्तदा १५ देशंविरजसंपश्यमेरोःशिखरमुत्तमम् ॥ यत्रात्मतृप्तैरध्यास्तेदेवैःसहपितामहः १६ यमाहुःसर्वभूतानांप्रकृतेःप्रकृतिंध्रुवम् ॥ अनादिनिधनंदेवंप्रभुं नारायणंपरम् १७ ब्रह्मणःसदनात्तस्यपरंस्थानंप्रकाशते ॥ देवापियंनपश्यंतिसर्वतेजोमयंशुभम् १८ अत्यर्कानलदीप्तंतत्स्थानंविष्णोर्महात्मनः ॥ स्वयैव प्रभयाराजन्दुष्प्रेक्ष्यंदेवदानवैः १९ प्राच्यांनारायणस्थानंमेरावतिविराजते ॥ यत्रभूतेश्वरस्तातसर्वप्रकृतिरात्मभूः २० भासयन्सर्वभूतानिसुश्रियाऽभिवि राजते ॥ नात्रब्रह्मर्षयस्तातकुतएवमहर्षयः २१ प्राप्नुवंतिगतिंह्येतांयतीनांकुरुसत्तम ॥ नतंज्योतींषिसर्वाणिप्राप्यभासंतिपांडव २२ स्वयंप्रभुरचिंत्यात्मा तत्रह्यतिविराजते ॥ यतयस्तत्रगच्छंतिभक्त्यानारायणंहरिम् २३ परेणतपसायुक्ताभाविताःकर्मभिःशुभैः ॥ योगसिद्धामहात्मानस्तमोमोहविवर्जिताः २४ तत्रगत्वापुनर्नेमंलोकमायांतिभारत ॥ स्वयंभुवंमहात्मानंदेवदेवंसनातनम् २५ स्थानमेतन्महाभागध्रुवमक्षयमव्ययम् ॥ ईश्वरस्यसदाह्येतत्प्रणमात्रयुधिष्ठिर २६ एनंत्वहरहर्मेरुंसूर्याचंद्रमसौध्रुवम् ॥ प्रदक्षिणमुपावृत्यकुरुतःकुरुनंदन २७ ज्योतींषिचाप्यशेषेणसर्वाण्यनघसर्वतः ॥ परियांतिमहाराजगिरिराजंप्रद क्षिणम् २८ एतंज्योतींषिसर्वाणिप्रकर्षन्भगवानपि ॥ कुरुतेवितमस्कर्माआदित्योऽभिप्रदक्षिणम् २९ अस्तंप्राप्यततःसंध्यामतिक्रम्यदिवाकरः ॥ उदीचीं भजतेकाष्ठांदिशमेषविभावसुः ३० समेरुमनुवृत्तःसन्पुनर्गच्छतिपांडव ॥ प्राङ्मुखःसवितादेवःसर्वभूतहितेरतः ३१ समासान्विभजन्कालेबहुधापर्वसंधिषु ॥ तथैवभगवान्सोमोनक्षत्रैःसहगच्छति ३२ एवमेतंत्वतिक्रम्यमहामेरुमतंद्रितः ॥ भावयन्सर्वभूतानिपुनर्गच्छतिमंदरम् ३३ तथातमिस्रहादेवोमयूखैर्भावय ञ्जगत् ॥ मार्गमेतदसंबाधमादित्यःपरिवर्तते ३४ सिसृक्षुःशिशिराण्येवदाक्षिणांभजतेदिशम् ॥ ततःसर्वाणिभूतानिकालोऽभ्यर्छतिशैशिरः ३५

क्रवेगात् कुलालचक्रेभ्रमतीपंक्रमंतीपिपीलिकेव प्रदक्षिणंकुरुतइत्यर्थः २७ । २८ प्रकर्षन्नभिभवन् प्रदक्षिणंकुरुतइत्यनुवादउत्तरार्धार्थः २९ अस्तमदर्शनं अयमर्थः । मेरुं प्रदक्षिणंकुर्वन्नादि त्योयत्रस्थोनदृश्यते तदेवास्तस्थानं ततउदीचींकाष्ठांदिशामध्येऽतिश्रेष्ठांदिशंभजते अत्रसंध्योत्तरमुदङ्मुखः ३० ततउदीच्याःपरांकाष्ठांप्राप्यप्राङ्मुखइतिवदता मेरोश्चतुष्कोणत्वंसूचितं भवति । एतदेवतत्त्वमित्यास्थिताःपाखंडिनोद्वौसूर्याविति कल्पयंति वस्तुतोऽत्रपरभ्रांतिरनूद्यते आकारेतात्पर्याभावादितिज्ञेयं ३१ ससोमोमासान्विभजन्नितिसंबंधः तत्रमासविभा गप्रकारोऽष्टावक्रीयेउक्तः ३२ । ३३ । ३४ शिशिराणिशीतानि ३५

तेजांसिसमुपादत्तेग्रीष्मे ३६ । ३७ अनिर्देश्यंमार्गमंतरिक्षं ३८ वह्निवायू परस्परंवर्धयंतौजलमुत्क्षिपतइतिप्रसिद्धं सजलस्थाल्यांवायूद्दीपितोऽग्निर्बाष्पत्वापादयंर्ध्वंयाति वायुश्चस्थालींजलमु त्क्षिपतीतिवृष्टिमारुतसंतापान्प्रति सूर्यस्यैवहेतुत्वंयुक्तमितिभावः ३९ । ४० । ४१ । ४२ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेत्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥ ॥ तस्मिन्निति १ । २ । ३ महतीचलालक्ष्मीःशोभायस्य महाचलस्य । 'चलालक्ष्म्यांपुमान्कंपे'इति मेदिनी । सानून्येवतीक्ष्णाग्राणि पुंसंचारायोग्यानिशृंगाणीत्युच्यंते ४ रोधसोरोधस्त्वयः नवशैवालादिनाच्छादितनीराइत्यर्थः ५ । ६ । ७ विभक्तभावोनबभूवाहोरात्रविभागोनासीत् नित्यमौषधिप्रभोपेतत्वात् अहोइतिरुत्वमार्षं ८ यंसूर्यविभावसुर्वह्निरास्थितः । 'आदित्योवा

स्थावराणांचभूतानांजंगमानांचतेजसा ॥ तेजांसिसमुपादत्तेनिवृत्तःसविभावसुः ३६ ततःस्वेदक्लमौतंद्रींग्लानिश्चभजतेनरान् ॥ प्राणिभिःसततंस्वप्मोह्यभी क्ष्णंचनिषेव्यते ३७ एवमेतदनिर्देश्यंमार्गमावृत्यभानुमान् ॥ पुनःसृजतिवर्षाणिभगवान्भावयन्प्रजाः ३८ वृष्टिमारुतसंतापैःसुखैःस्थावरजंगमान् ॥ वर्धय न्सुमहातेजाःपुनःप्रतिनिवर्तते ३९ एवमेषचरन्पार्थकालचक्रमतंद्रितः ॥ प्रकर्षन्सर्वभूतानिसवितापरिवर्तते ४० संततागतिरेतस्यनैषातिष्ठतिपां डव ॥ आदायैवतुभूतानांतेजोविसृजतेपुनः ४१ विभजन्सर्वभूतानामायुःकर्मचभारत ॥ अहोरात्रंकलाःकाष्ठाःसृजत्येषसदाविभुः ४२ ॥ इतिश्रीमहा भारतेआरण्यकेपर्वणियक्षयुद्धप० मेरुदर्शनेत्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ वैशंपायनउवाच ॥ तस्मिन्नगेंद्रे वसतांतुतेषांमहात्मनांसद्व्रतमास्थितानाम् ॥ रतिःप्रमोदश्चबभूवतेषामाकांक्षतांदर्शनमर्जुनस्य १ तान्वीर्ययुक्तान्सुविशुद्धकामांस्तेजस्विनःसत्यधृतिप्रधा नान् ॥ संप्रीयमाणाबहवोऽभिजग्मुर्गंधर्वसंघाश्चमहर्षयश्च २ तंपादपैःपुष्पधरैरुपेतंनगोत्तमंप्राप्यमहारथानाम् ॥ मनःप्रसादःपरमोबभूवयथादिवंप्राप्य मरुद्गणानाम् ३ मयूरहंसस्वननादितानिपुष्पोपकीर्णानिमहाचलस्य ॥ शृंगाणिसानूनिचपश्यमानागिरेःपरंहर्षमवाप्यतस्थुः ४ साक्षात्कुबेरेणकृताश्चत स्मिन्नगोत्तमेसंवृतकूलरोधसः ॥ कादंबकारंडवहंसजुष्टाःपद्माकुलाःपुष्करिणीरपश्यन् ५ क्रीडाप्रदेशांश्चसमृद्धरूपान्सुचित्रमाल्यावृतजातशोभान् ॥ मणिप्रकी र्णांश्चमनोरमांश्चयथाभवेयुर्धनदस्यराज्ञः ६ अनेकवर्णैश्चसुगंधिभिश्चमहाद्रुमैःसंततमभ्रजालैः ॥ तपःप्रधानाःसततंचरंतःशृंगंगिरेश्चिंतयितुंनशेकुः ७ स्वते जसातस्यनगोत्तमस्यमहौषधीनांचतथाप्रभावात् ॥ विभक्तभावोनबभूवकश्चिदहोनिशानांपुरुषप्रवीर ८ यमास्थितःस्थावरजंगमानिविभावसुर्भावयतेऽमि तौजाः ॥ तस्योदयंचास्तमनंचवीरास्तत्रस्थितास्तेददृशुर्नृसिंहाः ९ रवेस्तमिस्रागमनिर्गमांस्तेतथोदयंचास्तमनंचवीराः ॥ समावृताःप्रेक्ष्यतमोनुदस्यगभ स्तिजालैःप्रदिशोदिशश्च १० स्वाध्यायवंतःसततक्रियाश्चधर्मप्रधानाश्चशुचिव्रताश्च ॥ सत्येस्थितास्तस्यमहारथस्यसत्यव्रतस्यागमनप्रतीक्षाः ११

अस्तंयन्नग्निमनुप्रविशति'इतिश्रुतेः यस्यसूर्यस्याश्रयेणवरात्रौवह्निर्जगद्दीपयति तस्योदयमित्यन्वयः ९ तमिस्रागमनिर्गमाःअस्तोदयस्थानानि बहुत्वंलोकांतराभिप्रायं तथाहि । यद्दाक्षिणा त्यानामुदयस्थानंतदुदीच्यानामस्तस्थानं । पाश्चात्यानांनिशीथस्थानं प्राच्यानांमध्याह्नस्थानमितिक्रमेणउदयादिस्थानानांबहुत्वंगम्यते उदयमुदयाचलं । अस्तमितिमांतमव्ययमदर्शन वाचि तदर्थं अनितिचेष्टतेस्मिन्नित्यस्तमनमस्तमयस्थानं अस्ताचलमित्यादौत्वस्तपदंग्रहवाचि प्रदिशोदिशामंतरालानि १० सततक्रियाःअविच्छिन्नधर्माचरणाः ११

१२ । १३ । १४ यत्काम्यकात् यदाकाम्यकाख्यवनात् १५ । १६ । १७ । १८ । १९ । २० ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

इहैवहर्षोऽस्तुसमागतानांक्षिप्रंकृतास्त्रेणधनंजयेन ॥ इतिब्रुवंतःपरमाशिषस्तेपार्थास्तपोयोगपराबभूवुः १२ दृष्ट्वाविचित्राणिगिरौवनानिकिरीटिनंचिंतयता मभीक्ष्णम् ॥ बभूवरात्रिर्दिवसश्चतेषांसंवत्सरेणैवसमानरूपः १३ यदैवधौम्यानुमतेमहात्माकृत्वाजटांप्रव्रजितःसजिष्णुः ॥ तदैवतेषांनबभूवहर्षःकुतोरतिस्त द्गतमानसानाम् १४ भ्रातुर्नियोगात्तुयुधिष्ठिरस्यवनादसौवारणमत्तगामी ॥ यत्काम्यकात्प्रव्रजितःसजिष्णुस्तदैवतेशोकहताबभूवुः १५ तथैवतंचिंतयतांसि ताश्वमस्त्रार्थिनंवासवमभ्युपेतम् ॥ मासोऽथकृच्छ्रेणतदाव्यतीतस्तस्मिन्नगेभारतभारतानाम् १६ उषित्वापंचवर्षाणिसहस्राक्षनिवेशने ॥ अवाप्यादिव्यान्य स्त्राणिसर्वाणिविबुधेश्वरात् १७ आग्नेयंवारुणंसौम्यंवायव्यमथवैष्णवम् ॥ ऐंद्रंपाशुपतंब्राह्मंपारमेष्ठ्यंप्रजापतेः १८ यमस्यधातुःसवितुस्त्वष्टुर्वैश्रवणस्यच ॥ तानि प्राप्यसहस्राक्षादभिवाद्यशतक्रतुम् १९ अनुज्ञातस्तदातेनकृत्वाचापिप्रदक्षिणम् ॥ आगच्छदर्जुनःप्रीतःप्रहृष्टोगंधमादनम् २० ॥ इतिश्रीमहाभारतेआ रण्यकेप० यक्षयुद्धपर्वणिअर्जुनाभिगमनेचतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥ ॥ समाप्तंचयक्षयुद्धपर्व ॥ अथनिवातकवचयुद्धपर्व ॥ वैशंपायनउ वाच ॥ ततःकदाचिद्धरिसंप्रयुक्तंमहेंद्रवाहंसहसोपयातम् ॥ विद्युत्प्रभंप्रेक्ष्यमहारथानांहर्षोऽर्जुनंचिंतयतांबभूव १ सदीप्यमानःसहसांऽतरिक्षंप्रकाशयन्मा तलिसंगृहीतः ॥ बभौमहोल्केवघनांतरस्थाशिखेवचाग्नेर्ज्वलिताविधूमा २ तमास्थितःसंददृशेकिरीटीस्रग्वीनवान्याभरणानिबिभ्रत् ॥ धनंजयोवज्रधरप्रभावः श्रियाज्वलन्पर्वतमाजगाम ३ सशैलमासाद्यकिरीटमालीमहेंद्रवाहादवरुह्यतस्मात् ॥ धौम्यस्यपादावभिवाद्यधीमानजातशत्रोस्तदनंतरंच ४ वृकोदरस्या पिचवंद्यपादौमाद्रीसुताभ्यामभिवादितश्च ॥ समेत्यकृष्णांपरिसांत्व्यचैनांप्रह्वोऽभवद्भ्रातुरुपह्वरेसः ५ बभूवतेषांपरमःप्रहर्षस्तेनाप्रमेयेणसमागतानाम् ॥ स चापितान्प्रेक्ष्यकिरीटमालीननंदराजानमभिप्रशंसन् ६ यमास्थितःसप्तजघानपूगान्दितेःसुतानांनमुचेर्निहंता ॥ तमिंद्रवाहंसमुपेत्यपार्थाःप्रदक्षिणंचक्रुरदी नसत्त्वाः ७ तेमातलेश्चक्रुरतीवहृष्टाःसत्कारमग्र्यंसुरराजतुल्यम् ॥ सर्वान्यथावच्चदिवौकसस्तेपप्रच्छुरेनंकुरुराजपुत्राः ८ तानप्यसौमातलिरभ्यनंदत्पितेव पुत्राननुशिष्यपार्थान् ॥ ययौरथेनाप्रतिमप्रभेणपुनःसकाशंत्रिदिवेश्वरस्य ९ गतेतुतस्मिन्नरदेववर्यःशक्रात्मजःशक्ररिपुप्रमाथी ॥ शक्रेणदत्तानिददौमहात्मा महाधनान्युत्तमरूपवंति १० दिवाकराभाणिविभूषणानिप्रियःप्रियायैसुतसोममात्रे ॥ ततःसतेषांकुरुपुंगवानांतेषांचसूर्याग्निसमप्रभाणाम् ११

ततइति हरिभिरश्वैःसंप्रयुक्तंमहेंद्रस्यवाहंरथं १ । २ । ३ । ४ प्रह्वोनम्रः उपह्वरेसमीपे ५ । ६ पूगान्यूथानि ७ एनंमातलिं ८ । ९ । १० सुतसोमो भीमाद्द्रौपद्यांजातः ११

१२ । १३ आवसत्तिंरात्रिं प्रतीतोहृष्टः १४ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेपंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ ॥ ७ ॥ ततइति १ । २ । ३ । ४

विप्रर्षभाणामुपविश्यमध्येसर्वंयथावत्कथयांबभूव ॥ एवंमयाऽस्त्राण्युपशिक्षितानिशक्राच्चवाताच्छिवाच्चसाक्षात् १२ तथैवशीलेनसमाधिनाऽथप्रीताःसुरामे सहिताःसहेंद्राः ॥ संक्षेपतोवैसविशुद्धकर्मातेभ्यःसमाख्यायदिविप्रवासम् १३ माद्रीसुताभ्यांसहितःकिरीटीसुष्वापतामावसतिंप्रतीतः १४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनिवातकवचयुद्धपर्वणिअर्जुनसमागमेपंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ ततोरजन्यांव्युष्टायांधर्मराजंयुधिष्ठिरम् ॥ भ्रातृभिःसहितःसर्वैर्वंदतधनंजयः १ एतस्मिन्नेवकालेतुसर्ववादित्रनिःस्वनः ॥ बभूवतुमुलःशब्दस्त्वंतरिक्षेदिवौकसाम् २ रथनेमिस्वनश्चैवघंटाशब्दश्चभारत ॥ पृथग्व्यालमृगाणांचपक्षिणामिवसर्वशः ३ तेसमंतादनुययुर्गंधर्वाप्सरसांगणाः ॥ विमानैःसूर्यसंकाशैर्देवराजमरिंदमम् ४ ततःसहरिभिर्युक्तंजांबूनदपरिष्कृतम् ॥ मेघनादिनमारुह्यश्रियापरमयाज्वलन् ५ पार्थानभ्याजगामाथदेवराजःपुरंदरः॥ आगत्यचसहस्राक्षोरथादवरुरोहवै ६ तंदृष्ट्वैवमहात्मानंधर्मराजोयुधिष्ठिरः ॥ भ्रातृभिःसहितःश्रीमान्देवराजमुपागमत् ७ पूजयामासचैवाथविधिवद्भूरिदक्षिणः ॥ यथार्हममितात्मानंविधिदृष्टेनकर्मणा ८ धनंजयश्चतेजस्वीप्रणिपत्यपुरंदरम् ॥ भृत्यवत्प्रणतस्तस्थौदेवराजसमीपतः ९ आघ्रायतंमहातेजाःकुंतीपुत्रोयुधिष्ठिरः ॥ धनंजयमभिप्रेक्ष्यविनीतंस्थितमंतिके १० जटिलंदेवराजस्यतपोयुक्तमकल्मषम् ॥ हर्षेणमहताऽऽविष्टःफाल्गुनस्याथदर्शनात् ११ बभूवपरमप्रीतोदेवराजंचपूजयन् ॥ तंतथाऽदीनमनसंराजानंहर्षसंप्लुतम् १२ उवाचवचनंधीमान्देवराजःपुरंदरः ॥ त्वामिमांपृथिवींराजन्प्रशासिष्यसिपांडव ॥ स्वस्तिप्राप्नुहिकौंतेयकाम्यकंपुनराश्रमम् १३ अस्त्राणिलब्धानिचपांडवेनसर्वाणिमत्तःप्रयतेनराजन् ॥ कृतप्रियश्चास्मिधनंजयेनजेतुंनशक्यस्त्रिभिरेषलोकैः १४ एवमुक्त्वासहस्राक्षःकुंतीपुत्रंयुधिष्ठिरम् ॥ जगामत्रिदिवंहृष्टःस्तूयमानोमहर्षिभिः १५ धनेश्वरगृहस्थानांपांडवानांसमागमम् ॥ शक्रेणयइदंविद्वानधीयीतसमाहितः १६ संवत्सरंब्रह्मचारीनियतःसंशितव्रतः ॥ सजीवेद्धिनिराबाधःससुखीशरदांशतम् १७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनिवातकवचयुद्धपर्वणिइंद्रागमनेषट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ यथागतंगतेशक्रेभ्रातृभिःसहसंगतः ॥ कृष्णयाचैवबीभत्सुर्धर्मपुत्रमपूजयत् १ अभिवादयमानंतंमूर्ध्न्युपाघ्रायपांडवम् ॥ हर्षगद्गदयावाचाप्रहृष्टोऽर्जुनमब्रवीत् २ कथमर्जुनकालोऽयंस्वर्गेव्यतिगतस्तव ॥ कथंचास्त्राण्यवाप्तानिदेवराजश्चतोषितः ३

हरिभिर्युक्तंरथं ५ । ६ । ७ अमितात्माअमितबुद्धिः ८ । ९ । १० । ११ अदीनेतिच्छेदः १२ । १३ कृतप्रियःशत्रुवधेन १४ । १५ १६ । १७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेषट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥ ॥ ७ ॥ यथेति १ प्रहृष्टोधर्मपुत्रः २ । ३

४ । ५ । ६ । ७ । ८ हंतेत्यव्ययंवाक्यारंभे हर्षे वा । 'हंतवाक्यारंभहर्षविषादेखेदसंभ्रमे' इतिमेदिनी ९ । १० । ११ । १२ । १३ । १४ शैशिरंहिममयं १५ । १६ प्राणोबलं १७ वराह

सम्यग्वातेगृहीतानिकच्चिदस्त्राणिपांडव ॥ कच्चित्सुराधिपःप्रीतोरुद्रोवाऽस्त्राण्यदात्तव ४ यथादृष्टश्चतेशक्रोभगवान्वापिनाकधृक् ॥ यथैवास्त्राण्यवाप्तानियथैवाराधितश्चते ५ यथोक्तवांस्त्वांभगवान्शतक्रतुररिंदम ॥ कृतप्रियस्त्वयाऽस्मीतितस्यतेकिंप्रियंकृतम् ६ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहाद्युते ॥ यथातुष्टोमहादेवोदेवराजस्तथाऽनघ ७ यच्चापिवज्रपाणेस्तुप्रियंकृतमरिंदम ॥ एतदाख्याहिमेसर्वमखिलेनधनंजय ८ ॥ अर्जुनउवाच ॥ शृणुहंतमहाराजविधिनायेनदृष्टवान् ॥ शतक्रतुमहंदेवंभगवंतंचशंकरम् ९ विद्यामधीत्यतांराजंस्त्वयोक्तामरिमर्दन ॥ भवताचसमादिष्टस्तपसेप्रस्थितोवनम् १० भृगुतुंगमथोगत्वाकाम्यकादास्थितस्तपः ॥ एकरात्रोषितःकंचिदपश्यंब्राह्मणंपथि ११ समामपृच्छत्कौंतेयक्वासिगंताब्रवीहिमे ॥ तस्माअवितथंसर्वमब्रुवंकुरुनंदन १२ सतथ्यंममतच्छ्रुत्वाब्राह्मणोराजसत्तम ॥ अपूजयतमांराजन्प्रीतिमांश्चाभवन्मयि १३ ततोमामब्रवीत्प्रीतस्तपआतिष्ठभारत ॥ तपस्वीनचिरेणत्वंद्रक्ष्यसेविबुधाधिपम् १४ ततोऽहंवचनात्तस्यगिरिमारुह्यशैशिरम् ॥ तपोऽतप्यंमहाराजमासंमूलफलाशनः १५ द्वितीयश्चापिमेमासोजलंभक्षयतोगतः ॥ निराहारस्तृतीयेऽथमासेपांडवनंदन १६ ऊर्ध्वबाहुश्चतुर्थंतुमासमस्मिस्थितस्तदा ॥ नचमेहीयतेप्राणस्तदद्भुतमिवाभवत् १७ पंचमेत्वथसंप्राप्तेप्रथमेदिवसेगते ॥ वराहसंस्थितंभूतंमत्समीपंसमागमत् १८ निघ्नन्प्रोथेनपृथिवींविलिखंश्चरणैरपि ॥ संमार्जन्जठरेणोर्वींविवर्तंश्चमुहुर्मुहुः १९ अनुतस्यापरंभूतंमहत्कैरातसंस्थितम् ॥ धनुर्बाणासिमत्प्राप्तंस्त्रीगणानुगतंतदा २० ततोहंधनुरादायतथाऽक्षय्येमहेषुधी ॥ अताडयंशरेणाथतद्भूतंलोमहर्षणम् २१ युगपत्तंकिरातस्तुविकृष्यबलवद्धनुः ॥ अभ्याजघ्नेदृढतरंकंपयन्निवमेमनः २२ सतुमामब्रवीद्राजन्ममपूर्वपरिग्रहः ॥ मृगयाधर्ममुत्सृज्यकिमर्थंताडितस्त्वया २३ एषतोनिशितैर्बाणैर्दर्पंहन्मिस्थिरोभव ॥ सधनुष्मान्महाकायस्ततोमामभ्यभाषत २४ ततोगिरिमिवात्यर्थमावृणोन्मांमहाशरैः ॥ तंचाहंशरवर्षेणमहतासमवाकिरम् २५ ततःशरैर्दीप्तमुखैर्यंत्रितैरनुमंत्रितैः ॥ प्रत्यविध्यमहंतंतुवज्रैरिवशिलोच्चयम् २६ तस्यतच्छतधारूपमभवच्चसहस्रधा ॥ तानिचास्यशरीराणिशरैरहमताडयम् २७ पुनस्तानिशरीराणिएकीभूतानिभारत ॥ अदृश्यंतमहाराजतान्यहंव्यधमंपुनः २८ अणुर्बृहच्छिराभूत्वाबृहच्चाणुशिराःपुनः ॥ एकीभूतस्तदाराजन्सोऽभ्यवर्ततमांयुधि २९ यदाभिभवितुंबाणैर्नैवशक्नोमितंरणे ॥ ततोमहास्त्रमातिष्ठंवायव्यंभरतर्षभ ३० नचैनमशकंहंतुंतदद्भुतमिवाभवत् ॥ तस्मिन्प्रतिहतेचास्त्रेविस्मयोमेमहानभूत् ३१ भूयएवमहाराजसविशेषमहंततः ॥ अस्त्रपूगेनमहतारणेभूतमवाकिरम् ३२

वत्संस्थितमाकारो यस्य १८ प्रोथेनमुखाग्रेणपोत्राख्येन विवर्तन्विघ्निणभावेनवर्तमानः इतस्ततःपर्यटन्वा १९।२०।२१।२२।२३।२४।२५ अनुपश्चाद्यंत्रितैर्दृढाकृष्टैः २६।२७।२८।२९।३०।३१

स्थूणाकर्णइतिशंकुकर्णाख्योरुद्रावतारभेदस्तद्दैवत्यमस्त्रं जालंजलमयं वारुणं ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ व्यायामंसंघट्टनं अपारयन्अशक्नुवन् ४० । ४१। ४२ । ४३ गोवृषो

स्थूणाकर्णमथोजालंशरवर्षमथोल्बणम् ॥ शलभास्त्रमश्मवर्षंसमास्थायाहमभ्ययाम् ३३ जग्रासप्रसभंतानिसर्वाण्यस्त्राणिमेनृप ॥ तेषुसर्वेषुजग्धेषुब्रह्मास्त्रंम
हदादिशम् ३४ ततःप्रज्वलितैर्बाणैःसर्वतःसोऽपचीयते ॥ उपचीयमानश्चमयामहास्त्रेणव्यवर्धत ३५ ततःसंतापितालोकामत्प्रसूतेनतेजसा ॥ क्षणेनहिदि
शःखंचसर्वतोहिविदीपितम् ३६ तदप्यस्त्रंमहातेजाःक्षणेनैवव्यशातयत् ॥ ब्रह्मास्त्रेतुहतेराजन्भयंमांमहदाविशत् ३७ ततोऽहंधनुरादायतथाऽक्षय्येमहेषुधी ॥
सहसाऽभ्यहनंभूतंतान्यप्यस्त्राण्यभक्षयत् ३८ हतेष्वस्त्रेषुसर्वेषुभक्षितेष्वायुधेषुच ॥ ममतस्यचभूतस्यबाहुयुद्धमवर्तत ३९ व्यायामंमुष्टिभिःकृत्वातलैरपिस
मागतैः ॥ अपारयंश्चतद्भूतंनिश्चेष्टमगमंमहीम् ४० ततःप्रहस्यतद्भूतंतत्रैवांतरधीयत ॥ सहस्त्रीभिर्महाराजपश्यतोमेऽद्भुतोपमम् ४१ एवंकृत्वासभगवां
स्ततोऽन्यद्रूपमास्थितः ॥ दिव्यमेवमहाराजवसानोऽद्भुतमंबरम् ४२ हित्वाकिरातरूपंचभगवांस्त्रिदशेश्वरः ॥ स्वरूपंदिव्यमास्थायतस्थौतत्रमहेश्वरः ४३
अदृश्यतततःसाक्षाद्भगवान्गोवृषध्वजः ॥ उमासहायोव्यालधृग्बहुरूपःपिनाकधृक् ४४ समामभ्येत्यसमरेतथैवाभिमुखंस्थितम् ॥ शूलपाणिरथोवाचतुष्टोऽ
स्मीतिपरंतप ४५ ततस्तद्धनुरादायतूणीचाक्षय्यसायकौ ॥ प्रादान्ममैवभगवान्वरयस्वेतिचाब्रवीत् ४६ तुष्टोऽस्मितवकौंतेयब्रूहिकिंकरवाणिते ॥ मनोगतं
वीरयत्तेतद्ब्रूहिवितराम्यहम् ४७ अमरत्वमपाहायब्रूहियत्तेमनोगतम् ॥ ततःप्रांजलिरेवाहमस्त्रेषुगतमानसः ४८ प्रणम्यमनसाशर्वंततोवचनमाददे ॥ भगवा
न्मेप्रसन्नश्चेदीप्सितोऽयंवरोमम ४९ अस्त्राणीच्छाम्यहंज्ञातुंयानिदेवेषुकानिचित् ॥ ददानीत्येवभगवानब्रवीत्त्र्यंबकश्चमाम् ५० रौद्रमस्त्रंमदीयंत्वामुपस्था
स्यतिपांडव ॥ प्रददौचममप्रीतःसोऽस्त्रंपाशुपतंमहत् ५१ उवाचचमहादेवोदत्वामेऽस्त्रंसनातनम् ॥ नप्रयोज्यंभवेदेतन्मानुषेषुकथंचन ५२ जगद्विनिर्दहेदे
वमल्पतेजसिपातितम् ॥ पीड्यमानेनबलवत्प्रयोज्यंस्याद्धनंजय ५३ अस्त्राणांप्रतिघातेचसर्वथैवप्रयोजयेत् ॥ तदप्रतिहतंदिव्यंसर्वास्त्रप्रतिषेधनम् ५४ मू
र्तिमन्मेस्थितंपार्श्वेप्रसन्नेगोवृषध्वजे ॥ उत्सादनममित्राणांपरसेनानिकर्तनम् ५५ दुरासदंदुष्प्रसहंसुरदानवराक्षसैः ॥ अनुज्ञातस्त्वहंतेनतत्रैवसमुपाविशम्
५६ प्रेक्षतश्चैवमेदेवस्तत्रैवांतरधीयत ५७ ॥ इतिश्रीमहाभारतेआरण्यकेप० निवातकवचवधप०गंधमादनवासेयुधिष्ठिरार्जुनसंवादेसप्तषष्ट्यधिकशततमो
ऽध्यायः ॥ १६७ ॥ ॥ ७ ॥ ॥ अर्जुनउवाच ॥ ततस्तामवसंप्रीतोरजनींतत्रभारत ॥ प्रसादाद्देवदेवस्यत्र्यंबकस्यमहात्मनः १ व्युषितोरजनींचाहं
कृत्वापौर्वाण्हिकीःक्रियाः ॥ अपश्यंतंद्विजश्रेष्ठंदृष्टवानस्मियंपुरा २ तस्मैचाहंयथावृत्तंसर्वमेवन्यवेदयम् ॥ भगवंतंमहादेवंसमेतोऽस्मीतिभारत ३

बलीवर्दश्रेष्ठः ४४।४५।४६।४७।४८।४९।५०।५१।५२।५३।५४।५५।५६।५७ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥ ततइति १ । २ । ३

४ । ५ । ६ । ७ । ८ । ९ । १० देवयानैर्विमानैः सद्मनिवासिनः स्त्रीबालादयः शचीजयंतादयइत्यर्थः ११ । १२ । १३ यथास्थानंप्राच्यामिंद्रंप्रतीच्यांवरुणमित्यादि १४ । १५ । १६

समामुवाचराजेंद्रप्रीयमाणोद्विजोत्तमः ॥ दृष्टस्त्वयामहादेवोयथानान्येनकेनचित् ४ समेत्यलोकपालैस्तुसर्वैर्वैवस्वतादिभिः ॥ द्रष्टाऽस्यनघदेवेंद्रंसचतेऽस्त्रा
णिदास्यति ५ एवमुक्त्वासमांराजन्नाश्लिष्यचपुनःपुनः ॥ अगच्छत्सयथाकामंब्राह्मणःसूर्यसन्निभः ६ अथापराह्णेतस्याह्नःप्रावात्पुण्यःसमीरणः ॥ पुनर्नवमिमं
लोकंकुर्वन्निवसपत्नहन् ७ दिव्यानिचैवमाल्यानिसुगंधीनिनवानिच ॥ शैशिरस्यगिरेःपादेप्रादुरासन्समीपतः ८ वादित्राणिचादिव्यानिसुघोराणिसमंततः ॥
स्तुतयश्चेंद्रसंयुक्ताअश्रूयंतमनोहराः ९ गणाश्चाप्सरसांतत्रगंधर्वाणांतथैवच ॥ पुरस्ताद्देवदेवस्यजगुर्गीतानिसर्वशः १० मरुतांचगणास्तत्रदेवयानैरुपाग
मन् ॥ महेंद्रानुचरायेचयेचसद्मनिवासिनः ११ ततोमरुत्वान्हरिभिर्युक्तैर्वाहैःस्वलंकृतैः ॥ शचीसहायस्तत्रायात्सहसर्वैस्तदामरैः १२ एतस्मिन्नेवकालेतुकुबेरो
नरवाहनः ॥ दर्शयामाससमांराजन्लक्ष्म्यापरमयायुतः १३ दक्षिणस्यांदिशियमंप्रत्यपश्यंव्यवस्थितम् ॥ वरुणंदेवराजंचयथास्थानमवस्थितम् १४ तेमामू
चुर्महाराजसांत्वयित्वानरर्षभ ॥ सव्यसाचिन्निरीक्षास्माँल्लोकपालानवस्थितान् १५ सुरकार्यार्थसिद्ध्यर्थंदृष्टवानसिशंकरम् ॥ अस्मत्तोऽपिगृहाणत्वमस्त्राणीति
समंततः १६ ततोऽहंप्रयतोभूत्वाप्रणिपत्यसुरर्षभान् ॥ प्रत्यगृह्णंतदाऽस्त्राणिमहांतिविधिवद्विभो १७ गृहीतास्त्रस्ततोदेवैरनुज्ञातोऽस्मिभारत ॥ अथदेवा
ययुःसर्वेयथागतमरिंदम १८ मघवानपिदेवेशोरथमारुह्यसुप्रभम् ॥ उवाचभगवान्स्वर्गेगंतव्यंफाल्गुनत्वया १९ पुरैवागमनादस्माद्वेदाहंत्वांधनंजय ॥ अ
तःपरंत्वहंवैत्वांदर्शयेभरतर्षभ २० त्वयाहितीर्थेषुपुरासमाप्लावःकृतोऽसकृत् ॥ तपश्चेदंमहत्तप्तंस्वर्गंगंताऽसिपांडव २१ भूयश्चैवचतप्तव्यंतपश्चरणमुत्तमम् ॥
स्वर्गंत्ववश्यंगंतव्यंत्वयाशत्रुनिषूदन २२ मातलिर्मन्नियोगात्त्वांत्रिदिवंप्रापयिष्यति ॥ विदितस्त्वंहिदेवानांमुनीनांचमहात्मनाम् २३ ततोऽहमब्रुवंशक्रंप्रसीद
भगवन्मम ॥ आचार्यंवरयेयंत्वामस्त्रार्थंत्रिदशेश्वर २४ ॥ इंद्रउवाच ॥ क्रूरकर्मास्त्रवित्तातभविष्यसिपरंतप ॥ यदर्थमस्त्राणीप्सुस्त्वंतंकामंपांडवाप्नुहि २५ त
तोऽहमब्रुवंनाहंदिव्यान्यस्त्राणिशत्रुहन् ॥ मानुषेषुप्रयोक्ष्यामिविनास्त्रप्रतिघातनात् २६ तानिदिव्यानिमेऽस्त्राणिप्रयच्छविबुधाधिप ॥ लोकांश्चास्त्रजितान्प
श्चाल्लभेयंसुरपुंगव २७ ॥ इंद्रउवाच ॥ परीक्षार्थंमयैतत्तेवाक्यमुक्तंधनंजय ॥ ममात्मजस्यवचनंसूपपन्नमिदंतव २८ शिक्षमेभवनंगत्वासर्वाण्यस्त्रा
णिभारत ॥ वायोरग्नेर्वसुभ्योऽपिवरुणात्समरुद्गणात् २९ साध्यंपैतामहंचैवगंधर्वोरगरक्षसाम् ॥ वैष्णवानिचसर्वाणिनैर्ऋतानितथैवच ३० मद्गतानिचजानी
हिसर्वास्त्राणिकुरूद्वह ॥ एवमुक्त्वातुमांशक्रस्तत्रैवांतरधीयत ३१

१७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । त्वं क्रूरकर्मा भविष्यसीति संबंधः २५ अहंस्त्वयप्रतिघातार्थमस्त्रंमोक्ष्ये नत्वन्यत्र मानुषे । २६ । २७ । २८ । । २९ । ३० । ३१

 मायामयमिवात्यद्भुतं । ३१ । ३२ । ३३ । ३५ । ३६ । ३७ । ३८ । पदात् स्थानान्नचलितः रथस्य भ्रमणेऽपि दृढासन इत्यर्थः । ३९ । ४० । ४१ । ४२ सुरर्षिणामिति दैर्घ्याभावआर्षः
अथापश्यंहरियुजंरथमैंद्रमुपस्थितम् ॥ दिव्यंमायामयंपुण्यंयत्तंमातलिनानृप ३२ लोकपालेषुयातेषुमामुवाचाथमातलिः ॥ द्रष्टुमिच्छतिशक्रस्त्वांदेवराजो
॥१३७॥ महाद्युते ३३ संसिध्यस्वमहाबाहोकुरुकार्यमनंतरम् ॥ पश्यपुण्यकृतांल्लोकान्सशरीरोदिवंव्रज ३४ देवराजःसहस्राक्षस्त्वांदिदृक्षतिभारत ॥ इत्युक्तोऽहंमात
लिनागिरिमामंत्र्यशैशिरम् ३५ प्रदक्षिणमुपावृत्यसमारोहंरथोत्तमम् ॥ चोदयामाससहयान्मनोमारुतरंहसः ३६ मातलिर्हयतत्त्वज्ञोयथावद्भूरिदक्षिणः ॥ अ ॥१६८॥
वैक्षतचमेवक्त्रंस्थितस्याथससारथिः ३७ तथाभ्रांतेरथेराजन्विस्मितश्चेदमब्रवीत् ॥ अत्यद्भुतमिदंत्वय्यविचित्रंप्रतिभातिमे ३८ यदास्थितोरथंदिव्यंपदान्नच
लितःपदम् ॥ देवराजोऽपिहिमयानित्यमत्रोपलक्षितः ३९ विचलन्प्रथमोत्पातेहयानांभरतर्षभ ॥ त्वंपुनःस्थितएवात्ररथेभ्रांतेकुरूद्वह ४० अतिशक्रमिदंस
र्वंतवेतिप्रतिभातिमे ॥ इत्युक्त्वाऽऽकाशमाविश्यमातलिर्विबुधालयान् ४१ दर्शयामासमेराजन्विमानानिचभारत ॥ सरथोहरिभिर्युक्तोह्यूर्ध्वमाचक्रमेततः ४२
ऋषयोदेवताश्चैवपूजयंतिनरोत्तम ॥ ततःकामगमांल्लोकानपश्यंवैसुरर्षिणाम् ४३ गंधर्वाप्सरसांचैवप्रभावममितौजसाम् ॥ नंदनादीनिदेवानांवनान्युपवना
निच ४४ दर्शयामासमेशीघ्रंमातलिःशक्रसारथिः ॥ ततःशक्रस्यभवनमपश्यममरावतीम् ४५ दिव्यैःकामफलैर्वृक्षैरत्नैश्चसमलंकृताम् ॥ नतत्रसूर्यस्तप
तिनशीतोष्णेनचक्लमः ४६ नबाधतेतत्ररजस्तत्रास्तिनजरानृप ॥ नतत्रशोकोदैन्यंवादौर्बल्यंचोपलक्ष्यते ४७ दिवौकसांमहाराजनग्लानिररिमर्दन ॥ न
क्रोधलोभौतत्रास्तांसुरादीनांविशांपते ४८ नित्यतुष्टाश्चतेराजन्प्राणिनःसुरवेश्मनि ॥ नित्यपुष्पफलास्तत्रपादपाहरितच्छदाः ४९ पुष्करिण्यश्चविविधाः
पद्मसौगंधिकायुताः ॥ शीतस्तत्रववौवायुःसुगंधीजीवनःशुचिः ५० सर्वरत्नविचित्राचभूमिःपुष्पविभूषिता ॥ मृगद्विजाश्चबहवोरुचिरामधुरस्वराः ५१ वि
मानगामिनश्चात्रदृश्यंतेबहवोंऽबरे ॥ ततोऽपश्यंवसूनरुद्रान्साध्यांश्चसमरुद्गणान् ५२ आदित्यानश्विनौचैवतान्सर्वान्प्रत्यपूजयम् ॥ तेमांवीर्येणयशसातेज
साचबलेनच ५३ अस्त्रैश्चाप्यन्वजानंतसंग्रामेविजयेनच ॥ प्रविश्यतांपुरींदिव्यांदेवगंधर्वपूजिताम् ५४ देवराजंसहस्राक्षमुपातिष्ठंकृतांजलिः ॥ ददावर्धासनं
प्रीतःशक्रोमेददतांवरः ५५ बहुमानाच्चगात्राणिपस्पर्शममवासवः ॥ तत्राहंदेवगंधर्वैःसहितोभूरिदक्षिणैः ५६ अस्त्रार्थमवसंस्वर्गेशिक्षाणोऽस्त्राणिभारत ॥
विश्वावसोश्चवैपुत्रश्चित्रसेनोऽभवत्सखा ५७ सचगांधर्वमखिलंग्राहयामासमांनृप ॥ तत्राहमवसंराजनगृहीतास्त्रःसुपूजितः ५८ सुखंशक्रस्यभवनेसर्वकामसम
न्वितः ॥ शृण्वन्वैगीतशब्दंचतूर्यशब्दंचपुष्कलम् ॥ पश्यंश्चाप्सरसःश्रेष्ठानृत्यंतीर्भरतर्षभ ५९
समाहारबहुत्वं वा बहुसमुदायाभिप्रायेण ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३ अन्वजानंत वीर्यादिमान्भवेत्याशीर्वादान्ददुरित्यर्थः ५४ । ५५ । ५६ । ५७ । ५८ । ५९

तत्सर्वमिति अनवज्ञायादृत्यादरपूर्वकं तथ्यंयथावदस्त्यर्थंपुरुषार्थइतिविज्ञाय प्रतिगृह्यरागशून्येनमनसांऽगीकृत्याप्यहमस्त्रेष्वेवव्यवस्थितोऽभूवं नगीतादिषु ६० तेनकामेनाऽस्त्रेच्छयानतुभोगे
च्छया ६१ । ६२ । ६३ । ३४ । ६५ । ६६ पंचभिः प्रयोगादिभिः आवृत्तिः पुनःपुनःप्रयोगोपसंहारौ ६७ प्रायश्चित्तमस्त्राग्निनादग्धानामनागसांपुनरुज्जीवनं प्रतीघातं परास्त्रेणाभिभूतस्य
तत्सर्वमनवज्ञायतथ्यंविज्ञायभारत ॥ अत्यर्थंप्रतिगृह्याहमस्त्रेष्वेवव्यवस्थितः ६० ततोऽतुष्यत्सहस्राक्षस्तेनकामेनमेविभुः ॥ एवंमेवसतोराजन्नेषकालोऽत्य
गाद्दिवि ६१ कृतास्त्रमतिविश्वस्तमथमांहरिवाहनः ॥ संस्पृश्यमूर्ध्निपाणिभ्यामिदंवचनमब्रवीत् ६२ नत्वमद्ययुधाजेतुंशक्यःसुरगणैरपि ॥ किंपुनर्मानुषेलो
केमानुषैरकृतात्मभिः ६३ अप्रमेयोऽप्रधृष्यश्चयुद्धेष्वप्रतिमस्तथा ॥ अथाब्रवीत्पुनर्देवःसंप्रहृष्टतनूरुहः ६४ अस्त्रयुद्धेसमोवीरनतेकश्चिद्भविष्यति ॥ अप्रम
त्तःसदादक्षःसत्यवादीजितेंद्रियः ६५ ब्रह्मण्यश्चास्त्रविच्चासिशूरश्चासिकुरूद्वह ॥ अस्त्राणिसमवाप्तानित्वयादशचपंचच ६६ पंचभिर्विधिभिःपार्थविद्यतेनत्व
यासमः ॥ प्रयोगमुपसंहारमावृत्तिंचधनंजय ६७ प्रायश्चित्तंचवेत्थत्वंप्रतीघातंचसर्वशः ॥ ततोगुर्वर्थकालोऽयंसमुत्पन्नःपरंतप ६८ प्रतिजानीष्वतंकर्तुंततो
वेत्स्याम्यहंपरम् ॥ ततोऽहमब्रुवंराजन्देवराजमिदंवचः ६९ विषह्यंयन्मयाकर्तुंकृतमेवनिबोधतत् ॥ ततोमामब्रवीद्राजन्प्रहसन्बलवृत्रहा ७० नाविषह्यंतवा
द्यास्तित्रिषुलोकेषुकिंचन ॥ निवातकवचानामदानवाममशत्रवः ७१ समुद्रकुक्षिमाश्रित्यदुर्गेप्रतिवसंत्युत ॥ तिस्रःकोट्यःसमाख्यातास्तुल्यरूपबलप्रभाः
७२ तांस्तत्रजहिकौंतेयगुर्वर्थस्तेभविष्यति ॥ ततोमातलिसंयुक्तंमयूरसमरोमभिः ७३ हयैरुपेतंप्रादान्मेरथंदिव्यंमहाप्रभम् ॥ बबंधचैवमेमूर्ध्निकिरीटमिदमु
त्तमम् ७४ स्वरूपसदृशंचैवप्रादादंगविभूषणम् ॥ अभेद्यंकवचंचेदंस्पर्शरूपवदुत्तमम् ७५ अजरांज्यामिमांचापिगांडीवेसमयोजयत् ॥ ततःप्रायामहंतेन
स्यंदनेनविराजता ७६ येनाजयद्देवपतिर्बलिंवैरोचनिंपुरा ॥ ततोदेवाःसर्वएवतेनघोषेणबोधिताः ७७ मन्वानादेवराजंमांसमाजग्मुर्विशांपते ॥ दृष्ट्वाचमा
मपृच्छंतकिंकरिष्यसिफाल्गुन ७८ तानब्रुवंयथाभूतमिदंकर्ताऽस्मिसंयुगे ॥ निवातकवचानांतुप्रस्थितंमांवधैषिणम् ७९ निबोधतमहाभागाःशिवंचाशास्त
मेऽनघाः ॥ तुष्टुवुर्मांप्रसन्नास्तेयथादेवंपुरंदरम् ८० रथेनानेनमघवाजितवान्शंबरंयुधि ॥ नमुचिंबलवृत्रौचप्रह्लादनरकावपि ८१ बहूनिचसहस्राणिप्रयुता
न्यर्बुदान्यपि ॥ रथेनानेनदैत्यानांजितवान्मघवायुधि ८२ त्वमप्यनेनकौंतेयनिवातकवचान्रणे ॥ विजेतायुधिविक्रम्यपुरेवमघवावशी ८३ अयंचशंखप्रव
रोयेनजेताऽसिदानवान् ॥ अनेनविजितालोकाःशक्रेणापिमहात्मना ८४ प्रदीयमानंदेवैस्तंदेवदत्तंजलोद्भवम् ॥ प्रत्यगृह्णंजयायैनंस्तूयमानस्तदाऽमरैः ८५
सशंखीकवचीबाणीप्रगृहीतशरासनः ॥ दानवालयमत्युग्रंप्रयातोऽस्मियुयुत्सया ८६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनिवातकवचयुद्धपर्वणिअर्जुनवाक्ये
अष्टषष्ट्यधिकशततमोऽध्यायः ॥१६८॥ स्वास्त्रस्योद्दीपनं । गुर्वर्थो दक्षिणा ६८ वेत्स्यामिवेदयिष्यामि परंकार्यमितिशेषः ६९ विषह्यंशक्यं ७० । ७१ । ७२ । ७३ । ७४ । ७५
प्रायांप्रयाणंकृतवान् ७६ । ७७ । ७८ । ७९ आशास्त आशाध्वं ८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ इत्यार०पर्वणिनीलकंठीये भा०भा०अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

ततोऽहमिति १ । २ तिमिर्मत्स्यस्तंगिलतिमहामत्स्यस्तिमिंगिलः तमपिगिलतीतितिमितिमिंगिलः तिमिरिवगिलनीयस्तिमिंगिलोयस्येतिविग्रहः ३ । ४ । ५ घूर्णतेभ्रमति ६ निपत्यग
त्वापृथिवीतलेपाताले ७ आलक्ष्यसर्वसंपदुपेतमितिशेषः आश्लिष्येतिपाठेभूमाववतीर्य निम्नस्थं रथचक्रंदृढमाश्लिष्य उन्नीतवानित्यर्थः । प्राद्रव त्प्रकर्षेणवेगवानभूत् ८ । ९ । १० । ११ । १२

अर्जुनउवाच ॥ ततोऽहंस्तूयमानस्तुतत्रतत्रमहर्षिभिः ॥ अपश्यमुदधिंभीममपांपतिमथाव्ययम् १ फेनवत्यःप्रकीर्णाश्चसंहताश्चसमुत्थिताः ॥ ऊर्मयश्चात्र
दृश्यंतेवल्गंतइवपर्वताः २ नावःसहस्रशस्तत्ररत्नपूर्णाःसमंततः ॥ तिमिंगिलाःकच्छपाश्चतथातिमितिमिंगिलाः ३ मकराश्चात्रदृश्यंतेजलेमग्नाइवाद्रयः ॥
शंखानांचसहस्राणिमग्नान्यप्सुसमंततः ४ दृश्यंतेस्मयथारात्रौतारास्तन्वभ्रसंवृताः ॥ तथासहस्रशस्तत्ररत्नसंघाःप्लवंत्युत ५ वायुश्चघूर्णतेभीमस्तदद्भुतमि
वाभवत् ॥ तमुदीक्ष्यमहावेगंसर्वांभोनिधिमुत्तमम् ६ अपश्यंदानवाकीर्णंतद्दैत्यपुरमंतिकात् ॥ तत्रैवमातलिस्तूर्णंनिपत्यपृथिवीतले ७ रथंतंतुसमालक्ष्यप्रा
द्रवद्रथयोगवित् ॥ त्रासयन्रथघोषेणतत्पुरंसमुपाद्रवत् ८ रथघोषंतुतंश्रुत्वास्तनयित्नोरिवांबरे ॥ मन्वानादेवराजंमामाविग्नादानवाऽभवन् ९ सर्वेसंभ्रांतम
नसःशरचापधराःस्थिताः ॥ तथाऽसिशूलपरशुगदामुसलपाणयः १० ततोद्वाराणिपिदधुर्दानवास्त्रस्तचेतसः ॥ संविधायपुरेरक्षांनस्मकश्चनदृश्यते ११ त
तःशंखमुपादायदेवदत्तंमहास्वनम् ॥ परमांमुदमाश्रित्यप्राधमंतंशनैरहम् १२ सतुशब्दोदिवंस्तब्ध्वाप्रतिशब्दमजीजनत् ॥ वित्रेसुश्चनिलिल्युश्चभूतानि
सुमहांत्यपि १३ ततोनिवातकवचाःसर्वएवस्वलंकृताः ॥ दंशिताविविधैस्त्राणैर्विचित्रायुधपाणयः १४ आयसैश्चमहाशूलैर्गदाभिर्मुसलैरपि ॥ पट्टिशैःकरवालै
श्चरथचक्रैश्चभारत १५ शतघ्नीभिर्भुशुंडीभिःखड्गैश्चित्रैःस्वलंकृतैः ॥ प्रगृहीतैर्दितेःपुत्राःप्रादुरासन्सहस्रशः १६ ततोविचार्यबहुशोरथमार्गेषुतान्हयान् ॥ प्रा
चोदयत्समेदेशेमातलिर्भरतर्षभ १७ तेनतेषांप्रणुन्नानामाशुत्वाच्छीघ्रगामिनाम् ॥ नान्वपश्यंतदाकिंचित्तन्मेऽद्भुतमिवाभवत् १८ ततस्तेदानवास्तत्रवादि
त्राणिसहस्रशः ॥ विकृतस्वररूपाणिभृशंसर्वाण्यनादयन् १९ तेनशब्देनसहसासमुद्रेपर्वतोपमाः ॥ आप्लवंतगतैःसत्वैर्मत्स्याःशतसहस्रशः २० ततोवेगेनम
हतादानवामामुपाद्रवन् ॥ विमुंचंतःशितान्बाणान्शतशोऽथसहस्रशः २१ ससंप्रहारस्तुमुलस्तेषांचममभारत ॥ अवर्ततमहाघोरोनिवातकवचांतकः २२ त
तोदेवर्षयश्चैवदानवर्षिगणाश्चये ॥ ब्रह्मर्षयश्चसिद्धाश्चसमाजग्मुर्महामृधे २३ तेवैमामनुरूपाभिर्मधुराभिर्जयैषिणः ॥ अस्तुवन्मुनयोवाग्भिर्यथेंद्रंतारकामये
२४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनिवातकवचयुद्धपर्वणियुद्धारंभेऊनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥ ॥ अर्जुनउवाच ॥ ततोनिवात
कवचाःसर्वेवेगेनभारत ॥ अभ्यद्रवन्मांसहिताःप्रगृहीतायुधारणे १ आच्छाद्यरथपंथानमुत्क्रोशंतोमहारथाः ॥ आवृत्यसर्वतस्तेमांशरवर्षैरवाकिरन् २

१२ दिवंस्तब्ध्वाआकाशंव्याप्य १३ दंशिताःसन्नद्धाः त्राणैः कवचैः १४ । १५ । १६ । १७ । १८ । १९ आप्लवंतपलायनंकृतवंतः गतैः सत्वैर्वेगवाभिर्बुद्धिभिरुपलक्षिता भ्रांताइत्यर्थः
२० । २१ । २२ । २३ तारकामयेतारार्थेसंग्रामे २४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे ऊनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥ ॥ ततइति १ । २

३ । ४ । ५ । ६ । ७ । ८ शताःशतानिअयुतमित्यर्थः हरयोऽश्वाः शांताःपरीक्षिताः । शमेरालोचनार्थात्निष्ठा ९ । १० । ११ । १२ । १३ चिच्छेदअहमितिशेषः । परोक्षार्थेलिट् प्रयोगेणा
जानतैवमयाएतत्कृतमितिशत्रूणामत्यंतापकर्षःसूचितः १४ । १५ । १६ अस्माभिः पूजायांबहुत्वं अश्वाद्यपेक्षयावा १७ लघुभिःशीघ्रगैः १८ । १९ तिग्मतेजसं तीक्ष्णंदाहकं माधवंनाम

ततोपरेमहावीर्याःशूलपट्टिशपाणयः ॥ शूलानिचभुशुंडीश्चमुमुचुर्दानवामयि ३ तच्छूलवर्षंसुमहद्गदाशक्तिसमाकुलम् ॥ अनिशंसृज्यमानंतैरपतन्मद्रथोपरि ४
अन्येमामभ्यधावंतनिवातकवचायुधि ॥ जितशस्त्रायुधारौद्राःकालरूपाःप्रहारिणः ५ तानहंविविधैर्बाणैर्वेगवद्भिरजिह्मगैः ॥ गांडीवमुक्तैरभ्यघ्नमेकैकंदशभिर्मृ
धे ६ तेकृताविमुखाःसर्वेमत्प्रयुक्तैःशिलाशितैः ॥ ततोमातलिनातूर्णंहयास्तेसंप्रचोदिताः ७ मार्गान्बहुविधांस्तत्रविचेरुर्वाततरंहसः ॥ सुसंयतामातलिनाप्रा
मथ्नंतदितेःसुतान् ८ शतंशतास्तेहरयस्तस्मिन्युक्तामहारथे ॥ शांतामातलिनायत्ताव्यचरन्नल्पकाइव ९ तेषांचरणपातेनरथनेमिस्वनेनच ॥ ममबाणनि
पातैश्चहतास्तेशतशोऽसुराः १० गतासवस्तथैवान्येप्रगृहीतशरासनाः ॥ हतसारथयस्तत्रव्यकृष्यंततुरंगमैः ११ तेदिशोविदिशःसर्वेप्रतिरुध्यप्रहारिणः ॥
अभ्यघ्नन्विविधैःशस्त्रैस्ततोमेव्यथितंमनः १२ ततोऽहंमातलेर्वीर्यमपश्यंपरमाद्भुतम् ॥ अश्वांस्तथावेगवतोयदयत्नादधारयत् १३ ततोऽहंलघुभिश्चित्रैरस्त्रै
स्तानसुरान्रणे ॥ चिच्छेदसायुधान्राजञ्छतशोऽथसहस्रशः १४ एवंमेचरतस्तत्रसर्वयत्नेनशत्रुहन् ॥ प्रीतिमानभवद्वीरोमातलिःशक्रसारथिः १५ वध्यमा
नास्ततस्तैस्तुहयैस्तेनरथेनच ॥ अगमन्प्रक्षयंकेचिन्न्यवर्तंततथापरे १६ स्पर्धमानाइवास्माभिर्निवातकवचारणे ॥ शरवर्षैःशरार्तंमांमहद्भिःप्रत्यवारयन्
१७ ततोऽहंलघुभिश्चित्रैर्ब्रह्मास्त्रपरिमंत्रितैः ॥ व्यधमंसायकैराशुशतशोऽथसहस्रशः १८ ततःसंपीड्यमानास्तेक्रोधाविष्टामहारथाः ॥ अपीडयन्मांसहिताःश
क्तिशूलासिवृष्टिभिः १९ ततोऽहमस्त्रमातिष्ठंपरमंतिग्मतेजसम् ॥ दयितंदेवराजस्यमाधवंनामभारत२०ततःखड्गत्रिशूलेनतोमरांश्चसहस्रशः ॥ अस्त्रवीर्येणश
तधातैर्मुक्तानहमच्छिदम् २१ छित्वाप्रहरणान्येषांततस्तानपिसर्वशः ॥ प्रत्यविध्यमहंरोषाद्दशभिर्दशभिःशरैः २२ गांडीवाद्धितदासंख्येयथाभ्रमरपंक्तयः ॥
निष्पतंतिमहाबाणास्तन्मातलिरपूजयत् २३ तेषामपितुबाणास्तेतन्मातलिरपूजयत् ॥ अवाकिरन्मांबलवत्तानहंव्यधमंशरैः २४ वध्यमानास्ततस्तेतुनि
वातकवचाःपुनः ॥ शरवर्षैर्महद्भिर्मांसमंतात्पर्यवारयन् २५ शरवेगान्निहत्याहमस्त्रैरस्त्रविघातिभिः ॥ ज्वलद्भिःपरमैःशीघ्रैस्तानविध्यंसहस्रशः २६ तेषांछिन्ना
निगात्राणिविसृजंतिस्मशोणितम् ॥ प्रावृषीवाभिवृष्टानिशृंगाण्यथधराभृताम् २७ इंद्राशनिसमस्पर्शैर्वेगवद्भिरजिह्मगैः ॥ मद्बाणैर्वध्यमानास्तेसमुद्विग्नाःस्मदा
नवाः २८ शतधाभिन्नदेहास्तेक्षीणप्रहरणौजसः ॥ ततोनिवातकवचामामयुध्यंतमायया २९ ॥इतिश्रीम०आ०प०नि०सप्तत्यधिकशततमोऽध्यायः ॥१७०॥

मधोर्दैत्यस्यवधार्थंनिर्मितत्वात् २० ततोमाधवास्त्रादुत्पन्नेनखड्गसहितेनत्रिशूलेन । खड्गांश्चशूलांश्चेतिपाठे शरीरैरित्युत्तरश्लोकादपकर्षणीयं २१ । २२ । २३ तेषांतेबाणामामवाकिरन्नि
तिसंबंधः तदपिमातलिरपूजयत् २४ । २५ । २६ । २७ । २८ । २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ॥ ७ ॥

ततोऽश्मंति नगमात्रैर्वृक्षप्रमाणैः १ । २ पावकप्रकरावह्निराशयः ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८

॥ अर्जुनउवाच ॥ ततोऽश्मवर्षंसुमहत्प्रादुरासीत्समंततः ॥ नगमात्रैःशिलाखंडैस्तन्मांदृढमपीडयत् १ तदहंवज्रसंकाशैर्महेंद्रास्त्रप्रचोदितैः ॥ अचूर्णयंवेगव
द्भिःशरजालैर्महाहवे २ चूर्ण्यमानेऽश्मवर्षेतुपावकःसमजायत ॥ तत्राश्मचूर्णान्यपतन्पावकप्रकराइव ३ ततोऽश्मवर्षेविहतेजलवर्षंमहत्तरम् ॥ धाराभिरक्ष
मात्राभिःप्रादुरासीन्ममांतिके ४ नभसःप्रच्युताधारास्तिग्मवीर्याःसहस्रशः ॥ आवृण्वन्सर्वतोव्योमदिशश्चोपदिशस्तथा ५ धाराणांचनिपातेनवायोर्विस्फू
र्जितेनच ॥ गर्जितेनचदैत्यानांनप्राज्ञायतकिंचन ६ धारादिविचसंबद्धावसुधायांचसर्वशः ॥ व्यामोहयंतमांतत्रनिपतंत्योऽनिशंभुवि ७ तत्रोपदिष्टमिंद्रेणदि
व्यमस्त्रंविशोषणम् ॥ दीप्तंप्राहिणवंघोरमशुष्यत्तेनतज्जलम् ८ हतेऽश्मवर्षेचमयाजलवर्षेचशोषिते ॥ मुमुचुर्दानवामायामग्निंवायुंचभारत ९ ततोहमग्निंव्यधमं
सलिलास्त्रेणसर्वशः ॥ शैलेनचमहास्त्रेणवायोर्वेगमधारयम् १० तस्यांप्रतिहतायांतेदानवायुद्धदुर्मदाः ॥ प्राकुर्वन्विविधामायायौगपद्येनभारत ११ ततोवर्षं
प्रादुरभूत्सुमहल्लोमहर्षणम् ॥ अस्त्राणांघोररूपाणामग्नेर्वायोस्तथाऽश्मनाम् १२ सातुमायामयीवृष्टिःपीडयामासमांयुधि ॥ अथघोरंतमस्तीव्रंप्रादुरासीत्सम
ततः १३ तमसासंवृतेलोकेघोरेणपरुषेणच ॥ हरयोविमुखाश्चासन्प्रास्खलच्चापिमातलिः १४ हस्ताद्धिरण्मयश्चास्यप्रतोदःप्रापतद्भुवि ॥ असकृच्चाहमां
भीतःक्वासीतिभरतर्षभ १५ मांचभीराविशत्तीव्रातस्मिन्विगतचेतसि ॥ सचमांविगतज्ञानःसंत्रस्तमिदमब्रवीत् १६ सुराणामसुराणांचसंग्रामःसुमहानभूत् ॥
अमृतार्थंपुरापार्थसचदृष्टोमयाऽनघ १७ शंबरस्यवधेघोरःसंग्रामःसुमहानभूत् ॥ सारथ्यंदेवराजस्यतत्रापिकृतवानहम् १८ तथैववृत्रस्यवधेसंगृहीताहयाम
या ॥ वैरोचनेर्महायुद्धंदृष्टंचापिसुदारुणम् १९ एतेमयामहाघोराःसंग्रामाःपर्युपासिताः ॥ नचापिविगतज्ञानोभूतपूर्वोऽस्मिपांडव २० पितामहेनसंहारः
प्रजानांविहितोध्रुवम् ॥ नहियुद्धमिदंयुक्तमन्यत्रजगतःक्षयात् २१ तस्यतद्वचनंश्रुत्वासंस्तभ्यात्मानमात्मना ॥ मोहयिष्यन्दानवानामहंमायाबलंमहत् २२
अब्रुवंमातलिंभीतंपश्यमेभुजयोर्बलम् ॥ अस्त्राणांचप्रभावंवैधनुषोगांडिवस्यच २३ अद्यास्त्रमाययैतेषांमायामेतांसुदारुणाम् ॥ विनिहन्मितमश्चोग्रंमाभैःसू
तस्थिरोभव २४ एवमुक्त्वाऽहमसृजमस्त्रमायांनराधिप ॥ मोहनींसर्वभूतानांहितायत्रिदिवौकसाम् २५ पीड्यमानासुमायासुतासुतास्वसुरोत्तमाः ॥ पुनर्ब
हुविधामायाःप्राकुर्वन्नमितौजसः २६ पुनःप्रकाशमभवत्तमसाग्रस्यतेपुनः ॥ भवत्यदर्शनोलोकःपुनरप्सुनिमज्जति २७ सुसंगृहीतैर्हरिभिःप्रकाशेसतिमा
तलिः ॥ व्यचरत्स्यंदनाग्र्येणसंग्रामेलोमहर्षणे २८ ततःपर्यपतन्नुग्रानिवातकवचामयि ॥ तानहंविवरंदृष्ट्वाप्राहिणवंयमसादनम् २९

वैरोचनेर्बलेः १९ । २० । २१ । २२ । २३ । २४ । २५ मोहनास्त्रेणपीड्यमानासुनश्यमानासु २६ । २७ । २८ । २९

३० ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेएकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ ॥ अदृश्यमानाइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ हरीन्अत्यंतंहरणशीलान्

वर्तमानेतथायुद्धेनिवातकवचांतके ॥ नापश्यंसहसासर्वान्दानवान्माययावृतान् ३० ॥ इतिश्रीमहाभारतेआरण्यकेप० निवातकवचयुद्धप० मायायुद्धेएक
सप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ ॥ ७ ॥ ॥ अर्जुनउवाच ॥ अदृश्यमानास्तेदैत्यायोधयंतिस्ममायया ॥ अदृश्येनास्त्रवीर्येणतानप्यहमयो
धयम् १ गांडीवमुक्ताविशिखाःसम्यगस्त्रप्रचोदिताः ॥ अच्छिदन्नुत्तमांगानियत्रयत्रस्मतेऽभवन् २ ततोनिवातकवचावध्यमानामयायुधि ॥ संहृत्यमायांस
हसाप्राविशन्पुरमात्मनः ३ व्यपयातेषुदैत्येषुप्रादुर्भूतेचदर्शने ॥ अपश्यंदानवांस्तत्रहतान्शतसहस्रशः ४ विनिष्पिष्टानितत्रैषांशस्त्राण्याभरणानिच ॥ श
तशःस्मप्रदृश्यंतेगात्राणिकवचानिच ५ हयानांनांतरंह्यासीत्पदाद्विचलितुंपदम् ॥ उत्पत्यसहसातस्थुरंतरिक्षगमास्ततः ६ ततोनिवातकवचाव्योमसंछा
द्यकेवलम् ॥ अदृश्याह्यत्यवर्ततविसृजंतःशिलोच्चयान् ७ अंतर्भूमिगताश्चान्येहयानांचरणान्यथ ॥ व्यगृण्हन्दानवाघोरारथचक्रेचभारत ८ विनिगृह्यहरी
नश्वान्रथंचममयुध्यतः ॥ सर्वतोमामविध्यंतसरथंधरणीधरैः ९ पर्वतैरुपचीयद्भिःपतमानैस्तथाऽपरैः ॥ सदेशोयत्रवर्तामगुहेवसमपद्यत १० पर्वतैश्छा
द्यमानोऽहंनिगृहीतैश्चवाजिभिः ॥ अगच्छंपरमामार्तिंमातलिस्तदलक्षयत् ११ लक्षयित्वाचमांभीतमिदंवचनमब्रवीत् ॥ अर्जुनार्जुनमाभैस्त्वंवज्रमस्त्रमुदी
रय १२ ततोऽहंतस्यतद्वाक्यंश्रुत्वावज्रमुदीरयम् ॥ देवराजस्यदयितंभीममस्त्रंनराधिप १३ अचलंस्थानमासाद्यगांडीवमनुमंत्र्यच ॥ अमुंचंवज्रसंस्पर्शा
नायसान्निशितान्शरान् १४ ततोमायाश्चताःसर्वानिवातकवचांश्चतान् ॥ तेवज्रचोदिताबाणावज्रभूताःसमाविशन् १५ तेवज्रवेगविहतादानवाःपर्वतोपमाः ॥
इतरेतरमाश्लिष्यन्यपतन्पृथिवीतले १६ अंतर्भूमौचयेऽगृण्हन्दानवारथवाजिनः ॥ अनुप्रविश्यतान्बाणाःप्राहिण्वन्यमसादनम् १७ हतैर्निवातकवचैर्निर
स्तैःपर्वतोपमैः ॥ समाच्छाद्यतदेशःसविकीर्णैरिवपर्वतैः १८ नहयानांक्षतिःकाचिन्नरथस्यनमातलेः ॥ ममचादृश्यततदातदद्भुतमिवाभवत् १९ ततोमांप्र
हसन्राजन्मातलिःप्रत्यभाषत ॥ नैतदर्जुनदेवेषुत्वयिवीर्यंयदीक्ष्यते २० हतेष्वसुरसंघेषुदारास्तेषांतुसर्वशः ॥ प्राक्रोशन्नगरेतस्मिन्यथाशरदिसारसाः २१
ततोमातलिनासार्धमहंतत्पुरमभ्ययाम् ॥ त्रासयन्रथघोषेणनिवातकवचस्त्रियः २२ तान्दृष्ट्वादशसाहस्रान्मयूरसदृशान्हयान् ॥ रथंचरविसंकाशंप्राद्रवन्ग
णशःस्त्रियः २३ ताभिराभरणैःशब्दस्त्रासिताभिःसमीरितः ॥ शिलानामिवशैलेषुपततीनामभूत्तदा २४ वित्रस्तादैत्यनार्यस्ताःस्वानिवेश्मान्यथाविशन् ॥
बहुरत्नविचित्राणिशातकुंभमयानिच २५ तदद्भुताकारमहंदृष्ट्वानगरमुत्तमम् ॥ विशिष्टंदेवनगरादपृच्छंमातलिंततः २६

अविध्यंतव्याप्तवंतः अचिन्वंतेतिपाठेऽपिसएवार्थः ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९।२० सारसाहंसाः । लक्ष्मणाइतिपाठेसारस्यः २१।२२।२३।२४।२५।२६

 नश्रावासयंतिनाध्यासंते २७ । २८ । २९ अंतंनाशंनिवातकवचानामितिशेषः ३० । ३१ । ३२ । ३३ । ३४ प्रशाम्यप्रकर्षेणआलोच्य ३५ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारत
इदमेवंविधंकस्माद्देवानावासयंत्युत ॥ पुरंदरपुराद्धीदंविशिष्टमितिलक्षये २७ ॥ मातलिरुवाच ॥ आसीदिदंपुरापार्थदेवराजस्यनःपुरम् ॥ ततोनिवातक
 वचैरितःप्रच्याविताःसुराः २८ तपस्तप्त्वामहत्तीव्रंप्रसाद्यचपितामहम् ॥ इदंवृतंनिवासायदेवेभ्यश्चाभयंयुधि २९ ततःशक्रेणभगवान्स्वयंभूरितिचोदितः ॥
विधत्तांभगवानंतमात्मनोहितकाम्यया ३० ततउक्तोभगवतादिष्टमत्रेतिभारत ॥ भवितांऽतस्त्वमप्येषांदेहेनान्येनशत्रुहन् ३१ ततएषांवधार्थायशक्रोऽस्त्रा
णिददौतव ॥ नहिशक्याःसुरैर्हंतुंयएतेनिहतास्त्वया ३२ कालस्यपरिणामेनततस्त्वमिहभारत ॥ एषामंतकरःप्राप्तस्तत्त्वयाचकृतंतथा ३३ दानवानांवि
नाशायअस्त्राणांपरमंबलम् ॥ ग्राहितस्त्वंमहेंद्रेणपुरुषेंद्रतदुत्तमम् ३४ ॥ अर्जुनउवाच ॥ ततःप्रशाम्यनगरंदानवांश्चनिहत्यतान् ॥ पुनर्मातालिनासार्धम
गच्छंदेवसद्मतत् ३५ ॥ इतिश्रीमहाभारतेआरण्यकेप०निवातकवचयुद्धप०निवातक०युद्धे द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ ॥ ध ॥ ॥
अर्जुनउवाच ॥ निवर्तमानेनमयामहद्दृष्टंततोऽपरम् ॥ पुरंकामचरंदिव्यंपावकार्कसमप्रभम् १ रत्नद्रुममयैश्चित्रैःसुस्वरैश्चपतत्रिभिः ॥ पौलोमैःकालकंजैश्चनि
त्यहृष्टैरधिष्ठितम् २ गोपुराट्टालकोपेतंचतुर्द्वारंदुरासदम् ॥ सर्वरत्नमयंदिव्यमद्भुतोपमदर्शनम् ३ द्रुमैःपुष्पफलोपेतैःसर्वरत्नमयैर्वृतम् ॥ तथापतत्रिभिर्दिव्यै
रुपेतंसुमनोहरैः ४ असुरैर्नित्यमुदितैःशूलर्ष्टिमुसलायुधैः ॥ चापमुद्गरहस्तैश्चस्रग्विभिःसर्वतोवृतम् ५ तदहंप्रेक्ष्यदैत्यानांपुरमद्भुतदर्शनम् ॥ अपृच्छंमात
लिंराजन्किमिदंवर्ततेऽद्भुतम् ६ ॥ मातलिरुवाच ॥ पुलोमानामदैतेयीकालकाचमहासुरी ॥ दिव्यंवर्षसहस्रंतेचेरतुःपरमंतपः ७ तपसोंतेततस्ताभ्यांस्व
यंभूरददद्वरम् ॥ अगृह्णीतांवरंतेतुसुतानामल्पदुःखताम् ८ अवध्यतांचराजेंद्रसुरराक्षसपन्नगैः ॥ पुरंसुरमणीयंचखचरंसुमहाप्रभम् ९ सर्वरत्नैःसमुदितं
दुर्धर्षममरैरपि ॥ महर्षियक्षगंधर्वपन्नगासुरराक्षसैः १० सर्वकामगुणोपेतंवीतशोकमनामयम् ॥ ब्रह्मणाभरतश्रेष्ठकालकेयकृतेकृतम् ११ तदेतत्खपुरंदिव्यंच
रत्यमरवर्जितम् ॥ पौलोमाध्युषितंवीरकालकंजैश्चदानवैः १२ हिरण्यपुरमित्येवंख्यायतेनगरंमहत् ॥ रक्षितंकालकेयैश्चपौलोमैश्चमहासुरैः १३ तएतेमु
दिताराजन्नवध्याःसर्वदैवतैः ॥ निवसंत्यत्रराजेंद्रगतोद्वेगानिरुत्सुकाः १४ मानुषान्मृत्युरेतेषांनिर्दिष्टोब्रह्मणापुरा ॥ एतानापिरणेपार्थकालकंजान्दुरासदान् ॥
वज्रास्त्रेणनयस्वाशुविनाशंसुमहाबलान् १५ ॥ अर्जुनउवाच ॥ सुरासुरैरवध्यंतदहंज्ञात्वाविशांपते ॥ अब्रुवंमातलिंहृष्टोयाह्येतत्पुरमंजसा १६ त्रिदशेशद्विषो
यावत्क्षयमस्त्रैर्नयाम्यहम् ॥ नकथंचिद्धिमेपापानवध्यायेसुरद्विषः १७ उवाहमांततःशीघ्रंहिरण्यपुरमंतिकात् ॥ रथेनतेनदिव्येनहरियुक्तेनमातलिः १८
भारतभावदीपेद्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥ ॥ ध ॥ ॥ ध ॥ ॥ ध ॥ ॥ निवर्तमानेनेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९
१० । ११ खपुरंखचरत्वात् १२ । १३ । १४ । १५ । १६ नवध्याइतिनअपितुवध्याएव १७ । १९

१९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ व्यगृह्णं विशेषेणगृहीतवान् बाणवृष्ट्याऽरुद्धवानित्यर्थः २९ । ३० । ३१ आरुह्यगगनमुत्पत्य अन्तरदवतीर्णः पाठांतरेमा
तलिमारुह्यआलंब्यमहीमवतरं अवतीर्णोऽभवमितिशेषः ३२ पर्यवर्तंतपरित्यार्य अवर्तंत मार्गैराजितैर्भ्रमपन्नशोभितैः ३३ युद्धेनिमित्तेसतिसंन्यवर्तंत इयेत्वयमितिशेषः युद्धेनजेतुमितिशेषः
तेमामालक्ष्यदैतेयाविचित्राभरणांबराः ॥ समुत्पेतुर्महावेगारथानास्थायदंशिताः १९ ततोनालीकनाराचैर्भल्लैःशक्त्यृष्टितोमरैः ॥ प्रत्यघ्नन्दानवेंद्रामांक्रुद्धा
स्तीव्रपराक्रमाः २० तदहंशरवर्षेणमहताप्रत्यवारयं ॥ शस्त्रवर्षंमहद्राजन्विद्याबलमुपाश्रितः २१ व्यामोहयंचतान्सर्वान्रथमार्गैश्चरन्रणे ॥ तेऽन्योन्यम
भिसंमूढाःपातयंतिस्मदानवान् २२ तेषामेवंविमूढानामन्योन्यमभिधावताम् ॥ शिरांसिविशिखैर्दीप्तैर्न्यहनंशतसंघशः २३ तेवध्यमानादैतेयाःपुरमास्था
यतत्पुनः ॥ खमुत्पेतुःसनगरामायामास्थायदानवीं २४ ततोऽहंशरवर्षेणमहताकुरुनंदन ॥ मार्गमावृत्यदैत्यानांगतिंचैषामवारयम् २५ तत्पुरंखचरंदिव्यं
कामगंसूर्यसप्रभं ॥ दैतेयैर्वरदानेनधार्यतेस्मयथासुखम् २६ अंतर्भूमौनिपततिपुनरूर्ध्वंप्रतिष्ठते ॥ पुनस्तिर्यक्प्रयात्याशुपुनरप्सुनिमज्जति २७ अम
रावतिसंकाशंतत्पुरंकामगंमहत् ॥ अहमस्त्रैर्बहुविधैःप्रत्यगृह्णंपरंतप २८ ततोऽहंशरजालेनदिव्यास्त्रमुदितेनच ॥ व्यगृह्णंसहदैतेयैस्तत्पुरंपुरुषर्षभ २९ वि
क्षतंचायसैर्बाणैर्मत्प्रयुक्तैरजिह्मगैः ॥ महीमभ्यपतद्राजन्प्रभग्नंपुरमासुरम् ३० तेवध्यमानामद्बाणैर्वज्रवेगैरयस्मयैः ॥ पर्यभ्रमंतवैराजन्नसुराःकालचोदिताः
३१ ततोमातलिरारुह्यपुरस्तान्निपतन्निव ॥ महीमवातरत्क्षिप्रंरथेनादित्यवर्चसा ३२ ततोरथसहस्राणिषष्टिस्तेषाममर्षिणाम् ॥ युयुत्सूनांमयासार्धंपर्य
वर्तंतभारत ॥ तान्यहंनिशितैर्बाणैर्व्यधमंगार्ध्रराजितैः ३३ तेयुद्धेसन्यवर्तंतसमुद्रस्ययथोर्मयः ॥ नेमेशक्यामानुषेणयुद्धेनेतिप्रचिंत्यतत् ३४ ततोऽहमानु
पूर्व्येणदिव्यान्यस्त्राण्ययोजयं ॥ ततस्तानिसहस्राणिरथिनांचित्रयोधिनाम् ३५ अस्त्राणिममदिव्यानिप्रत्यघ्नञ्छनकैरिव ॥ रथमार्गान्विचित्रांस्तेविचरंतो
महाबलाः ३६ प्रत्यदृश्यंतसंग्रामेशतशोऽथसहस्रशः ॥ विचित्रमुकुटापीडाविचित्रकवचध्वजाः ३७ विचित्राभरणाश्चैवनंदयंतीवमेमनः ॥ अहंतुशरवर्षैस्ता
नस्त्रप्रमुदितैरणे ३८ नाशक्नुवंपीडयितुंतेतुमांप्रत्यपीडयन् ॥ तैःपीड्यमानोबहुभिःकृतास्त्रैःकुशलैर्युधि ३९ व्यथितोऽस्मिमहायुद्धेभयंचागान्महन्मम ॥
ततोऽहंदेवदेवायरुद्रायप्रयतोरणे ४० स्वस्तिभूतेभ्यइत्युक्त्वामहास्त्रंसमचोदयम् ॥ यत्तद्रौद्रमितिख्यातंसर्वामित्रविनाशनम् ४१ ततोऽपश्यंत्रिशिरसंपु
रुषंनवलोचनम् ॥ त्रिमुखंषड्भुजंदीप्तमर्कज्वलनमूर्धजम् ४२ लेलिहानैर्महानागैःकृतचीरममित्रहम् ॥ विभीस्ततस्तदस्त्रंतुघोरंरौद्रंसनातनम् ४३ दृष्ट्वागांडी
वसंयोगमानीयभरतर्षभ ॥ नमस्कृत्वात्रिनेत्रायशर्वायामिततेजसे ४४ मुक्तवान्दानवेंद्राणांपराभावायभारत ॥ मुक्तमात्रेततस्तस्मिन्रूपाण्यासन्सहस्रशः ४५
३४ । ३५ । ३६ । ३७ अस्त्रप्रमुदितैः अस्त्राणांप्रमुदितंभरणं यदर्थंतैः । उडुपधाद्भावादिकर्मणोरितिभावेनिष्ठायाःकित्वं ३८ । ३९ । ४० । ४१ । ४२ कृतंपीडितं निग्रहीतं
चीरंवस्त्रंयेन ४३ । ४४ परामावाय अत्यंताभावाय ४५

४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ मांसमेदोवसास्थिभिः संयुक्तैरितिशेषः ५३ । ५४ निबर्हणैर्नाशकरैः ५५ । ५६ निशम्यदृष्ट्वा ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४

मृगाणामथसिंहानांव्याघ्राणांचविशांपते ॥ ऋक्षाणांमहिषाणांचपन्नगानांतथागवाम् ४६ शरभाणांगजानांचवानराणांचसंघशः ॥ ऋषभाणांवराहाणांमार्जा
राणांतथैवच ४७ शालावृकाणांप्रेतानांभुरुंडानांचसर्वशः ॥ गृध्राणांगरुडानांचचमराणांतथैवच ४८ देवानांचऋषीणांचगंधर्वाणांचसर्वशः ॥ पिशाचानां
सयक्षाणांतथैवचसुरद्विषाम् ४९ गुह्यकानांचसंग्रामेनैर्ऋतानांतथैवच ॥ झषाणांगजवक्राणामुलूकानांतथैवच ५० मीनवाजिसरूपाणांनानाशस्त्रासिपाणिनां ॥
तथैवयातुधानानांगदामुद्गरधारिणाम् ५१ एतैश्चान्यैश्चबहुभिर्नानारूपधरैस्तथा ॥ सर्वमासीज्जगद्व्याप्तंतस्मिन्नस्त्रेविसर्जिते ५२ त्रिशिरोभिश्चतुर्दंष्ट्रैश्चतुरा
स्यैश्चतुर्भुजैः ॥ अनेकरूपसंयुक्तैर्मांसमेदोवसास्थिभिः ५३ अभीक्ष्णंवध्यमानास्तेदानवानाशमागताः ॥ अर्कज्वलनतेजोभिर्वज्राशनिसमप्रभैः ५४ अद्रिसा
रमयैश्चान्यैर्बाणैरपिनिबर्हणैः ॥ न्यहनंदानवान्सर्वान्मुहूर्तेनैवभारत ५५ गांडीवास्त्रप्रणुन्नांस्तान्गतासून्नभसश्च्युतान् ॥ दृष्ट्वाऽहंप्राणमंभूयस्त्रिपुरघ्नायवेधसे ५६
तथारौद्रास्त्रनिष्पिष्टान्दिव्याभरणभूषितान् ॥ निशम्यपरमंहर्षमगमद्देवसारथिः ५७ तदसह्यंकृतंकर्मदेवैरपिदुरासदम् ॥ दृष्ट्वामांपूजयामासमातलिःशक्रसा
रथिः ५८ उवाचवचनंचेदंप्रीयमाणःकृतांजलिः ॥ सुरासुरैरसह्यंहिकर्मयत्साधितंत्वया ५९ नह्येतत्संयुगेकर्तुमपिशक्तःसुरेश्वरः ॥ सुरासुरैरवध्यंहिपुरमेतत्खगं
महत् ६० त्वयाविमथितंवीरस्ववीर्यतपसोबलात् ॥ विध्वस्तेखपुरेतस्मिन्दानवेषुहतेषुच ६१ विनदंत्यःस्त्रियःसर्वानिष्पेतुर्नगराद्बहिः ॥ प्रकीर्णकेश्योऽव्यथि
ताःकुरर्यइवदुःखिताः ६२ पेतुःपुत्रानपितॄन्भ्रातॄन्शोचमानामहीतले ॥ रुदत्योदीनकंठचस्तुनिनदंत्योहतेश्वराः ६३ उरांसिपारिनिघ्नंत्योविस्रस्तस्रग्विभूष
णाः ॥ तच्छोकयुक्तमश्रीकंदुःखदैन्यसमाहतं ६४ नबभौदानवपुरंहतत्विट्कंहतेश्वरम् ॥ गंधर्वनगराकारंहतनागमिवह्रदम् ६५ शुष्कवृक्षमिवारण्यमदृश्यमभव
त्पुरम् ॥ मांतुसंहृष्टमनसंक्षिप्रंमातलिरानयत् ६६ देवराजस्यभवनंकृतकर्माणमाहवात् ॥ हिरण्यपुरमुत्सृज्यानिहत्यचमहासुरान् ६७ निवातकवचांश्चैवततोऽ
हंशक्रमागमम् ॥ ममकर्मचदेवेंद्रंमातलिर्विस्तरेणतत् ६८ सर्वंविश्रावयामासयथाभूतंमहाद्युते ॥ हिरण्यपुरघातंचमायानांचनिवारणम् ६९ निवातकवचा
नांचवधंसंख्येमहौजसां ॥ तच्छ्रुत्वाभगवान्प्रीतःसहस्राक्षःपुरंदरः ७० मरुद्भिःसहितःश्रीमान्साधुसाध्वित्यथाब्रवीत् ॥ ततोमांदेवराजोवैसमाश्वास्यपुनःपु
नः ७१ अब्रवीद्विबुधैःसार्धमिदंसमधुरंवचः ॥ अतिदेवासुरंकर्मकृतमेवत्वयारणे ७२ गुर्वर्थश्चकृतःपार्थमहाशत्रून्घ्नतामम ॥ एवमेवसदाभाव्यंस्थिरेणाजौधनं
जय ७३ असंमूढेनचास्त्राणांकर्तव्यंप्रतिपादनम् ॥ अविषह्योरणेहित्वंदेवदानवराक्षसैः ७४

६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४

७५ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥ ततइति अतिविश्वस्तं अतिअत्यंतंविश्वस्तं शत्रून्जेष्यतीतिविश्वासोयस्मिंस्तं संरूढा
देहेनिमग्नाःशरास्तैर्विक्षतं विग्रहविशेषेणगृहीत्वास्वीयत्वेनांगीकृत्येत्यर्थः १ त्वात्वां २ । ३ । ४ । ५ रुचिराणिदीप्तिमंति अतएवबृहंतिबहुमूल्यानि ६ । ७ । ८ । ९ । १० देवानांराजा

सयक्षासुरगंधर्वैःसपक्षिगणपन्नगैः ॥ वसुधांचापिकौंतेयत्वद्बाहुबलनिर्जिताम् ॥ पालयिष्यतिधर्मात्माकुंतीपुत्रोयुधिष्ठिरः ७५ ॥ इतिश्रीमहाभारतेआरण्यके
पर्वणिनिवातकवचयुद्धपर्वणिहिरण्यपुरदैत्यवधेत्रिसप्तत्यधिकशततमोऽध्यायः ॥१७३॥ ॥ अर्जुनउवाच ॥ ततोमामतिविश्वस्तंसंरूढशरविक्षतम् ॥
देवराजोविगृह्येदंकालेवचनमब्रवीत् १ दिव्यान्यस्त्राणिसर्वाणित्वयितिष्ठंतिभारत ॥ नत्वाऽभिभवितुंशक्तोमानुषोभुविकश्चन २ भीष्मोद्रोणःकृपःकर्णःशकुनिः
सहराजभिः ॥ संग्रामस्थस्यतेपुत्रकलांनार्हंतिषोडशीम् ३ इदंचमेतनुत्राणंप्रायच्छन्मघवान्प्रभुः ॥ अभेद्यंकवचंदिव्यंस्रजंचैवहिरण्मयीम् ४ देवदत्तंचमेशं
खंपुनःप्रादान्महारवम् ॥ दिव्यंचेदंकिरीटंमेस्वयमिंद्रोयुयोजह ५ ततोदिव्यानिवस्त्राणिदिव्यान्याभरणानिच ॥ प्रादाच्छक्रोममैतानिरुचिराणिबृहंतिच ६
एवंसंपूजितस्तत्रसुखमस्म्युषितोनृप ॥ इंद्रस्यभवनेपुण्येगंधर्वशिशुभिःसह ७ ततोमामब्रवीच्छक्रःप्रीतिमानमरैःसह ॥ समयोऽर्जुनगंतुंतेभ्रातरोहिस्मरंति
ते ८ एवमिंद्रस्यभवनेपंचवर्षाणिभारत ॥ उषितानिमयाराजन्स्मरताद्यूतजंकलिम् ९ ततोभवंतमद्राक्षंभ्रातृभिःपरिवारितम् ॥ गंधमादनपादस्यपर्वत
स्यास्यमूर्धनि १० ॥ युधिष्ठिरउवाच ॥ ॥ दिष्ट्याधनंजयास्त्राणित्वयाप्राप्तानिभारत ॥ दिष्ट्याचाराधितोराजादेवानामीश्वरःप्रभुः ११ दिष्ट्याचभगवा
न्स्थाणुर्देव्यासहपरंतप ॥ साक्षाद्दृष्टःस्वयुद्धेनतोषितश्चत्वयाऽनघ १२ दिष्ट्याचलोकपालैस्त्वंसमेतोभरतर्षभ ॥ दिष्ट्यावर्धामहेपार्थदिष्ट्यासिपुनरागतः
१३ अद्यकृत्स्नांमहींदेवींविजितांपुरमालिनीम् ॥ मन्येचधृतराष्ट्रस्यपुत्रानपिवशीकृतान् १४ इच्छामितानिचास्त्राणिद्रष्टुंदिव्यानिभारत ॥ यैस्तथावीर्यवंत
स्तेनिवातकवचाहताः १५ ॥ अर्जुनउवाच ॥ ॥ श्वःप्रभातेभवान्द्रष्टादिव्यान्यस्त्राणिसर्वशः ॥ निवातकवचाघोरायैर्मयाविनिपातिताः १६ ॥ वैशंपाय
नउवाच ॥ एवमागमनंतत्रकथयित्वाधनंजयः ॥ भ्रातृभिःसहितःसर्वैरजनींतामुवासह १७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनिवातकवचयुद्धपर्वणिअस्त्र
दर्शनसंकेतेचतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ तस्यांरात्र्यांव्यतीतायांधर्मराजोयुधिष्ठिरः ॥
४८ उत्थायावश्यकार्याणिकृतवान्भ्रातृभिःसह १ ततःसंचोदयामाससोऽर्जुनंमातृनंदनम् ॥ दर्शयास्त्राणिकौंतेययैर्जितादानवास्त्वया २ ततोधनंजयोराजन्
देवैर्दत्तानिपांडवः ॥ अस्त्राणितानिदिव्यानिदर्शयामासभारत ३

इंद्रः ११ । १२ । १३ । १४ तेत्वयाहताः १५ । १६ । १७ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥ ॥ ७ ॥ ॥ ७ ॥
तस्यामिति १ मातृनंदनं मातुःसुखकरम् २ । ३

अस्त्राणिदर्शयितुमिच्छोरर्जुनस्यभावनामाहागिरीति गिरयएव कूबरादयस्तद्वंतं । कूबरो यस्मिन् युगं भ्रियतेतद्दारु । पादौ चक्रे । अक्षस्तयोःसंधानदारु । शुभावेणवइववेणवो यस्मिन् तत् शुभवेणु त्रिवेणु अक्षकूबरयोःसंधानार्थं त्रिशिखं दारुतद्वंतं । सुपांसुलुगितिद्वितीयायाआर्षोलुक् रथपदेवाक्रीबत्वं ध्येयं ४ पृथिवीमेवपार्थिवं मानसं भूमिरूपंरथं राक्षसत्वायसादिव स्त्वार्थेतद्धितः आस्थायध्यानबलेनारुह्य दिव्येनेंद्रदत्तेन ५ वारिजं शंखं देवदत्तंनामतः ६ दर्शनायदर्शयितुं ७ अर्जुनेनअनेकब्रह्मांडगर्भस्यमहादेवस्यसाम्यंभावनाबलाद्गतेन समाक्रांतापृ

यथान्यायंमहातेजाःशौचं परममास्थितः ॥ गिरिकूबरपादाक्षंशुभवेणुत्रिवेणुमत् ४ पार्थिवंरथमास्थायशोभमानोधनंजयः ॥ दिव्येनसंवृतस्तेनकवचेनसु
वर्चसा ५ धनुरादायगांडीवंदेवदत्तंसवारिजम् ॥ शोशुभ्यमानःकौंतेयआनुपूर्व्यान्महाभुजः ६ अस्त्राणितानिदिव्यानिदर्शनायोपचक्रमे ॥ अथप्रयोक्ष्यमा
णेषुदिव्येष्वस्त्रेषुतेषुवै ७ समाक्रांतामहीपद्भ्यांसमकंपतसद्रुमा ॥ क्षुभिताःसरितश्चैवतथैवचमहोदधिः ८ शैलाश्चापिव्यदीर्यंतनववौचसमीरणः ॥ नबभासे
सहस्रांशुर्नजज्वालचपावकः ९ नवेदाःप्रतिभांतिस्मद्विजातीनांकथंचन ॥ अंतर्भूमिगतायेचप्राणिनोजनमेजय १० पीड्यमानाःसमुत्थायपांडवंपर्यवारयन् ॥
वेपमानाःप्रांजलयस्तेसर्वेविकृताननाः ११ दह्यमानास्तदाऽस्त्रैस्तेयाचंतिस्मधनंजयम् ॥ ततोब्रह्मर्षयश्चैवसिद्धायेचमहर्षयः १२ जंगमानिचभूतानि
सर्वाण्येवावतस्थिरे ॥ देवर्षयश्चप्रवरास्तथैवचदिवौकसः १३ यक्षराक्षसगंधर्वास्तथैवचपतत्रिणः ॥ खेचराणिचभूतानिसर्वाण्येवावतस्थिरे १४ ततःपिता
महश्चैवलोकपालाश्चसर्वशः ॥ भगवांश्चमहादेवःसगणोऽभ्याययौतदा १५ ततोवायुर्महाराजदिव्यैर्माल्यैःसमन्वितः ॥ अभितःपांडवंचित्रैरवचक्रेपनंततः
१६ जगुश्चगाथाविविधागंधर्वाःसुरचोदिताः ॥ ननृतुःसंघशश्चैवराजन्नप्सरसांगणाः १७ तस्मिंश्चतादृशेकालेनारदश्चोदितःसुरैः ॥ आगम्याहवचःपार्थंश्रव
णीयमिदंनृप १८ अर्जुनार्जुनमायुंक्ष्वदिव्यान्यस्त्राणिभारत ॥ नैतानिनिराधिष्ठानेप्रयुज्यंतेकथंचन १९ अधिष्ठानेनवानार्तःप्रयुंजीतकदाचन ॥ प्रयोगेसुम
हान्दोषोह्यस्त्राणांकुरुनंदन २० एतानिरक्ष्यमाणानिधनंजययथागमम् ॥ बलवंतिसुखार्हाणिभविष्यंतिनसंशयः २१ अरक्ष्यमाणान्येतानित्रैलोक्यस्यापि
पांडव ॥ भवंतिस्मविनाशायमैवंभूयःकृथाःक्वचित् २२ अजातशत्रोत्वंचैवद्रक्ष्यसेतानिसंयुगे ॥ योज्यमानानिपार्थेनद्विषतामवमर्दने २३ ॥ वैशंपायनउवाच ॥
निवार्याथततःपार्थंसर्वेदेवायथागतम् ॥ जग्मुरन्येचयेतत्रसमाजग्मुर्नरर्षभ २४ तेषुसर्वेषुकौरव्यप्रतियातेषुपांडवाः ॥ तस्मिन्नेववनेहृष्टास्तऊषुःसहकृष्णया
२५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिनिवातकवचयुद्धपर्वणिअस्त्रदर्शनेपंचसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥ ॥ समाप्तंचनिवातकवचयुद्धपर्व ॥
॥ अथाजगरपर्व ॥ जनमेजयउवाच ॥ तस्मिन्कृतास्त्रेरथिनांप्रवीरेप्रत्यागतेभवनाद्वृत्रहंतुः ॥ अतःपरंकिमकुर्वंतपार्थाःसमेत्यशूरेणधनंजयेन १

थिवीसमकंपत ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ निराधिष्ठाने लक्ष्याभावे सति १९ अधिष्ठानेऽपिवाअनार्तः नप्रयुंजीत २० । २१ । २२ । २३ । २४ । २५
इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे पंचसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥ ॥ ७ ॥ तस्मिन्निति वृत्रहंतुरिंद्रस्य १

आक्रीडमुद्यानम् २ । ३ वासंस्थानंप्राणिनांभूमिस्थानामैश्वर्यमितिशेषः ४ पूर्वाश्चषट्समाः ५ । ६ । ७ । ८ विचरन्विचरंतः अपकृष्टदेशान्दूरस्थान्नज्ञास्यंति अपितुसमीपस्थानेवैतद्दति ज्ञास्यंतीत्यर्थः । ज्ञास्यंत्यनाथानितिपाठेअनाथानितिदेशविशेषणं अप्रसिद्धान्देशान्तेषुसंवत्सरंगूढंविहृत्येतिसंबंधः ९ तत्रयुद्धेउद्धरेमकंटकवदूरीकरवाम निर्यात्यप्रत्यर्प्यअपका रिणेऽपकारंकृत्वेत्यर्थः । फलंराज्यप्राप्तिःपुष्पंशत्रुवधः निर्यात्यउद्धरेमेत्यन्वयः १० तदोहेतोर्महीमावसाधितिष्ठ ननुइहैवसुखंमहदस्तिकिमहीवासेनेत्याशंक्याहस्वर्गेति ११ । १२

॥ वैशंपायनउवाच ॥ वनेषुतेष्वेवतुतेनरेंद्राःसहार्जुनेनेंद्रसमेनवीराः ॥ तस्मिंश्चशैलप्रवरेसुरम्येधनेश्वराक्रीडगताविजह्रुः २ वेश्मानितान्यप्रतिमानिप
श्यन्क्रीडाश्चनानाद्रुमसन्निबद्धाः ॥ चचारधन्वीबहुधानरेंद्रःसोऽस्त्रेषुयत्तःसततंकिरीटी ३ अवाप्यवासंनरदेवपुत्राःप्रसादजंवैश्रवणस्यराज्ञः ॥ नप्राणिनांते
स्पृहयंतिराजन्शिवश्चकालःसबभूवतेषाम् ४ समेत्यपार्थेनयथैकरात्रमूषुःसमास्तत्रतदाचतस्रः ॥ पूर्वाश्चषट्तादशपांडवानांशिवाबभूवुर्वसतांवनेषु ५ ततोऽ
ब्रवीद्वायुसुतस्तरस्वीजिष्णुश्चराजानमुपोपविश्य ॥ यमौचवीरौसुरराजकल्पावेकांतमास्थायहितंप्रियंच ६ तवप्रतिज्ञांकुरुराजसत्यांचिकीर्षमाणास्त्वदनु
प्रियंच ॥ ततोनगच्छामवनान्यपास्यसुयोधनंसानुचरंनिहंतुम् ७ एकादशंवर्षमिदंवसामःसुयोधनेनात्तसुखाःसुखार्हाः ॥ तंवंचयित्वाऽधमबुद्धिशीलमज्ञातवा
संसुखमाप्नुयामः ८ तवाज्ञयापार्थिवनिर्विशंकाविहायमानंविचरन्वनानि ॥ समीपवासेनविलोभितास्तेज्ञास्यंतिनास्मानपकृष्टदेशान् ९ संवत्सरंतत्रविहृत्यगू
ढंनराधमंतंसुखमुद्धरेम ॥ निर्यात्यवैरंसफलंसपुष्पंतस्मैनरेंद्राधमपूरुषाय १० सुयोधनायानुचरैर्वृतायततोमहीमावसधर्मराज ॥ स्वर्गोपमंदेशमिमंचरद्भिः
शक्योविहंतुंनरदेवशोकः ११ कीर्तिस्तुतेभारतपुण्यगंधानश्येद्धिलोकेषुचराचरेषु ॥ तत्प्राप्यराज्यंकुरुपुंगवानांशक्यंमहत्प्राप्तुमथक्रियाश्च १२ इदंतुशक्यंस
ततंनरेंद्रप्राप्तुंत्वयायल्लभसेकुबेरात् ॥ कुरुष्वबुद्धिंद्विषतांवधायकृतागसांभारतनिग्रहेच १३ तेजस्तवोग्रंनसहेतराजन्समेत्यसाक्षादपिवज्रपाणिः ॥ नहिव्यथां
जातुकरिष्यतस्तौसमेत्यदेवैरपिधर्मराज १४ तवार्थसिद्ध्यर्थमभिप्रवृत्तौसुपर्णकेतुश्चशिनेश्चनप्ता ॥ तथैवकृष्णोऽप्रतिमोबलेनतथैवचाहंनरदेववर्य १५ तवार्थ
सिद्ध्यर्थमभिप्रपन्नोयथैवकृष्णःसहयादवैस्तैः ॥ तथैवचाहंनरदेववर्ययमौचवीरौकृतिनौप्रयोगे १६ त्वदर्थयोगप्रभवप्रधानाःशमंकरिष्यामपरान्समेत्य ॥
॥ वैशंपायनउवाच ॥ ततस्तदाज्ञायमतंमहात्मातेषांचधर्मस्यसुतोवरिष्ठः १७ प्रदक्षिणंवैश्रवणाधिवासंचकारधर्मार्थविदुत्तमौजाः ॥ आमंत्र्यवेश्मानिनदीः
सरांसिसर्वाणिरक्षांसिचधर्मराजः १८ यथागतंमार्गमवेक्षमाणःपुनर्गिरिंचैवनिरीक्षमाणः ॥ ततोमहात्मासविशुद्धबुद्धिःसंप्रार्थयामासनगेंद्रवर्यम् १९

निग्रहेचबंधनेवाप्राप्तत्वाद्वधेऽप्रवृत्तिश्चेदितिभावः १३ समेत्ययुद्धंप्राप्य १४ सुपर्णकेतुःकृष्णः शिनेर्नप्तासात्यकिः एतयोर्वीर्यंहितकारित्वंचाह तथैवेति कृष्णोऽर्जुनः अहंभीमसेनः १५ प्रयोगेऽस्त्रप्रयोगे कृतिनौकुशलौ १६ त्वदर्थयोगप्रभवप्रधानाःतवअर्थयोगोधनलाभः प्रभवऐश्वर्योत्कर्षस्तद्द्वयंप्रधानंयेषांतेतथा शमंसाम शत्रुनाशेनक्षेमंवा समेत्यसाम्रायुद्धेनवा १७।१८ । १९

इतिप्रार्थयामासेतिपूर्वेणसंबंधः मतिंचकारगमनेइतिशेषः २० । २१ । २२ । २३ ॥ इत्यारण्यकेप०नी०भा० षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥ ॥ ७ ॥ ॥ एवं
तीर्थयात्रादिप्रभवेनपुण्येनदेवताप्रसादादुत्तमलोकप्राप्तिरद्भुतसामर्थ्यप्राप्तिश्चेतिदर्शितं प्रमादमपिचतद्दर्पवतामनर्थकरंभवतीतिदर्पजयार्थनहुषभीमसेनयोर्दुरवस्थांवर्णयति नगोत्तमंप्रस्रवणैरुपे

समाप्तकर्मासहितःसुहृद्भिर्जित्वासपत्नान्प्रतिलभ्यराज्यम् ॥ शैलेंद्रभूयस्तपसेजितात्माद्रष्टातवास्मीतिमतिंचकार २० वृतश्चसर्वैरनुजैर्द्विजैश्चतेनैवमार्गेण
पतिःकुरूणाम् ॥ उवाहचैतान्गणशस्तथैवघटोत्कचःपर्वतनिर्झरेषु २१ तान्प्रस्थितान्प्रीतमनामहर्षिःपितेवपुत्राननुशिष्यसर्वान् ॥ सलोमशःप्रीतमनाजगा
मदिवौकसांपुण्यतमंनिवासम् २२ तेनार्ष्टिषेणेनतथानुशिष्टास्तीर्थानिरम्याणितपोवनानि ॥ महांतिचान्यानिसरांसिपार्थाःसंपश्यमानाःप्रययुर्नराग्र्याः २३
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिआजगरप०गंधमादनप्रस्थानेषट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ नगोत्त
मंप्रस्रवणैरुपेतंदिशांगजैःकिन्नरपक्षिभिश्च ॥ सुखंनिवासंजहतांहितेषांनप्रीतिरासीद्भरतर्षभाणाम् १ ततस्तुतेषांपुनरेवहर्षःकैलासमालोक्यमहान्बभूव ॥ कु
बेरकांतंभरतर्षभाणांमहीधरंवारिधरप्रकाशम् २ समुच्छ्रयान्पर्वतसंनिरोधान्गोष्ठान्हरीणांगिरिसेतुमालाः ॥ बहून्प्रपातांश्चसमीक्ष्यवीराःस्थलानिनिम्नानिच
तत्रतत्र ३ तथैवचान्यानिमहावनानिमृगद्विजानेकपसेवितानि ॥ आलोकयंतोऽभिययुःप्रतीतास्तेधन्विनःखड्गधरानराग्र्याः ४ वनानिरम्याणिनदीःसरां
सिगुहागिरीणांगिरिगह्वराणि ॥ एतेनिवासाःसततंबभूवुर्निशानिशंप्राप्यनरर्षभाणाम् ५ तेदुर्गवासंबहुधानिरुध्यव्यतीत्यकैलासमचिंत्यरूपम् ॥ आसेदुर
त्यर्थमनोरमंतेतमाश्रमाग्र्यंवृषपर्वणस्तु ६ समेत्यराज्ञावृषपर्वणातेप्रत्यर्चितास्तेनचवीतमोहाः ॥ शशंसिरेविस्तरशःप्रवासंगिरौयथावद्वृषपर्वणस्ते ७ सुखो
षितास्तस्यतएकरात्रंपुण्याश्रमेदेवमहर्षिजुष्टे ॥ अभ्याययुस्तेबदरींविशालांसुखेनवीराःपुनरेववासम् ८ ऊषुस्ततस्तत्रमहानुभावानारायणस्थानगताःसम
ग्राः ॥ कुबेरकांतांनलिनींविशोकाःसंपश्यमानाःसुरसिद्धजुष्टाम् ९ तांचाथदृष्ट्वानलिनींविशोकाःपांडोःसुताःसर्वनरप्रधानाः ॥ तेरेमिरेनंदनवासमेत्यद्विजर्षयो
वीतमलायथैव १० ततःक्रमेणोपययुर्नृवीरायथागतेनैवपथासमग्राः ॥ विहृत्यमासंसुखिनोबदर्यांकिरातराज्ञोविषयंसुबाहोः ११ चीनांस्तुषारान्दरदांश्चसर्वा
न्देशान्कुलिंदस्यचभूमिरत्नान् ॥ अतीत्यदुर्गंहिमवत्प्रदेशंपुरंसुबाहोर्ददृशुर्नृवीराः १२ श्रुत्वाचतान्पार्थिवपुत्रपौत्रान्प्राप्तान्सुबाहुर्विषयेसमग्रान् ॥ प्रत्युद्ययौप्री
तियुतःसराजातंचाभ्यनंदद्वृषभःकुरूणाम् १३ समेत्यराज्ञातुसुबाहुनातेसूतैर्विशोकप्रमुखैश्चसर्वे ॥ सहेंद्रसेनैःपरिचारकैश्चपौरोगवैर्येचमहानसस्थाः १४

तमित्यादिना नगोत्तमंगंधमादनंजहतांत्यजताम् १ कुबेरस्यकांतंप्रियम् २ समुच्छ्रयान्उच्चैस्त्वानि संनिरोधान्संकीर्णत्वानि गोष्ठान्स्थानानि हरीणांसिंहानांगिरिषुनद्युत्तारणार्थाः
सेतवोमालाश्चमहत्सुप्रवाहेषुतत्रैवदेवप्रयागादौसाग्राइतिप्रसिद्धाः प्रपातान्भृगून् ३ अनेकपाःद्विपाः ४ गुहाअल्पप्रमाणादरी गह्वरं महतीदरी निशानिशंरात्रिंदिनम् ५ । ६ । ७ । ८
नलिनींसरसीम् ९ नंदनमिंद्रवनम् १० । ११ । १२ । १३ पौरोगवैः पुरोगामिभिः पचग्रहादिसामग्रीवाहैः १४ ॥१४३॥

यामुनंयमुनोद्गमं १५ वृसियथा श्वेतमुत्तरीयंश्वेतणमुष्णीषं चतद्वत् गिरेःप्रस्रवणानि अरुणपांडुसानूनिचभांतीरयुत्प्रेक्षा विशाखयूपंस्थानविशेषः १६ । १७ विषादस्तेजःप्रतिघातजःसो
मः मोहोवैचित्यं १८ द्वीपोद्वीपवदाश्रयः ग्राहेणसर्पेण १९ । २० २१ तृणोदपात्रावरणाः आसनार्थंतृणेन प्राप्त्यार्थमुदकपात्रेणच आवृण्वंति पाठांतरे आहरंतिप्रत्येकमानीतेनतर
पंतितेतथाभूताः अश्मकुट्टावानप्रस्थाः दंतोलूखलिकाएवसंतो जरयानष्टदंता अश्मकुट्टाभवंति २२ बभ्रुःशोभावंतइतिशेषः २३ । २४ ॥ इत्यारण्यकेपर्वणि नी० भा० भावदीपे

सुखोषितास्तत्रतएकरात्रंसूतान्समादायरथांश्चसर्वान् ॥ घटोत्कचंसानुचरंविसृज्यततोऽभ्ययुर्यामुनमद्रिराजं १५ तस्मिन्गिरौप्रस्रवणोपपन्नेहिमोत्तरीयारु
णपांडुसानौ ॥ विशाखयूपंसमुपेत्यचक्रुस्तदानिवासंपुरुषप्रवीराः १६ वराहनानामृगपक्षिजुष्टंमहावनंचैत्ररथप्रकाशम् ॥ शिवेनपार्थामृगयाप्रधानाःसंवत्सरं
तत्रवनेविजह्रुः १७ तत्राससादातिबलंभुजंगंक्षुधार्दितंमृत्युमिवोग्ररूपम् ॥ वृकोदरःपर्वतकंदरायांविषादमोहव्यथितांतरात्मा १८ द्वीपोऽभवद्यत्रवृकोदरस्य
युधिष्ठिरोधर्मभृतांवरिष्ठः ॥ अमोक्षयद्यस्तमनंततेजाग्राहेणसंवेष्टितसर्वगात्रम् १९ तेद्वादशंवर्षमुपोपयातंवनेविहर्तुंकुरवःप्रतीताः ॥ तस्माद्वनाच्चैत्ररथप्र
काशाच्छ्रियाज्वलंतस्तपसाचयुक्ताः २० ततश्चयात्वामरुधन्वपार्श्वंसदाधनुर्वेदरतिप्रधानाः ॥ सरस्वतीमेत्यनिवासकामाःसरस्ततोद्वैतवनंप्रतीयुः २१ स
मीक्ष्यतान्द्वैतवनेनिविष्टान्निवासिनस्तत्रततोऽभिजग्मुः ॥ तपोदमाचारसमाधियुक्तास्तृणोदपात्रावरणाश्मकुट्टाः २२ प्लक्षाक्षरोहीतकवेतसाश्चतथाबदर्यः
खदिराःशिरीषाः ॥ बिल्वेंगुदाःपीलुशमीकरीराःसरस्वतीतीररुहाबभूवुः २३ तांयक्षगंधर्वमहर्षिकांतामागारभूतामिवदेवतानां ॥ सरस्वतींप्रीतियुताश्चरंतःसु
खंविजह्रुर्नरदेवपुत्राः २२४ ॥ इतिश्रीमहाभारतेआरण्यकेप०आजगरप०पुनर्द्वैतवनप्रवेशेसप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ ७ ॥ जनमेजयउ
वाच ॥ ॥ कथंनागायुतप्राणोभीमोभीमपराक्रमः ॥ भयमाहारयत्तीव्रंतस्मादजगरान्मुने १ पौलस्त्यंधनदंयुद्धेयआह्वयतिदर्पितः ॥ नलिन्यांकदनंकृत्वानि
हंतायक्षरक्षसाम् २ तंशंससिभयाविष्टमापन्नमरिसूदनम् ॥ एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे ३ ॥ वैशंपायनउवाच ॥ ॥ बह्वाश्चर्येवनेतेषांवसतामुग्रत
न्विनां ॥ प्राप्तानामाश्रमाद्राजन्राजर्षेर्वृषपर्वणः ४ यदृच्छयाधनुष्पाणिर्बद्धखड्गोवृकोदरः ॥ ददर्शतद्वनंरम्यंदेवगंधर्वसेवितं ५ सददर्शशुभान्देशान्गिरे
र्हिमवतस्तदा ॥ देवर्षिसिद्धचरितानप्सरोगणसेवितान् ६ चकोरैरुपचक्रैश्चपक्षिभिर्जीवजीवकैः ॥ कोकिलैर्भृंगराजैश्चतत्रतत्रनिनादितान् ७ नित्यपुष्पफलै
र्वृक्षैर्हिमसंस्पर्शकोमलैः ॥ उपेतान्बहुलच्छायैर्मनोनयननंदनैः ८ ससंपश्यन्गिरेर्नदीर्वैदूर्यमणिसंनिभैः ॥ सलिलैर्हिमसंकाशैर्हंसकारंडवायुतैः ९ वनानिदे
वदारूणांमेघानामिववागुराः ॥ हरिचंदनमिश्राणितुंगकालीयकान्यपि १० मृगयांपरिधावन्ससमेषुमरुधन्वसु ॥ विध्यन्मृगाञ्शरैःशुद्धैश्चचारसमहाबलः ११
भीमसेनस्तुविख्यातोमहांतंदंष्ट्रिणंबलात् ॥ निघ्ननागशतप्राणोवनेतस्मिन्महाबलः १२

सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ ॥ ॥ कथमिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ तुंगकालीयकंच काष्ठविशेषौ १० मरुधन्वसुगिरे
निर्जलप्रदेशेषु । 'मरुर्नागिरिधन्वनोः'इति मेदिनी ११ । १२

१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ पर्वतस्याभोगोविस्तीर्णता तत्परिमाणंवर्ष्मशरीरं यस्यतं २५ । २६ । २७ पृदाकुःसर्पः २८ । २९ । ३० । ३१

मृगाणांसवराहाणांमहिषाणांमहाभुजः ॥ विनिघ्नंस्तत्रतत्रैवभीमोभीमपराक्रमः १३ समातंगशतप्राणोमनुष्यशतवारणः ॥ सिंहशार्दूलविक्रांतोवनेतस्मिन्महा
बलः १४ वृक्षानुत्पाटयामासतरसाविबभंजच ॥ पृथिव्याश्चप्रदेशान्वैनादयंस्तुवनानिच १५ पर्वताग्राणिवैमृद्नन्नादयानश्चविज्वरः ॥ प्राक्षिपन्पादपांश्चापि
नादेनापूरयन्महीं १६ वेगेनन्यपतद्भीमोनिर्भयश्चपुनःपुनः ॥ आस्फोटयन्क्ष्वेडयंश्चतलतालांश्चवादयन् १७ चिरसंवृद्धदर्पस्तुभीमसेनोवनेतदा ॥ गजेंद्रा
श्चमहासत्वामृगेंद्राश्चमहाबलाः १८ भीमसेनस्यनादेनव्यमुंचंतगुहाभयात् ॥ क्वचित्प्रधावंस्तिष्ठंश्चक्वचिच्चोपविशंस्तथा १९ मृगप्रेप्सुर्महारौद्रेवनेचरतिनिर्भ
यः ॥ सतत्रमनुजव्याघ्रोवनेवनचरोपमः २० पद्भ्यामभिसमापेदेभीमसेनोमहाबलः ॥ समविष्टोमहारण्येनादान्नदतिचाद्भुतान् २१ त्रासयन्सर्वभूतानिमहा
सत्वपराक्रमः ॥ ततोभीमस्यशब्देनभीताःसर्पागुहाशयाः २२ अतिक्रांतास्तुवेगेनजगामानुसृतःशनैः ॥ ततोऽमरवरप्रख्योभीमसेनोमहाबलः २३ सददर्शम
हाकायंभुजंगंलोमहर्षणम् ॥ गिरिदुर्गेसमापन्नंकायेनावृत्यकंदरम् २४ पर्वताभोगवर्ष्माणमतिकायंमहाबलम् ॥ चित्रांगमंगजैश्चित्रैर्हरिद्रासदृशच्छविं २५
गुहाकारेणवक्त्रेणचतुर्दंष्ट्रेणराजता ॥ दीप्ताक्षेणातिताम्रेणलिहानंसृक्किणीमुहुः २६ त्रासनंसर्वभूतानांकालांतकयमोपमम् ॥ निःश्वासक्ष्वेडनादेनभर्त्सयंतमिव
स्थितम् २७ सभीमंसहसाऽभ्येत्यपृदाकुःकुपितोभृशम् ॥ जग्राहाजगरोग्राहोभुजयोरुभयोर्बलात् २८ तेनसंस्पृष्टगात्रस्यभीमसेनस्यवैतदा ॥ संज्ञामुमोहसह
सावरदानेनतस्यहि २९ दशनागसहस्राणिधारयंतिहियद्बलम् ॥ तद्बलंभीमसेनस्यभुजयोरसमंपरैः ३० सतेजस्वीतथातेनभुजगेनवशीकृतः ॥ विस्फुरन्
शनकैर्भीमोनशशाकविचेष्टितुम् ३१ नागायुतसमप्राणःसिंहस्कंधोमहाभुजः ॥ गृहीतोव्यजहात्सत्वंवरदानविमोहितः ३२ सहिप्रयत्नमकरोत्तीव्रमात्मविमोक्षणे ॥
नचैनमशकद्वीरःकथंचित्प्रतिबाधितुम् ३३ ॥ इतिश्रीभारतेआरण्यकेपर्वणिआजगरपर्वणिअजगरग्रहणेअष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥ ॥ छ ॥
॥ वैशंपायनउवाच ॥ सभीमसेनस्तेजस्वीतथासर्पवशंगतः ॥ चिंतयामाससर्पस्यवीर्यमत्यद्भुतंमहत् १ उवाचचमहासर्पंकामयाब्रूहिपन्नग ॥ कस्त्वंभोभुज
गश्रेष्ठकिंमयाचकरिष्यसि २ पांडवोभीमसेनोऽहंधर्मराजादनंतरः ॥ नागायुतसमप्राणस्त्वयानीतःकथंवशम् ३ सिंहाःकेसरिणोव्याघ्रामहिषावारणास्तथा ॥
समागताश्चशतशोनिहताश्चमयायुधि ४ राक्षसाश्चपिशाचाश्चपन्नगाश्चमहाबलाः ॥ भुजवेगमशक्तामेसोढुंपन्नगसत्तम ५ किंनुविद्याबलंकिंनुवरदानमथोतव ॥
उद्योगमपिकुर्वाणोवशगोऽस्मिकृतस्त्वया ६ असत्योविक्रमोनॄणामितिमेधीयतेमतिः ॥ यथेदंमेत्वयानागबलंप्रतिहतंमहत् ७ ॥१४४॥

सत्वंबुद्धिं ३२ । ३३ ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपे अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥ सभीमसेनइति १ कामयाइच्छातः २ । ३ । ४ । ५ । ६ । ७

भोगेनदेहेन ८ विमुच्य तस्यबाहुबलंजिज्ञासितुमित्याशयः ९ । १० । ११ । १२ । १३ । १४ दायादंस्ववंशयंपुत्रं अतएवावध्यं अभेध्यमितिपाठे वैश्वदेवाद्यनर्हत्वादभक्ष्यंनरमांसमित्यर्थः उपयोक्ष्यामिभक्षितुमिच्छामि विधानंदैवं १५ षष्ठेकालेऽष्टधाविभक्तस्याह्नोभागे १६ । १७ । १८ । १९ स्मार्तंस्मृतिविषयं पुराणंचिरकालीनमपिस्मराभीत्यर्थः २० विभागविदात्मानात्म

॥ वैशंपायनउवाच ॥ इत्येवंवादिनंवीरंभीममक्लिष्टकारिणम् ॥ भोगेनमहतागृह्यसमंतात्पर्यवेष्टयत् ८ निगृह्यैनंमहाबाहुंततःसभुजगस्तदा ॥ विमुच्यास्यभुजौ
पीनाविदंवचनमब्रवीत् ९ दिष्ट्यात्वंक्षुधितस्याद्यदेवैर्भक्षोमहाभुज ॥ दिष्ट्याकालस्यमहतःप्रियाःप्राणाहिदेहिनाम् १० यथात्विदंमयाप्राप्तंसर्परूपमरिंदम ॥
तथाऽवश्यंमयाऽऽख्याप्यंतवाद्यशृणुसत्तम ११ इमामवस्थांसंप्राप्तोह्यहंकोपान्महर्षिणाम् ॥ शापस्यांतंपरिप्रेप्सुःसर्वंतत्कथयामिते १२ नहुषोनामराजर्षि
र्व्यक्तंतेश्रोत्रमागतः ॥ तवैवपूर्वःपूर्वेषामायोर्वंशधरःसुतः १३ सोऽहंशापादगस्त्यस्यब्राह्मणानवमन्यच ॥ इमामवस्थामापन्नःपश्यदैवमिदंमम १४ त्वांचेद
वध्यंदायादमतीवप्रियदर्शनम् ॥ अहमद्योपयोक्ष्यामिविधानंपश्ययादृशम् १५ नहिमेमुच्यतेकश्चित्कथंचित्प्रग्रहंगतः ॥ गजोवामहिषोवाऽपिषष्ठेकालेनरोत्तम
१६ नासिकेवलसर्पेणतिर्यग्योनिषुवर्तता ॥ गृहीतःकौरवश्रेष्ठवरदानमिदंमम १७ पतताहिविमानाग्रान्मयाशक्रासनाद्द्रुतम् ॥ कुरुशापांतमित्युक्तोभगवान्मु
निसत्तमः १८ समामुवाचतेजस्वीकृपयाऽभिपरिप्लुतः ॥ मोक्षस्तेभविताराजन्कस्माच्चित्कालपर्ययात् १९ ततोऽस्मिपतितोभूमौनचमामजहात्स्मृतिः ॥ स्मा
र्तमस्तिपुराणंमेयथैवाधिगतंतथा २० यस्तुतेव्याहृतान्प्रश्नान्प्रतिब्रूयाद्विभागवित् ॥ सत्वांमोक्षयिताशापादितिमामब्रवीदृषिः २१ गृहीतस्यत्वयाराजन्प्रा
णिनोऽपिबलीयसः ॥ सत्वभ्रंशोऽधिकस्यापिसर्वस्याशुभविष्यति २२ इतिचाप्यहमश्रौषंवचस्तेषांदयावताम् ॥ मयिसंजातहार्दानामथतेऽतर्हिताद्विजाः
२३ सोऽहंपरमदुष्कर्मावसामिनिरयेऽशुचौ ॥ सर्पयोनिमिमांप्राप्यकालाकांक्षीमहाद्युते २४ तमुवाचमहाबाहुर्भीमसेनोभुजंगमम् ॥ नचकुप्येमहासर्पनचात्मा
नंविगर्हये २५ यस्मादभावीभावीवामनुष्यःसुखदुःखयोः ॥ आगमेयदिवाऽपायेनतत्रग्लपयेन्मनः २६ दैवंपुरुषकारेणकोवंचयितुमर्हति ॥ दैवमेवपरंमन्ये
पुरुषार्थोनिरर्थकः २७ पश्यदैवोपघाताद्धिभुजवीर्यव्यपाश्रयम् ॥ इमामवस्थांसंप्राप्तमनिमित्तमिहाद्यमाम् २८ किंतुनाद्यानुशोचामितथात्मानंविना
४९ शितम् ॥ यथातुविपिनेन्यस्तान्भ्रातॄन्राज्यपरिच्युतान् २९ हिमवांश्चसुदुर्गोऽयंयक्षराक्षससंकुलः ॥ मांसमुद्वीक्षमाणास्तेप्रपतिष्यंतिविह्वलाः ३० विनष्ट
मथमांश्रुत्वाभविष्यंतिनिरुद्यमाः ॥ धर्मशीलामयातेहिबाध्यंतेराज्यगृद्धिना ३१

विवेकवित् २१ । २२ । २३ । २४ । २५ यस्मान्मनुष्यः पुण्यपापसाम्येनोपात्तजन्मा सुखस्यागमेकदाचिदभावीसामर्थ्यहीनः कदाचिद्भावीसामर्थ्यवान्अवश्यंभवति एवंसुखस्यापायेदुःख स्याप्यागमेऽपायेच तस्मादवश्यंभावित्वादन्यतरस्य सुखापायेदुःखागमेवामनोनग्लपयेन्नग्लानिंनयेत् २६ । २७ । २८ । २९ । ३० मयाराज्यगृद्धिनाराज्यकामेन धर्मशीलाःसत्य प्रतिज्ञा बाध्यंते परुषोक्तिभिरितिशेषः ३१

३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ वर्तिकापक्षिविशेषः ४२ । ४३ दक्षिणोभुजःस्फुरतीतिभविष्यतोऽनिष्टप्रशमनस्यलिंगं ४४ विकारःस्फुरणं ४५ । ४६ । ४७

अथवानार्जुनोधीमान्विषादमुपयास्यति ॥ सर्वास्त्रविदनाधृष्योदेवगंधर्वराक्षसैः ३२ समर्थःसमहाबाहुरेकोऽपिपुरुषर्षभः ॥ देवराजमपिस्थानात्प्रच्यावयितु
मंजसा ३३ किंपुनर्धृतराष्ट्रस्यपुत्रंदुर्द्यूतदेविनम् ॥ विद्विष्टंसर्वलोकस्यदंभमोहपरायणम् ३४ मातरंचैवशोचामिकृपणांपुत्रगृद्धिनीम् ॥ याऽस्माकंनित्यमा
शास्तेमहत्त्वमधिकंपरैः ३५ तस्याःकथंत्वनाथायामद्विनाशाद्भुजंगम ॥ अफलास्तेभविष्यंतिमयितेतेमनोरथाः ३६ नकुलःसहदेवश्चयमौचगुरुवर्तिनौ ॥
मद्बाहुबलसंगुप्तौनित्यंपुरुषमानिनौ ३७ भविष्यतोनिरुत्साहौभ्रष्टवीर्यपराक्रमौ ॥ मद्विनाशात्परिद्यूनाविति मेवर्तते मतिः ३८ एवंविधंबहुतदाविललापवृ
कोदरः ॥ भुजंगभोगसंरुद्धोनाशकच्चविचेष्टितुम् ३९ युधिष्ठिरस्तुकौंतेयोबभूवास्वस्थचेतनः ॥ अनिष्टदर्शनाद्घोरानुत्पातान्परिचिंतयन् ४० दारुणंह्यशिवं
नादंशिवादक्षिणतःस्थिता ॥ दीप्तायांदिशिवित्रस्ता रौतितस्याश्रमस्यह ४१ एकपक्षाक्षिचरणावर्तिकाघोरदर्शना ॥ रक्तंवमंतीददृशेप्रत्यादित्यमभा
सुरा ४२ प्रववौचानिलोरूक्षश्चंडःशर्करकर्षणः ॥ अपसव्यानिसर्वाणिमृगपक्षिरुतानिच ४३ पृष्ठतोवायसःकृष्णोयाहियाहीतिशंसति ॥ मुहुर्मुहुःस्फुरतिच
दक्षिणोऽस्यभुजस्तथा ४४ हृदयंचरणश्चापिवामोऽस्यपरितप्यते ॥ सव्यस्याक्ष्णोविकारश्चाप्यनिष्टःसमपद्यत ४५ धर्मराजोऽपिमेधावीमन्यमानोमहद्भ
यम् ॥ द्रौपदींपरिपप्रच्छक्वभीमइतिभारत ४६ शशंसतस्मैपांचालीचिरयातंवृकोदरम् ॥ सप्रतस्थेमहाबाहुर्धौम्येनसहितोनृपः ४७ द्रौपद्यारक्षणंकार्यमि
त्युवाचधनंजयम् ॥ नकुलंसहदेवंचव्यादिदेशद्विजान्प्रति ४८ सतस्यपदमुन्नीयतस्माद्देवाश्रमात्प्रभुः ॥ मृगयामासकौंतेयोभीमसेनंमहावने ४९ सप्राचींदि
शमास्थायमहतोगजयूथपान् ॥ ददर्शपृथिवींचिह्नैर्भीमस्यपरिचिह्निताम् ५० ततोमृगसहस्राणिमृगेंद्राणांशतानिच ॥ पतितानिवनेदृष्ट्वामार्गंतस्याविशन्नृ
पः ५१ धावतस्तस्यवीरस्यमृगार्थंवातरंहसः ॥ ऊरुवातविनिर्भग्नाद्रुमाव्यावर्जिताःपथि ५२ सगत्वातैस्तदाचिह्नैर्ददर्शगिरिगह्वरे ॥ रूक्षमारुतभूयिष्ठेनि
ष्पत्रद्रुमसंकुले ५३ ईरिणेनिर्जलेदेशेकंटकिद्रुमसंकुले ॥ अश्मस्थाणुक्षुपाकीर्णेसुदुर्गेविषमोत्कटे ॥ गृहीतंभुजगेंद्रेणनिश्चेष्टमनुजंतदा ५४ ॥ इतिश्रीम
हाभारतेआरण्यकेपर्वणिआजगरपर्वणियुधिष्ठिरभीमदर्शनेऊनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥ ॥ वैशंपायनउवाच ॥ युधिष्ठिरस्तमासाद्यसर्पभो
गेनवेष्टितम् ॥ दयितंभ्रातरंधीमानिदंवचनमब्रवीत् १ कुंतीमातःकथमिमामापदंत्वमवाप्तवान् ॥ कश्चायंपर्वताभोगप्रतिमःपन्नगोत्तमः २ सधर्मराजमाऽऽलक्ष्य
भ्राताभ्रातरमग्रजम् ॥ कथयामासतत्सर्वंग्रहणादिविचेष्टितम् ३

४८ । ४९ यूथपान्पतितान्ददर्शेत्यन्वयः ५० । ५१ । ५२ । ५३ ईरिणेऊषरे क्षुपाह्रस्ववृक्षाः । 'ह्रस्वशाखाशिफःक्षुपः'इत्यमरः ५४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे ऊना
शीत्यधिकशततमोऽध्यायः ॥ १७९ ॥ ॥ ७ ॥ युधिष्ठिरइति १ । २ । ३

प्राणवान्वायुभक्षः सर्पइवनतुसर्पः ४ । ५ । ६ । ७ । ८ । ९ किमाहृत्यविदित्वावेविस्वस्यसदृशाकिमस्वंसर्वज्ञत्वंचसूचयति १० । ११ । १२ । १३ । १४ । १५ । १६ नहुषस्तुज्ञानमेवपुरुषार्थ
इतिमत्वा नचान्यदपिकामयेइतिस्वस्यज्ञानादन्यत्रवैराग्यप्रदर्शनकामः प्रश्नमेवदृणोतिप्रश्नानिति १७ । १८ ब्राह्मणेनेतिचर्चंकरोतीतिवद्बाविनींवृत्तिमाश्रित्य अब्राह्मणेऽपिमुमुक्षौब्रह्मवि
द्वाचिब्राह्मणशब्दप्रयोगः श्रुतौ 'अमौनंचमौनंचनिर्विद्याथब्राह्मणः'इति । श्रवणमननात्मकममौनं निदिध्यासनात्मकंमौनंच निर्विद्यनिष्पाद्य ब्राह्मणोब्रह्मविद्भवतीतिदर्शनात् केवलंनिर्वि
शेषंवेतिपुरुषार्थत्वेनजानातिचेत्तर्हि तद्वक्ष्यामिमतिसंवादाय १९ तत्रयान्येवब्रह्मविल्लक्षणानि तानि ब्रह्मविद्यासाधकानीतिमन्वानोब्रह्मविदोलक्षणंब्रह्मस्वरूपंचपृच्छति ब्राह्मणइति
॥ भीमउवाच ॥ अयमार्यमहासत्वोभक्षार्थंमांगृहीतवान् ॥ नहुषोनामराजर्षिःप्राणवानिवसंस्थितः ४ ॥ युधिष्ठिरउवाच ॥ मुच्यतामयमायुष्मन्भ्राता मेऽमि
तविक्रमः ॥ वयमाहारमन्यंतेदास्यामःक्षुन्निवारणम् ५ ॥ सर्पउवाच ॥ आहारोराजपुत्रोऽयंमयाप्राप्तोमुखागतः ॥ गम्यतांनेहस्थातव्यंश्वोभवानपिमेभवेत् ६
व्रतमेतन्महाबाहोविषयंममयोव्रजेत् ॥ समेभक्षोभवेत्तातत्वंचापिविषयेमम ७ चिरेणाद्यमयाऽऽहारःप्राप्तोऽयमनुजस्तव ॥ नाहमेनंविमोक्ष्यामिनचान्यमभि
कांक्षये ८ ॥ युधिष्ठिरउवाच ॥ देवोवायदिवादैत्यउरगोवाभवान्यदि ॥ सत्यंसर्पवचोब्रूहिपृच्छतित्वांयुधिष्ठिरः ॥ किमर्थंचत्वयाग्रस्तोभीमसेनोभुजंगम ९
किमाहृत्यविदित्वावाप्रीतिस्तेस्याद्भुजंगम ॥ किमाहारंप्रयच्छामिकथंमुंचेद्भवानिमम् १० ॥ सर्पउवाच ॥ नहुषोनामराजाहमासंपूर्वस्तवानघ ॥ प्रथितः
पंचमःसोमादायोःपुत्रोनराधिप ११ क्रतुभिस्तपसाचैवस्वाध्यायेनदमेनच ॥ त्रैलोक्यैश्वर्यमव्यग्रंप्राप्तोऽहंविक्रमेणच १२ तदैश्वर्यंसमासाद्यदर्पोमामगमत
दा ॥ सहस्रंहिद्विजातीनामुवाहशिबिकांमम १३ ऐश्वर्यमदमत्तोऽहमवमन्यततोद्विजान् ॥ इमामगस्त्येनदशामानीतःपृथिवीपते १४ नतुमामजहात्प्रज्ञायाव
दद्येतिपांडव ॥ तस्यैवानुग्रहाद्राजन्नगस्त्यस्यमहात्मनः १५ षष्ठेकालेमयाऽऽहारःप्राप्तोऽयमनुजस्तव ॥ नाहमेनंविमोक्ष्यामिनचान्यदपिकामये १६ प्रश्ना
नुच्चारितानद्यव्याहरिष्यसिचेन्मम ॥ अथपश्चाद्विमोक्ष्यामिभ्रातरंतेवृकोदरम् १७ ॥ युधिष्ठिरउवाच ॥ ब्रूहिसर्पयथाकामंप्रतिवक्ष्यामितेवचः ॥ अपिचे
च्छक्नुयांप्रीतिमाहर्तुंतेभुजंगम १८ वेद्यंयद्ब्राह्मणेनेहतद्भवान्वेत्तिकेवलम् ॥ सर्पराजततःश्रुत्वाप्रतिवक्ष्यामितेवचः १९ ॥ सर्पउवाच ॥ ब्राह्मणःकोभवेद्रा
जन्वेद्यंकिंचयुधिष्ठिर ॥ ब्रवीह्यतिमतिंत्वांहिवाक्यैरनुमिमीमहे २० ॥ युधिष्ठिरउवाच ॥ सत्यंदानंक्षमाशीलमानृशंस्यंतपोघृणा ॥ दृश्यंतेयत्रनागेंद्रसब्रा
ह्मणइतिस्मृतः २१ वेद्यंसर्पपरंब्रह्मनिर्दुःखमसुखंचयत् ॥ यत्रगत्वानशोचंतिभवतःकिंविवक्षितम् २२

२० सत्यंयथार्थमहिंस्रंचवचनं आनृशंस्यमनैष्ठुर्यं तपःस्वधर्माचरणं घृणाकृपा २१ परंनिर्विशेषं सविशेषस्यवाङ्मनसगोचरस्यश्रुत्यैवाब्रह्मत्वोक्तेः 'यन्मनसानमनुतेयेनाहुर्मनोमतं । तदेवब्र
ह्मत्वंविद्धिनेदंयदिदमुपासते'इत्यादिना । ब्रह्म त्रिविधपरिच्छेदशून्यंवस्तु । तत्रपरमते परमाणोर्नित्यत्वात् कालतःपरिच्छेदाभावेऽपिदेशतोवस्तुतश्चपरिच्छेदोऽस्ति तथाऽऽकाशस्य
नित्यत्वाद्विभुत्वाच्चकालतोदेशतश्चतदभावेऽपिवस्तुतःपरिच्छेदोऽस्त्येव अयमपित्रिविधः । 'वृक्षस्यस्वगतोभेदः पत्रपुष्पफलादितः ॥ वृक्षांतरात्सजातीयः विजातीयःशिलादितः'इत्युक्तल
क्षणः । सएवपरमतेईश्वरस्यनित्यज्ञानादिभ्यः आत्मांतराकाशादिभ्यश्चास्तीति तस्याप्यभावोऽत्राभिमतः अतएवसुखादिधर्मवत्त्वंनभवति । यत्रअखंडैकरसेगत्वानशोचति शोकायतनस्य
हृदयस्यैवाभावात्पुनःसंसारंनप्राप्नोतीत्यर्थः । एवंस्वमतमुक्त्वा परमतंजिज्ञासते भवतःकिंविवक्षितमिति २२

सर्पस्तुब्राह्मणपदेनजातिमात्रंविवक्षित्वा शूद्रेतल्लक्षणंव्यभिचारयति चातुर्वर्ण्यमितिसार्द्धेन चतुर्णांवर्णानांहितं सत्यंप्रमाणंच धर्मव्यवस्थापकं ब्रह्म शूद्रवेदः । शूद्राचारस्मृतेरपि वेदमूलत्वा त्सर्वोप्याचारादिः श्रुतिमूलकइत्यर्थः । एवंचसत्यादिकं यदिशूद्रेऽप्यस्ति तर्हिसोपि ब्राह्मणएवस्यादित्याह शूद्रेष्वपीति २३ सुखदुःखातीतंपदमेवनास्तीत्युक्तरूपं ब्रह्माप्याक्षिपतिवेद्य मिति पदंपदनीयंप्राप्यस्थानं २४ इतरस्तुब्राह्मणपदेन ब्रह्मविदंविवक्षित्वा शूद्रादेरपि ब्राह्मणत्वमभ्युपगम्यपरिहरतिशूद्रेत्विति शूद्रलक्ष्मकामादिकं नब्राह्मणेऽस्ति नापिब्राह्मणलक्ष्मशमा दिकंशूद्रेऽस्तीत्यर्थः । शूद्रोऽपिशमाद्युपेतो ब्राह्मणएव ब्राह्मणोऽपिकामाद्युपेतः शूद्रएवेत्यर्थः २५ । २६ यदप्युक्तंसुखदुःखातीतं पदंनास्ति तदपिअनुवादपूर्वकमभ्युपगमेनैव परिहरतिसार्धे न यत्पुनरिति पदंपदनीयं प्रागप्राप्तं सत्कर्मणाप्राप्यंस्थानं तत्सुखदुःखाभ्यां हीनंनास्ति ब्रह्मलोकस्थानामपिऐश्वर्यतारतम्यकृतंदुःखमस्त्येव किंपुनर्लोकांतरस्थानाम् २७ एतदेवदृष्टांतेना पवदतियथेति यथाशीतलस्यजलस्यमध्येऽभ्यंतरे उष्णंअग्निर्नास्ति । नापिउष्णेऽग्नौ शीततायुक्तंजलं तयोःपरस्परविरोधेनसंयोगायोगात् २८ एवंपदंपदनीयं ज्ञेयंवस्तु क्वचिद्देशे कालेवा सुखदुःखाभ्यांहीनं प्राप्तंनास्ति आध्यासिकयोःसुखदुःखयोराधिष्ठानेन ज्ञेयवस्तुनासह सर्पस्यरज्ज्वेव कालत्रयेऽपि संबंधो नास्तीत्यर्थः । ओहाहमतोअस्यओदितश्चोतिनिपातस्यनः

॥ सर्पउवाच ॥ चातुर्वर्ण्यंप्रमाणंचसत्यंचब्रह्मचैवहि ॥ शूद्रेष्वपिचसत्यंचदानमक्रोधएवच ॥ आनृशंस्यमहिंसाचघृणाचैवयुधिष्ठिर २३ वेद्यंयच्चात्रनिर्दुः खमसुखंचनराधिप ॥ ताभ्यांहीनंपदंचान्यन्नतदस्तीतिलक्षये २४ ॥ युधिष्ठिरउवाच ॥ शूद्रेतुयद्भवेल्लक्ष्मद्विजेतच्चनविद्यते ॥ नवैशूद्रोभवेच्छूद्रोब्राह्मणो नचब्राह्मणः २५ यत्रैतल्लक्ष्यतेसर्पवृत्तंसब्राह्मणःस्मृतः ॥ यत्रैतन्नभवेत्सर्पतंशूद्रमितिनिर्दिशेत् २६ यत्पुनर्भवताप्रोक्तंनवेद्यंविद्यतीतिच ॥ ताभ्यांही नमतोऽन्यत्रपदंनास्तीतिचेदपि २७ एवमेतन्मतंसर्पताभ्यांहीनंनविद्यते ॥ यथाशीतोष्णयोर्मध्येभवेन्नोष्णंनशीतता २८ एवंवैसुखदुःखाभ्यांहीनंनास्तिपदं क्वचित् ॥ एषाममममतिःसर्पयथावामन्यतेभवान् २९ ॥ सर्पउवाच ॥ यदितेवृत्ततोराजन्ब्राह्मणःप्रसमीक्षितः ॥ वृथाजातिस्तदाऽऽयुष्मन्कृतिर्यावन्नविद्यते ३० ॥ युधिष्ठिरउवाच ॥ जातिरत्रमहासर्पमनुष्यत्वेमहामते ॥ संकरात्सर्ववर्णानांदुष्परीक्ष्येतिमेमतिः ३१ सर्वेसर्वास्वपत्यानिजनयंतिसदानराः ॥ वाङ्मै थुनमथोजन्ममरणंचसमंनृणाम् ३२ इदमार्षंप्रमाणंचयेयजामहइत्यपि ॥ तस्माच्छीलंप्रधानेष्टंविदुर्येतत्त्वदर्शिनः ३३

घुमास्येतिसूत्रेणआतईत्वं हाङ्गपद्यतेश्चगत्यर्थत्वात्तज्ज्ञानार्थत्वाच्चहीनंप्राप्तमितिपदंज्ञेयमितिचव्याख्यातं अन्यथातुप्रश्नोत्तरयोरेकरूपत्वादेषाममममतिरितिवाक्यशेषे स्वमतेःपृथक्करणं नोपपद्यते । अन्येतु सिद्धांते ताभ्यांहीनंपदंकिंनास्ति अपितुअस्त्येवेति काकाव्याचक्षते । अयंभावः यत्कर्मप्राप्यंस्थानं तत्सुखदुःखवर्जितंकदाचिदपिनास्ति यत्तुज्ञेयंवस्तु नित्यप्राप्तं प्रमाणसामर्थ्यात्कंठगतविस्मृतचामीकरवत् तवकंठेचामीकरं त्वमेवब्रह्मेतिच वाक्यैकसिद्धमज्ञानापनयनमात्रमपेक्षते नतत्रसुखदुःखसंबंधोऽस्ति अकर्मजत्वात्तत्प्राप्तेः अतएवच तस्यानित्य त्वमपिनअजन्यत्वादिति २९ प्रथमप्रश्नस्योत्तरमाक्षिपति यदीति ३० उत्तरमाह जातिरिति ३१ वागादीनामिव मैथुनस्यापिसाधारण्याज्जातिर्दुर्ज्ञेया तथाचश्रुतिः । 'नचैतद्विद्मोब्राह्मणा स्मोवयमब्राह्मणावा'इतिब्राह्मण्येसंशयमुपन्यस्यति ३२ ननुजात्यनिश्चये कथंब्राह्मणोऽहमित्याद्यभिमानपुरःसरंयागादौप्रवर्तेतेत्याशंक्याह इदमार्षमिति । अत्र येयजामहइत्यनेनच येव यंस्मोब्राह्मणाअन्येवातेवयंयजामह इतिब्राह्मण्येऽनवधारणंदर्शितं मंत्रलिंगमपि । यएवास्मिससन्यजेइति । नन्वेवंस्वस्याब्राह्मणत्वपक्षे यज्ञस्यानिष्टकरत्वमापततीत्याशंक्य तत्परिहा राय यागेयजमानस्यप्रवरवरणंक्रियतेयाज्ञिकैः तत्राग्निहोतेतिमंत्रे 'गौतमवदयास्यवदंगिरोवद्ब्राह्मणवदितिकुर्वीत तस्यचप्रयोजनमब्राह्मणस्यापियजमानस्यब्राह्मणत्वसंपादनं तस्मादा चारएवब्राह्मण्यनिश्चयेहेतुर्वेदप्रामाण्यादित्युपसंहरति तस्मादिति प्रधानंचतदिष्टंचेतिकर्मधारयः ३३

कर्मैवब्राह्मण्यहेतुरित्याह प्रागिति नाभिवर्धनान्नालच्छेदनात् ३४ जायतेसंपुष्यते वेदसंयोगानंतरमेव ब्राह्मण्यमुदेति तद्वत्प्रवरणेनापीतिभावः द्वैधेजातिसंशयेसति ३५ वृत्तंवैदिकसंस्का रोयदिनविद्यतेतर्हि सर्वाःप्रजाः कृतकृत्याः शूद्रतुल्याः तथाचस्मृतिः। 'नशूद्रेपातकंकिंचिन्नचसंस्कारमर्हति' इतितेषांसंस्कारानर्हत्वनिष्पापत्वाभिधानात्कृतकृत्यत्वंदर्शयति तद्वत् त्रैवर्णिका अपिस्युरित्यर्थः अत्रवृत्ताभावे ३६ उपसंहरतियत्रेति ३७ । ३८ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥ एवंयुधिष्ठिरमुखेनब्रह्मविलक्षणानित्र प्रपंचनिरूप्य सर्पमुखेनचित्तशुद्धिद्वारा आत्मविविदिषोत्पादनद्वारावा ब्रह्मप्राप्त्युपायान्दानादीन्विधातुमयमध्याय आरभ्यते भवानेतादृशइति अनुत्तमागतिः स्वर्गाप्तिः १ । २ । ३ गु रुलाघवंगौरवंलाघवंचेत्यर्थः ४ कार्यगरीयस्त्वमेवसामान्यतोविवृणोति कस्माच्चिदिति अयमत्रनिर्णयः । 'पिशुनायाभयंदातुंनसत्यं मतिमांस्त्यजेत् । साधूनामभयायेह त्यजेत्सत्यमपिध्रुवं ।

प्राङ्नाभिवर्धनात्पुंसोजातकर्मविधीयते ॥ तत्रास्यमातासावित्रीपितात्वाचार्यउच्यते ३४ तावच्छूद्रसमोह्येषयावद्वेदेनजायते ॥ तस्मिन्नेवंमतिद्वैधेमनुः स्वायंभुवोऽब्रवीत् ३५ कृतकृत्याःपुनर्वर्णायदिवृत्तंनविद्यते ॥ संकरस्त्वत्रनागेंद्रबलवान्प्रसमीक्षितः ३६ यत्रेदानींमहासर्पसंस्कृतंवृत्तमिष्यते ॥ तंब्राह्मणम हंपूर्वमुक्तवान्भुजगोत्तम ३७ ॥ सर्पउवाच ॥ श्रुतंविदितवेद्यस्यतववाक्यंयुधिष्ठिर ॥ भक्षयेयमहंकस्माद्भ्रातरंतेवृकोदरम् ३८ ॥ इतिश्रीमहाभारतेआर ण्यकेपर्वणिआजगरपर्वणिअजगरयुधिष्ठिरसंवादेअशीत्यधिकशततमोऽध्यायः ॥ १८० ॥ ॥ युधिष्ठिरउवाच ॥ भवानेतादृशोलोकेवेदवेदांगपारगः ॥ ब्रूहि किंकुर्वतःकर्मभवेद्गतिरनुत्तमा १ ॥ सर्पउवाच ॥ पात्रेदत्वाप्रियाण्युक्त्वासत्यमुक्त्वाचभारत ॥ अहिंसानिरतःस्वर्गंगच्छेदितिमतिर्मम २ ॥ युधिष्ठिरउवाच ॥ दानाद्वासर्पसत्याद्वाकिमतोगुरुदृश्यते ॥ अहिंसाप्रिययोश्चैवगुरुलाघवमुच्यताम् ३ ॥सर्पउवाच॥ दानंचसत्यंतत्त्वंवाअहिंसाप्रियमेवच ॥ एषांकार्यगरीयस्त्वा दृश्यतेगुरुलाघवम् ४ कस्माच्चिद्दानयोगाद्धिसत्यमेवविशिष्यते ॥ सत्यवाक्याच्चराजेंद्रकिंचिद्दानंविशिष्यते ५ एवमेवमहेष्वासप्रियवाक्यान्महीपते ॥ अहिं सादृश्यतेगुर्वीततश्चप्रियमिष्यते ६ एवमेतद्भवेद्राजन्कार्यापेक्षमनंतरम् ॥ यदभिप्रेतमन्यत्तेब्रूहियावद्ब्रवीम्यहम् ७ ॥ युधिष्ठिरउवाच ॥ कथंस्वर्गेगतिःसर्प कर्मणांचफलंध्रुवम् ॥ अशरीरस्यदृश्येतप्रब्रूहिविषयांश्चमे ८ ॥सर्पउवाच॥ तिस्रोवैगतयोराजन्परिदृष्टाःस्वकर्मभिः ॥ मानुष्यंस्वर्गवासश्चतिर्यग्योनिश्चतत्त्रिधा ९

स्तेनेषुचप्रियाख्यानादहिंसाश्रेयसीमता ॥ अहिंसातःपरात्माख्यप्रियाख्यानं विशिष्यते'। एतच्चपुत्रांस्तत्त्वोपदेशेनप्रव्राज्य पितरंदुःखयतानारदेन मदालसया चकृतं ५ तदेतदाह ततश्चप्रि यमिष्यते अहिंसातोपिप्रियंगुरुतरमित्यर्थः ६ । ७ देहातिरिक्तमात्मानंसाधयितुं प्राक्कर्मसद्भावंदर्शयिष्यन् कर्मणांनिष्फलत्वंतावदाशंकते कथमिति अशरीरस्यनष्टदेहस्य कथंस्वर्गेगतिः कथंवातत्र विषयोपभोगः कथंवाकर्मफलस्यध्रुवत्वमप्रत्याख्येयत्वमित्यर्थः सदेहस्यह्येतत्सर्वंयुज्यते नतुदेहहीनस्येतिभावः ८ अत्रोत्तरमाहतिस्रइति यथामृद्विकारेष्वपि घटशरावोदंचना दिषु कुलालगतौ संकल्पक्रियाभेदौ वैषम्यहेतूभवतः एवंभौतिकेष्वपि सुरनरतिर्यक्शरीरेषु तदन्यकर्त्रात्मगतसंकल्पक्रियाभेदौ वैषम्यहेतूभवतइतिभावः तथाचश्रुतयः । 'तंविद्याकर्मणी समन्वारभेतेपूर्वप्रज्ञाच । योनिमन्येप्रपद्यंते शरीरत्वाय देहिनः । स्थाणुमन्येतुसंयंति यथाकर्मयथाश्रुतम्'इत्याद्याः । तंत्यक्तदेहं विद्याउपासनाकर्मयज्ञादि पूर्वप्रज्ञाप्राग्भवीयसंस्कारः समन्वारभेतेअनुगच्छतइतिश्रुतिपदानामर्थः स्थाणुंस्थाणुत्वं योनिंसुरनरतिर्यग्रूपां तद्गतित्रयं त्रिधाप्रत्येकमुत्तममध्यमाधमभावेन त्रिप्रकारं ९

एतदेवविवृणोतितत्रेत्यादिना कारणैः कर्मभिः १० विपरीतैरिति अयमर्थः पुण्यपापयोःसाम्येनमानुषत्वंप्राप्य पुण्याधिक्येस्वर्गंगच्छति पापाधिक्येनरकं तत्रच तदधिकांशयोर्भोगेनक्षयेजाते सति पुण्यपापयोःसाम्येस्वर्गादधस्तनं तिर्यग्योनेरुपरितनंचपुनर्मानुषत्वंगच्छतीति ११ । १२ तत्रापितिर्यग्योनौविशेषमाहतिर्यग्योन्याइति पृथग्भावस्ततोमुक्तिर्मनुष्यार्थेमनुष्यजन्मलाभायविधीयतेवेदेनबोध्यते यतोगवादिभ्योगोजातितएवयज्ञेउपयुक्ताद्देवत्वमपिदृश्यते प्रत्यक्षमुपलभ्यतेबहवत्राह्मणे । 'पशुर्वैनीयमानःसमृत्युंप्रापश्यत्सदेवान्नान्वकामयतैतुंतंदेवा अब्रुवन्नेहिस्वर्गंवैत्वालोकंगमयिष्यामः' इति १३ सोऽयमिति यथालोकेकार्यवाश्चरतिइतस्ततःपर्यटनंकरोति तद्रहितस्तुस्वस्थानेसुखमास्ते एवमिहापिसंसारमोक्षावितिभावः । महतिब्रह्मण्यात्मानंजीवमवस्थापयते उपाधित्यागेनमहाकाशेघटाकाशमिवप्रलीनंकरोति १४ एतदकरणेदोषमाहजातइति सचदेहवान्देहाभिमानीआत्माजीवः बलवानहंत्रोपगृहीतः जातोजातः पुनःपुनर्लब्धजन्मा फलार्थः सुखकामः भुंक्ते देहयोगजंफलमितिशेषः एतेनफलार्थिनःप्रवृत्तिस्ततःकर्म ततोजन्म ततःफलभोगस्ततोरागोऽभुक्तेरागानुदयात्ततःफलार्थितेतिसंसाराविच्छेदोदर्शितः । यस्तुनिष्पृक्तःनिर्गतःपृक्तंफलसंयोगोयस्मात्सफलासंगीत्यर्थः सप्रजानांलक्षणंज्ञापकंजन्ममरणादिकमसाधारणंधर्मंभावयतीतितथा । निष्कामकर्मकर्ताचित्तशुद्धयतिशयाज्जन्ममर

तत्रवैमानुषाल्लोकाद्दानादिभिरतंद्रितः ॥ अहिंसार्थसमायुक्तैःकारणैःस्वर्गमश्नुते १० विपरीतैश्चराजेंद्रकारणैर्मानुषोभवेत् ॥ तिर्यग्योनिस्तथाताततविशेषश्चात्रवक्ष्यते ११ कामक्रोधसमायुक्तोहिंसालोभसमन्वितः ॥ मनुष्यत्वात्परिभ्रष्टस्तिर्यग्योनौप्रसूयते १२ तिर्यग्योन्याःपृथग्भावोमनुष्यार्थेविधीयते ॥ गवादिभ्यस्तथाश्वेभ्योदेवत्वमपिदृश्यते १३ सोयमेताःगतीस्तातजंतुश्चरतिकार्यवान् ॥ नित्येमहतिचात्मानमवस्थापयतेद्विजः १४ जातोजातश्चबलवान्भुंक्तेचात्मासदेहवान् ॥ फलार्थस्तातनिष्पृक्तःप्रजालक्षणभावनः १५ ॥ युधिष्ठिरउवाच ॥ शब्देस्पर्शेचरूपेचतथैवरसगंधयोः ॥ तस्याधिष्ठानमव्यग्रोब्रूहिसर्पयथातथम् १६ किंनगृण्हासिविषयान्युगपत्त्वंमहामते ॥ एतावदुच्यतांचोक्तंसर्वंपन्नगसत्तम १७ ॥ सर्पउवाच ॥ यदात्मद्रव्यमायुष्मन्देहसंश्रयणान्वितम् ॥ करणाधिष्ठितंभोगानुपभुंक्तेयथाविधि १८ ज्ञानंचैवात्रबुद्धिश्चमनश्चभरतर्षभ ॥ तस्यभोगाधिकरणेकरणानिनिबोधमे १९

णादीन्दोषान्पश्यतीत्यर्थः । यद्वाप्रजानांकार्यमात्रस्यलक्षणमनिर्वचनीयत्वंभावयतीतितथा असंगःपुमानधिष्ठानज्ञानेन तत्राध्यस्तस्यसंसारस्यमिथ्यात्वं शुक्तिरजतस्येवपश्यतीत्यर्थः १५ इदमाक्षिपतिशब्देइति तस्यप्रजालक्षणलक्ष्यस्यानिर्वचनीयस्याहमर्थप्रसिद्धप्रजारूपकार्यस्यकिमधिष्ठानं तदाइदमर्थप्रसिद्धे शब्दादौविषये ग्राह्येसति किंवस्याधिष्ठानम् । यथाप्रकाश्यप्रकाशकयोर्घटसूर्ययोरधिष्ठानेभूनभसीभिन्नेदृष्टे तद्वदहमिदमर्थयोरप्यधिष्ठानेपृथक्वाच्येइतिभावः १६ यदितुतर्कमतेइवप्रकाश्यप्रकाशकयोःसुखज्ञानयोरेकात्माधिष्ठानत्वमिष्टंतर्हि तद्वदेवयुगपज्ज्ञानानुपलब्धिलिंगेनासिद्धंमनोनामकर्मात्मातिरिक्तंद्रव्यांतरमभ्युपेयं तेनविनाऽऽत्मनितत्संयोगवैजात्यसिद्धस्यकार्यवैजात्यस्योदयासंभवादितिशंकते किंनेति १७ उत्तरमाहयदिति यत्परमतप्रसिद्धमात्मरूपंद्रव्यंसुखदुःखादिगुणानामाश्रयभूतं तद्देहसंश्रयणेनस्थूलसूक्ष्मशरीररूपोपाध्यालंबनेनहेतुनाअन्वितं बुद्ध्यादियुक्तंभवति आत्मनि सुखादिमानमवस्थात्रयोपाधिकंनस्वाभाविकमवस्थांतरगतस्यसुखादेरवस्थांतरेदर्शनाभावात् । ततउपाधिविशिष्टमात्मद्रव्यं करणैर्वक्ष्यमाणैरधिष्ठितंसत्भोगान्भुंक्ते तथाचश्रुतिः । 'आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः' इतियथाविधिकर्मानुरूपम् १८ ज्ञानंरूपाद्याकाराधीवृत्तिस्तेनतत्साधनानींद्रियाणिगृह्यंते बुद्धिःकर्त्रादिधर्मकंविज्ञानम् । 'विज्ञानंयज्ञंतनुते'इतिश्रुतेः मनःसर्वबाह्यकरणानुग्राहकमंतःकरणं भोगाधिकरणेदेहे एतेनविकारभाजाकर्त्रादीनाकरणत्ववचनेन तदितरदकर्त्रात्मकमधिष्ठानंविवेचितम् १९

द्वितीयप्रश्नोत्तरमाहमनसेति विषयस्यग्राहकस्त्वेनायतनंस्थानमिंद्रियं तत्स्थेनमनसाकरणेन भूतात्माजीवः क्षेत्रात्तेनतेनद्वारेणनिःसृतः क्रमशइमान्रूपादीन्पर्येति । अन्यत्रमनाअभूवंनाश्रौषमन्यत्रमनाअभूवंनापश्यमित्याद्यनुभवस्यश्रुत्यैवप्रदर्शितत्वान्मनोनामअव्यापकंकरणंसिद्धं २० तत्रेति तत्रमनस्तत्रविषयग्रहणेकर्तव्येसतिविधीयते बुद्ध्याकस्मिंश्चिद्व्यापारेविष्टं क्रियतेऽतोव्यापारकालभेदान्मनोयुगपद्विषयान्नगृण्हातीत्यर्थः २१ बुद्धेरपिपरमेश्वरत्वमाहसइति योबुद्धिमनइंद्रियैः करणैरुपेतःसन् । भोक्तास्वतस्त्वभोक्तेत्युक्तः सआत्माभ्रुवोरंतरमाश्रितइतिगुरूक्तयुक्त्यातदुपासकस्यतदुपलब्धिस्थानमुक्तं । बुद्धिद्रव्येषुरूपादिमत्सुग्राह्येषु सृजतिप्रेरयति अयस्कांतइवलोहं परावरात्मानात्मविषयत्वेनोत्तमाधमां कुलालश्चक्रमिव बुद्धिर्व्यापाराविष्टंमनोव्यापारयत्यात्मातुनतथेत्यर्थः २२ ननुबुद्धेरेवकर्तृत्वेन सर्वव्यवहारनिर्वाहेसति किंक्षिप्तदशेनात्मांतरेणेत्याशंक्याहबुद्धेरिति बुद्धितद्भावयोर्याविदनाज्ज्ञानंसाक्षिरूपं बुधैर्योगिभिर्बुद्धेःसकाशाद्विविक्ततयादृश्यते युक्त्यानुभवेनचगृह्यते एषतदेवज्ञानं क्षेत्रज्ञभावनआत्मप्रकाशकोविधिरज्ञातज्ञापनं स्वप्रकाशमित्यर्थः नहिउदयव्ययवत्याबुद्धेरात्मत्वंसंभवति कृतनाशाकृताभ्यागमप्रसंगादित्यन्यत्रविस्तरः २३ मनसइति बुद्धिमनसोरन्यतरस्यकर्तृत्वंकरणत्वंवाऽस्तु किमुभयकल्पनयेत्याशयः २४ कार्यभेदाद्द्वयंकल्प्यतइत्याह बुद्धिरिति बुद्धिरंतीवात्मानुगाअत्यंतमात्मनासहतादात्म्यंप्राप्तालोहपिंडइवाग्निना अतः साआत्मचैतन्यानुविद्धा उत्पातेनोत्क्रांत्यादिनाविधीयते वशीक्रियते । तथाचोत्पातत्र्यात्मअनुगतआत्माप्यु

मनसातातपर्येतिक्रमशोविषयानिमान् ॥ विषयायतनस्थेनभूतात्माक्षेत्रनिःसृतः २० तत्रचापिनरव्याघ्रमनोजंतोर्विधीयते ॥ तस्माद्युगपदत्रास्यग्रहणंनोपपद्यते २१ सआत्मापुरुषव्याघ्रभ्रुवोरंतरमाश्रितः ॥ बुद्धिंद्रव्येषुसृजतिविविधेषुपरावराम् २२ बुद्धेरुत्तरकालाचवेदनादृश्यतेबुधैः ॥ एषवैराजशार्दूलविधिःक्षेत्रज्ञभावनः २३ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ मनसश्चापिबुद्धेश्चब्रूहिमेलक्षणंपरम् ॥ एतदध्यात्मविदुषांपरंकार्यंविधीयते २४ ॥ सर्पउवाच ॥ बुद्धिरात्मानुगातीवउत्पातेनविधीयते ॥ तदाश्रिताहिसाज्ञेयाबुद्धिस्तस्यैषिणीभवेत् २५ बुद्धिरुत्पद्यतेकार्यान्मनस्तूत्पन्नमेवहि ॥ बुद्धेर्गुणविधानेनमनस्तद्गुणवद्भवेत् २६

त्पातवान्जलचंद्रचांचल्यन्यायेनभवति एतेन बुद्ध्यात्मनोरन्योन्याध्यासोदर्शितः इममेवाश्रित्यतार्किकास्तयोर्धर्मधर्मिभावमुपयंति । नन्वध्यस्यंतामुपहितेषूपाधिधर्माः घटाकाशेइवघटगतिर्नतुविपरीतमपिघटेआकाशगतस्यास्पर्शत्वादेरदर्शनादित्याशंक्याह तदाश्रिताहिसाज्ञेयेति प्रसिद्धंह्यात्मचैतन्यंबुद्ध्याश्रितमतएवबौद्धाबुद्धिरेवचेतनेतिवदंति घटशब्दोऽयमितिदृष्टातेऽपि शब्दवत्त्वस्याकाशधर्मस्यघटेऽध्यासदर्शनात् नन्वप्रान्योन्यास्मिन्नन्योन्यधर्मयोरेवाध्यासउतधर्मिणोरपि । आद्येधर्मिणोःसमसत्त्वेनद्वैतापत्तिः । अंत्येद्वयोरपिमिथ्यात्वापत्त्याशून्यशेषतापत्तिरित्याशंक्याहबुद्धिस्तस्यैषिणीभवेदिति बुद्धिःस्वरूपसिद्ध्यर्थमात्मानमधिष्ठानमिच्छति रज्जूरगइवरज्जुं । तथाचधर्माणामेवान्योन्याध्यासो नतुधर्मिणोः शुक्तौरजतस्येव रजतेशुक्तेरध्यासाभावात् अतोनोक्तदोषद्वयप्रसंगः २५ नन्वापद्यतांद्वैतंनतुसर्वप्रमाणसिद्धायाबुद्धेर्मिथ्यात्वंवक्तुंशक्यमित्याशंक्याह बुद्धिरुत्पद्यतेकार्यादिति विषयेंद्रियसंयोगादेः कार्याद्बुद्धिरुत्पद्यते तन्निवृत्तौनिवर्ततइतिबुद्धेरनित्यत्वंसिद्धं नित्यानित्ययोश्चात्मबुद्ध्योर्नधर्मधर्मिभावःसिद्ध्यति घटेयावद्रूपाभावस्यादर्शनेनात्मनियावद्दुःखाभावलक्षणस्यमोक्षस्यासिद्धेः । नापिसंयोगः सहिउभयकर्मजोवाऽन्यतरकर्मजोवा मल्लयोःपक्षिवृक्षयोर्वादृष्टो नचविभुनाऽऽत्मनाताद्दशःसंयोगोबुद्धेरस्ति आकाशेनेवघटस्य । यत्तुतयोरपिसंयोगमभ्युपगच्छंति तद्युक्तिशून्यं परिभाषामात्रं । तस्माद्रज्जूरगयोरिवानिर्वचनीयस्तयोःसंबंधइति रज्जुवदात्मानित्यो रज्जूरगवदाविर्भावतिरोभाववतीबुद्धिर्मिथ्येतियुक्तमुत्पश्यामः । नन्वेवंबुद्धेराकस्मिकत्वे तद्धर्माणांदुःखादीनामप्याकस्मिकत्वापातात्कृतनाशा-

कृताभ्यागमस्तदवस्थएवेत्याशंक्याह मनस्तूत्पन्नमेवहीति बुद्धेर्नाशेऽपि तज्जन्यवासनावंतुसंतानात्मकंमनोऽस्त्येव ततश्चपूर्ववासनयाबुद्धिरुत्पद्यते बुद्ध्याचवासनाविवर्धतइत्यनादिर नंताचैषाबुद्धिवासनयोर्बीजांकुरवत्संततिः तदेतदाहबुद्धेरिति गुणविधानेनसुखाद्याकारपरिणामधारणेनगुणविधिर्नास्तीतिपाठे गुणविधिरुपादानत्वेनास्ति किंतूपादेयत्वमेव मनस्तूपादानं पटतंतुवदनयोर्भेदइत्यर्थः तद्गुणवत्तद्वासनायुक्तं २६ विशेषणं व्यावर्तकं तस्मात्कार्यभेदान्मनोबुद्ध्योर्भेदस्तेनच वासनाबीजनाशात् संसारांकुरो नजायतइतिसिद्धं २७। २८। २९। ३०

एतद्विशेषणंतातमनोबुद्ध्योर्यदंतरम् ॥ त्वमप्यत्राभिसंबुद्धःकथंवामन्यतेभवान् २७ ॥ युधिष्ठिरउवाच ॥ अहोबुद्धिमतांश्रेष्ठशुभाबुद्धिरियंतव ॥ विदितं वेदितव्यंतेकस्मात्समनुपृच्छसि २८ सर्वज्ञंत्वांकथंमोहआविशत्स्वर्गवासिनम् ॥ एवमद्भुतकर्माणमितिमेसंशयोमहान् २९ ॥ सर्पउवाच ॥ सुप्रज्ञमपि चेच्छूरमृद्धिर्मोहयतेनरम् ॥ वर्तमानःसुखेसर्वोमुह्यतीतिमतिर्मम ३० सोहमैश्वर्यमोहेनमदाविष्टोयुधिष्ठिर ॥ पतितःप्रतिसंबुद्धस्त्वांतुसंबोधयाम्यहम् ३१ कृतंकार्यंमहाराजत्वयाममपरंतप ॥ क्षीणःशापःसुकृच्छ्रोमेत्वयासंभाष्यसाधुना ३२ अहंहिदिविदिव्येनविमानेनचरन्पुरा ॥ अभिमानेनमत्तःसन्कंचिन्नान्य मचिंतयम् ३३ ब्रह्मर्षिदेवगंधर्वयक्षराक्षसपन्नगाः ॥ करान्ममप्रयच्छंतिसर्वेत्रैलोक्यवासिनः ३४ चक्षुषायंप्रपश्यामिप्राणिनंपृथिवीपते ॥ तस्यतेजोहरा म्याशुतद्धिदृष्टेर्बलंमम ३५ ब्रह्मर्षीणांसहस्रंहिउवाहशिबिकांमम ॥ समामपनयोराजन्भ्रंशयामासवैश्रियः ३६ तत्रह्यगस्त्यःपादेनवहन्स्पृष्टोमयामुनिः ॥ अ गस्त्येनततोऽस्म्युक्तोध्वंससर्पेतिवैरुषा ३७ ततस्तस्माद्विमानाग्र्यात्प्रच्युतश्च्युतलक्षणः ॥ प्रपतन्बुबुधेऽऽत्मानंव्यालीभूतमधोमुखम् ॥ अयाचंतमहंविप्रंशा पस्यांतोभवेदिति ३८ ॥ सर्पउवाच ॥ ॥ प्रमादात्संप्रमूढस्यभगवन्क्षंतुमर्हसि ॥ ततःसमामुवाचेदंप्रपतंतंकृपान्वितः ३९ युधिष्ठिरोधर्मराजःशापात्त्वांमो क्षयिष्यति ॥ अभिमानस्यघोरस्यपापस्यचनराधिप ४० फलेक्षीणेमहाराजफलंपुण्यमवाप्स्यसि ॥ ततोमेविस्मयोजातस्तद्दृष्ट्वातपसोबलम् ४१ ब्रह्मच ब्राह्मणत्वंचयेनत्वाहमचूचुदम् ॥ सत्यंदमस्तपोदानमहिंसाधर्मनित्यता ४२ साधकानिसदापुंसांनजातिर्नकुलंनृप ॥ अरिष्टएषतेभ्राताभीमसेनोमहाबलः ॥ स्वस्तितेऽस्तुमहाराजगमिष्यामिदिवंपुनः ४३ ॥ वैशंपायनउवाच ॥ इत्युक्त्वाऽऽजगरंदेहंमुक्त्वासनहुषोनृपः ॥ दिव्यंवपुःसमास्थायगतस्त्रिदिवमेवह ४४ युधिष्ठिरोपिधर्मात्माभ्रात्राभीमेनसंगतः ॥ धौम्येनसहितःश्रीमानाश्रमंपुनरागमत् ४५ ततोद्विजेभ्यःसर्वेभ्यःसमेतेभ्योयथातथम् ॥ कथयामासतत्सर्वंधर्मरा जोयुधिष्ठिरः ४६ तच्छ्रुत्वातेद्विजाःसर्वेभ्रातरश्चास्ययेत्रयः ॥ आसन्सुव्रीडिताराजन्द्रौपदीचयशस्विनी ४७ तेतुसर्वेद्विजश्रेष्ठाःपांडवानांहितेप्सया ॥ मै वमित्यब्रुवन्भीमंगर्हयंतोऽस्यसाहसम् ४८ पांडवास्तुभयान्मुक्तंप्रेक्ष्यभीमंमहाबलम् ॥ हर्षमाहारयांचक्रुर्विजन्हुश्चमुदायुताः ४९ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणिआजगरपर्वणिभीममोचनेएकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥ ॥ समाप्तंचेदमाजगरंपर्व ॥ ॥ ॥ ॥ ॥

जातमपिज्ञानमैश्वर्यजाड्यान्नश्यतीतिज्ञाततत्त्वोऽपि शमादीनाश्रयेदितिशेषग्रंथतात्पर्यं ३१। ३२। ३३। ३४। ३५। ३६। ३७। ३८। ३९। ४०। ४१ ब्राह्मणत्वं ब्रह्मविज्ञत्वं स्पष्टार्थमन्यत् ४२। ४३। ४४। ४५। ४६। ४७। ४८। ४९ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

उक्तामेवब्रह्मविद्यांमार्कंडेयमुखेननानाख्यानपूर्वकंप्रपंचयिष्यंस्तदुपोद्घातत्वेनकाम्यकप्रवेशंतावदाह निदाघांतकरःकालइत्यादिना १ असिताःकृष्णवर्णाः २ तपात्ययेवर्षासु निकेताइव मंडपीभूताइत्यर्थः ३। ४ समवस्तृतेआच्छादितेस्थावराणिभूतलादीनि ५ आशुगाःबाणवत्तीव्रवेगाः सिंधवोनद्यःशोणघर्घराद्याः ६। ७ स्तोकाएवस्तोकका श्चातकाः। 'स्तोकस्त्रिष्वल्पे चातकेपुमान्'इतिमेदिनी दर्दुरामंडूकाः ८ मरुधन्वसुगिरेःशुष्कस्थानेषु ९ रूढकक्षाणिबहुतृणानिवनानि प्रस्थशब्दोदितानिसानूनिचयस्यांसातथा। 'प्रस्थोस्त्रियांमानभेदेसानावस्तुवस्तु नि'इतिमेदिनी १०। ११। १२। १३ नीकाशःसदृशः १४। १५ कार्तिकीकृत्तिकायुक्तापौर्णमासी १६ योगं युज्यतेरथादावितियुत्पत्त्यावाहनादिकं समूहुरारोपितभारंकृतवंतः १७। १८ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥ काम्यकमिति १। २ शौरिःकृष्णः ३ आयाताविदिताइत्यन्वयः वोयुष्माकंश्रेयोऽन्वेषी ४। ५

॥ अथमार्कंडेयसमास्यापर्व ॥ ॥ वैशंपायनउवाच ॥ निदाघांतकरःकालःसर्वभूतसुखावहः ॥ तत्रैववसतांतेषांप्रावृट्समभिपद्यत १ छादयंतोमहाघोषाः खंदिशश्चबलाहकाः ॥ प्रववर्षुर्दिवारात्रमसिताःसततंतदा २ तपात्ययनिकेताश्चशतशोऽथसहस्रशः ॥ अपेतार्कप्रभाजालाःसविद्युद्विमलप्रभाः ३ विरूढश ष्पाधरणीमत्तदंशसरीसृपा ॥ बभूवपयसासिक्ताशांतासर्वमनोरमा ४ नस्मप्रज्ञायतेकिंचिदंभसासमवस्तृते ॥ समंवाविषमंवाऽपिनद्योवास्थावराणिच ५ क्षुब्ध तोयामहावेगाःश्वसमानाइवाशुगाः ॥ सिंधवःशोभयांचक्रुःकाननानितपात्यये ६ नदतांकाननांतेषुश्रूयंतेविविधाःस्वनाः ॥ वृष्टिभिश्छाद्यमानानांवराहमृग पक्षिणाम् ७ स्तोककाःशिखिनश्चैवपुंस्कोकिलगणैःसह ॥ मत्ताःपरिपतंतिस्मदर्दुराश्चैवदर्पिताः ८ तथाबहुविधाकाराप्रावृण्मेघानुनादिता ॥ अभ्यतीता शिवातेषांचरतांमरुधन्वसु ९ क्रौंचहंससमाकीर्णाशरत्प्रमुदिताऽभवत् ॥ रूढकक्षवनप्रस्थाप्रसन्नजलनिम्नगा १० विमलाकाशनक्षत्राशरत्तेषांशिवाऽभवत् ॥ मृगद्विजसमाकीर्णापांडवानांमहात्मनाम् ११ दृश्यंतेशांतरजसःक्षपाजलदशीतलाः ॥ ग्रहनक्षत्रसंघैश्चसोमेनचविराजिताः १२ कुमुदैःपुंडरीकैश्चशीतवारिध राःशिवाः ॥ नदीःपुष्करिणीश्चैवददृशुःसमलंकृताः १३ आकाशनीकाशतटांतीरवानीरसंकुलाम् ॥ बभूवचरतांहर्षःपुण्यतीर्थांसरस्वतीम् १४ तेवैमुमुदिरेवी राःप्रसन्नसलिलांशिवाम् ॥ पश्यंतोदृढधन्वानःपरिपूर्णांसरस्वतीम् १५ तेषांपुण्यतमारात्रिःपर्वसंधौस्मशारदी ॥ तत्रैववसतामासीत्कार्तिकीजनमेजय १६ पुण्यकृद्भिर्महासत्वैस्तापसैःसहपांडवाः ॥ तत्सर्वंभरतश्रेष्ठाःसमूहुर्योगमुत्तमम् १७ तमिस्राभ्युदयेतस्मिन्धौम्येनसहपांडवाः ॥ सूतैःपौरोगवैश्चैवकाम्यकंप्र ययुर्वनम् १८ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिकाम्यकवनप्रवेशेद्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥ ॥ छ ॥ ॥ वैशंपायनउवाच ॥ काम्यकंप्राप्यकौरव्ययुधिष्ठिरपुरोगमाः ॥ कृतातिथ्यामुनिगणैर्निषेदुःसहकृष्णया १ ततस्तान्परिविश्वस्तान्वसतःपांडुनंदनान् ॥ ब्रा ह्मणाबहवस्तत्रसमंतात्पर्यवारयन् २ अथाब्रवीद्द्विजःकश्चिदर्जुनस्यप्रियःसखा ॥ सएष्यतिमहाबाहुर्वशीशौरिरुदारधीः ३ विदिताहिहरेर्यूयमिहायाताःकुरू द्वहाः ॥ सदाहिदर्शनाकांक्षीश्रेयोन्वेषीचवोहरिः ४ बहुवत्सरजीवीचमार्कंडेयोमहातपाः ॥ स्वाध्यायतपसायुक्तःक्षिप्रंयुष्मान्समेष्यति ५

६ । ७ । ८ । ९ । १० । ११ । १२ भूतपतीरुद्रःगुहेनकार्तिकेयेन १३ । १४ मधुहामधुसूदनः १५ तस्यार्थधर्मस्यवृद्धचर्थम् १६ । १७ । १८ एषावानादिरूपावद्वारातिनित्यं

तथैवब्रुवतस्तस्यप्रत्यदृश्यतकेशवः ॥ शैब्यसुग्रीवयुक्तेनरथेनरथिनांवरः ६ मघवानिवपौलोम्यासहितःसत्यभामया ॥ उपायाद्देवकीपुत्रोदिदृक्षुःकुरुसत्तमा
न् ७ अवतीर्यरथात्कृष्णोधर्मराजंयथाविधि ॥ ववंदेमुदितोधीमान्भीमंचबलिनांवरम् ८ पूजयामासधौम्यंचयमाभ्यामभिवादितः ॥ परिष्वज्यगुडाकेशंद्रौ
पदींपर्यसांत्वयत् ९ सदृष्ट्वाफाल्गुनंवीरंचिरस्यप्रियमागतम् ॥ पर्यष्वजतदाशार्हःपुनःपुनररिंदमः १० तथैवसत्यभामाऽपिद्रौपदींपरिषस्वजे ॥ पांडवानां
प्रियांभार्यांकृष्णस्यमहिषीप्रिया ११ ततस्तेपांडवाःसर्वेसभार्याःसपुरोहिताः ॥ आनर्चुःपुंडरीकाक्षंपरिवव्रुश्चसर्वशः १२ कृष्णस्तुपार्थेनसमेत्यविद्वान्धनंजये
नासुरतर्जनेन ॥ बभौयथाभूतपतिर्महात्मासमेत्यसाक्षाद्भगवान्गुहेन १३ ततःसमस्तानिकिरीटमालीवनेषुवृत्तानिगदाग्रजाय ॥ उक्त्वायथावत्पुनरन्वपृच्छ
त्कथंसुभद्राचसचाभिमन्युः १४ सपूजयित्वामधुहायथावत्पार्थंचकृष्णांचपुरोहितंच ॥ उवाचराजानमभिप्रशंसन्युधिष्ठिरंतत्रसहोपविश्य १५ धर्मःपरःपां
डवराज्यलाभात्तस्यार्थमाहुस्तपएवराजन् ॥ सत्यार्जवाभ्यांचरतास्वधर्मंजितस्त्वयाऽयंचपरश्चलोकः १६ अधीतमग्रेचरताव्रतानिसम्यग्धनुर्वेदमवाप्यकृ
त्स्नम् ॥ क्षात्रेणधर्मेणवसूनिलब्ध्वासर्वेह्यवाप्ताःक्रतवःपुराणाः १७ नग्राम्यधर्मेषुरतिस्तवास्तिकामान्नकिंचित्कुरुषेनरेंद्र ॥ नचार्थलोभात्प्रजहासिधर्मंतस्मात्प्र
भावादसिधर्मराजः १८ दानंचसत्यंचतपश्चराजन्श्रद्धाचबुद्धिश्चक्षमाधृतिश्च ॥ अवाप्यराष्ट्राणिवसूनिभोगानेषापरापार्थसदारतिस्ते १९ यदाजनौघःकुरु
जांगलानांकृष्णांसभायामवशामपश्यत् ॥ अपेतधर्मव्यवहारवृत्तंसहेतत्पांडवकस्त्वदन्यः २० असंशयंसर्वसमृद्धकामःक्षिप्रंप्रजाःपालयिताऽसिसम्यक् ॥ इमे
वयंनिग्रहणेकुरूणांयदिप्रतिज्ञाभवतःसमाप्ता २१ धौम्यंचभीमंचयुधिष्ठिरंचयमौचकृष्णांचदशार्हसिंहः ॥ उवाचदिष्ट्याभवतांशिवेनप्राप्तःकिरीटीमुदितःकृ
तास्त्रः २२ प्रोवाचकृष्णामपियाज्ञसेनींदशार्हभर्तासहितःसुहृद्भिः ॥ दिष्ट्यासमग्राऽसिधनंजयेनसमागतेत्येवमुवाचकृष्णः २३ कृष्णेधनुर्वेदरतिप्रधानास्तवा
त्मजास्तेशिशवःसुशीलाः ॥ सद्भिःसदैवाचरितंसुहृद्भिश्चरंतिपुत्रास्तवयाज्ञसेनि २४ राज्येनराष्ट्रैश्चनिमंत्र्यमाणाःपित्राचकृष्णेतवसोदरैश्च ॥ नयज्ञसेनस्यन
मातुलानांगृहेषुबालारतिमाप्नुवंति २५ आनर्तमेवाभिमुखाःशिवेनगत्वाधनुर्वेदरतिप्रधानाः ॥ तवात्मजावृष्णिपुरंप्रविश्यनदैवतेभ्यःस्पृहयंतिकृष्णे २६ य
थात्वमेवार्हसितेषुवृत्तंप्रयोक्तुमार्याचयथैवकुंती ॥ तेष्वप्रमादेनतथाकरोतितथैवभूयश्चतथासुभद्रा २७ यथाऽनिरुद्धस्ययथाऽभिमन्योर्यथासुनीथस्ययथैव
भानोः ॥ तथाविनेताचगतिश्चकृष्णेतवात्मजानामपिरौक्मिणेयः २८

प्रीतिविषयः १९ । २० निग्रहणेयत्तास्मइतिशेषः २१ । २२ । २३ तवात्मजाःप्रतिविंध्यादयः २४ । २५ आनर्तंद्वारकादेशम् २६ यथात्वमर्हसितथासुभद्राऽर्हति यथाकुंती
प्रयोक्तुमर्हतितथासुभद्राप्यर्हति यथाचार्हतितथैवकरोतीचेतिसंबंधः २७ विनेताशिक्षयिता रौक्मिणेयःप्रद्युम्नः २८

२९ । ३० । ३१ । ३२ मधूनांमाथुराणां हलायुधःप्रग्रहणोनियंतायस्याःसासेना यत्तासन्नद्धा ३३ भौमस्यनरकासुरस्य सौभाधिपतेःशाल्वस्य ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४०

गदासिचर्मग्रहणेषुशूरानस्त्रेषुशिक्षासुरथाश्वयाने ॥ सम्यग्विनेताविनयेदतंद्रीस्तांश्चाभिमन्युःसततंकुमारः २९ सचापिसम्यक्प्रणिधायशिक्षांशस्त्राणिचैषां
विधिवत्प्रदाय ॥ तवात्मजानांचतथाऽभिमन्योःपराक्रमैस्तुष्यतिरौक्मिणेयः ३० यथाविहारंप्रसमीक्षमाणाःप्रयांतिपुत्रास्तवयाज्ञसेनि ॥ एकैकमेषामनुया
तितत्ररथाश्चयानानिचदंतिनश्च ३१ अथाब्रवीद्धर्मराजंतुकृष्णोदशार्हयोधाःकुकुरांधकाश्च ॥ एतेनिदेशंतवपालयंतस्तिष्ठंतुयत्रेच्छसितत्रराजन् ३२ आवर्त
तांकार्मुकवेगवाताहलायुधप्रग्रहणामधूनाम् ॥ सेनातवार्थेषुनरेंद्रयत्तासप्तादिपत्त्यश्वरथासनागा ३३ प्रस्थाप्यतांपांडवधार्तराष्ट्रःसुयोधनःपापकृतांवरिष्ठः ॥
ससानुबंधःससुहृद्गणश्चभौमस्यसौभाधिपतेश्चमार्गम् ३४ कामंतथातिष्ठनरेंद्रतस्मिन्यथाकृतस्तेसमयःसभायाम् ॥ दाशार्हयोधैस्तुहतारियोधंप्रतीक्षतांना
गपुरंभवंतम् ३५ व्यपेतमन्युर्व्यपनीतपाप्माविहृत्ययत्रेच्छसितत्रकामम् ॥ ततःप्रसिद्धंप्रथमंविशोकःप्रपत्स्यसेनागपुरंसराष्ट्रम् ३६ ततस्तदाज्ञायमतंम
हात्मायथावदुक्तंपुरुषोत्तमेन ॥ प्रशस्यविप्रेक्ष्यचधर्मराजःकृतांजलिःकेशवमित्युवाच ३७ असंशयंकेशवपांडवानांभवान्गतिस्त्वच्छरणाहिपार्थाः ॥ कालो
दयेतच्चततश्चभूयःकर्ताभवान्कर्मनसंशयोऽस्ति ३८ यथाप्रतिज्ञंविहृतश्चकालःसर्वाःसमाद्वादशनिर्जनेषु ॥ अज्ञातचर्यांविधिवत्समाप्यभवद्गताःकेशवपांडवे
याः ३९ एषैवबुद्धिर्जुषतांसदात्वांसत्येस्थिताःकेशवपांडवेयाः ॥ सदानधर्माःसजनाःसदाराःसबांधवास्त्वच्छरणाहिपार्थाः ४० ॥ वैशंपायनउवाच ॥ तथा
वदतिवार्ष्णेयेधर्मराजेचभारत ॥ अथपश्चात्तपोवृद्धोबहुवर्षसहस्रधृक् ४१ प्रत्यदृश्यतधर्मात्मामार्कंडेयोमहातपाः ॥ अजरश्चामरश्चैवरूपौदार्यगुणान्वितः
४२ व्यदृश्यततथायुक्तोयथास्यात्पंचविंशकः ॥ तमागतमृषिंवृद्धंबहुवर्षसहस्रिणम् ४३ आनर्चुर्ब्राह्मणाःसर्वेकृष्णश्चसहपांडवैः ॥ तमर्चितंसुविश्वस्तमासी
नमृषिसत्तमम् ॥ ब्राह्मणानांमतेनाहपांडवानांचकेशवः ४४ ॥ कृष्णउवाच ॥ शुश्रूषवःपांडवास्तेब्राह्मणाश्चसमागताः ॥ द्रौपदीसत्यभामाचतथाऽहं
परमंवचः ४५ पुरावृत्ताःकथाःपुण्याःसदाचारान्सनातनान् ॥ राज्ञांस्त्रीणामृषीणांचमार्कंडेयविचक्ष्व नः ४६ ॥ वैशंपायनउवाच ॥ तेषुतत्रोपविष्टेषु
देवर्षिरपिनारदः ॥ आजगामविशुद्धात्मापांडवानवलोककः ४७ तमप्यथमहात्मानंसर्वेतेपुरुषर्षभाः ॥ पाद्यार्घ्याभ्यांयथान्यायमुपतस्थुर्मनीषिणः ४८
नारदस्त्वथदेवर्षिर्ज्ञात्वातांस्तुकृतक्षणान् ॥ मार्कंडेयस्यवदतस्तांकथामन्वमोदत ४९ उवाचचैनंकालज्ञःस्मयन्निवसनातनः ॥ ब्रह्मर्षेकथ्यतांयत्तेपांडवेषुविव
क्षितम् ५० एवमुक्तःप्रत्युवाचमार्कंडेयोमहातपाः ॥ क्षणंकुरुध्वंविपुलमाख्यातव्यंभविष्यति ५१

४१ । ४२ पंचविंशकःवर्षैरितिशेषः ४३ सुविश्वस्तंभगवन्मायादौदृढनिश्चयम् ४४ । ४५ । ४६ अवलोककःअवलोकनार्थी ४७ । ४८ । ४९ सनातनः कृष्णः ५० । ५१

५१ । ५२ । ५३ । ५४ । ५५ भवत्येवहीति धर्माधर्मफलयोर्विपर्ययंदृष्ट्वापुरुषःकर्मणःफलंकथंस्विदश्नाति ईश्वरोवाकथंस्विवकर्तास्तीतिधर्मेश्वरयोराक्षेपः कष्यतःसमृद्धियुतान् ५६ कथंस्विदि त्यस्योभयत्रसंबंधः ५७ कुतोवेतिस्वभावात्कर्मणोवा अंत्ये इहैवपरत्रापिवा कृतंकर्मणासाधितंसुखमन्वेतीत्यर्थः ५८ शुभाशुभैःकर्मभिः सद्योविनाशिभिरिहवा कारीर्यादिभिर्दृष्टद्यायर्थ विहितैः परत्रवादेहत्यागेसति कथंसंयुज्यतेकिमाश्रित्यचकर्माणितिष्ठंतीति फलस्यव्यभिचाराद्दाशुविनाशित्वादाश्रयाभावाद्वेतित्रेधाप्राकर्मसद्भावाक्षेपः ५९ । ६० स्थिरयर्थलोकरक्षार्थम्

एवमुक्ताःक्षणंचक्रुःपांडवाःसहतैर्द्विजैः ॥ मध्यंदिनेयथाऽऽदित्यंप्रेक्षंतस्तेमहामुनिम् ५२ ॥ वैशंपायनउवाच ॥ तंविवक्षंतमालक्ष्यकुरुराजोमहामुनिम् ॥ कथासंजननार्थायचोदयामासपांडवः ५३ भवान्दैवतदैत्यानामृषीणांचमहात्मनाम् ॥ राजर्षीणांचसर्वेषांचरितज्ञःपुरातनः ५४ सेव्यश्चोपासितव्यश्चमतोनः कांक्षितश्चिरम् ॥ अयंचदेवकीपुत्रःप्राप्तोऽस्मानवलोककः ५५ भवत्येवहिमेबुद्धिर्दृष्ट्वाऽऽत्मानंसुखाच्च्युतम् ॥ धार्तराष्ट्रांश्चदुर्वृत्तान्नृद्धयतःप्रेक्ष्यसर्वशः ५६ कर्मणःपुरुषःकर्ताशुभस्याप्यशुभस्यवा ॥ सफलंतदुपाश्नातिकथंकर्तास्विदीश्वरः ५७ कुतोवासुखदुःखेषुनृणांब्रह्मविदांवर ॥ इहवाकृतमन्वेतिपरदेहेऽथवा पुनः ५८ देहीचदेहंसंत्यज्यमृग्यमाणःशुभाशुभैः ॥ कथंसंयुज्यतेप्रेत्यइहवाद्विजसत्तम ५९ ऐहलौकिकमेवेहउताहोपारलौकिकम् ॥ क्वचकर्माणितिष्ठंतिजंतोः प्रेतस्यभार्गव ६० ॥ मार्कंडेयउवाच ॥ त्वद्युक्तोऽयमनुप्रश्नोयथावद्वदतांवर ॥ विदितंवेदितव्यंतेस्थित्यर्थंत्वंतुपृच्छसि ६१ अत्रतेकथयिष्यामितदिहैक मनाःशृणु ॥ यथेहामुत्रचनरःसुखदुःखमुपाश्नुते ६२ निर्मलानिशरीराणिविशुद्धानिशरीरिणाम् ॥ ससर्जधर्मतंत्राणिपूर्वोत्पन्नःप्रजापतिः ६३ अमोघफलसं कल्पाःसुव्रताःसत्यवादिनः ॥ ब्रह्मभूतानराःपुण्याःपुराणाःकुरुसत्तम ६४ सर्वेदेवैःसमायांतिस्वच्छंदेननभस्तलम् ॥ ततश्चपुनरायांतिसर्वेस्वच्छंदचारिणः ६५ स्वच्छंदमरणाश्चासन्नराःस्वच्छंदचारिणः ॥ अल्पबाधानिरातंकाःसिद्धार्थानिरुपद्रवाः ६६ द्रष्टारोदेवसंघानामृषीणांचमहात्मनाम् ॥ प्रत्यक्षाःसर्वधर्माणां दांताविगतमत्सराः ६७ आसन्वर्षसहस्रीयास्तथापुत्रसहस्रिणः ॥ ततःकालांतरेऽन्यस्मिन्पृथिवीतलचारिणः ६८ कामक्रोधाभिभूतास्तेमायाव्याजोपजी विनः ॥ लोभमोहाभिभूताश्चत्यक्तादेहैस्ततोनराः ६९ अशुभैःकर्मभिःपापास्तिर्यङ्निरयगामिनः ॥ संसारेषुविचित्रेषुपच्यमानाःपुनःपुनः ७० मोघेष्टामो घसंकल्पामोघज्ञानाविचेतसः ॥ सर्वाभिशंकिनश्चैवसंवृत्ताःक्लेशदायिनः ७१ अशुभैःकर्मभिश्चापिप्रायशःपरिचिह्निताः ॥ दौष्कुल्याव्याधिबहुलादुरात्मानोऽ प्रतापिनः ७२ भवंत्यल्पायुषःपापारौद्रकर्मफलोदयाः ॥ नाथंतःसर्वकामानांनास्तिकाभिन्नचेतसः ७३ जंतोःप्रेतस्यकौंतेयगतिःस्वैरिहकर्मभिः ॥ प्राज्ञ स्यहीनबुद्धेश्चकर्मकोशःक्वतिष्ठति ७४ क्वस्थस्तत्समुपाश्नातिसुकृतंयदिवेतरत् ॥ इतितेदर्शनंयच्चतत्राप्यनुनयंशृणु ७५

६१ । ६२ । ६३ तत्रधर्माधर्मफलयोस्तावदव्यभिचारंदर्शयन्प्रथमंदोषंनिरस्यति निर्मलानीत्यादिना ६४ । ६५ । ६६ । ६७ । ६८ मायाकूटकार्षापणादिव्याजंदंभस्तदेवोपजीवंति नतुधर्मं तेमायाव्याजोपजीविनः ६९ । ७० ७१ । ७२ नाथंतःप्रार्थयमानाः कामानांकामान् ७३ अंत्यंप्रश्नमनुवदति जंतोःप्रेतस्येतिद्वाभ्याम् ७४ अनुनयंसिद्धांतम् ७५

॥१५०॥

तस्योत्तरेणैवार्थात्कर्मणामाशुविनाशित्वदोषोनिरस्तोभवतीत्यभिसंधायाह अयमादीति आदिशरीरेण लिंगदेहेन यावन्मोक्षं स्थायिनादेवसृष्टेन धर्माधर्मसंसृष्टेन । यद्वाधर्माद्यनुरोधिना ईश्वरेणवासृष्टेनाविष्कृतेन सर्ववासनामयं लिंगमेव कर्मणामाश्रयइत्यर्थः ७६ कलेवरंस्थूलदेहं युगपद्देहद्वयेनसंभवतिसंयुज्यते पूर्वस्यागात्प्रागेवतृणजलौकान्यायेनापरमादत्ते नतुतदनंतरं अतएवांतरामध्ये क्षणमात्रमप्यभवोऽसंसारोनास्ति ७७ तत्रस्थूलदेहांतरे यत्तुमरणानंतरं मध्ये यावद्गर्भवासमातिवाहिकशरीरारूढो दिविभुव्यंतरिक्षेनरकेवाभवतीति तदस्थूलदृष्ट्यैवज्ञेयं उभयत्रभोगसाम्येन स्थूलातिवाहिकयोर्भेदाभावात् यथोक्तंवसिष्ठेन । 'आतिवाहिकएवायं स्वाद्यशैश्चित्तदेहकः ॥ आधिभौतिकयाबुद्ध्या गृहीतश्चिरभावनात्'इति ७८ कृतांतोयमस्तत्संबंधी विधिः पुण्यपापफलभोगेनियोगस्तेनसंयुक्तस्तमनुतिष्ठन् ।निरादानः प्राप्तंसुखंदुःखंवादूरीकर्तुमशक्तः । दोऽवखंडने इत्यस्यरूपं७९ अबुद्धीनांतत्त्वज्ञानहीनानांगतिः स्वर्गनरकरूपा उत्तमांपुनरा वृत्तिवर्जितां ८०।८१ शुक्लजातीयाः शुक्लोयोगजोधर्मस्तत्प्रकारास्तदेकार्जनपराः प्रकारवचने जातीयर् । योन्यंतरमातिवाहिकयोन्यपेक्षयाऽन्यामाधिभौतिकीं योनिं ८२ वशिनईश्वराः

अयमादिशरीरेणदेवसृष्टेनमानवः ॥ शुभानामशुभानांचकुरुतेसंचयंमहत् ७६ आयुषोंतेप्रहायेदंक्षीणप्रायंकलेवरम् ॥ संभवत्येवयुगपद्योनौनास्त्यंतराऽभवः ७७ तत्रास्यस्वकृतंकर्मच्छायेवानुगतंसदा ॥ फलत्यथसुखार्होवादुःखार्होवाऽथजायते ७८ कृतांतविधिसंयुक्तःसजंतुर्लक्षणैःशुभैः ॥ अशुभैर्वानिरादानो लक्ष्यतेज्ञानदृष्टिभिः ७९ एषातावदबुद्धीनांगतिरुक्तायुधिष्ठिर ॥ अतःपरंज्ञानवतांनिबोधगतिमुत्तमाम् ८० मनुष्यास्तप्ततपसःसर्वागमपरायणाः ॥ स्थिर व्रताःसत्यपरागुरुशुश्रूषणेरताः ८१ सुशीलाशुक्लजातीयाःक्षांतादांताःसुतेजसः ॥ शुचियोन्यंतरगताःप्रायशःशुभलक्षणाः ८२ जितेंद्रियत्वाद्वशिनःशुक्लत्वा न्मंदरोगिणः ॥ अल्पाबाधपरित्रासाद्भवंतिनिरुपद्रवाः ८३ च्यवंतंजायमानंचगर्भस्थंचैवसर्वशः ॥ स्वमात्मानंपरंचैवबुध्यंतेज्ञानचक्षुषा ८४ ऋषयस्तेमहात्मा नःप्रत्यक्षागमबुद्धयः ॥ कर्मभूमिमिमांप्राप्यपुनर्यांतिसुरालयम् ८५ किंचिद्दैवाद्धठात्किंचित्किंचिदेवस्वकर्मभिः ॥ प्राप्नुवंतिनराराजन्माऽतेऽस्त्वन्याविचारणा ८६ इमामत्रोपमांचापिनिबोधवदतांवर ॥ मनुष्यलोकेयच्छ्रेयःपरंमन्येयुधिष्ठिर ८७ इहवैकस्यनामुत्रअमुत्रैकस्यनोइह ॥ इहवाऽमुत्रचैकस्यनामुत्रैकस्यनोइह ८८

मंदरोगिणोभीरोगाः । 'नतत्रशोकोनजरानमृत्युः प्राप्तस्ययोगाग्निमयंशरीरं'इतिश्रुतेः प्रारब्धकर्मप्राबल्यात्कदाचित् प्राप्तमेवचापक्वयोगिनांरोगादिकंचेत्तत्राह अल्पेति अल्पं द्वैतदर्शनं । 'अथयत्रान्यत्पश्यत्यन्यच्छृणोतिितदल्पं' इतिश्रुतेः तस्मादाबाधो दुःखं ततस्त्रासात् निरुपद्रवाः उपसमीपेस्थित्वाद्रवतिस्वीयंधर्ममासिंचतीत्युपद्रवोऽतःकरणंतद्रहिताः एतेनप्रारब्ध स्यापिप्रतिघाताय निर्बीजसमाधिः प्रभवतीतिदर्शितं ८३ ननुतादृशोऽप्यपांतरतमानाम वेदाचार्यः कलिद्वापरयोः संधौ सत्यवत्या व्यासतयासमजनीति स्मर्यतेमोक्षधर्मेषु अतःशुक्ल जातीयानामप्युत्क्रांतिगत्या गतयोऽपरिहार्या इत्याशंक्याहच्यवंतमिति अधिकारिणांतेषांलोकानुग्रहार्थं स्वेच्छयागृहाद्गृहांतरप्रवेशवदिहपरत्रचसंचारो नकर्माधीनतयाऽस्माकमिव दुःखायभवतीत्याशयः । तथानिर्णीतं यावदधिकारमवस्थितिराधिकारिकाणामित्यत्र ८४ । ८५ दैवात्मूढोन्मत्तजडभरतादिभिर्यल्लभ्यते तद्दैवादेव हठाद्योगसिद्धैर्विश्वामित्रादिभिः इतरैः स्वकर्मभिः अन्यातेषामन्यतमा एकैवकाचित्स्थितिरस्तीति विचारणा तेतवमास्तु ८६ एवमात्मविदांस्वातंत्र्यमुक्त्वेतरेषांस्थितिचातुर्विध्यमाह इमामिति ८७ इहवेति परंश्रेयइत्य नुकृष्यते वाशब्दएवार्थे द्विरावर्तते । एकस्यइहैवपरंश्रेयोऽस्तिनामुत्र परलोके । एकस्यामुत्रैवास्तिनत्विह इहचामुत्रचएकस्य श्रेयोऽस्ति । एकस्यतूभयत्रापि नास्तीति ८८

इममेवश्लोकंव्याचष्टे धनानीत्यादिना ८९ येइति तेषामसौ लोकएवनत्वयं ९० । ९१ प्रजनेपुत्रोत्पादने ९२ भवंतस्तु लोकद्वयेऽपिश्रेयांसइत्याह सर्वंभवंतइति ९३ । ९४ तस्माद्धर्माधर्म
फलयोर्वैपरीत्यं यत्त्वयाप्राक्शुतंतत्तथानमंतव्यमित्युपसंहरति माभूदिति ९५ मार्कंडेयसमास्यायां सहासने इत्यर्थः आसउपविशनेऽस्माण्ण्यत् ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारत

धनानियेषांविपुलानिसंतिनित्यंरमंतेसुविभूषितांगाः ॥ तेषामयंशत्रुवरघ्रलोकोनासौसदादेहसुखेरतानाम् ८९ येयोगयुक्तास्तपसिप्रसक्ताःस्वाध्यायशीला
जरयंतिदेहान् ॥ जितेंद्रियाःप्राणिवधेनिवृत्तास्तेषामसौनायमरिघ्रलोकः ९० येधर्ममेवप्रथमंचरंतिधर्मेणलब्ध्वाचधनानिकाले ॥ दारानवाप्यक्रतुभिर्यजंते
तेषामयंचैवपरश्चलोकः ९१ येनैवविद्यांनतपोनदानंनचापिमूढाःप्रजनेयतंति ॥ नचानुगच्छंतिसुखान्नभोगांस्तेषामयंचैवपरश्चलोकः ९२ सर्वेभवंतस्त्वति
वीर्यसत्वादिव्यौजसःसंहननोपपन्नाः ॥ लोकादमुष्मादवनिंप्रपन्नाःस्वधीतविद्याःसुरकार्यहेतोः ९३ कृत्वैवकर्माणिमहांतिशूरास्तपोदमाचारविहारशीलाः ॥
देवानृषीन्प्रेतगणांश्चसर्वान्संतर्पयित्वाविधिनापरेण ९४ स्वर्गंपरंपुण्यकृतोनिवासंक्रमेणसंप्राप्स्यथकर्मभिःस्वैः ॥ माभूद्विशंकातवकौरवेंद्रदृष्ट्वात्मनःक्लेशमिमं
सुखार्ह ९५ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणित्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥ ॥ ध ॥ वैशंपायनउवाच ॥ मार्कंडेयं
महात्मानमूचुःपांडुसुतास्तदा ॥ माहात्म्यंद्विजमुख्यानांश्रोतुमिच्छामकथ्यताम् १ एवमुक्तःसभगवान्मार्कंडेयोमहातपाः ॥ उवाचसुमहातेजाःसर्वशास्त्रवि
शारदः २ ॥ मार्कंडेयउवाच ॥ हैहयानांकुलकरोराजापरपुरंजयः ॥ कुमारोरूपसंपन्नोमृगयांव्यचरद्बली ३ चरमाणस्तुसोऽरण्येतृणवीरुत्समावृते ॥ कृष्णा
जिनोत्तरासंगंददर्शमुनिमंतिके ४ सतेननिहतोऽरण्येमन्यमानेनवैमृगम् ॥ व्यथितःकर्मतत्कृत्वाशोकोपहतचेतनः ५ जगामहैहयानांवैसकाशंप्रथितात्मनाम् ॥
राज्ञांराजीवनेत्रोऽसौकुमारःपृथिवीपतिः ॥ तेषांचतद्यथावृत्तंकथयामासवैतदा ६ तंचापिहिंसितंतातमुनिंमूलफलाशिनम् ॥ श्रुत्वादृष्ट्वाचतेतत्रबभूवुर्दी
नमानसाः ७ कस्यायमितितेसर्वेमार्गमाणास्ततस्ततः ॥ जग्मुश्चारिष्टनेम्नोऽथताक्ष्यर्स्याश्रममंजसा ८ तेऽभिवाद्यमहात्मानंतंमुनिंनियतव्रतम् ॥ तस्थुःसर्वे
सतुमुनिस्तेषांपूजामथाहरत् ९ तेतमूचुर्महात्मानंनवयंसत्क्रियांमुने ॥ त्वत्तोर्हाःकर्मदोषेणब्राह्मणोहिंसितोहिनः १० तानब्रवीत्सविप्रर्षिःकथंवोब्राह्मणोहतः ॥
क्वचासौब्रूतसहिताःपश्यध्वंमेतपोबलम् ११ तेतुतत्सर्वमखिलमाख्यायास्मैयथातथम् ॥ नापश्यंस्तमृषिंतत्रगतासुंतेसमागताः १२ अन्वेषमाणाःसव्रीडाः
स्वप्नवद्गतचेतनाः ॥ तानब्रवीत्तत्रमुनिस्ताक्ष्यर्ःपरपुरंजय १३ स्यादयंब्राह्मणःसोऽयंयुष्माभिर्योविनाशितः ॥ पुत्रोह्ययंममनृपास्तपोबलसमन्वितः १४ ते
चदृष्ट्वैवतमृषिंविस्मयंपरमंगताः ॥ महदाश्चर्यमितिवैतेब्रुवाणामहीपते १५ भावदीपे त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥ ॥ ध ॥

ब्रह्मविदांशुक्लजातीयानां स्वच्छंदमरणंतेषामित्यादिना प्रोक्तंमहाभाग्यं प्रश्नपूर्वकं विवरीतुमयमध्यायआरभ्यते मार्कंडेयमिति कथ्यतांत्वया १ । २ कुमारत्वादविवेकत्वं सूचितं ३
उत्तरासंगः प्रावरणं ४ । ५ । ६ । ७ अरिष्टनेमिशब्दइकारांतोऽप्यत्रमन्नंतोऽपिज्ञेयः ८ । ९ । १० । ११ । १२ ताक्ष्यर्ः तृक्षस्य कश्यपस्यापत्यं १३ स्यादयमित्यंगुल्यानिर्दिशति १४।१५

१६ । १७ हेतुयोगःयुक्तिसंबंधः समासःसंक्षेपस्ताभ्यामितिपंचम्यर्थतोसः सत्यमेवाभिजानीमइत्यादिना सत्यादीनिमृत्युजयसाधनान्युच्यंते १८ यदिति ब्राह्मणनिंदाशून्याःस्तुतिपराश्च
स्मइत्यर्थः १९ भृत्यान्भार्यादीन्अत्यशनेनअशनादधिकेनदानमानादिना २० पुण्यदेशःगंगातीरादिःतेजस्विनांयोगसिद्धानांदेशःसमीप्यंतत्संगादित्यर्थः २१ एतद्वैइति यौष्माकीणंह
त्यादोषमपि संलापमात्राद्वयंहंतुंसमर्थाःस्मइत्यर्थः २२ । २३ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेचतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥ ॥ मृत्युजयहेतुःपूर्वोक्तः स
त्यादिर्धर्मोवनस्थानामेवयुज्यते नतुगृहस्थानांतेषांदुष्प्रतिग्रहब्रह्मविद्वेषादिनादोषप्रसक्त्या तादृशधर्मासंभवादित्याशयवानध्यायमारभतेभूयइति १ सोऽत्रिरर्थंभूयोनानुरुध्यत् अत्यंतमर्था
र्थीनबभूव कुतः धर्मव्यक्तिर्धर्मस्यफलद्वाराऽभिव्यक्तिः फलव्यक्त्याहिधर्मोनश्यत्यतस्तन्नक्षणार्थंनैच्छदित्यर्थः २ वनंगंतुमितिशेषः ३ निरुपद्रवमक्षयंमोक्षाख्यम् ४ धर्मंयज्ञादिकमनुतन्वती
मृतोह्ययमुपानीतःकथंजीवितमाप्तवान् ॥ किमेततपसोवीर्यंयेनायंजीवितःपुनः १६ श्रोतुमिच्छामहेविप्रयदिश्रोतव्यमित्युत ॥ सतानुवाचनास्माकंमृत्युः
प्रभवतेनृपाः १७ कारणंवःप्रवक्ष्यामिहेतुयोगसमासतः ॥ सत्यमेवाभिजानीमोनानृतेकुर्महेमनः ॥ स्वधर्ममनुतिष्ठामस्तस्मान्मृत्युभयंननः १८ यद्ब्राह्मणा
नांकुशलंतदेषांकथयामहे ॥ नैषांदुश्चरितंब्रूमस्तस्मान्मृत्युभयंननः १९ अतिथीनन्नपानेनभृत्यानत्यशनेनच ॥ संभोज्यशेषमश्नीमस्तस्मान्मृत्युभयंननः
२० क्षांतादांताःक्षमाशीलास्तीर्थदानपरायणाः ॥ पुण्यदेशनिवासाच्चतस्मान्मृत्युभयंननः ॥ तेजस्विदेशवासाच्चतस्मान्मृत्युभयंननः २१ एतद्वैलेशमात्रं
वःसमाख्यातंविमत्सराः ॥ गच्छध्वंसहिताःसर्वेनपापाद्भयमस्तिवः २२ एवमस्त्वितितेसर्वेप्रतिपूज्यमहामुनिम् ॥ स्वदेशमगमन्हृष्टाराजानोभरतर्षभ २३
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणमाहात्म्यकथनेचतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥ ॥ ध ॥ ॥ मार्कंडेयउ
वाच ॥ भूयएवमहाभाग्यंब्राह्मणानांनिबोधमे ॥ वैन्योनामेहराजार्षिरश्वमेधायदीक्षितः १ तमत्रिर्गंतुमारेभेवित्तार्थमितिनःश्रुतम् ॥ भूयोर्थंनानुरुध्यत्सधर्म
व्यक्तिनिदर्शनात् २ सविचिंत्यमहातेजावनमेवान्वरोचयत् ॥ धर्मपत्नींसमाहूयपुत्रांश्चेदमुवाचह ३ प्राप्स्यामःफलमत्यंतंबहुलंनिरुपद्रवम् ॥ अरण्यगमनं
क्षिप्रंरोचतांवोगुणाधिकम् ४ तंभार्याप्रत्युवाचाथधर्ममेवानुतन्वती ॥ वैन्यंगत्वामहात्मानमर्थयस्वधनंबहु ५ सतेदास्यतिराजार्षिर्यजमानोऽर्थितोधनम् ॥
ततआदायविप्रर्षेप्रतिगृह्यधनंबहु ६ भृत्यान्सुतान्संविभज्यततोव्रजयथेप्सितम् ॥ एषवैपरमोधर्मोधर्मविद्भिरुदाहृतः ७ ॥ ॥ अत्रिरुवाच ॥ ॥ कथि
तोमेमहाभागगौतमेनमहात्मना ॥ वैन्योधर्मार्थसंयुक्तःसत्यव्रतसमन्वितः ८ किंत्वस्तितत्रद्वेष्टारोविवसंतिहिमेद्विजाः ॥ यथामेगौतमःप्राहततोनव्यवसाम्य
हम् ९ तत्रस्मवाचंकल्याणींधर्मकामार्थसंहिताम् ॥ मयोक्तामन्यथाब्रूयुस्ततस्तेवैनिरर्थिकाम् १० विस्तारयंती हेतौशतृप्रत्ययः धर्मार्थंधनमेवार्जस्वेत्युवाचेत्यर्थः ५
६ भृत्यानित्यतिथिदेवतादीनां सुतानिति भार्यादीनांचोपलक्षणंधर्मविद्भिर्मन्वादिभिः । 'अनधीत्यद्विजोवेदाननुत्पाद्यसुतानपि । अनिष्ट्वाविधिवद्यज्ञैर्मोक्षमिच्छन्व्रजत्यधः'इतिवदद्भिः
७ 'दशसूनासहस्राणिनित्यंवहतिसौनिकः । तेनतुल्यःस्मृतोराजाघोरस्तस्यप्रतिग्रहः' इतिमनुवाक्यादेवराजप्रतिग्रहेदोषंजानन्नत्रिस्तत्रविघ्नमुपन्यस्यतिकथितइत्यादिना ८ व्यवसामि
उद्यमंकरोमि ९ निरर्थकामपिवाचंवदतांपराजयोऽपिपापावहइतिभावः तथाचस्मृतिः । गुरुंत्वंकृत्यहुंकृत्य विप्रंनिर्जित्यवादतः । अरण्येनिर्जलेदेशे भवतिब्रह्मराक्षसः' इति १०

एवंजानन्नपित्त्रिहदोषात्तस्कर्तुमप्रतिजानीतेगमिष्यामीति ११ । १२ पूजयानइतितङ् कर्तृगामित्वात् स्तुतिफलस्ययुक्तःधन्योधनार्हः ईशईशितानियंता प्रथम हिरण्यगर्भइव अग्रजःनृपःमनु
ष्याणांरक्षकः १३ । १४ अत्रपरलोकमेवबहुमन्वानोगौतमआहमैवमिति १५ तत्रेंद्रइवात्रराजैवमहेंद्रइतिवितार्थीअत्रिः परपक्षंदूषयति अथेति १६ । १७ । १८ दर्शनेदृष्टिपथे १९ । २०
२१ ।२२ नौआवयोः २३ । २४ ब्राह्मेणबलेनराज्ञोबलंनतुस्वकीयमिति समाधानग्रंथार्थस्तेन नगौतमोक्तानिंदाऽपिव्यर्था नाप्यत्रिप्रोक्तास्तुतिरपिनिर्मूलेतिज्ञेयं यद्यपिलोभमूलकत्वंस्तुतिपक्षे

गमिष्यामिमहाप्राज्ञरोचतेमेवचस्तव ॥ गाश्चमेदास्यतेवैन्यःप्रभूतंचार्थसंचयम् ११ एवमुक्त्वाजगामाशुवैन्ययज्ञंमहातपाः ॥ गत्वाचयज्ञायतनमत्रिस्तु
ष्टावतंनृपम् १२ वाक्यैर्मंगलसंयुक्तैःपूजयानोऽब्रवीद्वचः ॥ अत्रिरुवाच ॥ राजन्धन्यस्त्वमीशश्चभुविस्त्वंप्रथमोनृपः १३ स्तुवंतित्वांमुनिगणास्त्वदन्योना
स्तिधर्मवित् ॥ तमब्रवीदृषिःक्रुद्धोवचनंवैमहातपाः १४ ॥ गौतमउवाच ॥ मैवमत्रेपुनर्ब्रूयानतेप्रज्ञासमाहिता ॥ अत्रनःप्रथमंस्थातामहेंद्रोवैप्रजापतिः १५
अथात्रिरपिराजेंद्रगौतमंप्रत्यभाषत ॥ अयमेवविधाताहियथैवेंद्रःप्रजापतिः ॥ त्वमेवमुह्यसेमोहान्नप्रज्ञानंतवास्तिह १६ ॥ गौतमउवाच ॥ जानामिनाहं
मुह्यामित्वमेवात्रविमुह्यसे ॥ स्तौषित्वंदर्शनप्रेप्सूराजानंजनसंसदि १७ नवेत्थपरमंधर्मंनचावैषिप्रयोजनम् ॥ बालस्त्वमसिमूढश्चवृद्धःकेनापिहेतुना १८ वि
वदंतौतथातौतुमुनीनांदर्शनेस्थितौ ॥ येतस्ययज्ञेसंवृत्तास्तेऽपृच्छंतकथंत्विमौ १९ प्रवेशःकेनदत्तोऽयमुभयोर्वैन्यसंसदि ॥ उच्चैःसमभिभाषंतौकेनकार्येणाधि
ष्ठितौ २० ततःपरमधर्मात्माकाश्यपःसर्वधर्मवित् ॥ विवादिनावनुप्राप्तौतावुभौप्रत्यवेदयत् २१ अथाब्रवीत्सदस्यांस्तुगौतमोमुनिसत्तमान् ॥ आवयोर्व्या
हृतंप्रश्नंशृणुतद्विजसत्तमाः २२ वैन्यंविधातेत्याहात्रिरत्रनौसंशयोमहान् ॥ श्रुत्वैवतुमहात्मानोमुनयोऽभ्यद्रवन्द्रुतम् २३ सनत्कुमारंधर्मज्ञंसंशयच्छेदनायवै ॥
सचतेषांवचःश्रुत्वायथातत्त्वंमहातपाः ॥ प्रत्युवाचाथतानेवंधर्मार्थसहितंवचः २४ ॥ सनत्कुमारउवाच ॥ ब्रह्मक्षत्रेणसहितंक्षत्रंचब्रह्मणासह ॥ संयुक्तौदहतः
शत्रून्वनानीवाग्निमारुतौ २५ राजावैप्रथितोधर्मःप्रजानांपतिरेवच ॥ सएवशक्रःशुक्रश्चसधाताचबृहस्पतिः २६ प्रजापतिर्विराट्सम्राट्क्षत्रियोभूपतिर्नृपः ॥
यएभिःस्तूयतेशब्दैःकस्तंनार्चितुमर्हति २७ पुरायोनिर्युधाजिच्चअभियामुदितोभवः ॥ स्वर्णेतासहजिद्बभ्रुरितिराजाऽभिधीयते २८ सत्ययोनिःपुराविच्चसत्य
धर्मप्रवर्तकः ॥ अधर्मादृषयोभीताबलंक्षत्रेसमादधन् २९ आदित्योदिविदेवेषुतमोनुदतितेजसा ॥ तथैवनृपतिर्भूमावधर्मान्नुदतेभृशम् ३०

स्पष्टमप्रामाण्यकारणंतयाऽप्यविद्यमानैरपिविशेषणैर्वेनार्थिनाराजास्तोतव्यइतिसनत्कुमाराशयः २५ प्रथितःप्रख्यातः । धर्मोधर्मस्थापकः । शक्रोरक्षिता । शुक्रोनीतिवित् । धाताअतप
वजनकः । बृहस्पतिर्हितोपदेष्टा २६ । २७ पुरायोनिर्धर्मप्रवर्तकत्वेनप्रथमंकारणम् । युधाजित्संग्रामेजयकर्तृत्वेनोपद्रवनाशकः । अभियाःअभितोयाति यामिकवद्रक्षणार्थमित्यभियाः मुदितः
भवःईश्वरः । स्वर्गेतास्वर्गप्रतिगमयिता । सहजित्सद्योजयशीलः । बभ्रुर्विष्णुः । 'बभ्रुर्नानकुलेविष्णौविशूलेपिंगलेत्रिषु'इतिबलशर्मा २८ अधर्मादिति सर्वनाशंबलंक्षत्रेऽस्तीत्यर्थः २९ । ३० ॥१५२॥

३१ । ३२ । ३३ । ३४ । ३५ । ३६ सत्यादिधर्मफलंवनेएवसिद्ध्यतीत्याख्यायिकावसानमुखेनोपसंहरति प्रदायचेति ३७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे पंचाशीत्यधिकश
ततमोऽध्यायः ॥ १८५ ॥ ॥ वनेसत्यादिधर्मवतायत्कर्तव्यंयत्प्राप्यंयच्चज्ञेयं तदाहाध्यायेन अत्रैवचसरस्वत्येत्यादिना सरस्वतीयज्ञभोक्त्रीयज्ञफलदात्रीचदेवता अग्निहोत्रादहमभ्याग
ताऽस्मीति वाक्यशेषात् १ कथंकुर्याच्छ्रेयइत्यावर्तते २ लोकान्कामान् विरजाआसक्तिहीनः चरेयमुपलभेयं । तेषांसर्वेषुलोकेषुकामचारोभवतीतिश्रुतिप्रसिद्धसर्वकामभाक्त्वरूपंफलंकेनोपा

ततोराज्ञःप्रधानत्वंशास्त्रप्रामाण्यदर्शनात् ॥ उत्तरःसिद्ध्यतेपक्षोयेनराजेतिभाषितम् ३१ ॥ मार्कंडेयउवाच ॥ ततःसराजासंहृष्टःसिद्धेपक्षेमहामना ॥
तमत्रिमब्रवीत्प्रीतःपूर्वंयेनाभिसंस्तुतः ३२ यस्मात्पूर्वंमनुष्येषुज्यायांसंमामिहाब्रवीः ॥ सर्वदेवैश्चविप्रर्षेसंमितंश्रेष्ठमेवच ३३ तस्मात्तेऽहंप्रदास्यामिविविधंव
सुभूरिच ॥ दासीसहस्रंश्यामानांसुवस्त्राणामलंकृतम् ३४ दशकोटिर्हिरण्यस्यरुक्मभारांस्तथादश ॥ एतद्ददामिविप्रर्षेसर्वज्ञस्त्वंमतोहिमे ३५ तदात्रिर्न्याय
तःसर्वंप्रतिगृह्याभिसत्कृतः ॥ प्रत्युज्जगामतेजस्वीगृहानेवमहातपाः ३६ प्रदायचधनंप्रीतःपुत्रेभ्यःप्रयतात्मवान् ॥ तपःसमभिसंधायवनमेवान्वपद्यत ३७
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणमाहात्म्येपंचाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥ ॥ ध ॥ ॥ मार्कंडेयउवाच ॥
अत्रैवचसरस्वत्यागीतंपरपुरंजय ॥ पृष्ट्यामुनिनावीरशृणुतार्क्ष्येणधीमता १ ॥ तार्क्ष्यउवाच ॥ किंनुश्रेयःपुरुषस्येहभद्रेकथंकुर्वन्नच्यवतेस्वधर्मात् ॥ आ
चक्ष्वमेचारुसर्वांगिकुर्यात्त्वयाशिष्टोनच्यवेयंस्वधर्मात् २ कथंवाग्निंजुहुयांपूजयेवाकस्मिन्कालेकेनधर्मोननश्येत् ॥ एतत्सर्वंसुभगेप्रब्रवीहियथालोकान्विरजाःसं
चरेयम् ३ ॥ मार्कंडेयउवाच ॥ ॥ एवंपृष्टाप्रीतियुक्तेनतेनशुश्रूषुमीक्ष्योत्तमबुद्धियुक्तं ॥ तार्क्ष्यंविप्रंधर्मयुक्तंहितंचसरस्वतीवाक्यमिदंबभाषे ४ ॥ सरस्व
त्युवाच ॥ योब्रह्मजानातियथाप्रदेशंस्वाध्यायनित्यःशुचिरप्रमत्तः ॥ सवैपारंदेवलोकस्यगंतासहामरैःप्राप्नुयात्प्रीतियोगम् ५ तत्रस्मरम्याविपुलाविशोकाःसुपु
ष्पिताःपुष्करिण्यःसुपुण्याः ॥ अकर्दमामीनवत्यःसुतीर्थाहिरण्मयैरावृताःपुंडरीकैः ६ तासांतीरेष्वासतेपुण्यभाजोमहीयमानाःपृथगप्सरोभिः ॥ सुपुण्यगंधाभि
रलंकृताभिर्हिरण्यवर्णाभिरतीवहृष्टाः ७ परंलोकंगोप्रदास्त्वाप्नुवंतिदत्वाऽनड्वाहंसूर्यलोकंव्रजंति ॥ वासोदत्वाचांद्रमसंतुलोकंदत्वाहिरण्यममरत्वमेति ८ धेनुंदत्वा
सुप्रभांसुप्रदोहांकल्याणवत्सामपलायिनींच ॥ यावंतिरोमाणिभवंतितस्यास्तावद्वर्षाण्यासतेदेवलोके ९ अनड्वाहंसुव्रतंयोददातिहलस्यवोढारमनंतवीर्यं ॥ धुरंधरं
बलवंतंयुवानंप्राप्नोतिलोकान्दशधेनुदस्य १० ददातियोवैकपिलांसचैलांकांस्योपदोहांद्रविणैरुत्तरीयैः ॥ तैस्तैर्गुणैःकामदुहाऽस्यभूत्वानरंप्रदातारमुपैतिसागौः ११

येनप्राप्नुयादित्यर्थः ३ । ४ ब्रह्मसगुणंहार्दाकाशाख्यं यथाप्रदेशं देशभेदमनतिक्रांतमर्चिरादिमार्गेणलभ्यामित्यर्थः । निर्गुणविदो नतस्यप्राणाउत्क्रामंतीतिगतिनिषेधात् स्वाध्यायःप्रणव
जपः देवलोकस्यपारं कार्यब्रह्मलोकं ५ एनमेवस्तौतितिद्वाभ्यांतत्रेति ६ । ७ देवलोकस्य पारस्तावद्दूरेऽस्तु सएवतुकथंप्राप्यतइत्यतआह परमित्यादिना अनड्वहमनड्वाहं शकटवहनसमर्थंबली
वर्दं ८ धेनुंदोग्ध्रीं ९ । १० उत्तरीयैःपश्चाद्वक्ष्यैर्दक्षिणादिभिर्द्रव्यैःसहिता ११

१२ तिलधेनुर्दानकांडेप्रसिद्धा ११ दानवैःकामक्रोधादिभिः संनिरुद्धेव्याप्ते तीव्रांधकारे अंपेतमसि देहाभिनिवेशाख्ये तारयतेयोगाविघ्नान्नाशयति १४ ब्राह्मदेयां ब्राह्मेणालंकृत्यकन्यामुद कपूर्वांदद्यादेषब्राह्मोविवाहइति गृह्योक्तेनविधिनादेयां १५ यःसप्तेति श्रौतंधर्ममनुतिष्ठन्नात्मनासहपूर्वानपरांश्चतारयतीत्यर्थः १६ अग्निहोत्रंजुह्वानो लोभजालंभिनत्त्यतः संमोहंछित्त्वेत्या दिना मैत्रायणीयोपनिषद्यग्निहोत्रस्य ज्ञानांतरंगत्वमुक्तमतस्तदाश्रितमेवविशेषंव्रतादिकंपृच्छति किमिति पुराणंवेदोदितं १७ अनिर्णिक्तपादोऽप्रक्षालितपाणिपादोऽनाचांतश्च अब्रह्मवित् वेदंपाठतोऽर्थतश्चाविद्वान् अविपश्चित् वेदादधिगतस्यार्थस्यानुभवहीनः बुभुत्सवःपराचित्तंज्ञातुमिच्छवः यस्मात्शुचिकामाजुषंतिसेवंते १८ ऋत्विगप्येवंविधएवकर्तव्यइत्याह नाश्रोत्रियमि ति देवहव्येदेवानां हव्यदानादौ मोघंनिष्फलं पुरेतिशीलगोत्रादिज्ञानात्प्राक् अपूर्वमज्ञातकुलशीलं आह वेदइविशेषः १९ कृशाःधनादिप्रमवेनदर्पेण हीनाः ऋत्विजोयजमानावा गवांलोकं

यावंतिरोमाणिभवंतिधेन्वास्तावत्फलंभवतिगोप्रदाने ॥ पुत्रांश्चपौत्रांश्चकुलंचसर्वमासप्तमंतारयतेपरत्र १२ सदाक्षिणांकांचनचारुशृंगींकांस्योपदोहांद्रविणैरु त्तरीयैः ॥ धेनुंतिलानांददतोद्विजायलोकावसूनांसुलभाभवंति १३ स्वकर्मभिर्दानवसंनिरुद्धेतीव्रांधकारेनरकेसंपतंतम् ॥ महार्णवेनौरिववातयुक्तादानंगवां तारयतेपरत्र १४ योब्राह्मदेयांतुददातिकन्यांभूमिप्रदानंचकरोतिविप्रे ॥ ददातिदानंविधिनाचयश्चसलोकमाप्नोतिपुरंदरस्य १५ यःसप्तवर्षाणिजुहोतितार्क्ष्य हव्यंत्वग्नौनियतःसाधुशीलः ॥ सप्तावरान्सप्तपूर्वान्पुनातिपितामहानात्मनाकर्मभिःस्वैः १६ ॥ तार्क्ष्यउवाच ॥ ॥ किमग्निहोत्रस्यव्रतंपुराणमाचक्ष्वमेपृच्छत श्चानुरूपे ॥ त्वयाऽनुशिष्टोऽहमिहाद्यविद्यांयदग्निहोत्रस्यव्रतंपुराणम् १७ ॥ सरस्वत्युवाच ॥ नवाऽशुचिर्नाप्यनिर्णिक्तपाणिर्नाब्रह्मविज्जुहुयान्नाविपश्चित् ॥ बुभुत्सवःशुचिकामाहिदेवानाश्रद्दधानाद्धिहविर्जुषंति १८ नाश्रोत्रियंदेवहव्येनियुंज्यान्मोघंपुरासिंचतितादृशोहि ॥ अपूर्वमश्रोत्रियमाहतार्क्ष्यनवैताह क्जुहुयादग्निहोत्रं १९ कृशाश्चयेजुह्वतिश्रद्दधानाःसत्यव्रताहुतशिष्टाशिनश्च ॥ गवांलोकंप्राप्यतेपुण्यगंधंपश्यंतिदेवंपरमंचापिसत्यं २० ॥ तार्क्ष्यउवाच ॥ क्षेत्रज्ञभूतांपरलोकभावेकर्मोदयेबुद्धिमतिप्रविष्टाम् ॥ प्रज्ञांचदेवींसुभगेविमृश्यपृच्छामित्वांकाह्यसिचारुरूपे २१ ॥ सरस्वत्युवाच ॥ ॥ अग्निहोत्रादहमभ्याग ताऽस्मिविप्रर्षभाणांसंशयच्छेदनाय ॥ त्वत्संयोगादहमेतमब्रुवंभावेस्थितातथ्यमर्थंयथावत् २२ ॥ तार्क्ष्यउवाच ॥ ॥ नहित्वयासदृशीकाचिदस्तिविभ्राजसे ह्यतिमात्रंयथाश्रीः ॥ रूपंचतेदिव्यमनंतकांतिप्रज्ञांचदेवींसुभगेबिभर्षि २३

कार्यब्रह्मलोकसमीपस्थं परमंचदेवं ब्रह्माणं ततःक्रमेण सत्यंचपरमं ब्रह्माख्यंपश्यंति एतेन सर्वगुणयुक्तस्याग्निहोत्रस्य परंपरयाकैवल्यजनकत्वमुक्तं २० क्षेत्रज्ञभूतांपरमात्मरूपांत्वांप्रज्ञांपृच्छामि त्वंचकाऽसीतिपृच्छा मि प्रज्ञांविशिनष्टि परोलोकआत्मातस्यभावेस्वरूपे विवेकमोदये कर्मफलेब्रह्मलोकांते च विषयेबुद्धिमतिउत्कृष्टतरांबुद्धिंप्रविष्टां कर्मब्रह्मतत्त्वयोर्निविष्टामित्यर्थः किंकरस्वात्वांदेवींउभयतत्त्वं द्योतयंतींविमृश्यज्ञात्वा २१ अग्निहोत्रात्सत्कर्मणःसकाशादहं परापरविद्यारूपा सरस्वत्यभ्यागताआविर्भूताऽस्मि त्वत्संयोगात्त्वत्संनिधिंप्राप्यएतमर्थंकर्मणांपारंपर्येण कैवल्यहेतुत्वंसगुणब्र ह्मविद्यांचाब्रुवं यतोहंभावेस्थिता श्रद्धावानग्निहोत्रादिनादेवताप्रसादंप्राप्य कर्मोपास्तिज्ञानफलानिविंदतीत्यर्थः २२ नहित्वयेतिश्लोकत्रयतात्पर्यंसोपासनेनकर्मणाविद्यासमुल्लसतीति २३

यज्ञेषुश्रेष्ठानिकर्मांगावबद्धोपासनानि उपासनास्वरूपंच । 'अहंक्रतुरहंयज्ञः स्वधाऽहमहमौषधं ॥ मंत्रोऽहमहमेवाज्यमहमग्निरहंहुतम्'इतिभगवदुपादिष्टंसर्वेषुयज्ञांगेषुब्रह्मदृष्टिकरणं २४ वान स्पत्यंसमिज्जुह्वादि । आयसंसौवर्णादि पार्थिवंव्रीह्यादि । दिव्येनदिवेस्वर्गायहितेनरूपेण । प्रज्ञया अहंक्रतुरित्यादिनाउक्तविधप्रज्ञात्मकेन तत्रैवप्रत्यगात्मनःसिद्धिःप्राप्तिर्मुक्तिर्नान्य नात्मभूतस्थानांतरसिद्धिरितिविद्धि २५ इदंतत्रैवसिद्धिरित्यनेनोपक्षिप्तंप्रत्यद्रूपंव्यायच्छंते नियच्छंतिइंद्रियादीनीतिशेषः संप्रतीताःसम्यग्विश्वासयुक्ताः २६ वेदविदएवप्रपन्नानत्ववै दिकाः । 'नावेदविन्मनुतेतं बृहंतम्'इतिश्रुतेः परंब्रह्मपरेभ्यो विराट्सूत्रांतर्यामिभ्यः सोपाधिकेभ्यःपरं निरुपाधिकत्वाच्छ्रेष्ठं प्रथितंसच्चिदानंदरूपेणसर्वत्रप्रथांगतं यथोक्तं । 'अस्तिभातिप्रियं रूपं नामचेत्यर्थपंचकं । आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयम्'इति पुराणं पुरापिनवं तेनसोपाधिकानामुत्पत्तिःसूचिता व्रतमहिंसादि पुण्यंजपादि योगश्चित्तवृत्तिनिरोधस्तैः तपःस्वधर्माचर णमेवधनंयेषांतेप्राप्नुवंतीतिशेषः २७ अस्यप्रत्यग्वस्तुनोऽद्वयस्त्वसिद्धयर्थमितएवांतर्याम्यादिनासमुत्थानमाह तस्येति तस्यचिदात्मनोमध्ये वेतसोवंजुलतरुरिवसबीजांकुरो ब्रह्मांडवृक्ष श्चित्तापरिच्छेद्यत्वात्तन्मध्यस्थः पुण्योरमणीयोगंधइवगंधादिर्विषयो धर्मज्ञानवैराग्यैश्वर्यवति यस्मिन्नस्तीतिपुण्यगंधः सहस्रमनंतंशाखाइवभोगस्थानानियस्मिन् विपुलोऽपरिच्छिन्नोवि

॥ सरस्वत्युवाच ॥ श्रेष्ठानियानिद्विपदांवरिष्ठयज्ञेषुविद्वन्नुपपादयंति ॥ तैरेवचाहंसंप्रवृद्धाभवामिचाप्यायितारूपवतीचविप्र २४ यच्चापिद्रव्यमुपयुज्यतेहवान स्पत्यमायसंपार्थिवंवा ॥ दिव्येनरूपेणचप्रज्ञयाचतत्रैवसिद्धिरितिविद्धिविद्वन् २५ ॥ तार्क्ष्यउवाच ॥ इदंश्रेयःपरमंमन्यमानाव्यायच्छंतेमुनयःसंप्रतीताः ॥ आचक्ष्वमेतंपरमंविशोकंमोक्षंपरंयंप्रविशंतिधीराः ॥ सांख्यायोगाःपरमंयंविदंतिपरंपुराणंतमहंनवेद्मि २६ ॥ सरस्वत्युवाच ॥ तंवैपरंवेदविदःप्रपन्नाःपरंपरेभ्यः प्रथितंपुराणम् ॥ स्वाध्यायवंतोव्रतपुण्ययोगैस्तपोधनावीतशोकाविमुक्ताः २७ तस्याथमध्येवेतसःपुण्यगंधःसहस्रशाखोविपुलोविभाति ॥ तस्यमूलात्सरितः प्रस्रवंतिमधूदकप्रस्रवणाःसुपुण्याः २८ शाखांशाखांमहानद्यःसंयांतिसिकताशयाः ॥ धानापूपामांसशाकाःसदापायसकर्दमाः २९ यस्मिन्नग्निमुखादेवाःसेंद्राः सहमरुद्गणाः ॥ ईजिरेक्रतुभिःश्रेष्ठैस्तत्पदंपरमंमम ३० इतिश्रीम०आ०प०मार्कंडेयसमास्यापर्वणिसरस्वतीतार्क्ष्यसंवादेषडशीत्यधिकशततमोऽध्यायः ॥१८६॥

भाति तस्यमूलादविद्यारूपात्सरितइव संततप्रवाहवत्यो भोगवासनाः प्रस्रवंत्युत्तिष्ठंति मधुवन्मृष्टमुदकवदाप्यायनकरंभोगजंसुखंप्रस्रवंतिताम धूदकप्रस्रवणाः भोगवासनाद्युत्तरकालीनंभो गसुखं प्रवृत्तिजननादिद्वारा प्रस्रवतीतिप्रसिद्धं २८ शाखामिति महानद्यो वासनाःपुराशाखांशाखातत्तद्भोगस्थानं संयांति स्वप्रवाहपतितं पुरुषं नयंतीत्यर्थः । पुण्यवासनया पुण्यमाचर न्स्वर्गंगच्छत्येवमन्यत्रापि सिकताइवपरस्परमसंश्लिष्टाः पुत्रपश्वादयस्तासुशेरते ताः सिकताशयाः पुत्रादिविषयाइत्यर्थः । धानाभृष्टयवाः अपूपाः सच्छिद्रंभक्ष्यं शेषंप्रसिद्धं । धानादिकं मधूदकस्थानीयस्यसुखस्यविशेषणं विषयसुखंहि धानावन्नस्वसजातीयंप्रसूते अपूपवदनेकच्छिद्रयुक्तं मांसवद्धिंसालभ्यं नानुपहत्यभूतानिभोगःसंभवतीतिप्रसिद्धेः शाकवदल्पसारं पायसवन्मु खमधुरं पाकेगुरुतरंच कर्दमवच्चित्तपदस्यमलिनीकरणंचेति परचैतन्यभूमावनाद्यविद्यामूलादुत्थितोऽयंसंसारवृक्षोऽतिविरसफलोऽविद्यानाशात्समूलमुन्मूलनीयइत्यर्थः तथाचाचिदद्वैतमव्या हतं २९ यस्मिन्यत्प्राप्तिनिमित्तं श्रेष्ठैः क्रतुभिर्योगयज्ञैरम्यादयो यद्गच्छंतितन्मम विद्यारूपायाः सरस्वत्याःपदंपदनीयंप्रापणीयंस्थानं परमंसर्वोत्कृष्टं ज्ञातृज्ञानज्ञेयभानशून्यं ब्रह्माद्वैतं ३० ॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥ ॥ ७ ॥

पूर्वत्रचिद्रूमविद्यामूलोजगद्वृक्षउत्थितः सोऽविद्याक्षयेभूमावेवलीयतइतिदर्शितं तत्र सकृदविद्याक्षयेसंसारभानंनस्यात् दृश्यतेचक्षीणाविद्यानामपिमार्कंडेयादीनांसंसारभानमस्मदा दिवदितिजीवन्मुक्तौसंदिहानो राजामार्कंडेयमुवाचेत्याह ततःसइति मनोर्मनुते इतिअभिमानात्मकोऽहंकारोमनुः । विशेषेणवस्ते आच्छादयतिचित्प्रकाशमितिविवोऽज्ञानं तद्वान् विव स्वान् मायावीईश्वरः । 'मायिनंतुमहेश्वरम्'इतिश्रुतेः सएवविवस्वतस्तस्यवैवस्वतस्यचरितं संचरणं अविद्यानाशेसत्यविद्यकोऽहंकारःकथंसंचरति नहितंतुदाहेपटस्तिष्ठतीत्याक्षेपः १ अ परस्त्वाख्यायिकामनुसृत्यैव उत्तरमाह विवस्वतइत्यादिना अत्रपरब्रह्मणएवरूपांतरं मत्स्याख्योजीवः सोहंकारेणमनुनाउत्तरोत्तरश्रेष्ठेष्वलिंजरादिरूपेषु स्थूलदेहेषु तपोबलान्निपात्यते ।

वैशंपायनउवाच ॥ ततःसपांडवोविप्रंमार्कंडेयमुवाचह ॥ कथयस्वेतिचरितंमनोर्वैवस्वतस्यच १ मार्कंडेयउवाच ॥ विवस्वतःसुतोराजन्महर्षिःसुप्रतापवान् ॥ बभूवनरशार्दूलप्रजापतिसमद्युतिः २ ओजसातेजसालक्ष्म्यातपसाचविशेषतः ॥ अतिचक्रामपितरंमनुःस्वंचापितामहम् ३ ऊर्ध्वबाहुर्विशालायांबदर्यांसन राधिप ॥ एकपादस्थितस्तीव्रंचकारसुमहत्तपः ४ अवाक्शिरास्तथाचापिनेत्रैरनिमिषैर्दृढम् ॥ सोऽतप्यततपोघोरंवर्षाणामयुतंतदा ५ तंकदाचित्तपस्यं तमार्द्रचीरजटाधरम् ॥ चीरिणीतीरमागम्यमत्स्योवचनमब्रवीत् ६ भगवन्क्षुद्रमत्स्योऽस्मिबलवद्भ्योभयंमम ॥ मत्स्येभ्योहिततोमांत्वंत्रातुमर्हसिसुव्रत ७ दुर्बलंबलवंतोहिमत्स्यामत्स्यंविशेषतः ॥ आस्वदंतिसदावृत्तिर्विहितानःसनातनी ८ तस्माद्भयौघान्महतोमज्जंतंमांविशेषतः ॥ त्रातुमर्हसिकर्ताऽस्मिकृतेप्र तिकृतंतव ९ समत्स्यवचनंश्रुत्वाकृपयाऽभिपरिप्लुतः ॥ मनुर्वैवस्वतोऽगृह्णात्तंमत्स्यंपाणिनास्वयम् १० उदकांतमुपानीयमत्स्यंवैवस्वतोमनुः ॥ अलिंजरे प्राक्षिपत्तंचंद्रांशुसदृशप्रभे ११ सतत्रववृधेराजन्मत्स्यःपरमसत्कृतः ॥ पुत्रवत्स्वीकरोत्तस्मैमनुर्भावंविशेषतः १२ अथकालेनमहतासमत्स्यःसुमहानभूत् ॥ अलिंजरेयथाचैवनासौसमभवत्किल १३ अथमत्स्योमनुंदृष्ट्वापुनरेवाभ्यभाषत ॥ भगवन्साधुमेऽद्यान्यत्स्थानंसंप्रतिपादय १४ उद्धृत्यालिंजरात्तस्मात्ततःस भगवान्मनुः ॥ तंमत्स्यमनयद्वापींमहतींसमनुस्तदा १५ तत्रतंप्राक्षिपच्चापिमनुःपरपुरंजय ॥ अथावर्धतमत्स्यःसपुनर्वर्षगणान्बहून् १६ द्वियोजनायतावा पीविस्तृताचापियोजनम् ॥ तस्यांनासौसमभवन्मत्स्योराजीवलोचनः १७ विचेष्टितुंचकौंतेयमत्स्योवाप्यांविशांपते ॥ मनुंमत्स्यस्ततोदृष्ट्वापुनरेवाभ्यभाष त १८ नयमांभगवन्साधोसमुद्रमहिषींप्रियाम् ॥ गंगांतत्रनिवत्स्यामियथावातातमन्यसे १९

सचसमुद्राख्येवैराजेदेहेनिपातितश्चकल्पांतेऽविद्यानाशरूपेसत्यपि दग्धपटन्यायेनानुवर्तमानमहंकारं सप्तर्षिसंज्ञकैःप्राणादिभिर्बीजसंज्ञैः प्रारब्धकर्मभिश्चसहितं चरमदेहनाव्यारूढं वास नावरत्रयाजीवमत्स्येन प्रलयकालेप्यूह्यमानं मेरुशृंगसमेऽचलेभगवतोरूपे सद्वासनयालब्धास्पदं विलीनमनुलक्ष्य जीवमत्स्योऽदर्शनंप्राप्नोति विलीनेह्यहंकारे जीवत्वं नश्यति । नपुनर्निर स्तजीवभावोऽहंकारोब्रह्मरूपतामापन्नो यथापूर्ववासनयाजगत्सृजति । नष्टेऽप्यविद्याख्येकारणे संसारभानलक्षणं कार्यं चक्रभ्रमिवत्कंचित्कालमनुवर्तत इत्यध्यायतात्पर्यं २ अक्षरार्थस्तु पितरमीश्वरं पितामहंशुद्धंब्रह्मातिचक्राम देहादावावेशबलान्नमनुतइत्यर्थः ३ एवमहंकारस्यईशाद्यज्ञानात् बंधेप्रसक्ते तपसस्तन्निवृत्त्युपायत्वमाह ऊर्ध्वबाहुरित्यादिना ४ । ५ चीरिणी न दीविशेषः ६ । ७ । ८ । ९ । १० अलिंजरे मणिकाख्यपात्रे ११ । १२ नसमभवत्स्थूलत्वेननममावित्यर्थः १३ । १४ । १५ । १६ । १७ । १८ । १९

२० समत्स्योऽच्युतइतिसंबंधः २१ । २२ । २३ २४ मत्स्यस्पर्शगंधजंचिदाभाससंपर्कजंसुखंयस्यास्तीतिवस्यमनोः २५ । २६ । २७ । २८ संप्रक्षालनमेकीभावेनशुद्धिरजतस्येव प्रपंचमल स्यदूरीकरणम् २९ त्रसानांजंगमानां इंगंचलनशीलंवृक्षादि नेंगतिपाषाणादि कालोंऽतः ३० वटारकारज्जुः । वटवेष्टनेऽस्यरूपं सप्तर्षिभिःप्राणेंद्रियैः ३१ बीजानिकर्माणिसुसंगुप्तानि दर्श

निदेशेहिमयातुभ्यंस्थातव्यमनसूयता ॥ वृद्धिर्हिपरमाप्राप्तात्वत्कृतेहिमयाऽनघ २० एवमुक्तोमनुर्मत्स्यमनयद्भगवान्वशी ॥ नदींगंगांतत्रचैनंस्वयंप्राक्षिप दच्युतः २१ सतत्रववृधेमत्स्यःकिंचित्कालमरिंदम ॥ ततःपुनर्मनुंदृष्ट्वामत्स्योवचनमब्रवीत् २२ गंगायांहिनशक्तोमिबृहत्त्वाच्चेष्टितुंप्रभो ॥ समुद्रंनयमा माशुप्रसीदभगवन्निति २३ उद्धृत्यगंगासलिलात्ततोमत्स्यंमनुःस्वयम् ॥ समुद्रमनयत्पार्थतत्रचैनमवासृजत् २४ सुमहानपिमत्स्यस्तुसमनोर्नयतस्तदा ॥ आसीद्यथेष्टहार्यश्चस्पर्शगंधसुखस्यवै २५ यदासमुद्रेप्रक्षिप्तःसमत्स्योमनुनातदा ॥ ततएनमिदंवाक्यंस्मयमानइवाब्रवीत् २६ भगवन्हिकृतारक्षात्वयासर्वा विशेषतः ॥ प्राप्तकालंतुयत्कार्यंत्वयातच्छ्रूयतांमम २७ अचिराद्भगवन्भौममिदंस्थावरजंगमम् ॥ सर्वमेवमहाभागप्रलयंवैगमिष्यति २८ संप्रक्षालनकालोऽयं लोकानांसमुपस्थितः ॥ तस्मात्त्वांबोधयाम्यद्ययत्तेहितमनुत्तमम् २९ त्रसानांस्थावराणांचयच्चेंगंयच्चनेंगति ॥ तस्यसर्वस्यसंप्राप्तःकालःपरमदारुणः ३० नौ श्चकारयितव्यातेदृढायुक्तवटारका ॥ तत्रसप्तर्षिभिःसार्धमारुहेथामहामुने ३१ बीजानिचैवसर्वाणियथोक्तानिद्विजैःपुरा ॥ तस्यामारोहयेर्नौविसुसंगुप्तानिभाग शः ३२ नौस्थश्चमांप्रतीक्षेथास्ततोमुनिजनप्रिय ॥ आगमिष्याम्यहंशृंगीविज्ञेयस्तेनतापस ३३ एवमेतत्त्वयाकार्यमापृष्टोऽसिव्रजाम्यहम् ॥ तानशक्या महत्योवैआपस्तर्तुंमयाविना ३४ नाभिशंक्यमिदंचापिवचनंमेत्वयाविभो ॥ एवंकरिष्यइतितंसमत्स्यंप्रत्यभाषत ३५ जग्मतुश्चयथाकाममनुज्ञाप्यपरस्प रम् ॥ ततोमनुर्महाराजयथोक्तंमत्स्यकेनह ३६ बीजान्यादायसर्वाणिसागरंपुप्लुवेतदा ॥ नौकयाशुभयावीरमहोर्मिणमरिंदम ३७ चिंतयामासचमनुस्तंमत्स्यं पृथिवीपते ॥ सचतच्चिंतितंज्ञात्वामत्स्यःपरपुरंजय ३८ शृंगीतत्राजगामाशुतदाभरतसत्तम ॥ तंदृष्ट्वामनुजव्याघ्रमनुर्मत्स्यंजलार्णवे ३९ शृंगिणंतंयथोक्तेनरू पेणाद्रिमिवोच्छ्रितम् ॥ वटारकमयंपाशमथमत्स्यस्यमूर्धनि ४० मनुर्मनुजशार्दूलतस्मिन्शृंगेन्यवेशयत् ॥ संयतस्तेनपाशेनमत्स्यःपरपुरंजय ४१ वेगेनमह तानावंप्राकर्षल्लवणांभसि ॥ सचतांस्तारयन्नावासमुद्रंमनुजेश्वर ४२ नृत्यमानमिवोर्मीभिर्गर्जमानमिवांभसा ॥ क्षोभ्यमाणामहावातैःसानौस्तस्मिन्महो दधौ ४३ घूर्णतेचपलेवस्त्रीमत्तापरपुरंजय ॥ नैवभूमिर्नदिशःप्रदिशोवाचकाशिरे ४४ सर्वमांभसमेवासीत्खंद्यौश्चनरपुंगव ॥ एवंभूतेतदालोकेसंकुलेभरतर्षभ ४५ अदृश्यंतसप्तर्षयोमनुर्मत्स्यस्तथैवच ॥ एवंबहून्वर्षगणांस्तांनावंसोऽथमत्स्यकः ४६

नायोग्यानिअदृष्टानीत्यर्थः ३२ मामंतरात्मानंप्रतीक्षेथाः प्रतीपंजडानृतादिमात्मप्रातिकूल्येनईक्षेथाआलोचय आगमिष्याम्याविर्भविष्यामि शृंगीशृणाति हिनस्तिजीवोपाधीन्बाधतेइतिशृंगं मूर्तिस्तद्वान् कथापक्षेसुगममेव ३३ आपःसंसारः मयाविनामदीयंज्ञानंविना ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६

४७।४८।४९।५०।५१ अहमिति अचले अमूर्तैकारणात्मनि शृंगे बंधनस्य फलमीश्वरानुग्रहादहं ब्रह्मास्मीति ज्ञानमित्यर्थः । तथा चान्यत्र पूर्वं मूर्तौ धृतं चित्तं मूर्तेरेकैकावयवत्यागेनैकदेशे स्मित मात्रे च धारयेदित्युक्त्वा । तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् । तत्र त्यक्त्वा मदारोहेन किंचिदपि चिंतयेदिति व्योमाख्यामूर्तद्वारा मूर्तामूर्तेतरे शुद्धे आरोह उक्तः अत्र हिमवतः शृंगे नावं बध्नी तेत्यहं प्रजापतिर्ब्रह्मेति च श्लोकाभ्यां मूर्त्योराधनादेव कारणं ब्रह्म निर्विशेषं च ब्रह्म क्रमेण प्राप्यत इति दर्शितं मत्स्यरूपेण ज्ञातेन यूयं मयाऽस्मान्मोक्षिता इति भयमहंकारादेरेव घर्म इत्युक्तं शेषं स्पष्टम् ५२।५३।५४।५५।५६।५७।५८ ॥ इत्यारण्यके पर्वणि नैलकंठीये भारतभावदीपे सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥ ॥ ७ ॥ ॥ एवं जीवन्मुक्तिं प्रसाध्य तस्या

चकर्षातंद्रितो राजंस्तस्मिन्सलिलसंचये ॥ ततो हिमवतः शृंगं यत्परं भरतर्षभ ४७ तत्राकर्षत्ततो नावं स मत्स्यः कुरुनंदन ॥ अथाब्रवीत्तदा मत्स्यस्तानृषीन्प्रह सञ्शनैः ४८ अस्मिन्हिमवतः शृंगे नावं बध्नीत माचिरम् ॥ सा बद्धा तत्र तैस्तूर्णमृषिभिर्भरतर्षभ ४९ नौर्मत्स्यस्य वचः श्रुत्वा शृंगे हिमवतस्तदा ॥ तच्च नौबंध नं नाम शृंगं हिमवतः परम् ५० ख्यातमद्यापि कौंतेय तद्विद्धि भरतर्षभ ॥ अथाब्रवीदनिमिषस्तानृषीन्सहितस्तदा ५१ अहं प्रजापतिर्ब्रह्मा मत्परं नाधिगम्य ते ॥ मत्स्यरूपेण यूयं च मयाऽस्मान्मोक्षिता भयात् ५२ मनुना च प्रजाः सर्वाः सदेवासुरमानुषाः ॥ स्रष्टव्याः सर्वलोकाश्च यच्चेंगं यच्च नेंगति ५३ तपसा चापि तीव्रेण प्रतिभाऽस्य भविष्यति ॥ मत्प्रसादात्प्रजासर्गे न च मोहं गमिष्यति ५४ इत्युक्त्वा वचनं मत्स्यः क्षणेनादर्शनं गतः ॥ स्रष्टुकामः प्रजाश्चापि मनुर्वैवस्वतः स्वयम् ५५ प्रमूढोऽभूत्प्रजासर्गे तपस्तेपे महत्ततः ॥ तपसा महता युक्तः सोऽथ स्रष्टुं प्रचक्रमे ५६ सर्वाः प्रजा मनुः साक्षाद्यथावद्भरतर्षभ ॥ इत्येतन्मात्स्यकं नाम पुराणं प रिकीर्तितम् ५७ आख्यानमिदमाख्यातं सर्वपापहरं मया ॥ य इदं शृणुयान्नित्यं मनोश्चरितमादितः ॥ स सुखी सर्वपूर्णार्थः सर्वलोकमियान्नरः ५८ ॥ इति श्री महाभारते आरण्यके पर्वणि मार्कंडेयसमास्यापर्वणि मत्स्योपाख्याने सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥ ॥ ७ ॥ ॥ वैशंपायन उवाच ॥ ततः स पुनरेवाथ मार्कंडेयं यशस्विनम् ॥ पप्रच्छ विनयोपेतो धर्मराजो युधिष्ठिरः १ नैकेयुगसहस्रांतास्त्वया दृष्टा महामुने ॥ न चापीह समः कश्चिदायुष्मान्दृश्यते तव २ वर्जयित्वा महात्मानं ब्रह्माणं परमेष्ठिनम् ॥ न तेऽस्ति सदृशः कश्चिदायुषा ब्रह्मवित्तम ३ अनंतरिक्षे लोकेऽस्मिन्देवदानववर्जिते ॥ त्वमेव प्रलये विप्र ब्रह्माणमुपति ष्ठसे ४ प्रलये चापि निर्वृत्ते प्रबुद्धे च पितामहे ॥ त्वमेकः सृज्यमानानि भूतानीह प्रपश्यसि ५ चतुर्विधानि विप्रर्षे यथावत्परमेष्ठिना ॥ वायुभूता दिशः कृत्वा विक्षि प्यापस्ततस्ततः ६ त्वया लोकगुरुः साक्षात्सर्वलोकपितामहः ॥ आराधितो द्विजश्रेष्ठ तत्परेण समाधिना ७

थमध्येवेतसः पुण्यगंधा इत्यादिना निर्गुणे ब्रह्मण्येव सगुणस्य मायिकाभावाभावावुक्तौ तत्प्रपंचार्थं ततः स पुनरेवाथेत्यादि मन्यमानो यथाविधि स्थितमध्यायद्वयमारभ्यते अद्वैतसिद्ध्यर्थं १ । २ ३ अनंतरिक्षे स्थूलवियदाद्यभाववति अस्मिन्लोके प्रत्यगात्मनि प्रलये स्थूलप्रपंचस्य लये सति । ब्रह्माणं सूत्रात्मानं सूक्ष्मभूतमयहिरण्यगर्भम् ४ इह हृदयपुंडरीके ५ चतुर्विधानि वासनामया नि जरायुजांडजस्वेदजोद्भिज्जानि अस्य प्रलयस्य पुरुषयत्नसाध्यतामाह वायुभूता इति दिशः स्थूलं जगत्प्राणनिरोधेन वायुमात्रतामापाद्य ततस्ततस्तेन तेनोपायेनापो देहाकारपरिणता विक्षिप्य परित्यज्य ब्रह्मांडस्थूलदेहे तं च लिंगे प्रविलाप्येत्यर्थः ६ लोकगुरुः सूत्रात्मा समाधिना मनःप्रणिधानेन ७

अनेकशोऽनेकैरुपायैः कृतं कार्यं सर्वं ब्रह्मांडं स्वप्रमाणमात्मसंमितं कृत्वा सार्वात्म्यं प्राप्येत्यर्थः । यद्वा स्वं प्रत्यक्चितिरेव प्रमाणं यस्मिन् स्वसंवेद्यं कृत्वा सार्वज्ञ्यं प्राप्येत्यर्थः । घोरेण तीव्रेण तपसा ऐकाग्र्येण । 'मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तपः' इति स्मृतेः । वेधसो विराजो मरीच्यादयो वा निर्जिताः स्वात्मसात्कृताः ८ नारायणस्यांकः स्थानं समीपं वा । 'अंकः स्थाने ऽतिके' इति विश्वः । तत्र प्रख्यः प्रख्यातो भगवद्भक्तेषूत्तमः सांपराये परलोके स्थूलदेहत्यागे वा कर्तव्ये सत्यतिपठ्यसे ऽत्यर्थं स्तूयसे लोकैरिति शेषः भगवानित्यादि सार्धः अक्षराधिकयमाप विष्णोर्ब्रह्मण उप लब्धिस्थानत्वेन तत्संबंधि कर्णिकोद्धरणं कृत्वा योगकलया हृदयपुंडरीकमुद्घाट्येत्यर्थः त्वया दृग्भ्यां भगवान् अनेकशोऽनेकवारं दृष्ट इत्यन्वयः रत्नानि तत्तज्जात्युत्कृष्टवस्तूनि तेषामलंकारो निवारण क्रिया परं वैराग्यमिति यावत् योगोऽभ्यासः वैराग्याभ्यासाभ्यामित्यर्थः । दृग्भ्यामिति द्वित्वमंतर्दृष्ट्या हार्दाकाशे दृष्टो बहिर्दृष्ट्या ऽपि योगजधर्मसंस्कृतया व्यवहितादिदर्शिन्या कृत्स्नब्रह्मांडरू पी करतलामलकवद्दृष्ट इत्यभिप्रायेण ९ । १० तवत्वां न विशतीत्यपकृष्यते ११ शेषमवशिष्टं पंचमहाभूतप्रलये सतीत्यर्थः १२ एकार्णवसदृशे एकरसे लोके आत्मनि सालिलप्रकोद्रष्टाऽद्वैतो

स्वप्रमाणमथो विप्र त्वया कृतमनेकशः ॥ घोरेणाविश्य तपसा वेधसो निर्जितास्त्वया ८ नारायणांकप्रख्यस्त्वं सांपराये ऽतिपठ्यसे ॥ भगवाननेकशः कृत्वा त्वया विष्णोश्च विश्वकृत ९ कर्णिकोद्धरणं दिव्यं ब्रह्मणः कामरूपिणः ॥ रत्नालंकारयोगाभ्यां दृग्भ्यां दृष्टस्त्वया पुरा १० तस्मात्त्वां तं कोमृत्युर्जरा वा देहनाशिनी ॥ न त्वां विशति विप्रर्षे प्रसादात्परमेष्ठिनः ११ यदा नैव रविर्नाग्निर्न वायुर्न च चंद्रमाः ॥ नैवांतरिक्षं नैवोर्वी शेषं भवति किंचन १२ तस्मिन्नेकार्णवे लोके नष्टे स्थावरजंगमे ॥ नष्टे देवासुरगणे समुत्सन्नमहोरगे १३ शयानममितात्मानं पद्मोत्पलनिकेतनम् ॥ त्वमेकः सर्वभूतेशं ब्रह्माणमुपतिष्ठसि १४ एतत्प्रत्यक्षतः सर्वं पूर्ववृत्तं द्विजोत्तम ॥ तस्मादिच्छाम्यहं श्रोतुं सर्वहेत्वात्मिकां कथाम् १५ अनुभूतं हि बहुशस्त्वयैकेन द्विजोत्तम ॥ न तेऽस्त्यविदितं किंचित्सर्वलोकेषु नित्यदा १६ ॥ मार्कंडेय उवाच ॥ हंत ते वर्तयिष्यामि नमस्कृत्वा स्वयंभुवे ॥ पुरुषाय पुराणाय शाश्वतायाव्ययाय च १७ अव्यक्ताय सुसूक्ष्माय निर्गुणाय गुणात्मने ॥ स एष पुरुषव्याघ्र पीतवासा ज नार्दनः १८ एष कर्ता विकर्ता च भूतात्मा भूतकृत्प्रभुः ॥ अचिंत्यं महदाश्चर्यं पवित्रमिति चोच्यते १९ अनादिनिधनं भूतं विश्वमव्ययमक्षयम् ॥ एष कर्ता न क्रिय ते कारणं चापि पौरुषे २० यं वेद पुरुषो वेद वेदा अपि न तं विदुः ॥ सर्वमाश्चर्यमेवैतन्निर्वृत्तं राजसत्तम २१

भवति आत्मानमेव लोकमुपासीतेत्यादौ निर्विशेषे आत्मनि सालिललोकशब्दयोः प्रयोगदर्शनात् स्थावरादौ नष्टे बाधिते सति १३ स्वयमपि तत्र शयानं समुद्रे वीचिचलीनं पद्मोत्पलनिकेतनं इति पद्मवल्लीपुष्पस्थमात्मानं मायाविनं ब्रह्माणं ब्रह्म अनुवाद्यापेक्षया पुंस्त्वं १४ एतत्सर्वं त्वया दृष्टमिति शेषः १५ । १६ स्वयंभुवे अजन्मने अस्यापि जन्यत्वे तस्य तस्यापीत्यनवस्थापातः पुरु षायपूर्णाय पुराणाय नित्यैकरूपाय शाश्वताय अनादये अव्ययाय नित्याय १७ अव्यक्ताय रूपादिहीनाय सुसूक्ष्माय दुर्लक्ष्याय गुणात्मने मायोपाधये स एष इत्यंगुल्या निर्दिशति १८ वि कर्ता विविधरूपत्वकर्ता महद्ब्रह्म १९ विश्वं विश्वात्मकमप्यव्ययं अपरिणामि अत एवाक्षयमविनाशि एष पीतवासाः कर्तैव न तु क्रियते एतेन कृष्णमूर्तेर्व्यवहारापेक्षया नित्यत्वमनादित्वं च दर्शितं तच्च व्युत्पादितमादिसभापर्वटीकयोः पौरुषे कारणं चायमेव तस्मात्प्रार्थनीय इति भावः २० य एनमिति वक्तव्ये यं येष इत्युक्तिर्वेद्यवेदित्रोरत्यंताभेदप्रदर्शनार्था तथा च श्रुतिः । 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' इति । 'ब्रह्मैव पश्यति ब्रह्म नाब्रह्म पश्यति' इति स्मृतिश्च वेदा अपि न तं विदुरवाङ्मनसगोचरत्वात् । सर्वमिति आदितः परमात्मनो निर्वृ त्तं निष्पन्नमेतत्प्रत्यक्षादिगम्यं सर्वं जगत्याश्चर्यमेव स्वप्नमायेंद्रजालवदसंभावनीयोत्पत्तिस्थितिकमेव कदा जगतः क्षये दृष्टे सति । अधिष्ठानसाक्षात्काराप्रागेव वादिभिः प्रधानपरमाण्वादिकं–

जगत्कारणमनुमीयते तस्मिन्सतितुप्रधानादेरभावावधारणात् कथमेकस्मादपरिणामिनोऽसहायाद्विचित्ररचनात्मकंजगज्जातं रज्ज्वाःसर्पइवेत्यत्यंताश्चर्यमितिभावः । तथाचब्रह्मैवसंस
रतितदेवचजगदात्मनानिर्वर्ततइतिश्लोकद्वयतात्पर्यं २१ अयमेवपुरुषः स्वाज्ञानोत्थमाश्चर्यरूपं जगत्पश्यंस्तत्ररागादिमान्सत्वायुगचतुष्टयात्माभवति तथाचश्रुतिः । 'कलिःशयानोभवति
संजिहानस्तुद्वापरः ॥ उत्तिष्ठंस्त्रेताभवतिकृतंसंपद्यतेचरन्'इति धर्मात्पराङ्मुखःपुरुषएवकलिः धर्मशास्त्राचार्यद्विजानन् द्वापरः तमनुष्ठातुमिच्छंस्त्रेता अनुतिष्ठन्कृतंभवति एतेषांव्युत्क्रमेण
कालप्रमाणमाहकलेर्बीभत्सत्वप्रदर्शनार्थं चत्वार्याहुरित्यादिना २२ तावच्छती चतुःशतीसंध्या पूर्वस्मिन् युगे उत्तरयुगधर्माणामुपसर्जनतयासंक्रमः संध्यांशस्तूत्तरस्मिन्पूर्वयुगधर्माणां

आदितोमनुजव्याघ्रकृत्स्नस्यजगतःक्षये ॥ चत्वार्याहुःसहस्राणिवर्षाणांतत्कृतंयुगम् २२ तस्यतावच्छतीसंध्यासंध्यांशश्चतथाविधः ॥ त्रीणिवर्षसहस्राणित्रे
तायुगमिहोच्यते २३ तस्यतावच्छतीसंध्यासंध्यांशश्चततःपरम् ॥ तथावर्षसहस्रेद्वेद्वापरंपरिमाणतः २४ तस्यापिद्विशतीसंध्यासंध्यांशश्चतथाविधः ॥ स
हस्रमेकंवर्षाणांततःकलियुगंस्मृतम् २५ तस्यवर्षशतंसंधिःसंध्यांशश्चततःपरम् ॥ संधिसंध्यांशयोस्तुल्यंप्रमाणमुपधारय २६ क्षीणेकलियुगेचैवप्रवर्तति
कृतंयुगम् ॥ एषाद्वादशसाहस्रीयुगाख्यापरिकीर्तिता २७ एतत्सहस्रपर्यंतमहोब्राह्ममुदाहृतम् ॥ विश्वंहिब्रह्मभवनेसर्वतःपरिवर्तते २८ लोकानांमनुजव्या
घ्रप्रलयंतंविदुर्बुधाः ॥ अल्पावशिष्टेतुतदायुगांतेभरतर्षभ २९ सहस्रांतेनराःसर्वेप्रायशोऽनृतवादिनः ॥ यज्ञप्रतिनिधिःपार्थदानप्रतिनिधिस्तथा ३० व्रतप्र
तिनिधिश्चैवतस्मिन्कालेप्रवर्तते ॥ ब्राह्मणाःशूद्रकर्माणस्तथाशूद्राधनार्जकाः ३१ क्षत्रधर्मेणवाप्यत्रवर्तयंतिगतेयुगे ॥ निवृत्तयज्ञस्वाध्यायादंडाजिनविवर्जि
ताः ३२ ब्राह्मणाःसर्वभक्षाश्चभविष्यंतिकलौयुगे ॥ अजपाब्राह्मणास्तातशूद्राजपपरायणाः ३३ विपरीतेतदालोकेपूर्वरूपंक्षयस्यतत् ॥ बहवोम्लेच्छराजा
नःपृथिव्यांमनुजाधिप ३४ मृषानुशासिनःपापामृषावादपरायणाः ॥ आंध्राःशकाःपुलिंदाश्चयवनाश्चनराधिपाः ३५ कांबोजाबाह्लिकाःशूरास्तथाऽऽभी
रानरोत्तम ॥ नतदाब्राह्मणःकश्चित्स्वधर्ममुपजीवति ३६ क्षत्रियाश्चापिवैश्याश्चविकर्मस्थानराधिप ॥ अल्पायुषःस्वल्पबलाःस्वल्पवीर्यपराक्रमाः ३७ अ
ल्पसाराल्पदेहाश्चतथासत्याल्पभाषिणः ॥ बहुशून्याजनपदामृगव्यालावृतादिशः ३८ युगांतेसमनुप्राप्तेवृथाचब्रह्मवादिनः ॥ भोवादिनस्तथाशूद्राब्राह्मणा
श्चार्यवादिनः ३९ युगांतेमनुजव्याघ्रभवंतिबहुजंतवः ॥ नतथाघ्राणयुक्ताश्चसर्वगंधाविशांपते ४० रसाश्चमनुजव्याघ्रनतथास्वादुयोगिनः ॥ बहुप्रजा
ह्रस्वदेहाःशीलाचारविवर्जिताः ॥ मुखेभगाःस्त्रियोराजन्भविष्यंतियुगक्षये ४१

तथाविधउत्तरप्रकारस्त्रिशतीमितो
ऽयमेवपूर्वयुगापेक्षयासंध्यांशउत्तरयुगापेक्षयासंध्येतिचोच्यते । तथाच कृतत्रेतयोः संध्यासंध्यांशौ सप्तशती । त्रेताद्वापरयोः पंचशती । द्वापारकल्योस्त्रिशती । कलिकृतयोस्तुपंचशती
विविज्ञेयं एवं चकृतस्यादौ चतुःशती कल्यपेक्षयासंध्यांशोऽपि कृतापेक्षयासंध्या एवंसर्वत्र तेनसंध्यासंध्यांशयोस्तुल्यंप्रमाणंभवति २३ । २४ । २५।२६। २७।२८ । २९ कलेर्दोषान्वर्णयन्नि
प्रहाणायपन्नासेनमोक्षमार्गेप्रीतिजननायच सहस्रांतइति सहस्रस्यचतुर्धाकृतस्यांतेऽतिमपादे ३० । ३१ । ३२ । ३३ । ३४ । ३५ स्वधर्मयाजनप्रतिग्रहादि ३६ । ३७ सत्येऽल्पंसत्याल्पं ॥१५६॥
सत्यवादोऽत्यंतमल्पइत्यर्थः ३८ वृथाअनुभवाभावात् ३९ । ४० मुखेभगाःस्त्रियोवंगेषुप्रसिद्धाः प्रथमंमुखेनैवभगकार्यंकृत्वा पुरुषस्यकाममुद्दीपयंत्यः अत्यंतरतार्तत्वात् ४१

अट्टशूलाइति । 'अट्टमन्नं शिवोवेदो ब्राह्मणाश्चचतुष्पथाः ॥ केशोभगंसमाख्यातं शूलंतद्विक्रयं विदुः'इति पूर्वेषांव्याख्यासंक्षेपः । अट्टमन्नंतदेवशूलंदुःखदं येषांते क्षुद्व्याधिग्रस्ताइत्यर्थः ।
शिवाःसर्वपुरुषप्रार्थनीयतयाकल्याणवत्यः शूलाःपण्यस्त्रियोयेषुते शिवशूलाः विटवारांगनापूर्णाश्चतुष्पथाइत्यर्थः । स्त्रियः पाणिग्रहणवत्योऽपिकेशोपलक्षितं सौभाग्यंलज्जामूलंशीलंशू
लमिवदुःखदंत्याज्यंचयासांताः केशशूलाः भर्तृद्वेषिण्यस्त्यक्तलज्जाश्चेत्यर्थः । 'अट्टंभक्तेचशुष्के चशूलं स्याद्रोगआयुधे ॥ योगेशूलातुपण्यस्त्रीशिवंक्षेमे जलेसुखे ॥ चतुष्पथश्चतुर्मार्गसंगमे ब्रा

अट्टशूलाजनपदाःशिवशूलाश्चतुष्पथाः ॥ केशशूलाःस्त्रियोराजन्भविष्यंतियुगक्षये ४२ अल्पक्षीरास्तथागावोभविष्यंतिजनाधिप ॥ अल्पपुष्पफलाश्चापि
पादपाबहुवायसाः ४३ ब्रह्मवध्यानुलिप्तानांतथामिथ्याभिशंसिनाम् ॥ नृपाणांपृथिवीपालप्रतिग्रहंतिवैद्विजाः ४४ लोभमोहपरीताश्चमिथ्याधर्मध्वजावृ
ताः ॥ भिक्षार्थंपृथिवीपालचंचूर्यंतेद्विजैर्दिशः ४५ करभारभयाद्भीतागृहस्थाःपरिमोषकाः ॥ मुनिच्छद्माकृतिच्छन्नावाणिज्यमुपजीविनः ४६ मिथ्याचन
खरोमाणिधारयंतितदाद्विजाः ॥ अर्थलोभान्नरव्याघ्रतथाचब्रह्मचारिणः ४७ आश्रमेषुवृथाचाराःपानपागुरुतल्पगाः ॥ इहलौकिकमीहंतेमांसशोणितवर्ध
नम् ४८ बहुपाषंडसंकीर्णाःपरान्नगुणवादिनः ॥ आश्रमामनुजव्याघ्रभविष्यंतियुगक्षये ४९ यथर्तुवर्षीभगवान्नतथापाकशासनः ॥ नचापिसर्वबीजानिसम्य
ग्रोहंतिभारत ५० हिंसाभिरामश्चजनस्तथासंपद्यतेशुचिः ॥ अधर्मफलमत्यर्थंतदाभवतिचानघ ५१ तदाचपृथिवीपालयोभवेद्धर्मसंयुतः ॥ अल्पायुःसहिमं
तव्योनहिधर्मोऽस्तिकश्चन ५२ भूयिष्ठंकूटमानैश्चपण्यंविक्रीडतेजनः ॥ वणिजश्चनरव्याघ्रबहुमायाभवंत्युत ५३ धर्मिष्ठाःपरिहीयंतेपापीयान्वर्धतेजनः ॥
धर्मस्यबलहानिःस्यादधर्मश्चबलीतथा ५४ अल्पायुषोदरिद्राश्चधर्मिष्ठामानवास्तथा ॥ दीर्घायुषःसमृद्धाश्चविधर्माणोयुगक्षये ५५ नगराणांविहारेषुविधर्मा
णोयुगक्षये ॥ अधर्मिष्ठैरुपायैश्चप्रजाव्यवहरंत्युत ५६ संचयेनतथाऽल्पेनभवंत्याढ्यमदान्विताः ॥ धनंविश्वासतोन्यस्तंमिथोभूयिष्ठशोनराः ५७ हर्तुंव्य
वसिताराजन्पापाचारसमन्विताः ॥ नैतदस्तीतिमनुजावर्ततेनिरपत्रपाः ५८ पुरुषादानिसत्वानिपक्षिणोऽथमृगास्तथा ॥ नगराणांविहारेषुचैत्येष्वपिचशे
रते ५९ सप्तवर्षाष्टवर्षाश्चस्त्रियोगर्भधरानृप ॥ दशद्वादशवर्षाणांपुंसांपुत्रःप्रजायते ६० भवंतिषोडशेवर्षेनराःपलितिनस्तथा ॥ आयुःक्षयोमनुष्याणांक्षिप्रमे
वप्रपद्यते ६१ क्षीणायुषोमहाराजतरुणावृद्धशीलिनः ॥ तरुणानांचयच्छीलंतद्वृद्धेषुप्रजायते ६२ विपरीतास्तदानार्योवंचयित्वाऽहतःपतीन् ॥ व्युच्चरंत्य
पिदुःशीलादासैःपशुभिरेवच ६३ वीरपत्न्यस्तथानार्यःसंश्रयंतिनरान्नृप ॥ भर्तारमपिजीवंतमन्यान्व्यभिचरंत्युत ६४

५३ ह्मणेपिच ॥ केशःस्यात्पुंसिवरुणे ह्रीबेरे कुंतलेऽपिच'इतिमेदिनी ह्रीबेरंलज्जामूलंशीलमित्यर्थः बेरशब्दःकर्णाटेषु मूले प्रसिद्धः ४२ । ४३ मिथ्याधर्मःकपटधर्मःसएवध्वजइवख्यात्यर्थं व्या
प्यो येषांतेतथा चंचूर्यंते पीडयंते दिशःदिक्स्थाःजनाः ४४ । ४५ । ४६ । ४७ पानपाः मद्यपाः ४८ । ४९ । ५० शुचिः ब्राह्मणपरिव्राजकादिः अशुचिरिति वाच्छेदः ५१ । ५२ । ५३
५४ विधर्माणः त्यक्तधर्माः ५५ नगराणानगरस्थानांविहारेषुक्रीडासु विधर्माणोव्यभिचारिणः ५६ आढ्योऽहमितिमदः आढ्यमदः ५७ । ५८ पुरुषादानिवृकव्याघ्रादीनि चैत्येषु दे
वतास्थानेषु ५९ गर्भधराः अतिकामातुराइत्यर्थः ६० । ६१ । ६२ अर्हतःयोग्यान् ६३ । ६४

६५ । ६६ ततोदिनकरैर्दीप्तैरित्यतःप्राक्तनेनग्रंथेनकलिरूपःस्त्रीपुंसयोर्दुराचारबाहुल्यादनंतंनरकंप्राप्नोतीतिविदर्शितं तत्परिहारार्थं योगमनुतिष्ठेदितिविधीयते स्वानुभवकथनप्रकारेण ततो दिनकरैरित्यादिना सोऽयंग्रंथो बहिर्दृष्टीनांकल्पांतप्रतिपादनपरतयाभासमानोऽपि योगपरएवास्ति । अनंतरिक्षेलोकेऽस्मिन्निति वाक्यशेषे आकाशाभावस्याप्युक्तत्वेननिराश्रयस्य ज लधातुमात्रस्यसत्त्वायोगात् समानप्रकारेपुष्करप्रादुर्भावेच । नष्टानलानिलेलोकेनष्टाकाशमहीतलेइतिस्पष्टंभूतपंचकनाशस्यप्रतिपादनात् तथापिकथापक्षेस्पष्टोऽर्थइतियोगपक्षएवव्या ख्यायते । कथापक्षेदिनकरैर्द्वादशादित्यैःपीयते सप्तभिर्दीप्तैःसप्तज्वालाभिःकल्पांताग्निनाच भस्मसाद्दृश्यतइतिद्वयोःसंबंधः ६७ । ६८ तस्यैवविवरणंततःसंवर्तकइति ६९ ततःसवह्निः

तस्मिन्युगसहस्रांतेसंप्राप्तेचायुषःक्षये ॥ अनावृष्टिर्महाराजजायतेबहुवार्षिकी ६५ ततस्तान्यल्पसाराणिसत्वानिक्षुधितानिवै ॥ प्रलयंयांतिभूयिष्ठंपृथिव्यां पृथिवीपते ६६ ततोदिनकरैर्दीप्तैःसप्तभिर्मनुजाधिप ॥ पीयतेसलिलंसर्वंसमुद्रेषुसरित्सुच ६७ यच्चकाष्ठंतृणंचापिशुष्कंचार्द्रंचभारत ॥ सर्वंतद्भस्मसाद्भूतं दृश्यतेभरतर्षभ ६८ ततःसंवर्तकोवह्निर्वायुनासहभारत ॥ लोकमाविशतेपूर्वमादित्यैरुपशोषितम् ६९ ततःसपृथिवींभित्त्वाप्रविश्यचरसातलम् ॥ देवदानव यक्षाणांभयंजनयतेमहत् ७० निर्दहन्नागलोकंचयच्चकिंचित्क्षिताविह ॥ अधस्तात्पृथिवीपालसर्वंनाशयतेक्षणात् ७१ ततोयोजनविंशानांसहस्राणिशता निच ॥ निर्दहत्यशिवोवायुःसचसंवर्तकोऽनलः ७२ सदेवासुरगंधर्वंसयक्षोरगराक्षसम् ॥ ततोदहतिदीप्तःससर्वमेवजगद्विभुः ७३ ततोगजकुलप्रख्यास्तडि न्मालाविभूषिताः ॥ उत्तिष्ठंतिमहामेघानभस्यद्भुतदर्शनाः ७४ केचिन्नीलोत्पलश्यामाःकेचित्कुमुदसन्निभाः ॥ केचित्किंजल्कसंकाशाःकेचित्पीताःपयोधराः ७५ केचिद्धारिद्रसंकाशाःकाकांडकनिभास्तथा ॥ केचित्कमलपत्राभाःकेचिद्धिंगुलसप्रभाः ७६ केचित्पुरवराकाराःकेचिद्गजकुलोपमाः ॥ केचिदंजनसंकाशाः केचिन्मकरसन्निभाः ७७ विद्युन्मालापिनद्धांगाःसमुत्तिष्ठंतिवैघनाः ॥ घोररूपामहाराजघोरस्वननिनादिताः ॥ ततोजलधराःसर्वेव्याप्नुवंतिनभस्तलम् ७८ तैरियंपृथिवीसर्वासपर्वतवनाकरा ॥ आपूर्यतेमहाराजसलिलौघपरिप्लुता ७९ ततस्तेजलदाघोराराविणःपुरुषर्षभ ॥ सर्वतःप्लावयंत्याशुचोदिताःपरमेष्ठिना ८० वर्षमाणामहत्तोयंपूरयंतोवसुंधराम् ॥ सुघोरमशिवंरौद्रंनाशयंतिचपावकम् ८१ ततोद्वादशवर्षाणिपयोदास्तउपप्लवे ॥ धाराभिःपूरयंतोवैचोद्यमानाम हात्मना ८२ ततःसमुद्रःस्वांवेलामतिक्रामतिभारत ॥ पर्वताश्चविदीर्यंतेमहीचाप्सुनिमज्जति ८३

७० । ७१ । ७२ । ७३ गजकुलप्रख्याःगजसमुदायाइवकृष्णाः ७४ । ७५ । ७६ । ७७ । ७८ । ७९ राविणःशब्दवंतः ८० । ८१ । ८२ योगपक्षेतु दिनकरैःसूर्यनाडीइडातया बहुवचनं तदीयावयवाभिप्रायेण सलिलंचैतन्यगर्भिताचित्तवृत्तिः समुद्रेषुकामेषु । कामंसमुद्रमाविशेतिमंत्रवर्णात् सरित्सु नाडीषु प्रसृतापीयतेसंह्रीयते सप्तभिःप्राणैरुद्दीपितयानाड्यावायुमाकृष्य चित्तवृत्तिर्निरुध्यतइत्यर्थः । तदाकाष्ठादितुल्यंशरीरंभस्मसाद्भूतमदर्शनंगतंदृश्यतेअनुभूयते तदानींजाठरोऽग्निरपि लोकदृष्ट्यास्थितंदेहंनबाधते वायुनातस्याग्निलोकंइष्टं स्थानंभ्रूघ्राणसं धिरूपंप्रतिनीतत्वादित्याहततइति पूर्वमादित्यैरिडानाडीरूपैरुपशोषितमित्येतदेवप्रपंचयतिचतुर्भिस्ततःसइत्यादिभिः वायुरनलश्चनाड्यंतर्गतोदहति तत्तदवयवमभिमानत्यागादस त्कल्पंकरोतीत्यर्थः अत्रउपाध्यंतराश्रयंविनापूर्वोपाधिनिर्मोकोनभवतीत्याशंक्य तदानीमेवरेचकाभ्यासाज्जलधातुपालंबभूयांसंतर्वात्मनात्य जतीत्याह ततोगजकुलप्रख्याइत्यादिना–

महीचाप्सुनिमज्जतीत्यंतेनततःसमुद्रइति समुद्रोदेहविषयःकामः स्वांवेलांदेहानुलंघनंअतिक्रामति सकामःसर्वथानिवर्ततइत्यर्थः ८१ वाय्वग्न्योःसाहचर्यात्अग्निसहितंवायुमालंब्य जलधातुमपि त्यजतीत्याहसर्वतइति पयोदाइति तन्नाशेनतद्गतस्यजलस्यापिनाशोलक्ष्यते तत्रवायुवेगपराहताःपयोदानश्यंति स्वयंभूःनभस्तलंसंवेष्टयित्वाआकाशंसंहृत्यमारुतंपीत्वाआकाशनाशेनैवत त्कार्यस्यमारुतस्यनाशंकृत्वा स्वपिति स्वंप्रत्यगात्मानंअपितिगच्छति । तथाचस्वपितिशब्दनिर्वचनं श्रूयते 'यत्रैतत्पुरुषःस्वपितिनामसतासोम्यतदासंपन्नोभवतितस्मादेनंस्वपितीत्याचक्षते' स्वंह्यपीतोभवतीतिस्वयंभूःसूत्रात्मा सताशुद्धेनब्रह्मणासंपन्नऐक्यंगतःस्वप्रत्यगात्मना ८४ । ८५ भौतिकप्रपंचप्रलयमाहतस्मिन्निति ८६ अनंतरिक्षेइतिपंचमहाभूतलयउक्तः एकोऽहंस्थूलप्रपं

सर्वतःसहसाभ्रांतास्तेपयोदानभस्तलम् ॥ संवेष्टयित्वानश्यंतिवायुवेगपराहताः ८४ ततस्तंमारुतंघोरंस्वयंभूर्मनुजाधिप ॥ आदिःपद्मालयोदेवःपीत्वास्व पितिभारत ८५ तस्मिन्नेकार्णवेघोरेनष्टेस्थावरजंगमे ॥ नष्टेदेवासुरगणेयक्षराक्षसवर्जिते ८६ निर्मनुष्येमहीपालनिःश्वापदमहीरुहे ॥ अनंतरिक्षेलोकेऽस्मि न्भ्रमाम्येकोऽहमाहतः ८७ एकार्णवेजलेघोरेविचरन्पार्थिवोत्तम ॥ अपश्यन्सर्वभूतानिवैक्लव्यमगमंततः ८८ ततःसुदीर्घंगत्वाऽहंप्लवमानोनराधिप ॥ श्रांतः क्वचिन्नशरणंलभाम्यहमतंद्रितः ८९ ततःकदाचित्पश्यामितस्मिन्सलिलसंचये ॥ न्यग्रोधंसुमहांतंवैविशालंपृथिवीपते ९० शाखायांतस्यवृक्षस्यविस्ती र्णायांनराधिप ॥ पर्यंकेपृथिवीपालदिव्यास्तरणसंस्तृते ९१ उपविष्टंमहाराजपूर्णेंदुसदृशाननम् ॥ फुल्लपद्मविशालाक्षंबालंपश्यामिभारत ९२ ततोमेपृ थिवीपालविस्मयःसुमहानभूत् ॥ कथंत्वयंशिशुःशेतेलोकेनाशमुपागते ९३ तपसाचिंतयंश्चापितंशिशुंनोपलक्षये ॥ भूतंभव्यंभविष्यंचजानन्नपिनराधिप ९४ अतसीपुष्पवर्णाभःश्रीवत्सकृतभूषणः ॥ साक्षाल्लक्ष्म्याइवावासःसतदाप्रतिभातिमे ९५ ततोमामब्रवीद्बालःसपद्मनिभलोचनः ॥ श्रीवत्सधारीद्युतिमा न्वाक्यंश्रुतिसुखावहम् ९६ जानामित्वांपरिश्रांतंततोविश्रामकांक्षिणम् ॥ मार्कंडेयइहास्वत्वंयावदिच्छसिभार्गव ९७ अभ्यंतरंशरीरंमेप्रविश्यमुनिसत्तम ॥ आस्वभोविहितोवासःप्रसादस्तेकृतोमया ९८ ततोबालेनतेनैवमुक्तस्यासीत्तदामम ॥ निर्वेदोजीवितेदीर्घेमनुष्यत्वेचभारत ९९ ततोबालेनतेनास्यंसहसा विवृतंकृतम् ॥ तस्याहमवशोवक्त्रेदैवयोगात्प्रवेशितः १०० ततःप्रविष्टस्तत्कुक्षिंसहसामनुजाधिप ॥ सराष्ट्रनगराकीर्णांकृत्स्नांपश्यामिमेदिनीम् १०१ गंगांशतद्रुंसीतांचयमुनामथकौशिकीम् ॥ चर्मण्वतींवेत्रवतींचंद्रभागांसरस्वतीम् १०२

चावीतस्तैजससूक्ष्मप्रपंचंप्राप्तःसन् भ्रमामीति ८७ भ्रमहेतुमाहएकेति एकार्णवेनिर्विशेषेब्रह्मणि तमश्छन्नतयाघोरेजलेसति पारावारशून्यजलात्मनाविवर्तमानेसति शुकादिवरूप्यात्म ना तस्माच्चजलभ्रमाद्वैक्लव्यंमूर्छांअगमंप्राप्तवानस्मि ८८ ततःसुदीर्घंगत्वाऽहमित्यादिनासएषपुरुषव्याप्रसंबंधीतेजनार्दनइत्यंतेन ग्रंथेनकृष्णमूर्तेरेवसर्वात्म्यंसर्वकर्तृत्वंचोक्तं तदेतदुपपा दितंआदिसमयोः अनेकबीजगर्भफलतुल्यस्यानेकब्रह्मांडकारणत्वंकृष्णस्ययुज्यतेइति ८९ । ९० । ९१ । ९२ । ९३ । ९४ । ९५ । ९६ । ९७ । ९८ ततोबालेनेति निर्वेदोवैराग्यं धिङ्मम दीर्घजीवित्वं मानुषत्वंच यन्माबालोऽपि प्रसादस्तेकृतोमयेतिवदतीतिस्वाज्ञाननिप्रकाशनं भगवन्मायायाःप्राबल्यख्यापनार्थम् ९९ । १०० । १०१ । १०२

३।४।५।६।५।८।९।१०।११।१२।१३।१४।१५।१६।१७। १८। १९।२०।२१।२२।२३।२४।२५।२६।२७।२८। २९।३०।३१।३२

सिंधुंचैवविपाशांचनदींगोदावरीमपि ॥ वस्वोकसारांनलिनींनर्मदांचैवभारत ३ नदींताम्रांचवेणांचपुण्यतोयांशुभावहाम् ॥ सुवेणांकृष्णवेणांचइरामांचमहा
नदीम् ४ वितस्तांचमहाराजकावेरींचमहानदीम् ॥ शोणंचपुरुषव्याघ्रविशल्यांकिंपुनामपि ५ एताश्चान्याश्चनद्योऽहंपृथिव्यांयानरोत्तम ॥ परिक्रामन्प्रप
श्यामितस्यकुक्षौमहात्मनः ६ ततःसमुद्रंपश्यामियादोगणनिषेवितम् ॥ रत्नाकरममित्रघ्नपयसोनिधिमुत्तमम् ७ तत्रपश्यामिगगनंचंद्रसूर्यविराजितम् ॥
जाज्वल्यमानंतेजोभिःपावकार्कसमप्रभम् ८ पश्यामिचमहींराजन्काननैरुपशोभिताम् ॥ यजंतेहितदाराजन्ब्राह्मणाबहुभिर्मखैः ९ क्षत्रियाश्चप्रवर्तंतेसर्ववर्णा
नुरंजनैः ॥ वैश्याःकृषिंयथान्यायंकारयंतिनराधिप ११० शुश्रूषायांचनिरताद्विजानांवृषलास्तदा ॥ ततःपरिपतन्राजंस्तस्यकुक्षौमहात्मनः ११ हिमवंतं
चपश्यामिहेमकूटंचपर्वतम् ॥ निषधंचापिपश्यामिश्वेतंचरजतान्वितम् १२ पश्यामिचमहीपालपर्वतंगंधमादनम् ॥ मंदरंमनुजव्याघ्रनीलंचापिमहागि
रिम् १३ पश्यामिचमहाराजमेरुंकनकपर्वतम् ॥ महेंद्रंचैवपश्यामिविंध्यंचगिरिमुत्तमम् १४ मलयंचापिपश्यामिपारियात्रंचपर्वतम् ॥ एतेचान्येचबहवो
यावंतःपृथिवीधराः १५ तस्योदरेमयादृष्टाःसर्वेरत्नविभूषिताः ॥ सिंहान्व्याघ्रान्वराहांश्चपश्यामिमनुजाधिप १६ पृथिव्यांयानिचान्यानिसत्वानिजगती
पते ॥ तानिसर्वाण्यहंतत्रपश्यन्पर्यचरंतदा १७ कुक्षौतस्यनरव्याघ्रप्रविष्टःसंचरन्दिशः ॥ शक्रादींश्चापिपश्यामिकृत्स्नान्देवगणानहम् १८ साध्यान्रुद्रां
स्तथाऽऽदित्यान्गुह्यकान्पितरस्तथा ॥ सर्पान्नागान्सुपर्णांश्चवसूनप्यश्विनावपि १९ गंधर्वाप्सरसोयक्षानृषींश्चैवमहीपते ॥ दैत्यदानवसंघांश्चनागांश्चमनु
जाधिप १२० सिंहिकातनयांश्चापियेचान्येसुरशत्रवः ॥ यच्चकिंचिन्मयालोकेदृष्टंस्थावरजंगमम् २१ सर्वंपश्याम्यहंराजंस्तस्यकुक्षौमहात्मनः ॥ त्वरमाणः
फलाहारःकृत्स्नंजगदिदंविभो २२ अंतःशरीरेतस्याहंवर्षाणामधिकंशतम् ॥ नचपश्यामितस्याहंदेहस्यांतंकदाचन २३ सततंधावमानश्चचिंतयानोविशांप
ते ॥ आसादयामिनैवांतंतस्यराजन्महात्मनः २४ ततस्तमेवशरणंगतोऽस्मिविधिवत्तदा ॥ वरेण्यंवरदंदेवंमनसाकर्मणैवच २५ ततोऽहंसहसाराजन्वायुवे
गेननिःसृतः ॥ महात्मनोमुखात्तस्यनिर्वृत्तात्पुरुषोत्तम २६ ततस्तस्यैवशाखायांन्यग्रोधस्यविशांपते ॥ आस्तेमनुजशार्दूलकृत्स्नमादायवैजगत् २७ तेनैव
बालवेषेणश्रीवत्सकृतलक्षणम् ॥ आसीनंतंनरव्याघ्रपश्याम्यमिततेजसम् २८ ततोमामब्रवीद्बालःसप्रीतःप्रहसन्निव ॥ श्रीवत्सधारीद्युतिमान्पीतवासामहा
द्युतिः २९ अपीदानींशरीरेऽस्मिन्ममामकेमुनिसत्तम ॥ उषितस्त्वंपरिश्रांतोमार्कंडेयब्रवीमिते १३० मुहूर्तादथमेदृष्टिःप्रादुर्भूतापुनर्नवा ॥ ययानिर्मुक्तमात्मा
नमपश्यंलब्धचेतसम् ३१ तस्यताम्रतलौतातचरणौसुप्रतिष्ठितौ ॥ सुजातौमृदुरक्ताभिरंगुलीभिर्विराजितौ ३२

३३।३४।३५।३६।३७।३८।३९।४०।४१।४२।४३ ॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥ ॥ काममिति १ । २
अपांनाराइति अपांअबुपलक्षितस्य पांचभौतिकस्य संघातस्यनाराइतियौगिकंनाम आपोवैनरसूनव इतिप्रदेशांतरेविवरणात् नरेणाविद्यावच्छिन्नरूपेणानादिनाजीवेनाद्युपावोब्रह्म

प्रयत्नेनमयामूर्ध्नागृहीत्वाह्यभिवंदितौ ॥ दृष्ट्वाऽपरिमितंतस्यप्रभावममितौजसः ३३ विनयेनांजलिंकृत्वाप्रयत्नेनोपगम्यह ॥ दृष्टोमयासभूतात्मादेवःकमललोच
नः ३४ तमहंप्रांजलिर्भूत्वानमस्कृत्येदमब्रुवं ॥ ज्ञातुमिच्छामिदेवत्वांमायांचैतांतवोत्तमां ३५ आस्येनानुप्रविष्टोऽहंशरीरेभगवंस्तव ॥ दृष्टवानखिलान्सर्वा
न्समस्तान्जठरेहिते ३६ तवदेवशरीरस्थादेवदानवराक्षसाः ॥ यक्षगंधर्वनागाश्चजगत्स्थावरजंगमम् ३७ त्वत्प्रसादाच्चमेदेवस्मृतिर्नपरिहीयते ॥ द्रुतमंतःश
रीरेतेसततंपरिवर्तिनः ३८ निर्गतोऽहमकामस्तुइच्छयातेमहाप्रभो ॥ इच्छामिपुंडरीकाक्षज्ञातुंत्वाऽहमनिंदितम् ३९ इहभूत्वाशिशुःसाक्षात्किंभवानवतिष्ठते॥
पीत्वाजगदिदंसर्वमेतदाख्यातुमर्हसि १४० किमर्थंचजगत्सर्वंशरीरस्थंतवानघ ॥ कियंतंचत्वयाकालमिहस्थेयमरिंदम ४१ एतदिच्छामिदेवेशश्रोतुंब्राह्मणका
म्यया ॥ त्वत्तःकमलपत्राक्षविस्तरेणयथातथम् ४२ महद्ध्येतदचिंत्यंचयदहंदृष्टवान्प्रभो ॥ इत्युक्तःसमयाश्रीमान्देवदेवोमहाद्युतिः ॥ सांत्वयन्मामिदंवाक्य
मुवाचवदतांवरः १४३ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिअष्टाशीत्यधिकशततमोऽध्यायः १८८ ॥ ॥ ६ ॥ ॥ देवउवाच ॥ कामं
देवापिमांविप्रनहिजानंतितत्त्वतः ॥ त्वत्प्रीत्यातुप्रवक्ष्यामियथेदंविसृजाम्यहम् १ पितृभक्तोसिविप्रर्षेमांचैवशरणंगतः ॥ ततोदृष्टोऽस्मितेसाक्षाद्ब्रह्मचर्यंचतेम
हत् २ अपांनाराइतिपुरासंज्ञाकर्मकृतंमया ॥ तेननारायणोऽप्युक्तोममतत्त्वयनंसदा ३ अहंनारायणोनामप्रभवःशाश्वतोऽव्ययः ॥ विधातासर्वभूतानांसंहर्ता
चद्विजोत्तम ४ अहंविष्णुरहंब्रह्माशक्रश्चाहंसुराधिपः ॥ अहंवैश्रवणोराजायमःप्रेताधिपस्तथा ५ अहंशिवश्चसोमश्चकश्यपोऽथप्रजापतिः ॥ अहंधाताविधाता
चयज्ञश्चाहंद्विजोत्तम ६ अग्निरास्यंक्षितिःपादौचंद्रादित्यौचलोचने ॥ द्यौर्मूर्धाखंदिशःश्रोत्रेतथाऽऽपःस्वेदसंभवाः ७ सदिशंचनभःकायोवायुर्मनसिमेस्थितः ॥
मयाक्रतुशतैरिष्टंबहुभिःस्वाप्तदक्षिणैः ८ यजंतेवेदविदुषोमांदेवयजनेस्थितम् ॥ पृथिव्यांक्षत्रियेंद्राश्चपार्थिवाःस्वर्गकांक्षिणः ९ यजंतेमांतथावैश्याःस्वर्गलोक
जिगीषया ॥ चतुःसमुद्रपर्यंतांमेरुमंदरभूषणाम् १० शेषोभूत्वाऽहमेवैतांधारयामिवसुंधराम् ॥ वाराहंरूपमास्थायमयेयंजगतीपुरा ११

णि शुक्तौरजतमिव कल्पितत्वात् । ममतत्त्वयनमिति तत्सृष्ट्वा 'तदेवानुप्राविशत्'इतिश्रुतेरहमेवसंघातस्यस्रष्टा तदभिमानीचेति जीवेश्वरयोरभेदोदर्शितः ३ । ४ अहंविष्णुरहंब्रह्मेत्या
दिनातत्पदार्थमनूद्य तस्यब्रह्मादिजीवाभिन्नत्वं ग्रुप्रभृतिजडवर्गाभिन्नत्वं चेतनाचेतनस्थितिकर्तृत्वंचप्रतिपाद्यते ५ । ६ । ७ । ८ । ९ । १० । ११

१२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ तदात्मानंसृजाम्यहंआत्मानं कृष्णादिविग्रहंसृजामि सूर्यवदा

मज्जमानाजलेविप्रवीर्येणासीत्समुद्धृता ॥ अग्निश्चवडवावक्त्रोभूत्वाहंद्विजसत्तम १२ पिबाम्यपःसदाविद्धंस्ताश्चैवविसृजाम्यहम् ॥ ब्रह्मवक्त्रंभुजौक्षत्रमूरूमेसंस्थि
ताविशः १३ पादौशूद्राभवंतीमेविक्रमेणक्रमेणच ॥ ऋग्वेदःसामवेदश्चयजुर्वेदोऽप्यथर्वणः १४ मत्तःप्रादुर्भवंत्येतेमामेवप्रविशंतिच ॥ यतयःशांतिपरमायता
त्मानोमुमुक्षवः १५ कामक्रोधद्वेषमुक्तानिःसंगावीतकल्मषाः ॥ सत्वस्थानिरहंकारानित्यमध्यात्मकोविदाः १६ मामेवसततंविप्राश्चिंतयंतउपासते ॥ अहंसं
वर्तकोवह्निरहंसंवर्तकोऽनलः १७ अहंसंवर्तकःसूर्यस्त्वहंसंवर्तकोऽनिलः ॥ ताराहृपाणिदृश्यंतेयान्येतानिनभस्तले १८ ममवैरोमकूपाणिविद्धित्वंद्विजसत्तम॥
रत्नाकराःसमुद्राश्चसर्वएवचतुर्दिशम् १९ वसनंशयनंचैवविलयंचैवविद्धिमे ॥ मयैवसुविभक्तास्तेदेवकार्यार्थसिद्धये २० कामंक्रोधंचहर्षंचभयंमोहंतथैवच ॥ म
मैवंविद्धिरोमाणिसर्वाण्येतानिसत्तम २१ प्राप्नुवंतिनराविप्रयत्कृत्वाकर्मशोभनं ॥ सत्यंदानंतपश्चोग्रमहिंसाचैवजंतुषु २२ मद्विधानेनविहितामम देहविहारिणः॥
मयाऽभिभूतविज्ञानाविचेष्टंतेनकामतः २३ सम्यग्वेदमधीयानायजंतेविविधैर्मखैः ॥ शांतात्मानोजितक्रोधाःप्राप्नुवंतिद्विजातयः २४ प्राप्तुंनशक्योयोविद्वन्नरै
र्दुष्कृतकर्मभिः ॥ लोभाभिभूतैःकृपणैरनार्यैरकृतात्मभिः २५ तस्मान्महाफलंविद्धिनराणांभावितात्मनाम् ॥ सुदुष्प्रापंविमूढानांमार्गंयोगैर्निषेवितम् २६ य
दायदाचधर्मस्यग्लानिर्भवतिसत्तम ॥ अभ्युत्थानमधर्मस्यतदाऽऽत्मानंसृजाम्यहम् २७ दैत्याहिंसानुरक्ताश्चअवध्याःसुरसत्तमैः ॥ राक्षसाश्चापिलोकेऽस्मिन्
यदोत्पत्स्यंतिदारुणाः २८ तदाऽहंसंप्रसूयामिगृहेषुशुभकर्मणां ॥ प्रविष्टोमानुषंदेहंसर्वंप्रशमयाम्यहम् २९ सृष्ट्वादेवमनुष्यांस्तुगंधर्वोरगराक्षसान् ॥ स्थाव
राणिचभूतानिसंहराम्यात्ममायया ३० कर्मकालेपुनर्देहमविचिंत्यंसृजाम्यहम् ॥ आविश्यमानुषंदेहंमर्यादाबंधकारणात् ३१ श्वेतःकृतयुगेवर्णःपीतस्त्रेतायुगे
मम ॥ रक्तोद्वापरमासाद्यकृष्णःकलियुगेतथा ३२ त्रयोभागाह्यधर्मस्यतस्मिन्कालेभवंतिच ॥ अंतकालेचसंप्राप्तेकालोभूत्वाऽतिदारुणः ३३ त्रैलोक्यंनाशया
म्येकःकृत्स्नंस्थावरजंगमम् ॥ अहंत्रिवर्त्माविश्वात्मासर्वलोकसुखावहः ३४ आविर्भूःसर्वगोऽनंतोहृषीकेशउरुक्रमः ॥ कालचक्रंनयाम्येकोब्रह्मन्नहमरूपकम्
३५ शमनंसर्वभूतानांसर्वलोककृतोद्यमम् ॥ एवंप्रणिहितःसम्यङ्ममात्मामुनिसत्तम ॥ सर्वभूतेषुविप्रेंद्रनचमांवेत्तिकश्चन ३६ सर्वलोकेचमांभक्ताःपूजयंतिच
सर्वशः ॥ यच्चकिंचित्त्वयाप्राप्तंमयिक्लेशात्मकंद्विज ३७ सुखोदयायतत्सर्वंश्रेयसेचतवानघ ॥ यच्चकिंचित्त्वयालोकेदृष्टंस्थावरजंगमम् ३८

विर्भावयामि यथासूर्यआविर्भवंस्तिरोभवंश्चअस्तोदयाभ्यांनस्पृश्यते किंतुअस्माभिरेव तत्रतौकल्पितौ एवंमंदमंदनेऽपिजन्मनाशौ मूढदृष्ट्यैवकल्पितावित्यर्थः २७ । २८ । २९
३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८

अर्धममेति पितामहोब्रह्मांडात्मा अर्धममेतिस्वस्वरूपंविकारांतर्वर्ति तदवर्तिचेति दर्शितं । यथा मृत् घटादिकार्यमध्यवर्तिनी तद्बहिर्भूताच तद्वत् अतएवसूत्रं 'विकारावर्तिचतथाहिस्थि
तिमाहेति' । 'जगद्व्यापारवर्जंप्रकरणादसंनिहितत्वाच्च भोगमात्रसाम्यलिंगाच्च'इति सूत्राभ्यां नित्यसिद्धेश्वरस्य उपासनासिद्धानामीश्वराणां चाद्यस्यजगत्सृष्टौ स्वातंत्र्यं इतरेषांभूतसृष्टिका
ले सन्निधानादसामर्थ्यं च । उभयेषां गीतवादित्रादिभोगे साम्यंचास्तीतिप्रदर्श्य आद्यस्य स्वरूपंमहदादिविकाराद्बहिर्भूतं चकाराचदंतर्वर्ति च । 'सभूमिं सर्वतोवृत्वाऽत्यतिष्ठद्दशांगुलम्'

विहितःसर्वथैवासौममात्माभूतभावनः ॥ अर्धंममशरीरस्यसर्वलोकपितामहः ३९ अहंनारायणोनामशंखचक्रगदाधरः ॥ यावद्युगानांविप्रर्षेसहस्रपरिवर्तनात्
४० तावत्स्वपिमिविश्वात्मासर्वभूतानिमोहयन् ॥ एवंसर्वमहंकालमिहास्सेमुनिसत्तम ४१ आशिशुःशिशुरूपेणयावद्ब्रह्मानबुध्यते ॥ मयाचदत्तोविप्राग्र्यवर
स्तेब्रह्मरूपिणा ४२ असकृत्परितुष्टेनविप्रर्षिगणपूजित ॥ सर्वमेकार्णवंदृष्ट्वानष्टंस्थावरजंगमम् ४३ विक्लवोऽसिमयाज्ञातस्ततस्तेदर्शितंजगत् ॥ अभ्यंतरंश
रीरस्यप्रविष्टोऽसियदामम ४४ दृष्ट्वालोकंसमस्तंचविस्मितोनावबुध्यसे ॥ ततोऽसिवक्त्राद्विप्रर्षेद्रुतंनिःसारितोमया ४५ आख्यातस्तेमयाचात्मादुर्ज्ञेयोहिसु
रासुरैः ४६ यावत्सभगवान्ब्रह्मानबुध्येतमहातपाः ॥ तावत्त्वमिहविप्रर्षेविश्रब्धश्चरवैसुखम् ४७ ततोविबुद्धेतस्मिंस्तुसर्वलोकपितामहे ॥ एकीभूतोहिस्र
क्ष्यामिशरीराणिद्विजोत्तम ४८ आकाशंपृथिवींज्योतिर्वायुंसलिलमेवच ॥ लोकेयच्चभवेच्छेषमिहस्थावरजंगमम् ४९ ॥ मार्कंडेयउवाच ॥ ॥ इत्युक्त्वांऽतर्हि
तस्तातसदेवःपरमाद्भुतः ॥ प्रजाश्चेमाःप्रपश्यामिविचित्राविविधाःकृताः ५० एवंदृष्टंमयाराजंस्तस्मिन्प्राप्तेयुगक्षये ॥ आश्चर्यंभरतश्रेष्ठसर्वधर्मभृतांवर ५१
यःसदेवोमयादृष्टःपुरापद्मायतेक्षणः ॥ सएषपुरुषव्याघ्रसंबंधीतेजनार्दनः ५२ अस्यैववरदानाद्धिस्मृतिर्नप्रजहातिमां ॥ दीर्घमायुश्चकौंतेयस्वच्छंदमरणं
मम ५३ सएषकृष्णोवार्ष्णेयःपुराणपुरुषोविभुः ॥ आस्तेहरिरचिंत्यात्माक्रीडन्निवमहाभुजः ५४ एषधाताविधाताचसंहर्ताचैवशाश्वतः ॥ श्रीवत्सवक्षागो
विंदःप्रजापतिपतिःप्रभुः५५ दृष्ट्वेमंवृष्णिप्रवरंस्मृतिर्मामियमागता ॥ आदिदेवमयंजिष्णुंपुरुषंपीतवाससम् ५६ सर्वेषामेवभूतानांपितामाताचमाधवः ॥ गच्छ
ध्वमेनंशरणंशरण्यंकौरवर्षभाः ५७ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्ताश्चतेपार्थायमौचपुरुषर्षभौ ॥ द्रौपद्यासहिताःसर्वेनमश्चक्रुर्जनार्दनं ५८ सचैतान्पु
रुषव्याघ्रसाम्नापरमवल्गुना ॥ सांत्वयामाससमानार्होमन्यमानोयथाविधि ५९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिभविष्यकथने
 एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥ ॥ ४ ॥

इतिवेदएवाविकारस्यरूपस्यस्थितिमाह । तस्मात्कृष्णमूर्तिर्व्यवहारतो वियदादिवन्नित्येतियुक्तमुत्पश्यामः श्रुतिविरोधस्तत्र प्रागेवनिरस्तः ३९ । ४० । ४१ । ४२ । ४३ । ४४
४५ । ४६ यावदिति ब्रह्मा विराट् इहलिंगात्मनि स्थूलाध्यासोदयादर्वाक् सूक्ष्मेएव स्थातव्यमित्यर्थः स्पष्टार्थमन्यत् ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५
५६ । ५७ । ५८ । ५९ ॥ ॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

एवंकृष्णार्द्धतंप्रसाध्य तत्त्वमीतिहेतोर्विषयवैराग्यस्योत्पादनाय पुनर्भविष्यमेवाध्यायद्वयेन प्रश्नपूर्वकमाह युधिष्ठिरस्त्वित्यादिना साम्राज्ये कर्तव्येसति १ । २ किंतुकथंतु शेषंजगद्भविष्य
ति उत्कर्षंप्राप्स्यति ३ । ४ काष्ठांअवधिं कृतंकृतयुगं ५ । ६ । ७ । कलुषंकलिं ८ निर्व्याजश्छद्महीनः उपाधिवर्जितः लोभादिहीनः वृषइवचतुष्पात् ९ अर्धेनाधर्मेण १० । ११ । १२ ।१३

॥ वैशंपायनउवाच ॥ ॥ युधिष्ठिरस्तुकौंतेयोमार्कंडेयंमहामुनिम् ॥ पुनःपप्रच्छसाम्राज्येभविष्यांजगतोगतिम् १ ॥ युधिष्ठिरउवाच ॥ ॥ आश्चर्यभूतंभ
वतःश्रुतंनोवदतांवर ॥ मुनेभार्गववृत्तंयुगादौप्रभवात्ययम् २ अस्मिन्कलियुगेत्वास्तिपुनःकौतूहलंमम ॥ समाकुलेषुधर्मेषुकिंतुशेषंभविष्यति ३ किंवीर्या
मानवास्तत्रकिमाहारविहारिणः ॥ किमायुषःकिंवसनाभविष्यंतियुगक्षये ४ कांचकाष्ठांसमासाद्यपुनःसंपत्स्यतेकृतम् ॥ विस्तरेणमुनेब्रूहिविचित्राणीह
भाषसे ५ इत्युक्तःसमुनिश्रेष्ठःपुनरेवाभ्यभाषत ॥ रमयन्वृष्णिशार्दूलंपांडवांश्चमहानृषिः ६ ॥ मार्कंडेयउवाच ॥ ॥ शृणुराजन्मयादृष्टंयत्पुराश्रुतमेवच
अनुभूतंचराजेंद्रदेवदेवप्रसादजम् ७ भविष्यंसर्वलोकस्यवृत्तांतंभरतर्षभ ॥ कलुषंकालमासाद्यकथ्यमानंनिबोधमे ८ कृतेचतुष्पात्सकलोनिर्व्याजोपाधिवर्जि
तः ॥ वृषःप्रतिष्ठितोधर्मोमनुष्येभरतर्षभ ९ अधर्मपादविद्धस्तुत्रिभिरंशैःप्रतिष्ठितः ॥ त्रेतायांद्वापरेऽर्धेनव्यामिश्रोधर्मउच्यते १० त्रिभिरंशैरधर्मस्तुलोका
नाक्रम्यतिष्ठति ॥ तामसंयुगमासाद्यतदाभरतसत्तम ११ चतुर्थांशेनधर्मस्तुमनुष्यानुपतिष्ठति ॥ आयुर्वीर्यमथोबुद्धिर्बलंतेजश्चपांडव १२ मनुष्याणामनु
युगंह्रसतीतिनिबोधमे ॥ राजानोब्राह्मणावैश्याःशूद्राश्चैवयुधिष्ठिर १३ व्याजैर्धर्मंचरिष्यंतिधर्मवैतंसिकानराः ॥ सत्यंसंक्षेप्स्यतेलोकेनरैःपंडितमानिभिः
१४ सत्यहान्याततस्तेषामायुरल्पंभविष्यति ॥ आयुषःप्रक्षयाद्विद्यानशक्ष्यंत्युपजीवितुम् १५ विद्याहीनानविज्ञानाल्लोभोऽप्यभिभविष्यति ॥ लोभक्रोधप
रामूढाःकामासक्ताश्चमानवाः १६ वैरबद्धाभविष्यंतिपरस्परवधैषिणः ॥ ब्राह्मणाःक्षत्रियावैश्याःसंकीर्यंतःपरस्परम् १७ शूद्रतुल्याभविष्यंतितपःसत्यविवर्जि
ताः ॥ अंत्यामध्याभविष्यंतिमध्याश्चांत्यानसंशयः १८ ईदृशोभविताल्लोकोयुगांतेपर्युपस्थिते ॥ वस्त्राणांप्रवराशाणीधान्यानांकोरदूषकाः १९ भार्यामित्राश्चपुरु
षाभविष्यंतियुगक्षये ॥ मत्स्यामिषेणजीवंतोदुहंतश्चाप्यजैडकम् २० गोषुनष्टासुपुरुषायेपिनित्यंधृतव्रताः ॥ तेऽपिलोभसमायुक्ताभविष्यंतियुगक्षये२१ अन्यो
न्यंपरिमुष्णंतोहिंसयंतश्चमानवाः ॥ अजपानास्तिकास्तेनाभविष्यंतियुगक्षये २२ सरित्तीरेषुकुद्दालैर्वापयिष्यंतिचौषधीः ॥ ताश्चाप्यल्पफलास्तेषांभविष्यंति
युगक्षये २३ श्राद्धेदैवेचपुरुषायेऽपिनित्यंधृतव्रताः ॥ तेऽपिलोभसमायुक्ताभोक्ष्यंतीहपरस्परम् २४ पितापुत्रस्यभोक्ताचापितुःपुत्रस्तथैवच॥ अतिक्रांतानिभो
ज्यानिभविष्यंतियुगक्षये २५ नव्रतानिचरिष्यंतिब्राह्मणावेदनिंदकाः ॥ नयक्ष्यंतिनहोष्यंतिहेतुवादविमोहिताः ॥ निम्नेष्वीहांकरिष्यंतिहेतुवादविमोहिताः २६ ॥१६०॥

धर्मवैतंसिकाःधर्मजालिकाः । 'वीतंसोबंधनोपाये पशूनां पक्षिणामपि'इति मेदिनी धर्मजालंविस्तार्यलोकान्वंचयंतीत्यर्थः १४ । १५ । १६ । १७ अंत्याइति चांडालाःक्षत्रियादिकर्म क्षत्रि
यादयश्चांडालकर्म करिष्यंतीत्यर्थः १८ शाणीशणसूत्रजा १९ । २० । २१ । २२ । २३ । २४ । २५ निम्नेषुहीनेषु कर्मसु २६

२७ वृद्धाद्धीअकर्ताब्रह्माऽहमितिवदनशीलः २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ परार्थान्परधनानि ३७ हस्तोहस्तंपरिमुषेद्धस्तवदेकोदरजोऽपि भ्राताभ्रातरंवंचयेदेव

निम्नेकृषिंकरिष्यंतियोक्ष्यंतिधुरिधेनुकाः ॥ एकहायनवत्सांश्चयोजयिष्यंतिमानवाः २७ पुत्रःपितृवधंकृत्वापितापुत्रवधंतथा ॥ निरुद्वेगोबृहद्वादीनर्निंदा
मुपलप्स्यते २८ म्लेच्छभूतंजगत्सर्वंनिष्क्रियंयज्ञवर्जितम् ॥ भविष्यतिनिरानंदमनुत्सवमथोतथा २९ प्रायशःकृपणानांहितथाऽबंधुमतामपि ॥ विधवानां
चवित्तानिहरिष्यंतीहमानवाः ३० स्वल्पवीर्यबलाःस्तब्धालोभमोहपरायणाः ॥ तत्कथादानसंतुष्टादुष्टानामपिमानवाः ३१ परिग्रहंकरिष्यंतिमायाचारपरि
ग्रहाः ॥ समाह्वयंतःकौंतेयराजानःपापबुद्धयः ३२ परस्परवधोद्युक्तामूर्खाःपंडितमानिनः ॥ भविष्यंतियुगस्यांतेक्षत्रियालोककंटकाः ३३ अरक्षितारोलु
ब्धाश्चमानाहंकारदर्पिताः ॥ केवलंदंडरुचयोभविष्यंतियुगक्षये ३४ आक्रम्याक्रम्यसाधूनांदारांश्चापिधनानिच ॥ भोक्ष्यंतेनिरनुक्रोशारुदतामपिभारत ३५
नकन्यांयाचतेकश्चिन्नापिकन्याप्रदीयते ॥ स्वयंग्राहाभविष्यंतियुगांतेसमुपस्थिते ३६ राजानश्चाप्यसंतुष्टाःपरार्थान्मूढचेतसः ॥ सर्वोपायैर्हरिष्यंतियुगांते
पर्युपस्थिते ३७ म्लेच्छीभूतंजगत्सर्वंभविष्यतिनसंशयः ॥ हस्तोहस्तंपरिमुषेद्युगांतेसमुपस्थिते ३८ सत्यंसंक्षिप्यतेलोकेनरैःपंडितमानिभिः ॥ स्थविरा
बालमतयोबालाःस्थविरबुद्धयः ३९ भीरुस्तथाशूरमानीशूराभीरुविषादिनः ॥ नविश्वसंतिचान्योन्यंयुगांतेपर्युपस्थिते ४० एकाहार्यंयुगेसर्वंलोभमोहव्य
वस्थितम् ॥ अधर्मोवर्द्धतेतत्रनतुधर्मःप्रवर्तते ४१ ब्राह्मणाःक्षत्रियावैश्यानशिष्यंतिजनाधिप ॥ एकवर्णस्तदालोकोभविष्यतियुगक्षये ४२ नक्षंस्यतिपि
तापुत्रंपुत्रश्चपितरंतथा ॥ भार्याश्चपतिशुश्रूषांनकरिष्यंतिसंक्षये ४३ येयवान्नाजनपदागोधूमान्नास्तथैवच ॥ तान्देशान्संश्रयिष्यंतियुगांतेपर्युपस्थिते
४४ स्वैराचाराश्चपुरुषायोषितश्चविशांपते ॥ अन्योन्यंनसहिष्यंतियुगांतेपर्युपस्थिते ४५ म्लेच्छभूतंजगत्सर्वंभविष्यतियुधिष्ठिर ॥ नश्राद्धैस्तर्पयिष्यं
तिदैवतानीहमानवाः ४६ नकश्चित्कस्यचिच्छ्रोतानकश्चित्कस्यचिद्गुरुः ॥ तमोग्रस्तस्तदालोकोभविष्यतिजनाधिप ४७ परमायुश्चभवितातदावर्षाणिषो
डश ॥ ततःप्राणान्विमोक्ष्यंतियुगांतेसमुपस्थिते ४८ पंचमेवाऽथषष्ठेवावर्षेकन्याप्रसूयते ॥ सप्तवर्षाष्टवर्षाश्चप्रजास्यंतिनरास्तदा ४९ पत्यौस्त्रीतुतदारा
जन्पुरुषोवास्त्रियंप्रति ॥ युगांतेराजशार्दूलनतोषमुपयास्यति ५० अल्पद्रव्यावृथालिंगाहिंसाचप्रभविष्यति ॥ नकश्चित्कस्यचिद्दाताभविष्यतियुगक्षये
५१ अट्टशूलाजनपदाःशिवशूलाश्चतुष्पथाः ॥ केशशूलाःस्त्रियश्चापिभविष्यंतियुगक्षये ५२ म्लेच्छाचाराःसर्वभक्षादारुणाःसर्वकर्मसु ॥ भाविनःपश्चिमेका
लेमनुष्यानात्रसंशयः ५३ क्रयविक्रयकालेचसर्वःसर्वस्यवंचनम् ॥ युगांतेभरतश्रेष्ठवित्तलोभात्करिष्यति ५४

३८ । ३९ । ४० एकाहार्यएकविधमेवमांसशाकादिकमाहारमर्हतीतितथा भक्ष्याभक्ष्यविभागोनास्तीत्यर्थः ४१ एकवर्णःवर्णविभागनाशनात् ४२ । ४३ । ४४ । ४५
४६ । ४७ । ४८ प्रजास्यंति प्रजाः जनयिष्यंति ४९ । ५० । ५१ । ५२ । ५३ । ५४

 ज्ञानानि ज्ञेयस्वरूपाणि ५५ । ५६ । ५७ । ५८ वृषलार्दिताः शूद्रपीडिताः ५९ संक्षेप्स्यते नाशं गमिष्यति ६० । ६१ काकाइवसर्वतःशंकिनः नीचवृत्त्युपजीविनोवा ६२ । ६३ । ६४ एडू
ज्ञानानिचाप्यविज्ञायकरिष्यंतिक्रियास्तथा ॥ आत्मच्छंदेनवर्तंतेयुगांतेसमुपस्थिते ५५ स्वभावात्क्रूरकर्माणश्चान्योन्यमभिशंसिनः ॥ भवितारोजनाःसर्वे
 संप्राप्तेतुयुगक्षये ५६ आरामांश्चैववृक्षांश्चनाशयिष्यंतिनिर्व्यथाः ॥ भवितासंशयोलोकेजीवितस्यहिदेहिनाम् ५७ तथालोभाभिभूताश्चभविष्यंतिनराधिप ॥
ब्राह्मणांश्चहनिष्यंतिब्राह्मणस्वोपभोगिनः ५८ हाहाकृताद्विजाश्चैवभयार्तावृषलार्दिताः ॥ त्रातारमलभंतोवैभ्रमिष्यंतिमहीमिमाम् ५९ जीवितांतकराःक्रूरा
रौद्राःप्राणिविहिंसकाः ॥ यदाभविष्यंतिनरास्तदासंक्षेप्स्यतेयुगम् ६० आश्रयिष्यंतिचनदीःपर्वतान्विषमाणिच ॥ प्रधावमानावित्रस्ताद्विजाःकुरुकुलोद्वह
६१ दस्युभिःपीडिताराजन्काकाइवद्विजोत्तमाः ॥ कुराजभिश्चसततंकरभारप्रपीडिताः ६२ धैर्यंत्यक्त्वामहीपालदारुणेयुगसंक्षये ॥ विकर्माणिकरिष्यंति
शूद्राणांपरिचारकाः ६३ शूद्राधर्मंप्रवक्ष्यंतिब्राह्मणाःपर्युपासकाः ॥ श्रोतारश्चभविष्यंतिप्रामाण्येनव्यवस्थिताः ६४ विपरीतश्चलोकोऽयंभविष्यत्यधरोत्तरः ॥
एडूकान्पूजयिष्यंतिवर्जयिष्यंतिदेवताः ६५ शूद्राःपरिचरिष्यंतिनद्विजान्युगसंक्षये ॥ आश्रमेषुमहर्षीणांब्राह्मणावसथेषुच ६६ देवस्थानेषुचैत्येषुनागाना
मालयेषुच ॥ एडूकचिह्नापृथिवीनदेवगृहभूषिता ६७ भविष्यंतियुगेक्षीणेतद्युगांतस्यलक्षणम् ॥ यदारौद्राधर्महीनामांसादाःपानपास्तथा ६८ भविष्यंति
नरानित्यंतदासंक्षेप्स्यतेयुगम् ॥ पुष्पंपुष्पेयदाराजन्फलेवाफलमाश्रितम् ६९ प्रजास्यतिमहाराजतदासंक्षेप्स्यतेयुगम् ॥ अकालवर्षीपर्जन्योभविष्यतिग
तेयुगे ७० अक्रमेणमनुष्याणांभविष्यंतितदाक्रियाः ॥ विरोधमथयास्यंतिवृषलाब्राह्मणैःसह ७१ महीम्लेच्छजनाकीर्णाभविष्यतिततोऽचिरात् ॥ करभार
भयाद्विप्राभजिष्यंतिदिशोदश ७२ निर्विशेषाजनपदास्तथाविष्टिकरार्दिताः ॥ आश्रमानुपलप्स्यंतिफलमूलोपजीविनः ७३ एवंपर्याकुलेलोकेमर्यादान
भविष्यति ॥ नस्थास्यंत्युपदेशेचशिष्यविप्रियकारिणः ७४ आचार्योऽपनिधिश्चैवभर्त्स्यर्यतेतदनंतरम् ॥ अर्थयुक्त्याप्रवात्स्यंतिमित्रसंबंधिबांधवाः ७५ अभावः
सर्वभूतानांयुगांतेसंभविष्यति ॥ दिशःप्रज्वलिताःसर्वानक्षत्राण्यप्रभाणिच ७६ ज्योतींषिप्रतिकूलानिवाताःपर्याकुलास्तथा ॥ उल्कापाताश्चबहवोमहा
भयनिदर्शकाः ७७ षड्भिरन्यैश्चसहितोभास्करःप्रतपिष्यति ॥ तुमुलाश्चापिनिर्ह्रादादिग्दाहाश्चापिसर्वशः ७८ कबंधांतर्हितोभानुरुदयास्तमनेतदा ॥
अकालवर्षीभगवान्भविष्यतिसहस्रदृक् ७९ सस्यानिचनरोक्ष्यंतियुगांतेपर्युपस्थिते ॥ अभीक्ष्णंक्रूरवादिन्यःपरुषारुदितप्रियाः ८०
कान्अस्थ्यंकितानिकुड्यानि । 'भित्तिःस्त्रीकुड्यमेडूकंयदंतर्न्यस्तकीकसम्'इत्यमरः ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ निर्विशेषाःतुल्याचारवेषाः विष्टिकराःभृतिमदत्त्वाकार्यं
कारयंतिते ७३ । ७४ आचार्योऽपि अपनिधिःनिर्धनः भर्त्स्यर्यतेधिक्क्रियते अर्थयुक्त्याधनयोगेन नतुस्नेहेनधर्मेणवा ७५ । ७६ । ७७ । ७८ कबंधांतर्हितः राहुंवरितः ७९ । ८०

८१ । ८२ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ । ८९ यदेति गुरुसूर्यचंद्राः यदायुगपत्पुष्यनक्षत्रमेष्यंतितदा कृतयुगप्रवृत्तिरित्यर्थः ९० । ९१ । ९२ । ९३ । ९४ । ९५ । ९६ । ९७
भर्तॄणांवचनेचैवनस्थास्यंतिततःस्त्रियः ॥ पुत्राश्चमातापितरौहानिष्यंतियुगक्षये ८१ सूदयिष्यंतिचपतीन्स्त्रियःपुत्रानपाश्रिताः ॥ अपर्वणिमहाराजसूर्यंरा
हुरुपैष्यति ८२ युगांतेहुतभुक्चापिसर्वतःप्रज्वलिष्यति ॥ पानीयंभोजनंचापियाचमानास्तदाऽध्वगाः ८३ नलप्स्यंतेनिवासंचनिरस्ताःपथिशेरते ॥ नि
र्घातवायसानागाःशकुनाःसमृगद्विजाः ८४ रूक्षावाचोविमोक्ष्यंतियुगांतेपर्युपस्थिते ॥ मित्रसंबंधिनश्चापिसंत्यक्ष्यंतिनरास्तदा ८५ जनंपरिजनंचापियु
गांतेपर्युपस्थिते ॥ अथदेशान्दिशश्चापिपत्तनानिपुराणिच ८६ क्रमशःसंश्रयिष्यंतियुगांतेपर्युपस्थिते ॥ हातातहासुतेत्येवंतदावाचःसुदारुणाः ८७ विक्रो
शमानश्चान्योन्यंजनोगांपर्यटिष्यति ॥ ततस्तुमुलसंघातेवर्तमानेयुगक्षये ८८ द्विजातिपूर्वकोलोकःक्रमेणप्रभविष्यति ॥ ततःकालांतरेऽन्यस्मिन्पुनर्लोकवि
वृद्धये ८९ भविष्यतिपुनर्दैवमनुकूलंयदृच्छया ॥ यदासूर्यश्चचंद्रश्चतथातिष्यबृहस्पती ९० एकराशौसमेष्यंतिप्रपत्स्यतितदाकृतम् ॥ कालवर्षीचपर्जन्यो
नक्षत्राणिशुभानिच ९१ प्रदक्षिणाग्रहाश्चापिभविष्यंत्यनुलोमगाः ॥ क्षेमंसुभिक्षमारोग्यंभविष्यतिनिरामयम् ९२ कल्कीविष्णुयशानामद्विजःकालप्रचोदि
तः ॥ उत्पत्स्यतेमहावीर्योमहाबुद्धिपराक्रमः ९३ संभूतःसंभलग्रामेब्राह्मणावसथेशुभे ॥ मनसातस्यसर्वाणिवाहनान्यायुधानिच ९४ उपस्थास्यंतियोधाश्च
शस्त्राणिकवचानिच ॥ सधर्मविजयीराजाचक्रवर्तीभविष्यति ९५ सचेमंसंकुलंलोकंप्रसादमुपनेष्यति ॥ उत्थितोब्राह्मणोदीप्तःक्षयांतकृदुदारधीः ९६ संक्षेप
कोहिसर्वस्ययुगस्यपरिवर्तकः ॥ ससर्वत्रगतान्क्षुद्रान्ब्राह्मणैःपरिवारितः ॥ उत्सादयिष्यतितदासर्वम्लेच्छगणान्द्विजः ९७ ॥ इतिश्रीमहाभारतेआरण्यके
पर्वणिमार्कंडेयसमास्यापर्वणिभविष्यकथनेनवत्यधिकशततमोऽध्यायः १९० ॥ ॥ ७ ॥ मार्कंडेयउवाच ॥ ततश्चोरक्षयंकृत्वाद्विजेभ्यःपृथिवीमिमाम् ॥
वाजिमेधेमहायज्ञेविधिवत्कल्पयिष्यति १ स्थापयित्वाचमर्यादाःस्वयंभुविहिताःशुभाः ॥ वनंपुण्ययशःकर्मारमणीयंप्रवेक्ष्यति २ तच्छीलमनुवर्त्स्यंतिमनुष्या
लोकवासिनः ॥ विप्रैश्चोरक्षयेचैवकृतेक्षेमंभविष्यति ३ कृष्णाजिनानिशक्तीश्चत्रिशूलान्यायुधानिच ॥ स्थापयन्द्विजशार्दूलोदेशेषुविजितेषुच ४ संस्तू
यमानोविप्रेंद्रैर्मानयानोद्विजोत्तमान् ॥ कल्कीचरिष्यतिमहींसदादस्युवधेरतः ५ हामातस्तातपुत्रेतितास्तावाचःसुदारुणाः ॥ विक्रोशमानान्सुभृशंदस्यून्ने
ष्यतिसंक्षयम् ६ ततोऽधर्मविनाशोवैधर्मवृद्धिश्चभारत ॥ भविष्यतिकृतेप्राप्तेक्रियावांश्चजनस्तथा ७ आरामाश्चैवचैत्याश्चतडागावसथास्तथा ॥ पुष्करिण्य
श्चविविधादेवतायतनानिच ८
इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे नवत्यधिकशततमोऽध्यायः ॥ १९० ॥ ॥ ततइति कल्पयिष्यतिदास्यति १ । २ विप्रैर्हेतुभिः कृतेयुगे ३ कृष्णाजिनानिब्रह्मचारिपरिधेया
नि तेनसर्वाणिब्राह्मणकर्माणिलक्ष्यंते शक्तीरित्यादिनाराजधर्माः स्थापयन् ब्रह्मक्षत्रयोर्धर्मव्यवस्थांचक्रेइतिभावः ४ । ५ । ६ अधर्मविनाशइतिच्छेदः ७ । ८

९ ये आश्रमाः सहपाषंडाः प्राक्स्थितास्ते मजाश्वसत्यजना भविष्यंतीतिसंबंधः प्रयंतिनश्यंति बीजानिसंस्काराः रोप्यमाणानिक्रियमाणैः कर्मभिर्दृढंसंपाद्यमानान्यपिज्ञानबलान्नश्यंती

यज्ञक्रियाश्वविविधाभविष्यंतिकृतेयुगे ॥ ब्राह्मणाःसाधवश्चैवमुनयश्चतपस्विनः ९ आश्रमाःसहपाषंडाःस्थिताःसत्यजनाःप्रजाः ॥ प्रयंतिसर्वबीजानिरोप्य
माणानिचैवह १० सर्वेष्वृतुषुराजेंद्रसर्वसस्यंभविष्यति ॥ नरादानेषुनिरतात्रतेषुनियमेषुच ११ जप्ययज्ञपराविप्राधर्मकामामुदायुताः ॥ पालयिष्यंतिराजा
नोधर्मेणेमांवसुंधराम् १२ व्यवहाररतावैश्याभविष्यंतिकृतेयुगे ॥ षट्कर्मनिरताविप्राःक्षत्रियाविक्रमेरताः १३ शुश्रूषायांरताःशूद्रास्तथावर्णत्रयस्यच ॥
एषधर्मःकृतयुगेत्रेतायांद्वापरेतथा १४ पश्चिमेयुगकालेचयःसतेसंप्रकीर्तितः ॥ सर्वलोकस्यविदितायुगसंख्याचपांडव १५ एतत्तेसर्वमाख्यातमतीतानागतं
तथा ॥ वायुप्रोक्तमनुस्मृत्यपुराणमृषिसंस्तुतम् १६ एवंसंसारमार्गामेबहुशश्चिरजीविना ॥ दृष्टाश्चैवानुभूताश्चतांस्तेकथितवानहम् १७ इदंचैवापरंभूयःसह
भ्रातृभिरच्युत ॥ धर्मसंशयमोक्षार्थंनिबोधवचनंमम १८ धर्मेत्वयाऽऽत्मासंयोज्योनित्यंधर्मभृतांवर ॥ धर्मात्माहिसुखंराजन्प्रेत्यचेहचनंदति १९ निबोधच
शुभांवाणींयांप्रवक्ष्यामितेऽनघ ॥ नब्राह्मणेपरिभवःकर्तव्यस्तेकदाचन २० ब्राह्मणःकुपितोहन्यादपिलोकान्प्रतिज्ञया ॥ वैशंपायनउवाच ॥ मार्कंडेयवचः
श्रुत्वाकुरूणांप्रवरोनृपः २१ उवाचवचनंधीमान्परमंपरमद्युतिः ॥ कस्मिन्धर्मेमयास्थेयंप्रजाःसंरक्षतामुने २२ कथंचवर्तमानोवैनच्यवेयंस्वधर्मतः ॥ मार्कं
डेयउवाच ॥ दयावान्सर्वभूतेषुहितोरक्तोऽनसूयकः २३ सत्यवादीमृदुर्दांतःप्रजानांरक्षणेरतः ॥ चरधर्मंत्यजाधर्मंपितॄन्देवांश्चपूजय २४ प्रमादाद्यत्कृतंतेऽ
भूत्सम्यग्दानेनतज्जय ॥ अलंतेमानमाश्रित्यसततंपरवान्भव २५ विजित्यपृथिवींसर्वांमोदमानःसुखीभव ॥ एषभूतोभविष्यश्चधर्मस्तेसमुदीरितः २६ नतेऽ
स्त्यविदितंकिंचिदतीतानागतंभुवि ॥ तस्मादिमंपरिक्लेशंत्वंतातहृदिमाकृथाः २७ प्राज्ञास्तातनमुह्यंतिकालेनापिप्रपीडिताः ॥ एषकालोमहाबाहोअपिसर्व
दिवौकसाम् २८ मुह्यंतिहिप्रजास्तातकालेनापिप्रचोदिताः ॥ माचतत्रविशंकाऽभूद्यन्मयोक्तंतवानघ २९ अशंक्यमद्वचोह्येतद्धर्मलोपोभवेत्तव ॥ जातोऽसिप्र
थितेवंशेकुरूणांभरतर्षभ ३० कर्मणामनसावाचासर्वमेतत्समाचर ॥ ॥ युधिष्ठिरउवाच ॥ ॥ यत्त्वयोक्तंद्विजश्रेष्ठवाक्यंश्रुतिमनोहरम् ३१ तथाकरिष्येयत्नेन
नभवतःशासनंविभो ॥ नमेलोभोऽस्तिविप्रेंद्रनभयंनचमत्सरः ३२ करिष्यामिहितत्सर्वमुक्तंयत्तेमयिप्रभो ॥ वैशंपायनउवाच ॥ श्रुत्वातुवचनंतस्यमार्कंडेय ॥१६२॥
स्यधीमतः ३३ संहृष्टाःपांडवाराजन्सहिताःशार्ङ्गधन्वना ॥ विप्रर्षभाश्चतेसर्वेयेतत्रासन्समागताः ३४

स्पष्टार्थः १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४

३५ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥ ॥ मारणस्तंभनाद्यान्यपिकर्माणिकृष्णाद्वैतविद्याबलेनैवसिद्ध्यंतीतिमंडूकाख्यायि

तथाकथांशुभांश्रुत्वामार्कंडेयस्यधीमतः ॥ विस्मिताःसमपद्यंतपुराणस्यनिवेदनात् ३५ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्याप०युधि
ष्ठिरानुशासनेएकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥ ॥ ध ॥ वैशंपायनउवाच ॥ भूयएवब्राह्मणमहाभाग्यंवक्तुमर्हसीत्यब्रवीत्पांडवेयोमार्कंडेयम् १
अथाचष्टमार्कंडेयोऽपूर्वमिदंश्रूयतांब्राह्मणानांचरितम् २ अयोध्यायामिक्ष्वाकुकुलोद्वहःपार्थिवःपरीक्षिन्नाममृगयामगमत् ३ तमेकाश्वेनमृगमनुसरंतंमृगोदूर
मपाहरत् ४ अध्वनिजातश्रमःक्षुत्तृष्णाभिभूतश्चैकस्मिन्देशेनीलंगहनंवनखंडमपश्यत् ५ तच्चविवेशततस्तस्यवनखंडस्यमध्येऽतीवरमणीयंसरोदृष्ट्वासाश्व
एवव्यगाहत ६ अथाश्वस्तःसबिसमृणालमश्वायाग्रतोनिक्षिप्यपुष्करिणीतीरेसंविवेश ॥ ततःशयानोमधुरंगीतमशृणोत् ७ सश्रुत्वाऽचिंतयन्नेहमनुष्यगतिं
पश्यामिकस्यखल्वयंगीतशब्दइति ८ अथापश्यत्कन्यांपरमरूपदर्शनीयांपुष्पाण्यवचिन्वतींगायंतींच ॥ अथसाराज्ञःसमीपेपर्यक्रामत् ९ तामब्रवीद्राजा
कस्यासिभद्रेकावात्वमिति ॥ साप्रत्युवाचकन्याऽस्मीति तांराजोवाचार्थीत्वयाऽमिति १० अथोवाचकन्यासमयेनाहंशक्यात्वयालब्धुंनान्यथेति राजातांसमय
मपृच्छत् ॥ कन्योवाच नोदकंमेदर्शयितव्यामेति ११ सराजातांबाढमित्युक्त्वातामुपयेमेकृतोद्वाहश्चराजापरीक्षित्क्रीडमानोमुदापरमयायुक्तस्तूष्णींसंगम्य
तयासहास्ते १२ ततस्तत्रैवासीनेराजनिसेनाऽन्वगच्छत् १३ सासेनोपविष्टंराजानंपरिवार्यातिष्ठत्पर्याश्वस्तश्चराजातयैवसहशिबिकयाप्रायादवघोटितयास
स्वंनगरमनुप्राप्यरहसितयासहास्ते १४ तत्राभ्याशस्थोऽपिकश्चिन्नापश्यदथप्रधानामात्योऽभ्याशचरास्तस्यस्त्रियोऽपृच्छत् १५ किमत्रप्रयोजनंवर्ततेइत्य
थाब्रुवंस्ताःस्त्रियः १६ अपूर्वमिवपश्यामउदकंनात्रनीयतइत्यथामात्योऽनुदकंवनंकारयित्वोदारवृक्षंबहुपुष्पफलमूलंतस्यमध्येमुक्ताजालमयींपार्श्वेवापींगूढां
सुधासलिललिप्तांसरहस्युपगम्यराजानमब्रवीत् १७ वनमिदमुदारकंसाध्वत्ररम्यतामिति १८ सतस्यवचनात्तयैवसहदेव्यातद्वनंप्राविशत्सकदाचित्तस्मिन्कानने
रम्येतयैवसव्यवाहरदथक्षुत्तृष्णार्दितःश्रांतोऽतिमुक्तकागारमपश्यत् १९ तत्प्रविश्यराजासहप्रिययासुधाकृतांविमलांसलिलपूर्णांवापीमपश्यत् २० दृष्ट्वैवचतां
तस्याश्चतीरेसहैवतयादेव्याऽवातिष्ठत् २१ अथतांदेवींसराजाऽब्रवीत्साध्ववतरवापीसलिलमिति ॥ सातद्वचःश्रुत्वाऽवतीर्यवापींन्यमज्जन्नपुनरुदमज्जत् २२
५५ तांसमृगयमाणोराजानापश्यद्वापीमथानिःस्राव्यमंडूकंश्वभ्रमुखेदृष्ट्वाक्रुद्धआज्ञापयामाससराजा २३ सर्वत्रमंडूकवधःक्रियतामितियोमयार्थीसमांमृतमंडूकोपाय
नमादायोपतिष्ठेदिति २४ अथमंडूकवधेघोरेक्रियमाणेदिक्षुसर्वासुमंडूकान्भयमाविवेशतेभीतामंडूकराज्ञेयथावृत्तंन्यवेदयन् २५

कथैवाहभूयइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ अवघोटितयाश्लक्ष्णीकृतया १४ अभ्याशस्थोऽपि निकटस्थोऽपि नापश्यत्क्री
डासक्तं राजानमितिशेषः १५ प्रयोजनंकर्तव्यं १६ । १७ अतिमुक्तकागारंवासंतीगृहं १८ । १९ । २० । २१ । २२ । २३ । २४ । २५

२६।२७ घनोद्रेकःश्रीतपसोरुत्कर्षः २८ प्रतिजानीहिनिश्चयंकुरु प्राप्यप्रापय्य मृत्युंक्रोधं स्त्रीशोकजं अलंकृत्वामाकुरु २९।३०।३१ विप्रलब्धाःवंचिताः ३२।३३। ३४ ब्रह्मण्यंब्राह्मणाहितंतेन

ततोमंडूकराट्तापसवेषधारीराजानमभ्यगच्छदुपेत्यचैनमुवाच २६ माराजन्क्रोधवशंगमःप्रसादंकुरुनार्हसिमंडूकानामनपराधिनांवधंकर्तुमितिश्लोकौचात्रभव
तः २७ मामंडूकान्जिघांसत्वंकोपंसंधारयाच्युत ॥ प्रक्षीयतेधनोद्रेकोजनानामविजानताम् २८ प्रतिजानीहिनैतांस्त्वंप्राप्यक्रोधंविमोक्ष्यसिअलंकृत्वात
वाधर्मेमंडूकैःकिंहतैर्हते २९ तमेवंवादिनमिष्टजनशोकपरीतात्माराजाऽथोवाच ३० नहिक्षम्यतेतन्मयाहनिष्याम्येतानेतैर्दुरात्मभिः ॥ प्रियामेभक्षितासर्वैथे
वमेवध्यामंडूकानार्हसिविद्वन्मामुपरोद्धुमिति ३१ सतद्वाक्यमुपलभ्यव्यथितेंद्रियमनाःप्रोवाचप्रसीदराजन्नहमायुर्नाममंडूकराजोममसादुहितासुशोभनानाम
तस्याहिदौःशील्यमेतद्बहवस्तयाराजानोविप्रलब्धाःपूर्वाइति ३२ तमब्रवीद्राजातयाऽऽसमर्थोसामेदयितामिति ३३ अथैनांराज्ञेपिताऽदादब्रवीच्चैनामेनंराजा
नंशुश्रूषस्वेति ३४ सएवमुक्तादुहितरंक्रुद्धःशशापयस्मात्त्वयाराजानोविप्रलब्धाबहवस्तस्मादब्रह्मण्यानितवापत्यानिभविष्यंत्यानृतिकत्वात्तवेति ३५ सचराजा
तामुपलभ्यतस्यांसुरतगुणनिबद्धहृदयोलोकत्रयैश्वर्यमिवोपलभ्यहर्षेणबाष्पकलयावाचाप्रणिपत्याभिपूज्यमंडूकराजमब्रवीदनुगृहीतोऽस्मीति ३६ सचमंडूक
राजोदुहितरमनुज्ञाप्ययथागतमगच्छत् ३७ अथकस्यचित्कालस्यतस्यांकुमारास्त्रयस्तस्यराज्ञःसंबभूवुःशलोदलोबलश्चेतिततस्तेषांज्येष्ठंशलंसमयेपितारा
ज्येभिषिच्यतपसिधृतात्मावनंजगाम ३८ अथकदाचिच्छलोमृगयामनुचरन्मृगमासाद्यरथेनान्वधावत् ३९ सूतंचोवाचशीघ्रंमांवहस्वेति सतथोक्तःसूतोराजा
नमब्रवीत् ४० नक्रियतामनुबंधोनैषशक्यस्त्वयामृगोऽयंग्रहीतुंयद्यपितेरथेयुक्तौवाम्यौस्यातामिति ततोऽब्रवीद्राजासूतमाचक्ष्वमेवाम्यौहन्मित्वाभिति ॥
सएवमुक्तोराजभयभीतःसूतोवामदेवशापभीतश्चसन्नाचख्यौराज्ञे ॥ ततःपुनःसराजाखड्गमुद्यम्यशीघ्रंकथयस्वेतितमाहहनिष्येत्वामिति ॥ सतदाऽऽहराजभय
भीतःसूतोवामदेवस्याश्वौवाम्यौमनोजवाविति ४१ अथैनमेवंब्रुवाणमब्रवीद्राजावामदेवाश्रमंप्रयाहीतिसगत्वावामदेवाश्रमंतमृषिमब्रवीत् ४२ भगवन्मृगोमेवि
द्धःपलायतेसंभावयितुमर्हसिवाम्यौदातुमितितमब्रवीदृषिर्ददानितेवाम्यौकृतकार्येणभवतामममेववाम्यौनिर्यात्यौक्षिप्रमितिसचतावश्वौप्रतिगृह्यानुज्ञाप्यऋषिंप्रा
याद्वामीप्रयुक्तेनरथेनमृगंप्रतिगच्छंश्चाब्रवीत्सूतमश्वरत्नाविमावयोग्यौब्राह्मणानांनैतौप्रतिदेयौवामदेवायेत्युक्त्वामृगमवाप्यस्वनगरमेत्याश्वावंतःपुरेऽस्थापयत्
४३ अथर्षिश्चिंतयामासतरुणोराजपुत्रःकल्याणंपत्रमासाद्यरमतेनप्रतिनिर्यातयत्यहोकष्टमिति ४४ समनसाविचिंत्यमासिपूर्णेशिष्यमब्रवीत् ४५ गच्छा
त्रेयराजानंब्रूहियदिपर्याप्तंनिर्यातयोपाध्यायवाम्याविति सगत्वैवंतंराजानब्रवीत्तंराजाप्रत्युवाचराज्ञामेतद्वाहनमनर्हाब्राह्मणारत्नानामेवंविधानांकिंब्राह्मणानाम
श्वैःकार्यंसाधुगम्यताम् ४६

रहितानिअब्रह्मण्यानि ३५।३६।३७।३८।३९।४० वाम्यौवामदेवीयौ रथे युक्तौअश्वौ अश्वतरौ वामीप्रयुक्तेनेतिवाक्यशेषात् ४१।४२। ४३ पत्रंवाहनं ४४।४५।४६

४७ अंतरंभेदे ४८।४९।५० वाहोवाहनं ५१ यदेतद्ब्राह्मणस्यस्वमाजीवमानोऽस्येतदिहघोरमनिष्टपाकं व्रतं कर्माहुरित्यन्वयः वहंतुचतुर्दिक्षुप्रापयंतु चतुर्धाकृत्वेतिशेषः ५२ येत्वामांहं
तुमुद्युक्तंतेमदीयास्त्वामेवपातयंत्वित्यर्थः ५३।५४ असत्यंमिथ्यावादिनमपित्वात्वांनानुशास्मिनदंडयामि अद्यप्रभृतितवाज्ञामितिसंबंधः तवापराधान्न क्षमिष्ये आज्ञयाचवर्तिष्येइति

सगत्वैतदुपाध्यायायाचष्टतच्छ्रुत्वावचनमप्रियंवामदेवःक्रोधपरीतात्मास्वयमेवराजानमभिगम्याश्वार्थमचोदयन्नचाददद्राजा ४७ ॥ वामदेवउवाच ॥ प्रयच्छ
वाम्यौममपार्थिवत्वंकृतंहितेकार्यमाभ्यामशक्यम् ॥ मात्वाऽवधीद्वरुणोघोरपाशैर्ब्रह्मक्षत्रस्यांतरेवर्तमानम् ४८ ॥ राजोवाच ॥ अनड्वाहौसुव्रतौसाधुदांतावे
तद्विप्राणांवाहनंवामदेव ॥ ताभ्यांयाहित्वंयत्रकामोमहर्षेच्छंदांसिवैत्वादृशंसंवहंति ४९ ॥ वामदेवउवाच ॥ छंदांसिवैमादृशंसंवहंतिलोकेऽमुष्मिन्पार्थिवयानि
संति ॥ अस्मिंस्तुलोकेममयानमेतदस्मद्विधानामपरेषांचराजन् ५० ॥ राजोवाच ॥ चत्वारस्त्वांवागर्दभाःसंवहंतुश्रेष्ठाश्वतर्योहरयोवातरंहाः ॥ तैस्त्वंयाहि
क्षत्रियस्यैषवाहोममैववाम्यौनतवैतौहिविद्धि ५१ ॥ वामदेवउवाच ॥ घोरंव्रतंब्राह्मणस्यैतदाहुरेतद्राजन्यदिहाजीवमानः ॥ अयस्मयाघोररूपामहांतश्चत्वा
रोवायातुधानाःसुरौद्राः ॥ मयाप्रयुक्तास्त्वद्वधमीप्समानावहंतुत्वांशितशूलाश्चतुर्धा ५२ ॥ राजोवाच ॥ येत्वांविदुर्ब्राह्मणंवामदेववाचाहंतुंमनसाकर्मणावा ॥
तेत्वांसशिष्यमिहपातयंतुमद्वाक्यनुन्नाःशितशूलासिहस्ताः ५३ ॥ वामदेवउवाच ॥ ममैतौवाम्यौप्रतिगृह्यराजन्पुनर्ददानीतिप्रपद्यमेत्वम् ॥ प्रयच्छशीघ्रंमम
वाम्यौत्वमश्वौयद्यात्मानंजीवितुंतेक्षमंस्यात् ५४ ॥ राजोवाच ॥ नब्राह्मणेभ्योमृगयाप्रसूतानत्वाऽनुशास्म्यद्यप्रभृतिह्यसत्यम् ॥ तवैवाज्ञांसंप्रणिधायसर्वां
तथाब्रह्मन्पुण्यलोकंलभेयम् ५५ ॥ वामदेवउवाच ॥ नानुयोगाब्राह्मणानांभवंतिवाचाराजन्मनसाकर्मणावा ॥ यस्त्वेवंब्रह्मतपसाऽन्वेतिविद्वांस्तेनश्रेष्ठोभव
तिहिजीवमानः ५६ ॥ मार्कंडेयउवाच ॥ एवमुक्तेवामदेवेनराजन्समुत्तस्थूराक्षसाघोररूपाः ॥ तैःशूलहस्तैर्वध्यमानःसराजाप्रोवाचेदंवाक्यमुच्चैस्तदानीं ५७
इक्ष्वाकवोयदिब्रह्मन्दलोवाविधेयामेयदिचेमेविशोऽपि ॥ नोत्स्रक्ष्येऽहंवामदेवस्यवाम्यौनैवंविधाःकर्मशीलाभवंति ५८ एवंब्रुवन्नेवसयातुधानैर्हतोजगामाशुमहीं
क्षितीशः ॥ ततोविदित्वानृपतिंनिपातितमिक्ष्वाकवोवैदलमभ्यषिंचन् ५९ राज्येतदातत्रगत्वासविप्रःप्रोवाचेदंवचनंवामदेवः ॥ दलंराजानंब्राह्मणानांहिदेय
मेवंराजन्सर्वधर्मेषुदृष्टम् ६० बिभेषिचेत्त्वमधर्मान्नरेंद्रप्रयच्छमेशीघ्रमेवाद्यवाम्यौ ॥ एतच्छ्रुत्वावामदेवस्यवाक्यंसपार्थिवःसूतमुवाचरोषात् ६१ एकंहिमेसाय
कंचित्ररूपंदिग्धंविषेणाहरसंगृहीतम् ॥ येनविद्धोवामदेवःशयीतसंदश्यमानःश्वभिरार्तरूपः ६२ ॥ वामदेवउवाच ॥ ॥ जानामिपुत्रंदशवर्षंतवाहंजातं
महिष्यांश्येनजितंनरेंद्र ॥ तंजहित्वंमद्वचनात्प्रणुन्नस्तूर्णंप्रियंसायकैर्घोररूपैः ६३

वरद्वयंज्ञेयं ५५ एतरमस्याचष्टेनेति अनुयोगः शासनं अदंडयाब्राह्मणाइत्यर्थः। ब्रह्मब्राह्मणजातिं योब्राह्मणसेवीसजीवत्यन्योनश्यतीत्यर्थः वरद्वयमपिनिरर्थकमितिभावः ५६। ५७ दलः
कनिष्ठोभ्राता विधेयाआज्ञाकारिणः ५८ निपातितंमृतं ५९।६०।६१। ६२ तंजहि तवसायकस्त्वत्पुत्रमेवहिंसिष्यतिनतुमामित्यर्थः ६३

६४ । ६५ । ६६ एवमुक्त्वावामदेवेनस्तंभितहस्तापदोराजोवाच इक्ष्वाकवइति ६७ संस्पृश्यहत्वा एनसो ब्रह्महत्याध्यवसायजात्पापात् ६८ एनंनृशंसंमर्तारंदिनेदिनेसूनृतानिकल्याणक

मार्कंडेयउवाच ॥ एवमुक्तोवामदेवेनराजन्नंतःपुरेराजपुत्रंजघान ॥ ससायकस्तिग्मतेजाविसृष्टःश्रुत्वादलस्तत्रवाक्यंबभाषे ६४ ॥ राजोवाच ॥ इक्ष्वाकवोहं
तचरामिवःप्रियंनिहन्मीमंविप्रमद्यप्रमथ्य ॥ आनीयतामपरस्तिग्मतेजाःपश्यध्वंमेवीर्यमद्यक्षितीशाः ६५ ॥ वामदेवउवाच ॥ यत्त्वमेनंसायकंघोररूपंविषे
णादिग्धंममसंदधासि ॥ नत्वेतंत्वंशरवर्यंविमोक्तुंसंधातुंवाशक्ष्यसेमानवेंद्र ६६ ॥ राजोवाच ॥ इक्ष्वाकवःपश्यतमांगृहीतंनवैशक्नोम्येषशरंविमोक्तुम् ॥ नचा
स्यकर्तुंनाशमभ्युत्सहामिआयुष्मान्वैजीवतुवामदेवः ६७ ॥वामदेवउवाच ॥ संस्पृश्यैनांमहिषींसायकेनततस्तस्मादेनसोमोक्ष्यसेत्वम् ॥ ततस्तथाकृतवान्पा
र्थिवस्तुततोमुनिंराजपुत्रीबभाषे ६८ ॥ राजपुत्र्युवाच ॥ यथायुक्तावामदेवाहमेनंदिनेदिनेसंदिशंतीनृशंसम् ॥ ब्राह्मणेभ्योमृगयतीसूनृतानितथाब्रह्मन्पुण्य
लोकंलभेयम् ६९ ॥ वामदेवउवाच ॥ त्वयात्रातंराजकुलंशुभेक्षणेवरंवृणीष्वाप्रतिमंददानिते ॥ प्रशाधीमंस्वजनंराजपुत्रिइक्ष्वाकुराज्यंसुमहच्चाप्यनिंद्ये ७०
॥ राजपुत्र्युवाच ॥ वरंवृणेभगवंस्त्वेवमेषविमुच्यतांकिल्बिषादद्यभर्ता ॥ शिवेनचाध्याहिसपुत्रबांधवंवरोवृतोह्येषमयाद्विजाग्र्य ७१ मार्कंडेयउवाच॥श्रुत्वावचः
समुनीराजपुत्र्यास्तथाऽस्त्वितिप्राहकुरुप्रवीर ॥ ततःसराजामुदितोबभूववाम्यौचास्मैप्रददौसंप्रणम्य ७२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमा
स्यापर्वणिमंडूकोपाख्यानेद्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥ वैशंपायनउवाच ॥ मार्कंडेयमृषयोब्राह्मणायुधिष्ठिरश्चपर्यपृच्छनृषिःकेनदीर्घायुरासीद्ब
को मार्कंडेयस्तुतान्सर्वानुवाच १ महातपादीर्घायुश्चबकोराजर्षिर्नात्रकार्याविचारणा २ एतच्छ्रुत्वातुकौंतेयोभ्रातृभिःसहभारत ॥ मार्कंडेयंपर्यपृच्छद्धर्मराजो
युधिष्ठिरः ३ बकदाल्भ्यौमहात्मानौश्रूयेतेचिरजीविनौ ॥ सखायौदेवराजस्यतावृषीलोकसंमतौ ४ एतदिच्छामिभगवन्बकशक्रसमागमम् ॥ सुखदुःखसमायु
क्तंतत्त्वेनकथयस्वमे ५ ॥ मार्कंडेयउवाच ॥ वृत्तेदेवासुरेराजन्संग्रामेलोमहर्षणे ॥ त्रयाणामपिलोकानामिंद्रोलोकाधिपोऽभवत् ६ सम्यग्वर्षतिपर्जन्येसस्यसं
पदउत्तमाः ॥ निरामयाःसुधर्मिष्ठाःप्रजाधर्मपरायणाः ७ मुदितश्चजनःसर्वःस्वधर्मेषुव्यवस्थितः ॥ ताःप्रजामुदिताःसर्वादृष्ट्वाबलनिषूदनः ८ ततस्तुमुदितो
राजन्देवराजःशतक्रतुः ॥ ऐरावतंसमास्थायताःपश्यन्मुदिताःप्रजाः ९ आश्रमांश्चविचित्रांश्चनदीश्चविविधाःशुभाः ॥ नगराणिसमृद्धानिखेटान्जनपदांस्त
था १० प्रजापालनदक्षांश्चनरेंद्रान्धर्मचारिणः ॥ उदपानंप्रपावापीतडागानिसरांसिच ११ नानाब्रह्मसमाचारैःसेवितानिद्विजोत्तमैः ॥ ततोऽवतीर्य
रम्यायांपृथ्व्यांराजञ्छतक्रतुः १२

राणिवाक्यानिसंदिशंतीतिसंबंधः ब्राह्मणेभ्योमृगयती ब्राह्मणान् सेवितुमिच्छंती ६९ । ७० । ७१ । ७२ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेद्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥ ॥ मार्कंडेयमृषयइत्यादेरध्यायस्यतात्पर्यं ब्रह्मविद्यालब्धंचिरजीवित्वमपिदुःखमिश्रमतोविदेहकैवल्यमेवश्रेष्ठमिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७

तत्ररम्येशिवेदेशेबहुवृक्षसमाकुले ॥ पूर्वस्यांदिशिरम्यायांसमुद्राभ्याशतोनृप १३ तत्राश्रमपदंरम्यंमृगद्विजनिषेवितम् ॥ तत्राश्रमपदेरम्येबकंपश्यतिदेव
राट् १४ बकस्तुदृष्ट्वादेवेंद्रंदृढंप्रीतमनाऽभवत् ॥ पाद्यासनार्घ्यदानेनफलमूलैरथार्चयत् १५ सुखोपविष्टोवरदस्ततस्तुबलसूदनः ॥ ततःप्रश्नंबकंदेवउवाचात्रि
दशेश्वरः १६ शतंवर्षसहस्राणिमुनेजातस्यतेऽनघ ॥ समाख्याहिममब्रह्मन्किंदुःखंचिरजीविनाम् १७ ॥ बकउवाच ॥ अप्रियैःसहसंवासःप्रियैश्चापिविना
भवः ॥ असद्भिःसंप्रयोगश्चतद्दुःखंचिरजीविनाम् १८ पुत्रदारविनाशोऽत्रज्ञातीनांसुहृदामपि ॥ परेष्वायत्तताकृच्छ्रंकिंनुदुःखतरंततः १९ नान्यद्दुःखतरंकिं
चिल्लोकेषुप्रतिभातिमे ॥ अर्थैर्विहीनःपुरुषःपरैःसंपरिभूयते २० अकुलानांकुलेभावंकुलीनानांकुलक्षयम् ॥ संयोगंविप्रयोगंचपश्यंतिचिरजीविनः २१ अपि
प्रत्यक्षमेवैतत्तवदेवशतक्रतो ॥ अकुलानांसमृद्धानांकथंकुलविपर्ययः २२ देवदानवगंधर्वमनुष्योरगराक्षसाः ॥ प्राप्नुवंतिविपर्यासंकिंनुदुःखतरंततः २३ कुले
जाताश्चक्लिश्यंतेदौष्कुलेयवशानुगाः ॥ आढ्यैर्दरिद्राऽवमताःकिंनुदुःखतरंततः २४ लोकेवैधर्म्यमेतत्तुदृश्यतेबहुविस्तरम् ॥ हीनज्ञानाश्चदृश्यंतेक्लिश्यंते
प्राज्ञकोविदाः २५ बहुदुःखपरिक्लेशंमानुष्यमिहदृश्यते ॥ इंद्रउवाच ॥ पुनरेवमहाभागदेवर्षिगणसेवित २६ समाख्याहिममब्रह्मन्किंसुखंचिरजीवि
नाम् ॥ बकउवाच ॥ अष्टमेद्वादशेवाऽपिशाकंयःपचतेगृहे २७ कुमित्राण्यनपाश्रित्यकिंवैसुखतरंततः ॥ यत्राहानिनगण्यंतेनैनमाहुर्महाशनम् २८ अपि
शाकंपचानस्यसुखंवैमघवन्गृहे ॥ अर्जितंस्वेनवीर्येणनाप्यपाश्रित्यकंचन २९ फलशाकमपिश्रेयोभोक्तुंह्यकृपणंगृहे ॥ परस्यतुगृहेभोक्तुःपरिभूतस्यनित्यशः
३० सुमृष्टमपिनश्रेयोविकल्पोऽयमतःसताम् ॥ श्ववत्कीलालपोयस्तुपरान्नंभोक्तुमिच्छति ३१ धिगस्तुतस्यतद्भुक्तंकृपणस्यदुरात्मनः ॥ योदत्वाऽतिथि
भूतेभ्यःपितृभ्यश्चद्विजोत्तमः ३२ शिष्टान्यन्नानियोभुंक्तेकिंवैसुखतरंततः ॥ अतोमृष्टतरंनान्यत्पूतंकिंचिच्छतक्रतो ३३ दत्वायस्त्वतिथिभ्योवैभुंक्तेतेनै
वनित्यशः ॥ यावतोह्यंधसःपिंडानश्नातिसततंद्विजः ३४ तावतांगोसहस्राणांफलंप्राप्नोतिदायकः ॥ यदेनोयौवनकृतंतत्सर्वंनश्यतेध्रुवम् ३५ सदक्षिणस्य
भुक्तस्यद्विजस्यतुकरेगतम् ॥ यद्वारिवारिणासिंचेत्तद्व्येनस्तरतेक्षणात् ३६ एताश्चान्याश्चवैबह्वीःकथयित्वाकथाःशुभाः ॥ बकेनसहदेवेंद्रआपृच्छ्यत्रिदि
वंगतः ३७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणमहाभाग्येबकशक्रसंवादेत्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥ ॥ ७ ॥

॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥

विद्याबलंबुद्धप्रजापालनादिव्यप्रेष्वापिराजस्वस्तीतिदर्शयितुमाह ततइति १ । २ नैतद्वयत्पंथास्त्याज्य इत्येतन्नेत्यर्थः तत्रहेतुः पूर्वेतिपूर्वेचते कर्मकर्त्रादयश्चेतिविग्रहः अनुमंतृवक्तृप्रभृतय आदिशब्दार्थः अवधानतोविचारतः अधरेतिआवयोस्तारतम्यं नास्तीत्यर्थः ३ क्रूरइति पूर्वार्द्धेखलवृत्तं नात्रयास्साधुत्वंवेकर्थनकुर्यादित्यर्थः ४ । ५ । ६ । ७ राज्ञःशिबेः ८ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥ ॥ इदमिति १ । २ विद्वेषणं याचकस्यद्वेषं प्रीत्यैवददासिचेत् ग्रहीष्यामीत्यर्थः ३ हेदय ददोदानं

॥ वैशंपायनउवाच ॥ ततःपांडवाःपुनर्मार्कंडेयमूचुः १ कथितंब्राह्मणमहाभाग्यंराजन्यमहाभाग्यमिदानींशुश्रूषामहइति तानुवाचमार्कंडेयोमहर्षिःश्रूयतामे॥१९६॥
ति इदानींराजन्यानांमहाभाग्यमिति ॥ कुरुणामन्यतमःसुहोत्रोनामराजामहर्षीनभिगम्यानिवृत्त्यरथस्थमेवराजानमौशीनरंशिबिंददर्शाभिमुखंतौसमेत्यपरस्प
रेणयथावयःपूजांप्रयुज्यगुणसाम्येनपरस्परेणतुल्यात्मानौविदित्वाऽन्योन्यस्यपंथानंनददतुस्तत्रनारदःप्रादुरासीत्किमिदंभवंतौपरस्परस्यपंथानमावृत्यतिष्ठ
तइति २ तावूचतुर्नारदंनैतद्भगवनपूर्वकर्मकर्त्रादिभिर्विशिष्टस्यपंथाउपदिश्यतेसमर्थायवा आवांचसख्यंपरस्परेणोपगतौ तच्चावधानतोऽत्युत्कृष्टमधरोत्तरंपारि
भ्रष्टम् ॥ नारदस्त्वेवमुक्तःश्लोकत्रयमपठत् ३ क्रूरःकौरव्यमृदवेमृदुःक्रूरेचकौरव ॥ साधुश्चासाधवेसाधुःसाधवेनाप्नुयात्कथम् ४ कृतंशतगुणंकुर्यान्नास्तिदे
वेषुनिर्णयः ॥ औशीनरःसाधुशीलोभवतोवैमहीपतिः ५ जयेत्कदर्यंदानेनसत्येनानृतवादिनम् ॥ क्षमयाक्रूरकर्माणमसाधुंसाधुनाजयेत् ६ तदुभावेवभवंता
वुदारौयइदानींभवद्भ्यामन्यतमःसोऽपसर्पतुएतद्वैनिदर्शनमित्युक्त्वातूष्णींनारदोबभूव ॥ एतच्छ्रुत्वातुकौरव्यःशिबिंप्रदक्षिणंकृत्वापंथानंदत्वाबहुकर्मभिःप्रश
स्यप्रययौ ७ तदेतद्राज्ञोमहाभाग्यमप्युक्तवान्नारदः ८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिशिबिचरितेचतुर्नवत्यधिकशततमोऽ
ध्यायः ॥ १९४ ॥ ॥ मार्कंडेयउवाच ॥ इदमन्यच्छ्रूयतांययातिर्नाहुषोराजाराज्यस्थःपौरजनावृतआसांचक्रे ॥ गुर्वर्थीब्राह्मणउपेत्याब्रवीत्भोराज
न्गुर्वर्थंभिक्षेयंसमयादिति राजोवाच १ ब्रवीतुभगवान्समयमिति २ ॥ ब्राह्मणउवाच ॥ विद्वेषणंपरमंजीवलोकेकुर्यान्नरःपार्थिवयाच्यमानः ॥ तंत्वांपृच्छामि
कथंतुराजन्दद्याद्भवानदयितंचमेऽद्य ३ ॥ राजोवाच ॥ नचानुकीर्तयेदद्यदत्वाअयाच्यमर्थंनचसंशृणोमि ॥ प्राप्यमर्थंचसंश्रुत्यतंचापिदत्वासुसुखीभवामि ४
ददामितेरोहिणीनांसहस्रंप्रियोहिमेब्राह्मणोयाचमानः ॥ नमेमनःकुप्यतियाचमानेदत्तंनशोचामिकदाचिदर्थं ५ इत्युक्त्वाब्राह्मणायराजागोसहस्रंददौ ॥ प्राप्त
वांश्चगवांसहस्रंब्राह्मणइति ६ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिनाहुषचरितेपंचनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥ ॥
॥ वैशंपायनउवाच ॥ भूयएवमहाभाग्यंकथ्यतामित्यब्रवीत्पांडवः १ ॥१९५॥

तदद्य दत्वानकीर्तये दुःखेसत्येवकीर्तनंस्यान्नान्यथेतिभावः । दुःखंचाप्रियवियोगेऽतोममादे यामावात्त्वयाऽप्ययाच्योऽर्थोनास्तीत्यतःसर्वप्राप्यंस्त्रीपुत्रदेहादिदेयमेवनत्वप्राप्यंदातुंशक्यमित्यर्थः ४ रोहिणीनांगवां । रोहिणीकंठरुग्भिदीत्युपक्रम्य लोहितागवीरितिमेदिनी ५ असावपिसाधुत्वंभीत्याइष्टार्थदानंचमहाभाग्यमित्यध्यायद्वयतात्पर्यं ६ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे पंचनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥ ॥ भूयइति १

२ उपांशुबहिरनुद्घाटितंकुप्यंस्वर्णरूप्यादन्यत् ३ । ४ । ५ । ६ । ७ कशेनपुंस्त्वमार्षं ८ हिंसिहिनस्सिताडयसि ९ शपंतंशापंदिस्संतं हेविप्र योनददातिस्वीयधनं तुभ्यं तस्मै वापत्तव शापदानमुचितं । उताहोस्विदेवब्राह्मण्यंब्राह्मणयोग्यंस्वीयमपिदिस्सन्नशापयोग्यः नापि शांतिधर्माब्राह्मणःशापंदातुमर्हतीत्यर्थः १० । ११ क्षेपणं दूरीकरणं अवश्यंसप्रसादनीयइ

अथाचष्टमार्कंडेयोमहाराजवृषदर्भसेदुकनामानौराजानौनीतिमार्गरतावस्त्रोपास्त्रकृतिनौ २ सेदुकोवृषदर्भस्यबालस्यैवउपांशुव्रतमभ्यजानात्कुप्यमदेयंब्राह्म
णस्य ३ अथतंसेदुकंब्राह्मणःकश्चिद्वेदाध्ययनसंपन्नआशिषंदत्वागुर्वर्थीभिक्षितवान् ४ अश्वसहस्रंमेभवान्ददात्विति ॥ तंसेदुकोब्राह्मणमब्रवीत् ५ नास्तिसं
भवोगुर्वर्थंदातुमिति ६ सत्वंगच्छवृषदर्भसकाशम् ॥ राजापरमधर्मज्ञोब्राह्मणतंभिक्षस्व ॥ सतेदास्यतितस्यैतदुपांशुव्रतमिति ७ अथब्राह्मणोवृषदर्भसकाशं
गत्वाअश्वसहस्रमयाचत ॥ सराजातंकशेनाताडयत् ८ तंब्राह्मणोऽब्रवीत् ॥ किंहिंस्यनागसंमामिति ९ एवमुक्तातंशपंतंराजाह ॥ विप्रकिंयोनददातितुभ्य
मुताहोस्विद्ब्राह्मण्यमेतत् १० ॥ ब्राह्मणउवाच ॥ राजाधिराजतवसमीपंसेदुकेनप्रेषितोभिक्षितुमागतः ॥ तेनानुशिष्टेनमयात्वंभिक्षितोऽसि ११ ॥ राजोवाच
पूर्वाह्णेतेदास्यामियोमेऽद्यबलिरागमिष्यति ॥ योहन्यतेकशयाकथंमोघंक्षेपणंतस्यस्यात् १२ इत्युक्त्वाब्राह्मणायदैवसिकामुत्पत्तिंप्रादात् ॥ अधिकस्याश्वस
हस्रस्यमूल्यमेवादादिति १३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिसेदुकवृषदर्भचरितेषण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥ ॥
॥ मार्कंडेयउवाच ॥ देवानांकथासंजाता महीतलंगत्वामहीपतिंशिबिमौशीनरंसाध्वेनंशिबिंजिज्ञास्यामइति ॥ एवंभोइत्युक्त्वाअग्नींद्रावुपातिष्ठेताम् १ अग्निः
कपोतरूपेणतमभ्यधावदामिषार्थमिंद्रःश्येनरूपेण २ अथकपोतोराज्ञोदिव्यासनासीनस्योत्संगंन्यपतत् ३ अथपुरोहितोराजानमब्रवीत् ॥ प्राणरक्षार्थंश्ये
नाद्भीतोभवंतंप्राणार्थीप्रपद्यते ४ वसुददातुअंतवान्पार्थिवोऽस्यानिष्कृतिंकुर्यात्घोरंकपोतस्यनिपातमाहुः ५ अथकपोतोराजानमब्रवीत् ॥ प्राणरक्षार्थंश्ये
नाद्भीतोभवंतंप्राणार्थीप्रपद्येअंगैरंगानिप्राप्यार्थीमुनिर्भूत्वामाणांस्त्वांप्रपद्ये ६ स्वाध्यायेनकर्शितंब्रह्मचारिणंमांविद्धि ॥ तपसादमेनयुक्तमाचार्यस्याप्रतिकू
लभाषिणम् ॥ एवंयुक्तमपापंमांविद्धि ७ गदामिवेदान्विचिनोमिच्छंदःसर्वेवेदाअक्षरशोमेअधीताः ॥ नसाधुदानंश्रोत्रियस्यप्रदानंमाप्रादाःश्येनायनकपो
तोऽस्मि ८ अथश्येनोराजानमब्रवीत् ९

त्यर्थः १२ दैवसिकांएकदिवसजातामुत्पत्तिंधनस्य । स्वनियमभंगायप्रवृत्तंब्राह्मणंदंडयितुमपिप्रार्थितादधिकंदत्वाप्रसादयितुमपिसमर्थोराजानइतितात्पर्यं १३ ॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥ ॥ देवानामिति १ । २ । ३ । ४ घोरंनिंदितंअनिष्टसूचकमित्यर्थः मृत्युदूतत्वात्कपोतस्यअंतवान् दिगंतानामीश्वरः ५ अंगैरिति मुनिरहं स्वशरीरेणकपोतशरीरंप्रविष्टोऽस्मीत्यर्थः प्राणान्प्राणरक्षकत्वेनत्वमेवममप्राणाइत्यर्थः ६ । ७ श्रोत्रियस्यश्येनायत्वत्कर्तृकंप्रदानंनसाधुदानं ८ । ९

पर्यायेणेतिपितृपुत्रभार्यामातृप्रभृतीनामाधरोत्तर्येण याजाया सैवभर्वांतरे माता यः पुत्रः सएवपिता एवंशत्रुर्मित्रंभवति मित्रंवाशत्रुरिति भवेषुजन्मसुपर्यायेणवसतिःस्थितिर्भवति अतस्त्वंसर्गेषु
इअस्मात्कपोतात् जातोऽसि अतस्त्वं तवजन्मांतरीयंपितरंकपोतं आददानोरक्षन् ममआहारेविघ्नंमाकुर्वित्यर्थः १० शकुनेनेत्यकारांतोऽपि एतयोःस्वरूपंज्ञात्वासाधुकर्मकथं कुर्यामिति
विमृशतीत्यर्थः ११ । १२ हस्वाशीतत्वेएवप्रजाप्रमीयंते म्रियते १३ मो.वं.नेऽफलंसोऽन्नंविंदतिलभते अग्रचेताःअनुदारः १४ अस्मात्कपोतादएनंकपोतं मोचयित्वा ते तुभ्यंप्रतिनयंतुददति

॥१६६॥ पर्यायेणवसातिवर्भवेपुसर्गेजातःपूर्वमस्मात्कपोतात् ॥ त्वमाददानोऽथकपोतमेनंमात्वंराजन्विघ्नकर्ताभवेथाः १० ॥ राजोवाच ॥ केनेदृशींजातुपराहिदृष्टावा
गुच्यमानाशकुनेनसंस्कृता ॥ यांवैकपोतोवदतेयांचश्येनउभौविदित्वाकथमस्तुसाधु ११ नास्यवर्षंवर्षतिवर्षकालेनास्यबीजंरोहतिकालउप्तम् ॥ भीतंप्रप ॥१९७॥
न्नंयोहिददातिशत्रवेनत्राणंलभेत्राणमिच्छन्सकाले १२ जाताहस्वाप्रजाप्रमीयंतेसदानवासंपितरोऽस्यकुर्वते ॥ भीतंप्रपन्नंयोहिददातिशत्रवेनास्यदेवाःप्रतिगृ
ह्णंतिहव्यम् १३ मोघमन्नंविंदतिचाप्रचेताःस्वर्गाल्लोकाद्भ्रश्यतिशीघ्रमेव ॥ भीतंप्रपन्नंयोहिददातिशत्रवेसेंद्रादेवाप्रहरंत्यस्यवज्रम् १४ उक्षाणंपक्त्वाप्रह
ओदनेनअस्मात्कपोतात्प्रतितेनयंतु ॥ यस्मिन्देशेरमसेऽतीवश्येनतत्रमांसंशिबयस्तेवहंतु १५ ॥ श्येनउवाच ॥ नोक्षाणोराजन्प्रार्थयेयंनचान्यदस्मान्मां
समाधिकंवाकपोतात् ॥ देवैर्दत्तःसोऽद्यममैषभक्षस्तन्मेददस्वशकुनानामभावात् १६ ॥ राजोवाच ॥ उक्षाणंवेहतमनूनंनयंतुतेपश्यंतुपुरुषानेत्र ॥ मया
हितस्यदायंममांतिकात्त्वांप्रत्याम्नायंतुत्वंह्येनंमाहिंसीः १७ त्यजेप्राणान्नैवदद्यांकपोतंसौम्योह्ययंकिंनजानासिश्येन ॥ यथाक्लेशंमाकुरुष्वेहसौम्यनाहंकपोत
मर्पयिष्येकथंचित् १८ यथामांसाधुवादैःप्रसन्नाःप्रशंसेयुःशिबयःकर्मणातु ॥ यथाश्येनप्रियमेवकुर्यांप्रशाधिमांयद्वदेस्तत्करोमि १९ ॥ श्येनउवाच ॥ ऊ
रोर्दक्षिणादुत्कृत्यस्वपिशितंतावद्राजन्यावन्मांसंकपोतेनसमम् ॥ तथात्रस्मात्साधुत्रातःकपोतःप्रशंसेयुश्चशिबयःकृतंचप्रियंस्यान्मनेति २० अथसदक्षि
णादूरोरुत्कृत्यस्वमांसपेशींतुलयाऽधारयत् ॥ गुरुतरएवकपोतआसीत् २१ पुनरन्यमुत्चकर्तगुरुतरएवकपोतः ॥ एवंसर्वंसमाधिकृत्यशरीरंतुलायामारोपया
मास ततथापिगुरुतरएवकपोतआसीत् २२ अथराजास्वयमेवतुलामारुरोह ॥ नचव्यलीकमासीद्राज्ञएतद्वृत्तांतंदृष्ट्वात्रातइत्युक्त्वाप्रालीयतश्येनः अथराजा
अब्रवीत् २३ कपोतंविदुःशिबयस्त्वांकपोतपृच्छामितेशकुनेकोनुश्येनः ॥ नानीश्वरईदृशंजातुकुर्यादेतंप्रश्नंभगवन्मेविचक्ष्व २४ ॥ कपोतउवाच ॥ वै
श्वानरोऽहंज्वलनोधूमकेतुरथैवश्येनोवज्रहस्तःशचीपतिः ॥ साधुज्ञातुंत्वावृषभंसौरथेयनौजिज्ञासयात्वत्सकाशंप्रपन्नौ २५

निर्विरवेनसमर्पयंतु १५ ददस्व ददवानेहत्यस्यरूपं शकुनानांएकस्मिन्नेवबहुत्वं अभावात्नाशेन १६ उक्षाणंबलीवर्दंवेहतंवंध्यां गांवा अनूनंसर्वांगसंपूर्णंयथास्यात्तथा मयाहितस्यभीत ॥१६६॥
स्तस्यकपोतस्य दायंप्रतिधनं मत्याम्नायंनयंतुप्रापयंतु पश्यंतुआलोचयंतुच संतः एनंकपोतंमाहिंसीरिति १७ सौम्योह्ययं सोमसंयुक्तक्रतुवन्निरयंपरिपाल्योह्ययं हेसौम्य सोमवत्प्रियदर्शन
१८ । १९ । २० । २१ अधिकृत्यछित्त्वा २२ अपर्याप्तौ स्वयमेवतुलामारुरोह व्यलीकं अप्रियं प्रातस्त्वयाकपोतइत्युक्ता २३ । २४ हेसौरथेयसुरथायाःपुत्र नौआवांविद्धीतिशेषः २५

असिनाखड्गेनएतन्मांसं वत्नृपाणांलक्ष्मचिह्नंकरोमि २६ । २७ शिबिनाशिथिलशरीरेणजातंऔद्भिदंउद्भेदेनजातं यशसादीप्यमानम् २८ ॥ इत्या० प० नी० भा० भावदीपेसप्तनवत्यधिक
शततमोऽध्यायः ॥ १९७ ॥ ॥ भूयइति १ । २ । ३ आयुष्मंतंचिरकालभोग्यंस्वर्गस्थानं पुंस्त्वमार्ष अवतरेत्स्वर्गात्भूमौप्रथममितिशेषः ४ । ५ । ६ पार्श्वरथचक्रप्रदेशस्यमध्यम् ७ । ८
यामेतांपेशींममनिष्क्रयायप्रादाद्भवानासिनोत्कृत्यराजन् ॥ एतद्वोलक्ष्मशिवंकरोमिहिरण्यवर्णंरुचिरंपुण्यगंधम् २६ एतासांप्रजानांपालयितायशस्वीसुरर्षी
णामथसंमतोभृशम् ॥ एतस्मात्पार्श्वात्पुरुषोजनिष्यतिकपोतरोमेतिचतस्यनाम २७ कपोतरोमाणंशिबिनौद्भिदंपुत्रंप्राप्स्यसिनृपवृषभंसंहननंयशोदीप्यमा
नंद्रष्टाऽसिशूरंवृषभंसौरथानाम् २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिशिबिचरितेसप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥ ॥
वैशंपायनउवाच ॥ भूयएवमहाभाग्यंकथ्यतामित्यब्रवीत्पांडवोमार्कंडेयम् ॥ अथाचष्टमार्कंडेयः ॥ अष्टकस्यवैश्वामित्रेरश्वमेधेसर्वेराजानःप्रागच्छन् १ भ्रातर
श्चास्यप्रतर्दनोवसुमनाःशिबिरौशीनरइतिसचसमाप्तयज्ञोभ्रातृभिःसहरथेनप्रायात्तेचनारदमागच्छंतमभिवाद्यारोहतुभवान्रथमित्यब्रुवन् २ तांस्तथेत्युक्त्वा
रथमारुरोह ॥ अथतेषामेकःसुरर्षिंनारदमब्रवीत् ॥ प्रसाद्यभगवंतंकिंचिदिच्छेयंप्रष्टुमिति ३ पृच्छेत्यब्रवीदृषिः ॥ सोऽब्रवीदायुष्मंतःसर्वगुणप्रमुदिताः ॥
अथायुष्मंतंस्वर्गस्थानंचतुर्भिर्यातव्यंस्यात्कोऽवतरेत् ॥ अयमष्टकोवतरेदित्यब्रवीदृषिः ४ किंकारणमित्यपृच्छन् ॥ अथाचष्टाष्टकस्यगृहेमयाउषितंसमार
थेनानुप्रावहदथापश्यमनेकानिगोसहस्राणिवर्णशोविविक्तानितमहमपृच्छंकस्येमागावइतिसोऽब्रवीत् ॥ मयानिसृष्टाइत्येतास्तेनैवस्वयंश्लाघितिकथितेन ॥
एषोऽवतरेदथात्रिभिर्यातव्यंसांप्रतंकोवतरेत् ५ प्रतर्दनइत्यब्रवीदृषिः ॥ तत्रकिंकारणंप्रतर्दनस्यापिगृहेमयोषितंसमारथेनानुप्रावहत् ६ अथैनंब्राह्मणोऽभिक्षे
ताश्वंमेददातुभवान्निवृत्तोदास्यामीत्यब्रवीद्ब्राह्मणंत्वरितमेवदीयतामित्यब्रवीद्ब्राह्मणस्त्वरितमेवसब्राह्मणस्यैवमुक्त्वादक्षिणंपार्श्वमददत् ७ अथान्योऽप्यश्वार्थीब्रा
ह्मणआगच्छत् ॥ तथैवचैनमुक्त्वावामपार्ष्णिमभ्यदादथप्रायात्पुनरपिचान्योऽप्यश्वार्थीब्राह्मणआगच्छत्त्वरितोऽथतस्मैअपनह्यवामंधुर्यमददत् ८ अथप्रा
यात्पुनरन्यआगच्छदश्वार्थीब्राह्मणस्तमब्रवीदतियातोदास्यामित्वरितमेवमेदीयतामित्यब्रवीद्ब्राह्मणस्तस्मैदत्वाऽश्वंरथधुरंगृह्णताव्याहृतंब्राह्मणानांसांप्रतंना
स्तिकिंचिदिति ९ यएषददातिचासूयतिचतेनव्याहृतेनतथाऽवतरेत् ॥ अथद्वाभ्यांयातव्यमितिकोऽवतरेत् १० वसुमनाअवतरेदित्यब्रवीदृषिः ११
किंकारणमित्यपृच्छदथाचष्टनारदः ॥ अहंपरिभ्रमन्वसुमनसोगृहमुपस्थितः १२ स्वस्तिवचनमासीत्पुष्परथस्यप्रयोजनेनतमहमन्वगच्छंस्वस्तिवाचितेषु
ब्राह्मणेषुरथोब्राह्मणानांदर्शितः १३ तमहंरथंप्राशंसमथराजाऽब्रवीद्भगवतारथःप्रशस्तः ॥ एषभगवतोभगवतोरथइति १४

अतियातोऽतिवेगवान् अश्वचतुष्टयस्यापिदानात्धुरंस्वहस्तेनैवगृह्णतासांप्रतंयुक्तायुक्तविचारः ९ । १० । ११ । १२ पुष्परथस्यगिरिगगनसागरेष्वप्रतिषिद्धमार्गस्य प्रयोजनेनतदर्थमित्य
र्थः १३ रथःस्तुतएवनतुयाचितः राजाऽपिममाशयंबुद्ध्वाऽपि रथंनदत्तवान् रथस्तुतिचानुमोदितवानितिप्रघट्टकार्थः १४

द्रोहवचनेनअदरवात्हृथास्तवेन १५ । १६ । १७ । १८ । १९ । २० । २१ महित्वापूजयित्वाकपालंशीर्षास्थिपात्रम् २२ । २३ । २४ । २५ । २६ योदत्वाश्लाघतेयश्चासूयेवयश्चार्थिनोलि
प्सितार्मिंगितैर्ज्ञात्वाऽपि तंस्तुतिमात्रेणैवसंभावयति नत्वर्थेन यश्चब्राह्मणेनार्थितःश्रद्धाक्षमापूर्वकमदेयमपिददाति अकर्तव्यमपिकरोति तेउत्तरोत्तरंश्रेष्ठाःतत्राप्यंत्योनारदादपिश्रेष्ठइतिदातृ

अथकदाचित्पुनरप्यहमुपस्थितःपुनरेवचरथप्रयोजनमासीत् ॥ सम्यग्गयमेषभगवतइत्येवंराजाऽब्रवीदितिपुनरेवतृतीयंस्वस्तिवाचनंसमभावयमथराजाब्रा
ह्मणानांदर्शयन्मामभिप्रेक्ष्याब्रवीत् ॥ अथोभगवतापुष्परथस्यस्वस्तिवाचनानिसुष्ठुसंभावितानिएतेनद्रोहवचनेनावतरेत् १५ अथैकेनयातव्यंस्यात्कोवतरेत्पु
नर्नारदआह ॥ शिबिर्यायादहमवतरेयंअत्रकिंकारणमित्यब्रवीत् ॥ असावहंशिबिनासमोनास्मियतोब्राह्मणःकश्चिदेनमब्रवीत् १६ शिबेअन्नार्थ्यस्मीतितम
ब्रवीच्छिबिःकिंक्रियतामाज्ञापयतुभवानिति १७ अथैनंब्राह्मणोऽब्रवीत्यएषतेपुत्रोबृहद्गर्भोनामएषप्रमातव्यइतितमेनंसंस्कुरुअन्नंचोपपादयततोहंप्रतीक्ष्य
इति ॥ ततःपुत्रंप्रमाथ्यसंस्कृत्यविधिनासाधयित्वापात्र्यामर्पयित्वाशिरसाप्रतिगृह्यब्राह्मणमम्रृगयत् १८ अथास्यमृगयमाणस्यकश्चिदाचष्टएषतेब्राह्मणोनग
रंप्रविश्यदहतितेगृहंकोशागारमायुधागारंस्त्र्यगारमश्वशालांहस्तिशालांचक्रुद्धइति १९ अथशिबिस्तथैवाविकृतमुखवर्णोनगरंप्रविश्यब्राह्मणंतमब्रवीत्सिद्धंभ
गवन्नन्नमितिब्राह्मणोनकिंचिद्व्याजहारविस्मयादधोमुखश्चासीत् २० ततःप्रासादयद्ब्राह्मणंभगवन्भुज्यतामिति ॥ मुहूर्तादुद्वीक्ष्यशिबिमब्रवीत् २१ त्वमेवैतद
शानेतितत्राहतथेतिशिबिस्तथैवाविमनामहित्वाकपालमभ्युद्धार्यभोक्तुमैच्छत् २२ अथास्यब्राह्मणोहस्तमगृह्णात् ॥ अब्रवीच्चैनंजितक्रोधोऽसिनतेकिंचिदप
रित्याज्यंब्राह्मणार्थेब्राह्मणोऽपितंमहाभागंसभाजयत् २३ सद्युद्वीक्षमाणःपुत्रमपश्यदग्रेतिष्ठंतंदेवकुमारमिवपुण्यगंधान्वितमलंकृतंसर्वंचतमर्थंविधायब्राह्मणोंऽत
रधीयत २४ तस्यराजर्षेर्विधातातेनैववेषेणपरीक्षार्थमागतइति ॥ तस्मिन्नंतर्हितेअमात्याराजानमूचुः ॥ किंप्रेप्सुनाभवताइदमेवंजानताकृतमिति २५ शि
बिरुवाच ॥ नैवाहमेतद्यशसेददानिनचार्थहेतोर्नचभोगतृष्णया ॥ पापैरनासेवितएषमार्गइत्येवमेतत्सकलंकरोमि २६ साद्भिःसदाऽध्यासितंतुप्रशस्तंतस्मा
त्प्रशस्तंश्रयतेमतिर्मे ॥ एतन्महाभाग्यवरंशिबेस्तुतस्मादहंवेदयथावदेतत् २७ ॥ इतिश्रीम० आ० प० मार्कंडेयसमास्याप० राजन्यमहाभाग्येशिबिचरि
तेअष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥ ॥ वैशंपायनउवाच ॥ मार्कंडेयमृषयःपांडवाःपर्यपृच्छन्नस्तिकश्चिद्भवतश्चिरजाततरइति १ सतानुवाचा
स्तिखलुराजर्षिरिंद्रद्युम्नोनामक्षीणपुण्यस्त्रिदिवात्प्रच्युतःकीर्तिर्मेव्युच्छिन्नेतिसमामुपातिष्ठदथप्रत्यभिजानातिमांभवानिति २

गुणदोषविधानपरोऽध्यायः २७ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥ ॥ मार्कंडेयमृषयइति यावत्कीर्तिस्तावत्स्वर्गेतिष्ठति तुल्यन्याय
त्वाद्यावदकीर्तिस्तावन्नरकेऽप्यतःकीर्त्यकीर्त्योर्नाशे कर्मानुरूपं ब्राह्मणादिशरीरंनीचयोनिवाऽभावपिभूमौमानुवइत्यध्यायतात्पर्यं १ प्रत्यभिजानाति परिचिनोति २

कार्यंपुण्यंतदर्थांश्चेष्टाजपादयस्ताभिराकुलत्वात् वासायनिकाः वासोविटागारंतदेवअयनंवासायनं तत्रभवाः ग्रामैकरात्रवासिनस्तीर्थाटनशीलाः शरीरोपतापेन कृच्छ्रोपवासादिजन्मना

तमहमन्नुवंकार्यचेष्टाकुलत्वान्नवयंवासायनिकाग्रामैकरात्रवासिनोनप्रत्यभिजानीमोऽप्यात्मनोर्थानामनुष्ठानंनशरीरोपतापेनात्मनःसमारभामोर्थानामनुष्ठानम् ३
अस्तिखलुहिमवतिप्रावारकर्णोनामोलूकःप्रतिवसति ॥ समत्तश्चिरजातोभवंतंयदिजानीयादितःप्रकृष्टेचाध्वानिहिमवांस्तत्रासौप्रतिवसतीति ४ ततःसमाम
श्वोभूत्वातत्रावहद्यत्रबभूवोलूकः ॥ अथैनंसराजापप्रच्छप्रतिजानातिमांभवानिति ५ समुहूर्तमिवध्यात्वाऽब्रवीदेनंनाभिजानामिभवंतमितिसएवमुक्तइंद्रद्यु
म्नःपुनस्तमुलूकमब्रवीद्राजर्षिः ६ अथास्तिकश्चिद्भवतःसकाशाच्चिरजातइतिसएवमुक्तोऽब्रवीदस्तिखल्विंद्रद्युम्नंनामसरस्तस्मिन्नाडीजंघोनामबकःप्रतिवसति
सोऽस्मत्तश्चिरजाततरस्तंपृच्छेतिततइंद्रद्युम्नोमांचोलूकमादायतत्सरोऽगच्छद्यत्रासौनाडीजंघोनामबकोबभूव ७ सोऽस्माभिःपृष्टोभवानिमामिंद्रद्युम्नंराजान
मभिजानातीतिसएवंमुहूर्तंध्यात्वाऽब्रवीन्नाभिजानाम्यहमिंद्रद्युम्नंराजानमिति ॥ ततःसोऽस्माभिःपृष्टःकश्चिद्भवतोऽन्यश्चिरजाततरोऽस्तीतिसनोऽब्रवीदस्ति
खल्वस्मिन्नेवसरस्यकूपारोनामकच्छपःप्रतिवसति ॥ समत्तश्चिरजाततरःसयादिकथंचिदाभिजानीयादिमंराजानंतमकूपारंपृच्छध्वमिति ८ ततःसबकस्त
मकूपारंकच्छपंविज्ञापयामास ॥ अस्माकमभिप्रेतंभवंतंकिंचिदर्थमभिप्रष्टुंसाध्वागम्यतांतावदिति तच्छ्रुत्वाकच्छपस्तस्मात्सरसउत्थायाभ्यगच्छद्यत्रतिष्ठामो
वयंतस्यसरसस्तीरेआगतंचैनंवयमपृच्छामभवानिंद्रद्युम्नंराजानमभिजानातीति ९ समुहूर्तंध्यात्वाबाष्पसंपूर्णनयनउद्विग्नहृदयोवेपमानोविसंज्ञकल्पःप्रांज
लिरब्रवीत्किमहमेनंनप्रत्यभिज्ञास्यामीहह्यनेनसहस्रकृत्वश्चितिषुयूपाआहिताः १० सरश्चेदमस्यदक्षिणाभिर्दत्ताभिर्गोभिरतिक्रममाणाभिःकृतम् ॥ अत्रचा
हंप्रतिवसामीति ११ अथैतत्सकलंकच्छपेनोदाहृतंश्रुत्वातदनंतरंदेवलोकाद्देवरथःप्रादुरासीद्वाचश्चाश्रूयंतेंद्रद्युम्नंप्रतिप्रस्तुतस्तेस्वर्गोयथोचितंस्थानंप्रतिपद्य
स्वकीर्तिमानस्यव्यग्रोयाहीति १२ भवंतिचात्रश्लोकाः ॥ दिवंस्पृशतिभूमिंचशब्दःपुण्यस्यकर्मणः ॥ यावत्सशब्दोभवतितावत्पुरुषउच्यते १३ अकीर्तिः
कीर्त्यतेलोकेयस्यभूतस्यकस्यचित् ॥ सपतत्यधमाँल्लोकान्यावच्छब्दःप्रकीर्त्यते १४ तस्मात्कल्याणवृत्तःस्यादनंतायनरःसदा ॥ विहायचित्तंपापिष्ठंधर्ममेव
समाश्रयेत् १५ इत्येतच्छ्रुत्वासराजाऽब्रवीत्तिष्ठतावद्यावदिमौवृद्धौयथास्थानंप्रतिपादयामीति १६ समांप्रावारकर्णंचोलूकंयथोचितेस्थानेप्रतिपाद्यतेनैवयाने
नसंस्थितोयथोचितंस्थानंप्रतिपेदे तन्मयाऽनुभूतंचिरजीविनेदृशमितिपांडवानुवाचमार्कंडेयः १७

देहतापेन अतोनवयमतीतानागतविदःस्म इतिभावः ३ खलुप्रसिद्धं ४ सइंद्रद्युम्नोऽश्वोभूत्वामामवहत् ५ । ६ । ७ । ८ । ९ चितिषु अग्निचयनेषु कर्तव्येषु सत्सु १०
११ । १२ । पुरुषः स्वर्गस्थइतिशेषः १३ । १४ । १५ । १६ । १७

असौ मार्कंडेयः १८ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे ऊनशताधिकशततमोऽध्यायः ॥ १९९ ॥ ॥ अतःपरं स्वर्गप्रदान्साधारणान्धर्मानाहाध्यायेन श्रुत्वासराजा
राजर्षिरित्यादिना वदंतिलोकेषुविशिष्टबुद्धयइत्यंतेन १ । २ । ३ । ४ पर्यश्नंतिबालवृद्धातिथिभ्यः पूर्वमश्नंति यत्रजन्मानि असत्यंवृथागोत्राह्मगादित्राणंविनाक्रीर्त्यते वदपिवृथेत्यर्थः ५

पांडवाश्चोचुःसाधुशोभनंभवताकृतंराजानमिंद्रद्युम्नंस्वर्गलोकाच्च्युतंस्वेस्थानेप्रतिपादयतेत्यथैतानब्रवीदसौनन्नुदेवकीपुत्रेणापिकृष्णेननरकेमज्जमानोराजर्षिर्नृ
गस्तस्मात्कृच्छ्रात्पुनःसमुद्धृत्यस्वर्गंप्रापितइति १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिइंद्रद्युम्नोपाख्यानेऊनशताधिकशततमो
ऽध्यायः ॥ १९९ ॥ ॥ ४ ॥ ॥ वैशंपायनउवाच ॥ श्रुत्वासराजाराजर्षिरिंद्रद्युम्नस्यतत्तदा ॥ मार्कंडेयान्महाभागात्स्वर्गस्यप्रतिपादनम् १ युधिष्ठिरो
महाराजपुनःपप्रच्छतंमुनिम् ॥ कीदृशीपुद्धवस्थासुदत्वादानंमहामुने २ इंद्रलोकंत्वनुभवेत्पुरुषस्तद्ब्रवीहिमे ॥ गार्हस्थ्येऽप्यथवाबाल्येयौवनेस्थाविरेऽपिवा ॥
यथाफलंसमश्नातितथात्वंकथयस्वमे ३ ॥ मार्कंडेयउवाच ॥ वृथाजन्मानिचत्वारिवृथादानानिषोडश ॥ वृथाजन्मह्यपुत्रस्ययेचधर्मबहिष्कृताः ४ परपा
केषुयेऽश्नंतिआत्मार्थंचपचेत्तुयः ॥ पर्यश्नंतिवृथायत्रतदसत्यंप्रकीर्त्यते ५ आरूढपतितेदत्तमन्यायोपहृतंचयत् ॥ व्यर्थंतुपतितेदानंब्राह्मणेतस्करेतथा ६ गुरौ
चानृतिकेपापेकृतघ्नेग्रामयाजके ॥ वेदविक्रयिणेदत्तंतथावृषलयाजके ७ ब्रह्मबंधुषुयद्दत्तंयद्दत्तंवृषलीपतौ ॥ स्त्रीजनेषुचयद्दत्तंव्यालग्राहेतथैवच ८ परिचारकेषु
यद्दत्तंवृथादानानिषोडश ॥ तमोवृतस्तुयोदद्याद्भयात्क्रोधात्तथैवच ९ भुंक्तेचदानंतत्सर्वंगर्भस्थस्तुनरःसदा ॥ ददद्दानंद्विजातिभ्योवृद्धभावेनमानवः १० त
स्मात्सर्वास्ववस्थासुसर्वदानानिपार्थिव ॥ दातव्यानिद्विजातिभ्यःस्वर्गमार्गजिगीषया ११ ॥ युधिष्ठिरउवाच ॥ चातुर्वर्ण्यस्यसर्वस्यवर्तमानाःप्रतिग्रहे ॥
केनविप्राविशेषेणतारयंतितरंतिच १२ ॥ मार्कंडेयउवाच ॥ जपैर्मंत्रैश्चहोमैश्चस्वाध्यायाध्ययनेनच ॥ नावंवेदमयींकृत्वातारयंतितरंतिच १३ ब्राह्मणांस्तो
षयेद्यस्तुतुष्यंतेतस्यदेवताः ॥ वचनाच्चापिविप्राणांस्वर्गलोकमवाप्नुयात् १४ पितृदेवतपूजाभिर्ब्राह्मणाभ्यर्चनेनच ॥ अनंतंपुण्यलोकंतुगंताऽसित्वंनसंशयः १५
श्लेष्मादिभिर्व्याप्ततनुर्म्रियमाणोऽविचेतनः ॥ ब्राह्मणाएवसंपूज्याःपुण्यंस्वर्गमभीप्सता १६ श्राद्धकालेतुयत्नेनभोक्तव्याह्यजुगुप्सिताः ॥ दुर्वर्णःकुनखीकुष्ठी
मायावीकुंडगोलकौ १७ वर्जनीयाःप्रयत्नेनकांडपृष्ठाश्चदेहिनः ॥ जुगुप्सितंहियच्छ्राद्धंदहत्यग्निरिवेंधनम् १८ येयेश्राद्धेनयुज्यंतेमूकांधबधिरादयः ॥ तेपि
सर्वेनियोक्तव्यामिश्रितावेदपारगैः १९ प्रतिग्रहश्चवैदेयःशृणुयस्ययुधिष्ठिर ॥ प्रदातारंतथाऽऽत्मानंयस्तारयतिशक्तिमान् २०

आरूढश्चासौपतितः । 'आरूढोनैष्ठिकंधर्मंयस्तस्मात्प्रच्यवते पुनः ॥ प्रायश्चित्तंनतस्यास्तियेन शुद्ध्येत्सआत्महा'इतिश्लोकोक्तः नैष्ठिकंयावज्जीवब्रह्मचर्यं चतुर्थाश्रमं वानप्रस्थत्वं वा प्रच्यवते गा
र्हस्थ्येच्छादिनातानिष्ठात्यजति ६ गुरावप्यानृतिकेऽनृतप्रिये वृषलः शूद्रः ७ ब्रह्मबंधवोजातिमात्रब्राह्मणावृत्ताध्ययनशून्याः ८ । ९ दानंदानफलंअन्यनुद्दानंवृद्धभावेनजरयायुक्तः १० ॥१९८॥
११ । १२ । १३ । १४ । १५।१६ अजुगुप्सिताः अभिशस्तपतितवर्जिताः दुर्वर्णः अतिगौरोऽतिकृष्णोबीभत्सवर्णः १७ कांडपृष्ठाः बाणनिषंगधराः क्षात्रवृत्तयइत्यर्थः १८ । १९ । २०

२१ । २२ । २३ माल्यं निर्माल्यं २४ आकल्पःगंधादिनाऽलंकरणं २५ । २६ अभिभूतायदारिद्र्यादेव २७ अभिवर्जितं दत्तं २८ साबहुभ्योदत्ता २९।३०।३१।३२।३३।३४।३५ । ३६ । ३७

तस्मिन्देयंद्विजेदानंसर्वागमविजानता ॥ प्रदातारंतथाऽऽत्मानंतारयेद्यःसशक्तिमान् २१ नतथाहविषोहोमैर्नपुष्पैर्नानुलेपनैः ॥ अग्नयःपार्थतुष्यंतियथाह्य
तिथिभोजने २२ तस्मात्त्वंसर्वयत्नेनयतस्वातिथिभोजने ॥ पादोदकंपादघृतंदीपमन्नंप्रतिश्रयम् २३ प्रयच्छंतितुयेराजन्नोपसर्पंतितेयमम् ॥ देवमाल्यापु
नयनंद्विजोच्छिष्टावमार्जनम् २४ आकल्पपरिचर्याचगात्रसंवाहनानिच ॥ अत्रैकैकंनृपश्रेष्ठगोदानाद्व्यतिरिच्यते २५ कपिलायाःप्रदानात्तुमुच्यतेनात्र
संशयः ॥ तस्मादलंकृतांदद्यात्कपिलांतुद्विजातये २६ श्रोत्रियायदरिद्रायगृहस्थायाग्निहोत्रिणे ॥ पुत्रदाराभिभूतायतथाह्यनुपकारिणे २७ एवंविधेषुदात
व्यानसमृद्धेषुभारत ॥ कोगुणोभरतश्रेष्ठसमृद्धेष्वभिवर्जितम् २८ एकस्यैकाप्रदातव्यानबहूनांकदाचन ॥ सागौर्विक्रयमापन्नाहन्यात्त्रिपुरुषंकुलम् २९ नता
रयतिदातारंब्राह्मणंनैवनैवतु ॥ सुवर्णस्यविशुद्धस्यसुवर्णंयःप्रयच्छति ३० सुवर्णानांशतंतेनदत्तंभवतिशाश्वतम् ॥ अनड्वाहंतुयोदद्याद्बलवंतंधुरंधरम् ३१
सनिस्तरतिदुर्गाणिस्वर्गलोकंचगच्छति ॥ वसुंधरांतुयोदद्याद्द्विजायविदुषात्मने ३२ दातारंह्यनुगच्छंतिसर्वेकामाभिवांछिताः ॥ पृच्छंतिचात्रदातारंवदंति
पुरुषाभुवि ३३ अध्वनिक्षीणगात्राश्चपांसुपादावगुंठिताः ॥ तेषामेवश्रमार्तानांयोह्यन्नंकथयेद्बुधः ३४ अन्नदातृसमःसोऽपिकीर्त्यतेनात्रसंशयः ॥ तस्मात्त्वं
सर्वदानानिहित्वाऽन्नंसंप्रयच्छह ३५ नहीदृशंपुण्यफलंविचित्रमिहविद्यते ॥ यथाशक्तिचयोदद्यादन्नंविप्रेषुसंस्कृतम् ३६ सतेनकर्मणाऽऽप्नोतिप्रजापतिस
लोकताम् ॥ अन्नमेवविशिष्टंहितस्मात्परतरंनच ३७ अन्नंप्रजापतिश्चोक्तःसचसंवत्सरोमतः ॥ संवत्सरस्तुयज्ञोऽसौसर्वंयज्ञेप्रतिष्ठितम् ३८ तस्मात्सर्वाणिभू
तानिस्थावराणिचराणिच ॥ तस्मादन्नंविशिष्टंहिसर्वेभ्यइतिविश्रुतम् ३९ येषांतटाकानिमहोदकानिवाप्यश्चकूपाश्चप्रतिश्रयाश्च ॥ अन्नस्यदानंमधुराचवा
णीयमस्यतेनिर्वचनाभवंति ४० धान्यंश्रमेणार्जितवित्तसंचितंविप्रेसुशीलेचप्रयच्छतेयः ॥ वसुंधरातस्यभवेत्सुतुष्टाधारांवसूनांप्रतिमुंचतीव ४१ अन्नदाःप्र
थमंयांतिसत्यवाक्तदनंतरम् ॥ अयाचितप्रदाताचसमंयांतित्रयोजनाः ४२ ॥ वैशंपायनउवाच ॥ कौतूहलसमुत्पन्नःपर्यपृच्छद्युधिष्ठिरः ॥ मार्कंडेयंमहात्मानं
पुनरेवसहानुजः ४३ यमलोकस्यचाध्वानमंतरंमानुषस्यच ॥ कीदृशंकिंप्रमाणंवाकथंवातन्महामुने ॥ तरंतिपुरुषाश्चैवयेनोपायेनशंसमे ४४ ॥ मार्कंडेय
५७ उवाच ॥ सर्वगुह्यतमंप्रश्नंपवित्रमृषिसंस्तुतम् ॥ कथयिष्यामितेराजन्धर्मंधर्मभृतांवर ४५ षडशीतिसहस्राणियोजनानांनराधिप ॥ यमलोकस्यचाध्वानमं
तरंमानुषस्यच ४६ आकाशंतदपानीयंघोरंकांतारदर्शनम् ॥ नतत्रवृक्षच्छायावापानीयंकेतनानिच ४७

प्रजापतिर्विराट्‌अन्नं विराडितिश्रुतेः ३८।३९ प्रतिश्रयाःगृहाःयेषां यैःउत्सृष्टाइतिशेषः निर्वचनाः यमवार्तामपिनशृण्वंतीत्यर्थः ४० वसूनांधनानां ४१। ४२ । ४३ । ४४ । ४५ । ४६ । ४७

४८ । ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ अपा

विश्रमेद्यत्रवैश्रांतःपुरुषोऽध्वनिकर्शितः ॥ नीयतेयमदूतैस्तुयमस्याज्ञाकरैर्बलात् ४८ नराःस्त्रियस्तथैवान्येपृथिव्यांजीवसंज्ञिताः ॥ ब्राह्मणेभ्यःप्रदानानिना
नारूपाणिपार्थिव ४९ हयादीनांप्रकृष्टानितेऽध्वानंयांतिवैनराः ॥ सन्निवार्यातपंयांतिच्छत्रेणैवहिच्छत्रदाः ५० तृप्ताश्चैवान्नदातारोह्यतृप्ताश्चाप्यनन्नदाः ॥
वस्त्रिणोवस्त्रदायांतिअवस्त्रायांत्यवस्त्रदाः ५१ हिरण्यदाःसुखंयांतिपुरुषास्त्वभ्यलंकृताः ॥ भूमिदास्तुसुखंयांतिसर्वैःकामैःसुतर्पिताः ५२ यांतिचैवापरिक्लि
ष्टानराःसस्यप्रदायकाः ॥ नराःसुखतरंयांतिविमानेषुगृहप्रदाः ५३ पानीयदाह्यतृषिताःप्रहृष्टमनसोनराः ॥ पंथानंद्योतयंतश्चयांतिदीपप्रदाःसुखम् ५४
गोप्रदास्तुसुखंयांतिनिर्मुक्ताःसर्वपातकैः ॥ विमानैर्हंससंयुक्तैर्यांतिमासोपवासिनः ५५ तथाबर्हिप्रयुक्तैश्चषष्ठरात्रोपवासिनः ॥ त्रिरात्रंक्षपतेयस्तुएकभक्तेन
पांडव ५६ अंतराचैवनाश्नातितस्यलोकाह्यनामयाः ॥ पानीयस्यगुणादिव्याःप्रेतलोकसुखावहाः ५७ तत्रपुष्पोदकानामनदीतेषांविधीयते ॥ शीतलंस
लिलंतत्रपिबंतिह्यमृतोपमम् ५८ येचदुष्कृतकर्माणःपूयंतेषांविधीयते ॥ एवंनदीमहाराजसर्वकामप्रदाहिसा ५९ तस्मात्त्वमपिराजेंद्रपूजयैनान्यथाविधि ॥
अध्वनिक्षीणगात्रश्चपथिपांसुसमन्वितः ६० पृच्छतेह्यन्नदातारंगृहमायातिचाशया ॥ तंपूजयाथयत्नेनसोऽतिथिर्ब्राह्मणश्चसः ६१ तंयांतमनुगच्छंतिदेवाः
सर्वेसवासवाः ॥ तस्मिन्संपूजितेप्रीतानिराशायांत्यपूजिते ६२ तस्मात्त्वमपिराजेंद्रपूजयैनंयथाविधि ॥ एतत्तेशतशःप्रोक्तंकिंभूयःश्रोतुमिच्छसि ६३ यु
धिष्ठिरउवाच ॥ पुनःपुनरहंश्रोतुंकथांधर्मसमाश्रयाम् ॥ पुण्यामिच्छामिधर्मज्ञकथ्यमानांत्वयाविभो ६४ ॥ मार्कंडेयउवाच ॥ धर्मांतरंप्रतिकथांकथ्यमानां
मयानृप ॥ सर्वपापहरांनित्यंशृणुष्वावहितोमम ६५ कपिलायांतुदत्तायांयत्फलंज्येष्ठपुष्करे ॥ तत्फलंभरतश्रेष्ठविप्राणांपादधावने ६६ द्विजपादोदकक्लिन्ना
यावत्तिष्ठतिमेदिनी ॥ तावत्पुष्करपर्णेनपिबंतिपितरोजलम् ६७ स्वागतेनाग्नयस्तृप्ताआसनेनशतक्रतुः ॥ पितरःपादशौचेनअन्नाद्येनप्रजापतिः ६८ याव
द्वत्सस्यवैपादौशिरश्चैवप्रदृश्यते ॥ तस्मिन्कालेप्रदातव्याप्रयतेनांतरात्मना ६९ अंतरिक्षगतोवत्सोयावद्योन्यांप्रदृश्यते ॥ तावद्गौःपृथिवीज्ञेयायावद्गर्भंनमुं
चति ७० यावंतितस्यारोमाणिवत्सस्यचयुधिष्ठिर ॥ तावद्युगसहस्राणिस्वर्गलोकेमहीयते ७१ सुवर्णनासांयःकृत्वासखुरांकृष्णधेनुकाम् ॥ तिलैःप्रच्छादितां
दद्यात्सर्वरत्नैरलंकृताम् ७२ प्रतिग्रहंगृहीत्वायःपुनर्ददतिसाधवे ॥ फलानांफलमश्नातितदादत्त्वाचभारत ७३ ससमुद्रगुहातेनसशैलवनकानना ॥ चतुरं
ताभवेद्दत्तापृथिवीनात्रसंशयः ७४ अंतर्जानुशयोयस्तुभुंजतेसक्तभाजनः ॥ योद्विजःशब्दरहितंसक्षमस्तारणायवै ७५ अपानपानगदितास्तथाऽन्येये
द्विजातयः ॥ जपंतिसंहितांसम्यक्तेनित्यंतारणक्षमाः ७६ .. नपाः अमद्यपाः नगदिताः न केनचिद्दोषवत्तया कीर्तिताः ७६

७७ । ७८ । ७९ नभवंतीहमानवाःस्वर्गंप्राप्योपर्युपरिगच्छंतोमुक्तिमेवप्राप्नुवंतीत्यर्थः ८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ । ८७ । ८८ । ८९ । ९० । ९१ । ९२ । ९३ पवित्राणां
त्रिसुपर्णादिमंत्राणाम् ९४ । ९५ अभिषेचनंतीर्थेषुयज्ञांतेऽवभृथेवास्नानम् ९६ भावश्चित्तम् ९७ नदुष्करमिति इंद्रियगामिनांविषयाणांविशुद्धिंविनाअशनंभोगः सुकरंभोगोविषयशुद्धिंनापेक्षते

हव्यंकव्यंचयत्किंचित्सर्वंतच्छ्रोत्रियोऽर्हति ॥ दत्तंहिश्रोत्रियेसाधौज्वलितेऽग्नौयथाहुतम् ७७ मन्युप्रहरणाविप्रानविप्राःशस्त्रयोधिनः ॥ निहन्युर्मन्युनाविप्रा
वज्रपाणिरिवासुरान् ७८ धर्माश्रितेयंतुकथाकथितेयंतवानघ ॥ यांश्रुत्वामुनयःप्रीतानैमिषारण्यवासिनः ७९ वीतशोकभयक्रोधाविपाप्मानस्तथैवच ॥ श्रुत्वे
मांतुकथांराजन्नभवंतीहमानवाः ८० ॥ युधिष्ठिरउवाच ॥ किंतच्छौचंभवेद्येनविप्रःशुद्धःसदाभवेत् ॥ तदिच्छामिमहाप्राज्ञश्रोतुंधर्मभृतांवर ८१ मार्कंडेय
उवाच ॥ वाक्शौचंकर्मशौचंचयच्चशौचंजलात्मकम् ॥ त्रिभिःशौचैरुपेतोयःसस्वर्गीनात्रसंशयः ८२ सायंप्रातश्चसंध्यांयोब्राह्मणोऽभ्युपसेवते ॥ प्रजपन्पावनीं
देवींगायत्रींवेदमातरम् ८३ सतयापावितोदेव्याब्राह्मणोनष्टकिल्बिषः ॥ नसीदेत्प्रतिगृह्णानोमहीमपिससागराम् ८४ येचास्यदारुणाःकेचिद्ग्रहाःसूर्यादयो
दिवि ॥ तेचास्यसौम्याजायंतेशिवाःशिवतराःसदा ८५ सर्वेनानुगतंचैनंदारुणाःपिशिताशनाः ॥ घोररूपामहाकायाधर्षयंतिद्विजोत्तमम् ८६ नाध्यापना
द्याजनाद्वाअन्यस्माद्वाप्रतिग्रहात् ॥ दोषोभवतिविप्राणांज्वलिताग्निसमाद्विजाः ८७ दुर्वेदावासुवेदावाप्राकृताःसंस्कृतास्तथा ॥ ब्राह्मणानावमंतव्याभस्म
च्छन्नाइवाग्नयः ८८ यथाश्मशानेदीप्तौजाःपावकोनैवदुष्यति ॥ एवंविद्वानविद्वान्वाब्राह्मणोदैवतंमहत् ८९ प्राकारैश्चपुरद्वारैःप्रासादैश्चपृथग्विधैः ॥ नगराणि
नशोभंतेहीनानिब्राह्मणोत्तमैः ९० वेदाढ्यावृत्तसंपन्नाज्ञानवंतस्तपस्विनः ॥ यत्रतिष्ठंतिवैविप्रास्तन्नामनगरंनृप ९१ व्रजेवाऽप्यथवाऽऽरण्येयत्रसंतिबहुश्रु
ताः ॥ तत्तन्नगरमित्याहुःपार्थतीर्थंचतद्भवेत् ९२ रक्षितारंचराजानंब्राह्मणंचतपस्विनम् ॥ अभिगम्याभिपूज्याथसद्यःपापात्प्रमुच्यते ९३ पुण्यतीर्थाभिषे
कंचपवित्राणांचकीर्तनम् ॥ सद्भिःसंभाषणंचैवप्रशस्तंकीर्त्यतेबुधैः ९४ साधुसंगमपूतेनवाक्सुभाषितवारिणा ॥ पवित्रीकृतमात्मानंसंतोमन्यंतिनित्यशः ९५
त्रिदंडधारणंमौनंजटाभारोऽथमुंडनम् ॥ वल्कलाजिनसंवेष्टंव्रतचर्याऽभिषेचनम् ९६ अग्निहोत्रंवनेवासःशरीरपरिशोषणम् ॥ सर्वाण्येतानिमिथ्यास्युर्यदिभावो
ननिर्मलः ९७ नदुष्करमनाशित्वंसुकरंह्यशनंविना ॥ विशुद्धिंचक्षुरादीनांषण्णामिंद्रियगामिनाम् ॥ विकारितेषांराजेंद्रसुदुष्करतरंमनः ९८ येपापानिन
कुर्वंतिमनोवाक्कर्मबुद्धिभिः ॥ तेतपंतिमहात्मानोनशरीरस्यशोषणम् ९९ नज्ञातिभ्योदयायस्यशुक्लदेहोविकल्मषः ॥ हिंसासातपसस्तस्यनानाशित्वंतपः
स्मृतम् १०० तिष्ठन्गृहेचैवमुनिर्नित्यंशुचिरलंकृतः ॥ यावज्जीवंदयावांश्चसर्वपापैःप्रमुच्यते १०१

पण्यांगनासंगादिनाऽपि वास्तिद्धेः । किंतुअनाशित्वंअमृतत्वंभोगवर्जनंवातविनानसुकरंयतोदुष्करंस्वभावतोदुःसंपादमितियोजना । दुष्करत्वेहेतुमाहार्धेनविकारीति सुदुष्करतरंदुर्जयं ९८
९९ ज्ञातिभ्यःपुत्राद्यर्थं शुक्लदेहःशुक्लवृत्त्युपजीवी अविकल्मषःशुक्लवृत्त्यायःकुटुंबंपीडयतिस निष्कल्मषोनभवतीत्यर्थः तस्योपपादनमुत्तरार्धेनहिंसेति अनाशित्वंअशनत्यागः १०० । १०१

मांसशोणितलेपनश्चदेहः २ अज्ञातंशास्त्रार्त्किंतुस्वयमेवकल्पितंतप्तशिलारोहणादितेनक्लेशएव नतुअन्यत्पापंप्रहीयते भावशून्यस्येति तदपिभावश्चेत् शुद्धिहेतुरितिभावः ३ पुण्यादेवदयारू पात् वाङ्मनःकायशुद्धिरूपाद्वैराग्यशुद्धिमोक्षाःस्युर्नतुफलाद्यशनादिनेत्यर्थः ४ स्थानकुटिकासनात्स्थात्ररगृहत्यागात् ५ । ६ विविदिषितमाहज्ञानेनेति ७ क्लेशैः अविद्यादिभिः ८ आ त्मनेतिशरीराणीतिशेषः आत्मनाविप्रहीणानिनिरात्मकानिरज्जुरगादिवत् यतःकाष्ठादिसमानिजडानिदृश्यानीत्यर्थः एतेनयद्दृश्यंतन्मिथ्येतिनियमोदर्शितः मुडदृष्टचाऽपि नियमांतरमाह विनश्यंतीति यद्दृश्यंतद्विनाशिअतोवियदादिकमहंकारश्चसाक्षिमास्यत्वात् घटवद्विनाश्येवेत्यर्थः ९ नास्मिदेहादिदृश्यरूपइतिवा नाहमहंकाराख्यद्रष्टृरूपोवा नममसंबंधिदेहाहंकारा दिकमितिवाऽऽत्मानंविंदते १० ब्रह्मरादतत्त्वमितिवाक्यात्अभिसंधाय शाखाशयंप्रत्यगात्मनःकेवलीभावंज्ञात्वा श्लोकपदैः 'सत्यंज्ञानमनंतम्'इत्यादिभिर्मंत्रपदैः अंकितानिचिह्निता

नहिपापानिकर्माणिशुद्ध्यंत्यनशनादिभिः ॥ सीदत्यनशनादेवमांसशोणितलेपनः २ अज्ञातंकर्मकृत्वाचक्लेशोनान्यत्प्रहीयते ॥ नाग्निर्दहतिकर्माणिभावशून्य स्यदेहिनः ३ पुण्यादेवप्रव्रजंतिशुध्यंत्यनशनानिच ॥ नमूलफलभक्षित्वान्नमौनान्नानिलाशनात् ४ शिरसोमुंडनाद्वाऽपिनस्थानकुटिकासनात् ॥ नजटाधार णाद्वाऽपितुस्थंडिलशय्यया ५ नित्यंह्यनशनाद्वाऽपिनाग्निशुश्रूषणादपि ॥ नचोदकप्रवेशेननचक्ष्माशयनादपि ६ ज्ञानेनकर्मणावाऽपिजरामरणमेव च ॥ व्याधयश्चप्रहीयंतेप्राप्यतेचोत्तमंपदम् ७ बीजानिह्यग्निदग्धानिनरोहंतिपुनर्यथा ॥ ज्ञानदग्धैस्तथाक्लेशैर्नात्मासंयुज्यतेपुनः ८ आत्मनाविप्रहीणानि काष्ठकुड्योपमानिच ॥ विनश्यंतिनसंदेहःफेनानीवमहार्णवे ९ आत्मानंविंदतेयेनसर्वभूतगुहाशयम् ॥ श्लोकेनयदिवाऽर्धेनक्षीणंतस्यप्रयोजनम् १० ब्यक्ष रादभिसंधायकेचिच्छ्लोकपदांकितैः ॥ शतैरन्यैःसहस्रैश्चप्रत्ययोमोक्षलक्षणम् ११ नायंलोकोऽस्तिनपरोनसुखंसंशयात्मनः ॥ ऋतुर्ज्ञानविदोवृद्धाःप्रत्ययोमो क्षलक्षणम् १२ विदितार्थस्तुवेदानांपरिवेदप्रयोजनम् ॥ उद्विजेत्सतुवेदेभ्योदावाग्नेरिवमानवः १३ शुष्कंतर्कंपरित्यज्यआश्रयस्वश्रुतिंस्मृतिम् ॥ एकाक्ष राभिसंबद्धंतत्त्वंहेतुभिरिच्छसि ॥ बुद्धिर्नतस्यासिद्धयेतसाधनस्यविपर्ययात् १४

निब्राह्मणानि'ब्रह्मविदाप्नोतिपरं'इत्यादीनि तैःउपनिषद्वाक्यशतैःसहस्रैर्वेत्यर्थः प्रत्ययोऽहंब्रह्मास्मीत्यनुभवःस्वसाक्षिकः अद्वेष्टृत्वादिश्चलोकसाक्षिकः मोक्षस्यलक्षणंज्ञापकं ११ । १२ परिवे दसाकल्येनवेद विदितार्थोज्ञातात्मतत्त्वः वेदेभ्यःवेदोक्तकर्मभ्यः १३ शुष्कतर्कप्रपंचःसत्योऽबाध्यत्वात्आत्मवत् । व्यतिरेकेणशुक्तिरजतवद्वेत्यादिरूपम् । 'श्रुतिंनेहनानास्तिकिंचन'इति । स्मृतिं'अज्ञानप्रभवालोकावेदाश्चाज्ञानसंभवाः ॥ विदितात्मसतत्त्वस्यनेहनानाऽस्तिकिंचन'इत्यादिकांजगद्बाधप्रदर्शिनीं आश्रयस्व 'नैषातर्केणमतिरापनेया । नावेदविन्मनुतेतंबृहंतम्' इतिश्रु तिभ्यांएकंचतत्अक्षरंव्यापकंत्रिविधभेदशून्यंवस्तु तत्संबद्धंश्रुतिस्मृतितत्त्वं हेतुभिःश्रौतयुक्तिभिः । 'अन्नेनसोम्यशुंगेनापोमूलमन्विच्छअद्भिःसोम्यशुंगेनतेजोमूलमन्विच्छतेजसासो म्यशुंगेनसन्मूलमन्विच्छसन्मूलाःसोम्येमाःप्रजाः'इत्यादिभिः कार्यलिंगकेनानुमानेनपरमकारणंदर्शयंतीभिः शुंगेनकार्येणमूलंकारणमिच्छसियदीतिशेषः बुद्धिस्तत्त्वज्ञानं साधनस्यशमादेः ॥१७०॥ शास्त्रादेःविपर्ययात्अभावात्अवैदिकत्वाद्वा १४

वेदेति तत् अक्षरंतत्त्वंवेदःप्रणवः वाच्यवाचकयोरभेदात् शरीरंप्रतिमाप्रणवद्वारैव तदधिगमस्यसर्वत्रदर्शनात् तथाचश्रुतिः । 'एतद्वैसत्यकामपरंचापरंब्रह्मयदोंकारस्तस्माद्विद्वानेतेनैवायत नेनैकतरमन्वेति'इत्यादिका वेदस्तत्त्वंतत्त्वाधिगमहेतुः तत्समासोपलब्धौ तस्यवेदस्यसमासः संक्षेपःप्रलयोयत्र सतत्समासआत्मा । 'यत्रवेदाअवेदाः' इतिश्रुतेः तस्योपलब्धौआत्मा क्लीबःस्वप्रकाशआत्मा नघटवत्स्वात्मानं प्रकाशयति स्वात्मनिवृत्तिविरोधात् कथंतर्हितज्ज्ञानस्यसाध्यत्वमुच्यत इत्याशंक्याह तत्संवेद्यस्यवेद्यमिति तत्तस्मात्सःआत्मावेद्यस्य बु द्धिसत्त्वस्यवेद्यंज्ञेयं । 'दृश्यतेत्वग्र्ययाबुद्ध्यामनसैवानुद्रष्टव्यः'इत्यादिश्रुतिभ्यः । कथंतर्हियन्मनसानमनुतइत्यादिश्रवणं उच्यते । 'चक्षुःसन्निहितं कुंभंयथासूर्योऽवभासयेत् ॥ चित्तवृत्त्या तथाव्याप्तंचिदात्मैवप्रकाशयेत् ॥ स्वप्रकाशंचिदात्मानंवृत्तिरात्मांतरंविना ॥ भासयेद्भास्करमिव चक्षुःसूर्यांतरंविना ॥ वृत्तिव्याप्तिमपेक्ष्यैव वेद्यत्वंप्राहुरात्मनः । चिदंतरानपे क्षत्वादवेद्यत्वंतथागमाः' आगमाः । 'यन्मनसानमनुते । मनसैवानुद्रष्टव्यम्' इत्याद्याः । 'विज्ञातारमरेकेन विजानीयादितिश्रुतिः । निराकरोतिवेद्यत्वमनवस्थाभयादिति' १५।१६ प्रसादे

वेदपूर्वंवेदितव्यंप्रयत्नात्तद्वैवेदस्तस्यवेदःशरीरम् ॥ वेदस्तत्त्वंतत्समासोपलब्धौक्लीबस्त्वात्मातत्संवेद्यस्यवेद्यम् १५ वेदोक्तमायुर्देवानामाशिषश्चैवकर्मणाम् ॥ फलत्यनुयुगंलोकेप्रभावश्चशरीरिणाम् १६ इंद्रियाणांप्रसादेनतदेतत्परिवर्जयेत् ॥ तस्मादनशनंदिव्यंनिरुद्धेंद्रियगोचरम् १७ तपसास्वर्गगमनंभोगोदानेन जायते ॥ ज्ञानेनमोक्षोविज्ञेयस्तीर्थस्नानादघक्षयः १८ ॥ वैशंपायनउवाच ॥ एवमुक्तस्तुराजेंद्रप्रत्युवाचमहायशाः ॥ भगवन्श्रोतुमिच्छामिप्रधानविधिमु त्तमम् १९ ॥ मार्कंडेयउवाच ॥ यत्त्वमिच्छसिराजेंद्रदानधर्मंयुधिष्ठिर ॥ इष्टंचेदंसदामह्यंराजन्गौरवतस्तथा २० शृणुदानरहस्यानिश्रुतिस्मृत्युदितानिच ॥ छायायांकरिणःश्राद्धंतत्कर्णपरिवीजिते ॥ दशकल्पायुतानीहनक्षीयेतयुधिष्ठिर २१ जीवनायसमाक्लिन्नंवसुदत्त्वामहीयते ॥ वैश्यंतुवासयेद्यस्तुसर्वयज्ञैःसइष्ट वान् २२ प्रतिस्रोतश्चित्रवाहाःपर्जन्योन्नानुसंचरन् ॥ महाधुरिथानावामहापापैःप्रमुच्यते २३ विप्लवेविप्रदत्तानिदधिमस्त्वक्षयाणिच ॥ पर्वसुद्विगुणंदान मृतौदशगुणंभवेत् २४ अयनेविषुवेचैवषडशीतिमुखेषुच ॥ चंद्रसूर्योपरागेचदत्तमक्षयमुच्यते २५ ऋतुषुदशगुणंवदंतिदत्तंशतगुणमृत्वयनादिषुध्रुवम् ॥ भवतिसहस्रगुणंदिनस्यराहोर्विषुवतिचाक्षयमश्नुतेफलम् १२६

ननैर्मल्येनअनशनंनामचित्तेंद्रियनिरोधो नत्वाहारत्यागइत्याहतस्मादिति १७ उक्तमर्थंपिंडीकृत्याह तपसेति तपसास्वधर्माचरणेन १८ । १९ । २० छायायांकरिणः गुर्वमायोगेऽश्वत्थच्छा यागजच्छायाख्यंपर्व देशकालयोगजं कर्णाइवकर्णाअश्वत्थपल्लवास्तैर्वीजितेदेशे जलोपांते २१ समाक्लिन्नंआर्द्रं वसुअन्नादिद्रव्यं वैश्यंविशंत्यस्मिन्निर्विशोधर्मगृहं तदधिकारिणंवैश्यं 'वृद्धचौषधाख्यान्नधने त्रिपुरत्नेवसुस्मृतम्'इति । 'विशोवैश्यागृहेमोक्तोनेपथ्येगृहमात्रके'इतिचविश्वः २२ प्रतिस्रोतश्चित्रवाहा इतिसार्धःश्लोकः प्रतिप्रतीपं पूर्ववाहिन्याःनद्याः पश्चिमाभिमुखं स्रोतः प्रवाहोयत्र तत्तीर्थंप्रतिस्रोतः तत्रपात्रेऽर्पिताश्चित्रवाहा उत्तमाश्वाः विपरिणम्य अक्षयाइत्यपकृष्यते अक्षयफलाइत्यर्थः पर्जन्योऽन्नानुसंचरन् अन्नार्थंअनुसंचरन्पर्जन्यइंद्रोऽप्यक्षयः अतिथिरूपेणतृप्तइंद्रोऽप्यक्षयस्वर्गप्रदइत्यर्थः । 'पर्जन्योमघवावृषा'इतिहलायुधः महाधुरिमहतिधुःसदृशेप्रवाहे विप्लवेराहूपरागे विप्रदत्तानिविप्रेभ्योदत्तानि दधिमस्तुदध्नोमंडं । 'मंडं दधिभवं मस्तु' इत्यमरः चकारात्पूर्वोक्तानि नापुरुषो वायथा महाधुरि योगभारे यथासर्वपापैः प्रमुच्यते तथैव गजच्छायाश्राद्धादिकर्तारोऽपिमुच्यंतइत्यर्थः २३ पर्वसुदर्शादिषु २४ वि षुवेतुलामेषसंक्रांत्योः षडशीतिमुखे मिथुनकन्यामीनसंक्रांतिषु २५ । १२६

कामान्नकाम्यमानान्विषयान् २७।२८। १२९ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे द्विशततमोऽध्यायः ॥ २०० ॥ ७ ॥ श्रुत्वेति ऋषीणांराज्ञांचलोककंटकोद्धरणं परमेश्वरमी

॥१७१॥ नाभूमिदोभूमिमश्नातिराजन्नायानदोयानमारुह्ययाति ॥ यान्यान्कामान्ब्राह्मणेभ्योददातितांस्तान्कामान्जायमानःसभुंक्ते २७ अग्नेरपत्यंप्रथमंसुवर्णंभूर्वैष्ण
वीसूर्यसुताश्चगावः ॥ लोकास्त्रयस्तेनभवंतिदत्तायःकांचनंगाश्चमहींचदद्यात् २८ परंहिदानान्नबभूवशाश्वतंभव्यंत्रिलोकेभवतेकुतःपुनः ॥ तस्मात्प्रधानं
परमंहिदानंवदंतिलोकेषुविशिष्टबुद्धयः १२९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिदानमाहात्म्येद्विशततमोऽध्यायः ॥ २०० ॥ ७ ॥
॥ वैशंपायनउवाच ॥ श्रुत्वातुराजाराजर्षेरिंद्रद्युम्नस्यतत्तथा ॥ मार्कंडेयान्महाभागात्स्वर्गस्यप्रतिपादनम् १ युधिष्ठिरोमहाराजपप्रच्छभरतर्षभ ॥ मार्कंडे ॥११६॥
यंतपोवृद्धंदीर्घायुषमकल्मषम् २ विदितास्तवधर्मज्ञदेवदानवराक्षसाः ॥ राजवंशाश्चविविधाऋषिवंशाश्चशाश्वताः ३ नतेस्त्यविदितंकिंचिदस्मिँल्लोकेद्विजो
त्तम ॥ कथांवेत्सिमुनेदिव्यांमनुष्योरगरक्षसाम् ४ देवगंधर्वयक्षाणांकिन्नराप्सरसांतथा ॥ इदमिच्छाम्यहंश्रोतुंतत्त्वेनद्विजसत्तम ५ कुवलाश्वइतिख्यातइक्ष्वा
कुरपराजितः ॥ कथंनामविपर्यासाद्धुंधुमारत्वमागतः ६ एतदिच्छामितत्त्वेनज्ञातुंभार्गवसत्तम ॥ विपर्यस्तंयथानामकुवलाश्वस्यधीमतः ७ ॥ वैशंपायनउ
वाच ॥ युधिष्ठिरेणैवमुक्तोमार्कंडेयोमहामुनिः ॥ धौंधुमारमुपाख्यानंकथयामासभारत ८ ॥ मार्कंडेयउवाच ॥ हंततेकथयिष्यामिशृणुराजन्युधिष्ठिर ॥
धर्मिष्ठमिदमाख्यानंधुंधुमारस्यतच्छृणु ९ यथासराजाइक्ष्वाकुःकुवलाश्वोमहीपतिः ॥ धुंधुमारत्वमगमत्तच्छृणुष्वमहीपते १० महर्षिर्विश्रुतस्तातउत्तंक
इतिभारत ॥ मरुधन्वसुरम्येषुआश्रमस्तस्यकौरव ११ उत्तंकस्तुमहाराजतपोऽतप्यत्सुदुश्चरम् ॥ आरिराधयिषुर्विष्णुंबहून्वर्षगणान्विभुः १२ तस्यप्रीतः
सभगवान्साक्षाद्दर्शनमेयिवान् ॥ दृष्ट्वैवचार्षिःप्रह्वस्तंतुष्टावविविधैःस्तवैः १३ ॥ उत्तंकउवाच ॥ ॥ त्वयादेवप्रजाःसर्वाःससुरासुरमानवाः ॥ स्थावराणिचभू
तानिजंगमानितथैवच १४ ब्रह्मवेदाश्चवेद्यंचत्वयासृष्टंमहाद्युते ॥ शिरस्तेगगनंदेवनेत्रेशशिदिवाकरौ १५ निःश्वासःपवनश्चापितेजोग्निश्चतवाच्युत ॥ बाहव
स्तेदिशःसर्वाःकुक्षिश्चापिमहार्णवः १६ ऊरूतेपर्वताद्देवखंजंघेमधुसूदन ॥ पादौतेपृथिवीदेवीरोमाण्योषधयस्तथा १७ इंद्रसोमाग्निवरुणादेवासुरमहोरगाः ॥
प्रह्वास्त्वामुपतिष्ठंतिस्तुवंतोविविधैःस्तवैः १८ त्वयाव्याप्तानिसर्वाणिभूतानिभुवनेश्वर ॥ योगिनःसुमहावीर्याःस्तुवंतित्वांमहर्षयः १९ त्वयितुष्टेजगत्स्वा
स्थ्यंत्वयिक्रुद्धेमहद्भयम् ॥ भयानामपनेताऽसित्वमेकःपुरुषोत्तम २० देवानांमानुषाणांचसर्वभूतसुखावहः ॥ त्रिभिर्विक्रमणैर्देवत्रयोलोकास्त्वयाहृताः २१
असुराणांसमृद्धानांविनाशश्चत्वयाकृतः ॥ तवविक्रमणैर्देवानिर्वाणमगमन्परम् २२ ॥१७१॥
तिकरमिति धुंधुमारोपाख्यानतात्पर्यं पदार्थःस्पष्टः १। २। ३। ४। ५। ६। ७। ८। ९। १०। ११। १२। १३। १४। १५। १६। १७। १८। १९। २०। २१। २२

२३। २४। २५। २६। २७। २८। २९। ३०। ३१। ३२। ३३। ३४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे एकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ ७ ॥
पराभूताश्चदैत्येंद्रास्त्वयिक्रुद्धेमहाद्युते ॥ त्वंहिकर्ताविकर्ताचभूतानामिहसर्वशः २३ आराधयित्वात्वांदेवाःसुखमेधंतिसर्वशः ॥ एवंस्तुतोहृषीकेशउत्तंकेनम
हात्मना २४ उत्तंकमब्रवीद्विष्णुःप्रीतस्तेऽहंवरंवृणु ॥ उत्तंकउवाच ॥ पर्याप्तोमेवरोह्येषयदहंदृष्टवान्हरिम् २५ पुरुषंशाश्वतंदिव्यंस्रष्टारंजगतःप्रभुम् ॥ वि
ष्णुरुवाच ॥ प्रीतस्तेऽहमलौल्येनभक्त्यातवचसत्तम २६ अवश्यंहित्वयाब्रह्मन्मत्तोग्राह्योवरोद्विज ॥ एवंसच्छंद्यमानस्तुवरेणहरिणातदा २७ उत्तंकःप्रांज
लिर्वव्रेवरंभरतसत्तम ॥ यदिमेभगवन्प्रीतःपुंडरीकनिभेक्षण २८ धर्मेसत्येदमेचैवबुद्धिर्भवतुमेसदा ॥ अभ्यासश्चभवेद्भक्त्यात्वयिनित्यंममेश्वर २९ ॥ भगवा
नुवाच ॥ सर्वमेतद्धिभवितामत्प्रसादात्तवद्विज ॥ प्रतिभास्यतियोगश्चयेनयुक्तोदिवौकसाम् ३० त्रयाणामपिलोकानांमहत्कार्यंकरिष्यसि ॥ उत्सादनार्थंलो
कानांधुंधुर्नाममहासुरः ३१ तपस्यतितपोघोरंशृणुयस्तंहनिष्यति ॥ राजाहिवीर्यवांस्तातइक्ष्वाकुरपराजितः ३२ बृहदश्वइतिख्यातोभविष्यतिमहीपतिः ॥
तस्यपुत्रःशुचिर्दांतःकुवलाश्वइतिश्रुतः ३३ सयोगबलमास्थायमामकंपार्थिवोत्तमः ॥ शासनात्तवविप्रर्षेधुंधुमारोभविष्यति ॥ एवमुक्त्वातुतंविप्रंविष्णुरंतरधी
यत ३४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिधुंधुमारोपाख्यानेएकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ ७ ॥ ॥ ७ ॥
॥ मार्कंडेयउवाच ॥ इक्ष्वाकौसंस्थितेराजन्शशादःपृथिवीमिमाम् ॥ प्राप्तःपरमधर्मात्मासोऽयोध्यायांनृपोऽभवत् १ शशादस्यतुदायादःककुत्स्थोनामवीर्य
वान् ॥ अनेनाश्चापिकाकुत्स्थःपृथुश्चानेनसःसुतः २ विष्वगश्वःपृथोःपुत्रस्तस्मादद्रिश्चजज्ञिवान् ॥ अद्रेश्चयुवनाश्वस्तुश्रावस्तस्यात्मजोऽभवत् ३ तस्य
श्रावस्तकोज्ञेयःश्रावस्तीयेननिर्मिता ॥ श्रावस्तकस्यदायादोबृहदश्वोमहाबलः ४ बृहदश्वस्यदायादःकुवलाश्वइतिस्मृतः ॥ कुवलाश्वस्यपुत्राणांसहस्राण्ये
कविंशतिः ५ सर्वेविद्यासुनिष्णाताबलवंतोदुरासदाः ॥ कुवलाश्वश्चपितृतोगुणैरभ्यधिकोऽभवत् ६ समयेतंपिताराज्येबृहदश्वोऽभ्यषेचयत् ॥ कुवलाश्वं
महाराजशूरमुत्तमधार्मिकम् ७ पुत्रसंक्रामितश्रीस्तुबृहदश्वोमहीपतिः ॥ जगामतपसेधीमांस्तपोवनममित्रहा ८ अथशुश्रावराजर्षितमुत्तंकोनराधिप ॥
वनंसंप्रस्थितंराजन्बृहदश्वंद्विजोत्तमः ९ तमुत्तंकोमहातेजाःसर्वास्त्रविदुषांवरम् ॥ न्यवारयदमेयात्मासमासाद्यनरोत्तमम् १० ॥ उत्तंकउवाच ॥ भव
तारक्षणंकार्यंतत्तावत्कर्तुमर्हसि ॥ निरुद्विग्नावयंराजंस्त्वत्प्रसादाद्भवेमहि ११ त्वयाहिपृथिवीराजन्रक्ष्यमाणामहात्मना ॥ भविष्यतिनिरुद्विग्नानारण्यंगं
तुमर्हसि १२ पालनेहिमहान्धर्मःप्रजानामिहदृश्यते ॥ नतथादृश्यतेऽरण्येमाभूत्तेबुद्धिरीदृशी १३
इक्ष्वाकाविति १। २। ३। ४। ५। ६। ७। ८। ९। १०। ११। १२। १३

१४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ ॥ इत्यारण्यकेपर्वणि नीलकंठीये

ईदृशोनहिराजेंद्रधर्मः क्वचनदृश्यते ॥ प्रजानांपालनेयोवैपुराराजर्षिभिःकृतः १४ रक्षितव्याःप्रजाराज्ञातास्त्वंरक्षितुमर्हसि ॥ निरुद्विग्नस्तपश्चर्तुंनहिशक्नो
मिपार्थिव १५ ममाश्रमसमीपेवैसमेषुमरुधन्वसु ॥ समुद्रोवालुकापूर्णउज्जालकइतिस्मृतः १६ बहुयोजनविस्तीर्णोबहुयोजनमायतः ॥ तत्ररौद्रोदानवेंद्रोम
हावीर्यपराक्रमः १७ मधुकैटभयोःपुत्रोधुंधुर्नामसुदारुणः ॥ अंतर्भूमिगतोराजन्वसत्यमितविक्रमः १८ तंनिहत्यमहाराजवनंत्वंगंतुमर्हसि ॥ शेतेलोकविना
शायतपआस्थायदारुणम् १९ त्रिदशानांविनाशायलोकानांचापिपार्थिव ॥ अवध्योदैवतानांहिदैत्यानामथरक्षसाम् २० नागानामथयक्षाणांगंधर्वाणांचसर्व
शः ॥ अवाप्यसवरंराजन्सर्वलोकपितामहात् २१ तंविनाशयभद्रंतेमातेबुद्धिरतोऽन्यथा ॥ प्राप्स्यसेमहतींकीर्तिंशाश्वतीमव्ययांध्रुवाम् २२ क्रूरस्यतस्य
स्वपतोवालुकांतर्हितस्यच ॥ संवत्सरस्यपर्यंतेनिश्वासःसंप्रवर्तते २३ यदातदाभूश्चलतिसशैलवनकानना ॥ तस्यनिःश्वासवातेनरजउद्धूयतेमहत् २४ आ
दित्यपथमाश्रित्यसप्ताहंभूमिकंपनम् ॥ सविस्फुलिंगंसज्वालंधूममिश्रंसुदारुणम् २५ तेनराजन्नशक्नोमितास्मिन्स्थातुंस्वआश्रमे ॥ तंविनाशयराजेंद्रलोका
नांहितकाम्यया २६ लोकाःस्वस्थाभविष्यंतितस्मिन्विनिहतेऽसुरे ॥ त्वंहितस्यविनाशायपर्याप्तइतिमेमतिः २७ तेजसातवतेजश्चविष्णुराप्याययिष्यति ॥
विष्णुनाचवरोदत्तःपूर्वंममहीपते २८ यस्तंमहासुरंरौद्रंवधिष्यतिमहीपतिः ॥ तेजस्तंवैष्णवमितिप्रवेक्ष्यतिदुरासदम् २९ तत्तेजस्त्वंसमाधायराजेंद्रभुविदुः
सहम् ॥ तंनिषूदयराजेंद्रदैत्यंरौद्रपराक्रमम् ३० नहिधुंधुर्महातेजास्तेजसाऽल्पेनशक्यते ॥ निर्दग्धुंपृथिवीपालसहिवर्षशतैरपि ३१ ॥ इतिश्रीमहाभार
तेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिधुंधुमारोपाख्यानेद्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ मार्कंडेयउवाच ॥ सएवमुक्तोराजर्षिरुत्तंकेनापरा
जितः ॥ उत्तंकंकौरवश्रेष्ठकृतांजलिरथाब्रवीत् १ नतेऽभिगमनंब्रह्मन्मोघमेतद्भविष्यति ॥ पुत्रोममाथभगवन्कुवलाश्वइतिस्मृतः २ धृतिमान्क्षिप्रकारी
चवीर्येणाप्रतिमोभुवि ॥ प्रियंचतेसर्वमेतत्करिष्यतिनसंशयः ३ पुत्रैःपरिवृतःसर्वैःशूरैःपरिघबाहुभिः ॥ विसर्जयस्वमांब्रह्मन्न्यस्तशस्त्रोऽस्मिसांप्रतम् ४ तथाऽ
स्त्वितिचतेनोक्तोमुनिनाऽमिततेजसा ॥ सतमादिश्यतनयमुत्तंकायमहात्मने ५ क्रियतामितिराजर्षिर्जगामवनमुत्तमम् ॥ युधिष्ठिरउवाच ॥ कएषभगवन्दै
त्योमहावीर्यस्तपोधन ६ कस्यपुत्रोऽथनप्तावाएतदिच्छामिवेदितुम् ॥ एवंमहाबलोदैत्योनश्रुतोमेतपोधन ७ एतदिच्छामिभगवन्याथातथ्येनवेदितुम् ॥
सर्वमेवमहाप्राज्ञविस्तरेणतपोधन ८ ॥ मार्कंडेयउवाच ॥ शृणुराजन्निदंसर्वंयथावृत्तंनराधिप ॥ कथ्यमानंमहाप्राज्ञविस्तरेणयथातथम् ९ ॥१७२॥

भारतभावदीपे द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ ७ ॥ ॥ सएवमिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९

१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४

एकार्णवेतदालोकेनष्टेस्थावरजंगमे ॥ प्रनष्टेषुचभूतेषुसर्वेषुभरतर्षभ १० प्रभवंलोककर्तारंविष्णुंशाश्वतमव्ययम् ॥ यमाहुर्मुनयःसिद्धाःसर्वलोकमहेश्वरम् ११
सुष्वापभगवान्विष्णुरप्सुयोगतएवसः ॥ नागस्यभोगेमहतिशेषस्यामिततेजसः १२ लोककर्तामहाभागभगवानच्युतोहरिः ॥ नागभोगेनमहतापरिरभ्यमही
मिमाम् १३ स्वपतस्तस्यदेवस्यपद्मंसूर्यसमप्रभम् ॥ नाभ्यांविनिःसृतंदिव्यंतत्रोत्पन्नःपितामहः १४ साक्षाल्लोकगुरुर्ब्रह्मापद्मेसूर्यसमप्रभः ॥ चतुर्वेदश्चतु
र्मूर्तिस्तथैवचचतुर्मुखः १५ स्वप्रभावादुराधर्षोमहाबलपराक्रमः ॥ कस्यचित्त्वथकालस्यदानवौवीर्यवत्तमौ १६ मधुश्चकैटभश्चैवदृष्टवंतौहरिंप्रभुम् ॥ शयानं
शयनेदिव्येनागभोगेमहाद्युतिम् १७ बहुयोजनविस्तीर्णेबहुयोजनमायते ॥ किरीटकौस्तुभधरंपीतकौशेयवाससम् १८ दीप्यमानंश्रियाराजंस्तेजसावपुषात
था ॥ सहस्रसूर्यप्रतिममद्भुतोपमदर्शनम् १९ विस्मयःसुमहानासीन्मधुकैटभयोस्तथा ॥ दृष्ट्वापितामहंचापिपद्मेपद्मनिभेक्षणम् २० वित्रासयेतामथतौब्र
ह्माणममितौजसम् ॥ वित्रस्यमानोबहुशोब्रह्मातावभ्यांमहायशाः २१ अकंपयत्पद्मनालंततोऽबुध्यतकेशवः ॥ अथापश्यतगोविंदोदानवौवीर्यवत्तरौ २२ दृष्ट्वा
तावब्रवीद्देवःस्वागतंवांमहाबलौ ॥ ददामिवांवरंश्रेष्ठंप्रीतिर्हिममजायते २३ तौप्रहस्यहृषीकेशंमहादर्पौमहाबलौ ॥ प्रत्यब्रूतांमहाराजसहितौमधुसूदनम् २४
आवांवरयदेवत्वंवरदौस्वःसुरोत्तम ॥ दातारौस्वोवरंतुभ्यंतद्ब्रवीह्यविचारयन् २५ ॥ भगवानुवाच ॥ प्रतिगृह्णेवरंवीरावीप्सितश्चवरोमम ॥ युवांहिवीर्यसंपन्नौ
नवामस्तिसमःपुमान् २६ वध्यत्वमुपगच्छेतांममसत्यपराक्रमौ ॥ एतदिच्छाम्यहंकामंप्राप्तुंलोकहितायवै २७ ॥ मधुकैटभावूचतुः ॥ अनृतंनोक्तपूर्वंनौ
स्वैरेष्वपिकुतोऽन्यथा ॥ सत्येधर्मेचनिरतौविद्ध्यावांपुरुषोत्तम २८ बलेरूपेचशौर्येचशमेनचसमोऽस्तिनौ ॥ धर्मेतपसिदानेचशीलसत्वदमेषुच २९ उपप्ल
वोमहानस्मानुपावर्ततकेशव ॥ उक्तंप्रतिकुरुष्वत्वंकालोहिदुरतिक्रमः ३० आवामिच्छावहेदेवकृतमेकंत्वयाविभो ॥ अनावृतेऽस्मिन्नाकाशेवधंसुरवरोत्तम ३१
पुत्रत्वमधिगच्छावतवचापिसुलोचन ॥ वरएषवृतोदेवतद्विद्धिसुरसत्तम ३२ अनृतंमाभवेद्देवयद्धिनौसंश्रुतंतदा ॥ भगवानुवाच ॥ बाढमेवंकरिष्यामिसर्वमेत
द्भविष्यति ३३ सविचिंत्याथगोविंदोनापश्यद्यदनावृतम् ॥ अवकाशंपृथिव्यांवादिविवामधुसूदनः ३४ स्वकावनावृतावूरूदृष्ट्वादेववरस्तदा ॥ मधुकैटभ
योराजन्शिरसीमधुसूदनः ॥ चक्रेणशितधारेणन्यकृंततमहायशाः ३५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिधुंधुमारोपाख्यानेत्र्यधि
कद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ ७ ॥ मार्कंडेयउवाच ॥ धुंधुर्नाममहाराजतयोःपुत्रोमहाद्युतिः ॥ सतपोतप्यतमहन्महावीर्यपराक्रमः १

३५ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ ७ ॥ ॥ धुंधुरिति १

२ । ३ । ४ । ० । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३
आतिष्ठदेकपादेनकृशोधमनिसंततः ॥ तस्मैब्रह्माददौप्रीतोवरंवव्रेसचप्रभुम् २ देवदानवयक्षाणांसर्पगंधर्वरक्षसाम् ॥ अवध्योऽहंभवेयंवैवरएषवृतोमया ३

एवंभवतुगच्छेतितमुवाचपितामहः ॥ सएवमुक्तस्तत्पादौमूर्ध्नास्पृश्यजगामह ४ सतुधुंधुर्वरंलब्ध्वामहावीर्यपराक्रमः ॥ अनुस्मरन्पितृवधंद्रुतंविष्णुमुपाग
मत् ५ सतुदेवान्सगंधर्वान्जित्वाधुंधुरमर्षणः ॥ बबाधसर्वानसकृद्विष्णुंदेवांश्चवैभृशम् ६ समुद्रेवालुकापूर्णेउज्जालइकतिस्मृते ॥ आगम्यचसदुष्टात्मातंदे

शंभरतर्षभ ७ बाधतिस्मपरंशक्त्यातमुत्तंकाश्रमंविभो ॥ अंतर्भूमिगतस्तत्रवालुकांतर्हितस्तथा ८ मधुकैटभयोःपुत्रोधुंधुर्भीमपराक्रमः ॥ शेतेलोकविनाशा
यतपोबलमुपाश्रितः ९ उत्तंकस्याश्रमाभ्याशेनिःश्वसन्पावकार्चिषः ॥ एतस्मिन्नेवकालेतुराजासबलवाहनः १० उत्तंकविप्रसहितःकुवलाश्वोमहीपतिः ॥
पुत्रैःसहमहीपालःप्रययौभरतर्षभ ११ सहस्रैरेकविंशत्यापुत्राणामरिमर्दनः ॥ कुवलाश्वोनरपतिरन्वितोबलशालिनाम् १२ तमाविशत्ततोविष्णुर्भगवांस्तेज
साप्रभुः ॥ उत्तंकस्यनियोगेनलोकानांहितकाम्यया १३ तस्मिन्प्रयातेदुर्धर्षेदिविशब्दोमहानभूत् ॥ एषश्रीमानवध्योऽद्यधुंधुमारोभविष्यति १४ दिव्यैश्च
पुष्पैस्तंदेवाःसमंतात्पर्यवारयन् ॥ देवदुंदुभयश्चापिनेदुःस्वयमनीरिताः १५ शीतश्चवायुःप्रववौप्रयाणेतस्यधीमतः ॥ विपांसुलांमहींकुर्वन्ववर्षचसुरेश्वरः ॥
१६ अंतरिक्षेविमानानिदेवतानांयुधिष्ठिर ॥ तत्रैवसमदृश्यंतधुंधुर्यत्रमहासुरः १७ कुवलाश्वस्यधुंधोश्चयुद्धकौतूहलान्विताः ॥ देवगंधर्वसहिताःसमवैक्षन्महर्ष
यः १८ नारायणेनकौरव्यतेजसाऽऽप्यायितस्तदा ॥ सगतोनृपतिःक्षिप्रंपुत्रैस्तैःसर्वतोदिशम् १९ अर्णवंखानयामासकुवलाश्वोमहीपतिः ॥ कुवलाश्वस्य
पुत्रैश्चतस्मिन्वैवालुकार्णवे २० सप्तभिर्दिवसैःखात्वादृष्टोधुंधुर्महाबलः ॥ आसीद्घोरंवपुस्तस्यवालुकांतर्हितंमहत् २१ दीप्यमानंयथासूर्यस्तेजसाभरतर्षभ ॥
ततोधुंधुर्महाराजदिशमावृत्यपश्चिमाम् २२ सुप्तोभूद्राजशार्दूलकालानलसमद्युतिः ॥ कुवलाश्वस्यपुत्रैस्तुसर्वतःपरिवारितः २३ अभिद्रुतःशरैस्तीक्ष्णैर्गदा
भिर्मुसलैरपि ॥ पट्टिशैःपरिघैःप्रासैःखड्गैश्चविमलैःशितैः २४ सवध्यमानःसंक्रुद्धःसमुत्तस्थौमहाबलः ॥ क्रुद्धश्चाभक्षयत्तेषांशस्त्राणिविविधानिच २५ आस्या
द्वमन्पावकंससंवर्तकसमंतदा ॥ तान्सर्वान्नृपतेःपुत्रानदहत्स्वेनतेजसा २६ मुखजेनाग्निनाक्रुद्धोलोकानुद्वर्तयन्निव ॥ क्षणेनराजशार्दूलपुरेवकपिलः
प्रभुः २७ सगरस्यात्मजान्क्रुद्धस्तदद्भुतमिवाभवत् ॥ तेषुक्रोधाग्निदग्धेषुतदाभरतसत्तम २८ तंप्रबुद्धंमहात्मानंकुंभकर्णमिवापरम् ॥ आससादमहा
तेजाःकुवलाश्वोमहीपतिः २९ तस्यवारिमहाराजसुस्रावबहुदेहतः ॥ तदापीयततस्तेजोराजावारिमयंनृप ३० योगीयोगेनवह्निंचशमयामासवारि ॥१७३॥
णा ॥ ब्रह्मास्त्रेणचराजेंद्रदैत्यंक्रूरपराक्रमम् ३१ ददाहभरतश्रेष्ठसर्वलोकभयायवै ॥ सोऽस्त्रेणदग्ध्वाराजर्षिःकुवलाश्वोमहाऽसुरम् ३२ सुरशत्रुममित्रघ्नं
त्रैलोक्येशइवापरः ॥ धुंधोर्वधात्तदाराजाकुवलाश्वोमहामनाः ३३

३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥ ततइति पतिव्रताख्या
धुंधुमारइतिख्यातोनाम्नाऽप्रतिरथोऽभवत् ॥ प्रीतैश्चत्रिदशैःसर्वैर्महर्षिसहितैस्तदा ३४ वरंवृणीष्वेत्युक्तःसप्रांजलिःप्रणतस्तदा ॥ अतीवमुदितोराजन्निदं
वचनमब्रवीत् ३५ दद्यांवित्तंद्विजाग्र्येभ्यःशत्रूणांचापिदुर्जयः ॥ सख्यंचविष्णुनामेस्याद्भूतेष्वद्रोहएवच ३६ धर्मेरतिश्चसततंस्वर्गेवासस्तथाऽक्षयः ॥ तथा
स्त्वितिततोदेवैःप्रीतैरुक्तःसपार्थिवः ३७ ऋषिभिश्चसगंधर्वैरुत्तंकेनचधीमता ॥ संभाष्यचैनंविविधैराशीर्वादैस्ततोनृप ३८ देवामहर्षयश्चापिस्वानिस्थाना
निभेजिरे ॥ तस्यपुत्रास्त्रयःशिष्टायुधिष्ठिरतदाऽभवन् ३९ दृढाश्वःकपिलाश्वश्चचंद्राश्वश्चैवभारत ॥ तेभ्यःपरंपराराजन्निक्ष्वाकूणांमहात्मनाम् ४० वंशस्य
सुमहाभागराज्ञाममिततेजसां ॥ एवंसनिहतस्तेनकुवलाश्वेनसत्तम ४१ धुंधुर्नाममहादैत्योमधुकैटभयोःसुतः ॥ कुवलाश्वश्चनृपतिर्धुंधुमारइतिस्मृतः ४२
नाम्नाचगुणसंयुक्तस्तदाप्रभृतिसोऽभवत् ॥ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि ४३ धौंधुमारमुपाख्यानंप्रथितंयस्यकर्मणा ॥ इदंतुपुण्यमाख्यानंविष्णोः
समनुकीर्तनम् ४४ शृणुयाद्यःसधर्मात्मापुत्रवांश्चभवेन्नरः ॥ आयुष्मान्भूतिमांश्चैवश्रुत्वाभवतिपर्वसु ॥ नचव्याधिभयंकिंचित्प्राप्नोतिविगतज्वरः ४५
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिधुंधुमारोपाख्यानेचतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥ ७ ॥ वैशंपायनउवाच ॥ ततोयु
धिष्ठिरोराजामार्कंडेयंमहाद्युतिम् ॥ पप्रच्छभरतश्रेष्ठधर्मप्रश्नंसुदुर्विदम् १ श्रोतुमिच्छामिभगवन्स्त्रीणांमाहात्म्यमुत्तमम् ॥ कथ्यमानंत्वयाविप्रसूक्ष्मंधर्म्यंच
तत्त्वतः २ प्रत्यक्षमिहविप्रर्षेदेवादृश्यंतिसत्तम ॥ सूर्याचंद्रमसौवायुःपृथिवीवह्निरेवच ३ पितामाताचभगवान्गुरुरेवचसत्तम ॥ यच्चान्यद्देवविहितंतच्चापि
भृगुनंदन ४ मान्याहिगुरवःसर्वेएकपत्न्यस्तथास्त्रियः ॥ पतिव्रतानांशुश्रूषादुष्कराप्रतिभातिमे ५ पतिव्रतानांमाहात्म्यंवक्तुमर्हसिनःप्रभो ॥ निरुध्यचेंद्रिय
ग्रामंमनःसंरुध्यचानघ ६ पतिंदैवतवच्चापिचिंतयंत्यःस्थिताहियाः ॥ भगवन्दुष्करंत्वेतत्प्रतिभातिममप्रभो ७ मातापित्रोश्चशुश्रूषास्त्रीणांभर्तरिचद्विज ॥
स्त्रीणांधर्मात्सुघोराद्धिनान्यंपश्यामिदुष्करम् ८ साध्वाचाराःस्त्रियोब्रह्मन्यत्कुर्वंतिसदाऽऽदृताः ॥ दुष्करंखलुकुर्वंतिपितरंमातरंचवै ९ एकपत्न्यश्चयानार्यो
याश्चसत्यंवदंत्युत ॥ कुक्षिणादशमासांश्चगर्भंसंधारयंतियाः १० नार्यःकालेनसंभूयकिमद्भुततरंततः ॥ संशयंपरमंप्राप्यवेदनामतुलामपि ११ प्रजायंतेसु
तान्नार्योदुःखेनमहताविभो ॥ पुष्णंतिचापिमहतास्नेहेनाद्विजपुंगव १२ येचक्रूरेषुसर्वेषुवर्तमानाजुगुप्सिताः ॥ स्वकर्मकुर्वंतिसदादुष्करंतच्चमेमतम् १३ क्षत्र
धर्मसमाचारतत्त्वंव्याख्याहिमेद्विज ॥ धर्मःसुदुर्लभोविप्रनृशंसेनमहात्मनाम् १४ एतदिच्छामिभगवन्प्रश्नंप्रश्नविदांवर ॥ श्रोतुंभृगुकुलश्रेष्ठशुश्रूषेतवसुव्रत १५
नमितःस्त्रीमाहात्म्यादीनांद्रष्टानांनिर्णयार्थम् । तत्रापिनाहंबलाकाविमर्षइत्यतःप्राक्तनोग्रंथःस्पष्टार्थः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

१६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेपंचाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ ॥ ७ ॥

॥ मार्कंडेयउवाच ॥ हंततेऽहंसमाख्यास्येप्रश्नमेतंसुदुर्वचम् ॥ तत्त्वेनभरतश्रेष्ठगदतस्तन्निबोधमे १६ मातृस्तुगौरवादन्येपितॄनन्येतुमेनिरे ॥ दुष्करंकु
रुतेमाताविवर्धयतियाप्रजाः १७ तपसादेवतेज्याभिर्वंदनेनतितिक्षया ॥ अभिचारैरुपायैश्चापीहंतेपितरःसुतान् १८ एवंकृच्छ्रेणमहतापुत्रंप्राप्यसुदुर्लभम् ॥
चिंतयंतिसदावीरकीदृशोऽयंभविष्यति १९ आशंसतेहिपुत्रेषुपितामाताचभारत ॥ यशःकीर्तिमथैश्वर्यंप्रजाधर्मंतथैवच २० तयोराशांतुसफलांयःकरोतिस
धर्मवित् ॥ पितामाताचराजेंद्रतुष्यतोयस्यनित्यशः २१ इहप्रेत्यचतस्याथकीर्तिर्धर्मश्चशाश्वतः ॥ नैवयज्ञाक्रियाःकाश्चिन्नश्राद्धंनोपवासकम् २२ यातुभर्त
रिशुश्रूषातयास्वर्गंजयत्युत ॥ एतत्प्रकरणंराजन्नधिकृत्ययुधिष्ठिर २३ पतिव्रतानांनियतंधर्मंचावहितःशृणु २४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमा
र्कंडेयसमास्यापर्वणिपतिव्रतोपाख्यानेपंचाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ ॥ ४ ॥ ॥ मार्कंडेयउवाच ॥ कश्चिद्द्विजातिप्रवरोवेदाध्यायीतपो
धनः ॥ तपस्वीधर्मशीलश्चकौशिकोनामभारत १ सांगोपनिषदोवेदानधीतेद्विजसत्तमः ॥ सवृक्षमूलेकस्मिंश्चिद्वेदानुच्चारयन्स्थितः २ उपरिष्टाच्चवृक्षस्य
बलाकासंन्यलीयत ॥ तयापुरीषमुत्सृष्टंब्राह्मण स्यतदोपरि ३ तामवेक्ष्यततःक्रुद्धःसमपध्यायतद्विजः ॥ भृशंक्रोधाभिभूतेनबलाकासानिरीक्षिता ४ अप
ध्याताचविप्रेणन्यपतद्धरणीतले ॥ बलाकांपतितांदृष्ट्वागतसत्त्वामचेतनाम् ५ कारुण्यादभिसंतप्तःपर्यशोचततांद्विजः ॥ अकार्यंकृतवानस्मिरागद्वेषबला
त्कृतः ६ ॥ मार्कंडेयउवाच ॥ इत्युक्त्वाबहुशोविद्वान्ग्रामंभैक्ष्यायसंश्रितः ॥ ग्रामेशुचीनिप्रचरन्कुलानिभरतर्षभ ७ प्रविष्टस्तत्कुलंयत्रपूर्वंचरितवांस्तुसः ॥
देहीतियाचमानोऽसौतिष्ठेत्युक्तःस्त्रियाततः ८ शौचंतुयावत्कुरुतेभाजनस्यकुटुंबिनी ॥ एतस्मिन्नंतरेराजन्क्षुधासंपीडितोभृशम् ९ भर्ताप्रविष्टःसहसातस्या
भरतसत्तम ॥ सातुदृष्ट्वापतिंसाध्वीब्राह्मणंव्यवहायतम् १० पाद्यमाचमनीयंवैददौभर्तुस्तथाऽऽसनम् ॥ प्रह्वापर्यचरच्चापिभर्तारमसितेक्षणा ११ आहारे
णाथभक्ष्यैश्चभोज्यैःसुमधुरैस्तथा॥उच्छिष्टंभावितामर्तुर्भुंक्तेनित्यंयुधिष्ठिर १२ दैवतंचपतिंमेनेभर्तुश्चित्तानुसारिणी ॥ कर्मणामनसावाचानान्यचिताऽभ्यगात्प
तिम् १३तंसर्वभावोपगतापतिशुश्रूषणेरता॥साध्वाचाराशुचिर्दक्षाकुटुंबस्यहितैषिणी १४भर्तुश्चापिहितंयत्तत्सततंसाऽनुवर्तते ॥ देवतातिथिभृत्यानांश्वश्रूश्वशु
रयोस्तथा१५शुश्रूषणपरानित्यंसततंसंयतेंद्रिया ॥साब्राह्मणंतदादृष्ट्वासंस्थितंभैक्ष्यकांक्षिणम् १६ कुर्वतीपतिशुश्रूषांसस्माराथशुभेक्षणा ॥ व्रीडितासाऽभवत्सा
ध्वीतदाभरतसत्तम॥भिक्षामादायविप्रायनिर्जगामयशस्विनी १७॥ब्राह्मणउवाच॥किमिदंभवतित्वंमांतिष्ठेत्युक्त्वावरांगने ॥उपरोधंकृतवतीनाविसर्जितवत्यसि १८ ॥१७४॥

॥ कश्चिदिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८

१९ । २० । २१ । २२ । २३ । २४ । २५ । २६ दंडकेदंडकारण्ये २७ । २८ । २९ । ३० शुश्रूषायाइति भर्तृशुश्रूषयासार्वज्ञ्यमामिदर्शिता ३१ साधब्राह्मणानांब्रह्मविदामेवास्तीतित
ल्लक्षणान्याहक्रोधइति ३२ अत्रलक्षणकथनंनिष्प्रयोजनमिति यान्येवविद्वल्लक्षणानितानिविद्यासाधनानीतिन्यायेन ब्रह्मण्यकामस्यक्रोधादित्यागो गुर्वाराधनादिच कर्तव्यत्वेनविधी

॥ मार्कंडेयउवाच ॥ ब्राह्मणंक्रोधसंतप्तंज्वलंतमिवतेजसा ॥ दृष्ट्वासाध्वीमनुष्येंद्रसांत्वपूर्वंवचोऽब्रवीत् १९ ॥ स्त्र्युवाच ॥ क्षंतुमर्हसिमेविद्वन्भर्तामेदैवतंम
हत् ॥ सचापिक्षुधितःश्रांतःप्राप्तःशुश्रूषितोमया २० ॥ ब्राह्मणउवाच ॥ ब्राह्मणानगरीयांसोगरीयांस्तेपतिःकृतः ॥ गृहस्थधर्मेवर्तंतीब्राह्मणानवमन्यसे २१
इंद्रोऽप्येषांप्रणमतेकिंपुनर्मानवोभुवि ॥ अवलिप्तेनजानीषेवृद्धानांनश्रुतंत्वया २२ ब्राह्मणाह्यग्निसदृशादहेयुःपृथिवीमपि ॥ स्त्र्युवाच ॥ नाहंबलाकाविप्रर्षे
त्यजक्रोधंतपोधन २३ अनयाक्रुद्धयादृष्ट्याक्रुद्धःकिंमांकरिष्यसि ॥ नावजानाम्यहंविप्रान्देवैस्तुल्यान्मनस्विनः २४ अपराधमिमंविप्रक्षंतुमर्हसिमेऽनघ ॥
जानामितेजोविप्राणांमहाभाग्यंचधीमताम् २५ अपेयःसागरःक्रोधात्कृतोहिलवणोदकः ॥ तथैवदीप्ततपसांमुनीनांभावितात्मनाम् २६ येषांक्रोधाग्निरद्या
पिदंडकेनोपशाम्यति ॥ ब्राह्मणानांपरिभवाद्वातापिःसुदुरात्मवान् २७ अगस्त्यमृषिमासाद्यजीर्णःक्रूरोमहासुरः ॥ बहुप्रभावाःश्रूयंतेब्राह्मणानांमहात्मनाम्
२८ क्रोधःसुविपुलोब्रह्मन्प्रसादश्चमहात्मनाम् ॥ अस्मिंस्त्वतिक्रमेब्रह्मन्क्षंतुमर्हसिमेऽनघ २९ पतिशुश्रूषयाधर्मोयःसमेरोचतेद्विज ॥ दैवतेष्वपिसर्वेषुभर्ता
मेदैवतंपरम् ३० अविशेषेणतस्याहंकुर्यांधर्मंद्विजोत्तम ॥ शुश्रूषायाःफलंपश्यपत्युर्ब्राह्मणयादृशम् ३१ बलाकाहित्वयादग्धारोषात्तद्विदितंमया ॥ क्रोधःशत्रुः
शरीरस्थोमनुष्याणांद्विजोत्तम ३२ यःक्रोधमोहौत्यजतितंदेवाब्राह्मणंविदुः ॥ योवदेदिहसत्यानिगुरुंसंतोषयेतच ३३ हिंसितश्चनहिंसेततंदेवाब्राह्मणंविदुः ॥
जितेंद्रियोधर्मपरःस्वाध्यायनिरतःशुचिः ३४ कामक्रोधौवशौयस्यतंदेवाब्राह्मणंविदुः ॥ यस्यचात्मसमोलोकोधर्मज्ञस्यमनस्विनः ३५ सर्वधर्मेषुचरतस्तं
देवाब्राह्मणंविदुः ॥ योऽध्यापयेदधीयीतयजेद्वायाजयीतवा ३६ दद्याद्वाऽपियथाशक्तितंदेवाब्राह्मणंविदुः ॥ ब्रह्मचारीवदान्योयोऽप्यधीयाद्द्विजपुंगवः ३७
स्वाध्यायवानमत्तोवैतंदेवाब्राह्मणंविदुः ॥ यद्ब्राह्मणानांकुशलंतदेषांपरिकीर्तयेत् ३८ सत्यंतथाव्याहरतांनानृतेरमतेमनः ॥ धर्मंतुब्राह्मणस्याहुःस्वाध्यायं
दममार्जवम् ३९ इंद्रियाणांनिग्रहंचशाश्वतंद्विजसत्तम ॥ सत्यार्जवेधर्ममाहुःपरंधर्मविदोजनाः ४० दुर्ज्ञेयःशाश्वतोधर्मःसचसत्येप्रतिष्ठितः ॥ श्रुतिप्रमाणो
७९ धर्मःस्यादितिवृद्धानुशासनम् ४१ बहुधादृश्यतेधर्मःसूक्ष्मएवद्विजोत्तम ॥ भगवानपिधर्मज्ञःस्वाध्यायनिरतःशुचिः ४२ नतुतत्त्वेनभगवन्धर्मंवेत्सीतिमे
मतिः ॥ यदिविप्रनजानीषेधर्मंपरमकंद्विज ४३ धर्मव्याधंततःपृच्छगत्वातुमिथिलांपुरीम् ॥ मातापितृभ्यांशुश्रूषुःसत्यवादीजितेंद्रियः ४४

यते यइति सत्यवाग्गुरुभक्तःक्षमावांश्चभवेदित्यर्थः ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० शाश्वतोधर्मआत्मदर्शनं यदाहयाज्ञवल्क्यः । 'इज्याचारदमाहिंसादानस्वाध्याय
कर्मणाम् ॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनम्'इति । सत्येत्रैकालिकबाधशून्येवस्तुनिप्रतिष्ठितःपर्यवसितः अन्योऽधर्मस्त्वसत्येप्रतिष्ठितइत्यर्थात्सिद्धम् ४१ । ४२ । ४३ । ४४

४५ । ४६ साधयिष्यामि स्वकार्यमितिशेषः ४७ । ४८ ॥ इ०नी०भा०षडधिकशततमोऽध्यायः ॥ २०६ ॥ ॥ चिंतयित्वेति आगोऽपराधः कृतमनेनेत्यागस्कृतः १ । २ । ३ । ४ । ५ । ६

मिथिलायांवसेद्व्याधःसतेधर्मान्प्रवक्ष्यति ॥ तत्रगच्छस्वभद्रंतेयथाकामंद्विजोत्तम ४५ अत्युक्तमपिमेसर्वंक्षंतुमर्हस्यनिंदित ॥ स्त्रियोह्यवध्याःसर्वेषांयेधर्ममभि
विंदते ४६ ॥ ब्राह्मणउवाच ॥ प्रीतोऽस्मितवभद्रंतेगतःक्रोधश्चशोभने ॥ उपालंभस्त्वयाऽत्युक्तोममनिःश्रेयसंपरम् ॥ स्वस्तितेऽस्तुगमिष्यामिसाधयिष्या
मिशोभने ४७ ॥ मार्कंडेयउवाच ॥ तयाविसृष्टोनिर्गम्यस्वमेवभवनंययौ ॥ विनिंदन्सस्वमात्मानंकौशिकोद्विजसत्तमः ४८ ॥ इतिश्रीमहाभारतेआरण्यके
पर्वणिमार्कंडेयसमास्यापर्वणिपतिव्रतोपाख्यानेषडधिकद्विशततमोऽध्यायः ॥ २०६ ॥ ॥ ७ ॥ मार्कंडेयउवाच ॥ चिंतयित्वातदाश्चर्यंस्त्रियाप्रोक्तमशेष
तः ॥ विनिंदन्सस्वमात्मानमागस्कृतइवाबभौ १ चिंतयानःस्वधर्मस्यसूक्ष्मांगतिमथाब्रवीत् ॥ श्रद्दधानेनवैभाव्यंगच्छामिमिथिलामहम् २ कृतात्माधर्मवि
त्तस्यांव्याधोनिवसतेकिल ॥ तंगच्छाम्यहमद्यैवधर्मंप्रष्टुंतपोधनम् ३ इतिसंचिंत्यमनसाश्रद्दधानःस्त्रियावचः ॥ बलाकाप्रत्ययेनासौधर्म्यैश्चवचनैःशुभैः ४ सं
प्रतस्थेसमिथिलांकौतूहलसमन्वितः ॥ अतिक्रामन्नरण्यानिग्रामांश्चनगराणिच ५ ततोजगाममिथिलांजनकेनसुरक्षिताम् ॥ धर्मसेतुसमाकीर्णांयज्ञोत्सववतीं
शुभाम् ६ गोपुराट्टालकवतींहर्म्यप्राकारशोभनाम् ॥ प्रविश्यनगरींरम्यांविमानैर्बहुभिर्युताम् ७ पण्यैश्चबहुभिर्युक्तांसुविभक्तमहापथाम् ॥ अश्वैरथैस्तथा
नागैर्योधैश्चबहुभिर्युताम् ८ हृष्टपुष्टजनाकीर्णांनित्योत्सवसमाकुलाम् ॥ सोऽपश्यद्बहुवृत्तांतांब्राह्मणःसमतिक्रमन् ९ धर्मव्याधमपृच्छच्चसचास्यकथितोद्वि
जैः ॥ अपश्यत्तत्रगत्वातंसूनामध्येव्यवस्थितम् १० मार्गमाहिषमांसानिविक्रीणंतंतपस्विनम् ॥ आकुलत्वाच्चकेतॄणामेकांतेसंस्थितोद्विजः ११ सतुज्ञात्वा
द्विजंप्राप्तंसहसासंभ्रमोत्थितः ॥ आजगामयतोविप्रःस्थितएकांतदर्शने १२ ॥ व्याधउवाच ॥ अभिवादयेत्वांभगवन्स्वागतंतेद्विजोत्तम ॥ अहंव्याधोहि
भद्रंतेकिंकरोमिप्रशाधिमाम् १३ एकपत्न्यायदुक्तोऽसिगच्छत्वंमिथिलामिति ॥ जानाम्येतदहंसर्वंयदर्थंत्वमिहागतः १४ श्रुत्वाचतस्यतद्वाक्यंसविप्रोभृशवि
स्मितः ॥ द्वितीयमिदमाश्चर्यमित्यचिंतयतद्विजः १५ अदेशस्थंहितेस्थानमितिव्याधोऽब्रवीदिदम् ॥ गृहंगच्छावभगवन्यदितेरोचतेऽनघ १६ ॥ मार्कंडेय
उवाच ॥ बाढमित्येवतंविप्रोहृष्टोवचनमब्रवीत् ॥ अग्रतस्तुद्विजंकृत्वासजगामगृहंप्रति १७ प्रविश्यचगृहंरम्यमासनेनाभिपूजितः ॥ पाद्यमाचमनीयंचप्र
तिगृह्यद्विजोत्तमः १८ ततःसुखोपविष्टस्तंव्याधंवचनमब्रवीत् ॥ कर्मैतद्वैनसदृशंभवतःप्रतिभातिमे ॥ अनुतप्येभृशंताततवघोरेणकर्मणा १९ ॥ व्याधउ
वाच ॥ कुलोचितमिदंकर्मपितृपैतामहंपरम् ॥ वर्तमानस्यमेधर्मेस्वेमन्युंमाकृथाद्विज २० विधात्राविहितंपूर्वंकर्मस्वमनुपालयन् ॥ प्रयत्नाच्चगुरूवृद्धौशुश्रू
षेऽहंद्विजोत्तम २१ सत्यंवदेनाभ्यसूयेयथाशक्तिददानिच ॥ देवतातिथिभृत्यानामवशिष्टेनवर्तये २२ विमानैःसप्तभूमिकगृहैः ७ । ८ । ९ सूनावधस्थानं तन्मध्ये
१० । ११ । १२ । १३ । १४ । १५ अदेशस्थं अयोग्यदेशस्थं १६ । १७ । १८ । १९ । २० गुरूमातापितरौ २१ नाभ्यसूयेपरगुणेषुदोषंनाविष्कुर्वे वर्तये जीवामि २२

कुत्साविद्यमानदोषसंकीर्तनं गर्हाअविद्यमानदोषारोपः पुराकृतं कर्मेतिसंबंधः २३ लोकःपरलोकः २४ । २५ । २६ । २७ । २८ नग्लातिनग्लानिंनयति २९ । ३० । ३१ । ३२ । ३३ । ३४
अभिचारात्स्वैरगतेः ३५ मेरुंडाः भयानकाः ३६ । ३७ । ३८ सुपरिणीतेनसाधुनायेसंयुंजंतिसम्यग्योगंसेनानिवेशंकुर्वंतितएवपार्थिवा अन्येचोराइत्यर्थः ३९ । ४० । ४१ संरंभाद्व्यात्

नकुत्सयाम्यहंकिंचिन्नगर्हेबलवत्तरम् ॥ कृतमन्वेतिकर्तारंपुराकर्मद्विजोत्तम २३ कृषिगोरक्ष्यवाणिज्यमिहलोकस्यजीवनम् ॥ दंडनीतिस्त्रयीविद्यातेनलोको
भवत्युत २४ कर्मशूद्रेकृषिर्वैश्येसंग्रामःक्षत्रियेस्मृतः ॥ ब्रह्मचर्यंतपोमंत्राःसत्यंचब्राह्मणेसदा २५ राजाप्रशास्तिधर्मेणस्वकर्मनिरताःप्रजाः ॥ विकर्माणश्चये
केचित्तान्युनक्तिस्वकर्मसु २६ भेतव्यंहिसदाराज्ञांप्रजानामधिपाहिते ॥ वारयंतिविकर्मस्थंनृपामृगमिवेषुभिः २७ जनकस्येहविप्रर्षेविकर्मस्थोनविद्यते ॥ स्व
कर्मनिरतावर्णाश्चत्वारोऽपिद्विजोत्तम २८ सएषजनकोराजादुर्वृत्तमपिचेत्सुतम् ॥ दंड्यंदंडेनिक्षिपतितथानग्लातिधार्मिकम् २९ सुयुक्तचारोनृपतिःसर्वंध
र्मेणपश्यति ॥ श्रीश्चराज्यंचदंडश्चक्षत्रियाणांद्विजोत्तम ३० राजानोहिस्वधर्मेणश्रियमिच्छंतिभूयसीम् ॥ सर्वेषामेववर्णानांत्राताराजाभवत्युत ३१ परेणहि
हतान्ब्रह्मन्वराहमहिषानहम् ॥ नस्वयंहन्मिविप्रर्षेविक्रीणामिसदात्वहम् ३२ नभक्षयामिमांसानिऋतुगामीतथाह्यहम् ॥ सदोपवासीचतथानक्तभोजीसदाद्वि
ज ३३ अशीलश्चापिपुरुषोभूत्वाभवतिशीलवान् ॥ प्राणिहिंसारतिश्चापिभवतेधार्मिकःपुनः ३४ अभिचारान्नरेंद्राणांधर्मःसंकीर्यतेमहान् ॥ अधर्मोवर्ततेचा
पिसंकीर्यंतेततःप्रजाः ३५ भेरुंडावामनाःकुब्जाःस्थूलशीर्षास्तथैवच ॥ क्लीबाश्चांधाश्चबधिराजायंतेऽत्युच्चलोचनाः ३६ पार्थिवानामधर्मत्वात्प्रजानामभवः
सदा ॥ सएषराजाजनकःप्रजाधर्मेणपश्यति ३७ अनुगृण्हन्प्रजाःसर्वाःस्वधर्मनिरताःसदा ॥ येचैवमांप्रशंसंतियेचनिंदंतिमानवाः ३८ सर्वान्सुपरिणीतेन
कर्मणातोषयाम्यहम् ॥ येजीवंतिस्वधर्मेणसंयुंजंतिचपार्थिवाः ३९ नकिंचिदुपजीवंतिदांताउत्थानशीलिनः ॥ शक्त्यान्नदानंसततंतितिक्षाधर्मनित्यता ४०
यथार्हंप्रतिपूजाचसर्वभूतेषुवैसदा ॥ त्यागान्नान्यत्रमर्त्यानांगुणास्तिष्ठंतिपूरुषे ४१ मृषावादंपरिहरेत्कुर्यात्प्रियमयाचितः ॥ नचकामान्नसंरंभान्नद्वेषाद्धर्ममु
त्सृजेत् ४२ प्रियेनातिभृशंहृष्येदप्रियेनचसंज्वरेत् ॥ नमुह्येदर्थकृच्छ्रेषुनचधर्मंपरित्यजेत् ४३ कर्मचेत्किंचिदन्यत्स्यादितरन्नतदाचरेत् ॥ यत्कल्याणमभि
ध्यायेत्तत्रात्मानंनियोजयेत् ४४ नपापेप्रतिपापःस्यात्साधुरेवसदाभवेत् ॥ आत्मनैवहतःपापोयःपापंकर्तुमिच्छति ४५ कर्मचैतदसाधूनांवृजिनानामसाधुवत् ॥
नधर्मोस्तीतिमन्वानाःशुचीनवहसंतिये ४६ अश्रद्दधानाधर्मस्यतेनश्यंतिनसंशयः ॥ महादृतिरिवाध्मातःपापोभवतिनित्यदा ४७ मूढानामवलिप्ताना
मसारंभावितंभवेत् ॥ दर्शयत्यंतरात्मातंदिवारूपमिवांशुमान् ४८

४२ । ४३ अन्यत् विपरीतंस्यात् इतरत्तादृशं द्वितीयंकल्याणमेवात्मनःपरस्यचाभिध्यायेत्जानीयात् ४४ पापेपापिनि प्रतिपापःप्रतिपापीनस्यात् ४५ वृजिनानांव्यसनवतांअसाधुश्चोरा
दिस्तद्वत् ४६ दृतिर्भस्त्रा आध्मातःसन्नसारोऽपिपुष्टोभवेत् ४७ तद्वन्मूढानांभावितंचिंतितं अंतरात्मैवतंमूढंदर्शयति मूढस्यमौढ्यमेवस्वरूपज्ञापकं ४८

मृजाहीनःमलिनदेहः श्रियेतिपाठांतरेस्पष्टोर्थः ४९ मूढमतमाह अब्रुवन्निति ५० पापात्प्राकृतात्द्वितीयात्करिष्यमाणात् ५१ कर्मणेति येनतेनेतिजपतपस्तीर्थाद्यन्यतमेनयेनकेनचिदपि पापात्परिमुच्यतइत्यनुषज्यते 'सब्राह्मणःकेनस्याद्येनस्यात्तेनेदृशएवस्यात्' इतिश्रुतिर्हि धर्मेषुधर्मोत्पत्तिविषया ज्ञानोत्पत्तौत्वेकएवश्रवणादिमार्गो 'नान्यःपंथाविद्यतेऽयनाय' इति श्रूयते ५२ प्राकृतानीतिसंबंधः ५३ ५४ चिकीर्षेदिति यःसाधूनांछिद्राणिघ्नादिहीनतयारिक्तानिश्राद्धादीनि यःविवृणोति धना दिदानेनविवृणोतिविशेषतःपिदधाति ५५ सःकल्याणं मोक्षोपायंकर्तुमिच्छेदेव साधुसेवनजात्पुण्यान्मुमुक्षाउदेतीत्यर्थः ५६ यथेति मुमुक्षापापनाशपूर्विकैवोदेतीतिभावः ५७ । ५८ अधर्माइति लुब्धाःधर्मशून्याअपि धर्मस्यरूपमिवरूपं

नलोकेराजतेमूर्खःकेवलात्मप्रशंसया ॥ अपिचेहमृजाहीनःकृतविद्यःप्रकाशते ४९ अब्रुवन्कस्यचिन्निंदामात्मपूजामवर्णयन् ॥ नकश्चिद्गुणसंपन्नःप्रकाशोभुवि दृश्यते ५० विकर्मणातप्यमानःपापाद्विपरिमुच्यते ॥ नतत्कुर्यांपुनरितिद्वितीयात्परिमुच्यते ५१ कर्मणायेनतेनेहपापाद्द्विजवरोत्तम ॥ एवंश्रुतिरियंब्रह्मन् धर्मेषुप्रतिदृश्यते ५२ पापान्यबुध्वेहपुराकृतानिप्राग्धर्मशीलोऽपिविहंतिपश्चात् ॥ धर्मोराज न्नुदतेपूरुषाणांयत्कुर्वतेपापमिहप्रमादात् ५३ पापंकृत्वाहिमन्ये तनाहमस्मीतिपूरुषः ॥ तंतुदेवाःप्रपश्यंतिस्वस्यैवांतरपूरुषः ५४ चिकीर्षेदेवकल्याणंश्रद्दधानोऽनसूयकः ॥ वसनस्येवच्छिद्राणिसाधूनांविवृणोतियः ॥ ५५ पापंचेत्पुरुषःकृत्वाकल्याणमभिपद्यते ॥ मुच्यतेसर्वपापेभ्योमहाभ्रेणेवचंद्रमाः ५६ यथाऽऽदित्यःसमुद्यन्वैतमःपूर्वंव्यपोहति ॥ एवंकल्याणमातिष्ठन्स र्वपापैःप्रमुच्यते ५७ पापानांविद्ध्यधिष्ठानंलोभमेवद्विजोत्तम ॥ लुब्धाःपापंव्यवस्यंतिनरानातिबहुश्रुताः ५८ अधर्माधर्मरूपेणतृणैःकूपाइवावृताः ॥ तेषांदमःपवित्राणिप्रलापाधर्मसंश्रिताः ॥ सर्वंहिविद्यतेतेषुशिष्टाचारःसुदुर्लभः ५९ ॥ मार्कंडेयउवाच ॥ सतुविप्रोमहाप्राज्ञोधर्मव्याधमपृच्छत ॥ शिष्टा चारंकथमहंविद्यामितिनरोत्तम ६० एतदिच्छामिभद्रंतेश्रोतुंधर्मभृतांवर ॥ त्वत्तोमहामतेव्याधतद्ब्रवीहियथातथम् ६१ ॥ व्याधउवाच ॥ यज्ञोदानंतपो वेदाःसत्यंचद्विजसत्तम ॥ पंचैतानिपवित्राणिशिष्टाचारेषुनित्यदा ६२ कामक्रोधौवशेकृत्वादंभंलोभमनार्जवम् ॥ धर्ममित्येवसंतुष्टास्तेशिष्टाःशिष्टसंमताः ६३ नतेषांविद्यतेवृत्तंयज्ञस्वाध्यायशीलिनाम् ॥ आचारपालनंचैवद्वितीयंशिष्टलक्षणम् ६४ गुरुशुश्रूषणंसत्यमक्रोधोदानमेवच ॥ एतच्चतुष्टयंब्रह्मन्शिष्टाचारे षुनित्यदा ६५ शिष्टाचारेमनःकृत्वाप्रतिष्ठाप्यचसर्वशः ॥ यामयंलभतेवृत्तिंसानशक्याह्यतोऽन्यथा ६६ वेदस्योपनिषत्सत्यंसत्यस्योपनिषद्दमः ॥ दमस्यो पनिषत्त्यागःशिष्टाचारेषुनित्यदा ६७ येतुधर्मानसूयंतेबुद्धिमोहान्वितानराः ॥ अपथागच्छतांतेषामनुयाताचपीड्यते ६८

यस्यतेनदंभेनआवृताः तेषांदंभिनां अतएवदंभिनांसाधूनांचविशेषानवगमात् तेषुदंभिषुशिष्टाचारःसुदुर्लभःदुर्बोधइत्यर्थः ५९ । ६० । ६१ शिष्टाचारमाहयज्ञइति ६२ शिष्टलक्षणमाहकामेति ६३ वृत्तंवृत्तंस्वेच्छोपात्तमितियावत् । 'वृत्तोऽधीतेऽप्यतीतेऽतिवर्तुलेऽपिमृतेवृत्ते'इतिमेदिनी ६४ । ६५ अतोऽन्यथागुरुशुश्रूषणाद्यभावे ६६ वेदस्येति उपनिषद्रहस्यंसत्यंब्रह्म तदज्ञानेवेदोनिष्फलइत्यर्थः एवंदमाभावेसत्यंनास्ति त्यागाभावेदमोऽपिनास्तीत्यर्थः ६७ अपथाअमार्गेण अनुयाताअनुगंता ६८

श्रुतिश्चत्यागश्चतेद्वेपरंअयनंस्थानंयेषांतेश्रुतित्यागपरायणाः ६९ परांबुद्धिंआत्माकारांवृत्तिमपिनियच्छंतिनिगृह्णंति परवैराग्यवंतइत्यर्थः ७० । ७१ । ७२ शिष्टाचारवतिशुक्रपटोपमे योगधर्मः रागइवसाधुर्भवेत् शुक्रेवत्रेतिइवार्थे । 'ववायथातथैवैवम्'इत्यमरः ७३ अहिंसांसत्यंचस्तौतिअहिंसेति प्रतिष्ठांस्थैर्यम् ७४ । ७५ योयथेत्यर्द्धंव्याचष्टेपापात्मेत्यादिना अनात्मवान्अजितचित्तः ७६ । ७७ अहंकारोदर्पः मत्सरःपरदोषासहिष्णुत्वं तद्वर्जिताः शिष्टेगुरुशास्त्रोक्तंआचरंतःशिष्टाचाराः ७८ त्रैविद्यवृद्धाःतिस्रोविद्याऋग्यजुःसामात्मिकायत्रसत्रिविद्योयज्ञस्तत्रसाधवस्त्रैविद्यायाज्ञिकाः वृत्तंशीलंतद्वंतः मनस्विनःजितचित्ताः ७९ दुष्कराचारकर्मणां अन्यैर्दुष्करःआचारःशीलंकर्मयज्ञादियेषांतेषां घोरत्वंहिंसादिदोषवत्त्वम् ८० आश्चर्यमसतां

येतुशिष्टाःसुनियताःश्रुतित्यागपरायणाः ॥ धर्मपंथानमारूढाःसत्यधर्मपरायणाः ६९ नियच्छंतिपरांबुद्धिंशिष्टाचारान्विताजनाः ॥ उपाध्यायमतेयुक्ताः स्थित्याधर्मार्थदर्शिनः ७० नास्तिकान्भिन्नमर्यादान्क्रूरान्पापमतौस्थितान् ॥ त्यजताञ्ज्ञानमाश्रित्यधार्मिकानुपसेव्यच ७१ कामलोभग्रहाकीर्णांपंचेंद्रिय जलांनदीम् ॥ नावंधृतिमयींकृत्वाजन्मदुर्गाणिसंतर ७२ क्रमेणसंचितोधर्मोबुद्धियोगमयोमहान् ॥ शिष्टाचारेभवेत्साधूरागःशुक्लेववाससि ७३ अहिंसासत्य वचनंसर्वभूतहितंपरम् ॥ अहिंसापरमोधर्मःसचसत्येप्रतिष्ठितः ॥ सत्येकृत्वाप्रतिष्ठांतुप्रवर्तंतेप्रवृत्तयः ७४ सत्यमेवगरीयस्तुशिष्टाचारनिषेवितम् ॥ आचा रश्चसतांधर्मःसंतश्चाचारलक्षणाः ७५ योयथाप्रकृतिर्जंतुःस्वांप्रकृतिमश्नुते ॥ पापात्माक्रोधकामादीन्दोषानाप्नोत्यनात्मवान् ७६ आरंभोन्याययुक्तोयःसहि धर्मइतिस्मृतः ॥ अनाचारस्त्वधर्मेतिएतच्छिष्टानुशासनम् ७७ अक्रुद्ध्यंतोऽनसूयंतोनिरहंकारमत्सराः ॥ ऋजवःशमसंपन्नाःशिष्टाचाराभवंतिते ७८ त्रैवि द्यवृद्धाःशुचयोवृत्तवंतोमनस्विनः ॥ गुरुशुश्रूषवोदांताःशिष्टाचाराभवंत्युत ७९ तेषामहीनसत्वानांदुष्कराचारकर्मणाम् ॥ स्वैःकर्मभिःसत्कृतानांघोरत्वंसं प्रणश्यति ८० तंसदाचारमाश्चर्यंपुराणंशाश्वतंध्रुवम् ॥ धर्मंधर्मेणपश्यंतःस्वर्गंयांतिमनीषिणः ८१ आस्तिकामानहीनाश्चद्विजातिजनपूजकाः ॥ श्रुतवृत्तो पसंपन्नाःसंतःस्वर्गनिवासिनः ८२ वेदोक्तःपरमोधर्मोधर्मशास्त्रेषुचापरः ॥ शिष्टाचारश्चशिष्टानांत्रिविधंधर्मलक्षणम् ॥ पारणंचापिविद्यानांतीर्थानामवगाह नम् ८३ क्षमासत्यार्जवंशौचंसतामाचारदर्शनम् ॥ सर्वभूतदयावंतोअहिंसानिरताःसदा ८४ परुषंचनभाषंतेसदासंतोद्विजप्रियाः ॥ शुभानामशुभानांचक र्मणांफलसंचये ८५ विपाकमभिजानंतितेशिष्टाःशिष्टसंमताः ॥ न्यायोपेतागुणोपेताःसर्वलोकहितैषिणः ८६ संतःस्वर्गजितःशुक्लाःसन्निविष्टाश्चसत्पथे ॥ दातारःसंविभक्तारोदीनानुग्रहकारिणः ८७ सर्वपूज्याःश्रुतधनास्तथैवचतपस्विनः ॥ सर्वभूतदयावंतस्तेशिष्टाःशिष्टसंमताः ८८ दीनशिष्टाःसुखाँल्लोकाना प्नुवंतीहचश्रियम् ॥ पीडयाचकलत्रस्यभृत्यानांचसमाहिताः ८९

दुरनुष्ठेयत्वात्सदाचारंसद्भिराचीर्णंपुराणमनादिं शाश्वतंअनवच्छिन्नं ध्रुवंनित्यंअत्याज्यमित्यर्थः ८१ । ८२ वेदोक्तोऽग्निहोत्रादिः धर्मशास्त्रोक्तःअष्टकाश्राद्धादिः शिष्टाचारःहोलकादिः शिष्टानांतुष्टिरितिशेषःतदुक्तमभियुक्तैः । 'सतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणस्यवृत्तयः'इति अस्यापिशिष्टाचारेएवांतर्भावात् त्रिविधमित्युक्तं पारणंसमापनम् ८३ । ८४ । ८५ विपाकंक्रमेणपुण्यपापयोःक्षयं तेनपुण्यन्हासहेतुःसुखंनेष्टव्यं पापन्हासहेतुर्दुःखंसोढव्यमितिभावः न्यायोयुक्तिः गुणाःशमादयस्तदुपेताः ८६ शुक्लाःहिंसाशून्यधर्मवंतः सत्पथेब्रह्ममार्गे संविभक्तारःकुटुंबेषु ८७ श्रुतधनाःविद्याधनाः ८८ । ८९

९० एवंतेवर्धंते ९१ नाभिमानःनिरभिमानः ९२ सतांपदं पदनीयंप्रार्थनीयम् ९३ करुणाःकरुणावंतश्चतेवेदनशीलाश्च मस्वर्थीयोण् ९४ । ९५ । ९६ कर्मचकर्मैव कर्मणेतिगौडपाठेकर्म णाश्रुतेनचसंपन्नमित्यर्थः ९७ प्रज्ञाकृतंभराख्यावस्तुयाथात्म्यविषयंज्ञानं तदेवउच्चत्वात्प्रासादं भयात्संसारात् लोकानात्वृत्ता‌निअतीतानागतादीनि ९८ । ९९ ॥ इत्यारण्यकेपर्वणिनील

अतिशक्त्याप्रयच्छंतिसंतःसद्भिःसमागताः ॥ लोकयात्रांचपश्यंतोधर्ममात्महितानिच ९० एवंसंतोवर्तमानास्त्वेधंतेशाश्वतीःसमाः ॥ अहिंसासत्यवचन मानृशंस्यमथाऽऽर्जवम् ९१ अद्रोहोनाभिमानश्चह्रीस्तितिक्षादमःशमः ॥ धीमंतोधृतिमंतश्चभूतानामनुकंपकाः ९२ अकामद्वेषसंयुक्तास्तेसंतोलोकसा क्षिणः ॥ त्रीण्येवतुसतामाहुःसंतःपदमनुत्तमम् ९३ नचैवद्रुह्येद्दद्याच्चसत्यंचैवसदावदेत् ॥ सर्वत्रचदयावंतःसंतःकरुणवेदिनः ९४ गच्छंतीहसुसंतुष्टाधर्मपं थानमुत्तमम् ॥ शिष्टाचारामहात्मानोयेषांधर्मःसुनिश्चितः ९५ अनसूयाक्षमाशांतिःसंतोषःप्रियवादिता ॥ कामक्रोधपरित्यागःशिष्टाचारनिषेवणम् ९६ कर्मचश्रुतसंपन्नंसतांमार्गमनुत्तमम् ॥ शिष्टाचारंनिषेवंतेनित्यंधर्ममनुव्रताः ९७ प्रज्ञाप्रासादमारुह्यमुच्यंतेमहतोभयात् ॥ प्रेक्षंतोलोकवृत्तानिविविधानिद्वि जोत्तम ९८ अतिपुण्यानिपापानितानिद्विजवरोत्तम ॥ एतत्तेसर्वमाख्यातंयथाप्रज्ञंयथाश्रुतम् ॥ शिष्टाचारगुणंब्रह्मन्पुरस्कृत्यद्विजर्षभ ९९ ॥ इतिश्रीम हाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणव्याधसंवादेसप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ ६ ॥ ॥ मार्कंडेयउवाच ॥ सतुविप्रमथो वाचधर्मव्याधोयुधिष्ठिर ॥ यदहमाचरेकर्मघोरमेतदसंशयम् १ विधिस्तुबलवान्ब्रह्मन्दुस्तरंहिपुराकृतम् ॥ पुराकृतस्यपापस्यकर्मदोषोभवत्ययम् २ दो षस्यैतस्यवैब्रह्मन्विघातेयत्नवानहम् ॥ विधिनाहिहतेपूर्वंनिमित्तंघातकोभवेत् ३ निमित्तभूताहिवयंकर्मणोऽस्यद्विजोत्तम ॥ येषांहतानांमांसानिविक्रीणामी हवैद्विज ४ तेषामपिभवेद्धर्मउपयोगेनभक्षणे ॥ देवताऽतिथिभृत्यानांपितृणांचापिपूजनम् ५ ओषध्योवीरुधश्चैवपशवोमृगपक्षिणः ॥ अन्नाद्यभूतालोक स्यइत्यपिश्रूयतेश्रुतिः ६ आत्ममांसप्रदानेनशिबिरौशीनरोनृपः ॥ स्वर्गंसुदुर्गमंप्राप्तःक्षमावान्द्विजसत्तम ७ राज्ञोमहानसेपूर्वंरंतिदेवस्यवैद्विज ॥ द्वेसहस्रे तुवध्येतेपशूनामन्वहंतदा ८ अहन्यहनिवध्येतेद्वेसहस्रेगवांतथा ॥ समांसंददतोह्यन्नंरंतिदेवस्यनित्यशः ९ अतुलाकीर्तिरभवन्नृपस्यद्विजसत्तम ॥ चातुर्मा स्येचपशवोवध्यंतइतिनित्यशः १० अग्नयोमांसकामाश्चइत्यपिश्रूयतेश्रुतिः ॥ यज्ञेषुपशवोब्रह्मन्वध्यंतेसततंद्विजैः ११ संस्कृताःकिलमंत्रैश्चतेऽपिस्वर्गम वाप्नुवन् ॥ यदिनैवाग्नयोब्रह्मन्मांसकामाभवन्पुरा १२ भक्ष्यंनैवाभवन्मांसंकस्यचिद्द्विजसत्तम १३

कंठीयेभारतभावदीपेसप्ताधिकशततमोऽध्यायः ॥ २०७ ॥ ॥ सत्विति एतन्मांसविक्रयात्मकं १ । २ दोषस्येति यत्नवानपिनपरिहर्तुंशक्नोमिविधेःप्राबल्यादित्यर्थः ३ निमित्तेति शरवन्निमित्तभूतावयं संधातृवत्कर्तातुविधिरेवेत्यर्थः ४ । ५ अन्नाद्यभूताःअन्नंचतदद्यंचभोग्यंभक्ष्यंचेत्यर्थः'सर्वमस्यान्नंभवति'इतिश्रुतेः ६ । ७ । ८ । ९ । १० 'येऽस्याग्नयोजुह्वतोमांसकामाः' इतिमंत्रलिंगमपिश्रुतिरेव ११ । १२ अत्रापीत्यादिसार्धःश्लोकः कलौतुमांसेनपैतृकस्यनिषेधाद्देवताशेषाच्चज्ञियमांसादन्यत्रमांसलक्षणंदुष्यत्येवेतिभावः १३

१४ अमांसाशीति यज्ञियमांसभुजोऽपि ऋतुगामिनोब्रह्मचर्यमिवऔपचारिकममांसाशित्वमितिभावः १५ सत्यानृतेज्ञानकर्ममार्गौअत्रापियज्ञियमांसभक्षणेविधिर्विशेषः तमेवाह परकृतिमुखेन सौदासेनेति कर्तृत्वाद्यभिमानवतामूढेनकर्मठेनयज्ञियमपिमांसंभक्षणीयं नज्ञानमार्गस्थेनेतिभावः रंतिदेवनिदर्शनंतुयुगांतराभिप्रायं अत्रकिंप्रतिभातिमे किंशब्दःकुत्सायांअत्रमांसभक्षणीयेमम निंदाप्रतिभाति अतएवनहन्मिनभक्षयामीतिप्रागेवोक्तंमयेत्यर्थः १६ कुतस्तर्हित्वंमांसविक्रयंकरोषि तत्कर्तुरपिप्रयोजकत्वाद्धिंसादोषोऽस्तीत्याशंक्याऽऽह स्वेति स्वकर्मइत्यस्यव्याख्या

अत्रापिविधिरुक्तश्चमुनिभिर्मांसभक्षणे ॥ देवतानांपितृणांचभुंक्तेदत्त्वाऽपियःसदा ॥ यथाविधियथाश्राद्धंनप्रदुष्यतिभक्षणात् १४ अमांसाशीभवत्येवमित्य पिश्रूयतेश्रुतिः ॥ भार्यांगच्छन्ब्रह्मचारीऋतौभवतिब्राह्मणः १५ सत्यानृतेविनिश्चित्यअत्रापिविधिरुच्यते ॥ सौदासेनतदाराज्ञामानुषाभक्षिताद्विज ॥ शा पाभिभूतेनभृशमत्रकिंप्रतिभातिमे १६ स्वधर्मइतिकृत्वातुनत्यजामिद्विजोत्तम ॥ पुराकृतमितिज्ञात्वाजीवाम्येतेनकर्मणा १७ स्वकर्मत्यजतोब्रह्मन्नधर्मइह दृश्यते ॥ स्वकर्मनिरतोयस्तुधर्मःसइतिनिश्चयः १८ पूर्वंहिविहितंकर्मदेहिनंनविमुंचति ॥ धात्राविधिरयंदृष्टोबहुधाकर्मनिर्णये १९ द्रष्टव्यातुभवेत्प्रज्ञाक्रूरे कर्मणिवर्तता ॥ कथंकर्मशुभंकुर्यांकथंमुच्येपराभवात् २० कर्मणस्तस्यघोरस्यबहुधानिर्णयोभवेत् ॥ दानेचसत्यवाक्येचगुरुशुश्रूषणेतथा २१ द्विजातिपू जनेचाहंधर्मेचनिरतःसदा ॥ अभिमानातिवादाभ्यांनिवृत्तोऽस्मिद्विजोत्तम २२ कृषिंसाध्वीतिमन्यंतेतत्रहिंसापरास्मृता ॥ कर्षंतोलांगलैःपुंसोघ्नंतिभूमिश यान्बहून् २३ जीवानन्यांश्चबहुशस्तत्रकिंप्रतिभातिमे ॥ धान्यबीजानियान्याहुर्व्रीह्यादीनिद्विजोत्तम २४ सर्वाण्येतानिजीवानितत्रकिंप्रतिभातिमे ॥ अध्याक्रम्यपशूंश्चापिघ्नंतिवैभक्षयंतिच २५ वृक्षांस्तथौषधीश्चापिछिंदंतिपुरुषाद्विज ॥ जीवाहिबहवोब्रह्मन्वृक्षेषुचफलेषुच २६ उदकेबहवश्चापितत्रकिंप्र तिभातिमे ॥ सर्वंव्याप्तमिदंब्रह्मन्प्राणिभिःप्राणजीवनैः २७ मत्स्यान्ग्रसंतेमत्स्याश्चतत्रकिंप्रतिभातिमे ॥ सत्त्वैःसत्त्वानिजीवंतिबहुधाद्विजसत्तम २८ प्रा णिनोऽन्योन्यभक्षाश्चतत्रकिंप्रतिभातिमे ॥ चंक्रम्यमाणाजीवांश्चधरणीसंश्रितान्बहून् २९ पद्भ्यांघ्नंतिनराविप्रतत्रकिंप्रतिभातिमे ॥ उपविष्टाःशयानाश्चघ्नंतेजी वाननेकशः ३० ज्ञानविज्ञानवंतश्चतत्रकिंप्रतिभातिमे ॥ जीवैर्ग्रस्तमिदंसर्वमाकाशंपृथिवीतथा ३१ अविज्ञानाच्चहिंसंतितत्रकिंप्रतिभातिमे ॥ अहिंसेति यदुक्तंहिपुरुषैर्विस्मितैःपुरा ३२ केनहिंसंतिजीवान्वैलोकेऽस्मिन्द्विजसत्तम ॥ बहुसंचिंत्यइतिवैनास्तिकश्चिदहिंसकः ३३ अहिंसायांतुनिरतायतयोद्विजसत्त म ॥ कुर्वंत्येवहिहिंसांतेयत्नादल्पतराभवेत् ३४ आलक्ष्याश्चैवपुरुषाःकुलेजातामहागुणाः ॥ महाघोराणिकर्माणिकृत्वालज्जंतिवैनच ३५ सुहृदःसुहृदो ऽन्यांश्चदुर्हृदश्चापिदुर्हृदः ॥ सम्यक्प्रवृत्तान्पुरुषान्नसम्यगनुपश्यतः ३६

पुराकृतमित्यादि १७ । १८ । १९ । २० । २१ । २२ तथापिहिंसामिश्रंकर्मतवाप्ययोग्यमित्याशंक्य सर्वत्रहिंसायाअपरिहार्यत्वमाह कृषिंसाध्वीतीत्यादिना केनरा जीवान्नहिंसंत्यपितुसर्वे ऽपिहिंसंत्येवेत्यर्थः २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६

३७ । ३८ । ३९ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥ ॥ शांत्यादयोज्ञानांगभूताधर्माःप्रोक्ताः संप्रतिज्ञानंविनाकृतकृत्यतानास्तीतिवक्तुंधर्मतत्त्वस्यदुरवगाहत्वं प्रपंचस्यनिःसारत्वंचोच्यते धर्मव्याधस्त्वित्यादिना १ । २ । ३ धारणाऽवधारणंनिश्चय इत्यर्थः ४ । ५ । ६ । ७ सुनीतंगुरुशिक्षा ८ । ९ प्रहीणाःश्रांताअ

समृद्धैश्चननंदंतिबांधवाबांधवैरपि ॥ गुरूंश्चैवाविनिंदंतिमूढाःपंडितमानिनः ३७ बहुलोकेविपर्यस्तंदृश्यतेद्विजसत्तम ॥ धर्मयुक्तमधर्मंचतत्रकिंप्रतिभातिमे ३८ वक्तुंबहुविधंशक्यंधर्माधर्मेषुकर्मसु ॥ स्वकर्मनिरतोयोहिसयशःप्राप्नुयान्महत् ३९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्या०पतिव्रतोपाख्यानेब्राह्मणव्याधसंवादेअष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥ ॥ ४ ॥ मार्कंडेयउवाच ॥ धर्मव्याधस्तुनिपुणंपुनरेवयुधिष्ठिर ॥ विप्रर्षभमुवाचेदंसर्वधर्मभृतांवर १ ॥ व्याधउवाच ॥ श्रुतिप्रमाणोधर्मोऽयमितिवृद्धानुशासनम् ॥ सूक्ष्मागतिर्हिधर्मस्यबहुशाखाह्यनंतिका २ प्राणांतिकेविवाहेचवक्तव्यमनृतंभवेत् ॥ अनृतेनभवेत्सत्यंसत्येनैवानृतंभवेत् ३ यद्भूतहितमत्यंतंतत्सत्यमितिधारणा ॥ विपर्ययकृतोधर्मःपश्यधर्मस्यसूक्ष्मताम् ४ यत्करोत्यशुभंकर्मशुभंवायदिसत्तम ॥ अवश्यंतत्समाप्नोतिपुरुषोनात्रसंशयः ५ विषमांचदशांप्राप्तोदेवान्गर्हतिवैभृशम् ॥ आत्मनःकर्मदोषाणिनविजानात्यपंडितः ६ मूढोनैकृतिकश्चापिचपलश्चद्विजोत्तम ॥ सुखदुःखविपर्यासान्सदासमुपपद्यते ७ नैनंप्रज्ञासुनीतंवात्रायतेनैवपौरुषम् ॥ योयमिच्छेद्यथाकामंतंतंकामंसआप्नुयात् ८ यदिस्यादपराधीनंपौरुषस्यक्रियाफलम् ॥ संयताश्चापिदक्षाश्चमतिमंतश्चमानवाः ९ दृश्यंतेनिष्फलाःसंतःप्रहीणाःसर्वकर्मभिः ॥ भूतानामपरःकश्चिद्धिंसायांसततोत्थितः १० वंचनायांचलोकस्यससुखीजीवतेसदा ॥ अचेष्टमपिचासीनंश्रीःकंचिदुपतिष्ठति ११ कश्चित्कर्माणिकुर्वन्हिनप्राप्यमधिगच्छति ॥ देवानिष्ट्वातपस्तप्त्वाकृपणैःपुत्रगृद्धिभिः १२ दशमासधृतागर्भेजायंतेकुलपांसनाः ॥ अपरेधनधान्यैश्चभोगैश्चापितृसंचितैः १३ विपुलैरभिजायंतेलब्धास्तैरेवमंगलैः ॥ कर्मजाहिमनुष्याणांरोगानास्त्यत्रसंशयः १४ व्याधयोविनिवार्यंतेव्याधैःक्षुद्रमृगाइव ॥ तेचापिकुशलैर्वैद्यैर्निपुणैःसंभृतौषधैः १५ व्याधयोविनिवार्यंतेमृगाव्याधैरिवद्विज ॥ येषामस्तिचभोक्तव्यंग्रहणीदोषपीडिताः १६ नशक्नुवंतितेभोक्तुंपश्यधर्मभृतांवर ॥ अपरेबाहुबलिनःक्लिश्यंतिबहवोजनाः १७ दुःखेनचाधिगच्छंतिभोजनंद्विजसत्तम ॥ इतिलोकमनाक्रंदंमोहशोकपरिप्लुतम् १८ स्रोतसाऽसकृदाक्षिप्तंह्रियमाणंबलीयसा ॥ नाम्रियेयुर्नजीर्येयुःसर्वेस्युःसार्वकामिकाः १९ नाप्रियंप्रतिपश्येयुर्वशित्वंयदिवैभवेत् ॥ उपर्युपरिलोकस्यसर्वोगंतुंसमीहते ॥ यततेचयथाशक्तिनचतद्वर्ततेतथा २०

पीत्यर्थः १० । ११ पुत्रगृद्धिभिःपुत्रकामैः १२ । १३ । १४ । १५ ग्रहणीविष्टंभरोगः १६ । १७ अनाक्रंदं असहायं । 'आक्रंदःक्रंदनेह्वानेमित्रदारुणयुद्धयोः'इतिमेदिनी १८ स्रोतसाकर्मप्रवाहेण असकृत्आक्षिप्तं आधिव्याधिभिस्ताडितं ह्रियमाणंअवशं १९ ननुसर्वेपिस्ववशाएवदृश्यंतेनेत्याह नेति २०

बहवइति देवज्ञशास्त्रमपिव्यभिचारिफलमित्याशयः २१ नेति स्वीयमपिवस्तुस्वस्यानधीनंप्राक्कर्मवशाद्भवतीत्यर्थः तत्राविदृष्टसामग्रीवैकल्यमितिलोकायतमतमाशंक्याह कर्मणेति प्राकृतानांदेहात्मवादिनां कृतहानाकृताभ्यागमादिदोषदर्शिनांतुप्राक्कर्मैवप्रधानमितिभावः २२ एतदेवव्रक्तुंजीवस्यनित्यत्वमाह यथेति २३ । २४ । २५ दशार्धता पंचत्वं २६ ननुकृतनाशोऽपिकृष्यादिफलेषुदृश्यतेऽतःकृतंकर्म नदेहांतरेऽनुवर्तिष्यते देहादन्यस्यात्मनोऽभावादित्याशंक्याह अन्योहीति भोजनफलवत्कृतस्यकर्मणःफलमपरिहार्यं । यत्रतुसद्यःफलंनदृष्टंतत्रापिजन्मांतरेभविष्यतीत्यनुमेयं । यत्रचाकृतमपिफलंनिधिलाभादिउपैति तत्रजन्मांतरीयंसाधनंकल्प्यमित्यर्थः २७ उत्पद्यतिजन्मांतरंलभते यतस्तैःप्राचीनैःकर्मभिर्भावितोरंजितः अतएवक्रममाणंप्रकृत्यश्रूयते । 'तंविद्याकर्मणी समन्वारभेतेपूर्वप्रज्ञाचेति' । तस्मात्स्वकृतमेवस्वयंभुंक्ते नत्वन्यकृतमन्योऽतोनास्तिकृतस्यनाशइत्युक्तं २८ । २९ एवंस्थूलशरीरादन्यत्त्वमा

बहवःसंप्रदृश्यंतेतुल्यनक्षत्रमंगलाः ॥ महत्तुफलवैषम्यंदृश्यतेकर्मसंधिषु २१ नकेचिदीशतेब्रह्मन्स्वयंग्राह्यस्यसत्तम ॥ कर्मणाप्राकृतानांवैइहसिद्धिःप्रदृश्यते २२ यथाश्रुतिरियंब्रह्मन्जीवःकिलसनातनः ॥ शरीरमध्रुवंलोकेसर्वेषांप्राणिनामिह २३ वध्यमानेशरीरेतुदेहनाशोभवत्युत ॥ जीवःसंक्रमतेऽन्यत्रकर्मबंधनिबंधनः २४ ॥ ब्राह्मणउवाच ॥ कथंकर्मविदांश्रेष्ठजीवोभवतिशाश्वतः ॥ एतदिच्छाम्यहंज्ञातुंतत्त्वेनवदतांवर २५ ॥ व्याधउवाच ॥ नजीवनाशोऽस्तिहिदेहभेदेमिथ्यैतदाहुर्म्रियतीतिमूढाः ॥ जीवस्तुदेहांतरितःप्रयातिदशार्धतैवास्यशरीरभेदः २६ अन्योहिनाश्नातिकृतंहिकर्ममनुष्यलोकेमनुजस्यकश्चित् ॥ यत्तेनकिंचिद्धिकृतंहिकर्मतदश्नुतेनास्तिकृतस्यनाशः २७ सुपुण्यशीलाहिभवंतिपुण्यानराधमाःपापकृतोभवंति ॥ नरोऽनुयातस्त्विहकर्मभिःस्वैस्ततःसमुत्पद्यतिभावितस्तैः २८ ॥ ब्राह्मणउवाच ॥ कथंसंभवतेयोनौकथंवापुण्यपापयोः ॥ जातीःपुण्यास्त्वपुण्याश्चकथंगच्छतिसत्तम २९ ॥ व्याधउवाच ॥ गर्भाधानसमायुक्तंकर्मेदंसंप्रदृश्यते ॥ समासेनतुतेक्षिप्रंप्रवक्ष्यामिद्विजोत्तम ३० यथासंभृतसंभारःपुनरेवप्रजायते ॥ शुभकृच्छुभयोनीषुपापकृत्पापयोनिषु ३१ शुभैःप्रयोगैर्देवत्वंव्यामिश्रैर्मानुषोभवेत् ॥ मोहनीयैर्वियोनीषुत्वधोगामीचकिल्बिषी ३२ जातिमृत्युजरादुःखैःसततंसमभिद्रुतः ॥ संचरेपच्यमानश्चदोषैरात्मकृतैर्नरः ३३ तिर्यग्योनिसहस्राणिगत्वानरकमेवच ॥ जीवाःसंपरिवर्तंतेकर्मबंधनिबंधनाः ३४ जंतुस्तुकर्मभिस्तैस्तैःस्वकृतैःप्रेत्यदुःखितः ॥ तद्दुःखप्रतिघातार्थमपुण्यांयोनिमाप्नुते ३५ ततःकर्मसमादत्तेपुनरन्यन्नवंबहु ॥ पच्यतेतुपुनस्तेनभुक्त्वाऽपथ्यमिवातुरः ३६

त्मनःप्रसाध्य लिंगशरीरादपिव्यतिरेकंसाधयितुंवैराग्योत्पत्त्यर्थंजन्मादीनांदुःखरूपत्वमाह गर्भेत्यादिना गर्भाधानेनपिंडोत्पत्तिप्रकाशकेनग्रंथेन एतत्सर्वंसमायुक्तंसमाहितं तदेवसंक्षिप्याह इदंयत्संप्रदृश्यतेस्थूलदेहादिघटांतंतत्सर्वंकर्मैवेति । अयमर्थःम्रियमाणोजंतुर्विद्याकर्मपूर्वप्रज्ञाभिः पंचप्राणमनोबुद्धिदशेंद्रियरूपसप्तदशकात्मकेनलिंगेनइतउत्क्रम्य यथाकर्मस्वर्गंनरकंवागत्वातत्रभोगान्भुक्त्वा कर्मशेषेणवृष्टिद्वारेणपुनर्बीजभावंप्राप्य शुक्रशोणितरूपेणपरिणमते बीजेपुनर्लिंगशरीरेणाविश्यतैरेवपूर्वैर्विद्यादिसंस्कारैर्युक्तोजायते तत्केनकर्मणाकुत्रजायतइत्येतत्प्रवक्ष्यामीत्यर्थः ३० संभृताःसंभाराःकर्मबीजानियेन ३१ मोहनीयैस्तामसैः अधःनरकतिर्यक्षु ३२ जातिर्जन्म संचरेयोनिसंचरे उत्क्रांत्यादिषुच ३३ । ३४ प्रेत्यमृत्वा दुःखात्मकः प्रतीघातः दुःखंमोक्तुमित्यर्थः ३५ अपथ्यमितिच्छेदः ३६

अदुःखितइतिच्छेदः । दुःखाभावस्यचसुखमितिसंज्ञा नतुसंसारेस्वरूपतःसुखमस्ति तथाचाहुः मारेऽपनीतेसुखिनःसंवृत्ताःस्मइति । ततःअदुःखेसुखाध्यासात् । अनिवृत्तेतिच्छेदः ३७ निवृत्तबंधोवीतरागःतत्रहेतुःविशुद्धश्चेति ३८ तस्यफलंतपोयोगयोःआलोचनध्यानयोःसमारंभम् ३९ । ४० यतेतयतेत ४१ पुण्यफलमाहअनसूयुरिति ४२ संस्कृतस्यअष्टाचत्वारिंशत्संस्कारयुक्तस्य दांतस्यजितबाह्येंद्रियस्य नियतस्यशौचादिपरस्य यतात्मनः जितचित्तस्य अनंतरासुलभावृत्तिर्जीवनंविषयसुखमितियावत् ४३। ४४ स्वधर्मेणेति यतःशिष्टाउपदेष्टारःसंति अतः

अजस्रमेवदुःखार्तोऽदुःखितःसुखसंज्ञकः ॥ ततोनिवृत्तबंधत्वात्कर्मणामुदयादपि ३७ परिक्रामतिसंसारेचक्रवद्बहुवेदनः ॥ सचेन्निवृत्तबंधस्तुविशुद्धश्चापि कर्मभिः ३८ तपोयोगसमारंभंकुरुतेद्विजसत्तम ॥ कर्मभिर्बहुभिश्चापिलोकानश्नातिमानवः ३९ सचेन्निवृत्तबंधस्तुविशुद्धश्चापिकर्मभिः ॥ प्राप्नोतिसुकृताँल्लोकान्यत्रगत्वानशोचति ४० पापंकुर्वन्पापवृत्तःपापस्यांतंनगच्छति ॥ तस्मात्पुण्यंयतेत्कर्तुंवर्जयीतचपापकम् ४१ अनसूयुःकृतज्ञश्चकल्याणानिचसेवते ॥ सुखानिधर्ममर्थंचस्वर्गंचलभतेनरः ४२ संस्कृतस्यचदांतस्यनियतस्ययतात्मनः ॥ प्राज्ञस्यानंतरावृत्तिरिहलोकेपरत्रच ४३ सतांधर्मेणवर्तेतक्रियांशिष्टवदाचरेत् ॥ असंक्लेशेनलोकस्यवृत्तिंलिप्सेतवैद्विज ४४ स्वधर्मेणक्रियालोकेकर्मणःसोऽप्यसंकरः ॥ संतिह्यागमविज्ञानाःशिष्टाःशास्त्रेविचक्षणाः ४५ प्राज्ञोधर्मेणरमतेधर्मंचैवोपजीवति ॥ तस्माद्धर्मादवाप्तेनधनेनद्विजसत्तम ४६ तस्यैवसिंचतेमूलंगुणान्पश्यतियत्रवै ॥ धर्मात्माभवतिह्येवंचित्तंचास्यप्रसीदति ४७ समित्रजनसंतुष्टइहप्रेत्यचनंदति ॥ शब्दंस्पर्शंतथारूपंगंधानिष्टांश्चसत्तम ४८ प्रभुत्वंलभतेचापिधर्मस्यैतत्फलंविदुः ॥ धर्मस्यचफलंलब्ध्वानतुष्यतिमहाद्विज ४९ अतृप्यमाणोनिर्वेदमापेदेज्ञानचक्षुषा ॥ प्रज्ञाचक्षुर्नरइहदोषंनैवानुरुध्यते ५० विरज्यतेयथाकामंनचधर्मंविमुंचति ॥ सर्वत्यागेचयततेदृष्ट्वालोकंक्षयात्मकम् ५१ ततोमोक्षेप्रयततेनानुपायादुपायतः ॥ एवंनिर्वेदमादत्तेपापंकर्मजहातिच ५२ धार्मिकश्चापिभवतिमोक्षंचलभतेपरम् ॥ तपोनिःश्रेयसंजंतोस्तस्यमूलंशमोदमः ५३ तेनसर्वानवाप्नोतिकामान्यान्मनसेच्छति ॥ इंद्रियाणांनिरोधेनसत्येनचदमेनच ॥ ब्रह्मणःपदमाप्नोतियत्परंद्विजसत्तम ५४ ॥ ब्राह्मणउवाच ॥ इंद्रियाणितुयान्याहुःकानितानियतव्रत ॥ निग्रहश्चकथंकार्योनिग्रहस्यचकिंफलम् ५५ कथंचफलमाप्नोतितेषांधर्मभृतांवर ॥ एतदिच्छामितत्त्वेनधर्मंज्ञातुंनिबोधमे ५६ ॥ इतिश्रीमहारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणव्याधसंवादेनवाधिकद्विशततमोऽध्यायः ॥२०९॥

कर्मणःकर्मणिषष्ठी कर्मस्वधर्मेणस्वोचितेनाचारेणक्रियाःकुरुष्व आशीर्लिङ्मध्यमैकवचनं सोऽपिअसंकरःधर्माणामितिशेषः ४५ । ४६ यत्रधर्मे ४७ । ४८ प्रभुत्वंअप्रतिहतेच्छत्वंधर्मस्यैतिंचित्तशुद्ध्याभोगेच्छायांक्षीणायां स्वर्गेऽपिवैराग्यंजायतेइत्यर्थः ४९ अतृप्यमाणःप्रीतिमलभमानः निर्वेदंवैराग्यंआप्नोति लकारव्यत्ययआर्षः दोषंरागद्वेषादिकंनानुरुध्यतेतद्वशोनभवतीत्यर्थः ५० । ५१ उपायतएवमोक्षेप्रयततेनत्वनुपायाद्दैवमात्राश्रयादितियोजना ५२ तपःज्ञानंनिःश्रेयसंमोक्षसाधनम् ५३ तेनतपसा ५४ तेषांनिग्रहस्यफलंचाकिं कथंचफलमाप्नोतीति संबंधः ५५ । ५६ ॥ ॥ इत्यारण्यकेपर्वणिनी० भा० नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

एवमिति १ सूक्ष्मशरीरादप्यात्मानंविवेचितुंइंद्रियाणामजयेदोषमाह विज्ञानार्थमित्यादिना महांधकारेविद्यमानानांघटादीनांविज्ञानार्थं घटच्छिद्राद्बहिर्गतदीपप्रभेव ब्रह्मणिविद्यमानरूपादीनां विज्ञानार्थं इंद्रियच्छिद्रद्वारा बहिर्गतं तैजसं मनः प्रथमं प्रवर्तते तत्तद्रूपादिविज्ञानंप्राप्य ज्ञातेऽर्थे कामंरागंक्रोधंद्वेषंचभजते २ तत्ररागकार्यमाह सपादश्लोकेन ततइति ३ प्रभवति स्वकार्यसाधनेन कृतकृत्यो भवति । द्वेषकार्यमाह पादोनश्लोकेन द्वेषश्चेति ४ उभयोः कार्यमाह ततोलोभेति व्याजात्दंभात् ५ व्याजेन कौटिल्येन अर्थं धनम् ६ । ७ श्रुतिसंबद्धं असंगोऽहमुदासीनोऽहमित्यादिअश्रुतियोजितं श्रुतिपथेशांत्यादौ योजितंयोगः तद्रहितंयथास्यात्तथा शमादिशून्योऽपि असंगत्वं शास्त्रीयं शब्देनैवदर्शयतीत्यर्थः ८ मनोवाक्कायजत्वेनत्रैविध्यमेवाह पापमिति । साधवः शमादयः ९ पापकर्मिणः भावप्रधानोनिर्देशः पापकर्मकरत्वादित्यर्थः १० धर्मलाभोपायमेवाह सार्द्धेन यस्त्विति ११ । १२

॥ मार्कंडेयउवाच ॥ एवमुक्तस्तुविप्रेणधर्मव्याधोयुधिष्ठिर ॥ प्रत्युवाचयथाविप्रंतच्छृणुष्वनराधिप १ ॥ व्याधउवाच ॥ विज्ञानार्थंमनुष्याणांमनःपूर्वंप्रवर्तते ॥ तत्प्राप्यकामंभजतेक्रोधंचद्विजसत्तम २ ततस्तदर्थंयततेकर्मचारभतेमहत् ॥ इष्टानांरूपगंधानामभ्यासंचनिषेवते ३ ततोरागःप्रभवतिद्वेषश्चतदनंतरम् ॥ ततोलोभःप्रभवतिमोहश्चतदनंतरम् ४ ततोलोभाभिभूतस्यरागद्वेषहतस्यच ॥ नधर्मेजायतेबुद्धिर्व्याजाद्धर्मंकरोतिच ५ व्याजेनचरतेधर्ममर्थंव्याजेनरोचते ॥ व्याजेनसिध्यमानेषुधनेषुद्विजसत्तम ६ तत्रैवरमतेबुद्धिस्ततःपापंचिकीर्षति ॥ सुहृद्भिर्वार्यमाणश्चपंडितैश्चद्विजोत्तम ७ उत्तरंश्रुतिसंबद्धंब्रवीत्यश्रुतियोजितम् ॥ अधर्मस्त्रिविधस्तस्यवर्ततेरागदोषजः ८ पापंचिंतयतेचैवब्रवीतिचकरोतिच ॥ तस्याधर्मप्रवृत्तस्यगुणानश्यंतिसाधवः ९ एकशीलैश्चमित्रत्वंभजंतेपापकर्मिणः ॥ सतेनदुःखमाप्नोतिपरत्रचविपद्यते १० पापात्माभवतिह्येवंधर्मलाभंतुमेशृणु ॥ यस्त्वेतान्प्रज्ञयादोषान्पूर्वमेवानुपश्यति ११ कुशलःसुखदुःखेषुसाधूंश्चाप्युपसेवते ॥ तस्यसाधुसमारंभाद्बुद्धिर्धर्मेषुराजते १२ ॥ ब्राह्मणउवाच ॥ ब्रवीषिसूनृतंधर्म्यंयस्यवक्तानविद्यते ॥ दिव्यप्रभावःसुमहानृषिरेवमतोऽसिमे १३ ॥ व्याधउवाच ॥ ब्राह्मणावैमहाभागाःपितरोऽग्रभुजःसदा ॥ तेषांसर्वात्मनाकार्यंप्रियंलोकेमनीषिणा १४ यत्तेषांचप्रियंतत्तेवक्ष्यामिद्विजसत्तम ॥ नमस्कृत्वाब्राह्मणेभ्योब्राह्मींविद्यांनिबोधमे १५ इदंविश्वंजगत्सर्वमजय्यंचापिसर्वशः ॥ महाभूतात्मकंब्रह्मनातःपरतरंभवेत् १६ महाभूतानिखंवायुरग्निरापस्तथाचभूः ॥ शब्दःस्पर्शश्चरूपंचरसोगंधश्चतद्गुणाः १७

सूनृतं प्रियं धर्म्यं च १३ । १४ ब्राह्मीं ब्राह्मणानां स्वभूतां १५ विद्यामेवाह इदमित्यादिना इदं प्रत्यक्षादिप्रमाणसिद्धंविश्वं कृत्स्नं जगत् स्थावरजंगमात्मकं सर्वं सर्वमपि अजय्यं कर्मणानलभ्यं सर्वशः सर्वप्रकारेण । इदंसर्वं 'यदयमात्माआत्मैवेदंसर्वम्'इत्यादिश्रुतिभ्यः सर्वस्यात्ममात्रत्वादितिभावः। ननु पशुबंधयाजी सर्वांल्लोकानभिजयतीति कर्मजय्यत्वंजगतः कथं श्रूयते तत्राह महाभूतात्मकमिति । यतः ब्रह्म त्रिविधपरिच्छेदशून्यंवस्तु तदेवमहाभूतानिआकाशादीनि आत्माजीवः कंआनंदरूपईश्वरएतत्त्रितयात्मकं तथाचश्रुतिः । 'भोक्ताभोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्मवेतत्'इति । नातः परतरं भवेत् अतो ब्रह्मणोऽन्यत् श्रेष्ठतरं प्राप्यं नास्ति । जयश्रुतिस्तु अविद्यावद्विषयकर्मकांडाभिप्राया १६ ननु केयं विद्यानाम आत्मैकत्वप्रतिपत्तिरिति ब्रूमः । किंशालग्रामेविष्णुत्वमिव प्रत्यगात्मनि सार्वात्म्यंभावनात्मकंकुर्यादितिविधितएवइहप्रतिपत्तव्यं । उतवह्नावौष्ण्यमिव तात्त्विकंतत्त्वमस्यादि-

शब्दप्रमाणात्प्रतिपत्तव्यं । आद्येऽजय्यवचनव्याकोपः । द्वितीयेतात्त्विकाद्वैतेकर्मोपास्तिकांडयोरप्रामाण्यं । नचेष्टापत्तिः । तद्वदेवज्ञानकांडस्याप्यप्रामाण्यापत्तेः । भेदग्राहिप्रत्यक्षादिप्रमाणांतरविरोधस्तुस्पष्टएवेत्याशंक्याह महाभूतानीति खादयःशब्दादयश्चतद्गुणास्तस्मिन्ब्रह्मणिआश्रितागुणाः त्रिगुणात्मकमायाकार्यत्वात्मायायाश्चाश्रयोब्रह्मैव । 'देवात्मशक्तिंस्वगुणैर्निगूढां । मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरम्'इत्यादिश्रुतिभ्यः । अयमर्थः । चंद्रेणासंस्पृष्टमपिजलंचंद्रेचंचलत्वानेकत्वाधःस्थत्वाद्यारोपहेतुर्भवति एवंप्रत्यगात्मनाऽसंसृष्टाऽपिमायातत्रदुःखित्वानेकत्वाद्यारोपहेतुर्भवतीति तथाच श्रुतयः । 'एकएवतुभूतात्माभूतेभूतेव्यवस्थितः । एकधाबहुधाचैवदृश्यतेजलचंद्रवत् । ससमानःसन्नुभौलोकावनुसंचरतिध्यायतीवलेलायतीव । घटसंवृतमाकाशंनीयमानेयथाघटे ॥ घटोनीयेतनाकाशंतद्वज्जीवोनभोपमः'इत्याद्याः । समानःबुद्धितादात्म्यंप्राप्तः लेलायतिलोलुपोभवति ब्रह्मैवस्वप्नादिष्विवस्वाज्ञानात्स्वस्मिन्ननेकभेदभिन्नंप्रपंचंपश्यति प्रमाणतश्चतद्बाधेएकमेवशिष्यते अतोरज्जुरगन्यायेनप्रपंचस्याधिष्ठानादनन्यत्वादात्ममात्रत्वं । आविद्यावस्थायांकर्मोपास्तिज्ञानकांडानांप्रामाण्यं । उत्पन्नेतुज्ञानेवेदाअवेदाइतिश्रुत्यैवस्वस्यप्रामाण्यंनिषिद्धमितिनाकिंचिद्दुःस्थं । यदाहुःसंप्रदायविदः ।'देहात्मप्रत्ययोयद्वत्प्रमाणत्वेनकल्पितः ॥ लौकिकंतद्वदेवेदंप्रमाणंत्वात्मनिश्चयात्'इति आत्मनिश्चयादितिच्छेदः तस्मायुक्तमुक्तंखादयस्तद्गुणाइति १७ अत्रतार्किकाः खादयःशब्दादिगुणवंतःआत्माचगुणवानन्योन्यतुतेषांपरस्परंगुणगुणिभावोऽस्तीत्याहुस्तन्निरस्यति तेषामपीति तेषांअव्यवधानात्शब्दादीनांखादिगुणानामपिसतां गुणास्तारत्वमंद्रत्वादयःसंतिसर्वैर्दृश्यमानाः अनेनसाक्षात्परंपरयावाग्राह्यमात्रंपांचभौतिकमित्युक्तं फलितमाह गुणवृत्तिःपरस्परमिति अयसिदग्धृत्वंवह्नौचतुष्कोणत्वमित्यन्योन्यसंक्रमोदृष्टः तद्वदात्मानात्मधर्माणामपि आत्मन्यपिआनंदोविषयानुभवोनित्यत्वंचेतिसंतिधर्मास्तेचापृथक्त्वोपचितन्या तपृथगिवावभासमानाअंतःकरणेदृश्यंते । एवमंतः

तेषामपिगुणाःसर्वेगुणवृत्तिःपरस्परम् ॥ पूर्वपूर्वगुणाःसर्वेक्रमशोगुणिषुत्रिषु १८

करणधर्मादुःखित्वादयोऽपीतरत्रेति तयोःपरस्पराश्रितत्वमाविद्यकंयुज्यतेऽतोनात्मनःपृथग्भूताःखादयः किंतुरज्जूरगवत्तत्रैवाध्यस्ताइतिभावः । त्रिषुईशसूत्रविराट्सु सर्वेइतिएतेषांउपर्युपरिपरस्पराध्यासेऽपिपूर्वस्यसर्वेगुणाउत्तरस्मिन्भवंति उत्तरस्यतुकेचिदेवपूर्वस्मिन्भवंतीत्युक्तं अयमर्थः । यथाशुद्धेस्फटिकेजपाकुसुमसान्निध्याद्रक्तत्वाध्यासस्तत्रैवस्फटिकधीप्रमोषेसतिपद्मरागत्वाध्यासस्तत्रैवचंद्रिकायामिंद्रनीलत्वाध्यासइति चतूरूपेस्फटिकेगुणवस्तुसोपाधिकेषुत्रिषुपूर्वपूर्वगुणस्यसर्वस्याप्युत्तरोत्तरत्राध्यासोदृश्यते तथाहि । स्फटिकगतासत्ताऽनिर्वचनीयेलौहित्येऽध्यस्ता नतुस्फटिकेलौहित्यधर्मोऽनिर्वचनीयत्वमध्यस्तं । एवंब्रह्मधर्माःसच्चिदानंदाःस्थूलेपिकायेदृश्यंते यथोक्तं । 'अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकं ॥ आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयम्'इति । एवंचरज्जुसर्पभ्रमेभीषणत्वादयएवंसर्पधर्मारज्ज्वामध्यस्यंतेनतुमिथ्यात्वादयस्तद्वत् । ननुसर्पेऽपिअभिगम्यत्वादयोरज्जुधर्मादृश्यंतेइति सर्वेइत्युक्तिरसंगतेतिचेत्सत्यं अखंडैकरसेब्रह्मणिसच्चिदानंदाःस्वरूपानतिरिक्ताअपि अनृतजडदुःखप्रतियोगित्वेनकल्प्यंते नतुरूपरसादिवदकल्पिताःसंति अतःकल्पितानातेषांकार्येऽनुवृत्तिर्नानुपपन्ना वेतुईशादौअकल्पिताईशनत्वादयोनतेसूत्रादिष्वनुवर्तंते किंतुकर्तृत्वसत्त्वादयएव । तस्मात्कल्पितधर्माभिप्रायेण सर्वेपूर्वस्यधर्माउत्तरस्मिन्संतीत्युक्तं तेनदृश्यंसर्वंभौतिकंतच्चब्रह्मण्यभेदेनाध्यस्तमितिपूर्वार्धार्थः । तत्रापिस्थूलंशुद्धेशसूत्रेरनुगतंसूत्रंशुद्धेशाभ्यांईशःशुद्धेनशुद्धंतुनकेनचिदनुगतमितिउत्तरार्धेऽर्थोदर्शितं । श्रौतोऽर्थस्तुतस्यस्पष्टएवेतिनिष्कर्षः । तथाचनद्रव्याणांप्रत्यक्स्वरूपात्पृथक्सिद्धिरस्तीतितद्विरुद्धंतर्कमतंनिरस्तम् १८ ॥१८०॥

अत्रानुभवमेवप्रमाणयतिषष्ठइति चेतनाधीष्ठातिस्तयाकामसंकल्पादयोऽप्युपलक्ष्यंते षष्ठंशब्दादिपंचकापेक्षयाअयंभावः । मनोविषयंकल्पयति स्वप्नेतथादर्शनात् बुद्धिस्तंप्रकाशयति अहंकारोभिमन्यतेमयायंज्ञातइति तस्मात्मनोमात्रंजगत्मनसोऽभावेतत्सत्त्वेप्रमाणाभावादिति १९ ननुप्रत्यक्षमेवतत्रप्रमाणमित्याशंक्याहइंद्रियाणीति आत्माजीवःअव्यक्तंमायातत्संज्ञकःप्रमाताप्रमाणंप्रमेयंचस्वप्नदृष्टांतेनमायामात्रमित्यवगंतव्यमितिभावः २० इंद्रियाणिमनोबुद्धिभ्यांसहसप्त तेषामर्थाःमंतव्यबोद्धव्याभ्यांसहशब्दादयःसप्त व्यक्ताव्यक्तैःबाह्येंद्रियग्राह्याःव्यक्ताःअन्येऽव्यक्ताःतैःसह सुसंवृतैरितिबुद्धिगुहायांलीनैरित्युक्तं तेचतुर्दश आकाशादयःपंचआत्मा अहंकारोगुणत्रयंचेतिचतुर्विंशतेर्गणः व्यक्ताव्यक्तरूपः गुणःभोग्यवर्गःएतेभ्योविविक्तंयत्तदेवसत्त्वंसर्वात्मत्वात्सर्वशब्दाभिधेयंभोक्तृब्रह्मेत्यर्थः २१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेदशाधिकद्विशततमोऽध्यायः ॥ २१०॥ एवंपूर्वत्रइदंजगन्महाभूतात्मकंब्रह्मेत्युक्तं तद्व्याख्यातुंभूतगुणाभि

षष्ठस्तुचेतनानाममनइत्यभिधीयते ॥ सप्तमीतुभवेद्बुद्धिरहंकारस्ततःपरम् १९ इंद्रियाणिचपंचात्मारजःसत्त्वंतमस्तथा ॥ इत्येषसप्तदशकोराशिरव्यक्तसंज्ञकः २० सर्वैरिहेंद्रियार्थैस्तुव्यक्ताव्यक्तैःसुसंवृतैः ॥ चतुर्विंशकइत्येषव्यक्ताव्यक्तमयोगणः ॥ एततेसर्वमाख्यातंकिंभूयःश्रोतुमिच्छसि ॥ २१ ॥ इतिश्रीमहाभारतेआरण्यकेप॰ मार्कंडेयसमास्याप॰ ब्राह्मणमाहात्म्येदशाधिकद्विशततमोऽध्यायः ॥ २१० ॥ ॥ मार्कंडेयउवाच ॥ एवमुक्तःसविप्रस्तुधर्मव्याधेनभारत ॥ कथामकथयद्भूयोमनसःप्रीतिवर्धनीम् १ ॥ ब्राह्मणउवाच ॥ महाभूतानियान्याहुःपंचधर्मभृतांवर ॥ एकैकस्यगुणान्सम्यक्पंचानामपिमेवद २ व्याधउवाच ॥ भूमिरापस्तथाज्योतिर्वायुराकाशमेवच ॥ गुणोत्तराणिसर्वाणितेषांवक्ष्यामितेगुणान् ३ भूमिःपंचगुणाब्रह्मन्नुदकंचचतुर्गुणम् ॥ गुणास्त्रयस्तेजसिचत्रयश्चाकाशवातयोः ४ शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः ॥ एतेगुणाःपंचभूमेःसर्वेभ्योगुणवत्तराः ५ शब्दःस्पर्शश्चरूपंचरसश्चापिद्विजोत्तम ॥ अपामेतेगुणाब्रह्मन्कीर्तितास्तवसुव्रत ६ शब्दःस्पर्शश्चरूपंचतेजसोऽथगुणास्त्रयः ॥ शब्दःस्पर्शश्चवायौतुशब्दश्चाकाशएवतु ७ एतेपंचदशब्रह्मन्गुणाभूतेषुपंचसु ॥ वर्तंतेसर्वभूतेषुयेषुलोकाःप्रतिष्ठिताः ८ अन्योन्यंनातिवर्तंतेसम्यक्चभवतिद्विज ॥ यदातुविषयीभावमाचरंतिचराचराः ९ तदादेहीदेहमन्यंव्यतिरोहतिकालतः ॥ आनुपूर्व्याविनश्यंतिजायंतेचानुपूर्वशः १० तत्रतत्रहिदृश्यंतेधातवःपांचभौतिकाः ॥ यैराव्रतमिदंसर्वंजगत्स्थावरजंगमम् ११

भजते सर्वात्मकत्वंब्रह्मणोव्याचष्टे एवमुक्तःसइत्यादिनाऽध्यायेन १ । २ गुणोत्तराणिउत्तरोत्तरगुणाःपूर्वपूर्वस्मिन्वर्ततइत्यर्थः ३ एतदेवाहभूमिरिति त्रयइतिआकाशेएकः वातेद्वावित्यर्थः ४

४१ ५ । ६ । ७ सर्वभूतेषुजरायुजादिषु लोकाश्चिदात्मोपाधिभूतानिपंचभूतानि ८ नातिवर्ततेपंचस्वेकेनविनाइतराणिभूतानिनतिष्ठंतीत्यर्थः सम्यक्चभवतिएकीभावेनप्रकाशंते एकत्वमार्षं संपूर्णदंपुगतिपूजनयोरित्यस्माद्धातोःऋत्विगादिनाक्विनिसमःसमिरादेशः समित्येकीभावेइतियास्कः ननुभूतानांपरस्परमवियोगेमरणंनस्यात्तत्संघातोहिचेतनआत्मेतिलोकायतमतमाशंक्याह यदेति अविषयंविषयमिवयत्रभावयतिससंकल्पोविषयीभावः तेजीवास्तीव्रसंकल्पावेशाद्यंदेहंभावयंति तदभिमानदार्ढ्येनपूर्वदेहस्पार्श्वंतविस्मृतौसत्यांमृताइत्युच्यंते नतुमृतदेहेऽपिभूतानांमिथोवियोगोऽस्तीत्यर्थः पाठांतरेभावंसंकल्पं विषमंस्वदेहविलक्षणंदेहांतरविषयम् ९ विनश्यंतितिरोभवंति जायंतेआविर्भवंति १० धातवोरेतआदयःप्रत्येकंपांचभौतिकाःसंतोऽपि ११

सृज्यतेसंसृज्यते यद्वाप्राणेभ्योदेवा देवेभ्योलोका इतिश्रूयमाणदृष्टिसृष्ट्यभिप्रायेण चक्षुरादिभिःसूर्यादिसृष्टिद्वारालोकःसृज्यतइति यथाश्रुतमेवव्यक्तंघटादि अव्यक्तंइंद्रियादि लिंगंरूपादि प्रकाशस्तेनग्राह्यंअनुमेयं १२ यथास्वंस्वविषयानतिक्रमेणइमानिइंद्रियाणिधारयन्नानिगृह्णन्तप्यतइव आत्मानमविषयमप्यालोचयतइव मनआदीनांनिग्रहएवआत्मालोचनमित्यर्थः १३ आत्मनःसोपाधिकंरूपमपेक्ष्याहलोकेइति विततंकुंडलेकनकमिवउपादानत्वेनव्यापकं निरुपाधिकंरूपमपेक्ष्याहलोकमिति लोकंचसैंधवखिल्यवदात्मनिचिदेकरसेविलीनंपश्यति तथाचश्रुतौ 'ब्रह्मविदांद्वे अवस्थेनिरूपयतः यएवंवेदाहंब्रह्मास्मीति सइदंसर्वंभवति।यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदिति'उक्तंचाभियुक्तैः।'सोपाधिर्निरुपाधिश्चद्वेधाब्रह्मविदुच्यते॥सोपाधिकःस्यात्सर्वात्मानिरुपाख्योऽनुपाधिकः'इतिपरापरज्ञः परंनिरुपाधि अपरंसोपाधि सक्तःप्रारब्धकर्मणाबद्धःसन्यावद्देहपातमेवसमाधौसोपाधिकावस्थामनुभवति नतुविदेहकैवल्येऽपीत्यर्थः १४ विद्याफलमाहपश्यतइति । 'ब्रह्मवेदब्रह्मैवभवति'इतिश्रुतेर्ब्रह्मभूतस्यउपाधित्यागादित्यर्थः अशुभेनपुण्यपापयोःफलेन संप्रज्ञातसमाधाविवेकात्म्यधीदार्ढ्याज्जाग्रत्स्वप्नयोरपि तदेवपश्यन्कर्मणानलिप्यतइत्यर्थः। ज्ञानमूलेति ज्ञानंविद्यातस्याःमूलंमाया ब्रह्माकारांतःकरणवृत्तेरपिमायाकार्यत्वात् मायात्मकंमिथ्यारूपंक्लेशं अविद्यादिरूपंअतिवृत्तस्यअतिक्रम्यगतस्य योगिनःलोकसंबंधि

इंद्रियैःसृज्यतेयद्यत्तत्तद्व्यक्तमितिस्मृतम् ॥ तदव्यक्तमितिज्ञेयंलिंगग्राह्यमतींद्रियम् १२ यथास्वंग्राहकान्येषांशब्दादीनामिमानितु ॥ इंद्रियाणियदादेहीधारयन्निवतप्यते १३ लोकेविततमात्मानंलोकंचात्मनिपश्यति ॥ परापरज्ञःसक्तःसन्सतुभूतानिपश्यति १४ पश्यतःसर्वभूतानिसर्वावस्थासुसर्वदा ॥ ब्रह्मभूतस्यसंयोगोनाशुभेनोपपद्यते १५ ज्ञानमूलात्मकंक्लेशमतिवृत्तस्यपौरुषम् ॥ लोकवृत्तिप्रकाशेनज्ञानमार्गेणगम्यते १६ अनादिनिधनंजंतुमात्मयोनिंसदाव्ययम् ॥ अनौपम्यममूर्तंचभगवानाहबुद्धिमान् १७ तपोमूलमिदंसर्वंयन्मांविप्रानुपृच्छसि ॥ इंद्रियाण्येवसंयम्यतपोभवतिनान्यथा १८ इंद्रियाण्येवतत्सर्वंयत्स्वर्गनरकावुभौ ॥ निगृहीतविसृष्टानिस्वर्गायनरकायच १९ एषयोगविधिःकृत्स्नोयावदिंद्रियधारणम् ॥ एतन्मूलंहितपसःकृत्स्नस्यनरकस्यच २० इंद्रियाणांप्रसंगेनदोषमार्च्छत्यसंशयम् ॥ सनियम्यतुतान्येवततःसिद्धिमवाप्नुयात् २१ षण्णामात्मनिनित्यानामैश्वर्यंयोऽधिगच्छति॥नसपापैःकुतोऽनर्थैर्युज्यतेविजितेंद्रियः २२

न्याःवृत्तेर्वर्तनजीवनात्मिकायाःप्रकाशोयेनवा दर्शनज्ञानरूपेण ज्ञानमार्गेण पौरुषंपरमपुरुषार्थरूपो मोक्षो गम्यतेप्रकाशते माधिक्येवाविद्यामायिकैवविद्ययानष्टाचेन्मुच्यतेइत्यर्थःयथोक्तं श्रीभागवते । 'विद्याविद्येममतनूविद्ध्युद्धवशरीरिणां ॥ मोक्षबंधकरीआद्येमायया मेविनिर्मिते'इति । ज्ञानपूर्वात्मकामिति पाठेऽपिसएवार्थः १६ मुक्तजीवस्यस्वरूपमाहअनादीति आद्यविशेषणेनलोकायतसंमतंदेहस्यात्मत्वंनिरस्तं जंतुंपुत्तिकादिब्रह्मांतंजीवं आत्मयोनिंजीवस्यात्मयोनित्वंवदताजीवत्वहेतोरविद्यादेःपृथक्सत्ता सांख्याद्यभिमतानिरस्ता अव्ययमितितार्किकाभिमतंसुखदुःखादिविकारवत्त्वंनिरस्तं सदेतिआगंतुकविकारास्पर्शित्वमुक्तं एतेनैवक्षणिकशून्यवादावपिनिरस्तौ अमूर्तमितिअतएवात्मवादो देहसंमितात्मवादश्चपरास्तः अनौपम्यंतर्कागम्यमित्यर्थः भगवानाह । 'स्वनिःश्वसितरूपेणवेदेन हेतुदृष्टांतवर्जितं ॥ नित्यंविभुंसर्वगतंसुसूक्ष्मंयद्भूतयोनिंपरिपश्यंतिधीराः' इत्यादिना बुद्धिमान्बुद्धिःनियन्तृत्वेनास्यास्तीतिसतथा १७ तपोध्यानं १८ इंद्रियाणिनिगृहीतानिस्वर्गाय विसृष्टानिनरकायेतियोजनयापूर्वार्धस्यैवव्याख्या १९।२० एतन्मूलमित्येतद्व्याचष्टे इंद्रियाणामिति दोषंरागविद्वेषादिरूपं आर्च्छतिप्राप्नोति २१ षण्णामनःषष्ठानामिंद्रियाणांनित्यानां आत्मनिकल्पितत्वेन रज्जुभुजंगवदाद्यंतशून्यानां ऐश्वर्यंनियंतृत्वं अनर्थैः प्रमातृत्वादिकर्तृत्वभोक्तृत्वरूपैः २२

उक्तेऽर्थे प्रमाणसूचनार्थं 'आत्मानंरथिनंविद्धिशरीरंरथमेवच' इत्यादिकठवल्लीनामर्थंसंगृह्णातिरथइत्यादिना २३ आत्माबुद्धिः २४ इंद्रियाणामजये शास्त्रजाऽपिप्रज्ञानश्यतीत्याहइंद्रियाणामिति २५ अनुविधीयतइतिकर्मकर्तरिलकारः यस्येंद्रियस्याधीनंमनोभवतितदेवप्रज्ञांनाशयतीत्यर्थः २६ षट्सुसंकल्पेषुशब्दादिषु फलागमेतज्जन्येसुखाद्युपलंभेविषये विप्रतिपद्यंते रागिणः सुखमुपादेयमित्याहुर्वीतरागा हेयमित्यादिरूपाविप्रतिपत्तिः तत्रयस्तेषुअध्यवसितं वस्तुदृष्ट्यानिश्चितं यद्ध्येयत्वं तदेवाध्यातुंशीलंयस्यसः विषयदोषदर्शनेनवीतरागइत्यर्थः २७ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे एकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥ ॥ पूर्वाध्यायांतोक्तविप्रतिपत्तिकारणंगुणत्रयंसकार्यंवक्तुमारमते एवामिति सूक्ष्मेब्रह्मणि सू

रथःशरीरंपुरुषस्यदृष्टमात्मानियंतेंद्रियाण्याहुरश्वान् ॥ तैरप्रमत्तःकुशलीसदश्वैर्दांतैःसुखंयातिरथीवधीरः २३ षण्णामात्मनियुक्तानामिंद्रियाणांप्रमाथिनाम् ॥ योधीरोधारयेद्रश्मीन्सस्यात्परमसारथिः २४ इंद्रियाणांप्रसृष्टानांहयानामिववर्त्मसु ॥ धृतिंकुर्वीतसारथ्येधृत्यातानिजयेद्ध्रुवम् २५ इंद्रियाणांविचरतांयन्मनोऽनुविधीयते ॥ तदस्यहरतेबुद्धिंनावंवायुरिवांभसि २६ येषुविप्रतिपद्यंतेषट्सुमोहात्फलागमम् ॥ तेष्वध्यवसिताध्यायीविंदतेध्यानजंफलम् २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणव्याधसंवादेएकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥ छ ॥ मार्कंडेयउवाच ॥ एवंतु सूक्ष्मेकथितेधर्मव्याधेनभारत ॥ ब्राह्मणःसपुनःसूक्ष्मंपप्रच्छसुसमाहितः १ ॥ ब्राह्मणउवाच ॥ सत्त्वस्यरजसश्चैवतमसश्चयथातथम् ॥ गुणांस्तत्त्वेनमेब्रूहियथावदिहपृच्छतः २ ॥ व्याधउवाच ॥ हंततेकथयिष्यामियन्मांत्वंपरिपृच्छसि ॥ एषांगुणान्पृथक्त्वेननिबोधगदतोमम ३ मोहात्मकंतमस्तेषांरजएषांप्रवर्तकम् ॥ प्रकाशबहुलत्वाच्चसत्त्वंज्यायइहोच्यते ४ अविद्याबहुलोमूढःस्वप्नशीलोविचेतनः ॥ दुर्हृषीकस्तमोध्यस्तःसक्रोधस्तामसोऽलसः ५ प्रवृत्तवाक्योमंत्रीचयोनराग्र्योऽनसूयकः ॥ विधित्समानोविप्रर्षेस्तब्धोमानीसराजसः ६ प्रकाशबहुलोधीरोनिर्विधित्सोऽनसूयकः ॥ अक्रोधनोनरोधीमान्दांतश्चैवससात्विकः ७ सात्विकस्त्वथसंबुद्धोलोकवृत्तेनक्लिश्यते ॥ यदाबुध्यतिबोद्धव्यंलोकवृत्तंजुगुप्सते ८ विरागस्यचरूपंतुपूर्वमेवप्रवर्तते ॥ मृदुर्भवत्यहंकारःप्रसीदत्यार्जवंचयत् ९ ततोऽस्यसर्वद्वंद्वानिप्रशाम्यंतिपरस्परम् ॥ नचास्यसंशयोनामकश्चिद्भवतिकश्चन १० शूद्रयोनौहिजातस्यसद्गुणानुपतिष्ठतः ॥ वैश्यत्वंलभतेब्रह्मन्क्षत्रियत्वंतथैवच ११ आर्जवेवर्तमानस्यब्राह्मण्यमभिजायते ॥ गुणास्तेकीर्तिताःसर्वेकिंभूयःश्रोतुमिच्छसि १२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राह्मणव्याधसंवादेद्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥ ॥ छ ॥

क्ष्मंतत्प्राप्तिकारणंगुणत्रयविभागं तेनार्थाद्गुणेभ्यो ब्रह्म विविक्तमित्युक्तंभवति १ । २ । ३ । ४ दुर्हृषीकः दुःस्थेंद्रियः ५ विधित्साविशेषतृष्णा धेट्पानेअस्यरूपं प्रवृत्तवाक्यः प्रवृत्तिवाक् अनसूयकःपरदोषादर्शी तत्रहेतुः विधित्समानइति स्तंभोनमस्काराद्यकरणं मानस्तद्धेतुमहत्त्वाभिमानस्तदुभयवान् ६ । ७ लोकवृत्तेरजस्तमःकार्येयदायतःतज्जुगुप्सतेनिंदति ८ विरागस्यरागहीनस्यरूपंलक्षणंमृदुःस्तंभादिहीनः आर्जवमकौटिल्यं ९ द्वंद्वानिमानापमानादीनि १० जातस्येतिकर्मणिषष्ठी वैश्यत्वंकर्तृ सद्गुणवंतंवैश्यत्वादयःस्वयमायांतीतिगुणकृतएववर्णविभागोनजातिकृतइतिभावः ११ ब्राह्मण्यंब्रह्मवित्त्वं १२ ॥ इत्यारण्यकेपर्वणिनी०भा०द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

ज्ञानक्रियाशक्तिमतोर्धीप्राणयोरात्मान्यत्वं'अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥ अपांरेतांसिजिन्वति'इतिमंत्रप्रकाशितंवकुमारमते पार्थिवमिति पार्थिवंपृथिवीबाहुल्याद्धातुंस्त्वगादि मयंदेहंआसाद्यप्राप्यप्रकाशप्रवृत्तिमोहाद्याश्रयोऽग्निर्विज्ञानाख्यस्तेजोधातुःशारीरःशरीराभिमानीकथंभवेत् अवकाशविशेषेणनाडीमार्गभेदेनवर्तयतेशरीरंचेष्टयते १ । २ मूर्धेनिसह स्त्रारेस्थितत्वाद्धात्श्रेष्ठत्वाद्वामूर्धानंचिदात्मानं अग्निर्विज्ञानात्माऽऽश्रितस्तदुपाधितांप्राप्तःसन् शरीरंपरिपालयन् चिरप्रतिबिंबंप्राप्यधीधातुःशरीरंचेतयतीत्यर्थः एतेनाग्निर्मूर्द्धेतिपदद्वयं व्याख्यातं । प्राणस्तुतयोरुभयोरप्युपाधिरित्याह प्राणइतिएतेनचिद्विज्ञानद्वयंवायुशब्दितं तस्यककुदिवककुत् चालकतयाश्रेष्ठःप्राणइत्युक्तम् ३ अस्यककुत्त्वंव्याचष्टेभूतमिति प्राणेचिद्वि ज्ञानाभ्यांयुक्तेसूत्रात्मरूपेब्रह्मकार्यरूपंयोनिर्विराडादेः ४ सचिद्विज्ञानप्राणानांसंघातोजंतुःसमष्टिजीवः सर्वेषांभूतानांकार्यकारणरूपाणांआत्माचेतयिता सनातनःपुरुषःपरंब्रह्मचसएव निरस्तोपाधिःसन् सएवोपाधिपक्षपातीसन्महदाद्यात्माभवति विषयश्चशब्दादिःसएव । एतेनपतिःपृथिव्याअयमितिद्वितीयःपादोव्याख्यातः । अयंचिद्विज्ञानप्राणसंघातःपृथिव्याःक्षेत्र स्येतिश्रुतिपदयोरर्थः ५ एवमिति सर्वत्रअतर्बहिश्चस्थितंसर्वंप्राणेनदेहलीदीपवन्मध्यस्थेनआंतरंविज्ञानंबाह्यंदेहेंद्रियादिकंचपाल्यतइत्यर्थः । अपांरेतांसिजिन्वतीत्यंतपादंव्याचष्टे पृष्ठत

॥ ब्राह्मणउवाच ॥ पार्थिवंधातुमासाद्यशारीरोऽग्निःकथंभवेत् ॥ अवकाशविशेषेणकथंवर्तयतेऽनिलः १ ॥ मार्कंडेयउवाच ॥ प्रश्नमेतंसमुद्दिष्टंब्राह्मणेनयुधिष्ठिर व्याधस्तुकथयामासब्राह्मणायमहात्मने २ ॥ व्याधउवाच ॥ मूर्धानमाश्रितोवह्निःशरीरंपरिपालयन् ॥ प्राणोमूर्धनिचाग्नौचवर्तमानोविचेष्टते ३ भूतंभव्यंभ विष्यंचसर्वंप्राणेप्रतिष्ठितम् ॥ श्रेष्ठंतदेवभूतानांब्रह्मयोनिमुपास्महे ४ सजंतुःसर्वभूतात्मापुरुषःससनातनः ॥ महान्बुद्धिरहंकारोभूतानांविषयश्चसः ५ एवं त्विहससर्वत्रप्राणेनपरिपाल्यते ॥ पृष्ठतस्तुसमानेनस्वांस्वांगतिमुपाश्रितः ६ बस्तिमूलंगुदंचैवपावकंसमुपाश्रितः ॥ वहन्मूत्रंपुरीषंवाऽप्यपानःपरिवर्तते ७ प्रयत्नेकर्मणिबलेसएषत्रिषुवर्तते ॥ उदानमितितंप्राहुरध्यात्मविदुषोजनाः ८ संधौसंधौसंनिविष्टःसर्वेष्वपितथाऽनिलः ॥ शरीरेषुमनुष्याणांव्यानइत्युपदिश्य ते ९ धातुष्वग्निस्तुविततःसतुवायुसमीरितः ॥ रसान्धातूंश्चदोषांश्चवर्तयन्परिधावति १० प्राणानांसंनिपातात्तुसन्निपातःप्रजायते ॥ ऊष्माचाग्निरितिज्ञे योयोऽन्नंपचतिदेहिनाम् ११ समानोदानयोर्मध्येप्राणापानौसमाहितौ ॥ समर्थितस्त्वधिष्ठानंसम्यक्पचतिपावकः १२

इत्यादिना । 'अन्नमयंहिसोम्यमनआपोमयःप्राणस्तेजोमयीवाक्'इतिश्रुतेः साक्षात्परंपरयावाप्राणमनइंद्रियाण्यपांरेतांसिजिन्वतितर्पयति संघातात्मेतिश्रुतिपदानामर्थः पृष्ठतःउपाध्यावे शाज्जीवत्वमाप्त्यनंतरंसमानेनइत्थंभावेतृतीया स्वांस्वांपृथक्गम्यांगतिंआश्रितोभवति समानवायुत्वंप्राप्तःपावकंजाठरमाश्रितःसन् बस्तिमूलंमूत्राशयंगुदंपुरीषाश्रयंच जाठरस्थःसमानोऽशि तपीतादिकंपाचयित्वाऽपानरूपीभूत्वास्वंस्वंस्थानंनयतीत्यर्थः । श्लोकद्वयं ६।७ कर्मगमनादि प्रयत्नस्तदनुकूलाचेष्टा बलंभारोद्यमनादौसामर्थ्यं विदुषःसकाशाच्छ्रुत्वेतिशेषः ८।९ धातुषुत्व गादिषुअग्निर्जाठरःविततोव्याप्तः रसादीन्परिवर्तयन्परिणामयन् रसान्अन्नादीन् धातूंस्त्वगादीन् दोषान्पित्तादीन् १० कथंवर्तयतेऽनिलइतिपृष्टंतत्राह प्राणानामिति सन्निपातःसंघर्षस्त ज्जउष्माऽग्निर्जाठरोभवति ११ संनिपातंव्याकरोति समानेति नाभिस्थंसमानं हृदिस्थःप्राणइति गुदस्थोपानः कंठस्थमुदानमेति तेनप्राणापानसमानानामभिदेशेसंघर्षेणसमर्थितोनिष्पादि तःअधिष्ठानंसप्तधातुमयंशरीरंसम्यक्पचतिवृद्ध्यादिपरिणामंनयति १२

अस्यपावकस्यपायुपर्यंतोगुदप्रवेशोगुदसंज्ञितोऽपानोभवति स्रोतांसिनाडीमार्गाः तस्माद्पानात्प्राणेषुप्राणादिषुपंचसु प्राणादिभ्यःपावकोत्पत्तिः पावकाच्चापानद्वाराप्राणाद्युत्पत्तिर्भवती तिप्रघट्टकार्थः १३ एतदेवोपपादयतिअग्नीति अग्निवेगात्कंदुकवदूर्ध्वमुत्प्लुतःप्राणोगुदांतेप्रतिहतःपुनरुत्पतन्नग्निमप्युत्क्षिपतीत्यर्थः दृश्यतेचाग्निवेगात्बाष्पवायुवृद्धिर्वायुवेगाच्चाग्निवृद्धिःतथा चप्राणरोधेसतिजाठरंभयंनिवर्ततेऽतःप्राणोरोद्धव्यइतिभावः १४ जाठरनिरोधेसर्वेषामिंद्रियाणांनिरोधोभवतीत्याशयेनाह पक्वेति पक्वाशयःपक्वान्नस्थानंआमाशयःअपक्वान्नस्थानं नाभि मध्येइति तात्स्थ्याज्जाठरेप्राणाइंद्रियाणिप्रतिष्ठितालीनाभवंतीत्यर्थः १५ सर्वेरसाःहृदयाद्धृदयंप्राप्यदशभिःप्राणैःप्रेरिताः तेचप्राणादयःपंच नागकूर्मकृकलदेवदत्तधनंजयाश्चपंच १६ एषमूर्द्धादिपायुपर्यंतःतत्परंब्रह्ममूर्द्धनिसुषुम्नयानाड्यासहस्रारंप्राप्य येतत्रात्मानंप्राणोपाधिमाहितवंतस्तेगच्छंति देहिषुजीवदेहेषुसर्वेषामप्येषमार्गोगंतुंयोग्यइतिभावः १७ नकेवलंप्राणरो धएवपुरुषार्थःकिंतुतत्साध्यंविज्ञानमित्याह एकादशेत्यादिना । 'सप्राणन्नेवप्राणोनामभवति वदन्वाक्पश्यन्चक्षुःशृण्वन्श्रोत्रंमन्वानोमनः' इतिश्रुतेरेकादशविकाराल्लिंगशरीरंतदात्मातत्ता दात्म्यंगतः । यद्यपि 'पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं ॥ अपंचीकृतभूतोत्थंसूक्ष्मांगंभोगसाधनम्'इतिसप्तदशात्मकंलिंगं तथाऽपिमनसिबुद्धेर्दशेंद्रियेषुसामान्याकरणवृत्तिःप्राणाद्या

अस्यापिपायुपर्यंतस्तथास्याद्गुदसंज्ञितः ॥ स्रोतांसितस्माज्जायंतेसर्वप्राणेषुदेहिनाम् १३ अग्निवेगवहःप्राणोगुदांतेप्रतिहन्यते ॥ सऊर्ध्वमागम्यपुनःसमुत्क्षि पतिपावकम् १४ पक्वाशयस्त्वधोनाभ्यामूर्ध्वमामाशयःस्थितः ॥ नाभिमध्येशरीरस्यप्राणाःसर्वेप्रतिष्ठिताः १५ प्रवृत्ताहृदयात्सर्वेतिर्यगूर्ध्वमधस्तथा ॥ वहंत्यन्नरसान्नाड्योदशप्राणप्रचोदिताः १६ योगिनामेषमार्गस्तुयेनगच्छंतितत्परम् ॥ जितक्लमाःसमाधीरामूर्धन्यात्मानमादधुः ॥ एवंसर्वेषुविततौ प्राणापानौहिदेहिषु १७ एकादशविकारात्माकलासंभारसंभृतः ॥ मूर्तिमंतंहितंविद्धिनित्यंयोगजितात्मकम् १८ तस्मिन्यःसंस्थितोह्यग्निर्नित्यंस्थाल्या मिवाहितः ॥ आत्मानंतंविजानीहिनित्यंयोगजितात्मकम् १९ देवोयःसंस्थितस्तस्मिन्नब्बिंदुरिवपुष्करे ॥ क्षेत्रज्ञंतंविजानीहिनित्यंयोगजितात्मकम् २० जीवात्मकानिजानीहिरजःसत्त्वंतमस्तथा ॥ जीवमात्मगुणंविद्धितथाऽऽत्मानंपरात्मकम् २१ सचेतनंजीवगुणंवदंतिसचेष्टतेचेष्टयतेचसर्वम् ॥ ततः परंक्षेत्रविदोवदंतिप्राकल्पयद्योभुवनानिसप्त २२

वायवःपंचेतिसांख्यमतेनप्राणपंचकस्यचातर्भावंविवक्षित्वाएकादशविकारात्मेतिज्ञेयं कलाःषोडश प्राणःश्रद्धाखंवायुर्ज्योतिरापःपृथिवींद्रियंमनोऽन्नंवीर्यंतपोमंत्राःकर्मलोकानामचेति एता सांसंभारेणसंभृतःकलारूपोपाधिनामूर्तिहीनमपिमूर्तिमंतं सूक्ष्मस्थूलदेहवंतंआत्मानंविद्धिविजानीहि । ज्ञानसाधनमाह नित्यमिति योगेनजितआत्माबुद्धिर्येनतंआत्मानमित्युत्तरादपकृष्यते १८ प्राणादिभ्योजीवंविविनक्तितस्मिन्निति तस्मिन्कलासंभारेअग्निवदात्माप्रकाशरूपः स्थालीवत्कलाअप्रकाशात्मिकाः आत्मानंत्वंपदार्थं १९ अस्यतत्पदार्थाभेदमाह देवइति अब्बि दुदृष्टांतेनासंगत्वंदर्शितंक्षेत्रज्ञंपरमात्मानं २० ननुत्वंपदार्थःसंगी तत्पदार्थोऽसंगःकथमनयोरभेदइत्याशंक्य बिंबप्रतिबिंबयोरिवेत्याशयेनाह जीवात्मकानीति रजआदिनाप्रवृत्त्यादयो धर्माजीवात्मकाउपाधिविशिष्टाश्रिताश्चांचल्यादयइव जलचंद्रेतंजीवंआत्मगुणंईश्वरस्यगुणंभृत्यवत्प्रेष्यं आत्मानंईश्वरंपरात्मकंनिर्गुणंविद्धि अयमर्थः । तरंगतटाकप्रतिबिंबकल्पोधीमा योपाधीजीवेश्वरौनियम्यनियामकौतयोर्जीवईश्वरात्मा ईश्वरस्तुबिंबस्थानीयासंगचिद्रूपइति तथाचश्रुतिः । 'एकएवहुभूतात्माभूतेभूतेव्यवस्थितः ॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवत्' इतिभूतात्मा नित्यसिद्धश्चिदात्मा एकधेतिईश्वररूपेण बहुधेतिजीवरूपेण२१ अचेतनंजडंशरीरादि सचेतनमितितद्देवप्राह्नं तत्जीवस्यगुणंभोग्यंवदंति सआत्माचेष्टतेजीवरूपेण चेष्टयते–

ईश्वररूपेण ततस्ताभ्यांजीवेश्वराभ्यांपरंउत्कृष्टंतंवदंति योभुवनानिसप्तभूरादीनिप्राकल्पयत्प्रावर्तयत् ननुकथंनिरुपाधेःप्रवर्तकत्वमुच्यतेअविद्यानतयेतिब्रूमः तथाचश्रुतिः । 'यतोवाइमानिभूतानिजायंते'इतिब्रह्मणोलक्षणमुक्त्वा अन्नमयादिकोशकारणीभूतानामन्नादिशब्दितानांविराडादीनांजगत्कारणत्वं । 'अन्नाद्ध्येवखल्विमानिभूतानि जायंते' इत्यादिनास्थूलारुंधतीन्यायेन विराडादीनिसोपाधिकानिब्रह्माणिउक्त्वा । 'प्रज्ञानघनएवानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादएषसर्वेश्वरः'इतिमांडूक्यश्रुतिप्रसिद्धस्यानंदमयस्यईश्वरस्यकारणीभूते आनंदाख्ये ब्रह्मणि । 'आनंदाद्ध्येवखल्विमानि भूतानिजायंते'इतिमुख्यंकारणत्वंव्यवस्थापितं तथाप्रदेशांतरेऽपि । 'कोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यात्'इतिश्रुतिराकाशाख्येकारणेयद्यानंदोनस्यात्तर्हितत्कार्येदेहादौकुतःप्राणनादिस्यादिति तत्रैवमुख्यंप्रवर्तकत्वंदर्शयति २२ ननुईश्वरसद्भावेभुवनप्रवृत्तिरेवकारणंदृश्यते नतुतदन्यस्यनिर्गुणस्य ईश्वरेणैवतस्यान्यथासिद्धत्वादित्याशंक्याह एवमिति भूतात्मानित्यसिद्धआत्माआनंदाख्यः ऐश्वर्यस्यतुईशितव्यसापेक्षत्वान्ननित्यसिद्धत्वं सुषुप्तिप्रलययोरीशितव्याभावादनीश्वरत्वापत्तेरित्याभंदस्यैवनित्यमैश्वर्यंमाययाऽभिव्यज्यतइतिभावः ज्ञानं ब्रह्माकारावृत्तिस्तत्साक्षिभिस्तेनवेद्यादीशादन्यस्तत्प्रकाशकइतिदर्शितं २३ प्रसन्नात्माद्वृत्तिजनितकालुष्यस्यागाद्विशुद्धचितः आ

एवंसर्वेषुभूतेषुभूतात्मासंप्रकाशते ॥ दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयाज्ञानवेदिभिः २३ चित्तस्यहिप्रसादेनहंतिकर्मशुभाशुभम् ॥ प्रसन्नात्माऽऽत्मनिस्थित्वासुखमानंत्यमश्नुते २४ लक्षणंतुप्रसादस्ययथातृप्तःसुखंस्वपेत् ॥ निवातेवायथादीपोदीप्येत्कुशलदीपितः २५ पूर्वरात्रेपरेचैवयुंजानःसततंमनः ॥ लघ्वाहारोविशुद्धात्मापश्यन्नात्मानमात्मनि २६ प्रदीप्तेनेवदीपेनमनोदीपेनपश्यति ॥ दृष्ट्वाऽऽत्मानंनिरात्मानंसतदाविप्रमुच्यते २७ सर्वोपायैस्तुलोभस्यक्रोधस्यचविनिग्रहः ॥ एतत्पवित्रंलोकानांतपोवैसंक्रमोमतः २८ नित्यंक्रोधात्तपोरक्षेद्धर्मंरक्षेच्चमत्सरात् ॥ विद्यांमानापमानाभ्यामात्मानंतुप्रमादतः २९ आनृशंस्यंपरोधर्मःक्षमाचपरमंबलम् ॥ आत्मज्ञानंपरंज्ञानंसत्यंव्रतपरंव्रतम् ३० सत्यस्यवचनंश्रेयःसत्यंज्ञानंहितंभवेत् ॥ यद्भूतहितमत्यंतंतद्वैसत्यंपरंमतम् ३१ यस्यसर्वेसमारंभानिराशीर्बंधनाःसदा ॥ त्यागेयस्यहुतंसर्वंसत्यागीसचबुद्धिमान् ३२ यतोनगुरुरप्येनंश्रावयेदुपपादयेत् ॥ तंविद्याद्ब्रह्मणोयोगंवियोगंयोगसंज्ञितम् ३३ नहिंस्यात्सर्वभूतानिमैत्रायणगतश्चरेत् ॥ नेदंजीवितमासाद्यवैरंकुर्वीतकेनचित् ३४ आकिंचन्यंसुसंतोषोनिराशित्वमचापलम् ॥ एतदेवपरंज्ञानंसदाऽऽत्मज्ञानमुत्तमम् ३५ परिग्रहंपरित्यज्यभवेद्बुद्ध्यायतव्रतः ॥ अशोकंस्थानमाश्रित्यनिश्चलंप्रेत्यचेहच ३६

त्मनिस्थित्वाचित्तसारूप्यमपित्यक्त्वा सुखंअनायासेन आनंत्यंमोक्षं २४ यथाजलादुत्तीर्णस्यशरीरेसंश्लिष्टःसूक्ष्मतमःपटःसन्नप्यसन्निवभाति एवंसमाधौ विकल्पाभावात्सदपिचित्तंनभातीतिसुषुप्तितुल्यतांप्रसादस्याहलक्षणमिति २५ विशुद्धात्माशुद्धचित्तः आत्मानंब्रह्मआत्मनिहृदये २६ निरात्मानंनिर्गुणंविलीनंचित्तंयस्मिन्मृतं । 'तावन्मनोनिरोद्धव्यंहृदियावत्क्षयंगतं । एतज्ज्ञानंचध्यानंचशेषोऽन्योग्रंथविस्तरः'इतिश्रुतिः चित्तक्षयएवात्मदर्शनमित्यर्थः २७ संक्रमःसेतुः पारप्रापकोमार्गः २८ । २९ । ३० भूतहितमनृतमपिसत्यमेवभूतानामहितकरंसत्यमप्यनृतमेवेत्यर्थः ३१ त्यागेफलत्यागे हुतंहोमयज्ञदानादि त्यागीसंन्यासी ३२ एनंब्रह्मणोयोगंनश्रावयेत् अपदार्थत्वात्किंतुउपपादयेल्लक्षणयाज्ञापयेत् तंचित्तवियोगमेवविरुद्धलक्षणयायोगसंज्ञितं प्राहुः । 'तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितम्'इत्याद्यागमाइत्यर्थः ३३ मैत्रंमित्रभावस्तदेवायनंमार्गस्तद्व्रतश्चरेत् ३४ ज्ञानंज्ञानसाधनंज्ञानमपिस्तौतिसाधनेप्रवृत्त्यर्थंसदाऽऽत्मज्ञानमुत्तममिति ३५ अशोकंस्थानंवैराग्यं प्रेत्यमृत्वा स्वर्गादौ इहचराज्यादौ आश्रित्य यतव्रतो भवेत् ३६

३७ गुणाःलोकवेदादयःअगुणायस्मिन्तंगुणागुणं । 'अत्रलोकाअलोकावेदाअवेदाः'इत्यादिश्रुतेः । अनासंगंरूपादिसंगहीनं अतएवएककार्यंएकेनप्रत्यगात्मनैवनिष्पाद्यं अनंतरं अज्ञानमात्रापनयाद्रम्यं नतुक्रियाव्यवहितंस्वर्गादिसुखवत् वृत्तंप्राक्सिद्धं एकमेवपद्यतेगम्यते नतुज्ञानज्ञेयविभागोयस्मिन्तत्एकपदं ३८ । ३९ । ४० ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे

तपोनित्येनदांतेनमुनिनासंयतात्मना ॥ अजितंजेतुकामेनभाव्यंसंगेष्वसंगिना ३७ गुणागुणमनासंगमेककार्यमनंतरम् ॥ एतद्ब्रह्मणोवृत्तमाहुरेकपदंसुखम् ३८ परित्यजतियोदुःखंसुखंचाप्युभयंनरः ॥ ब्रह्मप्राप्नोतिसोऽत्यंतमसंगेसचगच्छति ३९ यथाश्रुतमिदंसर्वंसमासेनद्विजोत्तम ॥ एतत्तेसर्वमाख्यातंकिंभूयःश्रोतुमिच्छसि ४० ॥ इतिश्रीम० आरण्यकेप० मार्कंडेयसमास्याप० ब्राह्मणव्याधसंवादे त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥ ॥ मार्कंडेयउवाच ॥ एवंसंकथितेकृत्स्नेमोक्षधर्मेयुधिष्ठिर ॥ दृढप्रीतमनाविप्रोधर्मव्याधमुवाचह १ न्याययुक्तमिदंसर्वंभवतापरिकीर्तितम् ॥ नतेऽस्त्यविदितंकिंचिद्धर्मेष्विहदृश्यते २ ॥ व्याधउवाच ॥ प्रत्यक्षंममयोधर्मस्तंचपश्यद्विजोत्तम ॥ येनसिद्धिरियंप्राप्तामयाब्राह्मणपुंगव ३ उत्तिष्ठभगवन्क्षिप्रंप्रविश्याभ्यंतरंगृहम् ॥ द्रष्टुमर्हसिधर्मज्ञमातरंपितरंचमे ४ ॥ मार्कंडेयउवाच ॥ इत्युक्तःसप्रविश्याथददर्शपरमार्चितम् ॥ सौधंहृद्यंचतुःशालमतीवचमनोरमम् ५ देवतागृहसंकाशंदैवतैश्चसुपूजितम् ॥ शयनासनसंबाधंगंधैश्चपरमैर्युतम् ६ तत्रशुक्लांबरधरौपितरावस्यपूजितौ ॥ कृताहारौतुसंतुष्टावुपविष्टौवरासने ॥ धर्मव्याधस्तुतौदृष्ट्वापादेषुशिरसाऽपतत् ७ ॥ वृद्धावूचतुः ॥ उत्तिष्ठोत्तिष्ठधर्मज्ञधर्मस्त्वामभिरक्षतु ॥ प्रीतौस्वस्तवशौचेनदीर्घमायुरवाप्नुहि ८ गतिमिष्टांतपोज्ञानंमेधांचपरमांगतः ॥ सत्पुत्रेणत्वयापुत्रनित्यंकालेसुपूजितौ ९ नतेऽन्यद्दैवतंकिंचिद्दैवतेष्वपिवर्तते ॥ प्रयतत्वाद्द्विजातीनांदमेनासिसमन्वितः १० पितुःपितामहायेचतथैवप्रपितामहाः ॥ प्रीतास्तेसततंपुत्रदमेनावांचपूजया ११ मनसाकर्मणावाचाशुश्रूषानैवहीयते ॥ नचान्याहितथाबुद्धिर्दृश्यतेसांप्रतंतव १२ जामदग्न्येनरामेणयथावृद्धौसुपूजितौ ॥ तथात्वयाकृतंसर्वंतद्विशिष्टंचपुत्रक १३ ततस्तंब्राह्मणंताभ्यांधर्मव्याधोन्यवेदयत् ॥ तौस्वागतेनतंविप्रमर्चयामासतुस्तदा १४ प्रतिपूज्यचतांपूजांद्विजःपप्रच्छतावुभौ ॥ सुपुत्राभ्यांसभृत्याभ्यांकच्चिद्वांकुशलंगृहे ॥ अनामयंचवांकच्चित्सदैवेहशरीरयोः १५ ॥ वृद्धावूचतुः ॥ कुशलंनौगृहेविप्रभृत्यवर्गेचसर्वशः ॥ कच्चित्त्वमप्यविघ्नेनसंप्राप्तोभगवन्निति १६ मार्कंडेयउवाच ॥ बाढमित्येवतौविप्रःप्रत्युवाचमुदाऽन्वितः ॥ धर्मव्याधोनिरीक्ष्याथ

४१ ततस्तंवाक्यमब्रवीत् १७ ॥ व्याधउवाच ॥ पितामाताचभगवन्नेतौमदैवतंपरम् ॥ यद्दैवतेभ्यःकर्तव्यंतदेताभ्यांकरोम्यहम् १८ त्रयस्त्रिंशद्यथादेवाःसर्वेशक्रपुरोगमाः ॥ संपूज्याःसर्वलोकस्यतथावृद्धाविमौमम १९ उपहारानाहरंतोदेवतानांयथाद्विजाः ॥ कुर्वंतितद्वदेताभ्यांकरोम्यहमतंद्रितः २०

ब्राह्मणव्याधसंवादे त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥ ॥ ७ ॥ एवमिति १ । २ । ३ । ४ । ५ शयनासनसंबाधं शयनादिसंकीर्णं ६ । ७ । ८ । ९ १० । ११ । १२ । १३ । १४ वांयुवयोः १५ नौ आवयोः १६ । १७ । १८ । १९ । २०

२१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेचतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥ ॥ ७ ॥ ॥ ७ ॥

एतौमेपरमंब्रह्मन्पितामाताचदैवतम् ॥ एतौपुष्पैःफलैरत्नैस्तोषयामिसदाद्विज २१ एतावेवाग्नयोमह्यंयान्वदंतिमनीषिणः ॥ यज्ञावेदाश्चचत्वारःसर्वमेतौ
ममाद्विज २२ एतदर्थंममप्राणाभार्यापुत्राःसुहृज्जनः ॥ सपुत्रदारःशुश्रूषांनित्यमेवकरोम्यहम् २३ स्वयंचस्नापयाम्येतौतथापादौप्रधावये ॥ आहारंचप्रय
च्छामिस्वयंचद्विजसत्तम २४ अनुकूलंतथावच्मिविप्रियंपरिवर्जये ॥ अधर्मेणापिसंयुक्तंप्रियमाभ्यांकरोम्यहम् २५ धर्ममेवंगुरुंज्ञात्वाकरोमिद्विजसत्तम ॥
अतंद्रितःसदाविप्रशुश्रूषांवैकरोम्यहम् २६ पंचैवगुरवोब्रह्मन्पुरुषस्यबुभूषतः ॥ पितामाताऽग्निरात्माचगुरुश्चद्विजसत्तम २७ एतेषुयस्तुवर्तेतसम्यगेव
द्विजोत्तम ॥ भवेयुरग्नयस्तस्यपरिचीर्णास्तुनित्यशः ॥ गार्हस्थ्येवर्तमानस्यएषधर्मःसनातनः २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्याप
र्वणिद्विजव्याधसंवादेचतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥ ॥ ७ ॥ ॥ मार्कंडेयउवाच ॥ गुरूनिवेद्यविप्रायतौमातापितरावुभौ ॥ पुनरेवसधर्मा
त्माव्याधोब्राह्मणमब्रवीत् १ प्रवृत्तचक्षुर्जातोऽस्मिसंपश्यतपसोबलम् ॥ यदर्थमुक्तोऽसितयागच्छत्वंमिथिलामिति २ पतिशुश्रूषपरयादांतयासत्यशीलया ॥
मिथिलायांवसेद्व्याधःसतेधर्मान्प्रवक्ष्यति ३ ॥ ब्राह्मणउवाच ॥ पतिव्रतायाःसत्यायाःशीलाढ्यायायतव्रत ॥ संस्मृत्यवाक्यंधर्मज्ञगुणवानसिमेमतः ४ ॥ व्या
धउवाच ॥ यत्तदात्वंद्विजश्रेष्ठतयोक्तोमांप्रतिप्रभो ॥ दृष्टमेवतयासम्यगेकपत्न्यानसंशयः ५ त्वदनुग्रहबुद्ध्यातुविप्रेतद्दर्शितंमया ॥ वाक्यंचशृणुमेतातयत्ते
वक्ष्येहितंद्विज ६ त्वयाविनिकृतामाता।पिता चद्विजसत्तम ॥ अनिसृष्टोऽसिनिष्क्रांतोगृहात्ताभ्यामनिंदित ७ वेदोच्चारणकार्यार्थमयुक्तंतत्त्वयाकृतम् ॥ तवशो
केनवृद्धौतावंधीभूतौतपस्विनौ ८ तौप्रसादयितुंगच्छमात्वांधर्मोऽत्यगादयम् ॥ तपस्वीत्वंमहात्माचधर्मेचनिरतःसदा ९ सर्वमेतदपार्थंतेक्षिप्रंतौसंप्रसादय ॥
श्रद्दधस्वममब्रह्मन्नान्यथाकर्तुमर्हसि ॥ गम्यतामद्यविप्रर्षेश्रेयस्तेकथयाम्यहम् १० ॥ ब्राह्मणउवाच ॥ यदेतदुक्तंभवतासर्वंसत्यमसंशयम् ॥ प्रीतोऽस्मितवभ
द्रंतेधर्माचारगुणान्वित ११ ॥ व्याधउवाच ॥ दैवतप्रतिमोहित्वंयस्त्वंधर्ममनुव्रतः ॥ पुराणंशाश्वतंदिव्यंदुष्प्राप्यमकृतात्मभिः १२ मातापित्रोःसकाशंहि
गत्वात्वंद्विजसत्तम ॥ अतंद्रितःकुरुक्षिप्रंमातापित्रोर्हिपूजनम् ॥ अतःपरमहंधर्मंनान्यंपश्यामिकंचन १३ ॥ ब्राह्मणउवाच ॥ इहाहमागतोदिष्ट्यादिष्ट्या
मेसंगतंत्वया ॥ ईदृशादुर्लभालोकेनराधर्मप्रदर्शकाः १४ एकोनरसहस्रेषुधर्मविद्विद्यतेनवा ॥ प्रीतोऽस्मितवसत्येनभद्रंतेपुरुषर्षभ १५ पतमानोऽद्यनरके
भवताऽस्मिसमुद्धृतः ॥ भवितव्यमथैवंचयद्दृष्टोऽसिमयाऽनघ १६ राजाययातिर्दौहित्रैःपतितस्तारितोयथा ॥ सद्भिःपुरुषशार्दूलतथाऽहंभवताद्विजः १७
मातापितृभ्यांशुश्रूषांकरिष्येवचनात्तव ॥ नाकृतात्मावेदयतिधर्माधर्मविनिश्चयम् १८

॥ गुरुइति १ प्रवृत्तचक्षुर्दिव्यदृष्टिः तपसः पित्रोःशुश्रूषात्मकस्य २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८

१९ कामयाइच्छया २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ निष्टनंतंशब्दंकुर्वंतम् २९ । ३० । ३१ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेपंचदशाधिकद्विश

दुर्ज्ञेयःशाश्वतोधर्मःशूद्रयोनौहिवर्तते ॥ नत्वांशूद्रमहंमन्येभवितव्यंहिकारणम् १९ येनकर्मविशेषेणप्राप्तेयंशूद्रतात्वया ॥ एतदिच्छामिविज्ञातुंतत्त्वेनहिमहा
मते ॥ कामयाब्रूहिमेसर्वंसत्येनप्रयतात्मना २० ॥ व्याधउवाच ॥ अनतिक्रमणीयावैब्राह्मणामेद्विजोत्तम ॥ शृणुसर्वमिदंवृत्तंपूर्वदेहेममाऽनघ २१ अहंहिब्रा
ह्मणःपूर्वमासंद्विजवरात्मजः ॥ वेदाध्यायीसुकुशलोवेदांगानांचपारगः २२ आत्मदोषकृतैर्ब्रह्मन्नवस्थामाप्तवानिमाम् ॥ कश्चिद्राजाममसखाधनुर्वेदपरायणः
२३ संसर्गाद्धनुषिश्रेष्ठस्ततोऽहमभवंद्विज ॥ एतस्मिन्नेवकालेतुमृगयांनिर्गतोनृपः २४ सहितोयोधमुख्यैश्चमंत्रिभिश्चसुसंवृतः ॥ ततोऽभ्यहन्मृगांस्तत्रसु
बहूनाश्रमंप्रति २५ अथक्षिप्तःशरोघोरोमयाऽपिद्विजसत्तम ॥ ताडितश्चऋषिस्तेनशरेणानतपर्वणा २६ भूमौनिपतितोब्रह्मन्नुवाचप्रतिनादयन् ॥ नाप
राध्याम्यहंकिंचित्केनपापमिदंकृतम् २७ मन्वानस्तंमृगंचाहंसंप्राप्तःसहसाप्रभो ॥ अपश्यंतमृषिंविद्धंशरेणानतपर्वणा २८ अकार्यकरणाच्चापिभृशंमेव्यथि
तंमनः ॥ तमुग्रतपसंविप्रंनिष्टनंतंमहीतले २९ अजानताकृतमिदंमयेत्यहमथाब्रुवम् ॥ क्षंतुमर्हसिमेसर्वमितिचोक्तोमयामुनिः ३० ततःप्रत्यब्रवीद्वाक्यमृ
षिर्मांक्रोधमूर्च्छितः ॥ व्याधस्त्वंभविताक्रूरशूद्रयोनावितिद्विज ३१ ॥ इतिश्रीमहाभारतेआरण्यकेप० मार्कंडेयसमास्यापर्वणिब्राह्मणव्याधसंवादेपंचदशा
धिकद्विशततमोऽध्यायः ॥ २१५ ॥ ॥ ७ ॥ ॥ व्याधउवाच ॥ एवंशप्तोऽहमृषिणातदाद्विजवरोत्तम ॥ अभिप्रसादयमृषिंगिरात्राहीतिमांतदा १
अजानतामयाऽकार्यमिदमद्यकृतंमुने ॥ क्षंतुमर्हसितत्सर्वंप्रसीदभगवन्निति २ ॥ ऋषिरुवाच ॥ नान्यथाभविताशापएवमेतदसंशयम् ॥ आनृशंस्यात्त्वहं
किंचित्कर्ताऽनुग्रहमद्यते ३ शूद्रयोन्यांवर्तमानोधर्मज्ञोहिभविष्यसि ॥ मातापित्रोश्चशुश्रूषांकरिष्यसिनसंशयः ४ तयाशुश्रूषयासिद्धिंमहत्त्वंसमवाप्स्यसि ॥
जातिस्मरश्चभवितास्वर्गंचैवगमिष्यसि ५ शापक्षयेतुनिर्वृत्तेभविताऽसिपुनर्द्विजः ॥ एवंशप्तःपुरातेनऋषिणाऽस्म्युग्रतेजसा ६ प्रसादश्चकृतस्तेनममैवंद्विप
दांवर ॥ शरंचोद्धृतवानस्मितस्यवैद्विजसत्तम ७ आश्रमंचमयानीतोनचप्राणैर्व्ययुज्यत ॥ एतत्तेसर्वमाख्यातंयथाममपुराऽभवत् ८ अभितश्चापिगंतव्यं
मयास्वर्गंद्विजोत्तम ९ ॥ ब्राह्मणउवाच ॥ एवमेतानिपुरुषादुःखानिचसुखानिच ॥ आप्नुवंतिमहाबुद्धेनोत्कंठांकर्तुमर्हसि १० दुष्करंहिकृतंकर्मजानताजा
तिमात्मनः ॥ लोकवृत्तांततत्त्वज्ञनित्यंधर्मपरायण ११ कर्मदोषश्चवैविद्वन्नात्मजातिकृतेनवै ॥ कंचित्कालमुष्यतांवैततोऽसिभविताद्विजः १२ सांप्रतंचमतो
मेऽसिब्राह्मणोनात्रसंशयः ॥ ब्राह्मणःपतनीयेषुवर्तमानोविकर्मसु १३ दांभिकोदुष्कृतःप्राज्ञःशूद्रेणसदृशोभवेत् ॥ यस्तुशूद्रोदमेसत्येधर्मेचसततोत्थितः १४

ततमोऽध्यायः ॥ २१५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ एवमिति अभिप्रसादयंअहमावआर्धः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४

१५ । १६ । १७ । १८ गुणैःगुणकार्यैःसुखदुःखमोहैः १९ । २० । २१ । २२ गताध्वानःप्राप्तज्ञानमार्गाः २३ । २४ । २५ । २६ । २७ बुद्धेस्तत्त्वज्ञानात्परंब्रह्मगताःप्राप्ताः २८ । २९
३० । ३१ प्रदक्षिणंकृत्वाउपदेष्टागुरुरितिबुद्ध्या ३२ । ३३ । ३४ । ३५ । ३६ । ३७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेषोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥ धर्मंव्या

तंब्राह्मणमहंमन्येवृत्तेनहिभवेद्द्विजः ॥ कर्मदोषेणविषमांगतिमाप्नोतिदारुणाम् १५ क्षीणदोषमहंमन्येचाभितस्त्वांनरोत्तम ॥ कर्तुमर्हसिनोत्कंठांत्वद्विधाह्यवि
षादिनः ॥ लोकवृत्तानुवृत्तज्ञानित्यंधर्मपरायणाः १६ ॥ व्याधउवाच ॥ प्रज्ञयामानसंदुःखंहन्याच्छारीरमौषधैः ॥ एतद्विज्ञानसामर्थ्यंनबालैःसमतामियात्
१७ अनिष्टसंप्रयोगाच्चविप्रयोगात्प्रियस्यच ॥ मनुष्यामानसैर्दुःखैर्युज्यंतेचाल्पबुद्धयः १८ गुणैर्भूतानियुज्यंतेवियुज्यंतेतथैवच ॥ सर्वाणिनैतदेकस्यशोक
स्थानंहिविद्यते १९ अनिष्टंचान्वितंपश्यंस्तथाक्षिप्रंविरज्यते ॥ ततश्चप्रतिकुर्वंतियदिपश्यंत्युपक्रमात् २० शोचतोनभवेत्किंचित्केवलंपरितप्यते ॥ परि
त्यजंतियेदुःखंसुखंवाऽप्युभयंनराः २१ तएवसुखमेधंतेज्ञानतृप्तामनीषिणः ॥ असंतोषपरामूढाःसंतोषंयांतिपंडिताः २२ असंतोषस्यनास्त्यंतस्तुष्टिस्तुप
रमंसुखम् ॥ नशोचंतिगताध्वानःपश्यंतःपरमांगतिम् २३ नविषादेमनःकार्यंविषादोविषमुत्तमम् ॥ मारयत्यकृतप्रज्ञंबालंक्रुद्धइवोरगः २४ यंविषादोऽभि
भवतिविक्रमेसमुपस्थिते ॥ तेजसातस्यहीनस्यपुरुषार्थोनविद्यते २५ अवश्यंक्रियमाणस्यकर्मणोदृश्यतेफलम् ॥ नहिनिर्वेदमागम्यकिंचित्प्राप्नोतिशोभनम्
२६ अथाऽप्युपायंपश्येतदुःखस्यपरिमोक्षणे ॥ अशोचन्नारभेतैवंमुक्तश्चाव्यसनीभवेत् २७ भूतेष्वभावंसंचिंत्ययेतुबुद्धेःपरंगताः ॥ नशोचंतिकृतप्रज्ञाःपश्यं
तःपरमांगतिम् २८ नशोचामिचवैविद्वन्कालाकांक्षीस्थितोह्यहम् ॥ एतैर्निदर्शनैर्ब्रह्मन्नवसीदामिसत्तम २९ ॥ ब्राह्मणउवाच ॥ कृतप्रज्ञोऽसिमेधावीबुद्धिर्हि
विपुलातव ॥ नाहंभवंतंशोचामिज्ञानतृप्तोऽसिधर्मवित् ३० आपृच्छेत्वांस्वस्तितेऽस्तुधर्मस्त्वांपरिरक्षतु ॥ अप्रमादस्तुकर्तव्योधर्मेधर्मभृतांवर ३१ मार्कंडे
यउवाच ॥ बाढमित्येवतंव्याधःकृतांजलिरुवाचह ॥ प्रदक्षिणमथोकृत्वाप्रस्थितोद्विजसत्तमः ३२ सतुगत्वाद्विजःसर्वांशुश्रूषांकृतवांस्तदा ॥ मातापितृभ्यां
वृद्धाभ्यांयथान्यायंसुसंशितः ३३ एतत्तेसर्वमाख्यातंनिखिलेनयुधिष्ठिर ॥ पृष्टवानसियंतातधर्मंधर्मभृतांवर ३४ पतिव्रतायामाहात्म्यंब्राह्मणस्यचसत्तम ॥
मातापित्रोश्चशुश्रूषाधर्मव्याधेनकीर्तिता ३५ ॥ युधिष्ठिरउवाच ॥ अत्यद्भुतमिदंब्रह्मन्धर्माख्यानमनुत्तमम् ॥ सर्वधर्मविदांश्रेष्ठकथितंमुनिसत्तम ३६ सुख
श्रव्यतयाविद्वन्मुहूर्तइवमेगतः ॥ नहितृप्तोऽस्मिभगवन्शृण्वानोधर्ममुत्तमम् ३७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिब्राणव्याधसं
वादेषोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥ ॥ वैशंपायनउवाच ॥ श्रुत्वेमांधर्मसंयुक्तांधर्मराजःकथांशुभाम् ॥ पुनःपप्रच्छतमृषिंमार्कंडेयमिदंतदा १ ॥१८५॥

धोक्तधर्मेषु 'मातापिताग्निरात्माचगुरुश्चद्विजसत्तम' इतिपुमुक्षूणांपंचसेव्यत्वेनप्रोक्तास्तत्रपतिव्रतोपाख्यानेषभव्याधनिदर्शनेनमातापित्रोः पतिव्रतानिदर्शनेनगुरोश्चशुश्रूषायाःफलंदर्शितं तत्रै
वमोक्षधर्मप्रस्तावेआत्मसेवनंफलंचोक्तं । परिशिष्टस्याग्निसेवनस्यमोक्षहेतुत्वप्रकारंवक्तुंमांगिरसमारमतेश्रुत्वेमांधर्मसं युक्तामित्यादिना १

कथमिति । ननुत्वमग्रेप्रथमोअंगिराऋषिरितिवेदेवह्नेरंगिरस्त्वंश्रूयते अत्रतुअंगिरसोवह्नित्वंकथंपृच्छतिसत्यं उभयोरभेदेनबीजांकुरवत्परस्परजनकत्वेनवाऽदोषःतथाच । 'अग्निर्वैब्राह्मणः'
इति । 'अहंत्वदस्मिमदसित्वमेतन्ममासियोनिस्तवयोनिरस्मि' इतिचश्रुतीभवतः वनंसलिलंयातःप्रविष्टः । प्रविवेशियापइतिमंत्रवर्णात् । 'जीवनंभुवनंवनम्' इत्यमरः २ अग्निरितिएक
स्याप्यग्नेःकर्मसुदृश्यमानमनेकत्वंकथमुपपद्यते । नहिआग्नेयोऽष्टाकपालःदर्शपूर्णमासचातुर्मास्यादिषुएकएवेतिवक्तुंशक्यंअन्यावयवत्वायोगात् । अन्यस्यचगुणस्यद्रव्यस्यवायागभेदक
त्वाभावाद्देवताभेदएवयागभेदहेतुरितिअवश्यंवाच्यं सचाग्नेरेककथंसंभवतीत्यर्थः ३ अथएकस्यसंततौअनेकेऽग्निनामानःसंतीतिचेत्तर्हिआग्नेयस्यस्कंदस्यकथंरुद्रादिपुत्रत्वमपिस्मर्यतइत्याह
कुमारश्चेति ४ । ५ । ६ अंगिराऽभवत् संचिरडभावोवाआर्षः ७ तयेति अग्नेरप्यधिकोभूत्वा सूर्यवत्जगत्प्रकाशितवान् ८ तपश्चरन्निति । 'महत्तदुल्बंस्थविरंतदासीद्ये

युधिष्ठिरउवाच ॥ कथमग्निर्वनंयातःकथंचाप्यंगिराःपुरा ॥ नष्टेऽग्नौहव्यमवहदग्निर्भूत्वामहाद्युतिः २ अग्निर्यदात्वेकएवबहुत्वंचास्यकर्मसु ॥ दृश्यतेभगव
न्सर्वमेतदिच्छामिवेदितुम् ३ कुमारश्चयथोत्पन्नोयथाचाग्नेःसुतोऽभवत् ॥ यथारुद्राच्चसंभूतोगंगायांकृत्तिकासुच ४ एतदिच्छाम्यहंत्वत्तःश्रोतुंभार्गवसत्तम ॥
कौतूहलसमाविष्टोयाथातथ्यंमहामुने ५ ॥मार्कंडेयउवाच॥अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ यथाक्रुद्धोहुतवहस्तपस्तप्तुंवनंगतः ६ यथाचभगवानग्निः
स्वयमेवांगिराऽभवत् ॥ संतापयंश्चप्रभयानाशयंस्तिमिराणिच ७ पुरांऽगिरामहाबाहोचचारतपउत्तमम् ॥ आश्रमस्थोमहाभागोहव्यवाहंविशेषयन् ॥ तथास
भूत्वातुतदाजगत्सर्वंव्यकाशयत् ८ तपश्चरंस्तुहुतभुक्संतप्तस्तस्यतेजसा ॥ भृशंग्लानश्चतेजस्वीनचकिंचित्प्रजज्ञिवान् ९ अथसंचिंतयामासभगवान्हव्य
वाहनः ॥ अन्योऽग्निरिहलोकानांब्रह्मणासंप्रकल्पितः १० अग्नित्वंविप्रनष्टंहितप्यमानस्यमेतपः ॥ कथमग्निःपुनरहंभवेयमितिचिंत्यसः ११ अपश्यदग्निव
ल्लोकांस्तापयंतंमहामुनिम् ॥ सोपासर्पच्छनैर्भीतस्तमुवाचतदांगिराः १२ शीघ्रमेवभवस्वाग्निस्त्वंपुनर्लोकभावनः ॥ विज्ञातश्चासिलोकेषुत्रिषुसंस्थानचा
रिषु १३ त्वमग्निःप्रथमंसृष्टोब्रह्मणातिमिरापहः ॥ स्वस्थानंप्रतिपद्यस्वशीघ्रमेवतमोनुद १४ ॥ अग्निरुवाच ॥ नष्टकीर्तिरहंलोकेभवान्जातोहुताशनः ॥
भवंतमेवज्ञास्यंतिपावकंनतुमांजनाः १५ निक्षिपाम्यहमग्नित्वंत्वमग्निःप्रथमोभव ॥ भविष्यामिद्वितीयोऽहंप्राजापत्यकएवच १६ ॥ अंगिराउवाच ॥ कुरु
पुण्यंप्रजास्वर्ग्यंभवाग्निस्तिमिरापहः ॥ मांचदेवकुरुष्वाग्नेप्रथमंपुत्रमंजसा १७

नाविश्वितःप्रविवेशियापः' इतिश्रुतिप्रसिद्धेनकेनचिन्निमित्तेनजलेप्रविश्यतपश्चरन्नग्निरांगिरसेनतेजसासंतप्तोऽभूदित्यर्थः उल्बंउल्बणंस्थविरंप्राचीनं आविश्यतिष्ठतीत्याविष्टंमयंसंजात
मस्यसआविष्टितः ९ । १० । ११ । १२ संस्थानचारिषुस्थावरजंगमेषुसम्यक् स्थानंगतिनिवृत्तिर्येषुचरणशीलेषुचेतियोगात् त्रिषुअंतर्बहिर्दिविचउत्तमाधममध्यमेषुवा १३ । १४ । १५
निक्षिपामीतिअत्राग्निशब्देनदिग्देशकालकर्त्राद्यात्मासूत्रसंज्ञोहिरण्यगर्भउच्यते तस्यअग्नित्वस्यागः कारणात्मनाऽवस्थानं प्रथमःप्रथमजःसूत्रात्मेत्यर्थः हेप्राजापत्यप्रजापतिपुत्रहेअंगि
रः अहंद्वितीयःकःकसंज्ञोविराडात्माभविष्यामि १६ कुर्विति पुण्यंहविर्वहनंप्रजानांस्वर्ग्यंस्वर्गायहितं प्रथमंपुत्रंबृहस्पतिसंज्ञं । अयंभावः ईशसूत्रविराडुपासनाभिःसिद्धाः क्रमेण ब्रह्मप्रजाप
तिबृहस्पतिसंज्ञाः पूर्वपूर्वस्यउत्तरउत्तरःशतांशःसमितैश्वर्यः तथाचश्रुतिरारोहक्रमेणाह । 'तेयेशतंबृहस्पतेरानंदाःसएकःप्रजापतेरानंदः ॥ तेयेशतंप्रजापतेरानंदाःसएकोब्रह्मणआनंदः'–

इति तत्रापिबीजांकुरन्यायेनाग्रे रंगिराः अंगिरसो बृहस्पत्याख्योऽग्निरितिबोध्यं । 'तद्यदिदमाहुरमुंयजामुं यजेत्येत स्यैवसाविसृष्टिः । सुपर्णंविप्राः कवयोवचोभिरेकंसंतं बहुधाकल्पयंति' इत्यादिश्रुतिप्रसिद्धं सूत्रात्मनःसर्वदेवतारूपत्वमांगिरसतात्पर्यं तदिदंज्ञात्वायजमानस्याग्निरपि मोक्षद्वारं भवतीत्यर्थः १७ तच्छ्रुत्वेति अकरोत्अंगी चकारजातवेदाःस्वयंकारणंगत्वास्व पुत्रमंगिरसमकरोत्तस्यापिपुत्रः स्वयंबृहस्पतिर्नामाऽभवदिति १८ तत्रबृहस्पतेःकारणत्वं कारणज्ञानादेवयुज्यते'ब्रह्मविद्ब्रह्मैवभवति'इतिश्रुतेरतस्तत्परीक्षार्थं देवा बृहस्पतिंप्रति कारणंब्रह्मपप्रच्छुः १९ तस्मिंश्चतेनोक्तेसतिप्रत्ययंगृह्णन् अंगिरसोवचः अयंभवतांगुरुरितिअंगीकृतवंतः २० नानार्थान्पृथक्प्रयोजनान् ब्राह्मणेषु कर्मविधिवाक्येषु २१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥ ॥ कालाभिमानिन्योदेवताअपि अंगिरःसंज्ञात्सूत्रात्मनएवसकाशाज्जाताइतिवक्तुमध्यायमारभते ब्रह्मणइति ब्रह्मणः कारणात्सूत्रं ततस्तदुपास्तिसिद्धोगिरा इतितस्यतृतीयत्वं सुभाकालाभिमानिनीदेवता सुष्ठुसंवत्सराद्यात्मनाऽहोरात्राद्यात्मनावाभातीतिसुभा शुभाइतिपाठेऽपिसैवग्राह्या १ बृहत्कीर्ति

मार्कंडेयउवाच ॥ तच्छ्रुत्वांऽगिरसोवाक्यंजातवेदास्तदाऽकरोत् ॥ राजन्बृहस्पतिर्नामतस्याप्यंगिरसःसुतः १८ ज्ञात्वाप्रथमजंतंतुवह्नेरांगिरसंसुतम् ॥ उपेत्यदेवाःपप्रच्छुःकारणंतत्रभारत १९ सतुपृष्टस्तदादेवैस्ततःकारणमब्रवीत् ॥ प्रत्यगृह्णंस्तुदेवाश्चतद्वचोंगिरसस्तदा २० तत्रनानाविधानग्नीन्प्रवक्ष्यामिमहाप्रभान् ॥ कर्मभिर्बहुभिःख्यातान्नानार्थान्ब्राह्मणेष्विह २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेसप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥ ॥ ७ ॥ मार्कंडेयउवाच ॥ ब्रह्मणोयस्तृतीयस्तुपुत्रःकुरुकुलोद्वह ॥ तस्याभवत्सुभाभार्याप्रजास्तस्यांचमेशृणु १ बृहत्कीर्तिर्बृहज्ज्योतिर्बृहद्ब्रह्माबृहन्मनाः ॥ बृहन्मंत्रोबृहद्भासस्तथाराजन्बृहस्पतिः २ प्रजासुतासुसर्वासुरूपेणाऽप्रतिमाभवत् ॥ देवीभानुमतीनामप्रथमांगिरसःसुता ३ भूतानामेवसर्वेषांयस्यांरागस्तदाऽभवत् ॥ रागाद्रागेतियामाहुर्द्वितीयांऽगिरसःसुता ४ यांकपर्दिसुतामाहुर्दृश्यादृश्येतिदेहिनः ॥ तनुत्वात्सासिनीवालीतृतीयांऽगिरसःसुता ५ पश्यत्यर्चिष्मतीभाभिर्हविर्भिश्चहविष्मती ॥ षष्ठीमंगिरसःकन्यांपुण्यामाहुर्हविष्मतीम् ६ महामखेष्वांगिरसीदीप्तिमत्सुमहामते ॥ महामतीतिविख्यातासप्तमीकथ्यतेसुता ७

त्यादीनिबृहस्पतेरेवविशेषणानि कीर्तिर्यशः ज्योतिःशारीरंतेजः ब्रह्मवेदाध्ययनं मनःसंकल्पादिरूपं मंत्रोविचारः भाःप्रतिभाविचार्यतत्त्वस्फूर्तिः एतानिबृहंतियस्यसतथा तथाशब्दःपादपूरणार्थः २ तासुवक्ष्यमाणत्वेनबुद्धिस्थासु भानुमतीसूर्ययुक्ता दिवसाभिमानिनीत्यर्थः ३ रात्रिमाहभूतानामिति सुषुप्तिकालत्वेनश्रमनाशकत्वात्तस्यांरागोऽभवत् रागात् रागहेतुत्वात् संध्याद्वये रागोपेतत्वाद्वा ४ कपर्दिनो रुद्रस्य सुतामिवसुतां चंद्रकलांललाटेधृतत्वात् दृश्यादृश्यरूपां तत्रहेतुः तनुत्वादिति तेनसूक्ष्मचंद्रयुक्तत्वंलक्ष्यते चतुर्दशीयुक्ताऽमावास्यासिनीवाली। 'यापूर्वाऽमावास्यासासिनीवालीयोत्तरासाकुहूः'इतिश्रुतेः ५ अर्चिष्मतीपूर्णचंद्रोपेताशुद्धपौर्णमासीयस्यांभाभिर्जनोरात्रावपिपश्यति रूपादिकमितिशेषः साचतुर्थी यस्यांहविर्भिर्देवताइज्यंते साहविष्मती प्रतिपद्युक्तापौर्णमासीराकानामपंचमी पुण्यांव्रतार्हांमहिष्मतींनाम चतुर्दशीयुक्तां पूर्वांपौर्णमासींअनुमतींनाम । 'यापौर्णमासीसाऽनुमतिर्योत्तरासाराका'इतिश्रुतेः ६ शुद्धाममावास्यामाह महामखेष्विति सोमयागादिषुदीप्तिमती अमावास्यायांहिदीक्षांकुर्वंतिमानश्चंद्रोऽग्नेर्दृश्यते पौर्णमास्यांसुक्षीयमाणः अतोदीप्तिमत्सुदिनेषु एषामहामतीत्युच्यते यतोत्रमहत् महस्वान् वाअंतर्हितोविद्यतेऽस्यामितियोगात् पूर्वपदस्याकारोऽतादेशआर्षः ७ ॥१८९॥

कुहुकुहायतेविस्मितोभवति एकाकलाअनंशाअल्पांशवती अलवणायवागूरितिवदल्पार्थे नञ् । योत्तरासाकुहूरितिश्रुतेः प्रतिपद्युक्ताअमावास्याकुहूरितिप्रसिद्धं ८ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे अष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥ ७ ॥ तत्रक्रत्वंगभूतःकालःप्रागुक्तः अथ क्रत्वंगभूतादेवताः प्रपंचयितुं विराडुपास्तिफलावस्थस्य बृहस्पतेर्विभूतिरूपांसंततिंवक्तुमुपक्रमते बृहस्पतेरिति चांद्रमसीचंद्रमसाआक्रांता तारानाम षडग्नीन् शंयुप्रभृतीन् वक्ष्यमाणान्एकांपुत्रिकांस्वाहाख्यां १ आहुतिषुप्रधानाहुतिषु दर्शपौर्णमासेष्व यस्यआद्यंहविः हविषेतितृतीयाप्रथमार्थे प्रथमंहविर्विधीयते 'यदाग्नेयोऽष्टाकपालोऽमावास्यायांचपौर्णमास्यांचाच्युतोभवति'इत्यादिश्रुत्याचोद्यते सशंयुर्नाम २ चातुर्मास्येषुचतुर्षुमासेषुकर्तव्येषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यपर्वचतुष्टयेषु । आग्नेयमष्टाकपालंनिर्वपतिसौम्यंचरुमितिप्रतिपर्वतुल्यवदग्निराम्नायते तथाऽश्वमेधेच यस्य इष्ट्यांइष्टिसमीपे अग्रजःप्रथमः पशुर्भवति । 'तत्रयापशाविष्टिरुभयतोन्यतरोवाग्नेयीवाग्नावैष्णवीचेति' आश्वलायनाद्युक्ता । तथाचदर्शपूर्णमासचातुर्मास्यपश्वश्वमेधाः यत्पूर्वकाःसोग्निर्बार्हस्पत्यः शंयुर्नामेत्यर्थः ३ शंयुसंततिमाह शंयोरिति अप्रतिमाअतिसुंदरीधर्मजाधर्मकन्यासत्यानाम दीप्तोदीप्तिमान् ४ तस्यनामाह प्रथमेनेति अध्वरे दर्शादौ प्रथमाज्यभागदेवतायोऽग्निःसभरद्वाजइत्यर्थः । तस्यशंयोः ५

यांतुदृष्ट्वाभगवतींजनःकुहुकुहायते ॥ एकानंशेतितामाहुःकुहूमंगिरसःसुताम् ८ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसोपाख्यानेअष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥ ॥ मार्कंडेयउवाच ॥ बृहस्पतेश्चांद्रमसीभार्याऽऽसीद्यायशस्विनी ॥ अग्नीन्साऽजनयत्पुण्यान्षडेकांचापिपुत्रिकाम् १ आहुतिष्वेवयस्याग्नेर्हविषाद्यंविधीयते ॥ सोऽग्निर्बृहस्पतेःपुत्रःशंयुर्नाममहाव्रतः २ चातुर्मास्येषुयस्येष्ट्यामश्वमेधेऽग्रजःपशुः ॥ दीप्तोज्वालैरनेकाभैरग्निरेकोऽथवीर्यवान् ३ शंयोरप्रतिमाभार्यासत्याऽसत्यायऽधर्मजा ॥ अग्निस्तस्यसुतोदीप्तस्तिस्रःकन्याश्चसुव्रताः ४ प्रथमेनाज्यभागेनपूज्यतेयोऽग्निरध्वरे ॥ अग्निस्तस्यभरद्वाजःप्रथमःपुत्रउच्यते ५ पौर्णमासेषुसर्वेषुहविषाज्यंस्रुवोद्यतम् ॥ भरतोनामतःसोऽग्निर्द्वितीयःशंयुतःसुतः ६ तिस्रःकन्याभवंत्यन्यायासांसभरतःपतिः ॥ भरतस्तुसुतस्तस्यभरत्येकाचपुत्रिका ७ भरतोभरतस्याग्नेःपावकस्तुप्रजापतेः ॥ महानत्यर्थमहितस्तथाभरतसत्तम ८ भरद्वाजस्यभार्यातुवीरावीरस्यपिंडदा ॥ प्राहुराज्येनतस्येज्यांसोमस्येवद्विजाःशनैः ९

पौर्णमासेष्विति स्रुवोद्यतंहविःप्रथमाघारस्तस्यदेवताभरतोनाम शंयोःपुत्रः । पूर्णमासपदंसर्वतद्विकारपरं तेनदर्शोऽपिगृह्यते । 'पौर्णमासेनेष्टिपशुसोमाउपदिष्टाः' इत्याश्वलायनवचनात् यद्यपिस्रौवाघारःप्राजापत्यस्तथापि सभरतसंज्ञएवप्रजापातिरितिज्ञेयं ६ भवंतिशंयुतइत्यनुकृष्यते पतिर्ज्येष्ठः अत्रकन्यानांनामधेयानिसंततिश्चानुक्ताऽपिअत्रैवांगप्रत्यंगदेवतात्वेनताबोध्याः विस्तरभयात्तुमुनिनानप्रदर्शिताः । तस्यभरतस्योर्जसंज्ञस्यपुत्रो भरतः'ऊर्जःपुत्रंभरतंसृप्रदानुम्'इतिमंत्रवर्णात् ७ भरतःभरणंकुर्वतः तेनभरतशब्दस्यनिर्वचनंदर्शितं । भरतस्यप्रजापतेः पावकः सुतः सअत्यर्थं महितत्वात् महान् महितत्वंमहाफलप्रदातृत्वं यत्रकर्मणिआग्रयणादौ प्रथमोऽग्निर्नास्तितत्रापिअयंमहत्त्वात्कर्तव्यएवेत्यर्थः पावकइत्यग्निपर्यायमात्रंनगुणः अग्निसंज्ञोऽग्निरित्यर्थः । तथाच'येनयज्ञेनेत्संकुर्यादेवतत्राग्नेयमष्टाकपालम्'इति आपस्तंबोक्तिःसंगच्छते । ईत्संत् वर्धितुमिच्छेत् ८ शंयोःकनिष्ठपुत्रसंततिमाह भरद्वाजस्येति वीरानामतः वीरस्यवह्नेःपिंडदाशरीरकर्त्री मातेत्यर्थः भरद्वाजात्वीरायांवीरोजातइत्यर्थः तस्यआज्येनइज्यांप्राहुः शनैः उपांशु सोमस्येवेतितत्साहित्यमुच्यते । 'तथाऽग्नीषोमावुपांशुयष्टव्यावजामित्वाय'इति श्रुतयोरग्नीषोमयोर्मध्यस्थोऽग्निः स इत्यर्थः ९

एतदेवाहहविषेति द्वितीयेनआग्नेयानंतरेण अस्यैवनामांतराणिरथेत्यादीनि १० सरथप्रभ्वादिनामा शरय्वांभार्यायां सिद्धिंनामपुत्रंजनयत् यःभानुं सूर्यं भाभिर्दीप्तिभिःआवृणोत्सूर्यआहुते
आग्नेयंअग्निदैवत्यंयागंमानयन् । अग्निमग्नआवहेत्यत्रमंत्रेऽग्नियुक्तसंबुद्धया एषसूयतेसु हूयतेकीर्त्यतइत्यर्थः शब्दइतिधातुः ११ बृहस्पतेर्द्वितीयःपुत्रोनिश्च्यवनः पृथिवींस्तौतीतिपृथिवीसाहचर्य
मुच्यते तेन वागभिमानिदेवतारूपःसइत्यर्थः । 'तस्यवाचापृष्टीपृथिवीचाग्निश्च'इतिश्रुतेः १२ निश्च्यवनपुत्रःसत्यः समयधर्मोवाचकसंबंधस्तत्कर्ता १३ सत्यस्यैवनामांतरंनिष्कृतिः अभिसेविते
गृहारामादौशोभयतिशोभांकरोति १४ रुजस्करःपीडाकरः स्वनोनामसत्यपुत्रः १५ एवंद्वयोर्बार्हस्पत्ययोःकर्मकर्मेंद्रियव्यापित्वमुक्तं तृतीयस्यबुद्धिव्यापकत्वमाहयस्त्विति १६ चतुर्थमाह

हविषायोद्वितीयेनसोमेनसहयुज्यते ॥ रथप्रभूरथाध्वानकुंभरेताःसउच्यते १० शरय्वांजनयत्सिद्धिंभानुंभाभिःसमावृणोत् ॥ आग्नेयंमानयन्नित्यमाह्वानेह्ये
षसूयते ११ यस्तुनच्यवतेनित्यंयशसावर्चसाश्रिया ॥ अग्निर्निश्च्यवनोनामपृथिवींस्तौतिकेवलम् १२ विपाप्माकलुषैर्मुक्तोविशुद्धश्चार्चिषाज्वलन् ॥ वि
पापोऽग्निःसुतस्तस्यसत्यःसमयधर्मकृत् १३ अक्रोशतांहिभूतानांयःकरोतिहिनिष्कृतिम् ॥ अग्निःसनिष्कृतिर्नामशोभयत्यभिसेविते १४ अनुकूजंतियेनेहवेद
नार्ताःस्वयंजनाः ॥ तस्यपुत्रःस्वनोनामपावकःसरुजस्करः १५ यस्तुविश्वस्यजगतोबुद्धिमाक्रम्यतिष्ठति ॥ तंप्राहुरध्यात्मविदोविश्वजिन्नामपावकम् १६
अंतराग्निःस्मृतोयस्तुभुक्तंपचतिदेहिनाम् ॥ सयज्ञेविश्वभुङ्नामसर्वलोकेषुभारत १७ ब्रह्मचारीयतात्माचसततंविपुलव्रतः ॥ ब्राह्मणाःपूजयंत्येनंपाकयज्ञेषु
पावकम् १८ पवित्रागोमतीनामनदीयस्याभवत्प्रिया ॥ तस्मिन्कर्माणिसर्वाणिक्रियंतेधर्मकर्तृभिः १९ वडवाग्निःपिबत्यंभोयोऽसौपरमदारुणः ॥ ऊर्ध्वभागूर्ध्व
भाङ्नामकविःप्राणाश्रितस्तुयः २० उदग्द्वारंहविर्यस्यगृहेनित्यंप्रदीयते ॥ ततःस्विष्टंभवेदाज्यंस्विष्टकृत्परमःस्मृतः २१ यःप्रशांतेषुभूतेषुमन्युर्भवति
पावकः ॥ क्रुद्धस्यतुरसोजज्ञेमन्यतीचाथपुत्रिका २२ स्वाहेतिदारुणाक्रूरासर्वभूतेषुतिष्ठति ॥ त्रिदिवेयस्यसदृशोनास्तिरूपेणकश्चन ॥ अतुलत्वात्कृतो
देवैर्नाम्नाकामस्तुपावकः २३ संहर्षाद्धारयन्क्रोधंधन्वीस्रग्वीरथेस्थितः ॥ समरेनाशयेच्छत्रूनमोघोनामपावकः २४

अंतरिति १७ एनंविश्वभुजं पाकयज्ञेषुस्मार्तकर्मसु १८ कर्माणिगृह्याणि १९ पंचमंबार्हस्पत्यमाह वडवाग्निरिति सएवाध्यात्मंऊर्ध्वभागूर्ध्वगतिरुदानसंज्ञः अतएवोर्ध्वभाङ्नामकविर्ब्राह्मणः
प्राणाश्रितःप्राणवाय्वभिमानी २० षष्ठंबार्हस्पत्यमाह उदग्द्वारमिति । 'उत्तरार्धात्सौविष्टकृतम्'इतिश्रुतेः उदगागमनंगृहेर्ष्वीसंबद्धेकर्मणितत्तस्तेनस्विष्टंसुष्टुइष्टं भवति आज्यंआज्यादिद्रव्यं
च तत्रोत्तरार्धयोगात्पृथग्ग्रहणं तत्रापिस्विष्टकृत्प्रापणार्थम् २१ सप्तमींकन्यामाहयइति पावकोबृहस्पतिः मन्युःक्रोधरूपीभवति तदायोऽस्यरसस्तेजःप्रभवःप्रस्वेदःजज्ञेजातःतामेवत्वामेवपु
त्रिकांमन्ये । मन्यंतीचाथपुत्रिकेतिपाठेतु सरसएवपुत्रिका मन्यंती देवतोद्देशेनत्यक्तंहविरनुजानती २२ काऽसावित्यतआहस्वाहेत्यर्द्धेन अस्यास्त्रिगुणात्मकत्वात्तादृशींतत्संततिमाह त्रिदिवे
इति एतेनराजस्याःस्वाहायाःकामरूपासंततिरुक्ता २३ तामस्याःसंततिंक्रोधाभिधारात्मिकामाह संहर्षादिति जेष्याम्येवेत्युत्साहःसंहर्षः २४

सात्विक्याःस्वाहायाःसंततिमाहउक्थइति उत्उत्ऊर्ध्वंमोक्षपदंनयत्युक् थः त्रिभिरुक्थैः उत्तिष्ठत्यस्मात्कर्मफलमित्युक्थं । तच्चशरीरादुत्थितंकर्मेतिशरीरमुक्थं । शरीरोत्थापकतयाप्राणउक्थं ।
प्राणोत्थापकतयापरमात्माऽप्युक्थं । सजन्योऽग्निस्त्रिभिरप्युक्थैरभिष्टुतस्तदाऽऽत्मनास्थितः महावाचंमहतींवाचंपराख्यांतुर्यब्रह्मकलां अजनयत्आविर्भावितवान् । पूर्वेषामप्युपासकानां
यंसमाश्वासंसमाश्वासिति विश्रामंप्राप्नोत्यनेनेतितंमोक्षेहेतुंविदुर्वेदाचार्याइतिशेषः २५ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेएकोनविंशत्यधिकद्विशततमोऽध्यायः ॥ २१९ ॥ ७ ॥
काश्यपइतित्रयाणांसंबंधः अत्रपाठक्रमादर्थक्रमस्यबलीयस्त्वात्आद्ययोःश्लोकयोःश्रीव्यासेनार्थोग्राह्यः अचरदिति सपूर्वाध्यायांतोक्तउक्थोनामकाश्यपः वासिष्ठः प्राणपुत्रइतिप्राणस्यैव
विशेषणं अग्निरांगिरसश्च्यवनइत्येकः १ । २ महाव्याहृतिभिःभूरग्नयेपृथिव्यैस्वाहेत्यादिभिः । भूर्भुवःस्वर्महोअग्निवायुसूर्यचंद्राःपृथिव्यंतरिक्षद्युदिगुपलक्षितेनसर्वात्मकेनरूपेणतंध्यातवंत
इत्यर्थः । 'तस्यैवंविदुषोयज्ञस्यात्मायजमानः । वीतरागविषयंवाचित्तम्'इतिश्रुतिस्मृत्योर्विदुषोऽपिध्येयत्वदर्शनात् जज्ञेप्रदीपइवपुत्ररूपेणाविर्भूतः अतएवअर्चिष्मानग्निरिवेतिलुप्तोपमा प्र

उक्थोनाममहाभागत्रिभिरुक्थैरभिष्टुतः ॥ महावाचंत्वजनयत्समाश्वासंहियंविदुः २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसो
पाख्यानेएकोनविंशत्यधिकद्विशततमोऽध्यायः ॥ २१९ ॥ ॥ ७ ॥ ॥ मार्कंडेयउवाच ॥ काश्यपोह्यथवासिष्ठःप्राणश्चप्राणपुत्रकः ॥ अग्निरांगिरसश्चैव
च्यवनस्त्रिषुवर्चकः १ अचरत्सतपस्तीव्रंपुत्रार्थेबहुवार्षिकम् ॥ पुत्रंलभेयंधर्मिष्ठंयशसाब्रह्मणासमम् २ महाव्याहृतिभिर्ध्यातःपंचभिस्तैस्तदात्वथ ॥ जज्ञे
तेजोमहार्चिष्मान्पंचवर्णःप्रभावनः ३ समिद्धोऽग्निःशिरस्तस्यबाहूसूर्यनिभौतथा ॥ त्वङ्नेत्रेचसुवर्णाभेकृष्णेजंघेचभारत ४ पंचवर्णःसतपसाकृतस्तैःपंच
भिर्जनैः ॥ पांचजन्यःश्रुतोदेवःपंचवंशकरस्तुसः ५ दशवर्षसहस्राणितपस्तप्त्वामहातपाः ॥ जनयत्पावकंघोरंपितॄणांसप्रजाःसृजन् ६ बृहद्रथंतरंमूर्ध्नोवक्त्रा
द्धातरसाहरौ ॥ शिवंनाभ्यांबलादिंद्रंवाय्वग्नीप्राणतोऽसृजत् ७ बाहुभ्यामनुदात्तौचविश्वेभूतानिचैवह ॥ एतान्सृष्ट्वाततःपंचपितॄणामसृजत्सुतान् ८ बृहद्र
थस्यप्रणिधिःकाश्यपस्यमहत्तरः ॥ भानुरंगिसोधीरःपुत्रोवर्चस्यसौभरः ९ प्राणस्यचानुदात्तस्तुव्याख्याताःपंचविंशतिः ॥ देवान्यज्ञमुषश्चान्यान्सृजन्पंच
दशोत्तरान् १० सुभीममतिभीमंचभीमंभीमबलाबलम् ॥ एतान्यज्ञमुषःपंचदेवानांह्यसृजत्तपः ११

भावनः जगत्सृष्टिकर्ता ३ पंचवर्णत्वमेवाहसमिद्धइति ज्वालावर्णशिरस्तस्येत्यर्थः तथात्वगिति त्वचोऽपिसूर्यनिभत्वमुक्तम् ४ तपसाकृतइतितपोनामेत्यर्थः सएवपांचजन्यश्च यौगिकमस्य
नामद्वयम् ५ पितॄणां पावकंदक्षिणाग्निं प्रजाःसृजन्प्रजास्रष्टा ६ बृहत्मूर्ध्नः रथंतरंवक्त्रात् वाशब्दश्चार्थः एतेअहोरात्रदेवते । 'राथंतरीवैराज्यहर्बार्हतम्'इतिश्रुतेः अतएव तरसावेगेनहरतः
आयुष्यादीतितरसाहरौ शिवंअहंकाराभिमानिनंरुद्रंनाभ्यांनाभितः प्राणतःप्राणंसृष्ट्वावाय्वग्नीअसृजदितिसर्वत्रसंबध्यते ७ अनुदात्तौमंत्रेप्राकृतोऽनुदात्तः शतपथब्राह्मणेचवैकृतोऽनुदात्तः
'उदात्तमनुदात्तमनंत्यम्' इतिभाषिकसूत्रेणप्राकृतोदात्तस्यब्राह्मणेऽनुदात्तत्वविधानात् तेनाभ्यांचतद्वान्मंत्रब्राह्मणभागात्मकोवेदोलभ्यते बाहुभ्यामितिहस्तस्वरेणतयोरनुदात्तयोःप्रदर्शनी
यत्वंसूचितं एतच्चवेदांतराणामप्युपलक्षणं विश्वेसमनस्केंद्रियदेवताः भूतानिपंच एतान्विंशतिसंख्याकान् ८ बृहद्रथस्यवासिष्ठस्यप्रणिधिरंशतइतिशेषः आंगिरसश्च्यवनस्य वर्चस्यसुवर्च
कस्य ९ असुरसृष्टिमाहदेवानिति उत्तरानपाश्चात्यान् १० भभिबलमबलंचेतिसमाहारः तपस्तपःसंज्ञःपांचजन्यः ११

१२ । १३ यज्ञयाजिनःइष्टमित्युत्तरश्लोकादपकृष्यते १४ । १५ तदादानंतेषामादेयोभागःबहिर्वेद्यामुत्करदेशे । 'तुषैर्वैफलीकरणैर्देवाहविर्यज्ञेभ्योरक्षांसिनिरभजन्नस्मामहायज्ञात्'इतिश्रुतेः अस्मालोहितेन तत्तस्माद्धेतोःयत्रचाग्निरंतर्वेद्यां १६ पक्षाभ्यामिव चक्राभ्यामुपलक्षितेतत्रचयनेप्रवर्तितेइह विघ्नंशकटेप्रवर्तितेसति चिताग्नेश्चयनकर्तुर्यजमानस्यआज्यंतदुपलक्षितंहविःएतेउद्र हद्वद्रहंस्युपर्यवहरंतीत्यर्थः मंत्रैरक्षोघ्नैःप्रशमिताःसंतइष्टंहविर्नमुष्णंति १७ एवमसुराणांनामानिभागधेयांनिवृत्त्युपायंचोक्त्वा पुनःपांचजन्यवंशमनुसंधत्तेबृहदुक्थइति तपस्य तपसः भूमिमुपा श्रितइतितस्यैवपृथिव्यभिमानिदेवतात्वमुक्तं १८ मित्रविंदोमहाविराड्बृहस्पत्यपेक्षयाश्रेष्ठःतस्मैतद्भावमाप्तये । मित्रविंदामहाविराजीत्याश्वलायवचनादिदमूहनीयं १९ । २० ॥ इत्यारण्यके पर्वणिनीलकंठीयेभारतभावदीपेविंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥ ॥ सिंहावलोकनन्यायेनशंयोः पौत्रमूर्जंपुत्रंभरतंस्तौतिसौर्धेनगुरुभिरिति पुष्टिमतिरित्येकंनाम १ तथैवतपस्तुती

सुमित्रंमित्रवंतंचमित्रज्ञंमित्रवर्धनम् ॥ मित्रधर्माणमित्येतान्देवानभ्यसृजत्तपः १२ सुरप्रवीरंवीरंचसुरेशंचसुवर्चसम् ॥ सुराणामपिहंतारंपंचैतानसृजत्तपः
१३ त्रिविधंसंस्थिताह्येतेपंचपंचपृथक्पृथक् ॥ मुष्णंत्यत्रस्थिताह्येतेस्वर्गतोयज्ञयाजिनः १४ तेषामिष्टंहरंत्येतेनिघ्नंतिचमहद्धविः ॥ स्पर्धयाहव्यवाहानांनि
घ्नंत्येतेहरंतिच १५ बहिर्वेद्यांतदादानंकुशलैःसंप्रवर्तितम् ॥ तदेतेनोपसर्पंतियत्रचाग्निःस्थितोभवेत् १६ चिताग्नेरुद्वहन्नाज्यंपक्षाभ्यांतंप्रवर्तिते ॥ मंत्रैः
प्रशमिताह्येतेनेष्टंमुष्णंतियज्ञियम् १७ बृहदुक्थतपस्यैवपुत्रोभूमिमुपाश्रितः ॥ अग्निहोत्रेहूयमानेपृथिव्यांसद्भिरिज्यते १८ रथंतरश्चतपसःपुत्रोऽग्निःपरिप
ठ्यते ॥ मित्रविंदायवैतस्मैहविरध्वर्यवोविदुः १९ मुमुदेपरमप्रीतःसहपुत्रैर्महायशाः २० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआं
गिरसोपाख्यानेविंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥ ७ ॥ मार्कंडेयउवाच ॥ गुरुभिर्नियमैर्जातोभरतोनामपावकः ॥ अग्निःपुष्टिमतिर्नामतुष्टःपुष्टिं
प्रयच्छति ॥ भरत्येषप्रजाःसर्वास्ततोभरतउच्यते १ अग्निर्यश्चशिवोनामशक्तिपूजापरश्चसः ॥ दुःखार्तानांचसर्वेषांशिवकृत्सततंशिवः २ तपसस्तुफलंदृष्ट्वा
संप्रवृत्तंतपोमहत् ॥ उद्धर्तुकामोमतिमान्पुत्रोजज्ञेपुरंदरः ३ ऊष्माचैवोष्मणोजज्ञेसोऽग्निर्भूतस्यलक्ष्यते ॥ अग्निश्चापिमनुर्नामप्राजापत्यमकारयत् ४ शंभुम
ग्निमथप्राहुर्ब्राह्मणावेदपारगाः ॥ आवसथ्यंद्विजाःप्राहुर्दीप्तमग्निंमहाप्रभम् ५ ऊर्जस्करान्हव्यवाहान्सुवर्णसदृशप्रभान् ॥ ततस्तपोह्यजनयत्पंचयज्ञसुतानिह
६ प्रशांतेऽग्निर्महाभागपरिश्रांतोगवांपतिः ॥ असुरानजयन्घोरान्मर्त्यांश्चैवपृथग्विधान् ७

यंसुतंशिवंस्तौतिअग्निर्यश्चेति शक्तिश्चिच्छक्तिस्तस्याःपूजानिर्विकल्पसमाधिरूपा २ तपसएवपूर्वो क्तचत्वारिंशतोऽन्ये पुरंदरऊष्मामनुःशंभुरावसथ्यइतिपंचपुत्रानाहचतुर्भिः तपसइति तप सोऽग्नेःफलमैश्वर्यंसंप्रवृद्धंदृष्ट्वातदुद्धर्तुपित्र्यंदायंपुत्रएवलभतेइतिदर्शनात्तदीयमैश्वर्यंमांभुपुरंदरोऽस्यपुत्रोजातः ३ ऊष्माचतपसःसकाशाज्जज्ञे योभूतेषूष्मणोहेतोर्लक्ष्यते अकारयदकरोत्स्वार्थे णिच् ४ । ५ उपसंहरति ऊर्जस्करानिति यज्ञसुतान्यज्ञेऽभिषुतान् आदिकर्मणिक्तःसोममागिनइत्यर्थः यद्वायज्ञःसोमःसुतोयेभ्यस्तेइतियोगः ६ प्रशांतेऽस्तकालेपरिश्रांतो गवांरश्मीनांपतिः सूर्याऽग्निर्भवति । 'आदित्योवाअस्तंयन्नग्निमनुप्रविशति'इतिश्रुतेः । यश्चघोरानसुरानजनयन्नभवतितंतपोऽजनयदितिपूर्वेणान्वयः ७ ॥१८८॥

तपसइति मनुमितिप्राजापत्यकर्तृत्वमुच्यते भानुंनामतः अंगिराश्चसृजदितिसंबंधः । तपःपुत्रस्याप्यंगिरःसृजत्वोक्तिर्भानुंप्रतिकुलालपितृवदंगिरसोऽन्यथासिद्धत्वंमाभूदितितेनमूलकारणमे वांत्यारकार्योन्नटइववतत्तद्वेषेणस्फुरतीतिसिद्धं । अतएवआकाशाद्वायुरित्यादावाकाशभावमापन्नआत्मैववायुमसृजन्नकेवलआकाशइतिव्याख्यातंसंप्रदायविद्भिः ८ एवंबृहद्भादीन्भान्वं तान्तपसःपुत्रानुक्त्वातत्पौत्रानाह भानोरिति ९ । १० बलदो मन्युमान् विष्णुरितित्रयःसुप्रजायाःसुताः ११ तत्रोपांशुयाजदेवताविष्णुरुभयत्रस्मर्यमाणस्त्रयोदशामावास्यायामाहुत योहूयंते । चतुर्दशपौर्णमास्यामितिलिंगदर्शनमन्यथयति दर्शेऽपिविष्णोःस्मरणेनचतुर्दशाहुतियोगात् अतएवांतरेणहविषीविष्णुरुपांश्वेतरेयिणइत्याश्वलायनः सप्रमाणमुभयत्रोपांशुया जमवगमयति १२ भानुभार्यायाबृहद्भासायाःसंततिराग्रयणस्थैंद्राग्नावयवोग्निरेकः १३ हविषामाग्नेयादीनामष्टानांयोनिरुद्धवस्थार्नवैश्वदेवेपर्वणिमुख्योविश्वदेवसंज्ञकोऽग्निर्द्वितीयः स्तुभःस्तूय

तपसश्चमनुंपुत्रंभानुंचाप्यंगिराःसृजत् ॥ बृहद्भानुंतुतंप्राहुर्ब्राह्मणावेदपारगाः ८ भानोर्भार्यासुप्रजातुबृहद्भासातुसूर्यजा ॥ असृजेतांतुषट्पुत्रान्शृणुतासांप्रजा
विधिम् ९ दुर्बलानांतुभूतानामसून्यःसंप्रयच्छति ॥ तमग्निंबलदंप्राहुःप्रथमंभानुतःसुतम् १० यःप्रशांतेषुभूतेषुमन्युर्भवतिदारुणः ॥ अग्निःसमन्युमान्नाम
द्वितीयोभानुतःसुतः ११ दर्शेचपौर्णमासेचयस्येहहविरुच्यते ॥ विष्णुर्नामेहयोऽग्निस्तुधृतिमान्नामसोऽङ्गिराः १२ इंद्रेणसहितंयस्यहविराग्रयणंस्मृतम् ॥
अग्निराग्रयणोनामभानोरेवान्वयस्तुसः १३ चातुर्मास्येषुनित्यानांहविषांयोनिरग्रहः ॥ चतुर्भिःसहितःपुत्रैर्भानोरेवान्वयःस्तुभः १४ निशात्वजनयत्कन्याम
ग्नीषोमावुभौतथा ॥ मनोरेवाभवद्भार्यासुषुवेपंचपावकान् १५ पूज्यतेहविषाग्र्येणचातुर्मास्येषुपावकः ॥ पर्जन्यसहितःश्रीमानग्निर्वैश्वानरस्तुसः १६ अस्य
लोकस्यसर्वस्ययःप्रभुःपरिपच्यते ॥ सोऽग्निर्विश्वपतिर्नामद्वितीयोवैमनोःसुतः १७ ततःस्विष्टंभवेदाज्यंस्विष्टकृत्परमस्तुसः ॥ कन्यासारोहिणीनामहिरण्य
कशिपोःसुता १८ कर्मणासौबभौभार्यासवह्निःसप्रजापतिः ॥ प्राणानाश्रित्ययोदेहंप्रवर्तयतिदेहिनाम् ॥ तस्यसन्निहितोनामशब्दरूपस्यसाधनः १९ शुक्ल
कृष्णगतिर्देवोयोबिभर्तिहुताशनम् ॥ अकल्मषःकल्मषाणांकर्ताक्रोधाश्रितस्तुसः २०

तेभातीतिस्तुभस्तृतीयः १४ निशानाम्नीभान्वपरनाम्नोमनोरपरातृतीयाभार्याऽभवत् कन्यांवक्ष्यमाणांरोहिणीमग्निंसोममन्यान्पंचेत्यष्टावपत्यानिसुषुवे १५ शेषान्पंचक्रमेणाह पूज्य तइत्यादिना चातुर्मास्यानामारंभात्पूर्वेद्युर्वैश्वानरपार्जन्येष्टिःक्रियते तत्रवैश्वानरःप्रथमोमनुपुत्रः १६ परिपच्यतेऽन्नंयेनेतिशेषः सविश्वपतिर्द्वितीयः १७ स्विष्टकृदेवकन्यारोहिणीपंचभ्यो ऽधिका १८ तस्याश्चकिंचिद्दोषजंभार्यात्वं वस्तुतस्तुसवह्निः प्रजापतिर्भनुसंज्ञैवकर्म णामैथुनतःप्रजाजननाख्येननिमित्तेन तथाचश्रुतिः । 'सइममेवात्मानंद्वेधापातयत्ततःपतिश्चपत्नीचाभवता म्'इति सन्निहितोनामतृतीयःशब्दरूपस्यशब्दरूपग्रहणस्यसाधनःप्रवर्तकः १९ चतुर्थमाह द्वाभ्यां शुक्लेति यस्मादुपास्याकर्मणाऽऽराधितात्क्रमेणशुक्लकृष्णेगती अर्चिरादिधूमादिमार्गावपुन रावृत्तिपुनरावृत्तिफलौप्राप्येतेसशुक्लकृष्णगतिः अकल्मषःशुक्लत्वात् कल्मषाणांकारयकर्मणां २०

अतएव कपिलः सांख्यं निरीश्वरशास्त्रं तद्रूपोयोगस्तस्यप्रवर्तकः २१ पंचममाहअग्रमिति वैश्वदेवांतेमनुष्ययज्ञार्थं यत्प्रयच्छंतितदग्रं २१ इमानन्यानित्यादिनाप्रोक्ताअष्टाग्रयोमनोरेवसं ततिः २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ ॥ ॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे एकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥ कथमग्निर्नष्टयातइति पृष्टमग्नेर्जलप्रवेशप्रकारंवक्तुमारभते आपस्येति आपस्या ऽप्सुविदितस्यसहस्य सहसंज्ञस्याग्नेर्मुदितानामपरमाप्रियाभार्या दुहितेतिपाठेऽपिसंज्ञाशब्दएवायं भूपतिर्भुवभर्ताच सहसंज्ञएव भूर्भुवर्लोकयोः स्वामी नतुस्वर्लोकस्यान्याह्वत्तिस्यानस्य । त्रिधैवात्रलोकविभागोऽभिमतः तेन ब्रह्मलोकादर्वाचीनस्यकृत्स्नस्यस्वामीत्यर्थः सपरमद्भुताख्यंपावकमजनयत् । सहसस्पुत्रो अद्भुतइतिमंत्रवर्णात् सहशब्दोऽत्रअकारांतोऽपि वेदेसकारांतोज्ञेयः १ अद्भुतमेवस्तौतिभूतानामितिचतुर्भिः यंपावकंपतिमभिप्रेत्य भुवनभर्ता भूतानांचतुर्विधानामात्मेतिप्राहुः सान्वयेषु

कपिलंपरमर्षिंचयंप्राहुर्यतयःसदा ॥ अग्निःसकपिलोनामसांख्ययोगप्रवर्तकः २१ अग्रंयच्छंतिभूतानांयेनभूतानिनित्यदा ॥ कर्मस्विहविचित्रेषुसोऽग्रगीर्वह्नि रुच्यते २२ इमानन्यान्समसृजत्पावकान्प्रथितान्भुवि ॥ अग्निहोत्रस्यदुष्टस्यप्रायश्चित्तार्थमुल्बणान् २३ संस्पृशेयुर्यदाऽन्योन्यंकथंचिद्वायुनाऽग्नयः ॥ इ ष्टिरष्टाकपालेनकार्यावैशुचयेऽग्नये २४ दक्षिणाग्निर्यदाद्वाभ्यांसंसृजेततदाकिल ॥ इष्टिरष्टाकपालेनकार्यावैवीतयेऽग्नये २५ यद्यग्नयोहिस्पृश्येयुर्निवेशस्थाद वाग्निना ॥ इष्टिरष्टाकपालेनकार्यातुशुचयेऽग्नये २६ अग्निंरजस्वलास्त्रीसंस्पृशेदग्निहोत्रिकम् ॥ इष्टिरष्टाकपालेनकार्यावसुमतेऽग्नये २७ मृतःश्रूयेतयोजीवः परेयुःपशवोयदा ॥ इष्टिरष्टाकपालेनकार्यासुरभिमतेऽग्नये २८ आर्तोनजुहुयादग्निंत्रिरात्रंयस्तुब्राह्मणः ॥ इष्टिरष्टाकपालेनकार्यास्यादुत्तराग्नये २९ दर्शंचपौ र्णमासंचयस्यतिष्ठेत्प्रतिष्ठितम् ॥ इष्टिरष्टाकपालेनकार्यापथिकृतेऽग्नये ३० सूतिकाग्निर्यदाचाग्निंसंस्पृशेदग्निहोत्रिकम् ॥ इष्टिरष्टाकपालेनकार्याचाग्निमतेऽग्न ये ३१ ॥ इतिश्री॰भा॰आ॰मा॰आंगिरसोपाख्यानेएकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥ मार्कंडेयउवाच ॥ आपस्यमुदिताभार्यासहस्यपरमाप्रि या ॥ भूपतिर्भुवभर्ताचजनयत्पावकंपरम् १ भूतानांचाऽपिसर्वेषांयंप्राहुःपावकंपतिम् ॥ आत्माभुवनभर्तेतिसान्वयेषुद्विजातिषु २ महतांचैवभूतानांसर्वेषा मिहयःपतिः ॥ भगवान्समहातेजानित्यंचरतिपावकः ३ अग्निर्गृहपतिर्नामनित्यंयज्ञेषुपूज्यते ॥ हुतंवहतियोहव्यमस्यलोकस्यपावकः ४ अपांगर्भोमहाभा गःसत्वभुग्योमहाद्भुतः ॥ भूपतिर्भुवभर्ताचमहतःपतिरुच्यते ५

देशपरंपरावत्सु २ नकेवलंजरायुजादीनामात्माऽपितुमहतांभूतानांवियदादीनांपतिः स्रष्टृत्वादिना अतएवभगवान् 'ऐश्वर्यस्यसमग्रस्यज्ञानस्ययशसःश्रियः ॥ वैराग्यस्यचधर्मस्यच ण्णांभगइतींगना'इतिस्मृत्युक्तगुणवान् ३ गृहपतिरधियज्ञं त्रेताग्निरध्यात्मं जाठरः उभावप्युभयत्रस्थित्वा पिंडब्रह्मांडस्थान्देवानन्नेनहविषाचतर्पयतइतिहव्यवाहौ ४ अपामितिअप्पंचं भाद्यापापरनामासहएवात्रअप्शब्दार्थः तस्यगर्भःपुत्रः सत्वभुक् अध्यात्मंबुद्धिसंहर्ता अधिभूतंलोकत्रयसंहर्ता महांश्चासावद्भुतः महत्वइतिनामैकदेशेनतस्यैवग्रहणं भामासत्यभामेति वत् महतोमहाद्भुतस्यपतिः पिता भूपतिर्भुवभर्ताचेत्यर्थः अत्र महच्छब्देनाऽऽध्यात्मंमहत्तत्वंसूक्ष्मबुद्ध्याख्यंग्राह्यं । सहशब्देनकारणमव्यक्ताख्यं । अप्शब्देन सलिलं एको द्रष्टाद्वैतोभवतीत्यादिश्रुतौ सलिलेनोपमितं शुद्धं ब्रह्म ग्राह्यं ५ ॥१८९॥

अस्यसहस्याऽपां प्रवेशेकारणमाहदहन्निति अधिभूतं भरतश्चिताग्निः सहस्यपौत्रोऽद्भुतपुत्रः अध्यात्मंमहतःपुत्रोऽहंकारः भरतिबिभर्तीति मृतान्यचेतनानि खादीनि देहाकारेणि धारय तीतिभरतोनाम तस्यैवभूतसंहारस्थानत्वंदहन्नितिदर्शितं भरस्यभरतस्य तकारलोपआर्षः क्रतुर्नामाध्यात्मं क्रतुः संकल्पात्मकंमनः अग्निष्टोमशब्देन । 'तस्यैवंविदुषोयज्ञस्यात्मायजमा नः श्रद्धापत्नीशरीरमिध्ममुरोवेदिर्लोमानिबर्हिः'इत्यादिनातैत्तिरीयकेसमाम्नातो देहतत्संबंधिक्रियाकलापात्मको मरणरूपावभृथांतःसंसारउच्यते नियतोनित्यः ६ सइति सहउच्य ते प्रथमइतिविशेषणात् देवैःसुरैरिंद्रियैश्चान्विष्यते भोगार्थिभिः परोहिस्वर्गःकारणात्मेतिसंसारक्रतुफलमनिवार्यंदृष्ट्वा सहोऽपिशुद्धंब्रह्माविवेशेत्युत्तरार्धार्थः । कारणात्मतांप्राप्तस्यापि तत्संबंधानपायात् । अन्यथासुप्तिमूर्च्छादौ मुच्येतायत्नतोजनइत्यापद्येत पक्षांतरे भवाग्निपौत्रंनियताख्यमायांतंदृष्ट्वा स्पर्शभयात्स्ववंश्योऽयंदुष्टइतिलज्जयाऽर्णवंविवेश । भृगुशापाद्धि सर्वभक्षत्वंप्राप्तोऽग्निरात्मानंबहुधाकृत्वाऽग्निहोत्रादिषु श्मशानादिषुचस्थितइत्युपाख्यायते ७ देवाइति अथर्वाणमंगिरसं तीव्रतपसं दृष्ट्वा ८ मध्वक्षंपिंगाक्षमग्निभावप्रधानोनिर्देशः द्वये

दहन्मृतानिभूतानितस्याग्निर्भरतोऽभवत् ॥ अग्निष्टोमेचनियतःक्रतुश्रेष्ठोभरस्यतु ६ सवह्निःप्रथमोनित्यंदेवैरन्विष्यतेप्रभुः ॥ आयांतंनियतंदृष्ट्वाप्रविवेशार्ण वंभयात् ७ देवास्तत्रापिगच्छंतिमार्गमाणायथादिशम् ॥ दृष्ट्वात्वग्निरथर्वाणंततोवचनमब्रवीत् ८ देवानांवहहव्यंत्वमहंवीरसुदुर्बलः ॥ अथत्वंगच्छमध्वक्षंप्रि यमेतत्कुरुष्वमे ९ प्रेष्यचाग्निरथर्वाणमन्यंदेशंततोऽगमत् ॥ मत्स्यास्तस्यसमाचख्युःक्रुद्धस्तान्ग्निरब्रवीत् ॥ भक्ष्यावैविविधैर्भावैर्भविष्यथशरीरिणाम् १० अथर्वाणंतथाचापिहव्यवाहोऽब्रवीद्वचः ११ अनुनीयमानोहिभृशंदेववाक्याद्धितेनसः ॥ नैच्छद्वोढुंहविःसोढुंशरीरंचापिसोऽत्यजत् १२ सतच्छरीरंसंत्यज्य प्रविवेशधरांतदा ॥ भूमिंस्पृष्ट्वाऽसृजद्धातून्पृथक्पृथगतीवहि १३ पूयात्सगंधंतेजश्चअस्थिभ्योदेवदारुच ॥ श्लेष्मणःस्फाटिकंतस्यपित्तान्मारकतंतथा १४ यकृत्कृष्णायसंतस्यत्रिभिरेवबभुःप्रजाः ॥ नखास्तस्याभ्रपटलंशिराजालानिविद्रुमम् १५ शरीराद्विविधाश्चान्येधातवोऽस्याभवन्नृप ॥ एवंत्यक्त्वाशरीरंचपर मेतपसिसंस्थितः १६ भृग्वंगिरादिभिर्भूयस्तपसोत्थापितस्तदा ॥ भृशंजज्वालतेजस्वीतपसाऽऽप्यायितःशिखी १७ दृष्ट्वाऋषिंभयाच्चापिप्रविवेशमहार्णवम् ॥ तस्मिन्नष्टेजगद्भीतमथर्वाणमथाश्रितम् ॥ अर्चयामासुरेवैनमथर्वाणंसुरादयः १८

कयोर्द्विवचनैकवचनेइतिवत् अन्यथाद्वयेकेष्वितिस्यात् द्वित्वैकत्वयोरितिव्याख्यानानुपपत्तिश्च तेनैकस्त्वमेवाग्नित्वंगच्छेत्यर्थः । तथाच 'निक्षिपाम्यहमग्नित्वं त्वमग्निःप्रथमोभव'इत्युपक्र मस्योपसंहारेणसहैकवाक्यताभवति ९ प्रेष्यआदिश्य सार्धः श्लोकः १० तथाचापितथैवमत्स्यैराख्यातोऽपि वचस्त्वंमध्वक्षोभवेतिपूर्वोक्तमेव ११ शरीरमाग्नेयंदेहं पक्षेमायांत्य क्त्वानिर्विकल्पोऽभूदित्यर्थः १२ देहत्यागप्रकारमाहसइति तत्स्थूलंशरीरंसंत्यज्य धरांधारणात्धरालयस्थानंलिंगशरीरंप्रविश्य तत्रापिसंकल्पोपनतान्भूम्यादीनसृजत् भूमिस्पृष्ट्वो पाधावविशंकत्वाऽत्रधातून् नीलपीतादींस्तानिव वासनामयानिनाडीरूपाणिदृश्यंते योगमार्गे । तथाचश्रुतिः 'तस्मिन्शुक्लमुतनीलमाहुः पिंगलंहरितंलोहितंच ॥ एषपंथाब्रह्मणाहानु वित्तस्तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्च'इति तैजसो लिंगदेहाभिमानी पक्षांतरेधातून् मनःशीलादीन् १३ । १४ यकृत्शरीरावयवविशेषःत्रिभिःकाष्ठपाषाणलोहैः १५ अन्येस्वर्ण पारदादयः शरीरंलिंगं परमेनिरुपाधौ तपसिआलोचनात्मकेध्याने १६ तपसासामर्थ्येनउत्थापितः समाधेर्व्यावितः १७ ऋषिमथर्वांगिरसं भयं पूर्वोक्तमेव सार्धःश्लोकः १८

अथर्वात्विति अथर्वाणमुन्ममाथ तेनपावकमालोक्यलोकानसृजदितिक्रमेणान्वयोज्ञेयःपूर्वोत्तरार्धयोर्व्यत्यासेन १९। २० एवंत्विति अग्नेरंगिरास्ततोबृहस्पतिस्ततःशंय्वादिक्रमेणवेदोक्तान् धिष्ण्यान्नानास्थानान्यजनयत्। अध्यात्मपक्षेतुसमाधेः मकाशाद्व्युत्थितोऽहंकारंपुरस्कृत्यवृत्तिनदीषुचिदात्मासंचरतीति २१ पद्यांतरेस्पष्टएवार्थःसिंधुमिति २२। २३। २४। २५। २६ अद्भुतस्यति विभूरसिरितिश्रुतेरनुकरणं तेनविभूरसिप्रवाहणोवह्निरसिहव्यवाहनइत्यनुवाकोक्ता अन्येचधिष्ण्याअग्नयोदर्शितास्तेषांज्येष्ठोविभूरित्यर्थः यावंतःपावकाधिष्ण्याःसंतितावंतःसोमाःसोमयागाः एतच्चयाज्ञिकेष्वेवप्रसिद्धं २७ तानेवाग्नीनिवात्मनिचित्तेऽधारयत् अग्निध्यायतोऽग्निरेवप्रजारूपेणाविर्बभूवेत्यर्थः एवंचऋष्यंतराणामप्युपलक्षणं। तथाचसर्वकर्माग्निदेवत्यंस

अथर्वात्वसृजल्लोकानात्मनाऽऽलोक्यपावकम् ॥ मिषतांसर्वभूतानामुन्ममाथमहार्णवम् १९ एवमग्निर्भगवतानष्टःपूर्वमथर्वणा ॥ आहूतःसर्वभूतानांहव्यंवहतिसर्वदा २० एवंत्वजनयद्धिष्ण्यान्वेदोक्तान्विबुधान्बहून ॥ विचरन्विविधान्देशान्भ्रममाणस्तुतत्रवै २१ सिंधुंनदंपंचनदंदेविकाऽथसरस्वती ॥ गंगाचशतकुंभाचशरयूगंडसाह्वया २२ चर्मण्वतीमहीचैवमेध्यामेधातिथिस्तदा ॥ ताम्रावतीवेत्रवतीनद्यस्त्रिस्रोऽथकौशिकी २३ तमसानर्मदाचैवनदीगोदावरीतथा ॥ वेणोपवेणाभीमाचवडवाचैवभारत २४ भारतीसुप्रयोगाचकावेरीमुर्मुरातथा ॥ तुंगवेणाकृष्णवेणाकपिलाशोणएवच २५ एतानद्यस्तुधिष्ण्यानांमातरोयाःप्रकीर्तिताः २६ अद्भुतस्यप्रियाभार्यातस्यपुत्रोविभूरसिः ॥ यावंतःपावकाःप्रोक्ताःसोमास्तावंतएवतु २७ अत्रेश्चाप्यन्वयेजाताब्रह्मणोमानसाःप्रजाः ॥ अत्रिःपुत्रान्स्रष्टुकामस्तानेवात्मन्यधारयत् २८ तस्यतद्ब्रह्मणःकायान्निर्हरंतिहुताशनाः ॥ एवमेतेमहात्मानःकीर्तितास्तेग्नयोमया २९ अप्रमेयायथोत्पन्नाःश्रीमंतस्तिमिरापहाः ॥ अद्भुतस्यतुमाहात्म्यंयथावेदेषुकीर्तितम् ३० तादृशंविद्धिसर्वेषामेकोह्येषुहुताशनः ॥ एकएवैषभगवान्विज्ञेयःप्रथमोंऽगिराः ३१ बहुधानिःसृतःकायाज्ज्योतिष्टोमःक्रतुर्यथा ॥ इत्येषवंशःसुमहानग्नीनांकीर्तितोमया ॥ योऽर्चितोविविधैर्मंत्रैर्हव्यंवहतिदेहिनाम् ॥ ३२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसोपाख्यानेअग्निसमुद्भवेद्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥ ॥ मार्कंडेयउवाच ॥ अग्नीनांविविधावंशाःकीर्तितास्तेमयाऽनघ ॥ शृणुजन्मतुकौरव्यकार्तिकेयस्यधीमतः १ अद्भुतस्याद्भुतंपुत्रंप्रवक्ष्याम्यमितौजसम् ॥ जातंब्रह्मर्षिभार्याभिर्ब्रह्मण्यंकीर्तिवर्धनम् २ देवासुराःपुरायत्ताविनिघ्नंतःपरस्परम् ॥ तत्राजयन्सदादेवान्दानवाघोररूपिणः ३ वध्यमानंबलंदृष्ट्वाबहुशस्तैःपुरंदरः ॥ ससैन्यनायकार्थायचिंतामापभृशंतदा ४ देवसेनांदानवैर्हिभग्नांदृष्ट्वामहाबलः ॥ पालयेद्वीर्यमाश्रित्यसज्ञेयःपुरुषोमया ५

र्वैर्ब्राह्मणाअग्निसंततिरित्युक्तंभवति २८ तस्याऽत्रेर्ब्रह्मणोब्राह्मणस्यकायाद्देहाद्धुताशनानिर्हरंतीतिनिश्चरंति सार्धः २९। ३०। ३१ कायात्कस्यप्रजापतेःपुत्रोंऽगिराःकायस्तस्मात्। कशब्दादण्प्रत्ययेकस्येदितिइकारांतादेशःणित्वादादिवृद्धिः। ज्योतिष्टोमोयथाउद्भिदादिरूपेणबहुधानिर्गतस्तद्वत् ३१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥ ॥ क्रमप्राप्तंकुमारश्चयथोत्पन्नोयथाचाग्नेःसुतोऽभवदित्यस्योत्तरमाह अग्नीनांविविधावंशाइत्यादिना १ अद्भुतस्याग्नेःअद्भुतमभिनवं २। ३। ४। ५

स्त्रियादेवसेनाभिमानिदेवतया ७। ८। ९। १०। ११। १२। १३। १४। १५ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेत्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥

सशैलंमानसंगत्वाध्यायन्नर्थमिदंभृशम् ॥ शुश्रावार्तस्वरंघोरमथमुक्तंस्त्रियातदा ६ अभिधावतुमांकश्चित्पुरुषस्त्रातुचैवह ॥ पतिंचमेप्रदिशतुस्वयंवापतिरस्तुमे ७ पुरंदरस्तुतामाहमाभैर्नास्तिभयंतव ॥ एवमुक्त्वाततोऽपश्यत्केशिनंस्थितमग्रतः ८ किरीटिनंगदापाणिंधातुमंतमिवाचलम् ॥ हस्तेगृहीत्वाकन्यांतामथैनंवासवोऽब्रवीत् ९ अनार्यकर्मन्कस्मात्त्वमिमांकन्यांजिहीर्षसि ॥ वज्रिणंमांविजानीहिविरमास्याःप्रबाधनात् १० ॥ केश्युवाच ॥ विसृजस्वत्वमेवैनांशक्रैषाप्रार्थितामया ॥ क्षमंतेजीवतोगंतुंस्वपुरंपाकशासन ११ एवमुक्त्वागदांकेशीचिक्षेपेंद्रवधायवै ॥ तामापतंतींचिच्छेदमध्येवज्रेणवासवः १२ अथास्यशैलशिखरंकेशीक्रुद्धोव्यवासृजत् ॥ तदाऽऽपतंतंसंप्रेक्ष्यशैलशृंगंशतक्रतुः १३ बिभेदराजन्वज्रेणभुवितन्निपपातह ॥ पततातुतदाकेशीतेनशृंगेणताडितः १४ हित्वाकन्यांमहाभागांप्राद्रवद्भृशपीडितः ॥ अपयातेऽसुरेतस्मिंस्तांकन्यांवासवोऽब्रवीत् ॥ कासिकस्यासिकिंचेहकुरुषेत्वंशुभानने ॥ १५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिर०स्कंदोत्पत्तौकेशिपराभवेत्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥ ॥ कन्योवाच ॥ अहंप्रजापतेःकन्यादेवसेनेतिविश्रुता ॥ भगिनीमेदैत्यसेनासापूर्वंकेशिनाहृता १ सदैवावांभगिन्यौतुसखीभिःसहमानसम् ॥ आगच्छावेहरत्यर्थमनुज्ञाप्यप्रजापतिम् २ नित्यंचावांप्रार्थयतेहृत्वाकेशीमहासुरः ॥ इच्छत्येनंदैत्यसेनानचाहंपाकशासन ३ साहृताऽनेनभगवन्मुक्ताऽहंत्वद्बलेनतु ॥ त्वयादेवेंद्रनिर्दिष्टंपतिमिच्छामिदुर्जयम् ४ ॥ इंद्रउवाच ॥ ममप्रातृष्वसेयीत्वंमातादाक्षायणीमम ॥ आख्यातुंत्वहमिच्छामिस्वयमात्मबलंत्वया ५ ॥ कन्योवाच ॥ अबलाऽहंमहाबाहोपतिस्तुबलवान्मम ॥ वरदानात्पितुर्भावीसुरासुरनमस्कृतः ६ ॥ इंद्रउवाच ॥ कीदृशंतुबलंदेविपत्युस्तवभविष्यति ॥ एतदिच्छाम्यहंश्रोतुंतववाक्यमनिंदिते ७ ॥ कन्योवाच ॥ देवदानवयक्षाणांकिन्नरोरगरक्षसाम् ॥ जेतायोदुष्टदैत्यानांमहावीर्योमहाबलः ८ यस्तुसर्वाणिभूतानित्वयासहविजेष्यति ॥ सहिमेभवितिभर्ताब्रह्मण्यःकीर्तिवर्धनः ९ ॥ मार्कंडेयउवाच ॥ इंद्रस्तस्यावचःश्रुत्वादुःखितोऽचिंतयद्भृशम् ॥ अस्यादेव्याःपतिर्नास्तियादृशंसंप्रभाषते १० अथापश्यत्सउदयेभास्करंभास्करद्युतिः ॥ सोमंचैवमहाभागंविशमानंदिवाकरम् ११ अमावास्यांप्रवृत्तायांमुहूर्तेरौद्रएवतु ॥ देवासुरंचसंग्रामंसोऽपश्यदुदयेगिरौ १२ लोहितैश्चघनैर्युक्तांपूर्वांसंध्यांशतक्रतुः ॥ अपश्यल्लोहितोदंचभगवान्वरुणालयम् १३ भृगुभिश्चांगिरोभिश्चहुतंमंत्रैःपृथग्विधैः ॥ हव्यंगृहीत्वावह्निंचप्रविशंतंदिवाकरम् १४ पर्वचैवचतुर्विंशंतदासूर्यमुपस्थितम् ॥ तथाधर्मगतंरौद्रंसोमंसूर्यगतंचतम् १५

अहमिति १। २। ३। ४। ५। ६। ७। ८। ९। १०। ११। १२। १३। १४। १५

१६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ धातुंधातुं २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६

समालोक्यैकतामेवशशिनोभास्करस्यच ॥ समवायंतुतंरौद्रंदृष्ट्वाशक्रोऽन्वचिंतयत् १६ सूर्याचंद्रमसोर्घोरंदृश्यतेपरिवेषणम् ॥ एतस्मिन्नेवरात्र्यंतेमहद्युद्धंतु
शंसति १७ सरित्सिंधुरपीयंतुप्रत्यसृग्वाहिनीभृशम् ॥ शृगालिन्यग्निवक्त्राचप्रत्यादित्यंविराविणी १८ एषरौद्रश्चसंघातोमहान्युक्तश्चतेजसा ॥ सोमस्यवह्नि
सूर्याभ्यामद्भुतोयंसमागमः १९ जनयेद्यंसुतंसोमःसोऽस्यादेव्याःपतिर्भवेत् ॥ अग्निश्चैतैर्गुणैर्युक्तःसर्वैरग्निश्चदेवता २० एषचेज्जनयेद्गर्भंसोऽस्यादेव्याःपतिर्भ
वेत् ॥ एवंसंचिंत्यभगवान्ब्रह्मलोकंतदागतः २१ गृहीत्वादेवसेनांतामवदत्सपितामहम् ॥ उवाचचास्यादेव्यास्त्वंसाधुशूरंपतिंदिश २२ ॥ ब्रह्मोवाच ॥ मयैत
च्चिंतितंकार्यंत्वयादानवसूदन ॥ तथासभवितागर्भोबलवानुरुविक्रमः २३ सभविष्यतिसेनानीस्त्वयासहशतक्रतो ॥ अस्यादेव्याःपतिश्चैवसभविष्यतिवी
र्यवान् २४ एतच्छ्रुत्वानमस्तस्मैकृत्वाऽसौसहकन्यया ॥ तत्राभ्यगच्छद्देवेंद्रोयत्रदेवर्षयोऽभवन् २५ वसिष्ठप्रमुखामुख्याविप्रेंद्राःसुमहाबलाः ॥ भागार्थंतप
सोपात्तंतेषांसोमंतथाऽध्वरे २६ पिपासवोययुर्देवाःशतक्रतुपुरोगमाः ॥ इष्टिंकृत्वायथान्यायंसुसमिद्धेहुताशने २७ जुहुवुस्तेमहात्मानोहव्यंसर्वदिवौकसाम् ॥
समाहूतोहुतवहःसोऽद्भुतःसूर्यमंडलात् २८ विनिःसृत्याययौवह्निर्वाग्यतोविधिवत्प्रभुः ॥ आगम्याहवनीयंवैतैर्द्विजैर्मंत्रतोहुतम् २९ सतत्रविविधंहव्यंप्रतिगृह्य
हुताशनः ॥ ऋषिभ्योभरतश्रेष्ठप्रायच्छतदिवौकसाम् ३० निष्क्रामंश्चाप्यपश्यत्सपत्नीस्तेषांमहात्मनाम् ॥ स्वेष्वासनेषूपविष्टाःस्वपंतीश्चतथासुखम् ३१
रुक्मवेदिनिभास्तास्तुचंद्रलेखाइवामलाः ॥ हुताशनार्चिप्रतिमाःसर्वास्ताराइवाद्भुताः ३२ सतत्रतेनमनसाबभूवक्षुभितेंद्रियः ॥ पत्नीर्दृष्ट्वाद्विजेंद्राणांवह्निः
कामवशंययौ ३३ भूयःसंचिंतयामासनन्याय्यंक्षुभितोह्यहम् ॥ साध्व्यःपत्न्योद्विजेंद्राणामकामाःकामयाम्यहम् ३४ नैताःशक्यामयाद्रष्टुंस्प्रष्टुंवाप्यनिमि
त्ततः ॥ गार्हपत्यंसमाविश्यतस्मात्पश्याम्यभीक्ष्णशः ३५ ॥ मार्कंडेयउवाच ॥ संस्पृशन्निवसर्वास्ताःशिखाभिःकांचनप्रभाः ॥ पश्यमानश्चमुमुदेगार्हपत्यं
समाश्रितः ३६ निरुष्यतत्रसुचिरमेवंवह्निर्वशंगतः ॥ मनस्तासुविनिक्षिप्यकामयानोवरांगनाः ३७ कामसंतप्तहृदयोदेहत्यागविनिश्चितः ॥ अलाभेब्राह्मण
स्त्रीणामग्निर्वनमुपागमत् ३८ स्वाहातंदक्षदुहिताप्रथमंकामयत्तदा ॥ सातस्यच्छिद्रमन्वैच्छच्चिरात्प्रभृतिभाविनी ३९ अप्रमत्तस्यदेवस्यनचपश्यत्यनिंदिता ॥
सातंज्ञात्वायथावत्तुवह्निंवनमुपागतम् ४० तत्त्वतःकामसंतप्तंचिंतयामासभाविनी ॥ अहंसप्तर्षिपत्नीनांकृत्वारूपाणिपावकम् ४१ कामयिष्यामिकामार्तांता
सांरूपेणमोहितम् ॥ एवंकृतेप्रीतिरस्यकामावाप्तिश्चमेभवेत् ॥ ४२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेस्कंदोत्पत्तौ ॥१३३॥
चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥ ॥

३७ । ३८ । ३९ । ४० । ४१ । ४२ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेचतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥ ॥

शिवेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९

मार्कंडेयउवाच ॥ शिवाभार्यात्वंगिरसःशीलरूपगुणान्विता ॥ तस्याःसाप्रथमंरूपंकृत्वादेवीजनाधिप १ जगामपावकाभ्याशंतंचोवाचवरांगना ॥ मामग्नेका
मसंतप्तांत्वंकामयितुमर्हसि २ करिष्यसिनचेदेवंमृतांमामुपधारय ॥ अहमंगिरसोभार्याशिवानामहुताशन ॥ शिष्टाभिःप्रहितांप्राप्तांमंत्रयित्वाविनिश्चयम् ३
अग्निरुवाच ॥ कथंमांत्वंविजानीषेकामार्तामितराःकथम् ॥ यास्त्वयाकीर्तिताःसर्वाःसप्तर्षीणांप्रियाःस्त्रियः ४ ॥ शिवोवाच ॥ अस्माकंत्वंप्रियोनित्यंबिभीमस्तु
वयंतव ॥ त्वच्चित्तमिंगितैर्ज्ञात्वाप्रेषिताऽस्मितवांतिकम् ५ मैथुनायेहसंप्राप्ताकामंप्राप्तंद्रुतंचर ॥ जामयोमांप्रतीक्षंतेगमिष्यामिहुताशन ६ ॥मार्कंडेयउवाच॥
ततोऽग्निरुपयेमेतांशिवांप्रीतिमुदायुतः ॥ प्रीत्यादेवीसमायुक्ताशुक्रंजग्राहपाणिना ७ अचिंतयन्ममेदंयेरूपंद्रक्ष्यंतिकानने ॥ तेब्राह्मणीनामनृतंदोषंवक्ष्यं
तिपावके ८ तस्मादेतद्रक्ष्यमाणागरुडीसंभवाम्यहम् ॥ वनान्निर्गमनंचैवसुखंममभविष्यति ९ मार्कंडेयउवाच ॥ सुपर्णीसातदाभूत्वानिर्जगाममहावनात् ॥
अपश्यत्पर्वतंश्वेतंशरस्तंबैःसुसंवृतम् १० दृष्टीविषैःसप्तशीर्षैर्गुप्तंभोगिभिरद्भुतैः ॥ रक्षोभिश्चपिशाचैश्चरौद्रैर्भूतगणैस्तथा ११ राक्षसीभिश्चसंपूर्णमनेकैश्च
मृगद्विजैः ॥ सातत्रसहसागत्वाशैलपृष्ठंसुदुर्गमम् १२ प्राक्षिपत्कांचनेकुंडेशुक्रंसात्वरिताशुभा ॥ सप्तानामपिसादेवीसप्तर्षीणांमहात्मनाम् १३ पत्नीसरूप
तांकृत्वाकामयामासपावकम् ॥ दिव्यरूपमरुंधत्याकर्तुंनशकितंतया १४ तस्यास्तपःप्रभावेणभर्तृशुश्रूषणेनच ॥ षट्कृत्वस्तत्तुनिक्षिप्तमग्नेरेतःकुरूत्तम
१५ तस्मिन्कुंडेप्रतिपदिकामिन्यास्वाहयातदा ॥ तत्स्कन्नंतेजसातत्रसंवृतंजनयत्सुतम् १६ ऋषिभिःपूजितंस्कन्नमनयत्स्कंदतांततः ॥ षट्शिराद्विगुण
श्रोत्रोद्वादशाक्षिभुजक्रमः १७ एकग्रीवैकजठरःकुमारःसमपद्यत ॥ द्वितीयायामभिव्यक्तस्तृतीयायांशिशुर्बभौ १८ अंगप्रत्यंगसंभूतश्चतुर्थ्यामभवद्गुहः ॥
लोहिताभ्रेणमहतासंवृतःसहविद्युता १९ लोहिताभ्रेसुमहतिभातिसूर्यइवोदितः ॥ गृहीतंतुधनुस्तेनविपुलंलोमहर्षणम् २० न्यस्तंयत्त्रिपुरघ्नेनसुरारिविनिकृं
तनम् ॥ तद्गृहीत्वाधनुःश्रेष्ठंननादबलवांस्तदा २१ संमोहयन्निवेमान्सत्रीँल्लोकान्सचराचरान् ॥ तस्यतंनिनदंश्रुत्वामहामेघौघनिःस्वनम् २२ उत्पेततुर्महाना
गौचित्रश्चैरावतश्चह ॥ तावापतंतौसंप्रेक्ष्यसबालोऽर्कसमद्युतिः २३ द्वाभ्यांगृहीत्वापाणिभ्यांशक्तिंचान्येनपाणिना ॥ अपरेणाग्निदायादस्ताम्रचूडंभुजेनसः
२४ महाकायमुपश्लिष्टंकुक्कुटंबलिनांवरम् ॥ गृहीत्वाव्यनदद्भीमंचिक्रीडचमहाभुजः २५ द्वाभ्यांभुजाभ्यांबलवान्गृहीत्वाशंखमुत्तमम् ॥ प्राध्मापयतभूतानां
त्रासनंबलिनामपि २६ द्वाभ्यांभुजाभ्यामाकाशंबहुशोनिजघानह ॥ क्रीडन्भातिमहासेनस्त्रीन्लोकान्वदनैःपिबन् २७ पर्वताग्रेऽप्रमेयात्मारश्मिमानुदये
यथा ॥ सतस्यपर्वतस्याग्रेनिषण्णोऽद्भुतविक्रमः २८ व्यलोकयदमेयात्मामुखैर्नानाविधैर्दिशः ॥ सपश्यन्विविधान्भावांश्चकारनिनदंपुनः २९

३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेपंचविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥ तस्मिन्निति १ विपरी

तस्यतंनिनदंश्रुत्वान्यपतन्बहुधाजनाः ॥ भीताश्चोद्विग्नमनसस्तमेवशरणंययुः ३० येतुतंसंश्रितादेवंनानावर्णास्तदाजनाः ॥ तानप्याहुःपारिषदान्ब्राह्म
णाःसुमहाबलान् ३१ सतूत्थायमहाबाहुरुपसांत्व्यचतान्जनान् ॥ धनुर्विकृष्यव्यसृजद्बाणाञ्श्वेतेमहागिरौ ३२ बिभेदसशरैःशैलंक्रौंचंहिमवतःसुतम् ॥ तेनहं
साश्चगृध्राश्चमेरुंगच्छंतिपर्वतम् ३३ सविशीर्णोऽपतच्छैलोभृशमार्तस्वरान्रुवन् ॥ तस्मिन्निपतितेत्वन्येनेदुःशैलाभृशंतदा ३४ सतंनादंभृशार्तानांश्रुत्वाऽ
पिबलिनांवरः ॥ नप्राच्यवदमेयात्माशक्तिमुद्यम्यचानदत् ३५ सातदाविमलाशक्तिःक्षिप्तातेनमहात्मना ॥ बिभेदशिखरंघोरंश्वेतस्यतरसागिरेः ३६ सतेना
भिहतोदीर्णोगिरिःश्वेतोऽचलैःसह ॥ उत्पपातमहींत्यक्त्वाभीतःससुमहात्मनः ३७ ततःप्रव्यथिताभूमिर्व्यशीर्यसमंततः ॥ आर्तास्कंदंसमासाद्यपुनर्बलवती
बभौ ३८ पर्वताश्चनमस्कृत्यतमेवपृथिवींगताः ॥ अथैनमभजल्लोकःस्कंदंशुक्लस्यपंचमीम् ३९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआं
गिरसेकुमारोत्पत्तौपंचविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥ ॥ मार्कंडेयउवाच ॥ तस्मिन्जातेमहासत्त्वेमहासेनेमहाबले ॥ समुत्तस्थुर्महोत्पाताघो
ररूपाःपृथग्विधाः १ स्त्रीपुंसोर्विपरीतंचतथाद्वंद्वानियानिच ॥ ग्रहादीप्तादिशःखंचररासचमहीभृशम् २ ऋषयश्चमहाघोरान्दृष्ट्वोत्पातान्समंततः ॥ अकुर्वन्
शांतिमुद्विग्नालोकानांलोकभावनाः ३ निवसंतिवनेयेतुतस्मिंश्चैत्ररथेजनाः ॥ तेऽब्रुवन्नेषनोऽनर्थःपावकेनाहितोमहान् ४ संगम्यषड्भिःपत्नीभिःसप्तर्षीणामिति
स्मह ॥ अपरेगरुडीमाहुस्त्वयाऽनर्थोऽयमाहृतः ५ यैर्दृष्टासातदादेवीतस्यारूपेणगच्छती ॥ नतुतत्स्वाहयाकर्मकृतंजानातिवैजनः ६ सुपर्णीतुवचःश्रुत्वा
ममायंतनयस्त्विति ॥ उपगम्यशनैःस्कंदमाहाहंजननीतव ७ अथसप्तर्षयःश्रुत्वाजातंपुत्रंमहौजसम् ॥ तत्यजुःषट्तदापत्नीर्विनादेवीमरुंधतीम् ८ षड्भिरेव
तदाजातमाहुस्तद्वनवासिनः ॥ सप्तर्षीनाहचस्वाहाममपुत्रोऽयमित्युत ९ अहंजानेनैतदेवमितिराजन्पुनःपुनः ॥ विश्वामित्रस्तुकृत्वेष्टिंसप्तर्षीणांमहामुनिः ॥
१० पावकंकामसंतप्तमदृष्टःपृष्ठतोऽन्वगात् ॥ तत्तेननिखिलंसर्वमवबुद्धंयथातथम् ११ विश्वामित्रस्तुप्रथमंकुमारंशरणंगतः ॥ स्तवंदिव्यंसंप्रचक्रेमहासेनस्य
चापिसः १२ मंगलानिचसर्वाणिकौमाराणित्रयोदश ॥ जातकर्मादिकास्तस्यक्रियाश्चक्रेमहामुनिः १३ षड्वक्त्रस्यतुमाहात्म्यंकुक्कुटस्यतुसाधनम् ॥ शक्त्या
देव्याःसाधनंचतथापारिषदामपि १४ विश्वामित्रश्चकारैतत्कर्मलोकहितायवै ॥ तस्माद्दृषिःकुमारस्यविश्वामित्रोऽभवत्प्रियः १५ अन्वजानाच्चस्वाहायारू
पान्यत्वंमहामुनिः ॥ अब्रवीच्चमुनीन्सर्वान्नापराध्यंतिवैस्त्रियः १६

तंवैरं द्वंद्वान्यतिशीतात्युष्णादीनि २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । जातकर्मादिका विवाहात्प्राचीनास्त्रयोदशक्रियाः । १३ । १४ । १५ । १६

श्रुत्वातुश्रुत्वाऽपि सर्वतोलोकापवादभयाद्रामवत्पत्नीस्त्यक्तवंतइत्यर्थः १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ ॥ इत्यारण्यकेपर्वणिनीलकं

श्रुत्वातुतत्त्वतस्तस्मात्तेपत्नीःसर्वतोऽत्यजन् ॥ मार्कंडेयउवाच ॥ स्कंदंश्रुत्वातदादेवावासवंसहिताऽब्रुवन् १७ अविषह्यबलंस्कंदंजहिशक्राशुमाचिरम् ॥ यादि
वाननिहंस्येनंदेवंद्रोऽयंभविष्यति १८ त्रैलोक्यंसन्निगृह्यास्मांस्त्वांचशक्रमहाबल ॥ सतानुवाचव्यथितोबालोऽयंसुमहाबलः १९ स्रष्टारमपिलोकानांयुधिवि
क्रम्यनाशयेत् ॥ नबालमुत्सहेहंतुमितिशक्रःप्रभाषते २० तेब्रुवन्नास्तितेवीर्यंयतएवंप्रभाषसे ॥ सर्वास्त्वद्याभिगच्छंतुस्कंदंलोकस्यमातरः २१ कामवीर्याघ्नंतुवै
नंतथेत्युक्त्वाचतायुयुः ॥ तमप्रतिबलंदृष्ट्वाविषण्णवदनास्तुताः २२ अशक्योऽयंविचिंत्यैवंतमेवशरणंययुः ॥ उचुश्चैनंत्वमस्माकंपुत्रोभवमहाबल २३ अभि
नंदस्वनःसर्वाःप्रस्नुताःस्नेहविक्लवाः ॥ तासांतद्वचनंश्रुत्वापातुकामःस्तनान्प्रभुः २४ ताःसंपूज्यमहासेनःकामांश्चासांप्रदायसः ॥ अपश्यदग्निमायांतंपितरं
बलिनांबली २५ सतुसंपूजितस्तेनसहमातृगणेनह ॥ परिवार्यमहासेनंरक्षमाणःस्थितःशिवः २६ सर्वासांयातुमातॄणांनारीक्रोधसमुद्भवा ॥ धात्रीस्वपुत्रवत्स्कं
दंशूलहस्ताऽभ्यरक्षत २७ लोहितस्योदधेःकन्याक्रूरालोहितभोजना ॥ परिष्वज्यमहासेनंपुत्रवत्पर्यरक्षत २८ अग्निर्भूत्वानैगमेयश्छागवक्त्रोबहुप्रजः ॥ रमयामास
शैलस्थंबालंक्रीडनकैरिव २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेस्कंदोत्पत्तौषड्विंशाधिकद्विशततमोऽध्यायः ॥ २२६ ॥
॥ मार्कंडेयउवाच ॥ ग्रहाःसोपग्रहाश्चैवऋषयोमातरस्तथा ॥ हुताशनमुखाश्चैवदृप्ताःपारिषदांगणाः १ एतेचान्येचबहवोघोरास्त्रिदिववासिनः ॥ परि
वार्यमहासेनंस्थितामातृगणैःसह २ संदिग्धंविजयंदृष्ट्वाविजयेप्सुःसुरेश्वरः ॥ आरुह्यैरावतस्कंधंप्रययौदैवतैःसह ३ आदायवज्रंबलवान्सर्वैर्देवगणैर्वृतः ॥
विजिघांसुर्महासेनमिंद्रस्तूर्णतरंययौ ४ उग्रंतंचमहानादंदेवानीकंमहाप्रभम् ॥ विचित्रध्वजसन्नाहंनानावाहनकार्मुकम् ५ प्रवरांबरसंवीतंश्रियाजुष्टमलंकृतम् ॥
विजिघांसुंतमायांतंकुमारःशक्रमन्वयात् ६ विनदन्पार्थदेवेशोद्रुतंयातिमहाबलः ॥ संहर्षयन्देवसेनांजिघांसुःपावकात्मजम् ७ संपूज्यमानस्त्रिदशैस्तथैवपर
मर्षिभिः ॥ समीपमथसंप्राप्तःकार्तिकेयस्यवासवः ८ सिंहनादंततश्चक्रेदेवेशःसहितैःसुरैः ॥ गुहोऽपिशब्दंतंश्रुत्वाव्यनदत्सागरोयथा ९ तस्यशब्देनमहता
समुद्भूतोदधिप्रभम् ॥ बभ्रामतत्रतत्रैवदेवसैन्यमचेतनम् १० जिघांसूनुपसंप्राप्तान्देवान्दृष्ट्वासपावकिः ॥ विससर्जमुखात्क्रुद्धःप्रवृद्धाःपावकार्चिषः ११ अद
६५ हद्देवसैन्यानिवेपमानानिभूतले ॥ तेप्रदीप्तशिरोदेहाःप्रदीप्तायुधवाहनाः १२ प्रच्युताःसहसाभांतिव्यस्तास्तारागणाइव ॥ दह्यमानाःप्रपन्नास्तेशरणंपावका
त्मजम् १३ देवावज्रधरंत्यक्त्वाततःशांतिमुपागताः ॥ त्यक्तोदेवैस्ततःस्कंदेवज्रंशक्रोन्यपातयत् १४

ठीयेभारतभावदीपेषड्विंशाधिकद्विशततमोऽध्यायः ॥ २२६ ॥ ग्रहाइति उपग्रहाराहुप्रभृतयः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४

१५ । १६ वज्रस्यविशनात्बाहोराखननाच्चविशाखइत्यर्थः १७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेसप्तविंशाधिकद्विशततमोऽध्यायः ॥ २२७ ॥ ॥ ७ ॥ स्कंदेति १ । २

तद्विसृष्टंजघानाशुपार्श्वंस्कंदस्यदक्षिणम् ॥ बिभेदचमहाराजपार्श्वंतस्यमहात्मनः १५ वज्रप्रहारात्स्कंदस्यसंजातःपुरुषोऽपरः ॥ युवाकांचनसन्नाहःशक्तिधृग्दिव्यकुंडलः १६ यद्वज्रविशनाज्जातोविशाखस्तेनसोऽभवत् ॥ संजातमपरंदृष्ट्वाकालानलसमद्युतिम् १७ भयादिंद्रस्तुतंस्कंदंप्रांजलिःशरणंगतः ॥ तस्याभयंददौस्कंदःसहसैन्यस्यसत्तमः ॥ ततःप्रहृष्टास्त्रिदशावादित्राण्यभ्यवादयन् १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेइंद्रस्कंदसमागमेसप्तविंशाधिकद्विशततमोऽध्यायः ॥ २२७ ॥ मार्कंडेयउवाच॥ स्कंदपारिषदान्घोरान्शृणुष्वाद्भुतदर्शनान् ॥ वज्रप्रहारात्स्कंदस्यजज्ञुस्तत्रकुमारकाः १ येहरंतिशिशून्जातान्गर्भस्थांश्चैवदारुणाः ॥ वज्रप्रहारात्कन्याश्चजज्ञिरेऽस्यमहाबलाः २ कुमारास्तेविशाखंचपितृत्वेसमकल्पयन् ॥ सभूत्वाभगवान्संख्येरक्षंश्छागमुखस्तदा ३ वृतःकन्यागणैःसर्वैरात्मीयैःसहपुत्रकैः॥ मातृणांप्रेक्षतीनांचभद्रशाखश्चकौसलः ४ ततःकुमारपितरंस्कंदमाहुर्जनाभुवि ॥ रुद्रमग्निमुखांस्वाहांप्रदेशेषुमहाबलम् ५ यजंतिपुत्रकामाश्चपुत्रिणश्चसदाजनाः ॥ यास्तास्त्वजनयत्कन्यास्तपोनाममहुताशनः ६ किंकरोमीतिताःस्कंदंसंप्राप्ताःसमभाषयन् ॥ कुमार्यऊचुः ॥ भवेमसर्वलोकस्यमातरोवयमुत्तमाः ७ प्रसादात्तवपूज्याश्चप्रियमेतत्कुरुष्वनः ॥ सोऽब्रवीद्बाढमित्येवंभविष्यध्वंपृथग्विधाः ८ शिवाश्चैवाशिवाश्चैवपुनःपुनरुदारधीः ॥ ततःसंकल्प्यपुत्रत्वेस्कंदंमातृगणोऽगमत् ९ काकीचहलिमाचैवमालिनीबृंहितातथा ॥ आर्यापलालावैमित्रासप्तैताःशिशुमातरः १० एतासांवीर्यसंपन्नःशिशुर्नामातिदारुणः ॥ स्कंदप्रसादजःपुत्रोलोहिताक्षोभयंकरः ११ एषवीराष्टकःप्रोक्तःस्कंदमातृगणोद्भवः ॥ छागवक्त्रेणसहितोनवकःपरिकीर्त्यते १२ षष्ठंछागमयंवक्त्रंस्कंदस्यैवेतिविद्धितत् ॥ षट्शिरोभ्यंतरंराजन्नित्यंमातृगणार्चितम् १३ षण्णांतुप्रवरंतस्यशीर्षाणामिहशब्द्यते ॥ शक्तियेनासृजद्दिव्यांभद्रशाखइतिस्मह १४ इत्येतद्विविधाकारंवृत्तंशुक्लस्यपंचमीम् ॥ तत्रयुद्धंमहाघोरंवृत्तंषष्ठ्यांजनाधिप १५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेकुमारोत्पत्तौअष्टविंशाधिकद्विशततमोऽध्यायः ॥ २२८ ॥ मार्कंडेयउवाच॥ उपविष्टंतुतंस्कंदंहिरण्यकवचस्रजम्॥ हिरण्यचूडमुकुटंहिरण्याक्षंमहाप्रभम् १ लोहितांबरसंवीतंतीक्ष्णदंष्ट्रंमनोरमम् ॥ सर्वलक्षणसंपन्नंत्रैलोक्यस्यापिसुप्रियम् २ ततस्तंवरदंशूरंयुवानंमृष्टकुंडलम् ॥ अभजत्पद्मरूपाश्रीःस्वयमेवशरीरिणी ३ श्रियाजुष्टःपृथुयशाःसकुमारवरस्तदा ॥ निषण्णोदृश्यतेभूतैःपौर्णमास्यांयथाशशी ४ अपूजयन्महात्मानोब्राह्मणास्तंमहाबलम् ॥ इदमाहुस्तदाचैवस्कंदंतत्रमहर्षयः ५ ॥ ऋषयऊचुः॥ हिरण्यगर्भभद्रंतेलोकानांशंकरोभव ॥ त्वयाषड्रात्रजातेनसर्वेलोकावशीकृताः ६ ॥११३॥

३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेअष्टविंशाधिकद्विशततमोऽध्यायः ॥ २२८ ॥ ॥ ७ ॥
उपविष्टमिति १ । २ । ३ । ४ । ५ हिरण्यगर्भेतिसंबोधनेनस्कंदस्यसूत्रात्ममूर्तितांदर्शयति ६

---

७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ रुद्रमग्निमिति 'रुद्रोवाएषयदग्निः' इतिश्रुतिविदोद्विजाःप्राहुः

अभयंचपुनर्दत्तंत्वयैवैषांसुरोत्तम ॥ तस्मादिंद्रोभवानस्तुत्रैलोक्यस्याभयंकरः ७ ॥ स्कंदउवाच ॥ किमिंद्रःसर्वलोकानांकरोतीहतपोधनाः ॥ कथंदेवगणांश्चैवपातिनित्यंसुरेश्वरः ८ ॥ ऋषयऊचुः ॥ इंद्रोदधातिभूतानांबलंतेजःप्रजासुखम् ॥ तुष्टःप्रयच्छतितथासर्वान्कामान्सुरेश्वरः ९ दुर्वृत्तानांसंहरतिव्रतस्थानांप्रयच्छति ॥ अनुशास्तिचभूतानिकार्येषुबलसूदनः १० असूर्येचभवेत्सूर्यस्तथाऽचंद्रेचचंद्रमाः ॥ भवत्यग्निश्चवायुश्चपृथिव्यापश्चकारणैः ११ एतदिंद्रेणकर्तव्यमिंद्रेहिविपुलंबलम् ॥ त्वंचवीरबलीश्रेष्ठस्तस्मादिंद्रोभवस्वनः १२ ॥ शक्रउवाच ॥ भवस्वेंद्रोमहाबाहोसर्वेषांनःसुखावहः ॥ अभिषिच्यस्वचैवाद्यप्राप्तरूपोऽसिसत्तम १३ ॥ स्कंदउवाच ॥ शाधित्वमेवत्रैलोक्यमव्यग्रोविजयेरतः ॥ अहंतेकिंकरःशक्रनममेंद्रत्वमीप्सितम् १४ ॥ शक्रउवाच ॥ बलंतवाद्भुतंवीरत्वंदेवानामरीन्जहि ॥ अवज्ञास्यंतिमांलोकावीर्येणतवविस्मिताः १५ इंद्रत्वेतुस्थितंवीरबलहीनंपराजितम् ॥ आवयोश्चमिथोभेदेप्रयतिष्यंत्यतंद्रिताः १६ भेदितेचत्वयिविभोलोकोद्वैधमुपेष्यति ॥ द्विधाभूतेषुलोकेषुनिश्चितेष्वावयोस्तथा १७ विग्रहःसंप्रवर्तेतभूतभेदान्महाबल ॥ तत्रत्वंमांरणेतातयथाश्रद्धंविजेष्यसि १८ तस्मादिंद्रोभवानेवभवितामाविचारय ॥ स्कंदउवाच ॥ त्वमेवराजाभद्रंतेत्रैलोक्यस्यममैवच १९ करोमिकिंचतेशक्रशासनंतद्ब्रवीहिमे ॥ इंद्रउवाच ॥ अहमिंद्रोभविष्यामितववाक्यान्महाबल २० यदिसत्यमिदंवाक्यंनिश्चयाद्भाषितंत्वया ॥ यदिवाशासनंस्कंदकर्तुमिच्छसिमेशृणु २१ अभिषिच्यस्वदेवानांसैनापत्येमहाबल ॥ स्कंदउवाच ॥ दानवानांविनाशायदेवानामर्थसिद्धये २२ गोब्राह्मणहितार्थायसैनापत्येऽभिषिंचमाम् ॥ मार्कंडेयउवाच॥ सोऽभिषिक्तोमघवतासर्वैर्देवगणैःसह २३ अतीवशुशुभेतत्रपूज्यमानोमहर्षिभिः ॥ तत्रतत्कांचनंछत्रंध्रियमाणंव्यरोचत २४ यथैवसुसमिद्धस्यपावकस्यात्ममंडलम् ॥ विश्वकर्मकृताचास्यदिव्यामालाहिरण्मयी २५ आबद्धात्रिपुरघ्नेनस्वयमेवयशस्विना ॥ आगम्यमनुजव्याघ्रसहदेव्यापरंतप २६ अर्चयामाससुप्रीतोभगवान्गोवृषध्वजः ॥ रुद्रमग्निंद्विजाःप्राहूरुद्रसूनुस्ततस्तुसः २७ रुद्रेणशुक्रमुत्सृष्टंतच्छ्वेतःपर्वतोऽभवत् ॥ पावकस्येंद्रियंश्वेतेकृत्तिकाभिःकृतंनगे २८ पूज्यमानंतुरुद्रेणदृष्ट्वासर्वेदिवौकसः ॥ रुद्रसूनुंततःप्राहुर्गुहंगुणवतांवरम् २९ अनुप्रविश्यरुद्रेणवह्निंजातोह्ययंशिशुः ॥ तत्रजातस्ततःस्कंदोरुद्रसूनुस्ततोऽभवत् ३० रुद्रस्यवह्नेःस्वाहायाःषण्णांस्त्रीणांचभारत ॥ जातःस्कंदःसुरश्रेष्ठोरुद्रसूनुस्ततोऽभवत् ३१ अरजेवाससीरक्तेवसानःपावकात्मजः ॥ भातिदीप्तवपुःश्रीमानरक्ताभ्राभ्यामिवांशुमान् ३२ कुक्कुटश्चाग्निनादत्तस्तस्यकेतुरलंकृतः ॥ रथेसमुच्छ्रितोभातिकालाग्निरिवलोहितः ३३

२७ । २८ । २९ प्रकारांतरेणस्कंदस्यरुद्रसूनुत्वमाह अनुप्रविश्येति अनुप्रविश्यस्थितेनेतिशेषः ततोवह्निदेहेप्रविष्टाद्रुद्राज्जातइतिवारुद्रसूनुरित्यर्थः ३० । ३१ । ३२ । ३३

२४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेऊनत्रिंशदधिक

याचेष्टासर्वभूतानांप्रभाशांतिर्बलंतथा ॥ अग्रतस्तस्यसाशक्तिर्देवानांजयवर्धिनी ३४ विवेशकवचंचास्यशरीरेसहजंतथा ॥ युध्यमानस्यदेवस्यप्रादुर्भवति
तत्सदा ३५ शक्तिर्धर्मोबलंतेजःकांतत्वंसत्यमुन्नतिः ॥ ब्रह्मण्यत्वमसंमोहोभक्तानांपरिरक्षणम् ३६ निकृंतनंचशत्रूणांलोकानांचाभिरक्षणम् ॥ स्कंदेनसहजाता
निसर्वाण्येवजनाधिप ३७ एवंदेवगणैःसर्वैःसोभिषिक्तःस्वलंकृतः ॥ बभौप्रतीतःसुमनाःपरिपूर्णेंदुमंडलः ३८ इष्टैःस्वाध्यायघोषैश्चदेवतूर्यवरैरपि ॥ देवगंध
र्वगीतैश्चसर्वैरप्सरसांगणैः ३९ एतैश्चान्यैश्चबहुभिस्तुष्टैर्हृष्टैःस्वलंकृतैः ॥ सुसंवृतःपिशाचानांगणैर्देवगणैस्तथा ४० क्रीडन्भातितदादेवैरभिषिक्तश्चपावकिः ॥
अभिषिक्तंमहासेनमपश्यंतदिवौकसः ४१ विनिहत्यतमःसूर्यंयथेहाभ्युदितंतथा ॥ अथैनमभ्ययुःसर्वादेवसेनाःसहस्रशः ४२ अस्माकंत्वंपतिरितिब्रुवाणाः
सर्वतोदिशः ॥ ताःसमासाद्यभगवान्सर्वभूतगणैर्वृतः ४३ अर्चितस्तुस्तुतश्चैवसांत्वयामासताअपि ॥ शतक्रतुश्चाभिषिच्यस्कंदंसेनापतिंतदा ४४ सस्मार
तांदेवसेनांयासातेनविमोक्षिता ॥ अयंतस्याःपतिर्नूनंविहितोब्रह्मणास्वयम् ४५ इतिचिंत्यानयामासदेवसेनांस्वलंकृताम् ॥ स्कंदंप्रोवाचबलभिदियंकन्यासु
रोत्तम ४६ अजातेत्वयिनिर्दिष्टातवपत्नीस्वयंभुवा ॥ तस्मात्त्वमस्याविधिवत्पाणिंमंत्रपुरस्कृतम् ४७ गृहाणदक्षिणंदेव्याःपाणिनापद्मवर्चसा ॥ एवमुक्तःसज
ग्राहतस्याःपाणिंयथाविधि ४८ बृहस्पतिर्मंत्रविद्धिजजापचजुहावच ॥ एवंस्कंदस्यमहिषींदेवसेनांविदुर्जनाः ४९ षष्ठींयांब्राह्मणाप्राहुर्लक्ष्मीमाशांसुखप्रदाम् ॥
सिनीवालींकुहूंचैवसद्वृत्तिमपराजिताम् ५० यदास्कंदःपतिर्लब्धःशाश्वतोदेवसेनया ॥ तदातमाश्रयल्लक्ष्मीःस्वयंदेवीशरीरिणी ५१ श्रीजुष्टःपंचमींस्कंदस्त
स्माच्छ्रीपंचमीस्मृता ॥ षष्ठ्यांकृतार्थोऽभूद्यस्मात्तस्मात्षष्ठीमहातिथिः ५२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेस्कंदो
पाख्यानेऊनत्रिंशदधिकद्विशततमोऽध्यायः ॥२२९॥ मार्कंडेयउवाच ॥ श्रियाजुष्टंमहासेनंदेवसेनापतिंकृतम् ॥ सप्तर्षिपत्न्यःषड्देव्यस्तत्सकाशमथागमन् १
ऋषिभिःसंपरित्यक्ताधर्मयुक्तामहाव्रताः ॥ द्रुतमागम्यचोचुस्तादेवसेनापतिंप्रभुम् २ वयंपुत्रपरित्यक्ताभर्तृभिर्देवसंमितैः ॥ अकारणाद्रुषातैस्तुपुण्यस्थानात्परि
च्युताः ३ अस्माभिःकिलजातस्त्वमितिकेनाप्युदाहृतम् ॥ तत्सत्यमेतत्संश्रुत्यतस्मान्नस्त्रातुमर्हसि ४ अक्षयश्चभवेत्स्वर्गस्त्वत्प्रसादाद्धिनःप्रभो ॥ त्वांपुत्रंचाप्य
भीप्सामःकृत्वैतदनृणोभव ५॥स्कंदउवाच॥ मातरोहिभवंत्योमेसुतोवोऽहमनिंदिताः॥यद्वाऽपीच्छततत्सर्वंसंभविष्यतिवस्तथा६ मार्कंडेयउवाच ॥ विवक्षंतंततः
शक्रंकिंकार्यमितिसोऽब्रवीत्॥उक्तःस्कंदेनब्रूहीतिसोऽब्रवीद्वासवस्ततः७अभिजित्स्पर्धमानातुरोहिण्याकन्यसीस्वसा॥ इच्छंतीज्येष्ठतांदेवीतपस्तप्तुंवनंगता ८

द्विशततमोऽध्यायः ॥ २२९ ॥ ॥ ७ ॥ श्रियेति १ । २ । ३ । ४ । ५ । ६ विवक्षंतमभिजिन्नक्षत्रस्यपतनान्नक्षत्रसंख्याकथंसमाभवेदितिप्रष्टुमिच्छंतंशक्रंसस्कंदः
किंकार्यमित्यब्रवीत् ७ कन्यसीकनिष्ठा वनंगता अधिकारंत्यक्त्वेतिशेषः ८

साचज्येष्ठतास्पर्धयागगनाच्च्युताऽतोऽहंमूढोऽस्मि नक्षत्रसंख्यापूरणप्रकारस्याज्ञानादितिभावः ९ धनिष्ठादिरिति यस्यनक्षत्रस्याद्यक्षणे चंद्रसूर्यगुरूणांयोगस्तद्युगादिनक्षत्रं तच्चपूर्वं रोहि
ण्यभूत्तदाऽभिजित्पतनकालेत्वेकन्यूनैरहोरात्रैर्भगणस्यभोगात् कृतयुगादिनक्षत्रंधनिष्ठैवाभवदित्यर्थः संख्याकलाकाष्ठादीनाम् १० तथाच कृत्तिकाभिरेवनक्षत्रसंख्यापूर्तिंकुर्वितिशक्राशयं
ज्ञात्वा तास्त्रिदिवंगताः ११ ननुषट्कृत्तिकाःकथंसप्तशीर्षाभमित्यत आह विनतेति ऋषिपत्नीनामिवगरुत्मत्याअपिरूपंस्वाहयाधृतमितितत्साहित्यात्सप्तशीर्षाभमित्यर्थः १२ स्नुषयादेवसे

तत्रमूढोऽस्मिभद्रंतेनक्षत्रंगगनाच्च्युतम् ॥ कालंत्विमंपरंस्कंदब्रह्मणासहचिंतय ९ धनिष्ठादिस्तदाकालोब्रह्मणापरिकल्पितः ॥ रोहिणीह्यभवत्पूर्वमेवंसंख्या
समाभवत् १० एवमुक्तेतुशक्रेणत्रिदिवंकृत्तिकागताः ॥ नक्षत्रंसप्तशीर्षाभंभातितद्वह्निदैवतम् ११ विनताचाब्रवीत्स्कंदंममत्वंपिंडदःसुतः ॥ इच्छामिनित्य
मेवाहंत्वयापुत्रसहासितुम् १२ ॥ स्कंदउवाच ॥ एवमस्तुनमस्तेऽस्तुपुत्रस्नेहात्प्रशाधिमाम् ॥ स्नुषयापूज्यमानावैदेविवत्स्यसिनित्यदा १३ ॥ मार्कंडेय
उवाच ॥ अथमातृगणःसर्वःस्कंदंवचनमब्रवीत् ॥ वयंसर्वस्यलोकस्यमातरःकविभिःस्तुताः ॥ इच्छामोमातरस्तुभ्यंभवितुंपूजयस्वनः १४ ॥ स्कंदउवाच ॥
मातरोहिभवत्योमेभवतीनामहंसुतः ॥ उच्यतांयन्मयाकार्यंभवतीनामथेप्सितम् १५ ॥ मातरऊचुः ॥ यास्तुतामातरःपूर्वंलोकस्यास्यप्रकल्पिताः ॥ अ
स्माकंतुभवेत्स्थानंतासांचैवनतद्भवेत् १६ भवेमपूज्यालोकस्यनताःपूज्याःसुरर्षभ ॥ प्रजाऽस्माकंहृतास्ताभिस्त्वत्कृतेताःप्रयच्छनः १७ ॥ स्कंदउवाच ॥
दत्ताःप्रजानताःशक्याभवतीभिर्निषेवितुम् ॥ अन्यांवःकांप्रयच्छामिप्रजांयांमनसेच्छथ १८ ॥ मातरऊचुः ॥ इच्छामतासांमातॄणांप्रजाभोक्तुंप्रयच्छनः ॥
त्वयासहपृथग्भूतायेचतासामथेश्वराः १९ ॥ स्कंदउवाच ॥ प्रजावोदद्मिकष्टंतुभवतीभिरुदाहृतम् ॥ परिरक्षतभद्रंवःप्रजाःसाधुनमस्कृताः २० ॥ मात
रऊचुः ॥ परिरक्षामभद्रंतेप्रजाःस्कंदयथेच्छसि ॥ त्वयानोरोचतेस्कंदसहवासश्चिरंप्रभो २१ ॥ स्कंदउवाच ॥ यावत्षोडशवर्षाणिभवंतितरुणाःप्रजाः ॥
प्रबाधतमनुष्याणांतावद्रूपैःपृथग्विधैः २२ अहंचवःप्रदास्यामिरौद्रमात्मानमव्ययम् ॥ परमंतेनसहिताःसुखंवत्स्यथपूजिताः २३ ॥ मार्कण्डेयउवाच ॥
ततःशरीरात्स्कंदस्यपुरुषःपावकप्रभः ॥ भोक्तुंप्रजाःसमर्त्यानांनिष्पपातमहाप्रभः २४ अपतत्सहसाभूमौविसंज्ञोऽथक्षुधार्दितः ॥ स्कंदेनसोऽभ्यनुज्ञातोरौ
द्ररूपोऽभवद्ग्रहः २५ स्कंदापस्मारमित्याहुर्ग्रहंतंद्विजसत्तमाः ॥ विनतातुमहारौद्राकथ्यतेशकुनिग्रहः २६ पूतनांराक्षसींप्राहुस्तंविद्यात्पूतनाग्रहम् ॥
कष्टादारुणरूपेणघोररूपानिशाचरी २७ पिशाचीदारुणाकाराकथ्यतेशीतपूतना ॥ गर्भान्सामानुषीणांतुहरतेघोरदर्शना २८ अदितिंरेवतींप्राहु
र्ग्रहस्तस्यास्तुरैवतः ॥ सोऽपिबालान्महाघोरोबाधतेवैमहाग्रहः २९

नया १३ मातृगणोविनतादिसमूहः १४ । १५ ताःप्रसिद्धाःमातरोब्राह्मीमाहेश्वरीप्रभृतयः १६ त्वत्कृतेत्वदर्थंताभिर्ब्राह्म्यादिभिरस्मद्भर्तॄन् मिथ्याभिशापदोषेण कोपयंतीभिः प्रजाहृताः
संगमाभावादित्यर्थःसंधिरार्षः नोऽस्मभ्यं प्रयच्छ भर्तॄणामनुकूलनेनेत्यर्थः १७ दत्तामयादत्ताअपि मयाप्रार्थिताअपि मुनयोयुष्मान्नांगीकरिष्यंतीतिभावः १८ मातॄणांब्राह्म्यादीनां तासां
प्रजानांमीश्वराःपित्रादयः १९ प्रजाःअस्मदाद्याः नमस्कृता यूयं मयेतिशेषः २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९

दैत्यानांयादितिर्मातातामाहुर्मुखमंडिकाम् ॥ अत्यर्थंशिशुमांसेनसंप्रहृष्टादुरासदा ३० कुमाराश्चकुमार्यश्चयेप्रोक्ताःस्कंदसंभवाः ॥ तेऽपिगर्भभुजःसर्वेकौर
॥१३५॥ व्यसुमहाग्रहाः ३१ तासामेवतुपत्नीनांपतयस्तेप्रकीर्तिताः ॥ आजायमानान्गृह्णंतिबालकान्रौद्रकर्मिणः ३२ गवांमातातुयाप्राज्ञैःकथ्यतेसुरभिर्नृप ॥ अ०
शकुनिस्तामथारुह्यसहभुंक्तेशिशून्भुवि ३३ सरमानाममयामाताशुनांदेवीजनाधिप ॥ साऽपिगर्भान्समादत्तेमानुषीणांसदैवहि ३४ पादपानांचयामाताकरं
जनिलयाहिसा ॥ वरदासाहिसौम्याचनित्यंभूतानुकंपिनी ३५ करंजेतांनमस्यंतितस्मात्पुत्रार्थिनोनराः ॥ इमेत्वष्टादशान्येवैग्रहामांसमधुप्रियाः ३६ द्वि ॥२३०॥
पंचरात्रंतिष्ठंतिसततंसूतिकागृहे ॥ कद्रूःसूक्ष्मवपुर्भूत्वागर्भिणींप्रविशत्यथ ३७ भुंक्तेसातत्रतंगर्भंसातुनागंप्रसूयते ॥ गंधर्वाणांतुयामातासागर्भंगृह्यगच्छति ३८
ततोविलीनगर्भासामानुषीभुविदृश्यते ॥ याजनित्रीत्वप्सरसांगर्भमास्तेप्रगृह्यसा ३९ उपनष्टंततोगर्भंकथयंतिमनीषिणः ॥ लोहितस्योदधेःकन्याधात्री
स्कंदस्यसास्मृता ४० लोहितायनिरित्येवंकदंबेसाहिपूज्यते ॥ पुरुषेषुयथारुद्रस्तथाऽऽर्याप्रमदास्वपि ४१ आर्यामाताकुमारस्यपृथक्कामार्थमिज्यते ॥
एवमेतेकुमारणांमयाप्रोक्तामहाग्रहाः ४२ यावत्षोडशवर्षाणिशिशूनांह्यशिवास्ततः ॥ येचमातृगणाःप्रोक्ताःपुरुषाश्चैवयेग्रहाः ४३ सर्वेस्कंदग्रहानामज्ञेयानि
त्यंशरीरिभिः ॥ तेषांप्रशमनंकार्यंस्नानंधूपमथांऽजनम् ॥ बलिकर्मोपहाराश्चस्कंदस्येज्याविशेषतः ४४ एवमभ्यर्चिताःसर्वेप्रयच्छंतिशुभंनृणाम् ॥ आ
युर्वीर्यंचराजेंद्रसम्यक्पूजानमस्कृताः ४५ ऊर्ध्वंतुषोडशाद्वर्षाद्येभवंतिग्रहान्नृणाम् ॥ तानहंसंप्रवक्ष्यामिनमस्कृत्यमहेश्वरम् ४६ यःपश्यतिनरोदेवान्जा
ग्रद्वाशयितोऽपिवा ॥ उन्मादयतिसतुक्षिप्रंतंतुदेवग्रहंविदुः ४७ आसीनश्चशयानश्चयःपश्यतिनरःपितॄन् ॥ उन्मादयतिसतुक्षिप्रंसज्ञेयस्तुपितृग्रहः ४८ अ
वमन्यतियःसिद्धान्क्रुद्धाश्चापिशपंतियम् ॥ उन्मादयतिसतुक्षिप्रंज्ञेयःसिद्धग्रहस्तुसः ४९ उपाघ्रातिचयोगंधान्रसांश्चापिपृथग्विधान् ॥ उन्मादयतिसतुक्षि
प्रंसज्ञेयोराक्षसोग्रहः ५० गंधर्वाश्चापियंदिव्याःसंविशंतिनरंभुवि ॥ उन्मादयतिसतुक्षिप्रंग्रहोगांधर्वएवसः ५१ अधिरोहंतियंनित्यंपिशाचाःपुरुषंप्रति ॥ उ
न्मादयतिसतुक्षिप्रंग्रहःपैशाचएवसः ५२ आविशंतिचयंयक्षाःपुरुषंकालपर्यये ॥ उन्मादयतिसतुक्षिप्रंज्ञेयोयक्षग्रहस्तुसः ५३ यस्यदोषैःप्रकुपितंचित्तंमुह्यति
देहिनः ॥ उन्मादयतिसतुक्षिप्रंसाधनंतस्यशास्त्रतः ५४ वैक्लव्याच्चभयाच्चैवघोराणांचापिदर्शनात् ॥ उन्मादयतिसतुक्षिप्रंसांत्वंतस्यतुसाधनम् ५५ कश्चि
त्क्रीडितुकामोवैभोक्तुकामस्तथाऽपरः ॥ अभिकामस्तथैवान्यइत्येषत्रिविधोग्रहः ५६ यावत्सप्ततिवर्षाणिभवंत्येतेग्रहान्नृणाम् ॥ अतःपरंदेहिनांतुग्रहतुल्यो
भवेज्ज्वरः ५७ अप्रकीर्णेंद्रियंदांतंशुचिंनित्यमतंद्रितम् ॥ आस्तिकंश्रद्दधानंचवर्जयंतिसदाग्रहाः ५८ ॥१३५॥

मिथ्याभिशापग्रस्तानामपिस्कंदमातॄणां बालग्रहत्वादिनाधिकारप्राप्तिः किमुत साक्षाद्दोषकर्तॄणामतःसर्वदोषपरिहारार्थंमहेश्वरःपूज्यइत्युपसंहरतिअप्रकीर्णेंद्रियमिति ५८

५९ ॥ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभा० त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ यदेति १ । २ । ३ । ४ । ५ । ६ । ७ । ८

इत्येषतेग्रहोद्देशोमानुषाणांप्रकीर्तितः ॥ नस्पृशंतिग्रहाभक्तान्नरान्देवंमहेश्वरम् ५९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेमनु
ष्यग्रहकथनेत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥ ॥ ४ ॥ मार्कंडेयउवाच ॥ यदास्कंदेनमातॄणामेवमेतत्प्रियंकृतम् ॥ अथैनमब्रवीत्स्वाहाममपुत्रस्त्व
मौरसः १ इच्छाम्यहंत्वयादत्तांप्रीतिंपरमदुर्लभाम् ॥ तामब्रवीत्ततःस्कंदःप्रीतिमिच्छसिकीदृशम् २ ॥ स्वाहोवाच ॥ दक्षस्याहंप्रियाकन्यास्वाहानाममहाभु
ज ॥ बाल्यात्प्रभृतिनित्यंचजातकामाहुताशने ३ नसमांकामिनींपुत्रसम्यग्जानातिपावकः ॥ इच्छामिशाश्वतंवासंवस्तुंपुत्रसहाग्निना ४ ॥ स्कंदउवाच ॥
हव्यंकव्यंचयत्किंचिद्द्विजानांमंत्रसंस्तुतम् ॥ होष्यंत्यग्नौसदादेविस्वाहेत्युक्त्वासमुद्धृतम् ५ अद्यप्रभृतिदास्यंतिसुवृत्ताःसत्पथेस्थिताः ॥ एवमग्निस्त्वयासार्धं
सदावत्स्यतिशोभने ६ ॥ मार्कंडेयउवाच ॥ एवमुक्ताततःस्वाहातुष्टास्कंदेनपूजिता ॥ पावकेनसमायुक्ताभर्त्रास्कंदमपूजयत् ७ ततोब्रह्मामहासेनंप्रजापतिर
थाब्रवीत् ॥ अभिगच्छमहादेवंपितरंत्रिपुरार्दनम् ८ रुद्रेणाग्निंसमाविश्यस्वाहामाविश्यचोमया ॥ हितार्थंसर्वलोकानांजातस्त्वमपराजितः ९ उमायोन्यांच
रुद्रेणशुक्रंसिक्तंमहात्मना ॥ अस्मिन्गिरौनिपतितंमिंजिकामिंजिकंयतः १० संभूतंलोहितोदेतुशुक्रशेषमवापतत् ॥ सूर्यरश्मिषुचाप्यन्यदन्यच्चैवापतद्भुवि ११
आसक्तमन्यद्वृक्षेषुतदेवंपंचधाऽपतत् ॥ तत्रतेविविधाकारागणाज्ञेयामनीषिभिः ॥ तवपारिषदाघोरायएतेपिशिताशिनः १२ एवमस्त्वितिचाप्युक्त्वामहासे
नोमहेश्वरम् ॥ अपूजयदमेयात्मापितरंपितृवत्सलः १३ ॥ मार्कंडेयउवाच ॥ अर्कपुष्पैस्तुतेपंचगणाःपूज्याधनार्थिभिः ॥ व्याधिप्रशमनार्थंचतेषांपूजांसमाच
रेत् १४ मिंजिकामिंजिकंचैवमिथुनंरुद्रसंभवम् ॥ नमस्कार्यंसदैवेहबालानांहितमिच्छता १५ स्त्रियोमानुषमांसादावृद्धिकानामनामतः ॥ वृक्षेषुजातास्तादेव्यो
नमस्कार्याःप्रजार्थिभिः १६ एवमेतेपिशाचानामसंख्येयागणाःस्मृताः ॥ घंटायाःसपताकायाःशृणुमेसंभवंनृप १७ ऐरावतस्यघंटेद्वेवैजयंत्याविति श्रुते ॥
गुहस्यतेस्वयंदत्तेक्रमेणानाय्यधीमता १८ एकातत्रविशाखस्यघंटास्कंदस्यचापरा ॥ पताकाकार्तिकेयस्यविशाखस्यचलोहिता १९ यानिक्रीडनकान्य
स्यदेवैर्दत्तानिवैतदा ॥ तैरेवरमतेदेवोमहासेनोमहाबलः २० ससंवृतःपिशाचानांगणैर्देवगणैस्तथा ॥ शुशुभेकांचनेशैलेदीप्यमानःश्रियावृतः २१ तेनवीरेण
११ शुशुभेसशैलःशुभकाननः ॥ आदित्येनेवांशुमतामंदरश्चारुकंदरः २२ संतानकवनैःफुल्लैःकरवीरवनैरपि ॥ पारिजातवनैश्चैवजपाशोकवनैस्तथा २३ कदंबत
रुषंडैश्चदिव्यैर्मृगगणैरपि ॥ दिव्यैःपक्षिगणैश्चैवशुशुभेश्वेतपर्वतः २४ तत्रदेवगणाःसर्वेसर्वेदेवर्षयस्तथा ॥ मेघतूर्यरवाश्चैवक्षुब्धोदधिसमस्वनाः २५

९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५

२६ । २७ । २८ । २९ । ३१ । ३२ । ३३ । जृंभकैर्ग्रहविशेषैः ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८

तत्रादिव्याश्चगंधर्वान्नृत्यंतेऽप्सरसस्तथा ॥ हृष्टानांतत्रभूतानांश्रूयतेनिनदोमहान् २६ एवंसेंद्रंजगत्सर्वंश्वेतपर्वतसंस्थितम् ॥ प्रहृष्टंप्रेक्षतेस्कंदंनचग्लायति
दर्शनात् २७ ॥ मार्कंडेयउवाच ॥ यदाऽभिषिक्तोभगवान्सैनापत्येनपावकिः ॥ तदासंप्रस्थितःश्रीमान्हृष्टोभद्रवटंहरः २८ रथेनादित्यवर्णेनपार्वत्यासहितः
प्रभुः ॥ सहस्रंतस्यसिंहानांतस्मिन्युक्तंरथोत्तमे २९ उत्पपातादिवंशुभ्रंकालेनाभिप्रचोदितम् ॥ तेपिबंतइवाकाशंत्रासयंतश्चराचरान् ३० सिंहानभस्यगच्छं
तनदंतश्चारुकेसराः ॥ तस्मिन्रथेपशुपतिःस्थितोभात्युमयासह ३१ विद्युतासहितःसूर्यःसेंद्रचापेघनेयथा ॥ अग्रतस्तस्यभगवान्धनेशोगुह्यकैःसह ३२
आस्थायतुचिरंयातिपुष्पकंनरवाहनः ॥ ऐरावतंसमास्थायशक्रश्चापिसुरैःसह ॥ पृष्ठतोऽनुययौयांतंवरदंवृषभध्वजम् ॥ जृंभकैर्यक्षरक्षोभिःस्रग्विभिःसमलं
कृतः ३४ यात्यमोघोमहायक्षोदक्षिणंपक्षमास्थितः ॥ तस्यदक्षिणतोदेवाबहवश्चित्रयोधिनः ३५ गच्छंतिवसुभिःसार्धंरुद्रैश्चसहसंगताः ॥ यमश्चमृत्युनासा
र्धंसर्वतःपरिवारितः ३६ घोरैर्व्याधिशतैर्यातिघोररूपवपुस्तथा ॥ यमस्यपृष्ठतश्चैवघोरस्त्रिशिखरःशितः ३७ विजयोनामरुद्रस्ययातिशूलःस्वलंकृतः ॥
तमुग्रपाशोवरुणोभगवान्सलिलेश्वरः ३८ परिवार्यशनैर्यातियादोभिर्विविधैर्वृतः ॥ पृष्ठतोविजयस्यापियातिरुद्रस्यपट्टिशः ३९ गदामुसलशक्त्याद्यैर्वृतःप्रह
रणोत्तमैः ॥ पट्टिशंत्वन्वगाद्राजंश्छत्रंरौद्रंमहाप्रभम् ४० कमंडलुश्चाप्यनुतंमहर्षिगणसेवितः ॥ तस्यदक्षिणतोभातिदंडोगच्छन्श्रियावृतः ४१ भृग्वंगिरो
भिःसहितोदैवतैश्चानुपूजितः ॥ एषांतुपृष्ठतोरुद्रोविमलेस्यंदनेस्थितः ४२ यातिसंहर्षयन्सर्वांस्तेजसात्रिदिवौकसः ॥ ऋषयश्चापिदेवाश्चगंधर्वाभुजगास्त
था ४३ नद्योह्रदाःसमुद्राश्चतथैवाप्सरसांगणाः ॥ नक्षत्राणिग्रहाश्चैवदेवानांशिशवश्चये ४४ स्त्रियश्चविविधाकारायांतिरुद्रस्यपृष्ठतः ॥ सृजंत्यःपुष्पवर्षाणि
चारुरूपावरांगनाः ४५ पर्जन्यश्चाप्यनुययौनमस्कृत्यपिनाकिनम् ॥ छत्रंचपांडुरंसोमस्तस्यमूर्धन्यधारयत् ४६ चामरेचापिवायुश्चगृहीत्वाऽग्निश्चविष्ठि
तौ ॥ शक्रश्चपृष्ठतस्तस्ययातिराजञ्छ्रियावृतः ४७ सहराजर्षिभिःसर्वैःस्तुवानोवृषकेतनम् ॥ गौरीविद्याऽथगांधारीकेशिनीमित्रसाह्वया ४८ सावित्र्यासह
सर्वास्ताःपार्वत्यायांतिपृष्ठतः ॥ तत्रविद्यागणाःसर्वेयेकेचित्कविभिःकृताः ४९ तस्यकुर्वंतिवचनंसेंद्रादेवाश्चमूमुखे ॥ गृहीत्वातुपताकांवैयात्यग्रेराक्षसोग्रहः ॥
५० व्यापृतस्तुश्मशानेयोनित्यंरुद्रस्यवैसखा ॥ पिंगलोनामयक्षेंद्रोलोकस्यानंददायकः ५१ एभिश्चसहितोदेवस्तत्रयातियथासुखम् ॥ अग्रतःपृष्ठतश्चैव
नहितस्यगतिर्ध्रुवा ५२ रुद्रंसत्कर्मभिर्मर्त्याःपूजयंतीहदैवतम् ॥ शिवमित्येवयंप्राहुरीशंरुद्रंपितामहम् ५३ भावैस्तुविविधाकारैःपूजयंतिमहेश्वरम् ॥ देवसे
नापतिस्त्वेवंदेवसेनाभिरावृतः ॥ अनुगच्छतिदेवेशंब्रह्मण्यःकृत्तिकासुतः ५४

विद्यागणाः स्तुतिपद्यसमूहाः ४९ वचनं पठनं सरहस्यव्याख्यानं वा ५० । ५१ । ५२ । ५३ । ५४

५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ । ७५ । ७६ । ७७ । ७८ अनयोदारहरणादिः

अथाब्रवीन्महासेनंमहादेवोबृहद्वचः ॥ सप्तमंमारुतस्कंधंरक्षनित्यमतंद्रितः ५५ ॥ स्कंदउवाच ॥ सप्तमंमारुतस्कंधंपालयिष्याम्यहंप्रभो ॥ यदन्यदपिमेका
र्यंदेवतद्वदमाचिरम् ५६ ॥ रुद्रउवाच ॥ कार्येष्वहंत्वयापुत्रसंद्रष्टव्यःसदैवहि ॥ दर्शनान्ममभक्त्याचश्रेयःपरमवाप्स्यसि ५७ ॥ ॥ मार्कंडेयउवाच ॥
इत्युक्त्वाविससर्जैनंपरिष्वज्यमहेश्वरः ॥ विसर्जितेततःस्कंदेबभूवौत्पातिकंमहत् ५८ सहसैवमहाराजदेवान्सर्वान्प्रमोहयत् ॥ जज्वालखंसनक्षत्रंप्रमूढंभुवनं
भृशम् ५९ चचालव्यनदच्चोर्वीतमोभूतंजगद्बभौ ॥ ततस्तद्दारुणंदृष्ट्वाक्षुभितःशंकरस्तदा ६० उमाचैवमहाभागादेवाश्चसमहर्षयः ॥ ततस्तेषुप्रमूढेषुपर्व
तांबुदसन्निभम् ६१ नानाप्रहरणंघोरमदृश्यतमहद्बलम् ॥ तद्वैघोरमसंख्येयंगर्जच्चविविधागिरः ६२ अभ्यद्रवद्रणेदेवान्भगवंतंचशंकरम् ॥ तैर्विसृष्टान्यनी
केषुबाणजालान्यनेकशः ६३ पर्वताश्चशतघ्न्यश्चप्रासासिपरिघागदाः ॥ निपतद्भिश्चतैर्घोरैर्देवानीकंमहायुधैः ६४ क्षणेनव्यद्रवत्सर्वंविमुखंचाप्यदृश्यत ॥
निकृत्तयोधनागाश्वंकृत्तायुधमहारथम् ६५ दानवैरर्दितंसैन्यंदेवानांविमुखंबभौ ॥ असुरैर्वध्यमानंतत्पावकैरिवकाननम् ६६ अपतद्दग्धभूयिष्ठंमहाद्रुमवनं
यथा ॥ तेविभिन्नशिरोदेहाःप्राद्रवंतोदिवौकसः ६७ ननाथमधिगच्छंतिवध्यमानामहारणे ॥ अथतद्विद्रुतंसैन्यंदृष्ट्वादेवःपुरंदरः ६८ आश्वासयन्नुवाचेदंबल
भिद्दानवार्दितम् ॥ भयंत्यजतभद्रंवःशूराःशस्त्राणिगृह्णत ६९ कुरुध्वंविक्रमेबुद्धिंमावःकाचिद्व्यथाभवेत् ॥ जयतैनान्सुदुर्वृत्तान्दानवान्घोरदर्शनान् ७०
अभिद्रवतभद्रंवोमयासहमहासुरान् ॥ शक्रस्यवचनंश्रुत्वासमाश्वस्तादिवौकसः ७१ दानवान्प्रत्ययुध्यंतशक्रंकृत्वाव्यपाश्रयम् ॥ ततस्तेत्रिदशाःसर्वेमरुत
श्चमहाबलाः ७२ प्रत्युद्ययुर्महाभागाःसाध्याश्चवसुभिःसह ॥ तैर्विसृष्टान्यनीकेषुक्रुद्धैःशस्त्राणिसंयुगे ७३ शराश्चदैत्यकायेषुपिबंतिरुधिरंबहु ॥ तेषांदेहान्वि
निर्भिद्यशरास्तेनिशितास्तदा ७४ निपतंतोऽभ्यदृश्यंतनगेभ्यइवपन्नगाः ॥ तानिदैत्यशरीराणिनिर्भिन्नानिस्मसायकैः ७५ अपतन्भूतलेराजंश्छिन्नाभ्राणी
वसर्वशः ॥ ततस्तद्दानवसैन्यंसर्वैर्देवगणैर्युधि ७६ त्रासितंविविधैर्बाणैःकृतंचैवपराङ्मुखम् ॥ अथोत्कुष्टंतदाहृष्टैःसर्वैर्देवैरुदायुधैः ७७ संहतानिचतूर्याणि
प्रावाद्यंतह्यनेकशः ॥ एवमन्योन्यसंयुक्तंयुद्धमासीत्सुदारुणम् ७८ देवानांदानवानांचमांसशोणितकर्दमम् ॥ अनयोदेवलोकस्यसहसैवाभ्यदृश्यत ७९ तथा
हिदानवाघोराविनिघ्नंतिदिवौकसः ॥ ततस्तूर्यप्रणादाश्चभेरीणांचमहास्वनः ८० बभूवुर्दानवेंद्राणांसिंहनादाश्चदारुणाः ॥ अथदैत्यबलाद्घोरान्निष्पपातम
हाबलः ८१ दानवोमहिषोनामप्रगृह्यविपुलंगिरिम् ॥ तेतंघनैरिवादित्यंदृष्ट्वासंपरिवारितम् ८२ तमुद्यतगिरिंराजन्व्यद्रवंतदिवौकसः ॥ अथाभिद्रुत्यमहि
षोदेवांश्चिक्षेपतंगिरिम् ८३ पतताऽतेनगिरिणादेवसैन्यस्यपार्थिव ॥ भीमरूपेणनिहतमयुतंप्रापतद्भुवि ८४ अथतैर्दानवैःसार्धंमहिषस्त्रासयन्सुरान् ॥ अभ्य
द्रवद्रणेतूर्णंसिंहःक्षुद्रमृगानिव ८५

७९ । ८० । ८१ । ८२ । ८३ । ८४ । ८५

८६ कुबरंधूःप्रदेशं ८७ रेसतुःशब्दंचक्रतुः रोदसीद्यावाभूमी ८८ । ८९ अहनत्हतवान् ९० । ९१ । ९२ । ९३ । ९४ । ९५ । ९६ द्वारमुत्तरकुरूणामितिशेषः अगम्यमितिच्छेदः ९७ तेनद्वा

तमापतंतंमहिषंदृष्ट्वासेंद्रादिवौकसः ॥ व्यद्रवंतरणेभीताविकीर्णायुधकेतनाः ८६ ततःसमहिषःक्रुद्धस्तूर्णंरुद्ररथंययौ ॥ अभिद्रुत्यचजग्राहरुद्रस्यरथकूबरम्
८७ यदारुद्ररथंक्रुद्धोमहिषःसहसाऽऽगतः ॥ रेसतूरोदसीगाढंमुमुहुश्चमहर्षयः ८८ अनदंश्चमहाकायादैत्याजलधरोपमाः ॥ आसीच्चनिश्चितंतेषांजितमस्मा
भिरित्युत ८९ तथाभूतेतुभगवानहनन्महिषंरणे ॥ सस्मारचतदास्कंदंमृत्युंतस्यदुरात्मनः ९० महिषोऽपिरथंदृष्ट्वारौद्रोरुद्रस्यचानदत् ॥ देवान्संत्रासयं
श्चापिदैत्यांश्चापिप्रहर्षयन् ९१ ततस्तस्मिन्भयेघोरेदेवानांसमुपस्थिते ॥ आजगाममहासेनःक्रोधात्सूर्यइवज्वलन् ९२ लोहितांबरसंवीतोलोहितस्रग्विभूषणः ॥
लोहिताश्वोमहाबाहुर्हिरण्यकवचःप्रभुः ९३ रथमादित्यसंकाशमास्थितःकनकप्रभम् ॥ तंदृष्ट्वादैत्यसेनासाव्यद्रवत्सहसारणे ९४ सचापितांप्रज्वलितांमहिषस्यवि
दारिणीम् ॥ मुमोचशक्तिंराजेंद्रमहासेनोमहाबलः ९५ सामुक्ताऽभ्यहरत्तस्यमहिषस्यशिरोमहत् ॥ पपातभिन्नेशिरसिमहिषस्त्यक्तजीवितः ९६ पतताशिर
सातेनद्वारंषोडशयोजनम् ॥ पर्वताभेनपिहितंतदाऽगम्यंततोऽभवत् ९७ उत्तराःकुरवस्तेनगच्छंत्यद्ययथासुखम् ॥ क्षिप्ताक्षिप्तातुसाशक्तिर्हत्वाशत्रून्सहस्रशः
९८ स्कंदहस्तमनुप्राप्तादृश्यतेदेवदानवैः ॥ प्रायःशरैर्विनिहतामहासेनेनधीमता ९९ शेषादैत्यगणाघोराभीतास्त्रस्तादुरासदैः ॥ स्कंदपारिषदैर्हत्वाभक्षिताश्च
सहस्रशः १०० दानवान्भक्षयंतस्तेप्रापिबंतश्चशोणितम् ॥ क्षणान्निर्दानवंसर्वमकार्षुर्भृशहर्षिताः १०१ तमांसीवयथासूर्योवृक्षानग्निर्घनान्खगः ॥ तथास्कं
दोऽजयच्छत्रून्स्वेनवीर्येणकीर्तिमान् २ संपूज्यमानस्त्रिदशैरभिवाद्यमहेश्वरम् ॥ शुशुभेकृत्तिकापुत्रःप्रकीर्णांशुरिवांशुमान् ३ नष्टशत्रुर्यदास्कंदःप्रयातस्तुमहे
श्वरम् ॥ तदाऽब्रवीन्महासेनंपरिष्वज्यपुरंदरः ४ ब्रह्मदत्तवरःस्कंदत्वयाऽयंमहिषोहतः ॥ देवास्तृणसमायस्यबभूवुर्जयतांवर ५ सोऽयंत्वयामहाबाहोशमितो
देवकंटकः ॥ शतंमहिषतुल्यानांदानवानांत्वयारणे ६ निहतंदेवशत्रूणांयैर्वयंपूर्वंतापिताः ॥ तावकैर्भक्षिताश्चान्येदानवाःशतसंघशः ७ अजेयस्त्वंरणेऽरीणा
मुमापतिरिवप्रभुः ॥ एतत्तेप्रथमंदेवख्यातंकर्मभविष्यति ८ त्रिषुलोकेषुकीर्तिश्चतवाक्षय्याभविष्यति ॥ वशगाश्चभविष्यंतिसुरास्तवमहाभुज ९ महासेनमे
वमुक्त्वानिवृत्तःसहदैवतैः ॥ अनुज्ञातोभगवतात्र्यंबकेणशचीपतिः ११० गतोभद्रवटंरुद्रोनिवृत्ताश्चदिवौकसः ॥ उक्ताश्चदेवारुद्रेणस्कंदंपश्यतमामिव ११
सहत्वादानवगणान्पूज्यमानोमहर्षिभिः ॥ एकाह्नैवाजयत्सर्वंत्रैलोक्यंवह्निनंदनः १२ स्कंदस्ययइदंविप्रःपठेज्जन्मसमाहितः ॥ सपुष्टिमिहसंप्राप्यस्कंदसालो
क्यमाप्नुयात् ११३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेस्कंदोत्पत्तौमहिषासुरवधेएकत्रिंशदधिकद्विशततमोऽध्यायः ॥२३१॥

रेण ९८ । ९९ । १०० । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । ११० । ११ । १२ । ११३ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेएकत्रिंशदधिकशततमोऽध्यायः ॥ २३१ ॥

सर्वेषांमहाणांस्कंदाधीनत्वात्तच्छांतयेस्कंदंप्रार्थयितुकामस्तदीयंनामादिकंपृच्छतिभगवन्निति १ । २ । ३ कामजित्पूर्णमनोरथः ४ कूटंकपटंबालग्रहादि तेनमोहयतीतिकूटमोहनः ५ कन्याभ
र्ताअग्निपुत्रत्वेनअग्निरूपत्वात्तृतीयोऽग्निष्टेपतिरितिमंत्रवर्णाच्च ६ । ७ । ८ । ९ जुष्टंसेवितं १० ब्रह्मण्योब्राह्मणेषुसाधुःब्रह्मजोवेदोक्तेनगर्भाधानादिकर्मणाजातःअतएवहेतुद्वयात्ब्रह्मविद्वेदार्थ

युधिष्ठिरउवाच ॥ भगवन्श्रोतुमिच्छामिनामान्यस्यमहात्मनः ॥ त्रिषुलोकेषुयान्यस्यविख्यातानिद्विजोत्तम १ ॥ वैशंपायनउवाच ॥ इत्युक्तःपांडवेयेनम
हात्माऋषिसन्निधौ ॥ उवाचभगवांस्तत्रमार्कंडेयोमहातपाः २ ॥ मार्कंडेयउवाच ॥ आग्नेयश्चैवस्कंदश्चदीप्तकीर्तिरनामयः ॥ मयूरकेतुर्धर्मात्माभूतेशोमहिषा
र्दनः ३ कामजित्कामदःकांतःसत्यवाग्भुवनेश्वरः ॥ शिशुःशीघ्रःशुचिश्चंडोदीप्तवर्णःशुभाननः ४ अमोघस्त्वनघोरौद्रःप्रियश्चंद्राननस्तथा ॥ दीप्तशक्तिःप्र
शांतात्माभद्रकृत्कूटमोहनः ५ षष्ठीप्रियश्चधर्मात्मापवित्रोमातृवत्सलः ॥ कन्याभर्ताविभक्तश्चस्वाहेयोरेवतीसुतः ६ प्रभुर्नेताविशाखश्चनैगमेयःसुदुश्चरः ॥
सुव्रतोललितश्चैवबालक्रीडनकप्रियः ७ खचारीब्रह्मचारीचशूरःशरवणोद्भवः ॥ विश्वामित्रप्रियश्चैवदेवसेनाप्रियस्तथा ८ वासुदेवप्रियश्चैवप्रियःप्रियकृदेवतु ॥
नामान्येतानिदिव्यानिकार्तिकेयस्ययःपठेत् ॥ स्वर्गंकीर्तिंधनंचैवसलभेन्नात्रसंशयः ९ ॥ मार्कंडेयउवाच ॥ स्तोष्यामिदेवैर्ऋषिभिश्चजुष्टंशक्त्यागुहंनामभिर
प्रमेयम् ॥ षडाननंशक्तिधरंसुवीरंनिबोधचैतानिकुरुप्रवीर १० ब्रह्मण्योवैब्रह्मजोब्रह्मविच्चब्रह्मेशयोब्रह्मवतांवरिष्ठः ॥ ब्रह्मप्रियोब्राह्मणसव्रतीत्वंब्रह्मज्ञोवैब्राह्मणा
नांचनेता ११ स्वाहास्वधात्वंपरमंपवित्रंमंत्रस्तुतस्त्वंप्रथितःषडर्चिः ॥ संवत्सरस्त्वमृतवश्चषड्वैमासार्धमासाव्ययनंदिशश्च १२ त्वंपुष्कराक्षस्त्वरविंदवक्त्रःसह
स्रवक्त्रोऽसिसहस्रबाहुः ॥ त्वंलोकपालःपरमंहविश्चत्वंभावनःसर्वसुरासुराणाम् १३ त्वमेवसेनाधिपतिःप्रचंडःप्रभुर्विभुश्चाप्यथशत्रुजेता ॥ सहस्रभूस्त्वंधरणीत्व
मेवसहस्रतुष्टिश्चसहस्रभुक्च १४ सहस्रशीर्षस्त्वमनंतरूपःसहस्रपात्त्वंगुहशक्तिधारी ॥ गंगासुतस्त्वंस्वमतेनदेवस्वाहामहीकृत्तिकानांतथैव १५ त्वंक्रीडसेषण्मुख
कुक्कुटेनयथेष्टनानाविधकामरूपी ॥ दीक्षाऽसिसोमोमरुतःसदैवधर्मोऽसिवायुरचलेंद्रइंद्रः १६ सनातनानामपिशाश्वतस्त्वंप्रभुःप्रभूणामपिचोग्रधन्वा ॥ ऋत
स्यकर्तादितिजांतकस्त्वंजेतारिपूणांप्रवरःसुराणाम् १७ सूक्ष्मंतपस्तत्परमंत्वमेवपरावरज्ञोऽसिपरावरस्त्वम् ॥ धर्मस्यकामस्यपरस्यचैवत्वत्तेजसाकृत्स्नमिदं
महात्मन् १८ व्याप्तंजगत्सर्वसुरप्रवीरशक्त्यामयासंस्तुतलोकनाथ ॥ नमोऽस्तुतेद्वादशनेत्रबाहोअतःपरंवेद्मिगतिंनतेऽहम् १९ स्कंदस्ययइदंविप्रःपठेज्जन्म
समाहितः ॥ श्रावयेद्ब्राह्मणेभ्योयःशृणुयाद्वाद्विजेरितम् २० धनमायुर्यशोदीप्तंपुत्रान्शत्रुजयंतथा ॥ सपुष्टितुष्टीसंप्राप्यस्कंदसालोक्यमाप्नुयात् २१ ॥ इतिश्री
महाभारतेआरण्यकेपर्वणिमार्कंडेयसमास्यापर्वणिआंगिरसेकार्तिकेयस्तवेद्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥ ॥ समाप्तंचमार्कंडेयसमास्यापर्व ॥

ज्ञाता ततएवब्रह्मेब्रह्मणिकर्मब्रह्मरूपेशेतेइतिब्रह्मेशयःअदंतत्वमार्षं कर्मब्रह्मनिष्ठावानित्यर्थः ब्रह्मवतांकर्मोपास्तिज्ञानवतांवरिष्ठोज्ञानीत्यर्थः वरिष्ठत्वेहेतुर्ब्रह्मप्रियस्तत्कर्मोपास्तिपरः ब्राह्मणो
ब्रह्मवित्तेनसहसमानंव्रतमद्वैतदृष्ट्यादिरूपंयस्यसब्राह्मणसव्रती अतएवब्रह्मज्ञःशुद्धब्रह्मवित् ब्राह्मणानांनेताब्रह्मपदप्रापकः ११ षडर्चिःषण्मुखत्वात्षड्जिह्वः १२ । १३ । १४ । १५ । १६
१७ । १८ । १९ । २० ॥ २१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेद्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥ ॥ ७ ॥

पतिव्रतोपाख्यानेसूचितान्स्त्रीधर्मान्विवरीतुंद्रौपदीसत्यभामासंवादमारभते उपासीनेषुविप्रेष्वित्यादिना सममेकत्र १ जाहस्यमभेपरस्परमतिशयेनहसंत्यौ २ कुरुयदूत्थिताःकुरुषुयदुषु चोत्पन्नाः ३ । ४ संहतान्दृढांगान् ५ । ६ व्रतंसोमवारव्रतादि तपउपवासादि स्नानंसंगमादौ । मंत्रोपेतमौषधंवशीकरणार्थं विद्या कामशास्त्रोक्ता । 'रतांतेवामपादेनभर्तृलिंगमुपस्पृशेत् । यावज्जीवंपतिस्तस्याःगर्भदासोभवेद्ध्रुवम्'इत्यादिकाषद्वीर्यं । मूलंअप्रच्युतंतारुण्यादितद्वीर्यं जपहोमागदाःविशकलिताःसमुदिता वा अगदोऽञ्जनादिरौषधम् ७ भगदैवतंसौभाग्यवर्धकं सौर

॥१६८॥ ॥ अथद्रौपदीसत्यभामासंवादपर्व ॥ ॥ वैशंपायनउवाच ॥ ॥ उपासीनेषुविप्रेषुपांडवेषुमहात्मसु ॥ द्रौपदीसत्यभामाचविविशातेतदासमम् ॥२३३॥
१ जाहस्यमानेसुप्रीतेसुखंतत्रनिषीदतुः ॥ चिरस्यदृष्ट्वाराजेंद्रतेन्योऽन्यस्यप्रियंवदे २ कथयामासतुश्चित्राःकथाःकुरुयदूत्थिताः ॥ अथाब्रवीत्सत्य
भामाकृष्णस्यमहिषीप्रिया ३ सात्राजितीयाज्ञसेनींरहसीदंसुमध्यमा ॥ केनद्रौपदिवृत्तेनपांडवानधितिष्ठसि ४ लोकपालोपमान्वीरान्युनःपरमसंहतान् ॥
कथंचवशगास्तुभ्यंनकुप्यंतिचतेशुभे ५ तववश्याहिसततंपांडवाःप्रियदर्शने ॥ मुखप्रेक्षाश्चतेसर्वेतत्त्वमेतद्ब्रवीहिमे ६ व्रतचर्यातपोवाऽपिस्नानमंत्रौषधानि
वा ॥ विद्यावीर्यंमूलवीर्यंजपहोमागदास्तथा ७ ममाद्याचक्ष्वपांचालियशस्यंभगदैवतम् ॥ येनकृष्णेभवेन्नित्यंममकृष्णोवशानुगः ८ एवमुक्त्वासत्यभामाविर
रामयशस्विनी ॥ पतिव्रतामहाभागाद्रौपदीप्रत्युवाचताम् ९ असत्स्त्रीणांसमाचारंसत्येमामनुपृच्छसि ॥ असदाचरितेमार्गेकथंस्यादनुकीर्तनम् १० अनु
प्रश्नःसंशयोवानैतत्त्वय्युपपद्यते ॥ तथाह्युपेतायुद्ध्याचत्वंकृष्णस्यमहिषीप्रिया ११ यदैवभर्ताजानीयान्मंत्रमूलपरांस्त्रियम् ॥ उद्विजेततदैवास्याःसर्पाद्वेश्म
गतादिव १२ उद्विग्नस्यकुतःशांतिरशांतस्यकुतःसुखम् ॥ नजातुवशगोभर्तास्त्रियाःस्यान्मंत्रकर्मणा १३ अमित्रप्रहितांश्चापिगदान्परमदारुणान् ॥ मूलप्र
चारैर्हिविषंप्रयच्छंतिजिघांसवः १४ जिह्वयायानिपुरुषस्त्वचावाऽप्युपसेवते ॥ तत्रचूर्णानिदत्तानिहन्युःक्षिप्रमसंशयम् १५ जलोदरसमायुक्ताःश्वित्रिणःप
लितास्तथा ॥ अपुमांसःकृताःस्त्रीभिर्जडांधबधिरास्तथा १६ पापानुगास्तुपापास्ताःपतीनुपसृजंत्युत ॥ नजातुविप्रियंभर्तुःस्त्रियाकार्यंकथंचन १७ वर्ता
म्यहंतुयांवृत्तिंपांडवेषुमहात्मसु ॥ तांसर्वांशृणुमेसत्यांसत्यभामेयशस्विनि १८ अहंकारंविहायाहंकामक्रोधौचसर्वदा ॥ सदारान्पांडवान्नित्यंप्रयतोपचराम्य
हम् १९ प्रणयंप्रतिसंहृत्यनिधायात्मानमात्मनि ॥ शुश्रूषुर्निरभीमानापतीनांचित्तरक्षिणी २० दुर्व्याहृताच्छंकमानादुःस्थिताद्दुरवेक्षितात् ॥ दुरासिता
द्दुर्व्रजितादिंगिताध्यासितादपि २१ सूर्यवैश्वानरसमान्सोमकल्पान्महारथान् ॥ सेवेचक्षुर्हणःपार्थानुग्रवीर्यप्रतापिनः २२

व्रतादिकं भगवेदनमितिपाठे सौभाग्यसूचकं वशानुगइच्छानुसारी ८ । ९ हेसत्ये अनुकीर्तनमुत्तरम् १० । ११ । १२ । १३ औषधादिप्रयोगेऽनिष्टमाहअमित्रेति गदान्रोगान् १४ । १५ ज ॥१६८॥
लोदरःउदररोगः वृकोदरइतिपाठे कुक्षिव्याधिर्भस्मकनामा श्वित्रिणःकुष्ठवंतः १६ उपसृजंतिदोषैर्योजयंति १७ । १८ सदारानितिसपत्नीनामपिसेवनंपतिप्रीत्यर्थंकर्तव्यमित्यर्थः १९ प्रण
यमीर्ष्यां आत्मा चित्तंआत्मनिस्वस्मिन् निरभिमाना दर्पहीना २० इंगितमभिप्रायः अध्यासितःक्षिप्तोयस्मिन्कटाक्षेतस्मादिंगिताध्यासितात् २१ चक्षुर्हणःद्वेषिरिपून्प्रतिताद्दशान् २२

अभिरूपःसुंदरः २३ नाभुक्तवतीति भर्तरिअभुक्तवति नाश्नामीत्यपकृष्यते । तथाअस्नाते नस्नामीतिशेषः तथाकर्मकरेषुभृत्येष्वपिअसंविष्टेषुन संविशामि अनाशितेषुनाश्नामीतिचविपरिणा
मापकर्षणेनयोज्यं २४ । २५ प्रमृष्टभांडासंमार्जितगृहोपकरणा २६ अतिरस्कृतसंभाषातिरस्कारशून्यवचना २७ अनर्मपरिहासहीनं हसितंहासः स्थानंस्थितिं अवस्करेतिरस्करोमिकिरते

देवोमनुष्योगंधर्वोयुवाचापिस्वलंकृतः ॥ द्रव्यवानभिरूपोवानमेऽन्यःपुरुषोमतः २३ नाभुक्तवतिनास्नातेनासंविष्टेचभर्तरि ॥ नसंविशामिनाश्नामिसदाकर्म
करेष्वपि २४ क्षेत्राद्वनाद्वाग्रामाद्वाभर्तारंगृहमागतम् ॥ अभ्युत्थायाभिनंदामिआसनेनोदकेनच २५ प्रमृष्टभांडामृष्टान्नाकालेभोजनदायिनी ॥ संयतागुप्त
धान्याचसुसंमृष्टनिवेशना २६ अतिरस्कृतसंभाषादुःस्त्रियोनानुसेवती ॥ अनुकूलवतीनित्यंभवाम्यनलसासदा २७ अनर्मचापिहसितंद्वारिस्थानमभीक्ष्ण
शः ॥ अवस्करेचिरस्थानंनिष्कुटेषुचवर्जये २८ अतिहासातिरोषौचक्रोधस्थानंचवर्जये ॥ निरताऽहंसदासत्येभर्तॄणामुपसेवने २९ सर्वथाभर्तृरहितंनममेष्टं
कथंचन ॥ यदाप्रवसतेभर्ताकुटुंबार्थेनकेनचित् ३० सुमनोवर्णकापेताभवामिव्रतचारिणी ॥ यच्चभर्तानपिबतियच्चभर्तानसेवते ३१ यच्चनाश्नातिमेभर्तासर्वं
तद्वर्जयाम्यहम् ॥ यथोपदेशंनियतावर्तमानावरांगने ३२ स्वलंकृतासुप्रयताभर्तुःप्रियहितेरता ॥ येचधर्माःकुटुंबेषुश्वश्र्वामेकथिताःपुरा ३३ भिक्षाबलिःश्रा
द्धमितिस्थालीपाकाश्चपर्वसु ॥ मान्यानांमानसत्कारायेचान्येविदितामम ३४ तान्सर्वाननुवर्तामिदिवारात्रमतंद्रिता ॥ विनयान्नियमांश्चैवसदासर्वात्मनाश्रि
ता ३५ मृदून्सतःसत्यशीलान्सत्यधर्मानुपालिनः ॥ आशीविषानिवक्रुद्धान्पतीन्परिचराम्यहम् ३६ पत्याश्रयोहिमेधर्मोमतःस्त्रीणांसनातनः ॥ सदेवःसाग
तिर्नान्यातस्यकाविप्रियंचरेत् ३७ अहंपतीन्नातिशयेनात्यश्नेनातिभूषये ॥ नापिपरिवदेश्वश्रूंसर्वदापरियंत्रिता ३८ अवधानेनसुभगेनित्योत्थिततयैवच ॥
भर्तारोवशगामह्यंगुरुशुश्रूषयैवच ३९ नित्यमार्यामहंकुंतींवीरसूंसत्यवादिनीम् ॥ स्वयंपरिचराम्येतांपानाच्छादनभोजनैः ४० नैतामतिशयेजातुवस्त्रभूषण
भोजनैः ॥ नापिपरिवदेचाहंतांपृथांपृथिवीसमाम् ४१ अष्टावग्रेब्राह्मणानांसहस्राणिस्मनित्यदा ॥ भुंजतेरुक्मपात्रीषुयुधिष्ठिरनिवेशने ४२ अष्टाशीतिसहस्रा
णिस्नातकागृहमेधिनः ॥ त्रिंशद्दासीकएकैकोयान्बिभर्तियुधिष्ठिरः ४३ दशान्यानिसहस्राणियेषामन्नंसुसंस्कृतम् ॥ ह्रियतेरुक्मपात्रीभिर्यतीनामूर्ध्वरेतसाम्
४४ तान्सर्वानग्रहारेणब्राह्मणान्वेदवादिनः ॥ यथार्हंपूजयामिस्मपानाच्छादनभोजनैः ४५ शतंदासीसहस्राणिकौंतेयस्यमहात्मनः ॥ कंबुकेयूरधा
रिण्योनिष्कंकंठ्यःस्वलंकृताः ४६ महार्हमाल्याभरणाःसुवर्णाश्चंदनोक्षिताः ॥ मणीन्हेमचबिभ्रत्योनृत्यगीतविशारदाः ४७ तासांनामचरूपंचभोजना
च्छादनानिच ॥ सर्वासामेववेदाहंकर्मचैवकृताकृतम् ४८

रिदंरूपं उत्करेइतिवा निष्कुटेषुगृहारामेषु २८ । २९ भर्तृरहितंभर्तृवियोगः ३० सुमनोवर्णकापेतापुष्पैरनुलेपनैश्चवर्जिता ३१ । ३२ । ३३ मानःपूजा सत्कारआदरः ३४ । ३५ । ३६ । ३७
नातिशयेनातिक्रमामि नपरिवदे नंनिंदामि ३८ अवधानेनअप्रमादेन मह्यंमम ३९ । ४० । ४१ । ४२ । ४३ । ४४ अग्रहारेण वैश्वदेवातिप्रथमदेयेनान्नेन ४५ । ४६ । ४७ । ४८

४९ अनुयात्रंस्वैरयात्रायामपिपरिवारभूतं ५० । ५१ वेदवेद्मि ५२ । ५३ । ५४ । ५५ । ५६ । ५७ संवननंवशीकरणं ५८ । ५९ । ६० अभिपन्नाप्रार्थयाना ॥ ६१ ॥ इत्यारण्यकेपर्वणि

शतंदासीसहस्राणिकुंतीपुत्रस्यधीमतः ॥ पात्रीहस्तादिवारात्रमतिथीन्भोजयंत्युत ४९ शतमश्वसहस्राणिदशनागायुतानिच ॥ युधिष्ठिरस्यानुयात्रमिंद्रप्रस्थ
निवासिनः ५० एतदासीत्तदाराज्ञोयन्महींपर्यपालयत् ॥ येषांसंख्याविधिंचैवप्रदिशामिशृणोमिच ५१ अंतःपुराणांसर्वेषांभृत्यानांचैवसर्वशः ॥ आगोपाला
विपालेभ्यःसर्वंवेदकृताकृतम् ५२ सर्वराज्ञःसमुदयमायंचव्ययमेवच ॥ एकाऽहंवेद्मिकल्याणिपांडवानांयशस्विनि ५३ मयिसर्वंसमासज्यकुटुंबंभरतर्षभाः ॥
उपासनरताःसर्वेघटयंतिवरानने ५४ तमहंभारमासक्तमनाधृष्यंदुरात्मभिः ॥ सुखंसर्वंपरित्यज्यरात्र्यहानिघटामिवै ५५ अधृष्यंवरुणस्येवनिधिपूर्णमिवोद
धिम् ॥ एकाहंवेद्मिकोशंवैपतीनांधर्मचारिणाम् ५६ अनिशायांनिशायांचसहायाक्षुत्पिपासयोः ॥ आराधयंत्याःकौरव्यांस्तुल्यारात्रिरहश्चमे ५७ प्रथमंप्राते
बुद्ध्यामिचरमंसंविशामिच ॥ नित्यकालमहंसत्येएतत्संवननंमम ५८ एतज्जानाम्यहंकर्तुंभर्तृसंवननंमहत् ॥ असत्स्त्रीणांसमाचारंनाहंकुर्यांनकामये ५९
॥ वैशंपायनउवाच ॥ तच्छ्रुत्वाधर्मसहितंव्याहृतंकृष्णयातदा ॥ उवाचसत्यासत्कृत्यपांचालींधर्मचारिणीम् ६० अभिपन्नास्मिपांचालियाज्ञसेनिक्षमस्वमे ॥
कामकारःसखीनांहिसोपहासंप्रभाषितम् ६१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीसत्यभामासंवादपर्वणित्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥२३३ ॥
द्रौपद्युवाच ॥ इमंतुतेमार्गमपेतमोहंवक्ष्यामिचित्तग्रहणायभर्तुः ॥ अस्मिन्यथावत्सखिवर्तमानाभर्तारमाच्छेत्स्यसिकामिनीभ्यः १ नैतादृशंदैवतमस्तिसत्येस
र्वेषुलोकेषुसदेवकेषु ॥ यथापतिस्तस्यतुसर्वकामालभ्याःप्रसादात्कुपितश्चहन्यात् २ तस्मादपत्यंविविधाश्चभोगाःशय्यासनान्युत्तमदर्शनानि ॥ वस्त्राणिमा
ल्यानितथैवगंधाःस्वर्गश्चलोकोविपुलाचकीर्तिः ३ सुखंसुखेनेहनजातुलभ्यंदुःखेनसाध्वीलभतेसुखानि ॥ साकृष्णमाराधयसौहृदेनप्रेम्णाचनित्यंप्रतिकर्मणा
च ४ तथाऽऽसनैश्चारुभिरग्र्यमाल्यैर्दाक्षिण्ययोगैर्विविधैश्चगंधैः ॥ अस्याःप्रियोऽस्मीतियथाविदित्वात्वामेवसंश्लिष्यतितद्विधत्स्व ५ श्रुत्वास्वरंद्वारगतस्यभ
र्तुःप्रत्युत्थितातिष्ठगृहस्यमध्ये ॥ दृष्ट्वाप्रविष्टंत्वरिताऽऽसनेनपाद्येनचैनंप्रतिपूजयस्व ६ संप्रेषितायामथचैवदास्यामुत्थायसर्वंस्वयमेवकार्यम् ॥ जानातुकृष्ण
स्तवभावमेतंसर्वात्मनामांभजतीतिसत्ये ७ त्वत्संनिधौयत्कथयेत्पतिस्तेयद्यप्यगुह्यंपरिरक्षितव्यम् ॥ काचित्सपत्नीतववासुदेवंप्रत्यादिशेत्तेनभवेद्विरागः ८
प्रियांश्चरक्तांश्चहितांश्चभर्तुस्तान्भोजयेथाविविधैरुपायैः ॥ द्वेष्यैरुपेक्ष्यैरहितैश्चतस्यभिद्यस्वनित्यंकुहकोद्यतैश्च ९ मदंप्रमादंपुरुषेषुहित्वासंयच्छभावं
प्रतिगृह्यमौनम् ॥ प्रद्युम्नसांबावपितेकुमारौनोपासितव्यौरहितेकदाचित् १० महाकुलीनाभिरपापिकाभिःस्त्रीभिःसतीभिस्तवसख्यमस्तु ॥ चंडाश्चशौंडाश्च ॥१९१॥
महाशनाश्चचौराश्चदुष्टाश्चपलाश्चवर्ज्याः ११ नीलकंठीयेभारतभावदीपेत्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥ ॥ इममिति आच्छेत्स्यसिबलाद्दूरीष्यसिकामिनीभ्यःसप
त्नीभ्यः १ । २ । ३ प्रतिकर्मणाकायक्लेशेन ४ । ५ । ६ । ७ । ८ । ९ रहितेविजने १० चंडाःक्रूराः शौंडाःपराभिभवसमर्थाः महाशनाःबहुभुजः दुष्टाःद्वेषाद्याक्रांताःस्त्रियोवर्ज्याइतिशेषः ११

भगदैवतंभाग्यकरं ॥ १२ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेचतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥ मार्कंडेयादिभिरिति १ संविदंसंभाषां २ स्वजित्वाआश्लिष्य ३ कृ
ष्णेहेद्रौपदि ४ ॥ ५ निर्द्वंद्वानिष्प्रतिपक्षा । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ प्रणयःस्नेहः १६ । १७ उपावर्त्यपांडवान्नितिशेषः १८ ॥ इत्यारण्यकेपर्वणिनीलकं

एतद्यशस्यंभगदैवतंचस्वर्ग्यंतथाशत्रुनिबर्हणंच ॥ महार्हमाल्याभरणांगरागाभर्तारमाराधयपुण्यगंधा १२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदी
सत्यभामासंवादप० द्रौपदीकर्तव्यकथनेचतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥ ॥ ४ ॥ ॥ ४ ॥ ॥ वैशंपायनउवाच ॥ मार्कंडेयादिभि
र्विप्रैःपांडवैश्चमहात्मभिः ॥ कथाभिरनुकूलाभिःसहस्थित्वाजनार्दनः १ ततस्तैःसंविदंकृत्वायथावन्मधुसूदनः ॥ आरुरुक्षूरथंसत्यामाह्वयामासकेशवः
२ सत्यभामाततस्तत्रस्वजित्वाद्रुपदात्मजाम् ॥ उवाचवचनंहृद्यंयथाभावंसमाहितम् ३ कृष्णेमाभूत्तवोत्कंठामाव्यथामाप्रजागारः ॥ भर्तृभिर्देवसंकाशै
र्जितांप्राप्स्यसिमेदिनीम् ४ नह्येवंशीलसंपन्नानैवंपूजितलक्षणाः ॥ प्राप्नुवंतिचिरंक्लेशंयथात्वमसितेक्षणे ५ अवश्यंचत्वयाभूमिरियंनिहतकंटका ॥ भर्तृभिःसह
भोक्तव्यानिर्द्वंद्वेतिश्रुतंमया ६ धार्तराष्ट्रवधंकृत्वावैराणिप्रतियात्यच ॥ युधिष्ठिरस्थांपृथिवींद्रक्ष्यसेद्रुपदात्मजे ७ यास्ताःप्रव्राजमानांत्वांप्राहसन्दर्पमोहिताः ॥
ताःक्षिप्रंहतसंकल्पाद्रक्ष्यसित्वंकुरुस्त्रियः ८ तवदुःखोपपन्नायायैराचरितमप्रियम् ॥ विधिसंप्रस्थितान्सर्वांस्तान्कृष्णेयमसादनम् ९ पुत्रस्तेप्रतिविंध्यश्चसु
तसोमस्तथाविधः ॥ श्रुतकर्मार्जुनिश्चैवशतानीकश्चनाकुलिः १० सहदेवाच्चयोजातःश्रुतसेनस्तवात्मजः ॥ सर्वेकुशलिनोवीराःकृतास्त्राश्चसुतास्तव ११ अ
भिमन्युरिवप्रीताद्वारवत्यांरताभृशम् ॥ त्वमिवैषांसुभद्राचप्रीत्यासर्वात्मनास्थिता १२ प्रीयतेतवनिर्द्वंद्वातेभ्यश्चाविगतज्वरा ॥ दुःखितातेनदुःखेनसुखेनसुखि
तातथा १३ भजेत्सर्वात्मनाचैवप्रद्युम्नजननीतथा ॥ भानुप्रभृतिभिश्चैनान्विशिनष्टिचकेशवः १४ भोजनाच्छादनेचैषांनित्यंमेश्वशुरःस्थितः ॥ रामप्रभृतयः
सर्वेभजंत्यंधकवृष्णयः १५ तुल्योहिप्रणयस्तेषांप्रद्युम्नस्यचभाविनि ॥ एवमादिप्रियंसत्यंहृद्यमुक्त्वामनोनुगम् १६ गमनायमनश्चक्रेवासुदेवरथंप्रति ॥ तां
कृष्णांकृष्णमहिषीचकाराभिप्रदक्षिणम् १७ आरुरोहरथंशौरेःसत्यभामाऽथभाविनी ॥ स्मयित्वातुयदुश्रेष्ठोद्रौपदींपरिसांत्व्यच ॥ उपावर्त्यततःशीघ्रैर्हयैःप्रा
यात्पुरंस्वकम् १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीसत्यभामासंवादप० कृष्णगमनेपंचत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥ ॥ ४ ॥
समाप्तमिदंद्रौपदीसत्यभामासंवादपर्व ॥ अथघोषयात्रापर्व ॥ जनमेजयउवाच ॥ एवंवनेवर्तमानानराग्र्याःशीतोष्णवातातपकर्शितांगाः ॥ सरस्तदासाद्यव
नंचपुण्यंततःपरंकिमकुर्वंतपार्थाः १ ॥ वैशंपायनउवाच ॥ सरस्तदासाद्यतुपांडुपुत्राजनंसमुत्सृज्यविधायवेशम् ॥ वनानिरम्याण्यथपर्वतांश्चनदीप्रदेशांश्चत
दाविचेरुः २ तथावनेतान्वसतःप्रवीरान्स्वाध्यायवंतश्चतपोधनांश्च ॥ अभ्याययुर्वेदविदःपुराणास्तान्पूजयामासुरथोनराग्र्याः ३

ठीयेभारतभावदीपेपंचत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥ एवंवनेवर्तमानाइत्यादेःस्वपुरंविविक्षुस्तदेत्यंतस्यग्रंथस्य ईर्ष्यालुर्दुर्योधनवदपमानंप्राप्नोति साधुश्चयुधिष्ठिरवच्छत्रूनप्युप
करोतीतितात्पर्यं सरोद्वैतवनस्थं १ जनंसमुदायं वेशंगृहं नदीप्रदेशान्त्र तत्समीपस्थानेच २ वनेद्वैतवने ३

नृपंधृतराष्ट्रम् ४ । ५ । ६ । ७ । ८ रंकोर्मृगविशेषस्यलोमराशिमयीतूलिकारांकवकूटम् ९ इडातलस्थःभूतलस्थः । 'इडातुबुधयोषिति । सौरभेय्यांचवचनेवसुमत्यामपिस्त्रियाम्' इतिमेदिनी १० । ११ । १२ उग्रतेजाअर्जुनः १३ प्रजागरस्थौसुविशयातेइतिशेषः १४ । १५ अन्येःअन्येभ्योऽधिकःप्रतीक्षतीत्यप्युपपदाभावेऽपिच्छांदसोगर्हायांलट् १६ । १७ । १८ । १९ । २०

ततःकदाचित्कुशलःकथासुविप्रोऽभ्यगच्छद्बहुविकीरवयान् ॥ सतैःसमेत्याथयदृच्छयैववैचित्रवीर्यंनृपमभ्यगच्छत् ४ अथोपविष्टःप्रतिसत्कृतश्चवृद्धेनराज्ञाकुरुसत्तमेन ॥ प्रचोदितःसंकथयांबभूवधर्मानिलेंद्रप्रभवान्यमौच ५ कृशांश्चवातातपकर्शितांगानदुःखस्यचोग्रस्यमुखेप्रपन्नान् ॥ तांचाप्यनाथामिववीरनाथांकृष्णांपरिक्लेशगुणेनयुक्ताम् ६ ततःकथास्तस्यनिशम्यराजावैचित्रवीर्यःकृपयाऽभितप्तः ॥ वनेतथापार्थिवपुत्रपौत्रान्श्रुत्वातथादुःखनदींप्रपन्नान् ७ प्रोवाचदैन्याभिहतांतरात्मानिःश्वासवातोपहतस्तदानीम् ॥ वाचंकथंचित्स्थिरतामुपेत्यतत्सर्वमात्मप्रभवंविचिंत्य ८ कथंनुसत्यःशुचिरार्यवृत्तोज्येष्ठःसुतानांममधर्मराजः ॥ अजातशत्रुःपृथिवीतलेऽस्मशेतेपुरारांकवकूटशायी ९ प्रबोध्यतेमागधसूतपूगैर्नित्यंस्तुवद्भिःस्वयमिंद्रकल्पः ॥ पतत्रिसंघैःसजघन्यरात्रेप्रबोध्यतेनूनमिडातलस्थः १० कथंनुवातातपकर्शितांगोवृकोदरःकोपपरिप्लुतांगः ॥ शेतेपृथिव्यामतथोचितांगःकृष्णासमक्षंवसुधातलस्थः ११ तथार्जुनःसुकुमारोमनस्वीवशेस्थितोधर्मसुतस्यराज्ञः ॥ विदूयमानैरिवसर्वगात्रैर्ध्रुवंनशेतेवसतीरमर्षात् १२ यमौचकृष्णांचयुधिष्ठिरंचभीमंचदृष्ट्वासुखविप्रयुक्तम् ॥ विनिःश्वसन्सर्पइवोग्रतेजाध्रुवंनशेतेवसतीरमर्षात् १३ यथायमौचाप्यसुखौसुखार्हौसमृद्धरूपावमरौदिवीव ॥ प्रजागरस्थौध्रुवमप्रशांतौधर्मेणसत्येनचवार्यमाणौ १४ समीरणेनाथसमोबलेनसमीरणस्यैवसुतोबलीयान् ॥ सधर्मपाशेनसितोऽग्रजेनध्रुवंविनिःश्वस्यसहत्यमर्षम् १५ सचापिभूमौपरिवर्तमानोवधंसुतानांममकांक्षमाणः ॥ सत्येनधर्मेणचवार्यमाणःकालंप्रतीक्षत्यधिकोरणेऽन्यैः १६ अजातशत्रौतु जितेनिकृत्यादुःशासनोयत्परुषाण्यवोचत् ॥ तानिप्रविष्टानिवृकोदरांगंदहंतिकक्षाग्निरिवेंधनानि १७ नपापकंध्यास्यतिधर्मपुत्रोधनंजयश्चाप्यनुवर्त्स्यतेतम् ॥ अरण्यवासेनविवर्धतेतुभीमस्यकोपोऽग्निरिवानिलेन १८ सतेनकोपेनविदह्यमानःकरंकरेणाभिनिपीड्यवीरः ॥ विनिःश्वसत्युष्णमतीवघोरंदहन्निवेमान्ममपुत्रपौत्रान् १९ गांडीवधन्वाचवृकोदरश्चसंरंभिणावंतककालकल्पौ ॥ नशेषयेतांयुधिशत्रुसेनांशरान्किरंतावशनिप्रकाशान् २० दुर्योधनःशकुनिःसूतपुत्रोदुःशासनश्चापिसुमंदचेताः ॥ मधुप्रपश्यंतिनतुप्रपातंयद्यूतमालंब्यहरंतिराज्यम् २१ शुभाशुभंकर्मनरोहिकृत्वाप्रतीक्षतेतस्यफलंस्मकर्ता ॥ सतेनमुह्यत्यवशःफलेनमोक्षःकथंस्यात्पुरुषस्यतस्मात् २२ क्षेत्रेसुकृष्टेह्युपितेचबीजेदेवेचवर्षत्यृतुकालयुक्तम् ॥ नस्यात्फलंतस्यकुतःप्रसिद्धिरन्यत्रदैवादितिचिंतयामि २३ कृतंमताक्षेणयथानसाधुसाधुप्रवृत्तेनचपांडवेन ॥ मयाचदुष्पुत्रवशानुगेनयथाकुरूणामयमंतकालः २४

२१ शुभेति फलंस्वर्गंनरकरूपंतेनमूढस्यतस्मान्नमोक्षोऽस्तीत्यर्थः २२ दृष्टसामग्र्यांसत्यामपिदैवप्रातिकूल्यात्फलंनजाततइत्याह क्षेत्रेइति उपितेन्युप्ते एवंमच्चित्तेदुर्योधनादीनांचचित्ते वृद्धहितोपदेशोव्यर्थाभवतीभावः २३ यथानसाधुअशुभंस्यात्तथामताक्षेणशकुनिनाकृतं । पांडवेनचतदानीमेवतान्अनिघ्नतासाधुकृतं मयाचतथाकृतं यथायमंतकालउपस्थितइतिशेषः २४

प्रवास्यतिवातइतिशेषः प्रजास्यतिअपत्यंजनयिष्यति क्षपादौराद्यादौ एतस्यपापस्यफलमपरिहार्यमितिभावः २५ कथंतर्हिप्रागेवैतन्नचिंतितमित्याशंक्याह क्रियेतेति यद्येवंविवेकोनृणांभवेत्तर्हि वित्तंकस्माद्धेतोरस्मदादिरन्यायेनापिक्रियेतसाधयेत्।त्वंमूर्खोऽसीतिचेदपरेऽपिपूर्वैराजानःकस्माद्वित्तंकुर्युरर्जयेयुः । अर्जितंवावित्तंपुरुषाःसाधवोऽपिकथंचिन्नधर्मकामाद्यर्थंत्राकस्मान्नदद्युःनपरित्यजेयुः । तस्मात्प्राणिनांवित्तस्यार्जने अर्जितस्यपालनेचस्वाभाविकीबुद्धिरपरिहार्येतिभावः । वित्तेनेतिगौडपाठेतुवित्तेनहेतुना वित्तार्थंकस्मात्क्रियेतयत्नइतियत्नंकुर्युरितिचाध्याहृत्ययोज्यं । कथंचिद्दद्युरितिदुस्त्यजत्वंचतस्यैवोक्तं । नन्वर्जनाभावेएवकोदोषइत्यतआह प्राप्येतिअर्थकालंअर्थसाध्यदारक्रियादिकालं यौवनादिकंप्राप्य अनर्थःव्याकुलत्वंभवेत् तदेवाह तत्धनसाध्यंकार्यंकथंनुकेनप्रकारेणवाममनिर्धनस्यस्यात् । कुतोवाउपपापाद्वतत्धनंममनिर्दैवस्यस्यात्संपद्येतेतिचिंताऽरूपोऽनर्थःस्यादेवेत्यर्थः २६ नन्वेवमर्थस्यइदानीमप्यनर्थकरत्वंजानतात्वयापांडवानामंशःसुत्यजस्तत्कथननाशशंकाऽस्तीत्याशंक्याह कथंनुइति पुत्रवत्पशुवच्चपिंडीभूतःप्रियतमश्चार्थः कथंनुभिद्येतद्विधाभवेत् वेणुरिवकरपत्रेणनकथंचिद्भेत्तुंशक्यइतिभावः । न

ध्रुवंप्रवास्यत्यसमीरितोऽपिध्रुवंप्रजास्यत्युतगर्भिणीया ॥ ध्रुवंदिनादौरजनीप्रणाशस्तथाक्षपादौचदिनप्रणाशः २५ क्रियेतकस्मादपरेचकुर्युर्वित्तंनदद्युःपुरुषाःकथंचित् ॥ प्राप्यार्थकालंचभवेदनर्थःकथंनुतत्स्यादितितत्कुतःस्यात् २६ कथंनुभिद्येतनचस्रवेतनचप्रसिच्येदितिरक्षितव्यम् ॥ अरक्ष्यमाणंशतधाप्रकीर्येद्ध्रुवंननाशोऽस्तिकृतस्यलोके २७ गतोह्यरण्यादपिशक्रलोकंधनंजयःपश्यतवीर्यमस्य ॥ अस्त्राणिदिव्यानिचतुर्विधानिज्ञात्वापुनर्लोकमिमंप्रपन्नः २८ स्वर्गंहिगत्वासशरीरएवकोमानुषःपुनरागंतुमिच्छेत् ॥ अन्यत्रकालोपहतानेकान्समीक्षमाणस्तुकुरून्मुमूर्षून् २९ धनुर्ग्राहश्चार्जुनःसव्यसाचीधनुश्चतद्गांडिवंभीमवेगम् ॥ अस्त्राणिदिव्यानिचतानितस्यत्रयस्यतेजःप्रसहेतकोऽत्र ३० निशम्यतद्वचनंपार्थिवस्यदुर्योधनंरहितेसौबलोऽथ ॥ अबोधयत्कर्णमुपेत्यसर्वंसचाप्यहृष्टोभवदल्पचेताः ३१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिधृतराष्ट्रखेदवाक्येषट्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३६ ॥ ॥ ७॥

॥ वैशंपायनउवाच ॥ धृतराष्ट्रस्यतद्वाक्यंनिशम्यशकुनिस्तदा ॥ दुर्योधनमिदंकालेकर्णेनसहितोऽब्रवीत् १ प्रव्राज्यपांडवान्वीरान्स्वेनवीर्येणभारत ॥ भुंक्ष्वेमांपृथिवीमेकोदिविशंबरहायथा २ प्राच्याश्चदाक्षिणात्याश्चप्रतीच्योदीच्यवासिनः ॥ कृताःकरप्रदाःसर्वेराजानस्तेनराधिप ३

चस्रवेतआमपात्राज्जलमिवस्तोकंस्तोकमपिनबहिर्गच्छेत् प्रार्थयालिङ्एवमहूप्रार्थनायामितेनपरंग्रामपंचकमपियाचितंचेन्नदास्यामीतिदर्शितं । नचप्रसिच्येत्पात्रधारयावानबहिर्गच्छेतेनार्धराज्यदानंसुतरांनदेयमित्युक्तं । इतिहेतोर्धनंरक्षितव्यमेव नस्तोकमर्थंवातेभ्यःप्रदेयमितिभावः तत्रहेतुः अरक्ष्यमाणंशतधाप्रकीर्येदिति अर्थनाशएवमहाननर्थइत्यर्थः । नन्वर्थेनापिपुत्रनाशःसंभाव्यत इत्याशंक्याहध्रुवमिति तेषांमरणंदुर्गतिर्वा दैवकृतादुर्निवार्या किमर्थंदानेनप्रत्यक्षदुःखेनेतिभावः २७ किंचतुल्यांशभागिनोदायादस्योत्कर्षोऽपिदुःसहइत्याशयेनाहगतइत्यादिना २८ अन्यत्रस्वर्गे स्थानविशेषमहिम्ना दिव्यज्ञानसंपन्नोऽर्जुनः कुरून्मुमूर्षून्समीक्षमाणः कोऽपिमानुषोनास्तीत्यर्थः २९ । ३० अहृष्टोमृत्युभयात् । सचाथहृष्टइतिपाठे हृष्टःपांडवेभ्योऽल्पमपिनदेयमितिधृतराष्ट्रप्रतिज्ञाश्रवणात् ३१ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेषट्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ धृतराष्ट्रस्येति १ । २ प्रतीच्या उदीच्याश्च देशास्तद्वासिनः ते त्वया ३

साद्याः सादयितुंनाशयितुंयोग्याः शत्रवस्तेषांलक्ष्मीः साद्यलक्ष्मीः । ४ । ५ नचिरमल्पकालं शोककर्शिताः अतस्त्वत्प्रतिज्ञातोऽस्माकंसुखकालोभूयानस्तीतिभावः सातुश्रीः । ६ । ७ । ८
९ वंद्यमानःस्तूयमानः द्विजैर्वर्णिकैः । १० ११ नाद्रियेतनादृता । १२ १३ । १४ १५ । त्वात्वाम् । १६ समर्था सुहृदांहर्षशत्रूणांचशोकंदातुमितिशेषः १७ । १८ । अमित्रेष्वघदर्शनात्

याहिसादीप्यमानेवपांडवानभजत्पुरा ॥ साद्यलक्ष्मीस्त्वयाराजन्नवाप्ताभ्रातृभिःसह ४ इंद्रप्रस्थगतेयांतांदीप्यमानांयुधिष्ठिरे ॥ अपश्यामश्रियंराजन्दृश्यते
सातवाद्यवै ५ शत्रवस्तवराजेंद्रनाचिरंशोककर्शिताः ॥ सातुबुद्धिबलेनेयंराज्ञस्तस्माद्युधिष्ठिरात् ६ त्वयाऽऽक्षिप्तामहाबाहोदीप्यमानेवदृश्यते ॥ तथैवतवरा
जेंद्रराजानःपरवीरहन् ७ शासनेऽधिष्ठिताःसर्वेकिंकुर्मइतिवादिनः ॥ तवेयंपृथिवीराजन्निखिलासागरांबरा ८ सपर्वतवनादेवीसग्रामनगराकरा ॥ नानावनोद्दे
शवतीपर्वतैरूपशोभिता ९ वंद्यमानोद्विजैराजन्पूज्यमानश्चराजभिः ॥ पौरुषाद्दिविदेवेषुभ्राजसेरश्मिवानिव १० रुद्रैरिवयमोराजामरुद्भिरिववासवः ॥ कुरुभि
स्त्वंवृतोराजन्भासिनक्षत्रराडिव ११ यैःस्मतंनाद्रियेताऽऽज्ञानचयेशासनेस्थिताः ॥ पश्यामस्तान्श्रियाहीनान्पांडवान्वनवासिनः १२ श्रूयतेहि
महाराजसरोद्वैतवनंप्रति ॥ वसंतःपांडवाःसार्धंब्राह्मणैर्वनवासिभिः १३ सप्रयाहिमहाराजश्रियापरमयायुतः ॥ तापयन्पांडुपुत्रांस्त्वंरश्मिवानिवतेजसा १४
स्थितोराज्येच्युतान्राज्याच्छ्रियाहीनाञ्छ्रियावृतः ॥ असमृद्धान्समृद्धार्थःपश्यपांडुसुतान्नृप १५ महाभिजनसंपन्नंभद्रेमहतिसंस्थितं ॥ पांडवास्त्वाऽभिवीक्षंतु
ययातिमिवनाहुषम् १६ यांश्रियंसुहृदश्चैवदुर्हृदश्चविशांपते ॥ पश्यंतिपुरुषेदीप्तांसासमर्थाभवत्युत १७ समस्थोविषमस्थान्हिदुर्हृदोयोऽभिवीक्षते ॥ जगती
स्थानिवाद्रिस्थःकिमतःपरमंसुखम् १८ नपुत्रधनलाभेननराज्येनापिविंदति ॥ प्रीतिंनृपतिशार्दूलयाममित्राघदर्शनात् १९ किंनुतस्यसुखंनस्यादाश्रमेयो
धनंजयं ॥ अभिवीक्षेतसिद्धार्थोवल्कलाजिनवाससं २० सुवाससोहितेभार्यावल्कलाजिनसंवृताम् ॥ पश्यंतुदुःखितांकृष्णांसाचनिर्विद्यतांपुनः २१ विनिंदतां
तथाऽऽत्मानंजीवितंचधनच्युतम् ॥ नतथाहिसभामध्येतस्याभवितुमर्हति ॥ वैमनस्यंयथादृष्ट्वातवभार्याःस्वलंकृताः २२ ॥ वैशंपायनउवाच ॥ ॥ एवमु
क्त्वातुराजानंकर्णःशकुनिनासह ॥ तूष्णींबभूवतुरुभौवाक्यांतेजनमेजय ॥ २३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिकर्णशकुनिवाक्ये
सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥ ७ ॥ वैशंपायनउवाच ॥ कर्णस्यवचनंश्रुत्वाराजादुर्योधनस्ततः ॥ हृष्टोभूत्वापुनर्दीनइदंवचनमब्रवीत् १ ब्र
वीषियदिदंकर्णसर्वंमनसिमेस्थितम् ॥ नत्वभ्यनुज्ञांलप्स्यामिगमनेयत्रपांडवाः २ परिदेवतितान्वीरान्धृतराष्ट्रोमहीपतिः ॥ मन्यतेऽभ्यधिकांश्चापितपोयो
गेनपांडवान् ३ अथवाऽप्यनुबुध्येतनृपोऽस्माकंचिकीर्षितम् ॥ एवमप्यायतिंरक्षन्नाभ्यनुज्ञातुमर्हति ४ नहिद्वैतवनेकिंचिद्विद्यतेऽन्यत्प्रयोजनम् ॥ उत्साद
नमृतेतेषांवनस्थानांमहाद्युते ५

अघंदुःखं । 'अघंतुव्यसनेदुःखेदुरितेचनपुंसकम्'इतिमेदिनी १९ । २०
निर्विद्यतांजीवितादपिविरक्ताभवतु २१ । २२ । २३ ॥ ॥ इत्यार०प०नी०भा०भा०सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥ कर्णस्येति १ । २ । ३ आयतिमुत्तरकालं ४ । ५

६ इतरायावस्थानाय नाधिगच्छामिअधिगमंनिश्चयंनप्राप्नोमि ७ । ८ । ९ । १० लक्ष्म्याउपेतंपश्येतांचेज्जीवितंयुक्तमितिसंबंधः ११ । १२ । १३ कल्यंप्रातः १४ । १५ । १६ । १७
१८ घोषागोव्रजाः १९ । २० । २१ अयमुपायोघोषयात्रैव २२ । २३ तलान्हस्ततलानि २४ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे अष्टत्रिंशदधिकद्विशततमोऽध्यायः ॥२३८॥

जानासिहियथाक्षत्ताद्यूतकालउपस्थिते ॥ अब्रवीद्यच्चमांत्वांचसौबलंवचनंतदा ६ तानिमर्माणिवाक्यानियच्चान्यत्परिदेवितम् ॥ विचिंत्यनाधिगच्छामिगम
नायेतरायवा ७ ममापिहिमहान्हर्षोयदहंभीमफाल्गुनौ ॥ क्लिष्टावरण्येपश्येयंकृष्णयासहिताविति ८ नतथाह्याप्नुयांप्रीतिमवाप्यवसुधामिमां ॥ दृष्ट्वायथापां
डुसुतान्वल्कलाजिनवाससः ९ किंनुस्यादधिकंतस्माद्यदहंद्रुपदात्मजाम् ॥ द्रौपदींकर्णपश्येयंकाषायवसनांवने १० यदिमांधर्मराजश्चभीमसेनश्चपांडवः ॥
युक्तंपरमयालक्ष्म्यापश्येतांजीवितंभवेत् ११ उपायंनतुपश्यामियेनगच्छेमतद्वनम् ॥ यथाचाभ्यनुजानीयाद्गच्छंतंमांमहीपतिः १२ ससौबलेनसहितस्तथा
दुःशासनेनच ॥ उपायंपश्यनिपुणंयेनगच्छेमतद्वनम् १३ अहमप्यद्यनिश्चित्यगमनायेतरायच ॥ कल्यमेवगमिष्यामिसमीपंपार्थिवस्यह १४ मयितत्रोपवि
ष्टेतुभीष्मेचकुरुसत्तमे ॥ उपायोयोभवेद्दृष्टस्तंब्रूयाःसहसौबलः १५ वचोभीष्मस्यराज्ञश्चनिशम्यगमनंप्रति ॥ व्यवसायंकरिष्येऽहमनुनीयपितामहम् १६ तथेत्यु
क्त्वातुतेसर्वेजग्मुरावसथान्प्रति ॥ व्युषितायांरजन्यांतुकर्णोराजानमभ्ययात् १७ ततोदुर्योधनंकर्णःप्रहसन्निदमब्रवीत् ॥ उपायःपरिदृष्टोऽयंतंनिबोधजनेश्वर
१८ घोषाद्वैतवनेसर्वेत्वत्प्रतीक्षानराधिप ॥ घोषयात्रापदेशेनगमिष्यामोनसंशयः १९ उचितंहिसदागंतुंघोषयात्रांविशांपते ॥ एवंचत्वांपिताराजन्समनुज्ञातु
मर्हति २० तथाकथयमानौतुघोषयात्राविनिश्चयम् ॥ गांधारराजःशकुनिःप्रत्युवाचहसन्निव २१ उपायोऽयंमयादृष्टोगमनायानिरामयः ॥ अनुज्ञास्यतिनोराजा
चोदयिष्यतिचाप्युत २२ घोषाद्वैतवनेसर्वेत्वत्प्रतीक्षानराधिप ॥ घोषयात्रापदेशेनगमिष्यामोनसंशयः २३ ततःप्रहसिताःसर्वेतेऽन्योन्यस्यतलान्ददुः ॥
तदेवचविनिश्चित्यददृशुःकुरुसत्तमम् २४ ॥ इतिश्रीम० आ० घोषया० घोषयात्रामंत्रणेअष्टत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥ ॥ वैशंपायनउ
वाच ॥ धृतराष्ट्रंततःसर्वेददृशुर्जनमेजय ॥ पृष्ट्वासुखमथोराज्ञःपृष्टाराज्ञाचभारत १ ततस्तैर्विहितःपूर्वंसमंगोनामवल्लवः ॥ समीपस्थास्तदागावोधृ
तराष्ट्रेन्यवेदयत् २ अनंतरंचराधेयःशकुनिश्चविशांपते ॥ आहतुःपार्थिवश्रेष्ठंधृतराष्ट्रंजनाधिपम् ३ रमणीयेषुदेशेषुघोषाःसंप्रतिकौरव ॥ स्मारणेसमयःप्राप्तो
१८ वत्सानामपिचांकनम् ४ मृगयाचोचिताराजन्नस्मिन्कालेसुतस्यते ॥ दुर्योधनस्यगमनंसमनुज्ञातुमर्हसि ५ ॥ धृतराष्ट्रउवाच ॥ मृगयाशोभनातातगवांहिस
मवेक्षणम् ॥ विश्रंभस्तुनगंतव्योवल्लवानामितिस्मरे ६ तेतुतत्रनरव्याघ्राःसमीपइतिनःश्रुतम् ॥ अतोनाभ्यनुजानामिगमनंतत्रवःस्वयम् ७ छद्मनानि
र्जितास्तेतुकर्शिताश्चमहावने ॥ तपोनित्याश्चराधेयसमर्थाश्चमहारथाः ८

धृतराष्ट्रमिति १ । २ । ३ स्मारणेस्मरणहेतौकर्मणि गवांसंख्यापूर्वकंवयोवर्णजातिनाम्नांलेखने
स्मारणासमयइतिगौडाःपठंति ४ । ५ विश्रंभोविश्वासोनगंतव्योनकर्तव्यः पांडवैर्भेदितास्तेकदाचिद्युष्मास्वत्पुरतोनिन्युश्चेदनिष्टंस्यादितिभावः ६ तदेवाह तेत्विति ७ । ८

तेजोऽग्निरेव ९ । १० । ११ । १२ अशक्यत्वमेवाहउषितोहीति १३ । १४ उद्विग्नवासइति वनवासेनोद्विग्नेषुपांडवेषु विश्रंभात्सत्यव्रताएतेनास्मान्बाधिष्यंतइतिविश्वासाद्योभवतांबालः सदुःखंदुःखदोभविष्यति । पूर्वापकृतेविश्वासोनकर्तव्यइत्यर्थः १५ पक्षांतरमाह अथवेति १६ ।१७ द्वयमपिदूषयतिधर्मज्ञइत्यादिना १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६

धर्मराजोनसंक्रुद्धश्चेद्भीमसेनस्त्वमर्षणः ॥ यज्ञसेनस्यदुहितातेजएवतुकेवलम् ९ यूयंचाप्यपराध्येयुर्दर्पमोहसमन्विताः ॥ ततोविनिर्दहेयुस्तेतपसाहिसमन्वि ताः १० अथवासायुधावीरामन्युनाऽभिपरिप्लुताः ॥ सहिताबद्धनिस्त्रिंशादहेयुःशस्त्रतेजसा ११ अथयूयंबहुत्वात्तानभियातकथंचन ॥ अनार्यंपरमंतत्स्या दशक्यंतच्चवैमतम् १२ उषितोहिमहाबाहुरिंद्रलोकेधनंजयः ॥ दिव्यान्यस्त्राण्यवाप्याथततःप्रत्यागतोवनम् १३ अकृतास्त्रेणपृथिवीजिताबीभत्सुनापुरा ॥ किंपुनःसकृतास्त्रोऽद्यनहन्याद्वोमहारथः १४ अथवामद्वचःश्रुत्वातत्रयत्ताभविष्यथ ॥ उद्विग्नवासोविश्रंभाद्दुःखंतत्रभविष्यति १५ अथवासैनिकाःकेचिदपकुर्यु र्युधिष्ठिरम् ॥ तदबुद्धिकृतंकर्मदोषमुत्पादयेच्चवः १६ तस्माद्गच्छंतुपुरुषाःस्मारणायाप्तकारिणः ॥ नस्वयंतत्रगमनंरोचयेतवभारत १७ ॥ शकुनिरुवाच ॥ धर्मज्ञःपांडवोज्येष्ठःप्रतिज्ञातंचसंसदि ॥ तेनद्वादशवर्षाणिवस्तव्यानीतिभारत १८ अनुवृत्ताश्चतेसर्वेपांडवाधर्मचारिणः ॥ युधिष्ठिरस्तुकौंतेयोननःकोपंक रिष्यति १९ मृगयांचैवनोगंतुमिच्छासंवर्ततेभृशम् ॥ स्मारणंतुचिकीर्षामोनतुपांडवदर्शनम् २० नचानार्यसमाचारःकश्चित्तत्रभविष्यति ॥ नचतत्रगमि ष्यामोयत्रतेषांप्रतिश्रयः २१ ॥ वैशंपायनउवाच ॥ एवमुक्तःशकुनिनाधृतराष्ट्रोजनेश्वरः ॥ दुर्योधनंसहामात्यमनुजज्ञेनकामतः २२ अनुज्ञातस्तुगांधारिः कर्णेनसहितस्तदा ॥ निर्ययौभरतश्रेष्ठोबलेनमहताऽऽवृतः २३ दुःशासनेनचतथासौबलेनचधीमता ॥ संवृतोभ्रातृभिश्चान्यैःस्त्रीभिश्चापिसहस्रशः २४ तंनिर्यां तंमहाबाहुंद्रष्टुंद्वैतवनंसरः ॥ पौराश्चानुययुःसर्वेसहदारावनंचतत् २५ अष्टौरथसहस्राणित्रीणिनागायुतानिच ॥ पत्तयोबहुसाहस्राहयाश्चनवतिःशताः २६ शकटापणवेशाश्चवणिजोबंदिनस्तथा ॥ नराश्चमृगयाशीलाःशतशोऽथसहस्रशः २७ ततःप्रयाणेनृपतेःसुमहानभवत्स्वनः ॥ प्रावृषीवमहावायोरुद्धतस्यविशां पते २८ गव्यूतिमात्रेन्यवसद्राजादुर्योधनस्तदा ॥ प्रयातोवाहनैःसर्वैस्ततोद्वैतवनंसरः २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योध नप्रस्थानेऊनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥ ॥ ७ ॥ वैशंपायनउवाच ॥ अथदुर्योधनोराजातत्रतत्रवनेवसन् ॥ जगामघोषानभितस्त त्रचक्रेनिवेशनम् १ रमणीयेसमाज्ञातेसोदकेसमहीरुहे ॥ देशेसर्वगुणोपेतेचकुरावसथान्नराः २ तथैवतत्समीपस्थान्पृथगावसथान्बहून् ॥ कर्णस्यशकुनेश्चैव भ्रातॄणांचैवसर्वशः ३ ददर्शसतदागावःशतशोऽथसहस्रशः ॥ अंकैर्लक्षैश्चताःसर्वालक्षयामासपार्थिवः ४

शकटाःभारवाहान्यनांसि आपणाःपण्यानि वेशोवेश्याजनाश्रयः २७ । २८ गव्यूतिःक्रोशद्वयं २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेऊनचत्वारिंशदधिकद्विशततमो ऽध्यायः ॥ २३९ ॥ ॥ ७ ॥ अथेति चक्रेकृतवान् १ । २ । ३ अंकैश्चिह्नैःलक्षैःसंख्यानैः । 'लक्षान्पुंसिसंख्यायाम्'इतिमेदिनी ४

जज्ञेज्ञातवान् उपसृतान् दमनार्हान् वत्सतरान्समीपागतान्वा कालयमाससंख्यातवान् ५ त्रिहायनांस्त्रिवर्षान्वृषान् व्याहरत्वविजहार ६ यथोपजोषंयथारुचि ७ । ८ । ९ । १० । ११ । १२ १३ । १४ । १५ साद्यस्केनएकाहसाध्येन १६ । १७ । १८ । १९ । २० । २१ आत्मजैर्जयंतादिभिःसहेतिशेषः २२ । २३ । २४ । २५ विजिहीर्षुर्विहर्तुमिच्छुःउपसर्पततत्समीपंगच्छत

अंकयामासवत्सांश्चजज्ञेचोपसृतांस्त्वपि ॥ बालवत्साश्चयागावःकालयामासताअपि ५ अथसस्मारणंकृत्वालक्षयित्वात्रिहायनान् ॥ वृतोगोपालकैःप्रीतोव्या हरत्कुरुनंदनः ६ सचपौरजनःसर्वःसैनिकाश्चसहस्रशः ॥ यथोपजोषंचिक्रीडुर्वनेतस्मिन्यथाऽमराः ७ ततोगोपाःप्रगातारःकुशलान्नृत्यवादने ॥ धार्तराष्ट्रमुपा तिष्ठन्कन्याश्चैवस्वलंकृताः ८ सस्त्रीगणावृतोराजाप्रहृष्टःप्रददौवसु ॥ तेभ्योयथार्हमन्नानिपानानिविविधानिच ९ ततस्तेसहिताःसर्वेतरक्षून्महिषान्मृगान् ॥ गवयर्क्षवराहांश्चसमंतात्पर्यकालयन् १० सताञ्छरैर्विनिर्भिद्यगजांश्चसुबहून्वने ॥ रमणीयेषुदेशेषुग्राहयामासवैमृगान् ११ गोरसानुपयुंजानउपभोगांश्चभारत ॥ पश्यन्सरमणीयानिवनान्युपवनानिच १२ मत्तभ्रमरजुष्टानिबर्हिणाभिरुतानिच ॥ अगच्छदानुपूर्व्येणपुण्यंद्वैतवनंसरः १३ मत्तभ्रमरसंजुष्टंनीलकंठरवाकुलम् ॥ सप्तच्छदसमाकीर्णंपुन्नागबकुलैर्युतम् १४ ऋद्ध्यापरमयायुक्तोमहेंद्रइववज्रभृत् ॥ यदृच्छयाचतत्रस्थोधर्मपुत्रोयुधिष्ठिरः १५ ईजेराजर्षियज्ञेनसाद्यस्केन विशांपते ॥ दिव्येनविधिनाचैववन्येनकुरुसत्तम १६ कृत्वानिवेशमभितःसरसस्तस्यकौरव ॥ द्रौपद्यासहितोधीमान्धर्मपत्न्यानराधिपः १७ ततोदुर्योधनःप्रे ष्यानादिदेशसहस्रशः ॥ आक्रीडावसथाःक्षिप्रंक्रियंतामितिभारत १८ तेतथेत्येवकौरव्यमुक्त्वावचनकारिणः ॥ चिकीर्षंतस्तदाऽऽक्रीडानजग्मुर्द्वैतवनंसरः १९ प्रविशंतंवनद्वारिगंधर्वाःसमवारयन् ॥ सेनाग्रंधार्तराष्ट्रस्यप्राप्तंद्वैतवनंसरः २० तत्रगंधर्वराजोवैपूर्वमेवविशांपते ॥ कुबेरभवनाद्राजन्नाजगामगणावृतः २१ गणैरप्सरसांचैवत्रिदशानांतथाऽऽत्मजैः ॥ विहारशीलःक्रीडार्थंतेनतत्संवृतंसरः २२ तेनतत्संवृतंदृष्ट्वातेराजपरिचारकाः ॥ प्रतिजग्मुस्ततोराजन्यत्रदुर्योधनो नृपः २३ सतुतेषांवचःश्रुत्वासैनिकान्युद्धदुर्मदान् ॥ प्रेषयामासकौरव्यउत्सारयततानिति २४ तस्यतद्वचनंश्रुत्वाराज्ञःसेनाग्रयायिनः ॥ सरोद्वैतवनंगत्वा गंधर्वानिदमब्रुवन् २५ राजादुर्योधनोनामधृतराष्ट्रसुतोबली ॥ विजिहीर्षुरिहायातितदर्थमुपसर्पत २६ एवमुक्तास्तुगंधर्वाःप्रहसंतोविशांपते ॥ प्रत्यब्रुवंस्तान्पुरु षानिदंहिपरुषंवचः २७ नचेतयतिवोराजामंदबुद्धिःसुयोधनः ॥ योऽस्मानाज्ञापयत्येववैश्यानिवदिवौकसः २८ यूयंमुमूर्षवश्चापिमंदप्रज्ञानसंशयः ॥ येत स्यवचनादेवमस्मान्ब्रूतविचेतसः २९ गच्छध्वंत्वरिताःसर्वेयत्रराजासकौरवः ॥ नचेदद्यैवगच्छध्वंधर्मराजनिवेशनम् ३० एवमुक्तास्तुगंधर्वैराज्ञःसेनाग्रयायिनः ॥ संप्राद्रवन्यतोराजाधृतराष्ट्रसुतोऽभवत् ३१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिगंधर्वदुर्योधनसेनासंवादेचत्वारिंदशाधिकद्विशततमोऽध्यायः ॥ २४०

२६ । २७ । २८ । २९ । ३० । ३१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारभावदीपेचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥

ततस्तेसहिताइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ एकैकस्ययोधाः एकैकंयोधाः पर्य

॥ वैशंपायनउवाच ॥ ततस्तेसहिताःसर्वेदुर्योधनमुपागमन् ॥ अब्रुवंश्चमहाराजयदूचुःकौरवंप्रति १ गंधर्वैर्वारितेसैन्येधार्त्तराष्ट्रःप्रतापवान् ॥ अमर्षपूर्णःसै
न्यानिप्रत्यभाषतभारत २ शासतैनानधर्मज्ञान्ममविप्रियकारिणः ॥ यदिप्रक्रीडतेसर्वैर्देवैःसहशतक्रतुः ३ दुर्योधनवचःश्रुत्वाधार्त्तराष्ट्रामहाबलाः ॥ सर्वएवा
भिसन्नधायोधाश्चापिसहस्रशः ४ ततःप्रमथ्यसर्वांस्तांस्तद्वनंविविशुर्बलात् ॥ सिंहनादेनमहतापूरयंतोदिशोदश ५ ततोपरैरवार्यंतगंधर्वैःकुरुसैनिकाः ॥ ते
वार्यमाणागंधर्वैःसाम्नैववसुधाधिप ६ताननादृत्यगंधर्वास्तद्वनंविविशुर्महत् ॥ यदावाचानतिष्ठंतिधार्त्तराष्ट्राःसराजकाः ७ ततस्तेखेचराःसर्वेचित्रसेनेन्यवेद
यन् ॥ गंधर्वराजस्तान्सर्वानब्रवीत्कौरवान्प्रति ८ अनार्यान्शासतेत्येतांश्चित्रसेनोऽत्यमर्षणः ॥ अनुज्ञाताश्चगंधर्वाश्चित्रसेनेनभारत ९ प्रगृहीतायुधाःसर्वे
धार्त्तराष्ट्रानभिद्रवन् ॥ तान्दृष्ट्वाऽऽपततःशीघ्रान्गंधर्वानुद्यतायुधान् १० प्राद्रवंस्तेदिशःसर्वेधार्त्तराष्ट्रस्यपश्यतः ॥ तान्दृष्ट्वाद्रवतःसर्वान्धार्त्तराष्ट्रान्प
राङ्मुखान् ११ राधेयस्तुतदावीरोनासीत्तत्रपराङ्मुखः ॥ आपतंतींतुसंप्रेक्ष्यगंधर्वाणांमहाचमूम् १२ महताशरवर्षेणराधेयःप्रत्यवारयत् ॥ क्षुरप्रैर्विशिखै
र्भल्लैर्वत्सदंतैस्तथाऽऽयसैः १३ गंधर्वान्शतशोऽभिघ्नँल्लघुत्वात्सूतनंदनः ॥ पातयन्नुत्तमांगानिगंधर्वाणांमहारथः १४ क्षणेनव्यधमत्सर्वांचित्रसेनस्यवाहि
नीम् ॥ तेवध्यमानागंधर्वाःसूतपुत्रेणधीमता १५ भूयएवाभ्यवर्तंतशतशोऽथसहस्रशः ॥ गंधर्वभूतापृथिवीक्षणेनसमपद्यत १६ आपतद्भिर्महावेगैश्चित्रसे
नस्यसैनिकैः ॥ अथदुर्योधनोराजाशकुनिश्चापिसौबलः १७ दुःशासनोविकर्णश्चयेचान्येधृतराष्ट्रजाः ॥ न्यहनंस्ततदासैन्यंरथैर्गरुडनिःस्वनैः १८ भूयश्च
योधयामासुःकृत्वाकर्णमथाग्रतः ॥ महतारथसंघेनरथचारेणचाप्युत १९ वैकर्तनंपरीप्संतोगंधर्वान्समवाकिरन् ॥ ततःसंन्यपतन्सर्वेगंधर्वाःकौरवैःसह २०
तदासुतुमुलंयुद्धमभवल्लोमहर्षणम् ॥ ततस्तेमृदवोऽभूवन्गंधर्वाःशरपीडिताः २१ उच्चुक्रुशुश्चकौरव्यागंधर्वान्प्रेक्ष्यपीडितान् ॥ गंधर्वांस्त्रासितान्दृष्ट्वाचि
त्रसेनोह्यमर्षणः २२ उत्पपातासनात्क्रुद्धोवधेतेषांसमाहितः ॥ ततोमायास्त्रमास्थाययुयुधेचित्रमार्गवित् ॥ तयाऽमुह्यंतकौरव्याश्चित्रसेनस्यमायया २३
एकैकस्यतदायोधाधार्त्तराष्ट्रस्यभारत ॥ पर्यवर्तंतगंधर्वैर्दशभिर्दशभिःसह २४ ततःसंपीड्यमानास्तेबलेनमहतातदा ॥ प्राद्रवंतरणेभीतायेचराजन्जिजी
षवः २५ भज्यमानेष्वनीकेषुधार्त्तराष्ट्रेषुसर्वशः ॥ कर्णोवैकर्तनोराजंस्तस्थौगिरिरिवाचलः २६ दुर्योधनश्चकर्णश्चशकुनिश्चापिसौबलः ॥ गंधर्वा
न्योधयामासुःसमरेभृशविक्षताः २७ सर्वएवतुगंधर्वाःशतशोऽथसहस्रशः ॥ जिघांसमानाःसहिताःकर्णमभ्यद्रवन्रणे २८ असिभिःपट्टिशैःशूलैर्गदा
भिश्चमहाबलाः ॥ सूतपुत्रंजिघांसंतःसमंतात्पर्यवाकिरन् २९

र्वंतपरीतवंतः २४ जिजीषवःअत्रार्षोलोपो व्योर्वलीतिलोपः जिजीविषवः २५ राजन्हेजनमेजय २६ । २७ । २८ । २९

३० वरूथंरथगुप्तिं बंधुरंरथबंधनानि ३१ । ३२ ॥ इत्यार० नी० एकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥ ॥ गंधर्वैरिति १ । २ । ३ । ४ । ५ जीवग्राहंजीवंतमेवगृही

अन्येऽस्ययुगमाच्छिंदन्ध्वजमन्येन्यपातयन् ॥ ईषामन्येहयानन्येसूतमन्येन्यपातयन् ३० अन्येच्छत्रंवरूथंचबंधुरंचतथाऽपरे ॥ गंधर्वाबहुसाहस्रास्ति
लशोव्यधमन्रथम् ३१ ततोरथादवप्लुत्यसूतपुत्रोऽसिचर्मभृत् ॥ विकर्णरथमास्थायमोक्षायाश्वानचोदयत् ३२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघो
षयात्राप०कर्णपराभवेएकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥ ॥ ४ ॥ ॥ वैशंपायनउवाच ॥ गंधर्वैस्तुमहाराजभग्नेकर्णेमहारथे ॥ संप्राद्रव
च्चमूःसर्वाधार्त्तराष्ट्रस्यपश्यतः १ तान्दृष्ट्वाद्रवतःसर्वान्धार्त्तराष्ट्रान्पराङ्मुखान् ॥ दुर्योधनोमहाराजोनासीत्तत्रपराङ्मुखः २ तामापतंतींसंप्रेक्ष्यगंधर्वाणांमहा
चमूम् ॥ महताशरवर्षेणसोऽभ्यवर्षदरिंदमः ३ अचिंत्यशरवर्षंतुगंधर्वास्तस्यतंरथम् ॥ दुर्योधनंजिघांसंतःसमंतात्पर्यवारयन् ४ युगमीषांवरूथंचतथैवध्वज
सारथी ॥ अश्वांस्त्रिवेणुंतल्पंचतिलशोव्यधमन्शरैः ५ दुर्योधनंचित्रसेनोविरथंपतितंभुवि ॥ अभिद्रुत्यमहाबाहुर्जीवग्राहमथाग्रहीत् ६ तस्मिन्गृहीतेराजेंद्र
स्थितंदुःशासनंरथे ॥ पर्यगृह्णंतगंधर्वाःपरिवार्यसमंतत ७ विविंशतिंचित्रसेनावादायान्येविदुद्रुवुः ॥ विंदानुविंदावपरेराजदारांश्चसर्वशः ८ सैन्यंतद्धार्तराष्ट्र
स्यगंधर्वैःसमभिद्रुतं ॥ पूर्वंप्रभग्नाःसहिताःपांडवानभ्ययुस्तदा ९ शकटापणवेशाश्चयानयुग्यंचसर्वशः ॥ शरणंपांडवान्जग्मुर्ह्रियमाणेमहीपतौ १० ॥ सैनि
काऊचुः ॥ प्रियदर्शीमहाबाहोधार्त्तराष्ट्रोमहाबलः ॥ गंधर्वैर्ह्रियतेराजापार्थास्तमनुधावत ११ दुःशासनोदुर्विषहोदुर्मुखोदुर्जयस्तथा ॥ बध्वाह्रियंतेगंधर्वैराज
दाराश्चसर्वशः १२ इतिदुर्योधनामात्याःक्रोशंतोराजगृद्धिनः ॥ आर्तादीनास्ततःसर्वेयुधिष्ठिरमुपागमन् १३ तांस्तथाव्यथितान्दीनानभिक्षमाणान्युधि
ष्ठिरम् ॥ वृद्धान्दुर्योधनामात्यान्भीमसेनोऽभ्यभाषत १४ महताहिप्रयत्नेनसंनह्यगजवाजिभिः ॥ अस्माभिर्यदनुष्ठेयंगंधर्वैस्तदनुष्ठितम् १५ अन्यथावर्त
मानानामर्थोजातोऽयमन्यथा ॥ दुर्मंत्रितमिदंतावद्राज्ञोदुर्द्यूतदेविनः १६ द्वेष्टारमन्येक्लीबस्यपातयंतीतिनःश्रुतम् ॥ इदंकृतंनःप्रत्यक्षंगंधर्वैरतिमानुषम् १७
दिष्ट्यालोकेपुमानस्तिकश्चिदस्मत्प्रियेस्थितः ॥ येनास्माकंहृतोभारआसीनानांसुखावहः १८ शीतवातातपसहांस्तपसाचैवकर्शितान् ॥ समस्थोविषम
स्थान्हिद्रष्टुमिच्छतिदुर्मतिः १९ अधर्मचारिणस्तस्यकौरव्यस्यदुरात्मनः ॥ येशीलमनुवर्ततितेपश्यंतिपराभवम् २० अधर्मोहिकृतस्तेनयेनैतदुपशिक्षि
तम् ॥ अनृशंसास्तुकौंतेयास्तत्प्रत्यक्षंब्रवीमिवः २१ एवंब्रुवाणंकौंतेयंभीमसेनमपस्वरम् ॥ नकालःपरुषस्यायमितिराजाऽभ्यभाषत २२ ॥ इतिश्री
महाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योधनादिहरणेद्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥ ॥ ४ ॥ ॥ ४ ॥
॥ युधिष्ठिरउवाच ॥ ॥ अस्मानभिगतांस्तातभयार्तान्छरणैषिणः ॥ कौरवान्विषमप्राप्तान्कथंब्रूयास्त्वमीदृशम् १

त्वेतिणमुलंतंकषादित्वाद्ग्रहीदित्यनुप्रयोगः ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ राज्ञोयुधिष्ठिरस्य १६ क्लीबस्यअशक्तत्वात् १७ । १८ । १९ । २० । २१ अप
स्वरं क्रोधेनविकलवर्णंयथास्यात्तथाब्रुवाणम् २२ ॥ इत्यारण्यकेप० नीलकंठीयेभारतभावदीपे द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥ ॥ ४ ॥ ॥ अस्मानिति १

२ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ अभिधाव याहीति चोदितश्चार्थः त्राणंरक्षकाशरणागतस्यकःभवेत् यश्चार्योमहान्सएवभवेत् शरणागतरक्षणसमर्थोदुर्लभइतिभावः
१२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४३ ॥

भवंतिभेदाज्ञातीनांकलहाश्चवृकोदर ॥ प्रसक्तानिचवैराणिकुलधर्मोननश्यति २ यदातुकश्चिज्ज्ञातीनांबाह्यःप्रार्थयतेकुलम् ॥ नमर्षयंतितत्संतोबाह्येना
भिप्रधर्षणम् ३ जानात्येषहिदुर्बुद्धिरस्मानिहचिरोषितान् ॥ सएवंपरिभूयास्मानकार्षीदिदमप्रियम् ४ दुर्योधनस्यग्रहणाद्गंधर्वेणबलात्प्रभो ॥ स्त्रीणांबाह्या
भिमर्शाच्चहतंभवतिनःकुलम् ५ शरणंचप्रपन्नानांत्राणार्थंचकुलस्यच ॥ उत्तिष्ठध्वंनरव्याघ्राःसज्जीभवतमाचिरम् ६ अर्जुनश्चयमौचैवत्वंचवीरापराजितः ॥
मोक्षयध्वंनरव्याघ्राह्रियमाणंसुयोधनम् ७ एतेरथानरव्याघ्राःसर्वशस्त्रसमन्विताः ॥ धृतराष्ट्रस्यपुत्राणांविमलाःकांचनध्वजाः ८ सस्वनानधिरोहध्वंनित्यसज्जा
निमान्रथान् ॥ इंद्रसेनादिभिःसूतैःकृतशस्त्रैरधिष्ठितान् ९ एतानास्थायवैयत्तागंधर्वान्योद्धुमाहवे ॥ सुयोधनस्यमोक्षायप्रयतध्वमतंद्रिताः १० यएवकश्चि
द्राजन्यःशरणार्थमिहागतम् ॥ परंशक्त्याऽभिरक्षेतकिंपुनस्त्वंवृकोदरम् ११ कइहार्योभवेत्राणमभिधावेतिचोदितः ॥ प्रांजलिंशरणापन्नंदृष्ट्वाशत्रुमपिध्रुवम्
१२ वरप्रदानंराज्यंचपुत्रजन्मचपांडवाः ॥ शत्रोश्चमोक्षणंक्लेशात्त्रीणिचैकंचतत्समम् १३ किंचाप्यधिकमेतस्माद्यदापन्नःसुयोधनः ॥ त्वद्बाहुबलमाश्रित्य
जीवितंपरिमार्गते १४ स्वयमेवप्रधावेयंयदिनस्याद्वृकोदर ॥ विततोमेक्रतुर्वीरनहिमेऽत्रविचारणा १५ साम्नैवतुयथाभीममोक्षयेथाःसुयोधनम् ॥ तथासर्वैरु
पायैस्त्वंयतेथाःकुरुनंदन १६ नसाम्नाप्रतिपद्येतयदिगंधर्वराडसौ ॥ पराक्रमेणमृदुनामोक्षयेथाःसुयोधनम् १७ अथासौमृदुयुद्धेननमुंचेद्भीमकौरवान् ॥ स
र्वोपायैर्विमोच्यास्तेनिगृह्यपरिपंथिनः १८ एतावद्धिमयाशक्यंसंदेष्टुंवैवृकोदर ॥ वैतानेकर्मणितततेवर्तमानेचभारत १९ ॥ वैशंपायनउवाच ॥ अजातशत्रो
र्वचनंतच्छ्रुत्वातुधनंजयः ॥ प्रतिजज्ञेगुरोर्वाक्यंकौरवाणांविमोक्षणम् २० ॥ ॥ अर्जुनउवाच ॥ यदिसाम्नानमोक्ष्यंतिगंधर्वाधृतराष्ट्रजान् ॥ अद्यगंधर्वराज
स्यभूमिःपास्यतिशोणितम् २१ अर्जुनस्यतुतांश्रुत्वाप्रतिज्ञांसत्यवादिनः ॥ कौरवाणांतदाराजन्पुनःप्रत्यागतंमनः २२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणि
घोषयात्रापर्वणिदुर्योधनमोचनानुज्ञायांत्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४३ ॥ ॥ वैशंपायनउवाच ॥ युधिष्ठिरवचःश्रुत्वाभीमसेनपुरोगमाः ॥
प्रहृष्टवदनाःसर्वेसमुत्तस्थुर्नरर्षभाः १ अभेद्यानिततःसर्वेसमनह्यंतभारत ॥ जांबूनदविचित्राणिकवचानिमहारथाः २ आयुधानिचदिव्यानिविविधानिसमाददुः॥
तेदंशितारथैःसर्वैर्ध्वजिनःसशरासनाः ३ पांडवाःप्रत्यदृश्यंतज्वलिताइवपावकाः ॥ तान्रथान्साधुसंपन्नान्संयुक्ताञ्जवनैर्हयैः ४ आस्थायरथशार्दूलाःशीघ्रमे
वययुस्ततः ॥ ततःकौरवसैन्यानांप्रादुरासीन्महास्वनः ५ प्रयातान्सहितान्दृष्ट्वापांडुपुत्रान्महारथान् ॥ जितकाशिनश्चखचरास्त्वरिताश्चमहारथाः ६ ॥२०४॥

युधिष्ठिरेति १ । २ दंशिताःसन्नद्धाः ३ । ४ । ५ । ६

७ । ८ । ९ । १० श्रेयःकल्याणंप्रतिपादयितुंप्रापयितुं ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ खचरान्गगनगमनान् खचरान्गंधर्वान् २० । २१ । २२ इत्यारण्यकेपर्वणि

क्षणेनैववनेतस्मिन्समाजग्मुरभीतवत् ॥ न्यवर्ततततःसर्वेगंधर्वाजितकाशिनः ७ दृष्ट्वारथगतान्वीरान्पांडवांश्चतुरोरणे ॥ तांस्तुविभ्राजितान्दृष्ट्वालोकपाला
निवोद्यतान् ८ व्यूढानीकव्यतिष्ठंतगंधमादनवासिनः ॥ राज्ञस्तुवचनंश्रुत्वाधर्मपुत्रस्यधीमतः ९ क्रमेणमृदुनायुद्धमुपक्रांतंचभारत ॥ नतुगंधर्वराजस्यसैनि
कामंदचेतसः १० शक्यंतेमृदुनाश्रेयःप्रतिपादयितुंतदा ॥ ततस्तान्युधिदुर्धर्षान्सव्यसाचीपरंतपः ११ सांत्वपूर्वमिदंवाक्यमुवाचखचरान्रणे ॥ विसर्जय
तराजानंभ्रातरंमेसुयोधनम् १२ तएवमुक्तागंधर्वाःपांडवेनयशस्विना ॥ उत्स्मयंतस्तदापार्थमिदंवचनमब्रुवन् १३ एकस्यैववयंतातकुर्यामवचनंभुवि ॥
यस्यशासनमाज्ञायचरामोविगतज्वराः १४ तेनैकेनयथाऽऽदिष्टंतथावर्तामभारत ॥ नशास्ताविद्यतेस्माकमन्यस्तस्मात्सुरेश्वरात् १५ एवमुक्तःसगंधर्वैःकुं
तीपुत्रोधनंजयः ॥ गंधर्वान्पुनरेवेदंवचनंप्रत्यभाषत १६ नतद्गंधर्वराजस्ययुक्तंकर्मजुगुप्सितम् ॥ परदाराभिमर्शश्चमानुषैश्चसमागमः १७उत्सृज्यध्वंमहावीर्या
न्धृतराष्ट्रसुतानिमान् ॥ दारांश्चैषांविमुंचध्वंधर्मराजस्यशासनात् १८ यदासाम्ना नमुंचध्वंगंधर्वाधृतराष्ट्रजान् ॥ मोक्षयिष्यामिविक्रम्यस्वयमेवसुयोधनम् ॥
१९ एवमुक्त्वाततःपार्थःसव्यसाचीधनंजयः ॥ ससर्जनिशितान्बाणान्खचरान्खचरान्प्रति २० तथैवशरवर्षेणगंधर्वास्तेबलोत्कटाः ॥ पांडवानभ्यवर्ततपां
डवाश्चदिवौकसः २१ ततःसुतुमुलंयुद्धंगंधर्वाणांतरस्विनाम् ॥ बभूवभीमवेगानांपांडवानांचभारत २२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रा
प॰पांडवगंधर्वयुद्धेचतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥ ॥ ५ ॥ वैशंपायनउवाच ॥ ततोदिव्यास्त्रसंपन्नागंधर्वाहेममालिनः ॥ विसृजंतः
शरान्दीप्तान्समंतात्पर्यवारयन् १ चत्वारःपांडवावीरागंधर्वाश्चसहस्रशः ॥ रणेसंन्यपतन्राजंस्तदद्भुतमिवाभवत् २ यथाकर्णस्यचरथोधार्तराष्ट्रस्यचोभयोः ॥
गंधर्वैःशतशश्छिन्नौतथातेषांप्रचक्रिरे ३ तान्समापततोराजन्गंधर्वाञ्छतशोरणे ॥ प्रत्यगृह्णन्नरव्याघ्राःशरवर्षैरनेकशः ४ तेकीर्यमाणाःखगमाःशरवर्षैःसमं
ततः ॥ नशेकुःपांडुपुत्राणांसमीपेपरिवर्तितुम् ५ अभिक्रुद्धानभिक्रुद्धोगंधर्वानर्जुनस्तदा ॥ लक्षयित्वाऽथदिव्यानिमहास्त्राण्युपचक्रमे ६ सहस्राणांसहस्राणि
प्राहिणोद्यमसादनम् ॥ आग्नेयेनार्जुनःसंख्येगंधर्वाणांबलोत्कटः ७ तथाभीमोमहेष्वासःसंयुगेबलिनांवरः ॥ गंधर्वाञ्शतशोराजन्जघाननिशितैःशरैः ८ मा
६९ द्रीपुत्रावपितथायुध्यमानौबलोत्कटौ ॥ परिगृह्याग्रतोराजञ्जघ्नतुःशतशःपरान् ९ तेवध्यमानागंधर्वादिव्यैरस्त्रैर्महारथैः ॥ उत्पेतुःखमुपादायधृतराष्ट्रसुतांस्त
तः १० सतानुत्पतितान्दृष्ट्वाकुंतीपुत्रोधनंजयः ॥ महताशरजालेनसमंतात्पर्यवारयत् ११ तेबद्धाःशरजालेनशकुंताइवपंजरे ॥ ववर्षुरर्जुनंक्रोधाद्गदाशक्त्यृ
ष्टिवृष्टिभिः १२ गदाशक्त्यृष्टिवृष्टीस्तानिहत्यपरमास्त्रवित् ॥ गात्राणिचाहनद्भल्लैर्गंधर्वाणांधनंजयः १३

नीलकंठीयेभारतभावदीपेचतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥ ततइति १ । २ तथातेषांचचूर्णामपिरथान्छिन्नान्प्रचक्रिरे गंधर्वाः ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३

म.भा.टी. १४ । १५ । १६ । १७ । १८ । १९ गृह्यगृहीत्वा २० । २१ संवृत्याच्छाद्य विद्ययाऽदर्शनशक्त्या २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० ॥ ॥ इत्यारण्यकेपर्वणिनील वन॰
शिरोभिःप्रपतद्भिश्चचरणैर्बाहुभिस्तथा ॥ अश्मवृष्टिरिवाभातिपरेषामभवद्भयम् १४ तेवध्यमानागंधर्वाःपांडवेनमहात्मना ॥ भूमिष्ठमंतरिक्षस्थाःशरवर्षैरवा
॥२०५॥ किरन् १५ तेषांतुशरवर्षाणिसव्यसाचीपरंतपः ॥ अस्त्रैःसंवार्यतेजस्वीगंधर्वान्प्रत्यविध्यत १६ स्थूणाकर्णेंद्रजालंचसौरंचापितथाऽर्जुनः ॥ आग्नेयंचापिसौ अ॰
म्यंचससर्जकुरुनंदनः १७ तेदह्यमानागंधर्वाःकुंतीपुत्रस्यसायकैः ॥ दैतेयाइवशक्रेणविषादमगमन्परम् १८ ऊर्ध्वमाक्रममाणाश्चशरजालेनवारिताः ॥ विस
र्पमाणाभल्लैश्चवार्यंतेसव्यसाचिना १९ गंधर्वांस्त्रासितान्दृष्ट्वाकुंतीपुत्रेणभारत ॥ चित्रसेनोगदांगृह्यसव्यसाचिनमाद्रवत् २० तस्याभिपततस्तूर्णंगदाहस्तस्य ॥२४६॥
संयुगे ॥ गदांसर्वायसींपार्थःशरैश्चिच्छेदसप्तधा २१ सगदांबहुधादृष्ट्वाकृत्तांबाणैस्तरस्विना ॥ संवृत्यविद्ययाऽऽत्मानंयोधयामासपांडवम् २२ अस्त्राणितस्य
दिव्यानिसंप्रयुक्तानिसर्वशः ॥ दिव्यैरस्त्रैस्तदावीरःपर्यवारयदर्जुनः २३ सवार्यमाणस्तैरस्त्रैरर्जुनेनमहात्मना ॥ गंधर्वराजोबलवान्माययांऽतर्हितस्तदा २४
अंतर्हितंतमालक्ष्यप्रहरंतमथार्जुनः ॥ ताडयामासखचरैर्दिव्यास्त्रप्रतिमंत्रितैः २५ अंतर्धानवधंचास्यचक्रेक्रुद्धोऽर्जुनस्तदा ॥ शब्दवेधंसमाश्रित्यबहुरूपोधनं
जयः २६ सवध्यमानस्तैरस्त्रैरर्जुनेनमहात्मना ॥ ततोऽस्यदर्शयामासतदाऽऽत्मानंप्रियःसखा २७ चित्रसेनस्ततोवाचसखायंयुधिविद्धिमाम् ॥ चित्रसेनम
थालक्ष्यसखायंयुधिदुर्बलम् २८ संजहारास्त्रमथतत्प्रसृष्टंपांडवर्षभः ॥ दृष्ट्वातुपांडवाःसर्वेसंहृतास्त्रंधनंजयम् २९ संजह्रुःप्रद्रुतानश्वान्शरवेगान्धनूंषिच ॥
चित्रसेनश्चभीमश्चसव्यसाचीयमावपि ॥ पृष्ट्वाकौशलमन्योन्यंरथेष्वेवावतस्थिरे ३० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिगंधर्वपराभवेपंचच
त्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥ ॥ वैशंपायनउवाच ॥ ततोऽर्जुनश्चित्रसेनंप्रहसन्निदमब्रवीत् ॥ मध्येगंधर्वसैन्यानांमहेष्वासोमहाद्युतिः १ किं
तेव्यवसितंवीरकौरवाणांविनिग्रहे ॥ किमर्थंचसदारोऽयंनिगृहीतःसुयोधनः २ चित्रसेनउवाच ॥ विदितोऽयमभिप्रायस्तत्रस्थेनदुरात्मनः ॥ दुर्योधनस्यपाप
स्यकर्णस्यचधनंजय ३ वनस्थान्भवतोज्ञात्वाक्लिश्यमानाननाथवत् ॥ समस्थोविषमस्थांस्तान्द्रक्ष्यामीत्यनवस्थितान् ४ इमेऽवहसितुंप्राप्ताद्रौपदींचयश
स्विनीम् ॥ ज्ञात्वाचिकीर्षितंचैषामामुवाचसुरेश्वरः ५ गच्छदुर्योधनंबद्ध्वासहामात्यमिहानय ॥ धनंजयश्चतेरक्ष्यःसहभ्रातृभिराहवे ६ सचप्रियःसखातुभ्यं
शिष्यश्चतवपांडव ॥ वचनाद्देवराजस्यततोस्मीहागतोद्रुतम् ७ अयंदुरात्माबद्धश्चगमिष्यामिसुरालयम् ॥ नेष्याम्येनंदुरात्मानंपाकशासनशासनात् ८
॥ अर्जुनउवाच ॥ उत्सृज्यतांचित्रसेनभ्राताऽस्माकंसुयोधनः ॥ धर्मराजस्यसंदेशान्ममचेदिच्छसिप्रियम् ९ पापोऽयंनित्यसंतुष्टोनविमोक्षणमर्हति ॥ प्रल
ब्धावधर्मराजस्यकृष्णायाश्चधनंजय १० कंठीयेभारतभावदीपेपंचचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥ ॥ ततोऽ ॥२०५॥
र्जुनइति १ । २ तत्रस्थेनमयेतिशेषः ३ । ४ । ५ । ६ । ७ । ८ । ९ नित्यंसंतुष्टोमत्तइत्यर्थः संतुष्टत्वाहम्यइति । 'दृष्टोदृप्यतिदृप्तोधर्ममतिक्रामति'इत्यापस्तंबवचनात् । प्रलब्धावंचकः १०

इदंमदुक्तंसमस्थोविषमस्थांस्तान्द्रक्ष्यामीति ११ । १२ । १३ । १४ । १५ इष्टानिवस्त्रालंकारादीन्याज्ञापयध्वंमदर्थेनान्योनेष्यतीति १६ । १७ । १८ । १९ । २० । २१ सुखंसुखेन
नेदंचिकीर्षितंतस्यकुंतीपुत्रोयुधिष्ठिरः ॥ जानातिधर्मराजोहिश्रुत्वाकुरुयथेच्छसि ११ ॥ वैशंपायनउवाच ॥ तेसर्वएवराजानमभिजग्मुर्युधिष्ठिरम् ॥ अभि
गम्यचतत्सर्वंशशंसुस्तस्यचेष्टितम् १२ अजातशत्रुस्तच्छ्रुत्वागंधर्वस्यवचस्तदा ॥ मोक्षयामासतान्सर्वान्गंधर्वान्प्रशशंसच १३ दिष्ट्याभवद्भिर्बलिभिःश
क्तैःसर्वैर्नहिंसितः ॥ दुर्वृत्तोधार्त्तराष्ट्रोऽयंसामात्यज्ञातिबांधवः १४ उपकारोमहांस्तातकृतोऽयंममखेचरैः ॥ कुलंनपरिभूतंमेमोक्षणेऽस्यदुरात्मनः १५ आज्ञा
पयध्वमिष्टानिप्रीयामोदर्शनेनवः ॥ प्राप्यसर्वानभिप्रायांस्ततोव्रजतमाचिरम् १६ अनुज्ञातास्तुगंधर्वाःपांडुपुत्रेणधीमता ॥ सहाप्सरोभिःसंहृष्टाश्चित्रसेनमु
खाययुः १७ देवराडपिगंधर्वान्मृतांस्तान्समजीवयत् ॥ दिव्येनामृतवर्षेणयेहताःकौरवैर्युधि १८ ज्ञातींस्तानवमुच्याथराजदारांश्चसर्वशः ॥ कृत्वाचदुष्करं
कर्मप्रीतियुक्ताश्चपांडवाः १९ सस्त्रीकुमारैःकुरुभिःपूज्यमानामहारथाः ॥ बभ्राजिरेमहात्मानःक्रतुमध्येयथाग्नयः २० ततोदुर्योधनंमुक्तंभ्रातृभिःसहितस्तदा ॥
युधिष्ठिरस्तुप्रणयादिदंवचनमब्रवीत् २१ मास्मतातपुनःकार्षीरीदृशंसाहसंक्वचित् ॥ नहिसाहसकर्तारःसुखमेधंतिभारत २२ स्वस्तिमान्सहितःसर्वैर्भ्रातृभिः
कुरुनंदन ॥ गृहानव्रजयथाकामंवैमनस्यंचमाकृथाः २३ ॥ वैशंपायनउवाच ॥ पांडवेनाभ्यनुज्ञातोराजादुर्योधनस्तदा ॥ अभिवाद्यधर्मपुत्रंगतेंद्रियइवा
तुरः २४ विदीर्यमाणोव्रीडावान्जगामनगरंप्रति ॥ तस्मिन्गतेकौरवेयेकुंतीपुत्रोयुधिष्ठिरः २५ भ्रातृभिःसहितोवीरःपूज्यमानोद्विजातिभिः ॥ तपोधनैश्चतैः
सर्वैर्वृतःशक्रइवामरैः २६ तथाद्वैतवनेतस्मिन्विजहारमुदायुतः २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योधनमोक्षणेषट्चत्वारिंशदधिक
द्विशततमोऽध्यायः ॥ २४६ ॥ ॥ ६ ॥ ॥ जनमेजयउवाच ॥ शत्रुभिर्जितबद्धस्यपांडवैश्चमहात्मभिः ॥ मोक्षितस्ययुधापश्चान्मानिनःसुदुरात्मनः
१ कत्थनस्यावलिप्तस्यगर्वितस्यचनित्यशः ॥ सदाचपौरुषौदार्यैःपांडवानवमन्यतः २ दुर्योधनस्यपापस्यनित्याहंकारवादिनः ॥ प्रवेशोहास्तिनपुरेदुष्करः
प्रतिभातिमे ३ तस्यलज्जान्वितस्यैवशोकव्याकुलचेतसः ॥ प्रवेशंविस्तरेणत्वंवैशंपायनकीर्त्तय ४ ॥ वैशंपायनउवाच ॥ धर्मराजनिसृष्टस्तुधार्त्तराष्ट्रःसुयो
धनः ॥ लज्जयाऽधोमुखःसीदन्नुपासर्पत्सुदुःखितः ५ स्वपुरंप्रययौराजाचतुरंगबलानुगः ॥ शोकोपहतयाबुद्ध्याचिंतयानःपराभवम् ६ विमुच्यपथियानानि
देशेसुयवसोदके ॥ सन्निविष्टःशुभेरम्येभूमिभागेयथेप्सितम् ७ हस्त्यश्वरथपादातंयथास्थानंन्यवेशयत् ॥ अथोपविष्टंराजानंपर्यंकेज्वलनप्रभे ८ उपप्लुतंय
थासोमंराहुणारात्रिसंक्षये ॥ उपागम्याब्रवीत्कर्णोदुर्योधनमिदंतदा ९
एधंतिएधंतेवर्धंते २२ वैमनस्यंवैरंकेनचित्सहमाकृथाःमाकुरु २३ । २४ । २५ । २६ । २७ ॥ इत्यार॰ प॰ नी॰ भा॰ भा॰ षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥ ॥ ६ ॥
शत्रुभिरिति १ कत्थनस्यात्मस्तुतिपरस्य अवलिप्तस्यपापाशयस्य गर्वितस्यात्यभिमानिनः अतएवपांडवानवमन्यतः २ अहंकारंगर्वंवदतीतितथा ३ । ४ । ५ । ६ । ७ । ८ । ९

१० । ११ । १२ । १३ । १४ । १५ । १६ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥ अजानतस्तेइति नाभ्यसूयामिदोषत्वदिवि

दिष्ट्याजीवसिगांधारेदिष्ट्यानःसंगमःपुनः ॥ दिष्ट्यात्वयाजिताश्चैवगंधर्वाःकामरूपिणः १० दिष्ट्यासमग्रान्पश्यामिभ्रातॄंस्तेकुरुनंदन ॥ विजिगीषून्रणेयु
क्तान्निर्जितारीन्महारथान् ११ अहंत्वभिद्रुतःसर्वैर्गंधर्वैःपश्यतस्तव ॥ नाशक्नुवंस्थापयितुंदीर्यमाणांचवाहिनीम् १२ शरक्षतांगश्चभृशंव्यपयातोऽभिपीडितः ॥
इदंत्वत्यद्भुतंमन्येयद्युष्मानिहभारत १३ अरिष्टानक्षतांश्चापिसदारबलवाहनान् ॥ विमुक्तान्संप्रपश्यामियुद्धात्तस्मादमानुषात् १४ नैतस्यकर्तालोकेऽस्मि
न्पुमानविद्यतिभारत ॥ यत्कृतंतेमहाराजसहभ्रातृभिराहवे ॥ १५ ॥ ॥ वैशंपायनउवाच ॥ एवमुक्तस्तुकर्णेनराजादुर्योधनस्तदा ॥ उवाचचांगराजानं
बाष्पगद्गदयागिरा ॥ १६ ॥ ॥ इतिश्री०म०आ०प०घोष०कर्णदुर्योधनसं०सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः २४७ ॥ दुर्योधनउवाच ॥ अजान
तस्तेराधेयनाभ्यसूयाम्यहंवचः ॥ जानासित्वंजितान्शत्रून्गंधर्वांस्तेजसामया १ आयोधितास्तुगंधर्वाःसुचिरंसोदरैर्मम ॥ मयासहमहाबाहोकृतश्चोभयतःक्ष
यः २ मायाधिकास्त्वयुध्यंतयदाशूरावियद्गताः ॥ तदानोनसमंयुद्धमभवत्खेचरैःसह ३ पराजयंचप्राप्ताःस्मोरणेबंधनमेवच ॥ सभृत्यामात्यपुत्राश्चसदार
बलवाहनाः ४ उच्चैराकाशमार्गेणह्रियामस्तैःसुदुःखिताः ॥ अथनःसैनिकाःकेचिदमात्याश्चमहारथाः ५ उपगम्याब्रुवन्दीनाःपांडवांश्शरणप्रदान् ॥ एषदुर्यो
धनोराजाधार्तराष्ट्रःसहानुजः ६ सामात्यदारोह्रियतेगंधर्वैर्दिवमाश्रितैः ॥ तंमोक्षयतभद्रंवःसहदारंनराधिपम् ७ परामर्शोमाऽभविष्यत्कुरुदारेषुसर्वशः ॥ एव
मुक्तेतुधर्मात्माज्येष्ठःपांडुसुतस्तदा ८ प्रसाद्यपांडवान्सर्वानाज्ञापयतमोक्षणे ॥ अथागम्यतमुद्देशंपांडवाःपुरुषर्षभाः ९ सांत्वपूर्वमयाचंतशक्ताःसंतोमहार
थाः ॥ यदाचास्मान्नमुमुचुर्गंधर्वाःसांत्विताअपि १० ततोऽर्जुनश्चभीमश्चयमजौचबलोत्कटौ ॥ मुमुचुःशरवर्षाणिगंधर्वान्प्रत्यनेकशः ११ अथसर्वेरणंमुक्त्वाप्र
याताःखेचरादिवम् ॥ अस्मानेवाभिकर्षंतोदीनान्मुदितमानसाः १२ ततःसमंतात्पश्यामःशरजालेनवेष्टितम् ॥ अमानुषाणिचास्त्राणिप्रमुंचंतंधनंजयम् १३
समावृतादिशोदृष्ट्वापांडवेनाशितैःशरैः ॥ धनंजयसखाऽऽत्मानंदर्शयामासवैतदा १४ चित्रसेनःपांडवेनसमाश्लिष्यपरस्परम् ॥ कुशलंपरिपप्रच्छतैःपृष्टश्चा
प्यनामयम् १५ तेसमेत्यतथाऽन्योन्यंसन्नाहान्विप्रमुच्यच ॥ एकीभूतास्ततोवीरागंधर्वाःसहपांडवैः ॥ अपूजयेतामन्योन्यंचित्रसेनधनंजयौ १६ ॥ इ
तिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योधनवाक्येअष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥ ॥ दुर्योधनउवाच ॥ ॥ चित्र
सेनंसमागम्यप्रहसन्नर्जुनस्तदा ॥ इदंवचनमक्लीबमब्रवीत्परवीरहा १ भ्रातॄनर्हसिमेवीरमोक्तुंगंधर्वसत्तम ॥ अनर्हधर्षणाहीमेजीवमानेषुपांडुषु २ ॥२०६॥

नमन्ये १ । २।३।४।५।६।७।८।९।१०।११।१२।१३।१४। १५ । १६ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥ चित्रसेनमिति १ । २

४ । ५ । ६ । ७ । ८ एवंभूतस्यजीवितंनश्रेयःइतिसंबंधः अभूदभविष्यत् ९ । १० । ११ । १२ । १३ । १४ । १५ श्रेणिमुख्याःशिल्पिसंघातमुख्याःप्रकृतयइत्यर्थः

एवमुक्तस्तुगंधर्वःपांडवेनमहात्मना ॥ उवाचयत्कर्णवयंमंत्रयंतोविनिर्गताः ३ द्रष्टारःस्मसुखाद्धीनान्सदारान्पांडवानिति ॥ तस्मिन्नुच्चार्यमाणेतुगंधर्वेणवच
स्तथा ४ भूमेर्विवरमन्वैच्छंप्रवेष्टुंव्रीडयान्वितः ॥ युधिष्ठिरमथागम्यगंधर्वाःसहपांडवैः ५ अस्मद्दुर्मंत्रितंतस्मैबद्धांश्चास्मान्न्यवेदयन् ॥ स्त्रीसमक्षमहंदीनोब
द्धःशत्रुवशंगतः ६ युधिष्ठिरस्योपहृतःकिंनुदुःखमतःपरम् ॥ येमेनिराकृतानित्यंरिपुर्येषामहंसदा ७ तैर्मोक्षितोऽहंदुर्बुद्धिर्दत्तंतैरेवजीवितम् ॥ प्राप्तःस्यांय
द्यहंवीरवधंतस्मिन्महारणे ८ श्रेयस्तद्भवितामह्यंनैवंभूतस्यजीवितम् ॥ अभूद्यशःपृथिव्यांमेख्यातंगंधर्वतोवधात् ९ प्राप्ताश्चपुण्यलोकाःस्युर्महेंद्रसदनेऽक्षयाः॥
यत्त्वद्यमेव्यवसितंतच्छृणुध्वंनरर्षभाः १० इहप्रायमुपासिष्येयूयंव्रजतवैगृहान् ॥ भ्रातरश्चैवमेसर्वेयांत्वद्यस्वपुरंप्रति ११ कर्णप्रभृतयश्चैवसुहृदोबांधवाश्चये ॥
दुःशासनंपुरस्कृत्यप्रयांत्वद्यपुरंप्रति १२ नह्यहंसंप्रयास्यामिपुरंशत्रुनिराकृतः ॥ शत्रुमानापहोभूत्वासुहृदांमानकृत्तथा १३ ससुहृच्छोकदोजातःशत्रूणांहर्षवर्ध
नः ॥ वारणाह्वयमासाद्यकिंवक्ष्यामिजनाधिपम् १४ भीष्मद्रोणौकृपद्रौणीविदुरःसंजयस्तथा ॥ बाह्लीकःसौमदत्तिश्चयेचान्येवृद्धसंमताः १५ ब्राह्मणाःश्रेणि
मुख्याश्चतथोदासीनवृत्तयः ॥ किंमांवक्ष्यंतिकिंचापिप्रतिवक्ष्यामितानहम् १६ रिपूणांशिरसिस्थित्वातथाविक्रम्यचोरसि ॥ आत्मदोषात्परिभ्रष्टःकथंवक्ष्या
मितानहम् १७ दुर्विनीताःश्रियंप्राप्यविद्यामैश्वर्यमेवच ॥ तिष्ठंतिनचिरंभद्रेयथाऽहंमदगर्वितः १८ अहोनार्हमिदंकर्मकष्टंदुश्चरितंकृतम् ॥ स्वयंदुर्बुद्धिना
मोहाद्येनप्राप्तोऽस्मिसंशयम् १९ तस्मात्प्रायमुपासिष्येनहिशक्ष्यामिजीवितुम् ॥ चेतयानोहिकोजीवेत्कृच्छ्राच्छत्रुभिरुद्धृतः २० शत्रुभिश्चावहसितोमानीपौरुष
वर्जितः ॥ पांडवैर्विक्रमाढ्यैश्चसावमानमवेक्षितः २१ ॥ वैशंपायनउवाच ॥ एवंचिंतापरिगतोदुःशासनमथाब्रवीत् ॥ दुःशासननिबोधेदंवचनंमम
भारत २२ प्रतीच्छत्वंमयादत्तमभिषेकंनृपोभव ॥ प्रशाधिपृथिवींस्फीतांकर्णसौबलपालिताम् २३ भ्रातॄन्पालयविस्रब्धंमरुतोवृत्रहायथा ॥ बांधवाश्चोपजीवं
तुदेवाइवशतक्रतुम् २४ ब्राह्मणेषुसदावृत्तिंकुर्वीथाश्चाप्रमादतः ॥ बंधूनांसुहृदांचैवभवेथास्त्वंगतिःसदा २५ ज्ञातींश्चाप्यनुपश्येथाविष्णुर्देवगणान्यथा ॥ गुर
वःपालनीयास्तेगच्छपालयमेदिनीम् २६ नंदयन्सुहृदःसर्वान्शात्रवांश्चावभर्त्सयन् ॥ कंठेचैनंपरिष्वज्यगम्यतामित्युवाचह २७ तस्यतद्वचनंश्रुत्वादीनोदुःशास
नोऽब्रवीत् ॥ अश्रुकंठःसुदुःखार्तःप्रांजलिःप्रणिपत्यच २८ सगद्गदमिदंवाक्यंभ्रातरंज्येष्ठमात्मनः ॥ प्रसीदेत्यपतद्भूमौदूयमानेनचेतसा २९ दुःखितःपादयोस्त
स्यनेत्रजंजलमुत्सृजन् ॥ उक्तवांश्चनरव्याघ्रोनैतदेवंभविष्यति ३० विदीर्येत्सकलाभूमिर्द्यौश्चापिशकलीभवेत् ॥ रविरात्मप्रभांजह्यात्सोमःशीतांशुतांत्यजेत् ३१

१६ । १७ । १८ । १९ । २० । २१ । २२ । २३ विस्रब्धंसविश्वासंयथास्यात्तथा २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१

३२ । ३३ । ३४ । ३५ । ३६ यदाचेति यदिशोकेनव्यसनंनश्येत्तर्हिसकर्तव्यो नतुतत्तथास्त्यतःशोको नकर्तव्यइत्यर्थः ३७ । ३८ । ३९ । ४० ॥ ४१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारत

वायुःशैघ्र्यमथोजह्याद्धिमवांश्चपरिव्रजेत् ॥ शुष्येत्तोयंसमुद्रेषुवह्निरप्युष्णतांत्यजेत् ३२ नचाहंत्वदृतेराजन्प्रशासेयंवसुंधराम् ॥ पुनःपुनःप्रसीदेतिवाक्यंचेद
मुवाचह ३३ त्वमेवनःकुलेराजाभविष्यसिशतंसमाः ॥ एवमुक्त्वासराजानंसुस्वरंप्ररुरोदह ३४ पादौसंस्पृश्यमानार्होभ्रातुर्ज्येष्ठस्यभारत ॥ तथातौदुःखितौ
दृष्ट्वादुःशासनसुयोधनौ ३५ अभिगम्यव्यथाविष्टःकर्णस्तौप्रत्यभाषत ॥ विषीदथःकिंकौरव्यौबालिश्यात्प्राकृताविव ३६ नशोकःशोचमानस्यविनिवर्तेतक
र्हिचित् ॥ यदाचशोचतःशोकोव्यसनंनापकर्षति ३७ सामर्थ्यंकिंततःशोकेशोचमानौप्रपश्यथः ॥ धृतिंगृह्णीतंमाशत्रूञ्शोचंतौनंदयिष्यथः ३८ कर्तव्यंहि
कृतंराजन्पांडवैस्तवमोक्षणम् ॥ नित्यमेवप्रियंकार्यंराज्ञोविषयवासिभिः ३९ पाल्यमानास्त्वयातेहिनिवसंतिगतज्वराः ॥ नार्हस्येवंगतेमन्युंकर्तुंप्राकृतवत्य
था ४० विषण्णास्तवसोदर्यास्त्वयिप्रायंसमास्थिते ॥ उत्तिष्ठव्रजभद्रंतेसमाश्वासयसोदरान् ४१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्राप०दुर्योधन
प्रायोपवेशेऊनपंचाशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥ ॥ कर्णउवाच ॥ राजन्नाद्यावगच्छामितवेहलघुसत्वताम् ॥ किमत्रचित्रंयद्वीरमोक्षितःपांडवै
रसि १ सद्योवशंसमापन्नःशत्रूणांशत्रुकर्शन ॥ सेनाजीवैश्चकौरव्यतथाविषयवासिभिः २ अज्ञातैर्यदिवाज्ञातैःकर्तव्यंनृपतेःप्रियम् ॥ प्रायःप्रधानाःपुरुषाः
क्षोभयंत्यरिवाहिनीम् ३ निगृह्यंतेचयुद्धेषुमोक्ष्यंतेचैवसैनिकैः ॥ सेनाजीवाश्चयेराज्ञांविषयेसंतिमानवाः ४ तैःसंगम्यनृपार्थाययतितव्यंयथातथम् ॥ यद्येवं
पांडवैराजन्भवद्विषयवासिभिः ५ यदृच्छयामोक्षितोऽसितत्रकापरिदेवना ॥ नचैतत्साधुयद्राजन्पांडवास्त्वांनृपोत्तमम् ६ स्वसेनयासंप्रयांतंनानुयांतिस्म
पृष्ठतः ॥ शूराश्चबलवंतश्चसंयुगेष्वपलायिनः ७ भवतस्तेसहायावैप्रेष्यतांपूर्वमागताः ॥ पांडवेयानिरत्नानित्वमद्याप्युपभुंजसे ८ सत्वस्थान्पांडवान्पश्यन
तेप्रायमुपाविशन् ॥ उत्तिष्ठराजन्भद्रंतेनचिरंकर्तुमर्हसि ९ अवश्यमेवनृपतेराज्ञोविषयवासिभिः ॥ प्रियाण्याचरितव्यानितत्रकापरिदेवना १० मद्वाक्यमेत
द्राजेंद्रयद्येवंनकरिष्यसि ॥ स्थास्यामीहभवत्पादौशुश्रूषन्नरिमर्दन ११ नोत्सहेजीवितुमहंत्वद्विहीनोनरर्षभ ॥ प्रायोपविष्टस्तुनृपराज्ञांहास्योभविष्यसि ॥
१२ वैशंपायनउवाच ॥ एवमुक्तस्तुकर्णेनराजादुर्योधनस्तदा ॥ नैवोत्थातुंमनश्चक्रेस्वर्गायकृतनिश्चयः १३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषया
त्रापर्वणिदुर्योधनप्रायोपवेशेकर्णवाक्येपंचाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥ ॥ ७ ॥ वैशंपायनउवाच ॥ प्रायोपविष्टंराजानंदुर्योधनममर्षणम् ॥
उवाचसांत्वयन्राजन्शकुनिःसौबलस्तदा १ शकुनिरुवाच ॥ सम्यगुक्तंहिकर्णेनतच्छ्रुतंकौरवत्वया ॥ मयाऽऽहृतांश्रियंस्फीतांतांमोहादपहासिकिम् २

भावदीपेऊनपंचाशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥ ॥ ७ ॥ ॥ राजन्निति स्पष्टार्थोऽध्यायः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ ॥ १३ ॥ ॥ इत्या
रण्यकेपर्वणिनीलकंठीयेभारतभावदीपेपंचाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥ ॥ ७ ॥ ॥ प्रायोपविष्टमिति १ । २

३ पात्रंमृत्पात्रं आममपक्वं ४ भीरुमात्मनाशशंकाकुलं । क्लीबंसामर्थ्यहीनं । दीर्घसूत्रंचिरकारिणं । प्रमादिनमनवहितं । व्यसनाद्द्यूतपानमृगयादिरूपात् । विषयैःस्त्र्यादिभिराक्रांतं । त्वं
तुतेषांमध्येप्रमादीविषयक्रांतश्चेतिभावः ५ पार्थैःकृतंशोकमालंब्यमानाशयेतिसंबंधः ६ । ७ आत्मानंशरीरंमात्यज ८ । ९ । १० विकृतंम्लानंभ्रातृसौहृदंभ्रातरिसौहृदंवात्सल्यमस्यास्ती
तितंभ्रातृसौहृदस्तं ११ । १२ निर्वेदंजीवितेवैराग्यं नैराश्यंराज्यलाभेइतिशेषः १३ समन्युःदैन्यवान्धर्मेणधनेनसौख्येनवानममकार्यमितिसंबंधः धर्मधनाभ्यांयत्सौख्यंतेनवा आज्ञायाआज्ञाफ
लेनराज्येनेत्यर्थः १४ माविहन्यतआत्मानंमाघातयत ममसंकल्पंवामानाशयत १५ पूज्याभवद्भिरितिशेषः गुरवोधृतराष्ट्रादयः १६ । १७ सुहृद्भिःकर्णाद्यैः अमात्यैःशकुनिप्रभृतिभिः भ्रातृभि

त्वमल्पबुद्ध्यानृपतेप्राणानुत्स्रष्टुमर्हसि ॥ अथवाऽप्यवगच्छामिनवृद्धाःसेवितास्त्वया ३ यःसमुत्पतितंहर्षंदैन्यंवानानियच्छति ॥ सनश्यतिश्रियंप्राप्यपात्र
मामिवांभसि ४ अतिभीरुमतिक्लीबंदीर्घसूत्रंप्रमादिनम् ॥ व्यसनाद्विषयाक्रांतंनभजंतिनृपंप्रजाः ५ सत्कृतस्यहितेशोकोविपरीतेकथंभवेत् ॥ माकृतंशोभ
नंपार्थैःशोकमालंब्यनाशय ६ यत्रहर्षस्त्वयाकार्यःसत्कर्तव्याश्चपांडवाः ॥ तत्रशोचसिराजेंद्रविपरीतमिदंतव ७ प्रसीदमात्यजात्मानंतुष्टश्चसुकृतंस्मर ॥ प्रय
च्छराज्यंपार्थनांयशोधर्ममवाप्नुहि ८ क्रियामेतांसमाज्ञायकृतज्ञस्त्वंभविष्यसि ॥ सौभ्रात्रंपांडवैःकृत्वासमवस्थाप्यचैवतान् ९ पित्र्यंराज्यंप्रयच्छैषांततःसुख
मवाप्स्यसि ॥ वैशंपायन उवाच ॥ शकुनेस्तुवचःश्रुत्वादुःशासनमवेक्ष्यच १० पादयोःपतितंवीरंविकृतंभ्रातृसौहृदम् ॥ बाहुभ्यांसाधुजाताभ्यांदुःशासनमरिं
दमम् ११ उत्थाप्यसंपरिष्वज्यप्रीत्याऽजिघ्रतमूर्धनि ॥ कर्णसौबलयोश्चापिसंश्रुत्यवचनान्यसौ १२ निर्वेदंपरमंगत्वाराजादुर्योधनस्तदा ॥ व्रीडयाऽभिपरीता
त्मानैराश्यमगमत्परम् १३ तच्छ्रुत्वासुहृदश्चैवसमन्युरिदमब्रवीत् ॥ नधर्मधनसौख्येनैश्वर्येणनचाज्ञया १४ नैवभोगैश्चमेकार्यंमाविहन्यतगच्छत ॥ नि
श्चितेयंममतिःस्थिताप्रायोपवेशने १५ गच्छध्वंनगरंसर्वेपूज्याश्चगुरवोमम ॥ तएवमुक्ताःप्रत्यूचूराजानमरिमर्दनम् १६ यागतिस्तवराजेंद्रसाऽस्माकम
पिभारत ॥ कथंवासंप्रवेक्ष्यामस्त्वद्विहीनाःपुरंवयम् १७ ॥ वैशंपायनउवाच ॥ ससुहृद्भिरमात्यैश्चभ्रातृभिःस्वजनेनच ॥ बहुप्रकारमप्युक्तोनिश्चयान्नविचा
ल्यते १८ दर्भास्तरणमास्तीर्यनिश्चयाद्धृतराष्ट्रजः ॥ संस्पृश्यापःशुचिर्भूत्वाभूतलेसमुपस्थितः १९ कुशचीरांबरधरःपरंनियममास्थितः ॥ वाग्यतोराज
शार्दूलःसस्वर्गगतिकाम्यया २० मनसोऽपचितिंकृत्वानिरस्यचबहिःक्रियाः ॥ अथतंनिश्चयंतस्यबुद्ध्वादैतेयदानवाः २१ पातालवासिनोरौद्राःपूर्वंदेवैर्विनि
र्जिताः ॥ तेस्वपक्षक्षयंतंतुज्ञात्वादुर्योधनस्यवै २२ आह्वानायतदाचक्रुःकर्मवैतानसंभवम् ॥ बृहस्पत्युशनोक्तैश्चमंत्रैर्मंत्रविशारदाः २३ अथर्ववेदप्रोक्तैश्चया
 श्चोपनिषदिक्रियाः ॥ मंत्रजप्यसमायुक्तास्तास्तदासमवर्तयन् २४ जुह्वत्यग्नौहविःक्षीरंमंत्रवत्सुसमाहिताः ॥ ब्राह्मणावेदवेदांगपारगाःसुदृढव्रताः २५

दुःशासनादिभिः स्वजनैःसंबंधिभिः १८ । १९ वाग्यतोमौनी स्वर्गगतिर्मरणंतत्काम्ययातदिच्छया २० मनसाउपसमीपेचितिंदाहार्थंकाष्ठसंचयंकृत्वा संकल्प्य अवश्यंमर्तव्यमितिनि
श्चित्येत्यर्थः बहिःक्रियाःस्नानपानाद्याः २१ । २२ वैतानसंभवमग्निविस्तारसाध्यंनवकुंडयादिविधानंआथर्वणिकं नतुत्रयीरूपं २३ उपनिषदिआरण्यकेप्रोक्ताःक्रियाः 'सर्वप्रविध्यहृदयंप्रवि
ध्यशिरोभिर्द्धंजधमनीःप्रव्रज' इत्यादिमंत्रप्रकाशिताः शत्रुमारणार्थाः एतन्मंत्रजपहोमादिरूपाः समवर्तयन्संप्रावर्तयन् दैतेयदानवाइतिपूर्वेणसंबंधः २४ । २५

कृत्याआज्ञाकरीदेवता २६ । २७ । २८ । २९ । ३० ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेएकपंचाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥ ॥ भोःसुयोधनेति १ । २ कार्यविरु

कर्मसिद्धौतदातत्रजृंभमाणामहाद्भुताः ॥ कृत्यासमुत्थिताराजन्किंकरोमीतिचाब्रवीत् २६ आहुर्दैत्याश्चतांतत्रसुप्रीतेनांतरात्मना ॥ प्रायोपविष्टंराजानंधार्त
राष्ट्रमिहानय २७ तथेतिचप्रतिश्रुत्यसाकृत्याप्रययौतदा ॥ निमेषादगमच्चापियत्रराजासुयोधनः २८ समादायचराजानंप्रविवेशरसातलम् ॥ दानवानांमु
हूर्ताच्चतमानीतंन्यवेदयत् ॥ तमानीतंनृपंदृष्ट्वारात्रौसंगत्यदानवाः २९ प्रहृष्टमनसःसर्वेकिंचिदुत्फुल्ललोचनाः ॥ साभिमानमिदंवाक्यंदुर्योधनमथाब्रुवन् ३०
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योधनप्रायोपवेशेएकपंचाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥ ॥ छ ॥ दानवाऊचुः ॥ भोःसु
योधनराजेंद्रभरतानांकुलोद्वह ॥ शूरैःपरिवृतोनित्यंतथैवचमहात्मभिः १ अकार्षीःसाहसमिदंकस्मात्प्रायोपवेशनम् ॥ आत्मत्यागीह्यधोयातिवाच्यतांचाय
शस्करीम् २ नहिकार्यविरुद्धेषुबहुपापेषुकर्मसु ॥ मूलघातिषुसज्जंतेबुद्धिमंतोभवद्विधाः ३ नियच्छैनांमतिंराजन्धर्मार्थसुखनाशिनीम् ॥ यशःप्रतापवीर्यघ्नीं
शत्रूणांहर्षवर्धनीम् ४ श्रूयतांतुप्रभोतत्त्वंदिव्यतांचात्मनोनृप ॥ निर्माणंचशरीरस्यततोधैर्यमवाप्नुहि ५ पुरात्वंतपसाऽस्माभिर्लब्धोराजन्महेश्वरात् ॥ पूर्वं
कायश्चपूर्वस्तेनिर्मितोवज्रसंचयैः ६ अस्त्रैरभेद्यःशस्त्रैश्चाप्यधःकायश्चतेऽनघ ॥ कृतःपुष्पमयोदेव्यारूपतःस्त्रीमनोहरः ७ एवमीश्वरसंयुक्तस्तवदेहोनृपोत्तम ॥
देव्याचराजशार्दूलदिव्यस्त्वंहिनमानुषः ८ क्षत्रियाश्चमहावीर्याभगदत्तपुरोगमाः ॥ दिव्यास्त्रविदुषःशूराःक्षपयिष्यंतितेरिपून् ९ तदलंतेविषादेनभयंतवनवि
द्यते ॥ सहायार्थंचतेवीराःसंभूताभुविदानवाः १० भीष्मद्रोणकृपादींश्चप्रवेक्ष्यंत्यपरेऽसुराः ॥ यैराविष्टाघृणांत्यक्त्वायोत्स्यंतेतववैरिभिः ११ नैवपुत्रान्नच
भ्रातॄन्नपितॄन्नचबांधवान् ॥ नैवशिष्यान्नचज्ञातीन्नबालान्स्थविरान्नच १२ युधिसंप्रहरिष्यंतोमोक्ष्यंतिकुरुसत्तम ॥ निःस्नेहादानवाविष्टाःसमाक्रांतेंऽतरात्म
नि १३ प्रहरिष्यंतिविवशाःस्नेहमुत्सृज्यदूरतः ॥ हृष्टाःपुरुषशार्दूलाःकलुषीकृतमानसाः ॥ अविज्ञानविमूढाश्चदैवाच्चविधिनिर्मितात् १४ व्याभाषमाणाश्चा
न्योन्यंनमेजीवन्विमोक्ष्यसे ॥ सर्वेशस्त्रास्त्रमोक्षेणपौरुषेसमवस्थिताः १५ श्लाघमानाःकुरुश्रेष्ठकरिष्यंतिजनक्षयम् ॥ तेऽपिपंचमहात्मानःप्रतियोत्स्यंतिपां
डवाः १६ वधंचैषांकरिष्यंतिदैवयुक्तामहाबलाः ॥ दैत्यरक्षोगणाश्चैवसंभूताःक्षत्रयोनिषु १७ योत्स्यंतियुधिविक्रम्यशत्रुभिस्तवपार्थिव ॥ गदाभिर्मुसलैः
शूलैःशस्त्रैरुच्चावचैस्तथा १८ यच्चतेंऽतर्गतंवीरभयमर्जुनसंभवम् ॥ तत्रापिविहितोऽस्माभिर्वधोपायोऽर्जुनस्यवै १९ हतस्यनरकस्यात्माकर्णमूर्तिमुपा
श्रितः ॥ तद्वैरंसंस्मरन्वीरयोत्स्यतेकेशवार्जुनौ २० ॥२०८॥

द्धेषुशत्रुजयविरुद्धेषु पापेषुआत्महत्यादिषु ३ नियच्छत्यजेत्यर्थः ४ । ५ पूर्वकायःनाभेरुपरि ६ । ७ । ८ ।९। १० असुराइतिच्छेदः घृणांकृपां ११।१२ अंतरात्मनिचित्तेसमाक्रांतेदानवैरेव
१३ अविज्ञानंकार्याकार्यविज्ञानाभावस्तेनमूढाः दैवाद्दृष्टात् विधिनिर्मिता त् पूर्वकर्मकृतात् १४ व्याभाषमाणाःविरुद्धमाभाषंतः १५ । १६ । १७ । १८ । १९ । २०

विक्रमेशत्रुजये शौटीरःसमर्थः २१ । २२ । २३ । २४ । २५ तेत्वयाअन्यामरणार्था वैरशांत्यर्थावाबुद्धिर्नकार्या २६ । २७ जयमाप्नुहिचेत्युक्तमितिशेषः अथतैर्विसृष्टमितिसंबंधः २८ । २९
सतेविक्रमशौटीरोरणेपार्थंविजेष्यति ॥ कर्णःप्रहरतांश्रेष्ठःसर्वांश्चारीन्महारथः २१ ज्ञात्वैतच्छद्मनावज्रीरक्षार्थंसव्यसाचिनः ॥ कुंडलेकवचंचैवकर्णस्यापहरि
ष्यति २२ तस्मादस्माभिरप्यत्रदैत्याःशतसहस्रशः ॥ नियुक्ताराक्षसाश्चैवयेतेसंशप्तकाइति २३ प्रख्यातास्तेऽर्जुनंवीरंहनिष्यंतिचमाशुचः ॥ असपत्नात्व
याहीयंभोक्तव्यावसुधानृप २४ माविषादंगमस्तस्मान्नैतत्त्वय्युपपद्यते ॥ विनष्टेत्वयिचास्माकंपक्षोहीयेतकौरव २५ गच्छवीरनतेबुद्धिरन्याकार्याकथंचन ॥
त्वमस्माकंगतिर्नित्यंदेवतानांचपांडवाः २६ ॥ वैशंपायनउवाच ॥ एवमुक्त्वापरिष्वज्यदैत्यास्तंराजकुंजरम् ॥ समाश्वास्यचदुर्धर्षंपुत्रवद्दानवर्षभाः २७ स्थि
रांकृत्वाबुद्धिमस्यप्रियाण्युक्त्वाचभारत ॥ गम्यतामित्यनुज्ञायजयमाप्नुहिचेत्यथ २८ तैर्विसृष्टंमहाबाहुंकृत्यासैवानयत्पुनः ॥ तमेवदेशंयत्रासौतदाप्रायमुपा
विशत् २९ प्रतिनिक्षिप्यतंवीरंकृत्यासमभिपूज्यच ॥ अनुज्ञाताचराज्ञासातत्रैवांतरधीयत ३० गतायामथतस्यांतुराजादुर्योधनस्तदा ॥ स्वप्नभूतमिदंसर्वं
मचिंतयतभारत ३१ विजेष्यामिरणेपांडूनितिचास्याभवन्मतिः ॥ कर्णंसंशप्तकांश्चैवपार्थस्यामित्रघातिनः ३२ अमन्यतवधेयुक्तान्समर्थांश्चसुयोधनः ॥ ए
वमाशादृढातस्यधार्तराष्ट्रस्यदुर्मतेः ३३ विनिर्जयेपांडवानामभवद्भरतर्षभ ॥ कर्णोऽप्याविष्टचित्तात्मानरकस्यांतरात्मना ३४ अर्जुनस्यवधेक्रूरांकरोतिस्म
तदामतिं ॥ संशप्तकाश्चतेवीराराक्षसाविष्टचेतसः ३५ रजस्तमोभ्यामाक्रांताःफाल्गुनस्यवधैषिणः ॥ भीष्मद्रोणकृपाद्याश्चदानवाक्रांतचेतसः ३६ नतथापां
डुपुत्राणांस्नेहवंतोविशांपते ॥ नचाचचक्षेकस्मैचिदेतद्राजासुयोधनः ३७ दुर्योधनंनिशांतेचकर्णोवैकर्तनोऽब्रवीत् ॥ स्मयन्निवांजलिंकृत्वापार्थिवंहेतुमद्वचः
३८ नमृतोजयतेशत्रून्जीवन्भद्राणिपश्यति ॥ मृतस्यभद्राणिकुतःकौरवेयकुतोजयः ३९ नकालोऽद्यविषादस्यभयस्यमरणस्यवा ॥ परिष्वज्याब्रवीच्चैनं
भुजाभ्यांसमहाभुजः ४० उत्तिष्ठराजन्किंशेषेकस्माच्छोचसिशत्रुहन् ॥ शत्रून्प्रताप्यवीर्येणसकथंमृत्युमिच्छसि ४१ अथवातेभयंजातंदृष्ट्वाऽर्जुनपराक्रमम् ॥
सत्यंतेप्रतिजानामिवधिष्यामिरणेऽर्जुनम् ४२ गतेत्रयोदशेवर्षेसत्येनायुधमालभे ॥ आनयिष्याम्यहंपार्थान्वशंतवजनाधिप ४३ एवमुक्तस्तुकर्णेनदैत्यानांवच
नात्तथा ॥ प्रणिपातेनचाप्येषामुदतिष्ठत्सुयोधनः ४४ दैत्यानांतद्वचःश्रुत्वाहृदिकृत्वास्थिरांमतिं ॥ ततोमनुजशार्दूलोयोजयामासवाहिनीं ४५ रथनागाश्व
कलिलांपदातिजनसंकुलां ॥ गंगौघप्रतिमाराजन्साप्रयातामहाचमूः ४६ श्वेतच्छत्रैःपताकाभिश्चामरैश्चसुपांडुरैः ॥ रथैर्नागैःपदातैश्चशुशुभेऽतीवसंकुला ४७

३० । ३१ । ३२ । ३३ अंतरात्मनामनसा ३४ । ३५ । ३६ पांडुपुत्राणामुपरीतिशेषः ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ एषांदुःशासनादीनां ४४ । ४५ । ४६ । पदातैःपदा
तिभिः साचमूर्द्यौरिवशुशुभेइतिद्वयोःसंबंधः ४७ ।

व्यपेतः अभ्रघनःमेघविस्तारोयस्मिन् । 'घनंस्यादित्युपक्रम्यविस्तारेलोहमुद्गरे'इतिमेदिनी । शरदीत्यर्थः अव्यक्ताईषद्व्यक्ताशारदी शरज्जातपुंडरीककाशकुसुमाद्याकारच्छत्रचामरादिरूपा शोभायस्यांसाऽव्यक्तशारदी अधिराजासार्वभौमोयुधिष्ठिरस्तद्वत् ४८ गृह्णन्दक्षप्रसारादिनाऽनुह्णन् अंजलिमालाःनमस्काराजलिपंक्तीः बद्धांजलीनित्यर्थः ४९ देविनाद्यूतरतेन ५० ।५१।५२

व्यपेताभ्रघनेकालेद्यौरिवाव्यक्तशारदी ॥ जयाशीर्भिर्द्विजेंद्रैःसस्तूयमानोऽधिराजवत् ४८ गृह्णन्नंजलिमालाश्चधार्तराष्ट्रोजनाधिपः ॥ सुयोधनोययावग्रेश्रि यापरमयाज्वलन् ४९ कर्णेनसार्धंराजेंद्रसौबलेनचदेविना॥ दुःशासनादयश्चास्यभ्रातरःसर्वएवते ५० भूरिश्रवाःसोमदत्तोमहाराजश्चबाह्लिकः ॥ रथैर्नानाविधा कारैर्हयैर्गजवरैस्तथा ५१ प्रयांतंनृपसिंहंतमनुजग्मुःकुरूद्वहा ॥ कालेनाल्पेनराजेंद्रस्वपुरंविविशुस्तदा ५२ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्राप० दुर्योधनपुरप्रवेशेद्विपंचाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥ ॥ ७ ॥ जनमेजयउवाच ॥ वसमानेषुपार्थेषुवनेतस्मिन्महात्मसु ॥ धार्तराष्ट्रामहेष्वा साःकिमकुर्वतसत्तमाः १ कर्णोवैकर्तनश्चैवशकुनिश्चमहाबलः ॥ भीष्मद्रोणकृपाश्चैवतन्मेशंसितुमर्हसि २ ॥ वैशंपायनउवाच ॥ एवंगतेषुपार्थेषुविसृष्टेचसुयो धने ॥ आगतेहास्तिनपुरंमोक्षितेपाण्डुनंदनैः ३ भीष्मोऽब्रवीन्महाराजधार्तराष्ट्रमिदंवचः ॥ उक्तंतातयथापूर्वंगच्छतस्तेतपोवनं ४ गमनंमेनरुचितंतवतत्रकृ तंचते ॥ ततःप्राप्तंत्वयावीरग्रहणंशत्रुभिर्बलात् ५ मोक्षितश्चासिधर्मज्ञैःपांडवैर्नचलज्जसे ॥ प्रत्यक्षंतवगांधारेससैन्यस्यविशांपते ६ सूतपुत्रोऽपयाद्भीतोगंध र्वाणांतदारणात् ॥ क्रोशतस्तवराजेंद्रससैन्यस्यनृपात्मज ७ दृष्टस्तेविक्रमश्चैवपांडवानांमहात्मनाम् ॥ कर्णस्यचमहाबाहोसूतपुत्रस्यदुर्मतेः ८ नचापिपाद भाक्कर्णःपांडवानांनृपोत्तम ॥ धनुर्वेदेचशौर्येचधर्मेवाधर्मवत्सल ९ तस्मादहंक्षमंमन्येपांडवैस्तैर्महात्मभिः ॥ संधिंसंधिविदांश्रेष्ठकुलस्यास्यविवृद्धये १० एव मुक्तश्चभीष्मेणधार्तराष्ट्रोजनेश्वरः ॥ प्रहस्यसहसाराजन्विप्रतस्थेससौबलः ११ तंतुप्रस्थितमाज्ञायकर्णदुःशासनादयः ॥ अनुजग्मुर्महेष्वासाधार्तराष्ट्रंमहाबलं १२ तांस्तुसंप्रस्थितान्दृष्ट्वाभीष्मःकुरुपितामहः ॥ लज्जयाव्रीडितोराजन्जगामस्वंनिवेशनम् १३ गतेभीष्मेमहाराज धार्तराष्ट्रोजनेश्वरः ॥ पुनरागम्यतंदेशम मंत्रयतमंत्रिभिः १४ किमस्माकंभवेच्छ्रेयःकिंकार्यमवशिष्यते ॥ कथंचसुकृतंतस्य।न्मंत्रयामोऽद्ययद्धितम् १५ ॥ कर्णउवाच ॥ दुर्योधननिबोधेदंयत्त्वांव क्ष्यामिकौरव ॥ भीष्मोऽस्मान्निंदतिसदापांडवांश्चप्रशंसति १६ त्वद्द्वेषाच्चमहाबाहोममापिद्वेष्टुमर्हति ॥ विगर्हतेचमांनित्यंत्वत्समीपेनरेश्वर १७ सोऽहंभीष्म वचस्तद्वैनमृष्यामीहभारत॥त्वत्समक्षंयदुक्तंचभीष्मेणामित्रकर्षण१८पांडवानांयशोराजंस्तवनिंदांचभारत॥ अनुजानीहिमांराजन्सभृत्यबलवाहनम् १९जेष्या मिपृथिवींराजन्सशैलवनकानना॥जिताचपांडवैर्भूमिश्चतुर्भिर्बलशालिभिः २०तामहंतेविजेष्यामिएकएवनसंशयः॥ संपश्यतुसुदुर्बुद्धिर्भीष्मःकुरुकुलाधमः २१

॥ इत्यारण्यकेप० नीलकंठीयेभारतभावदीपे द्विपंचाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥ वसमानेष्विति १ । २ । ३ । ४ तवगमनंनरुचितंनानुमोदितं मेमया तेत्वयाचतत्रकृतं ५ । ६ अपयात् अपायात्पलायितः ७ । ८ । ९ संधिं क्षमंयुक्तंमन्ये १० । ११ । १२ । १३ । १४ । १५ । १६ ममापिमामपि १७ । १८ । १९ । २० । २१

२२ । २३।२४।२५।२६ प्रायात्रिकं प्रयातुंराज्ञोऽपेक्षितंशकटापणवीथ्यादि २७। २८ मंगलैर्मंगलद्रव्यैःसुगंधतैलादिभिः स्नातः शुभैर्नीराजनादिभिः प्रययाविति संबंधः २९ ॥ इत्यारण्यकेप०

अनिंद्यंनिंदतेयोहिअप्रशस्यंप्रशंसति ॥ सपश्यतुबलंमेद्यआत्मानंतुविगर्हतु २२ अनुजानीहिमांराजन्ध्रुवोहिविजयस्तव ॥ प्रतिजानामितेसत्यंराजन्नायुध मालभे २३ तच्छ्रुत्वातुवचोराजन्कर्णस्यभरतर्षभ ॥ प्रीत्यापरमयायुक्तःकर्णमाहनराधिपः २४ धन्योऽस्म्यनुगृहीतोऽस्मियस्यमेत्वंमहाबलः ॥ हितेषुवर्तसेनि त्यंसफलंजन्मचाद्यमे २५ यदाचमन्यसेवीरसर्वशत्रुनिबर्हणम् ॥ तदानिर्गच्छभद्रंतेह्यनुशाधिचमामिति २६ एवमुक्तस्तदाकर्णोधार्तराष्ट्रेणधीमता ॥ सर्वमा ज्ञापयामासप्रायात्रिकमरिंदम २७ प्रययौचमहेष्वासोनक्षत्रेशुभदैवते ॥ शुभेतिथौमुहूर्तेचपूज्यमानोद्विजातिभिः २८ मंगलैश्चशुभैःस्नातोवाग्भिश्चापिप्रपूजि तः ॥ नादयन्रथघोषेणत्रैलोक्यंसचराचरम् २९ ॥ इतिश्रीम० आरण्यकेप० घोषयात्रापर्वणिकर्णदिग्विजयेत्रिपंचाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥ ॥ वैशंपायनउवाच ॥ ततःकर्णोमहेष्वासोबलेनमहतावृतः ॥ द्रुपदस्यपुरंरम्यंरुरोधभरतर्षभ १ युद्धेनमहताचैनंचक्रेवीरंवशानुगम् ॥ सुवर्णंरजतंचापिर त्नानिविविधानिच २ करंचदापयामासद्रुपदंनृपसत्तम ॥ तंविनिर्जित्यराजेंद्रराजानस्तस्ययेऽनुगाः ३ तान्सर्वान्वशगांश्चक्रेकरंचैनानदापयत् ॥ अथोत्तरां दिशंगत्वावशेचक्रेनराधिपान् ४ भगदत्तंचनिर्जित्यराधेयोगिरिमारुहत् ॥ हिमवंतंमहाशैलंयुध्यमानश्चशत्रुभिः ५ प्रययौचदिशःसर्वान्नृपतीन्वशमानयत् ॥ सहैमवतिकान्जित्वाकरंसर्वानदापयत् ६ नेपालविषयेयेचराजानस्तानवाजयत् ॥ अवतीर्यततःशैलात्पूर्वांदिशमभिद्रुतः ७ अंगान्वंगान्कलिंगांश्चशुंडिका न्मिथिलानथ ॥ मागधान्कर्कखंडांश्चनिवेश्यविषयेऽत्मनः ८ आवशीरांश्चयोध्यांश्चअहिक्षत्रंचनिर्जयत् ॥ पूर्वांदिशंविनिर्जित्यवत्सभूमिंतथाऽगमत् ९ वत्स भूमिंविनिर्जित्यकेवलांमृत्तिकावतीम् ॥ मोहनंपत्तनंचैवत्रिपुरींकोसलांतथा १० एतान्सर्वान्विनिर्जित्यकरमादायसर्वशः ॥ दक्षिणांदिशमास्थायकर्णोजित्वाम हारथान् ११ रुक्मिणंदाक्षिणात्येषुयोधयामाससूतजः ॥ सयुद्धंतुमुलंकृत्वारुक्मीप्रोवाचसूतजम् १२ प्रीतोऽस्मितवराजेंद्रविक्रमेणबलेनच ॥ नतेविघ्नंकरि ष्यामिप्रतिज्ञांसमपालयम् १३ प्रीत्याचाहंप्रयच्छामिहिरण्यंयावदिच्छसि ॥ समेत्यरुक्मिणाकर्णःपांड्यंशैलंचसोऽगमत् १४ सकेरलंरणेचैवनीलंचापिमहीप तिम् ॥ वेणुदारिसुतंचैवयेचान्येनृपसत्तमाः १५ दक्षिणस्यांदिशिनृपान्करान्सर्वानदापयत् ॥ शैशुपालिंततोगत्वाविजिग्येसूतनंदनः १६ पार्श्वस्थांश्चा पिनृपतीन्वशेचक्रेमहाबलः ॥ आवंत्यांश्चवशेकृत्वासाम्नाचभरतर्षभ ॥ वृष्णिभिःसहसंगम्यपश्चिमामपिनिर्जयत् १७

नी० भारत० त्रिपंचाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥ ततइति १ । २ । ३ । ४ । ५ । ६ । ७ निवेश्य विषयेऽत्मनःआत्मनोगोचरेकरदेत्यर्थः आकारपूर्वरूपंलोपोवाआर्षः ८ नि र्जयजितवान्अडभावआर्षः ९ । १० । ११ । १२ प्रतिज्ञांक्षत्रधर्मसमपालयंपालितवानस्मि क्षत्रधर्मोविक्षयैवत्वयासहयुद्धंकृतं नत्वाजिगीषयेतिभावः १३ शैलंश्रीशैलम् १४ । १५ । १६ । १७

१८ । १९ । २० । २१ । २२ । २३ तत्कर्मकर्णविजयंपुरेउद्घोषयामास २४ । २५ । २६ अभ्युदितेभ्योऽभ्युदिताःश्रेष्ठतमाः २७ । २८ हलहलाशब्दंहाहाकारं कर्णनिंदांचपांडवपक्षपा

वारुणींदिशमागम्ययवनान्बर्बरांस्तथा ॥ नृपान्पश्चिमभूमिस्थान्दापयामासवैकरान् १८ विजित्यपृथिवींसर्वांसपूर्वापरदक्षिणाम् ॥ सम्लेच्छाटविकान्वीरःसपर्वतनिवासिनः १९ भद्रान्रोहितकांश्चैवआग्रेयान्मालवानपि ॥ गणान्सर्वान्विनिर्जित्यनीतिकृत्प्रहसन्निव २० शशकान्यवनांश्चैवविजिग्येसूतनंदनः ॥ नग्नजित्प्रमुखांश्चैवगणान्जित्वामहारथान् २१ एवंसपृथिवींसर्वांवशेकृत्वामहारथः ॥ विजित्यपुरुषव्याघ्रोनागसाह्वयमागमत् २२ तमागतंमहेष्वासंधार्तराष्ट्रोजनाधिपः ॥ प्रत्युद्गम्यमहाराजसभ्रातृपितृबांधवः २३ अर्चयामासविधिनाकर्णमाहवशोभिनम् ॥ आश्रावयच्चतत्कर्मप्रीयमाणोजनेश्वरः २४ यन्नभीष्मान्नचद्रोणान्नकृपान्नचबाह्लिकात् ॥ प्राप्तवानस्मिभद्रंतेत्वत्तःप्राप्तंमयाहितत् २५ बहुनाचकिमुक्तेनशृणुकर्णवचोमम ॥ सनाथोऽस्मिमहाबाहोत्वयानाथेनसत्तम २६ नहितेपांडवाःसर्वेकलामर्हंतिषोडशीम् ॥ अन्येवापुरुषव्याघ्रराजानोऽभ्युदितोदिताः २७ सभवान्धृतराष्ट्रंतंगांधारींचयशस्विनीम् ॥ पश्यकर्णमहेष्वासअदितिंवज्रभृद्यथा २८ ततोहलहलाशब्दःप्रादुरासीद्विशांपते ॥ हाहाकाराश्चबहवोनगरेनागसाह्वये २९ केचिदेनंप्रशंसंतिनिंदंतिस्मतथाऽपरे ॥ तूष्णीमासंस्तथाचान्येनृपास्तत्रजनाधिप ३० एवंविजित्यराजेंद्रकर्णःशस्त्रभृतांवरः ॥ सपर्वतवनाकाशांससमुद्रांसनिष्कुटाम् ३१ देशैरुच्चावचैःपूर्णांपत्तनैर्नगरैरपि ॥ द्वीपैश्चानूपसंपूर्णैःपृथिवींपृथिवीपते ३२ कालेननातिदीर्घेणवशेकृत्वातुपार्थिवान् ॥ अक्षयंधनमादायसूतजोनृपमभ्ययात् ३३ प्रविश्यचगृहंराजन्नभ्यंतरमरिंदम ॥ गांधारीसहितंवीरोधृतराष्ट्रंददर्शसः ३४ पुत्रवच्चनरव्याघ्रपादौजग्राहधर्मवित् ॥ धृतराष्ट्रेणचाश्लिष्यप्रेम्णाचापिविसर्जितः ३५ तदाप्रभृतिराजाचशकुनिश्चापिसौबलः ॥ जानतेनिर्जितान्पार्थान्कर्णेनयुधिभारत ३६ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिकर्णदिग्विजयेचतुष्पंचाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ जित्वातुपृथिवींराजन्सूतपुत्रोजनाधिप ॥ अब्रवीत्परवीरघ्नोदुर्योधनमिदंवचः १ ॥ ॥ कर्णउवाच ॥ ॥ दुर्योधननिबोधेदंयत्त्वांवक्ष्यामिकौरव ॥ श्रुत्वावाचंतथासर्वंकर्तुमर्हस्यरिंदम २ तवाद्यपृथिवीवीरनिःसपत्नानृपोत्तम ॥ तांपालययथाशक्रोहतशत्रुर्महामनाः ३ ॥ ॥ वैशंपायनउवाच ॥ ॥ एवमुक्तस्तुकर्णेनकर्णंराजाऽब्रवीत्पुनः ॥ नकिंचिद्दुर्लभंतस्ययस्यत्वंपुरुषर्षभ ४ सहायश्चानुरक्तश्चमदर्थंचसमुद्यतः ॥ अभिप्रायस्तुमेकश्चित्तंवैशृणुयथातथम् ५ राजसूयंपांडवस्यदृष्ट्वाक्रतुवरंमहत् ॥ ममस्पृहासमुत्पन्नातांसंपादयसूतज ६ एवमुक्तस्ततःकर्णोराजानमिदमब्रवीत् ॥ तवाद्यपृथिवीपालावश्याःसर्वेनृपोत्तम ७ ॥२१०॥

तिनश्चकुरित्यर्थः २९ । ३० आकाशःपर्वतवनयोरंतरालं सस्याद्युत्पत्तिभूमिरित्यर्थः ३१ अनूपंसर्वतोजलंतेनसंपूर्णैः ३२ । ३३ । ३४ । ३५ । ३६ ॥ इत्यार० प० नी० भा० भा० चतुष्पंचाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ जित्वेति १ । २ । ३ । ४ । ५ । ६ । ७

८ । ९ । १० । ११ । १२ जीवमानेइत्येकस्मिन्कुलेद्वौराजसूयौनभवतइतिवा तस्मिन्नजितइतिवाभावः १३ सचशत्रुर्नतत्प्रतिबंधःस्माकंकश्चिदस्तिद्यूतेनचजितोऽस्त्येवेत्याशंक्याह दीर्घायुरिति पितर्यकृतराजसूयेजीवतिसतिस्वयंतंनकुर्यादित्यर्थः अंधस्यपितुरनधिकारात्तत्सत्त्वंयद्यप्यधिकारप्रतिबंधकंनभवति किंतुयुधिष्ठिरजयासामर्थ्यमेव तथापियत्कीर्तयितुमशक्यमित्येतदु

आहूयंतांद्विजवराःसंभाराश्चयथाविधि ॥ संभ्रियंतांकुरुश्रेष्ठयज्ञोपकरणानिच ८ ऋत्विजश्चसमाहूतायथोक्तावेदपारगाः ॥ क्रियांकुर्वंतुतेराजन्यथाशास्त्रमरिंदम ९ बह्वन्नपानसंयुक्तःसुसमृद्धगुणान्वितः ॥ प्रवर्ततांमहायज्ञस्तवापिभरतर्षभ १० एवमुक्तस्तुकर्णेनधार्तराष्ट्रोविशांपते ॥ पुरोहितंसमानाय्यवचनंचेदमब्रवीत् ११ राजसूयंक्रतुश्रेष्ठंसमाप्तवरदक्षिणम् ॥ आहरत्वंममकृतेयथान्यायंयथाक्रमम् १२ सएवमुक्तोनृपतिमुवाचद्विजसत्तमः ॥ नसशक्यःक्रतुश्रेष्ठोजीवमानेयुधिष्ठिरे १३ आहर्तुंकौरवश्रेष्ठकुलेतवनृपोत्तम ॥ दीर्घायुर्जीवतिचतेधृतराष्ट्रःपितानृप १४ अतश्चापिविरुद्धस्तेक्रतुरेषनृपोत्तम ॥ अस्तित्वन्यन्महत्सत्रंराजसूयसमंप्रभो १५ तेनत्वंयजराजेंद्रशृणुचेदंवचोमम ॥ यइमेपृथिवीपालाःकरदास्तवपार्थिव १६ तेकरान्संप्रयच्छंतुसुवर्णंचकृताकृतम् ॥ तेनतेक्रियतामद्यलांगलंनृपसत्तम १७ यज्ञवाटस्यतेभूमिःकृष्यतांतेनभारत ॥ तत्रयज्ञोनृपश्रेष्ठप्रभूतान्नःसुसंस्कृतः १८ प्रवर्ततांयथान्यायंसर्वतोह्यनिवारितः ॥ एषतेवैष्णवोनामयज्ञःसत्पुरुषोचितः १९ एतेननेष्टवान्कश्चिदृतेविष्णुंपुरातनम् ॥ राजसूयंक्रतुश्रेष्ठंस्पर्धत्येषमहाक्रतुः २० अस्माकंरोचतेचैवश्रेयश्चतवभारत ॥ निर्विघ्नश्चभवत्येषसफलास्यात्स्पृहातव २१ एवमुक्तस्तुतैर्विप्रैर्धार्तराष्ट्रोमहीपतिः ॥ कर्णंचसौबलंचैवभ्रातॄंश्चैवेदमब्रवीत् २२ रोचतेमेवचःकृत्स्नंब्राह्मणानांनसंशयः ॥ रोचतेयदियुष्माकंतस्मात्प्रब्रूतमाचिरम् २३ एवमुक्तास्तुतेसर्वेतथेत्यूचुर्नराधिपम् ॥ संदिदेशततोराजाव्यापारस्थान्यथाक्रमम् २४ हलस्यकरणेचापिव्यादिष्टाःसर्वशिल्पिनः ॥ यथोक्तंचनृपश्रेष्ठकृतंसर्वंयथाक्रमम् २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योधनयज्ञसमारंभेपंचपंचाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥ ॥ वैशंपायनउवाच ॥ ततस्तुशिल्पिनःसर्वेअमात्यप्रवराश्चये ॥ विदुरश्चमहाप्राज्ञोधार्तराष्ट्रेन्यवेदयत् १ सज्जंक्रतुवरंराजन्कालप्राप्तंचभारत ॥ सौवर्णंचकृतंसर्वंलांगलंचमहाधनम् २ एतच्छ्रुत्वानृपश्रेष्ठोधार्तराष्ट्रोविशांपते ॥ आज्ञापयामासनृपःक्रतुराजप्रवर्तनम् ३ ततःप्रववृतेयज्ञःप्रभूतान्नःसुसंस्कृतः ॥ दीक्षितश्चापिगांधारिर्यथाशास्त्रंयथाक्रमम् ४ प्रहृष्टोधृतराष्ट्रश्चविदुरश्चमहायशाः ॥ भीष्मोद्रोणःकृपःकर्णोगांधारीचयशस्विनी ५ निमंत्रणार्थंदूतांश्चप्रेषयामासशीघ्रगान् ॥ पार्थिवानांचराजेंद्रब्राह्मणानांतथैवच ६ तेप्रयातायथोद्दिष्टाद्दूतास्त्वरितवाहनाः ॥ तत्रकंचित्प्रयातंतुदूतंदुःशासनोऽब्रवीत् ७ गच्छद्वैतवनंशीघ्रंपांडवान्पापपूरुषान् ॥ निमंत्रययथान्यायंविप्रांस्तस्मिन्वनेतदा ८

दाहृतंतथाचवक्ष्यति । 'हतेषुयुधिपार्थेषुराजसूयेतथात्वया । आहृतेऽहंनरश्रेष्ठत्वांसभाजयितापुनः' इति १४ । १५ । १६ कृतंघटितमलंकारादिरूपंअकृतमन्यत् १७ । १८ । १९ । २० । २१ । २२ । २३ व्यापारस्थान्शिल्पिनः २४ । २५ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेपंचपंचाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥ ततइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८

९ । १० । ११ । १२ । १३ । १४ । १५ । १६ धार्तराष्ट्रेषुस्वयंक्रोधेनज्वलत्सु क्रोधहविः क्रोधरूपंमपिस्तेषामत्यंतोद्दीपकंमोक्ष्यतितदाऽहमागंताआगमिष्यामि १७ । १८

सगत्वापांडवान्सर्वानुवाचाभिप्रणम्यच ॥ दुर्योधनोमहाराजयजतेनृपसत्तमः ९ स्ववीर्यार्जितमर्थौघमवाप्यकुरुसत्तमः ॥ तत्रगच्छंतिराजानोब्राह्मणाश्चत
तस्ततः १० अहंतुप्रेषितोराजन्कौरवेणमहात्मना ॥ आमंत्रयतिवोराजाधार्तराष्ट्रोजनेश्वरः ११ मनोभिलषितंराज्ञस्तंक्रतुंद्रष्टुमर्हथ ॥ ततोयुधिष्ठिरोराजा
तच्छ्रुत्वादूतभाषितम् १२ अब्रवीन्नृपशार्दूलोदिष्ट्याराजासुयोधनः ॥ यजतेक्रतुमुख्येनपूर्वेषांकीर्तिवर्धनः १३ वयमप्युपयास्यामोनत्विदानींकथंचन ॥
समयःपरिपाल्योनोयावद्वर्षंत्रयोदशम् १४ श्रुत्वैतद्धर्मराजस्यभीमोवचनमब्रवीत् ॥ तदातुनृपतिर्गंताधर्मराजोयुधिष्ठिरः १५ अस्त्रशस्त्रप्रदीप्तेऽग्नौयदातंपात
यिष्यति ॥ वर्षात्त्रयोदशादूर्ध्वंरणसत्रेनराधिपः १६ यदाक्रोधहविर्मोक्ताधार्तराष्ट्रेषुपांडवः ॥ आगंताऽहंतदाऽस्मीतिवाच्यस्तेससुयोधनः १७ शेषास्तुपांडवा
राजन्नैवोचुःकिंचिदप्रियम् ॥ दूतश्चापियथावृत्तंधार्तराष्ट्रेन्यवेदयत् १८ अथाजग्मुर्नरश्रेष्ठानानाजनपदेश्वराः ॥ ब्राह्मणाश्चमहाभागधार्तराष्ट्रपुरंप्रति १९ तेत्व
र्चितायथाशास्त्रंयथाविधियथाक्रमम् ॥ मुदापरमयायुक्ताःप्रीताश्चापिनरेश्वराः २० धृतराष्ट्रोऽपिराजेंद्रसंवृतःसर्वकौरवैः ॥ हर्षेणमहतायुक्तोविदुरंप्रत्यभाषत
२१ यथासुखीजनःसर्वःक्षत्तःस्यादन्नसंयुतः ॥ तुष्येतुयज्ञसदनेतथाक्षिप्रंविधीयताम् २२ विदुरस्तुतदाज्ञायसर्ववर्णानरिंदम ॥ यथाप्रमाणतोविद्वान्पूजयामास
धर्मवित् २३ भक्ष्यपेयान्नपानेनमाल्यैश्चापिसुगंधिभिः ॥ वासोभिर्विविधैश्चैवयोजयामासहृष्टवत् २४ कृत्वाह्यावसथान्वीरोयथाशास्त्रंयथाक्रमम् ॥ सांत्वयि
त्वाचराजेंद्रोदत्वाचविविधंवसु २५ विसर्जयामासनृपान्ब्राह्मणांश्चसहस्रशः ॥ विसृज्यचनृपान्सर्वान्भ्रातृभिःपरिवारितः २६ विवेशहास्तिनपुरंसहितःकर्णसौ
बलैः २७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिघोषयात्रापर्वणिदुर्योधनयज्ञेषट्पंचाशदधिकद्विशततमोऽध्यायः ॥ २५६ ॥ ॥ ७ ॥ ॥ वैशंपायन
उवाच ॥ प्रविशंतंमहाराजसूतास्तुष्टुवुरच्युतम् ॥ जनाश्चापिमहेष्वासंतुष्टुवूराजसत्तम १ लाजैश्चंदनचूर्णैश्चविकीर्यचजनास्ततः ॥ ऊचुर्दिष्ट्यानृपाविघ्नः स
माप्तोऽयंक्रतुस्तव २ अपरेत्वब्रुवंस्तत्रवातिकास्तंमहीपतिम् ॥ युधिष्ठिरस्ययज्ञेननसमोह्येषतेक्रतुः ३ नैवतस्यक्रतोरेषकलामर्हतिषोडशीम् ॥ एवं
तत्राब्रुवन्केचिद्वातिकास्तंजनेश्वरम् ४ सुहृदस्त्वब्रुवंस्तत्रअतिसर्वानयंक्रतुः ॥ ययातिर्नहुषश्चापिमांधाताभरतस्तथा ५ क्रतुमेनंसमाहृत्यपूताःसर्वेदिवं
गताः ॥ एतावाचःशुभाःशृण्वन्सुहृदांभरतर्षभ ६ प्रविवेशपुरंहृष्टःस्ववेश्मचनराधिपः ॥ अभिवाद्यततःपादौमातापित्रोर्विशांपते ७ भीष्मद्रोणकृपादीनां
विदुरस्यचधीमतः ॥ अभिवादितःकनीयोभिर्भ्रातृभिर्भ्रातृनंदनः ८

१९ । २० । २१ । २२ । २३ । २४ । २५ । २६ कर्णसौबलैःसौबलाद्यैः २७ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे षट्पंचाशदधिकद्विशततमोऽध्यायः ॥ २५६ ॥ ॥ ७ ॥
प्रविशंतमिति १ । २ वातिकावातरोगोपहतचेतसउचितभाषणानभिज्ञाः ३ । ४ । ५ । ६ । ७ । ८

९ । १० समाजयितापूजयिष्यामि ११ । १२ । १३ । १४ । १५ धावयेपरेणेतिशेषः १६ कीलालजंमांसंतद्धिपशीभूतंरुधिरमेव । 'कीलालंरुधिरेतोये' इतिमेदिनी । असुरंसुरारहितंचव्रतंस्त्र

निषसादासनेमुख्येभ्रातृभिःपरिवारितः ॥ तमुत्थायमहाराजंसूतपुत्रोऽब्रवीद्वचः ९ दिष्ट्यातेभरतश्रेष्ठसमाप्तोऽयंमहाक्रतुः ॥ हतेषुयुधिपार्थेषुराजसूयेतथा
त्वया १० आहृतेऽहंनरश्रेष्ठत्वांसभाजयितापुनः ॥ तमब्रवीन्महाराजोधार्तराष्ट्रोमहायशाः ११ सत्यमेतत्त्वयोक्तंहिपांडवेषुदुरात्मसु ॥ निहतेषुनरश्रेष्ठप्राप्ते
चापिमहाक्रतौ १२ राजसूयेपुनर्वीरत्वमेवंवर्धयिष्यसि ॥ एवमुक्त्वामहाराजकर्णमाश्लिष्यभारत १३ राजसूयंक्रतुश्रेष्ठंचिंतयामासकौरवः ॥ सोऽब्रवीत्कौरवां
श्चापिपार्श्वस्थान्नृपसत्तमः १४ कदातुतंक्रतुवरंराजसूयंमहाधनम् ॥ निहत्यपांडवान्सर्वानाहरिष्यामिकौरवाः १५ तमब्रवीत्तदाकर्णःशृणुमेराजकुंजर ॥ पादौ
नधावयेतावद्यावन्ननिहतोऽर्जुनः १६ कीलालजंनखादेयंकरिष्येचासुरव्रतम् ॥ नास्तीतिनैववक्ष्यामियाचितोयेनकेनचित् १७ अथोत्क्रुष्टंमहेष्वासैर्धार्तराष्ट्रै
र्महारथैः ॥ प्रतिज्ञातेफाल्गुनस्यवधेकर्णेनसंयुगे १८ विजितांश्चाप्यमन्यंतपांडवान्धृतराष्ट्रजाः ॥ दुर्योधनोऽपिराजेंद्रविसृज्यनरपुंगवान् १९ प्रविवेशगृहं
श्रीमान्यथाचैत्ररथंप्रभुः ॥ तेऽपिसर्वेमहेष्वासाजग्मुर्वेश्मानिभारत २० पांडवाश्चमहेष्वासादूतवाक्यप्रचोदिताः ॥ चिंतयंतस्तमेवार्थंनालभंतसुखंक्वचित् २१
भूयश्चचारैराजेंद्रप्रवृत्तिरुपपादिता ॥ प्रतिज्ञासूतपुत्रस्यविजयस्यवधंप्रति २२ एतच्छ्रुत्वाधर्मसुतःसमुद्विग्नोनराधिप ॥ अभेद्यकवचंमत्वाकर्णमद्भुतविक्रमम्
२३ अनुस्मरंश्चसंक्लेशान्नशांतिमुपयातिसः ॥ तस्यचिंतापरीतस्यबुद्धिर्जज्ञेमहात्मनः २४ बहुव्यालमृगाकीर्णंत्यक्तुंद्वैतवनंवनम् ॥ धार्तराष्ट्रोऽपिनृपतिः
प्रशशासवसुंधराम् २५ भ्रातृभिःसहितोवीरैर्भीष्मद्रोणकृपैस्तथा ॥ संगम्यसूतपुत्रेणकर्णेनाहवशोभिना २६ दुर्योधनःप्रियेनित्यंवर्तमानोमहीभृताम् ॥ पूज
यामासविप्रेंद्रान्क्रतुभिर्भूरिदक्षिणैः २७ भ्रातृणांचप्रियंराजन्सचकारपरंतपः ॥ निश्चित्यमनसावीरोदत्तभुक्तफलंधनम् २८ ॥ इतिश्रीमहाभारतेआरण्यकेप०
घोषयात्रापर्वणियुधिष्ठिरचिंतायांसप्तपंचाशदधिकद्विशततमोऽध्यायः ॥ २५७ ॥ ॥ समाप्तंचघोषयात्रापर्व ॥ अथमृगस्वप्नोद्भवपर्व ॥ जनमेजयउवाच ॥
दुर्योधनंमोक्षयित्वापांडुपुत्रामहाबलाः ॥ किमकार्षुर्वनेतस्मिंस्तन्ममाख्यातुमर्हसि १ ॥ ॥ वैशंपायनउवाच ॥ ततःशयानंकौंतेयंरात्रौद्वैतवनेमृगाः ॥
स्वप्नांतेदर्शयामासुर्बाष्पकंठायुधिष्ठिरम् २ तानब्रवीत्सराजेंद्रोवेपमानान्कृतांजलीन् ॥ ब्रूतयद्वक्तुकामाःस्थकेभवंतःकिमिष्यते ३ एवमुक्ताःपांडवेनकौंते
येनयशस्विना ॥ प्रत्यब्रुवन्मृगास्तत्रहतशेषायुधिष्ठिरम् ४ वयंमृगाद्वैतवनेहतशिष्टास्तुभारत ॥ नोत्सीदेममहाराजक्रियतांवासपर्ययः ५ भवंतोभ्रा
तरःशूराःसर्वएवास्त्रकोविदाः ॥ कुलान्यल्पावशिष्टानिकृतवंतोवनौकसाम् ६

नियमंकरिष्येमद्यंमांसंचत्यक्ष्येइत्यर्थः १७ उत्क्रुष्टमुच्चैःशब्दःकृतः १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभा
वदीपेसप्तपंचाशदधिकद्विशततमोऽध्यायः ॥ २५७ ॥ ॥ ७ ॥ ॥ दुर्योधनमिति १ । २ । ३ । ४ वासस्यपर्ययोवैपरीत्यं नात्रवस्तव्यमित्यर्थः ५ । ६

७ । ८ । ९ । १० । ११ एकंवर्षवत्सरं उपयुंक्ष्महेभक्षयामः १२। १३ । १४ ।१५ । १६। १७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेअष्टपंचाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥
वनेइति १ ध्यांतःध्यायंतः २ । ३ तस्कालेतस्मिन्कालेद्यूतोद्भवस्यद्यूतहेतोःशकुन्यादेः ४ । ५ । ६ । ७ । ८ अवलोककोऽवलोकितुकामः ९ । १० । ११ । १२ । १३ अनंतंसुखंनप्राप्नोतिक

बीजभूतावयंकेचिदवशिष्टामहामते ॥ विवर्धेमहिराजेंद्रप्रसादात्तेयुधिष्ठिर ७ तान्वेपमानान्वित्रस्तान्बीजमात्रावशेषितान् ॥ मृगान्दृष्ट्वासुदुःखार्तोधर्मराजो
युधिष्ठिरः ८ तांस्तथेत्यब्रवीद्राजासर्वभूतहितेरतः ॥ यथाभवंतोब्रुवतेकरिष्यामिचतत्तथा ९ इत्येवंप्रतिबुद्धःसरात्र्यंतेराजसत्तमः ॥ अब्रवीत्सहितान्भ्रातॄनद
यापन्नोमृगान्प्रति १० उक्तोरात्रौमृगैरस्मिस्स्वप्नांतेहतशेषितैः ॥ तंतुभूताःस्मभद्रंतेदयानःक्रियतामिति ११ तेसत्यमाहुःकर्तव्यादयाऽस्माभिर्वनौकसाम् ॥
साष्टमासंहिनोवर्षंयदेनानुपयुंक्ष्महे १२ पुनर्बहुमृगंरम्यंकाम्यकंकाननोत्तमम् ॥ मरुभूमेःशिरस्थानंतृणबिंदुसरःप्रति १३ तत्रेमांवसतिंशिष्टांविहरंतोरमेमहि ॥
ततस्तेपांडवाःशीघ्रंप्रययुर्धर्मकोविदाः १४ ब्राह्मणैःसहिताराजन्येचतत्रसहोषिताः ॥ इंद्रसेनादिभिश्चैवप्रेष्यैरनुगतास्तदा १५ तेयात्वानुसृतैर्मार्गैःस्वन्नैः
शुचिजलान्वितैः ॥ ददृशुःकाम्यकंपुण्यमाश्रमंतपसायुतम् १६ विविशुस्तेस्मकौरव्याद्वृताविप्रर्षभैस्तदा ॥ तद्वनंभरतश्रेष्ठाःस्वर्गंसुकृतिनोयथा १७ ॥ इति
श्रीम० आरण्यकेपर्वणिमृगस्वप्नोद्भवपर्वणिकाम्यकप्रवेशेअष्टपंचाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥ ॥ ७ ॥ समाप्तंचमृगस्वप्नोद्भवपर्व ॥ अथव्रीहि
द्रौणिकपर्व ॥ ॥ वैशंपायनउवाच ॥ वनेनिवसतांतेषांपांडवानांमहात्मनाम् ॥ वर्षाण्येकादशातीयुःकृच्छ्रेणभरतर्षभ १ फलमूलाशनास्तेहिसुखार्हादुःखमु
त्तमम् ॥ प्राप्तकालमनुध्यांतःसेहिरेवरपूरुषाः २ युधिष्ठिरस्तुराजर्षिरात्मकर्मापराधजम् ॥ चिंतयन्समहाबाहुर्भ्रातॄणांदुःखमुत्तमम् ३ नसुष्वापसुखंराजाहृ
दिशल्यैरिवार्पितैः ॥ दौरात्म्यमनुपश्यंस्तत्कालेद्यूतोद्भवस्यहि ४ संस्मरन्परुषावाचःसूतपुत्रस्यपांडवः ॥ निःश्वासपरमोदीनोबिभ्रत्कोपविषंमहत् ५ अर्जु
नोयमजौचोभौद्रौपदीचयशस्विनी ॥ सचभीमोमहातेजाःसर्वेषामुत्तमोबली ६ युधिष्ठिरमुदीक्षंतःसेहुर्दुःखमनुत्तमम् ॥ अवशिष्टमल्पकालंमन्वानाःपुरुषर्षभाः
७ वपुरन्यदिवाकार्षुरुत्साहामर्षचेष्टितैः ॥ कस्यचित्त्वथकालस्यव्यासःसत्यवतीसुतः ८ आजगाममहायोगीपांडवानवलोककः ॥ तमागतमभिप्रेक्ष्यकुंतीपुत्रो
युधिष्ठिरः ९ प्रत्युद्गम्यमहात्मानंप्रत्यगृह्णाद्यथाविधि ॥ तमासीनमुपासीनःशुश्रूषुर्नियतेंद्रियः १० तोषयन्प्रणिपातेनव्यासंपांडवनंदनः ॥ तानवेक्ष्यकृशा
न्पौत्रान्वनेवन्येनजीवतः ११ महर्षिरनुकंपार्थमब्रवीद्बाष्पगद्गदम् ॥ युधिष्ठिरमहाबाहोशृणुधर्मभृतांवर १२ नातप्ततपसोलोकेप्राप्नुवंतिमहासुखम् ॥ सुखदुः
खेहिपुरुषःपर्यायेणोपसेवते १३ नह्यनंतंसुखंकश्चित्प्राप्नोतिपुरुषर्षभ ॥ प्रज्ञावांस्त्वेवपुरुषःसंयुक्तःपरयाधिया १४ उदयास्तमनज्ञोहिनहृष्यतिनशोचति ॥
सुखमापतितंसेवेद्दुःखमापतितंवहेत् १५ श्चित्पृथग्जनः कस्तर्हितत्प्राप्नोतीत्याह प्रज्ञावानिति परया।धियाब्रह्मविद्यया १४ उदयास्तमनंजगतउत्पत्तिस्थितिलयकारणं ब्रह्म
तज्ज्ञोनशोचति नकांक्षति मिथ्याभूतेजगति प्रियस्यसुखस्याभावात्तद्वियोगजःशोकोत्रा तदिच्छावा तस्यनजायतइत्यर्थः । प्रारब्धकर्मोपस्थापितंसुखदुःखाद्यपरिहार्यमित्याह सुखमिति १५

तपसाज्ञानेन महद्ब्रह्म १६ । १७ ।१८ । १९। २० कालेदानकाले २१ अनायासंक्लेशपरिहारं निर्वृत्तिंसुखं परांमोक्षाख्यां २१ दांतोजितेंद्रियः दांतस्वप्रतिपत्तियोग्यतामापादितआत्मामनो
यस्य जितचित्तइत्यर्थः२३ संविभक्ता अन्नादेर्विभागकर्ता दाताधनादेः २४ इंद्रियजयफलमाह मान्येति व्यसनैःस्त्रीमद्यद्यूताद्यैः २५ शुभमेवानुशेते शुभपक्षपातिनीबुद्धिर्यस्य कालधर्मेणमरणे
न तद्योगाच्छुभानुशययोगात्सकल्याणमतिरेवप्रादुर्भवतिजायते २६ दानजानांधर्माणां तपसःकायक्लेशकृतस्यकृच्छ्रादेः एतयोर्मध्ये प्रेत्यमृत्वा किंबहुगुणंकिंपरलोकेश्रेष्ठमित्यर्थः २७ । २८

कालप्राप्तमुपासीतसस्यानामिवकर्षकः ॥ तपसोहिपरंनास्तितपसाविंदतेमहत् १६ नासाध्यंतपसःकिंचिदितिबुद्ध्यस्वभारत ॥ सत्यमार्जवमक्रोधःसंविभागोदमः
शमः १७ अनसूयाऽविहिंसाचशौचमिंद्रियसंयमः ॥ पावनानिमहाराजनराणांपुण्यकर्मणाम् १८ अधर्मरुचयोमूढास्तिर्यग्गतिपरायणाः ॥ कृच्छ्रांयोनिमनु
प्राप्तानसुखंविंदतेजनाः १९ इहयत्क्रियतेकर्मतत्परत्रोपयुज्यते ॥ तस्माच्छरीरंयुंजीततपसानियमेनच २० यथाशक्तिप्रयच्छेतसंपूज्याभिप्रणम्यच ॥ काले
प्राप्तेचहृष्टात्माराजन्विगतमत्सरः २१ सत्यवादीलभेतायुरनायासमथार्जवम् ॥ अक्रोधनोऽनसूयश्चनिर्वृतिंलभतेपराम् २२ दांतःशमपरःशश्वत्परिक्लेशंन
विंदति ॥ नचतप्यतिदांतात्मादृष्ट्वापरगतांश्रियम् २३ संविभक्ताचदाताचभोगवान्सुखवान्नरः ॥ भवत्यहिंसकश्चैवपरमारोग्यमश्नुते २४ मान्यमानयिता
जन्मकुलेमहतिविंदति ॥ व्यसनैर्नतुसंयोगंप्राप्नोतिविजितेंद्रियः २५ शुभानुशयबुद्धिर्हिसंयुक्तःकालधर्मणा ॥ प्रादुर्भवतितद्योगात्कल्याणमतिरेवसः २६
युधिष्ठिरउवाच ॥ भगवन्दानधर्माणांतपसोवामहामुने ॥ किंस्विद्बहुगुणंप्रेत्यकिंवादुष्करमुच्यते २७ ॥ व्यासउवाच ॥ दानान्नदुष्करंतातपृथिव्यामस्तिकिंच
न ॥ अर्थेचमहतीतृष्णासचदुःखेनलभ्यते २८ परित्यज्यप्रियान्प्राणान्धनार्थंहिमहामते ॥ प्रविशंतिनरावीराःसमुद्रमटवींतथा २९ कृषिगोरक्ष्यमित्येकेप्र
तिपद्यंतिमानवाः ॥ पुरुषाःप्रेष्यतामेकेनिर्गच्छंतिधनार्थिनः ३० तस्माद्दुःखार्जितस्यैवपरित्यागःसुदुष्करः ॥ नदुष्करतरंदानात्तस्माद्दानंमतंमम ३१ विशे
षस्त्वत्रविज्ञेयोन्यायेनोपार्जितंधनम् ॥ पात्रेकालेचदेशेचसाधुभ्यःप्रतिपादयेत् ३२ अन्यायात्समुपात्तेनदानधर्मोधनेनयः ॥ क्रियतेनसकर्तारंत्रायतेमहतो
भयात् ३३ पात्रेदानंस्वल्पमपिकालेदत्तंयुधिष्ठिर ॥ मनसाहिविशुद्धेनप्रेत्यानंतफलंस्मृतम् ३४ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ व्रीहिद्रोणप
रित्यागाद्यत्फलंप्राप मुद्गलः ३५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिव्रीहिद्रौणिकपर्वणिदानदुष्करत्वकथनेऊनषष्ट्यधिकद्विशततमोऽध्यायः ॥ २५९ ॥ ७॥
॥ युधिष्ठिरउवाच ॥ व्रीहिद्रोणःपरित्यक्तःकथंतेनमहात्मना ॥ कस्मैदत्तश्चभगवन्विधिनाकेनचात्थमे १ प्रत्यक्षधर्माभगवान्यस्यतुष्टोहिकर्मभिः ॥ सफलंत
स्यजन्माहंमन्येसद्धर्मचारिणः २ ॥ व्यासउवाच ॥ शिलोंछवृत्तिर्धर्मात्मामुद्गलःसंयतेंद्रियः ॥ आसीद्राजन्कुरुक्षेत्रेसत्यवागनसूयकः ३

२९ । ३० दुःखार्जितस्यधनस्येतिविशेषः मतंश्रेष्ठत्वेन ३१ । ३२। ३३ । ३४ द्रोणोमानविशेषस्तन्मिताव्रीहयस्तेषांदानात् ३५ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदी
पेऊनषष्ट्यधिकद्विशततमोऽध्यायः ॥ २५९ ॥ ॥ ७ ॥ ॥ व्रीहिद्रोणइति १ प्रत्यक्षधर्मा नृणांधर्मस्यवेत्ता भगवानीश्वरः २ शिलंकणिशार्जनं उंछःकणशोऽर्जनं । 'उंछःकणशआ
दानंकणिशाद्यर्जनंशिलम्' इतियादवः । तेउभेवृत्तिर्जीवनंयस्यसशिलोंछवृत्तिः ३

कापोतींवृत्तिमल्पसंग्रहरूपां इष्टीकृतं इष्टिभिरेवनिर्वर्त्यं नतुपश्वादिना सत्रंयज्ञम् ४ ।५ । ६ । ७ पर्ववैश्वदेववरुणप्रघासादिकंकर्म कालंकालेफाल्गुन्यादौ अत्यंतसंयोगेद्वितीया व्रीहिद्रोण

अतिथिव्रतीक्रियावांश्चकापोतींवृत्तिमास्थितः ॥ सत्रमिष्टीकृतंनामसमुपास्तेमहातपाः ४ सपुत्रदारोहिमुनिःपक्षाहारोबभूवह ॥ कपोतवृत्त्यापक्षेणव्रीहिद्रो
णमुपार्जयत् ५ दर्शंचपौर्णमासंचकुर्वन्विगतमत्सरः ॥ देवतातिथिशेषेणकुरुतेदेहयापनम् ६ तस्येंद्रःसहितोदेवैःसाक्षात्त्रिभुवनेश्वरः ॥ प्रत्यगृह्णान्महारा
जभागंपर्वणिपर्वणि ७ सपर्वकालंकृत्वातुमुनिवृत्त्यासमन्वितः ॥ अतिथिभ्योददावन्नंप्रहृष्टेनांतरात्मना ८ व्रीहिद्रोणस्यतद्धचस्यददतोऽन्नंमहात्मनः ॥ शि
ष्टंमात्सर्यहीनस्यवर्धत्यातिथिदर्शनात् ९ तच्छतान्यपिभुंजंतिब्राह्मणानांमनीषिणाम् ॥ मुनेस्त्यागविशुद्धचातुतदन्नंवृद्धिमच्छति १० तंतुशुश्राववर्मिष्ठंमु
द्गलंसंशितव्रतम् ॥ दुर्वासानृपदिग्वासास्तमथाभ्याजगामह ११ बिभ्रच्चानियतंवेषमुन्मत्तइवपांडव ॥ विकचःपरुषावाचोव्याहरन्विविधामुनिः १२ अभिग
म्याथतंविप्रमुवाचमुनिसत्तमः ॥ अन्नार्थिनमनुप्राप्तंविद्धिमांद्विजसत्तम १३ स्वागतंतेऽस्त्वितिमुनिंमुद्गलःप्रत्यभाषत ॥ पाद्यमाचमनीयंचप्रतिपाद्यार्घ्यमुत्त
मम् १४ प्रादात्सतापसायान्नंक्षुधितायातिथिव्रती ॥ उन्मत्तायपरांश्रद्धामास्थायसधृतव्रतः १५ ततस्तदन्नंरसवत्सएवक्षुधयाऽन्वितः ॥ बुभुजेकृत्स्नमुन्म
त्तःप्रादात्तस्मैचमुद्गलः १६ भुक्त्वाचान्नंततःसर्वमुच्छिष्टेनात्मनस्ततः ॥ अथांगांलिलिपेऽन्नेनयथागतमगाच्चसः १७ एवंद्वितीयेसंप्राप्तेयथाकालेमनीषिणः ॥
आगम्यबुभुजेसर्वमन्नमुंछोपजीविनः १८ निराहारस्तुसमुनिरुंछमार्जयतेपुनः ॥ नचैनंविक्रियांनेतुमशकन्मुद्गलंक्षुधा १९ नक्रोधोनचमात्सर्यंनावमानोनसं
भ्रमः ॥ सपुत्रदारमुंछंतमाविवेशद्विजोत्तमम् २० तथातमुंछधर्माणंदुर्वासामुनिसत्तमम् ॥ उपतस्थेयथाकालंषट्कृत्वःकृतनिश्चयः २१ नचास्यमनसाकश्चि
द्विकारंददृशेमुनिः ॥ शुद्धसत्वस्यशुद्धंसददृशेनिर्मलंमनः २२ तमुवाचततःप्रीतःसमुनिर्मुद्गलंततः ॥ त्वत्समोनास्तिलोकेऽस्मिन्दातामात्सर्यवर्जितः २३ क्षु
द्धर्मसंज्ञांप्रणुदत्यादत्तेधैर्यमेवच ॥ रसानुसारिणीजिह्वाकर्षत्येवरसान्प्रति २४ आहारप्रभवाःप्राणामनोदुर्निग्रहंचलम् ॥ मनसश्चेंद्रियाणांचाप्यैकाग्र्यंनिश्चि
तंतपः २५ श्रमेणोपार्जितंत्यक्तुंदुःखंशुद्धेनचेतसा ॥ तत्सर्वंभवतासाधोयथावदुपपादितम् २६ प्रीताःस्मोऽनुगृहीताश्चसमेत्यभवतासह ॥ इंद्रि
याभिजयोधैर्यंसंविभागोदमःशमः २७ दयासत्यंचधर्मश्चत्वयिसर्वंप्रतिष्ठितम् ॥ जितास्तेकर्मभिर्लोकाःप्राप्तोऽसिपरमांगतिम् २८ अहोदानंविघुष्टं
तेसुमहत्स्वर्गवासिभिः ॥ सशरीरोभवान्गंतास्वर्गंसुचरितव्रत २९ इत्येवंवदतस्तस्यतदादुर्वाससोमुनेः ॥ देवदूतोविमानेनमुद्गलंप्रत्युपस्थितः ३०
हंससारसयुक्तेनकिंकिणीजालमालिना ॥ कामगेनविचित्रेणदिव्यगंधवतातथा ३१

मात्रंयदासिष्यतितदाददाति ८ तदाचदीयमानंतद्वर्धतेविवर्धते ९ अच्छेतिप्राप्नोति १० । ११ विकचोहसन्मुंडोवा १२ । १३ । १४ । १५ । १६ । १७ द्वितीयपक्षे १८ । १९ । २० ॥२१३॥
२१ । २२ । २३ क्षुत्क्षुधा धर्मसहितांसंज्ञां त्वयात् प्राणधर्मः क्षुधा इंद्रियधर्मोरसना तदुभयंजितमित्यर्थः २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१

उवाचदेवदूतइत्यनुकृष्यते ३२ । ३३ । ३४ । ३५ व्यवसायंनिश्चयम् ३६ ॥ इत्यार॰ प॰ नी॰ भा॰ षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६० ॥ ॥ महर्षइति विमृशसिशुभमशुभंवेतिवि
चारयसि १ स्वर्लोकःसुखलोकः । 'यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं ॥ अभिलाषोपनीतंयत्तत्सुखंस्वःपदास्पदम्'इतिश्रुतिः तत्प्रधानत्वाल्लोकोऽपिस्वःशब्दवाच्यः ऊर्ध्वगमनादिपूर्वगःसत्पथो

उवाचचैनंविप्रर्षिविमानंकर्मभिर्जितम् ॥ समुपारोहसंसिद्धिं प्राप्तोऽसिपरमांमुने ३२ तमेवंवादिनमृषिर्देवदूतमुवाचह ॥ इच्छामिभवताप्रोक्तान्गुणान्स्वर्गनि
वासिनाम् ३३ केगुणास्तत्रवसतांकिंतपःकश्चनिश्चयः ॥ स्वर्गेतत्रसुखंकिंचदोषोवादेवदूतक ३४ सतांसाप्तपदंमित्रमाहुःसंतःकुलोचिताः ॥ मित्रतांचपुर
स्कृत्यपृच्छामित्वामहंविभो ३५ यदत्रतथ्यंपथ्यंचतद्ब्रवीह्यविचारयन् ॥ श्रुत्वातथाकरिष्यामिव्यवसायंगिरातव ३६ ॥ ॥इतिश्रीम॰आ॰प॰व्रीहिद्रौ
णिकप॰ मुद्गलोपाख्यानेषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६० ॥ ॥ देवदूतउवाच ॥ महर्षेआर्यबुद्धिस्त्वंयःस्वर्गसुखमुत्तमम् ॥ संप्राप्तंबहुमंतव्यंवि
मृशस्यबुधोयथा १ उपरिष्टाद्यस्वर्लोकोयोऽयंस्वरितिसंज्ञितः ॥ ऊर्ध्वगःसत्पथःशश्वद्देवयानचरोमुने २ नातप्ततपसःपुंसोनामहायज्ञयाजिनः ॥ नानृताना
स्तिकाश्चैवतत्रगच्छंतिमुद्गल ३ धर्मात्मानोजितात्मानःशांतादांताविमत्सराः ॥ दानधर्मरताःपुंसःशूराश्चाहवलक्षणाः ४ तत्रगच्छंतिधर्माग्र्यंकृत्वाशमदमा
त्मकम् ॥ लोकान्पुण्यकृतांब्रह्मन्सद्भिराचरितान्नृभिः ५ देवाःसाध्यास्तथाविश्वेतथैवचमहर्षयः ॥ यामाधामाश्चमौद्गल्यगंधर्वाप्सरसस्तथा ६ एषांदेवानि
कायानांपृथक्पृथगनेकशः ॥ भास्वंतःकामसंपन्नालोकास्तेजोमयाःशुभाः ७ त्रयस्त्रिंशत्सहस्राणियोजनानिहिरण्मयः ॥ मेरुःपर्वतराड्यत्रदेवोद्यानानिमुद्गल
८ नंदनादीनिपुण्यानिविहाराःपुण्यकर्मणाम् ॥ नक्षुत्पिपासेनग्लानिर्नशीतोष्णेभयंतथा ९ बीभत्समशुभंवापितत्रकिंचिन्नविद्यते ॥ मनोज्ञाःसर्वतोगंधाःसु
खस्पर्शाश्चसर्वशः १० शब्दाःश्रुतिमनोग्राह्याःसर्वतस्तत्रवैमुने ॥ नशोकोनजरातत्रनायासपरिदेवने ११ ईदृशःसमुनेलोकःस्वकर्मफलहेतुकः ॥ सुकृतैस्त
त्रपुरुषाःसंभवंत्यात्मकर्मभिः १२ तैजसानिशरीराणिभवंत्यत्रोपपद्यताम् ॥ कर्मजान्येवमौद्गल्यनमातृपितृजान्युत १३ नसंस्वेदोनदौर्गंध्यंपुरीषंमूत्रमेवच ॥
तेषांनचरजोवस्त्रंबाधतेतत्रवैमुने १४ नम्लायंतिस्रजस्तेषांदिव्यगंधामनोरमाः ॥ संयुज्यतेविमानैश्चब्रह्मन्नेवंविधैश्चते १५ ईर्ष्याशोकक्लमापेतामोहमात्सर्य
वर्जिताः ॥ सुखंस्वर्गजितस्तत्रवर्तयंतेमहामुने १६ तेषांतथाविधानांतुलोकानांमुनिपुंगव ॥ उपर्युपरिलोकस्यलोकादिव्यागुणान्विताः १७ पुरस्ताद्ब्राह्म
७२ णास्तत्रलोकास्तेजोमयाःशुभाः ॥ यत्रयांत्यृषयोब्रह्मन्पूताःस्वैःकर्मभिःशुभैः १८ ऋभवोनामतत्रान्येदेवानामपिदेवताः ॥ तेषांलोकात्परतरेयान्यजंतीहदेवताः
१९ स्वयंप्रभास्तेभास्वंतोलोकाःकामदुघाःपरे ॥ नतेषांस्त्रीकृतस्तापोनलोकैश्वर्यमत्सरः २० ब्रह्ममार्गः क्रममुक्तिस्थानमित्यर्थः देवयानेनमार्गेण अर्चिरादिपर्वव्रताचरंत्य
स्मिन्निति देवयानचरः २ पुंसःपुमांसः ३ । ४ धर्माग्र्यंधर्मश्रेष्ठंयोगम् ५ यामाधामाश्चगणविशेषाः ६देवानांनिकायाआलयायेषुतेषांदेवनिकायानाम् ७ त्रयस्त्रिंशत्सहस्राणियोजनान्युपरिपरि
धिरित्यर्थः उच्छ्रायस्यचतुरशीतिसहस्रमानमितिजंबूखंडेवक्ष्यमाणत्वात् ८।९ । १० । ११ । १२ उपपद्यतामुपगच्छताम् १३। १४ एवंविधैरितिदृश्यमानप्रदर्शनम् १५।१६।१७।१८।१९।२०

२१ । २२ । २३ । २४ । २५ व्युष्टिःसंपत्तिः २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४०

नवर्तयंत्याहुतिभिस्तेनाप्यमृतभोजनाः ॥ तथादिव्यशरीरास्तेनचविग्रहमूर्तयः २१ नसुखेसुखकामास्तेदेवदेवाःसनातनाः ॥ नकल्पपरिवर्तेषुपरिवर्तंति
तेतथा २२ जरामृत्युःकुतस्तेषांहर्षःप्रीतिःसुखंनच ॥ नदुःखंनसुखंचापिरागद्वेषौकुतोमुने २३ देवानामपिमौद्गल्यकांक्षितासागतिःपरा ॥ दुष्प्रापापरमासि
द्धिरगम्याकामगोचरैः २४ त्रयस्त्रिंशदिमेदेवायेषांलोकामनीषिभिः ॥ गम्यंतेनियमैःश्रेष्ठैर्दानैर्वाविधिपूर्वकैः २५ सेयंदानकृताव्युष्टिरनुप्राप्तासुखंत्वया ॥ तां
भुंक्ष्वसुकृतैर्लब्धांतपसाद्योतितप्रभः २६ एतत्स्वर्गसुखंविप्रलोकानानाविधास्तथा ॥ गुणाःस्वर्गस्यप्रोक्तास्तेदोषानपिनिबोधमे २७ कृतस्यकर्मणस्तत्र
भुज्यतेयत्फलंदिवि ॥ नचान्यत्क्रियतेकर्ममूलच्छेदेनभुज्यते २८ सोत्रदोषोमममतस्तस्यांतेपतनंचयत् ॥ सुखव्याप्तमनस्कानांपतनंयच्चमुद्गल २९ असं
तोषःपरीतापोदृष्ट्वादीप्ततराःश्रियः ॥ यद्भवत्यवरेस्थानेस्थितानांतत्सुदुष्करम् ३० संज्ञामोहश्चपततांरजसाचप्रधर्षणम् ॥ प्रम्लानेषुचमाल्येषुततःपिपतिषोर्भ
यम् ३१ आब्रह्मभवनादेतेदोषामौद्गल्यदारुणाः ॥ नाकलोकेसुकृतिनांगुणास्त्वयुतशोनृणाम् ३२ अयंत्वन्योगुणःश्रेष्ठश्च्युतानांस्वर्गतोमुने ॥ शुभानुशययोगे
नमनुष्येषूपजायते ३३ तत्रापिसमहाभागःसुखभागभिजायते ॥ नचेत्संबुध्यतेतत्रगच्छत्यधमतांततः ३४ इहयत्क्रियतेकर्मतत्परत्रोपभुज्यते ॥ कर्मभूमि
रियंब्रह्मन्फलभूमिरसौमता ३५ ॥ मुद्गलउवाच ॥ महांतस्तुअमीदोषास्त्वयास्वर्गस्यकीर्तिताः ॥ निर्दोषएवयस्त्वन्योलोकंतंप्रवदस्वमे ३६ ॥ देवदूतउ
वाच ॥ ब्रह्मणःसदनादूर्ध्वंतद्विष्णोःपरमंपदम् ॥ शुद्धंसनातनंज्योतिःपरंब्रह्मेतियद्विदु ३७ नतत्रविप्रगच्छंतिपुरुषाविषयात्मकाः ॥ दंभलोभमहाक्रोधमोहद्रो
हैरभिद्रुताः ३८ निर्ममानिरहंकारानिर्द्वंद्वाःसंयतेंद्रियाः ॥ ध्यानयोगपराश्चैवतत्रगच्छंतिमानवाः ३९ एतत्तेसर्वमाख्यातंयन्मांपृच्छसिमुद्गल ॥ तवानुकं
पयासाधोसाधुगच्छाममाचिरम् ४० ॥ व्यासउवाच ॥ एतच्छ्रुत्वातुमौद्गल्योवाक्यंविममृशेधिया ॥ विमृश्यचमुनिश्रेष्ठोदेवदूतमुवाचह ४१ देवदूतनमस्तेऽ
स्तुगच्छतातयथासुखम् ॥ महादोषेणमेकार्यंनस्वर्गेणसुखेनवा ४२ पतनांतेमहादुःखंपरितापःसुदारुणः ॥ स्वर्गभाजश्चरंतीहतस्मात्स्वर्गंनकामये ४३ यत्रग
त्वानशोचंतिनव्यथंतिचलंतिवा ॥ तदहंस्थानमत्यंतंमार्गयिष्यामिकेवलम् ४४ इत्युक्त्वासमुनिर्वाक्यंदेवदूतंविसृज्यतम् ॥ शिलोंछवृत्तिर्धर्मात्माशममातिष्ठदु
त्तमम् ४५ तुल्यनिंदास्तुतिर्भूत्वासमलोष्टाश्मकांचनः ॥ ज्ञानयोगेनशुद्धेनध्याननित्योबभूवह ४६ ध्यानयोगाद्बलंलब्ध्वाप्राप्यबुद्धिमनुत्तमाम् ॥ जगामशा
श्वतींसिद्धिंपरांनिर्वाणलक्षणाम् ४७ तस्मात्त्वमपिकौंतेयनशोकंकर्तुमर्हसि ॥ राज्यात्स्फीतात्परिभ्रष्टस्तपसातदवाप्स्यसि ४८ सुखस्यानंतरंदुःखंदुःखस्यानं ॥२१४॥
तरंसुखम् ॥ पर्यायेणोपसर्पंतेनरंनेमिमराइव ४९ ४१ । ४२ । ४३ । ४४ । ४५ । ४६ बलंपरवैराग्यं बुद्धिंज्ञानम् ४७ । ४८ नेमिश्चक्रधारा अराः नाभिनेमिसंधानदारूणि ४९

५० । ५१ ॥ इत्यारण्यकेपर्वणिनी० भा० भा० एकषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६१ ॥ ॥ ७ ॥ वसत्स्विति १ । २ । ३ । ४ । ५ । ६ अवंदुखं ७ । ८

पितृपैतामहंराज्यंप्राप्स्यस्यमितविक्रम ॥ वर्षात्त्रयोदशादूर्ध्वंव्येतुतेमानसोज्वरः ५० ॥ वैशंपायनउवाच ॥ सएवमुक्त्वाभगवान्व्यासःपांडवनंदनम् ॥
जगामतपसेधीमान्पुनरेवाश्रमंप्रति ५१ ॥ इतिश्रीमहा० आरण्यकेप० व्रीहिद्रौणिकप० मुद्गलदेवदूतसंवादेएकषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६१ ॥
समाप्तंचव्रीहिद्रौणिकपर्व ॥ अथद्रौपदीहरणपर्व ॥ जनमेजयउवाच ॥ वसत्स्वेवंवनेतेषुपांडवेषुमहात्मसु ॥ रममाणेषुचित्राभिःकथाभिर्मुनिभिःसह १ सूर्यदत्ताक्ष
यान्नेनकृष्णायाभोजनावधि ॥ ब्राह्मणांस्तर्पमाणेषुयेचान्नार्थमुपागताः २ आरण्यानांमृगाणांचमांसैर्नानाविधैरपि ॥ धार्तराष्ट्रादुरात्मानःसर्वेदुर्योधनादयः ३
कथंतेष्वन्ववर्तंतपापाचारामहामुने ॥ दुःशासनस्यकर्णस्यशकुनेश्चमतेस्थिताः ४ एतदाचक्ष्वभगवन्वैशंपायनपृच्छतः ॥ वैशंपायनउवाच ॥ श्रुत्वातेषांतथा
वृत्तिंनगरेवसतामिव ५ दुर्योधनोमहाराजतेषुपापमरोचयत् ॥ तथातैर्निकृतिप्रज्ञैःकर्णदुःशासनादिभिः ६ नानोपायैरघंतेषुचिंतयत्सुदुरात्मसु ॥ अभ्याग
च्छत्सधर्मात्मातपस्वीसुमहायशाः ७ शिष्यायुतसमोपेतोदुर्वासानामकामतः ॥ तमागतमभिप्रेक्ष्यमुनिंपरमकोपनम् ८ दुर्योधनोविनीतात्माप्रश्रयेणदमेनच ॥
सहितोभ्रातृभिःश्रीमानातिथ्येनन्यमंत्रयत् ९ विधिवत्पूजयामासस्वयंकिंकरवत्स्थितः ॥ अहानिकतिचित्तत्रतस्थौसमुनिसत्तमः १० तंचपर्यचरद्राजादिवा
रात्रमतंद्रितः ॥ दुर्योधनोमहाराजशापात्तस्यविशंकितः ११ क्षुधितोऽस्मिददस्वान्नंशीघ्रंममनराधिप ॥ इत्युक्त्वागच्छतिस्नातुंप्रत्यागच्छतिवैचिरात् ॥ न
भोक्ष्याम्यद्यमेनास्तिक्षुधेत्युक्त्वैत्यदर्शनम् १२ अकस्मादेत्यचब्रूतेभोजयास्मांस्त्वरान्वितः ॥ कदाचिच्चनिशीथेसउत्थायनिकृतोस्थितः १३ पूर्ववत्कारयि
त्वान्नंनभुंक्तेगर्हयन्स्मसः ॥ वर्तमानेतथातस्मिन्यदादुर्योधनोनृपः १४ विकृतिंनैतिनक्रोधंतदातुष्टोऽभवन्मुनिः ॥ आहचैनंदुराधर्षोवरदोस्मीतिभारत १५
॥दुर्वासाउवाच॥ वरंवरयभद्रंतेयत्तेमनसिवर्तते ॥ मयिप्रीतेतुयद्धर्म्यंनालभ्यंविद्यतेतव १६ ॥ वैशंपायनउवाच ॥ एतच्छ्रुत्वावचस्तस्यमहर्षेर्भावितात्मनः ॥
अमन्यतपुनर्जातमात्मानंससुयोधनः १७ प्रागेवमंत्रितंचासीत्कर्णदुःशासनादिभिः ॥ याचनयिंमुनेस्तुष्टादितिनिश्चित्यदुर्मतिः १८ अतिहर्षान्वितोराजन्वरमेनम
याचत ॥ शिष्यैःसहममब्रह्मन्यथाजातोऽतिथिर्भवान् १९ अस्मत्कुलेमहाराजोज्येष्ठःश्रेष्ठोयुधिष्ठिरः ॥ वनेवसतिधर्मात्माभ्रातृभिःपरिवारितः २० गुणवाञ्शीलसं
पन्नस्तस्यत्वमतिथिर्भव ॥ यदाचराजपुत्रीसासुकुमारीयशस्विनी २१ भोजयित्वाद्विजान्सर्वान्पतींश्चवरवर्णिनी ॥ विश्रांताचस्वयंभुक्त्वासुखासीनाभवेद्यदा २२ तदा
त्वंतत्रगच्छेथायद्यनुग्राह्यतामयि ॥ तथाकरिष्येत्वत्प्रीत्येत्येवमुक्त्वासुयोधनम् २३ दुर्वासाअपिविप्रेंद्रोयथागतमगात्ततः ॥ कृतार्थमपिचात्मानंतदामेनेसुयोधनः २४

९ । १० । ११ । १२ । १३ । १४ । १५ धर्म्यंधर्मादनपेतं १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४

२५ । २६ । २७ । २८ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे द्विषष्ट्यधिकद्विशततमोऽध्यायः २६२ । ततइति १ । २ । ३ । ४ । ५ एतस्मिन्नंतरेकाले ६ । ७ कृष्णंपापकर्षकं कं सस्यकामादेर्दुष्टराज्ञोवानिषूदनं हेकृष्णकृष्णअत्यादरसूचनार्थंद्विर्वचनं । 'कृषिर्भूवाचकःशब्दोणश्चनिर्वृत्तिवाचकः । तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयते'इति श्रुतिप्रणीतः कृष्णपदस्यार्थः ।

करेणचकरंगृह्यकर्णस्यमुदितोभृशम् ॥ कर्णोपिभ्रातृसहितमित्युवाचनृपंमुदा २५ ॥ कर्णउवाच ॥ दिष्ट्याकामःसुसंवृत्तोदिष्ट्याकौरववर्धसे ॥ दिष्ट्यातेशत्रवोमग्नादुस्तरेव्यसनार्णवे २६ दुर्वासःक्रोधजेवह्नौपातिताःपांडुनंदनाः ॥ स्वैरेवतेमहापापैर्गताविदुस्तरंतमः २७ ॥ वैशंपायनउवाच ॥ इत्थंतेनिकृतिप्रज्ञाराजन्दुर्योधनादयः ॥ हसंतःप्रीतमनसोजग्मुःस्वंस्वंनिकेतनम् ॥ २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीहरणपर्वणिदुर्वासउपाख्यानेद्विषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६२ ॥ ॥ ७ ॥ वैशंपायनउवाच ॥ ततःकदाचिद्दुर्वासाःसुखासीनांस्तुपांडवान् ॥ भुक्त्वाचावस्थितांकृष्णांज्ञात्वातस्मिन्वनेमुनिः १ अभ्यागच्छत्परिवृतःशिष्यैरयुतसंमितैः ॥ दृष्ट्वाऽऽयांतंतमतिथिंसचराजायुधिष्ठिरः २ जगामाभिमुखःश्रीमान्सहभ्रातृभिरच्युतः ॥ तस्मैबद्ध्वाऽञ्जलिंसम्यगुपवेश्यवरासने ३ विधिवत्पूजयित्वातमातिथ्येनन्यमंत्रयत् ॥ आह्निकंभगवन्कृत्वाशीघ्रमेहीतिचाब्रवीत् ४ जगामचमुनिःसोऽपिस्नातुंशिष्यैःसहानघः ॥ भोजयेत्सहशिष्यंमांकथमित्यविचिंतयन् ५ न्यमज्जत्सलिलेचापिमुनिसंघःसमाहितः ॥ एतस्मिन्नंतरेराजन्द्रौपदीयोषितांवरा ६ चिंतामवापपरमामन्नहेतोःपतिव्रता ॥ साचिंतयंतीचयदानान्नहेतुमविंदत ७ मनसाचिंतयामासकृष्णंकंसनिषूदनम् ॥ कृष्णकृष्णमहाबाहोदेवकीनंदनाव्यय ८ वासुदेवजगन्नाथप्रणतार्तिविनाशन ॥ विश्वात्मन्विश्वजनकविश्वहर्तःप्रभोऽव्यय ९ प्रपन्नपालगोपालप्रजापालपरात्पर ॥ आकूतीनांचचित्तीनांप्रवर्तकनताऽस्मिते १० वरेण्यवरदानंतअगतीनांगतिर्भव ॥ पुराणपुरुषप्राणमनोवृत्त्याद्यगोचर ११ सर्वाध्यक्षपराध्यक्षत्वामहंशरणंगता ॥ पाहिमांकृपयादेवशरणागतवत्सल १२ नीलोत्पलदलश्यामपद्मगर्भारुणेक्षण ॥ पीतांबरपरीधानलसत्कौस्तुभभूषण १३ त्वमादिरंतोभूतानांत्वमेवचपरायणम् ॥ परात्परतरंज्योतिर्विश्वात्मासर्वतोमुखः १४ त्वामेवाहुःपरंबीजंनिधानंसर्वसंपदाम् ॥ त्वयानाथेनदेवेशसर्वापद्भ्योभयंनहि १५ दुःशासनादहंपूर्वंसभायांमोचितायथा ॥ तथैवसंकटादस्मान्मामुद्धर्तुमिहार्हसि १६ ॥ वैशंपायनउवाच ॥ एवंस्तुतस्तदादेवःकृष्णयाभक्तवत्सलः ॥ द्रौपद्याःसंकटंज्ञात्वादेवदेवोजगत्पतिः १७ पार्श्वस्थांशयनेत्यक्त्वारुक्मिणींकेशवःप्रभुः ॥ तत्राजगामत्वरितोह्यचिंत्यगतिरीश्वरः १८ ततस्तंद्रौपदीदृष्ट्वाप्रणम्यपरयामुदा ॥ अब्रवीद्वासुदेवायमुनेरागमनादिकम् १९ ततस्तामब्रवीत्कृष्णःक्षुधितोऽस्मिभृशातुरः ॥ शीघ्रंभोजयमांकृष्णेपश्चात्सर्वंकरिष्यसि २० निशम्यतद्वचःकृष्णालज्जितावाक्यमब्रवीत् ॥ स्थाल्यांभास्करदत्तायामन्नंमद्भोजनावधि २१ भुक्तवत्यस्म्यहंदेवतस्मादन्नंनविद्यते ॥ ततःप्रोवाचभगवान्कृष्णांकमललोचनः २२

महातोब्रह्मांडपिंडावष्टंभकःभौबाहुयस्य । 'संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः'इतिश्रुतेः अव्ययाविनाशिन् अत्रदेवकीनंदनस्याव्ययत्वंवदत्याकृष्णमूर्तेरभौतिकत्वमुक्तं एवमादिनाम्नामर्थःशंकरभगवत्पादीयेविष्णुसहस्रनामव्याख्यानेद्रष्टव्यः । ८ ९ । आकूतीनांचित्तीनांचेतिचेतोवृत्तिविशेषाणां १० । ११ । १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२

२३ । २४ । २५ । २६ । २७ देवनद्यांतत्रस्थएवतीर्थविशेषे २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७

कृष्णेनर्मकालोऽयंक्षुच्छ्रमेणातुरेमयि ॥ शीघ्रंगच्छममस्थालीमानयित्वाप्रदर्शय २३ इतिनिर्बंधतःस्थालीमानाय्यसयदूद्वहः ॥ स्थाल्याःकंठेऽथसंलग्नंशाकान्नंवीक्ष्यकेशवः २४ उपयुज्याब्रवीदेनामनेनहरिरीश्वरः ॥ विश्वात्माप्रीयतांदेवस्तुष्टश्चास्त्वितियज्ञभुक् २५ आकारयमुनीन्शीघ्रंभोजनायेतिचाब्रवीत् ॥ सहदेवंमहाबाहुःकृष्णःक्लेशविनाशनः २६ ततोजगामत्वरितःसहदेवोमहायशाः ॥ आकारितुंतुतान्सर्वान्भोजनार्थंनृपोत्तम २७ स्नातुंगतान्देवनद्यांदुर्वासःप्रभृतीन्मुनीन् ॥ तेचावतीर्णाःसलिलेकृतवंतोऽघमर्षणम् २८ दृष्ट्वोद्गारान्सान्नरसांस्तृप्त्यापरमयायुताः ॥ उत्तीर्यसलिलात्तस्माद्दृष्टवंतःपरस्परम् २९ दुर्वाससमभिप्रेक्ष्यतेसर्वेमुनयोऽब्रुवन् ॥ राज्ञाहिकारयित्वाऽन्नंवयंस्नातुंसमागताः ३० आकंठतृप्ताविप्रर्षेकिंस्विद्भुंजामहेवयम् ॥ वृथापाकःकृतोऽस्माभिस्तत्रकिंकरवामहे ३१ ॥ दुर्वासाउवाच ॥ वृथापाकेनराजर्षेरपराधःकृतोमहान् ॥ माऽस्मानधाक्षुर्दृष्ट्वैवपांडवाःक्रूरचक्षुषा ३२ स्मृत्वाऽनुभावंराजर्षेरंबरीषस्यधीमतः ॥ बिभेमिसुतरांविप्राहरिपादाश्रयाज्जनात् ३३ पांडवाश्चमहात्मानःसर्वेधर्मपरायणाः ॥ शूराश्चकृतविद्याश्चव्रतिनस्तपसिस्थिताः ३४ सदाचाररतानित्यंवासुदेवपरायणाः ॥ क्रुद्धास्तेनिर्दहेयुर्वैतूलराशिमिवानलः ॥ ततएतानपृष्ट्वैवशिष्याःशीघ्रंपलायत ३५ ॥ वैशंपायनउवाच ॥ इत्युक्तास्तेद्विजाःसर्वेमुनिनागुरुणातदा ॥ पांडवेभ्योभृशंभीतादुद्रुवुस्तेदिशोदश ३६ सहदेवोदेवनद्यामपश्यन्मुनिसत्तमान् ॥ तीर्थेष्वितस्ततस्तस्यांविचचारगवेषयन् ३७ तत्रस्थेभ्यस्तापसेभ्यःश्रुत्वातांश्चैवविद्रुतान् ॥ युधिष्ठिरमथाभ्येत्यतंवृत्तांतंन्यवेदयत् ३८ ततस्तेपांडवाःसर्वेप्रत्यागमनकांक्षिणः ॥ प्रतीक्षंतःकियत्कालंजितात्मानोऽवतस्थिरे ३९ निशीथेऽभ्येत्यचाकस्मादस्मान्सच्छलयिष्यति ॥ कथंचनिस्तरेमास्मात्कृच्छ्राद्दैवोपसादितात् ४० इतिचिंतापरान्दृष्ट्वानिःश्वसंतोमुहुर्मुहुः ॥ उवाचवचनंश्रीमान्कृष्णःप्रत्यक्षतांगतः ४१ ॥ श्रीकृष्णउवाच ॥ भवतामापदंज्ञात्वाऋषेःपरमकोपनात् ॥ द्रौपद्याचिंतितःपार्थाअहंसत्वरमागतः ४२ नभयंविद्यतेतस्माद्दृषेर्दुर्वाससोऽल्पकम् ॥ तेजसाभवतांभीतःपूर्वमेवपलायितः ४३ धर्मनित्यास्तुयेकेचिन्नतेसीदंतिकर्हिचित् ॥ आपृच्छेवोगमिष्यामिनियतंभद्रमस्तुवः ४४ ॥ वैशंपायनउवाच ॥ श्रुत्वेरितंकेशवस्यबभूवुःस्वस्थमानसाः ॥ द्रौपद्यासहिताःपार्थास्तमूचुर्विगतज्वराः ४५ त्वयानाथेनगोविंददुस्तरामापदंविभो ॥ तीर्णाःप्लवमिवासाद्यमज्जमानामहार्णवे ४६ स्वस्तिसाधयभद्रंतेइत्यज्ञातोययौपुरीम् ॥ पांडवाश्चमहाभागद्रौपद्यासहिताःप्रभो ४७ ऊषुःप्रहृष्टमनसोविहरंतोवनाद्वनम् ॥ इतितेऽभिहितंराजन्यत्पृष्टोऽहमिहत्वया ४८ एवंविधान्यलीकानिधार्तराष्ट्रैर्दुरात्मभिः ॥ पांडवेषुवनस्थेषुप्रयुक्तानिवृथाऽभवन् ॥ ४९ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणि द्रौपदीहरणपर्वणिदुर्वासउपाख्याने त्रिषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६३ ॥ ॥ ७ ॥

४८ अलीकानिच्छद्मानि । 'अलीकंत्वप्रियेऽनृते'इतिनानार्थः ४९ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे त्रिषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६३ ॥ ॥ ७ ॥

तस्मिन्निति १ । २ । ३ । ४ । ५ । ६ परिबर्हेणपरिच्छदेन । 'परिबर्हस्तुराजार्हवस्तुन्यपिपरिच्छदे' इतिविश्वः ७ । ८ नीलाभ्रंनीलमेघं ९ । १० । ११ कोटिकास्यंकोटीदुर्गंमंतःपुरंतत्राधि
कृताःकोटिकास्तेषामास्यमिवमुख्यं । आख्यमितिपाठेसंख्यातरंवक्तारमितिवा । अश्येतिपाठेकोटिका अश्याव्याप्यायस्येतिवा राजानंक्षत्रियंप्रभुंवा । 'राजाप्रभौचनृपतौक्षत्रियेरजनीपतौ'

वैशंपायनउवाच ॥ तस्मिन्बहुमृगेऽरण्येअटमानामहारथाः ॥ काम्यकेभरतश्रेष्ठाविजह्रुस्तेयथाऽमराः १ प्रेक्षमाणाबहुविधान्वनोद्देशान्समंततः ॥ यथर्तुकालरम्याश्चवनराजीःसुपुष्पिताः २ पांडवामृगयाशीलाश्चरंतस्तन्महद्वनम् ॥ विजह्रुरिंद्रप्रतिमाःकंचित्कालमरिंदम ३ ततस्तेयौगपद्येनययुःसर्वेचतुर्दिशम् ॥ मृगयांपुरुषव्याघ्राब्राह्मणार्थेपरंतपाः ४ द्रौपदीमाश्रमेन्यस्यतृणबिंदोरनुज्ञया ॥ महर्षेर्दीप्ततपसोधौम्यस्यचपुरोधसः ५ ततस्तुराजासिंधूनांवार्धक्षत्रिर्महायशाः ॥ विवाहकामःशाल्वेयान्प्रयातःसोऽभवत्तदा ६ महतापरिबर्हेणराजयोग्येनसंवृतः ॥ राजभिर्बहुभिःसार्धमुपायात्काम्यकंचसः ७ तत्रापश्यत्प्रियांभार्यांपांडवानांयशस्विनीम् ॥ तिष्ठंतीमाश्रमद्वारिद्रौपदींनिर्जनेवने ८ विभ्राजमानांवपुषाबिभ्रतींरूपमुत्तमम् ॥ भ्राजयंतींवनोद्देशंनीलाभ्रमिवविद्युतम् ९ अप्सरादेवकन्यावामायावादेवनिर्मिता ॥ इतिकृत्वांऽजलिंसर्वेददृशुस्तामनिंदिताम् १० ततःसराजासिंधूनांवार्धक्षत्रिर्जयद्रथः ॥ विस्मितस्त्वनवद्यांगींदृष्ट्वातांदुष्टमानसः ११ सकोटिकास्यंराजानमब्रवीत्काममोहितः ॥ कस्यत्वेषाऽनवद्यांगीयदिवाऽपिनमानुषी १२ विवाहार्थोनमेकश्चिदिमांप्राप्यातिसुंदरीम् ॥ एतामेवाहमादायगमिष्यामिस्वमालयम् १३ गच्छजानीहिसौम्येमांकस्यवाऽत्रकुतोऽपिवा ॥ किमर्थमागतासुभ्रूरिदंकंटकितंवनम् १४ अपिनामवरारोहामामेषालोकसुंदरी ॥ भजेदद्यायतापांगीसुदतीतनुमध्यमा १५ अप्यहंकृतकामःस्यामिमांप्राप्यवरस्त्रियम् ॥ गच्छजानीहिकोन्वस्यानाथइत्येवकोटिक १६ सकोटिकास्यस्तच्छ्रुत्वारथात्प्रस्कंद्यकुंडली ॥ उपेत्यपप्रच्छतदाक्रोष्टाव्याघ्रवधूमिव १७ ॥ इतिश्रीम० भा० आ० प० द्रौपदि ह० प० जयद्रथागमनेचतुःषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६४ ॥ कोटिकउवाच ॥ कात्वंकदंबस्यविनाम्यशाखामेकाऽऽश्रमेतिष्ठसिशोभमाना ॥ देदीप्यमानाऽग्निशिखेवनक्तंव्याधूयमानापवनेनसुभ्रूः १ अतीवरूपेणसमन्वितात्वंनचाप्यरण्येषुबिभेषिकिंनु ॥ देवीनुयक्षीयदिदानवीवावराप्सरादैत्यवरांगनावा २ वपुष्मतीवोरगराजकन्यावनेचरीवाक्षणदाचरस्त्री ॥ यद्येवराज्ञोवरुणस्यपत्नीयमस्यसोमस्यधनेश्वरस्य ३ धातुर्विधातुःसवितुर्विभोर्वाशक्रस्यवात्वंसदनात्प्रपन्ना ॥ नह्येवनःपृच्छसियेवयंस्मनचापिजानीमतवेहनाथम् ४ वयंहिमानंतववर्धयंतःपृच्छामभद्रेप्रभवंप्रभुंच ॥ आचक्ष्वबंधूंश्चपतिंकुलंचतत्त्वेनयच्चेहकरोषिकायम् ५ अहंतुराज्ञःसुरथस्यपुत्रोयंकोटिकास्येतिविदुर्मनुष्याः ॥ असौतुयस्तिष्ठतिकांचनांगेरथेहुतोऽग्निश्चयनेयथैव ६ त्रिगर्तराजःकमलायताक्षःक्षेमंकरोनामसएषवीरः ॥ अस्मात्परस्त्वेषमहाधनुष्मान्पुत्रःकुलिंदाधिपतेर्वरिष्ठः ७

इतिमेदिनी १२।१३।१४।१५ । १६ ।१७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेचतुःषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६४ ॥ केति १।२।३धातुःप्रजापतेःसरस्वतीवा विधातुःकश्यपस्यरुद्रस्यवा अदितिपार्वतीवा विभोर्विष्णोर्लक्ष्मीर्वा ४ प्रभवंपितरंप्रभुंमहातं ५ राज्ञःक्षत्रियस्यचयनेइष्टकोच्चये ६।७

८ अनुचक्रंसैन्यमनुलक्षीकृत्यप्रयाति । 'चक्रंसैन्यरथांगयोः' इतिविश्वः । पाठांतरेऽनुयात्रायात्रोपकरणपालाइत्यर्थः ९ । १० पदातिनःपद्भ्यामतितुंसततंगंतुंशीलंयेषांतेपदातयः ११ । १२
१३ । १४ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेपंचषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६५ ॥ ॥ ७ ॥ अथेति शिबीनांशिबिवंश्यानांक्षत्रियाणां मंदंस्वैरंअवेक्ष्यसंकोच्य तदे

निरीक्षतेत्वांविपुलायताक्षःसुपुष्पितःपर्वतवासनित्यः ॥ असौतुयःपुष्करिणीसमीपेश्यामोयुवातिष्ठतिदर्शनीयः ८ इक्ष्वाकुराज्ञःसुबलस्यपुत्रःसएवहंताद्विषतांसुगात्रि ॥ यस्यानुचक्रंध्वजिनःप्रयांतिसौवीरकाद्वादशराजपुत्राः ९ शोणाश्वयुक्तेषुरथेषुसर्वेमखेषुदीप्ताइवहव्यवाहाः ॥ अंगारकःकुंजरगुप्तकश्चशत्रुंजयःसंजयसुप्रवृद्धौ १० भयंकरोऽथभ्रमरोरविश्चशूरःप्रतापःकुहनश्चनाम ॥ यंषट्सहस्रारथिनोऽनुयांतिनागाहयाश्चैवपदातिनश्च ११ जयद्रथोनामयदिश्रुतस्तेसौवीरराजःसुभगेसएषः ॥ तस्यापरेभ्रातरोऽदीनसत्वाबलाहकानीकविदारणाद्याः १२ सौवीरवीराःप्रवरायुवानोराजानमेतेबलिनोऽनुयांति ॥ एतैःसहायैरुपयातिराजामरुद्गणैरिंद्रइवाभिगुप्तः १३ अजानतांख्यापयनःसुकेशिकस्यासिभार्यादुहिताचकस्य १४ ॥ इतिश्रीम० भा० आरण्यकेप० द्रौपदीहरणप० कोटिकास्यप्रश्नेपंचषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६५ ॥ वैशंपायनउवाच ॥ अथाब्रवीद्द्रौपदीराजपुत्रीपृष्टाशिबीनांप्रवरेणतेन ॥ अवेक्ष्यमंदंप्रविमुच्यशाखांसंगृह्णतीकौशिकमुत्तरीयम् १ बुद्ध्याऽभिजानामिनरेंद्रपुत्रनमादृशीत्वामभिभाष्टुमर्हति ॥ नत्वेहवक्ताऽस्तितवेहवाक्यमन्योनरोवाऽप्यथवाऽपिनारी २ एकाह्यहंसंप्रतितेनवाचंददानिवैभद्रनिबोधचेदम् ॥ अहंह्यरण्येकथमेकमेकात्वामालपेयंनिरतास्वधर्मे ३ जानामिचत्वांसुरथस्यपुत्रंयंकोटिकास्येतिविदुर्मनुष्याः ॥ तस्मादहंशैब्यतथैवतुभ्यमाख्यामिबंधून्प्रथितंकुलंच ४ अपत्यमस्मिद्रुपदस्यराज्ञःकृष्णेतिमांशैब्यविदुर्मनुष्याः ॥ साऽहंवृणेपंचजनान्पतित्वेयेखांडवप्रस्थगताःश्रुतास्ते ५ युधिष्ठिरोभीमसेनार्जुनौचमाद्र्याश्चपुत्रौपुरुषप्रवीरौ ॥ तेमांनिवेश्येहदिशश्चतस्रोविभज्यपार्थामृगयांप्रयाताः ६ प्राचींराजादक्षिणांभीमसेनोजयःप्रतीचींयमजावुदीचीम् ॥ मन्येतुतेषांरथसत्तमानांकालोऽभितःप्राप्तइहोपयातुम् ७ संमानितायास्यथतैर्यथेष्टंविमुच्यवाहानवरोहयध्वम् ॥ प्रियातिथिर्धर्मसुतोमहात्माप्रीतोभविष्यत्यभिवीक्ष्ययुष्मान् ८ एतावदुक्त्वाद्रुपदात्मजासाशैब्यात्मजंचंद्रमुखीप्रतीता ॥ विवेशतांपर्णशालांप्रशस्तांसंचिंत्यतेषामतिथित्वमर्थे ९ ॥ इतिश्रीम० भा० आ० पर्वणिद्रौपदीहरणपर्वणिद्रौपदीवाक्येषट्षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६६ ॥ ॥ वैशंपायनउवाच ॥ तथासीनेषुसर्वेषुतेषुराजसुभारत ॥ यदुक्तंकृष्णयासार्धंतत्सर्वंप्रत्यवेदयत् १ कोटिकास्यवचःश्रुत्वाशैब्यंसौवीरकोऽब्रवीत् ॥ यदावाचंव्याहरंत्यामस्यांमेरमतेमनः २ सीमंतिनीनांमुख्यायांविनिवृत्तःकथंभवान् ॥ एतांदृष्ट्वास्त्रियोमेऽन्यायथाशाखामृगस्त्रियः ३

वाहविमुच्येति कौशिकंकोशजं १ अभिभाष्टुंअभिभाषितुं २ तेनकारणेन ३ । ४ पंचजनान् पंचपुरुषान् ५ । ६ जयोऽर्जुनः ७ । ८ तेषामर्थेअतिथिषुयोग्यंस्वधर्मपूजादिकंकर्तुंसंचिंत्यशालांविवेश ९ ॥ इत्यार० प० नी० भा० षट्षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६६ ॥ तथेति । १ सौवीरकोजयद्रथः २ यदाअस्यांमेमनोरमते तदामवान्कथंविनिवृत्तइतियोज्यम् ३

४ । ५ । ६ ।७ सिंहगोष्ठ सिंहसभां । 'गोष्ठंगोस्थानकंगोष्ठीसभासंलापयोःस्त्रियाम्' इतिमेदिनी । लिंगंस्वविवक्षितं गोष्ठमिवगोष्ठमितिवा स्थानमेव ८ सप्तमोबलाहकादीन्षड्भ्रातॄनुपलक्ष्य आत्मनाशरीरेणसप्तानांपूरणः ९ । १० अनुतिष्ठसिपालयसि विदितालब्धाः ११ । १२ । १३ । १४ । १५ । १६ । १७ श्रियःसंक्षयेसतीतिशेषः हीनलक्ष्मीकेइत्यर्थः १८ समाःसंवत्सरान्

प्रतिभांतिमहाबाहोसत्यमेतद्ब्रवीमिते ॥ दर्शनादेवहिमनस्तयामेऽपहृतंभृशम् ४ तांसमाचक्ष्वकल्याणींयदिस्याच्छैब्यमानुषी ॥ कोटिकउवाच ॥ एषावैद्रौप
दीकृष्णाराजपुत्रीयशस्विनी ५ पंचानांपांडुपुत्राणांमहिषीसंमताभृशम् ॥ सर्वेषांचैवपार्थानांप्रियाबहुमतासती ६ तयासमेत्यसौवीरसौवीराभिमुखोव्रज ॥
॥ वैशंपायनउवाच ॥ एवमुक्तःप्रत्युवाचपश्यामिद्रौपदीमिति ७ पतिःसौवीरसिंधूनांदुष्टभावोजयद्रथः ॥ सप्रविश्याश्रमंपुण्यंसिंहगोष्ठंवृकोयथा ८ आत्मनास
प्तमःकृष्णामिदंवचनमब्रवीत् ॥ कुशलंतेवरारोहेभर्त्तारस्तेऽप्यनामयाः ९ येषांकुशलकामाऽसितेऽपिकच्चिदनामयाः ॥ द्रौपद्युवाच ॥ अपितेकुशलंराजन्रा
ष्ट्रेकोशेबलेतथा १० कच्चिदेकःशिबीनाढ्यान्सौवीरान्सहसिंधुभिः ॥ अनुतिष्ठसिधर्मेणयेचान्येविदितास्त्वया ११ कौरव्यःकुशलीराजाकुंतीपुत्रोयुधिष्ठिरः ॥
अहंचभ्रातरश्चास्ययांश्चान्यान्परिपृच्छसि १२ पाद्यंप्रतिगृहाणेदमासनंचनृपात्मज ॥ मृगान्पंचाशतंचैवप्रातराशंददानिते १३ ऐणेयान्पृषतान्न्यंकून्हरिणा
न्शरभान्शशान् ॥ ऋक्षान्रुरून्शंबरांश्चगवयांश्चमृगान्बहून् १४ वराहान्महिषांश्चैवयाश्चान्यामृगजातयः ॥ प्रदास्यतिस्वयंतुभ्यंकुंतीपुत्रोयुधिष्ठिरः १५
जयद्रथउवाच ॥ कुशलंप्रातराशस्यसर्वंमेदित्सितंत्वया ॥ एहिमेरथमारोहसुखमाप्नुहिकेवलम् १६ गतश्रीकान्हृतराज्यान्कृपणान्गतचेतसः ॥ अरण्यवासि
नःपार्थान्नानुरोद्धुंत्वमर्हसि १७ नैवप्राज्ञागतश्रीकंभर्त्तारमुपयुंजते ॥ युंजानमनुयुंजीतनश्रियःसंक्षयेवसेत् १८ श्रियाविहीनाराष्ट्राच्चविनष्टाःशाश्वतीःसमाः ॥
अलंतेपांडुपुत्राणांभक्त्याक्लेशमुपासितुम् १९ भार्यामेभवसुश्रोणित्यजैनान्सुखमाप्नुहि ॥ अखिलान्सिंधुसौवीरानाप्नुहित्वंमयासह २० ॥ वैशंपायनउवाच ॥ इ
त्युक्तासिंधुराजेनवाक्यंहृदयकंपनं ॥ कृष्णातस्मादपाक्रामद्देशात्सभ्रुकुटीमुखी २१ अवमत्यास्यतद्वाक्यमाक्षिप्यचसुमध्यमा ॥ मैवमित्यब्रवीत्कृष्णालज्जस्वेतिच
सैंधव २२ साकांक्षमाणाभर्तृणामुपयातमनिंदिता ॥ विलोभयामासपरंवाक्यैर्वाक्यानियुंजती २३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीहरणपर्वणिजयद्रथ
द्रौपदीसंवादेसप्तषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६७ ॥ वैशंपायनउवाच ॥ सरोषरागोपहतेनवल्गुनासरागनेत्रेणनतोन्नतभ्रुवा ॥ मुखेनविस्फूर्यसुवीरराष्ट्रपं
ततोऽब्रवीत्तंद्रुपदात्मजापुनः १ यशस्विनस्तीक्ष्णविषान्महारथानभिब्रुवन्मूढनलज्जसेकथम् ॥ महेंद्रकल्पान्निरतान्स्वकर्मसुस्थितान्समूहेष्वपियक्षरक्षसाम् २

१९ । २० । २१ । २२ । २३ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे सप्तषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६७ ॥ ॥ सरोषेति रोषेणरागोरक्तिमातेनसहितंसरोषरागं तदुपहतंच म्लानंचतेनवल्गुनासुंदरेण नतेस्वभावतउन्नतेक्रोधेनभ्रुवौयास्यास्तथा विस्फूर्यफूत्कारंकृत्वा १ अभिअभिक्रम्यब्रुवन् स्थितानचलान् यक्षादिभिरप्यजेयानित्यर्थः २

ईदृशंस्तुत्यं वनेचरंवानप्रस्थं पापंपापवचनं प्रवदंतिसंतइतिशेषः श्वनराःशुनकतुल्यानरास्त्वादृशास्तुएवमुकरीत्याभर्षंतिब्रुवंति ३ क्षत्रियसंनिवेशेनृपसमाजे पातालमुखेमहागर्ते प्रतिसंहरेत्प्रति बंधेत ४ उपत्यकामद्रिसमीपभूमिं दंडीदंडमात्रायुधो यूथात्समूहादपसेधसिअपकर्षसि ५ बाल्यात्मौढ्यात् पक्ष्माणिमुखोपरिस्थकेशान् पदासमाहत्यलुनासिछिनत्सि ६ ।७ ।८ वेण्वादयःफ लितापवनश्यंति कर्कटीचपरिणतगर्भानश्यतीतिलोकप्रसिद्धं ९ विभीषणेनभयप्रदर्शनेन १० वयमिति सप्तदशअष्टौकर्माणिनवशक्त्यादयश्चनित्यंसंतिवेषुतानिसप्तदशानि नित्ययोगेमत्वर्थीयो र्शआद्यच् । तत्र'कृषिर्वणिक्पथोदुर्गंसेतुःकुंजरबंधनं ॥ खन्याकरकरादानंशून्यानांचनिवेशनं ॥ अष्टौसंधानकर्माणिनियुक्तानिमनीषिभिः' इतिकर्माष्टकंकोशवृद्धिकरं तथा प्रभुशक्तिर्मंत्रशक्ति रुत्साहशक्तिः प्रभुसिद्धिर्मंत्रसिद्धिरुत्साहसिद्धिः प्रभूदयोमंत्रोदयउत्साहोदयः प्रभुत्वादीनांस्वरूपतःसामर्थ्यतः फलतश्चयेषुनित्ययोगइत्यर्थः अनवमेषुअनीचेषु षड्भ्योगुणेभ्यः त्यक्तो

नकिंचिदीदृशंप्रवदंतिपापंवनेचरंवागृहमेधिनंवा ॥ तपस्विनंसंपरिपूर्णविद्यंभषंतिहैवंश्वनराःसुवीर ३ अहंतुमन्येतवनास्तिकश्चिदेतादृशेक्षत्रियसंनिवेशे ॥ यस्त्वा
द्यपातालमुखेपतंतंपाणौगृहीत्वाप्रतिसंहरेत ४ नागंप्रभिन्नंगिरिकूटकल्पमुपत्यकांहैमवतींचरंतम् ॥ दंडीवयूथादपसेधसित्वंयोजेतुमाशंससिधर्मराजम् ५ बाल्या
त्प्रसुप्तस्यमहाबलस्यसिंहस्यपक्ष्माणिमुखाल्लुनासि ॥ पदासमाहत्यपलायमानःक्रुद्धंयदाद्रक्ष्यसिभीमसेनम् ६ महाबलंघोरतरंप्रवृद्धंजातंहरिंपर्वतकंदरेषु ॥ प्रसुप्त
मुग्रंप्रपदेनहंसियःक्रुद्धमायोत्स्यसिजिष्णुमुग्रम् ७ कृष्णोरगौतीक्ष्णमुखौद्विजिह्वौमत्तःपदाऽऽक्रामसिपुच्छदेशे ॥ यःपांडवाभ्यांपुरुषोत्तमाभ्यांजघन्यजाभ्यां
प्रयुयुत्ससेत्वम् ८ यथाचवेणुःकदलीनलोवाफलंत्यभावायनभूतयेऽऽत्मनः ॥ तथैवमांतैःपरिरक्ष्यमाणामादास्यसेकर्कटकीवगर्भम् ९ ॥ जयद्रथउवाच ॥ जा
नामिकृष्णेविदितंममैतद्यथाविधास्तेनरदेवपुत्राः ॥ नत्वेवमेतेनविभीषणेनशक्यावयंत्रासयितुंत्वयाद्य १० वयंपुनःसप्तदशेषुकृष्णेकुलेषुसर्वेऽनवमेषुजाताः ॥
षड्भ्योगुणेभ्योऽभ्यधिकाविहीनान्मन्यामहेद्रौपदिपांडुपुत्रान् ११ साक्षिप्रमातिष्ठगजंरथंवानवाक्यमात्रेणवयंहिशक्याः ॥ आशंसवात्वंकृपणंवदंतीसौवीररा
जस्यपुनःप्रसादम् १२ ॥ द्रौपद्युवाच ॥ महाबलाकिंत्विहदुर्बलेवसौवीरराजस्यमताऽहमस्मि ॥ नाहंप्रमाथादिहसंप्रतीतासौवीरराजंकृपणंवदेयम् १३ यस्याहि
कृष्णौपदवींचरेतांसमास्थितावेकरथेसमेतौ ॥ इंद्रोऽपितांनापहरेत्कथंचिन्मनुष्यमात्रःकृपणःकुतोऽन्यः १४ यथाकिरीटीपरवीरघातीनिघ्नन्रथस्थोद्विषतांम
नांसि ॥ मदंतरेत्वद्ध्वजिनींप्रवेष्टाकक्षंदहन्नग्निरिवोष्णगेषु १५ जनार्दनःसांधकवृष्णिवीरोमहेष्वासाःकेकयाश्चापिसर्वे ॥ एतेहिसर्वेममराजपुत्राःप्रहृष्टरूपाः
पदवींचरेयुः १६ मौर्वीविसृष्टाःस्तनयित्नुघोषागांडीवमुक्तास्त्वतिवेगवंतः ॥ हस्तंसमाहत्यधनंजयस्यभीमाःशब्दंघोरतरंनदंति १७

पेयंचमी षड्गुणान्प्राप्य पांडवेभ्योऽभ्यधिकाःतेचशौर्यंतेजोधृतिर्दाक्षिण्यदानैश्वर्याणि भवताऽप्युक्ताः शौर्यंतेजइतिय त्रयुद्धेचाप्यपलायनंशौर्यंपर्वांतर्भूतमितिषडेवक्षत्रियकर्माणि तस्यगुणत्वेनोच्यंते संधिविग्रहयानास नद्वैधीभावाश्रयाख्यास्तुगुणानीतिशास्त्रोक्तानेहग्राह्यंतेतेषांसर्वेषामुत्कर्षानाधायकत्वात् हीनबलएवसंधिद्वैधादीनिइच्छतिनप्रबलइति ११ शक्याःनिवारयितुमितिशेषः पुनरितिपांडवपराज यानंतरंवाइदानीमेववा त्वंमत्प्रसादमाशंसप्रार्थय १२ प्रमाथाभिग्रहात्प्रतीतासादराप्रख्यातावा सभायांवस्त्रराशिप्रदानेनभगवदनुगृहीतत्वात् । 'प्रतीतःसादरेज्ञातेहृष्टे'इतिमेदिनी १३ कृ ष्णौवासुदेवार्जुनौ पदवींचरेतामन्वेषणंकुरुतएवेत्यर्थः १४ मदंतरेमन्निमित्तंप्रवेष्टाप्रकर्षेणवेष्टयिष्यति उष्णगेषुनिदाघेषु १५।१६ गांडीवमुक्ताइतिसूचनाच्छराइतिविशेष्यानिर्देशोनदोषाय १७

१८ अभविष्यत् भविष्यतीत्यर्थे व्यत्ययेनलङ् १९ अधमेतिच्छेदः २० । २१ संभ्रमंभयंआगतैवास्मि नतुत्वद्वशेस्थास्यामीत्यर्थः २२ । २३ । २४ । २५ । २६ । २७ । २८ ॥ इत्यारण्यके पर्वणिनीलकंठीयेभारतभावदीपेअष्टषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६८ ॥ ततइति १ महावनंकाम्यकं २ महावनंमहानालयः गृहिणीगृहमुच्यतइत्युक्तेर्गृहिणी । 'वनंनपुंसकंनीरेनिवा

गांडीवमुक्तांश्चमहाशरौघान्पतंगसंगानिवशीघ्रवेगान् ॥ यदाद्रष्टाऽस्यर्जुनंवीर्यशालिनंतदास्वबुद्धिंप्रतिनिंदितासि १८ सशंखघोषःसतलत्रघोषोगांडीवधन्वा
मुहुरूद्धहंश्च ॥ यदाशरानर्पयितातवोरसितदामनस्तेकिमिवाभविष्यत् १९ गदाहस्तंभीममभिद्रवंतंमाद्रीपुत्रौसंपतंतौदिशश्च ॥ अमर्षजंक्रोधविषंवमंतौद्
ष्ट्वाचिरंतापमुपैष्यसेऽधम २० यथावाहंनातिचरेकथंचित्पतीन्महार्हान्मनसाऽपिजातु ॥ तेनाद्यसत्येनवशीकृतंत्वांद्रष्टाऽस्मिपार्थैःपरिकृष्यमाणम् २१ नसं
भ्रमंगंतुमहंहिशक्ष्येत्वयानृशंसेनविकृष्यमाणा ॥ समागताऽहंहिकुरुप्रवीरैःपुनर्वनंकाम्यकमागताऽस्मि २२ ॥ वैशंपायनउवाच ॥ साताननुप्रेक्ष्यविशालनेत्रा
जिघृक्षमाणानवभर्त्सयंती ॥ प्रोवाचमामास्पृशतेतिभीताधौम्यंप्रचुक्रोशपुरोहितंसा २३ जग्राहतामुत्तरवस्त्रदेशेजयद्रथस्तंसमवाक्षिपत्सा ॥ तयासमाक्षिप्तत
नुःसपापःपपातशाखीवनिकृत्तमूलः २४ प्रगृह्यमाणातुमहाजवेनमुहुर्विनिःश्वस्यचराजपुत्री ॥ साऽऽकृष्यमाणारथमारुरोहधौम्यस्यपादावभिवाद्यकृष्णा ॥
२५ ॥ धौम्यउवाच ॥ नेयंशक्यात्वयानेतुमविजित्यमहारथान् ॥ धर्मंक्षत्रस्यपौराणमवेक्षस्वजयद्रथ २६ क्षुद्रंकृत्वाफलंपापंत्वंप्राप्स्यसिनसंशयः ॥ आसा
द्यपांडवान्वीरान्धर्मराजपुरोगमान् २७ ॥ वैशंपायनउवाच ॥ इत्युक्त्वाह्रियमाणांतांराजपुत्रींयशस्विनीम् ॥ अन्वगच्छत्तदाधौम्यःपदातिगणमध्यगः २८
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीहरणपर्वणिद्रौपदीहरणेअष्टषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६८ ॥ ॥ ४ ॥ वैशंपायनउवाच ॥ ततोदिशः
संप्रविहृत्यपार्थामृगान्वराहान्महिषांश्चहत्वा ॥ धनुर्धराःश्रेष्ठतमाःपृथिव्यांपृथक्चरंतःसहिताबभूवुः १ ततोमृगव्यालगणानुकीर्णंमहावनंतद्विहगोपघुष्टम् ॥
भ्रातॄंश्चतानभ्यवदद्युधिष्ठिरःश्रुत्वागिरोव्याहरतांमृगाणाम् २ आदित्यदीप्तांदिशमभ्युपेत्यमृगाद्विजाःक्रूरमिमेवदंति ॥ आयासमुग्रंप्रतिवेदयंतोमहावनंशत्रु
भिर्बाध्यमानम् ३ क्षिप्रंनिवर्तध्वमलंमृगैर्नोमनोहिमेदूयतिदह्यतेच ॥ बुद्धिंसमाच्छाद्यचमेसमन्युरुद्धूयतेप्राणपतिःशरीरे ४ सरःसुपर्णेनहृतोरगंयथाराष्ट्रंय
थाऽराजकमात्तलक्ष्मि ॥ एवंविधंमेप्रतिभातिकाम्यकंशौंडैर्यथापीतरसश्चकुंभः ५ तेसैंधवैरत्यनिलोग्रवेगैर्महाजवैर्वाजिभिरुह्यमानाः ॥ युक्तैर्बृहद्भिःसुरथैर्नृवीरा
स्तदाऽऽश्रमायाभिमुखाबभूवुः ६ तेषांतुगोमायुरनल्पघोषोनिवर्ततांवाममुपेत्यपार्श्वम् ॥ प्रव्याहरत्तंप्रविमृश्यराजाप्रोवाचभीमंचधनंजयंच ७

सालयकानने' इतिमेदिनी । महाधनमितिपाठेमहद्धनंधनंचेतिविस्त्रीरूपमेवधनं ३ समाच्छाद्यमोहयित्वा समन्युःदैन्यसहितः प्राणानामाध्यात्मिकानामिंद्रियाणांपतिर्मुख्यःप्राणः ४ अ
राजकंराजहीनं शौंडैःशुंडयाविदितैर्गजैःपीतरसःपीतजलः यथादासीमुदकुंभंनयंतीमनुलक्ष्यमहामात्रस्तयाऽज्ञातमेव गजंतत्पृष्ठतोनीत्वा तेनतज्जलंशोषयति साचाकस्माद्घटंलघुतयारिक्त
श्चाज्ज्ञानातितद्वत् अस्माभिरज्ञातोऽस्मद्धनंकश्चिद्धरिष्यति तद्वारिक्तकुंभवद्वनंपश्चाद्द्रक्ष्यामइत्यर्थः ५ सैंधवैःसिंधुदेशजैर्वाजिभिरश्वैः सुरथैःशोभनरथैः समानाधिकरणंतृतीयात्रयं ६ । ७

८ प्रेष्यवधूदासभार्याम् ९ अंतितरःसमीपतरः आर्ततरइतिपाठः १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ पुरायावदनर्हतेतथुंनददाति तावच्छीघ्रमनुयातेतिचतुर्थेनसंबंधः १९
यथाव्रदस्येपविहीनयोनिःशालावृकोवाममुपेत्यपार्श्वम् ॥ सुव्यक्तमस्मानवमन्यपापैःकृतोऽभिमर्दःकुरुभिःप्रसह्य ८ इत्येवतेतद्वनमाविशंतोमहत्यरण्येमृगयां
चरित्वा ॥ बालामपश्यंततदारुदंतींधात्रेयिकांप्रेष्यवधूंप्रियायाः ९ तामिंद्रसेनस्त्वरितोऽभिसृत्यरथादवप्लुत्यततोऽभ्यधावत् ॥ प्रोवाचचैनांवचनंनरेंद्रधात्रेयि
कामंतितरस्तदानीम् १० किंरोदिषित्वंपतिताधरण्यांकिंतेमुखंशुष्यतिदीनवर्णम् ॥ कच्चिन्नपापैःसुनृशंसकृद्भिःप्रमाथिताद्रौपदीराजपुत्री ११ अचिंत्यरू
पासुविशालनेत्राशरीरतुल्याकुरुपुंगवानाम् ॥ यद्येवदेवीपृथिवींप्रविष्टादिवंप्रपन्नाऽप्यथवासमुद्रम् १२ तस्यागमिष्यंतिपदेहिपार्थायथाहिसंतप्यतिधर्मपु
त्रः ॥ कोहीदृशानामरिमर्दनानांक्लेशक्षमाणामपराजितानाम् १३ प्राणैःसमामिष्टतमांजिहीर्षेदनुत्तमंरत्नमिवप्रमूढः ॥ नबुध्यतेनाथवतीमिहाद्यबाहेश्चरंहृ
दयंपांडवानाम् १४ कस्याद्यकायंप्रतिभिद्यघोरामहींप्रवेक्ष्यंतिशिताःशराग्र्याः ॥ मात्वंशुचस्तांप्रतिभीरुविद्धियथाऽद्यकृष्णापुनरेष्यतीति १५ निहत्यस
र्वान्द्विषतःसमग्रान्पार्थाःसमेष्यंत्यथयाज्ञसेन्या ॥ अथाब्रवीच्चारुमुखंविमृज्यधात्रेयिकासारथिमिंद्रसेनम् १६ जयद्रथेनापहृताप्रमथ्यपंचेंद्रकल्पान्परिभूय
कृष्णा ॥ तिष्ठंतिवर्त्मानिनवान्यमूनिवृक्षाश्चनम्लांतितथैवभग्नाः १७ आवर्तयध्वंह्यनुयातशीघ्रंनदूरयातैवहिराजपुत्री ॥ सन्नह्यध्वंसर्वएवेंद्रकल्पामहांतिचा
रूणिचदंशनानि १८ गृह्णीतचापानिमहाधनानिशरांश्चशीघ्रंपदवींचरध्वम् ॥ पुराहिनिर्भर्त्सनदंडमोहिताप्रमोहचित्तावदनेनशुष्यता १९ ददातिकस्मैचि
दनर्हतेतनुंवराज्यपूर्णामिवभस्मनिस्रुचम् ॥ पुरातुषाग्नाविवहूयतेहविःपुराश्मशानेस्रगिवापविध्यते २० पुराचसोमोऽध्वरगोऽवलिह्यतेशुनायथाविप्रजनेप्रमो
हिते ॥ महत्यरण्येमृगयांचरित्वापुराशृगालोनलिनींविगाहते २१ मावःप्रियायाःसुनसंसुलोचनंचंद्रप्रभाच्छंवदनंप्रसन्नम् ॥ स्पृश्याच्छुभंकश्चिदकृत्यकारी
श्वावैपुरोडाशमिवाध्वरस्थम् ॥ एतानिवर्त्मान्यनुयातशीघ्रंमावःकालःक्षिप्रमिहात्यगाद्वै २२ ॥ युधिष्ठिरउवाच ॥ भद्रेप्रतिक्रामनियच्छवाचंमाऽस्म
त्सकाशेपरुषाण्यवोचः ॥ राजानोवायदिवाराजपुत्राबलेनमत्तावंचनांप्राप्नुवंति २३ ॥ वैशंपायनउवाच ॥ एतावदुक्त्वाप्रययुर्हिशीघ्रंतान्येववर्त्मान्यनुवर्तमा
नाः ॥ मुहुर्मुहुर्व्यालवदुच्छ्वसंतोज्यांविक्षिपंतश्चमहाधनुर्भ्यः २४ ततोऽपश्यंस्तस्यसैन्यस्यरेणुमुद्धूतंवैवाजिखुरप्रणुन्नम् ॥ पदातीनांमध्यगतंचधौम्यंविक्रोशं
तंभीममभिद्रवेति २५ तेसांत्व्यधौम्यंपरिदीनसत्वाःसुखंभवानेत्वितिराजपुत्राः ॥ श्येनायथैवामिषसंप्रयुक्ताजवेनतत्सैन्यमथाभ्यधावन् २६ तेषांमहेंद्रोपम
विक्रमाणांसंरब्धानांधर्षणायाज्ञसेन्याः ॥ क्रोधःप्रजज्वालजयद्रथंचदृष्ट्वाप्रियांतस्यरथेस्थितांच २७

२० । २१ । २२ प्रतिक्रामदूरेभव परुषाणि अनर्हते तनुंददातीत्यादीनि दुःश्राव्याणिमत्तत्वात् वंचनां स्वजनस्य तद्वैवधकर्मा २३ । २४ । २५ । २६ धर्षणात्पराभवात् २७

२८ ॥ इत्या० प० नी० भा० ऊनसप्तत्यधिकद्विशततमोऽध्यायः ॥ २६९ ॥ ततइति १ । २ । ३ अनायुष्यमायुर्नाशकंमृत्युदमित्यर्थः ४ । ५ ।६। ७ परेहि शरणंगच्छ एनंधर्मराजम् ८।९

प्रचुकुशुश्चाप्यथसिंधुराजंवृकोदरश्चैवधनंजयश्च ॥ यमौचराजाचमहाधनुर्धरास्ततोदिशःसंमुमुहुःपरेषाम् २८ ॥इतिश्रीमहाभारतेआरण्यकेप० द्रौ० ह० प० पार्थागमनेऊनसप्तत्यधिकद्विशततमोऽध्यायः ॥ २६९ ॥ वैशंपायनउवाच ॥ ततोघोरतरःशब्दोवनेसमभवत्तदा ॥ भीमसेनार्जुनौदृष्ट्वाक्षत्रियाणाममर्षिणाम् १ तेषांध्वजाग्राण्यभिवीक्ष्यराजास्वयंदुरात्माकुरुपुंगवानाम् ॥ जयद्रथोयाज्ञसेनीमुवाचरथेस्थितांभानुमतींहतौजाः २ आयांतीमेपंचरथामहांतोमन्येच कृष्णेपतयस्तवैते ॥ साजानतीख्यापयनःसुकेशिपरंपरंपांडवानांरथस्थम् ३ ॥ द्रौपद्युवाच ॥ किंतेज्ञातैर्मूढमहाधनुर्धरैरनायुष्यंकर्मकृत्वाऽतिघोरम् ॥ एतेवीराःपतयोमेसमेतानवःशेषःकश्चिदिहास्तियुद्धे ४ आख्यातव्यंत्वेवसर्वंमुमूर्षोर्मयातुभ्यंपृष्टयाधर्मएषः ॥ नमेव्यथाविद्यतेत्वद्भयंवासंपश्यंत्याःसानुजंधर्मराजम् ५ यस्यध्वजाग्रेनदतोमृदंगौनंदोपनंदौमधुरौयुक्तरूपौ ॥ एतंस्वधर्मार्थविनिश्चयज्ञंसदाजनाःकृत्यवंतोऽनुयांति ६ यएषजांबूनदशुद्धगौरःप्रचंडघोणस्तनुरायताक्षः ॥ एतंकुरुश्रेष्ठतमंवदंतियुधिष्ठिरंधर्मसुतंपतिंमे ७ अप्येषशत्रोःशरणागतस्यदद्यात्प्राणान्धर्मचारीनृवीरः ॥ परेह्येनंमूढजवेनभूतयेत्वमात्मनःप्रांजलिर्न्यस्तशस्त्रः ८ अथाप्येनंपश्यसियंरथस्थंमहाभुजंशालमिवप्रवृद्धम् ॥ संदष्टौष्ठंभ्रुकुटीसंहतभ्रुवंवृकोदरोनामपतिर्ममैषः ९ आजानेयाबलिनःसाधुदांतामहाबलाःशूरमुदावहंति ॥ एतस्यकर्माण्यतिमानुषाणिभीमेतिशब्दोऽस्यगतःपृथिव्याम् १० नास्यापराद्धाःशेषमवाप्नुवंतिनायंवैरंविस्मरतेकदाचित् ॥ वैरस्यांतंसंविधायोपयातिपश्चाच्छांतिंनचगच्छत्यतीव ११ धनुर्धराग्र्योधृतिमान्यशस्वीजितेंद्रियोवृद्धसेवीनृवीरः ॥ भ्राताचशिष्यश्चयुधिष्ठिरस्यधनंजयोनामपतिर्ममैषः १२ योवैनकामान्नभयान्नलोभात्त्यजेद्धर्मंननृशंसंचकुर्यात् ॥ सएषवैश्वानरतुल्यतेजाःकुंतीसुतःशत्रुसहःप्रमाथी १३ यःसर्वधर्मार्थविनिश्चयज्ञोभयार्तानांभयहर्तामनीषी ॥ यस्योत्तमंरूपमाहुःपृथिव्यांयंपांडवाःपरिरक्षंतिसर्वे १४ प्राणैर्गरीयांसमनुव्रतंवैसएषवीरोनकुलःपतिर्मे ॥ यःखड्गयोधीलघुचित्रहस्तोमहांश्चधीमान्सहदेवोऽद्वितीयः १५ यस्याद्यकर्मद्रक्ष्यसेमूढसत्वशतक्रतोर्वादैत्यसेनासुसंख्ये ॥ शूरःकृतास्त्रोमतिमान्मनस्वीप्रियंकरोधर्मसुतस्यराज्ञः १६ यएषचंद्रार्कसमानतेजाजघन्यजःपांडवानांप्रियश्च ॥ बुद्ध्यासमोयस्यनरोनविद्यतेवक्तातथासत्सुविनिश्चयज्ञः १७ सएषशूरोनित्यममर्षणश्चधीमान्प्राज्ञःसहदेवःपतिर्मे ॥ त्यजेत्प्राणान्प्रविशेद्धव्यवाहंनत्वेवैषव्याहरेद्धर्मबाह्यम् १८ सदामनस्वीक्षत्रधर्मेरतश्चकुंत्याःप्राणैरिष्टतमोनृवीरः ॥ विशीर्यंतींनावमिवार्णवांतेरत्नाभिपूर्णांमकरस्यपृष्ठे १९

आजानेयाअश्वविशेषाः १० अपराद्धाःअपराधवंतः शेषंजीवनंवैरस्यांतंशत्रुनाशंसंविधाय आत्रस्योपयाति कुर्वन्नपिअतीवशांतिंनोपैतीति मरणांतानिवैरणीतिलोकेप्रसिद्धं अयंतुमारयित्वापिपुत्रपौत्रादिकमपिनशेषयतीत्यर्थः यंदीर्घकोपित्वमुक्तम् ११ । १२ । १३ यंपरिरक्षंतिसनकुलःइतिद्वयोःसंबंधः १४ । १५ मूढसत्वमूढबुद्धे शतक्रतोर्वाशतक्रतोरिव १६ । १७ ।१८ । १९ ॥२११॥

जीवएवजीवन्नेवअमृत्वैवपुनर्जन्मप्राप्स्यसे २० । २१ ॥ इत्यार० प० नी० भा० भा० सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७० ॥ संतिष्ठतेति १ । २ । ३ । ४ अंतरमभ्यहारयत् भीम

सेनांतवेमांहतसर्वयोधांविक्षोभितांद्रक्ष्यसिपांडुपुत्रैः ॥ इत्येतेवैकथिताःपांडुपुत्रायांस्त्वंमोहादवमन्यप्रवृत्तः ॥ यद्येतेभ्योमुच्यसेऽरिष्टदेहःपुनर्जन्मप्राप्स्यसेजीवएव २० ॥ वैशंपायनउवाच ॥ ततःपार्थाःपंचपंचेंद्रकल्पास्त्यक्त्वात्रस्तांप्रांजलींस्तान्पदातीन् ॥ यथानीकंशरवर्षांधकारंचक्रुःक्रुद्धाःसर्वतःसंनिगृह्य २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीहरणप० द्रौपदीवाक्येसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७० ॥ ॥ छ ॥ ॥ वैशंपायनउवाच ॥ संतिष्ठतप्रहरततूर्णंविपरिधावत ॥ इतिस्मसैंधवोराजाचोदयामासतान्नृपान् १ ततोघोरतमःशब्दोरणेसमभवत्तदा ॥ भीमार्जुनयमान्दृष्ट्वासैन्यानांसयुधिष्ठिरान् २ शिबिसौवीरसिंधूनांविषादश्चाप्यजायत ॥ तान्दृष्ट्वापुरुषव्याघ्रान्व्याघ्रानिवबलोत्कटान् ३ हेमचित्रसमुत्सेधांसर्वशैक्यायसींगदाम् ॥ प्रगृह्याभ्यद्रवद्भीमःसैंधवंकालचोदितम् ४ तदंतरमथावृत्यकोटिकास्योऽभ्यहारयत् ॥ महतारथवंशेनपरिवार्यवृकोदरम् ५ शक्तितोमरनाराचैर्वीरबाहुप्रचोदितैः ॥ कीर्यमाणोऽपिबहुभिर्नस्मभीमोऽभ्यकंपत ६ गजंतुसगजारोहंपदातींश्चचतुर्दश ॥ जघानगदयाभीमःसैंधवध्वजिनीमुखे ७ पार्थःपंचशतान्शूरान्पार्वतीयान्महारथान् ॥ परीप्समानःसौवीरंजघानध्वजिनीमुखे ८ राजास्वयंसुवीराणांप्रवराणांप्रहारिणाम् ॥ निमेषमात्रेणशतंजघानसमरेतदा ९ ददृशेनकुलस्तत्ररथात्प्रस्कंद्यखड्गधृक् ॥ शिरांसिपादरक्षाणांबीजवत्प्रवपन्मुहुः १० सहदेवस्तुसंयायरथेनगजयोधिनः ॥ पातयामासनाराचैर्द्रुमेभ्यइवबर्हिणः ११ ततस्त्रिगर्तःसधनुरवतीर्यमहारथात् ॥ गदयाचतुरोवाहान्राज्ञस्तस्यतदाऽवधीत् १२ तमभ्याशगतंराजापदातिंकुंतिनंदनः ॥ अर्धचंद्रेणबाणेनविव्याधोरसिधर्मराट् १३ सभिन्नहृदयोवीरोवक्त्राच्छोणितमुद्वमन् ॥ पपाताभिमुखःपार्थंछिन्नमूलइवद्रुमः १४ इंद्रसेनद्वितीयस्तुरथात्प्रस्कंद्यधर्मराट् ॥ हताश्वःसहदेवस्यप्रतिपेदेमहारथम् १५ नकुलंत्वभिसंधायक्षेमंकरमहामुखौ ॥ उभावुभयतस्तीक्ष्णैःशरवर्षैरवर्षताम् १६ तोमरैरभिवर्षंतौजीमूताविववार्षिकौ ॥ एकैकेनविपाठेनजघ्नेमाद्रवतीसुतः १७ त्रिगर्तराजःसुरथस्तस्याथरथधूर्गतः ॥ रथमाक्षेपयामासगजेनगजयानवित् १८ नकुलस्त्वपभीस्तस्माद्रथाच्चर्मासिपाणिमान् ॥ उद्भ्रांतंस्थानमास्थायतस्थौगिरिरिवाचलः १९ सुरथस्तंगजवरंवधायनकुलस्यतु ॥ प्रेषयामाससक्रोधमत्युच्छ्रितकरंततः २० नकुलस्तस्यनागस्यसमीपपरिवर्तिनः ॥ सविषाणंभुजंमूलेखड्गेननिरकृंतत २१ सविनद्यमहानादंगजःकिंकिणिभूषणः ॥ पतन्नवाक्शिराभूमौहस्त्यारोहमपोथयत् २२ सतत्कर्ममहत्कृत्वाशूरोमाद्रवतीसुतः ॥ भीमसेनरथंप्राप्यशर्मलेभेमहारथः २३ भीमस्त्वापततोराज्ञःकोटिकास्यस्यसंगरे ॥ सूतस्यनुदतोवाहान्क्षुरेणापाहरच्छिरः २४

जयद्रथयोर्मध्ये प्रवेशेनव्यवधानंकृतवान् । रथवंशेनरथवर्गेण ५। ६। ७ । ८। ९ । १०।११।१२।१३।१४।१५।१६।१७।१८।१९।२० सविषाणंभुजं सदंतंशुंडादंडं मूलेगंडप्रदेशे २१।२२।२३।२४

२५ तलयुक्तेनमुष्टियुक्तेन 'तलंस्वरूपे। इत्युपक्रम्य। चपेटेतसरौ' इतिमेदिनी त्सरुःखड्गादिमुष्टिः २६। २७। २८। २९। ३०। ३१। ३२। ३३। ३४ आदिश्यनामविश्राव्य ३५ सैनिकान्

नतुबोधहतंसूतंसराजाबाहुशालिना ॥ तस्याश्वाव्यद्रवन्संख्येहतसूतास्ततस्ततः २५ विमुखंहतसूतंतंभीमःप्रहरतांवरः ॥ जघानतलयुक्तेनप्रासेनाभ्येत्य पांडवः २६ द्वादशानांतुसर्वेषांसौवीराणांधनंजयः ॥ चकर्तनिशितैर्भल्लैर्धनूंषिचशिरांसिच २७ शिबीनिक्ष्वाकुमुख्यांश्चत्रिगर्तान्सैंधवानपि ॥ जघानातिरथःसंख्येबाणगोचरमागतान् २८ सादिताःप्रत्यदृश्यंतबहवःसव्यसाचिना ॥ सपताकाश्चमातंगाःसध्वजाश्चमहारथाः २९ प्रच्छाद्यपृथिवींतस्थुःसर्वमायोधनंप्रति ॥ शरीराण्यशिरस्कानिविदेहानिशिरांसिच ३० श्वगृध्रकंककाकोलभासगोमायुवायसाः ॥ अतृप्यंस्तत्रवीराणांहतानांमांसशोणितैः ३१ हतेषुतेषुवीरेषुसिंधुराजोजयद्रथः ॥ विमुच्यकृष्णांसंत्रस्तःपलायनमनाऽभवत् ३२ सतस्मिन्संकुलेसैन्येद्रौपदीमवतार्यताम् ॥ प्राणप्रेप्सुरुपाधावद्वनंयेननराधमः ३३ द्रौपदींधर्मराजस्तुदृष्ट्वाधौम्यपुरस्कृताम् ॥ माद्रीपुत्रेणवीरेणरथमारोपयत्तदा ३४ ततस्तद्विद्रुतंसैन्यमपयातेजयद्रथे ॥ आदिश्यादिश्यनाराचैराजघानवृकोदरः ३५ सव्यसाचीतुतंदृष्ट्वापलायंतंजयद्रथम् ॥ वारयामासनिघ्नंतंभीमंसैंधवसैनिकान् ३६ ॥ अर्जुनउवाच ॥ यस्यापचारात्प्राप्तोऽयमस्मान्क्लेशोदुरासदः ॥ तमस्मिन्समरोद्देशेनपश्यामिजयद्रथम् ३७ तमेवान्विषभद्रंतेकिंतेयोधैर्निपातितैः ॥ अनामिषमिदंकर्मकथंवामन्यतेभवान् ३८ ॥ वैशंपायनउवाच ॥ इत्युक्तोभीमसेनस्तुगुडाकेशेनधीमता ॥ युधिष्ठिरमभिप्रेक्ष्यवाग्मीवचनमब्रवीत् ३९ हतप्रवीरारिपवोभूयिष्ठंविद्रुतादिशः ॥ गृहीत्वाद्रौपदींराजन्निवर्ततुभवानितः ४० यमाभ्यांसहराजेंद्रधौम्येनचमहात्मना ॥ प्राप्याश्रमपदंराजन्द्रौपदींपरिसांत्वय ४१ नहिमेमोक्ष्यतेजीवन्मूढःसैंधवकोनृपः ॥ पातालतलसंस्थोऽपियदिशक्रोऽस्यसारथिः ४२ ॥ युधिष्ठिरउवाच ॥ नहंतव्योमहाबाहोदुरात्माऽपिससैंधवः ॥ दुःशलामभिसंस्मृत्यगांधारींचयशस्विनीम् ४३ ॥ वैशंपायनउवाच ॥ तच्छ्रुत्वाद्रौपदीभीममुवाचव्याकुलेंद्रिया ॥ कुपिताह्रीमतीप्राज्ञापतीभीमार्जुनावुभौ ४४ कर्तव्यंचेत्प्रियंमह्यंवध्यःसपुरुषाधमः ॥ सैंधवापसदःपापोदुर्मतिःकुलपांसनः ४५ भार्याभिहर्तावैरीयोयश्चराज्यहरोरिपुः ॥ याचमानोऽपिसंग्रामेनमोक्तव्यःकथंचन ४६ इत्युक्तौतौनरव्याघ्रौययतुर्यत्रसैंधवः ॥ राजानिववृतेकृष्णामादायसपुरोहितः ४७ सप्रविश्याश्रमपदमपविद्धबृसीमठम् ॥ मार्कंडेयादिभिर्विप्रैरनुकीर्णंददर्शह ४८ द्रौपदीमनुशोचद्भिर्ब्राह्मणैस्तैःसमाहितैः ॥ समियायमहाप्राज्ञःसभार्योभ्रातृमध्यगः ४९ तेस्मतंमुदितादृष्ट्वापुनःप्रत्यागतंनृपम् ॥ जित्वातान्सिंधुसौवीरान्द्रौपदींचाहृतांपुनः ५०

निघ्नंतंभीमंवारयामास ३६ समरोद्देशेरणभूमौ ३७ अन्विषअन्विच्छ ३८। ३९। ४०। ४१। ४२ दुःशलांदुर्योधनभगिनीम् ४३। ४४। ४५। ४६। ४७ अपविद्धाइतस्ततो विशीर्णा बृस्योऋषीणामासनानि मठाश्चच्छात्राणामालयायत्रयत् ४८। ४९। ५० ॥२२०॥

५१। ५२। ५३। ५४। ५५ अतिविक्रमयुक्तानिकर्माणि ५६। ५७। ५८। ५९। ६० ॥ इत्यारण्यकेपर्वणिनैलकंठीये भारतभावदीपे एकसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७१ ॥
जयद्रथस्त्विति १। २ अत्रास्यजयद्रथस्यपरदारहर्तुःक्षत्रियाधमत्वात्पंचधामारणमुक्तंशिरोगृहीत्वेत्यादिना शिरःकेशेष्वित्यर्थः ताडयामासचपेटाभिरितिशेषः यथोक्तंनीतिशास्त्रे। 'वामपा

सतैःपरिवृतोराजातत्रैवोपविवेशह ॥ प्रविवेशाश्रमंकृष्णायमाभ्यांसहभाविनी ५१ भीमसेनार्जुनौचापिश्रुत्वाक्रोशगतंरिपुम् ॥ स्वयमश्वांस्तुदंतौतौजवेनैवाभ्यधावताम् ५२ इदमत्यद्भुतंचात्रचकारपुरुषोऽर्जुनः ॥ क्रोशमात्रगतानश्वान्सैंधवस्यजघानयत् ५३ साहिदिव्यास्त्रसंपन्नःकृच्छ्रकालेऽप्यसंभ्रमः ॥ अकरोद्दुष्करंकर्मशरैरस्त्रानुमंत्रितैः ५४ ततोऽभ्यधावतांवीरावुभौभीमधनंजयौ ॥ हताश्वंसैंधवंभीतमेकंव्याकुलचेतसम् ५५ सैंधवस्तुहतान्दृष्ट्वातथाऽश्वान्स्वान्सुदुःखितः ॥ अतिविक्रमकर्माणिकुर्वाणंचधनंजयम् ५६ पलायनकृतोत्साहःप्राद्रवद्येनवैवनम् ॥ सैंधवंत्वभिसंप्रेक्ष्यपराक्रांतंपलायने ५७ अनुयायमहाबाहुःफाल्गुनोवाक्यमब्रवीत् ॥ अनेनवीर्येणकथंस्त्रियंप्रार्थयसेबलात् ५८ राजपुत्रनिवर्तस्वनतेयुक्तंपलायनम् ॥ कथंह्यनुचरान्हित्वाशत्रुमध्येपलायसे ५९ इत्युच्यमानःपार्थेनसैंधवोनन्यवर्तत ॥ तिष्ठतिष्ठेतितंभीमःसहसाऽभ्यद्रवद्बली ॥ मावधीरितिपार्थस्तंदयावान्प्रत्यभाषत ६० ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिद्रौपदीहरणपर्वणिजयद्रथपलायनेएकसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७१ ॥ ॥ समाप्तंचद्रौपदीहरणपर्व ॥ ॥ अथजयद्रथविमोक्षणपर्व ॥ ॥ वैशंपायनउवाच ॥ जयद्रथस्तुसंप्रेक्ष्यभ्रातरावुद्यतावुभौ ॥ प्राधावत्तूर्णमव्यग्रोजीवितेप्सुःसुदुःखितः १ तंभीमसेनोधावंतमवतीर्यरथाद्बली ॥ अभिद्रुत्यनिजग्राहकेशपक्षेह्यमर्षणः २ समुद्यम्यचतंभीमोनिष्पिपेषमहीतले ॥ शिरोगृहीत्वाराजानंताडयामासचैवह ३ पुनःसंजीवमानस्यतस्योत्पतितुमिच्छतः ॥ पदामूर्ध्निमहाबाहुःप्राहरद्विलपिष्यतः ४ तस्यजानूददौभीमोजघ्नेचैनमरत्निना ॥ समोहमगमद्राजाप्रहारवरपीडितः ५ सरोषंभीमसेनंतुवारयामासफाल्गुनः ॥ दुःशलायाःकृतेराजायत्तदाऽऽहेतिकौरव ६ ॥ भीमसेनउवाच ॥ नायंपापसमाचारोमत्तोजीवितुमर्हति ॥ कृष्णायास्तदनर्हायाःपरिक्लेष्टानराधमः ७ किंनुशक्यंमयाकर्तुंयद्राजासततंघृणी ॥ त्वंचबालिशयाबुद्ध्यासदैवास्मान्प्रबाधसे ८ एवमुक्त्वासटास्तस्यपंचचक्रेवृकोदरः ॥ अर्धचंद्रेणबाणेनकिंचिदब्रुवतस्तदा ९ विकत्थयित्वाराजानंततःप्राहवृकोदरः ॥ जीवितुंचेच्छसेमूढहेतुंमेगदतःशृणु १० दासोऽस्मीतितथावाच्यंसंसत्सुचसभासुच ॥ एवंतेजीवितंदद्यामेषयुद्धजितोविधिः ११ एवमस्त्वितितंराजाकृष्यमाणोजयद्रथः ॥ प्रोवाचपुरुषव्याघ्रंभीममाहवशोभिनम् १२

णिकचोत्पीडाभूमौनिष्पेषणंबलात् ॥ मूर्ध्निपादप्रहरणंजानुनोदरमर्दनं ॥ मालूराकारयामुष्ट्याकपोलेदृढताडनं ॥ कफोणिपातोप्यसकृत्सर्वतस्तलताडनं ॥ तालेनयुद्धेभ्रमणंमारणंस्मृतमष्टधेति ॥ चतुर्भिःक्षत्रियंहन्यात्पंचभिःक्षत्रियाधमम् ॥ षड्भिर्वैश्यंसप्तभिस्तुशूद्रंसंकरमष्टभिः' इति ३। ४। ५। ६। ७ घृणीदयावान् बालिशयास्वल्पया बाधसे शत्रुंहंतुंनददासि ८ सटाःजटाःकेशसंनिवेशे मध्येमध्येपंचसुस्थानेष्वर्धचंद्रेणबाणेनक्षौरवद्वापयामासेत्यर्थ ९। १०। ११। १२

१३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ बलिमुपहारं २६ । २७ । २८ नारायणःसहायोयस्यतंनारायणसहायकं २९ शरंशृणातिहिनस्तीतिशर मस्त्रं ३० नारायणसहायस्याजेयत्वंवक्तुंनारायणमाहात्म्यमेवाह देवदेवइत्यादिना देवानांद्योतकानांसूर्यचंद्राग्निचक्षुर्मनोवाचांज्योतिषां देवःप्रकाशकः । 'येनसूर्यस्तपतितेजसेद्धःयेनचक्षूंषिपश्यंति' इत्यादिश्रुतिभ्यः । अनंतस्त्रिविधपरिच्छेदशून्यआत्मास्वरूपंयस्य । प्रधानंत्रिगुणात्मिकामाया पुरुषश्चिद्रूपस्तदुभयात्माचिदचिन्मयः । अव्यक्तोजगत्कारणरूपोबीजांतर्गत

ततएनंविचेष्टंतंबद्ध्वापार्थोवृकोदरः ॥ रथमारोपयामासविसंज्ञंपांसुगुंठितम् १३ ततस्तंरथमास्थायभीमःपार्थानुगस्तदा ॥ अभ्येत्याश्रममध्यस्थमभ्यग
च्छद्युधिष्ठिरम् १४ दर्शयामासभीमस्तुतदवस्थंजयद्रथम् ॥ तंराजाप्राहसन्दृष्ट्वामुच्यतामितिचाब्रवीत् १५ राजानंचाब्रवीद्भीमोद्रौपद्याःकथ्यतामिति ॥
दासभावंगतोह्येषपांडूनांपापचेतनः १६ तमुवाचततोज्येष्ठोभ्रातासप्रणयंवचः ॥ मुंचेममधमाचारंप्रमाणायदितेवयम् १७ द्रौपदीचाब्रवीद्भीममभिप्रेक्ष्य
युधिष्ठिरम् ॥ दासोऽयंमुच्यतांराज्ञस्त्वयापंचसटःकृतः १८ समुक्तोऽभ्येत्यराजानमभिवाद्ययुधिष्ठिरम् ॥ ववंदेविह्वलोराजंस्तांश्चदृष्ट्वामुनींस्तदा १९ तमु
वाचघृणीराजाधर्मपुत्रोयुधिष्ठिरः ॥ तथाजयद्रथंदृष्ट्वागृहीतंसव्यसाचिना २० अदासोगच्छमुक्तोऽसिमैवंकार्षीःपुनःक्वचित् ॥ स्त्रीकामंवाधिगस्तुत्वांक्षुद्रःक्षु
द्रसहायवान् २१ एवंविधंहिकःकुर्यात्त्वदन्यःपुरुषाधमः ॥ गतसत्वमिवज्ञात्वाकर्तारमशुभस्यतम् २२ संप्रेक्ष्यभरतश्रेष्ठःकृपांचक्रेनराधिपः ॥ धर्मेतेवर्धतांबु
द्धिर्माचाधर्मेमनःकृथाः २३ साश्वःसरथपादातःस्वस्तिगच्छजयद्रथ ॥ एवमुक्तस्तुसव्रीडंतूष्णींकिंचिदवाङ्मुखः २४ जगामराजन्दुःखार्तोगंगाद्वारायभार
त ॥ सदेवंशरणंगत्वाविरूपाक्षमुमापतिम् २५ तपश्चचारविपुलंतस्यप्रीतोवृषध्वजः ॥ बलिंस्वयंप्रत्यगृह्णात्प्रीयमाणस्त्रिलोचनः २६ वरंचास्मैददौदेवःस
जग्राहचतच्छृणु ॥ समस्तान्सरथान्पंचजयेयंयुधिपांडवान् २७ इतिराजाऽब्रवीद्देवंनेतिदेवस्तमब्रवीत् ॥ अजय्यांश्चाप्यवध्यांश्चवारयिष्यसितान्युधि २८
ऋतेऽर्जुनंमहाबाहुंनरंनामसुरेश्वरम् ॥ बदर्यांतप्ततपसंनारायणसहायकम् २९ अजितंसर्वलोकानांदेवैरपिदुरासदम् ॥ मयादत्तंपाशुपतंदिव्यमप्रतिमंशरम् ॥
अवापलोकपालेभ्योवज्रादीन्समहाशरान् ३० देवदेवोह्यनंतात्माविष्णुःसुरगुरुःप्रभुः ॥ प्रधानपुरुषोऽव्यक्तोविश्वात्माविश्वमूर्तिमान् ३१ युगांतकालेसंप्राप्तेकाला
ग्निर्दहतेजगत् ॥ सपर्वतार्णवद्वीपंसशैलवनकाननम् ३२ निर्दहन्नागलोकांश्चपातालतलचारिणः ॥ अथांतरिक्षेसुमहन्नानावर्णाःपयोधराः ३३ घोरस्वराविनादि
नस्तडिन्मालावलंबिनः ॥ समुत्तिष्ठन्दिशःसर्वाविवर्षंतःसमंततः ३४ ततोग्निंनाशयामासुःसंवर्ताग्निनियामकाः ॥ अक्षमात्रैश्चधाराभिस्तिष्ठंत्यापूर्यसर्वशः ३५

वटतुल्यःअतएवविश्वात्मा विश्वएवात्माचेतनांशेन विश्वमूर्तिमान्जडांशेन ३१ एवंनारायणस्यजगद्धेतुत्वमुक्त्वातस्यजगत्संहर्तृत्वमाह युगांतेति कालाग्निरूपोनारायणोनिर्दहते ३२ । ३३ विनदिनोगर्जंतः समुत्तिष्ठन्समुदतिष्ठन् । उत्तिष्ठंतीत्यर्थः ३४ नाशयामासुःपयोधराइतिपूर्वेणान्वयः अक्षमात्रैरक्षमात्राभिःस्थूलाभिः सामान्येनपुंस्त्वं । यद्वा धाराभिरितिधाराशब्द आकारांतःसोमपाशब्दवत्पुंल्लिंगः धावमानाएवरांतिआददतेछेदनीयंवस्त्वितिधाराः । राआदानेऽस्मात्क्विप् ३५ ॥२२१॥

एकार्णवेइति अवांतरप्रलयेऽस्मिन्पवननाशोक्तिर्निदाघइवतदनुपलंभमात्रपरा ३६ चतुर्युगसहस्रप्रमाणंब्रह्मणोदिनंतदंतेआप्लुतासलिलैस्तांर्हितेत्यर्थः नारायणइत्याख्या नाम यस्य । य द्वानारायणादेवआख्याप्रथायस्यसहिरण्यगर्भः सूत्रात्माविश्वाभिमानीअतएवसहस्रपादादिमान् ३७ स्वप्तुकामः स्वदिनांते फटासहस्रंफणासहस्रमध्यतिष्ठदितिशेषः ३८ अमितद्युतिमत्यं तंद्योतमानं ३९ । ४० सत्वोद्रेकात्तमसोऽभिभवेसतिसत्वस्याविर्भावात् शून्यंप्राणिसंचारहीनं ४१ नारायणपदंनिर्वक्तिआपइति नराज्जातानाराः । नृनरयोर्वृद्धिश्चेतिगौरादिगणपाठात्प्राप्तो ङीष्गणकार्यस्यानित्यत्वान्न । ततनवस्तस्यनारायणस्यैवतनवः । यथासौवर्णकुंडलंसुवर्णमेवैवंनरएवेत्यर्थः नाराअपोदेहाद्याकारपरिणताअयनंनिवासस्थानंयस्य अथवा ताभिःसहतत्ता दात्म्यंप्राप्याऽऽस्तेइतिवानारायणइति । 'तत्सृष्ट्वातदेवानुप्राविशत्'इति । 'आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः'इतिचश्रुतिः परमात्मनएवसृष्टदेहेप्रवेशंदेहसंबंधेनभोक्तृत्वंचदर्शयाति

एकार्णवेतदातस्मिन्नुपशांतचराचरे ॥ नष्टचंद्रार्कपवनेग्रहनक्षत्रवर्जिते ३६ चतुर्युगसहस्रांतेसलिलेनाप्लुतामही ॥ ततोनारायणाख्यस्तुसहस्राक्षःसहस्रपा
त् ३७ सहस्रशीर्षापुरुषःस्वप्तुकामस्त्वतींद्रियः ॥ फटासहस्रविकटंशेषंपर्यंकभाजनम् ३८ सहस्रमिवतिग्मांशुसंघातममितद्युतिम् ॥ कुंदेंदुहारगोक्षीरमृणाल
कुमुदप्रभम् ३९ तत्रासौभगवान्देवःस्वपन्जलनिधौतदा ॥ नैशेनतमसाव्याप्तांस्वांरात्रिंकुरुतेविभुः ४० सत्वोद्रेकात्प्रबुद्धस्तुशून्यंलोकमपश्यत ॥ इमंचो
दाहरंत्यत्रश्लोकंनारायणंप्रति ४१ आपोनारास्तत्तनवइत्यपांनामशुश्रुम ॥ अयनंतेनचैवास्तेतेननारायणःस्मृतः ४२ प्रध्यानसमकालंतुप्रजाहेतोःसनात
नः ॥ ध्यातमात्रेतुभगवन्नाभ्यांपद्मःसमुत्थितः ४३ ततश्चतुर्मुखोब्रह्मानाभिपद्माद्विनिःसृतः ॥ तत्रोपविष्टःसहसापद्मेलोकपितामहः ४४ शून्यंदृष्ट्वाजगत्कृ
त्स्नंमानसानात्मनःसमान् ॥ ततोमरीचिप्रमुखान्महर्षीनसृजन्नव ४५ तेऽसृजन्सर्वभूतानित्रसानिस्थावराणिच ॥ यक्षराक्षसभूतानिपिशाचोरगमानुषान् ॥
४६ सृज्यतेब्रह्ममूर्तिस्तुरक्षतेपौरुषीतनुः ॥ रौद्रीभावेनशमयेतिस्रोऽवस्थाःप्रजापतेः ४७ नश्रुतंतेसिंधुपतेविष्णोरद्भुतकर्मणः ॥ कथ्यमानानिमुनिभिर्ब्राह्म
णैर्वेदपारगैः ४८ जलेनसमनुप्राप्तेसर्वतःपृथिवीतले ॥ तदाचैकार्णवेतस्मिन्नेकाकाशेप्रभुश्चरन् ४९ निशायामिवखद्योतःप्रावृट्कालेसमंततः ॥ प्रतिष्ठानाय
पृथिवींमार्गमाणस्तदाऽभवत् ५० जलेनिमग्नांगांदृष्ट्वाचोद्धर्तुंमनसेच्छति ॥ किंनुरूपमहंकृत्वासलिलादुद्धरेमहीम् ५१

तेनचेतनाचेतनंसर्वंजगन्नारायणात्मकमित्युक्तंभवति ४२ प्रध्यानेति ध्यानसमकालेप्रजाहेतोःप्रजानामुत्पत्त्यर्थं सनातनश्चिरंतनोब्रह्मानाभिपद्माद्विनिःसृतस्तादृशेनरूपेणध्यातुर्दृष्टोप्रत्ययमादि त्यर्थः ततोध्यातमात्रेध्यानानंतरंविष्णोर्नाभ्यांपद्मःसमुत्थितः ४३ तस्मिंश्चपद्मेपितामहउपविष्टइतिक्रमभंगेनयोज्यं ४४ मरिचिप्रमुखान् 'मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः । वसिष्ठोनारदश्चैवसृष्टानवमहर्षयः' ४५ त्रसानिजंगमानि ४६ प्रजापतेरीश्वरस्यमाया शबलस्यतिस्रोऽवस्थाएकैकगुणोत्कर्षनिमित्ताः । रजसउत्कर्षेब्रह्मासृज्यते । सत्वोत्कर्षेपौरुषीवैष्णवींतनुंप्रविश्यर क्षति । तमसउत्कर्षेरौद्रीभावेनरुद्रभावेनशमयेदिति ४७ हेसिंधुपते तेत्वयश्रुतंश्रवणंनास्ति यतोविष्णोरद्भुतकर्मणःकथ्यमानानिकथनीयानिकर्माणिनवेत्सीतिशेषः ४८ तान्येवकर्माण्याह एकार्णवेसत्येकाकाशेआकाशमात्रे वायुतेजःपृथिवीरहितेजलमात्रेसति ४९ खद्योतइतिप्रकाशमात्ररूपमुच्यते प्रतिष्ठानायलोकप्रतिष्ठापनार्थम् ५० । ५१

जलक्रीडायामभिरुचितंप्रीतिर्यस्य ५२ वराहवपुषमात्मानमितिशेषः वाङ्मयंचतुर्वेदमयंवेदसमितं वेदप्रमितयज्ञरूपं ५३ वर्ष्मशरीरं ५४ दंष्ट्रेणदंष्ट्रयाप्यविशत्प्यवेशयत् ५५ एवंवराहावतारमुक्त्वानरसिंहावतारमाह पुनरेवेत्यादिना अपूर्वालोकेपूर्वंनदृष्टां ५६ । ५७ । ५८ । ५९ मृगेंद्रेणापिसमुपेत्यदैत्यसमीपंगत्वासमुपाद्रवन् हिरण्यकशिपुःकरजैर्नखैर्दारितः ६० एवंनृसिंहावतारकथामुपसंहृत्यवामनावतारकथांप्रस्तौतिएवमिति ६१ गर्भेधारितः गर्भधारितः सप्तमीतियोगविभागात्समासः ६२ दुर्दिनंप्रावृड्दिनंतत्रमत्तोऽम्भोदःकृष्णमेघस्तत्सदृशः।

एवंसंचिंत्यमनसादृष्ट्वादिव्येनचक्षुषा ॥ जलक्रीडाभिरुचितंवाराहंरूपमस्मरत् ५२ कृत्वावराहवपुषंवाङ्मयंवेदसंमितम् ॥ दशयोजनविस्तीर्णमायतंशतयोजनम् ५३ महापर्वतवर्ष्माभंतीक्ष्णदंष्ट्रंप्रदीप्तिमत् ॥ महामेघौघनिर्घोषंनीलजीमूतसन्निभम् ५४ भूत्वायज्ञवराहोवैअपःसंप्राविशत्प्रभुः ॥ दंष्ट्रेणैकेनचोद्धृत्यस्वेस्थानेन्यविशन्महीम् ५५ पुनरेवमहाबाहुरपूर्वांतनुमाश्रितः ॥ नरस्यकृत्वाऽर्धतनुंसिंहस्यार्धतनुंप्रभुः ५६ दैत्येंद्रस्यसभांगत्वापाणिंसंस्पृश्यपाणिना ॥ दैत्यानामादिपुरुषःसुरारिर्दितिनंदनः ५७ दृष्ट्वाचापूर्वपुरुषंक्रोधात्संरक्तलोचनः ॥ शूलोद्यतकरःस्रग्वीहिरण्यकशिपुस्तदा ५८मेघस्तनितनिर्घोषोनीलाभ्रचयसन्निभः ॥ देवारिर्दितिजोवीरोनृसिंहंसमुपाद्रवत् ५९ समुपेत्यततस्तीक्ष्णैर्मृगेंद्रेणबलीयसा ॥ नारसिंहेनवपुषादारितःकरजैर्भृशम् ६० एवंनिहत्यभगवान्दैत्येंद्ररिपुघातिनम् ॥ भूयोऽन्यःपुंडरीकाक्षः प्रभुर्लोकहितायच ६१ कश्यपस्यात्मजःश्रीमानदित्यागर्भधारितः ॥ पूर्णेवर्षसहस्रेतुप्रसूतागर्भमुत्तमम् ६२ दुर्दिनांभोदसदृशोदीप्ताक्षोवामनाकृतिः ॥ दंडीकमंडलुधरःश्रीवत्सोरसिभूषितः ६३ जटीयज्ञोपवीतीचभगवान्बालरूपधृक् ॥ यज्ञवाटंगतःश्रीमान्दानवेंद्रस्यवैतदा ६४ बृहस्पतिसहायोसौप्रविष्टोबलिनोमखे ॥ तंदृष्ट्वावामनतनुंप्रहृष्टोबलिरब्रवीत् ६५ प्रीतोऽस्मिदर्शनेविप्रब्रूहित्वंकिंददानिते ॥ एवमुक्तस्तुबलिनावामनःप्रत्युवाचह ६६ स्वस्तीत्युक्त्वाबलिंदेवःस्मयमानोऽभ्यभाषत ॥ मेदिनींदानवपतेदेहिमेविक्रमत्रयम् ६७ बलिर्ददौप्रसन्नात्माविप्रायामिततेजसे ॥ ततोदिव्याद्भुततमंरूपंविक्रमतोहरेः ६८ विक्रमैस्त्रिभिरक्षोभ्योजहाराशुसमेदिनीम् ॥ ददौशक्रायचमहींविष्णुर्देवःसनातनः ६९ एषतेवामनोनामप्रादुर्भावःप्रकीर्तितः ॥ तेनदेवाःप्रादुरासन्वैष्णवंचोच्यतेजगत् ७० असतांनिग्रहार्थायधर्मसंरक्षणायच ॥ अवतीर्णोमनुष्याणामजायतयदुक्षये ७१ सएवंभगवान्विष्णुःकृष्णेतिपरिकीर्त्यते ॥ अनाद्यंतमजंदेवंप्रभुंलोकनमस्कृतम् ७२ यदेवंविदुषोगांतितस्यकर्माणिसैंधव ॥ यमाहुरजितंकृष्णंशंखचक्रगदाधरम् ७३ श्रीवत्सधारिणंदेवंपीतकौशेयवाससम् ॥ प्रधानंसोऽस्त्रविदुषांतेनकृष्णेनरक्ष्यते ७४ सहायःपुंडरीकाक्षःश्रीमानतुलविक्रमः ॥ समानस्यंदनेपार्थमास्थायपरवीरहा ७५

'मेघच्छन्नेऽह्निदुर्दिनम्' इत्यमरः श्रीवत्सेनोरसिभूषितइत्यलुप्तविभक्तिकंपदं ६३ बालःवामनः वाटंस्थानं ६४ बलिनोबलेःअयमिकारांतइन्नंतश्चशब्दोदृश्यते ६५ ददानित्वदीप्सितमितिशेषः ६६ । ६७ दिव्यंचतदद्भुततमंचरूपंबभूवेतिशेषः ६८। ६९ । ७० अवतीर्णोऽवतरणंकुर्वन्नजायतआविर्भूतःयदुक्षयेयदूनांगृहे ७१ । ७२ तस्यकर्माणिविदुषोविद्वांसःगांतिगायंति ७३ सोऽर्जुनःअस्त्रविदुषांप्रधानंश्रेष्ठः यंअजितमाहुस्तेनकृष्णेनरक्ष्यते ७४ । ७५ ॥२२२॥

तेनकृष्णसहायत्वेनहेतुना भावःपूज्यतमः । 'भावःपूज्यतमेलोके' इत्यनेकार्थः ७६ दिनैकमेकदिनमेवनसर्वदा ७७ । ७८ । ७९ दक्षयज्ञेभगस्यनेत्रेनिपातितवान्भगनेत्रनिपातनः ८० । ८१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेद्विसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७२ ॥ ॥ ७ ॥ एवमिति १ । २ । ३ । ४ । ५ दैवंधर्माधर्मौ विधिःसदसत्कर्मणी ताभ्यांनिर्मितं ६

नशक्यतेतेनजेतुंत्रिदशैरपिदुःसहः ॥ कःपुनर्मानुषोभावोरणेपार्थविजेष्यति ७६ तमेकंवर्जयित्वातुसर्वंयौधिष्ठिरंबलम् ॥ चतुरःपांडवान्राजन्दिनैकंजेष्यसेरिपून् ७७ ॥ वैशंपायनउवाच ॥ इत्येवमुक्त्वानृपतिंसर्वपापहरोहरः ॥ उमापतिःपशुपतिर्यज्ञहात्रिपुरार्दनः ७८ वामनैर्विकटैःकुब्जैरुग्रश्रवणदर्शनैः ॥ वृतःपारिषदैर्घोरैर्नानाप्रहरणोद्यतैः ७९ त्र्यंबकोराजशार्दूलभगनेत्रनिपातनः ॥ उमासहायोभगवांस्तत्रैवांतरधीयत ८० जयद्रथोऽपिमंदात्मास्वमेवभवनंययौ ॥ पांडवाश्चवनेतस्मिन्न्यवसन्काम्यकेतथा ८१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिजयद्रथविमोक्षणपर्वणिद्विसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७२ ॥ ॥ समाप्तंचजयद्रथविमोक्षणपर्व ॥ अथरामोपाख्यानपर्व ॥ जनमेजयउवाच ॥ एवंहृतायांकृष्णायांप्राप्यक्लेशमनुत्तमम् ॥ अतऊर्ध्वंनरव्याघ्राःकिमकुर्वतपांडवाः १ ॥ वैशंपायनउवाच ॥ एवंकृष्णांमोक्षयित्वाविनिर्जित्यजयद्रथम् ॥ आसांचक्रेमुनिगणैर्धर्मराजोयुधिष्ठिरः २ तेषांमध्येमहर्षीणांशृण्वतामनुशोचताम् ॥ मार्कंडेयमिदंवाक्यमब्रवीत्पांडुनंदनः ३ ॥ युधिष्ठिरउवाच ॥ भगवन्देवर्षीणांत्वंख्यातोभूतभविष्यवित् ॥ संशयंपरिपृच्छामिच्छिंधिमेहृदिसंस्थितम् ४ द्रुपदस्यसुताह्येषावेदिमध्यात्समुत्थिता ॥ अयोनिजामहाभागास्नुषापांडोर्महात्मनः ५ मन्येकालश्चभगवान्दैवंचविधिनिर्मितम् ॥ भवितव्यंचभूतानांयस्यनास्तिव्यतिक्रमः ६ इमांहिपत्नीमस्माकंधर्मज्ञांधर्मचारिणीम् ॥ संस्पृशेदीदृशोभावःशुचिंस्तैन्यमिवानृतम् ७ नहिपापंकृतंकिंचित्कर्मवानिंदितंक्वचित् ॥ द्रौपद्याब्राह्मणेष्वेवधर्मःसुचरितोमहान् ८ तांजहारबलाद्राजामूढबुद्धिर्जयद्रथः ॥ तस्याःसंहरणात्पापःशिरसःकेशपातनम् ९ पराजयंचसंग्रामेससहायःसमाप्तवान् ॥ प्रत्याहृतातथाऽस्माभिर्हत्वातत्सैंधवंबलम् १० तद्दारहरणंप्राप्तमस्माभिरवितर्कितम् ॥ दुःखश्चायंवनेवासोमृगयायांचजीविका ११ हिंसाचमृगजातीनांवनौकोभिर्वनौकसाम् ॥ ज्ञातिभिर्विप्रवासश्चमिथ्याव्यवसितैरियम् १२ अस्तिनूनंमयाकश्चिदल्पभाग्यतरोनरः ॥ भवताद्दृष्टपूर्वोवाश्रुतपूर्वोऽपिवाभवेत् १३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणियुधिष्ठिरप्रश्नेत्रिसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७३ ॥ मार्कंडेयउवाच ॥ प्राप्तमप्रतिमंदुःखंरामेणभरतर्षभ ॥ रक्षसाजानकीतस्यहृताभार्याबलीयसा १ आश्रमाद्राक्षसेंद्रेणरावणेनदुरात्मना ॥ मायामास्थायतरसाहत्वागृध्रंजटायुषम् २ प्रत्याजहारतांरामःसुग्रीवबलमाश्रितः ॥ बद्ध्वासेतुंसमुद्रस्यदग्ध्वालंकांशितैःशरैः ३ ॥ युधिष्ठिरउवाच ॥ कस्मिन्रामःकुलेजातःकिंवीर्यःकिंपराक्रमः ॥ रावणःकस्यपुत्रोवाकिंवैरंतस्यतेनह ४

ईदृशोभावःपरेणहरणं ७ । ८ । ९ । १० । ११ मिथ्याव्यवसितैःवृथातापसवेषधरैः इयंहिंसाक्रियतइतिशेषः १२ मयासमइतिशेषः १३ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेत्रिसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७३ ॥ ॥ ७ ॥ ॥ प्राप्तमिति १ मायांसंन्यासिवेषं २ । ३ । ४

१ । ६ । ७ । ८ त्वष्टाप्रजापतिः स्वयमेवसंकल्पेनचकार नतुमैथुनद्वारा अयोनिजामित्यर्थः ९ । १० ११ गविगोसंज्ञायांभ।र्यायां १२ तस्यवैश्रवणस्यकोपान्मात्यक्त्वामत्पितरंसेवतइत्यति

एतन्मेभगवन्सर्वंसम्यगाख्यातुमर्हसि ॥ श्रोतुमिच्छामिचरितंरामस्याक्लिष्टकर्मणः ५ ॥ मार्कंडेयउवाच ॥ अजोनामाऽभवद्राजामहानिक्ष्वाकुवंशजः ॥ तस्य पुत्रोदशरथःशश्वत्स्वाध्यायवाञ्छुचिः ६ अभवंस्तस्यचत्वारःपुत्राधर्मार्थकोविदाः ॥ रामलक्ष्मणशत्रुघ्नाभरतश्चमहाबलः ७ रामस्यमाताकौसल्याकैकेयीभर तस्यतु ॥ सुतौलक्ष्मणशत्रुघ्नौसुमित्रायाःपरंतपौ ८ विदेहराजोजनकःसीतातस्यात्मजाविभो ॥ यांचकारस्वयंत्वष्टारामस्यमहिषींप्रियाम् ९ एतद्रामस्यतेज न्मसीतायाश्चप्रकीर्तितम् ॥ रावणस्यापितेजन्मव्याख्यास्यामिजनेश्वर १० पितामहोरावणस्यसाक्षाद्देवःप्रजापतिः ॥ स्वयंभूःसर्वलोकानांप्रभुःस्रष्टामहात पाः ११ पुलस्त्योनामतस्यासीन्मानसोदयितःसुतः ॥ तस्यवैश्रवणोनामगविपुत्रोऽभवत्प्रभुः १२ पितरंससमुत्सृज्यपितामहमुपास्थितः ॥ तस्यकोपात्पिता राजन्ससर्जात्मानमात्मना १३ सजज्ञेविश्रवानामतस्यात्मार्धेनवैद्विजः ॥ प्रतीकारायसक्रोधस्ततोवैश्रवणस्यवै १४ पितामहस्तुप्रीतात्मादद्दौवैश्रवणस्यह ॥ अमरत्वंधनेशत्वंलोकपालत्वमेवच १५ ईशानेनतथासख्यंपुत्रंचनलकूबरम् ॥ राजधानीनिवेशंचलंकांरक्षोगणान्विताम् १६ विमानंपुष्पकंनामकामगंच ददौप्रभुः ॥ यक्षाणामाधिपत्यंचराजराजत्वमेवच १७ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणिरामरावणयोर्जन्मकथनेचतुःसप्तत्यधिकद्विशत तमोऽध्यायः ॥ २७४ ॥ ॥ मार्कंडेयउवाच ॥ पुलस्त्यस्यतुयःक्रोधादर्धदेहोऽभवन्मुनिः ॥ विश्रवानामसक्रोधःसवैश्रवणमैक्षत १ बुबुधेतंतुसक्रोधंपितरं राक्षसेश्वरः ॥ कुबेरस्तत्प्रसादार्थंयततेस्मसदानृप २ सराजराजोलंकायांन्यवसन्नरवाहनः ॥ राक्षसीःप्रददौतिस्रःपितुर्वैपरिचारिकाः ३ ताःसदातंमहात्मानं संतोषयितुमुद्यताः ॥ ऋषिंभरतशार्दूलनृत्यगीतविशारदाः ४ पुष्पोत्कटाचराकाचमालिनीचविशांपते ॥ अन्योन्यस्पर्धयाराजञ्छ्रेयस्कामाःसुमध्यमाः ५ सतासांभगवांस्तुष्टोमहात्माप्रददौवरान् ॥ लोकपालोपमान्पुत्रानेकैकस्यायथेप्सितान् ६ पुष्पोत्कटायांजज्ञातेद्वौपुत्रौराक्षसेश्वरौ ॥ कुंभकर्णदशग्रीवौबलेनाप्र तिमौभुवि ७ मालिनीजनयामासपुत्रमेकंविभीषणम् ॥ राकायांमिथुनंजज्ञेखरःशूर्पणखातथा ८ विभीषणस्तुरूपेण सर्वेभ्योभ्यधिकोऽभवत् ॥ सबभूवमहाभा गोधर्मगोप्ताक्रियारतिः ९ दशग्रीवस्तुसर्वेषांश्रेष्ठोराक्षसपुंगवः ॥ महोत्साहोमहावीर्योमहासत्त्वपराक्रमः १० कुंभकर्णोबलेनासीत्सर्वेभ्योऽभ्यधिकोयुधि ॥ मा यावीरणशौंडश्चरौद्रश्चरजनीचरः ११ खरोधनुषिविक्रांतोब्रह्मद्विट्पिशिताशनः ॥ सिद्धविघ्नकरीचापिरौद्रीशूर्पणखातदा १२

ज्वलनात् वैश्रवणंबाधितुंपुलस्त्यएवयोगबलेनविश्रवःसंज्ञंदेहांतरंचक्रेइत्यर्थः १३ । १४ । १५ । १६ । १७ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे चतुःसप्तत्यधिकद्विशत तमोऽध्यायः ॥ २७४ ॥ पुलस्त्यस्येति १ पितरंविश्रवसंराक्षसेश्वरःकुबेरोरक्षःपुरीनायकत्वात् २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

पित्राविश्रवसा १३ । १४ । १५ पंचदिक्षुचत्वारएकःसूर्यइतिपंचानाममग्नीनांमध्यगःपंचाग्निः १६ विभीषणस्तपोऽतिष्ठदित्यन्वयः १७ । १८ । १९ । २० । २१ महदीप्सयाश्रेष्ठपदापेक्षया

सर्वेवेदविदःशूराःसर्वेसुचरितव्रताः ॥ ऊषुःपित्रासहरतागंधमादनपर्वते १३ ततोवैश्रवणंतत्रददृशुर्नरवाहनम् ॥ पित्रासार्धंसमासीनमृद्ध्याप रमयायुतम् १४ जातामर्षास्ततस्तेतुतपसेधृतनिश्चयाः ॥ ब्रह्माणंतोषयामासुर्घोरेणतपसातदा १५ अतिष्ठदेकपादेनसहस्रंपरिवत्सरान् ॥ वायुभक्षोदशग्रीवःपंचाग्निःसुसमा हितः १६ अधःशायीकुंभकर्णोयताहारोयतव्रतः ॥ विभीषणःशीर्णपर्णमेकमभ्यवहारयत् १७ उपवासरतिर्धीमान्सदाजप्यपरायणः ॥ तमेवकालमातिष्ठती व्रंतपउदारधीः १८ खरःशूर्पणखाचैवतेषांवैतप्यतांतपः ॥ परिचर्यांचरक्षांचचक्रतुर्हृष्टमानसौ १९ पूर्णेवर्षसहस्रेतुशिरश्छित्त्वादशाननः ॥ जुहोत्यग्नौदुरा धर्षस्तेनातुष्यज्जगत्प्रभुः २० ततोब्रह्मास्वयंगत्वातपसस्तान्न्यवारयत् ॥ प्रलोभ्यवरदानेनसर्वानेवपृथक्पृथक् २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रीतोऽस्मिवोनि वर्तध्वंवरान्वृणुतपुत्रकाः ॥ यद्यदिष्टमृतेत्वेकममरत्वंतथास्तुतत् २२ यद्यदग्नौहुतंसर्वंशिरस्तेमहदीप्सया ॥ तथैवतानितेदेहेभविष्यंतियथेप्सया २३ वैरू प्यंचनतेदेहेकामरूपधरस्तथा ॥ भविष्यसिरणेऽरीणांविजेतानचसंशयः ॥ २४ ॥ ॥ रावणउवाच ॥ गंधर्वदेवासुरतोयक्षराक्षसतस्तथा ॥ सर्पकिंनरभूते भ्योनमेभूयात्पराभवः ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ यएतेकीर्तितास्सर्वेनतेभ्योऽस्तिभयंतव ॥ ऋतेमनुष्याद्भद्रंतेतथातद्विहितंमया २६ ॥ ॥ मार्कंडेय उवाच ॥ एवमुक्तोदशग्रीवस्तुष्टःसमभवत्तदा ॥ अवमेनेहिदुर्बुद्धिर्मनुष्यान्पुरुषादकः २७ कुंभकर्णमथोवाचतथैवप्रपितामहः ॥ सवव्रेमहतींनिद्रांतमसाग्रस्त चेतनः २८ तथाभविष्यतीत्युक्त्वाविभीषणमुवाचह ॥ वरंवृणीष्वपुत्रत्वंप्रीतोऽस्मीतिपुनःपुनः २९ ॥ ॥ विभीषणउवाच ॥ परमापद्गतस्यापिनाधर्मेमेम तिर्भवेत् ॥ अशिक्षितंचभगवन्ब्रह्मास्त्रंप्रतिभातुमे ३० ॥ ॥ ब्रह्मोवाच ॥ यस्माद्राक्षसयोनौतेजातस्यामित्रकर्शन ॥ नाधर्मेधीयतेबुद्धिरमरत्वंददानिते ३१ मार्कंडेयउवाच ॥ राक्षसस्तुवरंलब्ध्वादशग्रीवोविशांपते ॥ लंकायाश्च्यावयामासयुधिजित्वाधनेश्वरम् ३२ हित्वासभगवाँल्लंकामाविशद्गंधमादनम् ॥ गंधर्वय क्षानुगतोरक्षःकिंपुरुषैःसह ३३ विमानंपुष्पकंतस्यजहाराक्रम्यरावणः ॥ शशापतंवैश्रवणोनत्वामेतद्वहिष्यति ३४ यस्तुत्वांसमरेहंतातमेवैतद्वहिष्यति ॥ अवमन्यगुरुंमांचक्षिप्रंत्वंनभविष्यसि ३५ विभीषणस्तुधर्मात्मासतांमार्गमनुस्मरन् ॥ अन्वगच्छन्महाराजश्रियापरमयायुतः ३६ तस्मैसभगवांस्तुष्टोभ्राता भ्रात्रेधनेश्वरः ॥ सैनापत्यंददौधीमान्यक्षराक्षससेनयोः ३७ राक्षसाःपुरुषादाश्चपिशाचाश्चमहाबलाः ॥ सर्वेसमेत्यराजानमभ्यषिंचन्दशाननम् ३८

२२ । २३ । २४ । २५ । २६ । २७ तमसेति अनिष्टामपिनिद्रांमोहाद्वृतवानित्यर्थः २८ । २९ । ३० योनौक्षेत्रे नतुरेतोऽत्रराक्षसमस्ति तस्मान्मातृदोषादेवक्रौर्यंरावणादीनामित्यर्थः। नराणांमातुलक्रमइतिप्रसिद्धं ३१ । ३२ । ३३ । ३४ नभविष्यासिमरिष्यसि ३५ अन्वगच्छत्कुबेरमितिशेषः ३६ । ३७ । ३८

रत्नानि । 'जातौजातौयदुत्कृष्टंतद्रत्नमभिधीयते' । विहंगमःखेचरः ३९ रावयामास हिंसार्थस्यरुङोरूपमिदम् ४० ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेपंचसप्तत्यधिकद्विशत
 तमोऽध्यायः ॥ २७५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ततइति १ । २ विप्रकारैर्विविधैःप्रकारैः ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ वज्रसंहननावज्रवद्दृढांगाः १३
दशग्रीवश्चदैत्यानांदेवानांचबलोत्कटः ॥ आक्रम्यरत्नान्यहरत्कामरूपीविहंगमः ३९ रावयामासलोकान्यत्तस्माद्रावणउच्यते ॥ दशग्रीवःकामबलोदेवानांभ
 यमादधत् ४० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणिरावणादिवरप्राप्तौपंचसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७५ ॥ ॥ ७ ॥
॥ मार्कंडेयउवाच ॥ ततोब्रह्मर्षयःसर्वेसिद्धादेवर्षयस्तथा ॥ हव्यवाहंपुरस्कृत्यब्रह्माणंशरणंगताः १ ॥ अग्निरुवाच ॥ योसौविश्रवसःपुत्रोदशग्रीवोमहाब
लः ॥ अवध्योवरदानेनकृतोभगवतापुरा २ सबाधतेप्रजाःसर्वाविप्रकारैर्महाबलः ॥ ततोनस्त्रातुभगवान्नान्यस्त्राताहिविद्यते ३ ॥ ब्रह्मोवाच ॥ नसदेवासुरैः
शक्योयुद्धेजेतुंविभावसो ॥ विहितंतत्रयत्कार्यमभितस्तस्यनिग्रहः ४ तदर्थमवतीर्णोऽसौमन्नियोगाच्चतुर्भुजः ॥ विष्णुःप्रहरतांश्रेष्ठःसतत्कर्मकरिष्यति ५
॥ मार्कंडेयउवाच ॥ पितामहस्ततस्तेषांसंनिधौशक्रमब्रवीत् ॥ सर्वैर्देवगणैःसार्धंसंभवत्वंमहीतले ६ विष्णोःसहायानृक्षीषुवानरीषुचसर्वशः ॥ जनयध्वंसुता
न्वीरान्कामरूपबलान्वितान् ७ ततोभागानुभागेनदेवगंधर्वदानवाः ॥ अवतर्तुंमहींसर्वेमंत्रयामासुरंजसा ८ तेषांसमक्षंगंधर्वींदुंदुभींनामनामतः ॥ शशासवर
दोदेवोगच्छकार्यार्थसिद्धये ९ पितामहवचःश्रुत्वागंधर्वीदुंदुभीततः ॥ मंथरामानुषेलोकेकुब्जासमभवत्तदा १० शक्रप्रभृतयश्चैवसर्वेतेसुरसत्तमाः ॥ वानरर्क्षवर
स्त्रीषुजनयामासुरात्मजान् ११ तेऽन्ववर्तन्पितॄन्सर्वेयशसाचबलेनच ॥ भेत्तारोगिरिशृंगाणांसालतालशिलायुधाः १२ वज्रसंहननाःसर्वेसर्वेचौघबलास्तथा ॥
कामवीर्यबलाश्चैवसर्वेयुद्धविशारदाः १३ नागायुतसमप्राणावायुवेगसमाजवे ॥ यत्रेच्छकनिवासाश्चकेचिदत्रवनौकसः १४ एवंविधायतत्सर्वंभगवाँल्लोकभाव
नः ॥ मंथरांबोधयामासयद्यत्कार्यंयथायथा १५ सातद्वचःसमाज्ञायतथाचक्रेमनोजवा ॥ इतश्चेतश्चगच्छंतीवैरसंधुक्षणेरता १६ ॥ इतिश्रीमहाभारतेआर
ण्यकेपर्वणिरामोपाख्यानपर्वणिवानराद्युत्पत्तौषट्सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७६ ॥ ॥ युधिष्ठिरउवाच ॥ उक्तंभगवताजन्मरामादीनांपृथक्पृथक् ॥
प्रस्थानकारणंब्रह्मन्श्रोतुमिच्छामिकथ्यताम् १ कथंदाशरथीवीरौभ्रातरौरामलक्ष्मणौ ॥ संप्रस्थितौवनेब्रह्मन्मैथिलीचयशस्विनी २ ॥ मार्कंडेयउवाच ॥
जातपुत्रोदशरथःप्रीतिमानभवन्नृप ॥ क्रियारतिर्धर्मरतःसततंवृद्धसेविता ३ क्रमेणचास्यतेपुत्राव्यवर्धंतमहौजसः ॥ वेदेषुसरहस्येषुधनुर्वेदेषुपारगाः ४ चरि
तब्रह्मचर्यास्तेकृतदाराश्चपार्थिव ॥ यदातदादशरथःप्रीतिमानभवत्सुखी ५ ज्येष्ठोरामोभवत्तेषांरमयामासहिप्रजाः ॥ मनोहरतयाधीमान्पितुर्हृदयनंदनः ६
यत्रेच्छातत्रैवनिवासोयेषांतेयत्रेच्छकनिवासाः १४ यद्यत्कार्यंकैकेयीप्रलोभनंरामप्रव्राजनादिच १५ संधुक्षणेदीपने १६ ॥ ॥ इत्यार० प० नी० भा० भा० षट्सप्त
त्यधिकद्विशततमोऽध्यायः ॥ २७६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ उक्तमिति १ । २ । ३ । ४ । ५ रामपदंनिर्वक्तिज्येष्ठइति ६

७ । ८ महांतौशत्रुजयक्षमौबाहूयस्यतं दीर्घौवाजानुपर्यंतौबाहूयस्यतम् ९ । १० सर्वशोऽनुरक्ताःप्रकृतयःप्रजायस्मिंस्तं सर्वानुरक्तप्रकृतिम् ११ । १२ । १३ भद्रंतेइतियुधिष्ठिरंप्रत्याशीर्व
ततःसराजामतिमान्मत्वाऽऽत्मानंवयोधिकम् ॥ मंत्रयामाससचिवैर्धर्मज्ञैश्चपुरोहितैः ७ अभिषेकायरामस्ययौवराज्येनभारत ॥ प्राप्तकालंचतेसर्वेमेनिरेमंत्रिसत्त
माः ८ लोहिताक्षंमहाबाहुंमत्तमातंगगामिनम् ॥ दीर्घबाहुंमहोरस्कंनीलकुंचितमूर्धजम् ९ दीप्यमानंश्रियावीरंशक्रादनवरंरणे ॥ पारगंसर्वधर्माणांबृहस्पतिस
मंमतौ १० सर्वानुरक्तप्रकृतिंसर्वविद्याविशारदम् ॥ जितेंद्रियममित्राणामपिदृष्टिमनोहरम् ११ नियंतारमसाधूनांगोप्तारंधर्मचारिणाम् ॥ धृतिमंतमनाधृ
ष्यंजेतारमपराजितम् १२ पुत्रंराजादशरथःकौसल्यानंदिवर्धनम् ॥ संदृश्यपरमांप्रीतिमगच्छत्कुरुनंदन १३ चिंतयंश्चमहातेजागुणान्रामस्यवीर्यवान् ॥
अभ्यभाषतभद्रंतेप्रीयमाणःपुरोहितम् १४ अद्यपुष्योनिशिब्रह्मन्पुण्यंयोगमुपैष्यति ॥ संभारास्संभ्रियंतांमेरामश्चोपनिमंत्र्यताम् १५ इतितद्राजवचनंप्रति
श्रुत्याथमंथरा ॥ कैकेयीमभिगम्येदंकालेवचनमब्रवीत् १६ अद्यकैकेयिदौर्भाग्यंराज्ञातेख्यापितंमहत् ॥ आशीविषस्त्वांसंक्रुद्धश्चंडोदशतुदुर्भगे १७ सुभगा
खलुकौसल्यायस्याःपुत्रोऽभिषेक्ष्यते ॥ कुतोहितवसौभाग्यंयस्याःपुत्रोनराज्यभाक् १८ सातद्वचनमाज्ञायसर्वाभरणभूषिता ॥ वेदीविलग्नमध्येवबिभ्रतीरूप
मुत्तमम् १९ विविक्तेपतिमासाद्यहसंतीवशुचिस्मिता ॥ प्रणयंव्यंजयंतीवमधुरंवाक्यमब्रवीत् २० सत्यप्रतिज्ञयन्मेत्वंकाममेकंनिसृष्टवान् ॥ उपाकुरुष्वत
द्राजंस्तस्मान्मुच्यस्वसंकटात् २१ ॥ राजोवाच ॥ वरंददानितेहंततद्गृहाणयदिच्छसि ॥ अवध्योवध्यतांकोऽद्यवध्यःकोऽद्यविमुच्यताम् २२ धनंददानि
कस्याद्यह्रियतांकस्यवापुनः ॥ ब्राह्मणस्वादिहान्यत्रयत्किंचिद्वित्तमस्तिमे २३ पृथिव्यांराजराजोऽस्मिचातुर्वर्ण्यस्यरक्षिता ॥ यस्तेऽभिलषितःकामोब्रूहि
कल्याणिमाचिरम् २४ सातद्वचनमाज्ञायपरिगृह्यनराधिपम् ॥ आत्मनोबलमाज्ञायततएनमुवाचह २५ आभिषेचनिकंयत्तेरामार्थमुपकल्पितम् ॥ भरत
स्तदवाप्नोतुवनंगच्छतुराघवः २६ सतद्राजावचःश्रुत्वाविप्रियंदारुणोदयम् ॥ दुःखार्तोभरतश्रेष्ठनकिंचिद्व्याजहारह २७ ततस्तथोक्तंपितरंरामोविज्ञायवी
र्यवान् ॥ वनंप्रतस्थेधर्मात्माराजासत्योभवत्विति २८ तमन्वगच्छल्लक्ष्मीवान्धनुष्माँल्लक्ष्मणस्तदा ॥ सीताचभार्याभद्रंतेवैदेहीजनकात्मजा २९ ततो
वनंगतेरामेराजादशरथस्तदा ॥ समयुज्यतदेहस्यकालपर्यायधर्मणा ३० रामंतुगतमाज्ञायराजानंचतथागतम् ॥ आनाय्यभरतंदेवीकैकेयीवाक्यमब्रवीत्
३१ गतोदशरथःस्वर्गंवनस्थौरामलक्ष्मणौ ॥ गृहाणराज्यंविपुलंक्षेमंनिहतकंटकम् ३२ तामुवाचसधर्मात्मानृशंसंबततेकृतम् ॥ पतिंहत्वाकुलंचेदमुत्साद्य
धनलुब्धया ३३ अयशःपातयित्वामेमूर्ध्नित्वंकुलपांसने ॥ सकामाभवमेमातरित्युक्त्वाप्ररुरोदह ३४
चनं पुरोहितंवसिष्ठम् १४ । १५ । १६ । १७ । १८ वेदीवद्विलग्नःकृशोमध्योयस्याः १९ । २० कामंवरंउपाकुरुष्वदेहि संकटात्कष्टात् २१ । २२ । २३ । २४ । २५ । २६
२७ । २८ सीतालांगलपद्धतिस्ततोजातत्वादियमपिसीता विदेहापत्यत्वाद्वैदेही २९ कालपर्यायधर्मणामृत्युना ३० । ३१ । ३२ । ३३ । ३४

चारित्र्यंविशोध्येदंकैकेय्यैवकृतंनतुमयेतिप्रदर्श्य ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ सिंहंहिंस्रं केसरिणंसटावंतंमृगराजं ५०

सचारित्रंविशोध्याथसर्वप्रकृतिसन्निधौ ॥ अन्वयाद्भ्रातरंरामंविनिवर्तनलालसः ३५ कौसल्यांचसुमित्रांचकैकेयींचसुदुःखितः ॥ अग्रेप्रस्थाप्ययानैःसशत्रुघ्न
सहितोययौ ३६ वसिष्ठवामदेवाभ्यांविप्रैश्चान्यैःसहस्रशः ॥ पौरजानपदैःसार्धंरामानयनकांक्षया ३७ ददर्शचित्रकूटस्थंसरामंसहलक्ष्मणम् ॥ तापसानामलं
कारंधारयंतंधनुर्धरम् ३८ विसर्जितःसरामेणपितुर्वचनकारिणा ॥ नंदिग्रामेऽकरोद्राज्यंपुरस्कृत्यास्यपादुके ३९ रामस्तुपुनराशंक्यपौरजानपदागमम् ॥
प्रविवेशमहारण्यंशरभंगाश्रमंप्रति ४० सत्कृत्यशरभंगंसदंडकारण्यमाश्रितः ॥ नदींगोदावरींरम्यामाश्रित्यन्यवसत्तदा ४१ वसतस्तस्यरामस्यततःशूर्पणखा
कृतम् ॥ खरेणासीन्महद्वैरंजनस्थाननिवासिना ४२ रक्षार्थंतापसानांतुराघवोधर्मवत्सलः ॥ चतुर्दशसहस्राणिजघानभुविराक्षसान् ४३ दूषणंचखरंचैवनि
हत्यसुमहाबलौ ॥ चक्रेक्षेमंपुनर्धीमान्धर्मारण्यंसराघवः ४४ हतेषुतेषुरक्षःसुततःशूर्पणखापुनः ॥ ययौनिकृत्तनासोष्ठीलंकांभ्रातुर्निवेशनम् ४५ ततोरावण
मभ्येत्यराक्षसीदुःखमूर्छिता ॥ पपातपादयोर्भ्रातुःसंशुष्करुधिरानना ४६ तांतथाविकृतांदृष्ट्वारावणःक्रोधमूर्छितः ॥ उत्पपातासनात्क्रुद्धोदंतैर्दंतानुपस्पृशन्
४७ स्वानमात्यान्विसृज्याथविविक्तेतामुवाचसः ॥ केनास्येवंकृताभद्रेमामचिंत्यावमन्यच ४८ कःशूलंतीक्ष्णमासाद्यसर्वगात्रैर्निषेवते ॥ कःशिरस्यग्निमाधा
यविश्वस्तःस्वपतेसुखम् ४९ आशीविषंघोरतरंपादेनस्पृशतीहकः ॥ सिंहंकेसरिणंकश्चदंष्ट्रायांस्पृश्यतिष्ठति ५० इत्येवंब्रुवतस्तस्यस्रोतोभ्यस्तेजसोऽर्चिषः॥
निश्चेरुर्दह्यतोरात्रौवृक्षस्येवस्वरंध्रतः ५१ तस्यतत्सर्वमाचख्यौभगिनीरामविक्रमम् ॥ खरदूषणसंयुक्तंराक्षसानांपराभवम् ५२ सनिश्चित्यततःकृत्यंस्वसारमुप
सांत्व्यच ॥ ऊर्ध्वमाचक्रमेराजाविधायनगरेविधिम् ५३ त्रिकूटंसमतिक्रम्यकालपर्वतमेवच ॥ ददर्शमकरावासंगंभीरोदंमहोदधिम् ५४ तमतीत्याथगोकर्ण
मभ्यगच्छद्दशाननः ॥ दयितंस्थानमव्यग्रंशूलपाणेर्महात्मनः ५५ तत्राभ्यगच्छन्मारीचंपूर्वामात्यंदशाननः ॥ पुरारामभयादेवतापस्यंसमुपाश्रितम् ५६
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपा० प० रामवनाभिगमने सप्तसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७७ ॥ ॥ मार्कंडेयउवाच ॥ मारीचस्त्वथ
संभ्रांतोदृष्ट्वारावणमागतम् ॥ पूजयामाससत्कारैःफलमूलादिभिस्ततः १ विश्रांतंचैनमासीनमन्वासीनःसराक्षसः ॥ उवाचप्रसृतंवाक्यंवाक्यज्ञोवाक्यकोविदम्
२ नतेप्रकृतिमान्वर्णःकच्चित्क्षेमंपुरेतव ॥ कच्चित्प्रकृतयःसर्वाभजंतेत्वांयथापुरा ३ किमिहागमनेचापिकार्यंतेराक्षसेश्वर ॥ कृतमित्येवतद्विद्धियद्यपिस्यात्सुदु
ष्करम् ४ शशंसरावणस्तस्मैतत्सर्वंरामचेष्टितम् ॥ समासेनैवकार्याणिक्रोधामर्षसमन्वितः ५

स्रोतोभ्यश्चक्षुरादिरंध्रेभ्यःतेजसोऽर्चिषोऽग्नेर्ज्वालाः ५१ खरदूषणसंयुक्तंतत्पराभवसहितं ५२ विधिरक्षां ५३ पुरारामभयाद्विश्वामित्रयज्ञप्रसंगेनजातात् ५४ । ५५ । ५६ ॥ इत्या
रण्यकेपर्वणि नीलकंठीयेभारतभावदीपेसप्तसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७७ ॥ ॥ मारीचइति १ प्रसृतंपुष्कलार्थंवत् २ । ३ । ४ । ५

रामसासाद्यालं रामेनैवासादयेरित्यर्थः । अलंखल्वोःप्रतिषेधयोःप्राचांक्त्वेतिनिषेधार्थकालंशब्दयोगेक्त्वाप्रत्ययः ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ उदकमौर्ध्वदेहिकम्

मारीचस्त्वब्रवीच्छ्रुत्वासमासेनैवरावणम् ॥ अलंतेराममासाद्यवीर्यज्ञोह्यस्मितस्यवै ६ बाणवेगंहिकस्तस्यशक्तःसोढुंमहात्मनः ॥ प्रव्रज्यायांहिमेहेतुःसएवपुरु
षर्षभः ७ विनाशमुखमेतत्तेकेनाख्यातंदुरात्मना ॥ तमुवाचाथसक्रोधोरावणःपरिभर्त्सयन् ८ अकुर्वतोऽस्मद्वचनंस्यान्मृत्युरपितेध्रुवम् ॥ मारीचश्चिंतयामा
सविशिष्टान्मरणंवरम् ९ अवश्यंमरणेप्राप्तेकरिष्याम्यस्ययन्मतम् ॥ ततस्तंप्रत्युवाचाथमारीचोरक्षसांवरम् १० किंतेसाह्यंमयाकार्यंकरिष्याम्यवशोऽपितत् ॥
तमब्रवीद्दशग्रीवोगच्छसीतांप्रलोभय ११ रत्नशृंगोमृगोभूत्वारत्नचित्रतनूरुहः ॥ ध्रुवंसीतासमालक्ष्यत्वांरामंचोदयिष्यति १२ अपक्रांतेचकाकुत्स्थेसीता
वश्याभविष्यति ॥ तामादायापनेष्यामिततःसनभविष्यति १३ भार्यावियोगाद्दुर्बुद्धिरेतत्साह्यंकुरुष्वमे ॥ इत्येवमुक्तोमारीचःकृत्वोदकमथात्मनः १४ रावणं
पुरतोयांतमन्वगच्छत्सुदुःखितः ॥ ततस्तस्याश्रमंगत्वारामस्याक्लिष्टकर्मणः १५ चक्रतुस्तद्यथासर्वमुभौयत्पूर्वंमंत्रितम् ॥ रावणस्तुयतिर्भूत्वामुंडःकुंडीत्रिदं
डधृक् १६ मृगश्चभूत्वामारीचस्तंदेशमुपजग्मतुः ॥ दर्शयामासमारीचोवैदेहींमृगरूपधृक् १७ चोदयामासतस्यार्थेसारामंविधिचोदिता ॥ रामस्तस्याः
प्रियंकुर्वन्धनुरादायसत्वरः १८ रक्षार्थेलक्ष्मणंन्यस्यप्रययौमृगलिप्सया ॥ सधन्वीबद्धतूणीरःखड्गगोधांगुलित्रवान् १९ अन्वधावन्मृगंरामोरुद्रस्तारामृगंय
था ॥ सोंऽतर्हितःपुनस्तस्यदर्शनंराक्षसोव्रजन् २० चकर्षमहदध्वानंरामस्तंबुबुधेततः ॥ निशाचरंविदित्वातंराघवःप्रतिभानवान् २१ अमोघंशरमादाय
जघानमृगरूपिणम् ॥ सरामबाणाभिहतःकृत्वारामस्वरंतदा २२ हासीतेलक्ष्मणेत्येवंचुक्रोशार्तस्वरेणह ॥ शुश्रावतस्यवैदेहीततस्तांकरुणांगिरम् २३ साप्रा
द्रवद्यतःशब्दस्तामुवाचाथलक्ष्मणः ॥ अलंतेशंकयाभीरुकोरामंप्रहरिष्यति २४ मुहूर्ताद्द्रक्ष्यसेरामंभर्तारंत्वंशुचिस्मिते ॥ इत्युक्तासाप्ररुदतीपर्यशंकतलक्ष्म
णम् २५ हतावैस्त्रीस्वभावेनशुक्लचारित्रभूषणा ॥ सातंपरुषमारब्धावक्तुंसाध्वीपतिव्रता २६ नैषकामोभवेन्मूढयंत्वंप्रार्थयसेहृदा ॥ अप्यहंशस्त्रमादायहन्या
मात्मानमात्मना २७ पतेयंगिरिशृंगाद्वाविशेयंवाहुताशनम् ॥ रामंभर्तारमुत्सृज्यनत्वहंत्वांकथंचन २८ निहीनमुपतिष्ठेयंशार्दूलीक्रोष्टुकंयथा ॥ एतादृशंवचः
श्रुत्वालक्ष्मणःप्रियराघवः २९ पिधायकर्णौसद्वृत्तःप्रस्थितोयेनराघवः ॥ सरामस्यपदंगृह्यप्रससारधनुर्धरः ३० अवीक्षमाणोबिंबोष्ठींप्रययौलक्ष्मणस्तदा ॥
एतस्मिन्नंतरेरक्षोरावणःप्रत्यदृश्यत ३१ अभव्योभव्यरूपेणभस्मच्छन्नइवानलः ॥ यतिवेषप्रतिच्छन्नोजिहीर्षुस्तामनिंदिताम् ३२ सातमालक्ष्यसंप्राप्तं
धर्मज्ञाजनकात्मजा ॥ निमंत्रयामासतदाफलमूलाशनादिभिः ३३

१४ । १५ । १६ । १७ । १८ गोधाज्याघातवारणंअंगुलित्रंचतद्वान् १९ तारामृगंतारारूपंमृगं प्रजापतिःस्वांदुहितरंमृगोभूत्वाजगाम तस्यरुद्रः शिरोऽच्छिनत्तदेतन्मृगशीर्षनामनक्षत्रम्
२० । २१ । २२ । २३ । २४ पर्यशंकत लक्ष्मणोमय्यभिलाषवानितिशंकामकरोत् २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३

३४ । ३५ । ३६ । ३७ । ३८ भिन्नकरटंभिन्नगंडस्थलंमत्तं करेणुर्हस्तिनी ३९ माध्वीकंमधुपुष्पजंमद्यं मधुमाधवींक्षौद्रजांसुरां सौवीरंकांजिकं ४० ।४१। ४२।४३ ॥ इत्यारण्यकेपर्वणिनैलकंठीयेभारतभावदीपेअष्टसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७८ ॥ ॥ सखेति १ । २ स्वमैथिलींस्वाचासौमैथिलीस्वाआत्मीयास्नुषामैथिलसुतेत्यर्थः म्रियमाणेजीवति ३ नखरैर्नखैस्ती

अवमन्यततःसर्वंस्वरूपंप्रत्यपद्यत ॥ सांत्वयामासवैदेहीमितिराक्षसपुंगवः ३४ सीतेराक्षसराजोऽहंरावणोनामविश्रुतः ॥ ममलंकापुरीनाम्नारम्यापारेमहोदधेः
३५ तत्रत्वंनरनारीषुशोभिष्यसिमयासह ॥ भार्यामेभवसुश्रोणितापसंत्यजराघवम् ३६ एवमादीनिवाक्यानिश्रुत्वातस्याथजानकी ॥ पिधायकर्णौसुश्रोणीमैव
मित्यब्रवीद्वचः ३७ प्रपतेद्द्यौःसनक्षत्रापृथिवीशकलीभवेत् ॥ शैत्यमग्निरियान्नाहंत्यजेयंरघुनंदनम् ३८ कथंहिभिन्नकरटंपद्मिनंवनगोचरम् ॥ उपस्थायम
हानागंकरेणुःसूकरंस्पृशेत् ३९ कथंहिपीत्वामाध्वीकंपीत्वाचमधुमाधवीम् ॥ लोभंसौवीरकेकुर्यान्नारीकाचिदितिस्मरेत् ४० इतिसातंसमाभाष्यप्रविवेशाश्रमं
ततः ॥ क्रोधात्प्रस्फुरमाणौष्ठीविधुन्वानाकरौमुहुः ४१ तामभिद्रुत्यसुश्रोणींरावणःप्रत्यषेधयत् ॥ भर्त्सयित्वातुरूक्षेणस्वरेणगतचेतनाम् ४२ मूर्धजेषुनिजग्राहऊ
र्ध्वमाचक्रमेततः ॥ तांददर्शततोगृध्रोजटायुर्गिरिगोचरः ॥ रुदतींरामरामेतिह्रियमाणांतपस्विनीम् ४३ ॥ इतिश्रीमहाभारतेआर० प० रामोपाख्यानप०
मारीचवधेसीताहरणेचअष्टसप्तत्यधिकद्विशततमोध्यायः ॥ २७८ ॥ ॥ छ ॥ ॥ मार्कंडेयउवाच ॥ सखादशरथस्यासिज्जटायुररुणात्मजः ॥ गृध्रराजो
महावीर्यःसंपातिर्यस्यसोदरः १ सददर्शतदासीतांरावणांकगतांस्नुषाम् ॥ सक्रोधोऽभ्यद्रवत्पक्षीरावणंराक्षसेश्वरम् २ अथैनमब्रवीद्गृध्रोमुंचमुंचस्वमैथिलीम् ॥
ध्रियमाणेमयिकथंहरिष्यसिनिशाचर ३ नहिमेमोक्ष्यसेजीवन्यदिनोत्सृज्यसेवधूम् ॥ उक्त्वैवंराक्षसेंद्रंतंचकर्तनखरैर्भृशम् ४ पक्षतुंडप्रहारैश्चशतशोजर्जरी
कृतम् ॥ चक्षाररुधिरंभूरिगिरिःप्रस्रवणैरिव ५ सवध्यमानोगृध्रेणरामप्रियहितैषिणा ॥ खड्गमादयचिच्छेदभुजौतस्यपतत्रिणः ६ निहत्यगृध्रराजंसभिन्ना
भ्रशिखरोपमम् ॥ ऊर्ध्वमाचक्रमेसीतांगृहीत्वांऽकेनराक्षसः ७ यत्रयत्रतुवैदेहीपश्यत्याश्रममंडलम् ॥ सरोवासरितोवाऽपितत्रमुंचतिभूषणम् ८ साददर्शगि
रिप्रस्थेपंचवानरपुंगवान् ॥ तत्रवासोमहद्दिव्यमुत्ससर्जमनस्विनी ९ तत्तेषांवानरेंद्राणांपपातपवनोद्धतम् ॥ मध्येसुपीतंपंचानांविद्युन्मेघांतरेयथा १० अ
चिरेणातिचक्रामखेचरःखेचरान्निव ॥ ददर्शाथपुरींरम्यांबहुद्वारांमनोरमाम् ११ प्राकारवप्रसंबाधांनिर्मितांविश्वकर्मणा ॥ प्रविवेशपुरींलंकांससीतोराक्षसेश्व
रः १२ एवंहृतायांवैदेह्यांरामोहत्वामहामृगम् ॥ निवृत्तोददृशेधीमान्भ्रातरंलक्ष्मणंतथा १३ कथमुत्सृज्यवैदेहींवनेराक्षससेविते ॥ इतितंभ्रातरंदृष्ट्वाप्राप्तोऽसी
त्यव्यगर्हयत् १४ मृगरूपधरेणाथरक्षसासोऽपकर्षणम् ॥ भ्रातुरागमनंचैवचिंतयन्पर्यतप्यत १५ गर्हयन्नेवरामस्तुत्वरितस्तंसमासदत् ॥ अपिजीवतिवैदेही
मितिपश्यामिलक्ष्मण १६

क्षणैः ४ चक्षारसुस्राव ५ । ६ अंकेनोत्संगेन ७ । ८ गिरिप्रस्थेपर्वतशिखरे । 'प्रस्थोऽस्त्रियांमानभेदेसानावस्तुचवस्तुनि' इतिमेदिनी ९ । १० । ११ प्राकारःपरिधिभित्तिः वप्रस्तद्बाह्यवेणुमयंदुर्गं ताभ्यांसंबाधांदुर्गमाम् । 'वप्रःस्यात्पुमानस्त्रीवेणुक्षेत्रेचयेदके' इतिमेदिनी १२ । १३ कथंप्राप्तोऽसीतिसंबंधः १४ । १५ । १६

---

१७ । १८ । १९ वांधुवयोः २० आहूभूते २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ उरसिनेत्रे उदरेमुखंयस्य कबंधःशीर्षहीनःपुमान् २९ । ३० येनयतस्तन्मुखंततःकृष्यते

तस्यतत्सर्वंऽमाचख्यौसीतायालक्ष्मणोवचः ॥ यदुक्तवत्यसदृशंवैदेहीपश्चिमंवचः १७ दह्यमानेनतुहृदारामोऽभ्यपतदाश्रमम् ॥ सददर्शतदागृध्रंनिहतंपर्व
तोपमम् १८ राक्षसंशंकमानस्तंविकृष्यबलवद्धनुः ॥ अभ्यधावतकाकुत्स्थस्ततस्तंसहलक्ष्मणः १९ सताभुवाचतेजस्वीसहितौरामलक्ष्मणौ ॥ गृध्रराजो
ऽस्मिभद्रंवांसखादशरथस्यवै २० तस्यतद्वचनंश्रुत्वासंगृह्यधनुषीशुभे ॥ कोऽयंपितरमस्माकंनाम्नाऽऽहेत्यूचतुश्चतौ २१ ततोददृशतुस्तौतंछिन्नपक्षद्वयं
खगम् ॥ तयोःशशंसगृध्रस्तुसीतार्थेरावणाद्वधम् २२ अपृच्छद्राघवोगृध्रंरावणःकांदिशंगतः ॥ तस्यगृध्रःशिरःकंपैराचचक्षेममारच २३ दक्षिणामितिकाकु
त्स्थोविदित्वाऽस्यतदिंगितम् ॥ सत्कारंलंभयामाससखायंपूजयन्पितुः २४ ततोदृष्ट्वाऽऽश्रमपदंव्यपविद्धबृसीमठम् ॥ विध्वस्तकलशंशून्यंगोमायुशतसंकु
लम् २५ दुःखशोकसमाविष्टौवैदेहीहरणार्दितौ ॥ जग्मतुर्दंडकारण्यंदक्षिणेनपरंतपौ २६ वनेमहतितस्मिंस्तुरामःसौमित्रिणासह ॥ ददर्शमृगयूथानिद्रवमा
णानिसर्वशः २७ शब्दंचघोरंसत्वानांदावाग्नेरिववर्धतः ॥ अपश्येतांमुहूर्ताच्चकबंधंघोरदर्शनम् २८ मेघपर्वतसंकाशंशालस्कंधंमहाभुजम् ॥ उरोगतविशा
लाक्षंमहोदरमहामुखम् २९ यदृच्छयाऽथतद्रक्षःकरेजग्राहलक्ष्मणम् ॥ विषादमगमत्सद्यःसौमित्रिरथभारत ३० सराममभिसंप्रेक्ष्यकृष्यतेयेनतन्मुखम् ॥
विषण्णश्चाब्रवीद्रामंपश्यावस्थामिमांमम ३१ हरणंचैववैदेह्याममचायमुपप्लवः ॥ राज्यभ्रंशश्चभवतस्तातस्यमरणंतथा ३२ नाहंत्वांसहवैदेह्यासमेतंकोसला
गतम् ॥ द्रक्ष्यामिपृथिवीराज्येपितृपैतामहेस्थितम् ३३ द्रक्ष्यंत्यार्यस्यधन्यायेकुशलाजशमीदलैः ॥ अभिषिक्तस्यवदनंसोमंशांतघनंयथा ३४ एवंबहुवि
धंधीमान्विललापसलक्ष्मणः ॥ तमुवाचाथकाकुत्स्थःसंभ्रमेष्वप्यसंभ्रमः ३५ माविषीदनरव्याघ्रनैषकश्चिन्मयिस्थिते ॥ छिंध्यस्यदक्षिणंबाहुंछिन्नःसव्योमया
भुजः ३६ इत्येवंवदतातस्यभुजोरामेणपातितः ॥ खड्गेनभृशतीक्ष्णेननिकृत्तस्तिलकांडवत् ३७ ततोऽस्यदक्षिणंबाहुंखड्गेनाजघ्निवान्बली ॥ सौमित्रिर
पिसंप्रेक्ष्यभ्रातरंराघवंस्थितम् ३८ पुनर्जघानपार्श्वेवैतद्रक्षोलक्ष्मणोभृशम् ॥ गतासुरपतद्भूमौकबंधःसुमहांस्ततः ३९ तस्यदेहाद्विनिःसृत्यपुरुषोदिव्यद
र्शनः ॥ ददृशेदिवमास्थायदिविसूर्यइवज्वलन् ४० पप्रच्छरामस्तंवाग्मीकस्त्वंप्रब्रूहिपृच्छतः ॥ कामयाकिमिदंचित्रमाश्चर्यंप्रतिभातिमे ४१ तस्या
चचक्षेगंधर्वोविश्वावसुरहंनृप ॥ प्राप्तोब्राह्मणशापेनयोनिंराक्षससेविताम् ४२ रावणेनहृतासीताराज्ञालंकाधिवासिना ॥ सुग्रीवमभिगच्छस्वसतेसाह्यं
करिष्यति ४३ एषापंपाशिवजलाहंसकारंडवायुता ॥ ऋष्यमूकस्यशैलस्यसंनिकर्षेतटाकिनी ४४ वसतेतत्रसुग्रीवश्चतुर्भिःसचिवैःसह ॥ भ्राताबा
नरराज्यस्यवालिनोहेममालिनः ४५

३१ । ३२ । ३३ । ३४ एवंबहुविधंराममब्रवीत् असंभ्रमो निर्भयः ३५ । ३६ । ३७ । ३८ । ३९ विनिसृत्य दिव्यदर्शनोऽभूत् पुरुषःकबंधदेहधारी सचददृशेदृष्टः ४० कामयाइच्छया ४१ । ४२ । ४३ पंपानामतःटाकिनीसरसी ४४ । ४५

४६ । ४७ । ४८ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेऊनाशीत्यधिकद्विशततमोऽध्यायः ॥ २७९ ॥ ॥ ७ ॥ ततइति अविदूरेसमीपे नलिनींपुष्करिणीं उत्पलानिकुमुदानि १
तेनत्वंसहसंगम्यदुःखमूलंनिवेदय ॥ समानशीलोभवतःसहाय्यंसकरिष्यति ४६ एतावच्छक्यमस्माभिर्वक्तुंद्रष्टाऽसिजानकीम् ॥ ध्रुवंवानरराजस्यविदितोराव
णालयः ४७ इत्युक्त्वांऽतर्हितोदिव्यःपुरुषःसमहाप्रभः ॥ विस्मयंजग्मतुश्चोभौप्रवीरौरामलक्ष्मणौ ४८ ॥ इतिश्रीम० आर० प० रामो० कवंधहननेऊनाशीत्य
धिकद्विशततमोऽध्यायः ॥ २७९ ॥ ॥ मार्कंडेयउवाच ॥ ततोविदूरेनलिनींप्रभूतकमलोत्पलाम् ॥ सीताहरणदुःखार्तःपंपांरामःसमासदत् १ मारुतेनसु
शीतेनसुखेनामृतगंधिना ॥ सेव्यमानोवनेतस्मिन्जगाममनसाप्रियाम् २ विललापसराजेंद्रस्तत्रकांतामनुस्मरन् ॥ कामबाणाभिसंतप्तसौमित्रिस्तमथाब्रवी
त् ३ नत्वामेवंविधोभावःस्प्रष्टुमर्हतिमानद ॥ आत्मवंतमिवव्याधिःपुरुषंवृद्धशीलिनम् ४ प्रवृत्तिरुपलब्धातेवैदेह्यारावणस्यच ॥ तांत्वंपुरुषकारेणबुद्ध्याचै
वोपपादय ५ अभिगच्छावसुग्रीवंशैलस्थंहरिपुंगवम् ॥ मयिशिष्येचभृत्येचसहायेचसमाश्वस ६ एवंबहुविधैर्वाक्यैर्लक्ष्मणेनसराघवः ॥ उक्तःप्रकृतिमापेदे
कार्येचानंतरोऽभवत् ७ निषेव्यवारिपंपायास्तर्पयित्वापितॄनपि ॥ प्रतस्थतुरुभौवीरौभ्रातरौरामलक्ष्मणौ ८ तावृष्यमूकमभ्येत्यबहुमूलफलद्रुमम् ॥ गिर्य
ग्रेवानरान्पंचवीरौददृशतुस्तदा ९ सुग्रीवःप्रेषयामाससचिवंवानरंतयोः ॥ बुद्धिमंतंहनूमंतंहिमवंतमिवस्थितम् १० तेनसंभाष्यपूर्वंतौसुग्रीवमभिजग्मतुः ॥
सख्यंवानरराजेनचक्रेरामस्तदानृप ११ तद्वासोदर्शयामासुस्तस्यकार्येनिवेदिते ॥ वानराणांतुयत्सीताह्रियमाणाव्यपासृजत् १२ तत्प्रत्ययकरंलब्ध्वासुग्री
वंप्लवगाधिपम् ॥ पृथिव्यांवानरैश्वर्येस्वयंरामोऽभ्यषेचयत् १३ प्रतिजज्ञेचकाकुत्स्थःसमरेवालिनोवधम् ॥ सुग्रीवश्चापिवैदेह्याःपुनरानयनंनृप १४ इत्युक्त्वा
समयंकृत्वाविश्वास्यचपरस्परम् ॥ अभ्येत्यसर्वेकिष्किंधांतस्थुर्युद्धाभिकांक्षिणः १५ सुग्रीवःप्राप्यकिष्किंधांननादौघनिभस्वनः ॥ नास्यतन्ममृषेवालीता
रातंप्रत्यषेधयत् १६ यथानदतिसुग्रीवोबलवानेषवानरः ॥ मन्येचाश्रयवान्प्राप्तोनत्वंनिष्क्रांतुमर्हसि १७ हेममालीततोवालीतारांताराधिपाननाम् ॥ प्रो
वाचवचनंवाग्मीतांवानरपतिःपतिः १८ सर्वभूतरुतज्ञात्वंपश्यबुद्ध्यासमन्विता ॥ केनचाश्रयवान्प्राप्तोममैषभ्रातृगंधिकः १९ चिंतयित्वामुहूर्तंतुताराताराधि
पप्रभा ॥ पतिमित्यब्रवीत्प्राज्ञाशृणुसर्वंकपीश्वर २० हृतदारोमहासत्वोरामोदशरथात्मजः ॥ तुल्यारिमित्रतांप्राप्तःसुग्रीवेणधनुर्धरः २१ भ्राताचास्यमहा
बाहुःसौमित्रिरपराजितः ॥ लक्ष्मणोनाममेधावीस्थितःकार्यार्थसिद्धये २२ मैंदश्चद्विविदश्चापिहनूमांश्चानिलात्मजः ॥ जांबवानृक्षराजश्चसुग्रीवसचिवाःस्थि
ताः २३ सर्वएतेमहात्मानोबुद्धिमंतोमहाबलाः ॥ अलंतवविनाशायरामवीर्यबलाश्रयात् २४ ॥२२७॥

अमृतगंधिनाऽमृतसदृशेन २ । ३ । ४ उपपादयसफलीकुरु ५ । ६ अनंतरःसंलग्नः ७ । ८ ऋष्यमूकंपर्वतं ९ । १० । ११ । १२ । १३ । १४ । १५ ओघोजनवृंदस्तन्निभःस्वनोयस्य । 'ओ
घोवेगेजलस्यच । वृंदेपरंपरायांच'इतिमेदिनी १६ आश्रयवान्परबलाश्रितः १७ । १८ । १९ । २० । २१ । २२ । २३ । २४

ईर्षुरीर्ष्यालुः २५ । २६ । २७ । २८ जीवितसामर्थ्यंजीवनस्यश्लाघ्यत्वम् २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३
तस्यास्तदाक्षिप्यवचोहितमुक्तंकपीश्वरः ॥ पर्यशंकततामीर्षुःसुग्रीवगतमानसाम् २५ तारांपरुषमुक्त्वातुनिर्जगाममगुहामुखात् ॥ स्थितंमाल्यवतोऽभ्याशे
सुग्रीवंसोऽभ्यभाषत २६ असकृत्त्वंमयापूर्वंनिर्जितोजीवितप्रियः ॥ मुक्तोज्ञातिरितिज्ञात्वाकात्वरामरणेपुनः २७ इत्युक्तःप्राहसुग्रीवोभ्रातरंहेतुमद्वचः ॥ प्रा
प्तकालममित्रघ्नोरामंसंबोधयन्निव २८ हृतराज्यस्यमेराजन्हृतदारस्यचत्वया ॥ किंमेजीवितसामर्थ्यमितिविद्धिसमागतम् २९ एवमुक्त्वाबहुविधंततस्तौस
न्निपेततुः ॥ समरेवालिसुग्रीवौशालतालशिलायुधौ ३० उभौजघ्नतुरन्योन्यमुभौभूमौनिपेततुः ॥ उभौववल्गतुश्चित्रंमुष्टिभिश्चनिजघ्नतुः ३१ उभौरुधिरसं
सिक्तौनखदंतपरिक्षतौ ॥ शुशुभातेतदावीरौपुष्पिताविवकिंशुकौ ३२ नविशेषस्तयोर्युद्धेयदाकश्चनदृश्यते ॥ सुग्रीवस्यतदामालांहनुमान्कंठआसजत् ३३
समालयातदावीरःशुशुभेकंठसक्तया ॥ श्रीमानिवमहाशैलोमलयोमेघमालया ३४ कृतचिह्नंतुसुग्रीवंरामोदृष्ट्वामहाधनुः ॥ विचकर्षधनुःश्रेष्ठंवालिमुद्दिश्यलक्ष्य
वत् ३५ विस्फारस्तस्यधनुषोयंत्रस्येवतदाबभौ ॥ वितत्रासतदावालीशरेणाभिहतोरसि ३६ सभिन्नहृदयोवालीवक्त्राच्छोणितमुद्वमन् ॥ ददर्शावस्थितंरामं
ततःसौमित्रिणासह ३७ गर्हयित्वासकाकुत्स्थंपपातभुविमूर्छितः ॥ तारादर्शतंभूमौतारापतिसमौजसम् ३८ हतेवालिनिसुग्रीवःकिष्किंधांप्रत्यपद्यत ॥ तां
चतारापतिमुखींतारांनिपतितेश्वराम् ३९ रामस्तुचतुरोमासान्पृष्ठेमाल्यवतःशुभे ॥ निवासमकरोद्धीमान्सुग्रीवेणाभ्युपस्थितः ४० रावणोऽपिपुरींगत्वालं
कांकामबलात्कृतः ॥ सीतांनिवेशयामासभवनेनंदनोपमे ४१ अशोकवनिकाभ्याशेतापसाश्रमसन्निभे ॥ भर्तृस्मरणतन्वंगीतापसीवेषधारिणी ४२ उपवास
तपःशीलातत्रासपृथुलेक्षणा ॥ उवासदुःखवसतिंफलमूलकृताशना ४३ दिदेशराक्षसीस्तत्ररक्षणेराक्षसाधिपः ॥ प्रासासिशूलपरशुमुद्गरालातधारिणीः ४४
द्व्यक्षींत्र्यक्षींललाटाक्षींदीर्घजिह्वामजिह्विकाम् ॥ त्रिस्तनीमेकपादांचत्रिजटामेकलोचनाम् ४५ एताश्चान्याश्चदीप्ताक्ष्यःकरभोत्कटमूर्द्धजाः ॥ परिवार्यास
तेसीतांदिवारात्रमतंद्रिताः ४६ तास्तुतामायतापांगींपिशाच्योदारुणस्वराः ॥ तर्जयंतिसदारौद्राःपरुषव्यंजनस्वराः ४७ खादामपाटयामैनांतिलशःप्रविभज्य
ताम् ॥ येयंभर्तारमस्माकमवमन्येहजीवति ४८ इत्येवंपरिभर्त्संतीस्त्रास्यमानापुनःपुनः ॥ भर्तृशोकसमाविष्टानिःश्वस्येदमुवाचताः ४९ आर्याःखादतमां
शीघ्रंनमेलोभोऽस्तिजीविते ॥ विनातंपुंडरीकाक्षंनीलकुंचितमूर्धजम् ५० अप्येवाहंनिराहाराजीविताप्रियवर्जिता ॥ शोषयिष्याभिगात्राणिव्याली
तालगतायथा ५१ नत्वन्यमभिगच्छेयंपुमांसंराघवादृते ॥ इतिजानीतसत्यंमेक्रियतांयदनंतरम् ५२ तस्यास्तद्वचनंश्रुत्वाराक्षस्यस्ताःखरस्वनाः ॥
आख्यातुंराक्षसेंद्रायजग्मुस्तत्सर्वमादृताः ५३

४४ । ४५ करभोत्कटमूर्धजाःउष्ट्रसदृशकेशाः ४६ परुषव्यंजनस्वरात्मकाःशब्दायासांताः ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३

६४ । ६५ । ६६ । ६७ । ६८ । ६९ वधूंस्नुषाम् ६० । ६१ । ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ परिक्षिप्ताव्याप्ता ६९ । ७० । ७१ । ७२ । ७३ । ७४ ॥ इत्यारण्यकेपर्वणिनीलकं

गतासुतासुसर्वासुत्रिजटानामराक्षसी ॥ सांत्वयामासवैदेहींधर्मज्ञाप्रियवादिनी ५४ सीतेवक्ष्यामितेकिंचिद्विश्वासंकुरुमेसखि ॥ भयंत्वंत्यजवामोरुशृणुचेदंव
चोमम ५५ अविंध्योनाममेधावीवृद्धोराक्षसपुंगवः ॥ सरामस्यहितान्वेषीत्वदर्थेहिसमावदत् ५६ सीतामद्वचनाद्वाच्यासमाश्वास्यप्रसाद्यच ॥ भर्तातेकुशली
रामोलक्ष्मणानुगतोबली ५७ सख्यंवानरराजेनशक्रप्रतिमतेजसा ॥ कृतवान्राघवःश्रीमांस्त्वदर्थेचसमुद्यतः ५८ माचतेऽस्तुभयंभीरुरावणाल्लोकगर्हितात् ॥
नलकूबरशापेनरक्षिताह्यसिनंदिनि ५९ शप्तोह्येषपुरापापोवधूंरंभांपरामृशन् ॥ नशक्तोह्यवशांनारीमुपैतुमजितेंद्रियः ६० क्षिप्रमेष्यतितेभर्तासुग्रीवेणाभि

रक्षितः ॥ सौमित्रिसहितोधीमांस्त्वांचेतोमोक्षयिष्यति ६१ स्वप्नाहिसुमहाघोरादृष्टामेऽनिष्टदर्शनाः ॥ विनाशायास्यदुर्बुद्धेःपौलस्त्यकुलघातिनः ६२ दारु
णोह्येषदुष्टात्माक्षुद्रकर्मानिशाचरः ॥ स्वभावाच्छीलदोषेणसर्वेषांभयवर्धनः ६३ स्पर्धतेसर्वदेवैर्यःकालोपहतचेतनः ॥ मयाविनाशलिंगानिस्वप्नेदृष्टानितस्य
वै ६४ तैलाभिषिक्तोविकचोमज्जन्पंकेदशाननः ॥ असकृत्खरयुक्तेतुरथेनृत्यन्निवस्थितः ६५ कुंभकर्णादयश्चेमेनग्नाःपतितमूर्धजाः ॥ गच्छंतिदक्षिणामा
शांरक्तमाल्यानुलेपनाः ६६ श्वेतातपत्रःसोष्णीषःशुक्लमाल्यानुलेपनः ॥ श्वेतपर्वतमारूढएकएवविभीषणः ६७ सचिवाश्चास्यचत्वारःशुक्लमाल्यानुलेपनाः ॥
श्वेतपर्वतमारूढामोक्ष्यंतेऽस्मान्महाभयात् ६८ रामस्यास्त्रेणपृथिवीपरिक्षिप्तासमागरा ॥ यशसापृथिवींकृत्स्नांपूरयिष्यतितेपतिः ६९ अस्थिसंचयमारूढो
भुंजानोमधुपायसम् ॥ लक्ष्मणश्चमयादृष्टोदिधक्षुःसर्वतोदिशम् ७० रुदतीरुधिरार्द्रांगीव्याघ्रेणपरिरक्षिता ॥ असकृत्त्वंमयादृष्टागच्छंतीदिशमुत्तराम् ७१
हर्षमेष्यसिवैदेहिक्षिप्रंभर्त्रासमन्विता ॥ राघवेणसहभ्रात्रासीतेत्वमचिरादिव ७२ इत्येतन्मृगशावाक्षीतच्छ्रुत्वात्रिजटावचः ॥ बभूवाशावतीबालापुनर्भर्तृसमा
गमे ७३ यावदभ्यागतारौद्राःपिशाच्यस्ताःसुदारुणाः ॥ ददृशुस्तांत्रिजटयासहासीनांयथापुरा ७४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्व
णित्रिजटाकृतसीतासांत्वनेअशीत्यधिकद्विशततमोऽध्यायः ॥ २८० ॥ ॥ ७ ॥ मार्कंडेयउवाच ॥ ततस्तांभर्तृशोकार्तांदीनांमलिनवाससम् ॥ मणिशेषा
भ्यलंकारांरुदतींचपतिव्रताम् १ राक्षसीभिरुपास्यंतींसमासीनांशिलातले ॥ रावणःकामबाणार्तोददर्शोपससर्पच २ देवदानवगंधर्वयक्षकिंपुरुषैर्युधि ॥ अ
जितोऽशोकवनिकांययौकंदर्पपीडितः ३ दिव्यांबरधरःश्रीमान्सुमृष्टमणिकुंडलः ॥ विचित्रमाल्यमुकुटोवसंतइवमूर्तिमान् ४ नकल्पवृक्षसदृशोयत्नादपिविभू
षितः ॥ श्मशानचैत्यद्रुमवद्भूषितोपिभयंकरः ५ सतस्यास्तनुमध्यायाःसमीपेरजनीचरः ॥ ददृशेरोहिणीमेत्यशनैश्चरइवग्रहः ६ ॥२२८॥

ठीयेभारतभावदीपेअशीत्यधिकद्विशततमोऽध्यायः ॥ २८० ॥ ॥ ततइति मणिर्मंगलसूत्रगतः सएवशेषोयेषांते तत्सदृशा अभ्यलंकारायस्यास्ताम् १ उपास्यंतीमुपास्यमानाम् २ । ३ । ४ । ५ । ६

रौहींहरिणीं ७ परिकर्म वस्त्राभरणादिनाप्रसाधनं ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ हेभद्रसुख भद्रंकल्याणावहंसुखंयस्य पारदार्यसुखंत्वकल्याणा

सतामामंत्र्यसुश्रोणींपुष्पकेतुशराहतः ॥ इदमित्यब्रवीद्वाक्यंत्रस्तरौहीमिवाबलाम् ७ सीतेपर्याप्तमेतावत्कृतोभर्तुरनुग्रहः ॥ प्रसादंकुरुतन्वंगिक्रियतांपरिक
र्मते ८ भजस्वमांवरारोहेमहार्हाभरणांबरा ॥ भवमेसर्वनारीणामुत्तमावरवर्णिनी ९ संतिमेदेवकन्याश्चगंधर्वाणांचयोषितः ॥ संतिदानवकन्याश्चदैत्यानांचापि
योषितः १० चतुर्दशपिशाचानांकोट्योमेवचनेस्थिताः ॥ द्विस्तावत्पुरुषादानांरक्षसांभीमकर्मणाम् ११ ततोमेत्रिगुणायक्षायेमद्वचनकारिणः ॥ केचिदेव
धनाध्यक्षंभ्रातरंमेसमाश्रिताः १२ गंधर्वाप्सरसोभद्रेमामापानगतंतदा ॥ उपतिष्ठंतिवामोरुयथैवभ्रातरंमम १३ पुत्रोऽहमपिविप्रर्षेःसाक्षाद्विश्रवसोमुनेः ॥ पंच
मोलोकपालानामितिमेप्रथितंयशः १४ दिव्यानिभक्ष्यभोज्यानिपानानिविविधानिच ॥ यथैवत्रिदशेशस्यतथैवममभाविनि १५ क्षीयतांदुष्कृतंकर्मवनवासकृ
तंतव ॥ भार्यामेभवसुश्रोणियथामंदोदरीतथा १६ इत्युक्तातेनवैदेहीपरिवृत्यशुभानना ॥ तृणमंतरतःकृत्वातमुवाचनिशाचरम् १७ अशिवेनातिवामोरूरजस्रं
नेत्रवारिणा ॥ स्तनावपतितौबालासंहतावभिवर्षति १८ उवाचवाक्यंतंक्षुद्रंवैदेहीपतिदेवता ॥ असकृद्वदतोवाक्यमीदृशंराक्षसेश्वर १९ विषादयुक्तमेतत्तेमया
श्रुतमभाग्यया ॥ तद्भद्रसुखभद्रंतेमानसंविनिवर्त्यताम् २० परदाराऽस्म्यलभ्याचसततंचपतिव्रता ॥ नचैवौपयिकीभार्यामानुषीकृपणातव २१ विवशां
धर्षयित्वाचकांत्वंप्रीतिमवाप्स्यसि ॥ प्रजापतिसमोविप्रोब्रह्मयोनिःपितातव २२ नचपालयसेधर्मंलोकपालसमःकथम् ॥ भ्रातरंराजराजानंमहेश्वरसखंप्रभुम्
२३ धनेश्वरंव्यपदिशन्कथंत्विहनलज्जसे ॥ इत्युक्त्वाप्रारुदत्सीताकंपयंतीपयोधरौ २४ शिरोधरांचतन्वंगीमुखंप्रच्छाद्यवाससा ॥ तस्यारुदत्याभामिन्यादी
र्घावेणीसुसंयता २५ ददृशेस्वसितास्निग्धाकालीव्यालीवमूर्धनि ॥ श्रुत्वातद्रावणोवाक्यंसीतयोक्तंसुनिष्ठुरम् २६ प्रत्याख्यातोऽपिदुर्मेधाःपुनरेवाब्रवीद्वचः ॥
काममंगानिमेसीतेदुनोतुमकरध्वजः २७ नत्वामकामांसुश्रोणींसमेष्येचारुहासिनीम् ॥ किंनुशक्यंमयाकर्तुंयत्त्वमद्यापिमानुषम् २८ आहारभूतमस्माकंराम
मेवानुरुध्यसे ॥ इत्युक्त्वातामनिंद्यांगींसराक्षसमहेश्वरः २९ तत्रैवांतर्हितोभूत्वाजगामाभिमतांदिशम् ॥ राक्षसीभिःपरिवृतावैदेहीशोककर्शिता ॥ सेव्यमाना
त्रिजटयातत्रैवन्यवसत्तदा ३० ॥ इतिश्रीमहाभारते आरण्यकेपर्वणि रामोपाख्यानपर्वणि सीतारावणसंवादे एकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥
 ॥ मार्कंडेयउवाच ॥ राघवःसहसौमित्रिःसुग्रीवेणाभिपालितः ॥ वसन्माल्यवतःपृष्ठेददृशेविमलंनभः १ सदृष्ट्वाविमलेव्योम्निनिर्मलंशशलक्षणम् ॥ ग्रहनक्षत्रतारा
भिरनुयातममित्रहा २ कुमुदोत्पलपद्मानांगंधमादायवायुना ॥ महीधरस्थःशीतेनसहसाप्रतिबोधितः ३

वहमितिभावः विनिवर्त्यतांमत्तइतिशेषः २० औपयिकीउपयोगार्हा २१ । २२ । २३ । २४ शिरोमुखंचप्रच्छाद्यधरांददृशेऽपश्यदितिसंबंधः २५ । २६ । २७ । २८ । २९ । ३०
॥ इत्यारण्यकेपर्वणि नीलकंठीये भारतभावदीपे एकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ राघवइति १ । २ । ३

४ ग्राम्यधर्मेषुमैथुनादिषुनिमित्तभूतेषु प्रमत्तमसावधानम् ५ । ६ । ७ । ८ । ९ । १० । ११ गुरोर्वाक्येहितेच रतस्तत्परः १२ । १३ । १४ । १५ । १६ । १७

प्रभातेलक्ष्मणंवीरमभ्यभाषतदुर्मनाः ॥ सीतांसंस्मृत्यधर्मात्मारुद्धांराक्षसवेश्मनि ४ गच्छलक्ष्मणजानीहिकिष्किंधायांकपीश्वरम् ॥ प्रमत्तंग्राम्यधर्मेषुकृतघ्नं
स्वार्थपंडितम् ५ योसौकुलाधमोमूढोमयाराज्येभिषेचितः ॥ सर्ववानरगोपुच्छायमृक्षाश्चभजंतिवै ६ यदर्थेनिहतोवालीमयारघुकुलोद्वह ॥ त्वयासहमहाबा
होकिष्किंधोपवनेतदा ७ कृतघ्नंतमहंमन्येवानरापसदंभुवि ॥ योमामेवंगतोमूढोनजानीतेऽद्यलक्ष्मण ८ असौमन्येनजानीतेसमयप्रतिपालनम् ॥ कृतोपकारं
मांनूनमवमन्याल्पयाधिया ९ यदितावदनुद्युक्तःशेतेकामसुखात्मकः ॥ नेतव्योवालिमार्गेणसर्वभूतगतिंत्वया १० अथापिघटतेऽस्माकमर्थेवानरपुंगवः ॥
तमादायैवकाकुत्स्थत्वरावान्भवमाचिरम् ११ इत्युक्तोलक्ष्मणोभ्रात्रागुरुवाक्यहितेरतः ॥ प्रतस्थेरुचिरंगृह्यसमार्गणगुणंधनुः १२ किष्किंधाद्वारमासाद्यप्रविवे
शानिवारितः ॥ सक्रोधइतितंमत्वाराजाप्रत्युद्ययौहरिः १३ तंसदारोविनीतात्मासुग्रीवःप्लवगाधिपः ॥ पूजयाप्रतिजग्राहप्रीयमाणस्तदर्हया १४ तमब्रवीद्रा
मवचःसौमित्रिरकुतोभयः ॥ सतत्सर्वमशेषेणश्रुत्वाप्रह्वःकृतांजलिः १५ सभृत्यदारोराजेंद्रसुग्रीवोवानराधिपः ॥ इदमाहवचःप्रीतोलक्ष्मणंनरकुंजरम् १६
नास्मिलक्ष्मणदुर्मेधानाकृतज्ञोननिर्घृणः ॥ श्रूयतांयःप्रयत्नोमेसीतापर्येषणेकृतः १७ दिशःप्रस्थापिताःसर्वेविनीताहरयोमया ॥ सर्वेषांचकृतःकालोमासेनाग
मनंपुनः १८ यैरियंसवनासाद्रिःसपुरासागरांबरा ॥ विचेतव्यामहीवीरसग्रामनगराकरा १९ समासःपंचरात्रेणपूर्णोभवितुमर्हति ॥ ततःश्रोष्यसिरामेणसहि
तःसुमहत्प्रियम् २० इत्युक्तोलक्ष्मणस्तेनवानरेंद्रेणधीमता ॥ त्यक्त्वारोषमदीनात्मासुग्रीवंप्रत्यपूजयत् २१ सरामंसहसुग्रीवोमाल्यवत्पृष्ठमास्थितम् ॥ अ
भिगम्योदयंतस्यकार्यस्यप्रत्यवेदयत् २२ इत्येवंवानरेंद्रास्तेसमाजग्मुःसहस्रशः ॥ दिशस्तिस्रोविचित्याथनतुयेदक्षिणांगताः २३ आचख्युस्तत्ररामायम
हींसागरमेखलाम् ॥ विचितांनतुवैदेह्यादर्शनंरावणस्यवा २४ गतास्तुदक्षिणामाशांयेवैवानरपुंगवाः ॥ आशावांस्तेषुकाकुत्स्थःप्राणानार्तोऽभ्यधारयत् २५
द्विमासोपरमेकालेव्यतीतेप्लवगास्ततः ॥ सुग्रीवमभिगम्येदंत्वरितावाक्यमब्रुवन् २६ रक्षितंवालिनायत्तत्स्फीतंमधुवनंमहत् ॥ त्वयाचप्लवगश्रेष्ठतद्भुंक्तेप
वनात्मजः २७ वालिपुत्रोंगदश्चैवयेचान्येप्लवगर्षभाः ॥ विचेतुंदक्षिणामाशांराजन्प्रस्थापितास्त्वया २८ तेषामपनयंश्रुत्वामेनेसकृतकृत्यताम् ॥ कृतार्था
नांहिभृत्यानामेतद्भवतिचेष्टितम् २९ सतद्रामायमेधावीशशंसप्लवगर्षभः ॥ रामश्चाप्यनुमानेनमेनेदृष्टांतुमैथिलीम् ३० हनुमत्प्रमुखाश्चापिविश्रांतास्तेप्ल
वंगमाः ॥ अभिजग्मुर्हरींद्रंतंरामलक्ष्मणसन्निधौ ३१ गतिंचमुखवर्णंचदृष्ट्वारामोहनूमतः ॥ अगमत्प्रत्ययंभूयोदृष्टासीतेतिभारत ३२ हनूमत्प्रमुखा
स्तेतुवानराःपूर्णमानसाः ॥ प्रणेमुर्विधिवद्रामंसुग्रीवंलक्ष्मणंतथा ३३

१८ । १९ । २० । २१ । २२ । २३ । २४ । २५ द्वयोर्मासयोरुपरमःसमाप्तिर्यस्मिंस्तस्मिन्काले २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३

३४ कारयिष्यामिस्वार्थेणिच् ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ सत्पदंगतवंतावितिशेषः ४९ । ५०

तानुवाचनतान्रामःप्रगृह्यसशरंधनुः ॥ अपिमांजीवयिष्यध्वमपिवःकृतकृत्यता ३४ अपिराज्यमयोध्यायांकारयिष्याम्यहंपुनः ॥ निहत्यसमरेशत्रूनाहृत्य
जनकात्मजाम् ३५ अमोक्षयित्वावैदेहीमहत्वाचरणेरिपून् ॥ हृतदारोऽवधूतश्चनाहंजीवितुमुत्सहे ३६ इत्युक्तवचनंरामंप्रत्युवाचानिलात्मजः ॥ प्रियमाख्या
मितरामदृष्टासाजानकीमया ३७ विचित्यदक्षिणामाशांसपर्वतवनाकराम् ॥ श्रांताःकालेव्यतीतेस्मदृष्टवंतोमहागुहाम् ३८ प्रविशामोवयंतांतुबहुयोजनमाय
ताम् ॥ अंधकारांसुविपिनांगहनांकीटसेविताम् ३९ गत्वासुमहदध्वानमादित्यस्यप्रभांततः ॥ दृष्टवंतःस्मतत्रैवभवनंदिव्यमंतरा ४० मयस्यकिलदैत्यस्य
तदासद्वेश्मराघव ॥ तत्रप्रभावतीनामतपोऽतप्यततापसी ४१ तयादत्तानिभोज्यानिपानानिविविधानिच ॥ भुक्त्वालब्धबलाःसंतस्तयोक्तेनपथाततः ४२
निर्यायतस्मादुद्देशात्पश्यामोलवणांभसः ॥ समीपेसह्यमलयौदर्दुरंचमहागिरिम् ४३ ततोमलयमारुह्यपश्यंतोवरुणालयम् ॥ विषण्णाव्यथिताःखिन्नानिरा
शाजीवितेभृशम् ४४ अनेकशतविस्तीर्णंयोजनानांमहोदधिम् ॥ तिमिनक्रझषावासंचिंतयंतःसुदुःखिताः ४५ तत्रानशनसंकल्पंकृत्वाऽऽसीनावयंतदा ॥
ततःकथांतेगृध्रस्यजटायोरभवत्कथा ४६ ततःपर्वतशृंगाभंघोररूपंभयावहम् ॥ पक्षिणंदृष्टवंतःस्मवैनतेयमिवापरम् ४७ सोऽस्मानतर्कयद्भोक्तुमथाभ्येत्यव
चोऽब्रवीत् ॥ भोःकएषममभ्रातुर्जटायोःकुरुतेकथाम् ४८ संपातिर्नामतस्याहंज्येष्ठोभ्राताखगाधिपः ॥ अन्योन्यस्पर्धयारूढावावामादित्यसत्पदम् ४९ त
तोदग्धाविमौपक्षौनदग्धौतुजटायुषः ॥ तदामेचिरदृष्टःसभ्रातागृध्रपतिःप्रियः ५० निर्दग्धपक्षःपतितोह्यहमस्मिन्महागिरौ ॥ तस्यैवंवदतोऽस्माभिर्हतोभ्रा
तानिवेदितः ५१ व्यसनंभवतश्चेदंसंक्षेपाद्वैनिवेदितम् ॥ ससंपातिस्तदाराजन्श्रुत्वासुमहदप्रियम् ५२ विषण्णचेताःपप्रच्छपुनरस्मानरिंदम ॥ यःसरामः
कथंसीताजटायुश्चकथंहतः ५३ इच्छामिसर्वमेवैतच्छ्रोतुंप्लवगसत्तमाः ॥ तस्याहंसर्वमेवैतद्भवतोव्यसनागमम् ५४ प्रायोपवेशनेचैवहेतुंविस्तरशोऽब्रुवम् ॥ सो
ऽस्मानुत्थापयामासवाक्येनानेनपक्षिराट् ५५ रावणोविदितोमह्यंलंकाचास्यमहापुरी ॥ दृष्टापारेसमुद्रस्यत्रिकूटगिरिकंदरे ५६ भवित्रीतत्रवैदेहीनमेऽस्त्यत्रावि
चारणा ॥ इतितस्यवचःश्रुत्वावयमुत्थायसत्वराः ५७ सागरक्रमणेमंत्रंमंत्रयामःपरंतप ॥ नाध्यवास्यद्यदाकश्चित्सागरस्यविलंघनम् ५८ ततःपितरमावि
श्यपुप्लुवेऽहंमहार्णवम् ॥ शतयोजनविस्तीर्णंनिहत्यजलराक्षसीम् ५९ तत्रसीतामयादृष्टारावणांतःपुरेसती ॥ उपवासतपःशीलाभर्तृदर्शनलालसा ६० ज
टिलामलदिग्धांगीकृशादीनातपस्विनी ॥ निमित्तैस्तामहंसीतामुपलभ्यपृथग्विधैः ६१ उपसृत्याब्रुवंचार्याममभिगम्यरहोगताम् ॥ सीतेरामस्यदूतोऽहंवानरो
मारुतात्मजः ६२ त्वद्दर्शनमभिप्रेप्सुरिहप्राप्तोविहायसा ॥ राजपुत्रौकुशलिनौभ्रातरौरामलक्ष्मणौ ६३

५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३

६४ । ६५ । ६६ । ६७ । ६८ धारिताजीवनंप्राप्ता इदानीमेतद्वियोगादस्यं तंव्याकुलायास्तस्याला मार्थंशीघ्रंयतितव्यमितिभावः ६९ । ७० । ७१ ॥ इ० नी० भा० भा० द्व्यशीत्यधि

सर्वशाखामृगेंद्रेणसुग्रीवेणाभिपालितौ ॥ कुशलंत्वाऽब्रवीद्रामःसीतेसौमित्रिणासह ॥ सखिभावाच्चसुग्रीवःकुशलंत्वाऽनुपृच्छति ॥ क्षिप्रमेष्यतितेभर्त्तासर्वशाखा
मृगैःसह ६५ प्रत्ययंकुरुमेदेविवानरोऽस्मिनराक्षसः ॥ मुहूर्त्तमिवचध्यात्वासीतामांप्रत्युवाचह ६६ अवैमित्वांहनूमंतमविंध्यवचनादहम् ॥ अविंध्योहिमहाबा
होराक्षसोवृद्धसंमतः ६७ कथितस्तेनसुग्रीवस्त्वद्विधैःसचिवैर्वृतः ॥ गम्यतामितिचोक्त्वामांसीताप्रादादिमंमणिम् ६८ धारितायेनवैदेहीकालमेतमनिंदि
ता ॥ प्रत्ययार्थंकथांचेमांकथयामासजानकी ६९ क्षिप्तामिषीकांकाकायचित्रकूटेमहागिरौ ॥ भवतापुरुषव्याघ्रप्रत्यभिज्ञानकारणात् ७० ग्राहयित्वाऽहमा
त्मानंततोदग्ध्वाचतांपुरीम् ॥ संप्राप्तइतितंरामःप्रियवादिनमार्चयत् ॥ ७१ ॥ इतिश्रीम० भा० आ० प० रामोपाख्यानप० हनुमत्प्रत्यागमनेद्व्यशीत्यधि
कद्विशततमोऽध्यायः ॥ २८२ ॥ ॥ छ ॥ मार्कंडेयउवाच ॥ ततस्तत्रैवरामस्यसमासीनस्यतैःसह ॥ समाजग्मुःकपिश्रेष्ठाःसुग्रीववचनात्तदा १ वृतः
कोटिसहस्रेणवानराणांतरस्विनाम् ॥ श्वशुरोवालिनःश्रीमान्सुषेणोराममभ्ययात् २ कोटीशतवृतोवाऽपिगजोगवयएवच ॥ वानरेंद्रौमहावीर्यौपृथक्पृथगद
श्यताम् ३ षष्टिकोटिसहस्राणिप्रकर्षन्प्रत्यदृश्यत ॥ गोलांगूलोमहाराजगवाक्षोभीमदर्शनः ४ गंधमादनवासीतुप्रथितोगंधमादनः ॥ कोटीशतसहस्राणिहरी
णांसमकर्षत ५ पनसोनाममेधावीवानरःसुमहाबलः ॥ कोटीर्दशद्वादशचत्रिंशत्पंचप्रकर्षति ६ श्रीमान्दधिमुखोनामहरिवृद्धोऽतिवीर्यवान् ॥ प्रचकर्षमहासै
न्यंहरीणांभीमतेजसाम् ७ कृष्णानांमुखपुंड्राणामृक्षाणांभीमकर्मणाम् ॥ कोटीशतसहस्रेणजांबवान्प्रत्यदृश्यत ८ एतेचान्येचबहवोहरियूथपयूथपाः ॥ असं
ख्येयामहाराजसमीयूरामकारणात् ९ गिरिकूटनिभांगानांसिंहानामिवगर्जताम् ॥ श्रूयतेतुमुलःशब्दस्तत्रतत्रप्रधावताम् १० गिरिकूटनिभाःकेचित्केचिन्महिष
सन्निभाः ॥ शरदभ्रप्रतीकाशाःकेचिद्धिंगुलकाननाः ११ उत्पतंतःपतंतश्चप्लवमानाश्चवानराः ॥ उद्धुन्वंतोऽपरेरेणून्समाजग्मुःसमंततः १२ सवानरमहासै
न्यःपूर्णसागरसन्निभः ॥ निवेशमकरोत्तत्रसुग्रीवानुमतेतदा १३ ततस्तेषुहरींद्रेषुसमावृत्तेषुसर्वशः ॥ तिथौप्रशस्तेनक्षत्रेमुहूर्तेचाभिपूजिते १४ तेनव्यूढेन
सैन्येनलोकानुद्वर्तयन्निव ॥ प्रययौराघवःश्रीमान्सुग्रीवसहितस्तदा १५ मुखमासीत्तुसैन्यस्यहनूमान्मारुतात्मजः ॥ जघनंपालयामाससौमित्रिरकुतोभयः १६
बद्धगोधांगुलित्राणौराघवौतत्रजग्मतुः ॥ वृतौहरिमहामात्रैश्चंद्रसूर्यौग्रहैरिव १७ प्रबभौहरिसैन्यंतत्सालतालशिलायुधम् ॥ सुमहच्छालिभवनंयथासूर्योदयंप्रति
१८ नलनीलांगदक्राथमैंदद्विविदपालिता ॥ ययौसुमहतीसेनाराघवस्यार्थसिद्धये १९ विविधेषुप्रशस्तेषुबहुमूलफलेषुच ॥ प्रभूतमधुमांसेषुवारिमत्सुशिवेषुच २०

कद्विशततमोऽध्यायः ॥ २८२ ॥ ॥ छ ॥ ॥ ततस्तत्रैवेति १ । २ । ३ । ४ । ५ । ६ । ७ मुखेपुंड्रस्तिलकंयेषांतेललाटेऊर्ध्वपुंड्राकारेणचिह्नेनचिह्नितानाम् ८ । ९
१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ शालिभिर्भातीतिशालिभंतच्चतद्वनंपक्वशालिभवनं तद्वत्पीतवर्णमित्यर्थः १८ । १९ । २०

२१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ प्लवःअलाबुघटादिमयंतरणसाधनं उडुपंक्षुद्रनौकाताभ्यांप्रतारस्तराणम् २९ समारप्स्यामिआराधयिष्यामि ३० । ३१ । ३२ । ३३ मधुरं

निवसंतीनिराबाधास्तथैवगिरिसानुषु ॥ उपायाद्धरिसेनासाक्षारोदमथसागरम् २१ द्वितीयसागरनिभंतद्बलंबहुलध्वजम् ॥ वेलावनंसमासाद्यनिवासमकरोत्त
दा २२ ततोदाशरथिःश्रीमान्सुग्रीवंप्रत्यभाषत ॥ मध्येवानरमुख्यानांप्राप्तकालमिदंवचः २३ उपायःकोनुभवतांमतःसागरलंघने ॥ इयंहिमहतीसेनासाग
रश्चातिदुस्तरः २४ तत्रान्येव्याहरंतिस्मवानराबहुमानिनः ॥ समर्थालंघनेसिंधोर्नतुतत्कृत्स्नकारकम् २५ केचिन्नौभिर्व्यवस्यंतिकेचिच्चविविधैःप्लवैः ॥ ने
तिरामस्तुतान्सर्वान्सांत्वयन्प्रत्यभाषत २६ शतयोजनविस्तारंनशक्ताःसर्ववानराः ॥ क्रांतुंतोयनिधिंवीरानैषावोनैष्ठिकीमतिः २७ नावोनसंतिसेनायाब
ह्वयस्तारयितुंतथा ॥ वणिजामुपघातंचकथमस्मद्विधश्चरेत् २८ विस्तीर्णंचैवनःसैन्यंहन्याच्छिद्रेणवैपरः ॥ प्लवोडुपप्रतारश्चनैवात्रममरोचते २९ अहंत्विमं
जलनिधिंसमारप्स्याम्युपायतः ॥ प्रतिशेष्याम्युपवसन्दर्शयिष्यतिमांततः ३० नचेद्दर्शयितामार्गंधक्ष्याम्येनमहंततः ॥ महास्त्रैरप्रतिहतैरत्यग्निपवनोज्ज्व
लैः ३१ इत्युक्त्वासहसौमित्रिरुपस्पृश्याथराघवः ॥ प्रतिशिश्येजलनिधिंविधिवत्कुशसंस्तरे ३२ सागरस्तुततःस्वप्नेदर्शयामासराघवम् ॥ देवोनदनदीभर्ता
श्रीमान्यादोगणैर्वृतः ३३ कौसल्यामातरित्येवमाभाष्यमधुरंवचः ॥ इदमित्याहरत्नानामाकरैःशतशोवृतः ३४ ब्रूहिकिंतेकरोम्यत्रसाहाय्यंपुरुषर्षभ ॥ ऐक्ष्वा
कोह्यस्मितज्ज्ञातिरितिरामस्तमब्रवीत् ३५ मार्गमिच्छामिसैन्यस्यदत्तंनदनदीपते ॥ येनगत्वादशग्रीवंहन्यांपौलस्त्यपांसनम् ३६ यद्येवंयाचतोमार्गंनप्रदा
स्यतिमेभवान् ॥ शरैस्त्वांशोषयिष्यामिदिव्यास्त्रप्रतिमंत्रितैः ३७ इत्येवंब्रुवतःश्रुत्वारामस्यवरुणालयः ॥ उवाचव्यथितोवाक्यमितिबद्धांजलिःस्थितः ॥
३८ नेच्छामिप्रतिघातंतेनास्मिविघ्नकरस्तव ॥ शृणुचेदंवचोरामश्रुत्वाकर्तव्यमाचर ३९ यदिदास्यामितेमार्गंसैन्यस्यव्रजतोऽऽज्ञया ॥ अन्येऽप्याज्ञापयि
ष्यंतिमामेवंधनुषोबलात् ४० अस्तित्वत्रनलोनामवानरःशिल्पिसंमतः ॥ त्वष्टुर्देवस्यतनयोबलवान्विश्वकर्मणः ४१ सयत्काष्ठंतृणंवापिशिलांवाक्षेप्स्यतेम
यि ॥ सर्वंतद्धारयिष्यामिसतेसेतुर्भविष्यति ४२ इत्युक्त्वांऽतर्हितेतस्मिन्रामोनलमुवाचह ॥ कुरुसेतुंसमुद्रेत्वंशक्तोह्यसिमतोमम ४३ तेनोपायेनकाकुत्स्थः
सेतुबंधमकारयत् ॥ दशयोजनविस्तारमायतंशतयोजनम् ४४ नलसेतुरितिख्यातोयोऽद्यापिप्रथितोभुवि ॥ रामस्याज्ञांपुरस्कृत्यनिर्यातोगिरिसंनिभः ४५
तत्रस्थंसतुधर्मात्मासमागच्छद्विभीषणः ॥ भ्रातावैराक्षसेंद्रस्यचतुर्भिःसचिवैःसह ४६ प्रतिजग्राहरामस्तंस्वागतेनमहामनाः ॥ सुग्रीवस्यतुशंकाऽभूत्प्राणि
धिःस्यादितिस्मह ४७ राघवःसत्यचेष्टाभिःसम्यक्चचरितेंगितैः ॥ यदातत्त्वेनतुष्टोऽभूत्ततएनमपूजयत् ४८

वचइदंशृण्वित्याहेतिशेषेणयोज्यम् ३४ । ३५
३६ । ३७ । ३८ । ३९ आज्ञयेतिच्छेदः पूर्वरूपमार्षम् ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ प्रणिधिश्छलकृच्चारोवा 'प्रणिधिर्नाखलेचरे' इतिमेदिनी ४७ । ४८

४९ । ५० ५१ ५२ । ५३ दौत्येनहेतुना ५४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे त्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥ प्रभूतेति १ संविधंसम्यग्विध्वंसनयातांयात्रादिसं
पत्तिम् १ । ३ कपाटैर्यंत्रैश्चगोलाद्युत्क्षेपणसाधनैर्दुर्धर्षाः परिखाःसहुडाःसोपलाश्च हुडंमूत्राद्युत्सर्जनार्थंशृंगं उपलाःप्रक्षेप्यागोलकाः ४ समधूच्छिष्टमुद्गराः मधूच्छिष्टंक्षौद्रं मधुमद्यादिव्याप्त

सर्वराक्षसराज्येचाप्यभ्यषिंचद्विभीषणम् ॥ चक्रेचमंत्रसचिवंसुहृदंलक्ष्मणस्यच ४९ विभीषणमतेचैवसोऽत्यक्रामन्महार्णवम् ॥ ससैन्यःसेतुनातेनमासेनैव
नराधिप ५० ततोगत्वासमासाद्यलंकोद्यानान्यनेकशः ॥ भेदयामासकपिभिर्महांतिचबहूनिच ५१ ततस्तौरावणामात्यौमंत्रिणौशुकसारणौ ॥ चरौवानररू
पेणतौजग्राहविभीषणः ५२ प्रतिपन्नौयदारूपंराक्षसंतौनिशाचरौ ॥ दर्शयित्वाततःसैन्यंरामःपश्चादवासृजत् ५३ निवेश्योपवनेसैन्यंतत्पुरःप्राज्ञवानरम् ॥
प्रेषयामासदौत्येनरावणस्यततोऽङ्गदम् ५४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणिसेतुबंधनेत्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥
॥ मार्कंडेयउवाच ॥ प्रभूतान्नोदकेतस्मिन्बहुमूलफलेवने ॥ सेनांनिवेश्यकाकुत्स्थोविधिवत्पर्यरक्षत १ रावणःसंविधंचक्रेलंकायांशास्त्रनिर्मिताम् ॥ प्रकृत्यैवदु
राधर्षादृढप्राकारतोरणा २ अगाधतोयाःपरिखामीननक्रसमाकुलाः ॥ बभूवुःसप्तदुर्धर्षाःखादिरैःशंकुभिश्चिताः ३ कपाटयंत्रदुर्धर्षाबभूवुःसहुडोपलाः ॥ साशी
विषघटातोयाःससर्जरसपांसवः ४ मुसलालातनाराचतोमरासिपरश्वधैः ॥ अन्विताश्चशतघ्नीभिःसमधूच्छिष्टमुद्गराः ५ पुरद्वारेषुसर्वेषुगुल्माःस्थावरजंगमाः ॥
बभूवुःपत्तिबहुलाःप्रभूतगजवाजिनः ६ अंगदस्त्वथलंकायाद्वारदेशमुपागतः ॥ विदितोराक्षसेंद्रस्यप्रविवेशगतव्यथः ७ मध्येराक्षसकोटीनांबह्वीनांसुमहाब
लः ॥ शुशुभेमेघमालाभिरादित्यइवसंवृतः ८ ससमासाद्यपौलस्त्यममात्यैरभिसंवृतम् ॥ रामसंदेशमामंत्र्यवाग्मीवक्तुंप्रचक्रमे ९ आहत्वांराघवोराजन्कोसलें
द्रोमहायशाः ॥ प्राप्तकालमिदंवाक्यंतदादत्स्वकुरुष्वच १० अकृतात्मानमासाद्यराजानमनयेरतम् ॥ विनश्यंत्यनयाविष्टादेशाश्चनगराणिच ११ त्वयैकेनाप
राद्धंमेसीतामाहरताबलात् ॥ वधायानपराद्धानामन्येषांतद्भविष्यति १२ येत्वयाबलदर्पाभ्यामाविष्टेनवनेचराः ॥ ऋषयोहिंसिताःपूर्वंदेवाश्चाप्यवमानिताः
१३ राजर्षयश्चनिहतारुदत्यश्चहृताःस्त्रियः ॥ तदिदंसमनुप्राप्तंफलंतस्यानयस्यते १४ हंतास्मित्वांसहामात्यैर्युध्यस्वपुरुषोभव ॥ पश्यमेधनुषोवीर्यंमानुषस्य
निशाचर १५ मुच्यतांजानकीसीतानमेमोक्ष्यसिकर्हिचित् ॥ अराक्षसमिमंलोकंकर्तास्मिनिशितैःशरैः १६ इतितस्यब्रुवाणस्यदूतस्यपरुषंवचः ॥ श्रुत्वानम
मृषेराजारावणःक्रोधमूर्च्छितः १७ इंगितज्ञास्ततोभर्तुश्चत्वारोरजनीचराः ॥ चतुर्ष्वंगेषुजगृहुःशार्दूलमिवपक्षिणः १८ तांस्तथांऽगेषुसंसक्तानंगदोरजनी
चरान् ॥ आदायैवखमुत्पत्यप्रासादतलमाविशत् १९ वेगेनोत्पततस्तस्यपेतुस्तेरजनीचराः ॥ भुविसंभिन्नहृदयाःप्रहारवरपीडिताः २० संसक्तोहर्म्यशिखरा
त्तस्मात्पुनरवापतत् ॥ लंघयित्वापुरींलंकांसुवेलस्यसमीपतः २१ ॥२३१॥

स्यर्थमुच्छिष्टपदम् ५ गुल्माःगुप्तोपवेशनस्थानानि बुरुजाख्यामहास्तंभाःस्थावरगुल्माः जंगमाःगुल्माः
सेनाद्या अलंग इत्यभिहिताः ६ गतव्यथोनिर्भयः ७ । ८ आमंत्र्य हेराणइतिसंबोध्य ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१

२२ सर्वाभिसारोयुगपत्सर्वैषामभिसारोयत्रस्तेन । 'सुलतानढवा'इति म्लेच्छप्रसिद्धेन २३ ऋक्षाधिपतिर्जांबवान् २४ करभोमणिबंधादिकनिष्ठांतंहस्तप्रदेशस्तद्वदरुणपांडवःश्वेतारुणाः २५
२६ । २७ शणो गोणीसूत्रोपादानवीरुत् २८ । २९ यातैर्दुर्गरक्षणार्थंसामग्रीकृता सैवतेषांनगरनाशायाभूदित्याह बिभिदुरस्तेइत्यादिना कर्णस्तिर्यग्यानंतेनप्रकारेणयत्पाषाणादि विस्तरे
णक्रियते तत्तद्गृहविशेषं कर्णाट्टमितिवदंति तद्धिदिक्कोणस्यचतुरस्रस्योपरिविदिक्कोणंचतुरस्रं तदुपरिदिक्कोणं तदुपरिपुनर्विदिक्कोणमित्येवंक्रमेणोत्तरोत्तरकल्पप्रमाणैश्चतुरस्रैःसमाप्यतइतिम

कोसलेंद्रमथागम्यसर्वमावेद्यवानरः ॥ विशश्रामसतेजस्वीराघवेणाभिनंदितः २२ ततःसर्वाभिसारेणहरीणांवातरंहसाम् ॥ भेदयामासलंकायाःप्राकारंरघुनंदनः
२३ विभीषणर्क्षाधिपतीपुरस्कृत्याथलक्ष्मणः ॥ दक्षिणंनगरद्वारमवामृद्नाद्दुरासदम् २४ करभारुणपांडूनांहरीणांयुद्धशालिनाम् ॥ कोटीशतसहस्रेणलंकाम
भ्यपतत्तदा २५ प्रलंबबाहूरुकरजंघांतरविलंबिनाम् ॥ ऋक्षाणांधूम्रवर्णानांतिस्रःकोट्योव्यवस्थिताः २६ उत्पतद्भिःपतद्भिश्चनिपतद्भिश्चवानरैः ॥ नादृ
श्यततदासूर्योरजसानाशितप्रभः २७ शालिप्रसूनसदृशैःशिरीषकुसुमप्रभैः ॥ तरुणादित्यसदृशैःशणगौरैश्चवानरैः २८ प्राकारंददृशुस्तेतुसमंतात्कपिली
कृतम् ॥ राक्षसाविस्मिताराजन्सस्त्रीवृद्धाःसमंततः २९ बिभिदुस्तेमणिस्तंभान्कर्णाट्टशिखराणिच ॥ भग्नोन्मथितशृंगाणियंत्राणिचविचिक्षिपुः ३० परिगृह्य
शतघ्नीश्चसचक्राःसहुडोपलाः ॥ चिक्षिपुर्भुजवेगेनलंकामध्येमहास्वनाः ३१ प्राकारस्थाश्चयेकेचिन्निशाचरगणास्तथा ॥ प्रदुद्रुवुस्तेशतशःकपिभिःसमभिद्रु
ताः ३२ ततस्तुराजवचनाद्राक्षसाःकामरूपिणः ॥ निर्ययुर्विकृताकाराःसहस्रशतसंघशः ३३ शस्त्रवर्षाणिवर्षंतोद्रावयित्वावनौकसः ॥ प्राकारंशोभयंतस्ते
परंविक्रममास्थिताः ३४ समाषराशिसदृशैर्बभूवक्षणदाचरैः ॥ कृतोनिर्वानरोभूयःप्राकारोभीमदर्शनैः ३५ पेतुःशूलविभिन्नांगाबहवोवानरर्षभाः ॥ स्तंभतो
रणभग्नाश्चपेतुस्तत्रनिशाचराः ३६ केशाकेश्यभवद्युद्धंरक्षसांवानरैःसह ॥ नखैर्दंतैश्चवीराणांखादतांवैपरस्परम् ३७ निष्टनंतोह्युभयतस्तत्रवानरराक्षसाः ॥ हता
निपतिताभूमौनमुंचंतिपरस्परम् ३८ रामस्तुशरजालानिववर्षजलदोयथा ॥ तानिलंकांसमासाद्यजघ्नुस्तान्रजनीचरान् ३९ सौमित्रिरपिनाराचैर्दृढधन्वा
जितक्लमः ॥ आदिश्यादिश्यदुर्गस्थान्पातयामासराक्षसान् ४० ततःप्रत्यवहारोऽभूत्सैन्यानांराघवाज्ञया ॥ कृतेविमर्देलंकायांलब्धलक्ष्योजयोत्तरः ४१ ॥ इति
श्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणिलंकाप्रवेशेचतुरशीत्यधिकद्विशततमोऽध्यायः ॥ २८४ ॥ मार्कंडेयउवाच ॥ ततोनिविशमानांस्तान्सैनिकान्
रावणानुगाः ॥ अभिजग्मुर्गणाऽनेकेपिशाचक्षुद्ररक्षसाम् १ पर्वणःपतनोजंभःखरःक्रोधवशोहरिः ॥ प्ररुजश्चारुजश्चैवप्रघसश्चैवमादयः २ ततोऽभिपततांते
षामदृश्यानांदुरात्मनाम् ॥ अंतर्धानवधंतज्ज्ञश्चकारसविभीषणः ३

सिद्धम् ३० । ३१ । ३२ । ३३ । ३४ । ३५ स्तंभतःस्तंभैर्वानरोपात्तैः रणेमग्नारणमग्नाः ३६ केशाके
शि अन्योन्यंकेशेषुगृहीत्वा ३७ निष्टनंतःशब्दंकुर्वंतः ३८ । ३९ आदिश्यसंमुखीकृत्येत्यर्थः ४० प्रत्यवहारःशिबिरंप्रतिगमनं लब्धाआयुधैःप्राप्ता लक्ष्यावेध्यायस्मिन्नवंध्यप्रहारइतियावत् जयो
त्तरोजयोत्कर्षवान् ४१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे चतुरशीत्यधिकद्विशततमोऽध्यायः ॥ २८४ ॥ ७८ ॥ गणाअनेकेइतिच्छेदः १ । २ अंतर्धानवधमंतर्धानशकैर्नाशम् ३

४ । ५ हरीन्वानरान् अभ्यवहारयदावेष्टितवान् ६ । ७ । ८ । ९ । १० ।११ आनर्छदपीडयत् १२ । १३ । १४ । १५ ॥ इत्यारण्यकेप० नी० भारत भावदीपे पंचाशीत्यधिकद्विशततमो

तेदृश्यमानाहरिभिर्बलिभिर्दूरपातिभिः ॥ निहताःसर्वशोराजन्महींजग्मुर्गतासवः ४ अमृष्यमाणस्वबलोरावणोनिर्ययावथ ॥ राक्षसानांबलैर्घोरैःपिशाचानांचसं
वृतः ५ युद्धशास्त्रविधानज्ञउशनाइवचापरः ॥ व्यूह्यचौशनसंव्यूहंहरीनभ्यवहारयत् ६ राघवस्तुविनिर्यांतंव्यूढानीकंदशाननम् ॥ बार्हस्पत्यंविधिंकृत्वाप्र
त्यव्यूहन्निशाचरम् ७ समेत्ययुयुधेतत्रततोरामेणरावणः ॥ युयुधेलक्ष्मणश्चापितथैवेंद्राजितासह ८ विरूपाक्षेणसुग्रीवस्तारेणचनिखर्वटः ॥ तुंडेनचनलस्तत्र
पटुशःपनसेनच ९ विषह्यंयंहियोमेनेसस्तेनसमेयिवान् ॥ युयुधेयुद्धवेलायांस्वबाहुबलमाश्रितः १० ससंप्रहारोववृधेभीरूणांभयवर्धनः ॥ लोमसंहर्षणोघोरः
पुरादेवासुरेयथा ११ रावणोराममानर्छच्छक्तिशूलासिवृष्टिभिः ॥ निशितैरायसैस्तीक्ष्णैरावणंचापिराघवः १२ तथैवेंद्राजितंयत्तंलक्ष्मणोमर्मभेदिभिः ॥ इंद्र
जिच्चापिसौमित्रिंबिभेदबहुभिःशरैः १३ विभीषणःप्रहस्तंचप्रहस्तश्चविभीषणम् ॥ खगपत्रैःशरैस्तीक्ष्णैरभ्यवर्षद्गतव्यथः १४ तेषांबलवतामासीन्महास्त्राणां
समागमः ॥ विव्यथुःसकलायेनत्रयोलोकाश्चराचराः १५ ॥ इतिश्रीम० आरण्यकेपर्वणि रामोपाख्यानप० रामरावणादिद्वंद्वयुद्धेपंचाशीत्यधिकद्विशतत
मोऽध्यायः ॥ २८५ ॥ ॥ छ ॥ मार्कंडेयउवाच ॥ ततःप्रहस्तःसहसासमभ्येत्यविभीषणम् ॥ गदयाताडयामासविनद्यरणकर्कशः १ सतयाऽभिहतोधी
मानगदयाभीमवेगया ॥ नाकंपतमहाबाहुर्हिमवानिवसुस्थिरः २ ततःप्रगृह्यविपुलांशतघंटांविभीषणः ॥ अनुमंत्र्यमहाशक्तिंचिक्षेपास्यशिरःप्रति ३ पतं
त्यासतयावेगाद्राक्षसोऽशनिवेगया ॥ हृतोत्तमांगोददृशेवातरुग्णइवद्रुमः ४ तंदृष्ट्वानिहतंसंख्येप्रहस्तंक्षणदाचरम् ॥ अभिदुद्रावधूम्राक्षोवेगेनमहताकपीन् ५
तस्यमेघोपमंसैन्यमापतद्भीमदर्शनम् ॥ दृष्ट्वैवसहसादीर्णारणेवानरपुंगवाः ६ ततस्तान्सहसादीर्णान्दृष्ट्वावानरपुंगवान् ॥ निर्ययौकपिशार्दूलोहनूमान्मारुतात्म
जः ७ तंदृष्ट्वावऽस्थितंसंख्येहरयःपवनात्मजम् ॥ महत्यात्वरयाराजन्संन्यवर्तंतसर्वशः ८ ततःशब्दोमहानासीत्तुमुलोलोमहर्षणः ॥ रामरावणसैन्यानाम
न्योन्यमभिधावताम् ९ तस्मिन्प्रवृत्तेसंग्रामेघोरेरुधिरकर्दमे ॥ धूम्राक्षःकपिसैन्यंतद्द्रावयामासपत्रिभिः १० तंसरक्षोमहामात्रमापतंतंसपत्नजित् ॥ प्रतिजग्रा
हहनुमांस्तरसापवनात्मजः ११ तयोर्युद्धमभूद्घोरंहरिराक्षसवीरयोः ॥ जिगीषतोर्युधाऽन्योन्यमिंद्रप्रह्लादयोरिव १२ गदाभिःपरिघैश्चैवराक्षसोजघ्निवान्क
पिम् ॥ कपिश्चजघ्निवान्रक्षःसस्कंधविटपैर्द्रुमैः १३ ततस्तमतिकोपेनसाश्वंसरथसारथिम् ॥ धूम्राक्षमवधीत्क्रुद्धोहनूमान्मारुतात्मजः १४ ततस्तंनिहतंदृष्ट्वाधू
म्राक्षंराक्षसोत्तमम् ॥ हरयोजातविस्रंभाजघ्नुरन्येत्यचसैनिकान् १५ तेवध्यमानाहरिभिर्बलिभिर्जितकाशिभिः ॥ राक्षसाभग्नसंकल्पालंकामभ्यपतन्भयात् १६

ऽध्यायः ॥ २८५ ॥ ॥ ततःप्रहस्तइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० रक्षोमहामात्रंरक्षःश्रेष्ठम् ११ । १२ । १३ । १४ । १५ । १६

१७ । १८ । १९ । २० आगतसाध्वसोजातभयः २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे षडशीत्यधिकद्विशततमो

तेऽभिपत्यपुरंभग्नाहतशेषानिशाचराः ॥ सर्वंराज्ञेयथावृत्तंरावणायन्यवेदयन् १७ श्रुत्वातुरावणस्तेभ्यःप्रहस्तंनिहतंयुधि ॥ धूम्राक्षंचमहेष्वासंससैन्यंवानरर्षभैः
१८ सुदीर्घमिवनिःश्वस्यसमुत्पत्यवरासनात् ॥ उवाचकुंभकर्णस्यकर्मकालोऽयमागतः १९ इत्येवमुक्त्वाविविधैर्वादित्रैःसुमहास्वनैः ॥ शयानमतिनिद्रालुंकुंभकर्णम
बोधयत् २० प्रबोध्यमहताचैनंयत्नेनागतसाध्वसः ॥ स्वस्थमासीनमव्यग्रंविनिद्रंराक्षसाधिपः २१ ततोऽब्रवीद्दशग्रीवःकुंभकर्णंमहाबलम् ॥ धन्योऽसियस्यते
निद्राकुंभकर्णेयमीदृशी २२ यइदंदारुणाकारंनजानीषेमहाभयम् ॥ एषतीर्त्वाऽर्णवंरामःसेतुनाहरिभिःसह २३ अवमन्येहनःसर्वान्करोतिकदनंमहत् ॥ मया
त्वपहृताभार्यासीतानामास्यजानकी २४ तांनेतुंसइहायातोबद्ध्वासेतुंमहार्णवे ॥ तेनचैवप्रहस्तादिर्महान्नःस्वजनोहतः २५ तस्यनान्योनिहंताऽस्तित्वामृते
शत्रुकर्शन ॥ सदंशितोऽभिनिर्यायत्वमद्यबलिनांवर २६ रामादीन्समरेसर्वाञ्जहिशत्रूनरिंदम ॥ दूषणावरजौचैवव्वज्रवेगप्रमाथिनौ २७ तौत्वांबलेनमहतासाहि
तावनुयास्यतः ॥ इत्युक्त्वाराक्षसपतिःकुंभकर्णंतरस्विनम् ॥ संदिदेशेतिकर्तव्येवज्रवेगप्रमाथिनौ २८ तथेत्युक्त्वातुतौवीरौरावणंदूषणानुजौ ॥ कुंभकर्णंपुरस्कृ
त्यतूर्णंनिर्ययतुःपुरात् २९ ॥ इतिश्रीम०भा०आ०प० रामोपाख्यानपर्वणिकुंभकर्णनिर्गमनेषडशीत्यधिकद्विशततमोऽध्यायः ॥ २८६ ॥ मार्कंडेयउवाच ॥
ततोनिर्यायस्वपुरात्कुंभकर्णःसहानुगः ॥ अपश्यत्कपिसैन्यंतज्जितकाश्यग्रतःस्थितम् १ सवीक्ष्यमाणस्तत्सैन्यंरामदर्शनकांक्षया ॥ अपश्यच्चापिसौमि
त्रिंधनुष्पाणिंव्यवस्थितम् २ तमभ्येत्याशुहरयःपरिवव्रुःसमंततः ॥ अभ्यघ्नंश्चमहाकायैर्बहुभिर्जगतीरुहैः ३ करजैरतुदंश्चान्येविहायभयमुत्तमम् ॥ बहुधायु
ध्यमानास्तेयुद्धमार्गैःप्लवंगमाः ४ नानाप्रहरणैर्भीमैराक्षसेंद्रमताडयन् ॥ सताड्यमानःप्रहसन्भक्षयामासवानरान् ५ बलंचंडबलाख्यंचवज्रबाहुंचवानरम् ॥
तद्दृष्ट्वाव्यथनंकर्मकुंभकर्णस्यरक्षसः ६ उदक्रोशन्परित्रस्तास्तारप्रभृतयस्तदा ॥ तानुच्चैःक्रोशतःसैन्यान्श्रुत्वासहरियूथपान् ७ अभिदुद्रावसुग्रीवःकुंभकर्णम
पेतभीः ॥ ततोनिपत्यवेगेनकुंभकर्णंमहामनाः ८ शालेनजघ्निवान्मूर्ध्निबलेनकपिकुंजरः ॥ समहात्मामहावेगःकुंभकर्णस्यमूर्धनि ९ बिभेदशालंसुग्रीवोनचैवाव्य
थयत्कपिः ॥ ततोविनद्यसहसाशालस्पर्शविबोधितः १० दोर्भ्यामादायसुग्रीवंकुंभकर्णोऽहरद्बलात् ॥ ह्रियमाणंतुसुग्रीवंकुंभकर्णेनरक्षसा ११ अवेक्ष्याभ्यद्रव
द्वीरःसौमित्रिर्मित्रनंदनः ॥ सोऽभिपत्यमहावेगंरुक्मपुंखंमहाशरम् १२ प्राहिणोत्कुंभकर्णायलक्ष्मणःपरवीरहा ॥ सतस्यदेहावरणंभित्त्वादेहंचसायकः १३ जगा
मदारयन्भूमिंरुधिरेणसमुक्षितः ॥ तथासभिन्नहृदयःसमुत्सृज्यकपीश्वरम् १४ कुंभकर्णोमहेष्वासःप्रगृहीतशिलायुधः ॥ अभिदुद्रावसौमित्रिमुद्यम्यमहतींशिलां १५

ऽध्यायः ॥ २८६ ॥ ॥ छ ॥ ॥ ततइति जितकाशि दृढमुष्टि । काशिर्मुष्टिःप्रकाशनादितियास्कः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

म.भा.टी० ११ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ वन्यावनेचरावानराः २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे वन० ६
तस्याभिपततस्तूर्णंक्षुराभ्यामुच्छ्रितौकरौ ॥ चिच्छेदनिशिताग्राभ्यांसबभूवचतुर्भुजः १६ तानप्यस्यभुजान्सर्वान्प्रगृहीतशिलायुधान् ॥ क्षुरैश्चिच्छेदलघ्वस्त्रं अ०
॥२१३॥ सौमित्रिःप्रतिदर्शयन् १७ सबभूवातिकायश्चबहुपादशिरोभुजः ॥ तंब्रह्मास्त्रेणसौमित्रिर्ददाराद्रिचयोपमम् १८ सपपातमहावीर्योदिव्यास्त्राभिहतोरणे ॥ महा
शनिविनिर्दग्धःपादपोऽङ्कुरवानिव १९ तंदृष्ट्वावृत्रसंकाशंकुंभकर्णंतरस्विनम् ॥ गतासुंपतितंभूमौराक्षसाःप्राद्रवन्भयात् २० तथातान्द्रवतोयोधान्दृष्ट्वातौ ॥२८८॥
दूषणानुजौ ॥ अवस्थाप्याथसौमित्रिंसंक्रुद्धावभ्यधावतां २१ तावाद्रवंतौसंक्रुद्धौवज्रवेगप्रमाथिनौ ॥ अभिजग्राहसौमित्रिर्विनद्योभौतपत्रिभिः २२ ततःसुतु
मुलंयुद्धमभवल्लोमहर्षणम् ॥ दूषणानुजयोःपार्थलक्ष्मणस्यचधीमतः २३ महताशरवर्षेणराक्षसौसोऽभ्यवर्षत ॥ तौचापिवीरौसंक्रुद्धावुभौतौसमवर्षताम् २४
मुहूर्त्तमेवमभवद्वज्रवेगप्रमाथिनोः ॥ सौमित्रेश्चमहाबाहोःसंप्रहारःसुदारुणः २५ अथाद्रिशृंगमादायहनुमान्मारुतात्मजः ॥ अभिद्रुत्याददेप्राणान्वज्रवेगस्यर
क्षसः २६ नीलश्चमहताग्राव्णादूषणावरजंहरिः ॥ प्रमाथिनमभिद्रुत्यप्रममाथमहाबलः २७ ततःप्रावर्त्ततपुनःसंग्रामःकटुकोदयः ॥ रामरावणसैन्यानामन्योन्य
मभिधावतां २८ शतशोनैर्ऋतान्वन्याजघ्नुर्वन्यांश्चनैर्ऋताः ॥ नैर्ऋतास्तत्रवध्यंतेप्रायेणनतुवानराः २९ ॥ इतिश्रीमहाभारतेआरण्यकेप०रामोपाख्यानप०
कुंभकर्णादिवधेसप्ताशीत्यधिकद्विशततमोऽध्यायः ॥ २८७ ॥ ॥ मार्कंडेयउवाच ॥ ततःश्रुत्वाहतंसंख्येकुंभकर्णंसहानुगम् ॥ प्रहस्तंचमहेष्वासंधूम्राक्षंचाति
तेजसम् १ पुत्रमिंद्रजितंवीरंरावणःप्रत्यभाषत ॥ जहिराममित्रघ्नसुग्रीवंचसलक्ष्मणम् २ त्वयाहिममसत्पुत्रयशोदीप्तमुपार्जितम् ॥ जित्वावज्रधरंसंख्येस
हस्राक्षंशचीपतिं ३ अंतर्हितःप्रकाशोवादिव्यैर्दत्तवरैःशरैः ॥ जहिशत्रूनमित्रघ्न ममशस्त्रभृतांवर ४ रामलक्ष्मणसुग्रीवाःशरस्पर्शनतेऽनघ ॥ समर्थाःप्रतिसोढुं
चकुतस्तदनुयायिनः ५ अगतायाप्रहस्तेनकुंभकर्णेनचानघ ॥ खरस्यापचितिःसंख्येतांगच्छत्वंमहाभुज ६ त्वमद्यनिशितैर्बाणैर्हत्वाशत्रून्ससैनिकान् ॥
प्रतिनंदयमांपुत्रपुराजित्वेववासवम् ७ इत्युक्तःसतथेत्युक्त्वारथमास्थायदंशितः ॥ प्रययाविंद्रजिद्राजंस्तूर्णमायोधनंप्रति ८ ततोविश्राव्यविस्पष्टंनामराक्षसपुं
गवः ॥ आह्वयामाससमरेलक्ष्मणंशुभलक्षणम् ९ तंलक्ष्मणोऽभ्यधावच्चप्रगृह्यसशरंधनुः ॥ त्रासयंस्तलघोषेणसिंहःक्षुद्रमृगान्यथा १० तयोःसमभवद्युद्धंसुमह
ज्जयगृद्धिनोः ॥ दिव्यास्त्रविदुषोस्तीव्रमन्योन्यस्पर्धिनोस्तदा ११ रावणिस्तुयदानैवंविशेषयतिसायकैः ॥ ततोगुरुतरंयत्नमातिष्ठद्बलिनांवरः १२ ततएनंमहावे
गैरर्दयामासतोमरैः ॥ तानागतान्सचिच्छेदसौमित्रिर्निशितैःशरैः १३ तेनिकृत्ताःशरैस्तीक्ष्णैर्न्यपतन्धरणीतले ॥ तमंगदोवालिसुतःश्रीमानुद्यम्यपादपम् १४ ॥२१३॥
सप्ताशीत्यधिकद्विशततमोऽध्यायः ॥ २८७ ॥ ॥ ७ ॥ ततइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४

१५ । १६ । १७ ससर्जउत्सृष्टवान् शालस्कंधंमहास्कंधंतरुं १८ । १९ । २० । २१ । २२ । २३ । २४ तान्हरीन् तौचरामलक्ष्मणौ २५ । २६ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे
अभिद्रुत्यमहावेगस्ताडयामाससमूर्धनि ॥ तस्येंद्रजिदसंभ्रांतःप्रासेनोरसिवीर्यवान् १५ प्रहर्तुमैच्छत्तंचास्यप्रासंचिच्छेदलक्ष्मणः ॥ तमभ्याशगतंवीरमंगदं
रावणात्मजः १६ गदयाऽताडयत्सव्येपार्श्वेवानरपुंगवम् ॥ तमचिंत्यप्रहारंसबलवान्वालिनःसुतः १७ ससर्जेंद्रजितःक्रोधाच्छालस्कंधंतथांऽगदः ॥ सोंऽगदे
नरुषोत्सृष्टोवधायेंद्रजितस्तरुः १८ जघानेंद्रजितःपार्थरथंसाश्वंससारथिं ॥ ततोहताश्वात्प्रस्कंद्यरथात्सहतसारथिः १९ तत्रैवांतर्दधेराजन्माययारावणात्म
जः ॥ अंतर्हितंविदित्वातंबहुमायंचराक्षसम् २० रामस्तंदेशमागम्यतत्सैन्यंपर्यरक्षत ॥ सराममुद्दिश्यशरैस्ततोदत्तवरैस्तदा २१ विव्याधसर्वगात्रेषुलक्ष्म
णंचमहाबलम् ॥ तमदृश्यंशरैःशूरौमाययांतर्हितंतदा २२ योधयामासतुरुभौरावणिंरामलक्ष्मणौ ॥ सरुषासर्वगात्रेषुतयोःपुरुषसिंहयोः २३ व्यसृजत्साय
कान्भूयःशतशोऽथसहस्रशः ॥ तमदृश्यंविचिन्वंतःसृजंतमनिशंशरान् २४ हरयोविविशुर्व्योमप्रगृह्यमहतीःशिलाः ॥ तांश्चतौचाप्यदृश्यःसशरैर्विव्याधरा
क्षसः २५ सभृशंताडयामासरावणिर्माययावृतः ॥ तौशरैराचितौवीरौभ्रातरौरामलक्ष्मणौ ॥ पेततुर्गगनाद्भूमिंसूर्याचंद्रमसाविव २६ ॥ इतिश्रीमहाभारते
आरण्यकेपर्वणि रामोपाख्यानपर्वणि इंद्रजिद्युद्धेअष्टाशीत्यधिकद्विशततमोऽध्यायः ॥ २८८ ॥ ॥ मार्कंडेयउवाच ॥ तावुभौपतितौदृष्ट्वाभ्रातरौ
रामलक्ष्मणौ ॥ बबंधरावणिर्भूयःशरैर्दत्तवरैस्तदा १ तौवीरौशरबंधेनबद्धाविंद्रजितारणे ॥ रेजतुःपुरुषव्याघ्रौशकुंताविवपंजरे २ तौदृष्ट्वापतितौभूमौशतशः
सायकैश्चितौ ॥ सुग्रीवःकपिभिःसार्धंपरिवार्यततःस्थितः ३ सुषेणमैंदद्विविदैःकुमुदेनांगदेनच ॥ हनुमन्नीलतारैश्चनलेनचकपीश्वरः ४ ततस्तंदेशमागम्य
कृतकर्माविभीषणः ॥ बोधयामासतौवीरौप्रज्ञास्त्रेणप्रबोधितौ ५ विशल्यौचापिसुग्रीवःक्षणेनैतौचकारह ॥ विशल्यया महौषध्यादिव्यमंत्रप्रयुक्तया ६ तौ
लब्धसंज्ञौनृवरौविशल्यावुदतिष्ठतां ॥ गततंद्रीक्लमौचापिक्षणेनैतौमहारथौ ७ ततोविभीषणःपार्थराममिक्ष्वाकुनंदनम् ॥ उवाचविज्वरंदृष्ट्वाकृतांजलिरिदं
वचः ८ इदमंभोगृहीत्वातुराजराजस्यशासनात् ॥ गुह्यकोऽभ्यागतःश्वेतात्त्वत्सकाशमरिंदम ९ इदमंभःकुबेरस्तेमहाराजप्रयच्छति ॥ अंतर्हितानांभूतानां
दर्शनार्थंपरंतप १० अनेनमृष्टनयनोभूतान्यंतर्हितान्युत ॥ भवान्द्रक्ष्यतियस्मैचप्रदास्यतिनरःसतु ११ तथेतिरामस्तद्वारिप्रतिगृह्याभिसंस्कृतम् ॥ चक्रा
रनेत्रयोःशौचंलक्ष्मणश्चमहामनाः १२ सुग्रीवजांबवंतौचहनुमानंगदस्तथा ॥ मैंदद्विविदनीलाश्चप्रायःप्लवगसत्तमाः १३ तथासमभवच्चापियदुवाचविभीषणः ॥
क्षणेनातींद्रियाण्येषांचक्षूंष्यासन्युधिष्ठिर १४ इंद्रजित्कृतकर्माचपित्रेकर्मतदात्मनः ॥ निवेद्यपुनरागच्छत्त्वरयाऽऽजिशिरःप्रति १५ तमापतंतं
संक्रुद्धंपुनरेवयुयुत्सया ॥ अभिदुद्रावसौमित्रिर्विभीषणमतेस्थितः १६
अष्टाशीत्यधिकद्विशततमोऽध्यायः ॥ २८८ ॥ ॥ ७ ॥ ताविति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ अतींद्रियाण्यतींद्रियार्थग्राहकाणि १४ । १५ । १६

कृतसंज्ञो विभीषणे नसंकेतितः १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ निधायबद्धा असिंबद्धं ३३ इत्यारण्यकेपर्वणिनीलं
अकृताह्निकमेवैनंजिघांसुर्जितकाशिनम् ॥ शरैर्जघानसंक्रुद्धःकृतसंज्ञोथलक्ष्मणः १७ तयोःसमभवद्युद्धंतदाऽन्योन्यंजिगीषतोः ॥ अतीवचित्रमाश्चर्यंशक्रप्र
ह्लादयोरिव १८ अविध्यदिंद्रजित्तीक्ष्णैःसौमित्रिंमर्मभेदिभिः ॥ सौमित्रिश्चानलस्पर्शैरविध्यद्रावणिंशरैः १९ सौमित्रिशरसंस्पर्शाद्रावणिःक्रोधमूर्छितः ॥ अ
सृजल्लक्ष्मणायाष्टौशरानाशीविषोपमान् २० तस्यासून्पावकस्पर्शैःसौमित्रिःपत्रिभिस्त्रिभिः ॥ यथानिरहरद्वीरस्तन्मेनिगदतःशृणु २१ एकेनास्यधनुष्मंतं
बाहुंदेहादपातयत् ॥ द्वितीयेनसनाराचंभुजंभूमौन्यपातयत् २२ तृतीयेनतुबाणेनपृथुधारेणभास्वता ॥ जहारसुनसंचापिशिरोभ्राजिष्णुकुंडलम् २३ विनि
कृत्तभुजस्कंधंकबंधंभीमदर्शनम् ॥ तंहत्वासूतमप्यस्त्रैर्जघानबलिनांवरः २४ लंकांप्रवेशयामासुस्तंरथंवाजिनस्तदा ॥ ददर्शरावणस्तंचरथंपुत्रविनाकृतम्
२५ सपुत्रंनिहतंदृष्ट्वात्रासात्संभ्रांतमानसः ॥ रावणःशोकमोहार्तोवैदेहींहंतुमुद्यतः २६ अशोकवनिकास्थांतांरामदर्शनलालसाम् ॥ खड्गमादायदुष्टात्माजवेना
भिपपातह २७ तंदृष्ट्वातस्यदुर्बुद्धेरविंध्यःपापनिश्चयम् ॥ शमयामाससंक्रुद्धंश्रूयतांयेनहेतुना २८ महाराज्येस्थितोदीप्तेनास्त्रियंहंतुमर्हसि ॥ हतैवैषायदास्त्री
चबंधनस्थाचतेवशे २९ नचैषादेहभेदेनहतास्यादितिमेमतिः ॥ जहिभर्तारमेवास्याहतेतस्मिन्हताभवेत् ३० नहितेविक्रमेतुल्यःसाक्षादपिशतक्रतुः ॥ अ
सकृद्धित्वयासेंद्रास्त्रासितास्त्रिदशायुधि ३१ एवंबहुविधैर्वाक्यैरविंध्योरावणंतदा ॥ क्रुद्धंसंशमयामासजगृहेचसतद्वचः ३२ निर्याणेसमतिंकृत्वानिधायासिंक्ष
पाचरः ॥ आज्ञापयामासतदारथोमेकल्प्यतामिति ३३ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणिइंद्राजिद्वधेऊननवत्यधिकद्विशततमो
ऽध्यायः ॥ २८९ ॥ ॥ छ ॥ मार्कंडेयउवाच ॥ ततःक्रुद्धोदशग्रीवःप्रियेपुत्रेनिपातिते ॥ निर्ययौरथमास्थायहेमरत्नविभूषितम् १ संवृतोराक्षसैर्घोरैर्विवि
धायुधपाणिभिः ॥ अभिदुद्रावरामंसयोधयन्हरियूथपान् २ तमाद्रवंतंसंक्रुद्धंमैंदनीलनलांगदाः ॥ हनूमाञ्जांबवांश्चैवससैन्याःपर्यवारयन् ३ तेदशग्रीवसैन्यं
तदृक्षवानरपुंगवाः ॥ द्रुमैर्विध्वंसयांचक्रुर्दशग्रीवस्यपश्यतः ४ ततःस्वसैन्यमालोक्यवध्यमानमरातिभिः ॥ मायावीचासृजन्मायांरावणोराक्षसाधिपः ५
तस्यदेहविनिष्क्रांताःशतशोऽथसहस्रशः ॥ राक्षसाःप्रत्यदृश्यंतशरशक्त्यृष्टिपाणयः ६ तान्रामोजघ्निवान्सर्वान्दिव्येनास्त्रेणराक्षसान् ॥ अथभूयोऽपिमायांसव्य
दधाद्राक्षसाधिपः ७ कृत्वारामस्यरूपाणिलक्ष्मणस्यचभारत ॥ अभिदुद्रावरामंचलक्ष्मणंचदशाननः ८ ततस्तेराममर्च्छंतोलक्ष्मणंचक्षपाचराः ॥ अभि
पेतुस्तदारामंप्रगृहीतशरासनाः ९ तांदृष्ट्वाराक्षसेंद्रस्यमायामिक्ष्वाकुनंदनः ॥ उवाचरामंसौमित्रिरसंभ्रांतोबृहद्वचः १० जहीमान्राक्षसान्पापानात्मनःप्रति
रूपकान् ॥ जघानरामस्तांश्चान्यानात्मनःप्रतिरूपकान् ११ कंठीयेभारतभावदीपेऊननवत्यधिक
द्विशततमोऽध्यायः ॥ २८९ ॥ ॥ छ ॥ ॥ ततःक्रुद्धइति १ । २ । ३ । ४ । ५ । ६ । ७ रामस्यरूपंकृत्वालक्ष्मणमभिदुद्राव लक्ष्मणस्यरूपंकृत्वारामभितियोजना ८ । ९ । १० । ११

१२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ विकृतांभीषणाम् २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ पंचभूतानितस्यजग्मुरित्यर्थः ३२ । ३३
ततोहर्यश्वयुक्तेनरथेनादित्यवर्चसा ॥ उपतस्थेरणेराममातलिःशक्रसारथिः १२ ॥ मातलिरुवाच ॥ अयंहर्यश्वयुग्जैत्रोमघोनःस्यंदनोत्तमः ॥ अनेनशक्रः
काकुत्स्थसमरेदैत्यदानवान् १३ शतशःपुरुषव्याघ्ररथोदारेणजघ्निवान् ॥ तदनेननरव्याघ्रमयायत्तेनसंयुगे १४ स्यंदनेनजहिक्षिप्रंरावणंमाचिरंकृथाः ॥ इ
त्युक्तोराघवस्तथ्यंवचोऽशंकतमातलेः १५ मायैषाराक्षसस्येतितमुवाचविभीषणः ॥ नेयंमायानरव्याघ्ररावणस्यदुरात्मनः १६ तदातिष्ठरथंशीघ्रमिममैंद्रंम
हाद्युते ॥ ततःप्रहृष्टःकाकुत्स्थस्तथेत्युक्त्वाविभीषणम् १७ रथेनाभिपपाताथदशग्रीवंरुषाऽन्वितः ॥ हाहाकृतानिभूतानिरावणेसमभिद्रुते १८ सिंहनादाःस
पटहादिविदिव्यास्तथाऽनदन् ॥ दशकंधरराजसून्वोस्तथायुद्धमभून्महत् १९ अलब्धोपममन्यत्रतयोरेवतथाऽभवत् ॥ सरामायमहाघोरंविससर्जनिशाचरः
२० शूलमिंद्राशनिप्रख्यंब्रह्मदंडमिवोद्यतम् ॥ तच्छूलंसत्वरंरामश्चिच्छेदनिशितैःशरैः २१ तद्दृष्ट्वादुष्करंकर्मरावणंभयमाविशत् ॥ ततःक्रुद्धःससर्जाशुदश
ग्रीवःशिताञ्छरान् २२ सहस्रायुतशोरामेशस्त्राणिविविधानिच ॥ ततोभुशुंडीःशूलानिमुसलानिपरश्वधान् २३ शक्तीश्चविविधाकाराःशतघ्नीश्चशितान्क्षुरान् ॥
तांमायांविकृतांदृष्ट्वादशग्रीवस्यरक्षसः २४ भयात्प्रदुद्रुवुःसर्वेवानराःसर्वतोदिशम् ॥ ततःसुपत्रंसुमुखंहेमपुंखंशरोत्तमम् २५ तूणादादायकाकुत्स्थोब्रह्मास्त्रेणयु
योजह ॥ तंबाणवर्यंरामेणब्रह्मास्त्रेणानुमंत्रितम् २६ जहृषुर्देवगंधर्वादृष्ट्वाशक्रपुरोगमाः ॥ अल्पावशेषमायुश्चततोऽमन्यंतरक्षसः २७ ब्रह्मास्त्रोदीरणाच्छत्रोर्देवदा
नवकिंनराः ॥ ततःससर्जतंरामःशरमप्रतिमौजसम् २८ रावणांतकरंघोरंब्रह्मदंडमिवोद्यतम् ॥ मुक्तमात्रेणरामेणदूराकृष्टेनभारत २९ सतेनराक्षसश्रेष्ठःसर
थःसाश्वसारथिः ॥ प्रजज्वालमहाज्वालेनाग्निनाऽभिपरिप्लुतः ३० ततःप्रहृष्टास्त्रिदशाःसहगंधर्वचारणाः ॥ निहतंरावणंदृष्ट्वारामेणाक्लिष्टकर्मणा ३१ तत्यजु
स्तंमहाभागंपंचभूतानिरावणम् ॥ भ्रंशितःसर्वलोकेषुसहिब्रह्मास्त्रतेजसा ३२ शरीरधातवोह्यस्यमांसंरुधिरमेवच ॥ नेशुर्ब्रह्मास्त्रनिर्दग्धानचभस्माऽप्यदृश्यत
३३ ॥ इतिश्रीम० भा० आ०प० रामोपाख्यानपर्वणिरावणवधेनवत्यधिकद्विशततमोऽध्यायः ॥ २९० ॥ ॥ मार्कंडेयउवाच ॥ सहत्वारावणंक्षुद्रंराक्षसें
द्रंसुरद्विषम् ॥ बभूवहृष्टःससुहृद्रामःसौमित्रिणासह १ ततोहतेदशग्रीवेदेवाःसर्षिपुरोगमाः ॥ आशीर्भिर्जययुक्ताभिरानर्चुस्तंमहाभुजम् २ रामंकमलपत्राक्षंतु
ष्टुवुःसर्वदेवताः ॥ गंधर्वाःपुष्पवर्षैश्चवाग्भिश्चत्रिदशालयाः ३ पूजयित्वायथारामंप्रतिजग्मुर्यथागतम् ॥ तन्महोत्सवसंकाशमासीदाकाशमच्युत ४ ततोह
त्वादशग्रीवंलंकांरामोमहायशाः ॥ विभीषणायप्रददौप्रभुःपरपुरंजयः ५ ततःसीतांपुरस्कृत्यविभीषणपुरस्कृताम् ॥ अविंध्योनामसुप्रज्ञोवृद्धामात्योविनिर्ययौ ६
॥ इत्यारण्यके पर्वणि नीलकंठीये भारतभावदीपे नवत्यधिकद्विशततमोऽध्यायः ॥ २९० ॥ ॥ छ ॥ ॥ सहत्वेति १ । २ त्रिदशालयःस्वर्गस्तत्रस्थाः ३ । ४ । ५ । ६

७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४

उवाचचमहात्मानंकाकुत्स्थंदैन्यमास्थितः ॥ प्रतीच्छदेवींसद्वृत्तांमहात्मन्जानकीमिति ७ एतच्छ्रुत्वावचस्तस्मादवतीर्यरथोत्तमात् ॥ बाष्पेणापिहितांसी
तांददर्शेक्ष्वाकुनंदनः ८ तांदृष्ट्वाचारुसर्वांगींयानस्थांशोककर्शिताम् ॥ मलोपचितसर्वांगींजटिलांकृष्णवाससम् ९ उवाचरामोवैदेहींपरामर्शविशंकितः ॥ ग
च्छवैदेहिमुक्तात्वंयत्कार्यंतन्मयाकृतम् १० मामासाद्यपतिंभद्रेनत्वंराक्षसवेश्मनि ॥ जरांव्रजेथाइतिमेनिहतोऽसौनिशाचरः ११ कथंह्यस्मद्विधोजातुजानन्धर्म
विनिश्चयम् ॥ परहस्तगतांनारींमुहूर्तमपिधारयेत् १२ सुवृत्तामसुवृत्तांवाऽप्यहंत्वामद्यमैथिलि ॥ नोत्सहेपरिभोगायश्वावलीढंहविर्यथा १३ ततःसासहसाबा
लातच्छ्रुत्वादारुणंवचः ॥ पपातदेवीव्यथितानिकृत्ताकदलीयथा १४ योऽप्यस्याहर्षसंभूतोमुखरागस्तदाऽभवत् ॥ क्षणेनसपुनर्नष्टोनिःश्वासइवदर्पणे १५ त
तस्तेहरयःसर्वेतच्छ्रुत्वारामभाषितम् ॥ गतासुकल्पानिश्चेष्टाबभूवुःसहलक्ष्मणाः १६ ततोदेवोविशुद्धात्माविमानेनचतुर्मुखः ॥ पद्मयोनिर्जगत्स्रष्टादर्शयामा
सराघवम् १७ शक्रश्चाग्निश्चवायुश्चयमोवरुणएवच ॥ यक्षाधिपश्चभगवांस्तथासप्तर्षयोऽमलाः १८ राजादशरथश्चैवदिव्यभास्वरमूर्तिमान् ॥ विमानेनमहा
र्हेणहंसयुक्तेनभास्वता १९ ततोऽन्तरिक्षंतत्सर्वंदेवगंधर्वसंकुलम् ॥ शुशुभेतारकाचित्रंशरदीवनभस्तलम् २० ततउत्थायवैदेहीतेषांमध्येयशस्विनी ॥ उवाच
वाक्यंकल्याणीरामंपृथुलवक्षसम् २१ राजपुत्रनतेदोषंकरोमिविदिताहिते ॥ गतिःस्त्रीणांनराणांचशृणुचेदंवचोमम २२ अंतश्चरतिभूतानांमातरिश्वासदाग
तिः ॥ समेविमुंचतुप्राणान्यदिपापंचराम्यहम् २३ अग्निरापस्तथाऽऽकाशंपृथिवीवायुरेवच ॥ विमुंचंतुममप्राणान्यदिपापंचराम्यहम् २४ यथाऽहंत्वदृते
वीरनान्यंस्वप्नेऽप्यचिंतयम् ॥ तथामेदेवनिर्दिष्टस्त्वमेवहिपतिर्भव २५ ततोऽन्तरिक्षेवागासीत्सुभगालोकसाक्षिणी ॥ पुण्यासंहर्षणीतेषांवानराणांमहात्मनाम्
२६ ॥ वायुरुवाच ॥ भोभोराघवसत्यंवैवायुरस्मिसदागतिः ॥ अपापामैथिलीराजन्संगच्छसहभार्यया २७ ॥ अग्निरुवाच ॥ अहमंतःशरीरस्थोभूतानांरघु
नंदन ॥ सुसूक्ष्ममपिकाकुत्स्थमैथिलीनापराध्यति २८ ॥ वरुणउवाच ॥ रसावैमत्प्रसूताहिभूतदेहेषुराघव ॥ अहंवैत्वांप्रब्रवीमिमैथिलीप्रतिगृह्यताम् २९
॥ ब्रह्मोवाच ॥ पुत्रनैतदिहाश्चर्यंत्वयिराजर्षिधर्मिणि ॥ साधोसद्वृत्तकाकुत्स्थशृणुचेदंवचोमम ३० शत्रुरेषत्वयावीरदेवगंधर्वभोगिनाम् ॥ यक्षाणांदानवानांच
महर्षीणांचपातितः ३१ अवध्यःसर्वभूतानांमत्प्रसादात्पुराऽभवत् ॥ कस्माच्चित्कारणात्पापःकंचित्कालमुपेक्षितः ३२ वधार्थमात्मनस्तेनहृतासीतादुरात्म ॥२३५॥
ना ॥ नलकूबरशापेनरक्षाचास्याःकृतामया ३३ यदिह्यकामामासेवेत्स्त्रियमन्यामपिध्रुवम् ॥ शतधास्यफलेन्मूर्धाइत्युक्तःसोऽभवत्पुरा ३४

३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३ यत्र शिश्ये पूर्वं समु

नात्रशंकात्वयाकार्याप्रतीच्छेमांमहाद्युते ॥ कृतंत्वयामहत्कार्यंदेवानाममरप्रभ ३५ ॥ दशरथउवाच ॥ प्रीतोऽस्मिवत्सभद्रंतेपितादशरथोऽस्मिते ॥ अनुजा
नामिराज्यंचप्रशाधिपुरुषोत्तम ३६ ॥ रामउवाच ॥ अभिवादयेत्वांराजेंद्रयदित्वंजनकोमम ॥ गमिष्यामिपुरींरम्यामयोध्यांशासनात्तव ३७ ॥ मार्कंडेयउ
वाच ॥ तमुवाचपिताभूयःप्रहृष्टोभरतर्षभ ॥ गच्छायोध्यांप्रशाधीतिरामंरक्तांतलोचनम् ३८ संपूर्णानिहिवर्षाणिचतुर्दशमहाद्युते ॥ ततोदेवान्नमस्कृत्यसुहृ
द्भिरभिनंदितः ३९ महेंद्रइवपौलोम्याभार्ययासमेयिवान् ॥ ततोवरंददौतस्मैह्यविंध्यायपरंतपः ४० त्रिजटांचार्थमानाभ्यांयोजयामासराक्षसीम् ॥ तमु
वाचततोब्रह्मादेवैःशक्रपुरोगमैः ४१ कौसल्यामातरिष्टांस्तेवरानद्यददानिकान् ॥ वव्रेरामःस्थितिंधर्मेशत्रुभिश्चापराजयम् ४२ राक्षसैर्निहतानांचवानराणां
समुद्भवम् ॥ ततस्तेब्रह्मणाप्रोक्तेतथेतिवचनेतदा ४३ समुत्तस्थुर्महाराजवानरालब्धचेतसः ॥ सीताचापिमहाभागावरंहनुमतेददौ ४४ रामकीर्त्यासमंपुत्र
जीवितंतेभविष्यति ॥ दिव्यास्त्वामुपभोगाश्चमत्प्रसादकृताःसदा ४५ उपस्थास्यंतिहनुमन्नितिस्महरिलोचन ॥ ततस्तेप्रेक्षमाणानांतेषामक्लिष्टकर्मणाम्
४६ अंतर्धानंययुर्देवाःसर्वेशक्रपुरोगमाः ॥ दृष्ट्वारामंतुजानक्यासंगतंशक्रसारथिः ४७ उवाचपरमप्रीतःसुहृन्मध्यइदंवचः ॥ देवगंधर्वयक्षाणांमानुषासुरभो
गिनाम् ४८ अपनीतंत्वयादुःखमिदंसत्यपराक्रम ॥ सदेवासुरगंधर्वायक्षराक्षसपन्नगाः ४९ कथयिष्यंतिलोकास्त्वांयावद्भूमिर्धरिष्यति ॥ इत्येवमुक्त्वाऽनुज्ञा
प्यरामंशस्त्रभृतांवरम् ५० संपूज्यापाक्रमत्तेनरथेनादित्यवर्चसा ॥ ततःसीतांपुरस्कृत्यरामःसौमित्रिणासह ५१ सुग्रीवप्रमुखैश्चैवसहितःसर्ववानरैः ॥ विधाय
रक्षांलंकायांविभीषणपुरस्कृतः ५२ संततारपुनस्तेनसेतुनामकरालयम् ॥ पुष्पकेणविमानेनखेचरेणविराजता ५३ कामगेनयथामुख्यैरमात्यैःसंवृतोवशी ॥
ततस्तीरेसमुद्रस्ययत्रशिश्येसपार्थिवः ५४ तत्रैवोवासधर्मात्मासहितःसर्ववानरैः ॥ अथैनान्राघवःकालेसमानीयाभ्यपूज्यच ५५ विसर्जयामासतदारत्नैःसं
तोष्यसर्वशः ॥ गतेषुवानरेंद्रेषुगोपुच्छर्क्षेषुतेषुच ५६ सुग्रीवसहितोरामःकिष्किंधांपुनरागमत् ॥ विभीषणेनानुगतःसुग्रीवसहितस्तदा ५७ पुष्पकेणविमानेन
वैदेह्यादर्शयन्वनम् ॥ किष्किंधांतुसमासाद्यरामःप्रहरतांवरः ५८ अंगदंकृतकर्माणंयौवराज्येऽभ्यषेचयत् ॥ ततस्तैरेवसहितोरामःसौमित्रिणासह ५९ यथा
गतेनमार्गेणप्रययौस्वपुरंप्रति ॥ अयोध्यांससमासाद्यपुरींराष्ट्रपतिस्ततः ६० भरतायहनूमंतंदूतंप्रास्थापयत्तदा ॥ लक्षयित्वेंगितंसर्वंप्रियंतस्मैनिवेद्यवै ६१
वायुपुत्रेपुनःप्राप्तेनंदिग्राममुपागमत् ॥ सतत्रमलदिग्धांगंभरतंचीरवाससम् ६२ अग्रतःपादुकेकृत्वाददर्शासनिमासने ॥संगतोभरतेनाथशत्रुघ्नेनचवीर्यवान् ६३

द्रुमार्थनार्थं शयनं कृतवान् ५४ । ५५ । ५६ । ५७ । ५८ । ५९ । ६० । ६१ । ६२ । ६३

गुरुणारामेण ६४ । ६५ वैष्णवे नक्षत्रे श्रवणे ६६ । ६७ । ६८ । ६९ जारूथ्यान्त्रिगुणदक्षिणानित्यर्जुनमिश्रः। जूहूभ्यःमूथन्त्रित्युणादिसूत्रे जरूथंमांसमितिशाब्दिकाः तदा मांसमया न्मांसादिदानप्रधानान्पुत्राानित्यर्थः । निरर्गलान्अन्नाद्यर्थिनामनावृतद्वारान् । जरूथोऽसुरविशेष इति वेदभाष्यं । 'जरूथंहन्यक्षिरायेपुरंधिम्'इतिमंत्रवर्णात् । जरूथंगरूथंगृणातेरिति यास्कवचनाच्चजरूथंस्तोत्रं । तथाचायंमंत्रोनिरुक्तमाष्येव्याख्यातः हेऽग्नेत्वंपुरंधिमहांतं समिधानःसम्यग्दीपयन् वसिष्ठोमुनी रायेधनप्राप्तये जरूथंस्तोत्रं हन्गमयन् यक्षियजाति। अत्रजरतेः

राघवःसहसौमित्रिर्मुमुदेभरतर्षभ ॥ ततोभरतशत्रुघ्नौसमेतौगुरुणातदा ६४ वैदेह्यादर्शनेनोभौप्रहर्षंसमवापतुः ॥ तस्मैतद्भरतोराज्यमागतायातिसत्कृतम् ॥ न्यासंनिर्यातयामासयुक्तःपरमयामुदा ६५ ततस्तंवैष्णवेशूरंनक्षत्रेऽभिमतेऽहनि ॥ वसिष्ठोवामदेवश्चसहितावभ्यषिंचताम् ६६ सोऽभिषिक्तःकपिश्रेष्ठंसुग्रीवं ससुहृज्जनम् ॥ विभीषणंचपौलस्त्यमन्वजानाद्गृहान्प्रति ६७ अभ्यर्च्यविविधैर्भोगैःप्रीतियुक्तौमुदायुतौ ॥ समाधायेतिकर्तव्यंदुःखेनविससर्जह ६८ पुष्प कंचविमानंतत्पूजयित्वासराघवः ॥ प्रादाद्वैश्रवणायैवप्रीत्यासरघुनंदनः ६९ ततोदेवर्षिसहितःसरितंगोमतीमनु ॥ दशाश्वमेधानाजह्रेजारूथ्यान्सनिरर्गलान् ७० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणिरामाभिषेकेएकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥ ॥ मार्कंडेयउवाच ॥ एवमेत न्महाबाहोरामेणामिततेजसा ॥ प्राप्तंव्यसनमत्युग्रंवनवासकृतंपुरा १ माशुचःपुरुषव्याघ्रक्षत्रियोऽसिपरंतप ॥ बाहुवीर्याश्रितेमार्गेवर्तसेदीप्तनिर्णये २ नहि तेवृजिनंकिंचिद्वर्ततेपरमण्वपि ॥ अस्मिन्मार्गेनिषीदेयुःसेंद्राअपिसुरासुराः ३ संहत्यनिहतोवृत्रोमरुद्भिर्वज्रपाणिना ॥ नमुचिश्चैवदुर्धर्षोदीर्घजिह्वाचराक्षसी ४ सहायवतिसर्वार्थाःसंतिष्ठंतीहसर्वशः ॥ किंनुतस्याजितंसंख्येयस्यभ्राताधनंजयः ५ अयंचबलिनांश्रेष्ठोभीमोभीमपराक्रमः ॥ युवानौचमहेष्वासौवीरौमाद्रवती सुतौ ६ एभिःसहायैःकस्मात्त्वंविषीदसिपरंतप ॥ यइमेवज्रिणःसेनांजयेयुःसमरुद्गणाम् ७ त्वमप्येभिर्महेष्वासैःसहायैर्देवरूपिभिः ॥ विजेष्यसिरणेसर्वानमि त्रान्भरतर्षभ ८ इतश्चत्वमिमांपश्यसैंधवेनदुरात्मना ॥ बलिनावीर्यमत्तेनहृतामेभिर्महात्मभिः ९ आनीतांद्रौपदींकृष्णांकृत्वाकर्मसुदुष्करम् ॥ जयद्रथंचरा जानंविजितंवशमागतम् १० असहायेनरामेणवैदेहीपुनराहृता ॥ हत्वासंख्येदशग्रीवंराक्षसंभीमविक्रमम् ११ यस्यशाखामृगामित्राण्यृक्षाःकालमुखास्तथा ॥ जात्यंतरगताराजन्नेतद्बुद्ध्यानुचिंतय १२ तस्मात्त्वंकुरुश्रेष्ठमाशुचोभरतर्षभ ॥ त्वद्विधाहिमहात्मानोनशोचंतिपरंतप १३ ॥ वैशंपायनउवाच ॥ एवमा श्वासितोराजामार्कंडेयेनधीमता ॥ त्यक्त्वादुःखमदीनात्मापुनरप्येनमब्रवीत् ॥ १४ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिरामोपाख्यानपर्वणियुधिष्ठि राश्वासनेद्विनवत्यधिकद्विशततमोऽध्यायः ॥ २९२ ॥ ॥ ७ ॥ ॥ समाप्तंचरामोपाख्यानपर्व ॥ अथपतिव्रतामाहात्म्यपर्व ॥ ॥ युधिष्ठिरउवाच ॥ नात्मानमनुशोचामिनेमान्भ्रातॄन्महामुने ॥ हरणंचापिराज्यस्ययथेमांद्रुपदात्मजाम् १

स्तुत्यर्थस्यशब्दसारूप्यादर्थाविरोधाच्चजरूथंस्तोत्रमित्युच्यतइति जारूथ्यान् स्तोत्राहांनित्यर्थः ७० ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे एकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥ ॥ ७ ॥ एवमेतदिति १ दीप्तनिर्णयेअसंदिग्धेप्रत्यक्षफले २ ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे द्विनवत्यधिकद्विशततमोऽध्यायः ॥ २९२ ॥ ॥ ७ ॥ ॥ नात्मानमिति १

२ । ३ । ४ । ५ । ६ । ७ । ८ सावित्र्या सावित्रीसवितृकन्या तद्देवत्ययाऋचा साच । 'सोमोवधूयुरभवदश्विनास्तामुभावरा । सूर्यांयत्पत्येशंसंतींमनसासविताऽददात्'इति यदासवित्रात्व ग्रासावित्रीस्वकन्या सूर्यासूर्यस्यस्त्री सूर्यायदत्ता तदासोमोऽस्यावधूयुर्वध्वाअनुवरोऽभूत् सविताच सूर्यां पत्येपत्युःकल्याणार्थं शंसंतींकथयंतीं मनसा उभौवरौ पुत्ररूपावश्विनौअददादि

द्यूतेदुरात्मभिःक्लिष्टाःकृष्णयातारितावयम् ॥ जयद्रथेनचपुनर्वनाच्चापिहृताबलात् २ अस्तिसीमंतिनीकाचिद्दृष्टपूर्वाऽपिवाश्रुता ॥ पतिव्रतामहाभागायथेयं द्रुपदात्मजा ३ ॥ मार्कंडेयउवाच ॥ शृणुराजन्कुलस्त्रीणांमहाभाग्यंयुधिष्ठिर ॥ सर्वमेतद्यथाप्राप्तंसावित्र्याराजकन्यया ४ आसीन्मद्रेषुधर्मात्माराजापरमधार्मि कः ॥ ब्रह्मण्यश्चमहात्माचसत्यसंधोजितेंद्रियः ५ यज्वादानपतिर्दक्षःपौरजानपदप्रियः ॥ पार्थिवोऽश्वपतिर्नामसर्वभूतहितेरतः ६ क्षमावाननपत्यश्चसत्यवा ग्विजितेंद्रियः ॥ अतिक्रांतेनवयसासंतापमुपजग्मिवान् ७ अपत्योत्पादनार्थंचतीव्रंनियममास्थितः ॥ कालेपरिमिताहारोब्रह्मचारीजितेंद्रियः ८ हुत्वाशत सहस्रंससावित्र्याराजसत्तम ॥ षष्ठेषष्ठेतदाकालेबभूवमितभोजनः ९ एतेननियमेनासीद्वर्षाण्यष्टादशैवतु ॥ पूर्णेत्वष्टादशेवर्षेसावित्रीतुष्टिमभ्यगात् १० रू पिणीतुतदाराजन्दर्शयामासतंनृपम् ॥ अग्निहोत्रात्समुत्थायहर्षेणमहताऽन्विता ॥ उवाचचैनंवरदावचनंपार्थिवंतदा ११ सावित्र्युवाच ॥ ब्रह्मचर्येणशुद्धेनद मेननियमेनच ॥ सर्वात्मनाचभक्त्याचतुष्टाऽस्मितवपार्थिव १२ वरंवृणीष्वाश्वपतेमद्रराजयदीप्सितम् ॥ नप्रमादश्चधर्मेषुकर्तव्यस्तेकथंचन १३ ॥ अ श्वपतिरुवाच ॥ अपत्यार्थःसमारंभःकृतोधर्मेप्सयामया ॥ पुत्रामेबहवोदेविभवेयुःकुलभावनाः १४ तुष्टासियदिमेदेविवरमेतंवृणोम्यहम् ॥ संतानंपरमोधर्म इत्याहुर्मांद्विजातयः १५ ॥ सावित्र्युवाच ॥ पूर्वमेवमयाराजन्नभिप्रायमिमंतव ॥ ज्ञात्वापुत्रार्थमुक्तोवैभगवांस्तेपितामहः १६ प्रसादाच्चैवतस्मात्तेस्वयंभुविहि ताद्भुवि ॥ कन्यातेजस्विनीसौम्यक्षिप्रमेवभविष्यति १७ उत्तरंचनतेकिंचिद्व्याहर्तव्यंकथंचन ॥ पितामहनिसर्गेणतुष्टाह्येतद्ब्रवीमिते १८ ॥ मार्कंडेयउवा च ॥ सतथेतिप्रतिज्ञायसावित्र्यावचनंनृपः ॥ प्रसादयामासपुनःक्षिप्रमेतद्भविष्यति १९ अंतर्हितायांसावित्र्यांजगामस्वपुरंनृपः ॥ स्वराज्येचावसद्वीरःप्रजा धर्मेणपालयन् २० कस्मिंश्चित्तुगतेकालेसराजानियतव्रतः ॥ ज्येष्ठायांधर्मचारिण्यांमहिष्यांगर्भमादधे २१ राजपुत्र्यास्तुगर्भःसमानव्याभरतर्षभ ॥ व्यवर्ध ततदाशुक्लेतारापतिरिवांबरे २२ प्राप्तेकालेतुसुषुवेकन्यांराजीवलोचनाम् ॥ क्रियाश्चतस्यामुदितश्चक्रेचनृपसत्तमः २३ सावित्र्याप्रीतयादत्तासावित्र्याहुतयाह्य पि ॥ सावित्रीत्येवनामास्याश्चक्रुर्विप्रास्तथापिता २४ साविग्रहवतीवश्रीर्व्यवर्धतनृपात्मजा ॥ कालेनचापिसाकन्यायौवनस्थाबभूवह २५ तांसुमध्यांपृथु श्रोणींप्रतिमांकांचनीमिव ॥ प्राप्तेयंदेवकन्येतिदृष्ट्वासंमेनिरेजनाः २६ तांतुपद्मपलाशाक्षींज्वलंतीमिवतेजसा ॥ नकश्चिद्वरयामासतेजसाप्रतिवारितः २७

तिमंत्रार्थः । इतएववाक्यादेतस्यमंत्रस्यलक्षहोमादपत्यप्राप्तिर्भवतीतिगम्यते । षष्ठेकालेऽष्टधाविभक्तस्याह्नःषष्ठेंशे ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ उत्तरंपुत्रार्थप्रार्थ नावचनंनिसर्गेणाज्ञया १८ प्रतिज्ञायांगीकृत्य १९ । २० । २१ मानव्या मनुपुत्र्याः २२ । २३ । २४ । २५ । २६ प्रतिवारितोऽभिभूतः २७

२८ सुमनसइष्टदेवतायाः । 'सुपर्वाणःसुमनसस्त्रिदिवेशाः'इत्यमरः । शेषाःप्रसादपूर्वकंदत्तानिमाल्यानि प्रसादभूतामालाइत्यर्थः । 'प्रसादान्निजनिर्माल्यदानेशेषानुकीर्तिता'इतिविश्वः २९

अथोपोष्यशिरःस्नातादेवतामभिगम्यसा ॥ हुत्वाग्निंविधिवद्विप्रान्वाचयामासपर्वणि २८ ततःसुमनसःशेषाःप्रतिगृह्यमहात्मनः ॥ पितुःसमीपमगमद्देवीश्रीरिवरूपिणी २९ साभिवाद्यपितुःपादौशेषाःपूर्वंनिवेद्यच ॥ कृतांजलिर्वरारोहान्नृपतेःपार्श्वमास्थिता ३० यौवनस्थांतुतांदृष्ट्वास्वांसुतांदेवरूपिणीम् ॥ अयाच्यमानांचवरैर्नृपतिर्दुःखितोऽभवत् ३१ ॥ राजोवाच ॥ पुत्रिप्रदानकालस्तेनचकश्चिद्वृणोतिमाम् ॥ स्वयमन्विच्छभर्तारंगुणैःसदृशमात्मनः ३२ प्रार्थितःपुरुषोयश्चसनिवेद्यस्त्वयामम ॥ विमृश्याहंप्रदास्यामिवरयत्वंयथेप्सितम् ३३ श्रुतंहिधर्मशास्त्रेषुपठ्यमानंद्विजातिभिः ॥ तथात्वमपिकल्याणिगदतोमेवचःशृणु ३४ अप्रदातापितावाच्योवाच्यश्चानुपयन्पतिः ॥ मृतेभर्तरिपुत्रश्चवाच्योमातुररक्षिता ३५ इदंमेवचनंश्रुत्वाभर्तुरन्वेषणेत्वर ॥ देवतानांयथावाच्योनभवेयंतथाकुरु ३६ ॥ मार्कंडेयउवाच ॥ एवमुक्त्वादुहितरंतथावृद्धांश्चमंत्रिणः ॥ व्यादिदेशानुयात्रंचगम्यतांचेत्यचोदयत् ३७ साभिवाद्यपितुःपादौव्रीडितेवतपस्विनी ॥ पितुर्वचनमाज्ञायनिर्जगामाविचारितम् ३८ साहैमंरथमास्थायस्थविरैःसचिवैर्वृता ॥ तपोवनानिरम्याणिराजर्षीणांजगामह ३९ मान्यानांतत्रवृद्धानांकृत्वापादाभिवादनम् ॥ वनानिक्रमशस्तातसर्वाण्येवाभ्यगच्छत ४० एवंतीर्थेषुसर्वेषुधनोत्सर्गंनृपात्मजा ॥ कुर्वतीद्विजमुख्यानांतंतंदेशंजगामह ४१ ॥ इतिश्रीम० भा० आ० प० पतिव्रतामाहात्म्यपर्वणिसावित्र्युपाख्यानेत्रिनवत्यधिकद्विशततमोऽध्यायः ॥ २९३ ॥ ॥ मार्कंडेयउवाच ॥ अथमद्राधिपोराजानारदेनसमागतः ॥ उपविष्टःसभामध्येकथायोगेनभारत १ ततोऽभिगम्यतीर्थानिसर्वाण्येवाश्रमांस्तथा ॥ आजगामपितुर्वेश्मसावित्रीसहमंत्रिभिः २ नारदेनसहासीनंसादृष्ट्वापितरंशुभा ॥ उभयोरेवशिरसाचक्रेपादाभिवादनम् ३ ॥ नारदउवाच ॥ क्वगताऽभूत्सुतेयंतेकुतश्चैवागतान्नृप ॥ किमर्थंयुवतींभर्त्रेनचैनांसंप्रयच्छसि ४ ॥ अश्वपतिरुवाच ॥ कार्येणखल्वनेनैवप्रेषिताऽद्यैवचागता ॥ एतस्याःशृणुदेवर्षेभर्तारंयोऽनयावृतः ५ ॥ मार्कंडेयउवाच ॥ साब्रूहिविस्तरेणेतिपित्रासंचोदिताशुभा ॥ तदैवतस्यवचनंप्रतिगृह्येदमब्रवीत् ६ ॥ सावित्र्युवाच ॥ आसीच्छाल्वेषुधर्मात्माक्षत्रियःपृथिवीपतिः ॥ द्युमत्सेनइतिख्यातःपश्चाद्अंधोबभूवह ७ विनष्टचक्षुषस्तस्यबालपुत्रस्यधीमतः ॥ सामीप्येनहृतंराज्यंछिद्रेऽस्मिन्पूर्ववैरिणा ८ सबालवत्सयासार्धंभार्ययाप्रस्थितोवनम् ॥ महारण्यंगतश्चापितपस्तेपेमहाव्रतः ९ तस्यपुत्रःपुरेजातःसंवृद्धश्चतपोवने ॥ सत्यवाननुरूपोमेभर्तेतिमनसावृतः १० ॥ नारदउवाच ॥ अहोबतमहत्पापंसावित्र्यानृपतेकृतम् ॥ अजानंत्यायदनयागुणवान्सत्यवान्वृतः ११

३० । ३१ । ३२ प्रार्थितइच्छितः ३३ । ३४ वाच्योनिंद्यःअनुपयन्नृतावगच्छन् ३५ । ३६ अनुयात्रंयात्रोपकरणंवाहनादि ३७ । ३८ । ३९ । ४० । ४१ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे त्रिनवत्यधिकद्विशततमोऽध्यायः ॥ २९३ ॥ ॥ ७ ॥ ॥ अथेति कथायोगेनकथाप्रसंगेन १ । २ । ३ । ४ । ५ । ६ । ७ सामीप्येनसमीपवासिना छिद्रे अंधत्वेसति ८ । ९ सत्यवान्नामतः १० । ११

१२ । १३ तेजस्वीप्रभाववान्बुद्धिमान्वा वाशब्दश्चार्थे १४ । १५ । १६ सांकृतेःसंकृतिपुत्रस्य १७ । १८ । १९ । २० । २१ आक्रम्याभिभूय २२ । २३ । २४ । २५ अंशःकाष्ठपाषा

सत्यंवदत्यस्यपितासत्यंमाताप्रभाषते ॥ तथाऽस्यब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति १२ बालस्याश्वाःप्रियाश्चास्यकरोत्यश्वांश्चमृन्मयान् ॥ चित्रेऽपिविलिखत्यश्वांश्चित्राश्वइतिचोच्यते १३ ॥ ॥ राजोवाच ॥ ॥ अपीदानींसतेजस्वीबुद्धिमान्वानृपात्मजः ॥ क्षमावानपिवाशूरःसत्यवान्पितृवत्सलः १४ ॥ नारदउवाच ॥ विवस्वानिवतेजस्वीबृहस्पतिसमोमतौ ॥ महेंद्रइववीरश्चवसुधेवक्षमान्वितः १५ ॥ अश्वपतिरुवाच ॥ अपिराजात्मजोदाताब्रह्मण्यश्चापिसत्यवान् ॥ रूपवानप्युदारोवाऽप्यथवाप्रियदर्शनः १६ ॥ नारदउवाच ॥ सांकृतेरंतिदेवस्यस्वशक्त्यादानतःसमः ॥ ब्रह्मण्यःसत्यवादीचशिबिरौशीनरोयथा १७ ययातिरिवचोदारःसोमवत्प्रियदर्शनः ॥ रूपेणान्यतमोऽश्विभ्यांद्युमत्सेनसुतोबली १८ सदांतःसमृदुःशूरःससत्यःसंयतेंद्रियः ॥ समैत्रःसोऽनसूयश्चसहीमान्द्युतिमांश्चसः १९ नित्यशश्चार्जवंतस्मिन्स्थितिस्तस्यैवचध्रुवा ॥ संक्षेपतस्तपोवृद्धैःशीलवृद्धैश्चकथ्यते २० ॥ अश्वपतिरुवाच ॥ गुणैरुपेतंसर्वैस्तंभगवन्प्रब्रवीषिमे ॥ दोषानप्यस्यमेब्रूहियदिसंतीहकेचन २१ ॥ नारदउवाच ॥ एकएवास्यदोषोहिगुणानाक्रम्यतिष्ठति ॥ सचदोषःप्रयत्नेननशक्यमतिवर्तितुम् २२ एकोदोषोऽस्तिनान्योऽस्यसोऽद्यप्रभृतिसत्यवान् ॥ संवत्सरेणक्षीणायुर्देहन्यासंकरिष्यति २३ ॥ राजोवाच ॥ एहिसावित्रिगच्छस्वअन्यंवरयशोभने ॥ तस्यदोषोमहानेकोगुणानाक्रम्यचस्थितः २४ यथामेभगवानाहनारदोदेवसत्कृतः ॥ संवत्सरेणसोऽल्पायुर्देहन्यासंकरिष्यति २५ ॥ सावित्र्युवाच ॥ सकृदंशोनिपततिसकृत्कन्याप्रदीयते ॥ सकृदाहददानीतित्रीण्येतानिसकृत्सकृत् २६ दीर्घायुरथवाऽल्पायुःसगुणोनिर्गुणोऽपिवा ॥ सकृद्वृतोमयाभर्तानाद्वितीयंवृणोम्यहम् २७ मनसानिश्चयंकृत्वाततोवाचाऽभिधीयते ॥ क्रियतेकर्मणापश्चात्प्रमाणंमेमनस्ततः २८ ॥ नारदउवाच ॥ स्थिराबुद्धिर्नरश्रेष्ठसावित्र्यादुहितुस्तव ॥ नैषावारयितुंशक्याधर्मादस्मात्कथंचन २९ नान्यस्मिन्पुरुषेसंतियेसत्यवतिवैगुणाः ॥ प्रदानमेवतस्मान्मेरोचतेदुहितुस्तव ३० ॥ राजोवाच ॥ अविचाल्यमेतदुक्तंतथ्यंचभवतावचः ॥ करिष्याम्येतदेवंचगुरुर्हिभगवान्मम ३१ ॥ नारदउवाच ॥ आवेघ्नमस्तुसावित्र्याःप्रदानेदुहितुस्तव ॥ साधयिष्याम्यहंतावत्सर्वेषांभद्रमस्तुवः ३२ ॥ मार्कंडेयउवाच ॥ एवमुक्त्वासमुत्पत्यनारदस्त्रिदिवंगतः ॥ राजाऽपिदुहितुःसज्जंवैवाहिकमकारयत् ३३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिपतिव्रतामा०सावित्र्युपाख्यानेचतुर्नवत्यधिकद्विशततमोऽध्यायः ॥ २९४ ॥ ॥ ७ ॥ ॥ मार्कंडेयउवाच ॥ अथकन्याप्रदानेसतमेवार्थंविचिंतयन् ॥ समानिन्येचतत्सर्वंभांडंवैवाहिकंनृपः १ ततोवृद्धान्द्विजान्सर्वानृत्विजःसपुरोहितान् ॥ समाहूयदिनेपुण्येप्रययौसहकन्यया २

णादेःशकलःसकृन्निपतति कृतस्यकरणंनास्तीत्यर्थः २६ । २७ । २८ । २९ । ३० यत्तत्सावित्र्यावचनमविचाल्यं भवताचतथ्यमुक्तं ३१ साधयिष्यामि गमिष्यामि । धातूनामनेकार्थत्वाद्रत्यर्थोऽयं ३२ । ३३ ॥ इत्यार० प० नी० भा० चतुर्नवत्यधिकद्विशततमोऽध्यायः ॥ २९४ ॥ ॥ ७ ॥ अथेति । भांडं वैवाहिकमुपकरणं विवाहोचितं १ । २

३ कौश्यांकुशमय्यांवृस्यामासने ४ आत्मनिवेदनमश्वपतिरहमितिज्ञापनं ५ । ६ । ७ । ८ । ९ भवाभवात्मकमुत्पत्तिविनाशात्मकं तेत्वांप्रति १० मामां ११ । १२ । १३ निर्वर्ततुनिष्पद्यतां

मेध्यारण्यंसगत्वाचद्युमत्सेनाश्रमंनृपः ॥ पद्भ्यामेवद्विजैःसार्धंराजर्षिंतमुपागमत् ३ तत्रापश्यन्महाभागंशालवृक्षमुपाश्रितम् ॥ कौश्यांवृस्यांसमासीनंचक्षु
र्हीनंनृपंतदा ४ सराजातस्यराजर्षेःकृत्वापूजांयथार्हतः ॥ वाचासुनियतोभूत्वाचकारात्मनिवेदनम् ५ तस्यार्घ्यमासनंचैवगांचावेद्यसधर्मवित् ॥ किमागमन
मित्येवंराजाराजानमब्रवीत् ६ तस्यसर्वमभिप्रायमितिकर्तव्यतांचताम् ॥ सत्यवंतंसमुद्दिश्यसर्वमेवन्यवेदयत् ७ ॥ अश्वपतिरुवाच ॥ सावित्रीनामराजर्षेकं
न्येयंममशोभना ॥ तांस्वधर्मेणधर्मज्ञस्नुषार्थेत्वंगृहाणमे ८ ॥ द्युमत्सेनउवाच ॥ च्युताःस्मराज्याद्वनवासमाश्रिताश्चरामधर्मंनियतास्तपस्विनः ॥ कथंत्वन
र्हावनवासमाश्रमेनिवत्स्यतेक्लेशमिमंसुतातव ९ ॥ अश्वपतिरुवाच ॥ सुखंचदुःखंचभवाभवात्मकंयदाविजानातिसुताऽहमेवच ॥ नमादृशेयुज्यतिवाक्यमीदृशं
विनिश्चयेनाभिगतोऽस्मितेनृप १० आशांनार्हसिमेहंतुंसौहृदात्प्रणतस्यच ॥ अभितश्चागतंप्रेम्णाप्रत्याख्यातुंनमाऽर्हसि ११ अनुरूपोहियुक्तश्चत्वंममाहंतवा
पिच ॥ स्नुषांप्रतीच्छमेकन्यांभार्यांसत्यवतस्ततः १२ ॥ द्युमत्सेनउवाच ॥ पूर्वमेवाभिलषितःसंबंधोमेत्वयासह ॥ भ्रष्टराज्यस्त्वहमितिततएतद्विचारितम्
१३ अभिप्रायस्त्वयंयोमेपूर्वमेवाभिकांक्षितः ॥ सनिर्वर्ततुमेऽद्यैवकांक्षितोह्यसिमेऽतिथिः १४ ततःसर्वान्समानाय्यद्विजानाश्रमवासिनः ॥ यथाविधिसमुद्वा
हंकारयामासतुर्नृपौ १५ दत्वासोऽश्वपतिःकन्यांयथार्हंसपरिच्छदं ॥ ययौस्वमेवभवनंयुक्तःपरमयामुदा १६ सत्यवानपितांभार्यांलब्ध्वासर्वगुणान्वितां ॥ मुमु
देसाचतंलब्ध्वाभर्तारंमनसेप्सितम् १७ गतेपितरिसर्वाणिसंन्यस्याभरणानिसा ॥ जगृहेवल्कलान्येववस्त्रंकाषायमेवच १८ परिचारैर्गुणैश्चैवप्रश्रयेणदमेनच ॥
सर्वकामक्रियाभिश्चसर्वेषांतुष्टिमादधे १९ श्वश्रूंशरीरसत्कारैःसर्वैराच्छादनादिभिः ॥ श्वशुरंदेवसत्कारैर्वाचःसंयमनेनच २० तथैवप्रियवादेननैपुणेनशमेनच ॥
रहश्चैवोपचारेणभर्तारंपर्यतोषयत् २१ एवंतत्राश्रमेतेषांतदानिवसतांसताम् ॥ कालस्तपस्यतांकश्चिदपाक्रामतभारत २२ सावित्र्याग्लायमानायास्तिष्ठंत्या
स्तुदिवानिशम् ॥ नारदेनयदुक्तंतद्वाक्यंमनसिवर्तते २३ ॥ इतिश्रीम०आ०प०सावित्र्युपाख्यानेपंचनवत्यधिकद्विशततमोऽध्यायः ॥ २९५ ॥ ॥ ७ ॥
॥ मार्कंडेयउवाच ॥ ततःकालेबहुतिथेव्यतिक्रांतेकदाचन ॥ प्राप्तःसकालोमर्तव्यंयत्रसत्यवतानृप १ गणयंत्याश्चसावित्र्यादिवसेदिवसेगते ॥ यद्वाक्यंनारदे
नोक्तंवर्ततेहृदिनित्यशः २ चतुर्थेऽहनिमर्तव्यमितिसंचिंत्यभाविनी ॥ व्रतंत्रिरात्रमुद्दिश्यदिवारात्रंस्थिताऽभवत् ३ तंश्रुत्वानियमंतस्याभृशंदुःखान्वितो
नृपः ॥ उत्थायवाक्यंसावित्रीमब्रवीत्परिसांत्वयन् ४

१४ । १५ । सपरिच्छदंपारिबर्हसहितं १६ । १७ । १८ परिचारैःसेवनैः गुणैःशीलसत्यादिभिः प्रश्रयेणस्नेहेन दमेनजितेंद्रियतया सर्वकामक्रियाभिःसर्वेषामिष्टसंपादनेन १९ । २० । २१
२२ । २३ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे पंचनवत्यधिकद्विशततमोऽध्यायः ॥ २९५ ॥ ॥ ७ ॥ ॥ ततइति १ । २ । ३ । ४

वसतीनांस्थानं भोजनत्रयनिरोधः उपवसतीत्यादौ वसतेस्तादर्थ्यदर्शनात् ५ पारयिष्यामिसमापयिष्यामि व्यवसायकृतमुद्योगकृतम् ६ । ७ । ८ । ९ युगंहस्तचतुष्कं तावदुदितेउपरियाते

॥ द्युमत्सेनउवाच ॥ अतितीव्रोयमारंभस्त्वयारब्धोनृपात्मजे ॥ तिसृणांवसतीनांहिस्थानंपरमदुश्चरम् ५ ॥ सावित्र्युवाच ॥ नकार्यस्तातसंतापःपारयिष्या
म्यहंव्रतम् ॥ व्यवसायकृतंहीदंव्यवसायश्चकारणम् ६ ॥ द्युमत्सेनउवाच ॥ व्रतंभिंधीतिवक्तुंत्वांनास्मिशक्तःकथंचन ॥ पारयस्वेतिवचनंयुक्तमस्मद्विधोवदेत्
७ ॥ मार्कंडेयउवाच ॥ एवमुक्त्वाद्युमत्सेनोविरराममहामनाः ॥ तिष्ठंतीचैवसावित्रीकाष्ठभूतेवलक्ष्यते ८ श्वोभूतेभर्तृमरणेसावित्र्याभरतर्षभ ॥ दुःखान्विता
यास्तिष्ठंत्याःसारात्रिर्व्यत्यवर्तत ९ अद्यतद्दिवसंचेतिहुत्वादीप्तंहुताशनम् ॥ युगमात्रोदितेसूर्येकृत्वापौर्वाह्णिकीःक्रियाः १० ततःसर्वान्द्विजान्वृद्धान्श्वश्रूं
श्वशुरमेवच ॥ अभिवाद्यानुपूर्व्येणप्रांजलिर्नियतास्थिता ११ अवैधव्याशिषस्तेतुसावित्र्यर्थंहिताःशुभाः ॥ ऊचुस्तपस्विनःसर्वेतपोवननिवासिनः १२ ए
वमस्त्वितिसावित्रीध्यानयोगपरायणा ॥ मनसातागिरःसर्वाःप्रत्यगृह्णात्तपस्विनाम् १३ तंकालंतंमुहूर्तंचप्रतीक्षंतीनृपात्मजा ॥ यथोक्तंनारदवचश्चिंतयंतीतु
दुःखिता १४ ततस्तुश्वश्रूश्वशुरावूचतुस्तांनृपात्मजाम् ॥ एकांतमास्थितांवाक्यंप्रीत्याभरतसत्तम १५ ॥ श्वशुरावूचतुः ॥ व्रतंयथोपदिष्टंतुतथातत्पारितंत्वया ॥
आहारकालःसंप्राप्तःक्रियतांयदनंतरं १६ ॥ सावित्र्युवाच ॥ अस्तंगतेमयाऽऽदित्येभोक्तव्यंकृतकामया ॥ एषमेहृदिसंकल्पःसमयश्चकृतोमया १७ ॥ मार्कं
डेयउवाच ॥ एवंसंभाषमाणायाःसावित्र्याभोजनंप्रति ॥ स्कंधेपरशुमादायसत्यवान्प्रस्थितोवनम् १८ सावित्रीत्वाहभर्तारंनैकस्त्वंगंतुमर्हसि ॥ सहत्वयाग
मिष्यामिनहित्वांहातुमुत्सहे १९ ॥ सत्यवानुवाच ॥ वनंनगतपूर्वंतेदुःखःपंथाश्चभाविनि ॥ व्रतोपवासक्षामाचकथंपद्भ्यांगमिष्यसि २० ॥ सावित्र्युवाच ॥
उपवासान्नमेग्लानिर्नास्तिचापिपरिश्रमः ॥ गमनेचकृतोत्साहांप्रतिषेद्धुंनमाऽर्हसि २१ ॥ सत्यवानुवाच ॥ यदितेगमनोत्साहःकरिष्यामितवप्रियम् ॥ मम
त्वामंत्रयगुरून्नमांदोषःस्पृशेदयम् २२ ॥ मार्कंडेयउवाच ॥ साऽभिवाद्याब्रवीच्छ्वश्रूंश्वशुरंचमहाव्रता ॥ अयंगच्छतिमेभर्ताफलाहारोमहावनम् २३ इच्छेय
मभ्यनुज्ञाताआर्ययाश्वशुरेणह ॥ अनेनसहनिर्गंतुंनमेऽद्यविरहःक्षमः २४ गुर्वग्निहोत्रार्थकृतेप्रस्थितश्चसुतस्तव ॥ ननिवार्योनिवार्यःस्यादन्यथाप्रस्थितो
वनम् २५ संवत्सरःकिंचिदूनोननिष्क्रांताऽहमाश्रमात् ॥ वनंकुसुमितंद्रष्टुंपरंकौतूहलंहिमे २६ ॥ द्युमत्सेनउवाच ॥ यतःप्रभृतिसावित्रीपित्रादत्तास्नुषामम ॥
नानयाभ्यर्थनायुक्तमुक्तपूर्वंस्मराम्यहम् २७ तदेषालभतांकामंयथाऽभिलषितंवधूः ॥ अप्रमादश्चकर्तव्यःपुत्रिसत्यवतःपथि २८ ॥ मार्कंडेयउवाच ॥ उभा
भ्यामभ्यनुज्ञातासाजगामयशस्विनी ॥ सहभर्त्राहसंतीवहृदयेनविदूयता २९ सावनानिविचित्राणिरमणीयानिसर्वशः ॥ मयूरगणजुष्टानिददर्शविपुलेक्षणा ३०

१० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३०

३१ । ३२ । ३३ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे षण्णवत्यधिकद्विशततमोऽध्यायः ॥ २९६ ॥ अथेति । कठिनंस्थालीं । 'कठिनंनिष्ठुरेस्थाल्याम्' इतिविश्वः

नदीःपुण्यवहाश्चैवपुष्पितांश्चनगोत्तमान् ॥ सत्यवानाहपश्येतिसावित्रींमधुरंवचः ३१ निरीक्षमाणाभर्तारंसर्वावस्थमनिंदिता ॥ मृतमेवहिभर्तारंकालेमुनिव
चःस्मरन् ३२ अनुव्रजंतीभर्तारंजगामम्रुदुगामिनी ॥ द्विधेवहृदयंकृत्वातंचकालमवेक्षती ३३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणि पतिव्रतामा॰सावित्र्युपा
ख्यानेषण्णवत्यधिकद्विशततमोऽध्यायः ॥ २९६ ॥ मार्कंडेयउवाच ॥ अथभार्यासहायःसफलान्यादायवीर्यवान् ॥ कठिनंपूरयामासततःकाष्ठान्यपाटयत् १
तस्यपाटयतःकाष्ठंस्वेदोवैसमजायत ॥ व्यायामेनचतेनास्यजज्ञेशिरसिवेदना २ सोऽभिगम्यप्रियांभार्यामुवाचश्रमपीडितः ॥ सत्यवानुवाच ॥ व्यायामे
नममानेनजाताशिरसिवेदना ३ अंगानिचैवसावित्रिहृदयंदूयतीवच ॥ अस्वस्थमिवचात्मानंलक्षयेमितभाषिणि ४ शूलैरिवशिरोविद्धमिदंसंलक्षयाम्यहम् ॥
तत्स्वप्तुमिच्छेकल्याणिनस्थातुंशक्तिरस्तिमे ५ सासमासाद्यसावित्रीभर्तारमुपगम्यच ॥ उत्संगेऽस्यशिरःकृत्वानिषसादमहीतले ६ ततःसानारदवचोविमृ
शंतीतपस्विनी ॥ तंमुहूर्तंक्षणंवेलांदिवसंचयुयोजह ७ मुहूर्तादेवचापश्यत्पुरुषंरक्तवाससम् ॥ बद्धमौलिंवपुष्मंतमादित्यसमतेजसम् ८ श्यामावदातंर
क्ताक्षंपाशहस्तंभयावहम् ॥ स्थितंसत्यवतःपार्श्वेनिरीक्षंतंतमेवच ९ तंदृष्ट्वासहसोत्थायभर्तुर्न्यस्यशनैःशिरः ॥ कृतांजलिरुवाचार्ताहृदयेनप्रवेपती १० सा
वित्र्युवाच ॥ दैवतंत्वाऽभिजानामिवपुरेतद्धचमानुषम् ॥ कामयाब्रूहिदेवेशकस्त्वंकिंचचिकीर्षसि ११ ॥ यमउवाच ॥ पतिव्रताऽसिसावित्रितथैवचतपो
न्विता ॥ अतस्त्वामभिभाषामिविद्धिमांत्वंशुभेयमम् १२ अयंतेसत्यवान्भर्ताक्षीणायुःपार्थिवात्मजः ॥ नेष्यामितमहंबद्ध्वाविद्ध्येतन्मेचिकीर्षितम् १३
सावित्र्युवाच ॥ श्रूयतेभगवन्दूतास्तवागच्छंतिमानवान् ॥ नेतुंकिलभवान्कस्मादागतोऽसिस्वयंप्रभो १४ ॥ मार्कंडेयउवाच ॥ इत्युक्तःपितृराजस्तांभगवा
न्स्वचिकीर्षितम् ॥ यथावत्सर्वमाख्यातुंतत्प्रियार्थंप्रचक्रमे १५ अयंचधर्मसंयुक्तोरूपवान्गुणसागरः ॥ नार्होमत्पुरुषैर्नेतुमतोऽस्मिस्वयमागतः १६ ततः
सत्यवतःकायात्पाशबद्धंवशंगतम् ॥ अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलात् १७ ततःसमुद्धृतप्राणंगतश्वासंहतप्रभम् ॥ निर्विचेष्टंशरीरंतद्बभूवाप्रियदर्शनम्
१८ यमस्तुतंततोबद्ध्वाप्रयातोदक्षिणामुखः ॥ सावित्रीचैवदुःखार्तायममेवान्वगच्छत ॥ नियमव्रतसंसिद्धामहाभागापतिव्रता १९ ॥ यमउवाच ॥ निवर्त
गच्छसावित्रिकुरुष्वास्यौर्ध्वदेहिकम् ॥ कृतंभर्तुस्त्वयाऽऽनृण्यंयावद्गम्यंगतंत्वया २० ॥ सावित्र्युवाच ॥ यत्रमेनीयतेभर्तास्वयंवायत्रगच्छति ॥ मयाचतत्र
गंतव्यमेषधर्मःसनातनः २१ तपसागुरुभक्त्याचभर्तुःस्नेहाद्व्रतेनच ॥ तवचैवप्रसादेननमेप्रतिहतागतिः २२ प्राहुःसाप्तपदंमैत्रंबुधास्तत्त्वार्थदर्शिनः ॥
मित्रतांचपुरस्कृत्यकिंचिद्वक्ष्यामितच्छृणु २३

१ । २ । ३ । ४ । ५ । ६ युयोजानुचिंतितवती ७ । ८ । ९ । १० कामया इच्छया ११ । १२ । १३ । १४ । १५ । १६ अंगुष्ठमात्रंहृदयाकाशप्रतिबिंबत्वात्तत्प्रमाणं पुर्यष्टकवेष्टितं सूक्ष्मशरीरवंतं १७ । १८ । १९ । २० । २१ । २२ । २३

अनात्मवंतोऽजितेंद्रियाः वने धर्मंयज्ञादिरूपं नचरंति जितेंद्रियाएव वनेग्रामेवायज्ञादींश्चीसंबद्धान्धर्मान्कुर्वंति तेनगृहस्थवानप्रस्थयोःसंग्रहः वासंगुरुकुलवासंब्रह्मचर्यं परिश्रमं परित्यागरू पमाश्रमंसंन्यासं । पाठांतरेप्रतिश्रयं प्रतिनिवृत्तःश्रयःकर्मफलाश्रयणमत्रेतिप्रतिश्रयंसंन्यासं विज्ञानतः चतुर्थ्यर्थेसार्वविभक्तिकस्तसिः धर्मस्यफलमात्मविज्ञानमित्यर्थः । 'तमेतंवेदानुवच नेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेन'इति एतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीतिचवेदानुवचनस्य यज्ञादीनां प्रव्रजनस्यचात्मलाभार्थत्वश्रवणात् २४ एतेषामाश्रमधर्माणां समुच्चयंवारयतिएकस्येति चतुर्णामन्यतमस्यैकस्याश्रमस्यधर्मेण सतांमतेन दंभादिरहितश्रद्धयासम्यगनुष्ठितेनेत्यर्थः सर्वेवयमाश्रमास्तंमार्गंज्ञानमार्गंप्रपन्नाःप्राप्ताःस्मः अतोहेतोरस्मत्सदृशो ऽग्निसाध्यानांकर्मणांकर्ता धर्मंचवासंचपरिश्रमंचेति पाठक्रमापेक्षया द्वितीयंनैष्ठिकंगुरुकुलवासंदाराऽकरणरूपं तृतीयं पारिव्राज्यंदारादित्यागरूपंवा नवांछे ज्ञानहेतोः प्रधानभूतस्यधर्मस्या प्येऽपिसिद्धेरित्यर्थः । मद्भर्तुर्हरणेनावयोर्धर्मनाशयेतिभावः २५ निवर्तनिवर्तस्व स्वरउदात्तादिः अक्षरमकारादि व्यंजनंककारादि एतद्युक्तत्वेनवाक्यस्यशब्दतोनिर्दोषत्वमुक्तं हेतुयुक्तत्वेन

नानात्मवंतस्तुवनेचरंतिधर्मंचवासंचपरिश्रमंच ॥ विज्ञानतोधर्ममुदाहरंतितस्मात्संतोधर्ममाहुःप्रधानम् २४ एकस्यधर्मेणसतांमतेनसर्वेस्मतंमार्गमनुप्रपन्नाः ॥
मावैद्वितीयंमातृतीयंचवांछेतस्मात्संतोधर्ममाहुःप्रधानम् २५ ॥ यमउवाच ॥ निवर्ततुष्टोऽस्मितवानयागिरास्वराक्षरव्यंजनहेतुयुक्तया ॥ वरंवृणीष्वेह
विनाऽस्यजीवितंददानितेसर्वमनिंदितेवरम् २६ सावित्र्युवाच ॥ च्युतःस्वराज्याद्वनवासमाश्रितोविनष्टचक्षुःश्वशुरोममाश्रमे ॥ सलब्धचक्षुर्बलवान्भवेन्नृ
पस्तवप्रसादाज्ज्वलनार्कसंनिभः २७ ॥ यमउवाच ॥ ददानितेऽहंतमनिंदितेवरंयथात्वयोक्तंभविताचतत्तथा ॥ तवाध्वनाग्लानिमिवोपलक्षयेनिवर्तगच्छस्व
नतेश्रमोभवेत् २८ ॥ सावित्र्युवाच ॥ श्रमःकुतोभर्तृसमीपतोहिमेयतोहिभर्ताममसागतिर्ध्रुवा ॥ यतःपतिंनेष्यसितत्रमेगतिःसुरेशभूयश्चवचोनिबोधमे २९
सतांसकृत्संगतमीप्सितंपरंततःपरंमित्रमितिप्रचक्षते ॥ नचाफलंसत्पुरुषेणसंगतंततःसतांसंनिवसेत्समागमे ३० ॥ यमउवाच ॥ मनोनुकूलंबुधबुद्धिवृद्धि
वर्धनंत्वयायदुक्तंवचनंहिताश्रयम् ॥ विनापुनःसत्यवतोऽस्यजीवितंवरंद्वितीयंवरयस्वभामिनि ३१ ॥ सावित्र्युवाच ॥ हृतंपुरामेश्वशुरस्यधीमतःस्वमे
वराज्यंलभतांसपार्थिवः ॥ जह्यात्स्वधर्मान्नचमेगुरुर्यथाद्वितीयमेतद्वरयामितेवरम् ३२ ॥ यमउवाच ॥ स्वमेवराज्यंप्रतिपत्स्यतेऽचिरान्नचस्वधर्मात्प
रिहास्यतेनृपः ॥ कृतेनकामेनमयानृपात्मजेनिवर्तगच्छस्वनतेश्रमोभवेत् ३३ ॥ सावित्र्युवाच ॥ प्रजास्त्वयैतानियमेनसंयतानियम्यचैतानयसे
निकामया ॥ ततोयमत्वंतवदेवविश्रुतंनिबोधचेमांगिरमीरितांमया ३४

युक्तियुक्तत्वमप्युक्तं २६ भर्तारंमोचयिष्याम्येवेतिस्वयंनिश्चिन्वाना वरांतराण्येवतावत्प्रार्थयंतीसावित्र्युवाच च्युतइति २७ अध्वनामार्गेण नतुभर्तृनाशेन अनष्टएवभर्तेत्याशयः २८ यतोयत्र भर्तासागतिस्तत्रैवगमनं ध्रुवानिश्चिता २९ सतामिति साधोस्तवसमागममात्रेणजाताभैत्रीयं निष्फलानैवभवेदितिभावः ३० हिताश्रयंयुक्त्यनुकूलं पूर्वमाश्रमधर्माणांज्ञानहेतुत्वमुक्तमिह तुसत्संगस्येतिभेदः । तथाचश्रुतिः 'तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्'इति ३१ गुरुःश्वशुरः ३२ । ३३ ज्ञानानवाप्तौदोषमाह प्रजाइति नियमेननियमनेन संयतानिगृहीताःसत्यःभवंति ताश्चपुनःकर्मभूतास्त्वंनिकामयाकामितेनार्थेन नयसेसंयोजयसि यातनांवेसत्कर्मफलमपिताभ्योददासि । नकामयेतिपाठे तास्त्वमिच्छयाननयसे कर्मफलायेतिशेषः किंतुतत्तत्कर्मवशादे वेत्यर्थः । येषांतुज्ञानिनां कामनैवनास्ति नतेत्वद्वशेभवंति नापिदेहैःफलायसंयुज्यंतइत्यर्थः तथाचश्रुतिः । इतिनुकामयमानस्येतिसंसारिणामुक्त्वाचागतिमुपसंहृत्य 'अथाकामयमानो

योऽकामोनिष्कामआप्तकामःस्यान्नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंते ब्रह्मैवसन्ब्रह्माप्येति' । तद्विपरीतकामानांगत्यागमावंदर्शयति तयासकामानांपुनःपुनःसंसारंप्रदर्शयति । 'नसां परायःप्रतिभातिबालंप्रमाद्यंतंवित्तमोहेनमूढं ' । अयंलोकोनास्तिपरइतिमानी पुनःपुनर्वशमापद्यतेमे इतियमयातनानिवृत्त्यर्थंसारमुपादिशन् श्रोतारमभिमुखीकरोतिनिबोधेति ३४ अद्रोहःद्रोहाभावः अनुग्रहोदया दानंसंविभागः स्वमपिमयिदयांकुर्विति भावः ३५ एवंप्रायइत्यल्पायुष्ट्वंभर्तुरभिनयति अशक्तिपेशलाः शक्तिकौशलहीनाः । पाठांतरेभक्तिःश्रद्धा कौशलं चताभ्यांहीनाःसंधिरार्षः आयुःशक्तिकौशलहीनामनुष्यामादृशाः संतस्त्वमित्रेष्वपिप्राप्तेषुशरणागतेषुदयांकुर्वंति किमुतमादृशेषुदीनेष्विति भावः ३६ यथातृप्तिकरमितिशेषः ३७ और समितिदत्तक्रीतादिव्यावृत्तिः ३८ । ३९ समुद्यतामुपस्थितां ४० विवस्वतःवस्यतेआच्छाद्यते इतिवः आच्छादनं तद्वान् वस्वांस्तदन्यो विवस्वान्निरावरणोजगदात्मासूर्यः 'सू

अद्रोहःसर्वभूतेषुकर्मणामनसागिरा ॥ अनुग्रहश्चदानंचसतांधर्मःसनातनः ३५ एवंप्रायश्चलोकोयंमनुष्याऽशक्तिपेशलाः ॥ संतस्त्वेवाप्यमित्रेषुदयांप्राप्तेषु कुर्वते ३६ ॥ यमउवाच ॥ पिपासितस्येवभवेद्यथापयस्तथात्वयावाक्यमिदंसमीरितम् ॥ विनापुनःसत्यवतोऽस्यजीवितंवरंवृणीष्वेहशुभेयदिच्छसि ३७ सावित्र्युवाच ॥ ममानपत्यःपृथिवीपतिःपितामवेत्पितुःपुत्रशतंतथौरसम् ॥ कुलस्यसंतानकरंचयद्भवेत्तृतीयमेतद्वरयामितेवरम् ३८ ॥ यमउवाच ॥ कुलस्यसंतानकरंसुवर्चसंशतंसुतानांपितुरस्तुतेशुभे ॥ कृतेनकामेननराधिपात्मजेनिवर्तदूरंहिपथस्त्वमागता ३९ सावित्र्युवाच ॥ नदूरमेतन्ममभर्तृसन्निधौमनो हिमेदूरतरंप्रधावति ॥ अथव्रजन्नेवगिरंसमुद्यतांमयोच्यमानांशृणुभूयएवच ४० विवस्वतस्त्वंतनयःप्रतापवांस्ततोहिवैवस्वतउच्यसेबुधैः ॥ समेनधर्मेणचरंति ताःप्रजास्ततस्तवेहेश्वरधर्मराजता ४१ आत्मन्यपिनविश्वासस्तथाभवतिसत्सुयः ॥ तस्मात्सत्सुविशेषेणसर्वःप्रणयमिच्छति ४२ सौहृदात्सर्वभूतानांविश्वासो नामजायते ॥ तस्मात्सत्सुविशेषेणविश्वासंकुरुतेजनः ४३ ॥ यमउवाच ॥ उदाहृतंतेवचनंयदंगनेशुभेनतादृक्त्वदृतेश्रुतंमया ॥ अनेनतुष्टोऽस्मिविनाऽस्य जीवितंवरंचतुर्थंवरयस्वगच्छच ४४ ॥ सावित्र्युवाच ॥ ममात्मजंसत्यवतस्तथौरसंभवेदुभाभ्यामिहयत्कुलोद्वहम् ॥ शतंसुतानांबलवीर्यशालिनामिदंचतुर्थं वरयामितेवरम् ४५ ॥ यमउवाच ॥ शतंसुतानांबलवीर्यशालिनांभविष्यतिप्रीतिकरंतवाबले ॥ परिश्रमस्तेनभवेन्नृपात्मजेनिवर्तदूरंहिपथस्त्वमागता ४६ सावित्र्युवाच ॥ सतांसदाशाश्वतधर्मवृत्तिःसंतोनसीदंतिनचव्यथंति ॥ सतांसद्भिर्नाफलःसंगमोऽस्तिसद्भ्योभयंनानुवर्तंतिसंतः ४७ संतोहिसत्येननयंतिसूर्यं संतोभूमिंतपसाधारयंति ॥ संतोगतिर्भूतभव्यस्यराजन्सतांमध्येनावसीदंतिसंतः ४८

र्यआत्माजगतस्तस्थुषश्च'इतिश्रुतेः। तस्यतनयःपुत्रः अत्यंतहितइत्यर्थः समेनशत्रुमित्रादितारतम्यहीनेनतवधर्मेणप्रशासनेन ताःप्रजाश्चरंति त्वदाज्ञावशगाइत्यर्थः अतएवतवनामधर्मराजइ ति धर्मेणैवराजतेधर्मोऽस्यराजतइतिवा ४१ लौकिकेष्वपिविश्वासंकुर्वन्निष्टसिद्धिमाप्नोति किमुतत्वयिधर्मराजेइत्याशयेनाह आत्मन्यपीति प्रणयंप्रार्थनां ४२ । ४३ तेत्वया ४४ ममा त्मजंसत्यवतश्चऔरसं नतुदत्तराष्ट्रादिवदन्यतोमयिजातमित्यर्थः ४५ । ४६ शाश्वतोधर्मः पत्युःसकाशादेवापत्योत्पादनं सतांमादृशानांदाराणांतत्रैववृत्तिः ननुगतासुविपत्यौकथंतदस्या दित्यतआहसंतइति वरंदत्त्वासंतोनव्यथंतिनापिसीदंति किंतूक्तंनिर्वहंत्येवेत्यर्थः । अत्यंताशक्येथैर्यकथंस्यादित्यतआह सतामिति सतामशक्यमपिनास्ति भयंचान्यस्यतेभ्योनास्तीतितस्त्व तोऽहंनिर्भयाऽस्मीतिभावः ४७ त्वयाऽपिसत्यंस्वीयंरक्षणीयमित्याह संतोहीति भूतभव्यस्य भूतस्यभविष्यस्यच ४८

परस्परंउपकारमप्युपकारं ४९ एतद्वयं प्रसादोऽर्थोमानश्च वरिव्रस्यप्रसादोनार्थाय श्रीमतांप्रसादोऽर्थकृदपिनमानदः सतांतुमानदइति खलेतुप्रसादएवनास्ति अतस्त्वयंत्वय्येवस्थितमिति त्वंरक्षिताऽस्माकमवेतिभावः ५० । ५१ तेत्वत्तःअपवर्गःपुत्रफलप्राप्तिः सुकृताद्विनासमीचीनाद्दांपत्ययोगादृते क्षेत्रजादिपुत्रार्पणेननकृतोनिष्पादितोभवति यथाऽन्येषुवरेषुमर्तृमुपदर्यांव

आर्यजुष्टमिदंवृत्तमितिविज्ञायशाश्वतम् ॥ संतःपरार्थंकुर्वाणानावेक्षंतिपरस्परम् ४९ नचप्रसादःसत्पुरुषेषुमोघोनचाप्यर्थोनश्यतिनापिमानः ॥ यस्मादेत न्नियतंसत्सुनित्यंतस्मात्संतोरक्षितारोभवंति ५० ॥ यमउवाच ॥ यथायथाभाषसिधर्मसंहितंमनोनुकूलंसुपदंमहार्थवत् ॥ तथातथामेत्वयिभक्तिरुत्तमावरं वृणीष्वाप्रतिमंपतिव्रते ५१ ॥ सावित्र्युवाच ॥ नतेऽपवर्गःसुकृताद्विनाकृतस्तथायथाऽन्येषुवरेषुमानद ॥ वरंवृणेजीवतुसत्यवानयंयथामृताह्येवमहंपतिंवि ना ५२ नकामयेभर्तृविनाकृतासुखंनकामयेभर्तृविनाकृतादिवम् ॥ नकामयेभर्तृविनाकृताश्रियंनभर्तृहीनाव्यवसामिजीवितुम् ५३ वरातिसर्गःशतपुत्रताम मत्वयैवदत्तोह्रियतेचमेपतिः ॥ वरंवृणेजीवतुसत्यवानयंतवैवसत्यंवचनंभविष्यति ५४ ॥ मार्कंडेयउवाच ॥ तथेत्युक्त्वातुतंपाशंमुक्त्वावैवस्वतोयमः ॥ धर्म राजःप्रहृष्टात्मासावित्रीमिदमब्रवीत् ५५ एषभद्रेमयामुक्तोभर्ताते कुलनंदिनि ॥ अरोगस्तवनेयश्चसिद्धार्थःसभविष्यति ५६ चतुर्वर्षशतायुश्चत्वयासार्धमवा प्स्यति ॥ इष्ट्वायज्ञैश्चधर्मेणख्यातिंलोकेगमिष्यति ५७ त्वयिपुत्रशतंचैवसत्यवान्जनयिष्यति ॥ तेचापिसर्वेराजानःक्षत्रियाःपुत्रपौत्रिणः ५८ ख्यातास्त्व न्नामधेयाश्चभविष्यंतीहशाश्वताः ॥ पितुश्चतेपुत्रशतंभवितातवमातरि ५९ मालव्यांमालवानामशाश्वताःपुत्रपौत्रिणः ॥ भ्रातरस्तेभविष्यंतिक्षत्रियास्त्रिद शोपमाः ६० एवंतस्यैवरंदत्वाधर्मराजःप्रतापवान् ॥ निवर्तयित्वासावित्रींस्वमेवभवनंययौ ६१ सावित्र्यपियमेयातेभर्तारंप्रतिलभ्यच ॥ जगामतत्रयत्रास्या भर्तुःशावंकलेवरम् ६२ साभूमौप्रेक्ष्यभर्तारमुपसृत्योपगृह्यच ॥ उत्संगेशिरआरोप्यभूमावुपविवेशह ६३ संज्ञांचसपुनर्लब्ध्वासावित्रीमभ्यभाषत ॥ प्रोष्या गतइवप्रेम्णापुनःपुनरुदीक्ष्यवै ६४ ॥ सत्यवानुवाच ॥ सुचिरंबतसुप्तोऽस्मिकिमर्थंनावबोधितः ॥ क्वचासौपुरुषःश्यामोयोऽसौमांसंचकर्षह ६५ ॥ सावि त्र्युवाच ॥ सुचिरंत्वंप्रसुप्तोऽसिममांकेपुरुषर्षभ ॥ गतःसभगवान्देवःप्रजासंयमनोयमः ६६ विश्रांतोऽसिमहाभागविनिद्रश्चनृपात्मज ॥ यदिशक्यंसमुत्तिष्ठ विगाढांपश्यशर्वरीम् ६७ ॥ मार्कंडेयउवाच ॥ उपलभ्यततःसंज्ञांसुखसुप्तइवोत्थितः ॥ दिशःसर्वावनांतांश्चनिरीक्ष्योवाचसत्यवान् ६८ फलाहारोऽस्मिनि ष्क्रांतस्त्वयासहसुमध्यमे ॥ ततःपाटयतःकाष्ठंशिरसोमेरुजाऽभवत् ६९ शिरोभितापसंतप्तःस्थातुंचिरमशक्नुवन् ॥ तवोत्संगेप्रसुप्तोऽस्मिइतिसर्वंस्मरेशु भे ७० त्वयोपगूढस्यचमेनिद्रयाऽपहृतंमनः ॥ ततोऽपश्यंतमोघोरंपुरुषंचमहौजसम् ७१ तद्यदित्वंविजानासिकिंतद्ब्रूहिसुमध्यमे ॥ स्वप्नोमेयदिवादृष्टो यदिवासत्यमेवतत् ७२

सिद्धस्यैव नतद्वत् यस्मादेवंतस्माद्वरंवृणे ५२ व्यवसामिशक्नोमि ५३ । ५४ ५५ । ५६ । ५७ । ५८ त्वन्नामधेयाःसावित्राइति ५९ । ६० । ६१ शावंश्वामं ६२ । ६३ । ६४ । ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२

७३ । ७४ । ७५ । ७६ । ७७ । ७८ । ७९ । ८० । ८१ । ८२ । ८३ । ८४ । ८५ । ८६ अत्रायमाणकौरुदंतौ ८७ नौआवयोः ८८ । ८९ । ९० । ९१

तमुवाचाथसावित्रीरजनीव्यवगाहते ॥ श्वस्तेसर्वंयथावृत्तमाख्यास्यामिनृपात्मज ७३ उत्तिष्ठोत्तिष्ठभद्रंतेपितरौपश्यसुव्रत ॥ विगाढारजनीचेयंनिवृत्तश्चदि
वाकरः ७४ नक्तंचराश्चरंत्येतेहृष्टाःक्रूराभिभाषिणः ॥ श्रूयंतेपर्णशब्दाश्चमृगाणांचरतांवने ७५ एताघोरंशिवानादान्दिशंदक्षिणपश्चिमाम् ॥ आस्थायवि
रुवंत्युग्राःकंपयंत्योमनोमम ७६ ॥ सत्यवानुवाच ॥ वनंप्रतिभयाकारंघनेनतमसावृतम् ॥ नविज्ञास्यसिपंथानंगंतुंचैवनशक्ष्यसि ७७ ॥ सावित्र्युवाच ॥
अस्मिन्नद्यवनेदग्धेशुष्कवृक्षःस्थितोज्वलन् ॥ वायुनाधम्यमानोऽत्रदृश्यतेऽग्निःक्वचित्क्वचित् ७८ ततोऽग्निमानयित्वेहज्वालयिष्यामिसर्वतः ॥ काष्ठानीमानि
संतीहजहिसंतापमात्मनः ७९ यदिनोत्सहसेगंतुंसरुजंत्वांहिलक्षये ॥ नचज्ञास्यसिपंथानंतमसासंवृतेवने ८० श्वःप्रभातेवनेदृश्येयास्यावोऽनुमनेतव ॥ व
सावेहक्षपामेकांरुचितंयदितेऽनघ ८१ ॥ सत्यवानुवाच ॥ शिरोरुजानिवृत्तामेस्वस्थान्यंगानिलक्षये ॥ मातापितृभ्यामिच्छामिसंगमंत्वत्प्रसादजम् ८२ न
कदाचिद्विकालंहिगतपूर्वोमयाऽऽश्रमः ॥ अनागतायांसंध्यायांमातामेप्ररुणद्धिमाम् ८३ दिवाऽपिमयिनिष्क्रांतेसंतप्येतेगुरूमम ॥ विचिनोतिहिमांतातः
सहैवाश्रमवासिभिः ८४ मात्रापित्राचसुभृशंदुःखिताभ्यामहंपुरा ॥ उपालब्धश्चबहुशश्चिरेणागच्छसीतिहि ८५ कात्ववस्थातयोरद्यमदर्थमितिचिंतये ॥ त
योरदृश्येमयिचमहद्दुःखंभविष्यति ८६ पुरामामूचतुश्चैवरात्रावस्रायमाणकौ ॥ भृशंसुदुःखितौवृद्धौबहुशःप्रीतिसंयुतौ ८७ त्वयाहीनौनजीवावमुहूर्तमपिपु
त्रक ॥ यावद्धरिष्यसेपुत्रतावन्नौजीवितंध्रुवम् ८८ वृद्धयोरंधयोर्दृष्टिस्त्वयिवंशःप्रतिष्ठितः ॥ त्वयिपिंडश्चकीर्तिश्चसंतानंचावयोरिति ८९ मातावृद्धापिता
वृद्धस्तयोर्यष्टिरहंकिल ॥ तौरात्रौमामपश्यंतौकामवस्थांगमिष्यतः ९० निद्रायाश्चाभ्यसूयामियस्याहेतोःपितामम ॥ माताचसंशयंप्राप्तामत्कृतेऽनपकारि
णी ९१ अहंचसंशयंप्राप्तःकृच्छ्रामापदमास्थितः ॥ मातापितृभ्यांहिविनानाहंजीवितुमुत्सहे ९२ व्यक्तमाकुलयाबुद्ध्याप्रज्ञाचक्षुःपितामम ॥ एकैकमस्यांवे
लायांपृच्छत्याश्रमवासिनम् ९३ नात्मानमनुशोचामियथाऽहंपितरंशुभे ॥ भर्तारंचाप्यनुगतांमातरंपरिदुर्बलम् ९४ मत्कृतेनहितावद्यसंतापंपरमेष्यतः ॥
जीवंतावनुजीवामिभर्तव्यौतौमयेतिह ९५ तयोःप्रियंमेकर्तव्यमितिजानामिचाप्यहम् ॥ मार्कंडेयउवाच ॥ एवमुक्त्वासधर्मात्मागुरुभक्तोगुरुप्रियः ९६ उच्छ्रि
त्यबाहूदुःखार्तःसुस्वरंप्ररुरोदह ॥ ततोऽब्रवीत्तथादृष्ट्वाभर्तारंशोककर्शितम् ९७ प्रमृज्याश्रूणिनेत्राभ्यांसावित्रीधर्मचारिणी ॥ यदिमेऽस्तितपस्तप्तंयदिदत्तं
हुतंयदि ९८ श्वश्रूश्वशुरभर्तॄणांममपुण्याऽस्तुशर्वरी ॥ नस्मराम्युक्तपूर्वांवैस्वैरेष्वप्यनृतांगिरम् ९९ तेनसत्येनतावद्यध्रियेतांश्वशुरौमम ॥ सत्यवा ॥२४१॥
नुवाच ॥ कामयेदर्शनंपित्रोर्याहिसावित्रिमाचिरम् १००

९२ प्रज्ञाचक्षुरंधः ९३ । ९४ । ९५ । ९६ । ९७ । ९८ । ९९ ध्रियेतांजीवेतां श्वशुरौश्वश्रूश्वशुरौ १००

१०१ । २ । ३ । कठिनेफलपूर्णेपात्रे ४ । ५ । ६ । ७ । ८ । ९ । १० ॥ ११ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे सप्तनवत्यधिकद्विशततमोऽध्यायः ॥ २९७ ॥ ॥ ७ ॥ एत

पुरामातुःपितुर्वाऽपियदिपश्यामिविप्रियम् ॥ नजीविष्येवरारोहेसत्येनात्मानमालभे १०१ यदिधर्मेचतेबुद्धिर्मांचेज्जीवंतमिच्छसि ॥ ममप्रियंवाकर्तव्यंगच्छावा
श्रममंतिकात् २ ॥ मार्कंडेयउवाच ॥ सावित्रीततउत्थायकेशान्संयम्यभाविनी ॥ पतिमुत्थापयामासबाहुभ्यांपरिगृह्यवै ३ उत्थायसत्यवांश्चापिप्रमृज्यांगा
निपाणिना ॥ सर्वादिशःसमालोक्यकठिनेदृष्टिमादधे ४ तमुवाचाथसावित्रीश्वःफलानिहरिष्यसि ॥ योगक्षेमार्थमेतंतेनेष्यामिपरशुंत्वहम् ५ कृत्वाकठिनभा
रंसावृक्षशाखावलंबिनम् ॥ गृहीत्वापरशुंभर्तुःसकाशेपुनरागमत् ६ वामेस्कंधेतुवामोरूभर्तुर्बाहुंनिवेश्यच ॥ दक्षिणेनपरिष्वज्यजगामगजगामिनी ७ ॥ सत्य
वानुवाच ॥ अभ्यासगमनाद्भीरुपंथानोविदितामम ॥ वृक्षांतरालोकितयाज्योत्स्नयाचापिलक्षये ८ आगतौस्वःपथायेनफलान्यवचितानिच ॥ यथागतंशुभे
गच्छपंथानंमाविचारय ९ पलाशखंडेचैतस्मिन्पंथाव्यावर्ततेद्विधा ॥ तस्योत्तरेणयःपंथास्तेनगच्छत्वरस्वच १० स्वस्थोऽस्मिबलवानस्मिदिदृक्षुःपितरा
वुभौ ॥ ब्रुवन्नेवत्वरायुक्तःसंप्रायादाश्रमंप्रति ॥ ११ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिपतिव्रतामा० सावित्र्युपाख्यानेसप्तनवत्यधिकद्विशततमोऽध्या
यः ॥ २९७ ॥ मार्कंडेयउवाच ॥ एतस्मिन्नेवकालेतुद्युमत्सेनोमहाबलः ॥ लब्धचक्षुःप्रसन्नात्मादृष्ट्यासर्वंददर्शह १ ससर्वानाश्रमान्गत्वाशैब्ययासहभार्यया ॥
पुत्रहेतोःपरामार्तिंजगामभरतर्षभ २ तावाश्रमान्नदीश्चैववनानिचसरांसिच ॥ तस्यांनिशिविचिन्वंतौदंपतीपरिजग्मतुः ३ श्रुत्वाशब्दंतुयत्कंचिदुन्मुखौसुतशं
कया ॥ सावित्रीसहितोभ्येतिसत्यवानित्यभाषताम् ४ भिन्नैश्चपरुषैःपादैःसव्रणैःशोणितोक्षितैः ॥ कुशकंटकविद्धांगावुन्मत्ताविवधावतः ५ ततोऽभिसृत्यतैर्वि
प्रैःसर्वैराश्रमवासिभिः ॥ परिवार्यसमाश्वास्यतावानीतौस्वमाश्रमम् ६ तत्रभार्यासहायःसवृतोवृद्धैस्तपोधनैः ॥ आश्वासितोऽपिचित्रार्थैःपूर्वराज्ञांकथाश्रयैः
७ ततस्तौपुनराश्वस्तौवृद्धौपुत्रदिदृक्षया ॥ बाल्यवृत्तानिपुत्रस्यस्मरंतौभृशदुःखितौ ८ पुनरुक्त्वाचकरुणांवाचंतौशोककर्शितौ ॥ हापुत्रहासाध्विवधूःक्वा
सिक्वासीत्यरोदताम् ॥ ब्राह्मणःसत्यवाक्तेषामुवाचेदंतयोर्वचः ९ ॥ सुवर्चाउवाच ॥ यथाऽस्यभार्यासावित्रीतपसाचदमेनच ॥ आचारेणचसंयुक्तातथाजी
वतिसत्यवान् १० ॥ गौतमउवाच ॥ वेदाःसांगामयाऽधीतास्तपोमेसंचितंमहत् ॥ कौमारब्रह्मचर्यंचगुरवोऽग्निश्चतोषिताः ११ समाहितेनचीर्णानिसर्वाण्ये
वव्रतानिमे ॥ वायुभक्षोपवासश्चकृतोमेविधिवत्सदा १२ अनेनतपसावेद्मिसर्वंपरचिकीर्षितम् ॥ सत्यमेतन्निबोधध्वंध्रियतेसत्यवानिति १३ ॥ शिष्यउवाच ॥
उपाध्यायस्यमेवक्त्राद्यथावाक्यंविनिःसृतम् ॥ नैवजातुभवेन्मिथ्यातथाजीवतिसत्यवान् १४ ॥ ऋषयऊचुः ॥ यथाऽस्यभार्यासावित्रीसर्वैरेवसुलक्षणैः ॥
अवैधव्यकरैर्युक्तातथाजीवतिसत्यवान् १५

स्मिन्नेवेति १ । २ । ३ । ४ भिन्नैर्विदीर्णैः परुषैःकर्कशैः ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

१६ । १७ शांतायांप्रसन्नायां पार्थिवीपार्थिवत्वयोग्या प्रवृत्तिर्धर्मः १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ विराबेबहुरात्रेकाले आगतमागमनम् २८

॥ भारद्वाजउवाच ॥ यथाऽस्यभार्यासावित्रीतपसाचदमेनच ॥ आचारेणचसंयुक्तातथाजीवतिसत्यवान् १६ ॥ दाल्भ्यउवाच ॥ यथादृष्टिःप्रवृत्तातेसावि
त्र्याश्चयथाव्रतम् ॥ गताऽऽहारमकृत्वाचतथाजीवतिसत्यवान् १७ ॥ आपस्तंबउवाच ॥ यथावदंतिशांतायांदिशिवैमृगपक्षिणः ॥ पार्थिवीचप्रवृत्तिस्तेतथा
जीवतिसत्यवान् १८ ॥ धौम्यउवाच ॥ सर्वैर्गुणैरुपेतस्तेयथापुत्रोजनप्रियः ॥ दीर्घायुर्लक्षणोपेतस्तथाजीवतिसत्यवान् १९ ॥ मार्कंडेयउवाच ॥ एवमा
श्वासितस्तैस्तुसत्यवाग्भिस्तपस्विभिः ॥ तांस्तान्विगणयन्सर्वांस्ततःस्थिरइवाभवत् २० ततोमुहूर्तात्सावित्रीभर्त्रासत्यवतासह ॥ आजगामाश्रमंरात्रौप्रह
ृष्टाप्रविवेशह २१ ॥ ब्राह्मणाऊचुः ॥ पुत्रेणसंगतंत्वांतुचक्षुष्मंतंनिरीक्ष्यच ॥ सर्वेवयंवैपृच्छामोवृद्धिंवैपृथिवीपते २२ समागमेनपुत्रस्यसावित्र्यादर्शनेनच ॥
चक्षुषश्चात्मनोलाभात्रिभिर्दिष्ट्याविवर्धते २३ सर्वैरस्माभिरुक्तंयत्तथातन्नात्रसंशयः ॥ भूयोभूयःसमृद्धिस्तेक्षिप्रमेवभविष्यति २४ ततोऽग्निंतत्रसंज्वाल्यद्वि
जास्तेसर्वएवहि ॥ उपासांचक्रिरेपार्थद्युमत्सेनंमहीपतिम् २५ शैब्याचसत्यवांश्चैवसावित्रीचैकतःस्थिताः ॥ सर्वैस्तैरभ्यनुज्ञाताविशोकाःसमुपाविशन् २६
ततोराज्ञासहासीनाःसर्वेतेवनवासिनः ॥ जातकौतूहलाःपार्थपप्रच्छुर्नृपतेःसुतम् २७ ॥ ऋषयऊचुः ॥ प्रागेवनागतंकस्मात्सभार्येणत्वयाविभो ॥ विरात्रेचा
गतंकस्मात्कोऽनुबंधस्तवाभवत् २८ संतापितःपितामातावयंचैवनृपात्मज ॥ कस्मादितिनजानीमस्तत्सर्वंवक्तुमर्हसि २९ ॥ सत्यवानुवाच ॥ पित्राऽहमभ्य
नुज्ञातःसावित्रीसहितोगतः ॥ अथमेऽभूच्छिरोदुःखंवनेकाष्ठानिभिंदतः ३० सुप्तश्चाहंवेदनयाचिरमित्युपलक्षये ॥ तावत्कालंनचमयासुप्तपूर्वंकदाचन ३१
सर्वेषामेवभवतांसंतापोमाभवेदिति ॥ अतोविरात्रागमनंनान्यदस्तीहकारणम् ३२ ॥ गौतमउवाच ॥ अकस्माच्चक्षुषःप्राप्तिर्द्युमत्सेनस्यतेपितुः ॥ नास्यत्वं
कारणंवेत्सिसावित्रीवक्तुमर्हति ३३ श्रोतुमिच्छामिसावित्रित्वंहिवेत्थपरावरम् ॥ त्वांहिजानामिसावित्रिसावित्रीमिवतेजसा ३४ त्वमत्रहेतुंजानीषेतस्मात्सत्यं
निरुच्यताम् ॥ रहस्यंयदितेनास्तिकिंचिदत्रवदस्वनः ३५ ॥ सावित्र्युवाच ॥ एवमेतद्यथावेत्थसंकल्पोनान्यथाहिवः ॥ नहिकिंचिद्रहस्यंमेश्रूयतांतथ्य
मेवयत् ३६ मृत्युर्मेपत्युराख्यातोनारदेनमहात्मना ॥ सचाद्यदिवसःप्राप्तस्ततोनैनंजहाम्यहम् ३७ सुप्तंचैनंयमःसाक्षादुपागच्छत्सकिंकरः ॥ सएनमनय
द्बद्ध्वादिशंपितृनिषेविताम् ३८ अस्तौषंतमहंदेवंसत्येनवचसाविभुम् ॥ पंचवैतेनमेदत्तावराःशृणुततान्मम ३९ चक्षुषीचस्वराज्यंचद्वौवरौश्वशुरस्यमे ॥
लब्धंपितुःपुत्रशतंपुत्राणांचात्मनःशतम् ४० चतुर्वर्षशतायुर्मेभर्तालब्धश्चसत्यवान् ॥ भर्तुर्हिजीवितार्थंतुमयाचीर्णंत्विदंव्रतम् ४१

२९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१

४२ । ४३ । ४४ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेअष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥ ॥ तस्यामिति १ । २ । ३ । ४ । ५ । ६ विरात्रायबहुकालम् ७

एतत्सर्वंमयाऽऽख्यातंकारणंविस्तरेणवः ॥ यथावृत्तंसुखोदर्कमिदंदुःखंमहन्मम ४२ ॥ ऋषयऊचुः ॥ निमज्जमानंव्यसनैरभिद्रुतंकुलंनरेंद्रस्यतमोमयेह्र
दे ॥ त्वयासुशीलव्रतपुण्ययाकुलंसमुद्धृतंसाध्विपुनःकुलीनया ४३ ॥ मार्कंडेयउवाच ॥ तथाप्रशस्यह्यभिपूज्यचैववरास्त्रियंतामृषयःसमागताः ॥ नरेंद्रमा
मंत्र्यसपुत्रमंजसाशिवेनजग्मुर्मुदिताःस्वमालयम् ४४ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिपातिव्रतामाहात्म्यपर्वणिसावित्र्युपाख्यानेअष्टनवत्यधिकद्विशतत
मोऽध्यायः ॥ २९८ ॥ ॥ मार्कंडेयउवाच ॥ तस्यांरात्र्यांव्यतीतायामुदितेसूर्यमंडले ॥ कृतपौर्वाह्णिकाःसर्वेसमेयुस्तेतपोधनाः १ तदेवसर्वंसावित्र्या
महाभाग्यंमहर्षयः ॥ द्युमत्सेनायनातृप्यन्कथयंतःपुनःपुनः २ ततःप्रकृतयःसर्वाःशाल्वेभ्योऽभ्यागतानृप ॥ आचख्युर्निहतंचैवस्वेनामात्येनतंद्विषम् ३
तंमंत्रिणाहतंश्रुत्वाससहायंसबांधवम् ॥ न्यवेदयन्यथावृत्तंविद्रुतंचद्विषद्बलम् ४ ऐकमत्यंचसर्वस्यजनस्याथनृपंप्रति ॥ सचक्षुर्वाऽप्यचक्षुर्वासनोराजाभवत्वि
ति ५ अनेननिश्चयेनेहवयंप्रस्थापितानृप ॥ प्राप्तानीमानियानानिचतुरंगंचतेबलम् ६ प्रयाहिराजन्भद्रंतेघुष्टस्तेनगरेजयः ॥ अध्यास्वचिरराजायपितृ
पैतामहंपदम् ७ चक्षुष्मंतंचतंदृष्ट्वाराजानंवपुषाऽन्वितम् ॥ मूर्ध्नानिपतिताःसर्वेविस्मयोत्फुल्ललोचनाः ८ ततोऽभिवाद्यतान्वृद्धान्द्विजानाश्रमवासिनः ॥ तै
श्चाभिपूजितःसर्वैःप्रययौनगरंप्रति ९ शैब्याचसहसावित्र्यास्वास्तीर्णेनसुवर्चसा ॥ नरयुक्तेनयानेनप्रययौसेनयावृता १० ततोऽभिषिषिचुःप्रीत्याद्युमत्सेनंपु
रोहिताः ॥ पुत्रंचास्यमहात्मानंयौवराज्येऽभ्यषेचयन् ११ ततःकालेनमहतासावित्र्याःकीर्तिवर्धनम् ॥ तद्वैपुत्रशतंजज्ञेशूराणामनिवर्तिनाम् १२ भ्रातॄणां
सोदराणांचतथैवास्याऽभवच्छतम् ॥ मद्राधिपस्याश्वपतेर्मालव्यांसुमहद्बलम् १३ एवमात्मापितामाताश्वश्रूःश्वशुरएवच ॥ भर्तुःकुलंचसावित्र्यासर्वंकृ
च्छ्रात्समुद्धृतम् १४ तथैवैषाहिकल्याणीद्रौपदीशीलसंमता ॥ तारयिष्यतिवःसर्वान्सावित्रीवकुलांगना १५ ॥ वैशंपायनउवाच ॥ एवंसपांडवस्तेनअनुनी
तोमहात्मना ॥ विशोकोविज्वरोराजन्काम्यकेन्यवसत्तदा १६ यश्चेदंशृणुयाद्भक्त्यासावित्र्याख्यानमुत्तमम् ॥ ससुखीसर्वसिद्धार्थोनदुःखंप्राप्नुयान्नरः १७ ॥
॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिपातिव्रतामाहात्म्यपर्वणिसावित्र्युपाख्यानेनवनवत्यधिकद्विशततमोऽध्यायः ॥ २९९ ॥ ॥ ५ ॥ ॥ समाप्तंचेदंपतिव्र
तामाहात्म्यपर्व ॥ अथकुंडलाहरणपर्व ॥ ॥ जनमेजयउवाच ॥ यत्तत्तदामहद्ब्रह्मन्लोमशोवाक्यमब्रवीत् ॥ इंद्रस्यवचनादेवपांडुपुत्रंयुधिष्ठिरम् १ यच्चापिते
भयंतीव्रंनचकीर्तयसेक्वचित् ॥ तच्चाप्यपहरिष्यामिधनंजयइतोगते २ किंनुतज्जपतांश्रेष्ठकर्णंप्रतिमहद्भयम् ॥ आसीन्नचसधर्मात्माकथयामासकस्यचित् ३

८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे नवनवत्यधिकद्विशततमोऽध्यायः ॥ २९९ ॥ ॥ यत्तदिति १ । २ । ३

४ । ५ विभावसुः विशिष्टाभाःऽदीप्तिः सैववसु धनंयस्य तादृशःसूर्यः ६ । ७ स्वप्नांतेस्वप्नमध्ये ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७

॥२४३॥ ॥ वैशंपायनउवाच ॥ अयंतेराजशार्दूलकथयामिकथामिमाम् ॥ पृच्छतोभरतश्रेष्ठशुश्रूषस्वगिरंमम ४ द्वादशेसमतिक्रांतेवर्षेप्राप्तेत्रयोदशे ॥ पांडूनांहि
तकृच्छक्रःकर्णंभिक्षितुमुद्यतः ५ अभिप्रायमथोज्ञात्वामहेंद्रस्यविभावसुः ॥ कुंडलार्थेमहाराजसूर्यःकर्णमुपागतः ६ महार्हेशयनेवीरंस्पर्द्ध्यास्तरणसंवृते ॥
शयानमतिविश्वस्तंब्रह्मण्यंसत्यवादिनम् ७ स्वप्नांतेनिशिराजेंद्रदर्शयामासरश्मिवान् ॥ कृपयापरयाऽऽविष्टःपुत्रस्नेहाच्चभारत ८ ब्राह्मणोवेदविद्भूत्वासूर्योयो
गर्धिरूपवान् ॥ हितार्थमब्रवीत्कर्णंसांत्वपूर्वमिदंवचः ९ कर्णमद्वचनंतातशृणुसत्यभृतांवर ॥ ब्रुवतोऽद्यमहाबाहोसौहृदात्परमंहितम् १० उपायास्यतिशक्र
स्त्वांपांडवानांहितेप्सया ॥ ब्राह्मणच्छद्मनाकर्णकुंडलोपजिहीर्षया ११ विदितंतेनशीलंतेसर्वस्यजगतस्तथा ॥ यथात्वंभिक्षितःसद्भिर्ददास्येवनयाचसे १२
त्वंहितातददास्येवब्राह्मणेभ्यःप्रयाचितम् ॥ वित्तंयच्चान्यदप्याहुर्नप्रत्याख्यासिकस्यचित् १३ त्वांतुचैवंविधंज्ञात्वास्वयंवैपाकशासनः ॥ आगंताकुंडलार्थायक
र्णंचैवभिक्षितुम् १४ तस्मैप्रयाचमानायनदेयेकुंडलेत्वया ॥ अनुनेयःपरंशक्त्याश्रेयएतद्धितेपरम् १५ कुंडलार्थेब्रुवंस्तातकारणैर्बहुभिस्त्वया ॥ अन्यैर्बहु
विधैर्वित्तैःसन्निवार्यःपुनःपुनः १६ रत्नैःस्त्रीभिस्तथागोभिर्धनैर्बहुविधैरपि ॥ निदर्शनैश्चबहुभिःकुंडलेप्सुःपुरंदरः १७ यदिदास्यसिकर्णत्वंसहजेकुंडलेशुभे ॥
आयुषःप्रक्षयंगत्वामृत्योर्वशमुपैष्यसि १८ कवचेनसमायुक्तःकुंडलाभ्यांचमानद ॥ अवध्यस्त्वंरणेऽरीणामितिविद्धिवचोमम १९ अमृतादुत्थितंह्येतदुभयंरत्न
संभवम् ॥ तस्माद्रक्ष्यंत्वयाकर्णजीवितंचेत्प्रियंतव २० ॥ कर्णउवाच ॥ कोमामेवंभवान्प्राहदर्शयन्सौहृदंपरम् ॥ कामयाभगवन्ब्रूहिकोभवान्द्विजवेषधृक् २१
॥ ब्राह्मणउवाच ॥ अहंतातसहस्रांशुःसौहृदात्त्वांनिदर्शये ॥ कुरुष्वैतद्वचोमेत्वमेतच्छ्रेयःपरंहिते २२ ॥ कर्णउवाच ॥ श्रेयएवममात्यंतंयस्यमेगोपतिःप्रभुः ॥
प्रवक्ताऽद्यहितान्वेषीशृणुचेदंवचोमम २३ प्रसादयेत्वांवरदंप्रणयाच्चब्रवीम्यहम् ॥ ननिवार्योव्रतादस्मादहंयद्यस्मितेप्रियः २४ व्रतंवैममलोकोऽयंवेत्तिकृत्स्नं
विभावसो ॥ यथाहंद्विजमुख्येभ्योदद्यांप्राणानपिध्रुवम् २५ यद्यागच्छतिमांशक्रोब्राह्मणच्छद्मनाऽऽवृतः ॥ हितार्थंपांडुपुत्राणांखेचरोत्तमभिक्षितुम् २६
दास्यामिविबुधश्रेष्ठकुंडलेवर्मचोत्तमम् ॥ नमेकीर्तिःप्रणश्येतत्रिषुलोकेषुविश्रुता २७ मद्विधस्ययशस्यंहिनयुक्तंप्राणरक्षणम् ॥ युक्तंहियशसायुक्तंमरणंलो
कसंमतम् २८ सोऽहमिंद्रायदास्यामिकुंडलेसहवर्मणा ॥ यदिमांबलवृत्रघ्नोभिक्षार्थमुपयास्यति २९ हितार्थंपांडुपुत्राणांकुंडलेमेप्रयाचितुम् ॥ तन्मेकी
र्तिकरंलोकेतस्याकीर्तिर्भविष्यति ३० वृणोमिकीर्तिंलोकेहिजीवितेनापिभानुमन् ॥ कीर्तिमानश्नुतेस्वर्गंहीनकीर्तिस्तुनश्यति ३१ ॥२४३॥

१८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१

॥ माऽहितमिति अहितमितिच्छेदः १ । २ । ३ जीवतांपु
३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे त्रिशततमोऽध्यायः ३०० ॥ ॥ माऽहितमिति अहितमितिच्छेदः १ । २ । ३ जीवतांपु
त्रादीनांकार्यप्रयोजनंपरि ध्वंगादिजंसुखंपित्रादिःकुरुतेलमते स्वधिमृतेस्वस्पित्रादीनांकिंसुखंस्यादितिभावः ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ विशाखयोः विशाखानक्षत्रस्यद्वेभास्तरेतारे

कीर्तिर्हिपुरुषंलोकेसंजीवयतिमातृवत् ॥ अकीर्तिर्जीवितंहंतिजीवतोऽपिशरीरिणः ३२ अयंपुराणःश्लोकोहिस्वयंगीतोविभावसो ॥ धात्रालोकेश्वरयथाकीर्तिरा
युर्नरस्यह ३३ पुरुषस्यपरेलोकेकीर्तिरेवपरायणम् ॥ इहलोकेविशुद्धाचकीर्तिरायुर्विवर्द्धनी ३४ सोऽहंशरीरजेदत्वाकीर्तिंप्राप्स्यामिशाश्वतीम् ॥ दत्वाचवि
धिवद्दानंब्राह्मणेभ्योयथाविधि ३५ हुत्वाशरीरंसंग्रामेकृत्वाकर्मसुदुष्करम् ॥ विजित्यचपरानाजौयशःप्राप्स्यामिकेवलम् ३६ भीतानामभयंदत्वासंग्रामेजीवि
तार्थिनां ॥ वृद्धान्बालान्द्विजातींश्चमोक्षयित्वामहाभयात् ३७ प्राप्स्यामिपरमंलोकेयशःस्वर्ग्यमनुत्तमम् ॥ जीवितेनापिमेरक्ष्याकीर्तिस्तद्विद्धिमेव्रतम् ३८
सोऽहंदत्वामघवतेभिक्षामेतामनुत्तमाम् ॥ ब्राह्मणच्छद्मिनेदेवलोकेगंता परांगतिं ३९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाहरणपर्वणिसूर्यकर्णसंवादेत्रिश
ततमोऽध्यायः ॥ ३०० ॥ ध्र ॥ ॥ सूर्यउवाच ॥ माऽहितंकर्णकार्षीस्त्वमात्मनःसुहृदांतथा ॥ पुत्राणामथभार्याणामथोमातुरथोपितुः १ शरीरस्याविरोधेन
प्राणिनांप्राणभृद्वर ॥ इष्यतेयशसःप्राप्तिःकीर्तिश्चत्रिदिवेस्थिरा २ यस्त्वंप्राणविरोधेनकीर्तिमिच्छसिशाश्वतीं ॥ सातेप्राणान्समादायगमिष्यतिनसंशयः ३ जी
वतांकुरुतेकार्यंपितामातासुतास्तथा ॥ येचान्येबांधवाःकेचिल्लोकेऽस्मिन्पुरुषर्षभ ४ राजानश्चनरव्याघ्रपौरुषेणनिबोधतत् ॥ कीर्तिश्चजीवतःसाध्वीपुरुष
स्यमहाद्युते ५ मृतस्यकीर्त्याकिंकार्यंभस्मीभूतस्यदेहिनः ॥ मृतःकीर्तिंनजानातिजीवन्कीर्तिंसमश्नुते ६ मृतस्यकीर्तिर्मर्त्यस्ययथामालागतायुषः ॥ अहंतु
त्वांब्रवीम्येतद्भक्तोऽसीतिहितेप्सया ७ भक्तिमंतोहिमेरक्ष्याइत्येतेनापिहेतुना ॥ भक्तोऽयंपरयाभक्त्यामामित्येवमहाभुज ८ ममापिभक्तिरुत्पन्नासत्वंकुरुवचो
मम ॥ अस्तिचात्रपरंकिंचिदध्यात्मंदेवनिर्मितम् ॥ अतश्चत्वांब्रवीम्येतत्क्रियतामविशंकया ९ देवगुह्यंत्वयाज्ञातुनशक्यंपुरुषर्षभ ॥ तस्मान्नाख्यामितेगु
ह्यंकालेवेत्स्यतितद्भवान् १० पुनरुक्तंचवक्ष्यामित्वंराधेयनिबोधतत् ॥ मास्मैतेकुंडलेदद्याभिक्षितेवज्रपाणिना ११ शोभसेकुंडलाभ्यांचरुचिराभ्यांमहाद्युते ॥
विशाखयोर्मध्यगतःशशीवविमलेदिवि १२ कीर्तिश्चजीवतःसाध्वीपुरुषस्येतिविद्धितत् ॥ प्रत्याख्येयस्त्वयातातकुंडलार्थेसुरेश्वरः १३ शक्याबहुविधैर्वाक्यैःकुंड
लेप्सात्वयाऽनघ ॥ विहंतुंदेवराजस्यहेतुयुक्तैःपुनःपुनः १४ हेतुमदुपपन्नार्थैर्माधुर्यकृतभूषणैः ॥ पुरंदरस्यकर्णत्वंबुद्धिमेतामपानुद १५ त्वंहिनित्यंनरव्याघ्र
 स्पर्धसेसव्यसाचिना ॥ सव्यसाचीत्वयाचेहयुधिशूरःसमेष्यति १६ नतुत्वामर्जुनःशक्तःकुंडलाभ्यांसमन्वितम् ॥ विजेतुंयुधियद्यस्यस्वयमिंद्रःसखाभवेत् १७

तयोर्मध्येगतःपूर्णचंद्रः १२ । १३ विहंतुंशक्येतिसंबंधः हेतुर्जीवनादिप्रदर्शनंतद्युक्तैः १४ हेतुर्युक्तिस्तद्वंतिचउपपन्नार्थानिहेत्वाभासरहितानिचवैः सर्वप्रवारमानंगोपायेत् । नसर्पायांगुलिंद
द्यात् । 'शरीरमाद्यंखलुधर्मसाधनम्' इत्यादिभिर्वाक्यैः १५ । १६ । १७

१८ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे एकाधिकत्रिशततमोऽध्यायः ॥ ३०१ ॥ ॥ भगवंतमिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

तस्मान्नदेयेशक्रायत्वयैतेकुंडलेशुभे ॥ संग्रामेयदिनिर्जेतुंकर्णकामयसेऽर्जुनम् ॥ १८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाहरणपर्वणिसूर्यकर्णसंवादेएका
धिकत्रिशततमोध्यायः ॥ ३०१ ॥ ॥ ७ ॥ कर्णउवाच ॥ भगवंतमहंभक्तोयथामांवेत्थगोपते ॥ तथापरमतिग्मांशोनास्त्यदेयंकथंचन १ नमेदारानमे
पुत्रानचात्मासुहृदोनच ॥ तथेष्टावैसदाभक्त्यायथात्वंगोपतेमम २ इष्टानांचमहात्मानोभक्तानांचनसंशयः ॥ कुर्वंतिभक्तिमिष्टांचजानीषेत्वंचभास्कर ३ इ
ष्टोभक्तश्चमेकर्णोनचान्यद्दैवतंदिवि ॥ जानीतइतिवैकृत्वाभगवानाहमद्धितम् ४ भूयश्चशिरसायाचेप्रसाद्यचपुनःपुनः ॥ इतिब्रवीमितिग्मांशोत्वंतुमेक्षंतुमर्ह
सि ५ बिभेमिनतथामृत्योर्यथाबिभ्येऽनृतादहम् ॥ विशेषेणद्विजातीनांसर्वेषांसर्वदासताम् ६ प्रदानेजीवितस्यापिनमेत्रास्तिविचारणा ॥ यच्चमामात्थदेवत्वंपां
डवंफाल्गुनंप्रति ७ व्येतुसंतापजंदुःखंतवभास्करमानसम् ॥ अर्जुनंप्रतिमांचैवविजेष्यामिरणेऽर्जुनम् ८ तवापिविदितंदेवममाप्यस्त्रबलंमहत् ॥ जामदग्न्यादुपात्तं
यत्तथाद्रोणान्महात्मनः ९ इदंत्वमनुजानीहिसुरश्रेष्ठव्रतंमम ॥ भिक्षतेवज्रिणेदद्यामपिजीवितमात्मनः १० ॥ सूर्यउवाच ॥ यदितातददास्येतेवज्रिणेकुंडलेशुभे ॥
त्वमप्येनमथोब्रूयाविजयार्थंमहाबलम् ११ नियमेनप्रदद्यांतेकुंडलेवैशतक्रतो ॥ अवध्योह्यसिभूतानांकुंडलाभ्यांसमन्वितः १२ अर्जुनेनविनाशंहितवदानव
सूदनः ॥ प्रार्थयानोरणेवत्सकुंडलेतेजिहीर्षति १३ सत्वमप्येनमाराध्यसूनृताभिःपुनःपुनः ॥ अभ्यर्थयेथादेवेशममोघार्थंपुरंदरम् १४ अमोघांदेहिमेशक्तिम
मित्रविनिबर्हिणीं ॥ दास्यामितेसहस्राक्षकुंडलेवर्मचोत्तमम् १५ इत्येवनियमेनत्वंदद्याःशक्रायकुंडले ॥ तयात्वंकर्णसंग्रामेहनिष्यसिरणेरिपून् १६ नाहत्वाहिमहा
बाहोशत्रूनेतिकरंपुनः ॥ साशक्तिर्देवराजस्यशतशोऽथसहस्रशः १७ ॥ वैशंपायनउवाच ॥ एवमुक्त्वासहस्रांशुःसहसाऽन्तरधीयत ॥ ततःसूर्यायजप्यांतेकर्णः
स्वप्नंन्यवेदयत् १८ यथादृष्टंयथातत्त्वंयथोक्तमुभयोर्निशि ॥ तत्सर्वमानुपूर्व्येणशशंसास्मैवृषस्तदा १९ तच्छ्रुत्वाभगवान्देवोभानुःस्वर्भानुसूदनः ॥ उवाचतंत
थेत्येवकर्णंसूर्यःस्मयन्निव २० ततस्तत्त्वमितिज्ञात्वाराधेयःपरवीरहा ॥ शक्तिमेवाभिकांक्षन्वैवासवंप्रत्यपालयत् २१ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंड
लाहरणपर्वणिसूर्यकर्णसंवादेद्व्यधिकत्रिशततमोऽध्यायः ॥ ३०२ ॥ ॥ जनमेजयउवाच ॥ किंतद्गुह्यंनचाख्यातंकर्णायेहोष्णरश्मिना ॥ कीदृशेकुंडलेते
चकवचंचैवकीदृशम् १ कुतश्चकवचंतस्यकुंडलेचैवसत्तम ॥ एतदिच्छाम्यहंश्रोतुंतन्मेब्रूहितपोधन २ ॥ वैशंपायनउवाच ॥ अयंराजन्ब्रवीम्येतत्तस्यगुह्यं
विभावसोः ॥ यादृशेकुंडलेतेचकवचंचैवयादृशम् ३ कुंतिभोजंपुराजन्ब्राह्मणःपर्युपस्थितः ॥ तिग्मतेजामहाप्रांशुःश्मश्रुदंडजटाधरः ४

१६।१७ । १८ । अस्मैसूर्याय वृषःकर्णः १९ स्वर्भानुसूदनोराहुदमनः २०।२१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपेद्व्यधिकत्रिशततमोऽध्यायः ॥ ३०२ ॥ किंतद्गुह्यमिति १।२।३।४

५ । ६ । ७ । ८ । ९ । १० अनवमन्य अवमानमकृत्वा ११ । १२ वस्तुंवासंकर्तुं १३ पराश्वस्यपरमाप्ता संकल्प्य अभिराधनंकर्तुमितिशेषः १४ । १५ । १६ । १७ । १८ प्रणिधानंचित्तैका

दर्शनीयोऽनवद्यांगस्तेजसाप्रज्वलन्निव ॥ मधुपिंगोमधुरवाक्तपःस्वाध्यायभूषणः ५ सराजानंकुंतिभोजमब्रवित्सुमहातपाः ॥ भिक्षामिच्छामिवैभोक्तुंतवगेहेवि
मत्सर ६ नमेव्यलीकंकर्तव्यंत्वयावातवचानुगैः ॥ एवंवत्स्यामितेगेहेयदितेरोचतेऽनघ ७ यथाकामंचगच्छेयमागच्छेयंतथैवच ॥ शय्यासनेचमेराजन्नाप
राध्येतकश्चन ८ तमब्रवीत्कुंतिभोजःप्रीतियुक्तमिदंवचः ॥ एवमस्तुपरंचेतिपुनश्चैनमथाब्रवीत् ९ ममकन्यामहाप्राज्ञपृथानामयशस्विनी ॥ शीलवृत्ता
न्वितासाध्वीनियताचैवभाविनी १० उपस्थास्यतिसात्वांवैपूजयाऽनवमन्यच ॥ तस्याश्चशीलवृत्तेनतुष्टिंसमुपयास्यसि ११ एवमुक्त्वातुतंविप्रमभिपूज्ययथा
विधि ॥ उवाचकन्यामभ्येत्यपृथांपृथुललोचनाम् १२ अयंवत्सेमहाभागोब्राह्मणोवस्तुमिच्छति ॥ ममगेहेमयाचास्यतथेत्येवंप्रतिश्रुतम् १३ त्वयिवत्सेपरा
श्वस्यब्राह्मणस्याभिराधनम् ॥ तन्मेवाक्यममिथ्यात्वंकर्तुमर्हसिकर्हिचित् १४ अयंतपस्वीभगवान्स्वाध्यायनियतोद्विजः ॥ यद्यद्ब्रूयान्महातेजास्तत्तद्देयममत्सरात् १५ ब्राह्मणोहिपरंतेजोब्राह्मणोहिपरंतपः ॥ ब्राह्मणानांनमस्कारैःसूर्योदिविविराजते १६ अमानयद्धिमानार्हान्वातापिश्चमहासुरः ॥ निहतोब्रह्मदंडे
नतालजंघस्तथैवच १७ सोऽयंवत्सेमहाभारआहितस्त्वयिसांप्रतम् ॥ त्वंसदानियताकुर्याब्राह्मणस्याभिराधनम् १८ जानामिप्रणिधानंतेबाल्यात्प्रभृतिनंदि
नि ॥ ब्राह्मणेष्विहसर्वेषुगुरुबंधुषुचैवह १९ तथाप्रेष्येषुसर्वेषुमित्रसंबंधिमातृषु ॥ मयिचैवयथावत्त्वंसर्वमावृत्यवर्तसे २० नह्यतुष्टोजनोस्तीहपुरेचांतःपुरेच
ते ॥ सम्यग्वृत्त्याऽनवद्यांगितवभृत्यजनेष्वपि २१ संदेष्टव्यांतुमन्येत्वांद्विजातिंकोपनंप्रति ॥ पृथेबालेतिकृत्वावैसुताचासिममेतिच २२ वृष्णीनांचकुलेजा
ताशूरस्यदयितासुता ॥ दत्ताप्रीतिमतामह्यंपित्राबालापुरास्वयम् २३ वसुदेवस्यभगिनीसुतानांप्रवरामम ॥ अग्र्यमग्रेप्रतिज्ञायतेनाऽसिदुहितामम २४
तादृशेहिकुलेजाताकुलेचैवविवर्धिता ॥ सुखात्सुखमनुप्राप्ताह्रदाद्ध्रदमिवागता २५ दौष्कुलेयाविशेषेणकथंचित्प्रग्रहंगताः ॥ बालभावाद्विकुर्वंतिप्रायशःप्रम
दाःशुभे २६ पृथेराजकुलेजन्मरूपंचापितवाद्भुतम् ॥ तेनतेनासिसंपन्नासमुपेताचभाविनी २७ सात्वंदर्पंपरित्यज्यदंभंमानंचभाविनि ॥ आराध्यवरदंविप्रं
श्रेयसायोक्ष्यसेपृथे २८ एवंप्राप्स्यसिकल्याणिकल्याणमनघेध्रुवम् ॥ कोपितेचद्विजश्रेष्ठेकृत्स्नंदह्येतमेकुलम् २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंड
लाहरणपर्वणिपृथोपदेशेत्र्यधिकत्रिशततमोऽध्यायः ॥ ३०३ ॥ कुंत्युवाच ॥ ब्राह्मणंयंत्रिताराजन्नुपस्थास्यामिपूजया ॥ यथाप्रतिज्ञंराजेंद्रनचमिथ्याब्रवी
म्यहम् १ एषचैवस्वभावोमेपूजयेयंद्विजानिति ॥ तवचैवप्रियंकार्यंश्रेयश्चपरमंमम २ यद्येवैष्यतिसायाह्नेयदिप्रातरथोनिशि ॥ यद्यर्धरात्रेभगवान्नमेकोपंकरिष्यति ३

र्थ्यं १९ आवृत्यव्याप्य २० । २१ । २२ । २३ अग्र्यं अग्रेदेयं मयाप्रथममपत्यंतुभ्यंदेयमितिप्रतिज्ञातमित्यर्थः २४ । २५ दौष्कुलेयाःदुष्कुलेजाताः प्रग्रहंनिर्बंधंगताःप्राप्ताः विकुर्वंतिवि
कृतंकुर्वंति २६ । २७ । २८ । २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे त्र्यधिकत्रिशततमोऽध्यायः ॥ ३०३ ॥ ॥ ७ ॥ ब्राह्मणमिति यंत्रितानियमयुक्ता १ । २ । ३

१ विस्रब्धोविश्वस्तः व्यलीकमप्रियं ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ अग्निशरणेअग्न्यगारे १८ तंद्रीमालस्यं १९ परिचारार्हपूजार्हं २० ॥ इ
त्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे चतुरधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥ ॥ ५ ॥ सात्विति १ । २ प्रतिश्रयैःआश्रयैःशयनासनाद्यैः ३ अन्नादिनासमुदाचारःसमुपसर्पणं ४

त्वाभोममैपराजेंद्रयद्वैपूजयतीद्विजान् ॥ आदेशे तवतिष्ठंतीहितंकुर्यांनरोत्तम ४ विस्रब्धोभवराजेंद्रनव्यलीकंद्विजोत्तमः ॥ वसन्प्राप्स्यतितेगेहेसत्यमेतद्ब्रवी
मिते ५ यत्प्रियंचद्विजस्यास्यहितंचैवतवानघ ॥ यतिष्यामितथाराजन्व्येतुतेमानसोज्वरः ६ ब्राह्मणाहिमहाभागाःपूजिताःपृथिवीपते ॥ तारणायसमर्थाः
स्युर्विपरीतेवधायच ७ साऽहमेतद्विजानंतीतोषयिष्येद्विजोत्तमम् ॥ नमत्कृतेव्यथांराजन्प्राप्स्यसिद्विजसत्तमात् ८ अपराधेऽपिराजेंद्रराज्ञामश्रेयसेद्विजाः ॥
भवंतिच्यवनोयद्वत्सुकन्यायाःकृतेपुरा ९ नियमेनपरेणाहमुपस्थास्येद्विजोत्तमम् ॥ यथात्वयानरेंद्रेदंभाषितंब्राह्मणंप्रति १० एवंब्रुवंतींबहुशःपरिष्वज्यसम
र्थ्यच ॥ इतिचेतिचकर्तव्यंराजासर्वमथादिशत् ११ ॥ राजोवाच ॥ एवमेतत्त्वयाभद्रेकर्तव्यमविशंकया ॥ मद्धितार्थंतथात्मार्थंकुलार्थंचाप्यनिंदिते १२
एवमुक्त्वातुतांकन्यांकुंतिभोजोमहायशाः ॥ पृथांपरिददौतस्मैद्विजायद्विजवत्सलः १३ इयंब्रह्मन्ममसुताबालासुखविवर्धिता ॥ अपराध्येतयत्किंचिन्नकार्यंह
दितत्त्वया १४ द्विजातयोमहाभागावृद्धबालतपस्विषु ॥ भवंत्यक्रोधनाःप्रायोह्यपराद्धेपुनित्यदा १५ सुमहत्यपराधेऽपिक्षांतिःकार्याद्विजातिभिः ॥ यथाश
क्तियथोत्साहंपूजाग्राह्याद्विजोत्तम १६ तथेतिब्राह्मणेनोक्तेसराजाप्रीतमानसः ॥ हंसचंद्रांशुसंकाशंगृहमस्मैन्यवेदयत् १७ तत्राग्निशरणेकॢप्तमासनंतस्यभानु
मत् ॥ आहारादिचसर्वंतत्तथैवप्रत्यवेदयत् १८ निक्षिप्यराजपुत्रीतुतंद्रींमानंतथैवच ॥ आतस्थेपरमंयत्नंब्राह्मणस्याभिराधने १९ तत्रसाब्राह्मणंगत्वापृथा
शौचपरासती ॥ विधिवत्परिचारार्हंदेववत्पर्यतोषयत् २० ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिपृथाद्विजपरिचर्यायांचतुरधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥
वैशंपायनउवाच ॥ सातुकन्यामहाराजब्राह्मणंसंशितव्रतम् ॥ तोषयामासशुद्धेनमनसासंशितव्रता १ प्रातरेष्याम्यथेत्युक्त्वाकदाचिद्द्विजसत्तमः ॥ ततआया
तिराजेंद्रसायंरात्रावथोपुनः २ तंचसर्वासुवेलासुभक्ष्यभोज्यप्रतिश्रयैः ॥ पूजयामाससाकन्यावर्धमानैस्तुसर्वदा ३ अन्नादिसमुदाचारःशय्यासनकृतस्तथा ॥
दिवसेदिवसेतस्यवर्धतेनतुहीयते ४ निर्भर्त्सनाऽपवादैश्चतथैवाप्रिययागिरा ॥ ब्राह्मणस्यपृथाराजन्नचकाराप्रियंतदा ५ व्यस्तेकालेपुनश्चैतिनचैतिबहुशो
द्विजः ॥ सुदुर्लभमपिह्यन्नंदीयतामितिसोऽब्रवीत् ६ कृतमेवचतत्सर्वंयथातस्मैन्यवेदयत् ॥ शिष्यवत्पुत्रवच्चैवस्वसृवच्चसुसंयता ७ यथोपजोषंराजेंद्रद्विजाति
प्रवरस्यसा ॥ प्रीतिमुत्पादयामासकन्यारत्नमनिंदिता ८ तस्यास्तुशीलवृत्तेनतुतोषद्विजसत्तमः ॥ अवधानेनभूयोऽस्याःपरंयत्नमथाकरोत् ९ तांप्रभातेचसायंच
पितापप्रच्छभारत ॥ अपितुष्यतितेपुत्रिब्राह्मणःपरिचर्यया १० निर्भर्त्सनंधिक्कारः अपवादोऽप्रादेर्दूषणं पाठांतरेऽपदेशोव्याजः अप्रिययागालनरूपया ५।६। ७ यथोपजोषं
प्रियमनतिक्रम्य ८ शीलंशमादि वृत्तंपरिचर्या अवधानमैकाग्र्यं एवंस्तुतोष । यद्वाऽस्याःपृथायाः श्रेयोऽर्थमवधानेनसमाधिकाले यत्नमकरोत् यत्नेनतस्याःकल्याणंचिंतितवानित्यर्थः ९।१०

११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ द्वितीयंद्वितीयवारं १९ । २० । २१ विहितोविधानतःविशेषेणहितस्तृप्तोवा २२ । २३ इत्यार०प०नी०भा०भा०पंचाधिकत्रिशततमो

तंसापरममित्येवप्रत्युवाचयशस्विनी ॥ ततःप्रीतिमवापाग्र्यांकुंतिभोजोमहामनाः ११ ततःसंवत्सरेपूर्णेयदाऽसौजपतांवरः ॥ नापश्यद्दुष्कृतंकिंचित्पृथायाः
सौहृदेरतः १२ ततःप्रीतमनाभूत्वासएनांब्राह्मणोऽब्रवीत् ॥ प्रीतोऽस्मिपरमंभद्रेपरिचारेणतेशुभे १३ वरान्वृणीष्वकल्याणिदुरापान्मानुषैरिह ॥ यैस्त्वंसी
मंतिनीःसर्वायशसाऽभिभविष्यसि १४ ॥ कुंत्युवाच ॥ कृतानिममसर्वाणियस्यामेवेदवित्तम ॥ त्वंप्रसन्नःपिताचैवकृतंविप्रवरैर्मम १५ ॥ ब्राह्मणउवाच ॥ यदि
नेच्छसिमत्तस्त्वंवरंभद्रेशुचिस्मिते ॥ इमंमंत्रंगृहाणत्वमाह्वानायदिवौकसाम् १६ यंयंदेवंत्वमेतेनमंत्रेणावाहयिष्यसि ॥ तेनतेनवशेभद्रेस्थातव्यंतेभविष्यति
१७ अकामोवासकामोवासमेष्यतितेवशे ॥ विबुधोमंत्रसंशांतोभवेद्भृत्यइवानतः १८ ॥ वैशंपायनउवाच ॥ नशशाकद्वितीयंसाप्रत्याख्यातुमनिंदिता ॥ तं
वैद्विजातिप्रवरंतदाशापभयान्नृप १९ ततस्तामनवद्यांगींग्राहयामाससद्विजः ॥ मंत्रग्रामंतदाराजन्नथर्वशिरसिश्रुतम् २० तंप्रदायतुराजेंद्रकुंतिभोजमुवाचह ॥
उषितोऽस्मिसुखंराजन्कन्ययापरितोषितः २१ तवगेहेषुविहितःसदासुप्रतिपूजितः ॥ साधयिष्यामहेतावदित्युक्त्वांतरधीयत २२ सतुराजाद्विजंदृष्ट्वातत्रैवां
तर्हितंतदा ॥ बभूवविस्मयाविष्टःपृथांचसमपूजयत् २३ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाह० पृथायामंत्रप्राप्तौपंचाधिकत्रिशततमोऽध्याय ॥३०५॥
वैशंपायनउवाच ॥ गतेतस्मिन्द्विजश्रेष्ठेकस्मिंश्चित्कारणांतरे ॥ चिंतयामाससाकन्यामंत्रग्रामबलाबलम् १ अयंवैकीदृशस्तेनममदत्तोमहात्मना ॥ मंत्रग्रामो
बलंतस्यज्ञास्येनातिचिरादिति २ एवंसंचिंतयंतीसाददर्शर्तुंयदृच्छया ॥ व्रीडितासाऽभवद्बालाकन्याभावेरजस्वला ३ ततोहर्म्यतलस्थासामहार्हशयनोचि
ता ॥ प्राच्यांदिशिसमुद्यंतंददर्शादित्यमंडलम् ४ तत्रबद्धमनोदृष्टिरभवत्सासुमध्यमा ॥ नचातप्यतरूपेणभानोःसंध्यागतस्यसा ५ तस्यादृष्टिरभूद्दिव्यासा
ऽपश्यद्दिव्यदर्शनम् ॥ आमुक्तकवचंदेवंकुंडलाभ्यांविभूषितम् ६ तस्याःकौतूहलंत्वासीन्मंत्रंप्रतिनराधिप ॥ आह्वानमकरोत्साऽथतस्यदेवस्यभाविनी ७ प्राणानु
पस्पृश्यतदाह्याजुहावदिवाकरम् ॥ आजगामततोराजंस्त्वरमाणोदिवाकरः ८ मधुपिंगोमहाबाहुःकंबुग्रीवोहसन्निव ॥ अंगदीबद्धमुकुटोदिशःप्रज्वालयन्निव ९
योगात्कृत्वाद्विधाऽऽत्मानमाजगामततापच ॥ आबभाषेततःकुंतींसाम्नापरमवल्गुना १० आगतोऽस्मिवशंभद्रेतवमंत्रबलात्कृतः ॥ किंकरोमिवशोराज्ञिब्रू
हिकर्तातदस्मिते ११ ॥ कुंत्युवाच ॥ गम्यतांभगवंस्तत्रयतएवागतोह्यसि ॥ कौतूहलात्समाहूतःप्रसीदभगवन्निति १२ ॥ सूर्यउवाच ॥ गमिष्येऽहंयथामात्वं
ब्रवीषितनुमध्यमे ॥ नतुदेवंसमाहूयन्याय्यंप्रेषयितुंवृथा १३ ध्यायः ॥ ३०५ ॥ ॥ गतेइति १ । २ ऋतुंरजः ३ । ४ । ५ । ६ । ७
प्राणानिंद्रियाणि चक्षुःश्रोत्रादीन्युपस्पृश्य जलेनसम्यगाचम्येत्यर्थः ८ । ९ । १० वशंकामं ११ । १२ यथाऽहंगमिष्येतथामामांब्रवीषि नतुतद्योग्यमित्याह नत्विति वृथाप्रसादमप्राप्य १३

१४ । १५ । १६ ब्राह्मणंदुर्वाससं १७ । १८ विनयंदंडं धास्यामिधारयिष्यामि १९ । २० । २१ अपचारोऽपराधःकृतः २२ । २३ । २४ । २५ । २६ । २७ । २८॥इत्यारण्यकेपर्वणिनील
कंठीयेभारतभावदीपेषडधिकत्रिशततमोऽध्यायः ॥ ३०६ ॥ सातुकन्येति १ । दध्यौचिंतितवती अंतरंकालं २ । ३ बालेनाल्पवयसाऽपिसतासाधुना मोहाच्चित्तपारवश्यात् पापंकृतंहिंसि

तवाभिसंधिःसुभगेसूर्यात्पुत्रोभवेदिति ॥ वीर्येणाप्रतिमोलोकेकवचीकुंडलीतिच १४ सात्वमात्मप्रदानंवैकुरुष्वगजगामिनि ॥ उत्पत्स्यतिहिपुत्रस्तेयथासं
कल्पमंगने १५ अथगच्छाम्यहंभद्रेत्वयासंगम्यसुस्मिते ॥ यदित्वंवचनंनाद्यकरिष्यसिममप्रियम् १६ शपिष्येत्वामहंक्रुद्धोब्राह्मणंपितरंचते ॥ त्वत्कृतेतां
न्प्रधक्ष्यामिसर्वानपिनसंशयः १७ पितरंचैवतेमूढंयोनवेत्तितवानयम् ॥ तस्यचब्राह्मणस्याद्ययोऽसौमंत्रमदात्तव १८ शीलवृत्तमविज्ञायधास्यामिविनयंपरम् ॥
एतेहिविबुधाःसर्वेपुरंदरमुखादिवि १९ त्वयाप्रलब्धंपश्यंतिस्मयंतइवभाविनि ॥ पश्यचैनान्सुरगणान्दिव्यंचक्षुरिदंहिते ॥ पूर्वमेवमयादत्तंदृष्टवत्यसियेनमां
२० ॥ वैशंपायनउवाच ॥ ततोऽपश्यत्त्रिदशान्राजपुत्रीसर्वानेवस्वेषुधिष्ण्येषुखस्थान् ॥ प्रभावंतंभानुमंतंमहांतंयथाऽऽदित्यंरोचमानांस्तथैव २१ साता
न्दृष्ट्वाव्रीडमानेवबालासूर्यंदेवीवचनंप्राहभीता ॥ गच्छत्वंवैगोपतेस्वंविमानंकन्याभावाद्दुःखएवापचारः २२ पितामातागुरवश्चैवयेऽन्येदेहस्यास्यप्रभवंतिप्र
दाने ॥ नाहंधर्मंलोपयिष्यामिलोकेस्त्रीणांवृत्तंपूज्यतेदेहरक्षा २३ मयामंत्रबलंज्ञातुमाहूतस्त्वंविभावसो ॥ बाल्याद्बालेतितत्कृत्वाक्षंतुमर्हसिमेविभो २४ सूर्य
उवाच ॥ बालेतिकृत्वाऽनुनयंतवाहंददानिनान्याऽनुनयंलभेत ॥ आत्मप्रदानंकुरुकुंतिकन्येशांतिस्तवैवंहिभवेच्चभीरु २५ नचापिगंतुंयुक्तंहिमयामिथ्याकृ
तेनवै ॥ असमेत्यत्वयाभीरुमंत्राहूतेनभाविनि २६ गमिष्याम्यनवद्यांगिलोकेसमवहास्यतां ॥ सर्वेषांविबुधानांचवक्तव्यःस्यांतथाशुभे २७ सात्वंमयसमागच्छ
पुत्रंलप्स्यासिमादृशम् ॥ विशिष्टासर्वलोकेषुभविष्यसिनसंशयः २८ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाहरणपर्वणिसूर्याह्वानेषडधिकत्रिशततमोऽ
ध्यायः ३०६ ॥ ॥ वैशंपायनउवाच ॥ सातुकन्याबहुविधंब्रुवंतीमधुरंवचः ॥ अनुनेतुंसहस्रांशुंनशशाकमनस्विनी १ नशशाकयदाबालाप्रत्याख्यातुंतमो
नुदम् ॥ भीताशापात्ततोराजन्दध्यौदीर्घमथांतरम् २ अनागसःपितुःशापोब्राह्मणस्यतथैवच ॥ मन्निमित्तःकथंनस्यात्क्रुद्धादस्माद्विभावसोः ३ बालेनापिसता
मोहाद्भृशंपापकृतान्यपि ॥ नाभ्यासादयितव्यानितेजांसिचतपांसिच ४ साऽहमद्यभृशंभीतागृहीत्वाचकरेभृशम् ॥ कथंत्वकार्यंकुर्यांवैप्रदानंह्यात्मनःस्वयम्
५ ॥ वैशंपायनउवाच ॥ साविशापपरित्रस्ताबहुचिंतयतीहृदा ॥ मोहेनाभिपरीतांगीस्मयमानापुनःपुनः ६ तंदेवमब्रवीद्व्रीताबंधूनांराजसत्तम ॥ व्रीडावि
ह्वलयावाचाशापत्रस्ताविशांपते ७ ॥ कुंत्युवाच ॥ पितामेध्रियतेदेवमाताचान्येचबांधवाः ॥ नतेषुध्रियमाणेषुविधिलोपोभवेदयम् ८

तथैवतानिनिष्पापान्यपितेजांसिसूर्यादीनि तपांसिदुर्वासआदीनि नाभ्यसादयितव्यान्यत्यंतंमत्यासत्तिविषयाणिनकर्तव्यानि ४ । ५ । ६ बंधूनांसखीनां ताभ्यइत्यर्थः ७ ध्रियतेजीवति ८

नशेन्नश्येत् ९ । १० । ११ प्रभवंति स्वाम्यमर्हंति १२ कामयतेसर्वानितिकन्येतिकन्याशब्दनिर्वचनम् १३ तत्रहेतुः लोककाम्ययालोकप्रियताकामवत्तया १४ अन्योविवाहनियमादिर्विकारः
१५ । १६ । १७ अमृतमयंसहजंवर्म १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ प्रस्थितंसंगमायोपक्रांतम् २६ । २७ आत्मसंस्थांवचनवशांएनां नदूषयामास कन्यात्वस्यापनेनेतिशेषः
त्वयातुसंगमोदेवयदिस्याद्विधिवर्जितः ॥ मन्निमित्तंकुलस्यास्यलोकेकीर्तिर्नशेत्ततः ९ अथवाधर्ममेतंत्वंमन्यसेतपतांवर ॥ ऋतेप्रदानाद्बंधुभ्यस्तवकामंकरो
म्यहम् १० आत्मप्रदानंदुर्धर्षतवकृत्वासतीत्वहम् ॥ त्वयिधर्मोयशश्चैवकीर्तिरायुश्चदेहिनाम् ११ ॥ सूर्यउवाच ॥ नतेपितानतेमातागुरवोवाशुचिस्मिते ॥
प्रभवंतिवरारोहेभद्रंतेशृणुमेवचः १२ सर्वान्कामयतेयस्मात्कमेर्धातोश्चभाविनि ॥ तस्मात्कन्येहसुश्रोणीस्वतंत्रावरवर्णिनि १३ नाधर्मश्चरितःकश्चित्त्वयाभ
वतिभाविनि ॥ अधर्मंकुतएवाहंचरेयंलोककाम्यया १४ अनावृताःस्त्रियःसर्वानराश्चवरवर्णिनि ॥ स्वभावएषलोकानांविकारोऽन्यइतिस्मृतः १५ सामयासह
संगम्यपुनःकन्याभविष्यसि ॥ पुत्रश्चतेमहाबाहुर्भविष्यतिमहायशाः १६ ॥ कुंत्युवाच ॥ यदिपुत्रोममभवेत्त्वत्तःसर्वतमोनुद ॥ कुंडलीकवचीशूरोमहाबाहु
र्महाबलः १७ ॥ सूर्यउवाच ॥ भविष्यतिमहाबाहुःकुंडलीदिव्यवर्मभृत् ॥ उभयंचामृतमयंतस्यभद्रेभविष्यति १८ ॥ कुंत्युवाच ॥ यद्येतदमृतादस्तिकुंडले
वर्मचोत्तमम् ॥ ममपुत्रस्ययंवैत्वंमत्तउत्पादयिष्यसि १९ अस्तुमेसंगमोदेवयथोक्तंभगवंस्त्वया ॥ त्वद्वीर्यरूपसत्त्वौजाधर्मयुक्तोभवेत्सच २० ॥ सूर्यउवाच ॥
अदित्याकुंडलेराज्ञिदत्तेमेमत्तकाशिनि ॥ तेऽस्यदास्यामिवैभीरुवर्मचैवेदमुत्तमम् २१ ॥ कुंत्युवाच ॥ परमंभगवन्नेवंसंगमिष्येत्वयासह ॥ यदिपुत्रोभवेदेवंयथा
वदसिगोपते २२ ॥ वैशंपायनउवाच ॥ तथेत्युक्त्वातुतांकुंतीमाविवेशविहंगमः ॥ स्वर्भानुशत्रुर्योगात्मानाभ्यांपस्पर्शचैवताम् २३ ततःसाविह्वलेवासीत्क
न्यासूर्यस्यतेजसा ॥ पपातचाथसादेवीशयनेमूढचेतना २४ ॥ सूर्यउवाच ॥ साधयिष्यामिसुश्रोणिपुत्रंवैजनयिष्यसि ॥ सर्वशस्त्रभृतांश्रेष्ठंकन्याचैवभवि
ष्यसि २५ ॥ वैशंपायनउवाच ॥ ततःसाव्रीडिताबालातदासूर्यमथाब्रवीत् ॥ एवमस्त्वितिराजेंद्रप्रस्थितंभूरिवर्चसम् २६ इतिस्मोक्ताकुंतिराजात्मजासाविव
स्वंतंयाचमानामलज्जा ॥ तस्मिन्पुण्येशयनीयेपपातमोहाविष्टाभज्यमानालतेव २७ तिग्मांशुस्तांतेजसामोहयित्वायोगेनाविश्यात्मसंस्थांचकार ॥ नचैवैनां
दूषयामासभानुःसंज्ञांलेभेभूयएवाथबाला २८ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाहरणपर्वणिसूर्यकुंतीसमागमेसप्ताधिकत्रिशततमोऽध्यायः ॥ ३०७ ॥
॥ वैशंपायनउवाच ॥ ततोगर्भःसमभवत्पृथायाःपृथिवीपते ॥ शुक्लेदशोत्तरेपक्षेतारापतिरिवांबरे १ साबांधवभयाद्बालागर्भंतंविनिगूहती ॥ धारयामाससु
श्रोणीनचैनांबुबुधेजनः २ नहितांवेदनार्यन्याकाचिद्धात्रेयिकामृते ॥ कन्यापुरगतांबालांनिपुणांपरिरक्षणे ३ ततःकालेनसागर्भंसुषुवेवरवर्णिनी ॥ कन्यैवतस्य
देवस्यप्रसादादमरप्रभम् ४ तथैवाबद्धकवचंकनकोज्ज्वलकुंडलम् ॥ हर्यक्षंवृषभस्कंधंयथाऽस्यपितरंतथा ५ २८ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदी
पेसप्ताधिकत्रिशततमोऽध्यायः ॥ ३०७ ॥ ॥ ततइति ॥ दशोत्तरेएकादशे शुक्लेपक्षेप्रतिपदि चंद्रइवबालउद्भूतः माघशुक्लप्रतिपदिकर्णनिषेकजन्मेत्यर्थः १ । २ । ३ । ४ हर्यक्षंसिंहनेत्रम् ५

६ मधूच्छिष्टंसिक्थकं मयनमितिभाषायां तेनास्थितायां सर्वतोलिप्तायां मंजूषायांजलप्रवेशोनभवेदित्यर्थः ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २०

जातमात्रंचतंगर्भंधात्र्यासंमं त्र्यभाविनी ॥ मंजूषायांसमाधायस्वास्तीर्णायांसमंततः ६ मधूच्छिष्टस्थितायांसासुखायांरुदतीतथा ॥ श्लक्ष्णायांसुपिधानाया
मश्वनद्यामवासृजत् ७ जानतीचाप्यकर्तव्यंकन्यायागर्भधारणम् ॥ पुत्रस्नेहेनसाराजन्करुणंपर्यदेवयत् ८ समुत्सृजंतीमंजूषामश्वनद्यांतदाजले ॥ उवाचरु
दतीकुंतीयानिवाक्यानितच्छृणु ९ स्वस्तितेचांतरिक्षेभ्यःपार्थिवेभ्यश्चपुत्रक ॥ दिव्येभ्यश्चैवभूतेभ्यस्तथातोयचराश्चये १० शिवास्तेसंतुपंथानोमाचते
परिपंथिनः ॥ आगताश्चतथापुत्रभवंत्व द्रोहचेतसः ११ पातुत्वांवरुणोराजासलिलेसलिलेश्वरः ॥ अंतरिक्षेंऽतरिक्षस्थःपवनःसर्वगस्तथा १२ पितात्वांपातु
सर्वत्रतपनस्तपतांवरः ॥ येनदत्तोऽसिमेपुत्रदिव्येनविधिनाकिल १३ आदित्यावसवोरुद्राःसाध्याविश्वेचदेवताः ॥ मरुतश्चसहेंद्रेणदिशश्चसदिगीश्वराः १४
रक्षंतुत्वांसुराःसर्वेसमेषुविषमेषुच ॥ वेत्स्यामित्वांविदेशेऽपिकवचेनाभिसूचितम् १५ धन्यस्तेपुत्रजनकोदेवोभानुर्विभावसुः ॥ यस्त्वांद्रक्ष्यतिदिव्येनचक्षुषावा
हिनीगतम् १६ धन्यासाप्रमदायात्वांपुत्रत्वेकल्पयिष्यति ॥ यस्यास्त्वंतृषितःपुत्रस्तनंपास्यसिदेवज १७ कोनुस्वप्नस्तयादृष्टोयात्वामादित्यवर्चसम् ॥ दिव्य
वर्मसमायुक्तंदिव्यकुंडलभूषितम् १८ पद्मायतविशालाक्षंपद्मताम्रदलोज्ज्वलम् ॥ सुललाटंसुकेशांतंपुत्रत्वेकल्पयिष्यति १९ धन्याद्रक्ष्यंतिपुत्रत्वांभूमौसंस
र्पमाणकम् ॥ अव्यक्तकलवाक्यानिवदंतंरेणुगुंठितम् २० धन्याद्रक्ष्यंतिपुत्रत्वांपुनर्यौवनगोचरम् ॥ हिमवद्वनसंभूतंसिंहंकेसरिणंयथा २१ एवंबहु
विधंराजन्विलप्यकरुणंपृथा ॥ अवासृजतमंजूषामश्वनद्यांतदाजले २२ रुदतीपुत्रशोकार्तानिशीथेकमलेक्षणा ॥ धात्र्यासहपृथाराजन्पुत्रदर्शनलालसा २३
विसर्जयित्वामंजूषांसंबोधनभयात्पितुः ॥ विवेशराजभवनंपुनःशोकातुरातत २४ मंजूषात्वश्वनद्याःसाययौचर्मण्वतींनदीम् ॥ चर्मण्वत्याश्चयमुनांततोगंगां
जगामह २५ गंगायाःसूतविषयंचंपामनुययौपुरीम् ॥ समंजूषागतोगर्भस्तरंगैरुह्यमानकः २६ अमृतादुत्थितंदिव्यंतनुवर्मसकुंडलम् ॥ धारयामासतंगर्भंदै
वंचविधिनिर्मितम् २७ ॥ इतिश्रीमहाभारतेआरण्यकेप॰कुंडलाहरणप॰कर्णपरित्यागेअष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥ वैशंपायनउवाच ॥ एतस्मिन्ने
वकालेतुधृतराष्ट्रस्यवैसखा ॥ सूतोऽधिरथइत्येवसदारोजाह्नवींययौ १ तस्यभार्याऽभवद्राजन्रूपेणासदृशीभुवि ॥ राधानाममहाभागानसापुत्रमविंदत २ अपत्यार्थे
परंयत्नमकरोच्चविशेषतः ॥ साददर्शाथमंजूषामुह्यमानांयदृच्छया ३ दत्तरक्षाप्रतिसरामन्वालंभनशोभनाम् ॥ ऊर्मीतरंगैर्जाह्नव्याःसमानीतामुपह्वरम् ४ सातुकौ
तूहलात्प्राप्तांग्राहयामासभाविनी ॥ ततोनिवेदयामाससूतस्याधिरथस्यवै ५ सतामुद्धृत्यमंजूषामुत्सार्यजलमंतिकात् ॥ यंत्रैरुद्घाटयामाससोऽपश्यत्तत्रबालकम् ६

२१ । २२ । २३ । २४ । २५ । २६ दैवंदेवजंविधिनाईश्वरेणनिर्मितम् २७ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपे अष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥ ॥ ७ ॥
॥ एतस्मिन्निति १ । २ । ३ दत्तोरक्षार्थंप्रतिसरोदूर्वांकंकणादिरूपोयस्यांतां अन्वालंभनंकुंकुमहस्तदानं उपह्वरंसमीपम् ४ । ५ उत्सार्यपरतोनीत्वा ६

७ । ८ यतोजातोऽस्मि उत्पत्तिदिनादारभ्यार्थेवेदमद्भुतंदृष्टम् ९ । १० । ११ । १२ वसुवर्म स्वर्णकवचम् १३ । १४ अंगेषुजनपदविशेषेषु १५ । १६ उपसदनंगुरूपसदनम् १७ परमेष्वास

तरुणादित्यसंकाशंहेमवर्मधरंतथा ॥ मृष्टकुंडलयुक्तेनवदनेनविराजता ७ ससूतोभार्ययासार्धंविस्मयोत्फुल्ललोचनः ॥ अंकमारोप्यतंबालंभार्यांवचनमब्रवीत्
८ इदमत्यद्भुतंभीरुयतोजातोऽस्मिभाविनी ॥ दृष्टवान्देवगर्भोऽयंमन्येऽस्मानुपागतः ९ अनपत्यस्यपुत्रोऽयंदेवैर्दत्तोध्रुवंमम ॥ इत्युक्त्वातंददौपुत्रंराधा
यैसमहीपते १० प्रतिजग्राहतंराधाविधिवद्दिव्यरूपिणम् ॥ पुत्रंकमलगर्भाभंदेवगर्भंश्रियावृतम् ११ पुपोषचैनंविधिवद्ववृधेसचवीर्यवान् ॥ ततःप्रभृति
चाप्यन्येप्राभवन्नौरसाःसुताः १२ वसुवर्मधरंदृष्ट्वातंबालंहेमकुंडलम् ॥ नामास्यवसुषेणेतितत्श्चक्रुर्द्विजातयः १३ एवंससूतपुत्रत्वंजगामामितविक्रमः ॥ वसु
षेणइतिख्यातोवृषइत्येवचप्रभुः १४ सूतस्यववृधेंऽगेषुश्रेष्ठःपुत्रःसवीर्यवान् ॥ चारेणविदितश्चासीत्पृथयादिव्यवर्मभृत् १५ सूतस्त्वधिरथःपुत्रंविवृद्धंसमयेन
तम् ॥ दृष्ट्वाप्रस्थापयामासपुरंवारणसाह्वयम् १६ तत्रोपसदनंचक्रेद्रोणस्येष्वस्त्रकर्मणि ॥ सख्यंदुर्योधनेनैवमगमत्सचवीर्यवान् १७ द्रोणात्कृपाच्चरामाच्चसो
स्त्रग्रामंचतुर्विधम् ॥ लब्ध्वालोकेऽभवत्ख्यातःपरमेष्वासतांगतः १८ संधायधार्तराष्ट्रेणपार्थानांविप्रियेरतः ॥ योद्धुमाशंसतेनित्यंफाल्गुनेनमहात्मना १९
सदाहितस्यस्पर्धाऽऽसीदर्जुनेनविशांपते ॥ अर्जुनस्यचकर्णेनयतोदृष्टोबभूवसः २० एतद्गुह्यंमहाराजसूर्यस्यासीन्नसंशयः ॥ यःसूर्यसंभवःकर्णःकुंत्यांसूतकु
लेतथा २१ तंतुकुंडलिनंदृष्ट्वावर्मणाचसमन्वितम् ॥ अवध्यंसमरेमत्वापर्यतप्यद्युधिष्ठिरः २२ यदाचकर्णोराजेंद्रभानुमंतंदिवाकरम् ॥ स्तौतिमध्यंदिनेप्रा
प्तेप्रांजलिःसलिलोत्थितः २३ तत्रैनमुपतिष्ठंतिब्राह्मणाधनहेतुना ॥ नादेयंतस्यतत्कालेकिंचिदस्तिद्विजातिषु २४ तमिंद्रोब्राह्मणोभूत्वाभिक्षांदेहीत्युपस्थि
तः ॥ स्वागतंचेतिराधेयस्तमथप्रत्यभाषत २५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाहरणपर्वणिराधाकर्णप्राप्तौनवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥
॥ वैशंपायनउवाच ॥ देवराजमनुप्राप्तंब्राह्मणच्छद्मनावृतम् ॥ दृष्ट्वास्वागतमित्याहनबुबोधास्यमानसम् १ हिरण्यकंठीःप्रमदाग्रामान्वाबहुगोकु
लान् ॥ किंददानीतितंविप्रमुवाचाधिरथिस्ततः २ ॥ ब्राह्मणउवाच ॥ हिरण्यकंठचःप्रमदायच्चान्यत्प्रीतिवर्धनम् ॥ नाहंदत्तमिहेच्छामितदर्थिभ्यः
प्रदीयताम् ३ यदेतत्सहजंवर्मकुंडलेचतवानघ ॥ एतदुत्कृत्यमेदेहियदिसत्यव्रतोभवान् ४ एतदिच्छाम्यहंक्षिप्रंत्वयादत्तंपरंतप ॥ एषमेसर्वला
भानांलाभःपरमकोमतः ५ ॥ कर्णउवाच ॥ अवनिंप्रमदागाश्चनिवापंबहुवार्षिकम् ॥ तत्तेविप्रप्रदास्यामिनतुवर्मसकुंडलम् ६ ॥ वैशंपायन
उवाच ॥ एवंबहुविधैर्वाक्यैर्याच्यमानःसतुद्विजः ॥ कर्णेनभरतश्रेष्ठनान्यंवरमयाचत ७

तां महाधनुर्धरताम् १८ । १९ यतःकालेदृष्टः २० । २१ । २२ । २३ । २४ । २५ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभावदीपेनवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥
॥ देवराजमिति १ । २ । ३ । ४ । ५ अवनिंगृहार्थं निवापं न्युप्यतेबीजमस्मिन्निति क्षेत्रं बहुवार्षिकंयावज्जीविकवृत्तिरूपम् ६ । ७

८ । ९ । १० । ११ गमनीयोवध्यः ११ । १३ । १४ । १५ । १६ । १७ आयानेव आगच्छन्नेव १८ । १९ । २० । २१ । २२ । २३ । २४ । २५

सांत्वितश्चयथाशक्तिपूजितश्चयथाविधि ॥ नचान्यंसद्विजश्रेष्ठःकामयामासवैवरम् ८ यदानान्यंप्रवृणुतेवरंवैद्विजसत्तमः ॥ तदैनमब्रवीद्भूयोराधेयःप्रहसन्नि
व ९ सहजंवर्ममेविप्रकुंडलेचामृतोद्भवे ॥ तेनावध्योऽस्मिलोकेषुततोनैतज्जहाम्यहम् १० विशालंपृथिवीराज्यंक्षेमंनिहतकंटकम् ॥ प्रतिगृह्णीष्वमत्तस्त्वंसाधु
ब्राह्मणपुंगव ११ कुंडलाभ्यांविमुक्तोऽहंवर्मणासहजेनच ॥ गमनीयोभविष्यामिशत्रूणांद्विजसत्तम १२ ॥ वैशंपायनउवाच ॥ यदन्यंनवरंवव्रेभगवान्पाकशास
नः ॥ ततःप्रहस्यकर्णस्तंपुनरित्यब्रवीद्वचः १३ विदितोदेवदेवेशप्रागेवासिममप्रभो ॥ नतुन्याय्यंमयादातुंतवशक्रवृथावरम् १४ त्वंहिदेवेश्वरःसाक्षात्त्वया
देयोवरोमम ॥ अन्येषांचैवभूतानामीश्वरोह्यसिभूतकृत् १५ यदिदास्यामितेदेवकुंडलेकवचंतथा ॥ वध्यतामुपयास्यामित्वंचशक्रावहास्यताम् १६ तस्मा
द्विनिमयंकृत्वाकुंडलेवर्मचोत्तमम् ॥ हरस्वशक्रकामंमेनदद्यामहमन्यथा १७ ॥ शक्रउवाच ॥ विदितोऽहंरवेःपूर्वमायानेवतवांतिकम् ॥ तेनतेसर्वमाख्यातमेव
मेतन्नसंशयः १८ काममस्तुतथाताततवकर्णयथेच्छसि ॥ वर्जयित्वातुमेवज्रंप्रवृणीष्वयथेच्छसि १९ ॥ वैशंपायनउवाच ॥ ततःकर्णःप्रहृष्टस्तुउपसंगम्यवास
वम् ॥ अमोघांशक्तिमभ्येत्यवव्रेसंपूर्णमानसः २० कर्णउवाच ॥ वर्मणाकुंडलाभ्यांचशक्तिंमेदेहिवासव ॥ अमोघांशत्रुसंघानांघातिनींपृतनामुखे २१ ततः
संचिंत्यमनसामुहूर्तमिववासवः ॥ शक्त्यर्थंपृथिवीपालकर्णंवाक्यमथाब्रवीत् २२ कुंडलेमेप्रयच्छस्ववर्मचैवशरीरजम् ॥ गृहाणकर्णशक्तिंत्वमनेनसमयेनच २३
अमोघाहंतिशतशःशत्रून्ममकरच्युता ॥ पुनश्चपाणिमभ्येतिममदैत्यान्विनिघ्नतः २४ सेयंतवकरप्राप्ताहत्वैकंरिपुमूर्जितम् ॥ गर्जंतंप्रतपंतंचमामेवैष्यतिसूत
ज २५ कर्णउवाच ॥ एकमेवाहमिच्छामिरिपुंहंतुंमहाहवे ॥ गर्जंतंप्रतपंतंचयतोममभयंभवेत् २६ ॥ इंद्रउवाच ॥ एकंहनिष्यसिरिपुंगर्जंतंबलिनंरणे ॥
त्वंतुयंप्रार्थयस्येकंरक्ष्यतेसमहात्मना २७ यमाहुर्वेदविद्वांसोवराहमपराजितम् ॥ नारायणमचिंत्यंचतेनकृष्णेनरक्ष्यते २८ ॥ कर्णउवाच ॥ एवमप्यस्तुभग
वन्नेकवीरवधेमम ॥ अमोघांदेहिमेशक्तिंयथाहन्यांप्रतापिनम् २९ उत्कृत्यतुप्रदास्यामिकुंडलेकवचंचते ॥ निकृत्तेषुतुगात्रेषुनमेबीभत्सताभवेत् ३० ॥ इंद्र
उवाच ॥ नतेबीभत्सताकर्णभविष्यतिकथंचन ॥ व्रणश्चैवनगात्रेषुयस्त्वंनानृतमिच्छसि ३१ यादृशस्तेपितुर्वर्णस्तेजश्चवदतांवर ॥ तादृशेनैववर्णेनत्वंकर्णभ
वितापुनः ३२ विद्यमानेषुशस्त्रेषुयद्यमोघामसंशये ॥ प्रमत्तोमोक्ष्यसेचापित्वय्येवैषापतिष्यति ३३ ॥ कर्णउवाच ॥ संशयंपरमंप्राप्यविमोक्ष्येवासवीमिमाम् ॥ ॥२४८॥
यथामामात्थशक्रत्वंसत्यमेतद्ब्रवीमिते ३४ ॥ वैशंपायनउवाच ॥ ततःशक्तिंप्रज्वलितांप्रतिगृह्यविशांपते ॥ शस्त्रंगृहीत्वानिशितंसर्वगात्राण्यकृंतत ३५

२६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६

३६ । ३७ कृणातिहिनस्ति कृतंतिछिनत्तिवा अंगानीतिकर्णइत्यर्थः ३८ । ३९ । ४० । ४१ । ४२ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे दशाधिकत्रिशततमोऽध्यायः ॥ ३१० ॥

ततोदेवामानवादानवाश्चनिकृंतंतंकर्णमात्मानमेवम् ॥ दृष्ट्वासर्वेसिंहनादान्प्रणेदुर्नह्यस्यासीन्मुखजोवैविकारः ३६ ततोदिव्यादुंदुभयःप्रणेदुःपपातोच्चैःपुष्पव
र्षंचदिव्यम् ॥ दृष्ट्वाकर्णंशस्त्रसंकृत्तगात्रंमुहुश्चापिस्मयमानंनृवीरम् ३७ ततश्छित्वाकवचंदिव्यमंगात्तथैवार्द्रंप्रददौवासवाय ॥ तथोत्कृत्यप्रददौकुंडलेतेकर्णा
त्तस्मात्कर्मणातेनकर्णः ३८ ततःशक्रःप्रहसन्वंचयित्वाकर्णंलोकेयशसायोजयित्वा ॥ कृतंकार्यंपांडवानांहिमेनेततःपश्चाद्दिवमेवोत्पपात ३९ श्रुत्वाकर्णंमुषितं
धार्तराष्ट्रादीनाःसर्वेभग्नदर्पाइवासन् ॥ तांचावस्थांगमितंसूतपुत्रंश्रुत्वापार्थाजहृषुःकाननस्थाः ४० ॥ जनमेजयउवाच ॥ क्वस्थावीराःपांडवास्तेबभूवुःकुत
श्चैतेश्रुतवंतःप्रियंतत् ॥ किंवाऽकार्षुर्द्वादशेऽब्देव्यतीतेतन्मेसर्वंभगवान्व्याकरोतु ४१ ॥ वैशंपायनउवाच ॥ लब्ध्वाकृष्णांसैंधवंद्रावयित्वाविप्रैःसार्धंकाम्य
कादाश्रमात्ते ॥ मार्कंडेयाच्छ्रुतवंतःपुराणंदेवर्षीणांचरितंविस्तरेण ४२ ॥ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिकुंडलाहरणपर्वणिकवचकुंडलदानेदशाधिकत्रि
शततमोऽध्यायः ॥ ३१० ॥ ॥ ७ ॥ समाप्तंचेदंकुंडलाहरणपर्व ॥ अथारणेयपर्व ॥ ॥ जनमेजयउवाच ॥ एवंहृतायांभार्यायांप्राप्यक्लेशमनुत्तमम् ॥ प्र
तिपद्यततःकृष्णांकिमकुर्वतपांडवाः १ ॥ वैशंपायनउवाच ॥ एवंहृतायांकृष्णायांप्राप्यक्लेशमनुत्तमम् ॥ विहायकाम्यकंराजासहभ्रातृभिरच्युतः २ पुन
र्द्वैतवनंरम्यमाजगामयुधिष्ठिरः ॥ स्वादुमूलफलंरम्यंविचित्रबहुपादपम् ३ अनुभुक्तफलाहाराःसर्वएवमिताशनाः ॥ न्यवसन्पांडवास्तत्रकृष्णयासहभार्यया
४ वसन्द्वैतवनेराजाकुंतीपुत्रोयुधिष्ठिरः ॥ भीमसेनोऽर्जुनश्चैवमाद्रीपुत्रौचपांडवौ ५ ब्राह्मणार्थेपराक्रांताधर्मात्मानोयतव्रताः ॥ क्लेशमार्च्छंतविपुलंसुखोदर्कं
परंतपाः ६ तस्मिन्प्रतिवसंतस्तेयत्प्रापुःकुरुसत्तमाः ॥ वनेक्लेशंसुखोदर्कंतत्प्रवक्ष्यामितेशृणु ७ अरणीसहितंमंथंब्राह्मणस्यतपस्विनः ॥ मृगस्यघर्षमाणस्य
विषाणेसमसज्जत ८ तदादायगतोराजंस्त्वरमाणोमहामृगः ॥ आश्रमांतरितःशीघ्रंप्लवमानोमहाजवः ९ ह्रियमाणंतुतंदृष्ट्वासविप्रःकुरुसत्तम ॥ त्वरितोऽभ्याग
मत्तत्रअग्निहोत्रपरीप्सया १० अजातशत्रुमासीनंभ्रातृभिःसहितंवने ॥ आगम्यब्राह्मणस्तूर्णंसंतप्तश्चेदमब्रवीत् ११ अरणीसहितंमंथंसमासक्तंवनस्पतौ ॥ मृ
गस्यघर्षमाणस्यविषाणेसमसज्जत १२ तमादायगतोराजंस्त्वरमाणोमहामृगः ॥ आश्रमात्त्वरितःशीघ्रंप्लवमानोमहाजवः १३ तस्यगत्वापदंराजन्नासाद्यचमहा
मृगम् ॥ अग्निहोत्रंनलुप्येततदानयतपांडवाः १४ ब्राह्मणस्यवचःश्रुत्वासंतप्तोऽथयुधिष्ठिरः ॥ धनुरादायकौंतेयःप्राद्रवद्भ्रातृभिःसह १५ सन्नद्धाधन्विनःस
र्वेप्राद्रवन्नरपुंगवाः ॥ ब्राह्मणार्थेयतंतस्तेशीघ्रमन्वगमन्मृगम् १६ कर्णिनालीकनाराचानुत्सृजंतोमहारथाः ॥ नाविध्यन्पांडवास्तत्रपश्यंतोमृगमंतिकात् १७

एवमिति १ । २ । ३ अनुभुक्ताःव्रतिनः फलाहाराः फलान्येवाहर्तुंशीलाः ४ । ५ । ६ । ७ अरणीउत्तराधरेऽग्निमथनकाष्ठे ताभ्यांसहितं मंथंनिर्मथनदंडं ८ आश्रमांतरितःआश्रमदूरगतः
९ । १० । ११ । १२ । १३ पदंमार्गचिह्नं गत्वाप्राप्य तेनैवपथातदानयत १४ । १५ । १६ । १७

१८ । १९ । २० धर्मोनममज्ज धर्मलोपोऽर्थलोपश्चनाभूत् आलस्यादिस्तूपचर्यते त्वयि अनुत्तराःप्रतिवाक्यरहिताः सर्वभूतेषुकार्यार्थउपस्थिते ओमित्येववदामोनतुवाक्यांतरमित्यर्थः संशयं
ब्राह्मणस्यकर्मलोपनिमित्तंदोषं २१ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे एकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥ ॥ ७ ॥ ॥ नापदामिति । निमित्तंफलंधर्मःप्रारब्धरूप

 तेषांप्रयतमानानांनादृश्यतमहामृगः ॥ अपश्यंतोमृगंश्रांतादुःखंप्राप्तामनस्विनः १८ शीतलच्छायमागम्यन्यग्रोधंगहनेवने ॥ क्षुत्पिपासापरीतांगाःपांड
वाःसमुपाविशन् १९ तेषांसमुपविष्टानांनकुलोदुःखितस्तदा ॥ अब्रवीद्भ्रातरंश्रेष्ठममर्षात्कुरुनंदनम् २० नास्मिन्कुलेजातुममज्जधर्मोनचालस्यादर्थलोपो
बभूव ॥ अनुत्तराःसर्वभूतेषुभूयःसंप्राप्ताःस्मःसंशयंकिंनुराजन् २१ ॥ इतिश्रीमहाभारते आरण्यकेपर्वणिआरणेयपर्वणिमृगान्वेषणेएकादशाधिकत्रिशतत
मोऽध्यायः ॥ ३११ ॥ ॥ ७ ॥ युधिष्ठिरउवाच ॥ नापदामस्तिमर्यादाननिमित्तंनकारणम् ॥ धर्मस्तुविभजत्यर्थमुभयोःपुण्यपापयोः १ ॥ भीमउवा
च ॥ प्रातिकाम्यनयत्कृष्णांसभायांप्रेष्यवत्तदा ॥ नमयानिहतस्तत्रतेनप्राप्ताःस्मसंशयम् २ ॥ अर्जुनउवाच ॥ वाचस्तीक्ष्णास्थिभेदिन्यःसूतपुत्रेणभाषि
ताः ॥ अतितीव्रामयाक्षांतास्तेनप्राप्ताःस्मसंशयम् ३ ॥ सहदेवउवाच ॥ शकुनिस्त्वांयदाऽजैषीदक्षद्यूतेनभारत ॥ समयानहतस्तत्रतेनप्राप्ताःस्मसंशयम्
४ ॥ वैशंपायनउवाच ॥ ततोयुधिष्ठिरोराजानकुलंवाक्यमब्रवीत् ॥ आरुह्यवृक्षंमाद्रेयनिरीक्षस्वदिशोदश ५ पानीयमंतिकेपश्यवृक्षांश्चाप्युदकाश्रितान् ॥
एतेहिभ्रातरःश्रांतास्तवतातपिपासिताः ६ नकुलस्तुतथेत्युक्त्वाशीघ्रमारुह्यपादपम् ॥ अब्रवीद्भ्रातरंज्येष्ठमभिवीक्ष्यसमंततः ७ पश्यामिबहुलानराजन्वृक्षा
नुदकसंश्रयान् ॥ सारसानांचनिर्ह्रादमत्रोदकमसंशयम् ८ ततोऽब्रवीत्सत्यधृतिःकुंतीपुत्रोयुधिष्ठिरः ॥ गच्छसौम्यततःशीघ्रंतूर्णंपानीयमानय ९ नकुलस्तु
तथेत्युक्त्वाभ्रातुर्ज्येष्ठस्यशासनात् ॥ प्राद्रवद्यत्रपानीयंशीघ्रंचैवान्वपद्यत १० सदृष्ट्वाविमलंतोयंसारसैःपरिवारितम् ॥ पातुकामस्ततोवाचमंतरिक्षात्सशुश्रुवे
११ ॥ यक्षउवाच ॥ मातातसाहसंकार्षीर्ममपूर्वपरिग्रहः ॥ प्रश्नानुक्त्वातुमाद्रेयततःपिबहरस्वच १२ अनादृत्यतुतद्वाक्यंनकुलःसुपिपासितः ॥ अपिब
च्छीतलंतोयंपीत्वाचनिपपातह १३ चिरायमाणेनकुलेकुंतीपुत्रोयुधिष्ठिरः ॥ अब्रवीद्भ्रातरंवीरंसहदेवमरिंदमम् १४ भ्राताहिचिरयातोनःसहदेवतवाग्रजः ॥ त
थैवानयसोदर्यंपानीयंचत्वमानय १५ सहदेवस्तथेत्युक्त्वातांदिशंप्रत्यपद्यत ॥ ददर्शचहतंभूमौभ्रातरंनकुलंतदा १६ भ्रातृशोकाभिसंतप्तस्तृषयाचप्रपीडितः ॥
अभिदुद्रावपानीयंततोवागभ्यभाषत १७ मातातसाहसंकार्षीर्ममपूर्वपरिग्रहः ॥ प्रश्नानुक्त्वायथाकामंपिबस्वचहरस्वच १८ अनादृत्यतुतद्वाक्यंसहदेवःपि
पासितः ॥ अपिबच्छीतलंतोयंपीत्वाचनिपपातह १९ अथाब्रवीत्सविजयंकुंतीपुत्रोयुधिष्ठिरः ॥ भ्रातरौतेपरिगतौबीभत्सोशत्रुकर्शन २० तौचैवानयभद्रं
तेपानीयंचत्वमानय ॥ त्वंहिनस्तातसर्वेषांदुःखितानामपाश्रयः २१

स्त्वर्थफलं सुखदुःखरूपंविभजति १ प्रेष्यवत्प्रेष्यामिव
२ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ साहसंजलपानरूपं परिग्रहेनियमः योमत्प्रश्नान्वदेत्सएवेतःपयःपिबेद्धरेद्वेति १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१

२२ । २३ । २४ । २५ । २६ । २७ दृश्यमानोभूत्वेतिशेषः २८ । २९ । ३० विधानेनयत्नेन ३१ नभविष्यसिमरिष्यसि ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१
एवमुक्तोगुडाकेशःप्रगृह्यसशरंधनुः ॥ आमुक्तखड्गोमेधावीतत्सरःप्रत्यपद्यत २२ ततःपुरुषशार्दूलौपानीयहरणेगतौ ॥ तौददर्शहतौतत्रभ्रातरौश्वेतवाहनः
२३ प्रसुप्ताविवतौदृष्ट्वानरसिंहःसुदुःखितः ॥ धनुरुद्यम्यकौंतेयोव्यलोकयततद्वनम् २४ नापश्यत्तत्रकिंचित्सभूतमस्मिन्महावने ॥ सव्यसाचीततःश्रांतःपा
नीयंसोऽभ्यधावत २५ अभिधावंस्ततोवाक्यमंतरिक्षात्सशुश्रुवे ॥ किमासीदसिपानीयंनैतच्छक्यंबलात्त्वया २६ कौंतेययदिप्रश्नांस्तान्मयोक्तान्प्रतिपत्स्य
से ॥ ततःपास्यसिपानीयंहरिष्यसिचभारत २७ वारितस्त्वब्रवीत्पार्थोदृश्यमानोनिवारय ॥ यावद्बाणैर्विनिर्भिन्नःपुनर्नैवंवदिष्यसि २८ एवमुक्त्वाततःपा
र्थःशरैरस्त्रानुमंत्रितैः ॥ प्रववर्षदिशःकृत्स्नाःशब्दवेधंचदर्शयन् २९ कर्णिनालीकनाराचानुत्सृजन्भरतर्षभ ॥ सत्वमोघानिषून्मुक्त्वातृष्णयाऽभिप्रपीडितः ३०
अनेकैरिषुसंघातैरंतरिक्षेववर्षह ॥ यक्षउवाच ॥ किंविघातेनतेपार्थप्रश्नानुक्त्वाततःपिब ३१ अनुक्त्वाचपिबन्प्रश्नान्पीत्वैवनभविष्यसि ॥ एवमुक्तस्ततः
पार्थःसव्यसाचीधनंजयः ३२ अवज्ञायैवतांवाचंपीत्वैवनिपपातह ॥ अथाब्रवीद्भीमसेनंकुंतीपुत्रोयुधिष्ठिरः ३३ नकुलःसहदेवश्चबीभत्सुश्चपरंतप ॥ चिरंग
तास्तोयहेतोर्नचागच्छंतिभारत ३४ तांश्चैवानयभद्रंतेपानीयंचत्वमानय ॥ भीमसेनस्तथेत्युक्त्वातंदेशंप्रत्यपद्यत ३५ यत्रतेपुरुषव्याघ्राभ्रातरोऽस्यनिपा
तिताः ॥ तान्दृष्ट्वादुःखितोभीमस्तृषयाचप्रपीडितः ३६ अमन्यतमहाबाहुःकर्मतद्यक्षरक्षसाम् ॥ सचिंतयामासतदायोद्धव्यंध्रुवमद्यवै ३७ पास्यामितावत्पा
नीयमितिपार्थोवृकोदरः ॥ ततोऽभ्यधावत्पानीयंपिपासुःपुरुषर्षभः ३८ ॥ यक्षउवाच ॥ मातातसाहसंकार्षीर्ममपूर्वपरिग्रहः ॥ प्रश्नानुक्त्वातुकौंतेयततःपिबहरस्व
च ३९ एवमुक्तस्तदाभीमोयक्षेणामिततेजसा ॥ अनुक्त्वैवतुतान्प्रश्नान्पीत्वैवनिपपातह ४० ततःकुंतीसुतोराजाप्रचिंत्यपुरुषर्षभः ॥ समुत्थायमहाबाहुर्द
ह्यमानेनचेतसा ४१ व्यपेतजननिर्घोषंप्रविवेशमहावनम् ॥ रुरुभिश्चवराहैश्चपक्षिभिश्चनिषेवितम् ४२ नीलभास्वरवर्णैश्चपादपैरुपशोभितम् ॥ भ्रमरैरुप
गीतंचपक्षिभिश्चमहायशाः ४३ सगच्छन्काननेतस्मिन्हेमजालपरिष्कृतम् ॥ ददर्शतत्सरःश्रीमान्विश्वकर्मकृतंयथा ४४ उपेतंनलिनीजालैःसिंधुवारैःसवेत
सैः ॥ केतकैःकरवीरैश्चपिप्पलैश्चैवसंवृतम् ॥ श्रमार्तस्तदुपागम्यसरोदृष्ट्वाऽथविस्मितः ४५ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिआरणेयपर्वणिनकुलादि
८४ पतनेद्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ सददर्शहतान्भ्रातॄन्लोकपालानिवच्युतान् ॥ युगांतेसमनुप्राप्ते
शक्रप्रतिमगौरवान् १ विनिकीर्णधनुर्बाणंदृष्ट्वानिहतमर्जुनम् ॥ भीमसेनंयमौचैवानिर्विचेष्टान्गतायुषः २ सदीर्घमुष्णंनिःश्वस्यशोकबाष्पपरिप्लुतः ॥ तान्दृष्ट्वा
पतितान्भ्रातॄन्सर्वांश्चिंतासमन्वितः ३

४२ । ४३ हेमजालानिहेमवर्णानिकेसराणितैःपरिष्कृतं
मंडितं ४४ सिंधुवारैर्जलजविशेषैः ४५ ॥ ॥ इत्यारण्यकेपर्वणिनीलकंठीयेभारतभावदीपे द्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥ ॥ ७ ॥ ॥ सददर्शेति १ । २ । ३

४ । ५ विधर्मिण्योऽनृताः ६ । ७ । ८ नकस्यचिदजेताऽपितुसर्वस्यैवजेता ९ आशांराज्याशां संहृत्यविनाश्य १० । ११ । १२ । १३ । १४ । १५ । १६ दध्यौकारणंमरणहेतुं विचारि

धर्मपुत्रोमहाबाहुर्विललापसुविस्तरम् ॥ ननुत्वयामहाबाहोप्रतिज्ञातंवृकोदर ४ सुयोधनस्यभेत्स्यामिगदयासक्थिनीरणे ॥ व्यर्थंतदद्यमेसर्वंत्वयिवीरेनिपा
तिते ५ महात्मनिमहाबाहोकुरूणांकीर्तिवर्धने ॥ मनुष्यसंभवावाचोविधर्मिण्यःप्रतिश्रुताः ६ भवतांदिव्यवाचस्तुताभवंतुकथंमृषा ॥ देवाश्चापियदाऽवोचन्
सूतकेत्वांधनंजय ७ सहस्राक्षादनवरःकुंतिपुत्रस्तवेतिवै ॥ उत्तरेपारियात्रेचजगुर्भूतानिसर्वशः ८ विप्रनष्टांश्रियंचैषामाहर्तापुनरंजसा ॥ नास्यजेतारणेक
श्चिदजेतानैषकस्यचित् ९ सोऽयंमृत्युवशंयातःकथंजिष्णुर्महाबलः ॥ अयंममाशांसंहृत्यशेतेभूमौधनंजयः १० आश्रित्ययंवयंनाथंदुःखान्येतानिसेहिम ॥
रणेप्रमत्तौवीरौचसदाशत्रुनिबर्हणौ ११ कथंरिपुवशंयातौकुंतीपुत्रौमहाबलौ ॥ यौसर्वास्त्राप्रतिहतौभीमसेनधनंजयौ १२ अश्मसारमयंनूनंहृदयंममदुर्हृदः ॥
यमौयदेतौदृष्ट्वाऽद्यपतितौनावदीर्यते १३ शास्त्रज्ञादेशकालज्ञास्तपोयुक्ताःक्रियान्विताः ॥ अकृत्वासदृशंकर्मकिंशेध्वंपुरुषर्षभाः १४ अविक्षतशरीराश्चाप्यप्र
मृष्टशरासनाः ॥ असंज्ञाभुविसंगम्यकिंशेध्वमपराजिताः १५ सानूनिवाद्रेःसंसुप्तान्दृष्ट्वाभ्रातॄन्महामतिः ॥ सुखंप्रसुप्तान्प्रस्विन्नःखिन्नःकष्टांदशांगतः १६
एवमेवेदमित्युक्त्वाधर्मात्मासनरेश्वरः ॥ शोकसागरमध्यस्थोदध्यौकारणमाकुलः १७ इतिकर्तव्यतांचेतिदेशकालविभागवित् ॥ नाभिपेदेमहाबाहुश्चिंतयानो
महामतिः १८ अथसंस्तभ्यधर्मात्मातदात्मानंतपःसुतः ॥ एवंविलप्यबहुधाधर्मपुत्रोयुधिष्ठिरः १९ बुद्ध्याविचिंतयामासवीराःकेननिपातिताः २० नैषांश
स्त्रप्रहारोऽस्तिपदंनेहास्तिकस्यचित् ॥ भूतंमहदिदंमन्येभ्रातरोयेनमेहताः २१ एकाग्रंचिंतयिष्यामिपीत्वावेत्स्यामिवाजलम् ॥ स्यात्तुदुर्योधनेनेदमुपांशुवि
हितंकृतम् २२ गांधारराजरचितंसततंजिह्मबुद्धिना ॥ यस्यकार्यमकार्यंवासममेवभवत्युत २३ कस्तस्यविश्वसेद्वीरोदुष्कृतेरकृतात्मनः ॥ अथवापुरुषैर्गूढैः
प्रयोगोऽयंदुरात्मनः २४ भवेदितिमहाबुद्धिर्बहुधातदचिंतयत् ॥ तस्यासीन्नविषेणेदमुदकंदूषितंयथा २५ मृतानामपिचैतेषांविकृतंनैवजायते ॥ मुखवर्णाः
प्रसन्नामेभ्रातॄणामित्यचिंतयत् २६ एकैकशश्चौघबलानिमान्पुरुषसत्तमान् ॥ कोऽन्यःप्रतिसमासेतकालांतकयमादृते २७ एतेनव्यवसायेनतत्तोयंव्यवगाढ
वान् ॥ गाहमानश्चतत्तोयमंतरिक्षात्सशुश्रुवे २८ ॥ यक्षउवाच ॥ अहंबकःशैवलमत्स्यभक्षोनीतामयाप्रेतवशंतवानुजाः ॥ त्वंपंचमोभविताराजपुत्रनचेत्प्र
श्नान्पृच्छतोव्याकरोषि २९ मातातसाहसंकार्षीर्ममपूर्वपरिग्रहः ॥ प्रश्नानुक्त्वातुकौंतेयततःपिबहरस्वच ३० ॥ युधिष्ठिरउवाच ॥ रुद्राणांवावसूनांवामरु
तांवाप्रधानभाक् ॥ पृच्छामिकोभवान्देवोनैतच्छकुनिनाकृतम् ३१

तवान् १७ । १८ तपःसुतोधर्मपुत्रः १९ । २० । २१ उपांशुविहितमस्माभिरज्ञातंसद्भिःहितं २२ । २३ दुष्कृतेःपापकर्मणः २४ । २५ । २६ ओघबलान्महाप्रवाहवेगान् प्रतिसमासेत प्र
तियुद्ध्येत कालेंऽतंकरोतियस्तादृशोयमःकालांतकयमस्तस्मात् २७ । २८ । २९ । ३० प्रधानभाक्प्राधान्यभाक् ३१

३२ तेतव ३३ तेत्वया ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ यद्यतःआत्मनैवात्मस्वरूपंवक्तव्यमतस्तेप्रश्नान्प्रतिवक्ष्यामि ४४ किंस्विदादित्यमुन्नयतीत्यादिप्र
श्नोत्तरमालिका आत्मनस्तत्त्वंनिर्णेतुमारब्धा 'तरतिशोकमात्मवित्'इतितज्ज्ञानस्यफलत्वश्रवणात्तत्सिद्धयेयोयावत्साधनजातमस्यानिरूप्यते तान्याख्यास्यामः ४५ आदित्यमादत्ते
शब्दादीन्श्रोत्रादिभिरित्यादित्योजीवस्तं गौरोऽहमंधोऽहमदुःख्यहंकर्ताऽहमित्याद्यनुभवाद्देहाद्यात्मतयाभासमानं वादिभिश्चानेकधाविकल्प्यमानं ब्रह्मवेदउन्नयति देहादिभ्यःपृथक्करोति
श्रुतिरेवात्मतत्त्वनिर्णयेमानमित्यर्थः तथाचश्रुतिः । 'नावेदविन्मनुतेतंबृहंतं'इति । ननुसर्वेऽपिवेदादात्मानंजानंतिनेत्याह देवाइति देवाःशमादयस्तस्याभितश्चराःसहायाः । अस्तंस्वस्थानमप
हतपाप्मादिगुणाष्टकविशिष्टंतत्कारणभूतंहार्दाकाशंमस्येनंधर्मः साक्षात्परंपरयावा कर्मोपासनारूपोनयतिप्रापयति । सएवमुक्तविधंस्वरूपंसगुणब्रह्मभावंप्राप्य तद्भावेन सत्येसर्वबाधावधिभूतेशु
हिमवान्पारियात्रश्चविंध्योमलयएवच ॥ चत्वारःपर्वताःकेनपातिताभूरितेजसः ३२ अतीवतेमहत्कर्मकृतंचबलिनांवर ॥ यान्नदेवानगंधर्वानासुराश्चनराक्ष
साः ३३ विषहेरन्महायुद्धेकृतंतेतन्महाद्भुतम् ॥ नतेजानामियत्कार्यंनाभिजानामिकांक्षितम् ३४ कौतूहलंमहज्जातंसाध्वसंचागतंमम ॥ येनास्म्युद्विग्नहृ
दयःसमुत्पन्नशिरोज्वरः ३५ पृच्छामिभगवंस्तस्मात्कोभवानिहतिष्ठति ॥ यक्षउवाच ॥ यक्षोहमस्मिभद्रंतेनास्मिपक्षीजलेचरः ३६ मयैतेनिहताःसर्वेभ्रात
रस्तेमहौजसः ॥ वैशंपायनउवाच ॥ ततस्तामशिवांश्रुत्वावाचंसपरुषाक्षराम् ३७ यक्षस्यब्रुवतोराजन्नुपक्रम्यतदास्थितः ॥ विरूपाक्षंमहाकायंयक्षंतालसमु
च्छ्रयम् ३८ ज्वलनार्कप्रतीकाशमधृष्यंपर्वतोपमम् ॥ वृक्षमाश्रित्यतिष्ठंतंददर्शभरतर्षभः ३९ मेघगंभीरनादेनतर्जयंतंमहास्वनम् ॥ यक्षउवाच ॥ इमेतेभ्रा
तरोराजन्वार्यमाणामयाऽसकृत् ४० बलात्तोयंजिहीर्षंतस्ततोवैसूदितामया ॥ नपेयमुदकंराजन्प्राणानिहपरीप्सता ४१ पार्थमासाहसंकार्षीर्ममपूर्वपरिग्रहः ॥
प्रश्नानुक्त्वातुकौंतेयततःपिबहरस्वच ४२ ॥ युधिष्ठिरउवाच ॥ नचाहंकामयेयक्षतवपूर्वपरिग्रहम् ॥ कामंनैतत्प्रशंसंतिसंतोहिपुरुषाःसदा ४३ यदात्मना
स्वमात्मानंप्रशंसेत्पुरुषर्षभ ॥ यथाप्रज्ञंतुतेप्रश्नान्प्रतिवक्ष्यामिपृच्छमाम् ४४ ॥ यक्षउवाच ॥ किंस्विदादित्यमुन्नयतिकेचतस्याभितश्चराः ॥ कश्चैनमस्तं
नयतिकस्मिंश्चप्रतितिष्ठति ४५ ॥ युधिष्ठिरउवाच ॥ ब्रह्मादित्यमुन्नयतिदेवास्तस्याभितश्चराः ॥ धर्मश्चास्तंनयतिचसत्येचप्रतितिष्ठति ४६ ॥ यक्षउ
वाच ॥ केनस्विच्छ्रोत्रियोभवतिकेनस्विद्विंदतेमहत् ॥ केनस्विद्द्वितीयवान्भवतिराजन्केनचबुद्धिमान् ४७ ॥ युधिष्ठिरउवाच ॥ श्रुतेनश्रोत्रि
योभवतितपसाविंदतेमहत् ॥ धृत्याद्वितीयवान्भवतिबुद्धिमान्वृद्धसेवया ४८

द्धचिन्मात्रेप्रतिष्ठितोभवति तथाचश्रुतिः । 'सएवंविद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वाऽमृतःसमभवत्'इति। प्रथमंशास्त्रजंज्ञानं ततःशमादिसंपन्नस्ययोगबला
द्देहाद्यध्यासनिवृत्तिस्ततःस्वर्गाख्यसगुणब्रह्मदर्शनं ततः केवलीभावइतिश्रुतेरर्थः ४६।४७ वेदस्यसत्येप्रतिष्ठाहेतुत्वमुक्तंतत्रदृष्टंद्वारमाह श्रुतेनेति श्रोत्रियोवेदाध्यायी श्रुतेनाचार्यमुखाद्वेदार्था
वधारणेनभवति नत्वक्षरग्रहणमात्रेण । ततश्चतपसायुक्त्याच श्रुतस्यार्थस्यालोचनेनमहत्ब्रह्मविंदतेजानीते मानमेयगताऽसंभावनानिवृत्त्यानिश्चिनोति। धृत्या। 'धृत्याययाधारयतेमनःप्राणे
न्द्रियक्रियाः । योगेनाव्यभिचारिण्याधृतिःसापार्थसात्त्विकी'इत्युक्तलक्षणया निदिध्यासनेनेत्यर्थः द्वितीयमनीशत्वादिविशिष्टादविद्याप्रत्युपस्थापिताज्जीवाद्रूपात्तद्विपरीतंविद्यामाप्यंप्रतीचो

यद्द्वितीयंरूपंतद्वान्भवति । एतत्त्रयनिश्चयात्मिकाबुद्धिर्गुरूपदेशादेवप्राप्येत्याह बुद्धिमानिति तथाचश्रुतिः । 'आत्मावाऽरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यः आचार्यवान्पुरुषोवेद' इत्यादिरात्मदर्शनसाधनत्वेनश्रवणादित्रयमाचार्यवत्त्वंचेतिदर्शयति ४८ । ४९ श्रवणाद्यधिकारेहेतुमाहत्रिभिरुत्तरैः स्वाध्यायोवेदाध्ययनंविप्राणांदेवत्वंस्वर्गलोकप्रापकं । तपः शमादिकं सदाचारइत्युपादेयद्वयं । मानुषोभावोदेहाद्यभिमानः मरणंजन्ममरणप्रापकः । परिवादोदेवब्राह्मणादिदूषणं असदाचारइतिहेयद्वयं ५० । ५१ परित्यागआर्तानामितिशेषः ५२ । ५३ इतोप्यंतरंगंहेतुमाह प्राणमनसीनिरुध्यमाने यज्ञेसामयजुषीइवज्ञानयज्ञोपकारके । ऋक्रूपकामुख्या यज्ञंज्ञानंवृणुतेस्वीकरोति ज्ञानोत्पादिकेत्यर्थः तथाचश्रुतिः 'मनोवाचंप्राणंतान्यात्मनेकुरुत'इति आत्महितार्थमेतत्त्रयंप्रजापतिनासृष्टमित्याह तथातंत्वौपनिषदं पुरुषमित्यौपनिषदत्वविशेषणंवाचोमुख्यत्वमाह ५४ । ५५ शमादीनांप्राणजयादीनांचासंभवेयज्ञाद्येवकर्तव्य

॥ यक्षउवाच ॥ किंब्राह्मणानांदेवत्वंकश्चधर्मःसतामिव ॥ कश्चैषांमानुषोभावःकिमेषामसतामिव ४९ ॥ युधिष्ठिरउवाच ॥ स्वाध्यायएषांदेवत्वंतपएषांसतामिव ॥ मरणंमानुषोभावःपरिवादोऽसतामिव ५० ॥ यक्षउवाच ॥ किंक्षत्रियाणांदेवत्वंकश्चधर्मःसतामिव ॥ कश्चैषांमानुषोभावःकिमेषामसतामिव ५१ ॥ युधिष्ठिरउवाच ॥ इष्वस्त्रमेषांदेवत्वंयज्ञएषांसतामिव ॥ भयंवैमानुषोभावःपरित्यागोऽसतामिव ५२ ॥ यक्षउवाच ॥ किमेकंयज्ञियंसामकिमेकंयज्ञियंयजुः ॥ काचैषांवृणुतेयज्ञंकांयज्ञोनातिवर्तते ५३ ॥ युधिष्ठिरउवाच ॥ प्राणोवैयज्ञियंसाममनोवैयज्ञियंयजुः ॥ ऋगेकावृणुतेयज्ञंतांयज्ञोनातिवर्तते ५४ ॥ यक्षउवाच ॥ किंस्विदावपतांश्रेष्ठंकिंस्विन्निवपतांवरम् ॥ किंस्वित्प्रतिष्ठमानानांकिंस्वित्प्रसवतांवरम् ५५ ॥ युधिष्ठिरउवाच ॥ वर्षमावपतांश्रेष्ठंबीजंनिवपतांवरम् ॥ गावःप्रतिष्ठमानानांपुत्रःप्रसवतांवरम् ५६ ॥ यक्षउवाच ॥ इंद्रियार्थाननुभवन्बुद्धिमाँल्लोकपूजितः ॥ संमतःसर्वभूतानामुच्छ्वसन्कोनजीवति ५७ ॥ युधिष्ठिरउवाच ॥ देवतातिथिभृत्यानांपितृणामात्मनश्चयः ॥ ननिर्वपतिपंचानामुच्छ्वसन्नसजीवति ५८ ॥ यक्षउवाच ॥ किंस्विद्गुरुतरंभूमेःकिंस्विदुच्चतरंचखात् ॥ किंस्विच्छीघ्रतरंवायोःकिंस्विद्बहुतरंतृणात् ५९ ॥ युधिष्ठिरउवाच ॥ मातागुरुतराभूमेःखात्पितोच्चतरस्तथा ॥ मनःशीघ्रतरंवाताच्चिंताबहुतरीतृणात् ६० ॥ यक्षउवाच ॥ किंस्वित्सुप्तंननिमिषतिकिंस्विज्जातंनचोपति ॥ कस्यस्विद्धृदयंनास्तिकिंस्विद्वेगेनवर्धते ६१

मित्याह आवपतांआसमंतात्देवांस्तर्पयतां वर्षंवृष्टिः श्रेष्ठंफलं सर्वलोकोपकारकत्वात् यथोक्तं ।'अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिः'इति । निवपतांनिवापःपितृतर्पणंतत्कुर्वतां बीजंक्षेत्रारामाद्यात्मोपकारकंफलं । 'आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच । प्रयच्छंतुतथाराज्यंप्रीतास्तुभ्यंपितामहाः' इतिस्मृत्युक्तं । प्रतिष्ठमानानामिहैवप्रतिष्ठालिप्सूनां गावःश्रेष्ठं । प्रसवतांसंततिमिच्छूनांपुत्रःश्रेष्ठंफलं दौहित्रादिभ्यःगवांपुत्रस्यचदृष्टार्थत्वेऽपि अतिथिर्मोचनद्वारा श्राद्धप्रदानादिद्वारोपकारकत्वेनपरंपरयाश्रवणाद्यधिकारहेतुत्वंज्ञेयं ५६ इतोऽपिसाधनाद्भ्रष्टोयस्तंनिंदति इंद्रियार्थानिति इंद्रियार्थान्शब्दादीन् लोकेधनादिमत्त्वेनपूजितः संमतोदानाधिकारित्वेन ५७ ननिर्वपतिनप्रयच्छति देवतादिभ्यः ५८ उक्तसाधनाशक्तेन मातापित्रोःशुश्रूषा मनोनिरोधस्तृणवत्तुच्छायाश्चिंतायास्त्यागश्चकर्तव्यइत्याह किंस्विद्गुर्विति ५९ । ६० । ६१ ॥२५१॥

ननुमनोनाशे शून्यमेवावशिष्यतइत्याशंक्यनेत्याहमत्स्यइति मत्स्यइवमत्स्योजीवः जाग्रत्स्वप्नयोरिहलोकपरलोकयोर्वा तीरयोरिवसंचारेणसुप्तः स्वनीडभूतंसद्रूपंब्रह्मप्राप्तो ननिमिषति मनोवत्प्रवृष्टिर्नभवति । 'नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वात्'इतिश्रुतेः । ननुमत्स्योऽविनाशित्वादजातश्चेत्कस्तर्हिजातइत्यतआह अंडंपिंडब्रह्मांडरूपंजातमुत्पन्नंसत्नचोपति नचलति । चुपमंदायांगतौ।पुरुषप्रवर्तितमेवाहंकारादिजडजातंचेष्टतेइत्यर्थः । 'कोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यात्'इतिश्रुतेः।कस्तर्हिजाताजातयोरेतयोः संयोगस्यदुःखदस्यनिवृत्त्युपायइत्यतआह अश्मनःअशरीरस्यनिवृत्तदेहत्रयाध्यासस्ययोगिनोहृदयंशोकनीडंनास्ति । कथंतर्हिसमाधेरपिव्युत्तिष्ठंतीत्याह नदीचित्तनदी वेगेनवर्धते सुषुप्तावस्थापन्नस्य स्वप्नदर्शनवत्समाहितोत्थितस्यायंप्रपंचो दृष्टिसमसमयमात्रजातइत्यर्थः ६२ । ६३ मनोरोधाशक्तस्यदानमेवश्रेयइत्याह सार्थोयथाप्रवसतोमित्रमेवंमरिष्यतोमर्त्यस्यदानंमित्रमित्यर्थः ६४ । ६५ दानस्यचित्तशुद्धिद्वारायज्ञादौ यज्ञादेश्च चित्तैकाग्र्यद्वारासमष्टयुपास्तौप्रवृत्तिहेतुत्वेनचउपकारकत्वमाह अतिथिरिति अग्निराहवनीयादिरूपः गवामृतंक्षीरंतद्देवसोमाख्यंहोतव्यं सोयंसनातनोनित्यो

॥ युधिष्ठिरउवाच ॥ मत्स्यःसुप्तोननिमिषत्यंडंजातंनचोपति ॥ अश्मनोहृदयंनास्तिनदीवेगेनवर्धते ६२ ॥ यक्षउवाच ॥ किंस्वित्प्रवसतोमित्रंकिंस्विन्मित्रंगृहेसतः ॥ आतुरस्यचकिंमित्रंकिंस्विन्मित्रंमरिष्यतः ६३ ॥ युधिष्ठिरउवाच ॥ सार्थःप्रवसतोमित्रंभार्यामित्रंगृहेसतः ॥ आतुरस्यभिषङ्मित्रंदानंमित्रंमरिष्यतः ६४ ॥ यक्षउवाच ॥ कोऽतिथिःसर्वभूतानांकिंस्विद्धर्मंसनातनम् ॥ अमृतंकिंस्विद्राजेंद्रकिंस्वित्सर्वमिदंजगत् ६५ ॥ युधिष्ठिरउवाच ॥ अतिथिःसर्वभूतानामग्निःसोमोगवामृतम् ॥ सनातनोऽमृतोधर्मोवायुःसर्वमिदंजगत् ६६ ॥ यक्षउवाच ॥ किंस्विदेकोविचरतेजातःकोजायतेपुनः ॥ किंस्विद्धिमस्यभैषज्यंकिंस्विदावपनंमहत् ६७ ॥ युधिष्ठिरउवाच ॥ सूर्यएकोविचरतेचंद्रमाजायतेपुनः ॥ अग्निर्हिमस्यभैषज्यंभूमिरावपनंमहत् ६८ ॥ यक्षउवाच ॥ किंस्विदेकपदंधर्म्यंकिंस्विदेकपदंयशः ॥ किंस्विदेकपदंस्वर्ग्यंकिंस्विदेकपदंसुखम् ६९ ॥ युधिष्ठिरउवाच ॥ दाक्ष्यमेकपदंधर्म्यंदानमेकपदंयशः ॥ सत्यमेकपदंस्वर्ग्यंशीलमेकपदंसुखम् ७० ॥ यक्षउवाच ॥ किंस्विदात्मामनुष्यस्यकिंस्विद्दैवकृतःसखा ॥ उपजीवनंकिंस्विदस्यकिंस्विदस्यपरायणम् ७१ ॥ युधिष्ठिरउवाच ॥ पुत्रआत्मामनुष्यस्यभार्यादैवकृतःसखा ॥ उपजीवनंचपर्जन्योदानमस्यपरायणम् ७२

धर्मः अमृतोमोक्षहेतुः तत्रद्वारमाह वायुःसर्वमिदंजगत्'वायुरेवव्यष्टिर्वायुःसमष्टिः'इतिश्रुतेःपिंडब्रह्मांडात्मकवायुरूपस्यप्राप्तेर्मोक्षद्वारमित्यर्थः ६६ । ६७ उक्तलक्षणस्यवायोरपिसंहारेकिमवशिष्यतइत्याह सूर्यएकोविचरतेसूर्यवच्चित्प्रकाशरूपआत्मैवास्ति । अवस्थात्रयेतदभावेचप्रकाश्यसत्वासत्वयोः सूर्यइवकुतस्तर्हिप्रपंचभानमतआहचंद्रमाजायतेपुनः । 'चंद्रमामनोभूत्वा'इतिश्रुतेर्मनएवाविद्यावशादुत्पद्यते तच्चदुःखप्रदंजगत्कल्पयति अविद्यानिवृत्त्युपायमाह अग्निर्हिमस्यभैषज्यं । 'अग्निर्वाग्भूत्वा'इतिश्रुतेर्वागेवतत्त्वमस्यादिका हिमस्यसूर्याभिभावकस्याविद्याजाड्यस्यऔषधंनिवारकं । भूमिःशरीरंतदेवमहदावपनंविद्यायाअविद्यायाश्चनिधानपात्रं इहैवसंसारित्वस्यवसंसारिब्रह्मभावोऽपिसाक्षात्क्रियतइत्यर्थः ६८ अत्रद्वाभ्यांप्रश्नाभ्यांब्रह्मविद्यासूत्रंससाधनमुपक्षिप्तं ततःसप्तभिस्त्वंपदार्थशोधस्ततस्त्रिभिस्तत्पदार्थशोधःससाधनःकृतः इदानींपुनःप्रकारांतरेणसाधनान्येवविदधत्त्वंपदार्थयोरभेदंतत्त्वमस्यहंब्रह्मास्मीत्यादिमहावाक्यप्रतिपाद्यंदर्शयति नवभिः किंस्विदेकपदमित्यादिना ६९ एकपदंएकमेवपर्यवसानस्थानं दाक्ष्येकस्थोधर्मःपर्यवसितइत्यर्थः एवमुत्तरत्र ७० उद्योगोदानंसत्यंशीलंचसेव्यं तत्रापिदानमेव पुत्रवदात्मा भार्यावत्सखा पर्जन्यवदुपजीवनंच आत्मप्रदत्वात्रमणीयफलत्वान्नादचमुपतिष्ठतीतिवचनेनोपजीवनहेतुत्वाच्चेत्याह किंस्विदात्मेति ७१ । ७२

७३ धन्यंधनायहितं । धनमपिश्रुतमेव नस्वर्णादीत्याह उत्तमंश्रुतमिति । लाभआरोग्यंधर्मसाधनत्वात् । तुष्टिःसंतोषः । उद्योगोध्ययनमारोग्यंसंतोषश्चदृष्टद्वारेणज्ञानेउपकुर्वंतीत्यर्थः ७४
७५ आनृशंस्यंसर्वभूताभयदानं संन्यासइत्यर्थः । त्रयी मोक्षमंत्रस्त्रयीतिश्रुतेस्त्रयीशब्देनात्रत्रिमात्रःप्रणवउच्यते तदाश्रितोधर्मोऽकारउकारमकारार्थानांस्थूलसूक्ष्मकारणोपाधीनां क्रमेण पूर्व
पूर्वस्योत्तरोत्तरत्रप्रविलापनेनार्धमात्रार्थेतुरीयेब्रह्मण्यवस्थानं सदाफलोऽविनाशिफलः मोक्षहेतुत्वात् । तस्यधर्मस्यप्राप्तावुपायोमनोनिग्रहएव तावैतवज्ञातात्मतत्त्वोभूत्वाशोकंतरति मनोनि
ग्रहमार्गश्चसद्भिःकृपालुभिरेवप्रदर्शनीयइतितात्पर्यार्थः ७६ मनोनिग्रहेदृष्टंद्वारंमानादिचतुष्टयत्यागइत्याह किंनुइति ७७ । ७८ मानादित्यागोऽपिधर्मफलमतोऽत्रापिब्राह्मणेदत्तंयद्दानं
तदेवधर्महेतुत्वादुपकरोतिनान्यत्रदत्तमित्याह किमर्थमिति ७९ । ८० । ८१ ननुदानबलान्मानादीन्जित्वामनोनिगृह्णतएवास्यंधिकोदुःखनाशोभविष्यति किमविलापनरूपेणत्रयीधर्मेणेत्या

॥ यक्षउवाच ॥ धन्यानामुत्तमंकिंस्विद्धनानांस्यात्किमुत्तमम् ॥ लाभानामुत्तमंकिंस्यात्सुखानांस्यात्किमुत्तमम् ७३ ॥ युधिष्ठिरउवाच ॥ धन्यानामुत्तमं दाक्ष्यंधनानामुत्तमंश्रुतम् ॥ लाभानांश्रेयआरोग्यंसुखानांतुष्टिरुत्तमा ७४ ॥ यक्षउवाच ॥ कश्चधर्मःपरोलोकेकश्चधर्मःसदाफलः ॥ किंनियम्यनशोचंति कैश्चसंधिर्नजीर्यते ७५ ॥ युधिष्ठिरउवाच ॥ आनृशंस्यंपरोधर्मस्त्रयीधर्मःसदाफलः ॥ मनोयम्यनशोचंतिसंधिःसद्भिर्नजीर्यते ७६ ॥ यक्षउवाच ॥ किंनुहित्वाप्रियोभवतिकिंनुहित्वानशोचति ॥ किंनुहित्वाऽर्थवान्भवतिकिंनुहित्वासुखीभवेत् ७७ ॥ युधिष्ठिरउवाच ॥ मानंहित्वाप्रियोभवतिक्रोधंहित्वानशोचति ॥ कामंहित्वाऽर्थवान्भवतिलोभंहित्वासुखीभवेत् ७८ ॥ यक्षउवाच ॥ किमर्थंब्राह्मणेदानंकिमर्थंनटनर्तके ॥ किमर्थंचैवभृत्येषुकिमर्थंचैवराजसु ७९ ॥ युधिष्ठिरउवाच ॥ धर्मार्थंब्राह्मणेदानंयशोर्थंनटनर्तके ॥ भृत्येषुभरणार्थंवैभयार्थंचैवराजसु ८० ॥ यक्षउवाच ॥ केनस्विदावृतोलोकःकेनस्विन्नप्रकाशते ॥ केनत्यजतिमित्राणिकेनस्वर्गंनगच्छति ८१ ॥ युधिष्ठिरउवाच ॥ अज्ञानेनावृतोलोकस्तमसानप्रकाशते ॥ लोभात्त्यजतिमित्राणिसंगात्स्वर्गंनगच्छति ८२ ॥ यक्षउवाच ॥ मृतःकथंस्यात्पुरुषःकथंराष्ट्रंमृतंभवेत् ॥ श्राद्धंमृतंकथंवास्यात्कथंयज्ञोमृतोभवेत् ८३ ॥ युधिष्ठिरउवाच ॥ मृतोदरिद्रःपुरुषोमृतंराष्ट्रमराजकम् ॥ मृतमश्रोत्रियंश्राद्धंमृतोयज्ञस्त्वदक्षिणः ८४ ॥ यक्षउवाच ॥ कादिक्किमुदकंप्रोक्तंकिमन्नंकिंचवैविषम् ॥ श्राद्धस्यकालमाख्याहिततःपिबहरस्वच ८५

शंक्याहअज्ञानेनेति अज्ञानकार्येण स्थूलसूक्ष्मशरीरद्वयेनजरामरणशोकमोहाद्याश्रयेण लोक्यतइतिलोकआत्मा आवृतस्तिरोहितः कल्पितभुजंगेनेवरज्जुः अतोऽज्ञाननाशार्थंत्रयीधर्मोव
इयमेष्टव्यः । ननुसुषुप्तौदेहद्वयस्याभावादज्ञाननाशोऽस्त्येव किंत्रयीधर्मेणेत्यतआह तमसामूलाज्ञानेन सुषुप्तावप्यावृतोऽतोनप्रकाशते तस्माद्देहत्रयमपिप्रविलापनीयमेवेत्यर्थं ज्ञानाज्ञान
योरेवविरोधादज्ञानकृतःसंसारोनमनोरोधमात्रेणनश्यति किंतुसर्पवाधेनरज्जुमधिगम्यैवयथासमूलस्यभयस्यनाशस्तथादेहत्रयबाधेनस्वरूपाधिगमेनैव समूलस्यसंसारस्यनाशइतिभावः अतो
लोभसंगौत्यक्त्वाज्ञानमेवसाधनीयमित्याह लोभादिति ८२ । ८३ लोभसंगयोरत्यागेदोषमाहमृतइति दरिद्रोलुब्धचित्तः सदानाद्यसमर्थत्वेनमृतएव । तत्रदृष्टांतः मृतं राष्ट्रमिवराष्ट्रंप्राणभृ
मिपतेःसंचारस्थानंशरीरं स्वराजकंनष्टप्राणंयथा तथा दरिद्रो जीवन्मृतइत्यर्थः । अग्निमंदृष्टांतद्वयंश्रुतिप्रसिद्धमेव ८४ । ८५

एवंलोभादित्यागेनदानाद्यनुष्ठानेनशमादिसंपन्नस्याचार्यकस्यश्रवणादिभिर्वेद्योयज्ज्ञातव्यंब्रह्मात्मैक्यंतदाह कादिगिति ॥ संतोवेदप्रमाणनिष्ठाः दिक्दिशत्युपदिशतीतिदिगुपदेष्टारइत्यर्थः आ
चार्यवचनाद्ब्रह्मज्ञातव्यमितिभावः । तथाजलं 'पंचम्यामाहुतावापःपुरुषवचसोभवंति' इतिश्रुतेर्जलंपिंडब्रह्मांडात्मकंकार्यंतदभिमानीचेतनश्च तेनव्यष्टिसमष्टिजीवोलक्ष्यते । आकाशः । 'सर्वा
णिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतआकाशेऽस्तंयंति' इतिश्रुतेराकाशोऽव्याकृतंकारणं तदभिमानीईश्वरस्तेनोच्यते अनयोर्जलमाकाशमितिसामानाधिकरण्यादभेदउपाध्यंशप्रहा
णेनोभयत्रशुद्धचिन्मात्रलक्षणया सोऽयंदेवदत्तइत्यत्रेव तदेतद्देशकालरूपविशेषणप्रहाणेनदेवदत्तस्वरूपमात्रलक्षणया एतावानेवसर्वेषुवेदांतेषुज्ञातव्योर्थः । नन्व्यावर्तकेउपाधिभेदेजाग्रतिस
तिकथमनयोरभेदःस्यादतआह गौरन्नमिति गच्छतीतिगौरिंद्रियंतद्द्वाह्यंशब्दाद्यर्थजातंवातदन्नप्रदनीयंप्रविलापनीयं सैंधवोदकन्यायेन । यथासैंधवखिल्यउदकेप्रास्तउदकमेवानुविलीयते ।

॥युधिष्ठिरउवाच ॥ संतोदिग्जलमाकाशंगौरन्नंप्रार्थनाविषम् ॥ श्राद्धस्यब्राह्मणःकालःकथंवायक्षमन्यसे ८६ ॥ यक्षउवाच ॥ तपःकिंलक्षणंप्रोक्तंकोदमश्चप्रकीर्तितः ॥ क्षमाचकापराप्रोक्ताकाचह्रीःपरिकीर्तिता ८७ ॥ युधिष्ठिरउवाच ॥ तपःस्वधर्मवर्तित्वंमनसोदमनंदमः ॥ क्षमाद्वंद्वसहिष्णुत्वंह्रीरकार्यनिवर्तनम् ८८ ॥ यक्षउवाच ॥ किंज्ञानंप्रोच्यतेराजन्कःशमश्चप्रकीर्तितः ॥ दयाचकापराप्रोक्ताकिंचार्जवमुदाहृतम् ८९ ॥ युधिष्ठिरउवाच ॥ ज्ञानंतत्त्वार्थसंबोधःशमश्चित्तप्रशांतता ॥ दयासर्वसुखैषित्वमार्जवंसमचित्तता ९० ॥ यक्षउवाच ॥ कःशत्रुर्दुर्जयःपुंसांकश्चव्याधिरनंतकः ॥ कीदृशश्चस्मृतःसाधुरसाधुःकीदृशःस्मृतः ९१ ॥ युधिष्ठिरउवाच ॥ क्रोधःसुदुर्जयःशत्रुर्लोभोव्याधिरनंतकः ॥ सर्वभूतहितःसाधुरसाधुर्निर्दयःस्मृतः ९२ ॥ यक्षउवाच ॥ कोमोहःप्रोच्यतेराजन्कश्चमानःप्रकीर्तितः ॥ किमालस्यंचविज्ञेयंकश्चशोकःप्रकीर्तितः ९३ ॥ युधिष्ठिरउवाच ॥ मोहोहिधर्ममूढत्वंमानस्त्वात्माभिमानिता ॥ धर्मनिष्क्रियताऽऽलस्यंशोकस्त्वज्ञानमुच्यते ९४ ॥ यक्षउवाच ॥ किंस्थैर्यमृषिभिःप्रोक्तंकिंचधैर्यमुदाहृतम् ॥ स्नानंचकिंपरंप्रोक्तंदानंचकिमिहोच्यते ९५ ॥ युधिष्ठिरउवाच ॥ स्वधर्मेस्थिरतास्थैर्यंधैर्यमिंद्रियनिग्रहः ॥ स्नानंमनोमलत्यागोदानंवैभूतरक्षणम् ९६ ॥ यक्षउवाच ॥ ॥ कःपंडितःपुमान्ज्ञेयोनास्तिकःकश्चउच्यते ॥ कोमूर्खःकश्चकामःस्यात्कोमत्सरइतिस्मृतः ९७ ॥ युधिष्ठिरउवाच ॥ धर्मज्ञःपंडितोज्ञेयोनास्तिकोमूर्खउच्यते ॥ कामःसंसारहेतुश्चहृत्तापोमत्सरःस्मृतः ९८ ॥ यक्षउवाच ॥ कोऽहंकारइतिप्रोक्तःकश्चदंभःप्रकीर्तितः ॥ किंतद्दैवंपरंप्रोक्तंकिंतत्पैशुन्यमुच्यते ९९

अत्रह्येतेसर्वएकंभवंतीत्यादिविश्रुतिभ्यः उपाध्योर्मिथ्यात्वादेव रज्जूरगवत्प्रविलयःसुखसाध्यइत्यर्थः । प्रार्थना कामः सएवविषमिवविषंजन्ममरणहेतुत्वात् अतःकामंत्यक्त्वागुरूपदेशेनप्रपंचं
 प्रविलाप्यप्रत्यक्ब्रह्मणोरभेदंसाक्षात्कुर्यादित्यर्थः । ब्राह्मणोब्रह्मवित् श्राद्धस्यश्रद्धयाप्रदेयस्य कालःसमयः यदेवसत्पात्रलाभस्तदेवधर्मज्ञानादिकमनुष्ठेयंशिक्षणीयंच । समासाससाधना
ब्रह्मविद्या तथाऽप्यन्यान्यपिज्ञानसाधनानितल्लक्षणानिचप्रष्टुमिच्छुः पूर्ववरंभ्रातृजीवनादिसुखंनददात्यतो धर्मराजःपरामृशति कथंवायक्षमन्यसेइति । तवमते एतावता कृतकृत्यत्वमस्तिना
स्तिवेतिप्रश्नाभिप्रायः ८६ । ८७ तपआद्यष्टकस्यज्ञानसाधनस्यलक्षणान्याहद्वाभ्यांतपःस्वधर्मेति ८८ । ८९ । ९० । ९१ क्रोधलोभनिर्दयत्वानित्यक्त्वा सर्वभूतहितःस्यादित्यर्थः ९२ । ९३
त्रिभिर्मोहादीनांलक्षणान्याह मोहोहीत्यादिना ९४ । ९५ । ९६ । ९७ नास्तिको नास्तिपरलोकइतिवादी सएवमूर्खोनततोऽन्यःपृथक्मूर्खःप्रष्टव्यइत्यर्थः । संसारहेतुर्वासना ९८ । ९९

२ । ३ । ४ सुहृदः सुहृत् छांदसमदंतत्वम् ५ । ६ यशःख्यातिः सत्यंयथार्थभाषणं दमोबाह्येंद्रियजयः शौचंद्विविधं मृज्जलादिनाबाह्यं कामक्रोधादिराहित्यादांतरं आर्जवमवक्रता मार्दव मितिपाठेअक्रूरता ह्रीरकार्यप्रवृत्तिवारकश्चेतोवृत्तिविशेषः अचापलंमनसःस्थैर्यं दानंप्रसिद्धं तपःस्वधर्माचरणं ब्रह्मचर्यमुपस्थनिग्रहः तनवःशरीराणि ७ अहिंसावाङ्मनःशरीरैःपरपीडाव र्जनं समतामानापमानादिष्ववैषम्यं शांतिश्चित्तनिग्रहः तपःकृच्छ्रचांद्रायणादि शौचंव्याख्यातं अमत्सरःपरगुणान्दृष्ट्वाऽसंतापः मत्सरस्तदभावः द्वाराणिधर्मप्राप्तिमुखानि ८ दिष्ट्यापंचसुर क्तोऽसिपंचस्वात्मदर्शनसाधनेषु । 'शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वाऽऽत्मन्येवात्मानंपश्यति'इतिश्रुत्युक्तेषुशमादिषु । दिष्ट्यापूर्वपुण्यवशाद्रक्तोऽसि तस्यफलंचषट्पदीजयः पद्यंतेप्रा प्नुवंतिदेहिनमितिपदानिषडूर्मयो । 'योऽशनायापिपासेशोकंमोहंजरांमृत्युमत्येति'इतिश्रुत्युक्ताः तेषांषण्णांपदानांसमाहारःषट्पदी सात्वयाजिता । तेषुपदेषुद्वेपदेपूर्वंजातमात्रस्यह्यशनापिपा

॥ युधिष्ठिरउवाच ॥ सरस्येकेनपादेनतिष्ठंतमपराजितम् ॥ पृच्छामिकोभवान्देवोनमेयक्षोमतोभवान् २ वसूनांवाभवानेकोरुद्राणामथवाभवान् ॥ अथवाम रुतांश्रेष्ठोवज्रीवात्रिदशेश्वरः ३ ममहिभ्रातरइमेसहस्रशतयोधिनः ॥ तंयोधंनप्रपश्यामियेनसर्वेनिपातिताः ४ सुखंप्रतिप्रबुद्धानामिंद्रियाण्युपलक्षये ॥ स भवान्सुहृदोऽस्माकमथवानःपिताभवान् ५ ॥ यक्षउवाच ॥ अहंतेजनकस्तातधर्मोमृदुपराक्रम ॥ त्वांदिदृक्षुरनुप्राप्तोविद्धिमांभरतर्षभ ६ यशःसत्यंदमः शौचमार्जवंह्रीरचापलम् ॥ दानंतपोब्रह्मचर्यमित्येतास्तनवोमम ७ अहिंसासमताशांतिस्तपःशौचममत्सरः ॥ द्वाराण्येतानिमेविद्धिप्रियोह्यसिसदामम ८ दिष्ट्यापंचसुरक्तोऽसिदिष्ट्यातेषट्पदीजिता ॥ द्वेपूर्वेमध्यमेद्वेचद्वेचांतेसांपरायिके ९ धर्मोऽहमितिभद्रंतेजिज्ञासुस्त्वामिहागतः ॥ आनृशंस्येनतुष्टोऽस्मि वरंदास्यामितेऽनघ १० वरंवृणीष्वराजेंद्रदाताह्यस्मितवानघ ॥ येहिमेपुरुषाभक्तानतेषामस्तिदुर्गतिः ११ ॥ युधिष्ठिरउवाच ॥ अरणीसहितंयस्यमृगो ह्यादायगच्छति ॥ तस्याग्नयोनलुप्येरन्प्रथमोऽस्तुवरोमम १२ ॥ यक्षउवाच ॥ अरणीसहितंह्यस्यब्राह्मणस्यहृतंमया ॥ मृगवेषेणकौंतेयजिज्ञासार्थंतव प्रभो १३ ॥ वैशंपायनउवाच ॥ ददानीत्येवभगवानुत्तरंप्रत्यपद्यत ॥ अन्यंवरयभद्रंतेवरंत्वममरोपम १४ ॥ युधिष्ठिरउवाच ॥ वर्षाणिद्वादशा रण्येत्रयोदशमुपस्थितम् ॥ तत्रनोनाभिजानीयुर्वसतोमनुजाःक्वचित् १५

सेमध्यमंभवतः । द्वेमध्ये शोकमोहौ शोकइष्टवियोगजश्चित्तस्यसंतापः । मोहोऽतिपापेनकार्याकार्यप्रतिसंधानशून्यत्वं । एतेमध्ये मध्यमेवयसिप्राप्नुतः। प्राप्नस्तुपंचसुमहायज्ञेषु । 'कामक्रोधौ लोभमोहौमदमानौचषट्पदी । षट्पदींसमतिक्रम्यमुच्यतेनात्रसंशयः'इतिव्याचक्षुस्तद्दृष्यात्माधिकाराद्वेपूर्वेइतिवाक्यशेषासामंजस्याच्चोपेक्षितं । सांपरायिके जरामृत्यू उत्तरेवयस्युपतिष्ठतः द्वेअंते सांपरायिके संपरायःपरलोकस्तंप्रतिनेतुमुदितेसांपरायिके ९ धर्मोऽहमितिभद्रंते अहंधर्मस्तवपिताऽस्मीतिस्वरूपप्रकाशनं इतिभद्रंतेइत्यनेनइतिएवमुक्तप्रकारेणयशःप्रभृति भिर्दशभिर्धर्मतनुभिरहिंसादिभिर्धर्मद्वारैश्चोत्पन्नेनादृष्टेन शमादिपंचकानुरक्तस्यषट्पदीजयफलं भद्रंकल्याणं मोक्षसुखाख्यमद्वयसच्चिदानंदमात्रं तेतवास्त्वितिशेषः । एवंप्रश्नानुवादमुखेन प्रतिपादितांब्रह्मविद्यां यशःसत्यंदमःशौचमित्यादिश्लोकत्रयेणोपसंहरन्नाख्यायिकामनुसरति जिज्ञासुस्त्वामिहागतइत्यादिना १० । ११ अरणीसहितमरण्योःसमारोपितमग्निं यद्वा अरण्योःसहितंसमुदायः अरणीद्वयमितियावत् १२ । १३ । १४ अरण्येगतानीतिशेषः नोऽस्मान् १५

१६ । १७ । १८ छंदतइच्छातः १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ आरणेयमरणीसंपुटम् २७ समुत्थानसमागतंभीमादीनांसमुत्थानंच धर्मराजेनसहसमागतंसंमेलनंचेति समाहारः पितुर्धर्मस्यपुत्रस्ययुधिष्ठिरस्यचात् समागतमितिसमासैकदेशभूतमप्यनुवर्तते २८ कदर्यभावेकार्पण्ये सदाख्यानंशुभाख्यानम् २९ ॥ इत्यारण्यकेपर्वणिनीलकंठीये भारतभाव

॥ वैशंपायनउवाच ॥ ददानीत्येवभगवानुत्तरंप्रत्यपद्यत ॥ भूयश्चाश्वासयामासकौंतेयंसत्यविक्रमम् १६ यद्यपिस्वेनरूपेणचरिष्यथमहीमिमाम् ॥ नवोविज्ञा स्यतेकश्चित्त्रिषुलोकेषुभारत १७ वर्षंत्रयोदशमिदंमत्प्रसादात्कुरूद्वहाः ॥ विराटनगरेगूढाअविज्ञाताश्चरिष्यथ १८ यद्वःसंकल्पितंरूपंमनसायस्ययादृशम् ॥ तादृशंतादृशंसर्वेछंदतोधारयिष्यथ १९ अरणीसहितंचेदंब्राह्मणायप्रयच्छत ॥ जिज्ञासार्थंमयाह्येतदाहृतंमृगरूपिणा २० प्रवृणीष्वापरंसौम्यवरमिष्टंददा निते ॥ नतृप्यामिनरश्रेष्ठप्रयच्छन्वैवरांस्तथा २१ तृतीयंगृह्यतांपुत्रवरमप्रतिमंमहत् ॥ त्वंहिमत्प्रभवोराजन्विदुरश्चममांशजः २२ ॥ युधिष्ठिरउवाच ॥ देवदेवोमयादृष्टोभवान्साक्षात्सनातनः ॥ यंददासिवरंतुष्टस्तंग्रहीष्याम्यहंपितः २३ जयेयंलोभमोहौचक्रोधंचाहंसदाविभो ॥ दानेतपसिसत्येचमनोमेसततंभ वेत् २४ ॥ धर्मउवाच ॥ उपपन्नोगुणैरेतैःस्वभावेनासिपांडव ॥ भवान्धर्मःपुनश्चैवयथोक्तंतेभविष्यति २५ ॥ वैशंपायनउवाच ॥ इत्युक्त्वांतर्दधेधर्मोभग वाँल्लोकभावनः ॥ समेताःपांडवाश्चैवसुखसुप्तामनस्विनः २६ उपेत्यचाश्रमंवीराःसर्वएवगतक्लमाः ॥ आरणेयंददुस्तस्मैब्राह्मणायतपस्विने २७ इदंसमुत्थान समागतंमहत्पितुश्चपुत्रस्यचकीर्तिवर्धनम् ॥ पठन्नरःस्याद्विजितेंद्रियोवशीसपुत्रपौत्रःशतवर्षभाग्भवेत् २८ नचाप्यधर्मेनसुहृद्विभेदनेपरस्वहारेपरदारमर्शे ने ॥ कदर्यभावेनरमेन्मनःसदानृणांसदाख्यानमिदंविजानताम् २९ ॥ इतिश्रीमहाभारतेआरण्यकेपर्वणिआरणेयप० नकुलादिजीवनादिवरप्राप्तौचतुर्दशा धिकत्रिशततमोऽध्यायः ॥ ३१४ ॥ ॥ वैशंपायनउवाच ॥ धर्मेणतेऽभ्यनुज्ञाताःपांडवाःसत्यविक्रमाः ॥ अज्ञातवासंवत्स्यंतश्छन्नावर्षंत्रयोदशम् १ उपोपविष्टाविद्वांसःसहिताःसंशितव्रताः ॥ येतद्भक्तावसंतिस्मवनवासेतपस्विनः २ तानब्रुवन्महात्मानःस्थिताःप्रांजलयस्तदा ॥ अभ्यनुज्ञापयिष्यंतस्तं निवासंधृतव्रताः ३ विदितंभवतांसर्वंधार्तराष्ट्रैर्यथावयम् ॥ छद्मनाहृतराज्याश्चानयाश्चबहुशःकृताः ४ उषिताश्चवनेकृच्छ्रेयंद्वादशवत्सरान् ॥ अज्ञातवास समयंशेषंवर्षंत्रयोदशम् ५ तद्वसामोवयंछन्नास्तदनुज्ञातुमर्हथ ॥ सुयोधनश्चदुष्टात्माकर्णश्चसहसौबलः ६ जानंतोविषमंकुर्युरस्मास्वत्यंतवैरिणः ॥ युक्तचारा श्चयुक्ताश्चपौरस्यस्वजनस्यच ७ अपिनस्तद्भवेद्भूयोयद्वयंब्राह्मणैःसह ॥ समस्ताःस्वेषुराष्ट्रेषुस्वराज्यस्थाभवेमहि ८ ॥ वैशंपायनउवाच ॥ इत्युक्त्वादुःखशो कार्तःशुचिर्धर्मसुतस्तदा ॥ संमूर्छितोऽभवद्राजासाश्रुकंठोयुधिष्ठिरः ९ तमथाश्वासयन्सर्वेब्राह्मणाभ्रातृभिःसह ॥ अथधौम्योऽब्रवीद्वाक्यंमहार्थंनृपतिंतदा १०

दीपिचतुर्दशाधिकत्रिशततमोऽध्यायः ॥ ३१४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ धर्मेणेति वत्स्यंतोवस्तुमिच्छंतः १ । २ स्थिताःस्वधर्मनिष्ठाः ३ । ४ । ५ । ६ युक्तायोजिताश्चारायै स्ते युक्ताअवहिताः पौरस्यस्वजनस्यचास्माभिराश्रितस्यविषमंकुर्युरतोराष्ट्रांतरेऽस्माभिर्गंतव्यमित्याशयः ७ । ८ अशुचिरार्तिग्रस्तत्वात् शुचिरित्येवपाठःस्वच्छः ९ । १०

११ । १२ उष्यवासंकृत्वा १३ । १४ । १५ । १६ । १७ । १८ । १९ । २०२१ नवचाल छलेनशत्रुवधंनांगीकृतवान् २१ । २३ । २४ । २५ । २६ आशषीको आशिषंप्रयुज्य २७

राजान्विद्वान्भवान्दांतःसत्यसंधोजितेंद्रियः ॥ नैवंविधाःप्रमुह्यंतेनराःकस्यांचिदापदि ११ देवैरप्यापदःप्राप्ताश्छन्नैश्चबहुशस्तथा ॥ तत्रतत्रसपत्नानांनि
ग्रहार्थंमहात्मभिः १२ इंद्रेणनिषधान्प्राप्यगिरिप्रस्थाश्रमेतदा ॥ छन्नेनोष्यकृतंकर्मद्विषतांचविनिग्रहे १३ विष्णुनाऽश्वशिरःप्राप्यतथाऽदित्यानिवस्य
ता ॥ गर्भेवधार्थंदैत्यानामज्ञातेनोषितंचिरम् १४ प्राप्यवामनरूपेणप्रच्छन्नंब्रह्मरूपिणा ॥ बलेर्यथाहृतंराज्यंविक्रमैस्तच्चतेश्रुतम् १५ हुताशनेनयच्चापःप्रवि
श्यच्छन्नमासता ॥ विबुधानांकृतंकर्मतच्चसर्वंश्रुतंत्वया १६ प्रच्छन्नंचापिधर्मज्ञहरिणाऽरिविनिग्रहे ॥ वज्रंप्रविश्यशक्रस्ययत्कृतंतच्चतेश्रुम् १७ और्वेणत्रस
ताच्छन्नमूरौब्रह्मर्षिणातदा ॥ यत्कृतंतातदेवेषुकर्मतत्तेऽनघश्रुतम् ॥ १८ एवंविवस्वतातातच्छन्नेनोत्तमतेजसा ॥ निर्दग्धाःशात्रवाःसर्वेवसताभुविसर्व
शः १९ विष्णुनावसताचापिगृहेदशरथस्यवै ॥ दशग्रीवोहतश्छन्नंसंयुगेभीमकर्मणा २० एवमेतमहात्मानःप्रच्छन्नास्तत्रतत्रह ॥ अजयञ्छात्रवान्युद्धेतथात्व
मपिजेष्यसि २१ तथाधौम्येनधर्मज्ञोवाक्यैःसंपरितोषितः ॥ शास्त्रबुद्ध्यास्वबुद्ध्याचनचचालयुधिष्ठिरः २२ अथाब्रवीन्महाबाहुर्भीमसेनोमहाबलः ॥ रा
जानंबलिनांश्रेष्ठोगिरासंपरिहर्षयन् २३ अवेक्षयामहाराजतवगांडीवधन्वना ॥ धर्मानुगतयाबुद्ध्यानकिंचित्साहसंकृतम् २४ सहदेवोमयानित्यंनकुलश्चनिवा
रितौ ॥ शक्तौविध्वंसनेतेषांशत्रूणांभीमविक्रमौ २५ नवयंतत्प्रहास्यामोयस्मिन्मोक्ष्यतिनोभवान् ॥ भवान्विधत्तांतत्सर्वंक्षिप्रंजेष्यामहेरिपून् २६ इत्युक्तेभी
मसेनेनब्राह्मणाःपरमाशिषा ॥ उक्त्वाचापृच्छ्यभरतान्यथास्वान्स्वान्ययुर्गृहान् २७ सर्वेवेदविदोमुख्यायतयोमुनयस्तथा ॥ आसेदुस्तेयथान्यायंपुनर्दर्शन
कांक्षया २८ सहधौम्येनविद्वांसस्तथापंचचपांडवाः ॥ उत्थायप्रययुर्वीराःकृष्णामादायधन्विनः २९ क्रोशमात्रमुपागम्यतस्माद्देशान्निमित्ततः ॥ श्वोभूतेमनु
जव्याघ्राश्छन्नवासार्थमुद्यताः ३० पृथक्शास्त्रविदःसर्वेसर्वेमंत्रविशारदाः ॥ संधिविग्रहकालज्ञामंत्रायसमुपाविशन् ३१ ॥ इतिश्रीमहाभारतेशतसाहस्र्यांसं
हितायांवैयासक्यांआरण्यकेपर्वणिआरणेयपर्वणिअज्ञातवासमंत्रणेपंचदशाधिकत्रिशततमोऽध्यायः ॥ ३१५ ॥ ध ॥ आरणेयपर्वसमाप्तम् ॥ समाप्तंचेदमार
ण्यकंपर्वेति ॥ ॥ ध ॥ ॥ इदमारण्यकंश्रुत्वामहापापैःप्रमुच्यते ॥ अधनोधनमाप्नोतिपुत्रपौत्रसमन्वितः १ यंयंप्रार्थयतेकामंतंतंप्राप्नोत्यसंशयम् ॥
नारीवापुरुषोवापिऽशुचिःप्रयतमानसः २ आरण्यकेश्रुतेऽधीतेब्राह्मणान्पायसादिभिः ॥ भोजयेद्वस्त्रगोस्वर्णदानैरत्नैःप्रपूजितान् ३ ब्राह्मणेषुचतुष्टेषुसंतुष्टाः
पांडुनंदनाः ॥ ब्रह्माविष्णुस्तथारुद्रःशक्रोदेवगणास्तथा ४

२८ । २९ । ३० मंत्रायविचारार्थं ३१ ॥२५५॥


॥ इतिश्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकंठस्य कृतौ भारतभावदीपे आरण्यपर्वार्थप्रकाशे पंचदशाधिकत्रिशततमोऽध्यायः ॥ ३१५ ॥ ॥ ७ ॥

भूतानिमुनयोदेव्यस्तथापितृगणाश्चये ॥ वाचकंपूजयेच्छक्त्यावस्त्रैःस्वर्णभूषणैः ५ विशेषतस्तुकपिलादेयातुजपपाठके ॥ कांस्यदोहारौप्यखुरास्वर्णशृंगीस
भूषणा ॥ पांडूनांपरितोषार्थंदद्याद्दन्नंद्विजातये ६ आरण्यकाख्यमाख्यानंश्रृणुयाद्योनरोत्तमः ॥ ससर्वकाममाप्नोतिपुनःस्वर्गतिमाप्नुयात् ७ ॥ इत्यारण्यकश्र
वणमहिमादानविधिश्चसमाप्तः ॥ ॥ अस्मिन्पर्वणिवृत्तांताः ॥ पांडवप्रवाजनम् ॥ पौरानुगमनम् ॥ पौरवाक्यंपौरविसर्जनंच ॥ ब्राह्मणानुगमनम् ॥ युधि
ष्ठिरचिंता ॥ शौनकवाक्यम् ॥ धौम्यस्तवः ॥ आदित्यनामाष्टशतम् ॥ विदुरनिर्वासनम् ॥ विदुरागमनम् ॥ धृतराष्ट्रस्यसंतापः ॥ व्यासागमनम् ॥ सुरभीं
द्रसंवादः ॥ अर्जुनवाक्यम् ॥ भीमसेनवाक्यम् ॥ व्यासदर्शनम् ॥ कौंतेयगमनम् ॥ लोकपालागमनम् ॥ विद्यालाभः ॥ शस्त्रप्राप्तिः ॥ किरातयुद्धम् ॥
इंद्रलोकगमनम् ॥ नलोपाख्यानम् ॥ अक्षज्ञानप्राप्तिः ॥ नारदागमनम् ॥ पुलस्त्यतीर्थयात्रा ॥ लोमशागमनम् ॥ तत्तीर्थयात्राप्रस्थानम् ॥ अगस्त्यप्र
भावः ॥ विंध्यशैलचरितम् ॥ वातापिनाशनम् ॥ समुद्रशोषणम् ॥ कालेयवधः ॥ सगरपुत्रविनाशः ॥ गंगावतारः ॥ ऋष्यशृंगोपाख्यानम् ॥ वृष्णि
पांचालागमनम् ॥ हलधरवाक्यम् ॥ वासुदेववाक्यम् ॥ जामदग्न्यचरितम् ॥ सौकन्योपाख्यानम् ॥ श्येनकपोतीयम् ॥ अष्टावक्रीयम् ॥ गंधमादनप्र
वेशः ॥ औत्पातिकम् ॥ घटोत्कचगमनम् ॥ जटासुरवधः ॥ आर्ष्टिषेणाश्रमनिवासः ॥ हनूमद्भीमसमागमः ॥ पुष्पाभिहरणम् ॥ यक्षयुद्धम् ॥ वैश्रवण
समागमनम् ॥ निवातकवचवधः ॥ अर्जुनागमनम् ॥ शस्त्रदर्शनम् ॥ आजगरम् ॥ काम्यकागमनम् ॥ वासुदेवसत्यभामागमनम् ॥ नारदागमनम् ॥
मार्कंडेयागमनम् ॥ मार्कंडेयसमास्याभविष्यम् ॥ ब्राह्मणमाहात्म्यम् ॥ धुंधुमारोपाख्यानम् ॥ सरस्वतीतार्क्ष्यसंवादः ॥ मनुचरितम् ॥ मंडूकोपाख्यानम् ॥
पतिव्रतोपाख्यानम् ॥ धर्मव्याधोपाख्यानम् ॥ मधुकैटभोपाख्यानम् ॥ द्रौपदीसत्यभामासंवादः ॥ घोषयात्रादुर्योधनकर्म ॥ प्रावृड्वर्णनम् ॥ इंद्रद्युम्नो
पाख्यानम् ॥ आंगिरसं स्कंदजननम् ॥ धार्तराष्ट्रयज्ञः ॥ व्यासदर्शनम् ॥ मृगस्वप्नदर्शनम् ॥ व्रीहिद्रौणिकम् ॥ द्रौपदीप्रमाथः ॥ दुर्वासउपाख्यानम् ॥
रामोपाख्यानम् ॥ सावित्र्युपाख्यानम् ॥ कुंडलाहरणम् ॥ आरणेययक्षप्रश्नाः ॥ समाप्तावृत्तांताः ॥ अस्याग्रेविराटपर्वभविष्यति तस्यायमाद्यःश्लोकः ॥
॥ जनमेजयउवाच ॥ कथंविराटनगरेममपूर्वपितामहाः ॥ अज्ञातवासमुषितादुर्योधनभयार्दिताः ॥ १ ॥

यद्यपिवनपर्वणिएकोनसप्तत्यधिकद्विशताध्यायाआदिपर्वणिसूत्राध्यायेलिखितास्तथाऽप्यत्रलिपिकरप्रमादादध्यायवृद्धिर्जाताकुत्रवृद्धिर्न
तन्निश्चयोनभवतीतिज्ञेयं श्लोकसंख्यायाअप्याधिक्यंतथैवबोध्यम् ॥

॥ इति श्रीमहाभारते वनपर्व समाप्तम् ॥

॥ अथ श्रीमहाभारते विराटपर्व प्रारंभः ॥



॥ श्रीगणेशायनमः ॥ श्रीमल्लारयेनमः ॥ श्रीमद्गोपालमानभ्यप्राचीनाचार्यवर्त्मना ॥ विराटपर्वप्रद्योतीभावदीपोवितन्यते ॥ १ ॥ तत्रपूर्वस्मिन्पर्वणि'दिष्ट्यापंचगुरुकोऽसिदिष्ट्यातेषट्पदी
जिता । द्वेपूर्वेमध्यमेद्वेचद्वेचांत्येसांपरायिके'। इति'शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वाऽऽत्मन्येवात्मानंपश्यति' इतिश्रुतिप्रसिद्धेष्वात्मदर्शनसाधनेषु शमादिषुरक्तः षडूर्मिलक्षणांषट्पदीं
जातमात्रस्याशनापिपासे प्ररूढस्यशोकमोहौ वृद्धस्यजरामृत्यूइति लोके।'योऽशनायापिपासेशोकंमोहंजरांमृत्युमत्येति'इतिवेदेचप्रसिद्धांजयतीत्युक्तं तांजितवतांत्वव्यक्तलिंगेनस्थेयं । आत्यं
तिक्यांकृतकृत्यतायांतु व्यक्तलिंगेनापिभाव्यमित्येतत्पांडवाचरणप्रदर्शनेनदर्शयितुंविराटपर्वारभते । तत्र'वर्षंत्रयोदशमिदंमत्प्रसादात्कुरूद्वहाः।विराटनगरेगूढा अविज्ञाताश्चरिष्यथ'इतिमाक

॥ श्रीगणेशायनमः ॥ श्रीवेदव्यासायनमः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींचैवततोजयमुदीरयेत् १ ॥ जनमेजयउवाच ॥ कथं
विराटनगरेमम पूर्वपितामहाः ॥ अज्ञातवासमुषितादुर्योधनभयार्दिताः २ पतिव्रतामहाभागासततंब्रह्मवादिनी ॥ द्रौपदीचकथंब्रह्मन्नज्ञातादुःखिताऽवसत्
३ ॥ वैशंपायनउवाच ॥ यथाविराटनगरेतवपूर्वपितामहाः ॥ अज्ञातवासमुषितास्तच्छृणुष्वनराधिप ४ तथासतुवरांल्लब्ध्वाधर्मोधर्मभृतांवरः ॥ गत्वाऽऽ
श्रमंब्राह्मणेभ्यआचख्यौसर्वमेवतत् ५ कथयित्वातुतत्सर्वंब्राह्मणेभ्योयुधिष्ठिरः ॥ अरणीसहितंतस्मैब्राह्मणायन्यवेदयत् ६ ततोयुधिष्ठिरोराजाधर्मपुत्रोमहा
मनाः ॥ संनिवर्त्यानुजान्सर्वानितिहोवाचभारत ७ द्वादशेमानिवर्षाणिराज्यविप्रोषितावयम् ॥ त्रयोदशोऽयंसंप्राप्तःकृच्छ्रात्परमदुर्वसः ८ ससाधुकौंतेयइतो
वासमर्जुनरोचय ॥ संवत्सरमिमंयत्रवसेमाविदिताःपरैः ९ ॥ अर्जुनउवाच ॥ तस्यैववरदानेनधर्मस्यमनुजाधिप ॥ अज्ञाताविचरिष्यामोनराणांनात्रसंशयः
१० तत्रवासायराष्ट्राणिकीर्तयिष्यामिकानिचित् ॥ रमणीयानिगुप्तानितेषांकिंचित्स्मरोचय ११ संतिरम्याजनपदाबह्वन्नाःपरितःकुरून् ॥ पंचालाश्चेदि
मत्स्याश्चशूरसेनाःपटच्चराः १२ दशार्णानवराष्ट्राश्चमल्लाःशाल्वायुगंधराः ॥ कुंतिराष्ट्रंचविपुलंसुराष्ट्रावंतयस्तथा १३ एतेषांकतमोराजन्निवासस्तवरोचते ॥
यत्रवत्स्यामहेराजन्संवत्सरमिमंवयम् १४ ॥ युधिष्ठिरउवाच ॥ श्रुतमेतन्महाबाहोयथासभगवान्प्रभुः ॥ अब्रवीत्सर्वभूतेशस्तत्तथानतदन्यथा १५ अवश्यं
त्वेववासार्थंरमणीयंशिवंसुखम् ॥ संमंत्र्यसहितैःसर्वैर्वस्तव्यमकुतोभयैः १६ मत्स्योविराटोबलवानभिरक्तोऽथपांडवान् ॥ धर्मशीलोवदान्यश्चवृद्धश्चसततंप्रि
यः १७ विराटनगरेतातसंवत्सरमिमंवयम् ॥ कुर्वंतस्तस्यकर्माणिविहरिष्यामभारत १८

यितधर्मवाक्यार्थमनुवदन् जनमेजयउवाच कथमिति पूर्वःपितापरीक्षित् तस्यपितामहाः अज्ञातवासंयथास्यात्तथाकथंउषिताः वासंकृतवंतः । समूलघातंन्यवधीदितिवत्कषादित्वाद्वसतेर
८१ नुप्रयोगः वासमितिणमुलंतम् २ ब्रह्मवादिनीश्रीकृष्णकीर्त्तनशीला ३ । ४ । ५ अरणीसहितंअरण्योर्मिथुनं । अरणीसहितंमंथमितिपाठे मंथोऽग्निनिर्मथनदंडस्तमरणीभ्यांसहितं ब्राह्मणाय
न्यवेदयदित्यर्थः ६ संनिवर्त्यएकत्रआनीय । अत्रवर्ततिर्गत्यर्थः नचपुनरावर्त्ततइत्यादिप्रयोगदर्शनात् । सांनिकृष्येतिपाठेऽपिसएवार्थः ७ अयंसंवत्सरः संवत्सरमिमामितिवाक्यशेषात् ८
वत्स्यामइतिपाठेअविदिताइतिच्छेदः ९ नराणामज्ञाताइतिसंबंधः १० । ११ । १२ । १३ । १४ प्रभुर्धर्मः । 'यद्यपिस्वेनरूपेणचरिष्यथमहीमिमां ॥ नवोविज्ञायतेकश्चित्रिषुलोकेषुकश्च
न'इत्यब्रवीत् १५ यद्यप्येवंतथापि कश्चित्प्रच्छन्नतयावस्तव्यमेवेत्याह अवश्यंत्वेवेति १६ । १७ । १८

वक्ष्यामहेनिर्वोढुंशक्ष्यामहेइति वेहरिदंरूपं प्रवृत्तप्रत्येकमितिशेषः १९ । २० । २१ । २२ । २३ सभास्तारःसभ्यः । 'समासदःसमास्तारा:'इत्यमरः । कंकोनामतः ।'कंकश्छत्रद्विजेख्यातोलोहपृष्ठकृतांतयोः'इतिविश्वकोशात् । स्वस्यकृतांतसूनुत्वेनआत्मावैपुत्रनामासीतिश्रुतेस्तदनन्यत्वात् तन्नाम्नोचारणेमिथ्यावादित्वंनभविष्यतीतिभावः । मताक्षःबृहदश्वात्प्राप्ताक्षहृदयस्तत्वः प्रियदेवनःक्रीडाप्रियः २४ दांतान्गजदंतमयान् । दंतःपर्वतसानुतत्सदृशान्वा शारीन् निर्वर्त्स्यामिचालयिष्यामि । 'दंतःसानुनिकथ्यते'इतिविश्वः । तानेवचतुर्वर्णानाह वैदूर्यान्हरितमणिमयान् नीलान् । कांचनान् सौवर्णान्पीतान् । ज्योतींषिचरसाश्च ज्योतीरसास्तैःसह ज्योतिःशब्देनात्रलोहितंलक्ष्यते । 'यदग्नेरोहितंरूपंतेजसस्तद्रूपम्'इतिश्रुतेः ज्योतीरूपाःलोहिताः । रसः पारदःतद्रूपाःश्वेताः । तैरुभयैःसहचतुर्वर्णसंपत्तिः तथा फलैः शारीस्थापनार्थानिकोष्ठकानिकाष्ठादिमयानिफलकानितैःसह तेषांनिर्वर्तनेकरणमाह कृष्णाक्षान्कृष्णाःअक्षाःपाशाः येषांचालनार्थमितिकृष्णाक्षास्तान् शारीनेव तथालोहिताक्षानित्यपि २५ । २६ युधिष्ठिराख्यस्यशरीरस्ययथाप्राणउत्थापकस्तद्वद्विराटमाऽपीतिप्राणसाम्येन युधिष्ठिरात्मैवविवक्षितइतिभावः । अनुयोक्ष्यते प्रश्नंकरिष्यति २७ । २८ ॥ इतिश्रीमहाभारते विराटपर्वणि नीलकंठीये भारतभावदीपे प्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ पौरोगवः पुरःपुरस्तादगावो रश्मयोयस्यसपुरोगुर्वायुः पिंडोत्पत्तौहिप्रथमं रजोरेतसोःकल्के वायुरश्मिभूतःप्राणआविर्भवति पश्चादिंद्रियांतराणीतिशास्त्रप्रसिद्धं तस्यपुत्रःपौरोगवः । लोकेतुपौरोगवोमहानसाध्यक्षः ॥ १ ॥ बल्लवःसूपकारः एतदेवममान्वर्थनाम १ । २ । ३ । ४ ईश्वरःयथेष्टंविनियोगकर्ताऽतएवनृपोयथा तथाप्रियोऽहंलोकानांभविष्यामीत्युक्तम् ५ । ६

यानियानिचकर्माणितस्यवक्ष्यामहेवयम् ॥ आसाद्यमत्स्यंतत्कर्मप्रवृत्तकुरुनंदनाः १९ ॥ अर्जुनउवाच ॥ नरदेवकथंतस्यराष्ट्रेकर्मकरिष्यसि ॥ विराटनगरेसाधोरंस्यसेकेनकर्मणा २० मृदुर्वदान्योह्रीमांश्चधार्मिकःसत्यविक्रमः ॥ राजंस्त्वमापदाऽऽक्लिष्टःकिंकरिष्यसिपांडव २१ नदुःखमुचितंकिंचिद्राजावेदयथा जनः ॥ सइमामापदंप्राप्यकथंघोरांतरिष्यसि २२ ॥ युधिष्ठिरउवाच ॥ शृणुध्वंयत्करिष्यामिकर्मवैकुरुनंदनाः ॥ विराटमनुसंप्राप्यराजानंपुरुषर्षभाः २३ सभास्तारोभविष्यामितस्यराज्ञोमहात्मनः ॥ कंकोनामद्विजोभूत्वामताक्षःप्रियदेवनः २४ वैदूर्यान्कांचनान्दांतान्फलैर्ज्योतीरसैःसह ॥ कृष्णाक्षाँल्लोहिताक्षांश्चनिर्वर्त्स्यामिमनोरमान् २५ विराटराजंरमयन्सामात्यंसहबांधवम् ॥ नचमांवेत्स्यतेकश्चित्तोषयिष्येचतंनृपम् २६ आसंयुधिष्ठिरस्याहंपुराप्राणसमःसखा ॥ इतिवक्ष्यामिराजानंयदिमांसोऽनुयोक्ष्यते २७ इत्येतद्वोमयाख्यातंविहरिष्याम्यहंयथा ॥ वृकोदरविराटेत्वंरंस्यसेकेनहेतुना २८ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणियुधिष्ठिरादिमंत्रणेप्रथमोऽध्यायः ॥ १ ॥ ॥ भीमसेनउवाच ॥ पौरोगवोब्रुवाणोऽहंबल्लवोनामभारत ॥ उपस्थास्यामिराजानंविराटमितिमेमतिः १ सूपानस्यकरिष्यामिकुशलोऽस्मिमहानसे ॥ कृतपूर्वाणियान्यस्यव्यंजनानिसुशिक्षितैः २ तान्यप्यभिभविष्यामिप्रीतिंसंजनयन्नहम् ॥ आहरिष्यामिदारूणांनिचयान्महतोऽपिच ३ यत्प्रेक्ष्यविपुलंकर्मराजासंयोक्ष्यतेसमाम् ॥ अमानुषाणिकुर्वाणस्तानिकर्माणिभारत ४ राज्ञस्तस्यपरेप्रेष्यामंस्यंतेमांयथानृपम् ॥ भक्ष्यान्नरसपानानांभविष्यामितथेश्वरः ५ द्विपावाबलिनोराजन्वृषभावामहाबलाः ॥ विनिग्राह्यायदिमयानिग्रहीष्यामितानपि ६

नियोत्स्यामि निहीनंयथास्यात्तथामारणवर्जयोत्स्यामि ७ तदेवाह नत्विति ८ आरालिकोगोविकर्तासूपकर्तानियोधकइति अरालाःमत्तगजास्तैःसहक्रीडतितान्जयतिवा आरालिकः । 'अरालःकुटिलेसर्जरसेवैमत्तदंतिनि'इतिविश्वः । गोविकर्तागवांमहतांबलीवर्दानामपिविकर्ता दमनेनविकृतिजनकः । वृषभान्वामहाबलान्निग्रहीष्यामीत्युपक्रमात् । सूपकर्ता मुद्गादिविकारकर्ता । पक्षेसुतरामुपकर्ता । नियोधकःमारणवर्जमल्लयुद्धकर्ता । पक्षेनितरांयोधकः । विषमश्लोकीकृतस्तु आरालिकः प्रकृतीनांगुणदोषसूचको हस्तिदमकोवा । तथाचविक्रमादित्यः'आरालिकःसूचनकोहस्तिनांदमकस्तथा'इति । गोविकर्तागवांवाचांविकर्तागद्यपद्यादिभेदानांप्रयोक्तेति । केचित्तु'आरालिकोऽन्नपाकीस्यात्सूपकर्तातुशाककृत्' ॥ तैलान्नंपचतेयस्तुगोविकर्तासउच्यते'इत्यप्युदाहरंतितत्रमूलंद्रष्टव्यं ९ । १० । ११ । १२ । १३ वासुकेःस्वसारमुलूपींहृतवान् सौंदर्येणेतिशेषः १४ सर्पाणांसरीसृपाणां आशीविषोदंष्ट्राविषः १५ १६ । १७ । १८ । १९ मानुषेषुअद्भुतंमानुषाद्भुतं २० । २१ गवांवृषभाणांस्कंधेइव वहः युगवर्षणजःकिणःकृतः । एतस्यैवगोपनंकठिनमितिभावः २२ । २३ पततांपक्षिणां २४ षंढकोऽस्मीति षंढोगोपतिःश्रीगोपालस्तस्यप्रतिकृतिरवतारांतरंषंढकः कृष्णसखाऽस्मीत्यर्थः । पक्षेक्लीबः । 'षंढोवर्षवरेक्लीबेगोपतौवंध्यपुरुषे'इतिविश्वः । संवर्तुंपिधातुं २५ । २६

येचकेचिन्नियोत्स्यंतिसमाजेषुनियोधकाः ॥ तानहंहिनियोत्स्यामिरतिंतस्यविवर्द्धयन् ७ नत्वेतान्युद्ध्यमानान्वैहनिष्यामिकथंचन ॥ तथैतान्पातयिष्यामियथायास्यंतिनक्षयम् ८ आरालिकोगोविकर्तासूपकर्तानियोधकः ॥ आसंयुधिष्ठिरस्याहमितिवक्ष्यामिपृच्छतः ९ आत्मानमात्मनारक्षंश्चरिष्यामिविशांपते ॥ इत्येतत्प्रतिजानामिविहरिष्याम्यहंयथा १० ॥ युधिष्ठिरउवाच ॥ यमग्निर्ब्राह्मणोभूत्वासमागच्छन्नृणांवरम् ॥ दिधक्षुःखांडवंदावंदाशार्हसहितंपुरा ॥ ११ महाबलंमहाबाहुमजितंकुरुनंदनम् ॥ सोऽयंकिंकर्मकौंतेयःकरिष्यतिधनंजयः १२ योऽयमासाद्यतंदावंतर्पयामासपावकम् ॥ विजित्यैकरथेनेंद्रंहत्वापन्नगराक्षसान् १३ वासुकेःसर्पराजस्यस्वसारंहृतवांश्चयः ॥ श्रेष्ठोयःप्रतियोधानांसोऽर्जुनःकिंकरिष्यति १४ सूर्यःप्रतपतांश्रेष्ठोद्विपदांब्राह्मणोवरः ॥ आशीविषश्चसर्पाणामग्निस्तेजस्विनांवरः १५ आयुधानांवरंवज्रंककुद्मीचगवांवरः ॥ ह्रदानामुदधिःश्रेष्ठःपर्जन्योवर्षतांवरः १६ धृतराष्ट्रश्चनागानांहस्तिष्वैरावणोवरः ॥ पुत्रःप्रियाणामधिकोभार्याचसुहृदांवरा १७ यथैतानिविशिष्टानिजात्यांजात्यांवृकोदर ॥ एवंयुवागुडाकेशःश्रेष्ठःसर्वधनुष्मताम् १८ सोऽयमिंद्रादनवरोवासुदेवान्महाद्युतिः ॥ गांडीवधन्वाबीभत्सुःश्वेताश्वःकिंकरिष्यति १९ उषित्वापंचवर्षाणिसहस्राक्षस्यवेश्मनि ॥ अस्त्रयोगंसमासाद्यस्ववीर्यान्मानुषाद्भुतम् ॥ दिव्यान्यस्त्राणिचाप्तानिदेवरूपेणभास्वता २० यंमन्येद्वादशंरुद्रमादित्यानांत्रयोदशम् ॥ वसूनांनवमंमन्येग्रहाणांदशमंतथा २१ यस्यबाहूसमौदीर्घौज्याघातकठिनत्वचौ ॥ दक्षिणेचैवसव्येचगवामिववहःकृतः २२ हिमवानिवशैलानांसमुद्रःसरितामिव ॥ त्रिदशानांयथाशक्रोवसूनामिवहव्यवाट् २३ मृगाणामिवशार्दूलोगरुडःपततामिव ॥ वरःसन्नह्यमानानांसोऽर्जुनःकिंकरिष्यति २४ ॥ अर्जुनउवाच ॥ प्रतिज्ञांषंढकोऽस्मीतिकरिष्यामिमहीपते ॥ ज्याघातौहिमहांतौमेसंवर्तुंनृपदुष्करौ २५ वलयैश्छादयिष्यामिबाहूकिणकृताविमौ ॥ कर्णयोःप्रतिमुच्याहंकुंडलेज्वलनप्रभे २६

पिनद्धाःकंबवःशंखवलयानियेनसःपिनद्धकंबुः तृतीयांप्रकृतिंस्त्रीपुंसापेक्षया क्लीबत्वं तृतीयंगतःप्राप्तः नरइतिरलयोर्डलयोश्चाभेदान्नरः बृहंश्चासौनरश्चेतिनारायणसख आद्योनरइत्यर्थः स्त्रीत्वंस्वरूपगोपनार्थम् २७ आख्यायिकाःपूर्वराजचरितानि २८ । २९ समुदाचारंसमीचीनमुत्कृष्टतरंमहावदान्यत्वादिरूपं ताभिःकृतंबहुकर्मचवदन् माययाकपटक्लीबवेषेणआत्मानंशरीरं आत्मनाबुद्ध्या ३० परितश्चारयितुंशीलंयस्याःसापरिचारिणीसैवपरिचारिका द्रौपद्याःभर्तेतिगूढो भिसंधिः । पक्षेपरिचारिकासेवाकर्त्री ३१ । ३२ ॥ इतिश्रीमहाभार

पिनद्धकंबुःपाणिभ्यांतृतीयांप्रकृतिंगतः ॥ वेणीकृतशिरारा जन्नाम्नाचैवबृहन्नला २७ पठन्नाख्यायिकाश्चैवस्त्रीभावेनपुनःपुनः ॥ रमयिष्येमहीपालमन्यांश्चांतःपुरेजनान् २८ गीतंनृत्यंविचित्रंचवादित्रंविविधंतथा ॥ शिक्षयिष्याम्यहंराजन्विराटस्यपुरस्त्रियः २९ प्रजानांसमुदाचारंबहुकर्मकृतंवदन् ॥ छादयिष्यामिकौंतेयमाययात्मानमात्मना ३० युधिष्ठिरस्यगेहेवैद्रौपद्याःपरिचारिका ॥ उषिताऽस्मीतिवक्ष्यामिपृष्टोराज्ञाचपांडव ३१ एतेनविधिनाछन्नःकृतकेनयथाऽनलः ॥ विहरिष्यामिराजेंद्रविराटभवनेसुखम् ३२ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणियुधिष्ठिरादिमंत्रणेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ वैशंपायनउवाच ॥ इत्येवमुक्त्वापुरुषप्रवीरस्तथाऽर्जुनोधर्मभृतांवरिष्ठः ॥ वाक्यंतथाऽसौविररामभूयोनृपोऽपरंभ्रातरमाबभाषे १ ॥ युधिष्ठिरउवाच ॥ किंत्वंनकुलकुर्वाणस्तत्रतातचरिष्यसि ॥ कर्मतत्त्वंसमाचक्ष्वराज्येतस्यमहीपतेः ॥ सुकुमारश्चशूरश्चदर्शनीयःसुखोचितः २ ॥ नकुलउवाच ॥ अश्वबंधोभविष्यामिविराटनृपतेरहम् ॥ सर्वथाज्ञानसंपन्नःकुशलःपरिरक्षणे ३ ग्रंथिकोनामनाम्नाऽहंकर्मैतत्सुप्रियंमम ॥ कुशलोऽस्म्यश्वशिक्षायांतथैवाश्वचिकित्सने ॥ प्रियाश्चसततंमेऽश्वाःकुरुराजयथातव ४ येमामामंत्रयिष्यंतिविराटनगरेजनाः ॥ तेभ्यएवंप्रवक्ष्यामिविहरिष्याम्यहंयथा ५ पांडवेनपुरातातअश्वेष्वधिकृतःपुरा ॥ विराटनगरेछन्नश्चरिष्यामिमहीपते ६ ॥ युधिष्ठिरउवाच ॥ सहदेवकथंतस्यसमीपेविहरिष्यसि ॥ किंवात्वंकर्मकुर्वाणःप्रच्छन्नोविहरिष्यसि ७ ॥ सहदेवउवाच ॥ गोसंख्याताभविष्यामिविराटस्यमहीपतेः ॥ प्रतिषेद्धाचदोग्धाचसंख्यानेकुशलोगवाम् ८ तंतिपालइतिख्यातोनाम्नाऽहंविदितस्त्वथ ॥ निपुणंचचरिष्यामिव्येतुतेमानसोज्वरः ९ अहंहिसततंगोषुभवताप्रहितःपुरा ॥ तत्रमेकौशलंसर्वमवबुद्धंविशांपते १० लक्षणंचरितंचापिगवांयच्चापिमंगलम् ॥ तत्सर्वंमेसुविदितमन्यच्चापिमहीपते ११ वृषभानपिजानामिराजन्पूजितलक्षणान् ॥ येषांमूत्रमुपाघ्रायअपिवंध्याप्रसूयते १२ सोऽहमेवंचरिष्यामिप्रीतिरत्रहिमेसदा ॥ नचमांवेत्स्यतेकश्चित्तोषयिष्येचपार्थिवम् १३

तेविराटपर्वणिनीलकंठीयेभारतभावदीपे द्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ इत्येवमिति १ । २ परिरक्षणेअश्वानामितिशेषः ३ ग्रंथान् आयुर्वेदंआध्वर्यवंचवेत्तीतिग्रंथिकोऽश्विनोःसुतत्वात् । 'अश्विनौवैदेवानांभिषजावश्विनावध्वर्यू'इतिश्रुतेः ४ । ५ अश्वेषु नास्तिश्चोयेषांतेशूराःसमरेतृणीकृतप्राणास्तेषुअधिकृतोमुख्यइतिगूढाशयः । पक्षेस्पष्टोऽर्थः ६ । ७ संख्यानेपरीक्षायां ८ तंतिपालः तंतिर्बलीवर्दा यस्यांदीर्घस्थूलरज्ज्वांवणिग्भिरल्पैर्दामभिर्बद्ध्यंतेसा प्रकृतोपयोगिनी । गूढाभिसंधौतुतंतिर्वाक् । 'तस्यवाकंतिर्नामानिदामानि'इतिश्रुतेर्वाक्पालः युष्मद्वचनार्थानुष्ठातेत्यर्थः ९ । १० । ११ । १२ । १३

इयंहीति माताकुलवृत्तिः आदिभूमिः गौर्वा । 'मातागौर्यादिजननीगोब्रह्माण्यादिभूमिषु'इतिमेदिनी । स्वसाअंबिका पार्वतीवत्पूज्येत्यर्थः । 'एषतेरुद्रभागःसहस्वस्राम्बिकयातंजुषस्वशरद्वाअस्यांबिकास्वसा'इतिमंत्रब्राह्मणदर्शनात् । 'जायागार्हपत्यःपुत्रोऽन्वाहार्यपचनः'इतितस्याअपिदेवतात्वेनसंस्तवात् । 'मातासत्यवतीभूमिर्घेनुर्ज्येष्ठास्वसाभवेत्'इत्यप्युदाहरंति १४ । १५ बालानित्यनूतना १६ यतोयस्मिन्दिनेजाता ततआरभ्यपाल्यादीन्भोगानेववेत्ति नक्लेशानित्यर्थः १७ सैरंध्रीति सीरंप्रतिसीरांतःपटःध्रियतेऽनयाऽस्येतिसीरंध्रासैवसैरंध्री स्वार्थेतद्धितः अंतःपुरपरिचारिकाराजभार्यावा । 'सैरंध्रीपरवेश्मस्थाशिल्पकृत्स्ववशास्त्रियां ॥ वर्णसंकरसंभूतस्त्रीमहिल्लिकयोरपि'इतिविश्वः । मतल्लिकयोरितिमेदिनीपाठः । आद्ये महिल्लिकाराजदाराः । द्वितीयेमतल्लिकाःप्रशस्तस्त्रियइति । दासीपक्षेअरक्षिताइतिच्छेदः स्ववशाइत्युक्तेःपक्षेरक्षिताइत्येव । भुजिष्यापालनीयापालयित्रीच । भुजपालनाभ्यवहारयोरित्यस्यरूपं । नैवमन्याःस्त्रियोरूपवतीर्यांतिप्राप्नुवंतिपश्यंतीतरेइत्यर्थः । दासीइतिभावः । पक्षेनैवंप्रकाशेयांतिसंचरंतीत्यर्थः १८ द्रौपद्याःपरिचारिकेतिराहोःशिरइतिवदभेदेऽपिभेदोपचारः द्रौपदीरूपायुधिष्ठिरस्यपरिचारिकेत्यर्थः १९ । २० । २१ । २२ । २३ ॥ इतिश्रीमहाभारतेवि० नी० भा० तृतीयोऽध्यायः ॥ ३ ॥ ॥ कर्माणीति १ अग्निहोत्राणिअग्निहोत्रपात्राण्यरणीसहितानि होमसाधनभूताधेनुर्वा २ । ३ । ४ नप्राज्ञायंतेतियथार्थमेव रहस्येवतेमत्स्यदेशेवस्तव्यमितिमंत्रितत्वात् ५ । ६ विहितंशास्त्रोक्तं ब्राह्मणादिषुउपस्थितेषु परिचर्यादिकंपांडवाःसर्वेजानंतीतिशेषः यानेविजययात्रायां प्रहरणेयुद्धे यद्यप्येवंतथाऽपिकिंचिद्वक्ष्यामीतिभावः ७

॥ युधिष्ठिरउवाच ॥ इयंहिनःप्रियाभार्याप्राणेभ्योऽपिगरीयसी ॥ मातेवपरिपाल्याचपूज्याज्येष्ठेवचस्वसा १४ केनस्मद्रौपदीकृष्णाकर्मणाविचरिष्यति ॥ नहिकिंचिद्विजानातिकर्मकर्तुंयथास्त्रियः १५ सुकुमारीचबालाचराजपुत्रीयशस्विनी ॥ पतिव्रतामहाभागाकथंनुविचरिष्यति १६ माल्यगंधानलंकारान्वस्त्राणिविविधानिच ॥ एतान्येवाभिजानातियतोजाताहिभामिनी १७ ॥ द्रौपद्युवाच ॥ सैरंध्र्योऽरक्षितालोकेभुजिष्याःसंतिभारत ॥ नैवमन्याःस्त्रियोयांतिइतिलोकस्यनिश्चयः ॥ साऽहंब्रुवाणासैरंध्रीकुशलाकेशकर्मणि १८ युधिष्ठिरस्यगेहेवैद्रौपद्याःपरिचारिका ॥ उषिताऽस्मीतिवक्ष्यामिपृष्टाराज्ञाचभारत १९ आत्मगुप्ताचरिष्यामियन्मांत्वंपरिपृच्छसि २० सुदेष्णांप्रत्युपस्थास्येराजभार्यांयशस्विनीम् ॥ सारक्षिष्यतिमांप्राप्तांमाभूत्तेदुःखमीदृशम् २१ ॥ युधिष्ठिरउवाच ॥ कल्याणंभाषसेकृष्णेकुलेजाताऽसिभामिनि ॥ नपापमभिजानासिसाध्वीसाधुव्रतेस्थिता २२ यथानदुर्हृदःपापाभवंतिसुखिनःपुनः ॥ कुर्यास्तत्त्वंहिकल्याणिलक्षयेयुर्नतेतथा २३ ॥ इतिश्रीमहाभा०विराटपर्वणिपांडवप्रवेशपर्वणियुधिष्ठिरादिमंत्रणेतृतीयोऽध्यायः ॥ ३ ॥ युधिष्ठिरउवाच ॥ कर्माण्युक्तानियुष्माभिर्यानियानिकरिष्यथ ॥ ममचापियथाबुद्धिरुचिताविधिनिश्चयात् १ पुरोहितोऽयमस्माकमग्निहोत्राणिरक्षतु ॥ सूदपौरोगवैःसार्द्धंद्रुपदस्यनिवेशने २ इंद्रसेनमुखाश्चेमेरथानादायकेवलान् ॥ यांतुद्वारवतींशीघ्रमितिमेवर्ततेमतिः ३ इमाश्चनार्योद्रौपद्याःसर्वाश्चपरिचारिकाः ॥ पंचालानेवगच्छंतुसूदपौरोगवैःसह ४ सर्वैरपिचवक्तव्यंनप्राज्ञायंतपांडवाः ॥ गताह्यस्मानपाहायसर्वेद्वैतवनादिति ५ ॥ वैशंपायनउवाच ॥ एवंतेऽन्योन्यमामंत्र्यकर्माण्युक्त्वापृथक्पृथक् ॥ धौम्यमामंत्रयामासुःसचतान्मंत्रमब्रवीत् ६ ॥ धौम्यउवाच ॥ विहितंपांडवाःसर्वंब्राह्मणेषुसुहृत्सुच ॥ यानेप्रहरणेचैवतथैवाग्निषुभारत ७

तदेवाह त्वयेति त्वयायुधिष्ठिरेण इदंलोकवृत्तं प्राकृतजनशीलं । अरक्ष्यमाणासुस्त्रीषुसाध्वीष्वपिजन्याप्यकल्पनं अतःकृष्णारक्ष्यैवेत्यर्थः ८ विद्वांसोऽपिसुहृद्भिःप्रीत्याऽवश्यंबोधनीयाए वेत्याह विदितेचापीति एवंसौहार्दप्रदर्शनेनधर्मादयोऽनुसृतामवंतीतिभावः ९ हंतेत्यनुकंपायां राजवसतिराजकुलेवासं तद्विधिमित्यर्थः १० दुर्वसंदुःखेनवस्तुंशक्यं ११ । १२ दृष्टद्वारः प्रतीहारद्वारानिवेद्यैवराजानंद्रष्टुमिच्छेन्नत्वननुज्ञातइत्यर्थः दिष्टेत्यपिपाठः पांठातरे रहस्येषुमंत्रकार्येषु नविश्वसेत् संमतोऽस्मीतिबुद्ध्यातत्रनगच्छेत् । पुत्रादिष्वपिअविश्वस्ताराजानोमंत्रविप्लवभयात्सद्योमारयेयुरितिभावः । तदेवेति परेणसहवैरंमाभूदितिपरासनंनान्विच्छेत् १३ यानंपरकीयमितिशेषः १४ दुष्टचारिणोदुष्टाचाराः यत्रयत्रद्यूतमद्यवेश्यादिस्थानेषुस्वनगरस्थपरकीयचारमंडलेयाआसीनमेनं द्यूतादिप्रियोऽयंपरैर्भेदितोऽयमितिशंकेरंस्तत्रनोपविशेत् । राजगामिपैशून्यभयादित्यर्थः १५ नानुशिष्यात्इदमित्थंकुर्वितिनाज्ञापयेत् तूष्णींमौनेन कालेपराक्रमसमये समभिपूजयेत्स्तुवीत १६ स्तुतिरप्यभूतार्थानकर्तव्येत्याह असूयंतीति दूषयंतीत्यर्थः १७ येंऽतःपुरचराः यांश्चराजाद्वेष्टि येचराज्ञोऽहिताद्वेष्टारस्तैः

त्वयारक्षाविधातव्याकृष्णायाःफाल्गुनेनच ॥ विदितंवोयथासर्वंलोकवृत्तमिदंतव ८ विदितेचापिवक्तव्यंसुहृद्भिरनुरागतः ॥ एषधर्मश्चकामश्च अर्थश्चैवसनातनः ९ अतोऽहमपिवक्ष्यामिहेतुमत्रनिबोधत ॥ हंतेमांराजवसतिंराजपुत्राब्रवीम्यहम् १० यथाराजकुलंप्राप्यसर्वान्दोषांस्तरिष्यथ ॥ दुर्वसंचैवकौरव्य जानताराजवेश्मनि ११ अमानितैर्मानितैर्वाअज्ञातैःपरिवत्सरम् ॥ ततश्चतुर्दशेवर्षेचरिष्यथयथासुखम् १२ दृष्टद्वारोलभेद्द्रष्टुंराजस्वेषुनविश्वसेत् ॥ तदेवासनमन्विच्छेद्यत्रनाभिपतेत्परः १३ योनयानंनपर्यंकंनपीठंनगजंरथम् ॥ आरोहेत्संमतोस्मीतिसराजवसतिंवसेत् १४ यत्रयत्रैनमासीनंशंकेरन्दुष्टचारिणः ॥ नतत्रोपविशेद्योवैसराजवसतिंवसेत् १५ नचानुशिष्याद्राजानमपृच्छंतंकदाचन ॥ तूष्णींत्वेनमुपासीतकालेसमभिपूजयेत् १६ असूयंतिहिराजानोजनाननृतवादिनः ॥ तथैवचावमन्यंतेमंत्रिणंवादिनंमृषा १७ नैषांदारेषुकुर्वीतमैत्रींप्राज्ञःकदाचन ॥ अंतःपुरचरायेचद्वेष्टियानहिताश्चये १८ विदितेचास्यकुर्वीतकार्याणिसुलघून्यपि ॥ एवंविचरतोराज्ञिनक्षतिर्जायतेक्वचित् १९ गच्छन्नपिपरांभूमिमपृष्टोह्यनियोजितः ॥ जात्यंधइवमन्येतमर्यादामनुचिंतयन् २० नहिपुत्रंननप्तारंनभ्रातरमरिंदमाः ॥ समतिक्रांतमर्यादंपूजयंतिनराधिपाः २१ यत्नाच्चोपचरेदेनमग्निवद्देववत्त्विह ॥ अनृतेनोपचीर्णोहिहन्यादेवनसंशयः २२ यद्यद्भर्ताऽनुयुंजीततत्तदेवानुवर्तयेत् ॥ प्रमादमवलेपंचकोपंचपरिवर्जयेत् २३ समर्थनासुसर्वासुहितंचप्रियमेवच ॥ संवर्णयेत्तदेवास्यप्रियादपिहितंभवेत् २४

सर्वैःसह मैत्रींनकुर्यात् १८ राज्ञिराजसन्निधौ विचारतोविचारपूर्वकंवसतोनक्षतिर्मानहान्यादिर्जायते १९ गच्छन्निति परांउत्कृष्टांभूमिंनित्यंगच्छन्नआसनार्थंप्राप्तवन् राज्ञाअपृष्टोऽसंभाषितोऽनियोजितः स्वेस्थानेउपविशेत्यनाज्ञप्तो जात्यंधइवतत्स्थानमपश्यंतमिवात्मानंमन्येत यावद्राजानसंभाषते नाप्यासनंदिशति तावत्प्रतीक्षेतैवेत्यर्थः २० अन्यथादोषमाह नहीति २१ यत्नादिति अतिसान्निध्यादग्निरिवराजादहति अवज्ञानादेवइवसर्वंहरतीत्यर्थः । अनृतेनकूटकार्षापणादिनाउपचीर्णआराधितःहन्यादेव २२ भर्तारंराजा अनुयुंजीतआज्ञापयेत्पृच्छेद्वा अनुवर्तयेत् कुर्यात्वदेद्वा । प्रमादं अनवधानतां अवलेपंशौर्यादिगर्वं २३ समर्थनासुकार्याकार्यपरीक्षासु हितंपरिणामसुखं प्रियंश्रुतिसुखंचवदेत् । उभयोःसमुच्चयासंभवे प्रियादपिहितंभवेत् प्रियंत्यक्त्वाऽपियद्धितंभवेत्तदेववदेन्नतुहितविरोधिप्रियंवदेदित्यर्थः २४

॥ ३ ॥

अस्यसर्वार्थेषुसर्वेष्वर्थसाधनेषु अनुकूलोयत्नवान्भवेत् नतुप्रातिकूल्यमालस्यंवाकुर्यादित्यर्थः २५ पंडितःपरिहासकः । 'पंडितःसिल्हकेकवा' इतिविश्वः । खंडितइतिपाठेविच्छिद्यनसेवेत किंत्वविच्छेदेनैवसेवेतेत्यर्थः । अप्रमत्तोऽवहितः २६ स्वस्थानात्राजदत्तान्नविकंपेतनचलेत् २७ पंडितोविद्यावान् राजानंकथाभीरमयन् पार्श्वेतिष्ठेत् रक्षिणांराजगोप्तॄणांतुस्थानंपृष्ठतः २८ शूरेणपंडितेनवा पुरस्तात् आसनंउपवेशनंनकर्तव्यमित्यर्थः । राज्ञांसंदर्शने समक्षंप्रवृत्तमपिभक्तवेतनादिदानं अहंपूर्विकयानाकारितःसन् नसंजयेत्स्वीकुर्यात् २९ एतत्तुघार्ष्ट्यं दरिद्राणामपिव्यलीकस्थानमप्रियपदं किमुतराज्ञामितिभावः उत्तमंपरमं नेति राज्ञोदितमनृतंबाहिर्नप्रकाशयेत् ३० हियस्मात् अनृतवादिनोनृपान् हियतोऽन्येराजानोऽसूयंति दोषवत्त्वेनकीर्तयंति । तस्मात्स्वामिनोऽकीर्तिकरंनवदेदित्यर्थः । अवमन्यंतेराजानइतिशेषः ३१ प्रियोभोगवांश्चभवतीतिसंबंधः ३२ । ३३ । ३४ नचेति क्रोधचापलयोःसूचकमोष्ठादीनांसमाक्षेपंप्रचालनं नकुर्यादित्यर्थः । वातंमुखजं अधस्तनंवा शनैरितरेणाज्ञातंयथाभवेत्तथाकुर्यादित्यर्थः ३५ हास्येति अन्यस्यराजसेवकस्य हास्यवस्तुषुहास्यास्पदेषु अय

अनुकूलोभवेच्चास्यसर्वार्थेषुकथासुच ॥ अप्रियंचाहितंयत्स्यात्तदस्मैनानुवर्णयेत् २५ नाहमस्यप्रियोस्मीतिमत्वासेवेतपंडितः ॥ अप्रमत्तश्चसततंहितंकुर्यात्प्रियंचयत् २६ नास्यानिष्टानिसेवेतनाहितैःसहसंवदेत् ॥ स्वस्थानान्नविकंपेतसराजवसतिंवसेत् २७ दक्षिणंवाऽथवामंवापार्श्वमासीतपंडितः ॥ रक्षिणांह्यात्तशस्त्राणांस्थानंपश्चाद्विधीयते २८ नित्यंहिप्रतिषिद्धंतुपुरस्तादासनंमहत् ॥ नचसंदर्शनेकिंचित्प्रवृत्तमपिसंजयेत् २९ अपिह्येतद्दरिद्राणांव्यलीकस्थानमुत्तमम् ॥ नमृषाभिहितंराज्ञांमनुष्येषुप्रकाशयेत् ३० असूयंतिहिराजानोनराननृतवादिनः ॥ तथैवचावमन्यंतेनरान्पंडितमानिनः ३१ शूरोऽस्मीतिनदृप्तःस्याद्बुद्धिमानितिवापुनः ॥ प्रियमेवाचरन्राज्ञःप्रियोभवतिभोगवान् ३२ ऐश्वर्यंप्राप्यदुष्प्रापंप्रियंप्राप्यचराजतः ॥ अप्रमत्तोभवेद्राज्ञःप्रियेषुचहितेषुच ॥ ३३ यस्यकोपोमहाबाधःप्रसादश्चमहाफलः ॥ कस्तस्यमनसाऽपीच्छेदनर्थंप्राज्ञसंमतः ३४ नचोष्ठौनभुजौजानूनचवाक्यंसमाक्षिपेत् ॥ सदावातंचवाचंचष्ठीवनंचाचरेच्छनैः ३५ हास्यवस्तुषुचान्यस्यवर्तमानेषुकेषुचित् ॥ नातिगाढंप्रहृष्येतनचाप्युन्मत्तवद्धसेत् ३६ नचातिधैर्येणचरेद्गुरुतांहिव्रजेत्ततः ॥ स्मितंतुमृदुपूर्वेणदर्शयेतप्रसादजम् ३७ लाभेनहर्षयेद्यस्तुनव्यथेद्योऽवमानितः ॥ असंमूढश्चयोनित्यंसराजवसतिंवसेत् ३८ राजानंराजपुत्रंवासंवर्णयतियःसदा ॥ अमात्यःपंडितोभूत्वासचिरंतिष्ठतेप्रियः ३९ प्रगृहीतश्चयोऽमात्योनिगृहीतस्त्वकारणैः ॥ ननिर्वदतिराजानंलभतेसंपदंपुनः ४० प्रत्यक्षंचपरोक्षंचगुणवादीविचक्षणः ॥ उपजीवीभवेद्राज्ञोविषयेयोऽपिवाभवेत् ४१ अमात्योहिबलाद्भोक्तुंराजानंप्रार्थयेतयः ॥ नसतिष्ठेच्चिरंस्थानंगच्छेच्चप्राणसंशयम् ४२

थास्थितेषुउष्णीषादिषुवर्तमानेषुनिमित्तेषु तदीयवैकल्येनातिगाढंनप्रहृष्येत्नापिहसेत् । तावतैदराजानरनंक्षुद्रंमन्यंतइतिभावः । नचैवंभूतेनिमित्तेसतिधैर्येणकाष्ठवत्स्थेयमित्याह नातीति ३६ गुरुतांजडतां किमप्ययंनजानातीतिवदेयुरितिभावः । अतएवस्मितंमृदुपूर्वंकिंचिद्दर्शयेदेव ३७ नहर्षयेत्नहृष्येत् असंमूढःसेवायामेकाग्रः ३८ राजातदाश्रितांश्चस्तोतव्याएवेत्याह राजानमिति संवर्तयतीतिपाठेऽनुसरति तिष्ठतेप्रकाशते ३९ ननिर्वदतिननिंदति दंडितोऽप्यमात्यःपुनरभ्युदयकामोराजानंननिंदेदित्यर्थः ४० योराज्ञोविषयेभवेत्देशेवसेत् योवाराज्ञउपजीवीसराज्ञोगुणवादीस्यादितिसंबंधः ४१ बलाद्धठात् भोक्तुंकुटिलीकर्तुं येनकेनाचिद्व्याजेनलोकान्दंडयेतिशिक्षयन्यःप्रार्थयेत् सराज्ञःप्रियोऽपि बहुजनविरोधात्चिरंस्थानंपदंनातिष्ठेन्नाधितिष्ठेत् । अवश्यंपदच्युतोभवेदित्यर्थः । भोक्तुमितिभुजकौटिल्येइत्यस्यरूपं ४२

श्रेयइति राज्ञःसकाशादात्मनःस्वस्यश्रेयोधनमानादिलाभंदृष्ट्वा परमन्यं सदासर्वदा राज्ञासार्धं नसंवदेन्नसंवादयेत् किंतुमहाराजोनभवादृशान्मंत्रिलक्षयतीत्येवलोकेपरंदर्शयेत् । योग्य भूमिषु युद्धे परराष्ट्रिकैःसहसंलापेवा राजानं विशेषयेत्राज्ञोऽपेक्षाया स्वीयंशौर्यं यौक्तिकत्वंवाधिकंदर्शयेत् । तेनराजाप्रीयतइतिभावः ४३ अम्लानःउत्साही । बलवान्धीबलयुक्तः । मृदुःअनिष्ठुरः । दांतोजितेंद्रियःसुशिक्षितोवा ४४ अन्यस्मिन्पुंसिकस्यचित्कार्यस्यार्थंप्रेष्यमाणे एहिइदंकुर्वित्युच्यमानेसतियस्तदागमनात्पूर्वंसमुत्पतेतत्कार्यंकर्तुंसशीघ्रकारी रा जवसतिंवसेत् ४५ आंतरेधनदारसंरक्षणादौ बाह्येसामंतजये आदिष्टआज्ञप्तो नैवकंपेत नैवसंशयंभयंवाकुर्यात् अनिःसंशयोनिर्भयश्चतत्कार्यंकुर्यादेवेत्यर्थः ४६ प्रियाणांप्रिया णिस्त्रीपुत्रान्नपानादिसुखानि दुःखेनप्रवासादिना ४७ समवेषं वस्त्रालंकारादिकं राज्ञासमानंनकुर्यात् । उच्चैःअतिशयेन बहुधाबहुप्रकारं नकुर्यात्नर्मिच्यादिरयर्थः ४८ धनंउत्कोचादिना

श्रेयःसदाऽऽत्मनोदृष्ट्वापरंराज्ञानसंवदेत् ॥ विशेषयेच्चराजानंयोग्यभूमिषुसर्वदा ४३ अम्लानोबलवान्शूरश्छायेवानुगतःसदा ॥ सत्यवादीमृदुर्दांतःसराजव सतिंवसेत् ४४ अन्यस्मिन्प्रेष्यमाणेतुपुरस्ताद्यःसमुत्पतेत् ॥ अहंकिंकरवाणीतिसराजवसतिंवसेत् ४५ आंतरेचैवबाह्येचराज्ञायश्चाथसर्वदा ॥ आदिष्टोनैव कंपेतसराजवसतिंवसेत् ४६ योवैगृहेभ्यःप्रवसन्प्रियाणांनानुसंस्मरेत् ॥ दुःखेनसुखमन्विच्छेत्सराजवसतिंवसेत् ४७ समवेषंनकुर्वीतनोच्चैःसन्निहितोवसेत् ॥ नमंत्रंबहुधाकुर्यादेवंराज्ञःप्रियोभवेत् ४८ नकर्मणिनियुक्तःसन्धनंकिंचिदपिस्पृशेत् ॥ प्राप्नोतिहिहरन्द्रव्यंबंधनंयदिवावधम् ४९ यानंवस्त्रमलंकारंयच्चान्यत्सं प्रयच्छति ॥ तदेवधारयेन्नित्यमेवंप्रियतरोभवेत् ५० एवंसंयम्यचित्तानियत्नतःपांडुनंदनाः ॥ संवत्सरमिमंताततथाशीलाबुभूषत ॥ अथस्वविषयंप्राप्य यथाकामंकरिष्यथ ५१ ॥ युधिष्ठिरउवाच ॥ अनुशिष्टाःस्मभद्रंतेनैतद्वक्ताऽस्तिकश्चन ॥ कुंतीमृतेमातरंनोविदुरंवामहामतिम् ५२ यदेवानंतरंकार्यंतद्भ वान्कर्तुमर्हति ॥ तारणायास्यदुःखस्यप्रस्थानायजयायच ५३ ॥ वैशंपायनउवाच ॥ एवमुक्तस्ततोराज्ञाधौम्योऽथद्विजसत्तमः ॥ अकरोद्विधिवत्सर्वंप्र स्थानेयद्विधीयते ५४ तेषांसमिध्यतानग्नीन्मंत्रवच्चजुहावसः ॥ समृद्धिवृद्धिलाभायपृथिवीविजयायच ५५ अग्नीन्प्रदक्षिणीकृत्यब्राह्मणांश्चतपोधनान् ॥ याज्ञसे नींपुरस्कृत्यषडेवाथप्रवव्रजुः ५६ गतेषुतेषुवीरेषुधौम्योऽथजपतांवरः ॥ अग्निहोत्राण्युपादायपांचालानभ्यगच्छत ५७ इंद्रसेनादयश्चैवयथोक्ताःप्राप्ययाद वान् ॥ रथानश्वांश्चरक्षंतःसुखमूषुःसुसंवृताः ५८ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणिधौम्योपदेशेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ४ ॥

मार्गकिंचिदपिअल्पमपिनस्पृशेत् ४९ यत्संप्रयच्छतिराजा तदेवराजदत्तं यानादिकंधारयेत् नतुतदन्यत्स्वेच्छयादिरयर्थः ५० संयम्यनिगृह्य इमंत्रयोदशंसंवत्सरं हेतातयुधिष्ठिर यूयं सर्वेतथाशीलाःयथोक्तसद्वृत्ताःसंतोबुभूषत ऐश्वर्यंप्राप्तुमिच्छत । अथअनंतरं स्वविषयंस्वदेशंप्राप्य यथाकामंयथेष्टंकरिष्यथ क्रीडामितिशेषः ५१ । ५२ अनंतरंअनुपदंकार्यंशांतिकंपौ ष्टिकंच । अस्यअज्ञातवासदुःखस्यतारणाय प्रस्थानाय शत्रून्प्रतियोद्धुंगमनाय जयायचयत्कर्मप्रभवतितत्कर्तुमर्हति ५३ । ५४ समिध्यउद्दीप्य समृद्धिर्जनाभिसंपत्तिः । वृद्धिर्युद्धे विशेषः । लाभोराज्यस्य । लब्धायाअपिपृथिव्याविजयायवशीकरणाय ५५ षट् द्रौपद्यासहिताः ५६ । ५७ । ५८ । इतिविराटपर्वणिनीलकंठीये भारतभावदीपेचतुर्थोऽध्यायः ॥ ४ ॥

तेवीराइति निस्त्रिंशाःखड्गाः कलापिनस्तूणवंतः । तथायुवेतिपाठे सज्जीकृतधनुषः तथायुवाश्चतेकलापिनश्चेतिविग्रहः । बद्धंगोधातलंज्याघातवारणाख्यमंगुलित्राणंचयैस्तेबद्धगोधांगु लित्राणाः 'गोधातलनिहाकयोः'इतिमेदिनी १ । २ । ३ अंतरेणमध्यतः मत्स्यस्यैवराज्ञोलुब्धाव्याधाःस्मइतिब्रुवाणाः । पक्षेराज्याकांक्षिणः । 'लुब्ध आकांक्षिणिव्याधे'इतिमेदिनी । वि

वैशंपायनउवाच ॥ तेवीराबद्धनिस्त्रिंशास्तथाबद्धकलापिनः ॥ बद्धगोधांगुलित्राणाःकालिंदीमभितोययुः १ ततस्तेदक्षिणंतीरमन्वगच्छन्पदातयः ॥ निवृ त्तवनवासाहिस्वराष्ट्रंप्रेप्सवस्तदा ॥ वसंतोगिरिदुर्गेषुवनदुर्गेषुधन्विनः २ विध्यंतोमृगजातानिमहेष्वासामहाबलाः ॥ उत्तरेणदशार्णांस्तेपंचालान्दक्षिणे नच ३ अंतरेणयकृल्लोमान्शूरसेनांश्चपांडवाः ॥ लुब्धाब्रुवाणामत्स्यस्यविषयंप्राविशन्वनात् ४ धन्विनोबद्धनिस्त्रिंशाविवर्णाःश्मश्रुधारिणः ॥ ततोज नपदंप्राप्यकृष्णाराजानमब्रवीत् ५ पश्यैकपद्योदृश्यंतेक्षेत्राणिविविधानिच ॥ व्यक्तंदूरेविराटस्यराजधानीभविष्यति ॥ वसामेहापरांरात्रिंबलवान्मेपरिश्रमः ६ ॥ युधिष्ठिरउवाच ॥ धनंजयसमुद्यम्यपांचालींवहभारत ॥ राजधान्यांनिवत्स्यामोविमुक्ताश्चवनादितः ७ ॥ वैशंपायनउवाच ॥ तामादायार्जुनस्तूर्णं द्रौपदींगजराडिव ॥ संप्राप्यनगराभ्यासमवतारयदर्जुनः ८ सराजधानींसंप्राप्यकौंतेयोर्जुनमब्रवीत् ॥ क्वायुधानिसमासज्यप्रवेक्ष्यामःपुरंवयम् ९ सायुधाश्च प्रवेक्ष्यामोवयंतातपुरंयदि ॥ समुद्वेगंजनस्यास्यकरिष्यामोनसंशयः १० गांडीवंचमहद्गाढंलोकेचविदितंनृणाम् ॥ तच्चेदायुधमादायगच्छामोनगरंवयम् ॥ क्षिप्रमस्मान्विजानीयुर्मनुष्यानात्रसंशयः ११ ततोद्वादशवर्षाणिप्रवेष्टव्यंवनेपुनः ॥ एकस्मिन्नपिविज्ञातेप्रतिज्ञातंहिनस्तथा १२ ॥ अर्जुनउवाच ॥ इयं कूटेमनुष्येंद्रगहनामहतीशमी ॥ भीमशाखादुरारोहाश्मशानस्यसमीपतः १३ नचापिविद्यतेकश्चिन्मनुष्यइतिमेमतिः ॥ योऽस्मान्निदधतोद्रष्टाभवेच्छस्त्राणिपां डवाः १४ उत्पथेहिवनेजातामृगव्यालनिषेविते ॥ समीपेचश्मशानस्यगहनस्यविशेषतः १५ समाधायायुधंशम्यांगच्छामोनगरंप्रति ॥ एवमत्रयथायोगं विहरिष्यामभारत १६ ॥ वैशंपायनउवाच ॥ एवमुक्त्वासराजानंधर्मराजंयुधिष्ठिरम् ॥ प्रचक्रमेनिधानायशस्त्राणांभरतर्षभ १७ येनदेवान्मनुष्यांश्चसर्वांश्चैकर थोऽजयत् ॥ स्फीतान्जनपदांश्चान्यानजयत्कुरुपुंगवः १८ तदुदारंमहाघोषंसपत्नबलसूदनम् ॥ अपज्यमकरोत्पार्थोगांडीवंसुभयंकरम् १९ येनवीरःकुरुक्षे त्रमभ्यरक्षत्परंतपः ॥ अमुंचद्धनुषस्तस्यज्यामक्षय्यांयुधिष्ठिरः २० पांचालान्येनसंग्रामेभीमसेनोऽजयत्प्रभुः ॥ प्रत्यषेधद्बहूनेकःसपत्नांश्चैवदिग्जये २१ निशम्ययस्यविस्फारंव्यद्रवंतरणात्परे ॥ पर्वतस्येवदीर्णस्यविस्फोटमशनेरिव २२ सैंधवंयेनराजानंपर्यामृषितवानथ ॥ ज्यापाशंधनुषस्तस्यभीमसेनोऽव तारयत् २३ अजयत्पश्चिमामाशांधनुषायेनपांडवः ॥ माद्रीपुत्रोमहाबाहुस्ताम्रास्योमितभाषिता २४

यथंमत्स्यस्यैवदेशं लुब्धत्वाभिनयार्थंविवर्णाः ४ । ५ एकपद्यः क्षेत्रगामिनःक्षुद्रमार्गाः६ । ७ । ८ । ९ । १० । ११ । १२ कूटेइववृटेउच्चप्रदेशे । 'मायानिश्चलयंत्रेषुकैतवानृतराशिषु । अयोघनेशैलशृंगे' इति । कूटमितिमेदिनी । दुरारो हा श्मशानस्थत्वात् १३ । १४ उत्पथेमार्गाद्बहिर्भूते १५ । १६ । १७ । १८ सपत्नबलानां देवाराधनप्राप्तबलानामसुरादीनामपिसूदनं १९ । २० । २१ । २२ सैंधवजयद्रथम् २३ । २४

संक्रंदनःशत्रूणामाक्रंदनकरः २५ अपज्यंज्यारहितं २६ विपाठान्बाणविशेषान् सादृशानक्षुरधारांश्च २७ अन्वशासदआज्ञापितवान् २८ तस्याःशम्याःवकाशानि माधुरिमतेनजलोपः अ
वकाशाख्यानिशुषिरस्थानानि २९ वर्षतिमेवः तिरोवर्षाणिअसंमुखानिवर्षाणितिष्ठीः यत्रापश्यत तत्रपर्यबंधतपर्यबध्नात् ३०। ३१ पूतिकंअमंगलं अशितिरधिकशततवर्षा नोऽस्माकंइवमितिशव
निर्देशः । पक्षे शमीआयुधरक्षकत्वान्मातेवास्माकमित्यभिसंधिः ३२ कुलधर्मोऽयंक्षत्रधर्मोऽयंयदायुधसंगोपनमितिगुढआशयः । पक्षे अयंमातुर्द्धेक्षेबंधनाख्यः ३३ । ३४ । ३५ वत्स्यंतोत्र

॥५॥ तस्यमौर्वीमपाकर्षच्छूरःसंक्रंदनोयुधि ॥ कुलेनास्तिसमोरूपेयस्येतिनकुलःस्मृतः २५ दक्षिणांदक्षिणाचारोदिशंयेनाजयत्प्रभुः ॥ अपज्यमकरोद्वीरःसहदे ॥६॥
वस्तदायुधम् २६ खड्गांश्चदीप्तानदीर्घांश्चकलापांश्चमहाधनान् ॥ विपाठान्क्षुरधारांश्चधनुर्भिर्निदधुःसह २७ ॥ वैशंपायनउवाच ॥ अथान्वशासन्नकुलंकुं
तीपुत्रोयुधिष्ठिरः ॥ आरुह्येमांशमींवीरधनूंष्येतानिनिक्षिप २८ तामुपारुह्यनकुलोधनूंषिनिदधेस्वयम् ॥ यानितस्यावकाशानिदिव्यरूपाण्यमन्यत २९
यत्रचापश्यतसवैतिरोवर्षाणिवर्षति ॥ तत्रतानिदृढैःपाशैःसुगाढंपर्यबंधत ३० शरीरंचमृतस्यैकंसमबध्नंतपांडवाः ॥ विवर्जयिष्यंतिनरादूरादेवशमीमिमाम्
३१ आबद्धंशवमत्रेतिगंधमाघ्रायपूतिकम् ॥ अशीतिशतवर्षेयंमातानइतिवादिनः ३२ कुलधर्मोऽयमस्माकंपूर्वैराचरितोऽपिवा ॥ समासज्याथवृक्षेऽस्मिन्त्रि
तिव्याहरंतिते ३३ आगोपालाविपालेभ्यआचक्षाणाःपरंतपाः ॥ आजग्मुर्नगराभ्याशंपार्थाःशत्रुनिबर्हणाः ३४ जयोजयंतोविजयोजयत्सेनोजयद्बलः ॥
इतिगुह्यानिनामानिचक्रेतेषांयुधिष्ठिरः ३५ ततोयथाप्रतिज्ञाभिःप्राविशन्नगरंमहत् ॥ अज्ञातचर्यांवत्स्यंतोराष्ट्रेवर्षंत्रयोदशम् ३६ ॥ इतिश्रीमहाभारतेविराट
पर्वणिपांडवप्रवेशपर्वणिपुरप्रवेशेअस्त्रसंस्थापनेपंचमोऽध्यायः ॥ ५ ॥ ॥ वैशंपायनउवाच ॥ विराटनगरंरम्यंगच्छमानोयुधिष्ठिरः ॥ अस्तुवन्मनसादेवींदुर्गां
त्रिभुवनेश्वरीम् १ यशोदागर्भसंभूतांनारायणवरप्रियाम् ॥ नंदगोपकुलेजातांमंगल्यांकुलवर्धिनीम् २ कंसविद्रावणकरीमसुराणांक्षयंकरीम् ॥ शिलातटवि
निक्षिप्तामाकाशंप्रतिगामिनीम् ३ वासुदेवस्यभगिनींदिव्यमाल्यविभूषिताम् ॥ दिव्यांबरधरांदेवींखड्गखेटकधारिणीम् ४ भारावतरणेपुण्येयेस्मरंतिसदा
शिवाम् ॥ तान्वैतारयतेपापात्पंकेगामिवदुर्बलाम् ५ स्तोतुंप्रचक्रमेभूयोविविधैःस्तोत्रसंभवैः ॥ आमंत्र्यदर्शनाकांक्षीराजादेवींसहानुजः ६ नमोऽस्तुवरदे
कृष्णेकुमारिब्रह्मचारिणि ॥ बालार्कसदृशाकारेपूर्णचंद्रनिभानने ७ चतुर्भुजेचतुर्वक्त्रेपीनश्रोणिपयोधरे ॥ मयूरपिच्छवलयेकेयूरांगदधारिणि ॥ भासिदेवि
यथापद्मानारायणपरिग्रहः ८

स्तुमिच्छंतः ३६ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेपंचमोऽध्यायः ॥ ५ ॥
गच्छमानःगच्छन् दुर्गांदुर्गमसंकटतारिणीं १ नारायणेनदत्तायेवराः । उमेतिभद्रकालीतिदेवास्त्वांपूजयिष्यंतीत्येवमादयोविष्णुपुराणादौश्रुतास्तत्प्रियांमंगल्यां मंगलप्रदां २ शिलातटे ॥५॥
कंसेनैवविनिक्षिप्तासतीआकाशंगतातां ३ खेटकंचर्म ४ । ५ स्तोत्रार्थमेवसंभवउद्भवेयेषांनाम्नां वरदेइत्यादीनांतैः आमंत्र्यसंबोध्य स्तोतुंप्रचक्रमेइतिपूर्वेणसंबंधः ६ कृष्णेकृष्णस्व
रूपे ७ चतुर्भुजेचतुर्वक्त्रेइतिविष्णुब्रह्मरूपत्वमुक्तं । मयूरपिच्छाभानिइंद्रनीलादिमणिखचितानिवलयानियस्यास्तथाविधे । पद्मालक्ष्मीः अतएवनारायणपरिग्रहोविष्णुकांता ८

ब्रह्मचर्यमित्यनन्यगामित्वंदर्शितं तेनलौकिकलक्ष्मीतोव्यावृत्तिः कृष्णच्छविनीलमेघस्तेनसमाकृष्णाकृष्णवर्णा ९ अष्टभुजाबाहू बिभ्रतीति विपुलौ वराभयप्रदत्वेनऊर्जितौद्वौबाहू । तत
एकःपात्रीपात्रवान् । पंकजीपंकजवान् । घंटीघंटावान्पंचमः १० पाशंधनुर्महाचक्रंचबिभ्रतीतिपूर्वेणान्वयः । एतान्येवविविधान्यायुधानि । कुंडलपूर्णौ योद्वौकर्णौताभ्यांविराजिता ११ के
स्वरूपंब्रह्मचर्यंचविशदंतवखेचरि ॥ कृष्णच्छविसमाकृष्णासंकर्षणसमानना ९ बिभ्रतीविपुलौबाहूशक्रध्वजसमुच्छ्रयौ ॥ पात्रीचपंकजीघंटीस्त्रीविशुद्धाचया
भुवि १० पाशंधनुर्महाचक्रंविविधान्यायुधानिच ॥ कुंडलाभ्यांसुपूर्णाभ्यांकर्णाभ्यांचविभूषिता ११ चंद्रविस्पर्द्धिनादेविमुखेनत्वंविराजसे ॥ मुकुटेनविचि
त्रेणकेशबंधेनशोभिना १२ भुजंगाभोगवासेनश्रोणिसूत्रेणराजता ॥ विभ्राजसेचाबद्धेनभोगेनेवेहमंदरः १३ ध्वजेनशिखिपिच्छानामुच्छ्रितेनविराजसे ॥ कौ
मारंव्रतमास्थायत्रिदिवंपावितंत्वया १४ तेनत्वंस्तूयसेदेवित्रिदशैःपूज्यसेऽपिच ॥ त्रैलोक्यरक्षणार्थायमहिषासुरनाशिनि ॥ प्रसन्नामेसुरश्रेष्ठेदयांकुरुशिवा
भव १५ जयात्वंविजयाचैवसंग्रामेचजयप्रदा ॥ ममापिविजयंदेहिवरदात्वंचसांप्रतम् १६ विंध्येचैवनगश्रेष्ठेतवस्थानंहिशाश्वतम् ॥ कालिकालिमहाकालिसी
धुमांसपशुप्रिये १७ कृतानुयात्राभूतैस्त्वंवरदाकामचारिणि ॥ भारावतारेयेचत्वांसंस्मरिष्यंतिमानवाः १८ प्रणमंतिचयेत्वांहिप्रभातेतुनराभुवि ॥ नतेषां
दुर्लभंकिंचित्पुत्रतोधनतोऽपिवा १९ दुर्गात्तारयसेदुर्गेतत्त्वंदुर्गास्मृताजनैः ॥ कांतारेष्ववसन्नानांमग्नानांचमहार्णवे २० दस्युभिर्वानिरुद्धानांत्वंगतिःपरमा
नृणाम् ॥ जलप्रतरणेचैवकांतारेष्वटवीषुच २१ येस्मरंतिमहादेविनचसीदंतितेनराः ॥ त्वंकीर्तिःश्रीर्धृतिःसिद्धिर्ह्रीर्विद्यासंततिर्मतिः २२ संध्यारात्रिःप्रभा
निद्राज्योत्स्नाकांतिःक्षमादया ॥ नृणांचबंधनंमोहंपुत्रनाशंधनक्षयम् २३ व्याधिंमृत्युंभयंचैवपूजितानाशयिष्यसि ॥ सोऽहंराज्यात्परिभ्रष्टःशरणंत्वांप्रपन्नवान्
२४ प्रणतश्चयथामूर्ध्नातवदेविसुरेश्वरि ॥ त्राहिमांपद्मपत्राक्षिसत्येसत्याभवस्वनः २५ शरणंभवमेदुर्गेशरण्येभक्तवत्सले ॥ एवंस्तुताहिसादेवीदर्शयामासपांड
वम् २६ उपगम्यतुराजानमिदंवचनमब्रवीत् ॥ देव्युवाच ॥ शृणुराजन्महाबाहोमदीयंवचनंप्रभो २७ भविष्यत्यचिरादेवसंग्रामेविजयस्तव ॥ ममप्रसादा
न्निर्जित्यहत्वाकौरववाहिनीम् २८ राज्यंनिष्कंटकंकृत्वाभोक्ष्यसेमेदिनींपुनः ॥ भ्रातृभिःसहितोराजन्प्रीतिंप्राप्स्यसिपुष्कलाम् २९ मत्प्रसादाच्चतेसौख्यमारो
ग्यंचभविष्यति ॥ येचसंकीर्तयिष्यंतिलोकेविगतकल्मषाः ३० तेषांतुष्टाप्रदास्यामिराज्यमायुर्वपुःसुतम् ॥ प्रवासेनगरेचापिसंग्रामेशत्रुसंकटे ३१
शबंधेनकवरीरूपेण १२ वेणींवर्णयतिभुजंगेति भुजंगाभोगवासेन सर्पशरीराकारेणवासोवासना तेनतदाकारउपलक्ष्यते । कटिसूत्रेणसह राजताशोभमानेन । कटिसूत्रोपरिलंबमानयावे
ण्येत्यर्थः । भोगेनभुजंगफणया तद्वताभुजंगेनेत्यर्थः । भोगिनेवेतियुक्तःपाठः १३ । १४ शिवाकल्याणरूपा १५ । १६ । १७ कृतानुयात्राभिरत्यमनुसृता भूतैर्ब्रह्माद्यैःप्राचीनैः १८ । १९
कांतारेमहारण्ये २० कांतारेदुर्गममार्गे २१ । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ संकीर्तयिष्यंतिमामितिशेषः ३० । ३१

३२ । ३३ । ३४ । ३५ ॥ इतिविराटपर्वणिनैलकंठीये भारतभावदीपेदुर्गास्तवःषष्ठोऽध्यायः ॥ ६ ॥ ॥ वैडूर्यरूपान्कांचनांश्चशारीन् इदंश्वेतरक्तशारीणांशारिफलकस्यचोपलक्षणं । १ शरीरलिंगैः
अक्षान्पाशांश्चवाससाप्रतिमुच्यबद्धा कक्षेपरिगृह्यआव्रजदितिसंबंधः १ । २ । ३ नचिरेणशीघ्रमेव ४ विशोविश्यान् ९ नतुद्विजोऽयंद्विजवेषोऽपिराजैवभविष्यतीत्यर्थः ६ शरीरलिंगैः
आजानुबाहुत्वादिभिः तामरसींपद्मिनीं । एतेनस्वाभिभवशंकादर्शिता ७ द्विजंत्रैवर्णिकत्वात् ८ कामचरःत्वदिच्छानुवर्ती ९ प्रीत्याऽऽत्मना प्रीतिमतामनसा कामेनरागेण तातेतिश्रेष्ठत्वा

॥ ६ ॥ ऽटव्यांदुर्गकांतारेसागरेगहनेगिरौ ॥ येस्मरिष्यंतिमांराजन्यथाऽहंभवतास्मृता ३२ नतेषांदुर्लभंकिंचिदस्मिँल्लोकेभविष्यति ॥ इदंस्तोत्रवरंभक्त्याशृणुया ॥ ७ ॥
द्वापठेतवा ३३ तस्यसर्वाणिकार्याणिसिद्धिंयास्यंतिपांडवाः ॥ मत्प्रसादाच्चवःसर्वान्विराटनगरेस्थितान् ३४ नप्रज्ञास्यंतिकुरवोनरावातन्निवासिनः ॥
इत्युक्त्वावरदादेवीयुधिष्ठिरमरिंदमम् ॥ रक्षांकृत्वाचपांडूनांतत्रैवांतरधीयत ३५ ॥ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणिदुर्गास्तवेषष्ठोऽ
ध्यायः ॥ ६ ॥ ॥ ४ ॥ ॥ वैशंपायनउवाच ॥ ततोविराटंप्रथमंयुधिष्ठिरोराजासभायामुपविष्टमाव्रजत् ॥ वैडूर्यरूपान्प्रतिमुच्यकांचनानक्षान्सकक्षेपरि
गृह्यवाससा १ नराधिपोराष्ट्रपतिंयशस्विनंमहायशाःकौरववंशवर्द्धनः ॥ महानुभावोनरराजसत्कृतोदुरासदस्तीक्ष्णविषोयथोरगः २ बलेनरूपेणनरर्षभो
महानपूर्वरूपेणयथामरस्तथा ॥ महाभ्रजालैरिवसंवृतोरविर्यथाऽनलोभस्मवृतश्चवीर्यवान् ३ तमापतंतंप्रसमीक्ष्यपांडवंविराटराडिंदुमिवाभ्रसंवृतम् ॥
समागतंपूर्णशशिप्रभाननंमहानुभावंनचिरेणदृष्टवान् ४ मंत्रिद्विजान्सूतमुखान्विशस्तथायेचापिकेचित्परितःसमासते ॥ पप्रच्छकोऽयंप्रथमंसमेयिवान्
नृपोपमोऽयंसमवेक्षतेसभाम् ५ नतुद्विजोऽयंभवितानरोत्तमःपतिःपृथिव्याइतिमेमनोगतम् ॥ नचास्यदासोनरथोनकुंजरःसमीपतोभ्राजतिचायमिंद्रवत्
६ शरीरलिंगैरुपसूचितोह्ययंमूर्धाभिषिक्तइतिमेमनोगतम् ॥ समीपमायातिचमेगतव्यथोयथागजस्तामरसींमदोत्कटः ७ वितर्कयंतंतुनरर्षभस्तथायु
धिष्ठिरोऽभ्येत्यविराटमब्रवीत् ॥ सम्राड्विजानात्विहजीवनार्थिनंविनष्टसर्वस्वमुपागतंद्विजम् ८ इहाहमिच्छामितवानघांतिकेवस्तुंयथाकामचरस्तथाविभो ॥
तमब्रवीत्स्वागतमित्यनंतरंराजाप्रहृष्टःप्रतिसंगृहाणच ९ तंराजसिंहंप्रतिगृह्यराजाप्रीत्याऽऽत्मनाचैवमिदंबभाषे ॥ कामेनताताभिवदाम्यहंत्वांकस्यासि
राज्ञोविषयादिहागतः १० गोत्रंचनामापिचशंसतत्त्वतःकिंचापिशिल्पंतवविद्यतेकृतम् ११ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ युधिष्ठिरस्यासमहंपुरासखा ॥ ८ ॥
वैयाघ्रपद्यःपुनरस्मिविप्रः ॥ अक्षान्प्रयोक्तुंकुशलोऽस्मिदेविनांकंकेतिनाम्नास्मिविराटविश्रुतः १२

त्संबोधयति १० शिल्पंकौशलं किंविषयं तवत्वया कृतंसंपादितम् ११ युधिष्ठिरस्येति लोके । पक्षेयुधिष्ठिरोऽहंतवसखास्यांसंभूयासमितिसंबंधः । अस्तेराशीर्लिङिच्छांदसआर्द्धधातुकत्वाभावः
तेनभूभावःश्नसोरित्यल्लोपाभावःश्चनभवतः सलोपाभावोऽपिछांदसः । युधिष्ठिरस्याहमहंसखेतिपाठेऽपि युधिष्ठिरोऽहंममसखास्याःभवेतिसंबंधः हमितितुपादपूरणार्थोनिपातः । पक्षे । अहम
हमितिद्विरुक्तिः सार्वभौमोऽपरसेवांचिकीर्षामीतिचिंतयाधिचित्यसूचिका । वैयाघ्रपद्यःव्याघ्रपात्प्रभवः व्याघ्रइवपततीतिव्याघ्रपाद्यमस्तस्यकुलेजातोवैयाघ्रपद्यः । गर्गादित्वाद्यञ् । यद्वा ।

वैयाघ्रंव्याघ्रचर्मतेनपरिवृतोरथोऽपिवैयाघ्रः सएवपद्यंपादक्रमणीयंवाहनमस्येतिवैयाघ्रपद्यः । परिवृतोरथइत्यधिकृत्यद्वैपवैयाघ्रादित्यञ् । विप्रःविशेषेणप्राति पूरयतिब्राह्मणादीन्ध
नादिभिरितिविप्रः । धर्मलुप्तत्वाद्वाविप्रोऽहं । ब्राह्मणइतिपाठेतुब्रह्मविदितिमुख्यएवार्थोग्रहीतुंशक्यः कंकइतिकृतांतनामेतिप्रागेवोक्तं । अक्षान्प्रयोक्तुंकुशलःबृहदश्वशिष्यत्वात् १२
देविनः देवनशीलाः १३ प्राप्तोविवादइति द्यूतिनांमध्येइतिशेषः द्यूतकृतांमध्येहीनतःहीनात्पराजितात् यंकंचकमपि प्रथमंराजानंराजपुत्रंवा मुख्यंजयवंतं प्रथमशब्दोऽत्रश्रेष्ठवाची तंप्रति
विवादःप्राप्तोनविद्यतेइतिन । सत्यगंधरहितेद्यूतेपराजिताजयवद्भिःसहनित्यंकलहंकुर्वंत्येवेत्यर्थः । हेविशांपतेहेमत्स्येत्यादरार्थंद्विःसंबोधयति यस्मादेवंतस्मात्कश्चनकोऽपिमया
जितोमेमदीयंधनंनधारयेत् । अहंकलहाद्भीतस्त्वमेवसत्यंज्ञात्वामदीयंधनंदापयेत्यर्थः १४ तेतव अप्रियमितिच्छेदः यथाऽहंविषयेदेशेप्रभुस्तथाकंकोऽपीतियोजना १५ अंतर्धनदा

विराटउवाच ॥ ददामितेहंतवरंयमिच्छसिप्रशाधिमत्स्यान्वशगोह्यहंतव ॥ प्रियाश्चधूर्तामममदेविनःसदाभवांश्चदेवोपमराज्यमर्हति १३ ॥ युधिष्ठिरउवाच ॥
प्राप्तोविवादःप्रथमंविशांपतेनविद्यतेकंचनमत्स्यहीनतः ॥ नमेजितःकश्चनधारयेद्धनंवरोममैषोऽस्तुतवप्रसादजः १४ ॥ विराटउवाच ॥ हन्यामवश्यंयदिते
ऽप्रियंचरेत्प्रव्राजयेयंविषयाद्द्विजांस्तथा ॥ शृण्वंतुमेजानपदाःसमागताःकंकोयथाऽहंविषयेप्रभुस्तथा १५ समानयानोभविताऽसिमेसखाप्रभूततवस्त्रोबहुपान
भोजनः ॥ पश्येस्त्वमंतश्चबहिश्चसर्वदाकृतंचतेद्वारमपावृतंमया १६ येत्वाऽनुवादेयुरवृत्तिकर्शितान्ब्रूयाश्चतेषांवचनेनमांसदा ॥ दास्यामिसर्वंतदहंनसं
शयोनतेभयंविद्यतिसन्निधौमम १७ ॥ वैशंपायनउवाच ॥ एवंसलब्ध्वातुवरंसमागमंविराटराजेननरर्षभस्तदा ॥ उवासधीरःपरमार्चितःसुखीनचापिकश्चि
च्चरितंबुबोधतत् १८ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणियुधिष्ठिरप्रवेशोनामसप्तमोऽध्यायः ॥ ७ ॥ ४ ॥ वैशंपायनउवाच ॥ अथापरोभीम
बलःश्रियाज्वलन्नुपाययौसिंहविलासविक्रमः ॥ खजांचदर्वींचकरेणधारयन्नसिंचकालांगमकोशमव्रणम् १ ससूदरूपःपरमेणवर्चसारविर्यथालोकमिमंप्रकाश
यन् ॥ सकृष्णवासागिरिराजसारवांस्तंमत्स्यराजंसमुपेत्यतस्थिवान् २ तंप्रेक्ष्यराजारमयन्नुपागतंततोऽब्रवीज्जानपदान्समागतान् ॥ सिंहोन्नतांसोऽयमतीवरू
पवान्प्रदृश्यतेकोनुवरर्षभोयुवा ३ अदृष्टपूर्वःपुरुषोरविर्यथावितर्कयन्नास्यलभामिनिश्चयम् ॥ तथाऽस्यचित्तंह्यपिसंवितर्कयन्नरर्षभस्यास्यनयामितत्त्वतः ४
दृष्ट्वैवचैनंतुविचारम्यहंगंधर्वराजोयदिवापुरंदरः ॥ जानीतकोऽयंममदर्शनेस्थितोयदीप्सितंतल्लभतांचमाचिरम् ५

रादीन् बहिःसैन्यारामादीन् पश्येःपर्यालो
चय अपावृतंअनावृतं १६ अनुवादेयुः पूर्वंदेहीत्युक्त्यादत्तस्यैवक्षेत्रारामादेः प्रतिवर्षंपुनर्देहीतिराजवचनंयद्विकारिणंप्रतित दनुवादस्तन्निमित्तंयेत्वांप्रति अयुःप्राप्नुयुस्तेषांवचनेनसदाऽन
वसरेपिमांब्रूयाः । क्षणमपिब्राह्मणवृत्तेःप्रतिबंधोमाभूदित्याशयः १७ वरंश्रेष्ठं समागमंप्रीतिं १८ ॥ इति० महाभारतेवि० नील० सप्तमोऽध्यायः ॥ ७ ॥ खजांमंथनदंडं अंगारावक्षेपणं
वा हस्ताकारंपिष्टविकारप्रमथनार्थंवादंडं । 'खजामंथमहस्तयोः'इतिविश्वः । दर्वींशाकादिपरिवेषणार्थां असिंमांसाद्यवकर्त्तनार्थंखड्गं कालांगंकृष्णायसमयंतीक्ष्णमित्यर्थः । अकोशंपिधान
हीनम् १ गिरिराजसारःमहामेरुवत्कठिनदेहः यद्वा गिरिराजसारोलोहं तेनतद्विकाररूपंपात्रजातंलक्ष्यते भक्ष्यद्रव्यपाकार्थंस्नेहपाकार्थंवातद्वान् २।१ तत्त्वतः तत्त्वंनयाभिनप्राप्नोमि ४ । ५

अवदतउक्तवान् अच्युतोधर्मःफलमदत्वानच्यवतइतियोगात्तस्यानुजं ६ सूदःपाककर्ता बल्लवोनामतः ७ । ८ । ९ । १० तवकर्म नचैवसमंमन्ये इतरकर्मणेतिशेषः अतिमानुषंकर्मैवदसी
त्यर्थः ११ । १२ । १३ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ वेल्लिताग्रान् आकुंचिताग्रान् समुत्क्षिप्यवेणीकृत्य १ जुगूहेगोपितवती २ । ३।४ युयुजति
योजयितुमिच्छति पुपूषतीतिपाठेपोषयितुमिच्छति ५ । ६ । ७ । ८ नैवंरूपात्वमसि किंतुदासान्दासीश्चप्रेषयंतीव बहूनांस्वामिन्यसीत्यर्थः ९ नोच्चौनबहिर्निर्गतौ गूढावित्यर्थः । नोच्चौ

विराटवाक्येनचतेनचोदितानराविराटस्यसुशीघ्रगामिनः ॥ उपेत्यकौंतेयमथाब्रुवंस्तदायथासराजाऽवदताच्युतानुजम् ६ ततोविराटंसमुपेत्यपांडवस्त्वदीन
रूपंवचनंमहामनाः ॥ उवाचसूदोऽस्मिनरेंद्रबल्लवोभजस्वमांव्यंजनकारमुत्तमम् ७ ॥ विराटउवाच ॥ नसूदतांबल्लवश्रद्दधामितेसहस्रनेत्रप्रतिमोविराजसे ॥
श्रियाचरूपेणचविक्रमेणचप्रभासिसत्वंनृवरोनरेष्विव ८ ॥ भीमउवाच ॥ नरेंद्रसूदःपरिचारकोऽस्मितेजानामिसूपान्प्रथमंचकेवलान् ॥ आस्वादितायेनृपते
पुराऽभवन्युधिष्ठिरेणापिनृपेणसर्वशः ९ बलेनतुल्यश्चनविद्यतेमयानियुद्धशीलश्चसदैवपार्थिव ॥ गजैश्चसिंहैश्चसमेयिवानहंसदाकरिष्यामितवानघप्रियम् ॥
१० ॥ विराटउवाच ॥ ददामितेहंतवरान्महानसेतथाचकुर्याःकुशलंप्रभाषसे ॥ नचैवमन्येतवकर्मयत्समंसमुद्रनेमिंपृथिवींत्वमर्हसि ११ यथाहिकामोभवतस्तथा
कृतंमहानसेत्वंभववमेपुरस्कृतः ॥ नराश्चयेतत्रसमाहिताःपुराभवांश्चतेषामधिपोमयाकृतः १२ ॥ वैशंपायनउवाच ॥ तथासभीमोविहितोमहानसेविराटराज्ञो
दयितोऽभवद्दृढम् ॥ उवासराज्येनचतंपृथग्जनोबुबोधतत्रानुचराश्चकेचन १३ ॥ इतिश्रीमहाभारतेविराटपर्वणि पांडवप्रवेशपर्वणिभीमप्र० अष्टमोऽध्या
यः ॥ ८ ॥ ॥ वैशंपायनउवाच ॥ ततःकेशान्समुत्क्षिप्यवेल्लिताग्राननिंदितान् ॥ कृष्णान्सूक्ष्मान्मृदून्दीर्घान्समुद्ग्रथ्यशुचिस्मिता १ जुगूहेदक्षिणेपा
र्श्वेमृदूनसितलोचना ॥ वासश्चपरिधायैकंकृष्णासुमलिनंमहत् २ कृत्वावेषंचसैरंध्र्यास्ततोव्यचरदार्तवत् ॥ तांनराःपरिधावंतींस्त्रियश्चसमुपाद्रवन् ३ अपृ
च्छंश्चैवतांदृष्ट्वाकात्वंकिंचचिकीर्षसि ॥ सातानुवाचराजेंद्रसैरंध्र्यहमिहागता ४ कर्मचेच्छामिवैकर्तुंतस्ययोमांयुयुक्षति ॥ तस्यारूपेणवेषेणश्लक्ष्णयाचतथा
गिरा ॥ नश्रद्दधततांदासीमन्नहेतोरुपस्थिताम् ५ विराटस्यतुकैकेयीभार्यापरमसंमता ॥ आलोकयंतीददृशेप्रासादाद्द्रुपदात्मजाम् ६ सासमीक्ष्यतथारूपा
मनाथामेकवाससम् ॥ समाहूयाब्रवीद्भद्रेकात्वंकिंचचिकीर्षसि ७ सातामुवाचराजेंद्रसैरंध्र्यहमुपागता ॥ कर्मचेच्छाम्यहंकर्तुंतस्ययोमांयुयुक्षति ८ ॥ सुदे
ष्णोवाच ॥ नैवंरूपाभवंत्येवयथावदसिभामिनि ॥ प्रेषयंतीववैदासीर्दासांश्चविविधान्बहून् ९ नोच्चगुल्फासंहतोरुस्त्रिगंभीराषडुन्नता ॥ रक्तापंचसुरक्तेषुहंस
गद्गदभाषिणी १० सुकेशीसुस्तनीश्यामापीनश्रोणिपयोधरा ॥ तेनतेनैवसंपन्नाकाश्मीरीवतुरंगमा ११

गुल्फौपादग्रंथीयस्याःसा तथात्रिगंभीरा त्रिषु शब्दबुद्धिनाभीषुगहना । षडुन्नता षट्सुनासिकाक्षिद्वयश्रोत्रनखस्तनककाटिकासुउन्नता । पंचसुस्थानेषु पादपाणितलनेत्रांतोष्ठजिह्वान
खेषु एतान्येवसंज्ञया पंचरक्तानितेषुरक्ता । हंसवद्गद्गदंकिंचिल्लुप्ताक्षरंमधुरंवाभाषते साहंसगद्गदभाषिणी १० तेनतेनलक्षणेनमंदगतित्वादिना ११

अरालेवक्रेकृष्णेवापक्ष्मणीययोस्तादृशेनयनेयस्याःसा । तथाकंबुग्रीवा शंखवत्रेखात्रयांकितग्रीवा । गूढशिरागुप्तनाडिका १२ । १३ । १४ । १५ । १६ सैरंध्रीभुजिष्यापदे प्राकुच्चर्यंव्या
ख्याते १७ कर्तुंसंस्कर्तुं १८ । १९ कृष्णांचभार्यांपांडूनामितिस्वात्मना स्वस्याराधनंसंभवतीतिनेयंनृपोक्तिः २० । २१ राजात्वांचेन्नइच्छतितदात्वांमूर्ध्निवासये परंतुराजात्वांसर्वेणचेतसा
गच्छेत्स्पृहयेदेवेतिशंके २२ त्वंस्त्रीणामपिमोहकरीकिमुतपुंसामित्याह स्त्रियइति २३ वृक्षानितिवृक्षा अपित्वांदृष्ट्वास्तब्धाःसंतीत्यर्थः २४ । २५ प्रसक्तंआसक्तियुक्तंयथास्यात्तथा २६ एवमनेनै

अरालपक्ष्मनयनाबिंबोष्ठीतनुमध्यमा ॥ कंबुग्रीवागूढशिरापूर्णचंद्रनिभानना १२ शारदोत्पलपत्राक्ष्याशारदोत्पलगंधया ॥ शारदोत्पलसेविन्यारूपेणसदृ
शीश्रिया १३ कात्वंब्रूहियथाभद्रेनासिदासीकथंचन ॥ यक्षीवायदिवादेवीगंधर्वीयदिवाऽप्सराः १४ देवकन्याभुजंगीवानगरस्याथदेवता ॥ विद्याधरीकिन्नरी
वायदिवारोहिणीस्वयम् १५ अलंबुषामिश्रकेशीपुंडरीकाऽथमालिनी ॥ इंद्राणीवारुणीवात्वंत्वष्टुर्धातुःप्रजापतेः ॥ देव्योदेवेषुविख्यातास्तासांत्वंकतमाशुभे
१६ ॥ द्रौपद्युवाच ॥ नास्मिदेवीनगंधर्वीनासुरीनचराक्षसी ॥ सैरंध्रीतुभुजिष्याऽस्मिसत्यमेतद्ब्रवीमिते १७ केशान्जानाम्यहंकर्तुंपिंषेसाधुविलेपनम् ॥ म
ल्लिकोत्पलपद्मानांचंपकानांतथाशुभे १८ ग्रथयिष्येविचित्राश्चस्रजःपरमशोभनाः ॥ आराधयंसत्यभामांकृष्णस्यमहिषींप्रियाम् १९ कृष्णांचभार्यांपांडूनां
कुरूणामेकसुंदरीम् ॥ तत्रतत्रचराम्येवंलभमानासुभोजनम् २० वासांसियावंतिलभेतावत्तावद्रमेतथा ॥ मालिनीत्येवमेनामस्वयंदेवीचकारसा ॥ साऽहम
द्यागतादेविसुदेष्णेत्वन्निवेशनम् २१ ॥ सुदेष्णोवाच ॥ मूर्ध्नित्वांवासयेयंवैसंशयोमेनविद्यते ॥ नचेदिच्छतिराजात्वांगच्छेत्सर्वेणचेतसा २२ स्त्रियोराजकु
लेयाश्चयाश्चेमाममवेश्मनि ॥ प्रसक्तास्त्वांनिरीक्षंतेपुमांसंकंनमोहयेः २३ वृक्षांश्चावस्थितान्पश्ययइमेममवेश्मनि ॥ तेऽपित्वांसन्नमंतीवपुमांसंकंनमोहयेः
२४ राजाविराटःसुश्रोणिदृष्ट्वावपुरमानुषम् ॥ विहायमांवरारोहेगच्छेत्सर्वेणचेतसा २५ यंहित्वमनवद्यांगितरलायतलोचने ॥ प्रसक्तमभिवीक्षेथाःसकामवश
गोभवेत् २६ यश्चत्वांसततंपश्येत्पुरुषश्चारुहासिनि ॥ एवंसर्वानवद्यांगिसचानंगवशोभवेत् २७ अध्यारोहेद्यथावृक्षान्वधायैवात्मनोनरः ॥ राजवेश्मनिते
सुभ्रुगृहेतुस्यात्तथामम २८ यथाचकर्कटीगर्भमाधत्तेमृत्युमात्मनः ॥ तथाविधमहंमन्येवासंतवशुचिस्मिते २९ ॥ द्रौपद्युवाच ॥ नास्मिलभ्याविराटेननचा
न्येनकदाचन ॥ गंधर्वाःपतयोमह्यंयुवानःपंचभामिनि ३० पुत्रागंधर्वराजस्यमहासत्वस्यकस्यचित् ॥ रक्षंतितेचमांनित्यंदुःखाचारातथाह्यहम् ३१ योमेन
दद्यादुच्छिष्टंनचपादौप्रधावयेत् ॥ प्रीणेरंस्तेनवासेनगंधर्वाःपतयोमम ३२

वल्लीवृक्षादिस्तब्धीभावचिन्हेन २७ । २८ कर्कटीषट्पादवान्जंतुः २९ मह्यंमम गंधर्वाइतिदेवत्वांशजत्वादमानुषत्वमात्रंविवक्षितं अतिमानुषकर्माणइत्यर्थः ३० गंधर्वतुल्योराजा
गंधर्वराजःपांडुस्तस्येतिगूढोऽभिसंधिः दुःखादुःखवतीतिदुःखदाचाहं परपत्नीत्वात् आरासिंहीव सिंहीपरैरनाक्रमणीया । 'आरःपुंसितरोभेदेतथाकर्कटदंष्ट्रिणोः'इतिमेदिनी । आरशब्दाद
दंतत्वाद्स्त्रियांटाप् । स्वयमेववीक्ष्यवताऽस्मीतिभावः । दुःखाचारेति क्लेशकालोऽयंकियान्ममास्तीतिद्योतयति ३१ । ३२

परांतरंप्रविश्येत्यनेनपरलोकंगच्छेदेवेरयुक्तम् ३३ तेऽपिदुःखशीलाः केनचिन्निमित्तेनदुःखंसहंतीत्यर्थः । बलवंतश्चतेप्रियाश्च ३४ हेनंदिनिसुखदे ३५ । ३६ । ३७ ॥ इतिवि० नी० भा० नवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ उपयात्उपायात् १ । २ । ३ । ४ वेशोरूपांतरप्रकाशनंकर्मयस्यसवैश्यः । अरिष्टनेमिःअप्रतिहतचक्रोऽस्मीतिगूढोऽभिसंधिः । कुरुपुंगवानां

योहिमांपुरुषोगृद्धचेद्यथाऽन्याःप्राकृताःस्त्रियः ॥ तामेवानिवसेद्रात्रिंप्रविश्यचपरांतनुम् ३३ नचाप्यहंचालयितुंशक्याकेनचिदंगने ॥ दुःखशीलाहिगंधर्वास्तेचमेबलवत्प्रियाः ३४ प्रच्छन्नाश्चापिरक्षंतितेमांनित्यंशुचिस्मिते ॥ सुदेष्णोवाच ॥ एवंत्वांवासयिष्यामियथात्वंनंदिनिच्छसि ३५ नचपादौनचोच्छिष्टंस्प्रक्ष्यसित्वंकथंचन ॥ वैशंपायनउवाच ॥ एवंकृष्णाविराटस्यभार्ययापरिसांत्विता ३६ उवासनगरेतस्मिन्पतिधर्मवतीसती ॥ नचैनांवेदतत्रान्यस्तत्त्वेन जनमेजय ३७ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणिद्रौपदीप्रवेशेनवमोऽध्यायः ॥ ९ ॥ वैशंपायनउवाच ॥ सहदेवोऽपिगोपानांकृत्वावेषमनुत्तमम् ॥ भाषांचैषांसमास्थायविराटमुपयादथ १ गोष्ठमासाद्यतिष्ठंतंभवनस्यसमीपतः ॥ राजाऽथदृष्ट्वापुरुषान्प्राहिणोज्जातविस्मयः २ तमायांतमभिप्रेक्ष्यभ्राजमानंनरर्षभम् ॥ समुपस्थायवैराजापप्रच्छकुरुनंदनम् ३ कस्यवात्वंकुतोवात्वंकिंवात्वंतुचिकीर्षसि ॥ नहिमेदृष्टपूर्वस्त्वंतत्त्वंब्रूहिनरर्षभ ४ संप्राप्यराजानममित्रतापनंततोऽब्रवीन्मेघमहौघनिःस्वनः ॥ वैश्योऽस्मिनाम्नाऽहमरिष्टनेमिर्गोसंख्यआसंकुरुपुंगवानाम् ५ वस्तुंत्वयीच्छामिविशांवरिष्ठतान्राजसिंहान्नहिवेद्मिपार्थान् ॥ नशक्यतेजीवितुमप्यकर्मणानचत्वदन्योममरोचतेनृपः ६ ॥ विराटउवाच ॥ त्वंब्राह्मणोयदिवाक्षत्रियोऽसिसमुद्रनेमीश्वररूपवानसि ॥ आचक्ष्वमेतत्त्वममित्रकर्शननवैश्यकर्मत्वयिविद्यतेक्षमम् ७ कस्यासिराज्ञोविषयादिहागतःकिंवाऽपिशिल्पंतवविद्यतेकृतम् ॥ कथंत्वमस्मासुनिवत्स्यसेसदावदस्वकिंचापितवेहवेतनम् ८ ॥ सहदेवउवाच ॥ पंचानांपांडुपुत्राणांज्येष्ठोभ्रातायुधिष्ठिरः ॥ तस्याष्टशतसाहस्रागवांवर्गाःशतंशतम् ९ अपरेशतसाहस्राद्विस्तावंतस्तथाऽपरे ॥ तेषांगोसंख्यआसंवैतंतिपालेतिमांविदुः १० भूतंभव्यंभविष्यंचयच्चसंख्यागतंगवाम् ॥ नमेऽस्त्यविदितंकिंचित्समंताद्दशयोजनम् ११ गुणाःसुविदिताह्यासन्ममतस्यमहात्मनः ॥ आसीच्चसमयादृष्टःकुरुराजोयुधिष्ठिरः १२ क्षिप्रंचगावोबहुलाभवंतिनतासुरोगोभवतीहकश्चन ॥ तैस्तैरुपायैर्विदितंममैतदेतानिशिल्पानिमयिस्थितानि १३ वृषभांश्चापिजानामिराजन्पूजितलक्षणान् ॥ येषांमूत्रमुपाघ्रायअपिवंध्याप्रसूयते १४ ॥ विराटउवाच ॥ शतंसहस्राणिसमाहितानिसवर्णवर्णस्यविमिश्रितान्गुणैः ॥ पशून्सपालान्भवतेददाम्यहंत्वदाश्रयामेपशवोभवंत्विह १५

पांडवानांमध्येगोसंख्यः गोइतिइंद्रियवाचित्वात्पंचानांसंख्यायस्यसगोसंख्यः पंचसंख्यः पंचमइत्यर्थः ५ तान्राजसिंहान् वर्तमानकाले राजमूर्धस्थान्नवेद्मिनोपलभे । स्वर्गोध्वस्तइतिवद्विशेषणादर्शनाद्विशिष्टादर्शनमुक्तमित्यदोषः ६ । ७ । ८ । ९ गोसंख्योगवांपरीक्षकः तंतिपालःवचनकरः १० संख्यागतंपरीक्षायामवगतम् ११ । १२ । १३ । १४ समानोवर्णोयेषांतेसवर्णाः वर्णस्यवर्णेनविमिश्रिताश्चपाटलादयः विभक्त्यलोपआर्षः सवर्णाश्चवर्णविमिश्रिताश्चतांस्तत्तद्गुणैरुपलक्षितान् १५

राज्ञोराज्यकर्तुः विशांपतेः प्रजापालकस्य भरणंवेतनम् १६ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेदशमोऽध्यायः ॥ १० ॥ अदृश्यतदृष्टः रूपसंपदाउपलक्षितः प्राकारवप्रेस्थितैःतत्समीपेवास्थितोऽदृश्यतदृष्टः । प्रतिमुच्यपरिधाय दीर्घेकुंडलेताटंके । कंबूनांशंखानामुपरिकंबुपरिहाटकेकनकमयेवलयेचपरिमुच्य १ दीर्घान्मूर्धजान्बाहूचप्रविकीर्यप्रसार्य २ । ३ । ४ । ५

॥ वैशंपायनउवाच ॥ तथासराज्ञोविदितोविशांपतेरुवासतत्रैवसुखंनरोत्तमः ॥ नचैनमन्येऽपिविदुःकथंचनप्रादाच्चतस्मैभरणंयथेप्सितम् १६ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणिसहदेवप्रवेशेदशमोऽध्यायः ॥ १० ॥ वैशंपायनउवाच ॥ अथापरोऽदृश्यतरूपसंपदास्त्रीणामलंकारधरोबृहत्पुमान् ॥ प्राकारवप्रेप्रतिमुच्यकुंडलेदीर्घेचकंबूपरिहाटकेशुभे १ बाहूचदीर्घान्प्रविकीर्यमूर्धजान्महाभुजोवारणतुल्यविक्रमः ॥ गतेनभूमिंप्रतिकंपयंस्तदाविराटमासाद्यसभासमीपतः २ तंप्रेक्ष्यराजोपगतंसभातलेव्याजात्प्रतिच्छन्नमरिप्रमाथिनम् ॥ विराजमानंपरमेणवर्चसासुतंमहेंद्रस्यगजेंद्रविक्रमम् ३ सर्वानपृच्छच्चसभानुचारिणःकुतोऽयमायातिपुरानमेश्रुतः ॥ नचैनमूचुर्विदितंतदानराःसविस्मयंवाक्यमिदंनृपोऽब्रवीत् ४ सत्त्वोपपन्नःपुरुषोऽमरोपमःश्यामोयुवावारणयूथपोपमः ॥ आमुच्यकंबूपरिहाटकेशुभेविमुच्यवेणीमपिनह्यकुंडले ५ स्रग्वीसुकेशःपरिधायचान्यथाशुशोभधन्वीकवचीशरीयथा ॥ आरुह्ययानंपरिधावतांभवान्सुतैःसमोमेभववामयासमः ६ वृद्धोह्यहंवैपरिहारकामःसर्वान्मत्स्यांस्तरसापालयस्व ॥ नैवंविधाःक्लीबरूपाभवंतिकथंचनेतिप्रतिभातिमेमनः ७॥ अर्जुनउवाच ॥ गायामिनृत्याम्यथवादयामिभद्रोऽस्मिनृत्येकुशलोऽस्मिगीते ॥ त्वमुत्तरायैप्रदिशस्वमांस्वयंभवामिदेव्यानरदेवनर्तकः ८ इदंतुरूपंममयेनकिंतवप्रकीर्तयित्वाभृशशोकवर्द्धनम् ॥ बृहन्नलांमांनरदेवविद्धिसुतंसुतांवापितृमातृवर्जिताम् ९ ॥ विराटउवाच ॥ ददामितेहंतवरंबृहन्नलेसुतांचमेनर्तययाश्चतादृशीः ॥ इदंतुतेकर्मसमंनमेमतंसमुद्रनेमिंपृथिवींत्वमर्हसि १० ॥ वैशंपायनउवाच ॥ बृहन्नलांतामभिवीक्ष्यमत्स्यराट्कलासुनृत्येषुतथैववादिते ॥ संमंत्र्यराजाविविधैःस्वमंत्रिभिःपरीक्ष्यचैनंप्रमदाभिराशुवै ११ अपुंस्त्वमप्यस्यनिशम्यचस्थिरंततःकुमारीपुरमुत्ससर्जतम् ॥ सशिक्षयामासचगीतवादितंसुतांविराटस्यधनंजयःप्रभुः १२ सखीश्चतस्याःपरिचारिकास्तथाप्रियश्चतासांसबभूवपांडवः १३ तथाससत्रेणधनंजयोवसन्प्रियाणिकुर्वन्सहताभिरात्मवान् ॥ तथाचतंतत्रनजज्ञिरेजनाबहिश्चरावाऽप्यथचांतरेचराः १४ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणिअर्जुनप्रवेशोनामएकादशोऽध्यायः ॥ ११ ॥ वैशंपायनउवाच ॥ अथापरोऽदृश्यतपांडवःप्रभुर्विराटराजंतरसासमेयिवान् ॥ तमापतंतंददृशेपृथग्जनोविमुक्तमभ्रादिवसूर्यमंडलम् १ सवैहयानैक्षततांस्ततस्ततःसमीक्षमाणंसददर्शमत्स्यराट् ॥ ततोऽब्रवीत्ताननुगान्नरेश्वरःकुतोऽयमायातिनरोऽमरोपमः २

६ परिहारकामः अमात्येषुराज्यभारंन्यस्तुकामः ७ देव्याउत्तरायाः ८ येनहेतुनाइदंरूपंममजातंतत्कीर्तनं तवनिकटेव्यर्थंशोककरंचेत्यर्थः ९ तेसमंरवदाकृत्याप्युक्तंनइतिमेममतम् १० । ११ अपुंस्त्वंक्लीबत्वं निशम्यआलोच्य १२ । १३ सत्रेणकैतवेन । 'सत्रमाच्छादनेयज्ञेसदादानेचकैतवे'इतिविश्वः । नजज्ञिरेनज्ञातवंतः १४ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपे एकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ १ । २

३ । ४ । ५ । ६ । प्रकृतिंजातिं । विनयंशिक्षां । प्रतिपत्तिंदोषनिराकरणप्रकारं । चिकित्सितंव्याध्युपशमोपायम् ७ कातरंभीरु वडवाअश्वा अतएवग्रंथिकमश्वशास्त्रज्ञम् ८
स्वयंहयानीक्षतिमामकान्दृढंध्रुवंहयज्ञोभविताविचक्षणः ॥ प्रवेश्यतामेषसमीपमाशुमेविभातिवीरोहियथाऽमरस्तथा ३ अभ्येत्यराजानममित्रहाऽब्रवीज्जयोऽ
स्तुतेपार्थिवभद्रमस्तुवः ॥ हयेषुयुक्तोनृपसंमतःसदातवाश्वसूतोनिपुणोभवाम्यहम् ४॥ विराटउवाच ॥ ददामियानानिधनंनिवेशनंममाश्वसूतोभवितुंत्वमर्ह
सि ॥ कुतोऽसिकस्यासिकथंत्वमागतःप्रब्रूहिशिल्पंतवविद्यतेचयत् ५ ॥ नकुलउवाच ॥ पंचानांपांडुपुत्राणांज्येष्ठोभ्रातायुधिष्ठिरः॥ तेनाहमश्वेषुपुरानियुक्तः
शत्रुकर्शन ६ अश्वानांप्रकृतिंवेद्मिविनयंचापिसर्वशः ॥ दुष्टानांप्रतिपत्तिंचकृत्स्नंचैवचिकित्सितम् ७ नकातरंस्यान्ममजातुवाहनंनमेऽस्तिदुष्टावडवाकुतोह
याः ॥ जनस्तुमामाहसचापिपांडवोयुधिष्ठिरोग्रंथिकमेवनामतः ८ ॥ विराटउवाच ॥ यदस्तिकिंचिन्ममवाजिवाहनंतदस्तुसर्वंत्वदधीनमद्यवै ॥ येचापिकेचि
न्ममवाजियोजकास्त्वदाश्रयाःसारथयश्चसंतुमे ९ इदंतवेष्टंयदिवैसुरोपमब्रवीहियत्तेप्रसमीक्षितंवसु ॥ नतेऽनुरूपंहयकर्मविद्यतेप्रभासिराजेवहिसंमतोमम १०
युधिष्ठिरस्येवहिदर्शनेनमेसमंतवेदंप्रियमत्रदर्शनं ॥ कथंतुभृत्यैःसविनाकृतोवनेवसत्यनिंद्योरमतेचपांडवः ११॥ वैशंपायनउवाच ॥ तथासगंधर्ववरोपमोयुवा
विराटराज्ञामुदितेनपूजितः ॥ नचैनमन्येऽपिविदुःकथंचनप्रियाभिरामंविचरंतमंतरा १२ एवंहिमत्स्येन्यवसंतपांडवायथाप्रतिज्ञाभिरमोघदर्शनाः ॥ अज्ञातच
र्यांव्यचरन्समाहिताःसमुद्रनेमीपतयोऽतिदुःखिताः १३ ॥ इतिश्रीमहाभारतेविराटपर्वणिपांडवप्रवेशपर्वणिनकुलप्रवेशेद्वादशोऽध्यायः ॥ १२ ॥ ॥ समाप्तं
चेदंप्रवेशपर्व ॥ अथसमयपालनपर्व ॥ ॥ जनमेजयउवाच ॥ एवंतेमत्स्यनगरेप्रच्छन्नाःकुरुनंदनाः ॥ अतऊर्ध्वंमहावीर्याःकिमकुर्वतवैद्विज १ ॥ वैशंपायन
उवाच ॥ एवंमत्स्यस्यनगरेप्रच्छन्नाःकुरुनंदनाः ॥ आराधयंतोराजानंयदकुर्वततच्छृणु २ तृणबिंदुप्रसादाच्चधर्मस्यचमहात्मनः ॥ अज्ञातवासमेवंतुविराटन
गरेऽवसन् ३ युधिष्ठिरःसभास्तारोमत्स्यानामभवत्प्रियः ॥ तथैवचविराटस्यसपुत्रस्यविशांपते ४ सह्याक्षहृदयज्ञस्तान्क्रीडयामासपांडवः ॥ अक्षवत्यांयथा
कामंसूत्रबद्धानिवद्विजान् ५ अज्ञातंचविराटस्यविजित्यवसुधर्मराट् ॥ भ्रातृभ्यःपुरुषव्याघ्रोयथार्हंसंप्रयच्छति ६ भीमसेनोऽपिमांसानिभक्ष्याणिविविधानि
च ॥ अतिसृष्टानिमत्स्येनविक्रीणीतेयुधिष्ठिरे ७ वासांसिपरिजीर्णानिलब्धान्यंतःपुरेऽर्जुनः ॥ विक्रीणानश्चसर्वेभ्यःपांडवेभ्यःप्रयच्छति ८ सहदेवोऽपिगोपा
नांवेषमास्थायपांडवः ॥ दधिक्षीरंघृतंचैवपांडवेभ्यःप्रयच्छति ९ नकुलोऽपिधनंलब्ध्वाकृतेकर्मणिवाजिनाम् ॥ तुष्टेतस्मिन्नरपतौपांडवेभ्यःप्रयच्छति १० ॥ १ ॥
२ । १० । ११ । १२ । १३ ॥ इतिश्रीम० विराटपर्वणिनैलकंठीयेभारतभावदीपे नकुलप्रवेशोनामद्वादशोऽध्याय ॥ १२ ॥ एत्रमिति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १०

११ संपादयंतोऽन्योन्यमाराधयंतः गर्भधृताइवप्रच्छन्नत्वेन सेवाश्रमेणचदुःखिताइत्यर्थः १२ । १३ ब्रह्मणउत्सवः शरदिनवधान्योत्पत्तौसर्वैःक्रियते सचदेशविशेषेप्रसिद्धः १४ यथात्र
ह्मणःसमाजेब्रह्मलोके कैलासेवापशुपतेःसमाजेइव मत्स्येषुसमापेतुरितिसंबंधः १५ । १६ स्वच्छदाताःअत्यंतनिर्मलाः मनस्विनःप्रीतमनसः लब्धलक्षाःप्राप्तविजयाः १७ । १८ सूदेनमीमेन
१९ दुःखेनैव पारतंत्र्यात्प्राकट्यभयाच्चादुःखं नतुभंगभयात् विवृते प्रकाशे २० । २१ कक्षांपरिकरं । कच्छामितिपाठेऽपिसएवार्थः । यद्वाकक्षांरज्जुं रज्ज्वापाटनभयान्मल्लैरंगुल्योर्बध्यंतइ
तिप्रसिद्धेरंगुलीर्बद्धेत्यर्थः २२ । २३ । २४ । २५ । २६ कृतंकचिद्देशेनिपीडनं प्रतिकृतंतस्यमोचनं । सुसंकटैःमुष्टिग्रहणेनकृशीकृतैः । सकंटकैरितिपाठेसकवचैःसकिणैर्वा । 'कंटकोबाहु
चरणकवचेकठिनेकिणे'इतिविश्वः । संनिपातोऽगसंघट्टनं । अवधूतंतेनैवदूरीकरणं । प्रमाथादयउक्तामल्लशास्त्रे । 'निपात्यपेषणंभूमौप्रमाथइतिकथ्यते । यत्नूत्थायांगमथनंतदुन्मथनमुच्यते'
कृष्णातुसर्वान्भर्तॄंस्तान्निरीक्षंतीतपस्विनी ॥ यथापुनरविज्ञातातथाचरतिभामिनी ११ एवंसंपादयंतस्तेतदाऽन्योन्यंमहारथाः ॥ विराटनगरेचेरुःपुनर्गर्भ
धृताइव १२ साशंकाधार्त्तराष्ट्रस्यभयात्पांडुसुतास्तदा ॥ प्रेक्षमाणास्तदाकृष्णामूषुश्छन्नानराधिप १३ अथमासेचतुर्थेतुब्रह्मणःसुमहोत्सवः ॥ आसीत्समृ
द्धोमत्स्येषुपुरुषाणांसुसंमतः १४ तत्रमल्लाःसमापेतुर्दिग्भ्योराजन्सहस्रशः ॥ समाजेब्राह्मणोराजन्यथापशुपतेरिव १५ महाकायामहावीर्याःकालखंजाइवा
सुराः ॥ वीर्योन्मत्ताबलोदग्राराज्ञासमभिपूजिताः १६ सिंहस्कंधकटिग्रीवाःस्ववदातामनस्विनः ॥ असकृल्लब्धलक्षास्तेरंगेपार्थिवसन्निधौ १७ तेषामेकोम
हानासीत्सर्वमल्लानथाह्वयत् ॥ आवल्गमानंतंरंगेनोपतिष्ठतिकश्चन १८ यदासर्वेविमनसस्तेमल्लाहतचेतसः ॥ अथसूदेनतंमल्लंयोधयामासमत्स्यराट् १९
नोद्यमानस्तदाभीमोदुःखेनैवाकरोन्मतिम् ॥ नहिशक्नोतिविवृतेप्रत्याख्यातुंनराधिपम् २० ततःसपुरुषव्याघ्रःशार्दूलशिथिलश्चरन् ॥ प्रविवेशमहारंगंविरा
टमभिपूजयन् २१ बबंधकक्षांकौंतेयस्ततःसंहर्षयन्जनम् ॥ ततस्तुवृत्रसंकाशंभीमोमल्लंसमाह्वयत् २२ जीमूतंनामतंतत्रमल्लंप्रख्यातविक्रमम् ॥ तावुभौसुम
होत्साहावुभौभीमपराक्रमौ २३ मत्ताविवमहाकायौवारणौषष्टिहायनौ ॥ ततस्तौनरशार्दूलौबाहुयुद्धंसमीयतुः २४ वीरौपरमसंहृष्टावन्योन्यजयकांक्षिणौ ॥
आसीत्सुभीमःसंपातोवज्रपर्वतयोरिव २५ उभौपरमसंहृष्टौबलेनातिबलावुभौ ॥ अन्योन्यस्यांतरंप्रेप्सूपरस्परजयैषिणौ २६ उभौपरमसंहृष्टौमत्ताविवमहाग
जौ ॥ कृतप्रतिकृतैश्चित्रैर्बाहुभिश्चसुसंकटैः ॥ सन्निपातावधूतैश्चप्रमाथोन्मथनैस्तथा २७ क्षेपणैर्मुष्टिभिश्चैववराहोद्धूतनिःस्वनैः ॥ तलैर्वज्रनिपातैश्चप्रसृष्टाभि
स्तथैवच २८ शलाकानखपातैश्चपादोद्धूतैश्चदारुणैः ॥ जानुभिश्चाश्मनिर्घोषैःशिरोभिश्चावघट्टनैः २९ तद्युद्धमभवद्घोरमशस्त्रंबाहुतेजसा ॥ बलप्राणेनशूरा
णांसमाजोत्सवसन्निधौ ३० अरज्यतजनःसर्वःसोत्कृष्टनिनदोत्थितः ॥ बलिनोःसंयुगेराजन्वृत्रवासवयोरिव ३१
२७ 'क्षेपणंकथ्यतेयत्तुस्थानात्प्रच्यावनंहठात् । उभयोर्भुजयोर्मुष्टिरुरोमध्येनिपात्यते । मुष्टिरित्युच्यतेतज्ज्ञैर्मल्लविद्याविशारदैः । अवाङ्मुखस्कंधगतंभ्रामयित्वातथैवयः । क्षिप्तस्यशब्दःसम
वेद्वराहोद्धूतनिःस्वनः' । तलैर्वज्रनिपातैर्वज्रवदृढपातैश्चपेटैः । 'अंगुल्यःप्रसृतायास्तुताःप्रसृष्टाउदीरिताः' २८ 'ऋज्वीद्दढारुपाक्षिप्ताशलाकासांगुलीस्मृता' । तस्यानखपातैः । पादोद्धूतैःपाद
प्रसारणेनाक्षेपैः । जानुभिःशिरोभिश्चकृतैरवघट्टनैरास्फालनैः । अश्मनिर्घोषैरित्युभयविशेषणं २९ अशस्त्रंनिर्यंत्रयोःकृतमेव । 'बाहुयुद्धंहिमल्लानामशस्त्रमृषिभिःस्मृतं । मृतस्य
तस्यनस्वर्गो यशोनेहापिविद्यते'इति । बलप्राणेन बलेनशारीरबलेन प्राणेनमानसबलेनच ३० सोत्कृष्टनिनदः हीहीशब्दोच्चारणेनयजितस्यसमुत्थापनंतस्सहितः ३१

'आकृष्यक्रोडीकरणंप्रकर्षणमुदाहृतं । आकर्षणंलीलयैवसंमुखीकरणंस्मृतं । पुरःपश्चात्पार्श्वयोश्चाभ्याकर्षोभ्रमणंतथा । पश्चात्प्रपातनंवेगाद्विकर्षणमुदाहृतम् ' ३२ । ३३ । ३४ । ३५

प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ॥ आकर्षतुरथान्योन्यंजानुभिश्चापिजघ्नतुः ३२ ततःशब्देनमहताभर्त्सयंतौपरस्परम् ॥ व्यूढोरस्कौदीर्घभुजौनियुद्धकुश
लावुभौ ॥ बाहुभिःसमसज्जेतामायसैःपरिघैरिव ३३ चकर्षदोर्भ्यामुत्पाट्यभीमोमल्लममित्रहा ॥ निनदंतमभिक्रोशन्शार्दूलइववारणम् ३४ समुद्यम्यमहाबा अ०
॥१०॥ हुर्भ्रामयामासवीर्यवान् ॥ ततोमल्लाश्चमत्स्याश्चविस्मयंचक्रिरेपरम् ३५ भ्रामयित्वाशतगुणंगतसत्वमचेतनम् ॥ प्रत्यपिंषन्महाबाहुर्मल्लंभुविवृकोदरः ३६
तस्मिन्विनिहतेवीरेजीमूतेलोकविश्रुते ॥ विराटःपरमंहर्षमगच्छद्बांधवैःसह ३७ प्रहर्षात्प्रददौवित्तंबहुराजामहामनाः ॥ बल्लवायमहारंगेयथावैश्रवणस्तथा ३८ ॥१३॥
एवंससुबहून्मल्लान्पुरुषांश्चमहाबलान् ॥ विनिघ्नन्मत्स्यराजस्यप्रीतिमाहरदुत्तमाम् ३९ यदास्यतुल्यःपुरुषोनकश्चित्तत्रविद्यते ॥ ततोव्याघ्रैश्चसिंहैश्चद्विर
दैश्चाप्ययोधयत् ४० पुनरंतःपुरगतःस्त्रीणांमध्येवृकोदरः ॥ योध्यतेसविराटेनसिंहैर्मत्तैर्महाबलैः ४१ बीभत्सुरपिगीतेनसुनृत्येनचपांडवः ॥ विराटंतोषयामा
ससर्वाश्चांतःपुरस्त्रियः ४२ अश्वैर्विनीतैर्जवनैस्तत्रतत्रसमागतैः ॥ तोषयामासराजानंनकुलोनृपसत्तमम् ४३ तस्मैप्रदेयंप्रायच्छत्प्रीतोराजाधनंबहु ॥ वि
नीतान्वृषभान्दृष्ट्वासहदेवस्यचाभितः ॥ धनंददौबहुविधंविराटःपुरुषर्षभः ४४ द्रौपदीप्रेक्ष्यतान्सर्वान्क्लिश्यमानान्महारथान् ॥ नातिप्रीतमनाराजन्निःश्वा
सपरमाऽभवत् ४५ एवंतेन्यवसंस्तत्रप्रच्छन्नाःपुरुषर्षभाः ॥ कर्माणितस्यकुर्वाणाविराटनृपतेस्तदा ४६ ॥ इतिश्रीमहा० वि० प० समयपालनप० जीमू
तवधेत्रयोदशोऽध्यायः ॥ १३ ॥ समाप्तंचेदंसमयपालनपर्व ॥ अथकीचकवधपर्व ॥ ॥ वैशंपायनउवाच ॥ वसमानेषुपार्थेषुमत्स्यस्यनगरेतदा ॥ महारथे
षुच्छन्नेषुमासादशसमाययुः १ याज्ञसेनींसुदेष्णांतुशुश्रूषंतीविशांपते ॥ आवसत्परिचारार्हासुदुःखंजनमेजय २ तथाचरंतींपांचालींसुदेष्णायानिवेशने ॥
तांदेवींतोषयामासतथाचांतःपुरस्त्रियः ३ तस्मिन्वर्षेगतप्रायेकीचकस्तुमहाबलः ॥ सेनापतिर्विराटस्यददर्शद्रुपदात्मजाम् ४ तांदृष्ट्वादेवगर्भाभांचरंतींदेवता
मिव ॥ कीचकःकामयामासकामबाणप्रपीडितः ५ सतुकामाग्निसंतप्तःसुदेष्णामभिगम्यवै ॥ प्रहसन्निवसेनानीरिदंवचनमब्रवीत् ६ नेयंमयाजातुपुरेहदृष्टाराज्ञोवि
राटस्यनिवेशनेशुभा ॥ रूपेणचोन्मादयतीवमांभृशंगंधेनजातामदिरेवभामिनी ७ कादेवरूपाहृदयंगमाशुभेह्याचक्ष्वमेकस्यकुतोऽत्रशोभने ॥ चित्तंहिनिर्मथ्य
करोतिमांवशेनचान्यदत्रौषधमस्तिमेमतम् ८ अहोतवेयंपरिचारिकाशुभाप्रत्यग्ररूपाप्रतिभातिमामियम् ॥ अयुक्तरूपंहिकरोतिकर्मतेप्रशास्तुमांयच्चममास्ति
किंचन ९ प्रभूतनागाश्वरथंमहाजनंसमृद्धियुक्तंबहुपानभोजनम् ॥ मनोहरंकांचनचित्रभूषणंगृहंमहच्छोभयतामियंमम १० ततःसुदेष्णामनुमंत्र्यकीचकस्त
तःसमभ्येत्यनराधिपात्मजाम् ॥ उवाचकृष्णामभिसांत्वयंस्तदामृगेंद्रकन्यामिवजंबुकोवने ११ गतसत्वंनष्टबुद्धिं अतएवअचेतनंशवभूतम् ३६ । ३७ । ३८ । ३९ । ४० ॥१०॥
४१।४२।४३।४४।४५।४६ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेत्रयोदशोऽध्यायः ॥ १३ ॥वसमानेष्विति १।२।३।४।५।६।७अन्यदौषधंदृतांविना ८ प्रत्यग्ररूपादिव्यरूपा ९।१०।११

१२ । १३ परपुष्टःकोकिलः १४ । १५ भूतिःईश्वरी ऐश्वर्याभिमानिनीदेवता १६ अनंगांगविहारिणी स्मरदेहेनक्रीडंती रतिरित्यर्थः १७ ईक्षणपक्ष्माणांनेत्रपक्ष्मणांस्मितंईषदुन्मीलनंतदेव
ज्योत्स्नोपमंमनसआह्लादकरं । लक्ष्माणमितिपाठेवक्त्रचंद्रविशेषणम् १८ । १९ सुजातौउन्नतौ निरंतरौपृथुत्वात्संश्लिष्टौ २० कुड्मलेतिमुकुलीभूतपद्माकारौ २१ कराग्रंअंगुष्ठादिमध्यमांतो
कात्वंकस्यासिकल्याणिकुतोवात्वंवरानने ॥ प्राप्ताविराटनगरंतत्त्वमाचक्ष्वशोभने १२ रूपमग्र्यंतथाकांतिःसौकुमार्यमनुत्तमम् ॥ कांत्याविभातिवक्त्रंतेशशां
कइवनिर्मलम् १३ नेत्रेसुविपुलेसुभ्रुपद्मपत्रनिभेशुभे ॥ वाक्यंतेचारुसर्वांगिपरपुष्टरुतोपमम् १४ एवंरूपामयानारीकाचिदन्यामहीतले ॥ नदृष्टपूर्वासुश्रो
णियादृशीत्वमनिंदिते १५ लक्ष्मीःपद्मालयाकात्वमथभूतिःसुमध्यमे ॥ ह्रीःश्रीःकीर्तिरथोकांतिरासांकात्वंवरानने १६ अतीवरूपिणीकिंत्वमनंगांगविहारि
णी ॥ अतिभ्राजसेसुभ्रुप्रभेवेंदोरनुत्तमा १७ अपिचेक्षणपक्ष्माणांस्मितज्योत्स्नोपमंशुभम् ॥ दिव्यांशुरश्मिभिर्वृत्तंदिव्यकांतिमनोरमम् १८ निरीक्ष्यवक्त्र
चंद्रंतेलक्ष्म्याऽनुपमयायुतम् ॥ कृत्स्नेजगतिकोनेहकामस्यवशगोभवेत् १९ हारालंकारयोग्यौतुस्तनौचोभौसुशोभनौ ॥ सुजातौसहितौलक्ष्म्यापीनौवृत्तौ
निरंतरौ २० कुड्मलांबुरुहाकारौतवसुभ्रुपयोधरौ ॥ कामप्रतोदाविवमांतुदतश्चारुहासिनि २१ वलीविभंगचतुरंस्तनभारविनामितम् ॥ कराग्रसंमितंमध्यं
तवेदंतनुमध्यमे २२ दृष्ट्वैवचारुजघनंसरित्पुलिनसंनिभम् ॥ कामव्याधिरसाध्योमामप्याक्रामतिभामिनि २३ जज्वालचाग्निमदनोदावाग्निरिवनिर्दयः ॥ त्व
त्संगमाभिसंकल्पविवृद्धोमांदहत्ययम् २४ आत्मप्रदानवर्षेणसंगमांभोधरेणच ॥ शमयस्ववरारोहेज्वलंतंमन्मथानलम् २५ मच्चित्तोन्मादनकरामन्मथस्यशरो
त्कराः ॥ त्वत्संगमाशानिशितास्तीव्राःशशिनिभानने ॥ मह्यंविदार्यहृदयमिदंनिर्दयवेगिताः २६ प्रविष्टाह्यसितापांगिप्रचंडाश्चंडदारुणाः ॥ अत्युन्मादसमा
रंभाःप्रीत्युन्मादकराभम ॥ आत्मप्रदानसंभोगैर्मामुद्धर्तुमिहार्हसि २७ चित्रमाल्यांबरधरासर्वाभरणभूषिता ॥ कामंप्रकामंसेवत्वंमयासहविलासिनि २८ नार्ह
सीहासुखंवस्तुंसुखार्हासुखवर्जिता ॥ प्राप्नुह्यनुत्तमंसौख्यंमत्तस्त्वंमत्तगामिनि २९ स्वादून्यमृतकल्पानिपेयानिविविधानिच ॥ पिबमानामनोज्ञानिरममाणा
यथासुखम् ३० भोगोपचारान्विविधान्सौभाग्यंचाप्यनुत्तमम् ॥ पानंपिबमहाभागेभोगैश्चानुत्तमैःशुभैः ३१ इदंहिरूपंप्रथमंतवानघेनिरर्थकंकेवलमद्यभामि
नि ॥ अधार्यमाणास्रगिवोत्तमाशुभानशोभसेसुंदरिशोभनासती ३२ त्यजामिदारान्ममयेपुरातनाभवंतुदास्यस्तवचारुहासिनि ॥ अहंचतेसुंदरिदासवत्स्थितःस
दाभविष्येवशगोवरानने ३३ ॥ द्रौपद्युवाच ॥ अप्रार्थनीयामिहमांसूतपुत्राभिमन्यसे ॥ निहीनवर्णांसैरंध्रींबीभत्सांकेशकारिणीम् ३४ परदाराऽस्मिभद्रंतेन
युक्तंत्वयिसांप्रतम् ॥ दयिताःप्राणिनांदाराधर्मंसमनुचिंतय ३५ परदारेनतेबुद्धिर्जातुकार्याकथंचन ॥ विवर्जनंह्यकार्याणामेतत्सुपुरुषव्रतम् ३६
वितस्तिस्तेनसंमितंकृशमित्यर्थः २२ । २३ अग्निमदनो मदनाग्निः २४ । २५ । २६ अत्युन्मादंमरणकालीनंसन्निपातंसमारभंते ते अत्युन्मादसमारंभाः त्वद्दलाभेमरिष्याम्येवेतिभावः
२७ कामंस्मरं प्रकाममतिशयितम् २८ प्राप्नुहिलभस्व २९ । ३० । ३१ । ३२ । ३३ अभिमन्यसे कामयसे ३४ । ३५ । ३६

मिथ्याभिगृध्नःवितथाभिनिवेशी महद्भयंमृत्युं ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ । ४८ । ४९ । ५० मन्यसेलिप्ससे । शिशोश्चंद्रवदहंतवदुर्लभाऽस्मीति
भावः ५१ तेषांप्रियामिति तेषांप्रसिद्धानांगंधर्वाणांप्रियांप्रार्थयतस्त्वेतव भुविगत्वादिवंवागत्वा शरणंत्राता कश्चिन्नभविष्यति । अतएवहेकीचक तेतवकामांधस्य सादृशादृष्टिर्बुद्धिरितिया
वत् याशुभंस्वीयंअर्थयेतकामयेत । शुभेच्छारूपातवनास्तीत्यर्थः । तेनचशुभेनपरदारानिवृत्तिरूपेण कामितेन संजीवनंभवतीतिशेषः । अन्यथामरिष्यसीत्यर्थः । नमेभुवीतिपाठे

॥११! मिथ्याभिगृध्नोहिनरःपापात्मामोहमास्थितः ॥ अयशःप्राप्नुयाद्घोरंमहद्वाप्राप्नुयाद्भयम् ३७ ॥ वैशंपायनउवाच ॥ एवमुक्तस्तुसैरंध्याकीचकःकाममोहितः ॥ ॥१५॥
जानन्नपिसुदुर्बुद्धिःपरदाराभिमर्शने ३८ दोषान्बहून्प्राणहरान्सर्वलोकविगर्हितान् ॥ प्रोवाचेदंसुदुर्बुद्धिर्द्रौपदीमजितेंद्रियः ३९ नार्हस्येवंवरारोहेप्रत्याख्यातुं
वरानने ॥ मांमन्मथसमाविष्टंत्वत्कृतेचारुहासिनि ४० प्रत्याख्यायचमांभीरुवशगंप्रियवादिनम् ॥ नूनंत्वमसितापांगिपश्चात्तापंकरिष्यसि ४१ अहंहिसुभ्रु
राज्यस्यकृत्स्नस्यास्यसुमध्यमे ॥ प्रभुर्वासयिताचैववीर्येचाप्रतिमःक्षितौ ४२ पृथिव्यांमत्समोनास्तिकश्चिदन्यःपुमानिह ॥ रूपयौवनसौभाग्यैर्भोगैश्चानुत्त
मैःशुभैः ४३ सर्वकामसमृद्धेषुभोगेष्वनुपमेष्विह ॥ भोक्तव्येषुचकल्याणिकस्माद्दास्येरताह्यसि ४४ मयादत्तमिदंराज्यंस्वामिन्यसिशुभानने ॥ भजस्वमांवरारो
हेभुंक्ष्वभोगाननुत्तमान् ४५ एवमुक्तातुसासाध्वीकीचकेनाशुभंवचः ॥ कीचकंप्रत्युवाचेदंगर्हयंत्यस्यतद्वचः ४६ ॥ सैरंध्र्युवाच ॥ मासूतपुत्रमुह्यस्वमाऽद्य
त्यक्ष्यस्वजीवितम् ॥ जानीहिपंचभिर्घोरैर्नित्यंमामभिरक्षिताम् ४७ नचाप्यहंत्वयालभ्यागंधर्वाःपतयोमम ॥ तेत्वांनिहन्युःकुपिताःसाध्वलंमाव्यनीनशः
४८ अशक्यरूपंपुरुषैरध्वानंगंतुमिच्छसि ॥ यथानिश्चेतनोबालःकूलस्थःकूलमुत्तरम् ॥ तर्तुमिच्छतिमंदात्मातथात्वंकर्तुमिच्छसि ४९ अंतर्महींवायदिवो
र्ध्वमुत्पतेःसमुद्रपारंयदिवाप्रधावसि ॥ तथाऽपितेषांनविमोक्षमर्हसिप्रमाथिनोदेवसुताहिखेचराः ५० त्वंकालरात्रीमिवकश्चिदातुरःकिंमांदृढंप्रार्थयसेऽद्यकीचक॥
किमातुरंकेशयितोयथाशिशुश्चंद्रंजिघृक्षुरिवमन्यसेहिमाम् ५१ तेषांप्रियांप्रार्थयतोनतेभुविगत्वादिवंवाशरणंभविष्यति ॥ नवर्ततेकीचकतेदृशाशुभंयातेनसं
जीवनमर्थयेतसा ५२ ॥ इतिश्रीमहाभारतेविराटपर्वणिकीचकवधपर्वणिकीचककृष्णासंवादेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ वैशंपायनउवाच ॥
प्रत्याख्यातोराजपुत्र्यासुदेष्णांकीचकोऽब्रवीत् ॥ अमर्यादेनकामेनघोरेणाभिपरिप्लुतः १ यथाकैकेयिसैरंध्रीसमेयात्तद्विधीयताम् ॥ येनोपायेनसैरंध्रीभजेन्मांग
जगामिनी ॥ तंसुदेष्णेपरीप्सस्वप्राणान्मोहात्प्रहासिषम् २

तेषांप्रियांप्रार्थयतो मेमम कोऽपित्रातानभविष्यतीति दृशाबुद्धिस्तवनास्तीतिसंबंधः । यातेषसंजीवनमर्थयतमितिपाठेतु यादृष्टिस्तेतवसंजीवनंचभवति कीदृशंसंजीवनं अर्थयतस्तवस्व ॥११॥
धीनं । तस्माद्वितथाभिनिवेशिनस्तेजीवनंनास्तीत्यर्थः ५२ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेचतुर्दशोऽध्याय ॥ १४ ॥ ॥ छ ॥ १ समेयात् मामुपगच्छेत् माऊहादि
तिच्छेदः ऊहात्वितर्कात्तं उपायंगुक्त्यापरीप्सस्वेतियोज्यं प्राणान्माप्रहासिषमितिच २

३ कृष्णायाःप्राप्त्यर्थंउद्योगंउद्यमंचानुचिंत्येतियोज्यं ४ पर्वणिमद्यपायिनांउत्सवकालेचतुर्दश्यादौ । समुद्दिश्य अद्याहंसुदेष्णायैमद्यादिकंकारयामीतिकीर्तयित्वाख्यापयित्वा ५ वि
जनेएकांते निरवग्रहेनिष्प्रतिबंधे ६ । ७ । ८ उपमंत्रिताप्रार्थिता ९ पानंमद्यं सुरामन्नंचेत्युपक्रमात् तस्यैव पिपासा पातुमिच्छा १० । ११ । १२ । १३ । १४ । १५ । १६ । १७

॥ वैशंपायनउवाच ॥ तस्यसावहुशःश्रुत्वावाचंविलपतस्तदा ॥ विराटमहिषीदेवीकृपांचक्रेमनस्विनी ३ स्वमंत्रमभिसंधायतस्यार्थमनुचिंत्यच ॥ उद्योगंचै
वकृष्णायाःसुदेष्णासूतमब्रवीत् ४ पर्वणित्वंसमुद्दिश्यसुरामन्नंचकारय ॥ तत्रैनांप्रेषयिष्यामिसुराहारींतवांतिकम् ५ तत्रसंप्रेषितामेनांविजनेनिरवग्रहे ॥ सां
त्वयेथायथाकामंसांत्वमानारमेद्यदि ६ ॥ वैशंपायनउवाच ॥ इत्युक्तःसविनिष्क्रम्यभगिन्यावचनात्तदा ॥ सुरामाहारयामासराजार्हांसुपरिष्कृताम् ७ भक्ष्यां
श्चविविधाकारान्बहूंश्चोच्चावचांस्तदा ॥ कारयामासकुशलैरन्नपानंसुशोभनम् ८ तस्मिन्कृतेतदादेवीकीचकेनोपमंत्रिता ॥ सुदेष्णाप्रेषयामाससैरंध्रींकीचका
लयम् ९ ॥ सुदेष्णोवाच ॥ उत्तिष्ठगच्छसैरंध्रिकीचकस्यनिवेशनम् ॥ पानमानयकल्याणिपिपासामांप्रबाधते १० ॥ सैरंध्र्युवाच ॥ नगच्छेयमहंतस्यरा
जपुत्रिनिवेशनम् ॥ त्वमेवराज्ञिजानासियथासनिरपत्रपः ११ नचाहमनवद्यांगितववेश्मनिभामिनि ॥ कामवृत्ताभविष्यामिपतीनांव्यभिचारिणी १२ त्वंचैव
देविजानासियथाससमयःकृतः ॥ प्रविशंत्यामयापूर्वंतववेश्मनिभामिनि १३ कीचकस्तुसुकेशांतेमूढोमदनदर्पितः ॥ सोऽवमंस्यतिमांदृष्ट्वानयास्येतत्रशोभने
१४ संतिबह्व्यस्तवप्रेष्याराजपुत्रिवशानुगाः ॥ अन्यांप्रेषयभद्रंतेसहिमामवमंस्यते १५ ॥ सुदेष्णोवाच ॥ नैवत्वांजातुहिंस्यात्सइतःसंप्रेषितांमया ॥ इ
त्युक्त्वाप्रददौपात्रंसपिधानंहिरण्मयम् १६ साशंकमानारुदतीदैवंशरणमीयुषी ॥ प्रातिष्ठतसुराहारीकीचकस्यनिवेशनम् १७ ॥ सैरंध्र्युवाच ॥ यथाऽहमन्यं
भर्तृभ्योनाभिजानामिकंचन ॥ तेनसत्येनमांप्राप्तांमाकुर्यात्कीचकोवशे १८ ॥ वैशंपायनउवाच ॥ उपातिष्ठतसासूर्यंमुहूर्तमबलाततः ॥ सतस्यास्तनुमध्या
याःसर्वंसूर्योऽवबुद्धवान् १९ अंतर्हितंततस्तस्यारक्षोरक्षार्थमादिशत् ॥ तच्चैनांनाजहात्तत्रसर्वावस्थास्वनिंदिताम् २० तांमृगीमिवसंत्रस्तांदृष्ट्वाकृष्णांसमीप
गाम् ॥ उदतिष्ठन्मुदासूतोनावंलब्ध्वेवपारगः २१ ॥ ॥ इतिश्रीमहाभारतेविराटपर्वणिकीचकवधपर्वणिद्रौपदीसुराहरणेपंचदशोऽध्यायः ॥ १५ ॥ छ ॥
कीचकउवाच ॥ स्वागतंतेसुकेशांतेसुव्युष्टारजनीमम ॥ स्वामिनीत्वमनुप्राप्ताप्रकुरुष्वममप्रियम् १ सुवर्णमालाःकंबूश्चकुंडलेपरिहाटके ॥ नानापत्तनजेशुभ्रे
मणिरत्नंचशोभनम् २ आहरंतुचवस्त्राणिकौशिकान्यजिनानिच ॥ अस्तिमेशयनंदिव्यंत्वदर्थमुपकल्पितम् ॥ एहितत्रमयासार्द्धंपिबस्वमधुमाधवीम् ३
॥ द्रौपद्युवाच ॥ अप्रैषीद्राजपुत्रीमांसुराहारींतवांतिकम् ॥ पानमाहरमेक्षिप्रंपिपासामेऽतिचाब्रवीत् ४
१८ । १९ । २० ॥ २१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेपंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ १ ॥ परितोहाटकेययोस्ते परिहाटकेकुंडले ताटंकेइत्यर्थः २ मधुमाधवीं मधु
पुष्पजांमदिरां ३ सुराहारींसुरामाहर्तुंकामां पिपासामेऽति मेममअतिपिपासा ४

५ । ६ । ७ । ८ विधुन्वानाकंपमाना ९ । १० अपोवाहदुरीचकार ११ । १२ । १३ । १४ धूमच्छायाःकर्मं नेत्रेकर्तृणी अभजतां । छायामित्येकवचनांतःपाठःस्वच्छः १५ । १६ अंगुष्ठं

कीचकउवाच ॥ अन्याभद्रेनयिष्यंतिराजपुत्र्याःप्रतिश्रुतम् ॥ इत्येनांदक्षिणेपाणौसूतपुत्रःपरामृशत् ५ ॥ द्रौपद्युवाच ॥ यथैवाहंनाभिचरेकदाचित्पती
न्मदाद्विमनसाऽपिजातु ॥ तेनैवसत्येनवशीकृतंत्वांद्रष्टास्मिपापंपरिकृष्यमाणम् ६ ॥ वैशंपायनउवाच ॥ सतामभिप्रेक्ष्यविशालनेत्रांजिघृक्षमाणःपरिभर्त्स
यंतीम् ॥ जग्राहतामुत्तरवस्त्रदेशेसकीचकस्तांसहसाऽऽक्षिपंतीम् ७ प्रगृह्यमाणातुमहाजवेनमुहुर्विनिश्वस्यचराजपुत्री ॥ तयासमाक्षिप्ततनुःसपापःपपातशा
खीवनिकृत्तमूलः ८ साग्रहीताविधुन्वानाभूमावाक्षिप्यकीचकम् ॥ सभांशरणमागच्छद्यत्रराजायुधिष्ठिरः ९ तांकीचकःप्रधावंतींकेशपाशेपरामृशत् ॥ अथै
नांपश्यतोराज्ञःपातयित्वापदाऽवधीत् १० तस्ययोऽसौतदाऽर्केणराक्षसःसंनियोजितः ॥ सकीचकमपोवाहवातवेगेनभारत ११ सपपाततदाभूमौरक्षोबलसमा
हतः ॥ विघूर्णमानोनिश्चेष्टश्छिन्नमूलइवद्रुमः १२ तांचासीनौददृशतुर्भीमसेनयुधिष्ठिरौ ॥ अमृष्यमाणौकृष्णायाःकीचकेनपराभवम् १३ तस्यभीमोवधंप्रेप्सुः
कीचकस्यदुरात्मनः ॥ दंतैर्दंतांस्तदारोषान्निष्पिपेषमहामनाः १४ धूमच्छायाह्यभजतांनेत्रेचोच्छ्रितपक्ष्मणी ॥ सस्वेदाभ्रुकुटीचोग्राललाटेसमवर्तत १५
हस्तेनममृदेचैवललाटंपरवीरहा ॥ भूयश्चत्वरितःक्रुद्धःसहसोत्थातुमैच्छत १६ अथावमृद्नादंगुष्ठमंगुष्ठेनयुधिष्ठिरः ॥ प्रबोधनभयाद्राजाभीमंतंप्रत्यषेधयत्
१७ तंमत्तमिवमातंगंवीक्षमाणंवनस्पतिम् ॥ सतमावारयामासभीममेनंयुधिष्ठिरः १८ आलोकयसिकिंवृक्षंसूददारुकृतेनवै ॥ यदितेदारुभिःकृत्यंबहिर्वृक्षा
न्निगृह्यताम् १९ सासभाद्वारमासाद्यरुदतीमत्स्यमब्रवीत् ॥ अवेक्षमाणासुश्रोणीपतींस्तान्दीनचेतसः २० आकारमभिरक्षंतीप्रतिज्ञाधर्मसंहिता ॥ दह्यमा
नेवरौद्रेणचक्षुषाद्रुपदात्मजा २१ ॥ द्रौपद्युवाच ॥ येषांवैरीनस्वपितिषष्ठेऽपिविषयेवसन् ॥ तेषांमांमानिनींभार्यांसूतपुत्रःपदाऽवधीत् २२ येदद्युर्नचयाचेयुर्ब्र
ह्मण्याःसत्यवादिनः ॥ तेषांमांमानिनींभार्यांसूतपुत्रःपदाऽवधीत् २३ येषांदुंदुभिनिर्घोषोज्याघोषःश्रूयतेऽनिशम् ॥ तेषांमांमानिनींभार्यांसूतपुत्रःपदाऽवधीत्
२४ येचतेजस्विनोदांताबलवंतोऽतिमानिनः ॥ तेषांमांमानिनींभार्यांसूतपुत्रःपदाऽवधीत् २५ सर्वलोकमिमंहन्युर्धर्मपाशसितास्तुये ॥ तेषांमांमानिनीं
भार्यांसूतपुत्रःपदाऽवधीत् २६ शरणंयेप्रपन्नानांभवंतिशरणार्थिनाम् ॥ चरंतिलोकेप्रच्छन्नाःक्वनुतेऽद्यमहारथाः २७ कथंतेसूतपुत्रेणवध्यमानांप्रियांसतीम् ॥
मर्षयंतियथाक्लीबाबलवंतोऽमितौजसः २८ क्वनुतेषाममर्षश्चवीर्यंतेजश्चवर्तते ॥ नपरीप्संतियेभार्यांवध्यमानांदुरात्मना २९ ॥१२॥

पादांगुष्ठं अंगुष्ठेनहस्तांगुष्ठेन आचारादेवंज्ञेयं १७ १८ । १९ । २० अभिरक्षंतीगूहमाना धर्मसंहिताधर्मबद्धा २१ षष्ठेविषये देशपंचकव्यवधानेऽपिनस्वपिति तेषांसार्वभौमत्वात् यद्वा । बाह्ये
न्द्रियग्राह्यपंचविषयापेक्षया षष्ठेमनोमात्रग्राह्ये स्वप्नमनोरथादिरूपेऽपिविषयेनस्वपिति भयार्दितःसन् किमुतलोकेनस्वपितीत्यर्थः २२ । २३ । २४ । २५ सिताःबद्धाः २६ । २७ । २८ । २९

३० । ३१ । ३२ । ३३ । ३४ । कौशलं साध्वसाधुनिर्णयेहविशेषः किंनुकथंनु ३५ । ३६ । ३७ । ३८ । ३९ माऽत्रस्थाःअत्रमास्थाःमातिष्ठ ४० । ४१ । ४२ शैलूषीव नटीव निर्लज्जा ४३

मयाऽत्रशक्यंकिंकर्तुंविराटेधर्मदूषके ॥ यःपश्यन्मांमर्षयतिवध्यमानामनागसम् ३० नराजाराजवत्किंचित्समाचरतिकीचके ॥ दस्यूनामिवधर्मस्तेनहिसंसदि
शोभते ३१ नाहमेतेनयुक्तंवैहंतुंमत्स्यतवांतिके ॥ सभासदोऽत्रपश्यंतुकीचकस्यव्यतिक्रमम् ३२ कीचकोनचधर्मज्ञोनचमत्स्यःकथंचन ॥ सभासदोऽप्यध
र्मज्ञायएनंपर्युपासते ३३ ॥ वैशंपायनउवाच ॥ एवंविधैर्वचोभिःसातदाकृष्णाऽश्रुलोचना ॥ उपालभतराजानंमत्स्यानांवरवर्णिनी ३४ ॥ विराटउवाच ॥
परोक्षंनाभिजानामिविग्रहंयुवयोरहम् ॥ अर्थतत्त्वमविज्ञायकिंनुस्यात्कौशलंमम ३५ ॥ वैशंपायनउवाच ॥ ततस्तुसभ्याविज्ञायकृष्णांभूयोऽभ्यपूजयन् ॥
साधुसाध्वितिचाप्याहुःकीचकंचव्यगर्हयन् ३६ ॥ सभ्याऊचुः ॥ यस्येयंचारुसर्वांगीभार्यास्यादायतेक्षणा ॥ परोलाभस्तुतस्यस्यान्नचशोचेत्कथंचन ३७ न
हीदृशीमनुष्येषुसुलभावरवर्णिनी ॥ नारीसर्वानवद्यांगीदेवीमन्यामहेवयम् ३८ ॥ वैशंपायनउवाच ॥ एवंसंपूजयंतस्तेकृष्णांप्रेक्ष्यसभासदः ॥ युधिष्ठिरस्य
कोपात्तुललाटेस्वेदआगमत् ३९ अथाब्रवीद्राजपुत्रींकौरव्योमहिषींप्रियाम् ॥ गच्छसैरंध्रिमाऽत्रस्थाःसुदेष्णायानिवेशनम् ४० भर्तारमनुरुंधंत्यःक्लिश्यंतेवी
रपत्नयः ॥ शुश्रूषयाक्लिश्यमानाःपतिलोकंजयंत्युत ४१ मन्येनकालंक्रोधस्यपश्यंतिपतयस्तव ॥ तेनत्वांनाभिधावंतिगंधर्वाःसूर्यवर्चसः ४२ अकालज्ञा
ऽसिसैरंध्रिशैलूषीवविरोदिषि ॥ विघ्नंकरोषिमत्स्यानांदीव्यतांराजसंसदि ४३ गच्छसैरंध्रिगंधर्वाःकरिष्यंतितवप्रियम् ॥ व्यपनेष्यंतितेदुःखंयेनतेविप्रियंकृतम्
४४ ॥ सैरंध्र्युवाच ॥ अतीवतेषांघृणिनामर्थेऽहंधर्मचारिणी ॥ तस्यतस्यैवतेवध्यायेषांज्येष्ठोऽक्षदेविता ४५ ॥ वैशंपायनउवाच ॥ इत्युक्त्वाप्राद्रवत्कृ
ष्णासुदेष्णायानिवेशनम् ॥ केशान्मुक्त्वाचसुश्रोणीसंरंभाल्लोहितेक्षणा ४६ शुशुभेवदनंतस्यारुदत्याःसुचिरंतदा ॥ मेघलेखाविनिर्मुक्तंदिवीवशशिमंडलम् ॥
४७ ॥ सुदेष्णोवाच ॥ कस्त्वाऽवधीद्वरारोहेकस्माद्रोदिषिशोभने ॥ कस्याद्यनसुखंभद्रेकेनतेविप्रियंकृतम् ४८ ॥ द्रौपद्युवाच ॥ कीचकोमाऽवधीत्तत्रसुरा
हारींगतांतव ॥ सभायांपश्यतोराज्ञोयथैवविजनेवने ४९ ॥ सुदेष्णोवाच ॥ घातयामिसुकेशांतेकीचकंयदिमन्यसे ॥ योऽसौत्वांकामसंमत्तोदुर्लभामवमन्यते
५० सैरंध्र्युवाच ॥ अन्येचैनंवधिष्यंतियेषामागःकरोतिसः ॥ मन्येचैवाद्यसुव्यक्तंयमलोकंगमिष्यति ५१ ॥ इतिश्रीमहाभारतेवि० कीचकव०द्रौपदीपरिभ
१० वेषोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ वैशंपायनउवाच ॥ साहतासूतपुत्रेणराजपत्नीयशस्विनी ॥ वधंकृष्णापरीप्संतीसेनावाहस्यभामिनी १ जगा
मावासमेवाथसातदाद्रुपदात्मजा ॥ कृत्वाशौचंयथान्यायंकृष्णासातनुमध्यमा २

दुःखंदुःखयितारं व्यपनेष्यंतिजीवितादितिशेषः ४४ घृणिनांदयावतां तेषामर्थेतस्यतस्यसर्वस्यैवतेवध्याःस्युः ४५ । ४६ । ४७ । ४८ पश्यतोराज्ञइत्यनादरेषष्ठी राजानंलक्षीकृत्येत्यर्थः ४९
५० । ५१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे षोडशोऽध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ सेनावाहस्य सेनापतेःकीचकस्य १ । २

३ । ४ । ५ । ६ यःतत्कर्मपदाहतिरूपंकृतवान् तस्मिन्नजीवति ७ । ८ । ९ संमूर्छितेवद्वद्दिशोभारूपांप्रासेवप्रजज्वालअशोभत १० सर्वश्वेतेवेति पांचालीद्रौपदी वरर्षभंवरणीयंपतिंश्रेष्ठंभी मसेनंउपलक्ष्य वासितेव पुष्पिणीत्वेनकामातुरेव उपातिष्ठतसमीपेस्थितवती वस्तुतोनकामातुरा किंतुद्वेषातुरैवेतिभावः । तत्रदृष्टांतद्वयं इवशब्दःकाकाक्षिवदुभयत्रसंबध्यते सर्वश्वेतेवमा हेयीवचेति । सर्वश्वेताबकी यथाकामातुरावरर्षभंपतिमितिएकः । तस्याःकामातुरत्वेहेतुः वनेजातेति जलेजातातेनजलसामीप्येलब्धाहारत्वेनउन्मत्तत्वंसूच्यते । तथामाहेयीगौः साऽपि वासितासतीवरर्षभंसांडंवलीवर्दं । तस्याअपिवासितात्वेविशेषणं त्रिहायणीति त्रिवर्षादिगोर्यौवनारूढाकामातुराचभवति । अन्येतु'श्वेतःसितेराजहंसेकैलासेद्वीपभूपयोः'इतिकोशमुदा

गात्राणिवाससीचैवप्रक्ष्याल्यसलिलेनसा ॥ चिंतयामासरुदतीतस्यदुःखस्यनिर्णयम् ३ किंकरोमिक्वगच्छामिकथंकार्यंभवेन्मम ॥ इत्येवंचिंतयित्वासाभीमं वैमनसाऽगमत् ४ नान्यःकर्त्ताऋतेभीमान्ममाद्यमनसःप्रियम् ॥ ततउत्थायरात्रौसाविहायशयनंस्वकम् ५ प्राद्रवन्नाथमिच्छंतीकृष्णानाथवतीसती ॥ भव नंभीमसेनस्यक्षिप्रमायतलोचना ६ दुःखेनमहतायुक्तामानसेनमनस्विनी ॥ सैरंध्र्युवाच ॥ तस्मिन्नजीवतिपापिष्ठेसेनावाहेममद्विषि ७ तत्कर्मकृतवानद्य कथंनिद्रांनिषेवसे ॥ वैशंपायनउवाच ॥ एवमुक्त्वाऽथतांशालांप्रविवेशमनस्विनी ८ यस्यांभीमस्तथाशेतेमृगराजइवश्वसन् ॥ तस्यारूपेणसाशालाभीम स्यचमहात्मनः ९ संमूर्छितेवकौरव्यप्रजज्वालचतेजसा ॥ सर्वेमहानसंप्राप्यभीमसेनंशुचिस्मिता १० सर्वश्वेतेवमाहेयीवनेजातात्रिहायणी ॥ उपातिष्ठत पांचालीवासितेववरर्षभम् ११ सालतेवमहाशालंफुल्लंगोमतितीरजम् ॥ परिष्वजतपांचालीमध्यमंपांडुनंदनम् १२ बाहुभ्यांपरिरभ्यैनंप्राबोधयदनिंदिता ॥ सिंहंसुप्तंवनेदुर्गेमृगराजवधूरिव १३ भीमसेनमुपाश्लिष्यद्धस्तिनीवमहागजम् ॥ वीणेवमधुरालापागांधारंसाधुमूर्छती ॥ अभ्यभाषतपांचालीभीमसेनमनिंदि ता १४ उत्तिष्ठोत्तिष्ठकिंशेषेभीमसेनयथामृतः ॥ नामृतस्यहिपापीयान्भार्यामालभ्यजीवति १५ ससंप्रहायशयनंराजपुत्र्याप्रबोधितः ॥ उपातिष्ठतमेघाभः पर्यंकेसोपसंग्रहे १६ अथाब्रवीद्राजपुत्रींकौरव्योमहिषींप्रियाम् ॥ केनास्यर्थेनसंप्राप्तात्वरितेवममांतिकम् १७ नतेप्रकृतिमान्वर्णःकृशापांडुश्चलक्ष्यसे ॥ आ चक्ष्वपरिशेषेणसर्वंविद्यामहंयथा १८ सुखंवायदिवादुःखंद्वेष्यंवायदिवाप्रियम् ॥ यथावत्सर्वमाचक्ष्वश्रुत्वाज्ञास्यामियत्क्षमम् १९ अहमेवहितेकृष्णेविश्वा स्यःसर्वकर्मसु ॥ अहमापत्सुचापित्वांमोक्षयामिपुनःपुनः २०

हृत्यसर्वश्वेताहंसीतिव्याचक्षते । तत्रसर्वेपदंव्यर्थं हंसस्यलोहितलोचनास्यचरणत्वात्प्रतिकूलंच । यद्यपि'त्रिहायणीत्रिवर्षागौः'इतिचकोशात् त्रिहायणीपदेनैवगौर्लभ्यते तथापितत्कामातु रत्वज्ञापनार्थमुपक्षीणंसद्विशेष्यसमर्पकंपदांतरमपेक्षतएवेतिनव्यर्थंविशेषणत्वं । अन्येऽव्याख्यानप्रकाराःसर्वेऽनेनैवदोषेणग्रस्ताइत्युपेक्षिताः ११ मध्यमंपांडुनंदनंभीमसेनं । यमयोःसहजात त्वेनपौर्वापर्याभावाच्चोक्तानिष्ठावेवयुधिष्ठिरोज्येष्ठएव । मध्यमत्वंभीमार्जुनयोरेवविश्रांतं तत्रापिअत्रप्रकरणात्अर्जुनस्यसंप्रतिपुंस्त्वाभावाच्च मध्यमत्वंभीमसेनेएवमुख्यमित्याशयेनैवैतदुक्तं । परिष्वजतपर्यष्वजतआलिंगितवती १२ । १३ गांधारंस्वरविशेषं मूर्छतीमूर्छयंती १४ । १५ सोपसंग्रहेसतूलिके १६ । १७ विद्यांजानीयां १८ ज्ञास्यामिउपायंचिंतयिष्यामि क्षमंयोग्यं १९ । २०

॥११॥

२१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेसप्तदशोऽध्यायः ॥ १७ ॥ १ सभाशाला तस्यां परिषत्जनसमाजस्तस्यमध्य तदाद्यूतकाले २ । ३ सैंधवेनजयद्रथेन ४ । ५ । ६ । ७ ८ । ९ । १० प्रव्रज्यंप्रव्रजनं व्रजयजोर्भावेक्यप् तस्मैप्रव्रज्याय ११ निष्कःसुवर्णपलंतेषांसहस्रेण १२ रुक्मंस्वर्णरूपंहिरण्यं । 'तस्माद्रजतंहिरण्यमश्रुजम्'इतिश्रुतौ हिरण्यश

शीघ्रमुक्त्वायथाकामंयत्तेकार्यंविवक्षितम् ॥ गच्छैवेशयनायैवपुरानान्येनबुध्यते २१ ॥ इतिश्रीमहाभारतेविराटपर्वणिकीचकवधपर्वणिद्रौपदीभीमसंवादेसप्त दशोऽध्यायः ॥ १७ ॥ ॥ द्रौपद्युवाच ॥ अशोच्यत्वंकुतस्तस्यायस्याभर्तायुधिष्ठिरः ॥ जानन्सर्वाणिदुःखानिकिंमांत्वंपरिपृच्छसि १ यन्मांदासीप्रवा देनप्रातिकामीतदाऽनयत् ॥ सभापरिषदोमध्येतन्मांदहतिभारत २ पार्थिवस्यसुतानामकानुजीवतिमादृशी ॥ अनुभूयेदृशंदुःखमन्यत्रद्रौपदींप्रभो ३ व नवासगतायाश्चसैंधवेनदुरात्मना ॥ परामर्शोद्वितीयोवैसोढुमुत्सहतेतुका ४ मत्स्यराज्ञःसमक्षंतुतस्यधूर्तस्यपश्यतः ॥ कीचकेनपरामृष्टाकानुजीवतिमादृशी ५ एवंबहुविधैःक्लेशैःक्लिश्यमानांचभारत ॥ नमांजानासिकौंतेयकिंफलंजीवितेनमे ६ योऽयंराज्ञोविराटस्यकीचकोनामभारत ॥ सेनानीःपुरुषव्याघ्रश्यालः परमदुर्मतिः ७ समांसैरंध्रिवेषेणवसंतींराजवेश्मनि ॥ नित्यमेवाहदुष्टात्माभार्याममभवेतिवै ८ तेनोपमंत्र्यमाणायावधार्हेणसपत्नहन् ॥ कालेनेवफलंपक्वंहृदयं मेविदीर्यते ९ भ्रातरंचविगर्हस्वज्येष्ठंदुर्द्यूतदेविनम् ॥ यस्याऽस्मिकर्मणाप्राप्तादुःखमेतदनंतकम् १० कोहिराज्यंपरित्यज्यसर्वस्वंचात्मनासह ॥ प्रव्रज्यायैवदी व्येतविनादुर्द्यूतदेविनम् ११ यदिनिष्कसहस्रेणयच्चान्यत्सारवद्धनम् ॥ सायंप्रातरदेविष्यदपिसंवत्सरान्बहून् १२ रुक्मंहिरण्यंवासांसियानंयुग्यमजाविकम् ॥ अश्वाश्वतरसंघाश्चनजातुक्षयमावहेत् १३ सोऽयंद्यूतप्रवादेनश्रियःप्रत्यवरोपितः ॥ तूष्णीमास्तेयथामूढःस्वानिकर्माणिचिंतयन् १४ दशनागसहस्राणिहया नांहेममालिनाम् ॥ यंयांतमनुयांतीहसोऽयंद्यूतेनजीवति १५ रथाःशतसहस्राणिनृपाणाममितौजाम् ॥ उपासंतमहाराजमिंद्रप्रस्थेयुधिष्ठिरम् १६ शतंदा सीसहस्राणांयस्यनित्यंमहानसे ॥ पात्रीहस्तंदिवारात्रमतिथीन्भोजयत्युत १७ एषनिष्कसहस्राणिप्रदायददतांवरः ॥ द्यूतजेनह्यनर्थेनमहतासमुपाश्रितः १८ एनंहिस्वरसंपन्नाबहवःसूतमागधाः ॥ सायंप्रातरुपातिष्ठन्सुमृष्टमणिकुंडलाः १९ सहस्रमृषयोयस्यनित्यमासन्सभासदः ॥ तपःश्रुतोपसंपन्नाःसर्वकामैरुप स्थिताः २० अष्टाशीतिसहस्राणिस्नातकागृहमेधिनः ॥ त्रिंशद्दासीकएकैकोयान्बिभर्तियुधिष्ठिरः २१ अप्रतिग्राहिणांचैवयतीनामूर्ध्वरेतसाम् ॥ दशचापिसह स्राणिसोऽयमास्तेनरेश्वरः २२ आनृशंस्यमनुक्रोशंसंविभागस्तथैवच ॥ यस्मिन्नेतानिसर्वाणिसोऽयमास्तेनरेश्वरः २३ अंधान्वृद्धांस्तथाऽनाथान्बालान् राष्ट्रेषुदुर्गतान् ॥ बिभर्तिविविधान्राजाधृतिमान्सत्यविक्रमः ॥ संविभागमनानित्यमानृशंस्याद्युधिष्ठिरः २४

ण्दस्यरजतेऽपिदर्शनात् । यानंगजादि । युग्यंयुगोपेतंरथशकटादि । अश्वावडवा १३ । १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ यतीनांदशसहस्रा णिबिभर्तीतिपूर्वेणान्वय २१ आनृशंस्यंअद्रोहं अनुक्रोशंदयां २३ । २४

निरयंपारतंत्र्यं कंकोहमितियुधिष्ठिरोब्रूते । कंकव्रतयुधिष्ठिरइतिपाठे कंकव्रतश्चासौयुधिष्ठिरश्चेतिसमासः २१ । २६ । २७ । २८ । २९ सदस्यंसभासदम् ३० । ३१ । ३२ । ३३
॥ इतिविराटपर्वणिनील० भारतभावदीपेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥ ॥ इदमिति १ हीनेनीचे असमेविषमे २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ प्रियसंवासात्प्रियस्यभी

सएषनिरयंप्राप्तोमत्स्यस्यपरिचारकः ॥ सभायांदेविताराज्ञःकंकोब्रूतेयुधिष्ठिरः २५ इंद्रप्रस्थेनिवसतःसमयेयस्यपार्थिवाः ॥ आसन्बलिभृतःसर्वेसोऽद्यान्यै
र्भृतिमिच्छति २६ पार्थिवाःपृथिवीपालायस्यासन्वशवर्तिनः ॥ सवशेविवशोराजापरेषामद्यवर्तते २७ प्रताप्यपृथिवींसर्वांरश्मिमानिवतेजसा ॥ सोऽयंराज्ञो
विराटस्यसभास्तारोयुधिष्ठिरः २८ यमुपासंतराजानःसभायामृषिभिःसह ॥ तमुपासीनमद्यान्यंपश्यपांडवपांडवम् २९ सदस्यंसमुपासीनंपरस्यप्रियवादि
नम् ॥ दृष्ट्वायुधिष्ठिरंकोपोवर्द्धतेमामसंशयम् ३० अतदर्हंमहाप्राज्ञंजीवितार्थेऽभिसंस्थितम् ॥ दृष्ट्वाकस्यनदुःखंस्याद्धर्मात्मानंयुधिष्ठिरम् ३१ उपास्तेस्मस
भायांयंकृत्स्नावीरवसुंधरा ॥ तमुपासीनमप्यन्यंपश्यभारतभारतम् ३२ एवंबहुविधैर्दुःखैःपीड्यमानामनाथवत् ॥ शोकसागरमध्यस्थांकिंमांभीमनपश्यसि
३३ ॥ इतिश्रीम० वि० प० की० व० द्रौपदीभीमसंवादे अष्टादशोऽध्यायः ॥ १८ ॥ ॥ ७ ॥ ॥ द्रौपद्युवाच ॥ इदंतुतेमहद्दुःखंयत्प्रवक्ष्यामि
भारत ॥ नमेऽभ्यसूयाकर्त्तव्यादुःखादेतद्ब्रवीम्यहम् १ सूदकर्मणिहीनेत्वमसमेभरतर्षभ ॥ ब्रुवन्बल्लवजातीयःकस्यशोकंनवर्द्धयेः २ सूपकारंविराटस्यबल्लवं
त्वांविदुर्जनाः ॥ प्रेष्यत्वंसमनुप्राप्तंततोदुःखतरंनुकिम् ३ यदामहानसेसिद्धेविराटमुपतिष्ठसि ॥ ब्रुवाणोबल्लवःसूदस्तदासीदातेमेमनः ४ यदाप्रहृष्टःसम्राट्
त्वांसंयोधयतिकुंजरैः ॥ हसंत्यंतःपुरेनार्योममतूद्विजतेमनः ५ शार्दूलैर्महिषैःसिंहैरागारेयोध्यसेयदा ॥ कैकेय्याःप्रेक्षमाणायास्तदामेकश्मलंभवेत् ६ ततउ
त्थायकैकेयीसर्वास्ताःप्रत्यभाषत ॥ प्रेष्याःसमुत्थिताश्चापिकैकेयींताःस्त्रियोऽब्रुवन् ७ प्रेक्षयमामनवद्यांगींकश्मलोपहतामिव ॥ स्नेहात्संवासजाद्धर्मात्सूदमेषा
शुचिस्मिता ८ योध्यमानंमहावीर्यमियंसमनुशोचति ॥ कल्याणरूपासैरंध्रीबल्लवश्चापिसुंदरः ९ स्त्रीणांचित्तंचदुर्ज्ञेयंयुक्तरूपौचमेमतौ ॥ सैरंध्रीप्रियसंवासा
न्नित्यंकरुणवादिनी १० अस्मिन्राजकुलेचेमौतुल्यकालनिवासिनौ ॥ इतिब्रुवाणावाक्यानिसामांनित्यमतर्जयत् ११ क्रुध्यंतींमांचसंप्रेक्ष्यसमशंकतमांत्वयि ॥
तस्यांतथाब्रुवत्यांतुदुःखंमांमहदाविशत् १२ त्वय्येवंनिरयंप्राप्तेभीमेभीमपराक्रमे ॥ शोकेयौधिष्ठिरेमग्नानाहंजीवितुमुत्सहे १३ यःसदेवान्मनुष्यांश्चसर्वांश्चै
करथोऽजयत् ॥ सोऽयंराज्ञोविराटस्यकन्यानांनर्त्तकोयुवा १४ योऽतर्पयदमेयात्माखांडवेजातवेदसम् ॥ सोंऽतःपुरगतःपार्थःकूपेऽग्निरिवसंवृतः १५ यस्मा
द्भयममित्राणांसदैवपुरुषर्षभात् ॥ सलोकपरिभूतेनवेषेणास्तेधनंजयः १६ यस्यज्याक्षेपकठिनौबाहूपरिघसन्निभौ ॥ सशंखपरिपूर्णाभ्यांशोचन्नास्तेधनंजयः
१७ यस्यज्यातलनिर्घोषात्समकंपंतशत्रवः ॥ स्त्रियोगीतस्वनंतस्यमुदिताःपर्युपासते १८ भसेनस्य संवासःसहवासःसंबंधस्तस्मात् तस्मिन्हस्त्यादिभिःसहयो ॥१४॥
ध्यमानेसाति करुणवादिनीदीनवादिनीभवति १० संवासमेवाहअस्मिन्निति ११ । १२ निरयंदुःखम् १३ । १४ । १५ लोकेपरिभूतेननिंदितेन १६ शंखपरिपूर्णाभ्यांबाहुभ्याम् १७ । १८

१९ । २० । २१ स्प्रष्टुंआकलयितुंयमितिशेषः यस्येत्यपिपठंति अप्रतिमानीतिच्छेदः २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ दिशोनश्यंति शोकेनआंध्यमायातीत्यर्थः ३० आ

किरीटंसूर्यसंकाशंयस्यमूर्द्धन्यशोभत ॥ वेणीविकृतकेशांतःसोऽयमद्यधनंजयः १९ तंवेणीकृतकेशांतंभीमधन्वानमर्जुनम् ॥ कन्यापरिवृतंदृष्ट्वाभीमसीदतिमे
मनः २० यस्मिन्नस्त्राणिदिव्यानिसमस्तानिमहात्मनि ॥ आधारःसर्वविद्यानांसधारयतिकुण्डले २१ स्प्रष्टुंराजसहस्राणितेजसाऽप्रतिमानिवै ॥ समरेनाभ्यवर्तं
तवेलामिवमहार्णवः २२ सोऽयंराज्ञोविराटस्यकन्यानांनर्तकोयुवा ॥ आस्तेवेषप्रतिच्छन्नःकन्यानांपरिचारकः २३ यस्यस्मरथघोषेणसमकंपतमेदिनी ॥ सपर्व
तवनाभीमसहस्थावरजंगमा २४ यस्मिन्जातेमहाभागेकुंत्याःशोकोव्यनश्यत ॥ सशोचयतिमामद्यभीमसेनतवानुजः २५ भूषितंतमलंकारैःकुंडलैःपरिहाट
कैः ॥ कंबुपाणिनमायांतंदृष्ट्वासीदतिमेमनः २६ यस्यनास्तिसमोवीर्येकश्चिदुर्व्यांधनुर्धरः ॥ सोऽद्यकन्यापरिवृतोगायन्नास्तेधनंजयः २७ धर्मेशौर्येचसत्येच
जीवलोकस्यसंमतम् ॥ स्त्रीवेषविकृतंपार्थंदृष्ट्वासीदतिमेमनः २८ यदाह्येनंपरिवृतंकन्याभिर्देवरूपिणम् ॥ प्रभिन्नमिवमातंगंपरिकीर्णंकरेणुभिः २९ मत्स्यम
र्थपतिंपार्थंविराटंसमुपस्थितम् ॥ पश्यामितुर्यमध्यस्थंदिशोनश्यंतिमेतदा ३० नूनमार्यानजानातिकृच्छ्रंप्राप्तंधनंजयम् ॥ अजातशत्रुंकौरव्यंमग्नंदुर्द्यूतदेवि
नम् ३१ तथादृष्ट्वायवीयांसंसहदेवंगवांपतिम् ॥ गोषुगोवेषमायांतंपांडुभूताऽस्मिभारत ३२ सहदेवस्यवृत्तानिचिंतयंतीपुनःपुनः ॥ ननिद्रामभिगच्छामि
भीमसेनकुतोरतिम् ३३ नविंदामिमहाबाहोसहदेवस्यदुष्कृतम् ॥ यस्मिन्नेवंविधंदुःखंप्राप्नुयात्सत्यविक्रमः ३४ दूयामिभरतश्रेष्ठदृष्ट्वातेभ्रातरंप्रियम् ॥ गोषु
गोवृषसंकाशंमत्स्येनाभिनिवेशितम् ॥ ३५ संरब्धंरक्तनेपथ्यंगोपालानांपुरोगमम् ॥ विराटमभिनंदंतमथमेभवतिज्वरः ३६ सहदेवंहिमेवीरंनित्यमार्याप्रशंस
ति ॥ महाभिजनसंपन्नःशीलवान्वृत्तवानिति ३७ ह्रीनिषेवोमधुरवाक्धार्मिकश्चप्रियश्चमे ॥ सतेऽरण्येषुवोढव्योयाज्ञसेनिक्षपास्वपि ३८ सुकुमारश्चशूरश्च
राजानंचाप्यनुव्रतः ॥ ज्येष्ठापचायिनंवीरंस्वयंपांचालिभोजयेः ३९ इत्युवाचहिमांकुंतीरुदतीपुत्रगृद्धिनी ॥ प्रव्रजंतंमहारण्यंतंपरिष्वज्यतिष्ठती ४० तंदृष्ट्वा
व्यापृतंगोषुवत्सचर्मक्षपाशयम् ॥ सहदेवंयुधांश्रेष्ठंकिंनुजीवामिपांडव ४१ यस्त्रिभिर्नित्यसंपन्नोरूपेणास्त्रेणमेधया ॥ सोऽश्वबंधोविराटस्यपश्यकालस्यप
र्ययम् ४२ अभ्यकीर्यंतवृंदानिदामग्रंथिमुदीक्षतम् ॥ विनयंतंजवेनाश्वान्महाराजस्यपश्यतः ४३ अपश्यमेनंश्रीमंतंमत्स्यंभ्राजिष्णुमुत्तमम् ॥ विराटमुप
तिष्ठंतंदर्शयंतंचवाजिनः ४४ किंनुमांमन्यसेपार्थसुखिनीतिपरंतप ॥ एवंदुःखशताविष्टायुधिष्ठिरनिमित्ततः ४५
र्यामश्वशूः ३१ गोवेषंमहोक्षसदृशं ३२ । ३३ । ३४ दूयामिखेदंप्राप्नोमि ३५ रक्तनेपथ्यं रक्तंगैरिकादिधातुमयंनेपथ्यमलंकारोयस्य ३६ । ३७ । ३८ ज्येष्ठापचायिनंज्येष्ठपूजकं ३९ । ४० वत्स
चर्मणिक्षपायांशेतेइतितं वत्सचर्मक्षपाशयम् ४१ । ४२ अभ्यकीर्यंतव्यशीर्यंत वृंदानिशत्रूणामितिशेषः दामग्रंथिंग्रंथिकम् ४३ एनंनकुलं वाजिनोऽश्वान्दर्शयंतं विराटंविराडाय ४४ । ४५

४६ म्रियमाणेषुजीवत्सु ॥ ४७ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे एकोनविंशोऽध्यायः ॥ १९ ॥ ॥ सैरंध्यावेषेणसैरंध्रीवेषेण शौचदाशुजलादिशौचसाधनप्रदा १ । २ । ३ ४ पुरुषस्यदुर्योधनादेः यःकालः सएवकालएव प्रतिपालयेकालमितिशेषः ५ कालएवसर्वंविपरीतंकरोतीत्याह दत्वेति येस्वयंदातारस्तएवकालेनदरिद्राःसंतोयाचकाभवंतीत्यर्थः । तथाअन्यान्हत्वापरैरपिवध्यंतेविध्वंते । पातयित्वाअन्यान् तएवान्यैःपात्यंतइति ६ अतिभारोदुष्करंदैवस्यकिमपिनास्ति । अस्यदेवस्यअतिवर्तनंअतिक्रमणंचनास्ति केनचित्कृतमितिशेषः । दैवस्यप्राधान्यप्रतिपादकमागमंप्रतिपालयेमानये । दैवाधीनाऽस्मीतिमत्वानशोचामीत्यर्थः ७ स्थितमिति यथारिक्तंसरःपुनःकालेनपूर्यत एवमहमपिपुनःश्रियंप्राप्स्याम्ये

॥१९॥ अतःप्रतिविशिष्टानिदुःखान्यन्यानिभारत ॥ वर्ततेमयिकौंतेयवक्ष्यामिशृणुतान्यपि ४६ युष्मासुम्रियमाणेषुदुःखानिविविधान्युत ॥ शोषयंतिशरीरंमेकिंनु दुःखमतःपरम् ४७ ॥ इतिश्रीमहाभारतेविराटपर्वणिकीचकवधपर्वणिद्रौपदीभीमसंवादेएकोनविंशोऽध्यायः ॥ १९ ॥ द्रौपद्युवाच ॥ अहंसैरंध्रिवेषेणचरंती ॥२०॥
राजवेश्मनि ॥ शौचदाऽस्मिसुदेष्णायाअक्षधूर्तस्यकरणात् १ विक्रियांपश्यमेतीव्रांराजपुत्र्याःपरंतप ॥ आत्मकालमुदीक्षंतिसर्वेदुःखंकिलांतवत् २ अनित्याकिलमर्त्यानामर्थसिद्धिर्जयाजयौ ॥ इतिकृत्वाप्रतीक्षामिभर्तॄणामुदयंपुनः ३ चक्रवत्परिवर्तंतेह्यर्थाश्चव्यसनानिच ॥ इतिकृत्वाप्रतीक्षामिभर्तॄणामुदयंपुनः ४ यएवहेतुर्भवतिपुरुषस्यजयावहः ॥ पराजयेचहेतुश्चसइतिप्रतिपालये ॥ किंमांनप्रतिजानीषेभीमसेनमृतामिव ५ दत्वायाचंतिपुरुषाहत्वावध्यंतिचापरे ॥ पातयित्वाचपात्यंतेपरैरितिचमेश्रुतम् ६ नदैवस्यातिभारोऽस्तिनचैवास्यातिवर्तनम् ॥ इतिचाप्यागमंभूयोदैवस्तप्रतिपालये ७ स्थितंपूर्वंजलंयत्रपुनस्तत्रैवगच्छति ॥ इतिपर्यायमिच्छंतीप्रतीक्षेउदयंपुनः ८ दैवेनकिलयस्यार्थःसुनीतोऽपिविपद्यते ॥ दैवस्यचागमेयत्नस्तेनकार्योविजानता ९ यत्तुमेवचनस्यास्यकथितस्यप्रयोजनम् ॥ पृच्छमांदुःखितांतत्त्वंपृष्टाचात्रब्रवीमिते १० महिषीपांडुपुत्राणांदुहिताद्रुपदस्यच ॥ इमामवस्थांसंप्राप्तामदन्याकाजिजीविषेत् ११ कुरून्परिभवेत्सर्वान्पंचालानपिभारत ॥ पांडवेयांश्चसंप्राप्तोममक्लेशोह्यरिंदम १२ भ्रातृभिःश्वशुरैःपुत्रैर्बहुभिःपरिवारिता ॥ एवंसमुदितानारीकात्वन्यादुःखिताभवेत् १३ नूनंहिबालयाधातुर्मयावैविप्रियंकृतम् ॥ यस्यप्रसादाद्दुर्नीतंप्राप्तास्मिभरतर्षभ १४ वर्णावकाशमपिमेपश्यपांडवयादृशम् ॥ तादृशोमेनतत्रासीद्दुःखेपरमकेतदा १५ त्वमेवभीमजानीषेयन्मेपार्थसुखंपुरा ॥ साऽहंदासीत्वमापन्नानशांतिमवशालभे १६

वेतिनिश्चयेन पर्यायंकालवैपरीत्यंइच्छंती ८ यस्यपुंसोऽर्थोदैवेनविपद्यतेनश्यति तेनदैवस्यैवआगमेआनुकूल्येयत्नःकार्यः । दैवान्नष्टोऽर्थः पुनर्जपहोमादिनाआहर्तव्यइत्यर्थः ९ १० । ११ कुरूनिति ममसंबंधीमन्निमित्तकः कचग्रहादिरयंक्लेशः पांडवेयान्पांडोःस्त्रीपांडवीकुंतीतस्याःपुत्रान्युष्मान्प्राप्तःसन् कुरून्भीष्मादीन्पंचालान्द्रुपदादांश्चपरिभवेत्नाशयेदित्यर्थः १२ समुदितासम्यगुदयवत्यपि एवं काऽन्यादुःखिताभवेन्नकाऽपि श्रीमतामापदोनदृष्टाएव ममतुदृष्टाइतिमहदाश्चर्यमितिभावः १३ बालयानतुप्रौढया तं बाल्येकृतममराधंनस्मरामि यस्यप्रसादादिदंदुर्नीतंदुरवस्थांप्राप्ताऽस्मि १४ वर्णावकाशोदीप्तिसंकोचः । वन्यान्नवल्कलधारणयुक्तात्स्वातंत्र्यादिव्यान्नवस्त्रसंयुक्तंपारतंत्र्यमतिदुःखदमितिभावः । तत्रवने इदानींयथादीप्तिसंकोचोऽस्ति नतथावनेआसीदित्यर्थः १५ अवशापराधीना १६ ॥१९॥

अदैविकंनर्किंतुदैविकमेव १७ विनिपातंपराभवं १८ । १९ । २० । २१ । २२ । २३ पुराकिणवंतौनैवाऽभूतां किंत्विदानीमेवजातावित्यर्थः २४ । २५ वर्णकोविलेपनं । 'वर्णकश्चारणेऽस्त्रीतुचंदनेचविलेपने'इतिमेदिनी । 'वर्णकोऽस्त्रीविलेपनम्'इत्यमरः २६ । २७ बाष्पकलयाबाष्पेणगद्गदया मंजुलयावा घट्टयंतीकंपयंतीव २८ कर्तव्येमर्तव्ये कांहिंसायामि

नादैविकमहंमन्येयत्रपार्थोधनंजयः ॥ भीमधन्वामहाबाहुरास्तेच्छन्नइवानलः १७ अशक्यावेदितुंपार्थप्राणिनांवैगतिर्नरैः ॥ विनिपातमिमंमन्येयुष्माकंह्यविचिंतितम् १८ यस्याममुखप्रेक्षायूयमिंद्रसमाःसदा ॥ साप्रेक्षेमुखमन्यासामवराणांवरासती १९ पश्यपांडवमेऽवस्थांयथानार्हामिवैतथा ॥ युष्मासुम्रियमाणेषुपश्यकालस्यपर्ययम् २० यस्याःसागरपर्यंताप्रथिवीवशवर्तिनी ॥ आसीत्साऽद्यसुदेष्णायाभीताऽहंवशवर्तिनी २१ यस्याःपुरःसराआसन्पृष्ठतश्चानुगामिनः ॥ साऽहमद्यसुदेष्णायाःपुरःपश्चाच्चगामिनी २२ इदंतुदुःखंकौंतेयममासह्यंनिबोधतत् ॥ यानजातुस्वयंपिंषेगात्रोद्वर्तनमात्मनः ॥ अन्यत्रकुंत्याभद्रंतेसापिनष्म्यद्यचंदनम् २३ पश्यकौंतेयपाणीमेनैवाऽभूतांहियौपुरा ॥ इत्यस्यदर्शयामासकिणवंतौकराबुभौ २४ बिभेमिकुंत्यायानाहंयुष्माकंवाकदाचन ॥ साद्याऽग्रतोविराटस्यभीतातिष्ठामिकिंकरी २५ किंनुवक्ष्यतिसम्राण्मांवर्णकःसुकृतोनवा ॥ नान्यपिष्टंहिमत्स्यस्यचंदनंकिलरोचते २६ ॥ वैशंपायनउवाच ॥ साकीर्तयंतीदुःखानिभीमसेनस्यभामिनी ॥ रुरोदशनकैःकृष्णाभीमसेनमुदीक्षती २७ साबाष्पकलयावाचानिःश्वसंतीपुनःपुनः ॥ हृदयंभीमसेनस्यघट्टयंतीदमब्रवीत् २८ नाल्पंकृतंमयाभीमदेवानांकिल्बिषंपुरा ॥ अभाग्यायत्रजीवामिकर्तव्येसतिपांडव २९ ॥ वैशंपायनउवाच ॥ ततस्तस्याःकरौसूक्ष्मौकिणबद्धौवृकोदरः ॥ मुखमानीयवैपत्न्यारुरोदपरवीरहा ३० तौगृहीत्वाचकौंतेयोबाष्पमुत्सृज्यवीर्यवान् ॥ ततःपरमदुःखार्तइदंवचनमब्रवीत् ३१ ॥ इतिश्रीमहा० विराटप० कीचकवधप० द्रौपदीभीमसं० विंशोऽध्यायः ॥ २० ॥ भीमसेनउवाच ॥ धिगस्तुमेबाहुबलंगांडीवंफाल्गुनस्यच ॥ यत्तेरक्तौपुराभूत्वापाणीकृतकिणाविमौ १ सभायांतुविराटस्यकरोमिकदनंमहत् ॥ तत्रमेकारणंभातिकौंतेयोयत्प्रतीक्षते २ अथवाकीचकस्याहंपोथयामिपदाशिरः ॥ ऐश्वर्यमदमत्तस्यक्रीडन्निवमहाद्विपः ३ अपश्यंत्वांयदाकृष्णेकीचकेनपदाहताम् ॥ तदैवाहंचिकीर्षामिमत्स्यानांकदनंमहत् ४ तत्रमांधर्मराजस्तुकटाक्षेणन्यवारयत् ॥ तदहंतस्यविज्ञायस्थितएवास्मिभामिनि ५ यच्चराष्ट्रात्प्रच्यवनंकुरूणामवधश्चयः ॥ सुयोधनस्यकर्णस्यशकुनेःसौबलस्यच ६ दुःशासनस्यपापस्ययन्मया
 नाहृतंशिरः ॥ तन्मेदहतिगात्राणिहृदिशल्यमिवार्पितम् ॥ माधर्मंजहिसुश्रोणिक्रोधंजहिमहामते ७ इमंतुसमुपालंभंत्वत्तोराजायुधिष्ठिरः ॥ शृणुयाद्वाऽपिकल्याणिकृत्स्नंजह्यात्सजीवितम् ८ धनंजयोवासुश्रोणियमौवातनुमध्यमे ॥ लोकांतरगतेष्वेषुनाहंशक्ष्यामिजीवितुम् ९

त्यस्यरूपं २९ । ३० ॥ ३१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेविंशोऽध्यायः ॥ २० ॥ ॥ ७ ॥ धिगिति १ सभायामिति कारणंमाकदर्थंमाभूदितिहेतुः प्रतीक्षतेतदेवसूचयन्मामवेक्षते । अन्यथातदानीमेव कदनंकरोमि कृतंस्यादित्यर्थः २ पोथयामिचूर्णीकरोमि ३ । ४ । ५ । ६ नाहृतंछित्वानानीतं ७ । ८ । ९

अन्वपद्यतअनुसृतवती १० । ११ । १३ । १४ । १५ । १६ मादीर्घंअदीर्घंअल्पमित्यर्थः सुप्सुपेतिसमासः क्षमक्षमस्व मासमर्धंचेतिसार्धमासमित्यर्थः १७ । १८ अनंतरःआसन्नः सन्न
ह्नोमवेतियावत् १९ कैकेयीसुदेष्णा नेयात्नगच्छेत् २० तंभावं राजाऽस्यांकीचकहतायांविरक्तःस्यादित्येवंरूपमभिप्रायं २१ । २२ । २३ । २४ क्षणंस्वीकारं २५ । २६ व

पुरासुकन्यामार्याचभार्गवंच्यवनंवने ॥ वल्मीकभूतंशाम्यंतमन्वपद्यतभामिनी १० नारायणीचेंद्रसेनारूपेणयदितेश्रुता ॥ पतिमन्वचरद्वृद्धंपुरावर्षसहस्रि
णम् ११ दुहिताजनकस्यापिवैदेहीयदितेश्रुता ॥ पतिमन्वचरत्सीतामहारण्यनिवासिनम् १२ रक्षसानिग्रहंप्राप्यरामस्यमहिषीप्रिया ॥ क्लिश्यमानाऽपि
सुश्रोणिराममेवान्वपद्यत १३ लोपामुद्रातथाभीरुवयोरूपसमन्विता ॥ अगस्तिमन्वयाद्धित्वाकामान्सर्वानमानुषान् १४ द्युमत्सेनसुतंवीरंसत्यवंतमनिंदि
ता ॥ सावित्र्यनुचचारैकायमलोकंमनस्विनी १५ यथैताःकीर्तितानार्योरूपवत्यःपतिव्रताः ॥ तथात्वमपिकल्याणिसर्वैःसमुदितागुणैः १६ मादीर्घंक्षमकालं
त्वंमासमर्द्धंचसंमितम् ॥ पूर्णेत्रयोदशेवर्षेराज्ञांराज्ञीभविष्यसि १७ ॥ द्रौपद्युवाच ॥ आर्त्तयैतन्मयाभीमकृतंबाष्पप्रमोचनम् ॥ अपारयंत्यादुःखानिनरा
जानमुपालभे १८ किमुक्तेनव्यतीतेनभीमसेनमहाबल ॥ प्रत्युपस्थितकालस्यकार्यस्यानंतरोभव १९ ममेहभीमकैकेयीरूपाभिभवशंकया ॥ नित्यमुद्विजते
राजाकथंनेयादिमामिति २० तस्याविदित्वातंभावंस्वयंचानृतदर्शनः ॥ कीचकोऽयंसुदुष्टात्मासदाप्रार्थयतेहिमाम् २१ तमहंकुपिताभीमपुनःकोपंनियम्यच ॥
अब्रुवंकामसंमूढमात्मानंरक्षकीचक २२ गंधर्वाणामहंभार्यापंचानांमहिषीप्रिया ॥ तेत्वांनिहन्युःकुपिताःशूराःसाहसकारिणः २३ एवमुक्तःसुदुष्टात्माकीचकः
प्रत्युवाचह ॥ नाहंबिभेमिसैरंध्रिगंधर्वाणांशुचिस्मिते २४ शतंशतसहस्राणि गंधर्वाणामहंरणे ॥ समागतंहनिष्यामित्वंभीरुकुरुमेक्षणम् २५ इत्युक्तेचाब्रुवंम
त्तंकामातुरमहंपुनः ॥ नत्वंप्रतिबलश्चैषांगंधर्वाणांयशस्विनाम् २६ धर्मेस्थिताऽस्मिसततंकुलशीलसमन्विता ॥ नेच्छामिकंचिद्वध्यंतंतेनजीवसिकीचक ॥
२७ एवमुक्तःसदुष्टात्माप्राहसत्स्वनवत्तदा ॥ अथमांतत्रकैकेयीप्रेषयत्प्रणयेनतु २८ तेनैवदेशितापूर्वंभ्रातृप्रियचिकीर्षया ॥ सुरामानयकल्याणिकीचकस्यनि
वेशनात् २९ सूतपुत्रस्तुमांदृष्ट्वामहत्सांत्वमवर्तयत् ॥ सांत्वेप्रतिहतेक्रुद्धःपरामर्शमनाऽभवत् ३० विदित्वातस्यसंकल्पंकीचकस्यदुरात्मनः ॥ तथाऽहंराजश
रणंजवेनैवप्रधाविता ३१ संदर्शनेतुमांराज्ञःसूतपुत्रःपरामृशत् ॥ पातयित्वातुदुष्टात्मापदाऽहंतेनताडिता ३२ प्रेक्षतेस्मविराटस्तुकंकस्तुबहवोजनाः ॥ र
थिनःपीठमर्दाश्चहस्त्यारोहाश्चनैगमाः ३३ उपालब्धोमयाराजाकंकश्चापिपुनःपुनः ॥ ततोनवारितोराज्ञानतस्याविनयःकृतः ३४

ध्यंतंवध्यमानं २७ । २८ । २९ अवर्तयत्कृतवान् सांत्वंप्रियवादं ३० राजशरणंराजाधिष्ठितंस्थानं ३१ संदर्शनेप्रत्यक्षं ३२ पीठमर्दाःराजप्रियाः । 'पीठमर्दोऽतिधृष्टे
स्यान्नायकस्यप्रियेऽपिच'इतिमेदिनी । नैगमाःनागराःवणिजोवा । 'नैगमःस्यादुपनिषद्वणिजोर्नागरेऽपिच'इतिमेदिनी ३३ तस्यकीचकस्याविनयः नकृतःननाशितः ३४

सारथिर्युद्धेसहायः नरस्यराज्ञः स्त्रियःसुदेष्णायाःश्चसंमतःसंबंधित्वात् ३५ तर्हिकथंतयोर्विप्रियंतद्वधेनकर्तव्यमित्याशंक्याह शूरइति मुग्धवान्मौढ्यंगतवान् दारामर्शीतवेवस्त्रियंमाऽस्प्र
ष्टवान् ३६ तिष्ठतेस्थिरोभवति बुभूषतिप्राप्तुमिच्छति ३७ । ३८ दर्शनेदर्शनेप्रतिदर्शनं सएवराजवल्लभःकामात्माच यदिमांहन्यात्ताडयेत् ताडनभयाद्वाऽहंयदिजीवितंजह्यां तत्तर्हिधर्मे
यतमानानांभवतांधर्मोनशिष्यति शौर्यंव्यर्थंस्यादित्यर्थः ३९ एतदेवाह समयमिति समयंमर्यादांत्रयोदशवर्षरूपां भार्यापोषणीयानभविष्यति ४० । ४१ जायात्वआविर्भवेत् वदतांक

योऽयंराज्ञोविराटस्यकीचकोनामसारथिः ॥ त्यक्तधर्मानृशंसश्चनरस्त्रीसंमतःप्रियः ३५ शूरोऽभिमानीपापात्मासर्वार्थेषुचमुग्धवान् ॥ दारामर्शीमहाभागलभते
ऽर्थान्बहूनपि ३६ आहरेदपिवित्तानिपरेषांक्रोशतामपि ॥ नतिष्ठतेस्मसन्मार्गेनचधर्मंबुभूषति ३७ पापात्मापापभावश्चकामबाणवशानुगः ॥ अविनीतश्च
दुष्टात्माप्रत्याख्यातःपुनःपुनः ३८ दर्शनेदर्शनेहन्याद्यदिजह्यांचजीवितम् ॥ तद्धर्मेयतमानानांमहान्धर्मोनशिष्यति ३९ समयंरक्षमाणानांभार्यावोनभवि
ष्यति ॥ भार्यायांरक्ष्यमाणायांप्रजाभवतिरक्षिता ४० प्रजायांरक्ष्यमाणायामात्माभवतिरक्षितः ॥ आत्माहिजायतेतस्यांतेनजायांविदुर्बुधाः ४१ भर्तातुभा
र्ययारक्ष्यःकथंजायान्ममोदरे ॥ वदतांवर्णधर्मश्चब्राह्मणानामितिश्रुतः ४२ क्षत्रियस्यसदाधर्मोनान्यःशत्रुनिबर्हणात् ॥ पश्यतोधर्मराजस्यकीचकोमांपदाऽव
धीत् ४३ तवचैवसमक्षेवैभीमसेनमहाबल ॥ त्वयाह्यहंपरित्रातातस्माद्घोराज्जटासुरात् ४४ जयद्रथंतथैवत्वमजैषीर्भ्रातृभिःसह ॥ जहीममपिपापिष्ठंयोऽयंमाम
वमन्यते ४५ कीचकोराजवाल्लभ्याच्छोककृन्ममभारत ॥ तमेवंकामसंमत्तंभिंधिकुंभमिवाश्मनि ४६ योनिमित्तमनर्थानांबहूनांममभारत ॥ तंचेज्जीवंतमा
दित्यःप्रातरभ्युदयिष्यति ४७ विषमालोड्यपास्यामिमाकीचकवशंगमम् ॥ श्रेयोहिमरणंमह्यंभीमसेनतवाग्रतः ४८ ॥ वैशंपायनउवाच ॥ इत्युक्त्वाप्ररुद
त्कृष्णाभीमस्योरःसमाश्रिता ॥ भीमश्चतांपरिष्वज्यमहत्सांत्वंप्रयुज्यच ४९ आश्वासयित्वाबहुशोभृशमार्तांसुमध्यमाम् ॥ हेतुतत्त्वार्थसंयुक्तैर्वचोभिर्द्रुपदा
त्मजाम् ५० प्रमृज्यवदनंतस्याःपाणिनाऽश्रुसमाकुलम् ॥ कीचकंमनसाऽगच्छत्सृक्किणीपरिसंलिहन् ॥ उवाचचैनांदुःखार्तांभीमःक्रोधसमन्वितः ५१ ॥ इति
श्रीमहाभारतेविराटपर्वणिकीचकवधपर्वणिद्रौपदीसांत्वनेएकविंशोऽध्यायः ॥ २१ ॥ ॥ भीमसेनउवाच ॥ तथाभद्रेकरिष्यामियथात्वंभीरुभाषसे ॥ अद्य
तंसूदयिष्यामिकीचकंसहबांधवम् १ अस्याःप्रदोषेशर्वर्याःकुरुष्वानेनसंगतम् ॥ दुःखंशोकंचनिर्धूययाज्ञसेनिशुचिस्मिते २ यैषानर्तनशालेहमत्स्यराजेनका
रिता ॥ दिवाऽत्रकन्यानृत्यंतिरात्रौयांतियथागृहम् ३ तत्रास्तिशयनंदिव्यंदृढांगंसुप्रतिष्ठितम् ॥ तत्रास्यदर्शयिष्यामिपूर्वप्रेतान्पितामहान् ४ यथाचत्वां
पश्येयुःकुर्वाणांतेनसंविदम् ॥ कुर्यास्तथात्वंकल्याणियथासन्निहितोभवेत् ५

यतांब्राह्मणानांमुखाद्वर्णधर्मश्चश्रुतः ४२ । ४३ । ४४ । ४५ । ४६ अभ्युदयिष्यतिअभ्युदे
ष्यति ४७ कीचकवशंगामगमंनगच्छेयं ४८ । ४९ हेतुभिर्युक्तिभिःतत्त्वार्थैर्यथार्थभूतैश्चार्थैःसंयुक्तानितैः ५० आगच्छत्स्मृतवान् सृक्किणीगल्लयोरभ्यंतरे परिसंलिहन्जिव्हयापरामृशन्
५१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे एकविंशोऽध्यायः ॥ २१ ॥ ॥ तथेति १ प्रदोषेरजनीमुखे संगतंसंभाषणं निर्धूयअप्रकाश्य २ । ३ दृढांगंकाष्ठफलकमयं ४ । ५

६ । ७ अहनंहतवान् ८ । ९ । १० नौआवयोः ११ समयंसंकेतं प्रतिपद्यस्वस्वीकुरु १२ । १३ । १४ । १५ । १६ । १७ दिवसार्द्धंअहोरात्रार्द्धं दिनमेकमपिमा

वैशंपायनउवाच ॥ तथातौकथयित्वातुबाष्पमुत्सृज्यदुःखितौ ॥ रात्रिशेषंतमत्युग्रंधारयामासतुर्हृदि ६ तस्यांरात्र्यांव्यतीतायांप्रातरुत्थायकीचकः ॥ ग अ०
॥१७॥ त्वाराजकुलायैवद्रौपदीमिदमब्रवीत् ७ सभायांपश्यतोराज्ञःपातयित्वापदाऽहनम् ॥ नचैवालभसेत्राणमभिपन्नाबलीयसा ८ प्रवादेनहमत्स्यानांराजानाम्ना
ऽयमुच्यते ॥ अहमेवहिमत्स्यानांराजावैवाहिनीपतिः ९ मांसुखंप्रतिपद्यस्वदासोभीरुभवामिते ॥ अह्नायतवसुश्रोणिशतंनिष्कान्ददाम्यहम् १० दासीशतं ॥२१॥
चतेदद्यांदासानामपिचापरम् ॥ रथंचाश्वतरीयुक्तमस्तुनौभीरुसंगमः ११ ॥ द्रौपद्युवाच ॥ एवंमेसमयंत्वद्यप्रतिपद्यस्वकीचक ॥ नत्वांसखावाभ्रातावाजानी
यात्संगतंमया १२ अनुप्रवादाद्भीताऽस्मिगंधर्वाणांयशस्विनाम् ॥ एवंमेप्रतिजानीहिततोऽहंवशगातव १३ ॥ कीचकउवाच ॥ एवमेतत्करिष्यामियथासुश्रो
णिभाषसे ॥ एकोभद्रेगमिष्यामिशून्यमावसथंतव १४ समागमार्थंरंभोरुत्वयामदनमोहितः ॥ यथात्वांनैवपश्येयुर्गंधर्वाःसूर्यवर्चसः १५ ॥ द्रौपद्युवाच ॥
यदेतन्नर्तनागारंमत्स्यराजेनकारितम् ॥ दिवाऽत्रकन्यानृत्यंतिरात्रौयांतियथागृहम् १६ तमिस्रेतत्रगच्छेथागंधर्वास्तन्नजानते ॥ तत्रदोषःपरिहृतोभवि
ष्यतिनसंशयः १७ ॥ वैशंपायनउवाच ॥ तमर्थमपिजल्पंत्याःकृष्णायाःकीचकेनह ॥ दिवसार्द्धंसमभवन्मासेनैवसमंनृप १८ कीचकोऽथगृहंगत्वाभृशंहर्षप
रिप्लुतः ॥ सैरंध्रीरूपिणंमूढोमृत्युंतन्नावबुद्धवान् १९ गंधाभरणमाल्येषुव्यासक्तःसविशेषतः ॥ अलंचक्रेतदात्मानंसत्वरःकाममोहितः २० तस्यतत्कुर्वतः
कर्मकालोदीर्घइवाभवत् ॥ अनुचिंतयतश्चापितामेवायतलोचनाम् २१ आसीदभ्यधिकाचापिश्रीःश्रियंप्रमुमुक्षतः ॥ निर्वाणकालेदीपस्यवर्तीमिवदिधक्षतः
२२ कृतसंप्रत्ययस्तस्याःकीचकःकाममोहितः ॥ नाजानाद्दिवसंयातंचिंतयानःसमागमम् २३ ततस्तुद्रौपदीगत्वातदाभीमंमहानसे ॥ उपातिष्ठतकल्याणी
कौरव्यंपतिमंतिकम् २४ तमुवाचसुकेशांताकीचकस्यमयाकृतः ॥ संगमोनर्तनागारेयथाऽवोचःपरंतप २५ शून्यंसनर्तनागारमागमिष्यतिकीचकः ॥ ए
कोनिशिमहाबाहोकीचकंतंनिषूदय २६ तंसूतपुत्रंकौंतेयकीचकंमददर्पितम् ॥ गत्वात्वंनर्तनागारंनिर्जीवंकुरुपांडव २७ दर्पाच्चसूतपुत्रोऽसौगंधर्वानवमन्य
ते ॥ तंत्वंप्रहरतांश्रेष्ठह्रदान्नागमिवोद्धर २८ अश्रुदुःखाभिभूतायाममममार्जस्वभारत ॥ आत्मनश्चैवभद्रंतेकुरुमानंकुलस्यच २९ ॥ भीमसेनउवाच ॥ स्वा
गतंतेवरारोहेयन्मांवेदयसेप्रियम् ॥ नह्यन्यंकंचिदिच्छामिसहायंवरवर्णिनि ३० यामेप्रीतिस्त्वयाऽऽख्याताकीचकस्यसमागमे ॥ हत्वाहिडिंबंसाप्रीतिर्ममासीद्वर
वर्णिनि ३१ सत्यंभ्रातॄंश्चधर्मंचपुरस्कृत्यब्रवीमिते ॥ कीचकंनिहनिष्यामिवृत्रंदेवपतिर्यथा ३२ ॥१७॥

सेनसममीत्कंठयादभूत् १८ । १९ । २० । २१ । २२ कृतसंप्रत्ययःकृतविश्वासः नाजानादनज्ञातवान् २३ । २४ । २५ । २६ । २७ ह्रदात्यमुनाह्रदान्नागंकालि
यंकृष्णोयथाउद्धृतवांस्तद्वत्त्वमेनमिहलोकाद्दूरेपातयेतिभावः २८ । २९ । ३० । ३१ । ३२

३३ । ३४ । ३५ । ३६ तस्यतेभादृश्यमानः नागोहस्ती अलभ्यांस्त्वाम् ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ यत्कृतंयदर्जितंधनादितत्सर्वं तेतुभ्यंप्रापितंद

तंगह्वरेप्रकाशेवापोथयिष्यामिकीचकम् ॥ अथचेदपियोत्स्यंतिहिंसेमत्स्यानपिध्रुवम् ३३ ततोदुर्योधनंहत्वाप्रतिपत्स्येवसुंधराम् ॥ कामंमत्स्यमुपास्तांहि
कुंतीपुत्रोयुधिष्ठिरः ३४ ॥ द्रौपद्युवाच ॥ यथानसंत्यजेथास्त्वंसत्यंवैमत्कृतेविभो ॥ निगूढस्त्वंतथापार्थकीचकंतंनिषूदय ३५ ॥ भीमसेनउवाच ॥ एवमे
तत्करिष्यामियथात्वंभीरुभाषसे ॥ अद्यतंसूदयिष्यामिकीचकंसहबांधवैः ३६ अदृश्यमानस्तस्याथतमस्विन्यामनिंदिते ॥ नागोबिल्वमिवाक्रम्यपोथयि
ष्याम्यहंशिरः ॥ अलभ्यामिच्छतस्तस्यकीचकस्यदुरात्मनः ३७ ॥ वैशंपायनउवाच ॥ भीमोऽथप्रथमंगत्वारात्रौच्छन्नउपाविशत् ॥ मृगंहरिरिवादृश्यःप्रत्या
कांक्षतकीचकम् ३८ कीचकश्चाप्यलंकृत्ययथाकाममुपागमत् ॥ तांवेलांनर्तनागारंपांचालीसंगमाशया ३९ मन्यमानःससंकेतमागारंप्राविशच्चतत् ॥ प्रवि
श्यचसतद्वेश्मतमसासंवृतंमहत् ४० पूर्वागतंततस्तत्रभीममप्रतिमौजसम् ॥ एकांतावस्थितंचैनमाससादसदुर्मतिः ४१ शयानंशयनेतत्रसूतपुत्रःपरामृश
त् ॥ जाज्वल्यमानंकोपेनकृष्णाधर्षणजेनह ४२ उपासंगम्यचैवैनंकीचकःकाममोहितः ॥ हर्षोन्मथितचित्तात्मास्मयमानोऽभ्यभाषत ४३ प्रापितंतेमयाबि
त्तंबहुरूपमनंतकम् ॥ यत्कृतंधनरत्नाढ्यंदासीशतपरिच्छदम् ४४ रूपलावण्ययुक्ताभिर्युवतीभिरलंकृतम् ॥ गृहंचांतःपुरंसुभ्रुक्रीडारतिविराजितम् ॥ त
त्सर्वंत्वांसमुद्दिश्यसहसाऽहमुपागतः ४५ अकस्मान्मांप्रशंसंतिसदागृहगताःस्त्रियः ॥ सुवासादर्शनीयश्चनान्योऽस्तित्वादृशःपुमान् ४६ ॥ भीमसेनउवाच ॥
दिष्ट्यात्वंदर्शनीयोऽथदिष्ट्याऽऽत्मानंप्रशंससि ॥ ईदृशस्तुत्वयास्पर्शःस्पृष्टपूर्वोनकर्हिचित् ४७ स्पर्शंवेत्सिविदग्धस्त्वंकामधर्मविचक्षणः ॥ स्त्रीणांप्रीतिकरो
नान्यस्त्वत्समःपुरुषस्त्विह ४८ ॥ वैशंपायनउवाच ॥ इत्युक्त्वातंमहाबाहुर्भीमोभीमपराक्रमः ॥ सहसोत्पत्यकौंतेयःप्रहस्येदमुवाचह ४९ अद्यत्वांभगिनीपा
पंकृष्यमाणंमयाभुवि ॥ द्रक्ष्यतेऽद्रिप्रतीकाशंसिंहेनेवमहागजम् ५० निराबाधात्वयिहतेसैरंध्रीविचरिष्यति ॥ सुखमेवचरिष्यंतिसैरंध्र्याःपतयःसदा ५१ त
तोजग्राहकेशेषुमाल्यवत्सुमहाबलः ॥ सकेशेषुपरामृष्टोबलेनबलिनांवरः ५२ आक्षिप्यकेशान्वेगेनबाह्वोर्जग्राहपांडवम् ॥ बाहुयुद्धंतयोरासीत्क्रुद्धयोर्नरसिंह
योः ५३ वसंतेवासिताहेतोर्बलवद्गजयोरिव ॥ कीचकानांतुमुख्यस्यनराणामुत्तमस्यच ५४ वालिसुग्रीवयोर्भ्रात्रोःपुरेवकपिसिंहयोः ॥ अन्योन्यमभिसंरब्धौ
परस्परजयैषिणौ ५५ ततःसमुद्यम्यभुजौपंचशीर्षाविवोरगौ ॥ नखदंष्ट्राभिरन्योन्यंघ्नतःक्रोधविषोद्धतौ ५६ वेगेनाभिहतोभीमःकीचकेनबलीयसा ॥ स्थि
रप्रतिज्ञःसरणेपदान्नचलितःपदम् ५७ तावन्योन्यंसमाश्लिष्यप्रकर्षंतौपरस्परम् ॥ उभावपिप्रकाशेतेप्रवृद्धौवृषभाविव ५८

समितिसंबंधः ४४ अतःपरंत्वांसमुद्दिश्याहमत्रागतोऽस्मि ४५ प्रशंसंतिस्त्वयाऽहंवृतइतिहेतोरित्यभिप्रायः ४६ । ४७ । ४८ । ४९ । ५० । ५१ । ५२ । ५३
वासिताहेतोर्हस्तिनीनिमित्तम् ५४ । ५५ । ५६ । ५७ । ५८

५९ करटामुखंगंडस्थलस्थंमदानिर्गमस्थानं । 'करटोगजगंडेस्यात्'इतिमेदिनी ६० । ६१ । ६२ । ६३ । ६४ आकलितमाक्रांतं द्रुतपदंचलितस्थानंयथास्यात्तथास्थितम् ६५ । ६६ । ६७
६८ । ६९ सहित्वासोढ्वा बलाद्दहीयतबलहीनोऽभूत् ७० वक्षस्यानीयानतंभुग्नंकृत्वा तन्नाभिनावाच्छिरःसंयोज्येत्यर्थः ७१ । ७२ गृहीत्वाचेतिपाठे इवार्थेचः ७३ योक्रयामासबबंध रशनया

तयोर्ह्यासीत्सुतुमुलःसंप्रहारःसुदारुणः ॥ नखदंतायुधवतोर्व्याघ्रयोरिवदृप्तयोः ५९ अभिपत्याथबाहुभ्यांप्रत्यगृह्णादमर्षितः ॥ मातंगइवमातंगंप्रभिन्नकरटा
मुखम् ६० सचाप्येनंतदाभीमःप्रतिजग्राहवीर्यवान् ॥ तमाक्षिपत्कीचकोऽथबलेनबलिनांवरः ६१ तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा ॥ शब्दःसमभव
द्घोरोवेणुस्फोटसमोयुधि ६२ अथैनमाक्षिप्यबलाद्गृहमध्येवृकोदरः ॥ धूनयामासवेगेनवायुश्चंडइवद्रुमम् ६३ भीमेनचपरामृष्टोदुर्बलोबलिनारणे ॥ प्रास्पंदतय
थाप्राणंविचकर्षचपांडवम् ६४ ईषदाकलितंचापिक्रोधाद्द्रुतपदंस्थितम् ॥ कीचकोबलवान्भीमंजानुभ्यामाक्षिपद्भुवि ६५ पातितोभुविभीमस्तुकीचकेनब
लीयसा ॥ उत्पपाताथवेगेनदंडपाणिरिवांतकः ६६ स्पर्द्धयाचबलोन्मत्तौताबुभौसूतपांडवौ ॥ निशीथेपर्यकर्षेतांबलिनौनिर्जनेस्थले ६७ ततस्तद्भवनंश्रेष्ठं
प्राकंपतमुहुर्मुहुः ॥ बलवच्चापिसंक्रुद्धावन्योन्यंप्रतिगर्जतः ६८ तलाभ्यांसतुभीमेनवक्षस्यभिहतोबली ॥ कीचकोरोषसंतप्तःपदान्नचलितःपदम् ६९ मुहूर्तं
तुसतंवेगंसहित्वाभुविदुःसहम् ॥ बलादहीयततदासूतोभीमबलार्दितः ७० तंहीयमानंविज्ञायभीमसेनोमहाबलः ॥ वक्षस्यानीयवेगेनममर्दैनंविचेतसम् ७१
क्रोधाविष्टोविनिःश्वस्यपुनश्चैनंवृकोदरः ॥ जग्राहजयतांश्रेष्ठःकेशेष्वेवतदाभृशम् ७२ गृहीत्वाकीचकंभीमोविरराजमहाबलः ॥ शार्दूलःपिशिताकांक्षीगृहीत्वेव
महामृगम् ७३ ततएनंपरिश्रांतमुपलभ्यवृकोदरः ॥ योक्रयामासबाहुभ्यांपशुंरशनयायथा ७४ नदंतंचमहानादंभिन्नभेरीसमस्वनम् ॥ भ्रामयामाससुचिरं
विस्फुरंतमचेतसम् ७५ प्रगृह्यतरसादोर्भ्यांकंठंतस्यवृकोदरः ॥ अपीडयतकृष्णायास्तदाकोपोपशांतये ७६ अथतंभग्नसर्वांगंव्याविद्धनयनांबरम् ॥ आ
क्रम्यचकटीदेशेजानुनाकीचकाधमम् ॥ अपीडयतबाहुभ्यांपशुमारममारयत् ७७ तंविषीदंतमाज्ञायकीचकंपांडुनंदनः ॥ भूतलेभ्रामयामासवाक्यंचेदमुवाच
ह ७८ अद्याहमनृणोभूत्वाभ्रातुर्भार्यापहारिणम् ॥ शांतिंलब्धास्मिपरमांहत्वासैरंध्रिकंटकम् ७९ इत्येवमुक्त्वापुरुषप्रवीरस्तंकीचकंक्रोधसरागनेत्रः ॥ अस्र
स्तवस्त्राभरणंस्फुरंतमुद्भ्रांतनेत्रंव्यसुमुत्ससर्ज ८० निष्पिष्यपाणिनापाणिंसंदष्टोष्ठपुटंबली ॥ समाक्रम्यचसंक्रुद्धोबलेनबलिनांवरः ८१ तस्यपादौचपाणी
चशिरोग्रीवांचसर्वशः ॥ कायेप्रवेशयामासपशोरिवपिनाकधृक् ८२ तंसंमथितसर्वांगंमांसपिंडोपमंकृतम् ॥ कृष्णायादर्शयामासभीमसेनोमहाबलः ८३ उवा
चचमहातेजाद्रौपदींयोषितांवराम् ॥ पश्यैनमेहिपांचालिकामुकोयंयथाकृतः ८४ रज्ज्वा ७४ । ७५ दोर्भ्यांपाणिभ्याम् ७६ व्याविद्धेअतिपीडनात्अधःक्षिप्ते नयनेन
यनगोलकेअंबरंवस्त्रंचयस्य नयनाकाशोवा पशुमारं पशुंमारयित्वेवेतियज्ञियपशुवदित्यर्थः ७७ । ७८ सैरंध्रिकंटकंह्रस्वत्वंसमासनिमित्तम् ७९ । ८० । ८१ तस्यपादौचेति कायेदेहमध्यभागे
तत्तन्निर्गममार्गेणैवांगान्यंतःप्रवेश्य । 'योअस्मैरेवान्नसुनोतिसोमं निररत्नौमघवातंदधाति'इतिश्रुत्यरत्नौनिर्धानमेतदेवज्ञेयं रेवान्धनवान्निर्धानंनिष्कष्यस्थापनम्८२कृष्णायाःद्रौपद्यै८३।८४

८५ । ८६ सुकेशांते सुष्ठुकौटिल्येनाविराजमानाःकेशांतायस्याः । शोभतइत्युपहासः एवमेवधार्तराष्ट्रान्मारयिष्यामीतिभावः ८७ रोषस्यशमंअंतं फलस्यजातत्वात् ८८ । ८९

एवमुक्त्वामहाराजभीमोभीमपराक्रमः ॥ पादेनपीडयामासतस्यकायंदुरात्मनः ८५ ततोऽग्निंतत्रप्रज्वाल्यदर्शयित्वातुकीचकम् ॥ पांचालींसतदावीरइदंवच
नमब्रवीत् ८६ प्रार्थयंतिसुकेशांतेयेत्वांशीलगुणान्विताम् ॥ एवंतेभीरुवध्यंतेकीचकःशोभतेयथा ८७ तत्कृत्वादुष्करंकर्मकृष्णायाःप्रियमुत्तमम् ॥ तथासकी
चकंहत्वागत्वारोषस्यवैशमम् ८८ आमंत्र्यद्रौपदींकृष्णांक्षिप्रमायान्महानसम् ॥ कीचकंघातयित्वातुद्रौपदीयोषितांवरा ॥ प्रहृष्टागतसंतापासभापालानुवाचह
८९ कीचकोऽयंहतःशेतेगंधर्वैःपतिभिर्मम ॥ परस्त्रीकामसंमत्तस्तत्रागच्छतपश्यत ९० तच्छ्रुत्वाभाषितंतस्यानर्तनागाररक्षिणः ॥ सहसैवसमाजग्मुरादायोल्काः
सहस्रशः ९१ ततोगत्वाऽथतद्वेश्मकीचकंविनिपातितम् ॥ गतासुंददृशुर्भूमौरुधिरेणसमुक्षितम् ९२ पाणिपादविहीनंतुदृष्ट्वाचव्यथिताऽभवन् ॥ निरीक्षं
तितत:सर्वेपरंविस्मयमागताः ९३ अमानुषंकृतंकर्मतंदृष्ट्वाविनिपातितम् ॥ क्वास्यग्रीवाक्वचरणौक्वपाणीक्वशिरस्तथा ॥ इतिस्मतंपरीक्षंतेगंधर्वेणहतंतदा
९४ ॥ इतिश्रीमहाभारतेविराटपर्वणि कीचकवधपर्वणिकीचकवधेद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ ४ ॥ ॥ वैशंपायनउवाच ॥ तस्मिन्कालेसमागम्यसर्वे
तत्रास्यबांधवाः ॥ रुरुदुःकीचकंदृष्ट्वापरिवार्यसमंततः १ सर्वेसंहृष्टरोमाणःसंत्रस्ताःप्रेक्ष्यकीचकम् ॥ तथासंभिन्नसर्वांगंकूर्मंस्थलइवोद्धृतम् २ पोथितंभीमसे
नेनतमिंद्रेणेवदानवम् ॥ संस्कारयितुमिच्छंतोबहिर्नेतुंप्रचक्रमुः ३ ददृशुस्तेततःकृष्णांसूतपुत्राःसमागताः ॥ अदूराच्चानवद्यांगींस्तंभमालिंग्यतिष्ठतीम् ४
समवेतेषुसर्वेषुतामूचुरुपकीचकाः ॥ हन्यतांशीघ्रमसतीयत्कृतेकीचकोहतः ५ अथवानैवहंतव्यादह्यतांकामिनासह ॥ मृतस्यापिप्रियंकार्यंसूतपुत्रस्यसर्वथा ६
ततोविराटमूचुस्तेकीचकोऽस्याःकृतेहतः ॥ सहानेनाद्यदह्येमतदनुज्ञातुमर्हसि ७ पराक्रमंतुसूतानांमत्वाराजाऽन्वमोदत ॥ सैरंध्याःसूतपुत्रेणसहदाहंविशांपतिः
८ तांसमासाद्यवित्रस्तांकृष्णांकमललोचनाम् ॥ मोमुह्यमानांतेतत्रजगृहुःकीचकाभृशम् ९ ततस्तुतांसमारोप्यनिबद्ध्यचसुमध्यमाम् ॥ जग्मुरुद्यम्यते
सर्वेश्मशानाभिमुखास्तदा १० ह्रियमाणातुसाराजन्सूतपुत्रैरनिंदिता ॥ प्राक्रोशन्नाथमिच्छंतीकृष्णानाथवतीसती ११ ॥ द्रौपद्युवाच ॥ जयोजयंतोविजयो
जयत्सेनोजयद्बलः ॥ तेमेवाचंविजानंतुसूतपुत्रानयंतिमाम् १२ येषांज्यातलनिर्घोषोविस्फूर्जितमिवाशनेः ॥ व्यश्रूयतमहायुद्धेभीमघोषस्तरस्विनाम् १३
रथघोषश्चबलवान्गंधर्वाणांतरस्विनाम् ॥ तेमेवाचंविजानंतुसूतपुत्रानयंतिमाम् १४ ॥ वैशंपायनउवाच ॥ तस्यास्ताःकृपणावाचःकृष्णायाःपरिदेवितम् ॥
श्रुत्वैवाभ्यपतद्भीमःशयनादविचारयन् १५ १० । ११ । १२ । १३ । १४ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेद्वाविंशोऽध्यायः ॥ २२ ॥
तस्मिन्निति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

१६ व्यायतंव्यापरंयत्नंकृत्वा वेषंचविपरिवर्त्य गंधर्ववेषसदृशंकृत्वा १७ अभ्यवस्कंद्यानिपत्य द्रुममारुह्य ततश्चद्रौपदीनयनप्रदेशंदृष्ट्वेत्यर्थः १८ । १९ मूर्ध्निशुष्कमितिशोष
णोन्मुखत्वेनातिपक्कत्वंसूच्यते २० परिरभ्यउपक्रम्यउत्पाटनार्थंयत्नंकृत्वा उत्पाटितंचतंस्कंधेआरोपयामास व्यामंप्रसारितयोर्बाह्वोरंतरम् २१ । २२ । २३ । २४ । २५

 ॥ भीमसेनउवाच ॥ अहंशृणोमितेवाचंत्वयासैरंध्रिभाषिताम् ॥ तस्मात्तेसूतपुत्रेभ्योभयंभीरुनाविद्यते १६ ॥ वैशंपायनउवाच ॥ इत्युक्त्वासमहाबाहुर्विजजृं
भेजिघांसया ॥ ततःसव्यायतंकृत्वावेषंविपरिवर्त्यच १७ अद्वारेणाभ्यवस्कंद्यानिर्जगामबहिस्तदा ॥ सभीमसेनःप्राकारादारुह्यतरसाद्रुमम् १८ श्मशानाभि
मुखःप्रायाद्यत्रतेकीचकागताः ॥ सलंघयित्वाप्राकारंनिसृत्यचपुरोत्तमात् ॥ जवेनपतितोभीमःसूतानामग्रतस्तदा १९ चितासमीपेगत्वासतत्रापश्यद्वनस्प
तिम् ॥ तालमात्रंमहास्कंधंमूर्धशुष्कंविशांपते २० तंनागवदुपक्रम्यबाहुभ्यांपरिरभ्यच ॥ स्कंधमारोपयामासदशव्यामंपरंतपः २१ सतंवृक्षंदशव्यामंसस्कंध
विटपंबली ॥ प्रगृह्याभ्यद्रवत्सूतान्दंडपाणिरिवांतकः २२ ऊरुवेगेनतस्याथन्यग्रोधाश्वत्थकिंशुकाः ॥ भूमौनिपतितावृक्षाःसंघशस्तत्रशेरते २३ तंसिंहमिव
संक्रुद्धंदृष्ट्वागंधर्वमागतम् ॥ वित्रेसुःसर्वशःसूताविषादभयकंपिताः २४ गंधर्वोबलवानेतिक्रुद्धउद्यम्यपादपम् ॥ सैरंध्रीमुच्यतांशीघ्रंयतोनोभयमागतम् २५
तेतुदृष्ट्वातदाऽऽविद्धंभीमसेनेनपादपम् ॥ विमुच्यद्रौपदींतत्रप्राद्रवन्नगरंप्रति २६ द्रवतस्तांस्तुसंप्रेक्ष्यसवज्रीदानवानिव ॥ शतंपंचाधिकंभीमःप्राहिणोद्य
मसादनम् २७ वृक्षेणैतेनराजेंद्रप्रभंजनसुतोबली ॥ ततआश्वासयत्कृष्णांसविमुच्यविशांपते २८ उवाचचमहाबाहुःपांचालींतत्रद्रौपदीम् ॥ अश्रुपूर्णमुखीं
दीनांदुर्धर्षःसवृकोदरः २९ एवंतेभीरुवध्यंतेयेत्वांक्लिश्यंत्यनागसम् ॥ प्रैहित्वंनगरंकृष्णेनभयंविद्यतेतव ३० अन्येनाहंगमिष्यामिविराटस्यमहानसम् ३१
॥ वैशंपायनउवाच ॥ पंचाधिकंशतंतच्चनिहतंतेनभारत ॥ महावनमिवच्छिन्नंशिश्येविगलितद्रुमम् ३२ एवंतेनिहताराजन्शतंपंचचकीचकाः ॥ सचसेना
पतिःपूर्वमित्येतत्सूतषट्शतम् ३३ तद्दृष्ट्वामहदाश्चर्यंनरानार्यश्चसंगताः ॥ विस्मयंपरमंगत्वानोचुःकिंचनभारत ३४ ॥ इतिश्रीमहाभारतेविराटपर्वणिकी
चकवधपर्वणित्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ वैशंपायनउवाच ॥ तेदृष्ट्वानिहतान्सूतान्राज्ञेगत्वान्यवेदयन् ॥ गंधर्वैर्निहताराजन्सूतपुत्रामहाबलाः १
यथावज्रेणवैदीर्णंपर्वतस्यमहच्छिरः ॥ व्यतिकीर्णाःप्रदृश्यंतेतथासूतामहीतले २ सैरंध्रीचविमुक्ताऽसौपुनरायातितेगृहम् ॥ सर्वंसंशयितंराजन्नगरंतेभवि
ष्यति ३ यथारूपाचसैरंध्रीगंधर्वाश्चमहाबलाः ॥ पुंसामिष्टश्चविषयोमैथुनायनसंशयः ४ यथासैरंध्रिदोषेणनतेराजन्निदंपुरम् ॥ विनाशमेतिवैक्षिप्रंतथानीतिर्वि
धीयाम् ५ तेषांतद्वचनंश्रुत्वाविराटोवाहिनीपतिः ॥ अब्रवीक्रियतामेषांसूतानांपरमक्रिया ६ २६ । २७ । २८ विमुच्यमोचयित्वा २९ । ३० अन्येनमार्गेण
३१ शिश्येशयितम् ३२ षट्शतंषडधिकंशतम् ३३ । ३४ । इतिविराटपर्वणिनीलकंठीये भारतभावदीपेत्रयोविंशोऽध्यायः ॥ २३ ॥ ततइति १ । २ । ३ । ४ । ५ । ६

७ । ८ । ९ नहित्वामिति हित्वांहातुंयोग्यां । कृत्यार्थेतवैकेन्केन्यत्वनइतित्वन् जहातिश्चेतिहित्वंअच्छायामपिच्छांदसं । पित्वोभिक्षेतेत्यादिवत् । त्वां सैरंध्री हित्वात्यक्तुंयोग्या
मप्यहंराजागच्छेतिवक्तुंनोत्सहे स्त्रियास्तुसुदेष्णायास्तवतांप्रत्येतद्वक्तुमदोषइतिराजवाक्यानुवादः । यस्मादेवंराजामांआज्ञापितवान् तस्मादेवंत्वांप्रतिप्रब्रवीम्यहमितिसुदेष्णा

एकस्मिन्नेवतेसर्वेसुसमिद्धेहुताशने ॥ दह्यंतांकीचकाःशीघ्रंरत्नैर्गंधैश्चसर्वशः ७ सुदेष्णामब्रवीद्राजामहिषींजातसाध्वसः ॥ सैरंध्रीमागतांब्रूयाममैववचनादि
दम् ८ गच्छसैरंध्रिभद्रंतेयथाकामंवरानने ॥ बिभेतिराजासुश्रोणिगंधर्वेभ्यःपराभवात् ९ नहित्वामुत्सहेवक्तुंस्वयंगंधर्वरक्षिताम् ॥ स्त्रियास्त्वदोषस्तांवक्तुमत
स्त्वांप्रब्रवीम्यहम् १० ॥ वैशंपायनउवाच ॥ अथमुक्ताभयात्कृष्णासूतपुत्रान्निरस्यच ॥ मोक्षिताभीमसेनेनजगामनगरंप्रति ११ त्रासितेवमृगीबालाशार्दू
लेनमनस्विनी ॥ गात्राणिवाससीचैवप्रक्षाल्यसलिलेनसा १२ तांदृष्ट्वापुरुषाराजन्प्राद्रवंतदिशोदश ॥ गंधर्वाणांभयत्रस्ताःकेचिद्दृष्टान्यमीलयन् १३ ततो
महानसद्वारिभीमसेनमवस्थितम् ॥ ददर्शराजन्पांचालीयथामत्तंमहाद्विपम् १४ तंविस्मयंतीशनकैःसंज्ञाभिरिदमब्रवीत् ॥ गंधर्वराजायनमोयेनास्मिपरिमो
चिता १५ ॥ भीमसेनउवाच ॥ येपुराविचरंतीहपुरुषावशवर्तिनः ॥ तस्यास्तेवचनंश्रुत्वाह्यनृणाविहरंत्वतः १६ ॥ वैशंपायनउवाच ॥ ततःसानर्तनागा
रेधनंजयमपश्यत ॥ राज्ञःकन्याविराटस्यनर्तयानंमहाभुजम् १७ ततस्तानर्तनागाराद्विनिष्क्रम्यसहार्जुनाः ॥ कन्यादद्दशुरायांतींक्लिष्टांकृष्णामनागसम्
१८ ॥ कन्याऊचुः ॥ दिष्ट्यासैरंध्रिमुक्तासिदिष्ट्याऽसिपुनरागता ॥ दिष्ट्याविनिहताःसूतायेत्वांक्लिश्यंत्यनागसम् १९ ॥ बृहन्नलोवाच ॥ कथंसैरंध्रिमुक्ताऽसि
कथंपापाश्चतेहताः ॥ इच्छामिवैतवश्रोतुंसर्वमेवयथातथम् २० ॥ सैरंध्र्युवाच ॥ बृहन्नलेकिंनुतवसैरंध्र्याकार्यमद्यवै ॥ यात्वंवससिकल्याणिसदाकन्यापुरेसुखम्
२१ नहिदुःखंसमाप्नोषिसैरंध्रीयदुपाश्नुते ॥ तेनमांदुःखितामेवंपृच्छसेप्रहसन्निव २२ ॥ बृहन्नलोवाच ॥ बृहन्नलाऽपिकल्याणिदुःखमाप्नोत्यनुत्तमम् ॥ ति
र्यग्योनिगताबालेनचैनामवबुद्ध्यसे २३ त्वयासहोषिताचास्मित्वंचसर्वैःसहोषिता ॥ क्लिश्यंत्यांत्वयिसुश्रोणिकोनुदुःखंनचिंतयेत् २४ नतुकेनचिदत्यंतंक
स्यचिद्धृदयंक्वचित् ॥ वेदितुंशक्यतेनूनंतेनमांनावबुद्ध्यसे २५ ॥ वैशंपायनउवाच ॥ ततःसहैवकन्याभिर्द्रौपदीराजवेश्मतत् ॥ प्रविवेशसुदेष्णायाःसमीप
मुपगामिनी २६ तामब्रवीद्राजपुत्रीविराटवचनादिदम् ॥ सैरंध्रिगम्यतांशीघ्रंयत्रकामयसेगतिम् २७

वचनं १० । ११ । १२ । १३ । १४ । १५ पुरुषायस्याःवशवर्तिनआज्ञाकारिणः । इहविराटपुरेपुरावर्षमात्रंविहरंतितेतस्याःवचनंगंधर्वराजायनमइत्यादिरूपं
श्रुत्वाऽतःपरंअनृणास्तदाज्ञासंपादनेन अज्ञातवाससमाप्त्यावा कृतकृत्याःसंतोविहरंतु १६ । १७ । १८ । १९ । २० । २१ प्रहसन्निवेतिपूर्वसंस्कारात्पुल्लिंगप्रयोगः प्रहसं
तीवेत्यर्थः २२ तिर्यक्नीचंक्लीबत्वंतन्मयीयोनिःशरीरंतत्रगता २३ । २४ । २५ । २६ । २७

२८ । २९ । ३० ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ४ ॥ ॥ 'अत्याहितंमहाभीतिः कर्मजीवानपेक्षिच'इत्यमरः १ । २ । ३

राजाबिभेतितेभद्रेगंधर्वेभ्यःपराभवात् ॥ त्वंचापितरुणीसुभ्रुरूपेणाप्रतिमाभुवि ॥ पुंसामिष्टश्चविषयोगंधर्वाश्चातिकोपनाः २८ सैरंध्र्युवाच ॥ त्रयोदशाह
मात्रंमेराजाक्षम्यतुभामिनी ॥ कृतकृत्याभविष्यंतिगंधर्वास्तेनसंशयः २९ ततोमामुपनेष्यंतिकरिष्यंतिचतेप्रियम् ॥ ध्रुवंचश्रेयसाराजायोक्ष्यतेसहबांधवैः ॥
३० ॥ ॥ इतिश्रीमहाभारतेविराटपर्वणिकीचकवधपर्वणिकीचकदाहेचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ समाप्तंचेदंकीचकवधपर्व ॥ ४ ॥ अथगोहरणपर्व ॥
वैशंपायनउवाच ॥ कीचकस्यतुघातेनसानुजस्यविशांपते ॥ अत्याहितंचिंतयित्वाव्यस्मयंतपृथक्जनाः १ तस्मिन्पुरेजनपदेसंजल्पोभूच्चसंघशः ॥ शौर्याद्धि
वल्लभोराज्ञोमहासत्वःसकीचकः २ आसीत्प्रहर्त्तासैन्यानांदारामर्शीचदुर्मतिः ॥ सहतःखलुपापात्मागंधर्वैर्दुष्टपूरुषः ३ इत्यजल्पन्महाराजपरानीकविनाशनम् ॥
देशेदेशेमनुष्याश्चकीचकंदुष्प्रधर्षणम् ४ अथवैधार्त्तराष्ट्रेणप्रयुक्तायेबहिश्चराः ॥ मृगयित्वाबहून्ग्रामान्राष्ट्राणिनगराणिच ५ संविधाययथादृष्टंयथादेशप्रदर्शनम् ॥
कृतकृत्यान्यवर्त्तंततेचरानगरंप्रति ६ तत्रदृष्ट्वातुराजानंकौरव्यंधृतराष्ट्रजम् ॥ द्रोणकर्णकृपैःसार्द्धंभीष्मेणचमहात्मना ७ संगतंभ्रातृभिश्चापित्रिगर्तैश्चमहा
रथैः ॥ दुर्योधनंसभामध्येआसीनमिदमब्रुवन् ८ ॥ चराऊचुः ॥ कृतोऽस्माभिःपरोयत्नस्तेषामन्वेषणेसदा ॥ पांडवानांमनुष्येंद्रतस्मिन्महतिकानने ९ नि
र्जनेमृगसंकीर्णेनानाद्रुमलताकुले ॥ लताप्रतानबहुलेनानागुल्मसमावृते १० नचविद्मोगतायेनपार्थाःसुदृढविक्रमाः ॥ मार्गमाणाःपदन्यासंतेषुतेषुतथातथा
११ गिरिकूटेषुतुंगेषुनानाजनपदेषुच ॥ जनाकीर्णेषुदेशेषुखर्वटेषुपुरेषुच १२ नरेंद्रबहुशोऽन्विष्टानैवविद्मश्चपांडवान् ॥ अत्यंतंवाविनष्टास्तेभद्रंतुभ्यंनर
र्षभ १३ वर्त्मन्यन्वेष्यमाणविरथिनांरथिसत्तम ॥ नहिविद्मोगतिंतेषांवासंहिनरसत्तम १४ किंचित्कालंमनुष्येंद्रसूतानामनुगावयम् ॥ मृगयित्वायथान्यायंवे
दितार्थाःस्मतत्त्वतः १५ प्राप्ताद्वारवतींसूताविनापार्थैःपरंतप ॥ नतत्रकृष्णाराजेंद्रपांडवाश्चमहाव्रताः १६ सर्वथाविप्रणष्टास्तेनमस्तेभरतर्षभ ॥ नहिवि
द्मोगतिंतेषांवासंवापिमहात्मनाम् १७ पांडवानांप्रवृत्तिंचविद्मःकर्मापिवाकृतम् ॥ सनःशाधिमनुष्येंद्रअतऊर्ध्वंविशांपते १८ अन्वेषणेपांडवानांभूयःकिंकर
वामहे ॥ इमांचनःप्रियांवीरवाचंभद्रवतींशृणु १९ येनत्रिगर्त्तानिहताबलेनमहतानृप ॥ सूतेनराज्ञोमत्स्यस्यकीचकेनबलीयसा २० सहतःपतितःशेतेगं
धर्वैर्निशिभारत ॥ अदृश्यमानैर्दुष्टात्माभ्रातृभिःसहसोदरैः २१

४ । ५ कृतकृत्याः कीचकवधज्ञानेनात्रैवपांडवानांवासंस्वयमेवधार्तराष्ट्राःअनुमानतोज्ञास्यंतीत्याशयः ६ । ७ । ८ । ९ । १० येनमार्गेण ११ गिरिकूटेषुगिरिशिखरेषु १२
१३ । सूतानांपांडवीयानामिंद्रसेनादीनां १५ । १६ । १७ । १८ । १९ । २० । २१

२२ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे पंचविंशोऽध्यायः ॥ २५ ॥ ५ ॥ ततइति १ । २ । ३ । ४ दुःखादुःखयितारः संरब्धाःकुपिताः ५ यथातेपुनर्वनं
प्रविशेयुस्तथाबुभूषध्वं तान्प्राप्तुमिच्छतेत्यर्थः ६ तत्फलंचाह अत्यंतमित्यादिना ७ । ८ जनपदाकुलान्जनव्याप्तान् । 'भवेज्जनपदोजानपदोऽपिजनदेशयोः'इतिमेदिनी गो

प्रियमतदुपश्रुत्यशत्रूणांचरापराभवम् ॥ कृतकृत्यश्चकौरव्यविधत्स्वयदनंतरम् २२ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिचारप्रत्यागमनेपंचविंशो
ऽध्यायः ॥ २५ ॥ ॥ वैशंपायनउवाच ॥ ततोदुर्योधनोराजाज्ञात्वातेषांवचस्तदा ॥ चिरमंतर्मनाभूत्वाप्रत्युवाचसभासदः १ सुदुःखाखलुकार्याणांगति
र्विज्ञातुमंततः ॥ तस्मात्सर्वेनिरीक्षध्वंक्वनुतेपांडवागताः २ अल्पावशिष्टंकालस्यगतभूयिष्ठमंततः ॥ तेषामज्ञातचर्यायामस्मिन्वर्षेत्रयोदशे ३ अस्यवर्ष
स्यशेषंचेद्व्यतीयुरिहपांडवाः ॥ निवृत्तसमयास्तेहिसत्यव्रतपरायणाः ४ क्षरंतइवनागेंद्राःसर्वेह्याशीविषोपमाः ॥ दुःखाभवेयुःसंरब्धाःकौरवान्प्रतितेध्रुवम् ५
सर्वेकालस्यवेत्तारःकृच्छ्ररूपधराःस्थिताः ॥ प्रविशेयुर्जितक्रोधास्तावदेवपुनर्वनम् ६ तस्मात्क्षिप्रंबुभूषध्वंयथातेऽत्यंतमव्ययम् ॥ राज्यंनिर्द्वंद्वमव्यग्रंनिः
सपत्नंचिरंभवेत् ७ अथाब्रवीत्ततःकर्णःक्षिप्रंगच्छंतुभारत ॥ अन्येधूर्तानरादक्षानिभृताःसाधुकारिणः ८ चरंतुदेशान्संवीताःस्फीतान्जनपदाकुलान् ॥ तत्र
गोष्ठीषुरम्यासुसिद्धप्रव्रजितेषुच ९ परिचारेषुतीर्थेषुविविधेष्वाकरेषुच ॥ विज्ञातव्यामनुष्यैस्तैस्तर्कयासुविनीतया १० विविधैस्तत्परैःसम्यक्तज्ज्ञैर्निपुण
संवृतैः ॥ अन्वेष्टव्याःसुनिपुणैःपांडवाश्छन्नवासिनः ११ नदीकुंजेषुतीर्थेषुग्रामेषुनगरेषुच ॥ आश्रमेषुचरम्येषुपर्वतेषुगुहासुच १२ अथाग्रजानंतरजःपाप
भावानुरागवान् ॥ ज्येष्ठंदुःशासनस्तत्रभ्राताभ्रातरमब्रवीत् १३ येषुनःप्रत्ययोराजंश्चारेषुमनुजाधिप ॥ तेयांतुदत्तदेयाविभूयस्तान्परिमार्गितुम् १४ एतच्च
कर्णोयत्प्राहसर्वमीहामहेतथा ॥ यथोद्दिष्टंचराःसर्वेमृगयंतुयतस्ततः १५ एतेचान्येचभूयांसोदेशाद्देशंयथाविधि ॥ नतुतेषांगतिर्वासःप्रवृत्तिश्चोपलभ्यते १६
अत्यंतंवानिगूढास्तेपारंचोर्मिमतोगताः ॥ व्यालैश्चापिमहारण्येभक्षिताःशूरमानिनः १७ अथवाविषमंप्राप्यविनष्टाःशाश्वतीःसमाः ॥ तस्मान्मानसमव्यग्रं
कृत्वात्वंकुरुनंदन ॥ कुरुकार्यंमहोत्साहंमन्यसेयन्नराधिप १८ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिकर्णदुःशासनवाक्येषड्विंशोऽध्यायः ॥ २६ ॥ ॥
वैशंपायनउवाच ॥ अथाब्रवीन्महावीर्योद्रोणस्तत्त्वार्थदर्शिवान् ॥ नतादृशाविनश्यंतिनप्रयांतिपराभवम् १ शूराश्चकृतविद्याश्चबुद्धिमंतोजितेंद्रियाः ॥ धर्म
ज्ञाश्चकृतज्ञाश्चधर्मराजमनुव्रताः २ नीतिधर्मार्थतत्त्वज्ञंपितृवच्चसमाहितम् ॥ धर्मेस्थितंसत्यधृतिंज्येष्ठंज्येष्ठानुयायिनः ३ ष्ठीषुविद्वत्सभासु सिद्धानांप्रव्रजितंगमनंये
षुतेषुमुनीनामाश्रमेषु ९ परितआगत्यचरंत्येषुतेपरिचाराःराजपुराणि तेषु तर्कयाकांक्षया । 'तर्कःकांक्षावितर्कोहे'इतिमेदिनी १० । ११ । १२ अग्रजानंतरजःद्वितीयोभ्राता
१३ । १४ । १५ । १६ ऊर्मिमतःसिंधोः १७ । १८ ॥ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे षड्विंशोऽध्यायः ॥ २६ ॥ ॥ अथेति १ । २ । ३

४ विधेयानांकिंकराणां निभृतानांअत्यंतावहितानां ५ । ६ अकालिकांविलंबासहं ७ । ८ गृह्णीयादपिचक्षुषा प्रत्यक्षदृष्टोऽपिमोहयेदेवेत्यर्थः ९ । १० ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ततइति १ अभिसंदधत् तद्वाक्यानुगुणमेववदन् भारतींभरतवंशीयपांडवविषयां गिरंवाचं भारतान्कौरवान्उवाचेतिसंबंधः २ । ३ समंवदत् समंपक्षपातशून्यं वदत्वदन् नुमभावआर्षः ४ श्रुतंशास्त्रं नानाश्रुतिरनेकाआख्यायिका ५ । ६ महात्मानउदारचित्ताः सतांधुरंधर्मं ७ । ८ परैः

अनुव्रतामहात्मानंभ्रातरोभ्रातरंनृप ॥ अजातशत्रुंश्रीमंतंसर्वेभ्रातृननुव्रतम् ४ तेषांतथाविधेयानांनिभृतानांमहात्मनाम् ॥ किमर्थंनीतिमान्पार्थःश्रेयोनैषांकरिष्यति ५ तस्माद्यत्नात्प्रतीक्षंतेकालस्योदयमागतम् ॥ नहितेनाशमृच्छेयुरितिपश्याम्यहंधिया ६ सांप्रतंचैवयत्कार्यंतच्चक्षिप्रमकालिकम् ॥ क्रियतांसाधुसंचिंत्यवासश्चैषांप्रचिंत्यताम् ७ यथावत्पांडुपुत्राणांसर्वार्थेषुधृतात्मनाम् ॥ दुर्ज्ञेयाःखलुशूरास्तेदुरापास्तपसावृताः ८ शुद्धात्मागुणवान्पार्थःसत्यवान्नीतिमान्शुचिः ॥ तेजोराशिरसंख्येयोगृह्णीयादपिचक्षुषा ९ विज्ञायक्रियतांतस्माद्भूयश्चमृगयामहे ॥ ब्राह्मणैश्चारकैःसिद्धैर्येचान्येतद्विदोजनाः १० ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिद्रोणवाक्येचारप्रत्याचारेसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ वैशंपायनउवाच ॥ ततःशांतनवोभीष्मोभरतानांपितामहः ॥ श्रुतवान्देशकालज्ञस्तत्त्वज्ञःसर्वधर्मवित् १ आचार्यवाक्योपरमेतद्वाक्यमभिसंदधत् ॥ हितार्थंसमुवाचैनांभारतींभारतान्प्रति २ युधिष्ठिरेसमासक्तांधर्मज्ञेधर्मसंवृताम् ॥ असत्सुदुर्लभांनित्यंसतांचाभिमतांसदा ३ भीष्मःसमंवदत्तत्रगिरंसाधुभिरर्चिताम् ॥ यथैषब्राह्मणःप्राहद्रोणःसर्वार्थतत्त्ववित् ४ सर्वलक्षणसंपन्नाःसाधुव्रतसमन्विताः ॥ श्रुतव्रतोपपन्नाश्चनानाश्रुतिसमन्विताः ५ वृद्धानुशासनेयुक्ताःसत्यव्रतपरायणाः ॥ समयंसमयज्ञास्तेपालयंतःशुचिव्रताः ६ क्षत्रधर्मरतानित्यंकेशवानुगताःसदा ॥ प्रवीरपुरुषास्तेवैमहात्मानोमहाबलाः ॥ नावसीदितुमर्हंतिउद्वहंतःसतांधुरम् ७ धर्मतश्चैवगुप्तास्तेसुवीर्येणचपांडवाः ॥ ननाशमधिगच्छेयुरितिमेधीयतेमतिः ८ तत्रबुद्धिंप्रवक्ष्यामिपांडवान्प्रतिभारत ॥ नतुनीतिःसुनीतस्यशक्यतेऽन्वेषितुंपरैः ९ यत्तुशक्यमिहास्माभिस्तान्वैसंचिंत्यपांडवान् ॥ बुद्ध्याप्रयुक्तंनद्रोहात्प्रवक्ष्यामिनिबोधतत् १० नत्वियंमादृशैर्नीतिस्तस्यवाच्याकथंचन ॥ सात्वियंसाधुवक्तव्यानत्वनीतिःकथंचन ११ वृद्धानुशासनेताततिष्ठतासत्यशीलिना ॥ अवश्यंत्विहधीरेणसतांमध्येविवक्षता १२

अनीतिपरैःअन्वेषितुंअनुगंतुं ९ यत्तुप्रयुक्तंप्रयोगः शक्यंज्ञातुंयोग्यः तदेववक्ष्यामिनतुभवतांद्रोहात् १० नत्विति तस्यदुर्जनस्य त्वादृशस्येतिगूढोऽभिसंधिः । सातु तुशब्दोहेत्वर्थे साहि यतःनीतिरियंसाधुवाच्यासाधुष्वेववक्तव्याऽतोऽसावौत्वयिनैवेषावक्तव्येत्यर्थः । अनीतिस्तुकथंचनसाधुष्वसाधुषुवानैववक्तव्येत्यर्थः ११ तिष्ठतावक्तव्यमितिसंबंधः १२ ॥२१॥

तत्रवक्तव्येसति यथाइतरोजनः पांडवानांनिवासंलोकसाधारणंमन्यते तथाऽहंनमन्येइतियोजना १३ असाधारण्यमेवाहतत्रेति तत्रपुरादौ असांप्रतमकल्याणम् १४ वदान्यः प्रियवादी । 'वदान्योदानशीलेचचारुवादिनिवाच्यवत्'इतिमेदिनी निभृतःनियतेंद्रियः भाव्यःअवश्यंभावी । ओरावश्यकेइतिण्यत् १५ भव्योभाविता १६ असूयकःपरगुणेषुदोषारोपकः ईर्षुःपरोत्कर्षासहिष्णुः अभिमानीआत्मसंभावितः मत्सरीपरद्रोहकर्ता तत्रयत्रयुधिष्ठिरइत्यनुकृष्यते १७ । १८ । १९ । २० दर्शनंधर्मब्रह्मस्वरूपावेक्षणं निष्प्र

यथार्हमिहवक्तव्यंसर्वथाधर्मलिप्सया ॥ तत्रनाहंतथामन्येयथायमितरोजनः १३ निवासंधर्मराजस्यवर्षेऽस्मिन्वैत्रयोदशे ॥ तत्रतातनतेषांहिराज्ञांभाव्यमसांप्रतम् १४ पुरेजनपदेचापियत्रराजायुधिष्ठिरः ॥ दानशीलोवदान्यश्चनिभृतोह्रीनिषेवकः ॥ जनोजनपदेभाव्योयत्रराजायुधिष्ठिरः १५ प्रियवादीसदादांतोभव्यःसत्यपरोजनः ॥ हृष्टःपुष्टःशुचिर्दक्षोयत्रराजायुधिष्ठिरः १६ नासूयकोनचापीर्षुर्नाभिमानीनमत्सरी ॥ भविष्यतिजनस्तत्रस्वयंधर्ममनुव्रतः १७ ब्रह्मघोषाश्चभूयांसःपूर्णाहुत्यस्तथैवच ॥ क्रतवश्चभविष्यंतिभूयांसोभूरिदक्षिणाः १८ सदाचतत्रपर्जन्यःसम्यग्वर्षीनसंशयः ॥ संपन्नसस्याचमहीनिरातंकाभविष्यति १९ गुणवंतिचधान्यानिरसवंतिफलानिच ॥ गंधवंतिचमाल्यानिशुभशब्दाचभारती २० वायुश्चसुखसंस्पर्शोनिष्प्रतीपंचदर्शनम् ॥ नभयंत्वाविशेत्तत्रयत्रराजायुधिष्ठिरः २१ गावश्चबहुलास्तत्रनकृशानचदुर्बलाः ॥ पयांसिदधिसर्पींषिरसवंतिहितानिच २२ गुणवंतिचपेयानिभोज्यानिरसवंतिच ॥ तत्रदेशेभविष्यंतियत्रराजायुधिष्ठिरः २३ रसाःस्पर्शाश्चगंधाश्चशब्दाश्चापिगुणान्विताः ॥ दृश्यानिचप्रसन्नानियत्रराजायुधिष्ठिरः २४ धर्माश्चतत्रसर्वैस्तुसेविताश्चद्विजातिभिः ॥ स्वैःस्वैर्गुणैश्चसंयुक्ताअस्मिन्वर्षेत्रयोदशे २५ देशेतस्मिन्भविष्यंतिताततपांडवसंयुते ॥ संप्रीतिमान्जनस्तत्रसंतुष्टःशुचिरव्ययः २६ देवतातिथिपूजासुसर्वभावानुरागवान् ॥ इष्टदानोमहोत्साहःस्वस्वधर्मपरायणः २७ अशुभाद्धिशुभप्रेप्सुरिष्टयज्ञःशुभव्रतः ॥ भविष्यतिजनस्तत्रयत्रराजायुधिष्ठिरः २८ त्यक्तवाक्यानृतस्तातशुभकल्याणमंगलः ॥ शुभार्थेप्सुःशुभमतिर्यत्रराजायुधिष्ठिरः २९ भविष्यतिजनस्तत्रनित्यंचेष्टप्रियव्रतः ॥ धर्मात्माशक्यतेज्ञातुंनापितातद्विजातिभिः ३० किंपुनःप्राकृतैस्तातपार्थोविज्ञायतेक्वचित् ॥ यस्मिन्सत्यंधृतिर्दानंपराशांतिर्ध्रुवाक्षमा ३१ ह्रीःश्रीःकीर्तिःपरंतेजआनृशंस्यमथार्जवम् ॥ तस्मात्तत्रनिवासंतुच्छन्नंयत्नेनधीमतः ॥ गतिंचपरमांतत्रनोत्सहेवक्तुमन्यथा ३२

तीपंपाखंडमार्गवर्जितम् २१ । २२ । २३ दृश्यानिरूपाणि २४ । २५ । २६ सर्वभावेनसर्वात्मनाऽनुरागवान् २७ अशुभात्अशुभंत्यक्त्वा २८ । २९ इष्टंयागादिप्रियंपरसुखदंचव्रतंपालनीयंयस्य एवंभूतस्यदुर्ज्ञेयत्वमप्याहधर्मात्मेति ३० । ३१ तस्मादिति धीमतःपांडवस्यवासंछन्नंतत्रविद्धीतिशेषः परमांगतिंगमनंचतत्रैवस्वकीयंकुरु एतच्चाहमन्यथाविपरीतंवचोवक्तुंनोत्सहे वृद्धत्वात्पांडवेषुद्वेषस्याधर्मरूपत्वाच्चेतिभावः ३२

३३ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेअष्टाविंशोऽध्यायः ॥ २८ ॥ युक्तंयुक्तिमत् प्राप्तंप्राप्तकालम् १ तत्त्वतश्चसहेतुकंयुक्त्याभासहीनम् २ तीर्थैश्चारैः ३ । ४ सत्रंकैतवंवेषांतररूपं छन्नेषुगुप्तेषु उदयंउद्गमनं प्रतिज्ञातेकालेउत्क्रांतेसति सामीप्येसप्तमी । कालेऽल्पावशिष्टेसतीत्यर्थः ५ परराष्ट्रेषुमित्रराष्ट्रेषु स्वराष्ट्रेषुच स्वस्यबलंसैन्यंसाम र्थ्यंचयत्तज्ज्ञातव्यम् ६ । ७ नीतिर्भक्तवेतनदानचारप्रवृत्त्यादिका तथाविधीयतांयथायेनप्रकारेणतैःसहसंदधामहेशरादिसंधानंकुर्महे यद्वा बलकोशयोरल्पत्वंस्वस्य परस्य बहुत्वं नीतिर्यथाप्रतिज्ञंसामरूपाविधीयतां यथातैःसहसंदधामहेसख्यंकुर्महेइति कालोदयेमृत्यूदयरूपेयुद्धेप्राप्तेसति । तेषांविधीयतइतिपाठे तेषांकालतःउदयेप्राप्तेसतियथास्म्यग्विधीयतेजायतेतथानीतिर्विधीयताम् ८ नियतमचंचलंनियमेनबुद्ध्यस्व ९ बोधफलमाहउच्चेति उच्चादिभेदेनत्रिविधमपिप्रहृष्टंवाअप्रहृष्टंवाज्ञातव्यं । उच्चंसमंवास्त्रबलं

एवमेततुसंचिंत्ययत्क्षतेमन्यसेहितम् ॥ तत्क्षिप्रंकुरुकौरव्ययद्येवंश्रद्दधासिमे ३३ ॥ इतिश्रीमहाभारते विराटपर्वणि गोहरणपर्वणिचारप्रत्याचारेभीष्मवाक्ये अष्टाविंशोऽध्यायः ॥ २८ ॥ वैशंपायन उवाच ॥ ततःशारद्वतोवाक्यमित्युवाचकृपस्तदा ॥ युक्तंप्राप्तंचवृद्धेनपांडवान्प्रतिभाषितम् १ धर्मार्थसहितंश्लक्ष्णं तत्त्वतश्चसहेतुकम् ॥ तत्रानुरूपंभीष्मेणममाप्यत्रगिरंशृणु २ तेषांचैवगतिस्तीर्थैर्वासश्चैषांप्रचिंत्यताम् ॥ नीतिर्विधीयतांचापिसांप्रतंयाहिताभवेत् ३ नावज्ञेयोरिपुस्तातप्राकृतोऽपिबुभूषता ॥ किंपुनःपांडवास्तातसर्वास्त्रकुशलारणे ४ तस्मात्सत्रंप्रविष्टेषुपांडवेषुमहात्मसु ॥ गूढभावेषुच्छन्नेषुकालेचोदयमागते ५ स्वराष्ट्रेपरराष्ट्रेचज्ञातव्यंबलमात्मनः ॥ उदयःपांडवानांचप्राप्तेकालेनसंशयः ६ निवृत्तसमयाःपार्थामहात्मानोमहाबलाः ॥ महोत्साहाभविष्यंतिपांडवाह्यमितौजसः ७ तस्माद्बलंचकोशश्चनीतिश्चापिविधीयताम् ॥ यथाकालोदयेप्राप्तेसम्यक्तैःसंदधामहे ८ तातबुद्ध्याऽपितत्सर्वंबुद्ध्यस्वबलमात्मनः ॥ नियतंसर्वमित्रेषुबलवत्स्वबलेषुच ९ उच्चावचंबलंज्ञात्वामध्यस्थंचापिभारत ॥ प्रहृष्टमप्रहृष्टंचसंदधामतथापरैः १० साम्नाभेदेनदानेनदंडेनबलिकर्मणा ॥ न्यायेनाक्रम्यचपरान्बलाच्चानम्यदुर्बलान् ११ सांत्वयित्वातुमित्राणिबलंचाभाष्यतांसुखम् ॥ सुकोशबलसंवृद्धःसम्यक्सिद्धिमवाप्स्यसि १२ योत्स्यसेचापिबलिभिररिभिःप्रत्युपस्थितैः ॥ अन्यैस्त्वंपांडवैर्वापिहीनैःस्वबलवाहनैः १३ एवंसर्वंविनिश्चित्यव्यवसायंस्वधर्मतः ॥ यथाकालंमनुष्येंद्रचिरंसुखमवाप्स्यसि १४ ॥ इतिश्री०म०वि०गो०चारप्रत्याचारेकृपवाक्येएकोनत्रिंशोऽध्यायः ॥ २९ ॥ अप्रहृष्टंचेत्प्रहृष्टबलैःशत्रुभिःसहसंदधामसंधिंकरवाम । विपरीतंचेदपिसंदधामशरानितिशेषः । संधनीयमितिपाठेऽपितदेवार्थद्वयंज्ञेयं । आतोधातोरित्यालोपः अनीयर्प्रत्ययेपरेभवति । संधानीयामितितुयुक्तःपाठः १० साम्नेसामभेदौ अपरस्याधिक्येदानं स्वस्याधिक्येदंडो युद्धेनिपातनंवा बलिकर्मवाकरादानाख्यं इतिबलज्ञानफलम् ११ बलंस्वसैन्यं सुखंयथास्यात्तथाआभाष्यतांप्रीतिवादेनभक्तवेतनमानदानेनसंमंत्रणीयमित्यर्थः सिद्धिंजयम् १२ अन्यैः शत्रुभिः पांडवैश्चापिसहयोत्स्यसे कीदृशैः स्वबलादिनाहीनैः १३ व्यवसायंस्वकर्तव्यम् १४ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥२२॥

अथेति १ वाक्यमुवाचेत्यत्रहेतुमाह असकृदिति निकृताःवंचितास्त्रिगर्ताइतिशेषः प्रभोहेजनमेजय २ बाधितःसुशर्मा बलवताकौरवाणांविभौस्वामिनिभीष्मेसमीपेसति कर्णे

॥ वैशंपायनउवाच ॥ अथराजात्रिगर्तानांसुशर्मारथयूथपः ॥ प्राप्तकालमिदंवाक्यमुवाचत्वरितोबली १ असकृन्निकृताःपूर्वंमत्स्यशाल्वेयकैःप्रभो ॥ सूतेनैवचमत्स्यस्यकीचकेनपुनःपुनः २ बाधितोबंधुभिःसार्द्धंबलाद्बलवताविभौ ॥ सकर्णमभ्युदीक्ष्याथदुर्योधनमभाषत ३ असकृन्मत्स्यराज्ञामेराष्ट्रंबाधितमोजसा ॥ प्रणेताकीचकस्तस्यबलवानभवत्पुरा ४ क्रूरोऽमर्षीसुदुष्टात्माभुविप्रख्यातविक्रमः ॥ निहतःसतुगंधर्वैःपापकर्मानृशंसवान् ५ तस्मिन्विनिहतेराजाहतदर्पोनिराश्रयः ॥ भविष्यतिनिरुत्साहोविराटइतिमेमतिः ६ तत्रयात्राममतायदितेरोचतेऽनघ ॥ कौरवाणांचसर्वेषांकर्णस्यचमहात्मनः ७ एतत्प्राप्तमहंमन्येकार्यमात्ययिकंहिनः ॥ राष्ट्रंतस्याभियास्यामोबहुधान्यसमाकुलम् ८ आददामोऽस्यरत्नानिविविधानिवसूनिच ॥ ग्रामान्राष्ट्राणिवातस्यहरिष्यामोविभागशः ९ अथवागोसहस्राणिशुभानिचबहूनिच ॥ विविधानिहरिष्यामःप्रतिपीड्यपुरंबलात् १० कौरवैःसहसंगत्यत्रिगर्तैश्चविशांपते ॥ गास्तस्यापहरामोऽद्यसर्वैश्चैवसुसंहताः ११ संविभागेनकृत्वातुनिबध्नीमोऽस्यपौरुषम् ॥ हत्वाचास्यचमूंकृत्स्नांवशमेवानयामहे १२ तंवशेन्यायतःकृत्वासुखंवत्स्यामहेवयम् ॥ भवतांबलवृद्धिश्चभविष्यतिनसंशयः १३ तच्छ्रुत्वावचनंतस्यकर्णोराजानमब्रवीत् ॥ सूक्तंसुशर्मणावाक्यंप्राप्तकालंहितंचनः १४ तस्मात्क्षिप्रंविनिर्यामोयोजयित्वावरूथिनीम् ॥ विभज्यचाप्यनीकानियथावामन्यसेऽनघ १५ प्रज्ञावान्कुरुवृद्धोऽयंसर्वेषांनःपितामहः ॥ आचार्यश्चयथाद्रोणःकृपःशारद्वतस्तथा ॥ मन्यंतेतेयथासर्वेतथायात्राविधीयताम् १६ संमंत्र्यचाशुगच्छामःसाधनार्थंमहीपतेः ॥ किंचनःपांडवैःकार्यंहीनार्थबलपौरुषैः १७ अत्यंतंवाप्रनष्टास्तेप्राप्तावापियमक्षयम् ॥ यामोराजन्निरुद्विग्नाविराटनगरंवयम् ॥ आदास्यामोहिगास्तस्यविविधानिवसूनिच १८ ॥ वैशंपायनउवाच ॥ ततोदुर्योधनोराजावाक्यमादायतस्यतत् ॥ वैकर्तनस्यकर्णस्यक्षिप्रमाज्ञापयत्स्वयम् १९ शासनेनित्यसंयुक्तंदुःशासनमनंतरम् ॥ सहवृद्धैस्तुसंमंत्र्यक्षिप्रंयोजयवाहिनीम् २० यथोद्देशंचगच्छामःसहितास्तत्रकौरवैः ॥ सुशर्माचयथोद्दिष्टंदेशंयातुमहारथः ॥ त्रिगर्तैःसहितोराजासमग्रबलवाहनः २१ प्रागेवहिसुसंवीतोमत्स्यस्यविषयंप्रति ॥ जघन्यतोवयंतत्रयास्यामोदिवसांतरे ॥ विषयंमत्स्यराजस्यसुसमृद्धंसुसंहताः २२ तेयांतुसहितास्तत्रविराटनगरंप्रति ॥ क्षिप्रंगोपान्समासाद्यगृह्णंतुविपुलंधनम् २३ गवांशतसहस्राणिश्रीमंतिगुणवंतिच ॥ वयमप्यनुगृह्णीमोद्विधाकृत्वावरूथिनीम् २४

चोदीक्ष्यदुर्योधनमभाषत ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ निबध्नीमःनिगृह्णीमः १२ । १३ । १४ विनिर्यामःनिर्गच्छामः १५ । १६ । १७ । १८ १९ । २० यथोद्देशंयथानिर्दिष्टांदक्षिणामुत्तरांवादिशं यथायोग्यंबलविभागंवाउद्दिश्येत्यर्थः २१ । २२ । २३ । २४

 २५ गृद्धाःलुब्धाः २६ न्यगृह्णंतकालयामासुः २७ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे त्रिंशोऽध्यायः ॥ ३० ॥ ॥ छद्मलिंगेनब्राह्मणादिकपटवेषेणप्रविष्टानां
व्यतीतोऽतिक्रांतः समय संवत्सरः १ । २ संभावनां कीचकवत्अयमपिममजयकर्त्ताभविष्यतीत्येवंरूपां ३ । ४ । ५ । ६ । ७ । ८ मानेशुःनाशमदर्शनं दूरेइतियावत् मागच्छे
 युः ९ तनुत्राणिकवचानि १० भानुमंतिदीप्यमानानि वज्रायसंअशनिलोहं यद्वा वज्रवदच्छेद्यमभेद्यंच यदयः भाषायां 'पोलाद'इतिसंज्ञितं तद्वज्रायसं तन्मयोगर्भोंतःकवचंतेन
सहितं सवज्रायसगर्भं । पाठांतरे संनाहायसज्जीभावाय सगर्भसकंटकं । 'गर्भोभ्रूणेऽर्भकेकुक्षौसंधौपनसकंटके'इतिनानार्थः । 'वज्रंस्याद्धीरकेपवौ' इतिच ११ अभ्यहारयत्

॥ वैशंपायनउवाच ॥ तेस्मगत्वायथोद्दिष्टांदिशंवन्हेर्महीपते ॥ सन्नद्धारथिनःसर्वेसपदातावलोत्कटाः २५ प्रतिवैरंचिकीर्षंतोगोषुगृद्धामहाबलाः ॥ आदातुंगाः सुशर्माऽथकृष्णपक्षस्यसप्तमीम् २६ अपरेदिवसेसर्वेराजन्संभूयकौरवाः ॥ अष्टम्यांतेन्यगृह्णंतगोकुलानिसहस्रशः २७ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिदक्षिणगोग्रहेसुशर्मादियानेत्रिंशोऽध्यायः ॥ ३० ॥ ॥ ४ ॥ वैशंपायनउवाच ॥ ततस्तेषांमहाराजतत्रैवामिततेजसाम् ॥ छद्मलिंगप्रविष्टानां पांडवानांमहात्मनाम् १ व्यतीतःसमयःसम्यग्वसतांवैपुरोत्तमे ॥ कुर्वतांतस्यकर्माणिविराटस्यमहीपतेः २ कीचकेतुहतेराजाविराटःपरवीरहा ॥ परांसंभावनांचक्रेकुंतीपुत्रेयुधिष्ठिरे ३ ततस्त्रयोदशस्यांतेतस्यवर्षस्यभारत ॥ सुशर्मणागृहीतंतद्गोधनंतरसाबहु ४ ततोजवेनमहतागोपःपुरमथाव्रजत् ॥ सदृष्ट्वामत्स्यराजंचरथात्प्रस्कंद्यकुंडली ५ शूरैःपरिवृतंयोधैःकुंडलांगदधारिभिः ॥ संवृतंमंत्रिभिःसार्द्धंपांडवैश्चमहात्मभिः ६ तंसभायांमहाराजमासीनंराष्ट्रवर्द्धनम् ॥ सोऽब्रवीदुपसंगम्यविराटंप्रणतस्तदा ७ अस्मान्युधिविनिर्जित्यपरिभूयसबांधवान् ॥ गवांशतसहस्राणित्रिगर्त्ताःकालयंतिते ८ तान्परीप्सस्वराजेंद्रमानेशुःपशवस्तव ॥ तच्छ्रुत्वान्नृपतिःसेनांमत्स्यानांसमयोजयत् ९ रथनागाश्वकलिलांपत्तिध्वजसमाकुलाम् ॥ राजानोराजपुत्राश्चतनुत्राण्यथभेजिरे १० भानुमंतिविचित्राणिशूरसेव्यानिभागशः ॥ सवज्रायसगर्भंतुकवचंतप्तकांचनम् ११ विराटस्यप्रियोभ्राताशतानीकोऽभ्यहारयत् ॥ सर्वपारसवंवर्मकल्याणपटलंदृढम् १२ शतानीकादवरजोमदिराक्षोऽभ्यहारयत् ॥ शतसूर्यंशतावर्तंशतबिंदुशताक्षिमत् १३ अभेद्यकल्पंमत्स्यानांराजाकवचमाहरत् ॥ उत्सेधेयस्यपद्मानिशतंसौगंधिकानिच १४ सुवर्णपृष्ठंसूर्याभंसूर्यदत्तोऽभ्यहारयत् ॥ दृढमायसगर्भंचश्वेतंवर्मशताक्षिमत् १५ विराटस्यसुतोज्येष्ठोवीरःशंखोऽभ्यहारयत् ॥ शतशश्चतनुत्राणियथास्वंतेमहारथाः १६

बबंध पारसवंपरान्सुनोतिपीडयति सुवतिक्षिपतिवापारसवं । ऋदोरप्
स्वार्थेतद्धितः । पारसवंशस्त्रं सर्वपारसवंसर्वशस्त्रसहमित्यर्थः कल्याणपटलंसुवर्णपत्राच्छादितं 'कल्याणमक्षयेस्वर्णे' इतिविश्वः १२ आवर्त्ततेपुनःपुनर्ल्लोपतिविलसतीतियोगात्चंद्रः पद्मंवा बिंदुःसूक्ष्मचक्रं अक्षिनेत्राकारंचक्रं १३ उत्सेधेउच्छ्राये संपूर्णेविस्तारे कह्लारजातीयानि शतंपद्मानिपंक्त्यानिविष्टानि एवंविशालमित्यर्थः १४ । १५ । १६

अभ्यनह्यंतेतिपाठेसंधिरार्षः सूपस्करेषुशोभनरथांगेषु १७ । १८ उच्छिश्रिये उच्छ्रितोऽभूत् १९ । २० गोपालस्तंतिपालाख्यः दामग्रंथिर्ह्यश्वपालः २१ । २२ । २३
२४ । २५ । २६ । २७ । २८ । २९ । ३० प्रभिन्नकरटामुखाः । 'काकेभगंडौकरटौ'इत्यमरः ३१ । ३२ । ३३ । ३४ निरीक्षंतंनिरीक्षमाणं पुल्लिंगमार्षं ३५ ॥ इति

योत्स्यमानाअनह्यंतदेवरूपाःप्रहारिणः ॥ सूपस्करेषुशुभ्रेषुमहत्सुचमहारथाः १७ पृथक्कांचनसन्नाहान्रथेष्वश्वानयोजयन् ॥ सूर्यचंद्रप्रतीकाशेरथेदिव्येहिरण्मये १८ महानुभावोमत्स्यस्यध्वजउच्छिश्रियेतदा ॥ अथान्यान्विविधाकारान्ध्वजान्हेमपरिष्कृतान् १९ यथास्वंक्षत्रियाःशूरारथेषुसमयोजयन् ॥ अथमत्स्योऽब्रवीद्राजाशतानीकंजघन्यजम् २० कंकबल्लवगोपालादामग्रंथिश्चवीर्यवान् ॥ युद्ध्येयुरितिमेबुद्धिर्वर्ततेनात्रसंशयः २१ एतेषामपिदीयंतांरथाध्वजपताकिनः ॥ कवचानिचचित्राणिदृढानिचमृदूनिच २२ प्रतिमुंचंतुगात्रेषुदीयंतामायुधानिच ॥ वीरांगरूपाःपुरुषानागराजकरोपमाः २३ नेमेजातुनयुद्ध्येरन्नितिमेधीयतेमतिः ॥ एतच्छ्रुत्वातुनृपतेर्वाक्यंत्वरितमानसः ॥ शतानीकस्तुपार्थेभ्योरथान्राजन्समादिशत् २४ सहदेवायराज्ञेचभीमायनकुलायच ॥ तान्प्रहृष्टांस्ततःसूताराजभक्तिपुरस्कृताः २५ निर्दिष्टान्नरदेवेनरथाञ्शीघ्रमयोजयन् ॥ कवचानिविचित्राणिमृदूनिचदृढानिच २६ विराटःप्रादिशद्यानितेषामक्लिष्टकर्मणाम् ॥ तान्यामुच्यशरीरेषुदंशितास्तेपरंतपाः २७ रथान्हयैःसुसंपन्नानास्थायचनरोत्तमाः ॥ निर्ययुर्मुदिताःपार्थाःशत्रुसंघावमर्दिनः २८ तरस्विनश्छन्नरूपाःसर्वेयुद्धविशारदाः ॥ रथान्हेमपरिच्छन्नानास्थायचमहारथाः २९ विराटमन्वयुःपार्थाःसहिताःकुरुपुंगवाः ॥ चत्वारोभ्रातरःशूराःपांडवाःसत्यविक्रमाः ३० भीमाश्चमत्तमातंगाःप्रभिन्नकरटामुखाः ॥ क्षरंतश्चैवनागेंद्राःसुदंताःषष्टिहायनाः ३१ स्वारूढायुद्धकुशलैःशिक्षिताहस्तिसादिभिः ॥ राजानमन्वयुःपश्चाच्चलंतइवपर्वताः ३२ विशारदानांमुख्यानांहृष्टानांचारुजीविनाम् ॥ अष्टौरथसहस्राणिदशनागशतानिच ३३ षष्टिश्चाश्वसहस्राणिमत्स्यानामभिनिर्ययुः ॥ तदनीकंविराटस्यशुशुभेभरतर्षभ ३४ संप्रयातंतदाराजन्निरीक्षंतंगवांपदम् ॥ तद्बलाग्र्यंविराटस्यसंप्रस्थितमशोभत ॥ दृढायुधजनाकीर्णंगजाश्वरथसंकुलम् ३५ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिदक्षिणगोग्रहेमत्स्यराजरणोद्योगेएकत्रिंशोऽध्यायः ॥ ३१ ॥ वैशंपायनउवाच ॥ निर्यायनगराच्छूराव्यूढानीकाःप्रहारिणः ॥ त्रिगर्त्तानस्पृशन्मत्स्याःसूर्येपरिणतेसति १ तेत्रिगर्त्ताश्चमत्स्याश्चसंरब्धायुद्धदुर्मदाः ॥ अन्योन्यमभिगर्जंतोगोषुगृद्धामहाबलाः २ भीमाश्चमत्तमातंगास्तोमरांकुशनोदिताः ॥ ग्रामणीयैःसमारूढाःकुशलैर्हस्तिसादिभिः ३ तेषांसमागमोघोरस्तुमुलोलोमहर्षणः ॥ घ्नतांपरस्परंराजन्यमराष्ट्रविवर्द्धनः ४

विराटपर्वणिनीलकंठीये भारतभावदीपे एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ निर्यायनिर्गत्य अस्पृशन्
प्राप्तवंतः परिणते पंचधाविभक्तस्याह्नश्चतुर्थभागंप्राप्ते १ । २ ग्रामणीयैःराजकीयैः'ग्रामणीर्नापितेपुंसित्रिष्वध्यक्षेऽधिपेऽपिच' इतिनानार्थः ३ समागमःसंग्रामः ४

अवलंबति अवरोहति ५ । ६ सैन्येनसेनोत्थेन ७ व्यतिषिक्तानि हस्तात्हस्तांतरंगतानि ८ अस्यतांक्षिपताम् ९ । १० । ११ । १२ । १३ नागभोगनिकाशैःसर्प
देहोपमैः १४ । १५ । १६ कश्मलंमूर्छाआविशत् शूरानितिशेषः येषांगरुत्मतांपक्षिणांअंतरिक्षेगतिर्दर्शनंच तेऽपिशरैःप्रवेजिताःउद्वेगंप्रापिताःसंतःउपाविशन् ध्वजा
ग्रादौ बाणपटलेनतेषांगतिर्दर्शनंचन्यरुध्यत निरुद्धम् १७ । १८ त्रिगर्त्तानांसेनांप्रविष्टाविरयन्वयः १९ प्रविश्य चतामाच्छेतांमोहितवंतौ केशाकेशि केशेषुकेशेषुगृही

देवासुरसमोराजन्नासीत्सूर्येऽवलंबति ॥ पदातिरथनागेंद्रहयारोहबलौघवान् ५ अन्योन्यमभ्यापततांनिघ्नतांचेतरेतरम् ॥ उदतिष्ठद्रजोभौमंनप्राज्ञायत
किंचन ६ पक्षिणश्चापतन्भूमौसैन्येनरजसाऽऽवृताः ॥ इषुभिर्व्यतिसर्पद्भिरादित्योऽतरधीयत ७ खद्योतैरिवसंयुक्तमंतरिक्षंव्यराजत ॥ रुक्मपृष्ठानिचापा
निव्यतिषिक्तानिधन्विनाम् ८ पततांलोकवीराणांसव्यदक्षिणमस्यताम् ॥ रथारथैःसमाजग्मुःपादातैश्चपदातयः ९ सादिनःसादिभिश्चैवगजैश्चापिमहाग
जाः ॥ असिभिःपट्टिशैःप्रासैःशक्तिभिस्तोमरैरपि १० संरब्धाःसमरेराजन्निजघ्नुरितरेतरम् ॥ निघ्नंतःसमरेऽन्योन्यंशूराःपरिघबाहवः ११ नशेकुरभिसंर
ब्धाःशूरान्कर्तुंपराङ्मुखान् ॥ कृत्तोत्तरोष्ठंसुनसंकृत्तकेशमलंकृतम् १२ अदृश्यतशिरश्छिन्नंरजोध्वस्तंसकुंडलम् ॥ अदृश्यंस्तत्रगात्राणिशरैश्छिन्नानिभा
गशः १३ शालस्कंधनिकाशानिक्षत्रियाणांमहामृधे ॥ नागभोगनिकाशैश्चबाहुभिश्चंदनोक्षितैः १४ आस्तीर्णावसुधाभातिशिरोभिश्चसकुंडलैः ॥ रथिनांर
थिभिश्चात्रसंप्रहारोऽभ्यवर्त्तत १५ सादिभिःसादिनांचापिपदातीनांपदातिभिः ॥ उपाशाम्यद्रजोभौमंरुधिरेणप्रसर्पता १६ कश्मलंचाविशद्घोरंनिर्मर्यादम
वर्तत ॥ उपाविशन्गरुत्मंतःशरैर्गाढंप्रवेजिताः ॥ अंतरिक्षेगतिर्येषांदर्शनंचाप्यरुध्यत १७ तेघ्नंतःसमरेऽन्योन्यंशूराःपरिघबाहवः ॥ नशेकुरभिसंरब्धाः
शूरान्कर्तुंपराङ्मुखान् १८ शतानीकःशतंहत्वाविशालाक्षश्चतुःशतम् ॥ प्रविष्टौमहतींसेनांत्रिगर्त्तानांमहारथौ १९ तौप्रविष्टौमहासेनांबलवंतौमनस्विनौ ॥
आच्छेतांबाहुसंरब्धौकेशाकेशिरथारथि २० लक्षयित्वात्रिगर्त्तानांतौप्रविष्टौरथव्रजम् ॥ अग्रतःसूर्यदत्तश्चमदिराक्षश्चपृष्ठतः २१ विराटस्तत्रसंग्रामेहत्वा
पंचशतान्रथान् ॥ हयानांचशतान्यष्टौहत्वापंचमहारथान् २२ चरन्सविविधान्मार्गान्रथेनरथसत्तमः ॥ त्रिगर्त्तानांसुशर्माणमाच्छेद्रुक्मरथंरणे २३ तौ
व्यवाहरतांतत्रमहात्मानौमहाबलौ ॥ अन्योन्यमभिगर्जंतौगोष्ठेषुवृषभाविव २४ ततोराजात्रिगर्त्तानांसुशर्मायुद्धदुर्मदः ॥ मत्स्यंसमीयाद्राजानंद्वैरथेननरर्ष
भः २५ ततोरथाभ्यांरथिनौव्यतीयतुरमर्षणौ ॥ शरान्व्यसृजतांशीघ्रंतोयधाराघनाइव २६

त्वा प्रवृत्तंयुद्धं केशाकेशि एवंरथारथि । पाठांतरे नखानखि नखैर्नखैश्चप्रहृत्येदंयुद्धंप्रवृत्तंनखानखि केशेषुगृहीत्वायोधान् रथेषुगृहीत्वारथांश्चप्रक्षिपतइतिभावः २० ॥२४॥
सूर्यदत्तःशतानीकः २१ । २२ । २३ तौ विराटसुशर्माणौ २४ । २५ । २६

२७ । २८ । २९ ततःसैन्यमितिश्लोकःप्राचीनपुस्तकेष्वन्यथापठ्यते । 'ततःसेनाःसमाहृत्यमत्स्यराजसुशर्मणौ । नजानीतांतदाऽन्योन्यंसैन्येनरजसावृतौ'इति तत्रसुशर्मणा
विति ह्रस्वत्वमार्षं सेनाःसेनास्थान्शूरान्समाहृत्यअन्योन्यसंघट्टंकारयित्वा सैन्येनसेनोत्थेन ३३ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेद्वात्रिंशोऽध्यायः ॥ ३२ ॥

अन्योन्यंचापिसंरब्धौविचेरतुरमर्षणौ ॥ कृतास्त्रौनिशितैर्बाणैरसिशक्तिगदाभृतौ २७ ततोराजासुशर्माणंविव्याधदशभिःशरैः ॥ पंचभिःपंचभिश्चास्यवि
व्याधचतुरोहयान् २८ तथैवमत्स्यराजानंसुशर्मायुद्धदुर्मदः ॥ पंचाशद्भिःशितैर्बाणैर्विव्याधपरमास्त्रवित् २९ ततःसैन्यंमहाराजमत्स्यराजसुशर्मणोः ॥ नाभ्य
जानत्तदाऽन्योन्यंसैन्येनरजसाऽऽवृतम् ३० ॥ इतिश्रीमहाभारतेविराटपर्वणिगोग्रहणपर्वणिदक्षिणगोग्रहेविराटसुशर्मयुद्धेद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ ७ ॥
॥ वैशंपायनउवाच ॥ तमसाऽभिप्लुतेलोकेरजसाचैवभारत ॥ अतिष्ठन्वैमुहूर्तंतुव्यूढानीकाःप्रहारिणः १ ततोंऽधकारंप्रणुदन्नुदतिष्ठतचंद्रमाः ॥ कुर्वाणोविम
लांरात्रिंनंदयन्क्षत्रियान्युधि २ ततःप्रकाशमासाद्यपुनर्युद्धमवर्तत ॥ घोररूपंततस्तेस्मनवैक्षंतपरस्परम् ३ ततःसुशर्मात्रैगर्तःसहभ्रात्रायवीयसा ॥ अ
भ्यद्रवन्मत्स्यराजंरथव्रातेनसर्वशः ४ ततोरथाभ्यांप्रस्कंद्यभ्रातरौक्षत्रियर्षभौ ॥ गदापाणीसुसंरब्धौसमभ्यद्रवतांरथान् ५ तथैवतेषांतुबलानितानिक्रुद्धान्य
थान्योन्यमभिद्रवंति ॥ गदासिखड्गैश्चपरश्वधैश्चप्रासैश्चतीक्ष्णाग्रसुपीतधारैः ६ बलंतुमत्स्यस्यबलेनराजासर्वंत्रिगर्ताधिपतिःसुशर्मा ॥ प्रमथ्यजित्वाचप्र
सह्यमत्स्यंविराटमोजस्विनमभ्यधावत् ७ तौनिहत्यपृथक्धुर्यावुभौतौपार्ष्णिसारथी ॥ विरथंमत्स्यराजानंजीवग्राहमगृह्णताम् ८ तमुन्मथ्यसुशर्माऽथयुवती
मिवकामुकः ॥ स्यंदनंस्वंसमारोप्यप्रययौशीघ्रवाहनः ९ तस्मिन्गृहीतेविरथेविराटेबलवत्तरे ॥ प्राद्रवंतभयान्मत्स्यास्त्रिगर्तैरर्दिताभृशम् १० तेषुसंत्रस्य
मानेषुकुंतीपुत्रोयुधिष्ठिरः ॥ प्रत्यभाषन्महाबाहुंभीमसेनमरिंदमम् ११ मत्स्यराजःपरामृष्टस्त्रिगर्तेनसुशर्मणा ॥ तंमोचयमहाबाहोनगच्छेद्द्विषतांवशम् १२
उषिताःस्मसुखंसर्वेसर्वकामैःसुपूजिताः ॥ भीमसेनत्वयाकार्यातस्यवासस्यनिष्कृतिः १३ ॥ भीमसेनउवाच ॥ अहमेनंपरित्रास्येशासनात्तवपार्थिव ॥ पश्य
मेसुमहत्कर्मयुध्यतःसहशत्रुभिः १४ स्वबाहुबलमाश्रित्यतिष्ठत्वंभ्रातृभिःसह ॥ एकांतमाश्रितोराजन्पश्यमेऽद्यपराक्रमम् १५

तमसानैशेनांधकारेण । मुहूर्तं आचंद्रोदयकालं नतुघटीद्वयमात्रं । कृष्णपक्षस्यसप्तमीमिति सप्तम्यांगोग्रहणस्योक्तत्वात् १ । २ । ३ । ४ प्रस्कंद्यअवरुह्य ५ तीक्ष्णानिअग्रा
णि सुपीताःसुतरांपीताः शोषिताःकृशीकृता अनायासेनशीघ्रंपरशरीरप्रवेशक्षमाःधाराश्चयेषांते तीक्ष्णाग्रसुपीतधारास्तैः । तीक्ष्णायसपीतेतिपाठेऽपि पीतशब्दस्योक्तएवार्थः ६
बलंजित्वाचेतिसंबंधः ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५

अपारुज्यउत्पाटच १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ विराटंसमवीक्ष्यैनं हेसमहेसाधो इतिविराटं वीक्ष्यवाचाहशाचसंभाव्य एनंसुशर्माणंतिष्ठतिष्ठेति
चावददितिसंबंधः । 'सर्वसाधुसमानेषुसमंस्यादभिधेयवत्'इतिमेदिनी २४ रथपुंगवःतिष्ठतिष्ठेतिभाषमाणः महत्कर्मान्योन्ययुद्धंपश्यतां कर्मण्यति हारेतङ् अयंमांमहत्कर्मकुर्वाणं

सुस्कंधोऽयंमहावृक्षोगदारूपइवस्थितः ॥ अहमेनमपारुज्यद्रावयिष्यामिशात्रवान् १६ ॥ वैशंपायनउवाच ॥ तंमत्तमिवमातंगंवीक्षमाणंवनस्पतिम् ॥ अ
ब्रवीद्भ्रातरंवीरंधर्मराजोयुधिष्ठिरः १७ माभीमसाहसंकार्षीस्तिष्ठत्वेषवनस्पतिः ॥ मात्वंवृक्षेणकर्माणिकुर्वाणमतिमानुषम् १८ जनाःसमवबुध्येरन्भीमोऽयमि
तिभारत ॥ अन्यदेवायुधंकिंचित्प्रतिपद्यस्वमानुषम् १९ चापंवायदिवाशक्तिंनिस्त्रिंशंवापरश्वधम् ॥ यदेवमानुषंभीमभवेदन्यैरलक्षितम् २० तदेवायुध
मादायमोक्षयाशुमहीपतिम् ॥ यमौचचक्ररक्षौतेभवितारौमहाबलौ २१ सहिताःसमरेतत्रमत्स्यराजंपरीप्सत ॥ वैशंपायनउवाच ॥ एवमुक्तस्तुवेगेनभीमसे
नोमहाबलः २२ गृहीत्वातुधनुःश्रेष्ठंजवेनसुमहाजवः ॥ व्यमुंचच्छरवर्षाणिसतोयइवतोयदः २३ तंभीमोभीमकर्माणंसुशर्माणमथाद्रवत् ॥ विराटंसमवीक्ष्यै
नंतिष्ठतिष्ठेतिचावदत् २४ सुशर्माचिंतयामासकालांतकयमोपमम् ॥ तिष्ठतिष्ठेतिभाषंतंपृष्ठतोरथपुंगवः ॥ पश्यतांसुमहत्कर्ममहद्युद्धमुपस्थितम् २५ परा
वृत्तोधनुर्गृह्यसुशर्माभ्रातृभिःसह ॥ निमेषांतरमात्रेणभीमसेनेनतेरथाः २६ रथानांचगजानांचवाजिनांचससादिनाम् ॥ सहस्रशतसंघाताःशूराणामुग्रधन्वि
नाम् २७ पातिताभीमसेनेनविराटस्यसमीपतः ॥ पत्तयोनिहतास्तेषांगदांगृह्य महात्मना २८ तद्दृष्ट्वातादृशंयुद्धंसुशर्मायुद्धदुर्मदः ॥ चिंतयामासमनसाकिं
शेषंहिबलस्यमे ॥ अपरोदृश्यतेसैन्येपुरामग्नोमहाबले २९ आकर्णपूर्णेनतदाधनुषाप्रत्यदृश्यत ॥ सुशर्मासायकांस्तीक्ष्णान्क्षिपतेचपुनःपुनः ३० ततः
समस्तास्तेसर्वेतुरगानभ्यचोदयन् ॥ दिव्यमस्त्रंविकुर्वाणास्त्रिगर्तान्प्रत्यमर्षणाः ३१ तान्निवृत्तरथान्दृष्ट्वापांडवान्सामहाचमूः ॥ वैराटिःपरमक्रुद्धोयुयुधेपरमा
द्भुतम् ३२ सहस्रमवधीत्तत्रकुंतीपुत्रोयुधिष्ठिरः ॥ भीमःसप्तसहस्राणियमलोकमदर्शयत् ३३ नकुलश्चापिसप्तैवशतानिप्राहिणोच्छरैः ॥ शतानित्रीणिशूराणां
सहदेवःप्रतापवान् ३४ युधिष्ठिरसमादिष्टोनिजघ्नेपुरुषर्षभः ॥ ततोऽभ्यपतदत्युग्रःसुशर्माणमुदायुधः ३५ हत्वातांमहतींसेनांत्रिगर्तानांमहारथः ॥ ततोयुधि
ष्ठिरोराजात्वरमाणोमहारथः ३६ अभिपत्यसुशर्माणंशरैरभ्याहनद्भृशम् ॥ सुशर्माऽपिसुसंरब्धस्त्वरमाणोयुधिष्ठिरम् ३७ अविध्यन्नवभिर्बाणैश्चतुर्भिश्चतुरो
हयान् ॥ ततोराजन्नाशुकारीकुंतीपुत्रोवृकोदरः ३८ पश्यतु अहंचैनंद्रक्ष्येइत्यर्थः २५ रथाःसंगताइतिशेषः २६ । २७ । २८ चिंतयामासेति सुशर्माबलस्य
सैन्यस्य किंशेषंकुत्सितंवधंचिंतयामास । 'शेषःसंकर्षणेवधे'इतिमेदिनी तत्रहेतुः हियस्मात्मेममअपरोभ्रातामहाबलेसैन्येपुरामग्नोदृश्यते । भ्रातुःसंकटंदृष्ट्वा सैन्यनाशं
चिंतयामासेत्यर्थः २९ धनुषाशोभमानइतिशेषः ३० तेसर्वेमत्स्याः ३१ । ३२ । ३३ । ३४ अत्युग्रोयुधिष्ठिरः वाक्यशेषात् ३५ । ३६ । ३७ । ३८

३९ । ४० । ४१ । ४२ त्रैगर्तंत्रिगर्ताधिपतिं ४३ । ४४ । ४५ । भीमसंकाशःभीमोपमः 'रामरावणयोर्युद्धंरामरावणयोरिव'इतिवदनुपमइत्यर्थः ४६। ४७ केशपक्षेकेशक
लापे । 'पाशःपक्षश्चहस्तश्चकलापार्थाःकचात्परे'इति । पक्षोमासार्धकेइत्युपक्रम्यकेशादेःपरतोवृंदइतिमेदिनी अत्रोक्तंनीतिशास्त्रे । 'वामपाणिकचोत्पीडा १ भूमौनिष्पेष

समासाद्यसुशर्माणमश्वानस्यव्यपोथयत् ॥ पृष्ठगोपौश्चतस्याथहत्वापरमसायकैः ३९ अथास्यसारथिंक्रुद्धोरथोपस्थादपातयत् ॥ चक्ररक्षश्चशूरोवैमदिरा
क्षोऽतिविश्रुतः ४० समायाद्दिरथंदृष्ट्वात्रिगर्तंप्राहरत्तदा ॥ ततोविराटःप्रस्कंद्यरथादथसुशर्मणः ४१ गदांतस्यपरामृश्यतमेवाभ्यद्रवद्बली ॥ सचचारगदापा
णिर्वृद्धोऽपितरुणोयथा ४२ पलायमानंत्रैगर्तंदृष्ट्वाभीमोऽभ्यभाषत ॥ राजपुत्रनिवर्तस्वनतेयुक्तंपलायनम् ४३ अनेनवीर्येणकथंगास्त्वंप्रार्थयसेबलात् ॥ कथं
चानुचरांस्त्यक्त्वाशत्रुमध्येविषीदसि ४४ इत्युक्तःसतुपार्थेनसुशर्मारथयूथपः ॥ तिष्ठतिष्ठेतिभीमंससहसाऽभ्यद्रवद्बली ४५ भीमस्तुभीमसंकाशोरथात्प्र
स्कंद्यपांडवः ॥ प्राद्रवत्तूर्णमव्यग्रोजीवितेप्सुःसुशर्मणः ४६ तंभीमसेनोधावंतमभ्यधावतवीर्यवान् ॥ त्रिगर्तराजमादातुंसिंहःक्षुद्रमृगंयथा ४७ अभिद्रुत्यसुश
र्माणंकेशपक्षेपरामृशत् ॥ समुद्यम्यतुरोषात्तंनिष्पिपेषमहीतले ४८ पदामूर्ध्निमहाबाहुःप्राहरद्विलपिष्यतः ॥ तस्यजानुंददौभीमोजघ्नेचैनमरत्निना ॥ समोहम
गमद्राजाप्रहारवरपीडितः ४९ तस्मिन्गृहीतेविरथेत्रिगर्तानांमहारथे ॥ अभज्यतबलंसर्वंत्रैगर्तंतद्भयातुरम् ५० निवर्त्यगास्ततःसर्वाःपांडुपुत्रामहारथाः ॥
अवजित्यसुशर्माणंधनंचादायसर्वशः ५१ स्वबाहुबलसंपन्नाह्रीनिषेधायतव्रताः ॥ विराटस्यमहात्मानःपरिक्लेशविनाशनाः ५२ स्थिताःसमक्षंतेसर्वेत्वथभीमोऽ
भ्यभाषत ५३ नायंपापसमाचारोमत्तोजीवितुमर्हति ॥ किंतुशक्यंमयाकर्तुंयद्राजासततंघृणी ५४ गलेगृहीत्वाराजानमानीयविवशंवशम् ॥ ततएनंविचेष्टंतंब
द्ध्वापार्थोवृकोदरः ५५ रथमारोपयामासविसंज्ञंपांसुगुंठितम् ॥ अभ्येत्यरणमध्यस्थमभ्यगच्छद्युधिष्ठिरम् ५६ दर्शयामासभीमस्तुसुशर्माणंनराधिपम् ॥ प्रोवा
चपुरुषव्याघ्रोभीममाहवशोभिनम् ५७ तंराजाप्राहसद्दृष्ट्वामुच्यतांवैनराधमः ॥ एवमुक्तोऽब्रवीद्भीमःसुशर्माणंमहाबलम् ५८ ॥ भीमउवाच ॥ जीवितुंचे
च्छसेमूढहेतुंमेदगतःशृणु ॥ दासोऽस्मीतित्वयावाच्यंसंसत्सुचसभासुच ५९ एवंतेजीवितंदद्यामेषयुद्धजितोविधिः ॥ तमुवाचततोज्येष्ठोभ्रातासप्रणयंवचः ६०

णंबलात् २। मूर्ध्निपादप्रहरणं ३ जानुनोदरमर्दनं ४। मालूराकारयामुष्ट्या कपोलेदृढताडनं ५ । कफोणिपातोऽप्यसकृत् ६ सर्वतस्तलताडनं ७ । तालेनयुद्धेभ्रमणंमारणं ८
स्मृतमष्टधा । चतुर्भिःक्षत्रियंहन्यात्पंचभिःक्षत्रियाधमं । षड्भिर्वैश्यंसप्तभिस्तुशूद्रंसंकरमष्टभिः'इति एतेषांमध्येतंकेशग्रहादिभिःपंचभिर्मारयताऽस्यक्षत्रियाधमत्वंदर्शितं ४८
४९ । ५० । ५१ । ५२ । ५३ घृणीदयालुः ५४ विवशंअचित्तं वशंपराधीनं ५५ । ५६ । ५७ । ५८ । ५९ । ६०

६१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ एवमिति १ । २ । ३ । ४ । ५ । ६ । ७ प्रतीताःहृष्टाः ८ । ९ । १० नःअस्मत्संबंधि

॥ युधिष्ठिरउवाच ॥ मुंचमुंचाधमाचारंप्रमाणंयदितेवयम् ॥ दासभावंगतोह्येषविराटस्यमहीपतेः ॥ अदासोगच्छमुक्तोऽसिमैवंकार्षीःकदाचन ६१ ॥ इतिश्री
महाभारतेविराटपर्वणिगोग्रहणपर्वणिदक्षिणगोग्रहेसुशर्मनिग्रहेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ वैशंपायनउवाच ॥ एवमुक्तेतुसव्रीडःसुशर्माऽऽसीदधोमुखः ॥
समुक्तोऽभ्येत्यराजानमभिवाद्यप्रतस्थितवान् १ विसृज्यतुसुशर्माणंपांडवास्तेहतद्विषः ॥ स्वबाहुबलसंपन्नाह्रीनिषेवायतव्रताः ॥ संग्रामशिरसोमध्येतांरात्रिं
सुखिनोऽवसन् २ ततोविराटःकौंतेयानतिमानुषविक्रमान् ॥ अर्चयामासवित्तेनमानेनचमहारथान् ३ ॥ विराटउवाच ॥ यथैवममरत्नानियुष्माकंतानिवै
तथा ॥ कार्यंकुरुतवैसर्वेयथाकामंयथासुखम् ४ ददाम्यलंकृताःकन्यावसूनिविविधानिच ॥ मनसश्चाप्यभिप्रेतंयुद्वःशत्रुनिबर्हणाः ५ युष्माकंविक्रमादद्यमु
क्तोऽहंस्वस्तिमानिह ॥ तस्माद्भवंतोमत्स्यानामीश्वराःसर्वएवहि ६ ॥ वैशंपायनउवाच ॥ तथेतिवादिनंमत्स्यंकौरवेयाःपृथक्पृथक् ॥ ऊचुःप्रांजलयःसर्वेयु
धिष्ठिरपुरोगमाः ७ प्रतिनंदामतेवाक्यंसर्वंचैवविशांपते ॥ एतेनैवप्रतीताःस्मयत्त्वंमुक्तोऽद्यशत्रुभिः ८ ततोऽब्रवीत्प्रीतमनामत्स्यराजोयुधिष्ठिरम् ॥ पुनरे
वमहाबाहुर्विराटोराजसत्तमः ९ एहित्वामभिषेक्ष्यामिमत्स्यराजस्तुनोभवान् १० मनसश्चाप्यभिप्रेतंयथेष्टंभुविदुर्लभम् ॥ तत्तेहंसंप्रदास्यामिसर्वमर्हतिनोभ
वान् ११ रत्नानिगाःसुवर्णंचमणिमुक्तमथापिच ॥ वैयाघ्रपद्यविप्रेंद्रसर्वथैवनमोस्तुते १२ त्वत्कृतेह्यद्यपश्यामिराज्यंसंतानमेवच ॥ यतश्चजातसंरंभोनचश
त्रुवशंगतः १३ ततोयुधिष्ठिरोमत्स्यंपुनरेवाभ्यभाषत ॥ प्रतिनंदामितेवाक्यंमनोज्ञंमत्स्यभाषसे १४ आनृशंस्यपरोनित्यंसुसुखीसततंभव ॥ गच्छंतुदूता
स्त्वरितंनगरंतवपार्थिव १५ सुहृदांप्रियमाख्यातुंघोषयंतुचतेजयम् ॥ ततस्तद्वचनान्मत्स्योदूतान्राजासमादिशत् १६ आचक्षध्वंपुरंगत्वासंग्रामविज
यंमम ॥ कुमार्यःसमलंकृत्यपर्यागच्छंतुमेपुरात् १७ वादित्राणिचसर्वाणिगणिकाश्चस्वलंकृताः ॥ एतांचाज्ञांततःश्रुत्वाराज्ञामत्स्येननोदिताः ॥ तामाज्ञांशि
रसाकृत्वाप्रस्थिताहृष्टमानसाः १८ तेगत्वातत्रतांरात्रिमथसूर्योदयंप्रति ॥ विराटस्यपुराभ्याशेदूताजयमघोषयन् १९ ॥ इतिश्रीमहाभारतेवि० प०गोहरण
प० दक्षिणगोग्रहेविराटजयघोषेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ वैशंपायनउवाच ॥ यातेत्रिगर्तान्मत्स्येतुपशूंस्तान्वैपरीप्सति ॥ दुर्योधनःसहामात्यो
विराटमुपयादथ १ भीष्मोद्रोणश्चकर्णश्चकृपश्चपरमास्त्रवित् ॥ द्रौणिश्चसौबलश्चैवतथादुःशासनःप्रभो २ विविंशतिर्विकर्णश्चचित्रसेनश्चवीर्यवान् ॥ दुर्मुखोदुः
शलश्चैवयेचैवान्येमहारथाः ३ सर्वंभवान्अर्हीतुमर्हति ११ । १२ यतोनिगृहीतःजातसंरंभोजातभयोऽपित्वद्बलाच्चशत्रुवशंगतोऽस्मि १३ । १४ । १५ । १६ ॥२६॥
१७।१८ । १९ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ परीप्सतिलिप्सति यतः अथ अतः विराटंविराटदेशंउपयात्उपायात् १ । २ ३

४ कालयंतिनयंति रथवंशेनरथसमूहेन ५ घोषस्यघोषस्थानांगवांगोपालानांच हन्यताहन्यमानानामारावःशब्दोमहानभूत् ६ । ७ । ८ भूमिंजयमित्युत्तरस्यैवनामांतरं
९ । १० शून्यपालंराज्ञोऽसन्निधानेपालकं ११ । १२ । १३ । १४ यूथपोगंधहस्ती १५ पाशोपधानामिति पाशौमौर्वीप्रांतद्वयगतौ तावेवउपधानेवीणायांतंत्रीसंधानार्थे
कीलविशेषौयस्यांसापाशोपधानातां । ज्यातंत्रीं मौर्व्येवतंत्रीकार्ष्णायसतंतवोयस्यांतां चापोधनुर्यष्टिः सैवअलाबुसहितोदंडोयस्यास्तां । महास्वनामित्युभयत्रतुल्यं । शरास्ततो
एतेमत्स्यानुपागम्यविराटस्यमहीपतेः ॥ घोषान्विद्राव्यतरसागोधनंजहुरोजसा ४ षष्टिंगवांसहस्राणिकुरवःकालयंतिच ॥ महतारथवंशेनपरिवार्यसमंततः
५ गोपालानांतुघोषस्यहन्यतांतैर्महारथैः ॥ आरावःसुमहानासीत्संप्रहारेभयंकरे ६ गोपाध्यक्षोभयत्रस्तोरथमास्थायसत्वरः ॥ जगामनगरायैवपरिक्रोशं
स्तदार्तवत् ७ सप्रविश्यपुरंराज्ञोनृपवेश्माभ्ययात्ततः ॥ अवतीर्यरथात्तूर्णमाख्यातुंप्रविवेशह ८ दृष्ट्वाभूमिंजयंनामपुत्रंमत्स्यस्यमानिनम् ॥ तस्मैतत्सर्वमाच
ष्टराष्ट्रस्यपशुकर्षणम् ९ षष्टिंगवांसहस्राणिकुरवःकालयंतिते ॥ तद्विजेतुंसमुत्तिष्ठगोधनंराष्ट्रवर्धन १० राजपुत्रहितप्रेप्सुःक्षिप्रंनिर्याहिचस्वयम् ॥ त्वांहि
मत्स्योमहीपालःशून्यपालमिहाकरोत् ११ त्वयापरिषदोमध्येश्लाघतेसनराधिपः ॥ पुत्रोममानुरूपश्चशूरश्चेतिकुलोद्वहः १२ इष्वस्त्रेनिपुणोयोधःसदावीरश्च
मेसुतः ॥ तस्यतत्सत्यमेवास्तुमनुष्येंद्रस्यभाषितम् १३ आवर्तयकुरूञ्जित्वापशून्पशुमतांवर ॥ निर्दहैषामनीकानिभीमेनशरतेजसा १४ धनुश्च्युतैरु
क्मपुंखैःशरैःसन्नतपर्वभिः ॥ द्विषतांभिंध्यनीकानिगजानामिवयूथपः १५ पाशोपधानांज्यातंत्रींचापदंडांमहास्वनाम् ॥ शरवर्णांधनुर्वीणांशत्रुमध्येप्रवादय
१६ श्वेतारजतसंकाशारथेयुज्यंतुतेहयाः ॥ ध्वजंचसिंहंसौवर्णमुच्छ्रयंतुतवप्रभो १७ रुक्मपुंखाःप्रसन्नाग्रामुक्ताहस्तवतात्वया ॥ छादयंतुशराःसूर्यंराज्ञांमार्गं
निरोधकाः १८ रणेजित्वाकुरून्सर्वान्वज्रपाणिरिवासुरान् ॥ यशोमहदवाप्यत्वंप्रविशेदंपुरंपुनः १९ त्वंहिराष्ट्रस्यपरमागतिर्मत्स्यपतेःसुतः ॥ यथाहिपांडुपु
त्राणामर्जुनोजयतांवरः २० एवमेवगतिर्नूनंभवान्विषयवासिनाम् ॥ गतिमंतोवयंत्वद्यसर्वेविषयवासिनः २१ ॥ वैशंपायनउवाच ॥ स्त्रीमध्यउक्तस्तेनासौ
तद्वाक्यमभयंकरम् ॥ अंतःपुरेश्लाघमानइदंवचनमब्रवीत् २२ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेगोपवाक्येपंचत्रिंशोऽध्यायः ॥३५॥
॥उत्तरउवाच ॥ अद्याहमनुगच्छेयंदृढधन्वागवांपदम् ॥ यदिमेसारथिःकश्चिद्भवेदश्वेषुकोविदः १ तंत्वहंनावगच्छामियोमेयंताभवेन्नरः ॥ पश्यध्वंसारथिंक्षिप्रं
ममयुक्तंप्रयास्यतः २ अष्टाविंशतिरात्रंवामासंवानूनमंततः ॥ यत्तदासीन्महद्युद्धंतत्रमेसारथिर्हतः ३
निःसरंतस्तएववर्णाः शब्दवत्त्वसामान्यात्स्वरस्पर्शादयोयस्यां । धनुःशब्दोऽत्रसज्यचापवाची । तामेववीणांशत्रूणांमध्येप्रवादय १६ युज्यंतुयुज्यंतां सिंहंसिंहाकारं सौवर्णं १७
हस्तवताढृढहस्तेन प्रशंसायांमतुप् १८ । १९ । २० । २१ । २२ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे पंचत्रिंशोऽध्यायः ॥ ३५ ॥ १ । २ । ३

हयानविदं अश्वमतिज्ञम् ४।५।६।७।८।९।१०।११।१२।१३।१४।१५।१६ ।१७।१८।१९।२०।२१ । २२ । २३ नर्तनागृहं ण्यासश्रयोयुजितिण्यंतादुचिटावंतं सत्रेण
च्छद्मना २४ ॥ इति वि०प०नी०भा०भा०षट्त्रिंशोध्यायः॥ ३६ ॥ माल्यंमाला । 'माल्यंकुसुमतरलजोः' इति मेदिनी । सुदक्षिणाभ्रातृच्छंदानुवर्तिनो । 'दक्षिणादक्षिणो

॥२७॥ अ०
सलभेयंयदात्वन्यंहययानविदंनरम् ॥ त्वरावानद्ययात्वाऽहंसमुच्छ्रितमहाध्वजम् ४ विगाह्यतत्परानीकंगजवाजिरथाकुलम् ॥ शस्त्रप्रतापनिर्वीर्यान्कुरून्जि
त्वाऽऽनयेपशून् ५ दुर्योधनंशांतनवंकर्णंवैकर्तनंकृपम् ॥ द्रोणंचसहपुत्रेणमहेष्वासान्समागतान् ६ वित्रासयित्वासंग्रामेदानवानिववज्रभृत् ॥ अनेनैवमुहूर्तेन ॥३७॥
पुनःप्रत्यानयेपशून् ७ शून्यमासाद्यकुरवःप्रयांत्यादायगोधनम् ॥ किंतुशक्यंमयाकर्तुंयदहंतत्रनाभवम् ८ पश्येयुरद्यमेवीर्यंकुरवस्तेसमागताः ॥ किंनुपा
र्थोऽर्जुनःसाक्षादयमस्मान्प्रबाधते ९ ॥ वैशंपायनउवाच ॥ श्रुत्वातदर्जुनोवाक्यंराज्ञःपुत्रस्यभाषतः ॥ अतीतसमयेकालेप्रियांभार्यामनिंदिताम् १० द्रुप
दस्यसुतांतन्वींपांचालींपावकात्मजाम् ॥ सत्यार्जवगुणोपेतांभर्तुःप्रियहितेरताम् ११ उवाचरहसिप्रीतःकृष्णांसर्वार्थकोविदः ॥ उत्तरंब्रूहिकल्याणिक्षिप्रंमद्व
चनादिदम् १२ अयंवैपांडवस्यासीत्सारथिःसंमतोदृढः ॥ महायुद्धेषुसंसिद्धःसतेयंताभविष्यति १३ ॥ वैशंपायनउवाच ॥ तस्यतद्वचनंस्त्रीषुभाषतश्चपु
नःपुनः ॥ नसाऽमर्षतपांचालीबीभत्सोःपरिकीर्तनम् १४ अथैनमुपसंगम्यस्त्रीमध्यात्सातपस्विनी ॥ व्रीडमानेवशनकैरिदंवचनमब्रवीत् १५ योऽसौबृहद्वा
रणाभोयुवासुप्रियदर्शनः ॥ बृहन्नलेतिविख्यातःपार्थस्यासीत्ससारथिः १६ धनुष्यनवरश्चासीत्तस्यशिष्योमहात्मनः ॥ दृष्टपूर्वोमयावीरचरंस्त्यापांडवान्प्र
ति १७ यदातत्पावकोदावमदहत्खांडवंमहत् ॥ अर्जुनस्यतदाऽनेनसंगृहीताहयोत्तमाः १८ तेनसारथिनापार्थःसर्वभूतानिसर्वशः ॥ अजयत्खांडवप्रस्थेन
हियंताऽस्तितादृशः १९ ॥ उत्तरउवाच ॥ सैरंध्रिजानासितथायुवानंनपुंसकोनैवभवेद्यथाऽसौ ॥ अहंनशक्नोमिबृहन्नलांशुभेवक्तुंस्वयंयच्छहयान्ममेतिवै ॥
२० ॥ द्रौपद्युवाच ॥ येयंकुमारीसुश्रोणीभगिनीतेयवीयसी ॥ अस्याःसावीरवचनंकरिष्यतिनसंशयः २१ यदिवैसारथिःसस्यात्कुरून्सर्वान्नसंशयः ॥ जि
त्वागाश्वसमादायध्रुवमागमनंभवेत् २२ एवमुक्तःससैरंध्र्याभगिनींप्रत्यभाषत ॥ गच्छत्वमनवद्यांगितामानयबृहन्नलाम् २३ साभ्रात्राप्रेषिताशीघ्रमगच्छन्नर्त
नागृहम् ॥ यत्रास्तेसमहाबाहुश्छन्नःसत्रेणपांडवः २४ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेबृहन्नलासारथ्यकथनेषट्त्रिंशोऽध्याय ॥३६॥
॥ वैशंपायनउवाच ॥ साप्राद्रवत्कांचनमाल्यधारिणीज्येष्ठेनभ्रात्राप्रहितायशस्विनी ॥ सुदक्षिणावेदिविलग्नमध्यासापद्मपत्राभनिभाशिखंडिनी १

ऽतसरलच्छंदवर्तिषु' इतिमेदिनी । वेदिवत्विलग्नःकृशोमध्योयस्याःसा पद्मपत्राभिनवाशिखंडिनीतिप्राचीनपाठः । पद्मपत्राभनिभा पद्मपत्रेषुआभातीतिपद्मपत्राभालक्ष्मीः ॥२७॥
तद्वत् निभादीप्तिर्यस्याःसा । येतु पद्मपत्राभंमरकतंतन्निभांद्युतिमामितिव्याचख्युस्तेषांकनकोज्ज्वलत्वचामितिवाक्यशेषेणविरोधःस्पष्टः । शिखंडिनी मयूरपिच्छालंकारवती १

अरालपक्ष्मावक्राक्षिपक्ष्मा शतन्हदाविद्युत् २ । ३ प्रमुखेअग्रे ४ । ५ किंकिमर्थमागमनम् ६ प्रणयंविनयंभावयंतीदर्शयंती ७ । ८ । ९ । १० । ११ यावद्गावोदूरतरंन्हियंते ततःप्रागेव

तन्वीशुभांगीमणिचित्रमेखलामत्स्यस्यराज्ञोदुहिताश्रियावृता ॥ तन्नर्तनागारमरालपक्ष्माशतह्रदामेघमिवान्वपद्यत २ साहस्तिहस्तोपमसंहितोरूःस्वनिंदि
ताचारुदतीसुमध्यमा ॥ आसाद्यतंवैवरमाल्यधारिणीपार्थंशुभानागवधूरिवद्विपम् ३ सारत्नभूतामनसःप्रियाऽर्चितासुताविराटस्ययथेंद्रलक्ष्मीः ॥ सुदर्शनी
याप्रमुखेयशस्विनीप्रीत्याऽब्रवीदर्जुनमायतेक्षणा ४ सुसंहतोरुंकनकोज्ज्वलत्वचंपार्थःकुमारींसतदाऽभ्यभाषत ॥ किमागमःकांचनमाल्यधारिणिमृगाक्षिकिंत्वं
त्वरितेवभामिनि ॥ किंतेमुखंसुंदरिनप्रसन्नमाचक्ष्वतत्त्वंममशीघ्रमंगने ५ ॥ वैशंपायनउवाच ॥ सतांदृष्ट्वाविशालाक्षींराजपुत्रींसखींतथा ॥ प्रहसन्नब्रवीद्रा
जन्किमागमनमित्युत ६ तमब्रवीद्राजपुत्रीसमुपेत्यनरर्षभम् ॥ प्रणयंभावयंतीसासखीमध्यइदंवचः ७ गावोराष्ट्रस्यकुरुभिःकाल्यंतेनोबृहन्नले ॥ ताविजेतुंम
मभ्राताप्रयास्यतिधनुर्धरः ८ नाचिरंनिहतस्तस्यसंग्रामेरथसारथिः ॥ तेननास्तिसमःसूतोयोऽस्यसारथ्यमाचरेत् ९ तस्मैप्रयतमानायसारथ्यर्थंबृहन्नले ॥
आचक्षेहयज्ञानेसैरंध्रीकौशलंतव १० अर्जुनस्यकिलासीस्त्वंसारथिर्दयितःपुरा ॥ त्वयाऽजयत्सहायेनपृथिवींपांडवर्षभः ११ सासारथ्यंममभ्रातुःकुरुसाधु
बृहन्नले ॥ पुरादूरतरंगावोह्रियंतेकुरुभिर्हिनः १२ अथैतद्वचनंमेऽद्यनियुक्तानकरिष्यसि ॥ प्रणयादुच्यमानात्वंपरित्यक्ष्यामिजीवितम् १३ एवमुक्तस्तुसुश्रो
ण्यातयासख्यापरंतपः ॥ जगामराजपुत्रस्यसकाशममितौजसः १४ तमाव्रजंतंत्वरितंप्रभिन्नमिवकुंजरम् ॥ अन्वगच्छद्विशालाक्षीशिशुंगजवधूरिव १५ दू
रादेवतुतंप्रेक्ष्यराजपुत्रोऽभ्यभाषत ॥ त्वयासारथिनापार्थःखांडवेऽग्निमतर्पयत् १६ पृथिवीमजयत्कृत्स्नांकुंतीपुत्रोधनंजयः ॥ सैरंध्रीत्वांसमाचष्टेसाहिजा
नातिपांडवान् १७ संयच्छमामकानश्वांस्तथैवत्वंबृहन्नले ॥ कुरुभिर्योत्स्यमानस्यगोधनानिपरीप्सतः १८ अर्जुनस्यकिलासीस्त्वंसारथिर्दयितःपुरा ॥ त्वया
ऽजयत्सहायेनपृथिवींपांडवर्षभः १९ एवमुक्ताप्रत्युवाचराजपुत्रंबृहन्नला ॥ काशक्तिर्ममसारथ्यंकर्तुंसंग्राममूर्धनि २० गीतंवायदिवानृत्यंवादित्रंवापृथग्विधम् ॥
तत्करिष्यामिभद्रंतेसारथ्यंतुकुतोमम २१ ॥ उत्तरउवाच ॥ बृहन्नलेगायनोवानर्तनोवापुनर्भव ॥ क्षिप्रंमेरथमास्थायनिगृह्णीष्वहयोत्तमान् २२ ॥ वैशंपाय
९५ नउवाच ॥ सतत्रनर्मसंयुक्तमकरोत्पांडवोबहु ॥ उत्तरायाःप्रमुखतःसर्वंजानन्नरिंदमः २३ ऊर्ध्वमुत्क्षिप्यकवचंशरीरेप्रत्यमुंचत ॥ कुमार्यस्तत्रतंदृष्ट्वाप्राहस
न्पृथुलोचनाः २४ सतुदृष्ट्वाविमुह्यंतंस्वयमेवोत्तरस्ततः ॥ कवचेनमहार्हेणसमनह्यद्बृहन्नलाम् २५ सबिभ्रत्कवचंचाग्र्यंस्वयमप्यंशुमत्प्रभम् ॥ ध्वजंचसिंहमु
च्छ्रित्यसारथ्येसमकल्पयत् २६ धनूंषिचमहार्हाणिबाणांश्चरुचिरान्बहून् ॥ आदायप्रययौवीरःसबृहन्नलसारथिः २७ अथोत्तराचकन्याश्चसख्यस्तामब्रुवं
स्तदा ॥ बृहन्नलेआनयेथावासांसिरुचिराणिच २८ सारथ्यंकुरु १२ । १३ । १४ । १५ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ ।२७ २८

पांचालिकार्थं । 'पांचालिकापुत्तिकास्याद्वस्त्रदंतादिभिःकृता'इत्यमरः २९ । ३० । ३१ । ३२ । ३३ । ३४ ॥ ॥ इतिविराटप॰ नील॰ भारतभा॰ सप्तत्रिंशोऽ विरा. ४
म.भा.टी. ध्यायः ॥ ३७ ॥ ॥ ७ ॥ ॥ सइति १ । २ । ३ । ४ । ५ अतिवेगेनआकाशे ६ । ७ । ८ हृष्टरोमारोमांचितः ९ नोत्सहेइत्यत्रहेतुमाहबह्विति १० । ११
॥२८॥ पांचालिकार्थंचित्राणिसूक्ष्माणिचमृदूनिच ॥ विजित्यसंग्रामगतान्भीष्मद्रोणमुखान्कुरून् २९ एवंताब्रुवतीःकन्याःसहिताःपांडुनंदनः ॥ प्रत्युवाचहसन्पा अ॰
र्थोमेघदुंदुभिनिःस्वनः ३० ॥ बृहन्नलोवाच ॥ यद्युत्तरोऽयंसंग्रामेविजेष्यतिमहारथान् ॥ अथाहरिष्येवासांसिदिव्यानिरुचिराणिच ३१ ॥ वैशंपायनउवाच ॥
एवमुक्त्वातुबीभत्सुस्ततःप्राचोदयद्धयान् ॥ कुरूनभिमुखःशूरोनानाध्वजपताकिनः ३२ तमुत्तरंवीक्ष्यरथोत्तमेस्थितंबृहन्नलायाःसहितंमहाभुजम् ॥ स्त्रियश्च ॥३८॥
कन्याश्चद्विजाश्चसुव्रताःप्रदक्षिणंचक्रुरथोचुरंगनाः ३३ यदर्जुनस्यर्षभतुल्यगामिनःपुराऽभवत्खांडवदाहमंगलम् ॥ कुरून्समासाद्यरणेबृहन्नलेसहोत्तरेणाद्य
तदस्तुमंगलम् ३४ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेउत्तरनिर्याणंनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ वैशंपायनउवाच ॥ सराजधा
न्यानिर्यायवैराटिरकुतोभयः ॥ प्रयाहीत्यब्रवीत्सूतंयत्रतेकुरवोगताः १ समवेतान्कुरून्सर्वान्जिगीषूनवजित्यवै ॥ गास्तेषांक्षिप्रमादायपुनरेष्याम्यहंपुरम्
२ ततस्तांश्चोदयामाससदश्वान्पांडुनंदनः ॥ तेहयानरसिंहेननोदितावातरंहसः ॥ आलिखंतइवाकाशमूहुःकांचनमालिनः ३ नातिदूरमथोगत्वामत्स्यपुत्र
धनंजयौ ॥ अवेक्षेतामभित्रघ्नौकुरूणांबलिनांबलम् ४ श्मशानमभितोगत्वाआससादकुरूनथ ॥ तांशमीमन्ववीक्षेतांव्यूढानीकांश्चसर्वशः ५ तदनीकंमह
त्तेषांविबभौसागरोपमम् ॥ सर्पमाणमिवाकाशेवनंबहुलपादपम् ६ ददृशेपार्थिवोरेणुर्जनितस्तेनसर्पता ॥ दृष्टिप्रणाशोभूतानांदिवस्पृक्कुरुसत्तम ७ तदनी
कंमहद्दृष्ट्वागजाश्वरथसंकुलम् ॥ कर्णदुर्योधनकृपैर्गुप्तंशांतनवेनच ८ द्रोणेनचसपुत्रेणमहेष्वासेनधीमता ॥ हृष्टरोमाभयोद्विग्नःपार्थंवैराटिरब्रवीत् ९ ॥ उत्तर
उवाच ॥ नोत्सहेकुरुभिर्योद्धुंरोमहर्षंहिपश्यमे ॥ बहुप्रवीरमत्युग्रंदेवैरपिदुरासदम् १० प्रतियोद्धुंनशक्यामिकुरुसैन्यमनंतकम् ॥ नाशंसेभारतींसेनांप्रवेष्टुं
भीमकार्मुकाम् ११ रथनागाश्वकलिलांपत्तिध्वजसमाकुलाम् ॥ दृष्ट्वैवहिपरानाजौमनःप्रव्यथतीवमे १२ यत्रद्रोणश्चभीष्मश्चकृपःकर्णोविविंशतिः ॥ अश्व
त्थामाविकर्णश्चसोमदत्तश्चबाल्हिकः १३ दुर्योधनस्तथावीरोराजाचरथिनांवरः ॥ द्युतिमंतोमहेष्वासाःसर्वेयुद्धविशारदाः १४ दृष्ट्वैवहिकुरूनेतान्व्यूढानीका
न्प्रहारिणः ॥ हृषितानिचरोमाणिकश्मलंचागतंमम १५ ॥ वैशंपायनउवाच ॥ अविजातोविजातस्यमौर्ख्याद्धूर्तस्यपश्यतः ॥ परिदेवयतेमंदःस
काशेसव्यसाचिनः १६ त्रिगर्तान्मेपितायातःशून्येसंप्रणिधायमाम् ॥ सर्वांसेनामुपादायनमेसंतीहसैनिकाः १७ सोहमेकोबहून्बालःकृतास्त्रानकृतश्रमः ॥ प्र ॥२८॥
तियोद्धुंनशक्ष्यामिनिवर्तस्वबृहन्नले १८ कलिलांगहनाम् १२ । १३ । १४ कश्मलंमूर्च्छा १५ अविजातः जातंसामान्यंविगतंयस्मात्सविजातोऽ
साधारणस्तदन्योऽविजातः साधारणः प्राकृतः । प्राचांतुसयकारः पाठः तदा वियातोधृष्टः । 'धृष्टेधृष्णुर्वियातश्च'इत्यमरः । अवियातोऽप्रगल्भः । धूर्तस्यछन्नवेषधारिणः १६ । १७ । १८

१९ । २० आमिषंमांसं तत्रयथागृध्राःपतंति तत्तुल्यानांगोलुब्धानां । पृथिव्यांनिमित्तभूतायां । एतेनाग्रेमातिसंग्रामेष्वपिरवानेष्याभीत्युक्तम् २१ अभिनिर्यायाभिनिर्गत्य
॥ बृहन्नलोवाच ॥ भयेनदीनरूपोऽसिद्विषतांहर्षवर्द्धनः ॥ नचतावत्कृतंकर्मपरैःकिंचिद्रणाजिरे १९ स्वयमेवचमामात्थवहमांकौरवान्प्रति ॥ सोऽहंत्वांतत्रने
ष्यामियत्रैतेबहुलाध्वजाः २० मध्यमामिषगृध्राणांकुरूणामाततायिनाम् ॥ नेष्यामित्वांमहाबाहोपृथिव्यामपियुध्यताम् २१ तथास्त्रीषुप्रतिश्रुत्यपौरुषंपुरु
षेषुच ॥ कत्थमानोभिनिर्यायकिमर्थंनयुयुत्ससे २२ नचेद्विजित्यगास्तास्त्वंगृहान्वैप्रतियास्यसि ॥ प्रहसिष्यंतिवीरास्त्वांनरानार्यश्चसंगताः २३ अहमप्य
त्रसैरंध्र्याख्यातासारथ्यकर्मणि ॥ नचशक्ष्याम्यनिर्जित्यगाःप्रयातुंपुरंप्रति २४ स्तोत्रेणचैवसैरंध्र्यास्तववाक्येनतेनच ॥ कथंनयुध्येयमहंकुरून्सर्वान्स्थि
रोभव २५ ॥ उत्तरउवाच ॥ कामंहरंतुमत्स्यानांभूयांसःकुरवोधनम् ॥ प्रहसंतुचमांनार्योनरावाऽपिबृहन्नले २६ संग्रामेनचकार्यंमेगावोगच्छंतुचापिमे ॥ शू
न्यंमेनगरंचापिपितुश्चैवबिभेम्यहम् २७ ॥ वैशंपायनउवाच ॥ इत्युक्त्वाप्राद्रवद्भीतोरथात्प्रस्कंद्यकुंडली ॥ त्यक्त्वामानंचदर्पंचविसृज्यसशरंधनुः २८ ॥ बृ
हन्नलोवाच ॥ नैषशूरैःस्मृतोधर्मःक्षत्रियस्यपलायनम् ॥ श्रेयस्तुमरणंयुद्धेनभीतस्यपलायनम् २९ ॥ वैशंपायनउवाच ॥ एवमुक्त्वातुकौंतेयःसोऽवप्लुत्यरथो
त्तमात् ॥ तमन्वधावद्धावंतंराजपुत्रंधनंजयः ३० दीर्घांवेणींविधुन्वानःसाधुरक्तेचवाससी ॥ विधूयवेणींधावंतमजानंतोऽर्जुनंतदा ३१ सैनिकाःप्राहसन्केचि
त्तथारूपमवेक्ष्यतम् ॥ तंशीघ्रमभिधावंतंसंप्रेक्ष्यकुरवोऽब्रुवन् ३२ कएषवेषसंछन्नोभस्मन्येवहुताशनः ॥ किंचिदस्ययथापुंसःकिंचिदस्ययथास्त्रियः ३३
सारूप्यमर्जुनस्येवक्लीबरूपंबिभर्तिच ॥ तदेवैतच्छिरोग्रीवंतौबाहूपरिघोपमौ ॥ तद्वदेवास्यविक्रांतंनायमन्योधनंजयात् ३४ अमरेष्विवदेवेंद्रोमानुषेषुधनं
जयः ॥ एकःकोऽस्मानुपायायादन्योलोकेधनंजयात् ३५ एकःपुत्रोविराटस्यशून्येसन्निहितःपुरे ॥ सएषकिलनिर्यातोबालभावान्नपौरुषात् ३६ सत्रेणनूनं
छन्नंहिचरंतंपार्थमर्जुनम् ॥ उत्तरःसारथिंकृत्वानिर्यातोनगराद्बहिः ३७ सनोमन्यामहेदृष्ट्वाभीतएषपलायते ॥ तंनूनमेषधावंतंजिघृक्षतिधनंजयः ३८ ॥ वैशंपा
यनउवाच ॥ इतिस्मकुरवःसर्वेविमृशंतःपृथक्पृथक् ॥ नचव्यवसितुंकिंचिदुत्तरंशक्नुवंतिते ३९ छन्नंतथातंसत्रेणपांडवंप्रेक्ष्यभारत ॥ उत्तरंतुप्रधावंतमभिद्रुत्यध
नंजयः ॥ गत्वापदशतंतूर्णंकेशपक्षेपरामृशत् ४० सोऽर्जुनेनपरामृष्टःपर्यदेवयदार्तवत् ॥ बहुलंकृपणंचैवविराटस्यसुतस्तदा ४१ ॥ उत्तरउवाच ॥ शृणुया
स्त्वंहिकल्याणिबृहन्नलेसुमध्यमे ॥ निवर्तयरथंक्षिप्रंजीवन्भद्राणिपश्यति ४२ शातकुंभस्यशुद्धस्यशतंनिष्कान्ददामिते ॥ मणीनष्टौचवैडूर्यान्हेमबद्धा
न्महाप्रभान् ४३ हेमदंडप्रतिच्छन्नंरथंयुक्तंचसुव्रतैः ॥ मत्तांश्चदशमातंगान्मुंचमांत्वंबृहन्नले ४४ ॥ वैशंपायनउवाच ॥ एवमादीनिवाक्यानिविलपंतमचेत
सम् ॥ प्रहस्यपुरुषव्याघ्रोरथस्यांतिकमानयत् ४५
नयुयुत्ससेयोद्धुंनेच्छसि २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५

४६ । ४७ । ४८ । ४९ । ५० । ५१ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ तामिति १ । २ । ३ । ४ । ५ । ६ । ७ वैशसंवैरं युद्धेकदनंवा ८ । ९ नदीजेति हेनदीजगांगेयहेभीष्म लंकेशस्यरावणस्य वनंतस्यारिर्नाशकोहनुमान् सःकेतुर्ध्वजोयस्यसः लंकेशवनारिकेतुः । नगोवृक्षस्तदाह्वयःवृक्षनामा । नामेतिवितर्के निश्चितंवाअर्जुनइत्यर्थः ।

अथैनमब्रवीत्पार्थोभयार्तंनष्टचेतसम् ॥ यदिनोत्सहसेयोद्धुंशत्रुभिःशत्रुकर्षण ॥ एहिमेत्वंहयान्यच्छयुध्यमानस्यशत्रुभिः ४६ प्रयाह्येतद्रथानीकंमद्बाहुबलरक्षितः ॥ अप्रधृष्यतमंघोरंगुप्तंवीरैर्महारथैः ४७ माभैस्त्वंराजपुत्राग्र्यक्षत्रियोऽसिपरंतप ॥ कथंपुरुषशार्दूलशत्रुमध्येविषीदसि ४८ अहंवैकुरुभिर्योत्स्येविजेष्यामिचतेपशून् ॥ प्रविश्यैतद्रथानीकमप्रधृष्यंदुरासदम् ४९ यंताभवनरश्रेष्ठयोत्स्येऽहंकुरुभिःसह ॥ एवंब्रुवाणोबीभत्सुर्वैराटिमपराजितः ॥ समाश्वास्यमुहूर्तंतमुत्तरंभरतर्षभ ५० ततएनंविचेष्टंतमकामंभयपीडितम् ॥ रथमारोपयामासपार्थःप्रहरतांवरः ५१ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेउत्तराश्वासनेअष्टत्रिंशोऽध्यायः ॥ ३८ ॥ वैशंपायनउवाच ॥ तंदृष्ट्वाक्लीबवेषेणरथस्थंनरपुंगवम् ॥ शमीमभिमुखंयांतंरथमारोप्यचोत्तरम् १ भीष्मद्रोणमुखास्तत्रकुरवोरथिसत्तमाः ॥ वित्रस्तमनसःसर्वेधनंजयकृताद्भयात् २ तानवेक्ष्यहतोत्साहानुत्पातानपिचाद्भुतान् ॥ गुरुःशस्त्रभृतांश्रेष्ठोभारद्वाजोऽभ्यभाषत ३ चंडाश्चवाताःसंवांतिरूक्षाःशर्करवर्षिणः ॥ भस्मवर्णप्रकाशेनतमसासंवृतंनभः ४ रूक्षवर्णाश्चजलदादृश्यंतेऽद्भुतदर्शनाः ॥ निःसरंतिचकोशेभ्यःशस्त्राणिविविधानिच ५ शिवाश्चविनदंत्येतादीप्तायांदिशिदारुणाः ॥ हयाश्चाश्रूणिमुंचंतिध्वजाःकंपंत्यकंपिताः ६ यादृशान्यत्ररूपाणिसंदृश्यंतेबहूनिच ॥ यत्ताभवंतस्तिष्ठंतुसाध्वसंसमुपस्थितम् ७ रक्षध्वमपिचात्मानंव्यूहध्वंवाहिनीमपि ॥ वैशसंचप्रतीक्षध्वंरक्षध्वंचापिगोधनम् ८ एषवीरोमहेष्वासःसर्वशस्त्रभृतांवरः ॥ आगतःक्लीबवेषेणपार्थोनास्त्यत्रसंशयः ९ नदीज लंकेशवनारिकेतुर्नगाह्वयो नाम नगारिसूनुः ॥ एषोंऽगनावेषधरः किरीटी जित्वाऽद्य यं नेष्यति चाद्य गा वः १० सएषपार्थोविक्रांतःसव्यसाचीपरंतपः ॥ नायुद्धेननिवर्तेतसर्वैरपिसुरासुरैः ११ क्लेशितश्चवनेशूरोवासवेनापिशिक्षितः ॥ अमर्षवशमापन्नोवासवप्रतिमोयुधि ॥ नेहास्यप्रतियोद्धारमहंपश्यामिकौरवाः १२ महादेवोऽपिपार्थेनश्रूयतेयुधितोषितः ॥ किरातवेषप्रच्छन्नोगिरौहिमवतिप्रभुः १३ ॥ कर्णउवाच ॥ सदाभवान्फाल्गुनस्यगुणैरस्मान्विकत्थसे ॥ नचार्जुनःकलापूर्णोममदुर्योधनस्यच १४ ॥ दुर्योधनउवाच ॥ यद्येषपार्थोराधेयकृतंकार्यंभवेन्मम ॥ ज्ञाताःपुनश्चरिष्यंतिद्वादशाब्दान्विशांपते १५ अथैषकश्चिदेवान्यःक्लीबवेषेणमानवः ॥ शरैरेनंसुनिशितैःपातयिष्यामिभूतले १६ ॥ वैशंपायनउवाच ॥ तस्मिन्ब्रुवतितद्वाक्यंधार्तराष्ट्रेपरंतप ॥ भीष्मोद्रोणःकृपोद्रौणिःपौरुषंतदपूजयन् १७ ॥ इतिश्रीम०वि०प० गो०प० उत्तरगोग्रहेअर्जुनप्रशंसायामेकोनचत्वारिंशोऽध्यायः ॥३९॥

'शैलवृक्षौनगावगौ'इत्यमरः । नगारिरिंद्रस्तस्यसूनुः । एषःअंगनावेषधरः । किरीटीएतन्नामा यं जित्वा वःयुष्माकंगाःधेनूःनेष्यति तंदुर्योधनंअवपालय १० । ११ । १२ । १३ कलाषोडशांऽशःपूर्णःकृत्स्नः १४ । १५ । १६ । १७ ॥ इतिविराटपर्वणि नीलकंठीये भारतभावदीपे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ ७ ॥

तामिति १ अवहरअवतारय २ बाहुविक्षेपंसोढुंनशक्ष्यंतीतिसंबंधः भूमिंजयहेउत्तर पलाशिनींबहुपत्रवतीं ३।४ । ५ तृणराजस्तालस्तत्समं ६ महामात्रंअतिप्रमाणं ७ । ८ ॥ इतिविराटपर्वणि नीलकंठीयेभारतभावदीपे चत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ ७ ॥ अस्मिन्निति १ आलब्धुंस्प्रष्टुं २ । ३ । ४ दायादंपुत्रं ५ । ६ । ७ अपहृत्यवृक्षाग्रादपआनीय ८ संनहनानि धनुर्बंधनानि ९

वैशंपायनउवाच ॥ तांशमीमुपसंगम्यपार्थोवैराटिमब्रवीत् ॥ सुकुमारंसमाज्ञायसंग्रामेनातिकोविदम् १ समादिष्टोमयाक्षिप्रंधनूंष्यवहरोत्तर ॥ नेमानिहित्वदीयानिसोढुंशक्ष्यंतिमेबलम् ॥ भारंचापिगुरुंवोढुंकुंजरंवाप्रमर्दितुम् २ ममवाबाहुविक्षेपंशत्रूनिहविजेष्यतः ॥ तस्माद्भूमिंजयारोहशमीमेतांपलाशिनीम् ३ अस्यांहिपांडुपुत्राणांधनूंषिनिहितान्युत ॥ युधिष्ठिरस्यभीमस्यबीभत्सोर्यमयोस्तथा ४ ध्वजाःशराश्चशूराणांदिव्यानिकवचानिच ॥ अत्रचैतन्महावीर्यंधनुःपार्थस्यगांडिवम् ५ एकंशतसहस्रेणसंमितंराष्ट्रवर्धनम् ॥ व्यायामसहमत्यर्थंतृणराजसमंमहत् ६ सर्वायुधमहामात्रंशत्रुसंबाधकारकम् ॥ सुवर्णविकृतंदिव्यंश्लक्ष्णमायतमव्रणम् ७ अलंभारंगुरुंवोढुंदारुणंचारुदर्शनम् ॥ तादृशान्येवसर्वाणिबलवंतिदृढानिच ॥ युधिष्ठिरस्यभीमस्यबीभत्सोर्यमयोस्तथा ८ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेअर्जुनास्त्रकथनेचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ उत्तरउवाच ॥ अस्मिन्वृक्षेकिलोद्बद्धंशरीरमितिनःश्रुतम् ॥ तदहंराजपुत्रःसन्स्पृशेयंपाणिनाकथम् १ नैवंविधंमयायुक्तमालब्धुंक्षत्रयोनिना ॥ महताराजपुत्रेणमंत्रयज्ञविदासता २ स्पृष्टवंतंशरीरंमांशववाहमिवाशुचिम् ॥ कथंवाव्यवहार्यंवैकुर्वीथास्त्वंबृहन्नले ३ ॥ बृहन्नलोवाच ॥ व्यवहार्यश्चराजेंद्रशुचिश्चैवभविष्यसि ॥ धनूंष्येतानिमाभैस्त्वंशरीरंनात्रविद्यते ४ दायादंमत्स्यराजस्यकुलेजातंमनस्विनाम् ॥ त्वांकथंनिंदितंकर्मकारयेयंनृपात्मज ५ ॥ वैशंपायनउवाच ॥ एवमुक्तःसपार्थेनरथात्प्रस्कंद्यकुंडली ॥ आरुरोहशमीवृक्षंवैराटिरवशस्तदा ६ तमन्वशासच्छत्रुघ्नोरथेतिष्ठन्धनंजयः ॥ अवरोपयवृक्षाग्राद्धनूंष्येतानिमाचिरम् ७ परिवेष्टनमेतेषांक्षिप्रंचैवव्यपानुद ॥ सोपहृत्यमहार्हाणिधनूंषिपृथुवक्षसाम् ॥ परिवेष्टनपत्राणिविमुच्यसमुपानयत् ८ तथासंनहनान्येषांपरिमुच्यसमंततः ॥ अपश्यद्गांडिवंतत्रचतुर्भिरपरैःसह ९ तेषांविमुच्यमानानांधनुषामर्कवर्चसाम् ॥ विनिश्चेरुःप्रभादिव्याग्रहाणामुदयेष्विव १० सतेषांरूपमालोक्यभोगिनामिवजृंभताम् ॥ हृष्टरोमाभयोद्विग्नःक्षणेनसमपद्यत ११ संस्पृश्यतानिचापानिभानुमंतिबृहंतिच ॥ वैराटिरर्जुनंराजन्निदंवचनमब्रवीत् १२ ॥ इ०म० वि०गो० उत्तरगोग्रहेअस्त्रारोपणेएकचत्वारिंशोऽध्यायः ॥ ४१ ॥ उत्तरउवाच ॥ बिंदवोजातरूपस्यशतंयस्मिन्निपातिताः ॥ सहस्रकोटिसौवर्णाःकस्यैतद्धनुरुत्तमम् १ वारणायत्रसौवर्णाःपृष्ठेभासंतिदंशिताः ॥ सुपार्श्वंसुग्रहंचैवकस्यैतद्धनुरुत्तमम् २ १० । ११ । १२ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ७ ॥

कस्यजातरूपस्यजातकीर्तेः । 'रूपंस्वभावेसौंदर्येनालोकपशुशब्दयोः । ग्रंथावृत्तौनाटकादावाकारश्लोकयोरपि'इतिमेदिनी । बिंदवःसौवर्णाइतिसंबंधः १ सहस्रेसहस्वत्यौबलवत्यौदीप्तिमत्यौवाकोटीप्रांतौ यस्यतत्सहस्रकोटि । 'सहोबलेज्योतिषिच'इतिमेदिनी । सहस्शब्दान्मत्वर्थीयोरप्रत्ययः १ दंशिताःभासमानाः सुग्रहं ग्रहणेऽस्मिन्निति ग्रहोमध्यं २

तपनीयस्यसुवर्णस्य इंद्रगोपकाःकीटविशेषाःरक्तपीतभास्वरवर्णाः ३ । ४ सौवर्णाःशलभाः सुवर्णःकृष्णागुरुवर्णद्रव्यं 'मीना' इतिसंज्ञितं तन्मयाः तेषुहिनीलवर्णेषुतपनीयारूपस्वर्णभूषणानि शोभंते । 'सुवर्णश्चसुवर्णाचकृष्णागुरुमखांतरे' इतिविश्वः । सुवर्णमणयःस्वर्णबिंदवः शोभनवर्णमणिखचितत्वाद्वासुवर्णमणिचित्रत्वं ५ साहस्राःसहस्रशःसंख्याताः लोमवाहिनःपत्रवंतः लोमच्छेदिनइत्यन्येउपासंगेनिषंगे ६ विपाठाःस्थूलदंडाबाणविशेषाः । 'विपाठःस्थूलदंडःस्यात्'इतिकल्पद्रुः । गार्ध्रपत्राःगृध्रपत्रवाहिनः । शिलाशिताःशिलायांतीक्ष्णीकृताः । पीताःकर्मारेण तेजनजलंपायिताः । सर्वायसाःकेवलंलोहमयाः । काष्ठदंडरहिताइत्यर्थः ७ वराहकर्णाकारैःशल्यैः व्यामिश्रान्युक्तान् धारयते शरान्चित्ररूपानेवेतिभावः ८ चंद्रबिंबार्धवद्दर्शनंयेषांअर्धचंद्राकाराइत्यर्थः ९ पूर्वैरुपरिस्थैरर्धैःउपलक्षिताः सुवाससः सुपुंखाबाणाएवउत्तरैरग्रभागैर्हेमपुंखैः सुवर्णधाराचित्रितैः १० शिलीभेकी पृष्ठेचित्ररूपेणयस्यपरिचयार्थं शिलीमुखोभेक्यामुखमि

तपनीयस्यशुद्धस्यपृष्ठेयस्येंद्रगोपकाः ॥ पृष्ठेविभक्ताःशोभंतेकस्यैतद्धनुरुत्तमम् ३ सूर्यायत्रचसौवर्णास्त्रयोभासंतिदंशिताः ॥ तेजसाप्रज्वलंतोहिकस्यैतद्धनुरुत्तमम् ४ शलभायत्रसौवर्णास्तपनीयविभूषिताः ॥ सुवर्णमणिचित्रंचकस्यैतद्धनुरुत्तमम् ५ इमेचकस्यनाराचाःसहस्रालोमवाहिनः ॥ समंतात्कलधौताग्रा उपासंगेहिरण्मये ६ विपाठाःपृथवःकस्यगार्ध्रपत्राःशिलाशिताः ॥ हारिद्रवर्णाःसुमुखाःपीताःसर्वायसाःशराः ७ कस्यायमसितश्चापःपंचशार्दूललक्षणः ॥ वराहकर्णव्यामिश्रान्शरान्धारयतेदश ८ कस्येमेपृथवोदीर्घाश्चंद्रबिंबार्धदर्शनाः ॥ शतानिसप्ततिष्ठंतिनाराचारुधिराशनाः ९ कस्येमेशुकपत्राभैःपूर्वैरर्धैःसुवाससः ॥ उत्तरैरायसैःपीतैर्हेमपुंखैःशिलाशितैः १० गुरुभारसहोदिव्यःशात्रवाणांभयंकरः ॥ कस्यायंसायकोदीर्घःशिलीपृष्ठःशिलीमुखः ११ वैयाघ्रकोशेनिहितोहेमचित्रत्सरुर्महान् ॥ सुफलश्चित्रकोशश्चकिंकिणीसायकोमहान् १२ कस्यहेमत्सरुर्दिव्यःखड्गःपरमनिर्मलः ॥ कस्यायंविमलःखड्गोगव्येकोशेसमर्पितः १३ हेमत्सरुरनाधृष्योनैषध्योभारसाधनः ॥ कस्यपांचनखेकोशेसायकोहेमविग्रहः १४ प्रमाणरूपसंपन्नःपीतआकाशसन्निभः ॥ कस्यहेममयेकोशेसुततेपावकप्रभे १५ निस्त्रिंशोऽयंगुरुःपीतःसायकःपरनिर्व्रणः ॥ कस्यायमसितःखड्गोहेमबिंदुभिरावृतः १६ आशीविषसमस्पर्शःपरकायप्रभेदनः ॥ गुरुभारसहोदिव्यःसपत्नानांभयप्रदः १७ निर्दिशस्वयथातत्त्वंमयापृष्टाबृहन्नले ॥ विस्मयोमेपरोजातोदृष्ट्वासर्वमिदंमहत् ॥ १८ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणि उत्तरवाक्यंनामद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ ध ॥ ॥ बृहन्नलोवाच ॥ यन्मांपूर्वमिहापृच्छःशत्रुसेनापहारिणम् ॥ गांडीवमेतत्पार्थस्यलोकेपुविदितंधनुः १ सर्वायुधमहामात्रंशातकुंभपरिष्कृतम् ॥ एतत्तदर्जुनस्यासीद्गांडीवंपरमायुधम् २

वमुखंयस्य सायकःखड्गः । 'शरेखड्गेचसायकः'इत्यमरः ११ वैयाघ्रकोशेव्याघ्रचर्मकोशे । 'त्सरुःखड्गादिमुष्टौस्यात्'इत्यमरः । सुफलःशोभनमल्लिकः । 'फलंशस्त्राग्रेव्युष्टिलाभयोः' इतिविश्वः । किंकिणीयुक्तः सायकः १२ गव्येगोचर्मजे १३ नैषध्योनिषधदेशजः पांचनखेअजचर्मजे । 'पंचनखोऽजेकूर्मे'इति विश्वः । हेमविग्रहःसुवर्णेनालंकृतदेहः १४ आकाशसन्निभःकृष्णभास्वरः १५ निस्त्रिंशःत्रिंशतोंऽगुलिभ्योनिर्गतः त्रिंशदंगुलाधिकःसायकःखड्गः । परेषांशस्त्रेणनिर्गतोव्रणोयस्य परानभिभूतः । शिक्यइतिपाठे पुरुषद्वयेनोह्यमाना सांगीतिप्रसिद्धातद्योग्यः १६ । १७ । १८ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ अपहरतीत्यपहारीकालः सोऽस्त्यस्मिन्नित्यपहारिणं । पामादित्वान्मत्वर्थीयोनप्रत्ययः कालरूपीत्यर्थः १ २ ॥१०॥

धनुर्धाशतसहस्रेणलक्षेणसंमितं ३ । ४ । ५ त्रीणिवर्षाणिपंचशतंवर्षाणि प्रजापतिरधारयदितिसंबंधः । अत्रब्रह्मादीनांवर्षाणिदेवमानेनैवज्ञेयानि योह्यस्माकंसौरःसंवत्सरः सतेषामेकंदिनमितिशास्त्रप्रसिद्धं । पार्थःपंचचषष्टिंचेत्यत्रतुवर्षशब्दोवृष्टिपरः । तथाचसंवत्सरे वर्षद्वयंजायते । 'तथाहिएकेनवर्षेणनृपःशरदिव्रीह्याग्रयणंकरोति अपरेणनृपोवसंतेयवाग्रयणंकरोति' । तथाचाग्रयणंप्रकृत्य आश्वलायनःश्रुतिमुदाहरति । 'अपिहिदेवाआहुस्तृप्तोनूनं वर्षस्याग्रयणेनहियजते' इति । तथान्यत्रापितदेवप्रकृत्यश्रुतं ' व्रीहिभिरिष्ट्वाव्रीहिभिरेवयजेताथ यवेभ्योयवैरिष्ट्वायवैरेवयजेतव्रीहिभ्यः' इति । एवंचैकस्मिन्संवत्सरे कर्कायनाद्येकंवर्षमपरंमकरायनादीतिद्वेवर्षे ततश्चसार्द्धद्वात्रिंशतासंवत्सरैःपंचषष्टिर्वर्षाणिभवंतीतियुक्तमुक्तं पार्थःपंचचषष्टिंचवर्षाणिएतद्धनुर्दधारेति । अन्येतुअतीतमनागतंचकालमेकीकृत्य पंचषष्टिसंवत्सरंधनुर्द्धारणंवर्णयंति । 'वर्षोऽस्त्रीभारतादौतुजंबूद्वीपाब्दवृष्टिषु'इतिमेदिनी । 'वृष्टिर्वर्ष'इत्यमरश्च । तत्र

यत्तच्छतसहस्रेणसंमितंराष्ट्रवर्द्धनम् ॥ येनदेवान्मनुष्यांश्चपार्थोविजयतेमृधे ३ चित्रमुच्चावचैर्वर्णैःश्लक्ष्णमायतमव्रणम् ॥ देवदानवगंधर्वैःपूजितंशाश्वतीःसमाः ४ एतद्वर्षसहस्रंतुब्रह्मापूर्वमधारयत् ॥ ततोऽनंतरमेवाथप्रजापतिरधारयत् ५ त्रीणिपंचशतंचैवशक्रोऽशीतिचपंचच ॥ सोमःपंचशतंराजातथैववरुणःशतम् ॥ पार्थःपंचचषष्टिंचवर्षाणिश्वेतवाहनः ६ महावीर्यंमहादिव्यमेतत्तद्धनुरुत्तमम् ॥ एतत्पार्थमनुप्राप्तंवरुणाच्चारुदर्शनम् ७ पूजितंसुरमर्त्येषुबिभर्तिपरमंवपुः ॥ सुपार्श्वंभीमसेनस्यजातरूपग्रहंधनुः ॥ येनपार्थोऽजयत्कृत्स्नांदिशंप्राचींपरंतपः ८ इंद्रगोपकचित्रंचयदेतच्चारुदर्शनम् ॥ राज्ञोयुधिष्ठिरस्यैतद्वैराटेधनुरुत्तमम् ९ सूर्यायस्मिंस्तुसौवर्णाःप्रकाशंतेप्रकाशिनः ॥ तेजसाप्रज्वलंतोवैनकुलस्यैतदायुधम् १० शलभायत्रसौवर्णास्तपनीयविचित्रिताः ॥ एतन्माद्रीसुतस्यापिसहदेवस्यकार्मुकम् ११ येत्विमेक्षुरसंकाशाःसहस्रालोमवाहिनः ॥ एतेऽर्जुनस्यवैराटेशराःसर्पविषोपमाः १२ एतेज्वलंतःसंग्रामेतेजसाशीघ्रगामिनः ॥ भवंतिवीरस्याक्षय्याव्यूहतःसमरेरिपून् १३ येचेमेपृथवोदीर्घाश्चंद्रबिंबार्धदर्शनाः ॥ एतेभीमस्यनिशिताारिपुक्षयकराःशराः १४ हारिद्रवर्णायेत्वेतेहेमपुंखाःशिलाशिताः ॥ नकुलस्यकलापोऽयंपंचशार्दूललक्षणः १५ येनासौव्यजयत्कृत्स्नांप्रतीचींदिशमाहवे ॥ कलापोह्येषतस्यासीन्माद्रीपुत्रस्यधीमतः १६ येत्विमेभास्कराकाराःसर्वपारसवाःशराः ॥ एतेचित्रक्रियोपेताःसहदेवस्यधीमतः १७ येत्विमेनिशिताःपीताःपृथवोदीर्घवाससः ॥ हेमपुंखास्त्रिपर्वाणोराज्ञएतेमहाशराः १८ यस्त्वयंसायकोदीर्घःशिलीपृष्ठःशिलीमुखः ॥ अर्जुनस्यैषसंग्रामेगुरुभारसहोदृढः १९ वैयाघ्रकोशःसुमहान्भीमसेनस्यसायकः ॥
९६ गुरुभारसहोदिव्यःशात्रवाणांभयंकरः २० सुफलश्चित्रकोशश्चहेमत्सरुरनुत्तमः ॥ निस्त्रिंशःकौरवस्यैषधर्मराजस्यधीमतः २१

प्राचामतेऽधारयदितिभूतकालानुपपत्तिः । वक्तुःकदाचिदायुर्ज्ञानकल्पनेऽपि प्रतिपत्तुःपारोक्ष्येणार्जुनवयोविदोऽप्रतिपत्तिश्चेतिविचारणीयं । अस्माकंतुगांडीवलाभानंतरंवर्षेषु सार्द्धद्वात्रिंशद्वर्षेषु त्रयोदशवर्षाणिवनवासे । ब्राह्मणकार्यार्थमायुधागारंप्रविष्टस्यार्जुनस्य द्रौपदीधर्मराजयोःसहासनकालेऽनुप्रवेशनिमित्ते द्वादशवर्षाणि इतिपंचविंशतिर्गतानि । अन्यान्यपिदिग्विजयराजसूयराज्यकरणादिकाले प्रागेवसार्द्धसप्तवर्षाणिगतानीतिसमुन्नेयं ६ । ७ । ८ । ९ । १० । ११ सहस्राःतेजस्विनोदृढाः सहस्रशःसंमितावा १२ व्यूहतःक्षिपतः १३ । १४ । १५ १६ सर्वपारसवाः सर्वंचतत्पारं परसमूहं सुवतेहिंसंतितेसर्वपारसवाः सर्वशत्रुसमूहनाशकराः १७ । १८ । १९ । २० । २१

चित्रयोधने विचित्रयुद्धनिमित्तं निहितःपालितः २२ । २३ ॥ इतिश्रीमहाभारतेविराटपर्वणि नीलकंठीयेभारतभावदीपे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ सुवर्णेति १ । २ पराकीर्यंअपास्य ३ । ४ । ५ । ६ । ७ । ८ नररूपस्यममहाविष्णोर्नामानि संकटेस्मर्यमाणानि विजयावहानीत्यभिप्रेत्याह एकाग्रेति ९ । १० । ११ । १२ । १३ । १४ । १५ नक्षत्राभ्यांताराभ्यां

यस्तुपांचनखेकोशेनिहिताश्चित्रयोधने ॥ नकुलस्यैषनिस्त्रिंशोगुरुभारसहोदृढः २२ यस्त्वयंविपुलःखड्गोगव्येकोशेसमर्पितः ॥ सहदेवस्यविद्ध्येनंसर्वभारसहंदृढम् २३ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेआयुधवर्णनंनामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ७ ॥ ॥ उत्तरउवाच ॥ सुवर्णविकृतानीमान्यायुधानिमहात्मनः ॥ रुचिराणिप्रकाशंतेपार्थानामाशुकारिणाम् १ क्वनुस्विदर्जुनःपार्थःकौरव्योवायुधिष्ठिरः ॥ नकुलःसहदेवश्चभीमसेनश्चपांडवः २ सर्वएवमहात्मानःसर्वामित्रविनाशनाः ॥ राज्यमक्षैःपराकीर्यनश्रूयंतेकथंचन ३ द्रौपदीक्वचपांचालीस्त्रीरत्नमितिविश्रुता ॥ जितानक्षैस्तदाकृष्णातानेवान्वगमद्वनम् ४ ॥ अर्जुनउवाच ॥ अहमस्म्यर्जुनःपार्थःसभास्तारोयुधिष्ठिरः ॥ बल्लवोभीमसेनस्तुपितुस्तेरसपाचकः ५ अश्वबंधोऽथनकुलःसहदेवस्तुगोकुले ॥ सैरंध्रींद्रौपदींविद्धियत्कृतेकीचकाहताः ६ ॥ उत्तरउवाच ॥ दशपार्थस्यनामानियानिपूर्वंश्रुतानिमे ॥ प्रब्रूयास्तानियदिमेश्रद्दध्यांसर्वमेवते ७ अर्जुनउवाच ॥ हंततेऽहंसमाचक्षेदशनामानियानिमे ॥ वैराटेशृणुतानित्वंयानिपूर्वंश्रुतानिते ८ एकाग्रमनसोभूत्वाशृणुसर्वंसमाहितः ॥ अर्जुनःफाल्गुनोजिष्णुःकिरीटीश्वेतवाहनः ॥ बीभत्सुर्विजयःकृष्णःसव्यसाचीधनंजयः ९ ॥ उत्तरउवाच ॥ केनासिविजयोनामकेनासिश्वेतवाहनः ॥ किरीटीनामकेनासिसव्यसाचीकथंभवान् १० ॥ अर्जुनःफाल्गुनोजिष्णुःकृष्णोबीभत्सुरेवच ॥ धनंजयश्चकेनासिब्रूहितन्ममतत्त्वतः ११ श्रुतामेतस्यवीरस्यकेवलानामहेतवः ॥ तत्सर्वंयदिमेब्रूयाःश्रद्दध्यांसर्वमेवते १२ ॥ अर्जुनउवाच ॥ सर्वाञ्जनपदाञ्जित्वावित्तमादायकेवलम् ॥ मध्येधनस्यतिष्ठामितेनाहुर्मांधनंजयम् १३ अभिप्रयामिसंग्रामेयदहंयुद्धदुर्मदान् ॥ नाजित्वाविनिवर्तामितेनमांविजयंविदुः १४ श्वेताःकांचनसन्नाहारथेयुज्यंतिमेहयाः ॥ संग्रामेयुद्ध्यमानस्यतेनाहंश्वेतवाहनः १५ उत्तराभ्यांफल्गुनीभ्यांनक्षत्राभ्यामहंदिवा ॥ जातोहिमवतःपृष्ठेतेनमांफाल्गुनंविदुः १६ पुराशक्रेणमेदत्तंयुध्यतोदानवर्षभैः ॥ किरीटंमूर्ध्निसूर्याभंतेनाहुर्मांकिरीटिनम् १७ नकुर्यांकर्मबीभत्संयुध्यमानःकथंचन ॥ तेनदेवमनुष्येषुबीभत्सुरितिविश्रुतः १८ उभौमेदक्षिणौपाणीगांडीवस्यविकर्षणे ॥ तेनदेवमनुष्येषुसव्यसाचीतिमांविदुः १९ पृथिव्यांचतुरंतायांवर्णोमेदुर्लभःसमः ॥ करोमिकर्मशुक्लंचतस्मान्मामर्जुनंविदुः २० अहंदुरापोदुर्धर्षोदमनःपाकशासनिः ॥ तेनदेवमनुष्येषुजिष्णुर्नामास्मिविश्रुतः २१

तत्रस्थितेचंद्रेइत्यर्थः उत्तराभ्यांचपूर्वाभ्यामितिपाठे नक्षत्रसंघावित्यर्थः १६ । १७ बीभत्सुरिति भद्रकल्याणेसुखेचेत्यस्यसानिरूपं १८ विकर्षणेशक्तावितिशेषः सव्येनवामेनापिहस्तेनसचितुंज्याकर्षणादिक्रियायांसंबंद्धुंशीलमस्येतिसव्यसाचीत्यर्थः १९ अर्जुनइति ऋजगतिस्थानार्जनोपार्जनेष्वित्यतउनन्प्रत्ययेभवति वर्णोदीप्तिःसमऋजुः दीप्तिमत्त्वात्समत्वाच्छुद्धकर्मकरत्वाच्चार्जुनइत्यर्थः २० जिष्णुर्जयशीलः २१

कृष्णावदातस्यकृष्णभास्वरवर्णस्य कर्षतिचित्तमितिमनोहरत्वाद्वाकृष्णइत्याह प्रियत्वादिति २२ । २३ नागराजऐरावतस्तस्यैवकरोपमा हस्तयोःसादृश्यंयस्य हस्तिहस्तोपमकरेत्यर्थः २४ कर्मदिग्विजयादि २५ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ आस्थायेति १ नुदामिदूरीकरोमि २ भैरवंभयानकंमहत्कर्मकुर्वाणम् ३ उपासंगान्तूणीरान् ४ गृह्यगृहीत्वा शीघ्रेणवेगेन ततःशमीतोऽवातरत् । इतरेषामायुधानितत्रनिधायेतिशेषः ५ अवजेष्यामिहेलयाजेष्यामि ६ त्वंतुमयंत्यजेत्याह संकल्पेतित्रिभिः इदंमयागुप्तंरक्षितंरथोपस्थं रथोपरिभागस्तेतवनगरंनगरवद्रक्षकंभविष्यति तत्रत्यांगेपुनगरांगसंपत्तिमाह संकल्पपक्षविक्षेपमिति संकल्पःसम्यक्कल्पनंचक्राक्षध्वजकूबरयुगादीनामंगानांद्वा

कृष्णइत्येवदशमंनामचक्रेपितामम ॥ कृष्णावदातस्यततःप्रियत्वाद्बालकस्यवै २२ ॥ वैशंपायनउवाच ॥ ततःसपार्थंवैराटिरभ्यवादयदंतिकात् ॥ अहंभूमिंजयोनामनाम्नाहमपिचोत्तरः २३ दिष्ट्यात्वांपार्थपश्यामिस्वागतंतेधनंजय ॥ लोहिताक्षमहाबाहोनागराजकरोपम २४ यदज्ञानादवोचंत्वांक्षंतुमर्हसितन्मम ॥ यतस्त्वयाकृतंपूर्वंचित्रंकर्मसुदुष्करम् ॥ अतोभयंव्यतीतंमेप्रीतिश्चपरमात्वयि २५ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेअर्जुनपरिचयेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ ७ ॥ ॥ उत्तरउवाच ॥ आस्थायरुचिरंवीररथंसारथिनामया ॥ कतमंयास्यसेऽनीकमुक्तोयास्याम्यहंत्वया १ ॥ अर्जुनउवाच ॥ प्रीतोऽस्मिपुरुषव्याघ्रनभयंविद्यतेतव ॥ सर्वान्नुदामितेशत्रून्रणेरणविशारद २ स्वस्थोभवमहाबाहोपश्यमांशत्रुभिःसह ॥ युध्यमानंविमर्देऽस्मिन्कुर्वाणंभैरवंमहत् ३ एतान्सर्वानुपासंगान्क्षिप्रंबध्नीहिमेरथे ॥ एकंचाहरनिस्त्रिंशंजातरूपपरिष्कृतम् ४ ॥ वैशंपायनउवाच ॥ अर्जुनस्यवचःश्रुत्वात्वरावानुत्तरस्तदा ॥ अर्जुनस्यायुधान्गृह्यशीघ्रेणावातरत्ततः ५ ॥ अर्जुनउवाच ॥ अहंवैकुरुभिर्योत्स्याम्यवजेष्यामितेपशून् ६ संकल्पपक्षविक्षेपंबाहुप्राकारतोरणम् ॥ त्रिदंडतूणसंबाधमनेकध्वजसंकुलम् ७ ज्याक्षेपणंक्रोधकृतंनेमीनिनददुंदुभिः ॥ नगरंतेमयागुप्तंरथोपस्थंभविष्यति ८ अधिष्ठितोमयासंख्येरथोगांडीवधन्वना ॥ अजेयःशत्रुसैन्यानांवैराटेव्येतुतेभयम् ९ ॥ उत्तरउवाच ॥ बिभेमिनाहमेतेषांजानामित्वांस्थिरंयुधि ॥ केशवेनापिसंग्रामेसाक्षादिंद्रेणवासमम् १० इदंतुचिंतयन्नेवंपरिमुह्यामिकेवलम् ॥ निश्चयंचापिदुर्मेधानगच्छामिकथंचन ११ एवंयुक्तांगरूपस्यलक्षणैःसूचितस्यच ॥ केनकर्मविपाकेनक्लीबत्वमिदमागतम् १२ मन्येत्वांक्लीबवेषेणचरंतंशूलपाणिनम् ॥ गंधर्वराजप्रतिमंदेवंवाऽपिशतक्रतुम् १३

र्थ्यंनसमर्थनं तदेवपक्षयोर्वीथीनांपार्श्वयोर्विक्षेपोविस्तारोयस्मिन् । बाहूएवस्वीयौबाहुतुल्यत्वाद्वांधवाएववाप्राकारः पुरपरिधिभित्तिस्तस्मिंस्तोरणंपुरद्वारंयस्मिन् रथिसारथ्योरविरथांगत्वविवक्षयाएतदुक्तं । त्रिदंडः ईषातदुभयपार्श्वेदारुणीचेतिमिलित्वात्रिदंडउच्यते सचतूणोनिषंगश्चताभ्यांसंबाधंसंकटंदुष्प्रवेशं । पक्षेत्रिदंडसैन्यत्रयं रथिनांहस्तिसादिनांहयसादिनांचेतित्रीणिसैन्यानि तेषांतूणोपलक्षितानिआयुधानितैःसंबाधं । अनेकध्वजसंकुलंबहुध्वजव्याप्तं अनेकेनअनन्येनध्वजेनवानरेण संकुलंभयंकरं । 'एकेमुख्यान्यकेवलाः' इतिनानार्थः ७ ज्याधनुर्मौर्वीसैवक्षेपणानिगोलासनानि नालिकाख्यानियस्मिन् । क्रोधेनपराजिघांसाहेतुनाचित्तवृत्तिविशेषेणनिमित्तभूतेन कृतंपरिष्कृतंद्वयमपि ८ फलितमाह अधिष्ठितइति ९ केशवेनइंद्रेणवा समंसार्धं संग्रामेत्वांस्थिरंजानामि १० । ११ युक्तांगरूपस्य युक्तानिसमीचीनान्यंगानियुद्धांगानि शस्त्रास्त्रनैपुणादीनि रूपमाकृतिश्चयस्य लक्षणैःचक्रध्वजादिभिः १२ । १३

१४ परवान्नाथवान् उत्तीर्णमापद्भयइतिशेषः १९ । १६ । १७ शत्रुरथारुजानशत्रुरथभंजकान् मूलविभुजादित्वात्कः तीर्थतोगुरुतः १८ । १९ यातेगमने पदंपदंसर्वमपिपदं भू
मौक्षिप्तं ततउद्गृहीतंवा नपश्यंतिवेगवत्त्वात् सुग्रीवमेघपुष्पशैब्यबलाहकाममवतोऽश्वास्तत्साम्यमेषांवाहानामुक्तम् २० । २१ पार्ष्णिपुरःस्थितयोरश्वयोःपृष्ठभागं पाश्चात्यंयुगमितियावत् ।

॥ अर्जुनउवाच ॥ भ्रातुर्नियोगाज्ज्येष्ठस्यसंवत्सरमिदंव्रतम् ॥ चरामिव्रतचर्यंचसत्यमेतद्ब्रवीमिते १४ नास्मिक्लीबोमहाबाहोपरवान्धर्मसंयुतः ॥ समाप्तव्रत
मुत्तीर्णंविद्धिमांत्वंनृपात्मज १५ ॥ उत्तरउवाच ॥ परमोऽनुग्रहोमेऽद्ययतस्तर्कोनमेवृथा ॥ नहीदृशाःक्लीबरूपाभवंतितुनरोत्तम १६ सहायवानस्मिरणेयुध्ये
यममरैरपि ॥ साध्वसंहिप्रनष्टंमेकिंकरोमिब्रवीहिमे १७ अहंतेसंग्रहीष्यामिहयान्शत्रुरथारुजान् ॥ शिक्षितोह्यस्मिसारथ्येतीर्थतःपुरुषर्षभ १८ दारुकोवासुदे
वस्ययथाशक्रस्यमातलिः ॥ तथामांविद्धिसारथ्येशिक्षितंनरपुंगव १९ यस्ययातेनपश्यंतिभूमौक्षिप्तंपदंपदम् ॥ दक्षिणांयोधुरंयुक्तःसुग्रीवसदृशोहयः २०
योऽयंधुरंधुर्यवरोवामांवहतिशोभनः ॥ तंमन्येमेघपुष्पस्यजवेनसदृशंहयम् २१ योऽयंकांचनसंनाहःपार्ष्णिवहतिशोभनः ॥ समंशैब्यस्यतंमन्येजवेनबलवत्त
रम् २२ योऽयंवहतिमेपार्ष्णिंदक्षिणामभितःस्थितः ॥ बलाहकादपिमतःसजवेवीर्यवत्तरः २३ त्वामेवायंरथोवोढुंसंग्रामेऽर्हतिधन्विनम् ॥ त्वंचेमंरथमास्थाय
योद्धुमर्होमतोमम २४ ॥ वैशंपायनउवाच ॥ ततोविमुच्यबाहुभ्यांवलयानिसवीर्यवान् ॥ चित्रेकांचनसन्नाहेप्रत्यमुंचत्तदातले २५ कृष्णान्भंगिमतःकेशान्
श्वेतेनोद्ग्रथ्यवाससा ॥ अथासौप्राङ्मुखोभूत्वाशुचिःप्रयतमानसः ॥ अभिदध्यौमहाबाहुःसर्वास्त्राणिरथोत्तमे २६ ऊचुश्चपार्थंसर्वाणिप्रांजलीनिनृपात्मजम् ॥
इमेस्मपरमोदाराःकिंकराःपांडुनंदन २७ प्रणिपत्यततःपार्थःसमालभ्यचपाणिना ॥ सर्वाणिमानसानीहभवतेत्यभ्यभाषत २८ प्रतिगृह्यततोऽस्त्राणिप्रहृष्टव
दनोऽभवत् ॥ अधिज्यंतरसाकृत्वागांडीवंव्याक्षिपद्धनुः २९ तस्यविक्षिप्यमाणस्यधनुषोऽभून्महाध्वनिः ॥ यथाशैलस्यमहतःशैलेनैवावजघ्नतः ३० सनि
र्घातोऽभवद्भूमिर्दिक्षुवायुर्ववौभृशम् ॥ पपातमहतीचोल्कादिशोनप्रचकाशिरे ॥ भ्रांतध्वजंखंतदासीत्प्रकंपितमहाद्रुमम् ३१ तंशब्दंकुरवोऽजानन्विस्फो
टमशनेरिव ॥ यदर्जुनोधनुःश्रेष्ठंबाहुभ्यामाक्षिपद्रथे ३२ ॥ उत्तरउवाच ॥ एकस्त्वंपांडवश्रेष्ठबहूनेतान्महारथान् ॥ कथंजेष्यसिसंग्रामेसर्वशस्त्रास्त्रपारगान्
३३ असहायोऽसिकौंतेयससहायाश्चकौरवाः ॥ अतएवमहाबाहोभीतस्तिष्ठामितेऽग्रतः ३४ उवाचपार्थोमाभैषीःप्रहस्यस्वनवत्तदा ३५

'पार्ष्णिःस्यादुन्मदास्त्रियां । स्त्रियांद्वयोः सैन्यपृष्ठे'इतिमेदिनी २२ । २३ । २४ पर्यमुंचत्तदाशुभेइतिपाठेतु कुंडलेइतिशेषः २५ भंगिमतःकौटिल्यवतः अभिदध्यौस्मृतवान् २६ । २७ मानसा
निप्रयोजनकालेस्मृतिगोचराणि २८ प्रतिगृह्य अनुकूलानिकृत्वा व्याक्षिपत्टणत्कारितवान् २९ अवजघ्नतःअवहन्यमानस्य अभिनिघ्नतइतिपाठांतरम् ३० भूमित्भूविदारकः प्रचकाशिरे
प्रकाशवत्योऽभूवन् भ्रांताइतश्चलिताध्वजायस्मिन् एतेनपरसैन्यवाहेषुशब्दजात्रासादुत्पथगामित्वंव्यज्यते प्रकंपितमहाद्रुममित्यनेनभूमिकंपोव्यज्यते ३१ । ३२ । ३३ । ३४ । ३५

३६ । ३७ । ३८ । ३९ । ४० । ४१ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपे पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ७ ॥ उत्तरमिति १ सिंहंसिंहाकारं २ दैवीमायामित्यत्रतत्वंध्वजस्य
दर्शितं । मायामयइवध्वजोऽद्भुतइत्यर्थः । विश्वकर्मणाब्रह्मणाभौमनेनवा । काचनंकांचनवर्णं । सिंहंहिस्त्रंलांगूलं यस्यपुच्छविक्षेपणेनैवबहून्हस्त्यादीन्पोथयंतमित्यर्थः वानरलक्षणंवानरस्व

युध्यमानस्यमेवीरगंधर्वैःसुमहाबलैः ॥ सहायोघोषयात्रायांकस्तदाऽऽसीत्सखामम ३६ तथाप्रतिभयेतस्मिन्देवदानवसंकुले ॥ खांडवेयुध्यमानस्यकस्त
दासीत्सखामम ३७ निवातकवचैःसार्धंपौलोमैश्चमहाबलैः ॥ युध्यतोदेवराजार्थेकःसहायस्तदाऽभवत् ३८ स्वयंवरेतुपांचाल्याराजभिःसहसंयुगे ॥ युध्यतो
बहुभिस्तातकःसहायस्तदाऽभवत् ३९ उपजीव्यगुरुंद्रोणंशक्रंवैश्रवणंयमम् ॥ वरुणंपावकंचैवकृपंकृष्णंचमाधवम् ४० पिनाकपाणिनंचैवकथमेतान्नयोधये ॥
रथंवाहयमेशीघ्रंव्येतुतेमानसोज्वरः ४१ ॥ इतिश्रीमहाभारतेविरा॰गोहरणप॰उत्तरगोग्रहेउत्तरार्जुनयोर्वाक्यंनामपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ ७ ॥
वैशंपायनउवाच ॥ उत्तरंसारथिंकृत्वाशमींकृत्वाप्रदक्षिणम् ॥ आयुधंसर्वमादायप्रययौपांडवर्षभः १ ध्वजंसिंहंरथात्तस्मादपनीयमहारथः ॥ प्रणिधायशमीमू
लेप्रायादुत्तरसारथिः २ दैवींमायांरथेयुक्तांविहितांविश्वकर्मणा ॥ कांचनंसिंहलांगूलंध्वजंवानरलक्षणम् ३ मनसाचिंतयामासप्रसादंपावकस्यच ॥ सचतच्चिं
तितंज्ञात्वाध्वजेभूतान्यदेशयत् ४ सपताकंविचित्रांगंसोपासंगंमहाबलम् ॥ खात्पपातरथेतूर्णंदिव्यरूपंमनोरमम् ५ रथंतमागतंदृष्ट्वादक्षिणंप्राकरोत्तदा ॥
रथमास्थायबीभत्सुःकौंतेयःश्वेतवाहनः ६ बद्धगोधांगुलित्राणःप्रगृहीतशरासनः ॥ ततःप्रायादुदीचींचकपिप्रवरकेतनः ७ स्वनवंतंमहाशंखंबलवानरिमर्दनः ॥
प्राधमद्बलमास्थायद्विषतांलोमहर्षणम् ८ ततस्तेजवनाधुर्याजानुभ्यामगमन्महीम् ॥ उत्तरश्चापिसंत्रस्तोरथोपस्थउपाविशत् ९ संस्थाप्यचाश्वान्कौंतेयः
समुद्यम्यचरश्मिभिः ॥ उत्तरंचपरिष्वज्यसमाश्वासयदर्जुनः १० ॥ अर्जुनउवाच ॥ माभैस्त्वंराजपुत्राग्र्यक्षत्रियोऽसिपरंतप ॥ कथंतुपुरुषव्याघ्रशत्रुमध्ये
विषीदसि ११ श्रुतास्तेशंखशब्दाश्चभेरीशब्दाश्चपुष्कलाः ॥ कुंजराणांचनदतांव्यूढानीकेषुतिष्ठताम् १२ सत्वंकथमिहानेनशंखशब्देनभीषितः ॥ विव
र्णरूपोवित्रस्तःपुरुषःप्राकृतोयथा १३ ॥ उत्तरउवाच ॥ श्रुतामेशंखशब्दाश्चभेरीशब्दाश्चपुष्कलाः ॥ कुंजराणांनिनदतांव्यूढानीकेषुतिष्ठताम् १४ नैवंवि
धःशंखशब्दःपुराजातुमयाश्रुतः ॥ ध्वजस्यचापिरूपंमेदृष्टपूर्वंनहीदृशम् १५ धनुषश्चैवनिर्घोषःश्रुतपूर्वोनमेक्वचित् ॥ अस्यशंखस्यशब्देनधनुषोनिःस्वनेन
च १६ अमानुषाणांशब्देनभूतानांध्वजवासिनाम् ॥ रथस्यचनिनादेनमनोमुह्यतिमेभृशम् १७ व्याकुलाश्चदिशःसर्वाहृदयंव्यथतीवमे ॥ ध्वजेनपिहिताः
सर्वादिशोनप्रतिभांतिमे १८ गांडीवस्यचशब्देनकर्णौमेबधिरीकृतौ ॥ समुहूर्तंप्रयातंतुपार्थोवैराटिमब्रवीत् १९ ॥ अर्जुनउवाच ॥ एकांतंरथमास्थायपद्भ्यां
त्वमपीडयन् ॥ दृढंचरश्मीन्संयच्छशंखंध्मास्याम्यहंपुनः २० रूपं ३ प्रसादंप्रसादप्राप्तं संपादकः । तच्चिंतितंअर्जुनचिंतितं । अदेशयत्अयोजयत् ४ । ५ । ६ । ७ । ८
तेजवनाःप्रसिद्धाः वेगवंतोऽश्विदत्तरथस्याः ९ संस्थाप्यथावत्कृत्वा १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ एकांतंसुदृढं सप्तम्यंतपाठस्तुलेखकप्रमादः रथंसुदृढंअवलंब्येत्यर्थः २०

२१ । २२ । २३ । २४ । २५ । २६ । २७ अनाहतःअक्षतोधावति २८ । २९ ज्योतींषि सूर्यचन्द्रर्क्षाणमनांसि ३० । ३१ । ३२ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ७ ॥ अथेति १ आचार्यौद्रोणंकृपंचप्रतिमयाऽयमर्थउक्तः । पाठांतरेऽयमाचार्योऽस्मिन्नर्थेविषये मयाकर्णेनचोक्तइतियोजना २।३।४।५ हीनेति नजातमधिकंवाऽज्ञातवासकालं ज्ञातुमर्हति ६ तत्रऊनपक्षेइष्टमेवासिद्धं अधिकपक्षेऽपिदोषमाह अर्थानामिति द्वैधेद्विप्रकारत्वेसंशयोभवति अर्थानांप्रयोजनानां अयंभावः । यदितेनिस्तीर्णप्रतिज्ञास्तर्हितेषां स्वां

॥ वैशंपायनउवाच ॥ ततःशंखमुपाध्मासीद्दारयन्निवपर्वतान् ॥ गुहागिरीणांचतदादिशःशैलांस्तथैवच ॥ उत्तरश्चापिसंलीनोरथोपस्थउपाविशत् २१ तस्य शंखस्यशब्देनरथनेमिस्वनेनच ॥ गांडीवस्यचघोषेणपृथिवीसमकंपत २२ तंसमाश्वासयामासपुनरेवधनंजयः २३ ॥ द्रोणउवाच ॥ यथारथस्यनिर्घोषो यथामेघउदीर्यते ॥ कंपतेचयथाभूमिर्नैषोऽन्यःसव्यसाचिनः २४ शस्त्राणिनप्रकाशंतेनप्रहृष्यंतिवाजिनः ॥ अग्नयश्चनभासंतेसमिद्धास्तन्नशोभनम् २५ प्रत्यादित्यंचनःसर्वेमृगाघोरप्रवादिनः ॥ ध्वजेषुचनिलीयंतेवायसास्तन्नशोभनम् २६ शकुनाश्चापसव्यानोवेदयंतिमहद्भयम् २७ गोमायुरेषसेनायारुदन्मध्ये नधावति ॥ अनाहतश्चनिष्क्रांतोमहद्वेदयतेभयम् २८ भवतांरोमकूपाणिप्रहृष्टान्युपलक्षये ॥ ध्रुवंविनाशोयुद्धेनक्षत्रियाणांप्रदृश्यते २९ ज्योतींषिनप्रकाशंतेदारुणामृगपक्षिणः ॥ उत्पाताविविधाघोरादृश्यंतेक्षत्रनाशनाः ३० विशेषतइहास्माकंनिमित्तानिविनाशने ॥ उल्काभिश्चप्रदीप्ताभिर्बाध्यतेपृतनातव ॥ वाहनान्यप्रहृष्टानिरुदंतीवविशांपते ३१ उपासतेचसैन्यानिगृध्रास्तवसमंततः ॥ तप्स्यसेवाहिनींदृष्ट्वापार्थबाणप्रपीडिताम् ॥ पराभूताचवःसेनानकश्चिद्योद्धुमिच्छति ३२ विवर्णमुखभूयिष्ठाःसर्वेयोधाविचेतसः ॥ गाःसंप्रस्थाप्यतिष्ठामोव्यूढानीकाःप्रहारिणः ३३ ॥ इति०म०विरा०गो०उत्तरगोग्रहेऔत्पातिकोनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ वैशंपायनउवाच ॥ अथदुर्योधनोराजासमरेभीष्ममब्रवीत् ॥ द्रोणंचरथशार्दूलंकृपंचसुमहारथम् १ उक्तोऽयमर्थआचार्यौमयाकर्णेनचासकृत् ॥ पुनरेवप्रवक्ष्यामिनहितृप्यामितंब्रुवन् २ पराभूतैर्हिवस्तव्यंतैश्चद्वादशवत्सरान् ॥ वनेजनपदेज्ञातैरेषएवपणोहिनः ३ तेषांनतावन्निर्वृत्तंवर्ततेतुत्रयोदशम् ॥ अज्ञातवासोबीभत्सुरथास्माभिःसमागतः ४ अनिवृत्तेतुनिर्वासेयदिबीभत्सुरागतः ॥ पुनर्द्वादशवर्षाणिवनेवत्स्यंतिपांडवाः ५ लोभाद्वातेनजानीयुरस्मान्वामोहआविशत् ॥ हीनातिरिक्तमेतेषांभीष्मोवेदितुमर्हति ६ अर्थानांचपुनर्द्वैधेनित्यंभवतिसंशयः ॥ अन्यथाचिंतितोह्यर्थःपुनर्भवतिसोऽन्यथा ७ उत्तरंमार्गमाणानांमत्स्यानांचयुयुत्सताम् ॥ यदिबीभत्सुरायातस्तदाकस्यापराङ्मुखः ८ त्रिगर्तानांवयंहेतोर्मत्स्यान्योद्धुमिहागताः ॥ मत्स्यानांविप्रकारांस्तेबहूनस्मानकीर्तयन् ९

शलाभार्थमामुपगतानांमत्प्रसादतस्तत्प्राप्तिरप्राप्तिर्वेतिद्वैधेसंभवति संशायाक्रांतानामकस्माद्युद्धार्थमागमनंदोषएवेति । पूर्ववैरेणसत्यपिसंशये ऽस्मज्जिघांसयाआगतानांपराजयोऽपिसंभाव्यतइत्याहान्यथेति । अन्यायेनयुध्यतःपराजयेऽप्यधिकैवनष्टिरस्तीतिभावः ७ उत्तरंगोग्रहंमार्गमाणानामिच्छतामस्माकं अनादरेषष्ठी अस्माननादृत्येत्यर्थः । वालिसुग्रीवयोर्युद्धेप्रविशन् रामइवार्जुनोऽपिकुरुमत्स्यसंनिपाते प्रविशन्नपराधीस्यादित्यर्थः ८ ननुतर्हिमत्स्यत्रिगर्तविमर्देकुरुभिरापिकिमर्थंगंतव्यमित्याशंक्याह त्रिगर्तानामित्यादिना तेतवसमक्षमितिशेषः ९

तेषांत्रिगर्तानामर्थे तत्मत्स्यैःसहयुद्धंप्रतिश्रुतं १० नकेवलंमित्रपक्षपातमात्रमस्माकमस्ति अपितुस्वार्थोऽप्यस्तीत्याह अष्टम्यामिति तथाचस्वार्थंयुद्ध्यतांनास्माकमपराधोस्ति । मत्स्येगवांत्रिगर्तैर्हृतानांपदंमार्गंगतेसति अस्माभिरिमागावोग्रहीतव्याः ११ तेत्रिगर्ताःउपसंधायवंचयित्वामत्स्येनसंगतंस्नेहंकुर्युः सर्वथापक्षत्रयेऽपिअस्माभिरिदानींयोद्धव्यमेवेत्यर्थः १२ तान्त्रिगर्तान् अपाहायगोभिःसहउपेक्ष्य केवलंरात्रिरात्रौस्वगृहमायातइदानींप्रातरस्मान्योद्धुमिहागतइतिसंबंधः १३ पक्षांतरमाह तेषामिति १४ फलितमाह सर्वैरिति सर्वैरस्माभिरेकीभूययेआगतास्तैःसहयोद्धव्यमेवेत्यर्थः १५ । १६ आत्माचित्तं प्रणिधीयतांसावधानंक्रियतां १७ लब्धस्यगोधनस्यनाशेअस्माभिःस्वपुरंनप्रवेष्टव्यमितिप्रतिजानीते आच्छिन्नइति । पदातयस्त्वस्मिन्युद्धेनंक्ष्यंत्येवाश्वास्तुकदाचिज्जीविष्यंत्यपीत्याह शरैरिति प्राचांव्याख्यावक्तुरपकर्षसूचिका । वस्तुतस्तु आच्छिन्नेऽपहृतेगोधनेनिमित्ते देवेनवासह संग्रामेउपस्थितेसतिअस्माकंभीष्मादीनांमध्ये ह

तेषांभयाभिभूतानांतदस्माभिःप्रतिश्रुतम् ॥ प्रथमंतैर्ग्रहीतव्यंमत्स्यानांगोधनंमहत् ॥ सप्तम्यामपराह्णेवैतथातैस्तुसमाहितम् १० अष्टम्यांपुनरस्माभिरादित्यस्योदयंप्रति ॥ इमागावोग्रहीतव्यागतेमत्स्येगवांपदम् ११ तेवागाश्चानयिष्यंतियदिवास्युःपराजिताः ॥ अस्मान्वाह्युपसंधायकुर्युर्मत्स्येनसंगतम् ॥ १२ अथवातानपाहायमत्स्योजनपदैःसह ॥ सर्वयासेनयासार्धंसंवृतोभीमरूपया ॥ आयातःकेवलंरात्रिमस्मान्योद्धुमिहागतः १३ तेषामेवमहावीर्यःकश्चिदेषपुरःसरः ॥ अस्मान्जेतुमिहायातोमत्स्योवाऽपिस्वयंभवेत् १४ यद्येषराजामत्स्यानांयदिबीभत्सुरागतः ॥ सर्वैर्योद्धव्यमस्माभिरितिनःसमयःकृतः १५ अथकस्मात्स्थिताह्येतेरथेषुरथसत्तमाः ॥ भीष्मोद्रोणःकृपश्चैवविकर्णोद्रौणिरेवच १६ संभ्रांतमनसःसर्वेकालेह्यस्मिन्महारथाः ॥ नान्यत्रयुद्धाच्छ्रेयोऽस्तितथाऽऽत्माप्रणिधीयताम् १७ आच्छिन्नेगोधने ऽस्माकमपिदेवेनवज्रिणा ॥ यमेनवाऽपिसंग्रामेकोहास्तिनपुरंव्रजेत् १८ शरैरेभिःप्रणुन्नानांभग्नानांगहनेवने ॥ कोहिजीवेत्पदातीनांभवेदश्वेषुसंशयः १९ दुर्योधनवचःश्रुत्वाराधेयस्त्वब्रवीद्वचः ॥ आचार्यंपृष्ठतःकृत्वातथानीतिर्विधीयताम् २० जानातिहिमतंतेषामत्रासयतीहनः ॥ अर्जुनेचास्यसंप्रीतिमधिकामुपलक्षये २१ तथाहिदृष्ट्वाबीभत्सुमुपायांतंप्रशंसति ॥ यथासेनानभज्येततथानीतिर्विधीयताम् २२ हेषितंह्युपशृण्वानेद्रोणेसर्वंविघट्टितम् ॥ अदेशिकामहारण्येग्रीष्मेशत्रुवशंगताः ॥ यथानविभ्रमेत्सेनातथानीतिर्विधीयताम् २३ इष्टाहिपांडवानित्यमाचार्यस्यविशेषतः ॥ आसयन्नपरार्थांश्चकथ्यतेस्मस्वयंतथा २४ अश्वानांहेषितंश्रुत्वाकःप्रशंसापरोभवेत् ॥ स्थानेवाऽपिव्रजंतोवासदाह्रेषंतिवाजिनः २५ सदावववायवोवांतिनित्यंवर्षतिवासवः ॥ स्तनयित्नोश्चनिर्घोषःश्रूयतेबहुशस्तथा २६ इतिप्रसिद्धः कोऽस्वियोनपुरंव्रजेत् अपितुप्रत्येकंसर्वेपवस्वंपुरंगंतुंदेवानपिजेतुंगाश्चाच्छेत्तुंसमर्थाः स्मेत्यर्थः १८ शरैरिति एभिरितिस्वकीयशरप्रदर्शनं १९ आचार्यंरणाद्वीतंपृष्ठतःकृत्वा सेनामुखादपसार्य अस्मिन्भीतेसर्वेऽपिभीताःस्युरितिभावः २० तेषांपांडवानांमतंसमंतं अस्मत्तेजोवधकरणंजानातीति २१ । २२ द्रोणेभीतेसतिसर्वंविघट्टितंविचलितंभवेत् सामर्थ्यमितिशेषः ग्रीष्मेघर्मकालेवसंतेइत्यर्थः । इतःषण्मासानंतरंयुद्धारंभस्यशरदिदृष्टत्वात् । अदेशिकाःस्वदेशात् च्युताः व्यूहभंगोमाभूदित्यर्थः २३ इष्टाहीति पांडवाःअपरार्थाः नास्तिपरार्थोयेषांते ऽपरार्थाःस्वार्थपराः आसयन्द्रोणंत्वरसभीपेस्थापितवंतः । परकीयोऽयमित्यर्थः । तत्रहेतुमाह स्वयंद्रोणेनतथाकथ्यते यथापांडवीयत्वंस्वस्यप्रकाशतेतथेत्यर्थः २४ एतदेवविवृणोतिअश्वानामित्यादिना २५ २६

पार्थस्यार्जुनस्यागमनेऽत्र किंकार्यं किमर्थंवासोऽनेनप्रशस्यते तत्रहेतुः अत्र पार्थश्रेयस्कामादभिलाषात् अस्मासुवाद्वेषात् जिघांसातःरोषात्तन्मूलादभिज्वलनात् २७ द्रोणमुपहसतिआचा र्याइत्यादिना कारुणिकाइत्यनेनयुद्धधर्मानभिज्ञत्वमुक्तं अपापंअहिंसातद्दर्शिनः २८ । २९ आश्चर्यरूपाणिविनोदादीनि इज्यास्त्रेयज्ञायुधेकपालादौ तेषामुपसंधानेआसादनप्रोक्षणादौ परे षांइज्यास्त्रज्ञानांयाज्ञिकानांविवरज्ञानेछिद्रदर्शने ३० मनुष्यचरितेषुस्नानाचमनभोजनादिषु हस्त्यश्वरथचर्यासु हस्त्यादिनावाहनेनचर्यागमनं खरादीनांकर्मणिचिकित्सादौ ३१ प्रतोली

किमत्रकार्यंपार्थस्यकथंवासप्रशस्यते ॥ अन्यत्रकामाद्द्वेषाद्वारोषादस्मासुकेवलात् २७ आचार्यावैकारुणिकाःप्राज्ञाश्चापापदर्शिनः ॥ नैतेमहाभयेप्राप्तेसंप्रष्ट व्याःकथंचन २८ प्रासादेषुविचित्रेषुगोष्ठीषूपवनेषुच ॥ कथाविचित्राःकुर्वाणाःपंडितास्तत्रशोभनाः २९ बहून्याश्चर्यरूपाणिकुर्वाणाजनसंसदि ॥ इज्यास्त्रे चोपसंधानेपंडितास्तत्रशोभनाः ३० परेषांविवरज्ञानेमनुष्यचरितेषुच ॥ हस्त्यश्वरथचर्यासुखरोष्ट्राजाविकर्मणि ३१ गोधनेषुप्रतोलीषुवरद्वारमुखेषुच ॥ अन्न संस्कारदोषेषुपंडितास्तत्रशोभनाः ३२ पंडितान्पृष्ठतःकृत्वापरेषांगुणवादिनः ॥ विधीयतांतथानीतिर्यथावध्योभवेत्परः ३३ गावश्चसंप्रतिष्ठाप्यसेनांव्यूह्यसमं ततः ॥ आरक्षाश्चविधीयंतांयत्रयोत्स्यामहेपरान् ३४ ॥ इतिश्रीमहाभारतेविराटपर्वणिगो० उत्तरगोग्रहेदुर्योधनवाक्येसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ कर्णउवाच ॥ सर्वानायुष्मतोभीतान्संत्रस्तानिवलक्षये ॥ अयुद्धमनसश्चैवसर्वांश्चैवानवस्थितान् १ यद्येषराजामत्स्यानांयदिबीभत्सुरागतः ॥ अहमावारयिष्यामिवेलेवम करालयम् २ ममचापप्रयुक्तानांशराणांनतपर्वणाम् ॥ नावृत्तिर्गच्छतांतेषांसर्पाणामिवसर्पताम् ३ रुक्मपुंखाःसुतीक्ष्णाग्रामुक्ताहस्तवतामया ॥ छादयंतु शराःपार्थंशलभाइवपादपम् ४ शराणांपुंखसक्तानांमौर्व्याभिहतयादृढम् ॥ श्रूयतांतलयोःशब्दोभेर्योराहतयोरिव ५ समाहितोहिबीभत्सुर्वर्षाण्यष्टौचपंचच ॥ जातस्नेहश्चयुद्धेऽस्मिन्मयिसंप्रहरिष्यति ६ पात्रीभूतश्चकौंतेयोब्राह्मणोगुणवानिव ॥ शरौघान्प्रतिगृह्णातुमयामुक्तान्सहस्रशः ७ एषचैवमहेष्वासस्त्रिषुलोके षुविश्रुतः ॥ अहंचापिनरश्रेष्ठादर्जुनान्नावरःक्वचित् ८ इतश्चेतश्चनिर्मुक्तैःकांचनैर्गार्ध्रवाजितैः ॥ दृश्यतामद्यवैव्योमखद्योतैरिवसंवृतम् ९ अद्याहमृणमक्ष य्यंपुरावाचाप्रतिश्रुतम् ॥ धार्तराष्ट्रायदास्यामिनिहत्यसमरेर्जुनम् १० अंतराच्छिद्यमानानांपुंखानांव्यतिशीर्यताम् ॥ शलभानामिवाकाशेप्रचारःसंप्रदृश्य ताम् ११ इंद्राशनिसमस्पर्शंमहेंद्रसमतेजसम् ॥ अर्दयिष्याम्यहंपार्थमुल्काभिरिवकुंजरम् १२ रथादतिरथंशूरंसर्वशस्त्रभृतांवरम् ॥ विवशंपार्थमादास्येगरु त्मानिवपन्नगम् १३ तमग्निमिवदुर्धर्षमसिशक्तिशरेंधनम् ॥ पांडवाग्निमहंदीप्तंप्रदहंतमिवाहितम् १४

षुगृहबाह्यावयवेषु प्रदीयमानबलिदानादावित्यर्थः संस्कारोवैश्वदेवादिना दोषःकेशकीटपातादिना ३२ । ३३ गाःवइतिच्छेदः गावश्चसंप्रतिष्ठंतामितिपाठांतरे गावइत्येकंपदं आरक्षाःरक्षकाः ३४ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदी पेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ सर्वानिति सर्वान्भीष्मादीन्अनवस्थितान्चंचलान् १ । २ नावृत्तिर्लक्ष्यच्युतिर्न ३ । ४ पुंखसक्तानांसक्तपुंखानां ५ । ६ । ७ । ८ गार्ध्रवाजितैःगृध्रपक्षैर्वा जोवेगःशब्दः पक्षोवा संजातोयेषांतैः 'वाजोनिःस्वनपक्षयोःवेगेपुमान्' इतिमेदिनी ९ अक्षय्यमितरैःक्षपयितुमशक्यम् १० पुंखानांपुंखवतांशराणाम् ११ । १२ । १३ । १४

१५ । १६ नतपर्वभिःसमीकृतग्रंथिप्रदेशैः १७ । १८ । १९ विपन्नानांभ्रंशितानाम् २० । २१ । २२ धनंगोधनम् २३ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेअष्टचत्वारिंशोऽ ध्यायः ॥ ४८ ॥ अर्थानांगवादीनां प्रकृतिंप्राप्तकारणं अनुबंधंप्राप्तावाफलं नहियूतमर्थप्राप्तेर्मुख्यंकारणं नापितत्प्राप्तानामर्थानांपरिणामेसुखकरत्वंचास्तीत्यभिसंधिः १ मायाइति येषां शकुन्यादीनांमायाःकपटानि बहवःबह्व्यःसंति तेषांद्यूतवद्युद्धंपापिष्ठं नाशकरत्वात् । नहीदानीमर्जुनोद्यूतेनेवमायामात्रेणजेतुंशक्यइतिभावः । पाठांतरेनयाःनीतयः सामाद्यास्तेषांमध्येयुद्धं पापिष्ठम् २ देशेति इदानींग्रीष्मोनयुद्धकालः श्रांत्याजलाभावेनचसद्योवाहनानांनाशापत्तेः । नापिदेशोगिरिदुर्गाद्याश्रितोऽस्तीतिभावः । इदंयुद्धंफलंनलभतेफलंनलंभयेत् । परस्यतु

अश्ववेगपुरोवातोरथौघस्तनयित्नुमान् ॥ शरधारोमहामेघःशमयिष्यामिपांडवम् १५ मत्कार्मुकविनिर्मुक्ताःपार्थमाशीविषोपमाः ॥ शराःसमभिसर्पंतुवल्मीक मिवपन्नगाः १६ सुतेजनैरुक्मपुंखैःसुधौतैर्नतपर्वभिः ॥ आचितंपश्यकौंतेयंकार्णिकारैरिवाचलम् १७ जामदग्न्यान्मयाह्यस्त्रंयत्प्राप्तमृषिसत्तमात् ॥ तदुपा श्रित्यवीर्यंचयुध्येयमपिवासवम् १८ ध्वजाग्रेवानरस्तिष्ठन्भल्लेननिहतोमया ॥ अद्यैवपततांभूमौविनदन्भैरवान्रवान् १९ शत्रोर्मयाविपन्नानांभूतानां ध्वजवासिनाम् ॥ दिशःप्रतिष्ठमानानामस्तुशब्दोदिवंगमः २० अद्यदुर्योधनस्याहंशल्यंहृदिचिरास्थितम् ॥ समूलमुद्धरिष्यामिबीभत्सुंपातयन्रथात् २१ हताश्वंविरथंपार्थंपौरुषेपर्यवस्थितम् ॥ निःश्वसंतंयथानागमद्यपश्यंतुकौरवाः २२ कामंगच्छंतुकुरवोधनमादायकेवलम् ॥ रथेषुवापितिष्ठंतोयुद्धंपश्यंतुमाम कम् २३ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणि उत्तरगोग्रहेकर्णविकत्थने अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ कृपउवाच ॥ सदै वतवराधेययुद्धेक्रूरतरामतिः ॥ नार्थानांप्रकृतिंवेत्सिनानुबंधमवेक्षसे १ मायाहिबहवःसंतिशास्त्रमाश्रित्यचिंतिताः ॥ तेषांयुद्धंतुपापिष्ठंवेदयंतिपुराविदः २ दे शकालेनसंयुक्तंयुद्धंविजयदंभवेत् ॥ हीनकालंतदेवेहफलंनलभतेपुनः ॥ देशेकालेचविक्रांतंकल्याणायविधीयते ३ आनुकूल्येनकार्याणामंतरंसंविधीयते ॥ भारंहिरथकारस्यनव्यवस्यंतिपंडिताः ४ परिचिंत्यतुपार्थेनसंनिपातोननःक्षमः ॥ एकःकुरूनभ्यगच्छदेकश्चाग्निमतर्पयत् ५ एकश्चपंचवर्षाणिब्रह्मचर्यमधार यत् ॥ एकःसुभद्रामारोप्यद्वैरथेकृष्णमाह्वयत् ६ एकःकिरातरूपेणस्थितंरुद्रमयोधयत् ॥ अस्मिन्नेववनेपार्थोहृतांकृष्णामवाजयत् ७ एकश्चपंचवर्षाणि शक्रादस्त्राण्यशिक्षत ॥ एकःसोऽयमरिंजित्वाकुरूणामकरोद्यशः ८ एकोगंधर्वराजानंचित्रसेनमरिंदमः ॥ विजिग्येतरसासंख्येसेनांप्राप्यसुदुर्जयाम् ९ तथानिवातकवचाःकालखंजाश्चदानवाः ॥ दैवतैरप्यवध्यास्तेएकेनयुधिपातिताः १०

देशकालावनुकूलावेववर्तेतेइतिभावः । विक्रांतंपराक्रमः ३ देशादेरानुकूल्येनहेतुना कार्याणांयुद्धादीनामंतरंतादर्थ्यंफलवत्त्वमितियावत् संविधीयतेसम्यक्क्रियते 'अंतरमवकाशावधिपरि धानांतर्द्धिभेदतादर्थ्ये'इतिमेदिनी । मंत्राणामितिपाठे देशाद्यानुकूल्येनकार्यंविचार्यमित्यर्थः तत्राभाणकमाहभारमिति । यथारथकारेणदिव्योऽयंमयानिर्मितोरथः सुदृढांगोऽनेनत्वंदेवान पिसर्वथाजेष्यसीत्युक्ते तद्वचसिभारंदत्वादेशकालानुकूल्यमनपेक्ष्यैव पंडितानव्यवस्यंति योद्धुमितिशेषः एवंत्वद्वचसिभारंदत्वा देशाद्यानुकूल्यमनवेक्ष्य कथमस्माभिर्योद्धव्यं । तवतु वचनंरथकारवचनवदर्थशून्यमितिभावः । 'सर्वानायुष्मतोभीतान्संत्रस्तानिवलक्षय'इतियत्कर्णेनोक्तंतस्यैतदुत्तरम् ४ विचारफलमाह परिचिंत्येति ५ । ६ । ७ । ८ । ९ । १०

११ । १२ प्रदेशिन्यातर्जन्या १३ । १४ मध्येनमध्यतउत्सर्तुंउत्सर्पितुम् १५ । १६ । १७ । १८ । १९ । २० । २१ यदुक्तं'कामंगच्छंतुकुरवोधनमादायकेवलं ॥ रथेपुत्राऽपितिष्ठंतोयुद्धं पश्यंतुमामकम्'इतितत्राह षड्थाइति संहताःषडपिएकीभूयतेनैकेनयोद्धुंकथंचिच्छक्ष्यामोनत्वेकैकशइतिभावः २२ । २३ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ नचोति शूराःपरवित्तंजित्वापरसीमामुलंघ्यस्वनगरंप्रतिनीत्वाऽपिनश्लाघंते त्वंत्वेतेषामेकतममप्यकृत्वाकत्थसेऽतोनिर्लज्जोऽसीतिभावः १ । २ । ३ यदुक्तं'नैतेमहामयेमा

एकेनहित्वयाकर्णकिंनामेहकृतंपुरा ॥ एकैकेनयथातेषांभूमिपालावशेकृताः ११ इंद्रोऽपिहिनपार्थेनसंयुगेयोद्धुमर्हति ॥ यस्तेनाशंसतेयोद्धुंकर्तव्यंतस्यभेषजम् १२ आशीविषस्यक्रुद्धस्यपाणिमुद्यम्यदक्षिणम् ॥ अवमुच्यप्रदेशिन्यादंष्ट्रामादातुमिच्छसि १३ अथवाकुंजरंमत्तमेकएवचरन्वने ॥ अनंकुशंसमारुह्य नगरंगंतुमिच्छसि १४ समिद्धंपावकंचैवघृतमेदोवसाहुतम् ॥ घृताक्तश्चीरवासास्त्वंमध्येनोत्सर्तुमिच्छसि १५ आत्मानंकःसमुद्बध्यकंठेबध्वामहाशिलाम् ॥ समुद्रंतरतेदोर्भ्यांतत्रकिंनामपौरुषम् १६ अकृतास्त्रःकृतास्त्रंवैबलवंतंसुदुर्बलः ॥ तादृशंकर्णयःपार्थंयोद्धुमिच्छेत्सदुर्मतिः १७ अस्माभिर्ह्येषनिकृतोवर्षाणीह त्रयोदश ॥ सिंहःपाशविनिर्मुक्तोननःशेषंकरिष्यति १८ एकांतेपार्थमासीनंकूपेऽग्निमिवसंवृतम् ॥ अज्ञानादभ्यवस्कंद्यप्राप्ताःस्मोभयमुत्तमम् १९ सहयुध्यामहेपार्थमागतंयुद्धदुर्मदम् ॥ सैन्यास्तिष्ठंतुसन्नद्धाव्यूढानीकाःप्रहारिणः २० द्रोणोदुर्योधनोभीष्मोभवान्द्रौणिस्तथावयम् ॥ सर्वेयुध्यामहेपार्थंकर्णमासाहसंकृथाः २१ वयंव्यवसितंपार्थंवज्रपाणिमिवोद्यतम् ॥ षड्रथाःप्रतियुध्येमतिष्ठेमयदिसंहताः २२ व्यूढानीकानिसैन्यानियत्ताःपरमधन्विनः ॥ युध्यामहेऽर्जुनंसंख्येदानवाइववासवम् २३ ॥ इतिश्रीविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेकृपवाक्यंनामएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ अश्वत्थामोवाच ॥ नचतावज्जितागावोनचसीमांतरंगताः ॥ नहास्तिनपुरंप्राप्तास्त्वंचकर्णविकत्थसे १ संग्रामांश्चबहून्जित्वालब्ध्वाचविपुलंधनम् ॥ विजित्यचपरांसेनांनाहुःकिंचनपौरुषम् २ दहत्यग्निरवाक्यस्तुतूष्णींभातिदिवाकरः ॥ तूष्णींधारयतेलोकान्वसुधासचराचरान् ३ चातुर्वर्ण्यस्यकर्माणिविहितानिस्वयंभुवा ॥ धनंयैरधिगंतव्यंयच्चकुर्वन्नदुष्यति ४ अधीत्यब्राह्मणोवेदान्याजयेतयजेतवा ॥ क्षत्रियोधनुराश्रित्ययजेच्चैवनयाजयेत् ५ वैश्योधिगम्यवित्तानिब्रह्मकर्माणिकारयेत् ॥ शूद्रःशुश्रूषणंकुर्यात्त्रिषुवर्णेषुनित्यशः ॥ वंदनायोगविधिभिर्वैतसींवृत्तिमास्थितः ६ वर्तमानायथाशास्त्रंप्राप्यचापिमहीमिमाम् ॥ सत्कुर्वंतिमहाभागागुरून्सुविगुणानपि ७ प्राप्यद्यूतेनकोराज्यंक्षत्रियस्तोष्टुमर्हति ॥ तथानृशंसरूपोऽयंधार्तराष्ट्रश्चनिर्घृणः ८

मेसंप्रष्टव्याः' इत्यादिना ब्राह्मणानांभोजनादावेवकौशलंनयुद्धेइति तत्रतवापिवैश्यत्वान्नयुद्धेसामर्थ्यमस्तीतिदर्शयिष्यन्वर्णानांकर्माणिविभजते चातुर्वर्ण्यस्येत्यादिना ४ । ५ वित्तान्यधिगम्यकृष्यादिनेतिशेषः ब्रह्मकर्माणिवेदोक्तकर्माण्याधानादीनिकारयेत् स्वार्थेणिच् ६ वर्तमानाइति न्यायेनपृथिवींजित्वाऽपिसंतोविगुणानपिगुरून्सत्कुर्वंति । त्वंत्वन्यायेनपांडवंजित्वासाधूनपिगुरून्निंदसीतिभावः ७ एतदेवाहप्राप्येति निर्घृणोनिर्लज्जः ८

निकृत्याशाठ्येन वंचनायोगैश्छद्मोपायैः वितंसोबंधनोपायस्तेनजीवतीतिवैतंसिकोव्याधः ९ । १० इंद्रप्रस्थंतत्स्थाःपांडवाः ११।१२ मूलमिति एषांपांडवानांमूलं महत्महच्छब्दवाच्यंब्रह्म श्रीकृष्णाख्यं वेदवाक्यंब्राह्मणाश्चयथोक्तमादिपर्वणि । 'मूलंकृष्णोब्रह्मचब्राह्मणाश्च'इति । तदेतद्वेदविरुद्धमनृतंद्यूतंकुर्वता धार्तराष्ट्रेणधर्मस्यमूलंकृत्तंछिन्नं इदानींचब्राह्मणानवजानतात्वयाऽपितदेव कृतं । अतोधर्मनाशाद्भवतांनाशोऽवश्यंभावीत्यर्थः । मूलंकीदृशं चंदनंयथाशांतंशीतलं नतुदाहकंक्रोधरूपं । तथाचदुर्योधनःकेवलंक्रोधमयइत्युक्तंप्राक् । 'दुर्योधनोमन्युमयोमहाद्रुमः'इति । सारार्थीकर्मकारयिथा इतिव्यवहिते नसंबंधः । सारार्थीधनार्थी । 'धनेचसारम्'इतिमेदिनी । पांडवान्कर्मकारानिवकृतवानसि यत्रकालेतत्रतदाविदुरःकिमब्रवीत् । क्षयमूलंद्यूतमिति तदिदानींस्मरेतिभावः । सूतेतिसंबोधयन्क्षत्रियत्वादस्ययुद्धेष्वकौशलंव्यनक्ति । 'नन्वाविर्योवैदैवंक्षत्रम्' इतिश्रुतेर्दिव्यात्क्षत्रात्कुंत्यांजातस्यास्यकथमक्षत्रत्वंयुद्धाकौशलंचेति विदुषाऽप्यश्वत्थाम्नावक्तुंयुक्तमितिचेच्छृणु सर्वेषांहिवर्णानांद्विविधंजन्म योनिजंसंस्कारजंच । तत्रयएवयोनिःसएवसंस्कर्ताचेत्सएकजोनमक्तितिरुच्यते । कर्णस्तुदैवक्षत्रजोऽप्यक्षत्रियेणसूतेनसंस्कृतइतिद्विजातत्वात् क्षत्रियत्वेनप्रहर्तुंकुशलोऽपि सूतत्वेनपरकीयप्रहारंसोढुमशक्तइतियुद्धात्पलायते इत्याशयेनैनंसूर्यपुत्रंजानन्नपिसूतेतिसंबोधयति । तथाचमंत्रवर्णः । 'सहस्व मन्योअभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहिशत्रून् ॥ उग्रंतेपाजोनन्वारुरुध्रे वशीवशंनयसएकजत्वम्'इतिअस्यार्थः । तापसोमन्युर्ऋषिःसंकल्पाधिष्ठात्रींदेवतांमन्युसंज्ञांप्रार्थयते त्वयामन्यो

तथाऽधिगम्यवित्तानिकोविकत्थेद्विचक्षणः ॥ निकृत्यावंचनायोगैश्चरन्वैतंसिकोयथा ९ कतमंद्वैरथंयुद्धंयत्राजैषीर्धनंजयम् ॥ नकुलंसहदेवंवाधनंयेषांत्वयाहृतम् १० युधिष्ठिरोजितःकस्मिन्भीमश्चबलिनांवरः ॥ इंद्रप्रस्थंत्वयाकस्मिन्संग्रामेनिर्जितंपुरा ११ तथैवकतमद्युद्धंयस्मिन्कृष्णाजितात्वया ॥ एकवस्त्रासभांनीतादुष्टकर्मन्रजस्वला १२ मूलमेषांमहत्कृत्तंसारार्थीचंदनंयथा ॥ कर्मकारयिथाःसूततत्रकिंविदुरोऽब्रवीत् १३ यथाशक्तिमनुष्याणांशममालक्षयामहे ॥ अन्येषामपिसत्त्वानामपिकीटपिपीलिकैः ॥ द्रौपद्याःसंपरिक्लेशंनक्षंतुंपांडवोऽर्हति १४ क्षयायधार्तराष्ट्राणांप्रादुर्भूतोधनंजयः ॥ त्वंपुनःपंडितोभूत्वावाचंवक्तुमिहेच्छसि १५ वैरांतकरणोजिष्णुर्ननःशेषंकरिष्यति १६ नैषदेवान्नगंधर्वान्नसुरान्नचराक्षसान् ॥ भयादिहनयुध्येतकुंतीपुत्रोधनंजयः १७

इतिसूक्तेतृतीयेयमृक् यस्तेमन्यविधितिमध्यंदिनइतिमाध्यंदिनेसवनेइध्येनयागेशत्रुमारणार्थेऽस्यसूक्तस्यविनियोगः हेमन्योअस्मैशरणागतायराज्यायवा एतद्रक्षणार्थमितियावत् । अभिमातिंसर्वतःपीडांपित्रादिभिःसहविरोधंज्ञातिवधदोषंवासहस्वक्षमस्व । कथंतेषांरक्षणंस्यादतआह रुजन्रोगंप्राप्नुवन् मृणन्म्रियमाणोजराग्रस्तइत्यर्थः प्रमृणन्अत्यंतंआसन्नमृत्युर्वा शत्रून्प्रेहिप्रकर्षेणजेतुंगच्छ । अत्रशरीरगतरोगादितदभिमानिनिचेतसिउपचर्यते । नन्वशक्तेनरोगाद्याक्रांतेनमयाकथंशत्रवोजेतुंशक्याइत्याशंक्याह उग्रमिति उग्रंपरमर्दनक्षमंतेतवपाजस्तेजो ननुनिश्चितंआरुरुध्रेआरोद्धुंशत्रून्समर्थमस्ति । दृष्टसंकल्पस्यहितेजःपरानवश्यंनाशयेदेवेत्यर्थः । एतदेवाह वशीसर्वमस्यवशेस्तीतिवशी संकल्पदार्ढ्याद्धिब्रह्मगस्त्यादिभिःसमुद्रपानादीन्यपिकृतानिअतएवसर्वंजगत्त्वमेववशंनयसे । वशित्वेहेतुः हेएकजएकस्माज्जात । नन्वेकमेवमनःसंकल्पस्योपादानमितिव्यर्थंविशेषणमितिचेन्न कुंडव्यावृत्त्यर्थत्वात् । सद्यन्येनजातोऽन्येनचआत्मीयबुद्ध्यासंस्कृतइवनदृढसंकल्पोभवति नचपरांस्त्रातुंशक्नोतिद्विजत्वात् । तथाचलोकेआभाणकः यस्यद्वेवचनेसद्विपितृकइतिवक्तारोभवंति अतएकजेत्यर्थवद्वचनं । दत्तक्रीतादौतुशाखीयंएकस्यैवस्वत्वमस्तीतिनासौकुंडतुल्यइतिदिक् १३ ननुममसूतत्वाद्दोषवत्त्वंचेत् सुजाताअपितेकुतोनशाम्यंति कुतोवापरसाहाय्यार्थमस्मान्योद्धुमागता वालिवधेरामइवेत्याशंक्याह यथाशक्तीतिद्वाभ्यां पिपीलिकैरपिकृतंशमंलक्षयामहे इतियोज्यं । वालिरामयोर्विरोधाभावेऽपिरामेणवालीहतइतिसोऽपराधी । पांडवास्तुयुष्माभिरपकृताइतियुष्मान्जिघांसंतोनापराध्यंतीतिभावः १४ । १५ । १६ नैवनयुध्येत अपितुयुद्धचेतैवेत्यर्थः १७

एष्यतिगमिष्यति १८ । १९ देवेनदेवयोग्येनयुध्येत २० । २१ अहरः हृतवानासि आनैषीः आनीतवानसि । यथाउत्साहपूर्वकमेतत्कर्मत्वयाकृतंतथैवेदानीमपराङ्मुखोयुध्यस्वेत्यर्थः २२ २३ नचेति चकारात्त्रेताऽपिनभवतीत्यध्याहार्यं । अयमर्थः क्रमेणएकद्वित्रिचतुरंकांकितैःप्रदेशैरंकचतुष्टयवान्पाशोभवति । तत्रएकांकःकलिः द्व्यंकोद्वापरः त्र्यंकस्त्रेता चतुरंकःकृतं । तत्र द्यूतेपंचस्वीयाःपंचपरकीयाश्चदीनारादयःस्थाप्यंते तदितःपाशप्रक्षेपेयद्येकांकउपर्यायातितर्हि स्वीयेष्वेकएवजितोभवति । यदिद्व्यंकस्तदापरकीयंदीनारद्वयंस्वीयश्चैकोजितः यदित्र्यंकउप

यंयमेषोऽतिसंक्रुद्धःसंग्रामेनिपतिष्यति ॥ वृक्षंगरुत्मान्वेगेनविनिहत्यतमेष्यति १८ त्वत्तोविशिष्टंवीर्येणनुधष्यमरराट्समम् ॥ वासुदेवसमंयुद्धेतंपार्थंकोनपूजयेत् १९ देवंदेवेनयुध्येतमानुषेणचमानुषम् ॥ अस्त्रंह्यस्त्रेणयोहन्यात्कोऽर्जुनेनसमःपुमान् २० पुत्रादनंतरंशिष्यइतिधर्मविदोविदुः ॥ एतेनापिनिमित्तेन प्रियोद्रोणस्यपांडवः २१ यथात्वमकरोर्द्यूतमिंद्रप्रस्थंयथाऽहरः ॥ यथाऽऽनैषीःसभांकृष्णांतथायुध्यस्वपांडवम् २२ अयंतेमातुलःप्राज्ञःक्षत्रधर्मस्यकोविदः ॥ दुर्द्यूतदेवीगांधारःशकुनिर्युध्यतामिह २३ नाक्षान्क्षिपतिगांडीवंनकृतंद्वापरंनच ॥ ज्वलतोनिशिताान्बाणांस्तांस्तान्क्षिपतिगांडिवम् २४ नहिगांडीवनिर्मुक्तागार्ध्रपक्षाःसुतेजनाः ॥ नांतरेष्ववतिष्ठंतेगिरीणामपिदारणाः २५ अंतकःपवनोमृत्युस्तथाऽग्निर्वडवामुखः ॥ कुर्युरेतेकचिच्छेषंनतुक्रुद्धोधनंजयः २६ यथासभायांद्यूतंत्वंमातुलेनसहाकरोः ॥ तथायुध्यस्वसंग्रामेसौबलेनसुरक्षितः २७ युध्यंतांकामतोयोधानाहंयोत्स्येधनंजयम् ॥ मत्स्योह्यस्माभिरायोध्योयद्यागच्छेद्गवांपदम् २८ ॥ इतिश्रीम०भा० वि०गोहरणप० उ०द्रौणिवाक्यंनामपंचाशत्तमोऽध्यायः ॥ ५० ॥ भीष्मउवाच ॥ साधुपश्यतिवैद्रोणिःकृपःसाध्वनुपश्यति ॥ कर्णस्तुक्षत्रधर्मेणकेवलंयोद्धुमिच्छति १ आचार्योनाभिवक्तव्यःपुरुषेणविजानता ॥ देशकालौतुसंप्रेक्ष्ययोद्धव्यमितिमेमतिः २ यस्यसूर्यसमाःपंचसपत्नाःस्युःप्रहारिणः ॥ कथमभ्युदयेतेषांनप्रमुह्येतपंडितः ३ स्वार्थेसर्वेविमुह्यंतियेऽपिधर्मविदोजनाः ॥ तस्माद्राजन्नब्रवीम्येषवाक्यंतेयदिरोचते ४ कर्णोयदवोचत्त्वांतेजःसंजननायतत् ॥ आचार्यपुत्रःक्षमतांमहत्कार्यमुपस्थितम् ५ नायंकालोविरोधस्यकौंतेयेसमुपस्थिते ॥ क्षंतव्यंभवतासर्वमाचार्येणकृपेणच ६ भवतांहिकृतास्त्रत्वंयथाऽऽदित्येप्रभातथा ॥ यथाचंद्रमसोलक्ष्मीःसर्वथानापकृष्यते ७ एवंभवत्सुब्राह्मण्यंब्रह्मास्त्रंचप्रतिष्ठितम् ॥ चत्वारएकतोवेदाःक्षात्रमेकत्रदृश्यते ८ नैतत्समस्तमुभयंकस्मिंश्चिदनुशुश्रुम ॥ अन्यत्रभारताचार्यात्सपुत्रादितिमेमतिः ९ वेदांताश्चपुराणानिइतिहासंपुरातनम् ॥ जामदग्न्यमृतेराजन्कोद्रोणादधिकोभवेत् १० ब्रह्मास्त्रंचैववेदाश्चनैतदन्यत्रदृश्यते ॥ आचार्यपुत्रःक्षमतांनायंकालोविभेदने ११ सर्वेसंहत्ययुध्यामःपाकशासनिमागतम् १२

रिपतेत्तदापरकीयंत्रयंस्वीयंचत्रयंजितं । चतुरंकस्योपरिपतनेसर्वेऽपिस्वीयाः परकीयाश्चजितामवंति । तथाचकलिपातेजयोनास्ति द्वापरादिपातेउत्तरोत्तरवृद्धयाजयोऽस्ति । तेनगांडीवस्थाःशराःसर्वथानजयावहाइत्यर्थः २४ । २५ । २६ । २७ । २८ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे पंचाशत्तमोऽध्यायः ॥ ५० ॥ ७ ॥ साध्विति १ । २ यस्यदुर्योधनस्यपंचपांडवाः ३ । ४ यत्अवोचदाचार्यस्यनिंदारूपं तत्तस्यैवतेजःसंजननायैव नतुद्वेषात् ५ । ६ । ७ । ८ । ९ । १० । ११ । १२

बलस्यसैन्यस्यव्यसनानिविनाशकानि १३ नैवेति अस्माकमिदंन्याय्यंवचनंत्वयानैवनिंद्यं । रोषेणदुर्द्यूतादिदर्शनजेनपरीतस्तेनगुरुणाद्रोणेन । गुणाअर्जुनस्य १४ हितंकुर्वतासह निर्वैलैर्भवद्भिर्विचार्ययोद्धव्यमित्येवंरूपं १५ आचार्यइति रोषादेतद्वचनमाचार्येणोक्तं नतुभेदार्थमितिभावः । पाठांतरे अभिषज्यमाणेअभिमृष्यमाणे उपालभ्यमानेइतियावत् शेषकारितंशेषंकर्तव्यंकारणीयंचतत्सर्वंनकृतंस्यात् । प्रस्तुतकार्यनाशोभवेदित्यर्थः १६ । १७ प्रथमंमुख्यंभेदोनकार्यःक्षंतव्यंचेतियदुक्तंतेनैवाहंवाक्येनप्रसन्नोऽस्मि १८ । १९ धनंचेति धनंलब्ध्वाअस्माननुपेक्ष्यगृहंगमिष्यति गोधनेअस्यंतंदूरतोऽन्यैर्नीते युध्यतामस्माकंअंतमेवायंकरिष्यतीतिभावः २० समायुंज्यात्संप्राप्नुयात् पराजयपात्वपराजयंप्राप्नुयात् २१ पुरस्ताद्वाक्यमुक्तं अज्ञातवासकालःपूर्णोनवेतिप्रथमंविचार्यमित्येवंरूपं २२ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे एकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ७ ॥ कलाकाष्ठाश्चेति १ । २ अत्रचतुर्विंशत्यापक्षैश्चांद्रः

बलस्यव्यसनानीहयान्युक्तानिमनीषिभिः ॥ मुख्योभेदोहितेषांतुपापिष्ठोविदुषांमतः १३ ॥ अश्वत्थामोवाच ॥ नैवन्याय्यमिदंवाच्यमस्माकंपुरुषर्षभ ॥ किंतुरोषपरीतेनगुरुणाभाषितागुणाः १४ शत्रोरपिगुणाग्राह्यादोषावाच्यागुरोरपि ॥ सर्वथासर्वयत्नेनपुत्रेशिष्येहितंवदेत् १५ ॥ दुर्योधनउवाच ॥ आचार्यएषक्षमतांशांतिरत्रविधीयताम् ॥ अभिद्यमानेतुगुरौतद्वृत्तंरोषकारितम् १६ ॥ वैशंपायनउवाच ॥ ततोदुर्योधनोद्रोणंक्षमयामासभारत ॥ सहकर्णेनभीष्मेणकृपेणचमहात्मना १७ ॥ द्रोणउवाच ॥ यदेतत्प्रथमंवाक्यंभीष्मःशांतनवोऽब्रवीत् ॥ तेनैवाहंप्रसन्नोवैनीतिरत्रविधीयताम् १८ यथादुर्योधनंपार्थोनोपसर्पतिसंगरे ॥ साहसाद्यदिवामोहात्तथानीतिर्विधीयताम् १९ वनवासेह्यनिर्वृत्तेदर्शयेन्नधनंजयः ॥ धनंचालभमानोऽत्रनाद्यतत्क्षंतुमर्हति २० यथानायंसमायुंज्याद्धार्तराष्ट्रान्कथंचन ॥ नचसेनापराजय्यात्तथानीतिर्विधीयताम् २१ उक्तंदुर्योधनेनापिपुरस्ताद्वाक्यमीदृशम् ॥ तदनुस्मृत्यगांगेययथावद्वक्तुमर्हसि २२ इतिविराटपर्वणिगोहरणपर्वणिद्रोणवाक्येएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ भीष्मउवाच ॥ कलाकाष्ठाश्चयुज्यंतेमुहूर्ताश्चदिनानिच ॥ अर्धमासाश्चमासाश्चनक्षत्राणिग्रहास्तथा १ ऋतवश्चापियुज्यंतेतथासंवत्सराअपि ॥ एवंकालविभागेनकालचक्रंप्रवर्तते २ तेषांकालातिरेकेणज्योतिषांचव्यतिक्रमात् ॥ पंचमेपंचमेवर्षेद्वौमासावुपजायतः ३ एषामभ्यधिकामासाःपंचचद्वादशक्षपाः ॥ त्रयोदशानांवर्षाणामितिमेवर्ततेमतिः ४

संवत्सरः चतुष्पंचाशदधिकशतत्रयदिनात्मकः । षष्ट्यधिकशतत्रयदिनात्मासावनः । सएव द्वादशवार्षिकादिप्रविज्ञाद्ये गवामयनादिसत्रादिषुचउपयुज्यते । त्रीणिशतानिपंचषष्टिश्चदिनानि पंचदशघटिकाएकत्रिंशत्पलानित्रिंशदक्षराणि सौरस्यसंवत्सरस्यमानं । तत्रप्रायेणज्योतिर्विदःसौरसंवत्सरानुरोधेनैववर्षप्रवेशादिकंकुर्वंति । स्मार्तंवर्द्धापनादौतुचांद्रेणेति विशेषेसत्यपि यदाएतयोरांतरालिकःसावनाब्दोगण्यते । तदासौरगताद्वृद्धिस्तत्रगण्यते । एवंगणनायांक्रियमाणायां त्रयोदशस्वब्देषु पंचचांद्रामासाः द्वेदिनेसप्तत्रिंशन्नाड्यःपंचचत्वारिंशत्पलानिपंचदशाक्षराणिचतथाचकिंचिदधिकानिनवदिनान्यवधिपूर्तेरधिकानिजातानि । ज्योतिषांनक्षत्राणांव्यतिक्रमात् सूर्येणचंद्रेणचलंघनात् उपजायतःअधिकौभवतः३ अत्रतुअर्धमासाश्चमासाश्चयुज्यंतइतिग्रहणात् त्रयोदशानांवर्षाणांचांद्रमासाः षट्पंचाशदधिकंशतंभवंतीति तएवग्रहीतव्याइतिज्ञेयं । तथाचविजयदशम्यां द्यूते पांडवपराजयः। लोकेतस्यैवप्रायेणद्यूतकालत्वात्

ग्रीष्मेचगोग्रहार्थंप्रवृत्ताइत्युक्तं तेनविजयदशम्यामागामिन्यांत्रयोदशाब्दपूरणंभविष्यतीतिदुर्योधनप्रत्याशा । पांडवास्तुचांद्राब्दमानेन त्रयोदशवत्सरानतिवाह्य कृतकृत्याअभूवन् तत्रविजयदशमीतःपूर्वंपंचमासाःद्वादशदिनानिप्रकटीभवितव्यं तत्रदर्शांतमासे चैत्रकृष्णसप्तम्यामाविर्भूताः प्रतिज्ञांनिस्तीर्यैवकानिचिदधिकान्यपिदिनानिअतिवाह्यआविर्भूताइत्यर्थः

सर्वंयथावच्चरितंयद्यदेभिःप्रतिश्रुतम् ॥ एवमेतद्ध्रुवंज्ञात्वाततोबीभत्सुरागतः ५ सर्वेचैवमहात्मानःसर्वेधर्मार्थकोविदाः ॥ येषांयुधिष्ठिरोराजाकस्माद्धर्मेऽपराध्नुयुः ६ अलुब्धाश्चैवकौंतेयाःकृतवंतश्चदुष्करम् ॥ नचापिकेवलंराज्यमिच्छेयुस्तेऽनुपायतः ७ तदैवतेहिविक्रांतुमीषुःकौरवनंदनाः ॥ धर्मपाशनिबद्धास्तु नचेलुःक्षत्रियव्रतात् ८ यच्चानृतइतिख्यायाद्यःसगच्छेत्पराभवम् ॥ वृणुयुर्मरणंपार्थानानृतत्वंकथंचन ९ प्राप्तकालेतुप्राप्तव्यंनोत्सृजेयुर्नरर्षभाः ॥ अपिवज्रभृतागुप्तंतथावीर्याहिपांडवाः १० प्रतियुध्येमसमरेसर्वशस्त्रभृतांवरम् ॥ तस्माद्यदत्रकल्याणंलोकेसद्भिरनुष्ठितम् ॥ तत्संविधीयतांशीघ्रंमावोह्यर्थोऽभ्यगात्परम् ११ नहिपश्यामिसंग्रामेकदाचिदपिकौरव ॥ एकांतसिद्धिंराजेंद्रसंप्राप्तश्चधनंजयः १२ संप्रवृत्तेतुसंग्रामेभावाभावौजयाजयौ ॥ अवश्यमेकंस्पृशतो दृष्टमेतदसंशयम् १३ तस्माद्युद्धोचितंकर्मकर्मवाधर्मसंहितम् ॥ क्रियतामाशुराजेंद्रसंप्राप्तश्चधनंजयः १४॥ दुर्योधनउवाच ॥ नाहंराज्यंप्रदास्यामिपांडवानां पितामह ॥ युद्धोपचारिकंयत्तुतच्छीघ्रंप्रविधीयताम् १५ ॥ भीष्मउवाच ॥ अत्रयामामिकाबुद्धिःश्रूयतांयदिरोचते ॥ सर्वथाहिमयाश्रेयोवक्तव्यंकुरुनंदन १६ क्षिप्रंबलचतुर्भागंगृह्यगच्छपुरंप्रति ॥ ततोऽपरश्चतुर्भागोगाःसमादायगच्छतु १७ वयंचार्धेनसैन्यस्यप्रतियोत्स्यामपांडवम् ॥ अहंद्रोणश्चकर्णश्चअश्वत्थामाकृपस्तथा ॥ प्रतियोत्स्यामबीभत्सुमागतंकृतनिश्चयम् १८ मत्स्यंवापुनरायातमागतंवाशतक्रतुम् ॥ अहमावारयिष्यामिवेलेवमकरालयम् १९ ॥ वैशंपायनउवाच ॥ तद्वाक्यंरुरुचेतेषांभीष्मेणोक्तंमहात्मना ॥ तथाहिकृतवान्राजाकौरवाणामनंतरम् २० भीष्मःप्रस्थाप्यराजानंगोधनंतदनंतरम् ॥ सेनामुख्यान्व्यवस्थाप्यव्यूहितुंसंप्रचक्रमे २१ ॥ भीष्मउवाच ॥ आचार्यमध्येतिष्ठत्वमश्वत्थामातुसव्यतः ॥ कृपःशारद्वतोधीमान्पार्श्वंरक्षतुदक्षिणम् २२ अग्रतःसूतपुत्रस्तुकर्णस्तिष्ठतुदंशितः ॥ अहंसर्वस्यसैन्यस्यपश्चात्स्थास्यामिपालयन् २३ ॥ इतिविराटपर्वणिगोहरणपर्वणिभीष्मसैन्यव्यूहेद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ वैशंपायनउवाच ॥ तथाव्यूढेष्वनीकेषुकौरवेयेषुभारत ॥ उपायादर्जुनस्तूर्णंरथघोषेणनादयन् १ ददृशुस्तेध्वजाग्रंवैशुश्रुवुश्चमहास्वनम् ॥ दोधूयमानस्यभृशंगांडीवस्यचनिःस्वनम् २ ततस्तुसर्वमालोक्यद्रोणोवचनमब्रवीत् ॥ महारथमनुप्राप्तंदृष्ट्वागांडीवधन्विनम् ३ ॥ द्रोणउवाच ॥ एतद्ध्वजाग्रंपार्थस्यदूरतःसंप्रकाशते ॥ एषघोषःसरथजोरोरवीतिचवानरः ४

४ । ५ । ६ । ७ । ८ यच्चयदिचपांडवमनृतोऽयमर्जुनइतिख्यायात्कथयेत्सपराभवंगच्छेत् ९ । १० । ११ । १२ । १३ धर्मसंहितंकर्म अयुद्धेनएतैःसहऐक्यंगत्वाराज्यप्रदानं १४ । १५ १६ । १७ । १८ । १९ अनंतरंअविलंबितं २० । २१ । २२ । २३ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ७ ॥ तथेति १ । २ । ३ । ४

५ मेममकर्णौसंस्पृश्यअतिक्रांतौ ६ । ७ । ८ चारुतलंहस्तावापश्चारुतलं तद्वान्चारुतली सुग्भिःजुहूप्रभृतिभिः ९ इषुपातेइषुपातप्रमितेदेशे असौदुर्योधनः १० । ११ महेष्वासाःमहनी

एषतिष्ठन्रथश्रेष्ठेरथेचरथिनांवरः ॥ उत्कर्षतिधनुःश्रेष्ठंगांडीवमशनिस्वनम् ५ इमौचबाणौसहितौपादयोर्मेव्यवस्थितौ ॥ अपरौचाप्यतिक्रांतौकर्णौसंस्पृश्यमेशरौ ६ निरुष्यहिवनेवासंकृत्वाकर्मातिमानुषम् ॥ अभिवादयतेपार्थःश्रोत्रेचपरिपृच्छति ७ चिरदृष्टोऽयमस्माभिःप्रज्ञावान्बांधवप्रियः ॥ अतीवज्वलितोलक्ष्म्यापांडुपुत्रोधनंजयः ८ रथीशरीचारुतलीनिषंगीशंखीपताकीकवचीकिरीटी ॥ खड्गीचधन्वीचविभातिपार्थःशिखीवृतःस्रुग्भिरिवाज्यसिक्तः ९ ॥ अर्जुनउवाच ॥ इषुपातेचसेनायाहयान्संयच्छसारथे ॥ यावत्समीक्षेसैन्येस्मिन्क्वासौकुरुकुलाधमः १० सर्वानेताननादृत्यदृष्ट्वातमतिमानिनम् ॥ तस्यमूर्ध्निपतिष्यामिततएतेपराजिताः ११ एषव्यवस्थितोद्रोणोद्रौणिश्चतदनंतरम् ॥ भीष्मःकृपश्चकर्णश्चमहेष्वासाःसमागताः १२ राजानंनात्रपश्यामिगाःसमादायगच्छति ॥ दक्षिणंमार्गमास्थायशंकेजीवपरायणः १३ उत्सृजैतद्रथानीकंगच्छयत्रसुयोधनः ॥ तत्रैवयोत्स्येवैराटेनास्तियुद्धंनिरामिषम् ॥ तंजित्वाविनिवर्तिष्येगाःसमादायवैपुनः १४ ॥ वैशंपायनउवाच ॥ एवमुक्तःसवैराटिर्हयान्संयम्ययत्नतः ॥ नियम्यचततोरश्मीन्यत्रतेकुरुपुंगवाः ॥ अचोदयत्ततोवाहान्यत्रदुर्योधनोगतः १५ उत्सृज्यरथवंशंतुप्रयातेश्वेतवाहने ॥ अभिप्रायंविदित्वाचकृपोवचनमब्रवीत् १६ नैषोऽंतरेणराजानंबीभत्सुःस्थातुमिच्छति ॥ तस्यपार्ष्णिंग्रहीष्यामोजवेनाभिप्रयास्यतः १७ नह्येनमतिसंक्रुद्धमेकोयुध्येतसंयुगे ॥ अन्योदेवात्सहस्राक्षात्कृष्णाद्वादेवकीसुतात् ॥ आचार्याच्चसपुत्राद्वाभारद्वाजान्महारथात् १८ किंनोगावःकरिष्यंतिधनंवाविपुलंतथा ॥ दुर्योधनःपार्थजलेपुरानौरिवमज्जति १९ तथैवगत्वाबीभत्सुर्नामविश्राव्यचात्मनः ॥ शलभैरिवतांसेनांशरैःशीघ्रमवाकिरत् २० कीर्यमाणाःशरौघैस्तुयोधास्तेपार्थचोदितैः ॥ नापश्यन्नावृतांभूमिंनांतरिक्षंचपत्रिभिः २१ तेषांनापततांयुद्धेनापयानेऽभवन्मतिः ॥ शीघ्रत्वमेवपार्थस्यपूजयंतिस्मचेतसा २२ ततःशंखंप्रदध्मौसद्विषतांलोमहर्षणम् ॥ विस्फार्यचधनुःश्रेष्ठंध्वजेभूतान्यचोदयत् २३ तस्यशंखस्यशब्देनरथनेमिस्वनेनच ॥ गांडीवस्यचघोषेणपृथिवीसमकंपत २४ अमानुषाणांभूतानांतेषांचध्वजवासिनाम् ॥ ऊर्ध्वंपुच्छान्विधुन्वानारेभमाणाःसमंततः ॥ गावःप्रतिन्यवर्ततंदिशमास्थायदक्षिणाम् २५ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउ० गोनिवर्तनेत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ वैशंपायनउवाच ॥ सशत्रुसेनांतरसाप्रणुद्यगास्ताविजित्याथधनुर्धराग्र्यः ॥ दुर्योधनायाभिमुखंप्रयातोभूयोरणंसोऽभिचिकीर्षमाणः १ गोषुप्रयातासुजवेनमत्स्यान्किरीटिनंकृतकार्यंचमत्वा ॥ दुर्योधनायाभिमुखंप्रयातंकुरुप्रवीराःसहसाऽभिपेतुः २

यधनुषः १२ । १३ । १४ । १५ रथवंशंरथसमूहं १६ । १७ । १८ । १९ । २० आवृतांभूमिंनापश्यन्नितिन अपितुशरैरावृतामेवापश्यन् २१ । २२ । २३ । २४ रेभमाणाःहंबारवंकुर्वाणाः ॥ २५ ॥ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ ७ ॥ ॥ सइति १ । २

३ एतेनपथा काञ्चनमयारश्मयोरज्जवस्तास्त्वयोक्ताणिबंधनानियेषांतान् कुरुसिंहस्यदुर्योधनस्यद्वंद्वंमुख्यं । इहितद्वंद्वोअस्मात्कप्रत्ययेहस्वदः ४ । ५ सुवर्णकक्षैःस्वर्णमयोकक्षोपल्याण
स्यपश्चादंचलपल्लवौयेषांतैः । 'कक्षःस्यादंतरीयस्यपश्चादंचलपल्लवे'इतिमेदिनी ६ अभीप्समानाःकर्णंजीवंतमिच्छंतः ७ व्रातंसमूहम् ८ विपाठःस्थूलदंडोबाणः ९ विकृष्यविलिख्यछित्वे
त्यर्थः अस्य तंप्रसिद्धंध्वजंचमध्यउन्मथ्यापातयत् अपयात्अपायात् १० गणस्यबाधितारं तेजोहरं शत्रुंतपनामा ११ । २१ नगोत्तक्षः नगाग्रात्पर्वताग्रात् । 'शैलवृक्षौनगावगौ'इत्यमरः

तेषामनीकानिबहूनिगाढंव्यूढानिदृष्ट्वाबहुलध्वजानि ॥ मत्स्यस्यपुत्रंद्विषतांनिहंतावैराटिमामंत्र्यततोऽभ्युवाच ३ एतेनतूर्णंप्रतिपादयेमान्श्वेतान्हयान्कां
चनरश्मियोक्त्रान् ॥ जवेनसर्वेणकुरुप्रयत्नमासादयेऽहंकुरुसिंहवृंदम् ४ गजोगजेनेवमयादुरात्मायोद्धुंसमाकांक्षतिसूतपुत्रः ॥ तमेवमांप्रापयराजपुत्रदुर्योधना
पाश्रयजातदर्पं ५ सतैर्हयैर्वातजवैर्बृहद्भिःपुत्रोविराटस्यसुवर्णकक्षैः ॥ व्यध्वंसयत्तद्रथिनामनीकंततोऽवहत्पांडवमाजिमध्ये ६ तंचित्रसेनोविशिखैर्विपा
ठैःसंग्रामजिच्छत्रुसहोजयश्च ॥ प्रत्युद्ययुर्भारतमापतंतंमहारथाःकर्णमभीप्समानाः ७ ततःसतेषांपुरुषप्रवीरःशरासनार्चिःशरवेगतापः ॥ व्रातंरथानामदह
त्समन्युर्वनंयथाग्निःकुरुपुंगवानाम् ८ तस्मिंस्तुयुद्धेतुमुलेप्रवृत्तेपार्थंविकर्णोऽतिरथंरथेन ॥ विपाठवर्षेणकुरुप्रवीरोभीमेनभीमानुजमाससाद ९ ततोविकर्णस्य
धनुर्विकृष्यजांबूनदाग्र्योपचितंदृढज्यम् ॥ आपातयत्तंध्वजमस्यमथ्यच्छिन्नध्वजःसोऽप्यपयाज्जवेन १० तंशात्रवाणांगणबाधितारंकर्माणिकुर्वंतममानुषाणि ॥
शत्रुंतपःपार्थममृष्यमाणःसमार्दयच्छरवर्षेणपार्थं ११ सतेनराज्ञाऽतिरथेनविद्धोविगाहमानोध्वजिनींकुरूणां ॥ शत्रुंतपंपंचभिराशुविध्वाततोऽस्यसूतंदशभिर्ज
घान १२ ततःसविद्धोभरतर्षभेणबाणेनगात्रावरणातिगेन ॥ गतासुराजौनिपपातभूमौनगोनगाग्रादिववातरुग्णः १३ नरर्षभास्तेननरर्षभेणवीरारणेवीरतरेणभ
ग्नाः ॥ चकंपिरेवातवशेनकालेप्रकंपितानीवमहावनानि १४हतास्तुपार्थेननरप्रवीरागतासवोर्व्यांसुषुपुःसुवेषाः ॥ वसुप्रदावासवतुल्यवीर्याःपराजितावासवजेनसं
ख्ये १५ सुवर्णकार्ष्णायसवर्मनद्धानागायथाहैमवताःप्रवृद्धाः ॥ तथासशत्रून्समरेविनिघ्नन्गांडीवधन्वापुरुषप्रवीरः १६ चचारसंख्येविदिशोदिशश्चदहन्निवा
ग्निर्वनमातपांते ॥ प्रकीर्णपर्णानियथावसंतेविशातयित्वापवनोंबुदांश्च १७ तथासपत्नान्विकिरन्किरीटीचचारसंख्येऽतिरथोरथेन ॥ शोणाश्ववाहस्यहया
न्निहत्यवैकर्तनभ्रातुरदीनसत्वः ॥ एकेनसंग्रामजितःशरेणशिरोजहाराथकिरीटमाली १८ तस्मिन्हतेभ्रातरिसूतपुत्रोवैकर्तनोवीर्यमथाददानः ॥ प्रगृह्यदंता
विवनागराजोमहर्षभंव्याघ्रइवाभ्यधावत् १९ सपांडवंद्वादशभिःपृषत्कैर्वैकर्तनःशीघ्रमथोजघान ॥ विव्याधगात्रेषुहयांश्चसर्वान्विराटपुत्रंचकरेनिजघ्ने २०

१३ । १४ । गतासवःउर्व्यामितिच्छेदः संधिरार्षः १५ १६ आतपांतेघर्मस्वरूपेनिदाघे । 'अंतःस्वरूपेनाशेना'इतिमेदिनी १७ शोणाश्वाःवाहेवाहकेरथेयस्यतस्य १८ आददानआददानुमि
च्छन्प्रगृह्यआग्रहेण दंताविवपर्वतशिखरतुल्यौ अर्जुनोत्तरौप्रति अभ्यधावत् । 'दंतःसानुनिकष्यते'इतिविश्वः । 'दंतोऽद्रिकटकेकुंजे'इतिमेदिनी १९ । २०

वेगंप्रगृह्यस्वीकृत्य २१ निशम्ययुद्धादुपरम्य दिदृक्षमाणास्तस्थुः २२ । २३ कर्णस्यातर्घानानंतरमितरेऽपिशरैरंतर्हिताःकृताः २४ । २५ प्रक्ष्वेडितोमुक्तोज्यातलयोर्निःस्वनोयेनतंपूज
यतां । तलतालशब्दः तलेनचपेट्यातालःकरास्फालनंतज्जःशब्दोऽभूत् । 'तलश्चपेटेतालद्रौ । तालःकरास्फाले'इतिचमेदिनी २६ उद्धूतमुपरिकृतंलांगूलमेवमहतीपताकाध्वजोचलोयस्मिं

तमापतंतंसहसाकिरीटीवैकर्तनंवैतरसाऽभिपत्य ॥ प्रगृह्यवेगंन्यपतज्जवेननागंगरुत्मानिवचित्रपक्षः २१ तावुत्तमौसर्वधनुर्धराणांमहाबलौसर्वसपत्नसाहौ ॥
कर्णस्यपार्थस्यनिशम्ययुद्धंदिदृक्षमाणाःकुरवोऽभितस्थुः २२ सपांडवस्तूर्णमुदीर्णकोपःकृतागसंकर्णमुदीक्ष्यहर्षात् ॥ क्षणेनसाश्वंसरथंससारथिमंतर्दधेघोर
शरौघवृष्ट्या २३ ततःसुविद्धाःसरथाःसनागायोधाविनेदुर्भरतर्षभाणाम् ॥ अंतर्हिताभीष्ममुखाःसहाश्वाःकिरीटिनाकीर्णरथाःपृषत्कैः २४ सचापितानर्जुन
बाहुमुक्तान्छरान्शरौघैःप्रतिहत्यवीरः ॥ तस्थौमहात्मासधनुःसबाणःसविस्फुलिंगोऽग्निरिवाशुकर्णः २५ ततस्त्वभूद्वैतलतालशब्दःसशंखभेरीपणवप्रणादः ॥
प्रक्ष्वेडितज्यातलनिःस्वनंतंवैकर्तनंपूजयतांकुरूणाम् २६ उद्धूतलांगूलमहापताकध्वजोत्तमांसाकुलभीषणांतम् ॥ गांडीवनिर्ह्रादकृतप्रणादंकिरीटिनंप्रेक्ष्य
ननादकर्णः २७ सचापिवैकर्तनमर्दयित्वासाश्वंससूतंसरथंपृषत्कैः ॥ तमाववर्षप्रसभंकिरीटीपितामहंद्रोणकृपौचदृष्ट्वा २८ सचापिपार्थंबहुभिःपृषत्कैर्वैकर्तनोमे
घइवाभ्यवर्षत् ॥ तथैवकर्णंचकिरीटमालीसंछादयामासशितैःपृषत्कैः २९ तयोःसुतीक्ष्णान्सृजतोःशरौघान्महाशरौघास्त्रविवर्द्धनेरणे ॥ रथेविलग्नाविवचं
द्रसूर्यौघनांतरेणानुददर्शलोकः ३० अथाशुकारीचतुरोहयांश्चविव्याधकर्णोनिशितैःकिरीटिनः ॥ त्रिभिश्चयंतारममृष्यमाणोविव्याधतूर्णंत्रिभिरस्यकेतुम्
३१ ततोऽभिविद्धःसमरावमर्दीप्रबोधितःसिंहइवप्रसुप्तः ॥ गांडीवधन्वाऋषभःकुरूणामजिह्मगैःकर्णमियायजिष्णुः ३२ शरास्त्रवृष्ट्यानिहतोमहात्माप्रादुश्च
कारातिमनुष्यकर्म ॥ प्राच्छादयत्कर्णरथंपृषत्कैर्लोकानिमान्सूर्यइवांशुजालैः ३३ सहस्तिनेवाभिहतोगजेंद्रःप्रगृह्यभल्लान्निशितान्निषंगात् ॥ आकर्णपूर्णंचध
नुर्विकृष्यविव्याधगात्रेष्वथसूतपुत्रम् ३४ अथास्यबाहूरुशिरोललाटंग्रीवांवरांगानिपरावमर्दी ॥ शितैश्चबाणैर्युधिनिर्बिभेदगांडीवमुक्तैरशनिप्रकाशैः ३५
सपार्थमुक्तैरिषुभिःप्रणुन्नोगजोगजेनेवजितस्तरस्वी ॥ विहायसंग्रामशिरःप्रयातोवैकर्तनःपांडवबाणतप्तः ३६ ॥ इतिश्रीविराटपर्वणिगोहरणपर्वणिउत्तरगो
ग्रहेकर्णापयानेचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ ६ ॥ ॥ वैशंपायनउवाच ॥ अपयातेतुराधेयेदुर्योधनपुरोगमाः ॥ अनीकेनयथास्वेनशनैराच्छं
तपांडवम् १ बहुधातस्यसैन्यस्यव्यूढस्यापततःशरैः ॥ अधारयतवेगंसवेलेवतुमहोदधेः २

स्तस्यध्वजस्यउत्तमौअंसौ उपरिस्थतिर्यक्फलकाग्रभागौ तत्रआकुलाव्यग्राः येभीषणाःभूतादयःतेअंतेसमीपेयस्यतं । गांडीवनिर्ह्रादेनसहकृतःप्रणादोयेनतं गांडीवनिर्ह्रादकृतप्रणादं
किरीटिनं । ध्वजोपरिस्थभूतनादैः संवर्द्धितनादमित्यर्थः २७ द्रोणकृपौचदृष्ट्वावववर्षेतिअनुकृष्यते २८ । २९ महद्भिःशरौघैरस्त्रौघैश्चविवर्द्धनंछेदनंयत्रतस्मिन्रणेविलग्नौसंनिहितौचंद्रसूर्यौ
घनमध्यादिवतौ बाणसंघमध्याल्लोकोऽनुददर्श ३० । ३१ । ३२।३३।३४ । ३५ । ३६ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेचतुष्पंचाशत्तमोऽध्यायः ॥ ५४ ॥ आर्छंतआगताः १ । २

प्रत्यायात्प्रातिकूल्येनाभिमुखोऽगादित्यर्थः ३ दिशोदशप्रच्छादितवान् ४ अनिविद्धंनितरामविद्धंअंतरंअवकाशः ५ उत्तरस्यहयानांशिक्षाशिल्पोपपन्नत्वादितिसंबंधः द्रुतंवेगंअपूजयन् अरयइत्यपकृष्यते ६ । ७ शैलंप्रतिशैलसमीपे बलाभ्राणिबलवंतिअचंचलानिअभ्राणि सूर्यरश्मिव्याप्तानियथातथातान्यनीकानि शरव्याप्तान्यर्जुनसमीपेरेजुरित्यर्थः ८ शुभैःपुष्पैःफलसूचकत्वात्तेषांशुभत्वम् ९ स्रजःपुष्पं हिरण्मयंस्वर्णचंपकजं शुष्यत्शरैःशीर्णंच तद्वच्छत्रादीनिच सदागतिःवायुःखेदधार बाणजालांतर्हितत्वात्तेषामधःपतनंनाभूदित्यर्थः १० रथांगदेशान्युगस्यैकदेशान्‌आदाय हयाःपरिपेतुरित्यन्वयः ११ गजान्कर्णादिप्रदेशेषुआहत्य विध्वाऽपातयत्पातयतिस्म १२ अग्रजानांसेनाग्रगामिनांगजानांगतचेतसांमृतानाम् १३ कालक्षयं

ततःप्रहस्यबीभत्सुःकौंतेयःश्वेतवाहनः ॥ दिव्यमस्त्रंप्रकुर्वाणःप्रत्यायाद्रथसत्तमः ३ यथारश्मिभिरादित्यःप्रच्छादयतिमेदिनीम् ॥ तथागांडीवनिर्मुक्तैःशरैःपार्थोदिशोदश ४ नरथानांनचाश्वानांनगजानांनवर्मणाम् ॥ अनिविद्धंशितैर्बाणैरासीत्द्व्यंगुलमंतरम् ५ दिव्ययोगाच्चपार्थस्यहयानामुत्तरस्यच ॥ शिक्षाशिल्पोपपन्नत्वादस्त्राणांचपरिक्रमात् ॥ वीर्यवत्त्वंद्रुतंचाग्र्यंदृष्ट्वाजिष्णोरपूजयन् ६ कालाग्निमिवबीभत्सुंनिर्दहंतमिवप्रजाः ॥ नारयःप्रेक्षितुंशेकुर्ज्वलंतमिवपावकम् ७ तानिग्रस्तान्यनीकानिरेजुरर्जुनमार्गणैः ॥ शैलंप्रतिबलाभ्राणिव्याप्तानीवार्करश्मिभिः ८ अशोकानांवनानीवच्छन्नानिबहुशःशुभैः ॥ रेजुःपार्थशरैस्तत्रतदासैन्यानिभारत ९ स्रजोर्जुनशरैःशीर्णंशुष्यत्पुष्पंहिरण्मयम् ॥ छत्राणिचपताकाश्चखेदधारसदागतिः १० स्वबलत्रासनात्रस्ताःपरिपेतुर्दिशोदश ॥ रथांगदेशानादायपार्थच्छिन्नयुगाहयाः ११ कर्णकक्षविषाणेषुअंतरोष्ठेपुचैवह ॥ मर्मस्वंगेषुचाहत्यपातयत्समरेगजान् १२ कौरवाग्रगजानांतुशरीरैर्गतचेतसाम् ॥ क्षणेनसंवृताभूमिर्मेघैरिवनभस्तलम् १३ युगांतसमयेसर्वंयथास्थावरजंगमम् ॥ कालक्षयमशेषेणदहत्यग्निशिखःशिखी ॥ तद्वत्पार्थोमहाराजददाहसमरेरिपून् १४ ततःसर्वास्त्रतेजोभिर्धनुषोनिःस्वनेनच ॥ शब्देनामानुषाणांचभूतानांध्वजवासिनाम् ॥ भैरवंशब्दमत्यर्थंवानरस्यचकुर्वतः १५ देवारिपाच्चबीभत्सुस्तस्मिन्दौर्योधनेबले ॥ भयमुत्पादयामासबलवानरिमर्दनः १६ रथशक्तिममित्राणांप्रागेवनिपतद्भुवि ॥ सोऽपयात्सहसापश्चात्साहसाच्चाभ्युपेयिवान् १७ शरव्रातैःसुतीक्ष्णाग्रैःसमादिष्टैःखगैरिव ॥ अर्जुनस्तुखमावव्रेलोहितप्राशनैःखगैः १८ अत्रमध्येयथार्कस्यरश्मयस्तिग्मतेजसः ॥ दिशासुचतथाराजन्नसंख्याताःशरास्तदा १९

कालस्यऐश्वर्यंजगदित्यर्थः अग्निशिखःअग्निवत्तीक्ष्णाःशिखायस्य १४ । १५ देवारिपात् देवारीनसुरान्पातीतिदेवारिपः समुद्रस्तत्रजातोदेवारिपःशंखस्तस्मात् चात्भैरवंशब्दंकुर्वतइत्यनुकृष्यते १६ अमित्राणांवैरिणांरथशक्तिशरीरसामर्थ्यं । 'रथःस्यंदनदेहयोः'इतिकोशः । प्रागेवसहसादर्शनमात्रादेव निपतत्न्यपातयत् । शक्तिरितिपाठेन्यपतत् अडभावादिरार्षः । सोऽर्जुनःअपयात् । पयगतौगत्यभावादित्यर्थः । साहसाच्च अशक्यवधरूपात्पश्चात्तान्युद्धार्थंउपेयिवान् १७ खगैःपक्षिभिरिव खगैर्बाणैः १८ अत्रमध्येअत्रंअमत्रं'अत्राण्यस्मैपड्भिःसंभरंति'इत्यादाविवात्रापिमध्यमवर्णलोपश्छांदसः । यदाहशौनकोबृहद्देवतायां । 'वर्णस्यवर्णयोर्लोपोबहूनांव्यंजनस्यवा ॥ अत्राणीतिकपिर्नाभादनोयाभीत्यथासुच'इति अत्राण्यस्मैपड्भिः अमत्राणीत्यपेक्षितेवर्णस्यलोपः । प्रियातष्टानिमेकपिः वृषाकपिरित्यपेक्षिते वृषाइत्येतयोर्वर्णयोर्लोपः । अयंनाभावदति नाभानेदिष्टइत्यपेक्षितेवर्णत्रयलोपः । दनोविशइंद्र

दनोदानमनसइत्यपेक्षितेबहूनांवर्णानांलोपः । 'दनोदानमनस'इतियास्कः । तस्वायामियाचामीत्यपेक्षिते । अधासुहव्यंतेगावः मधास्विरुथपेक्षितेव्यंजनलोपः । यथापात्रेप्रविष्टाःसूर्यरश्मयोऽवकाशाभावात्संकुचंति तद्वद्गगनेऽर्जुनबाणानमांतीत्यर्थः १९ सकृदेवतत्क्षणमेवआनतमुन्नतं रथमर्जुनरथं परेरिपवःअभ्यसितुंपरिचेतुंशेकुः । तुशब्दोहेत्वर्थेऽतःसपुनःक्षणांतरेअलभ्यःपरैर्ज्ञातुमशक्यः तत्रहेतुमाहअश्वैरिति सःअश्वैःसह परान्रथात्अतिप्रपादयेत् इमंलोकमतिहापयित्वाऽमुंलोकंनयेत् । दृष्टमात्रोर्जुनःशरैःपरान्परलोकंप्रापयतीत्यर्थः २० नससज्जिरेनसक्ताः किंतुभित्वापरतएवगताः । एवंरथोऽपिद्विषांअनीकेष्वित्यर्थः । शराणांरथस्यचगतिर्नकुंठिताभवतीत्यर्थः २१ अनंतभोगःबहुफणःशेषइत्यर्थः २२ सर्वमेवातिगःसर्वाधिकः सर्व

सकृदेवानतंशेकूरथमभ्यसितुंपरे ॥ अलभ्यःपुनरश्वैस्तुरथात्सोऽतिप्रपादयेत् २० तेशराद्विट्शरीरेषुयथैवनससज्जिरे ॥ द्विडनीकेषुबीभत्सोर्नससज्जेरथस्तदा २१ सतद्विक्षोभयामासह्यरातिबलमंजसा ॥ अनंतभोगोभुजगःक्रीडन्निवमहार्णवे २२ अस्यतोनित्यमत्यर्थंसर्वमेवातिगस्तथा ॥ अश्रुतःश्रूयतेभूतैर्धनुर्घोषःकिरीटिनः २३ संततास्तत्रमातंगाबाणैरल्पांतरांतरे ॥ संवृतास्तेनदृश्यंतेमेघाइवगभस्तिभिः २४ दिशोऽनुभ्रमतःसर्वाःसव्यदक्षिणमस्यतः ॥ सततंदृश्यतेयुद्धेसायकासनमंडलम् २५ पतंत्यरूपेषुयथाचक्षूंषिनकदाचन ॥ नालक्ष्येषुशराःपेतुस्तथागांडीवधन्वनः २६ मार्गोगजसहस्रस्ययुगपद्गच्छतोवने ॥ यथाभवेत्तथाजज्ञेरथमार्गःकिरीटिनः २७ नूनंपार्थजयैषित्वाच्छक्रःसर्वामरैःसह ॥ हंत्यस्मानित्यमन्यंतपार्थेनानिहताःपरे २८ घ्नंतमत्यर्थमहितान्विजयंतत्रमेनिरे ॥ कालमर्जुनरूपेणसंहरंतमिवप्रजाः २९ कुरुसेनाशरीराणिपार्थेनैवाहतान्यपि ॥ सेदुःपार्थहतानीवपार्थकर्मानुशासनात् ३० ओषधीनांशिरांसीवद्विषच्छीर्षाणिसोऽन्वयात् ॥ अवनेशुःकुरूणांहिवीर्याण्यर्जुनजाद्भयात् ३१ अर्जुनानिलभिन्नानिवनान्यर्जुनविद्विषाम् ॥ चक्रुर्लोहितधाराभिर्धरणींलोहितांतराम् ३२ लोहितेनसमायुक्तैःपांसुभिःपवनोद्धुतैः ॥ बभूवुर्लोहितास्तत्रभृशमादित्यरश्मयः ३३ सार्कंखंतत्क्षणेनासीत्संध्यायामिवलोहितम् ॥ अप्यस्तंप्राप्यसूर्योऽपिनिवर्तेतनपांडवः ३४ तान्सर्वान्समरेशूरःपौरुषेसमवस्थितान् ॥ दिव्यैरस्त्रैरचिंत्यात्मासर्वानाच्छेद्धनुर्धरान् ३५ सतुद्रोणंत्रिसप्तत्याक्षुरप्राणांसमार्पयत् ॥ दुःसहंदशभिर्बाणैर्द्रौणिमष्टाभिरेवच ३६ दुःशासनंद्वादशभिःकृपंशारद्वतंत्रिभिः ॥ भीष्मंशांतनवंषष्ट्याराजानंचशतेनह ॥ कर्णंचकर्णिनाकर्णेविव्याधपरवीरहा ३७

शब्दाभिभावीत्यर्थः २३ तत्ररणभूमौ अल्पांतरांतरेअल्पेअल्पांतरे पदेपदेसंततताइत्यर्थः । तेनकारणेन तेगभस्तिभिःसूर्यरश्मिभिःसंवृताभिवाइवदृश्यंते २४ सायकासनंधनुस्तस्यमंडलमतिवेगात्अलातचक्रसदृशमित्यर्थः २५ । २६ मार्गइति गजसहस्रेणवनमिवार्जुनरथेनपरसैन्यमुपमृद्यतइत्यर्थः २७ । २८ विजयमर्जुनंकालमिवमेनिरे २९ पार्थेनैवहतानिपार्थहतानीव सेदुर्विशीर्णानिबभूवुरिति रामरावणयोर्युद्धंरामरावणयोरिवेतिवदभूतोपमेयमित्यर्थः । यतोऽत्रपार्थकर्मैवानुशासनमुपमार्थकर्तव्यंनान्यकर्म अतःपार्थहतानीवसेदुरित्यर्थः ३० ओषधीनांव्रीह्यादीनांशिरांसिकणिशानि अन्वयात्अनुक्रमात् अवनेशुःनष्टानि अर्जुनजात्अर्जुनकृतात्भयात्छेदरूपात् ३१ अर्जुनविद्विषांस्थाणुभूतानां वनानिआलयानिशरीराणीतियावत् । 'वनंनपुंसकंनीरेनिवासालयकानने'इतिमेदिनी ३२ । ३३ । ३४ । ३५ । ३६ कर्णिनाबाणेन कर्णेकर्णदेशे ३७

३८ । ३९ । ४० अरिष्टंशुभं वैय्याघ्रंव्याघ्रचर्मपरिवृतम् ४१ । ४२ । ४३ । ४४ अत्रैवसमयेएनंअव मानय अवरोह चअध्यारूढोभव युद्धायसज्जोभव । एनंअनुलक्षीकृत्येत्यर्थः ।
एतदेवद्वयंप्रकटयति यदिमेइति प्रथमंअप्रहारान्मानं पश्चात्प्रहारेणाधिरोहणंचेत्यर्थः ४५ । ४६ । ४७ व्यावहार्येणव्यवहारयोग्येनअश्रांतेनेत्यर्थः ४८ । ४९ । ५० । ५१

तस्मिन्विद्धेमहेष्वासेकर्णेसर्वास्त्रकोविदे ॥ हताश्वसूतेविरथेततोऽनीकमभज्यत ३८ तत्प्रभग्नंबलंदृष्ट्वापार्थमाजिस्थितंपुनः ॥ अभिप्रायंसमाज्ञायवैराटिरि
दमब्रवीत् ३९ आस्थायरुचिरंजिष्णोरथंसारथिनामया ॥ कतमंयास्यसेऽनीकमुक्तोयास्याम्यहंत्वया ४० ॥ अर्जुनउवाच ॥ लोहिताश्वमरिष्टंयंवैयाघ्रमनु
पश्यसि ॥ नीलांपताकामाश्रित्यरथेतिष्ठंतमुत्तर ४१ कृपस्यैतदनीकाग्र्यंप्रापयस्वैतदेवमाम् ॥ एतस्यदर्शयिष्यामिशीघ्रास्त्रंदृढधन्विनः ४२ ध्वजेकमंड
लुर्यस्यशातकौंभमयःशुभः ॥ आचार्यएषहिद्रोणःसर्वशस्त्रभृतांवरः ४३ सदाममैषमान्यस्तुसर्वशस्त्रभृतामपि ॥ सुप्रसन्नंमहावीरंकुरुष्वैनंप्रदक्षिणम् ४४ अत्रैवा
वावरोहैनमेषधर्मःसनातनः ॥ यदिमेप्रथमंद्रोणःशरीरेप्रहरिष्यति ॥ ततोऽस्यप्रहरिष्यामिनास्यकोपोभवेदिति ४५ अस्याविदूरेहिधनुर्ध्वजाग्रेयस्यदृश्य
ते ॥ आचार्यस्यैषपुत्रोवैअश्वत्थामामहारथः ४६ सदाममैषमान्यस्तुसर्वशस्त्रभृतामपि ॥ एतस्यत्वंरथंप्राप्यनिवर्तेथाःपुनःपुनः ४७ यएषतुरथानीकेसु
वर्णकवचावृतः ॥ सेनाग्र्येणतृतीयेनव्यावहार्येणतिष्ठति ४८ यस्यनागोध्वजाग्रेऽसौहेमकेतनसंवृतः ॥ धृतराष्ट्रात्मजःश्रीमानेषराजासुयोधनः ४९ एतस्या
भिमुखंवीररथंपररथारुजम् ॥ प्रापयस्वैषराजाहिप्रमाथीयुद्धदुर्मदः ५० एषद्रोणस्यशिष्याणांशीघ्रास्त्रेप्रथमोमतः ॥ एतस्यदर्शयिष्यामिशीघ्रास्त्रंविपुलंरणे
५१ नागकक्षातुरुचिराध्वजाग्रेयस्यतिष्ठति ॥ एषवैकर्तनःकर्णोविदितःपूर्वमेवते ५२ एतस्यरथमास्थायराधेयस्यदुरात्मनः ॥ यत्तोभवेथाःसंग्रामेस्पर्द्धतेहिसदा
मया ५३ यस्तुनीलानुसारेणपंचतारेणकेतुना ॥ हस्तावापीबृहद्धन्वारथेतिष्ठतिवीर्यवान् ५४ यस्यतारार्कचित्रोऽसौध्वजोरथवरेस्थितः ॥ यस्यैतत्पांडुरंछ
त्रंविमलंमूर्ध्नितिष्ठति ५५ महतोरथवंशस्यनानाध्वजपताकिनः ॥ बलाहकाग्रेसूर्योवायएषप्रमुखेस्थितः ५६ हैमंचंद्रार्कसंकाशंकवचंयस्यदृश्यते ॥ जातरू
पशिरस्त्राणंमनस्तापयतीवमे ५७ एषशांतनवोभीष्मःसर्वेषांनःपितामहः ॥ राजश्रियाऽभिवृद्धश्चसुयोधनवशानुगः ५८ पश्चादेषप्रयातव्योनमेविघ्नकरोभवे
त् ॥ एतेनयुध्यमानस्ययत्तःसंयच्छमेहयान् ५९ ततोऽभ्यवहदव्यग्रोवैराटिःसव्यसाचिनम् ॥ यत्रातिष्ठत्कृपोराजन्योत्स्यमानोधनंजयम् ६० ॥ इतिश्रीम
हाभारतेविराटपर्वणिगोहरणपर्वणिअर्जुनकृपसंग्रामेपंचपंचाशत्तमोऽध्यायः ॥५५॥ वैशंपायनउवाच ॥तान्यनीकान्यदृश्यंतकुरूणामुग्रधन्विनाम् ॥ संसर्पंतेयथा
मेघाघर्मांतेमंदमारुताः १ अभ्याशेवाजिनस्तस्थुःसमारूढाःप्रहारिणः ॥भीमरूपाश्चमातंगास्तोमरांकुशनोदिताः ॥ महामात्रैःसमारूढाविचित्रकवचोज्ज्वलाः २

नागकक्षाहस्त्यंकितपताकाचलः हस्तिशृंखलेत्यन्ये ५२ । ५३ नीलानुसारेणनीलपताकावता ताराःसुवर्णमंडलानि हस्तावापोहस्तत्राणंतद्वान् ५४ । ५५ सूर्योवासूर्यइव
५६ । ५७ । ५८ । ५९ । ६० ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपे पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ ७ ॥ ॥ तानीति घर्मांतेप्रावृट्काले १ । २

समारुह्यविमानमितिशेषः सुदर्शनंशत्रुसमागमंउपायात् । 'सुदर्शनोहरेश्चक्रेद्वीपेशत्रुसमागमे' इतिमेदिनी । सुदर्शनंयानमित्यन्ये ३ ततमंडलंसभूमिभागः ग्रहाणांमंडलमिववृत्तंशुशुभे ४
५ शतसहस्राणांशतंलक्षशतंकोटिसंख्याःस्थूणाः एकाहिरण्मयीस्थूणाचयदधारयत् ६ । ७ त्रयस्त्रिंशत् । अष्टौवसव एकादशरुद्रा द्वादशादित्याः प्रजापतिश्चवषट्कारश्चेतिब्राह्मणं ८
ततःशक्रःसुरगणैःसमारुह्यसुदर्शनम् ॥ सहोपायात्तदाराजन्विश्वाश्विमरुतांगणैः ३ तद्देवयक्षगंधर्वमहोरगसमाकुलम् ॥ शुशुभेऽभ्रविनिर्मुक्तंग्रहाणामिवमंडलम्
४ अस्त्राणांचबलंतेषांमानुषेषुप्रयुंजताम् ॥ तच्चभीमंमहद्युद्धंकृपार्जुनसमागमे ॥ द्रष्टुमभ्यागतादेवाःस्वविमानैःपृथक्पृथक् ५ शतंशतसहस्राणांयत्रस्थूणा
हिरण्मयी ॥ मणिरत्नमयीचान्याप्रासादंतदधारयत् ६ ततःकामगमंदिव्यंसर्वरत्नविभूषितम् ॥ विमानंदेवराजस्यशुशुभेखेचरंतदा ७ तत्रदेवास्त्रयस्त्रिंशति
ष्ठंतिसहवासवाः ॥ गंधर्वाराक्षसाःसर्पाःपितरश्चमहर्षिभिः ८ तथाराजावसुमनाबलाक्षःसुप्रतर्दनः ॥ अष्टकश्चशिबिश्चैवययातिर्नहुषोगयः ९ मनुःपूरूरघुर्भा
नुःकृशाश्वःसगरोनलः ॥ विमानेदेवराजस्यसमदृश्यंतसुप्रभाः १० अग्नेरीशस्यसोमस्यवरुणस्यप्रजापतेः ॥ तथाधातुर्विधातुश्चकुबेरस्ययमस्यच ११ अ
लंबुषोग्रसेनानांगंधर्वस्यचतुंबुरोः ॥ यथामानंयथोद्देशंविमानानिचकाशिरे १२ सर्वदेवनिकायाश्चसिद्धाश्चपरमर्षयः ॥ अर्जुनस्यकुरूणांचद्रष्टुंयुद्धमुपागताः
१३ दिव्यानांसर्वमाल्यानांगंधःपुण्योऽथसर्वशः ॥ प्रससारवसंताग्रेवनानामिवभारत १४ तत्ररत्नानिदेवानांसमदृश्यंतितिष्ठताम् ॥ आतपत्राणिवासांसिस्र
जश्चव्यजनानिच १५ उपाशाम्यद्रजोभौमंसर्वंव्याप्तंमरीचिभिः ॥ दिव्यगंधानुपादायवायुर्योधानसेवत १६ प्रभासितमिवाकाशंचित्ररूपमलंकृतम् ॥ संप
तद्भिःस्थितैश्चापिनानारत्नावभासितैः १७ विमानैर्विविधैश्चित्रैरुपानीतैःसुरोत्तमैः ॥ वज्रभृच्छुशुभेतत्रविमानस्थैःसुरैर्वृतः १८ बिभ्रन्मालांमहातेजाःपद्मोत्प
लसमायुताम् ॥ विप्रेक्ष्यमाणोबहुभिर्नातृप्यत्सुमहाहवम् १९ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिदेवागमनेषट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ७ ॥
वैशंपायनउवाच ॥ दृष्ट्वाव्यूढान्यनीकानिकुरूणांकुरुनंदनः ॥ तत्रवैराटिमामंत्र्यपार्थोवचनमब्रवीत् १ जांबूनदमयीवेदीध्वजेयस्यप्रदृश्यते ॥ तस्यदक्षिण
तोयाहिकृपःशारद्वतोयतः २ ॥ वैशंपायनउवाच ॥ धनंजयवचःश्रुत्वावैराटिस्त्वरितस्ततः ॥ हयान्रजतसंकाशान्हेमभांडानचोदयत् ३ आनुपूर्व्यात्तु
तत्सर्वमास्थायजवमुत्तमम् ॥ प्राहिणोच्चंद्रसंकाशान्कुपितानिवताहयान् ४ सगत्वाकुरुसेनायाःसमीपंहयकोविदः ॥ पुनरावर्त्तयामासताह्यान्वातरंहसः ५
प्रदक्षिणमुपावृत्यमंडलंसव्यमेवच ॥ कुरून्संमोहयामासमत्स्योयानेनतत्त्ववित् ६ कृपस्यरथमास्थायवैराटिरकुतोभयः ॥ प्रदक्षिणमुपावृत्यतस्थौतस्याग्र
तोबली ७ ततोऽर्जुनःशंखवरंदेवदत्तंमहारवम् ॥ प्रदध्मौबलमास्थायनामविश्राव्यचात्मनः ८ तस्यशब्दोमहानासीद्धम्यमानस्यजिष्णुना ॥ तथावीर्यवता
संख्येपर्वतस्येवदीर्यतः ९

९ । १० । ११ अलंबुषोग्रसेनानांतत्प्रभृतीनांगंधर्वाणां १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९
॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ७ ॥ दृष्ट्वेति १ । २ हेमभांडान्स्वर्णालंकारान् ३ । ४ । ५ मत्स्यःउत्तरः ६ । ७ । ८ । ९

१० वज्रःअशनिः ११ । १२ महोदधिजंशंखं १३ । १४ रथौरथिनौ १५ । १६ । १७ । १८ । १९ । २० । २१ कनकपर्वाग्रैःकनककलितफलकैः २२ । २३ । २४ स्थानंस्थैर्यं संज्ञामिति

पूजयांचक्रिरेशंखंकुरवःसहसैनिकाः ॥ अर्जुनेनतथाध्मातःशतधायन्नदीर्यते १० दिवमावृत्यशब्दस्तुनिवृत्तःशुश्रुवेपुनः ॥ सृष्टोमघवतावज्रःप्रपतन्निवपर्वते
११ एतस्मिन्नंतरेवीरोबलवीर्यसमन्वितः ॥ अर्जुनंप्रतिसंरब्धःकृपःपरमदुर्जयः ॥ अमृष्यमाणस्तंशब्दंकृपःशारद्वतस्तदा १२ अर्जुनंप्रतिसंरब्धोयुद्धार्थीसम
हारथः ॥ महोदधिजमादायदध्मौवेगेनवीर्यवान् १३ सतुशब्देनलोकांस्त्रीनावृत्यरथिनांवरः ॥ धनुरादायसुमहज्ज्याशब्दमकरोत्तदा १४ तौरथौसूर्यसंकाशौ
योत्स्यमानौमहाबलौ ॥ शारदाविवजीमूतौव्यरोचेतांव्यवस्थितौ १५ ततःशारद्वतस्तूर्णंपार्थंदशभिराशुगैः ॥ विव्याधपरवीरघ्नंनिशितैर्मर्मभेदिभिः १६
पार्थोऽपिविश्रुतंलोकेगांडीवंपरमायुधम् ॥ विकृष्यचिक्षेपबहून्नाराचान्मर्मभेदिनः १७ तानप्राप्तान्शितैर्बाणैर्नाराचान्रक्तभोजनान् ॥ कृपश्चिच्छेदपार्थस्य
शतशोऽथसहस्रशः १८ ततःपार्थस्तुसंक्रुद्धश्चित्रान्मार्गान्प्रदर्शयन् ॥ दिशःसंछादयन्बाणैःप्रदिशश्चमहारथः ॥ एकच्छायमिवाकाशमकरोत्सर्वतःप्रभुः १९
प्राच्छादयदमेयात्मापार्थःशरशतैःकृपम् ॥ सशरैरर्दितःक्रुद्धःशितैरग्निशिखोपमैः २० तूर्णंदशसहस्रेणपार्थमप्रतिमौजसम् ॥ अर्दयित्वामहात्मानंननर्दसमरे
कृपः २१ ततःकनकपर्वाग्रैर्वीरःसन्नतपर्वभिः ॥ त्वरन्गांडीवनिर्मुक्तैरर्जुनस्तस्यवाजिनः २२ चतुर्भिश्चतुरस्तीक्ष्णैरविध्यत्परमेषुभिः ॥ तेहयानिशितैर्बाणैर्ज्व
लद्भिरिवपन्नगैः ॥ उत्पेतुःसहसासर्वेकृपःस्थानादथाच्यवत् २३ च्युतंतुगौतमंस्थानात्समीक्ष्यकुरुनंदनः ॥ नाविध्यत्परवीरघ्नोरक्षमाणोऽस्यगौरवम् २४ सतुल
ब्ध्वापुनःस्थानंगौतमःसव्यसाचिनम् ॥ विव्याधदशभिर्बाणैस्त्वरितःकंकपत्रिभि २५ ततःपार्थोधनुस्तस्यभल्लेननिशितेनह ॥ चिच्छेदैकेनभूयश्चहस्ता
वापमथाहरत् २६ अथास्यकवचंबाणैर्निशितैर्मर्मभेदिभिः ॥ व्यधमन्नचपार्थोऽस्यशरीरमवपीडयत् २७ तस्यनिर्मुच्यमानस्यकवचात्कायआबभौ ॥ समये
मुच्यमानस्यसर्पस्येवतनुर्यथा २८ छिन्नेधनुषिपार्थेनसोऽन्यदादायकार्मुकम् ॥ चकारगौतमःसज्यंतदद्भुतमिवाभवत् २९ सतदप्यस्यकौंतेयश्चिच्छेदनतपर्व
णा ॥ एवमन्यानिचापानिबहूनिकृतहस्तवत् ॥ शारद्वतस्यचिच्छेदपांडवःपरवीरहा ३० सछिन्नधनुरादायरथशक्तिंप्रतापवान् ॥ प्राहिणोत्पांडुपुत्रायप्र
दीप्तामशनीमिव ३१ तामर्जुनस्तदायांतींशक्तिंहेमविभूषिताम् ॥ वियद्गतांमहोल्काभांचिच्छेददशभिःशरैः ३२ साऽपतद्दशधाछिन्नाभूमौपार्थेनधीमता ३३
युगपच्चैवभल्लैस्तुततःसज्यधनुःकृपः ॥ तमाशुनिशितैःपार्थंबिभेदशदभिःशरैः ३४ ततःपार्थोमहातेजाविशिखानग्नितेजसः ॥ चिक्षेपसमरेक्रुद्धस्त्रयोदशशि
लाशितान् ॥ ३५ अथास्ययुगमेकेनचतुर्भिश्चतुरोहयान् ॥ षष्ठेनचशिरःकायाच्छरेणरथसारथेः ३६ त्रिभिस्त्रिवेणुंसमरेद्वाभ्यामक्षंमहारथः ॥ द्वादशेनतुभ
ल्लेनचकर्तास्यध्वजंतदा ३७

यावत् २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७

३८ । ३९ नुन्नादूरीकृता प्रतिमार्गंविपरीतमार्गं अगमत्परावृत्तेत्यर्थः ४० । ४१ असव्यंआवृत्यअप्रदक्षिणंकृत्वेत्यर्थः । यमकंशत्रूणांनिरोधकंमंडलंकृत्वा यस्मिन्कृतेशत्रुरपमानितो लज्जि
तस्तिष्ठति ४२ अपजन्हुर्नीतवंतः ४३ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ७ ॥ कृपइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११

ततोवज्रनिकाशेनफाल्गुनःप्रहसन्निव ॥ त्रयोदशेनेंद्रसमःकृपंवक्षस्यविध्यत ३८ सछिन्नधन्वाविरथोहताश्वोहतसारथिः ॥ गदापाणिरवप्लुत्यतूर्णंचिक्षेपतां
गदाम् ३९ साचमुक्तागदागुर्वीकृपेणसुपरिष्कृता ॥ अर्जुनेनशरैर्नुन्नाप्रतिमार्गमथागमत् ४० तंतुयोधाःपरीप्संतःशारद्वतममर्षणम् ॥ सर्वतःसमरेपार्थंशर
वर्षैरवाकिरन् ४१ ततोविराटस्यसुतोऽसव्यमावृत्यवाजिनः ॥ यमकंमंडलंकृत्वातान्योधान्प्रत्यवारयत् ४२ ततःकृपमुपादायविरथंतेनरर्षभाः ॥ अपजन्हुर्म
हावेगाःकुंतीपुत्राद्धनंजयात् ४३ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउ० कृपापयानेसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ वैशंपायनउवाच ॥
कृपेऽपनीतेद्रोणस्तुप्रगृह्यसशरंधनुः ॥ अभ्यद्रवदनाधृष्यःशोणाश्वःश्वेतवाहनम् १ सतुरुक्मरथंदृष्ट्वागुरुमायांतमंतिकात् ॥ अर्जुनोजयतांश्रेष्ठउत्तरंवाक्यम
ब्रवीत् २ ॥ अर्जुनउवाच ॥ यत्रैषाकांचनीवेदीध्वजेयस्यप्रकाशते ॥ उच्छ्रिताप्रवरेदंडेपताकाभिरलंकृता ॥ अत्रमांवहभद्रंतेद्रोणानीकायसारथे ३ अ
श्वाःशोणाःप्रकाशंतेबृहंतश्चारुवाहिनः ॥ स्निग्धविद्रुमसंकाशास्ताम्रास्याःप्रियदर्शनाः ॥ युक्तारथवरेयस्यसर्वशिक्षाविशारदाः ४ दीर्घबाहुर्महातेजाबलरूप
समन्वितः ॥ सर्वलोकेषुविक्रांतोभारद्वाजःप्रतापवान् ५ बुद्ध्यातुल्योह्युशनसाबृहस्पतिसमोनये ॥ वेदास्तथैवचत्वारोब्रह्मचर्यंतथैवच ६ ससंहाराणिसर्वाणि
दिव्यान्यस्त्राणिमारिष ॥ धनुर्वेदश्चकात्स्न्येनयस्मिन्नित्यंप्रतिष्ठितः ७ क्षमादमश्चसत्यंचआनृशंस्यमथार्जवम् ॥ एतेचान्येचबहवोयस्मिन्नित्यंद्विजेगुणाः ८
तेनाहंयोद्धुमिच्छामिमहाभागेनसंयुगे ॥ तस्मात्त्वंप्रापयाचार्यंक्षिप्रमुत्तरवाहय ९ ॥ वैशंपायनउवाच ॥ अर्जुनेनैवमुक्तस्तुवैराटिर्हेमभूषणान् ॥ चोदयामासता
नश्वान्भारद्वाजरथंप्रति १० तमापतंतंवेगेनपांडवंरथिनांवरम् ॥ द्रोणःप्रत्युद्ययौपार्थंमत्तोमत्तमिवद्विपम् ११ ततःप्राध्मापयच्छंखंभेरीशतनिनादिनम् ॥
प्रचुक्षुभेबलंसर्वमुद्धूतइवसागरः १२ अथशोणान्सदश्वांस्तान्हंसवर्णैर्मनोजवैः ॥ मिश्रितान्समरेदृष्ट्वाव्यस्मयंतरणेनराः १३ तौरथौवीरसंपन्नौदृष्ट्वासंग्राममूर्ध
नि ॥ आचार्यशिष्यावजितौकृतविद्यौमनस्विनौ १४ समाश्लिष्टौतदाऽन्योन्यंद्रोणपार्थौमहाबलौ ॥ दृष्ट्वाप्राकंपतमुहुर्भरतानांमहद्बलम् १५ हर्षयुक्तस्ततःपा
र्थःप्रहसन्निववीर्यवान् ॥ रथंरथेनद्रोणस्यसमासाद्यमहारथः १६ अभिवाद्यमहाबाहुःसामपूर्वमिदंवचः ॥ उवाचश्लक्ष्णयावाचाकौंतेयःपरवीरहा १७ उषिताः
स्मोवनेवासंप्रतिकर्मचिकीर्षवः ॥ कोपंनार्हसिनःकर्तुंसदासमरदुर्जय १८ अहंतुप्रहृतेपूर्वंप्रहरिष्यामितेऽनघ ॥ इतिमेवर्ततेबुद्धिस्तद्भवान्कर्तुमर्हति १९

१२ प्रतिद्वंद्विनोर्द्रोणार्जुनयोर्वाजिनांमिश्रणेनातिसान्निध्याद्विस्मयोजातः १३ । १४ यदातौसमाश्लिष्टौ परस्परंरथस्थावेवालिंगितवंतौ तदाभरतानांबलंप्राकंपत द्रोणोऽर्जुनेनसख्यं
गतोऽस्मानेवप्रहरिष्यतीतिशंकया १५ । १६ । १७ प्रतिकर्मशत्रूणामपकारं १८ । १९

कृतहस्तवत्सुशिक्षितहस्तयुक्तंयथास्यात्तथाचिच्छेद २० । २१ । २२ सममविशेषेण २३ विदुषौविद्वांसौ २४ । २५ । २६ । २७ । २८ शिलाधौतैर्दृषदितेजितैः २९ । ३० भारसाधनं

ततोऽस्मैप्राहिणोद्द्रोणःशरानधिकविंशतिम् ॥ अप्राप्तांश्चैवतान्पार्थश्चिच्छेदकृतहस्तवत् २० ततःशरसहस्रेणरथंपार्थस्यवीर्यवान् ॥ अवाकिरत्ततोद्रोणःशी
घ्रमस्त्रंविदर्शयन् २१ हयांश्चरजतप्रख्यान्कंकपत्रैःशिलाशितैः ॥ अवाकिरदमेयात्मापार्थंसंकोपयन्निव २२ एवंप्रववृतेयुद्धंभारद्वाजकिरीटिनोः ॥ समंविमुंच
तोःसंख्येविशिखान्दीप्ततेजसः २३ तावुभौख्यातकर्माणावुभौवायुसमौजवे ॥ उभौदिव्यास्त्रविदुषावुभावुत्तमतेजसौ ॥ क्षिपंतौशरजालानिमोहयामासतुर्नृपा
न् २४ व्यस्मयंततत्तोयोधायेतत्रासन्समागताः ॥ शरान्विसृजतोस्तूर्णंसाधुसाध्वित्यपूजयन् २५ द्रोणंहिसमरेकोऽन्योयोद्धुमर्हतिफाल्गुनात् ॥ रौद्रःक्षात्रियध
र्मोऽयंगुरुणायदयुध्यत ॥ इत्यब्रुवन्जनास्तत्रसंग्रामशिरसिस्थिताः २६ वीरौतावभिसंरब्धौसंनिकृष्टौमहाभुजौ ॥ छादयेतांशरव्रातैरन्योन्यमपराजितौ २७
विस्फार्यसुमहच्चापंहेमपृष्ठंदुरासदम् ॥ भारद्वाजोऽथसंक्रुद्धःफाल्गुनंप्रत्यविध्यत २८ ससायकमयैर्जालैरर्जुनस्यरथंप्रति ॥ भानुमद्भिःशिलाधौतैर्भानोराच्छा
दयत्प्रभाम् २९ पार्थंचसुमहाबाहुर्महावेगैर्महारथः ॥ विव्याधनिशितैर्बाणैर्मेघोवृष्टयेवपर्वतम् ३० तथैवदिव्यंगांडीवंधनुरादायपांडवः ॥ शत्रुघ्नंवेगवान्हृ
ष्टोभारसाधनमुत्तमम् ३१ विससर्जशरांश्चित्रान्सुवर्णविकृतान्बहून् ॥ नाशयन्शरवर्षाणिभारद्वाजस्यवीर्यवान् ॥ तूर्णंचापविनिर्मुक्तैस्तदद्भुतमिवाभवत् ३२
सरथेनचरन्पार्थःप्रेक्षणीयोधनंजयः ॥ युगपद्दिक्षुसर्वासुसर्वतोऽस्त्राण्यदर्शयत् ३३ एकच्छायमिवाकाशंबाणैश्चक्रेसमंततः ॥ नादृश्यततदाद्रोणोनीहारेणेवसं
वृतः ३४ तस्याभवत्तदारूपंसंवृतस्यशरोत्तमैः ॥ जाज्वल्यमानस्यतदापर्वतस्येवसर्वतः ३५ दृष्ट्वातुपार्थस्यरणेशरैःस्वरथमावृतम् ॥ सविस्फार्यधनुःश्रेष्ठंमेघ
स्तनितनिःस्वनम् ३६ अग्निचक्रोपमंघोरंव्यकर्षत्परमायुधम् ॥ व्यशातयच्छरांस्तांस्तुद्रोणःसमितिशोभनः ३७ महानभूत्ततःशब्दोवंशानामिवदह्यताम्
३८ जांबूनदमयैःपुंखैश्चित्रचापविनिर्गतैः ॥ प्राच्छादयदमेयात्मादिशःसूर्यस्यचप्रभाम् ३९ ततःकनकपुंखानांशराणांनतपर्वणाम् ॥ वियच्चराणांवियति
दृश्यंतेबहवोव्रजाः ४० द्रोणस्यपुंखसक्ताश्चप्रभवंतःशरासनात् ॥ एकोदीर्घइवादृश्यदाकाशेसंहतःशरः ४१ एवंतौस्वर्णविकृतानविमुंचंतौमहाशरान् ॥
आकाशंसंवृतंवीरावुल्काभिरिवचक्रतुः ४२ शरास्तयोस्तुविबभुःकंकबर्हिणवाससः ॥ पंक्तयःशरदिखस्थानांहंसानांचरतामिव ४३ युद्धंसमभवत्तत्रसुसंरब्धं
महात्मनोः ॥ द्रोणपांडवयोर्घोरंवृत्रवासवयोरिव ४४ तौगजाविवचासाद्यविषाणाग्रैःपरस्परम् ॥ शरैःपूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ४५ तौव्यवाहरतांयु
द्धेसंरब्धौरणशोभिनौ ॥ उदीरयंतौसमरेदिव्यान्यस्त्राणिभागशः ४६ अथत्वाचार्यमुख्येनशरान्सृष्टान्शिलाशितान् ॥ न्यवारयच्छितैर्बाणैरर्जुनोजयतांवरः
४७ दर्शयन्वीक्षमाणानामस्त्रमुग्रपराक्रमः ॥ इषुभिस्तूर्णमाकाशंबहुभिश्चसमावृणोत् ४८ ॥४२॥

शत्रुमर्दनदक्षमं अच्छेद्यमित्यर्थः ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ । ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ विषाणाग्रैर्दंताग्रैः ४५ व्यवाहरतां व्यवहारंधर्मयुद्धंकृतवंतौ ४६ । ४७ । ४८

जिघांसताप्यर्जुनेनसह वात्सल्यात्स्वयमक्रीडत् नतुक्रूरोऽभूत् ४९ । ५० । ५१ । ५२ । ५३ । ५४ । ५५ । ५६ । ५७ ततक्षतुःक्षीणंचक्रतुः ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ आय

जिघांसंतंनरव्याघ्रमर्जुनंतिग्मतेजसम् ॥ आचार्यमुख्यःसमरेद्रोणःशस्त्रभृतांवरः ॥ अर्जुनेनसहाक्रीडच्छरैःसन्नतपर्वभिः ४९ दिव्यान्यस्त्राणिवर्षंतंतस्मिन्वैतुमु
लेरणे ॥ अस्त्रैरस्त्राणिसंवार्यफाल्गुनंसमयोधयत् ५० तयोरासीत्संप्रहारःक्रुद्धयोर्नरसिंहयोः ॥ अमर्षिणोस्तदाऽन्योन्यंदेवदानवयोरिव ५१ ऐंद्रंवायव्यमाग्ने
यमस्त्रमस्त्रेणपांडवः ॥ द्रोणेनमुक्तमात्रंतुग्रसतिस्मपुनःपुनः ५२ एवंशूरौमहेष्वासौविसृजंतौशितान्शरान् ॥ एकच्छायंचक्रतुस्तावाकाशंशरवृष्टिभिः ५३ त
त्रार्जुनेनमुक्तानांपततांवैशरीरिषु ॥ पर्वतेष्विववज्राणांशराणांश्रूयतेस्वनः ५४ ततोनागारथाश्चैववाजिनश्चविशांपते ॥ शोणिताक्ताव्यदृश्यंतपुष्पिताइवकिंशु
काः ५५ बाहुभिश्चसकेयूरैर्विचित्रैश्चमहारथैः ॥ सुवर्णचित्रैःकवचैर्ध्वजैश्चविनिपातितैः ५६ योधैश्चनिहतैस्तत्रपार्थबाणप्रपीडितैः ॥ बलमासीत्समुद्भ्रांतं
द्रोणार्जुनसमागमे ५७ विधुन्वानौतुतौतत्रधनुषीभारसाधने ॥ आच्छादयेतामन्योन्यंततक्षतुरथेषुभिः ५८ तयोःसमभवद्युद्धंतुमुलंभरतर्षभ ॥ द्रोणकौंतेय
योस्तत्रबलिवासवयोरिव ५९ अथपूर्णायतोत्सृष्टैःशरैःसन्नतपर्वभिः ॥ व्यदारयेतामन्योन्यंप्राणद्यूतेप्रवर्तिते ६० अथांतरिक्षेनादोऽभूद्द्रोणंतत्रप्रशंसताम् ॥ दुष्क
रंकृतवान्द्रोणोयदर्जुनमयोधयत् ६१ प्रमाथिनंमहावीर्यंदृढमुष्टिंदुरासदम् ॥ जेतारंदेवदैत्यानांसर्वेषांचमहारथम् ६२ अविभ्रमंचशिक्षांचलाघवंदूरपातिताम् ॥
पार्थस्यसमरेदृष्ट्वाद्रोणस्याभूच्चविस्मयः ६३ अथगांडीवमुद्यम्यदिव्यंधनुरमर्षणः ॥ विचकर्षरणेपार्थोबाहुभ्यांभरतर्षभ ६४ तस्यबाणमयंवर्षंशलभानामिवा
यतिम् ॥ दृष्ट्वातेविस्मिताःसर्वेसाधुसाध्वित्यपूजयन् ६५ नचबाणांतरेवायुरस्यशक्नोतिसर्पितुम् ॥ अनिशंसंदधानस्यशरानुत्सृजतस्तथा ६६ ददर्शनांतरं
कश्चित्पार्थस्याददतोऽपिच ६७ तथाशीघ्रास्त्रयुद्धेतुवर्तमानेसुदारुणे ॥ शीघ्रंशीघ्रतरंपार्थःशरानन्यानुदीरयत् ६८ ततःशतसहस्राणिशराणांनतपर्वणाम् ॥
युगपत्प्रापतंस्तत्रद्रोणस्यरथमंतिकात् ६९ कीर्यमाणेतदाद्रोणेशरैर्गांडीवधन्वना ॥ हाहाकारोमहानासीत्सैन्यानांभरतर्षभ ७० पांडवस्यतुशीघ्रास्त्रंमघवा
प्रत्यपूजयत् ॥ गंधर्वाप्सरसश्चैवयेचतत्रसमागताः ७१ ततोवृंदेनमहतारथानांरथयूथपः ॥ आचार्यपुत्रःसहसापांडवंपर्यवारयत् ७२ अश्वत्थामातुतत्कर्म
हृदयेनमहात्मनः ॥ पूजयामासपार्थस्यकोपंचास्याकरोद्भृशम् ७३ समन्युवशमापन्नःपार्थमभ्यद्रवद्रणे ॥ किरञ्छरसहस्राणिपर्जन्यइववृष्टिमान् ७४ आवृ
१०० त्यतुमहाबाहुर्यतोद्रौणिस्ततोहयान् ॥ अंतरंप्रददौपार्थोद्रोणस्यव्यपसर्पितुम् ७५ सतुलब्ध्वांऽतरंतूर्णमपायाज्जवनैर्हयैः ॥ छिन्नवर्मध्वजःशूरोनिकृत्तःपर
मेषुभिः ७६ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिद्रोणापयानेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ७ ॥

तिंसंततिं ६५ । ६६ । ६७ । ६८ । ६९ । ७० । ७१ । ७२ । ७३ । ७४ अंतरमवकाशं ७५ निकृत्तःप्रहृतः ७६ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेअष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥

ततइति १ । २ । ३ । ४ नप्रजानंत अडभावआर्षः नचज्ञातवंतः ५ विवरंरंध्रं ६ । ७ अपकृष्यआकृष्य ८ । ९ अर्धचंद्रंअर्धचंद्राकारं ललाटंआवृत्यप्रमृज्य स्वेदेनज्यांप्रमृज्येत्यर्थः । तेन अश्वत्थाम्ना १० । ११ । १२ । १३ । १४ । १५ । १६ चक्षुर्दधेदृष्टवान् १७ । १८ । १९ । २० कामयन्कामयमानः २१ ॥ इतिविराटप ० नी ० भा ० भा ० एकोनष

॥ वैशंपायनउवाच ॥ ततोद्रौणिर्महाराजप्रययावर्जुनंरणे ॥ तंपार्थःप्रतिजग्राहवायुवेगमिवोद्धतम् ॥ शरजालेनमहतावर्षमाणमिवांबुदम् १ तयोर्देवासुरसमः सन्निपातोमहानभूत् ॥ किरतोःशरजालानिवृत्रवासवयोरिव २ नस्मसूर्यस्तदाभाति नचवातिसमीरणः ॥ शरजालावृतेव्योम्निच्छायाभूतेसमंततः ३ महांश्च टचटाशब्दोयोधयोर्हन्यमानयोः ॥ दह्यतामिववेणूनामासीत्परपुरंजय ४ हयानस्यार्जुनःसर्वान्कृतवानल्पजीवितान् ॥ तेराजन्नप्रजानंतदिशंकांचनमोहिताः ५ ततोद्रौणिर्महावीर्यःपार्थस्यविचरिष्यतः ॥ विवरंसूक्ष्ममालोक्यज्यांचिच्छेदक्षुरेणह ॥ तदस्यापूजयन्देवाःकर्मदृष्ट्वाऽतिमानुषम् ६ द्रोणोभीष्मश्च कर्णश्चकृपश्चैवमहारथाः ॥ साधुसाध्वितिभाषंतोऽपूजयन्कर्मतस्यतत् ७ ततोद्रौणिर्धनुःश्रेष्ठमपकृष्यरथर्षभम् ॥ पुनरेवाहनत्पार्थंहृदयेकंकपत्रिभिः ८ ततःपार्थोमहाबाहुःप्रहस्यस्वनवत्तदा ॥ योजयामासनवयामौर्व्यागांडीवमोजसा ९ ततोऽर्धचंद्रमावृत्यतेनपार्थःसमागमत् ॥ वारणेनेवमत्तेनमत्तोवारणयूथपः १० ततःप्रववृतेयुद्धंपृथिव्यामेकवीरयोः ॥ रणमध्येद्वयोरेवंसुमहल्लोमहर्षणम् ११ तौवीरौददृशुःसर्वेकुरवोविस्मयान्विताः ॥ युध्यमानौमहावीर्यौयूथपाविवसंगतौ १२ तौसमाजघ्नतुर्वीरावन्योन्यंपुरुषर्षभौ ॥ शरैराशीविषाकारैर्ज्वलद्भिरिवपन्नगैः १३ अक्षय्याविषुधीदिव्यौपांडवस्यमहात्मनः ॥ तेनपार्थोरणेशूरस्तस्थौगिरिरिवाचलः १४ अश्वत्थाम्नःपुनर्बाणाःक्षिप्रमभ्यस्यतोरणे ॥ जग्मुःपरिक्षयंतूर्णमभूत्तेनाधिकोऽर्जुनः १५ ततःकर्णोमहाचापंविकृष्याभ्यधिकंतथा ॥ अवाक्षिपत्ततःशब्दोहाहाकारोमहानभूत् १६ ततश्चक्षुर्दधेपार्थोयत्रविस्फार्यतेधनुः ॥ ददर्शतत्रराधेयंतस्यकोपोऽभ्यवर्धत १७ सरोषवशमापन्नःकर्णमेवजिघांसया ॥ तमैक्षतविवृत्ताभ्यांनेत्राभ्यांकुरुपुंगवः १८ तथातुविमुखेपार्थेद्रोणपुत्रस्यसायकान् ॥ त्वरिताःपुरुषाराजन्नुपाजह्रुःसहस्रशः १९ उत्सृज्यचमहाबाहुर्द्रोणपुत्रंधनंजयः ॥ अभिदुद्रावसहसाकर्णमेवसपत्नजित् २० तमभिद्रुत्यकौंतेयःक्रोधसंरक्तलोचनः ॥ कामयन्द्वैरथंतेनयुद्धंवचनमब्रवीत् २१ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरगोग्रहेअर्जुनाश्वत्थामयुद्धेएकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥ अर्जुनउवाच ॥ कर्णयत्तेसभामध्ये बहुवाचाविकत्थितम् ॥ नमेयुधिसमोऽस्तीतितदिदंसमुपस्थितम् १ सोऽद्यकर्णमयासार्धंव्यवहृत्यमहामृधे ॥ ज्ञास्यस्यबलमात्मानंनचान्यानवमन्यसे २ अवोचःपरुषावाचोधर्ममुत्सृज्यकेवलम् ॥ इदंतुदुष्करंमन्येयदिदंतेचिकीर्षितम् ३ यत्त्वयाकथितंपूर्वंमामनासाद्यकिंचन ॥ तदद्यकुरुराधेयकुरुमध्येमयासह ४ यत्सभायांसपांचालींक्लिश्यमानांदुरात्मभिः ॥ दृष्टवानसितस्याद्यफलमाप्नुहिकेवलम् ५

ष्टितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ छ ॥ ॥ छ ॥ ॥ कर्णेति तेत्वया १ । २ । ३ । ४ । ५

६ । ७ । ८ तेतववाक्यंकर्तृ कर्मअतिशेते । अल्पंकर्म वाक्यंतुबहुलमित्यर्थः ९ इतःपरंतवपराक्रमं गृह्णीमहेअंगीकुर्महे १० । ११ । १२ । १३ । १४ । १५ । १६ । १७

धर्मपाशनिबद्धेनयन्मयामर्षितंपुरा ॥ तस्यराधेयकोपस्यविजयंपश्यमेमृधे ६ वनेद्वादशवर्षाणियानिसोढानिदुर्मते ॥ तस्याद्यप्रतिकोपस्यफलंप्राप्नुहिसंप्रति ७ एहिकर्णमयासार्धंप्रतियुध्यस्वसंगरे ॥ प्रेक्षकाःकुरवःसर्वेभवंतुतवसैनिकाः ८ ॥ कर्णउवाच ॥ ब्रवीषिवाचायत्पार्थकर्मणातत्समाचर ॥ अतिशेतेहितेवाक्यंकर्मतत्प्रथितंभुवि ९ यत्त्वयामर्षितंपूर्वंतदशक्तेनमर्षितम् ॥ इतोगृह्णीमहेपार्थतवदृष्ट्वापराक्रमम् १० धर्मपाशनिबद्धेनयत्त्वयामर्षितंपुरा ॥ तथैवबद्धमात्मानमबद्धमिवमन्यसे ११ यदितावद्वनेवासोयथोक्तश्चरितस्त्वया ॥ तत्त्वंधर्मार्थविक्लिष्टःसमयंयोद्धुमिच्छसि १२ यदिशक्रःस्वयंपार्थयुध्यतेतवकारणात् ॥ तथाऽपिनव्यथाकाचिन्ममस्याद्विक्रमिष्यतः १३ अयंकौंतेयकामस्तेनचिरात्समुपस्थितः ॥ योत्स्यसेहिमयासार्द्धमद्यद्रक्ष्यसिमेबलम् १४ ॥ अर्जुनउवाच ॥ इदानीमेवतावत्त्वमपयातोरणान्मम ॥ तेनजीवसिराधेयनिहतस्त्वनुजस्तव १५ भ्रातरंघातयित्वाकस्त्यक्त्वारणशिरश्चकः ॥ त्वदन्यःकःपुमान्सत्सुब्रूयादेवंव्यवस्थितः १६ ॥ वैशंपायनउवाच ॥ इतिकर्णंब्रुवन्नेवबीभत्सुरपराजितः ॥ अभ्ययाद्विसृजन्बाणान्कायावरणभेदिनः १७ प्रतिजग्राहतंकर्णःप्रीयमाणोमहारथः ॥ महताशरवर्षेणवर्षमाणमिवांबुदम् १८ उत्पेतुःशरजालानिघोररूपाणिसर्वशः ॥ अविध्यदश्वान्बाह्वोश्चहस्तावापंपृथक्पृथक् १९ सोऽमृष्यमाणःकर्णस्यनिषंगस्यावलंबनम् ॥ चिच्छेदनिशिताग्रेणशरेणनतपर्वणा २० उपासंगादुपादायकर्णोबाणानथापरान् ॥ विव्याधपांडवंहस्तेतस्यमुष्टिरशीर्यत २१ ततःपार्थोमहाबाहुःकर्णस्यधनुरच्छिनत् ॥ सशक्तिंप्राहिणोत्तस्मैतांपार्थोव्यधमच्छरैः २२ ततोऽनुपेतुर्बहवोराधेयस्यपदानुगाः ॥ तांश्चगांडीवनिर्मुक्तैःप्राहिणोद्यमसादनम् २३ ततोऽस्याश्वान्शरैस्तीक्ष्णैर्बीभत्सुर्भारसाधनैः ॥ आकर्णमुक्तैरभ्यघ्नंस्तेहताःप्रापतन्भुवि २४ अथापरेणबाणेनज्वलितेनमहौजसा ॥ विव्याधकर्णंकौंतेयस्तीक्ष्णेनोरसिवीर्यवान् २५ तस्यभित्वातनुत्राणंकायमभ्यगमच्छरः ॥ ततःसतमसाऽऽविष्टोनस्मकिंचित्प्रजज्ञिवान् २६ सगाढवेदनोहित्वारणंप्रायादुदङ्मुखः ॥ ततोऽर्जुनउदक्रोशदुत्तरश्चमहारथः २७ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिकर्णापयानेषष्टितमोऽध्यायः ॥ ६० ॥ ॥ वैशंपायनउवाच ॥ ततोवैकर्तनंजित्वापार्थोवैराटिमब्रवीत् ॥ एतन्मांप्रापयानीकंयत्रतालोहिरण्मयः १ अत्रशांतनवोभीष्मोरथेऽस्माकंपितामहः ॥ कांक्षमाणोमयायुद्धंतिष्ठत्यमरदर्शनः २ अथसैन्यंमहद्दृष्ट्वारथनागहयाकुलम् ॥ अब्रवीदुत्तरःपार्थमपविद्धःशरैर्भृशम् ३ नाहंशक्ष्यामिवीरेहनियंतुंतेहयोत्तमान् ॥ विषीदंतिममप्राणामनोविह्वलतीवमे ४

१८ । १९ अवलंबनंसूत्रंचिच्छेद २० ततोनिषंगेमहातूणीरेपतितेसति उपासंगात्क्षुद्रतूणीरात्स्वदेहबाह्यात् २१ । २२ । २३ । २४ । २५ । २६ । २७ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेषष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ छ ॥ ॥ तवइति १ । २ । ३ । ४

५ । ६ । ७ । ८ । ९ । १० नसंधानं नसंदधानं वर्णलोपआर्षः ११ । १२ । १३ । १४ । १५ । १६ । १७ निशामयपश्य शतन्हदांविद्युतम् १८ । १९ । २० । २१ शतंमार्गाइतिसर्वतो

अस्त्राणामिवदिव्यानांप्रभावःसंप्रयुज्यताम् ॥ त्वयाचकुरुभिश्चैवद्रवंतीवदिशोदश ५ गंधेनमूर्छितश्चाहंवसारुधिरमेदसाम् ॥ द्वैधीभूतंमनोमेऽद्यतवचैवप्रप
श्यतः ६ अदृष्टपूर्वःशूराणांमयासंख्येसमागमः ॥ गदापातेनमहताशंखानांनिःस्वनेनच ७ सिंहनादैश्चशूराणांगजानांबृंहितैस्तथा ॥ गांडीवशब्देनभृशम
शनिप्रतिमेनच ॥ श्रुतिःस्मृतिश्चमेवीरप्रनष्टामूढचेतसः ८ अलातचक्रप्रतिमंमंडलंसततंत्वया ॥ व्याक्षिप्यमाणंसमरेगांडीवंचप्रकर्षता ॥ दृष्टिःप्रचलिता
वीरहृदयंदीर्यतीवमे ९ वपुश्चोग्रंतवरणेक्रुद्धस्येवपिनाकिनः ॥ व्यायच्छतस्तवभुजंदृष्ट्वाभीर्मेभवत्यपि १० नाददानंसंधानंनमुंचंतंशरोत्तमान् ॥ त्वामहंसंप्र
पश्यामिपश्यन्नपिनचेतनः ११ अवसीदंतिमेप्राणाभूरियंचलतीवच ॥ नचप्रतोदंरश्मींश्चसंयंतुंशक्तिरस्तिमे १२ ॥ अर्जुनउवाच ॥ माभैषीःस्तंभयात्मानंत्वयाऽ
पिनरपुंगव ॥ अत्यद्भुतानिकर्माणिकृतानिरणमूर्धनि १३ राजपुत्रोऽसिभद्रंतेकुलेमत्स्यस्यविश्रुते ॥ जातस्त्वंशत्रुदमनेनावसीदितुमर्हसि १४ धृतिंकृत्वासु
विपुलांराजपुत्ररथेमम ॥ युध्यमानस्यसमरेहयान्संयच्छशत्रुहन् १५ ॥ वैशंपायनउवाच ॥ एवमुक्त्वामहाबाहुर्वैराटिंनरसत्तमः ॥ अर्जुनोरथिनांश्रेष्ठउत्तरंवा
क्यमब्रवीत् १६ सेनाग्रमाशुभीष्मस्यप्रापयस्वैतदेवमाम् ॥ आच्छेत्स्याम्यहमेतस्यधनुर्ज्यामपिचाहवे १७ अस्यंतंदिव्यमस्त्रंमांचित्रमद्यनिशामय ॥ शत
ह्रदामिवायांतींस्तनयित्नोरिवांबरे १८ सुवर्णपृष्ठंगांडीवंद्रक्ष्यंतिकुरवोमम ॥ दक्षिणेनाथवामेनकतरेणास्विदस्यति १९ इतिमांसंगताःसर्वेतर्कयिष्यंतिशत्र
वः ॥ शोणितोदांरथावर्तांनागनक्रांदुरत्ययाम् ॥ नदींप्रस्कंदयिष्यामिपरलोकप्रवाहिनीम् २० पाणिपादशिरःपृष्ठबाहुशाखानिरंतरम् ॥ वनंकुरूणांछेत्स्या
मिशरैःसन्नतपर्वभिः २१ जयतःकौरवींसेनामेकस्यममधन्विनः ॥ शतंमार्गाभविष्यंतिपावकस्येवकानने २२ मयाचक्रमिवाविद्धंसैन्यंद्रक्ष्यसिकेवलम् ॥ इष्वस्त्रे
शिक्षितंचित्रमहंदर्शयिताऽस्मिते २३ असंभ्रांतोरथेतिष्ठसमेषुविषमेषुच ॥ दिवमावृत्यतिष्ठंतंगिरिंभेत्स्यामिपत्रिभिः २४ अहमिंद्रस्यवचनात्संग्रामेऽभ्यहनं
पुरा ॥ पौलोमान्कालखंजांश्चसहस्राणिशतानिच २५ अहमिंद्राद्दृढांमुष्टिंब्रह्मणःकृतहस्तताम् ॥ प्रगाढेतुमुलंचित्रमितिविद्धिप्रजापतेः २६ अहंपारे
समुद्रस्यहिरण्यपुरवासिनाम् ॥ जित्वाषष्टिंसहस्राणिरथिनामुग्रधन्विनाम् २७ शीर्यमाणानिकूलानिप्रवृद्धेनेववारिणा ॥ मयाकुरूणांवृंदानिपात्यमाना
निपश्यवै २८ ध्वजवृक्षंपत्तितृणंरथसिंहगणायुतम् ॥ वनमादीपयिष्यामिकुरूणामस्त्रतेजसा २९ तानहंरथनीडेभ्यःशरैःसन्नतपर्वभिः ॥ यतान्सर्वा
नतिबलान्योत्स्यमानानवस्थितान् ॥ एकःसंकालयिष्यामिवज्रपाणिरिवासुरान् ३०

मार्गस्यानिरोधउक्तः सर्वतोवाममबाणागमिष्यंतीत्यर्थः २२ आविद्धंभ्राम्यमाणंशिक्षितंशिक्षाम् २३ । २४ । २५ प्रगाढेसंकटे चित्रंनानाविधं तुमुलंसंकटयुद्धं सर्वत्रवेधीतिविशेषः
२६ जित्वाजेतुंशक्तः २७ । २८ रथसिंहगणैःआसमंतात्युतम् २९ । ३०

३१ । ३२ व्यवागाहत्आलोडितवान् ३३ । ३४ उपावृत्यसंमुखीभूय विकृष्यछित्वा कलधौताग्रैः स्वर्णरंजितफलकैर्बाणैः ३५ । ३६ । ३७ । ३८ । ३९ एनंदुःशासनम् ४० । ४१ । ४२

रौद्रंरुद्रादहंह्यस्त्रंवारुणंवरुणादपि ॥ अस्त्रमाग्नेयमग्नेश्चवायव्यंमातरिश्वनः ॥ वज्रादीनितथाऽस्त्राणिशक्रादहमवाप्तवान् ३१ धार्त्तराष्ट्रवनंघोरंनरसिंहाभिरक्षि
तम् ॥ अहमुत्पाटयिष्यामिवैराटेव्येतुतेभयम् ३२ ॥ वैशंपायनउवाच ॥ एवमाश्वासितस्तेनवैराटिःसव्यसाचिना ॥ व्यवागाहद्रथानीकंभीमंभीष्माभिरक्षि
तम् ३३ तमायांतंमहाबाहुंजिगीषंतंरणेकुरून् ॥ अभ्यवारयदव्यग्रःक्रूरकर्माऽऽपगासुतः ३४ तस्यजिष्णुरुपावृत्यध्वजंमूलादपातयत् ॥ विकृष्यकलधौताग्रैः
सविद्धःप्रापतद्भुवि ३५ तंचित्रमाल्याभरणाःकृतविद्यामनस्विनः ॥ आगच्छन्भीमधन्वानंचत्वारश्चमहाबलाः ३६ दुःशासनोविकर्णश्चदुःसहोऽथविविंशतिः ॥
आगत्यभीमधन्वानंबीभत्सुंपर्यवारयन् ३७ दुःशासनस्तुभल्लेनविद्ध्वावैराटिमुत्तरम् ॥ द्वितीयेनार्जुनंवीरःप्रत्याविध्यत्स्तनांतरे ३८ तस्यजिष्णुरुपावृत्य
पृथुधारंणकार्मुकम् ॥ चकर्त्तगार्ध्रपत्रेणजातरूपपरिष्कृतम् ३९ अथैनंपंचभिःपश्चात्प्रत्यविध्यत्स्तनांतरे ॥ सोऽपयातोरणंहित्वापार्थबाणप्रपीडितः ४०
तंविकर्णःशरैस्तीक्ष्णैर्गार्ध्रपत्रैरजिह्मगैः ॥ विव्याधपरवीरघ्नमर्जुनंधृतराष्ट्रजः ४१ ततस्तमपिकौंतेयःशरेणानतपर्वणा ॥ ललाटेऽभ्यहनत्तूर्णंसविद्धःप्रापतद्र
थात् ४२ ततःपार्थमभिद्रुत्यदुःसहःसविविंशतिः ॥ अवाकिरच्छरैस्तीक्ष्णैःपरीप्सुर्भ्रातरंरणे ४३ तावुभौगार्ध्रपत्राभ्यांनिशिताभ्यांधनंजयः ॥ विध्वायुगपद
व्यग्रस्तयोर्वाहानसूदयत् ४४ तौहताश्वौविभिन्नांगौधृतराष्ट्रात्मजावुभौ ॥ अभिपत्यरथैरन्यैरपनीतौपदानुगैः ४५ सर्वादिशश्चाभ्यपतद्बीभत्सुरपराजितः ॥
किरीटमालीकौंतेयोलब्धलक्षोमहाबलः ४६ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणि अर्जुनदुःशासनादियुद्धेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ७ ॥
॥ वैशंपायनउवाच ॥ अथसंगम्यसर्वेतेकौरवाणांमहारथाः ॥ अर्जुनंसहितायत्ताःप्रत्ययुध्यंतभारत १ ससायकमयैर्जालैःसर्वतस्तान्महारथान् ॥ प्राच्छाद
यदमेयात्मानीहारेणेवपर्वतान् २ नदद्भिश्चमहानागैर्हेषमाणैश्चवाजिभिः ॥ भेरीशंखनिनादैश्चसशब्दस्तुमुलोऽभवत् ३ नराश्वकायान्निर्भिद्यलोहानिकवचा
निच ॥ पार्थस्यशरजालानिविनिष्पेतुःसहस्रशः ४ त्वरमाणःशरानस्यन्पांडवःप्रबभौरणे ॥ मध्यंदिनगतोऽर्चिष्मान्शरदीवदिवाकरः ५ उपप्लवंतवित्रस्ता
रथेभ्योरथिनस्तथा ॥ सादिनश्चाश्वपृष्ठेभ्योभूमौचैवपदातयः ६ शरैःसंछिद्यमानानांकवचानांमहात्मनाम् ॥ ताम्रराजतलौहानांप्रादुरासीन्महास्वनः ७
छन्नमायोधनंसर्वंशरीरैर्गतचेतसाम् ॥ गजाश्वसादिनांतत्रशितबाणात्तजीवितैः ८ रथोपस्थाभिपतितैरास्तृतामानवैर्मही ॥ प्रनृत्यतीवसंग्रामेचापहस्तो
धनंजयः ९ श्रुत्वागांडीवनिर्घोषंविस्फूर्जितमिवाशनेः ॥ त्रस्तानिसर्वसैन्यानिव्यपागच्छन्महाहवात् १०

४३ । ४४ । ४५ लब्धलक्षः अप्रच्युतलक्षः ४६ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेएकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ अथेति १ निहारेण
धूमोष्मणा २ । ३ । ४ । ५ उपप्लवंति इतस्ततोधावंति ६ । ७ आयोधनंरणभूः गतचेतसांमूढानां आत्तजीवितैर्मृतैःशरीरैः ८ रथोपस्थेभ्योऽभिनःपतितैः ९ । १०

 धारीणिशिरांसि स्रजश्चपतितानिदृश्यंते ११ । १२ । १३ श्रीणिचदशचेति त्रिदशा।निवर्षाणि अवरुद्धःपार्थस्तदानींस्वेच्छयाऽचरदित्यर्थः १४ । १५ । १६ । १७ नागाहस्तिनस्तत्रकूर्माः
कुंडलोष्णीषधारीणिजातरूपस्रजस्तथा ॥ पतितानिस्मदृश्यंतेशिरांसिरणमूर्धनि ११ विशिखोन्मथितैर्गात्रैर्बाहुभिश्चसकार्मुकैः ॥ सहस्ताभरणैश्चान्यैःप्रच्छ
 न्नाभातिमेदिनी १२ शिरसांपात्यमानानामंतरानिशितैःशरैः ॥ अश्मवृष्टिरिवाकाशादभवद्भरतर्षभ १३ दर्शयित्वातथाऽऽत्मानंरौद्रंरुद्रपराक्रमः ॥ अ
वरुद्धोऽचरत्पार्थोवर्षाणित्रिदशानिच ॥ क्रोधाग्निमुत्सृजन्वीरोधार्तराष्ट्रेषुपांडवः १४ तस्यतद्दहतःसैन्यंदृष्ट्वाचैवपराक्रमम् ॥ सर्वेशांतिपरायोधाधार्तराष्ट्रस्य
पश्यतः १५ वित्रासयित्वातत्सैन्यंद्रावयित्वामहारथान् ॥ अर्जुनोजयतांश्रेष्ठःपर्यवर्ततभारत १६ प्रावर्तयन्नदींघोरांशोणितोदांतरंगिणीम् ॥ अस्थिशै
वालसंबाधांयुगांतेकालनिर्मिताम् १७ शरचापप्लवांघोरांकेशशैवलशाद्वलाम् ॥ तनुत्रोष्णीषसंबाधांनागकूर्ममहाद्विपाम् १८ मेदोवसासृक्प्रवहांमहाभयावि
वर्धिनीम् ॥ रौद्ररूपांमहाभीमांश्वापदैरभिनादिताम् १९ तीक्ष्णशस्त्रमहाग्राहांक्रव्यादगणसेविताम् ॥ मुक्ताहारोर्मिकलिलांचित्रालंकारबुद्बुदाम् २० शरसंघ
महावर्तांनागनक्रांदुरत्ययाम् ॥ महारथमहाद्वीपांशंखदुंदुभिनिःस्वनाम् ॥ चकारचतदापार्थोनदींदुस्तरशोणिताम् २१ आददानस्यहिशरान्संधायचविमुं
चतः ॥ विकर्षतश्चगांडीवंनकश्चिद्ददृशेजनः २२ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिअर्जुनसंकुलयुद्धेद्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ वैशंपायनउ
वाच ॥ ततोदुर्योधनःकर्णोदुःशासनविविंशती ॥ द्रोणश्चसहपुत्रेणकृपश्चापिमहारथः १ पुनर्ययुश्चसंरब्धाधनंजयजिघांसवः ॥ विस्फारयंतश्चापानिबलवं
तिदृढानिच २ तान्विकीर्णपताकेनरथेनादित्यवर्चसा ॥ प्रत्युद्ययौमहाराजसमंताद्वानरध्वजः ३ ततःकृपश्चकर्णश्चद्रोणश्चरथिनांवरः ॥ तंमहास्त्रैर्महावीर्यैप
रिवार्यधनंजयम् ४ शरौघान्सम्यगस्यंतोजीमूताइववार्षिकाः॥ ववर्षुःशरवर्षाणिपातयंतोधनंजयम् ५ इषुभिर्बहुभिस्तूर्णंसमरेलोमवाहिभिः ॥ अदूरात्पर्यव
स्थाप्यपूरयामासुराहृताः ६ तथातैरवकीर्णस्यदिव्यैरस्त्रैःसमंततः ॥ नतस्यद्व्यंगुलमपिविवृतंसंप्रदृश्यते ७ ततःप्रहस्यबीभत्सुर्दिव्यमैंद्रंमहारथः ॥ अस्त्र
मादित्यसंकाशंगांडीवेसमयोजयत् ८ शररश्मिरिवादित्यःप्रतस्थेसमरेबली ॥ किरीटमालीकौंतेयःसर्वान्प्राच्छादयत्कुरून् ९ यथाबलाहकेविद्युत्पावकोवा
शिलोच्चये ॥ तथागांडीवमभवदिंद्रायुधमिवाननतम् १० यथावर्षतिपर्जन्येविद्युद्विभ्राजतेदिवि ॥ द्योतयंतीदिशःसर्वाःपृथिवींचसमंततः ११ तथादशदिशः
सर्वाःपतद्गांडीवमावृणोत् ॥ नागाश्चरथिनःसर्वेमुमुहुस्तत्रभारत १२ सर्वेशांतिपरायोधाःस्वचित्तानिनलेभिरे ॥ संग्रामेविमुखाःसर्वेयोधास्तेहतचेतसः १३

महाद्विपाजलगजाश्चयस्यांतां १८ । १९ । २० । २१ । २२ ॥ इति विराटपर्वणि नी० भा० द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ॥ १ ततइति २ विकीर्णाविस्तारितापताकाध्वजांचलो
यस्यतेन ३ । ४ पातयंतःपीडयंतः ५ पर्यवस्थाप्यस्तब्धीकृत्य इषुभिःपूरयामासुःआवृतवंतः ६ । ७ । ८ । ९ । १० । ११ । १२ स्वचित्तानिअयमहमितिनज्ञातवंतः १३

१४ ॥ इतिविराटप० नी० भा० त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ७ ॥ ॥ ततइति १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ अग्निचक्रंअलातचक्रं
एवंसर्वाणिसैन्यानिभग्नानिभरतर्षभ ॥ व्यद्रवंतदिशःसर्वानिराशानिस्वजीविते १४ ॥ इतिश्रीमहाभारतेवि०प० गोहरणप०उत्त०अर्जुनसंकुलयुद्धेत्रिषष्टितमो
ऽध्यायः ॥ ६३ ॥ वैशंपायनउवाच ॥ ततःशांतनवोभीष्मोभारतानांपितामहः ॥ वध्यमानेषुयोधेषुधनंजयमुपाद्रवत् १ प्रगृह्यकार्मुकश्रेष्ठंजातरूपपरि
ष्कृतम् ॥ शरानादायतीक्ष्णाग्रान्मर्मभेदान्प्रमाथिनः २ पांडुरेणातपत्रेणध्रियमाणेनमूर्धनि ॥ शुशुभेसनरव्याघ्रोगिरिःसूर्योदयेयथा ३ प्रध्मायशंखंगांगे
योधार्तराष्ट्रान्प्रहर्षयन् ॥ प्रदक्षिणमुपावृत्यबीभत्सुंसमवारयत् ४ तमुदीक्ष्यसमायांतंकौंतेयःपरवीरहा ॥ प्रत्यगृह्णात्प्रहृष्टात्माधाराधरमिवाचलः ५ ततोभी
ष्मःशरानष्टौध्वजेपार्थस्यवीर्यवान् ॥ समार्पयन्महावेगान्श्वसमानानिवोरगान् ६ तेध्वजंपांडुपुत्रस्यसमासाद्यपतत्रिणः ॥ ज्वलंतंकपिमाजघ्नुर्ध्वजाग्रनिलयां
श्चतान् ७ ततोभल्लेनमहतापृथुधारेणपांडवः ॥ छत्रंचिच्छेदभीष्मस्यतूर्णंतदपतद्भुवि ८ ध्वजंचैवास्यकौंतेयःशरैरभ्यहनद्भृशम् ॥ शीघ्रकृद्रथवाहांश्चतथो
भौपार्ष्णिसारथी ९ अमृष्यमाणस्तद्भीष्मोजानन्नपिसपांडवम् ॥ दिव्येनास्त्रेणमहताधनंजयमवाकिरत् १० तथैवपांडवोभीष्मेदिव्यमस्त्रमुदीरयन् ॥ प्रत्य
गृह्णादमेयात्मामहामेघमिवाचलः ११ तयोस्तदभवद्युद्धंतुमुलंलोमहर्षणम् ॥ भीष्मेणसहपार्थेनबलिवासवयोरिव १२ प्रैक्षंतकुरवःसर्वेयोधाश्चसहसैनिकाः ॥
भल्लैर्भल्लाःसमागम्यभीष्मपांडवयोर्युधि ॥ अंतरिक्षेव्यराजंतखद्योताःप्रावृषीवहि १३ अग्निचक्रमिवाविद्धंसव्यदक्षिणमस्यतः ॥ गांडीवमभवद्राजन्पार्थस्य
सृजतःशरान् १४ ततःसंछादयामासभीष्मंशरशतैःशितैः ॥ पर्वतंवारिधाराभिश्छादयन्निवतोयदः १५ तांसवेलामिवोद्धूतांशरवृष्टिंसमुत्थिताम् ॥ व्यधम
त्सायकैर्भीष्मःपांडवंसमवारयत् १६ ततस्तानिनिकृत्तानिशरजालानिभागशः ॥ समरेचव्यशीर्यंतफाल्गुनस्यरथंप्रति १७ ततःकनकपुंखानांशरवृष्टिंसमु
त्थिताम् ॥ पांडवस्यरथात्तूर्णंशलभानामिवायतिम् ॥ व्यधमत्तांपुनस्तस्यभीष्मःशरशतैःशितैः १८ ततस्तेकुरवःसर्वेसाधुसाध्वितिचाब्रुवन् ॥ दुष्करंकृत
वानभीष्मोयदर्जुनमयोधयत् १९ बलवांस्तरुणोदक्षःक्षिप्रकारीधनंजयः ॥ कोऽन्यःसमर्थःपार्थस्यवेगंधारयितुंरणे २० ऋतेशांतनवाद्भीष्मात्कृष्णाद्वादेवकी
सुतात् ॥ आचार्यप्रवराद्वाऽपिभारद्वाजान्महाबलात् २१ अस्त्रैरस्त्राणिसंवार्यक्रीडंतौभरतर्षभौ ॥ चक्षूंषिसर्वभूतानांमोहयंतौमहाबलौ २२ प्राजापत्यंतथैवैं
 द्रमाग्नेयंरौद्रदारुणम् ॥ कौबेरंवारुणंचैवयाम्यंवायव्यमेवच ॥ प्रयुंजानौमहात्मानौसमरेतौविचेरतुः २३ विस्मितान्यथभूतानितौदृष्ट्वासंयुगेतदा ॥ साधु
पार्थमहाबाहोसाधुभीष्मेतिचाब्रुवन् २४ नायंयुक्तोमनुष्येषुयोऽयंसंदृश्यतेमहान् ॥ महास्त्राणांसंप्रयोगःसमरेभीष्मपार्थयोः २५ ॥ वैशंपायनउवाच ॥ एवं
सर्वास्त्रविदुषोरस्त्रयुद्धमवर्तत ॥ अस्त्रयुद्धेतुनिर्वृत्तेशरयुद्धमवर्तत २६ अथजिष्णुरुपावृत्यक्षुरधारेणकार्मुकम् ॥ चकर्तभीष्मस्यतदाजातरूपपरिष्कृतम् २७

आविद्धंभ्राम्यमाणम् १४ । १५ । १६ । १७ । १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ उपावृत्यसमीपमेत्य २७

२८ । २९ । ३० । ३१ । ३२ । ३३ । ३४ । ३५ । ३६ । ३७ अस्त्रंबाणानांक्षिपणकर्म ३८ । ३९ । ४० । ४१ । ४२ । ४३ । ४४ । ४५ । ४६ । ४७ कूबरंरथयुगंधरं ४८ अपोवाहअप

निमेषांतरमात्रेणभीष्मोऽन्यत्कार्मुकंरणे ॥ समादायमहाबाहुःसज्यंचक्रेमहारथः ॥ शरांश्चसुबहून्क्रुद्धोमुमोचाशुधनंजये २८ अर्जुनोऽपिशरांस्तीक्ष्णान्भी
ष्मायनिशितान्बहून् ॥ चिक्षेपसुमहातेजास्तथाभीष्मश्चपांडवे २९ तयोर्दिव्यास्त्रविदुषोरस्यतोर्निशितान्शरान् ॥ नविशेषस्तदाराजन्लक्ष्यतेस्ममहात्म
नोः ३० अथावृणोद्दशदिशःशरैरतिरथस्तदा ॥ किरीटमालीकौंतेयःशूरःशांतनवस्तथा ३१ अतीवपांडवोभीष्मंभीष्मश्चातीवपांडवम् ॥ बभूवतस्मिन्संग्रा
मेराजन्लोकेतदद्भुतम् ३२ पांडवेनहताःशूराभीष्मस्यरथरक्षिणः ॥ शेरतेस्मतदाराजन्कौंतेयस्याभितोरथम् ३३ ततोगांडीवनिर्मुक्तानिरमित्रंचिकीर्षवः ॥
आगच्छन्पुंखसंश्लिष्टाःश्वेतवाहनपत्रिणः ३४ निष्पतंतोरथात्तस्यधौताहैरण्यवाससः ॥ आकाशेसमदृश्यंतहंसानामिवपंक्तयः ३५ तस्यतद्दिव्यमस्त्रंहिवि
गाढंचित्रमस्यतः ॥ प्रेक्षंतेस्मांतरिक्षस्थाःसर्वेदेवाःसवासवाः ३६ तंदृष्ट्वापरमप्रीतोगंधर्वश्चित्रमद्भुतम् ॥ शशंसदेवराजायचित्रसेनःप्रतापवान् ३७ पश्येमा
न्पार्थनिर्मुक्तान्संसक्तानिवगच्छतः ॥ चित्ररूपमिदंजिष्णोर्दिव्यमस्त्रमुदीर्यतः ३८ नेदंमनुष्याःसंदध्युर्नहीदंतेषुविद्यते ॥ पौराणानांमहास्त्राणांविचित्रोऽयं
समागमः ३९ आददानस्यहिशरान्संधायचविमुंचतः ॥ विकर्षतश्चगांडीवंनांतरंसमदृश्यत ४० मध्यंदिनगतंसूर्यंप्रतपंतमिवांबरे ॥ नाशक्नुवंतसैन्यानिपां
डवंप्रतिवीक्षितुम् ४१ तथैवभीष्मंगांगेयंद्रष्टुंनोत्सहतेजनः ४२ उभौविश्रुतकर्माणावुभौतीव्रपराक्रमौ ॥ उभौसदृशकर्माणावुभौयुधिसुदुर्जयौ ४३ इत्युक्तोदे
वराजस्तुपार्थभीष्मसमागमम् ॥ पूजयामासदिव्येनपुष्पवर्षेणभारत ४४ ततःशांतनवोभीष्मोवामंपार्श्वमताडयत् ॥ पश्यतःप्रतिसंधायविध्यतःसव्यसा
चिनः ४५ ततःप्रहस्यबीभत्सुःपृथुधारेणकार्मुकम् ॥ चिच्छेदगार्ध्रपत्रेणभीष्मस्यादित्यतेजसः ४६ अथैनंदशभिर्बाणैःप्रत्यविध्यत्स्तनांतरे ॥ यतमानंपरा
क्रांतंकुंतीपुत्रोधनंजयः ४७ सपीडितोमहाबाहुर्गृहीत्वारथकूबरम् ॥ गांगेयोयुद्धदुर्धर्षस्तस्थौदीर्घमिवांतरम् ४८ तंविसंज्ञमपोवाहसंयंतारथवाजिनाम् ॥ उप
देशमनुस्मृत्यरक्षमाणोमहारथम् ४९ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिभीष्मापयानेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ७ ॥ ॥ वैशंपा
यनउवाच ॥ भीष्मेतुसंग्रामशिरोविहायपलायमानेधृतराष्ट्रपुत्रः ॥ उत्सृज्यकेतुंविनदन्महात्माधनुर्विगृह्यार्जुनमाससाद १ सभीमधन्वानमुदग्रवीर्यंधनंजयं
शत्रुगणेचरंतम् ॥ आकर्णपूर्णायतचोदितेनविव्याधभल्लेनललाटमध्ये २ सतेनबाणेनसमर्पितेनजांबूनदाग्रेणसुसंहितेन ॥ रराजराजन्महनीयकर्मायथैकपर्वा
रुचिरैकशृंगः ३ अथास्यबाणेनविदारितस्यप्रादुर्बभूवासृगजस्रमुष्णम् ॥ सतस्यजांबूनदपुंखचित्रोभित्त्वाललाटंसुविराजतेस्म ४ दुर्योधनश्चापितमुग्रतेजाः
पार्थश्चदुर्योधनमेकवीरः ॥ अन्योन्यमाजौपुरुषप्रवीरौसमौसमाजग्मतुराजमीढौ ५

सारयामास ४९ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपेचतुःषष्टितमो
ऽध्यायः ॥ ६४ ॥ धृतराष्ट्रपुत्रोदुर्योधनः उत्सृज्यउन्मुच्य केतुंपताकां १ । २ । एकशृंगःपर्वतोयथाएकेनपर्ववतादीर्घवंशेन एकःपर्वोयस्मिन्निति समासः मतुब्लोपआर्षः ३ असृक्रक्तं ४ । ५

६ । ७ महायसेनमहाफलकेन ८ । ९ । १० । ११ अपजग्मुःपलायनंकृतवंतः १२ । १३ अभिषंगात्पराभवात्द्रवंतंआलक्ष्य प्रास्फोटयत्आस्फोटंबाहुशब्दंकृतवान् १४ तूर्याणिजयवाद्यानि

ततःप्रभिन्नेनमहागजेनमहीधराभेनपुनर्विकर्णः ॥ रथैश्चतुर्भिर्गजपादरक्षैःकुंतीसुतंजिष्णुमथाभ्यधावत् ६ तमापतंतंत्वरितंगजेंद्रंधनंजयःकुंभविभागमध्ये ॥
आकर्णपूर्णेनमहायसेनबाणेनविव्याधमहाजवेन ७ पार्थेनसृष्टःसतुगार्ध्रपत्रआपुंखदेशात्प्रविवेशनागम् ॥ विदार्यशैलप्रवरंप्रकाशंयथाऽशनिःपर्वतमिंद्रसृष्टः ८
शरप्रतप्तःसतुनागराजःप्रवेपितांगोव्यथितांतरात्मा ॥ संसीदमानोनिपपातमह्यांवज्राहतंशृंगमिवाचलस्य ९ निपातितेदंतिवरेपृथिव्यांत्रासाद्विकर्णःसहसा
ऽवतीर्य ॥ तूर्णंपदान्यष्टशतानिगत्वाविविंशतेःस्यंदनमारुरोह १० निहत्यनागंतुशरेणतेनवज्रोपमेनाद्रिवरांबुदाभम् ॥ तथाविधेनैवशरेणपार्थोदुर्योधनंवक्षसि
निर्बिभेद ११ ततोगजेराजनिचैवभिन्नेभग्नेविकर्णेचसपादरक्षे ॥ गांडीवमुक्तैर्विशिखैःप्रणुन्नास्तेयोधमुख्याःसहसाऽपजग्मुः १२ दृष्ट्वैवपार्थेनहतंचनागंयोधां
श्चसर्वान्द्रवतोनिशम्य ॥ रथंसमावृत्यकुरुप्रवीरोरणात्प्रदुद्रावयतोनपार्थः १३ तंभीमरूपंत्वरितंद्रवंतंदुर्योधनंशत्रुसहोऽभिषंगात् ॥ प्रास्फोटयद्योद्धुमनाः
किरीटीबाणेनविद्धंरुधिरंवमंतं १४ ॥ अर्जुनउवाच ॥ विहायकीर्तिंविपुलंयशश्चयुद्धात्परावृत्यपलायसेकिम् ॥ नतेऽद्यतूर्याणिसमाहतानितथैवराज्यादवरो
पितस्य १५ युधिष्ठिरस्यास्मिनिदेशकारीपार्थस्तृतीयोयुधिसंस्थितोऽस्मि ॥ तदर्थमावृत्यमुखंप्रयच्छनरेंद्रवृत्तंस्मरधार्तराष्ट्र १६ मोघंतवेदंभुविनामधेयं
दुर्योधनेतीहकृतंपुरस्तात् ॥ नहीहदुर्योधनतातवास्तिपलायमानस्यरणंविहाय १७ नतेपुरस्तादथपृष्ठतोवापश्यामिदुर्योधनरक्षितारम् ॥ अपेहियुद्धात्पुरुष
प्रवीरप्राणान्प्रियान्पांडवतोऽद्यरक्ष १८ ॥ इतिश्रीम० विराटप० दुर्योधनापयानेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ वैशंपायनउवाच ॥ आहूयमानश्च
सतेनसंख्येमहात्मनावैधृतराष्ट्रपुत्रः ॥ निवर्तितस्तस्यगिरांकुशेनमहागजोमत्तइवांकुशेन १ सोऽमृष्यमाणोवचसाऽभिमृष्टोमहारथेनातिरथस्तरस्वी ॥ पर्याव
वर्ताथरथेनवीरोभोगीयथापादतलाभिमृष्टः २ तंप्रेक्ष्यकर्णःपरिवर्तमानंनिवर्त्यसंस्तभ्यचविद्धगात्रम् ॥ दुर्योधनस्योत्तरतोऽभ्यगच्छत्पार्थंनृवीरोयुधिहेममाली
३ भीष्मस्ततःशांतनवोविवृत्यहिरण्यकक्षस्त्वरयाऽभिषंगी ॥ दुर्योधनंपश्चिमतोऽभ्यरक्षत्पार्थान्महाबाहुरधिज्यधन्वा ४ द्रोणःकृपश्चैवविविंशतिश्चदुःशास
नश्चैवविवृत्यशीघ्रम् ॥ सर्वेपुरस्ताद्विततोरुचापादुर्योधनार्थंत्वरिताऽभ्युपेयुः ५ सतान्यनीकानिनिवर्तमानान्यालोक्यपूर्णौघनिभानिपार्थः ॥ हंसोयथामेघ
मिवापतंतंधनंजयःप्रत्यतपत्तरस्वी ६ तेसर्वतःसंपरिवार्यपार्थमस्त्राणिदिव्यानिसमाददानाः ॥ ववर्षुरभ्येत्यशरैःसमंतान्मेघायथाभूधरमंबुवेगैः ७ ततोऽस्त्रमस्त्रे
णनिवार्यतेषांगांडीवधन्वाकुरुपुंगवानाम् ॥ संमोहनंशत्रुसहोऽन्यदस्त्रंप्रादुश्चकारैंद्रिरपारणीयम् ८

तथैवेत्यादिउत्तरान्वयि १५ तृतीयःपार्थःपृथासुतोऽर्जुनोऽस्मि वृत्तंद्यूतादिष्वधर्मं १६ । १७ । १८ ॥ इतिविराटप०नीलकंठीये० भारतभावदीपेपंचषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ आहूयेति १
पर्याववर्तपरावृत्तवान् २ नृवीरोदुर्योधनः ३ अभिषंगीशत्रुपराजयसमर्थः ४ त्वरिताःअभ्युपेयुःसंधिरार्षः ५ हंसःसूर्यःप्रत्यतपत्प्रतितापितवान् ६ । ७ । ८

विवृत्यव्याप्य ९। १० शांतिपराःउपरतचित्ताः ११। १२। १३ अमूढसंज्ञैर्भीष्मादिभिःसव्यतःकृतैरुपलक्षितेनभवतायातव्यंगंतव्यं १४। १५। १६। १७। १८। १९ अयमर्जुनोभवतो
विसंज्ञानयुष्मान्यथानमुच्येत नमोचनंस्यात्तथाप्रमथ्नीत उपमृद्यात्नतुमृदितवानितिभावः २० शांतिनष्टचित्ततां नृशंसंकर्तुंसंमूढान्मारयितुं नअलंनयोग्यः तत्रहेतुः नपापेऽस्यमनोस्तियतो

ततोदिशश्चानुदिशोविवृत्यशरैःसुधारैर्निशितैःसुपत्रैः ॥ गांडीवघोषेणमनांसितेषांमहाबलःप्रव्यथयांचकार ९ ततःपुनर्भीमरवंप्रगृह्यदोर्भ्यांमहाशंखमुदार
घोषं ॥ व्यनादयत्सप्रदिशोदिशःखंभुवंचपार्थोद्विषतांनिहंता १० तेशंखनादेनकुरुप्रवीराःसंमोहिताःपार्थसमीरितेन ॥ उत्सृज्यचापानिदुरासदानिसर्वेतदा
शांतिपराबभूवुः ११ तथाविसंज्ञेषुचतेषुपार्थःस्मृत्वाचवाक्यानितथोत्तरायाः ॥ निर्याहिमध्यादितिमत्स्यपुत्रमुवाचयावत्कुरवोविसंज्ञाः १२ आचार्यशारद्व
तयोःसुशुक्लेकर्णस्यपीतंरुचिरंचवस्त्रं ॥ द्रौणेश्चराज्ञश्चतथैवनीलेवस्त्रेसमादत्स्वनरप्रवीर १३ भीष्मस्यसंज्ञांतुतथैवमन्येजानातिसोऽस्त्रप्रतिघातमेषः ॥ एतस्यवा
हान्कुरुसव्यतस्त्वमेवंहियातव्यममूढसंज्ञैः १४ रश्मीन्समुत्सृज्यततोमहात्मारथादवप्लुत्यविराटपुत्रः ॥ वस्त्राण्युपादायमहारथानांतूर्णंपुनःस्वंरथमारुरोह १५
ततोऽन्वशासच्चतुरःसदश्वान्पुत्रोविराटस्यहिरण्यकक्षान् ॥ तेतद्व्यतीयुर्ध्वजिनामनीकंश्वेतावहंतोऽर्जुनमाजिमध्यात् १६ तथाऽनुयांतंपुरुषप्रवीरंभीष्मःशरैर
भ्यहनत्तरस्वी ॥ सचापिभीष्मस्यहयान्निहत्यविव्याधपार्थोदशभिःपृषत्कैः १७ ततोऽर्जुनोभीष्ममपास्ययुद्धेविद्धाऽस्ययंतारमरिष्टधन्वा ॥ तस्थौविमुक्तोरथवृं
दमध्यात्मेघंविदार्येवसहस्ररश्मिः १८लब्ध्वाहिसंज्ञांतुकुरुप्रवीराःपार्थंनिरीक्ष्याथसुरेंद्रकल्पम् ॥ रणेविमुक्तंस्थितमेकमाजौसधार्तराष्ट्रस्त्वरितंबभाषे १९ अयं
कथंवैभवतोविमुक्तस्तथाप्रमथ्नीतयथानमुच्येत् ॥ तमब्रवीच्छांतनवःप्रहस्यक्वतेगताबुद्धिरभूत्क्ववीर्यम् २० शांतिंपरांप्राप्ययदास्थितोऽभूरुत्सृज्यबाणांश्चधनुर्वि
चित्रम् ॥ नत्वेषबीभत्सुरलंनृशंसंकर्तुंनपापेऽस्यमनोविशिष्टम् २१ त्रैलोक्यहेतोर्नजहेत्स्वधर्मंसर्वेनतस्मान्निहतारणेऽस्मिन् ॥ क्षिप्रंकुरून्याहिकुरुप्रवीरविजि
त्यगाश्चप्रतियातुपार्थः ॥ मातेस्वकोऽर्थोनिपतेतमोहात्तत्संविधातव्यमरिष्टबंधम् २२ ॥ वैशंपायनउवाच ॥ दुर्योधनस्तस्यतुतन्निशम्यपितामहस्यात्महितं
वचोऽथ ॥ अतीतकामोयुधिसोऽत्यमर्षीराजाविनिःश्वस्यबभूवतूष्णीम् २३ तद्भीष्मवाक्यंहितमीक्ष्यसर्वेधनंजयाग्निंचविवर्धमानम् ॥ निवर्तनायैवमनोनिदध्युर्दु
र्योधनंतेपरिरक्षमाणाः २४ तान्प्रस्थितान्प्रीतमनाःसपार्थोधनंजयःप्रेक्ष्यकुरुप्रवीरान् ॥ अभाषमाणोऽनुनयंमुहूर्तंवचोऽब्रवीत्संपरिहृत्यभूयः २५ पितामहं
शांतनवंचवृद्धंद्रोणंगुरुंचप्रणिपत्यमूर्ध्ना ॥ द्रौणिंकृपंचैवकुरूंश्चमान्याञ्छरैर्विचित्रैरभिवाद्यचैव २६ दुर्योधनस्योत्तमरत्नचित्रंचिच्छेदपार्थोमुकुटंशरेण ॥ आमं
त्र्यवीरांश्चतथैवमान्यान्गांडीवघोषेणविनाद्यलोकान् २७सदेवदत्तंसहसाविनाद्यविदार्यवीरोद्विषतांमनांसि॥ध्वजेनसर्वानभिभूयशत्रून्सहेममालेनविराजमानः २८ ॥४७॥

विशिष्टंश्रेष्ठं २१ अरिष्टबंधंकल्याणानुबंधिकर्म २२। २३। २४ परिहृत्यपरिवृत्य २५ शरैरेवपाददेशेपातितैरभिवाद्य मान्यान्बाल्हीकसोमदत्तादीन् २६ मुकुटंचिच्छेदेतिदुर्योधनस्य
मरणमेवसूचितं २७ हेममालयासहितेनसहेममालेनध्वजेन २८

२९ ॥ ३० ॥ ॥ इति विराटप०नील०भा०षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ ७ ॥ ॥ वृषभेक्षणःश्रेष्ठदृष्टिः १। २। ३। ४। ५। ६। ७ आपतंतं पुंस्त्वमार्षम्

दृष्ट्वाप्रयातांस्तुकुरून्किरीटीहृष्टोऽब्रवीत्तत्रसमत्स्यपुत्रम् ॥ आवर्तयाश्वान्पशवोजितास्तेयाताःपरेयाहिपुरंप्रहृष्टः २९ देवास्तुदृष्ट्वामहदद्भुतंतद्युद्धंकुरूणां
सहफाल्गुनेन ॥ जग्मुर्यथास्वंभवनंप्रतीताःपार्थस्यकर्माणिविचिंतयंतः ३० ॥ इतिश्रीमहाभारतेविराटप० गोहरणप० समस्तकौरवपलायनेषट्षष्टितमोऽ
ध्यायः ॥ ६६ ॥ वैशंपायनउवाच ॥ ततोविजित्यसंग्रामेकुरून्सवृषभेक्षणः ॥ समानयामासतदाविराटस्यधनंमहत् १ गतेषुचप्रभग्नेषुधार्तराष्ट्रेषुसर्वतः ॥
वनान्निष्क्रम्यगहनाद्बहवःकुरुसैनिकाः २ भयात्संत्रस्तमनसःसमाजग्मुस्ततस्ततः ॥ मुक्तकेशास्त्वदृश्यंतस्थिताःप्रांजलयस्तदा ३ क्षुत्पिपासापरिश्रांताविदे
शस्थाविचेतसः ॥ ऊचुःप्रणम्यसंभ्रांताःपार्थकिंकरवामते ४ ॥ अर्जुनउवाच ॥ स्वस्तिव्रजतवोभद्रंनभेतव्यंकथंचन ॥ नाहमार्तान्जिघांसामिभृशमाश्वास
यामिवः ५ ॥ वैशंपायनउवाच ॥ तस्यतामभयांवाचंश्रुत्वायोधाःसमागताः ॥ आयुःकीर्तियशोदाभिस्तमाशीर्भिरनंदयन् ६ ततोऽर्जुनंनागमिवप्रभिन्नमुत्सृ
ज्यशत्रून्विनिवर्तमानम् ॥ विराटराष्ट्राभिमुखंप्रयांतंनाशक्नुवंस्तंकुरवोऽभियातुम् ७ ततःसतन्मेघमिवापतंतंविद्राव्यपार्थःकुरुमेघसैन्यम् ॥ मत्स्यस्यपुत्रं
द्विषतांनिहंतावचोऽब्रवीत्संपरिरभ्यभूयः ८ पितुःसकाशेतववाततसर्वेवसंतिपार्थाविदितंतवैव ॥ तान्माप्रशंसेर्नगरंप्रविश्यभीतःप्रणश्येद्धिसमत्स्यराजः ९
मयाजितासाध्वजिनीकुरूणांमयाचगावोविजिताद्विषद्भ्यः ॥ पितुःसकाशंनगरंप्रविश्यत्वमात्मनःकर्मकृतंब्रवीहि १० ॥ उत्तरउवाच ॥ यत्तेकृतंकर्मनपारणीयं
तत्कर्मकर्तुंममनास्तिशक्तिः ॥ नत्वांप्रवक्ष्यामिपितुःसकाशेयावन्नमांवक्ष्यसिसव्यसाचिन् ११ ॥ वैशंपायनउवाच ॥ सशत्रुसेनामवजित्यजिष्णुराच्छिद्यसर्वं
चधनंकुरुभ्यः ॥ श्मशानमागत्यपुनःशमींतामभ्येत्यतस्थौशरविक्षतांगः १२ ततःसवन्हिप्रतिमोमहाकपिःसहैवभूतैर्दिवमुत्पपात ॥ तथैवमायाविहिता
बभूवध्वजंचसैंहंयुयुजेरथेपुनः १३ विधायतच्चायुधमाजिवर्धनंकुरूत्तमानामिषुधीःशरांस्तथा ॥ प्रायात्समत्स्योनगरंप्रहृष्टःकिरीटिनासारथिनामहात्मना १४
पार्थस्तुकृत्वापरमार्यकर्मनिहत्यशत्रून्द्विषतांनिहंता ॥ चकारवेणींचतथैवभूयोजग्राहरश्मीन्पुनरुत्तरस्य ॥ विवेशहृष्टोनगरंमहामनाबृहन्नलारूपमुपेत्यसार
थिः १५ ॥ वैशंपायनउवाच ॥ ततोनिवृत्ताःकुरवःप्रभग्नावशमास्थिताः ॥ हस्तिनापुरमुद्दिश्यसर्वेदीनाययुस्तदा १६ पंथानमुपसंगम्यफाल्गुनोवाक्य
मब्रवीत् १७ राजपुत्रप्रत्यवेक्षसमानीतानिसर्वशः ॥ गोकुलानिमहाबाहोवीरगोपालकैःसह १८ ततोऽपराह्णेयास्यामोविराटनगरंप्रति ॥ आश्वास्यपायायि
त्वाचपरिप्लाव्यचवाजिनः १९ गच्छंतुत्वरिताश्चैमेगोपालाःप्रेषितास्त्वया ॥ नगरेप्रियमाख्यातुंघोषयंतुचतेजयम् २०

८। ९। १०। ११। १२ सैंहंध्वजंविराटीयं पूर्वतत्रस्थापितं १३ विधाययथावत्स्थापयित्वा १४। १५ वशंपरवशतां आस्थिताःप्राप्ताः १६। १७। १८। १९। २०

२१ विजये नतृप्तौ इतोऽप्याधिकंयुद्धंप्रार्थयानौ यद्वा विजयेनस्वीयेनतृप्तौ आनंदिनौ स्वस्वभांडंअलंकारादिकंयत्पूर्वमुत्सृष्टंतत्तथैवशरीरेरथेचआरोपयतांआरोपितवंतौ २२ धनंगोधनं प्रतीतो

॥ वैशंपायनउवाच ॥ अथोत्तरस्त्वरमाणःसदूतानाज्ञापयद्वचनात्फाल्गुनस्य ॥ आचक्षध्वंविजयंपार्थिवस्यभग्नाःपरेविजिताश्चापिगावः २१ इत्येवंतौभारतमत्स्यवीरौसंमंत्र्यसंगम्यततःशमीताम् ॥ अभ्येत्यभूयोविजयेनतृप्तावुत्सृष्टमारोपयतांस्वभांडम् २२ सशत्रुसेनामभिभूयसर्वामाच्छिद्यसर्वंचधनंकुरुभ्यः ॥ वैराटिरायान्नगरंप्रतीतोबृहन्नलासारथिनाप्रवीरः २३ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिउत्तरागमनेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ४ ॥

॥ वैशंपायनउवाच ॥ धनंचापिविजित्याशुविराटोवाहिनीपतिः ॥ विवेशनगरंहृष्टश्चतुर्भिःपांडवैःसह १ जित्वात्रिगर्तान्संग्रामेगाश्चैवादायसर्वशः ॥ अशोभतमहाराजसहपार्थैःश्रियावृतः २ तमासनगतंवीरंसुहृदांहर्षवर्द्धनम् ॥ उपासांचक्रिरेसर्वेसहपार्थैःपरंतपाः ३ उपतस्थुःप्रकृतयःसमस्ताब्राह्मणैःसह ॥ सभाजितःससैन्यस्तुप्रतिनंद्याथमत्स्यराट् ४ विसर्जयामासतदाद्विजांश्चप्रकृतीस्तथा ॥ तथासराजामत्स्यानांविराटोवाहिनीपतिः ५ उत्तरंपरिपप्रच्छकयातइतिचाब्रवीत् ॥ आचख्युस्तस्यतत्सर्वंस्त्रियःकन्याश्चवेश्मनि ६ अंतःपुरचराश्चैवकुरुभिर्गोधनंहृतम् ॥ विजेतुमभिसंरब्धएकएवातिसाहसात् ॥ बृहन्नलासहायश्चनिर्गतःपृथिवींजयः ७ उपयातानतिरथान्भीष्मंशांतनवंकृपम् ॥ कर्णंदुर्योधनंद्रोणंद्रोणपुत्रंचषड्रथान् ८ ॥ वैशंपायनउवाच ॥ राजाविराटोऽथभृशाभितप्तःश्रुत्वासुतंत्वेकरथेनयातम् ॥ बृहन्नलासारथिमाजिवर्धनंप्रोवाचसर्वानथमंत्रिमुख्यान् ९ सर्वथाकुरवस्तेहियेचान्येवसुधाधिपाः ॥ त्रिगर्तान्निर्मृतान्श्रुत्वानस्थास्यंतिकदाचन १० तस्माद्गच्छंतुमेयोधाबलेनमहतावृताः ॥ उत्तरस्यपरीप्सार्थंयेत्रिगर्तैरविक्षताः ११ हयांश्चनागांश्चरथांश्चशीघ्रंपदातिसंघांश्चततःप्रवीरान् ॥ प्रस्थापयामाससुतस्यहेतोर्विचित्रशस्त्राभरणोपपन्नान् १२ एवंसराजामत्स्यानांविराटोवाहिनीपतिः ॥ व्यादिदेशाथतांक्षिप्रंवाहिनींचतुरंगिणीम् १३ कुमारमाशुजानीतयदिजीवतिवानवा ॥ यस्ययंतागतःषंढोमन्येऽहंसनजीवति १४ ॥ वैशंपायनउवाच ॥ तमब्रवीद्धर्मराजोविहस्यविराटराजंतुभृशाभितप्तम् ॥ बृहन्नलासारथिश्चेन्नरेंद्रपरेननेष्यंतितवाद्यगास्ताः १५ सर्वान्महीपान्सहितान्कुरूंश्चतथैवदेवासुरसिद्धयक्षान् ॥ अतीवजेतुंसमरेसुतस्तेस्वनुष्ठितःसारथिनाहितेन १६ ॥ वैशंपायनउवाच ॥ अथोत्तरेणप्रहितादूतास्तेशीघ्रगामिनः ॥ विराटनगरंप्राप्यविजयंसमवेदयन् १७ राज्ञस्तत्सर्वमाचख्यौमंत्रीविजयमुत्तमम् ॥ पराजयंकुरूणांचाप्युपायांतंतथोत्तरम् १८ सर्वाविनिर्जितागावःकुरवश्चपराजिताः ॥ उत्तरःसहसूतेनकुशलीचपरंतपः १९ ॥ युधिष्ठिरउवाच ॥ दिष्ट्याविनिर्जितागावःकुरवश्चपलायिताः ॥ नाद्भुतंत्वेवमन्येऽहंयत्तेपुत्रोऽजयत्कुरून् २०

हृष्टः २३ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ४ ॥ ॥ दक्षिणगोग्रहवृत्तांतमाहधनंचेति १ २ । ३ सभाजितः पूजितः ४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ । १७ । १८ । १९ । २०

२१ आच्छादयित्वावस्त्रादिभिरभ्यर्च्य २२ । २३ । २४ शृंगाटकेषुचतुष्पथेषु । 'शृंगाटकंभवेद्वारिकंटकेचचतुष्पथे' इतिमेदिनी २५ शृंगारवेषाभरणानाट्यरसवेषाभरणा । 'शृंगारःसुरतेनाट्ये'इतिमेदिनी २६ स्वस्तिकंमंगलाराात्तिकादिदधिदूर्वादिचपाणौयस्यतत्स्वस्तिकपाणिभूतंऋद्धिमत् वारिजाःशंखाः २७ नांदीवाद्याःमंगलवाद्यानि तूर्यवाद्याजयवाद्यानि २८ । २९

ध्रुवएवजयस्तस्ययस्ययंताबृहन्नला ॥ वैशंपायनउवाच ॥ ततोविराटोनृपतिःसंप्रहृष्टतनूरुहः २१ श्रुत्वासविजयंतस्यकुमारस्यामितौजसः ॥ आच्छादयित्वादूतांस्तान्मंत्रिणंसोऽभ्यचोदयत् २२ राजमार्गाःक्रियंतांमेपताकाभिरलंकृताः ॥ पुष्पोपहारैरर्च्यंतांदेवताश्चापिसर्वशः २३ कुमारायोधमुख्याश्चगणिकाश्चस्वलंकृताः ॥ वादित्राणिचसर्वाणिप्रत्युद्यांतुसुतंमम २४ घंटावान्मानवःशीघ्रंमत्तमारुह्यवारणम् ॥ शृंगाटकेषुसर्वेषुआख्यातुविजयंमम २५ उत्तराचकुमारीभिर्बह्वीभिःपरिवारिता ॥ शृंगारवेषाभरणाप्रत्युद्यातुसुतंमम २६ ॥ वैशंपायनउवाच ॥ श्रुत्वाचेदंवचनंपार्थिवस्यसर्वंपुरंस्वस्तिकपाणिभूतम् ॥ भेर्यश्चतूर्याणिचवारिजाश्चवेषैःपरार्द्ध्यैःप्रमदाःशुभाश्च २७ तथैवसूतैःसहमागधैश्चनांदीवाद्याःपणवास्तूर्यवाद्याः ॥ पुराद्विराटस्यमहाबलस्यप्रत्युद्ययुःपुत्रमनंतवीर्यम् २८ ॥ वैशंपायनउवाच ॥ प्रस्थाप्यसेनांकन्याश्चगणिकाश्चस्वलंकृताः ॥ मत्स्यराजोमहाप्राज्ञःप्रहृष्टइदमब्रवीत् २९ अक्षानाहरसैरंध्रिकंकद्यूतंप्रवर्त्तताम् ॥ तंतथावादिनंदृष्ट्वापांडवःप्रत्यभाषत ३० नदेवितव्यंहृष्टेनाकितवेनेतिनःश्रुतम् ॥ तंत्वामद्यमुदायुक्तंनाहंदेवितुमुत्सहे ॥ प्रियंतुतेचिकीर्षामिवर्त्ततांयदिमन्यसे ३१ ॥ विराटउवाच ॥ स्त्रियोगावोहिरण्यंचयच्चान्यद्वसुकिंचन ॥ नमेकिंचित्त्वयारक्ष्यंतेअंतरेणापिदेवितुम् ३२ ॥ कंकउवाच ॥ किंतेद्यूतेनराजेंद्रबहुदोषेणमानद ॥ देवनेबहवोदोषास्तस्मात्तत्परिवर्जयेत् ३३ श्रुतस्तेयदिवादृष्टःपांडवेयोयुधिष्ठिरः ॥ सराष्ट्रंसुमहत्स्फीतंभ्रातॄंश्चत्रिदशोपमान् ३४ राज्यंहारितवान्सर्वंतस्माद्द्यूतंनरोचये ॥ अथवामन्यसेराजन्दीव्यामयदिरोचते ३५ ॥ वैशंपायनउवाच ॥ प्रवर्त्तमानेद्यूतेतुमत्स्यःपांडवमब्रवीत् ॥ पश्यपुत्रेणमेयुद्धेताहशाःकुरवोजिताः ३६ ततोऽब्रवीन्महात्मासएनंराजायुधिष्ठिरः ॥ बृहन्नलायस्ययंताकथंसनजयेद्युधि ३७ इत्युक्तःकुपितोराजामत्स्यःपांडवमब्रवीत् ॥ समंपुत्रेणमेषंढंब्रह्मबंधोप्रशंससि ३८ वाच्यावाच्यंनजानीषेनूनंमामवमन्यसे ॥ भीष्मद्रोणमुखान्सर्वान्कस्मान्नसविजेष्यति ३९ वयस्यत्वात्तुतेब्रह्मन्नपराधमिमंक्षमे ॥ नेदृशंतुपुनर्वाच्यंयदिजीवितुमिच्छसि ४० ॥ युधिष्ठिरउवाच ॥ यत्रद्रोणस्तथाभीष्मोद्रौणिर्वैकर्तनःकृपः ॥ दुर्योधनश्चराजेंद्रस्तथाऽन्येचमहारथाः ४१ मरुद्गणैःपरिवृतःसाक्षादपिमरुत्पतिः ॥ कोऽन्योबृहन्नलायास्तान्प्रतियुध्येतसंगतान् ४२ यस्यबाहुबलेतुल्योनभूतोनभविष्यति ॥ अतीवसमरंदृष्ट्वाहर्षोयस्योपजायते ४३ योऽजयत्संगतान्सर्वान्ससुरासुरमानवान् ॥ तादृशेनसहायेनकस्मात्सनविजेष्यते ४४ ॥ विराटउवाच ॥ बहुशःप्रतिषिद्धोऽसिनचवाचंनियच्छसि ॥ नियंताचेन्नविद्येतनकश्चिद्धर्ममाचरेत् ४५

३० हृष्टेनत्वयासह कितवेनमयानदेवितव्यं ३१ अंतरेणविनाऽपिद्यूतं ३२ । ३३ । ३४ । ३५ । ३६ । ३७ ब्रह्मबंधोब्राह्मणाधम ३८ । ३९ वयस्यत्वात्सख्यात् ४० । ४१ । ४२ । ४३ । ४४ नियच्छसिनिगृह्णासि ४५

नैवंवाच्यमिति ४६ नस्तःनासिकातः ४७ । ४८ नस्ततःनासिकानाडीतः तनोतिदेहंप्रथयतीतितच्छब्दोनाडीवचनः पुरीततिशेते इत्यादिप्रयोगदर्शनात् ४९ । ५० । ५१ । ५२ । ५३ कु
रुराजोयुधिष्ठिरःकर्णकर्णउपाजपत्उपांशुउक्तवान् ५४ । ५५ । ५६ । ५७ अनेकाग्रंव्यग्रं ५८ । ५९ । ६० । ६१ । ६२ । ६३ । ६४ हेराजन्तेतवतत्कर्मनदूषयामि यत्अदूषकंपरापवा
दहीनं हन्यादन्यायितत्दूष्यमपिनदूषयामि यतःबलवंतंप्रभुं क्षिप्रंशीघ्रं दारुणंनृशंसं कर्मप्राप्नुयादेव । 'दृष्टोदष्यतिदृप्तोधर्ममतिक्रामति' इतिस्मृतेः कलयंतमितिपाठेजानंतमपि ६५ । ६६

वैशंपायनउवाच ॥ ततःप्रकुपितोराजातमक्षेणाहनद्भृशम् ॥ मुखेयुधिष्ठिरंकोपान्नैवमित्येवभर्त्सयन् ४६ बलवत्प्रतिविद्धस्यनस्तःशोणितमावहत् ॥ तदप्रा
प्तंमहींपार्थःपाणिभ्यांप्रत्यगृह्णत ४७ अवैक्षतसधर्मात्माद्रौपदींपार्श्वतःस्थिताम् ॥ साज्ञात्वातमभिप्रायंभर्तुश्चित्तवशानुगा ४८ पात्रंगृहीत्वासौवर्णंजलपूर्ण
मनिंदिता ॥ तच्छोणितंप्रत्यगृह्णाद्यत्प्रसुस्रावनस्ततः ४९ अथोत्तरःशुभैर्गंधैर्माल्यैश्चविविधैस्तथा ॥ अवकीर्यमाणःसंहृष्टोनगरंस्वैरमागतः ५० सभाज्यमा
नःपौरैश्चस्त्रीभिर्जानपदैस्तथा ॥ आसाद्यभवनद्वारंपित्रेसंप्रत्यवेदयत् ५१ ततोद्वास्थःप्रविश्यैवविराटमिदमब्रवीत् ॥ बृहन्नलासहायश्चपुत्रोद्वार्युत्तरःस्थितः
५२ ततोहृष्टोमत्स्यराजःक्षत्तारमिदमब्रवीत् ॥ प्रवेश्यतामुभौतूर्णंदर्शनेप्सुरहंतयोः ५३ क्षत्तारंकुरुराजस्तुशनैःकर्णमुपाजपत् ॥ उत्तरःप्रविशत्वेकोनप्रवे
श्याबृहन्नला ५४ एतस्यहिमहाबाहोव्रतमेतत्समाहितम् ॥ योममांगेव्रणंकुर्याच्छोणितंवाऽपिदर्शयेत् ॥ अन्यत्रसंग्रामगतान्नसजीवेत्कथंचन ५५ नमृष्याद्भृ
शंसंक्रुद्धोमांदृष्ट्वातुसशोणितम् ॥ विराटमिहसामात्यंहन्यात्सबलवाहनम् ५६ ॥ वैशंपायनउवाच ॥ ततोराज्ञःसुतोज्येष्ठःप्राविशत्पृथिवींजयः ॥ सोऽभिवाद्य
पितुःपादौकंकंचाप्युपतिष्ठत ५७ ततोरुधिरसंयुक्तमनेकाग्रमनागसम् ॥ भूमावासीनमेकांतेसैरंध्र्याप्रत्युपस्थितम् ५८ ततःपप्रच्छपितरंत्वरमाणइवोत्तरः ॥
केनायंताडितोराजन्केनपापमिदंकृतम् ५९ ॥ विराटउवाच ॥ मयाऽयंताडितोजिह्मोनचाप्येतावदर्हति ॥ प्रशस्यमानेयच्छूरेत्वयिषंढंप्रशंसति ६० ॥ उत्तरउवाच ॥
अकार्यंतेकृतंराजन्क्षिप्रमेवप्रसाद्यताम् ॥ मात्वांब्रह्मविषंघोरंसमूलमिहनिर्दहेत् ६१ ॥ वैशंपायनउवाच ॥ सपुत्रस्यवचःश्रुत्वाविराटोराष्ट्रवर्धनः ॥ क्षमयामा
सकौंतेयंभस्मच्छन्नमिवानलम् ६२ क्षमयंतंतुराजानंपांडवःप्रत्यभाषत ॥ चिरंक्षांतमिदंराजन्नमन्युर्विद्यतेमम ६३ यदिह्येतत्पतेद्भूमौरुधिरंममनस्ततः ॥
सराष्ट्रस्त्वंमहाराजविनश्येथानसंशयः ६४ नदूषयामितेराजन्यद्वैहन्याददूषकम् ॥ बलवंतंप्रभुंराजन्क्षिप्रंदारुणमाप्नुयात् ६५ ॥ वैशंपायनउवाच ॥ शोणिते
तुव्यतिक्रांतेप्रविवेशबृहन्नला ॥ अभिवाद्यविराटंतुकंकंचाप्युपतिष्ठत ६६ क्षामयित्वातुकौरव्यंरणादुत्तरमागतम् ॥ प्रशशंसततोमत्स्यःशृण्वतःसव्यसाचिनः
६७ त्वयादायादवानस्मिकैकेयीनंदिवर्धन ॥ त्वयामेसदृशःपुत्रोनभूतोनभविष्यति ६८ पदंपदसहस्रेणयश्चरन्नापराध्नुयात् ॥ तेनकर्णेनतेतातकथमासीत्समागमः ६९

६७ दायादवान्पुत्रवान् ६८ पदमिति पदंबाणनिपातस्थानं पदसहस्रेणलक्ष्यसहस्रार्थं हेत्वर्थेतृतीया सहस्रलक्ष्याणिवेद्धुमित्यर्थः चरन्बाणैःप्रचरन्नेकमपिस्थानंनापराध्नुयात् नरिक्तंकु
र्यात् । युगपल्लक्ष्यसहस्रमुद्दिश्यबाणैश्चरन्नेकमपिलक्ष्यंनजह्यादित्यर्थः । पदंपदमितिपाठे सर्वपदंनापराध्नुयात् सहस्रेणचरन्नित्यर्थाविपदसहस्रेणोद्देशेनेतिबोध्यं समागमःसंग्रामः ६९

७० । ७१ । ७२ हृतस्वाःहृतधनाःवणिजइवसीदंतिशूराइतिशेषः ७३ । ७४ अवगाढाःपराभूताः ७५ प्रकाल्यनिर्जित्य ७६ ॥ इतिविराटप०नी०भा० अष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥

मनुष्यलोकेसकलेयस्यतुल्योनविद्यते ॥ तेनभीष्मेणतेतातकथमासीत्समागमः ७० आचार्योवृष्णिवीराणांकौरवाणांचयोद्विजः ॥ सर्वक्षत्रस्यचाचार्यःसर्वशस्त्र
भृतांवरः ॥ तेनद्रोणेनतेतातकथमासीत्समागमः ७१ आचार्यपुत्रोयःशूरःसर्वशस्त्रभृतामपि ॥ अश्वत्थामेतिविख्यातस्तेनासीत्संगरःकथम् ७२ रणेयंप्रेक्ष्यसीदं
तिहृतस्वावणिजोयथा ॥ कृपेणतेनतेतातकथमासीत्समागमः ७३ पर्वतंयोऽभिविध्येतराजपुत्रोमहेषुभिः ॥ दुर्योधनेनतेतातकथमासीत्समागमः ७४ अवगा
ढाद्विषंतोमेसुखोवातोऽभिवातिमां ॥ यस्त्वंधनमथाजैषीःकुरुभिर्ग्रस्तमाहवे ७५ तेषांभयाभिपन्नानांसर्वेषांबलशालिनाम् ॥ नूनंप्रकाल्यतान्सर्वांस्त्वयायुधि
नरर्षभ ॥ आच्छिन्नंगोधनंसर्वंशार्दूलेनामिषंयथा ७६ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिविराटोत्तरसंवादेऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥
उत्तरउवाच ॥ नमयानिर्जितागावोनमयानिर्जिताःपरे ॥ कृतंतत्सकलंतेनदेवपुत्रेणकेनचित् १ सहिभीतंद्रवंतंमांदेवपुत्रोन्यवर्तयत् ॥ सचातिष्ठद्रथोपस्थेवज्रसंह
ननोयुवा २ तेनतानिर्जितागावःकुरवश्चपराजिताः ॥ तस्यतत्कर्मवीरस्यनमयाताततत्कृतम् ३ सहिशारद्वतंद्रोणंद्रोणपुत्रंचषड्रथान् ॥ सूतपुत्रंचभीष्मंचचका
रविमुखाञ्शरैः ४ दुर्योधनंविकर्णंचसनागमिवयूथपम् ॥ प्रभग्नमब्रवीद्भीतंराजपुत्रंमहाबलः ५ नहास्तिनपुरेत्राणंतवपश्यामिकिंचन ॥ व्यायामेनपरीप्स
स्वजीवितंकौरवात्मज ॥ ६ नमोक्ष्यसेपलायंस्त्वंराजन्युद्धेमनःकुरु ॥ पृथिवींभोक्ष्यसेजित्वाहतोवास्वर्गमाप्स्यसि ७ सनिवृत्तोनरव्याघ्रोमुंचन्वज्रनिभा
ञ्शरान् ॥ सचिवैःसंवृतोराजारथेनागइवश्वसन् ८ तंदृष्ट्वारोमहर्षोऽभूदूरुकंपश्चमारिष ॥ सतत्रसिंहसंकाशमनीकंव्यधमच्छरैः ९ तत्प्रणुद्यरथानीकंसिंहसंहन
नोयुवा ॥ कुरूंस्तान्प्रहसन्राजन्संस्थितान्हृतवाससः १० एकेनतेनवीरेणषड्रथाःपरिनिर्जिताः ॥ शार्दूलेनेवमत्तेनयथावनचरामृगाः ११ ॥ विराटउवाच ॥
क्वसवीरोमहाबाहुर्देवपुत्रोमहायशाः ॥ योमेधनमथाजैषीत्कुरुभिर्ग्रस्तमाहवे १२ इच्छामितमहंद्रष्टुमर्चितुंचमहाबलम् ॥ येनमेत्वंचगावश्चरक्षितादेवसूनु
ना १३ ॥ उत्तरउवाच ॥ अंतर्धानंगतस्तत्रदेवपुत्रोमहाबलः ॥ सतुश्वोवापरश्वोवामन्येप्रादुर्भविष्यति १४ ॥ वैशंपायनउवाच ॥ एवमाख्यायमानंतु
च्छन्नंसत्रेणपांडवम् ॥ वसंतंतत्रनाज्ञासीद्विराटोवाहिनीपतिः १५ ततःपार्थोऽभ्यनुज्ञातोविराटेनमहात्मना ॥ प्रददौतानिवासांसिविराटदुहितुःस्वयम् १६
उत्तरातुमहार्हाणिविविधानिनवानिच ॥ प्रतिगृह्याभवत्प्रीतातानिवासांसिभामिनी १७

नमयेति १ । २ । ३ । ४ । ५ व्यायामेननिस्यंदेशांतरसंचारेण । एवेनसदेवपुत्रस्तेषामग्रेऽपिनाशंकरिष्यतीतिसूचितं ६ । ७ । ८ रोमहर्षोऽमूनममेतिशेषः ९ । १०
११ । १२ । १३ । १४ सत्रेणव्याजेन १५ । १६ । १७

मंत्रयित्वेति युधिष्ठिरेयुधिष्ठिरविषये इतिकर्तव्यतांअग्रेकर्तुमिष्टां भद्रासनेराज्ञउपवेशनादिरूपांक्रियामुत्तरेणसहमंत्रयित्वा तथाययामंत्रं तत्तांव्यदधादित्युभयोरन्वयः । हेराजन्जनमेजय
१८ प्रहृष्टाअभूवन्नितिशेषः १९ ॥ इतिविराटपर्वणिनीलकंठीये भारतभावदीपेएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ततइति १ । २ धिष्ण्येषुआयतनेषु ३ । ४ । ५ । ६ अक्षातिवापःअ

मंत्रयित्वातुकौंतेयउत्तरेणमहात्मना ॥ इतिकर्तव्यतांसर्वांराजन्पार्थेयुधिष्ठिरे १८ ततस्तथातद्व्यदधाद्यथावत्पुरुषर्षभ ॥ सहपुत्रेणमत्स्यस्यप्रहृष्टाभरतर्षभाः
१९ ॥ इतिश्रीमहाभारतेविराटपर्वणिगोहरणपर्वणिविराटोत्तरसंवादेएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ समाप्तंगोहरणपर्व ॥ अथवैवाहिकपर्व ॥ वैशंपायन
उवाच ॥ ततस्तृतीयेदिवसेभ्रातरःपंचपांडवाः ॥ स्नाताःशुक्लांबरधराःसमयेचरितव्रताः १ युधिष्ठिरंपुरस्कृत्यसर्वाभरणभूषिताः ॥ द्वारिमत्तायथानागाभ्रा
जमानामहारथाः २ विराटस्यसभांगत्वाभूमिपालासनेष्वथ ॥ निषेदुःपावकप्रख्याःसर्वेधिष्ण्येष्विवाग्नयः ३ तेषुतत्रोपविष्टेषुविराटःपृथिवीपतिः ॥ आजगाम
सभांकर्तुंराजकार्याणिसर्वशः ४ श्रीमतःपांडवान्दृष्ट्वाज्वलतःपावकानिव ॥ मुहूर्तमिवचध्यात्वासरोषःपृथिवीपतिः ५ अथमत्स्योऽब्रवीत्कंकंदेवरूपमिवस्थि
तम् ॥ मरुद्गणैरुपासीनंत्रिदशानामिवेश्वरम् ६ सकिलाक्षातिवापस्त्वंसभास्तारोमयाकृतः ॥ अथराजासनेकस्मादुपविष्टस्त्वलंकृतः ७ ॥ वैशंपायनउवाच ॥
परिहासेप्सयावाक्यंविराटस्यनिशम्यतत् ॥ स्मयमानोऽर्जुनोराजन्निदंवचनमब्रवीत् ८ ॥ अर्जुनउवाच ॥ इंद्रस्यार्धासनंराजन्नयमारोढुमर्हति ॥ ब्रह्मण्यः
श्रुतवांस्त्यागीयज्ञशीलोदृढव्रतः ९ एषविग्रहवान्धर्मएषवीर्यवतांवरः ॥ एषबुद्ध्याऽधिकोलोकेतपसांचपरायणम् १० एषोऽस्त्रंविविधंवेत्तित्रैलोक्येसचराचरे ॥
नचैवान्यःपुमान्वेत्तिनवेत्स्यतिकदाचन ११ नदेवानासुराःकेचिन्नमनुष्यानराक्षसाः ॥ गंधर्वयक्षप्रवराःसकिंनरमहोरगाः १२ दीर्घदर्शीमहातेजाःपौरजानपद
प्रियः ॥ पांडवानामतिरथोयज्ञधर्मपरोवशी १३ महर्षिकल्पोराजर्षिःसर्वलोकेषुविश्रुतः ॥ बलवान्धृतिमान्दक्षःसत्यवादीजितेंद्रियः ॥ धनैश्वसंचयैश्चैवश
क्रवैश्रवणोपमः १४ यथामनुर्महातेजाःलोकानांपरिरक्षिता ॥ एवमेषमहातेजाःप्रजानुग्रहकारकः १५ अयंकुरूणामृषभोधर्मराजोयुधिष्ठिरः ॥ अस्यकीर्तिःस्थि
तालोकेसूर्यस्येवोद्यतःप्रभा १६ संसरंतिदिशःसर्वायशसोऽस्यइवांशवः ॥ उदितस्येवसूर्यस्यतेजसोऽनुगभस्तयः १७ एनंदशसहस्राणिकुंजराणांतरस्विनाम् ॥
अन्वयुःपृष्ठतोराजन्यावदध्यावसत्कुरून् १८ त्रिंशदेवंसहस्राणिरथाःकांचनमालिनः ॥ सदश्वैरुपसंपन्नाःपृष्ठतोऽनुययुस्तदा १९ एनमष्टशताःसूताःसुमृ
ष्टमणिकुंडलाः ॥ अब्रुवन्मागधैःसार्धंपुराशक्रमिवर्षयः २० एनंनित्यमुपासंतकुरवःकिंकरायथा ॥ सर्वेचराजन्राजानोधनेश्वरमिवामराः २१ एषसर्वान्महीपाला
न्करदान्समकारयत् ॥ वैश्यानिवमहाभागोविवशान्स्ववशानपि २२ अष्टाशीतिसहस्राणिस्नातकानांमहात्मनाम् ॥ उपजीवंतिराजानमेनंसुचरितव्रतम् २३ ॥५०॥

क्षान्अतिवपतीतितथा द्यूतकारी ७ परिहासेप्सयासर्निदोषालंभमपेक्ष्य यद्विराटस्यवाक्यंतन्निशम्य ८ । ९ । १० । ११ । १२ । १३ । १४ । १५ । १६ अस्यइवेत्यत्रसंधिरविवक्षितः
उपमेयद्वयस्योपमाद्वयसूचनंएकेनापिइवशब्देनभवति तथाऽप्यत्रस्पष्टार्थंपुनरिवग्रहणम् १७ । १८ । १९ अब्रुवन्अस्तुवन् २० । २१ । २२ । २३

२४ । २५ शीघ्रंतीव्रं २६ । २७ । २८ ॥ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे सप्ततितमोऽध्यायः ॥ ७० ॥ ॥ ७ ॥ ॥ यदिति १ । २ । ३

एषवृद्धाननाथांश्चपंगूनंधांश्चमानवान् ॥ पुत्रवत्पालयामासप्रजाधर्मेणवैविभुः २४ एषधर्मेदमेचैवक्रोधेचापिजितव्रतः ॥ महाप्रसादोब्रह्मण्यःसत्यवादीचपा
र्थिवः २५ शीघ्रंतापेनचैतस्यतप्यतेससुयोधनः ॥ सगणःसहकर्णेनसौबलेनापिवाविभुः २६ नशक्यंतेह्यस्यगुणाःप्रसंख्यातुंनरेश्वर ॥ एषधर्मपरोनित्यमा
नृशंस्यश्चपांडवः २७ एवंयुक्तोमहाराजःपांडवःपार्थिवर्षभः ॥ कथंनार्हतिराजार्हमासनंपृथिवीपते २८ ॥ इतिश्रीमहाभारतेविराटपर्वणिवैवाहिकपर्वणिपांड
वप्रकाशेसप्ततितमोऽध्यायः ॥ ७० ॥ ॥ विराटउवाच ॥ यद्येषराजाकौरव्यःकुंतीपुत्रोयुधिष्ठिरः ॥ कतमोऽस्यार्जुनोभ्राताभीमश्चकतमोबली १ नकुलः
सहदेवोवाद्रौपदीवायशस्विनी ॥ यदाद्यूतजिताःपार्थानप्राज्ञायंततेक्वचित् २ ॥ अर्जुनउवाच ॥ यएषबल्लवोब्रूतेसूदस्तवनराधिप ॥ एषभीमोमहाराजभी
मवेगपराक्रमः ३ एषक्रोधवशान्हत्वापर्वतेगंधमादने ॥ सौगंधिकानिदिव्यानिकृष्णार्थेसमुपाहरत् ४ गंधर्वएषवैहंताकीचकानांदुरात्मनाम् ॥ व्याघ्रानृक्षान्व
राहांश्चहतवान्स्त्रीपुरेतव ५ यश्चासीदश्वबंधस्तेनकुलोऽयंपरंतपः ॥ गोसंख्यःसहदेवश्चमाद्रीपुत्रौमहारथौ ६ शृंगारवेषाभरणौरूपवंतौयशस्विनौ ॥ महारथ
सहस्राणांसमर्थौभरतर्षभौ ७ एषापद्मपलाशाक्षीसुमध्याचारुहासिनी ॥ सैरंध्रीद्रौपदीराजन्यस्यार्थेकीचकाहताः ८ अर्जुनोऽहंमहाराजव्यक्तंतेश्रोत्रमागतः ॥
भीमादवरजःपार्थोयमाभ्यांचापिपूर्वजः ९ उषिताःस्मोमहाराजसुखंतवनिवेशने ॥ अज्ञातवासमुषितागर्भवासइवप्रजाः १० ॥ वैशंपायनउवाच ॥ यदा
ऽर्जुनेनतेवीराःकथिताःपंचपांडवाः ॥ तदाऽर्जुनस्यवैराटिःकथयामासविक्रमम् ११ पुनरेवचतान्पार्थान्दर्शयामासचोत्तरः १२ ॥ उत्तरउवाच ॥ यएषजां
बूनदशुद्धगौरतनुर्महान्सिंहइवप्रवृद्धः ॥ प्रचंडघोणःपृथुदीर्घनेत्रस्ताम्रायताक्षःकुरुराजएषः १३ अयंपुनर्मत्तगजेंद्रगामीप्रतप्तचामीकरशुद्धगौरः ॥ पृथ्वा
यतांसोगुरुदीर्घबाहुर्वृकोदरःपश्यतपश्यतैनम् १४ यस्त्वेवपार्श्वेऽस्यमहाधनुष्मान्श्यामोयुवावारणयूथपोपमः ॥ सिंहोन्नतांसोगजराजगामीपद्मायताक्षोऽर्जु
नएषवीरः १५ राज्ञःसमीपेपुरुषोत्तमौतुयमाविमौविष्णुमहेंद्रकल्पौ ॥ मनुष्यलोकेसकलेसमोऽस्तिययोर्नरूपेनबलेनशीले १६ आभ्यांतुपार्श्वेकनकोत्तमांगीयै
षाप्रभामूर्तिमतीवगौरी ॥ नीलोत्पलाभासुरदेवतेवकृष्णास्थितामूर्तिमतीवलक्ष्मीः १७ ॥ वैशंपायनउवाच ॥ एवंनिवेद्यतान्पार्थान्पांडवान्पंचभूपतेः ॥
ततोऽर्जुनस्यवैराटिःकथयामासविक्रमम् १८ ॥ उत्तरउवाच ॥ अयंसद्विषतांहंतामृगाणामिवकेसरी ॥ अचरद्रथवृंदेषुनिघ्नंस्तांस्तान्वरान्रथान् १९

४ । ५ । ६ । ७ । ८ । ९ । १० । ११ । १२ । प्रचंडघोणःपृथुनासिकः घोणाकंधरेस्यपि १३ । १४ । १५ । १६ । १७ । १८ । १९

२०। २१ अभिपन्नोऽपराधंकृतवान् २२ । २३ । २४ । २५ । २६ । २७ समेत्यपुत्रेणसहसमयंनिश्चयंचकार विससर्जददौ २८ । २९ । ३० । ३१ । ३२ । ३३ औपयिकःउचितः ३४ । ३५
३६ ॥ इतिविराटपर्वणिनीलकंठीयेभारतभावदीपे एकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ किमर्थमिति १ । २ । ३ याशंकामवेत् सास्थानेउचिता अयमहंतेतवदुहितांनिमंत्रयेस्नुषात्वे

अनेनविद्धोमातंगोमहानेकेषुणाहतः ॥ सुवर्णकक्षःसंग्रामेदंताभ्यामगमन्महीं २० अनेनविजितागावोजिताश्चकुरवोयुधि ॥ अस्यशंखप्रणादेनकर्णौमेबधि
रीकृतौ २१ ॥ वैशंपायनउवाच ॥ तस्यतद्वचनंश्रुत्वामत्स्यराजःप्रतापवान् ॥ उत्तरंप्रत्युवाचेदमभिपन्नोयुधिष्ठिरे २२ प्रसादनंपांडवस्यप्राप्तकालंहिरो
चये ॥ उत्तरांचप्रयच्छामिपार्थाययदिमन्यसे २३ ॥ उत्तरउवाच ॥ आर्याःपूज्याश्चमान्याश्चप्राप्तकालंचमेमतम् ॥ पूज्यंतांपूजनार्हाश्चमहाभागाश्चपांड
वाः २४ ॥ विराटउवाच ॥ अहंखल्वपिसंग्रामेशत्रूणांवशमागतः ॥ मोक्षितोभीमसेनेनगावश्चापिजितास्तथा २५ एतेषांबाहुवीर्येणअस्माकंविजयोमृधे ॥
एवंसर्वेसहामात्याःकुंतीपुत्रंयुधिष्ठिरम् ॥ प्रसादयामोभद्रंतेसानुजंपांडवर्षभम् २६ यदस्माभिरजानद्भिःकिंचिदुक्तोनराधिपः ॥ क्षंतुमर्हतितत्सर्वंधर्मात्मा
ह्येषपांडवः २७ ॥ वैशंपायनउवाच ॥ ततोविराटःपरमाभितुष्टःसमेत्यराजासमयंचकार ॥ राज्यंचसर्वंविससर्जतस्मैसदंडकोशंसपुरंमहात्मा २८ पांडवांश्च
ततःसर्वान्मत्स्यराजःप्रतापवान् ॥ धनंजयंपुरस्कृत्यदिष्ट्यादिष्ट्येतिचाब्रवीत् २९ समुपाघ्रायमूर्द्धानंसंश्लिष्यचपुनःपुनः ॥ युधिष्ठिरंचभीमंचमाद्रीपुत्रौ
चपांडवौ ३० नातृप्यद्दर्शनेतेषांविराटोवाहिनीपतिः ॥ सप्रीयमाणोराजानंयुधिष्ठिरमथाब्रवीत् ३१ दिष्ट्याभवंतःसंप्राप्ताःसर्वेकुशलिनोवनात् ॥ दिष्ट्यासं
पालितंकृच्छ्रमज्ञातंवैदुरात्मभिः ३२ इदंचराज्यंपार्थाययच्चान्यदपिकिंचन ॥ प्रतिगृह्णंतुतत्सर्वंपांडवाअविशंकया ३३ उत्तरांप्रतिगृह्णातुसव्यसाचीधनंजयः ॥
अयंह्यौपयिकोभर्तातस्याःपुरुषसत्तमः ३४ एवमुक्तोधर्मराजःपार्थमैक्षद्धनंजयम् ॥ ईक्षितश्चार्जुनोभ्रात्रामत्स्यंवचनमब्रवीत् ३५ प्रतिगृह्णाम्यहंराजन्स्नुषां
दुहितरंतव ॥ युक्तश्चावांहिसंबंधोमत्स्यभारतयोरपि ३६ ॥ इतिश्रीमहाभारतेविराटपर्वणिवैवाहिकपर्वणिउत्तराविवाहप्रस्तावेएकसप्ततितमोऽध्यायः ॥७१॥
विराटउवाच ॥ किमर्थंपांडवश्रेष्ठभार्यांदुहितरंमम ॥ प्रतिग्रहीतुंनेमांत्वंमयादत्तामिहेच्छसि १ ॥ अर्जुनउवाच ॥ अंतःपुरेऽहमुषितःसदापश्यन्सुतांतव ॥
रहस्यंचप्रकाशंचविश्वस्तापितृवन्मयि २ प्रियोबहुमतश्चासंनर्तकोगीतकोविदः ॥ आचार्यवच्चमांनित्यंमन्यतेदुहितातव ३ वयस्थयातयाराजन्सहसंवत्सरो
षितः ॥ अतिशंकाभवेत्स्थानेतवलोकस्यवाविभो ४ तस्मान्निमंत्रयेऽहंतेदुहितांमनुजाधिप ॥ शुद्धोजितेंद्रियोदांतस्तस्याःशुद्धिःकृतामया ५ स्नुषायांदुहितु
र्वापिपुत्रेचात्मनिवापुनः ॥ अत्रशंकांनपश्यामितेनशुद्धिर्भविष्यति ६ अभिशापादहंभीतोमिथ्यावादात्परंतप ॥ स्नुषार्थमुत्तरांराजन्प्रतिगृह्णामितेसुताम् ७ ४१ ॥४१॥

नयाचे । 'दुहितादुर्हितादूरेहिता'इतियास्केननिरुक्तत्वात् वर्णविकारेण दुहिताशब्दआकारांतोऽप्यस्ति ४ एवंचस्नुषात्वेनएनांवरयतोमेब्रह्मचर्यशुद्धिरपिभविष्यतीत्याह शुद्धइति ५ । ६
अभिशापात्भार्यार्थंप्रतिग्रहेऽनयोःप्रागेवसंबंधआसीदितिकल्पयतोलोकस्यदुर्वाक्यभयात् ७

८ । ९ । १० । ११ अन्वशासत्आज्ञापितवान् संयोगंविवाहसंबंधम् ११ प्रेषयामासआह्वानार्थंदूतानितिशेषः १३ उपप्लव्यं विराटनगरसमीपस्थनगरांतरम् १४ । १५

स्वस्रीयोवासुदेवस्यसाक्षाद्देवशिशुर्यथा ॥ दयितश्चक्रहस्तस्यसर्वास्त्रेषुचकोविदः ८ अभिमन्युर्महाबाहुःपुत्रोममविशांपते ॥ जामातातवयुक्तोवैभर्ताचदुहितु
स्तव ९॥ विराटउवाच ॥ उपपन्नंकुरुश्रेष्ठेकुंतीपुत्रेधनंजये ॥ यएवंधर्मनित्यश्चजातज्ञानश्चपांडवः १० यत्कृत्यंमन्यसेपार्थक्रियतांतदनंतरम् ॥ सर्वेकामाःस
मृद्धामेसंबंधीयस्यमेऽर्जुनः ११ ॥ वैशंपायनउवाच ॥ एवंब्रुवतिराजेंद्रेकुंतीपुत्रोयुधिष्ठिरः ॥ अन्वशासत्ससंयोगंसमयेमत्स्यपार्थयोः १२ ततोमित्रेषुसर्वेषु
वासुदेवेचभारत ॥ प्रेषयामासकौंतेयोविराटश्चमहीपतिः १३ ततस्त्रयोदशेवर्षेनिवृत्तेपंचपांडवाः ॥ उपप्लव्यंविराटस्यसमपद्यंतसर्वशः १४ अभिमन्युंचबी
भत्सुरानिनायजनार्दनम् ॥ आनर्तेभ्योऽपिदाशार्हानानयामासपांडवः १५ काशिराजश्चशैब्यश्चप्रीयमाणौयुधिष्ठिरे ॥ अक्षौहिणीभ्यांसहितावागतौपृथिवी
पती १६ अक्षौहिण्याचसहितोयज्ञसेनोमहाबलः ॥ द्रौपद्याश्चसुतावीराःशिखंडीचापराजितः १७ धृष्टद्युम्नश्चदुर्धर्षःसर्वशस्त्रभृतांवरः ॥ समस्ताक्षौहिणी
पालायज्वानोभूरिदक्षिणाः ॥ वेदावभृथसंपन्नाःसर्वेशूरास्तनुत्यजः १८ तानागतानभिप्रेक्ष्यमत्स्योधर्मभृतांवरः ॥ पूजयामासविधिवत्सभृत्यबलवाहनान्
१९ प्रीतोऽभवद्दुहितरंदत्वातामभिमन्यवे ॥ ततःप्रत्युपयातेषुपार्थिवेषुततस्ततः २० तत्रागमद्वासुदेवोवनमालीहलायुधः ॥ कृतवर्माचहार्दिक्योयुयुधा
नश्चसात्यकिः २१ अनाधृष्टिस्तथाऽक्रूरःसांबोनिशठएवच ॥ अभिमन्युमुपादायसहमात्रापरंतपाः २२ इंद्रसेनादयश्चैवरथैस्तैःसुसमाहितैः ॥ आययुःस
हिताःसर्वेपरिसंवत्सरोषिताः २३ दशनागसहस्राणिहयानांचदशायुतम् ॥ रथानामर्बुदंपूर्णंनिखर्वंचपदातिनाम् २४ वृष्ण्यंधकाश्चबहवोभोजाश्चपरमौज
सः ॥ अन्वयुर्वृष्णिशार्दूलंवासुदेवंमहाद्युतिम् २५ पारिबर्हंददौकृष्णःपांडवानांमहात्मनाम् ॥ स्त्रियोरत्नानिवासांसिपृथक्पृथगनेकशः ॥ ततोविवाहोविधि
वद्ववृधेमत्स्यपार्थयोः २६ ततःशंखाश्चभेर्यश्चगोमुखाडंबरास्तथा ॥ पार्थैःसंयुज्यमानस्यनेदुर्मत्स्यस्यवेश्मनि २७ उच्चावचान्मृगाञ्जघ्नुर्मेध्यांश्चशतशःप
शून् ॥ सुरामैरेयपानानिप्रभूतान्यभ्यहारयन् २८ गायनाख्यानशीलाश्चनटवैतालिकास्तथा ॥ स्तुवंतस्तानुपातिष्ठन्सूताश्चसहमागधैः २९ सुदेष्णां
चपुरस्कृत्यमत्स्यानांचवरस्त्रियः ॥ आजग्मुश्चारुसर्वांग्यःसुमृष्टमणिकुंडलाः ३०

१६ । १७ वेदाध्ययनसंपन्नाइत्यपिपाठः १८ । १९ । २० । २१ । २२ । २३ । २४ । २५ । २६ । २७ सुरानानाद्रव्यसाररूपं मद्यंमैरेयंदक्षरसरूपंमद्यम् २८ । २९ । ३०

अभ्यभवन्नभिभूताः ३१ । ३२ । ३३ । ३४ । ३५ । ३६ आत्मानमेवच प्रादादितिपूर्वेणान्वयः ३७ । ३८ । ३९ । ४० ॥ इतिश्रीमत्पदवाक्यप्रमाणमर्यादा
धुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकंठस्यकृतौ भारतभावदीपे विराटपर्वार्थप्रकाशे द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

वर्णोपपन्नास्तानार्योरूपवत्यःस्वलंकृताः ॥ सर्वाश्चाभ्यभवन्कृष्णारूपेणयशसाश्रिया ३१ परिवार्योत्तरांतास्तुराजपुत्रीमलंकृताम् ॥ सुतामिवमहेंद्रस्यपुरस्कृत्योपतस्थिरे ३२ तांप्रत्यगृह्णात्कौंतेयःसुतस्यार्थेधनंजयः ॥ सौभद्रस्यानवद्यांगींविराटतनयांतदा ३३ तत्रातिष्ठन्महाराजोरूपमिंद्रस्यधारयन् ॥ स्नुषांतांप्रतिजग्राहकुंतीपुत्रोयुधिष्ठिरः ३४ प्रतिगृह्यचतांपार्थःपुरस्कृत्यजनार्दनम् ॥ विवाहंकारयामाससौभद्रस्यमहात्मनः ३५ तस्मैसप्तसहस्राणिहयानांवातरंहसाम् ॥ द्वेचनागशतेमुख्येप्रादाद्बहुधनंतदा ३६ हुत्वासम्यक्समिद्धाग्निमर्चयित्वाद्विजन्मनः ॥ राज्यंबलंचकोशंचसर्वमात्मानमेवच ३७ कृतेविवाहेतुतदाधर्मपुत्रोयुधिष्ठिरः ॥ ब्राह्मणेभ्योददौवित्तंयदुपाहरदच्युतः ३८ गोसहस्राणिरत्नानिवस्त्राणिविविधानिच ॥ भूषणानिचमुख्यानियानानिशयनानिच ३९ भोजनानिचहृद्यानिपानानिविविधानिच ॥ तन्महोत्सवसंकाशंहृष्टपुष्टजनायुतम् ॥ नगरंमत्स्यराजस्यशुशुभेभरतर्षभ ४० ॥ इतिश्रीमन्महाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यां विराटपर्वणिवैवाहिकपर्वणिउत्तराविवाहे द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ ७ ॥ ॥ समाप्तंचेदंविराटपर्व ॥ अतःपरमुद्योगपर्व ॥ तस्यायमाद्यःश्लोकः ॥ वैशंपायनउवाच ॥ कृत्वाविवाहंतुकुरुप्रवीरास्तदाभिमन्योर्मुदिताःस्वपक्षाः ॥ विश्रम्यरात्रावुषसिप्रतीताःसभांविराटस्यततोऽभिजग्मुः ॥ १ ॥ श्रुत्वावैराटकंपर्ववासांसिविविधानिच ॥ हिरण्यंधान्यंगावश्वदद्याद्वित्तानुसारतः ॥ १ ॥ प्रीतयेदेवतानांवैदद्याद्वैद्विजमुख्यके ॥ वाचकेतुसुसंतुष्टेतुष्टाःस्युःसर्वदेवताः ॥ २ ॥ ब्राह्मणान्भोजयेच्छक्त्यापायसैःसार्पिषासितैः ॥ एवंश्रुतेचवैराटेसम्यक्फलमवाप्नुयात् ॥ ३ ॥ ॥ ७ ॥
अस्मिपर्वणिवृत्तांताः ॥ अज्ञातवासमंत्रः । धौम्यवाक्यं । आयुधन्यासः । विराटनगरेप्रवेशः । जीमूतवधः । कीचकवधः । दक्षिणगोग्रहः । उत्तरगोग्रहः ।
अभिमन्युविवाहश्च ॥

॥ अत्र विराटपर्वण्यध्यायानां श्लोकानां च व्यासोक्तसंख्याधिकसंख्या दृश्यते लिपिकरप्रमादात् कुत्रकुत्राधिक्यं जातं तन्निश्चयो न भवतीति ॥

॥ इति श्रीमहाभारते विराटपर्व समाप्तम् ॥

See pt. I

Cat.
V.R. 31/3/76